Śāntarakṣita and Kamalaśīla

Tattvasaṅgraha

— Tattvasaṅgrahapañjikā

SARIT

SARIT

Contents

Contents i

I श्रीः। तत्त्वसङ्ग्रहः। पञ्जिकासमेतः। ३

II तत्त्वसंग्रहस्य प्रथमो भागः। ७
०.१ Introductory verses (१-६) ९
०.२ प्रकृतिपरीक्षा। २१
०.३ ईश्वरपरीक्षा। ४४
०.४ उभयपरीक्षा। ६३
०.५ स्वाभाविकवादपरीक्षा। ६८
०.६ शब्दब्रह्मपरीक्षा। ७४
०.७ पुरुषपरीक्षा। ८४
०.८ आत्मपरीक्षा। ८९
०.९ स्थिरभावपरीक्षा। १४८
०.१० कर्मफलसंबन्धपरीक्षा॥ १८९
०.११ द्रव्यपदार्थपरीक्षा। २१२
०.१२ गुणपदार्थपरीक्षा। २४०
०.१३ कर्मपदार्थपरीक्षा। २६३
०.१४ सामान्यपरीक्षा। २६८
०.१५ विशेषपरीक्षा। २९९
०.१६ समवायपदार्थपरीक्षा। ३०२
०.१७ शब्दार्थपरीक्षा। ३१४
०.१८ प्रत्यक्षलक्षणपरीक्षा। ४२२
०.१९ अनुमानपरीक्षा। ४६७
०.२० प्रमाणान्तरपरीक्षा। ५०२
०.२१ स्याद्वादपरीक्षा। ५६७
०.२२ त्रैकाल्यपरीक्षा। ५८८
०.२३ लोकायतपरीक्षा। ६०७
०.२४ बहिरर्थपरीक्षा। ६४३

III तत्त्वसंग्रहस्य द्वितीयो भागः। ६८३
०.२५ श्रुतिपरीक्षा। ६८५

०.२६ स्वतःप्रामाण्यपरीक्षा। ८८५
०.२७ अतीन्द्रियदर्शिपुरुषपरीक्षा। ९७३

The TEI Header ११२३

Abbreviations **1124**

References **1124**

001/k

Part I

[

श्रीः। तत्त्वसङ्ग्रहः। पञ्जिकासमेतः।]श्रीः। तत्त्वसङ्ग्रहः। पञ्जिकासमेतः।

Part II

तत्त्वसंग्रहस्य प्रथमो भागः।

०.१ Introductory verses (१-६)

प्रकृतीशोभयात्मादिव्यापाररहितं चलम्।
कर्म-तत्फलसंबन्धव्यवस्थादिसमाश्रयम्॥ १॥ § 2

गुणद्रव्यक्रियाजातिसमवायाद्युपाधिभिः।
शून्यमारोपिताकारशब्दप्रत्ययगोचरम्॥ २॥ § 4

स्पष्टलक्षणसंयुक्तप्रमाद्वितयनिश्चितम्।
अणीयसाऽपि नांशेन मिश्रीभूतापरात्मकम्॥ ३॥ § 6

असंक्रान्तिमनाद्यन्तं प्रतिबिम्बादिसन्निभम्।
सर्वप्रपञ्चसन्दोहनिर्मुक्तमगतं परैः॥ ४॥ § 8

स्वतन्त्रश्रुतिनिस्संगो जगद्धितविधित्सया।
अनल्पकल्पासङ्ख्येयसात्मीभूतमहादयः॥ ५॥ § 10

यः प्रतीत्यसमुत्पादं जगाद गदतांवरः।
तं सर्वज्ञं प्रणम्यायं क्रियते तत्त्वसंग्रहः॥ ६॥ § 12

(पञ्जिका)

ज्ञेयाम्भोनिधिमन्थनादधिगतैस्तत्त्वामृतैर्यो जगज्जातिव्याधिजरादिदुःखशमनैः कारुण्यतोऽतर्पयत्। तस्मै तत्त्वविदांवराय जगतः शास्त्रे प्रणम्यादरात्तत्त्वानामिह सङ्ग्रहे स्फुटतरा प्रारभ्यते पञ्जिका॥ १॥ § 13

वक्तुं वस्तु न मादृशा जडधियोऽपूर्वं कदाऽपि क्षमाः क्षुण्णो वा बहुधा बुधैरहरहः कोऽसौ न पन्थाः क्वचित्। किन्तु स्वार्थपरस्य मे मतिरियं पुण्योदयाकाङ्क्षिणःतत्त्वाभ्यासमिमं शुभोदयफलं कर्त्तुं समभ्युद्यता॥ २॥ § 14

002/k

इह हि शास्त्रे प्रेक्षावतामभिधेयप्रयोजनावसायपूर्विका प्रवृत्तिर्महत्सु च प्रसादः सर्वश्रेयोऽधिगतेः कारणं प्रथममित्यालोच्य भगवति प्रसादोत्पादनार्थं

शास्त्रे चास्मिन्नादरेण श्रोतुः प्रवृत्त्यर्थं स्वशास्तृपूजाविधिपूर्वकमस्य शास्त्रस्य प्रकृतीत्यादिभिः श्लोकैस्तत्त्वसङ्ग्रह इत्येतत्पर्यन्तैरभिधेयप्रयोजने प्राह॥ § 15

तथाहि—यद्यभिधेयमस्य न कथ्येत तदोन्मत्तादिवाक्यवदानर्थक्यं सम्भावयन् प्रेक्षावान्न प्रवर्त्तेतापि श्रोतुमित्यभिधेयमस्यावश्यवचनीयम्। तथा सत्यभिधेये काकदन्तादिपरीक्षाशास्त्रवदभिमतप्रयोजनरहितं शास्त्रं प्रेक्षावन्तः श्रोतुमपि नाद्रियन्त इति ततस्तत्प्रवृत्त्यर्थमादौ प्रयोजनमभिधानीयम्। प्राधान्येन तु प्रयोजनमेव प्रवृत्त्यङ्गम्। तदर्थितयैव शास्त्रेषु श्रोतृजनस्य प्रवृत्तेः। तच्चाभिधेयशून्येन शास्त्रेणाशक्यं सम्पादयितुमिति शास्त्रस्य प्रयोजनोपायतासंदर्शनार्थमभिधेयकथनम्। तच्च प्रयोजनमनुगुणोपायमुपदर्शनीयं न पुनरशक्यतत्साधनानुष्ठानम्। अन्यथा विषहरतक्षकचूडारत्नालङ्कारोपदेशशास्त्रवत्सत्यपि प्रयोजने तत्साधनानुष्ठानाशक्यतां मत्वा न प्रवर्त्तेत प्रेक्षावान्। अत एवोक्तम्— संबद्धानुगुणोपायं पुरुषार्थाभिधायकम्। परीक्षाऽविकृतं वाक्यमतो न विकृतं परम्॥ इति। तस्माच्छास्त्रेषु प्रवृत्त्यर्थमभिधेयादिकथनम्॥ § 16

ननु प्रेक्षावतां प्रवृत्तिर्निश्चयादेव। निश्चयश्च प्रमाणादेव। न चास्य प्रयोजनवाक्यस्यात्राभिधेयादौ बाह्येऽर्थे प्रामाण्यमस्ति। तत्रास्य प्रतिबन्धाभावात्। तथा हि—नतावत्तादात्म्यलक्षणः प्रतिबन्धो(द्धो ?)ऽत्यन्तभेदात्। नापि तदुत्पत्तिलक्षण इच्छामात्रप्रतिबद्धत्वाद्वाक्यस्य। न चाप्रतिबद्धाद्वाक्याज्जिज्ञासितेऽर्थे ज्ञानमुत्पद्यमानं प्रमाणं युक्तमतिप्रसङ्गात्। विवक्षायां च यद्यपि प्रामाण्यं वाक्यस्य। तथापि न तत्प्रेक्षावतः प्रवृत्त्यङ्गम्। नहि ये यथा विवक्षन्ति ते तथैवानुष्ठानकाले कुर्वन्ति विसंवादना(द)भिप्रायस्य। अन्यथा प्रतिज्ञायाऽप्यन्यथा शास्त्ररचनासम्भवात्॥ अपि च यः प्रमाणान्तरादधिगतशास्त्रप्रयोजनस्तं प्रति प्रयोजनवाक्योपन्यासोऽनर्थक एव। तस्य प्रमाणान्तरादेव प्रवृत्तत्वात्॥ यश्चापि प्रमाणान्तरेण बाधितशास्त्रप्रयोजनस्तं प्रति सुतरामनर्थक एव,तस्य प्रमाणान्तरेण बाधितत्वादेव प्रवृत्त्यसम्भवात्। एतच्च द्वयमभ्युपगम्योच्यते। न तु किंचिदर्वाग्दृशां प्राक्प्रवृत्तेः प्रयोजनादिसाधकं तद्बाधकं वा प्रमाणमस्ति। येनामी तत्सदसत्तामवगच्छेयुः। तस्याः प्रवृत्तिसमधिगम्यत्वात्। 003/k किं तु योऽनधिगत शास्त्रप्रयोजनादिस्तं प्रति वाक्यमिदमारभ्यते। तस्य च प्रेक्षावतः संशय एव वाक्यतोऽस्मादुपजायते न निश्चयोऽप्रमाणत्वात्। स च संशयः प्रागपि वाक्योपन्यासादस्तीति व्यर्थः प्रयोजनादिवाक्योपन्यासः॥ § 17

तदत्राभिधीयते। यत्तावदुक्तं निश्चयेनैव प्रेक्षावतां प्रवृत्तिरिति तदसत्। संशयेनापि प्रवृत्तिदर्शनात्। यथा कृषीवलादीनाम्। स्यादेतद्यद्यपि कृषीवलादेर्भाविनि फले संशयस्तथापि तत्फलसाधननिश्चयस्तेषां विद्यत एव। तेन निश्चयपूर्विकैव तेषां प्रवृत्तिरिति। तदसम्यक्। यदर्थं हि यस्य प्रवृत्तिः सा तत्संशयेऽपि तस्य भवतीत्येतावदिह प्रकृतम्। न च कृषीवलादयः साधनार्थं

१७ ऽत्यन्तभेदात्] Correction : ; त्पन्नभेदात् (sic !)ऽत्यन्तभेदात्

तेषु प्रवर्त्तन्ते येन साधनविषयनिश्चयसद्भावान्निश्चयपूर्विका प्रवृत्तिरेषामुपवर्ण्यते। किं तर्हि। फलार्थं ते तत्र प्रवर्त्तन्ते। तत्र च फले प्रतिबन्धादिसम्भवान्न निश्चयोऽस्तीत्यतः संशयपूर्विकैव तेषां प्रवृत्तिः। याऽपि चाऽऽद्यायां प्रवृत्तौ साधननिश्चयार्था प्रवृत्तिरेषाम्। तत्रापि न साधननिश्चयः। तदर्थत्वादेव प्रवृत्तेः। अपिच—साधननिश्चयोऽपि तेषां भाविफलापेक्षयाभवन्नवश्यमेतदनागतमेवंविध फलं साधयिष्यतीत्येवंरूपो भवेत्, यद्वा प्रतिबन्धकसहकारिवैकल्ययोरसम्भवे सत्यवश्यमभिमतफलसम्पादनायालमेतदित्येवंरूपः। न तत्र तावदाद्यो युक्तरूपः सम्भवत्सहकारिवैकल्यप्रतिबन्धकोपनिपातस्य कस्यचिदुपलब्धतथाविधफलस्यापि शाल्यादेरनागतफलं प्रत्यसाधनत्वदर्शनेन सर्वत्राऽऽशङ्काया अव्यावृत्तेर्यदाह— सामग्रीफलशक्तीनां परिणामानुबन्धिनि। अनैकान्तिकता कार्ये प्रतिबन्धादिसम्भवात्॥ इति। अथ द्वितीयस्तदा युक्ततरमेतत्। एवंरूपत्वादेव सर्वस्याः प्रमाणपूर्विकायाः प्रवृत्तेः। अत एव चाचार्यास्तत्र योग्यतानुमानेन विशेषणं विदधति। असति प्रतिबन्धे योग्यमेतदिति। किं तु फलमप्यनेन रूपेण निश्चितमेवेति न साधनस्यैव निश्चयः। न चाप्येवंप्रवृत्तौ परमार्थतः फलनिश्चयपूर्विका प्रवृत्तिः सिद्ध्यति।प्रतिबन्धाद्यसत्त्वस्यैवापरदर्शनैर्निश्चेतुमशक्यत्वात्॥ § 18

स्यादेतत्—यद्यपि परमार्थतः प्रतिबन्धाभावो निश्चेतुमशक्यस्तथापि यदि प्रतिबन्धो न स्यात्, तदावश्यमस्मात् फलप्राप्तिर्नियमेनेत्येवंविधो निश्चयः प्रमाणपूर्विकायां प्रवृत्तौ विद्यत एव, नत्वप्रमाणपूर्विकायामन्यथा प्रमाणाप्रमाणपूर्विकयोः प्रवृत्त्योर्विशेषो न स्यात्; स च तथाविधोऽपि निश्चयो वाक्यान्न सम्भवत्येवः, बाह्येऽर्थे तत्र तस्याप्रतिबन्धेनाप्रमाणत्वादिति। सत्यमेवैतत्। किं तु—यदि वाक्यान्न कस्यचित्प्रे क्षावतः प्रवृत्तिरस्तीत्येतत्सिद्धं भवेत्त- 004/k दा सर्वमेवैतत्स्यात्; यावता दृश्यन्ते हि केचिदप्रत्यक्षफलानां केषांचित्प्रवृत्तिनिवृत्त्योर्महाशंसापायश्रवणादनाश्रित्यागमप्रामाण्यमासितुमशक्नुवन्तो वचनात्प्रवर्त्तमानाः। न चैतावता तेषां प्रेक्षावत्ताहानिः, अभ्युपायेनैव प्रवृत्तेः; न ह्यागमादृतेऽत्यन्तपरोक्षार्थविषये प्रवृत्तावन्योऽभ्युपायोऽस्ति। अवश्यं च प्रवर्त्तितव्यं त्वागमात्। व्याहतागमपरिग्रहं हि कुर्वाणा अप्रेक्षापूर्वकारिणः स्युः।अव्याहतागमसमाश्रयेण तु प्रवृत्तौ कथं न प्रेक्षावन्तो भवेयुस्तस्यैव सम्यगुपायत्वात्। न चागमस्य पुरुषातिशयप्रणीततया यथार्थत्वमवधार्य तत्र निश्चयादेव प्रवर्त्तन्त इति युक्तं वक्तुम्। पुरुषातिशयस्यैवापरदर्शनैर्निश्चेतुमशक्यत्वात्। न चागमान्न प्रवर्त्तन्ते प्रेक्षावन्तोऽपि। तद्वदिहापि। अव्याहतप्रयोजनादिवाक्यश्रवणाच्छास्त्रेषु प्रवर्त्तमानाः प्रेक्षापूर्वकारिणो भविष्यन्ति। उपायेनैव प्रवृत्तेः। न ह्यत्रापि प्रवृत्तावभ्युपायान्तरमस्ति। शास्त्रार्थस्य प्राक् प्रवृत्तेरत्यन्तपरोक्षत्वात्॥ § 19

यच्चाप्युक्तं विवक्षायां यद्यपि प्रामाण्यमित्यादि। तदप्यसारम्, यतो यथाविवक्षितमप्यर्थं शास्त्रेण परिसमापयन्त उपलभ्यन्ते; तद्वदिहापि कदाचिद्यथा प्रतिज्ञातार्थपरिसमाप्तिर्भविष्यतीति मत्वा प्रेक्षावतः प्रवृत्तिः केन वा-

र्येत। न चाप्यसम्भवाशङ्कया निवृत्तिर्युक्ता; अर्थसंशयेनापि प्रवृत्तेः। अन्यथा प्रमाणपूर्विकायामपि प्रवृत्तौ फलासम्भवाशङ्कायाः सम्भवात्क्वचिदपि प्रवृत्तिर्न स्यात्। नाप्यनर्थावाप्तिशङ्का, शास्त्रादनिष्टफलावाप्त्यसम्भवात्। न चाप्यभिमतफलाप्राप्तिसम्भावनालक्षणानर्थावाप्तिशङ्केति युक्तं वक्तुं, तस्याः सर्वत्र प्रवृत्तौ तुल्यत्वात्॥ § 20

यच्चोक्तं योऽनधिगतशास्त्रप्रयोजनस्तं प्रति वाक्यमिदमारभ्यत इति। वयमप्येवं ब्रूमः। किं तु—यद्यपि प्रयोजनवाक्योपन्यासात्प्राक्तस्य संशयोऽस्ति। स तु प्रयोजनसामान्ये, किमिदं प्रयोजनवदाहोस्विन्नेति। न च प्रयोजनमात्रसन्देहात्प्रवृत्तिर्युक्ता, सर्वत्रैव प्रवृत्तिप्रसङ्गात्। प्रयोजनमात्रस्य चानर्थितत्वात्। किं तु प्रतिनियतसाधनोपादानहेतोः प्रयोजनविशेषविषयात्संशयात्प्रवृत्तिर्दृश्यते। क्वचिदेव साधनेऽर्थिनां प्रवृत्तेः प्रयोजनविशेषस्य चाकाङ्क्षितत्वात्। न चान्यः प्रयोजनवाक्यात्प्राक् प्रयोजनविशेषविषयसंशयोत्पत्तिहेतुः कश्चिदस्ति येन शास्त्रान्तरपरिहारेण प्रतिनियतशास्त्रपरिग्रहं कुर्वीत॥ § 21

005/k

ननुप्रयोजनविशेषार्थितैव पुंसः प्रयोजनविशेषसंशयोत्पत्तिहेतुः प्राग्विद्यत एव।तथाहि प्रयोजनविशेषाकाङ्क्षापरिगतमनसः प्रथमतरमेवं भवत्येव, किमिदमस्मदधिगतप्रयोजनेन सप्रयोजनम् ? आहोस्विदन्येन ? किं वा निष्प्रयोजनमिति; तत्साधकबाधकप्रमाणाभावे तस्य न्यायप्राप्तत्वात्। प्रयोजनविशेषप्रतिपादकशास्त्रान्तरोपलब्धेश्च। अतो भवत्येव प्रागपि प्रयोजनविशेषविषयसंशय इति व्यर्थः प्रयोजनवाक्योपन्यासः। नैतदस्ति। यद्यपि प्रयोजनविशेषार्थितापि संशयविशेषहेतुर्भवति। तथापि न सा सर्वेषां संमुखीभवति। अव्युत्पन्नपुरुषार्थानां मूढधियां केषांचिदसंमुखीभावात्। तथाहि—मोक्षः परमपुरुषार्थतया सिद्धः, अथ च सन्ति केचिदव्युत्पन्ना ये तमपि परमपुरुषार्थं पुरुषार्थतया न जानन्ति। प्राग्ये न तं प्रार्थयिष्यन्ते ते। न वा संमुखीभूता प्रयोजनविशेषाकाङ्क्षा प्रयोजनविशेषविषयसन्देहोत्पत्तिहेतुर्युक्ता, कारणसत्ताधीनत्वात्कार्याणाम्। यदि नाम सा केषांचिदपि संमुखीभवति, तथाप्यसौ साधनान्तरपरित्यागेन प्रतिनियतसाधनोपादानहेतोः संशयविशेषस्य हेतुर्नभवति; सर्वत्र साधकबाधकप्रमाणाभावेन तस्यास्तद्धेतुत्वेन न्यायप्राप्तत्वात्। न चैतावन्मात्रेण प्रवृत्तिर्युक्ता। सर्वत्र प्रवृत्तिप्रसङ्गात्। न च शक्यं केनचित्सर्वत्र प्रवर्त्तितुमित्यतः फलविशेषार्थिनोऽपि प्रतिनियतसाधनपरिग्रहनिबन्धनाभावादुदासीरन्।तस्मात्प्रतिनियतसाधनपरिग्रहहेतुप्रयोजनविशेषविषयसंशयोत्पादनायात्यन्तपरोक्षार्थविषयागमप्रणयनवत् फलविशेषार्थिना प्रतिनियतसाधनपरिग्रहायाभिधानीयमेव प्रयोजनवाक्यम्। तथा हि तेनास्यैव शास्त्रस्यार्थविशेष उपदर्श्यते नान्यस्य। अतोऽनेन प्रतिनियतसाधनसाध्यफलविशेषविषयः संशयो जन्यते। स च श्रोता कदाचिन्ममायमर्थविशेषो निष्पत्स्यत इति प्रयोजनवाक्योप-

जनितात् प्रयोजनविशेषविषयादत्यन्तपरोक्षार्थविषयागमोपजनितादिव संशयात्प्रवर्त्ततापीत्यतः प्रयोजनवाक्योपन्यासः॥ § 22

अवश्यं चैतदेवं विज्ञेयम्, अन्यथाऽत्यन्तपरोक्षार्थविषयागमप्रणयनमपि व्यर्थं स्यात्; प्रागप्यागमप्रणयनाद्दानादिषु फलविशेषार्थिनां साधकबाधकप्रमाणाभावेन तत्संशयस्य विद्यमानत्वात्। किं त्वसावव्युत्पन्नस्वर्गादिफलानां नैवोत्पद्यते। तत्कारणभूतायाः फलविशेषार्थिताया असंमुखीभावात्। येषां चोपजायते तेषामपि सर्वत्रोपलादिभक्षणेऽपि प्रवृत्तिहेतुतया साधारणत्वादुपलादिभक्षणपरिहारेण (न) प्रतिनियतदानादिपरिग्रहहेतुर्भवतीति मत्वा तदर्थमागमप्रणेतृभिरागमः प्रणीयते तद्वत्प्रयो जनवाक्यमपि शास्त्रकारैरित्यचोद्यमेतत्। 006/k न चापि जिज्ञासितप्रयोजनविशेषप्रतिपादकंशास्त्रान्तरमुपलब्धम्, येन तदुपलब्धिबलादभिमतप्रयोजनविशेषविषयः सन्देहो भवेत्। न ह्यभिमतप्रयोजनविशेषसाधने शास्त्रान्तरे सम्भवति कश्चित्प्रेक्षावान् परं शास्त्रान्तरमारभते। प्रेक्षावत्त्वहानिप्रसङ्गात्। अतो न शास्त्रान्तरोपलब्धिरपि विवक्षितप्रयोजनविशेषसन्देहहेतुर्भवति। तस्माच्छ्रोतृजनप्रवृत्त्यर्थः प्रयोजनादिवाक्योपन्यास इति स्थितम्॥ § 23

यस्तु मन्यते न श्रोतृजनप्रवृत्त्यर्थं प्रयोजनादिकथनम्, ततः संशयोत्पत्तेः; संशयेन तु प्रेक्षावतः प्रवृत्त्यसम्भवात्। किंतु यत्प्रयोजनरहितमनर्थकं वा तन्नारब्धव्यम्, यथा काकदन्तपरीक्षोन्मत्तादिवाक्यम्; प्रयोजनरहितं चेदं शास्त्रमतो न श्रोतुं कर्त्तुं वा प्रारब्धव्यमित्येवं व्यापकानुपलब्ध्या यः प्रत्यवतिष्ठते तस्य हेतोरसिद्धतोद्भावनार्थमादौ प्रयोजनादिवाक्योपन्यास इति। तदसम्यगिव लक्ष्यते। संशयेनापि प्रवृत्तेः प्रसाधितत्वात्। असिद्धतोद्भावनस्य च वैयर्थ्यात्। एवं हि तदर्थवद्भवेत्। यदि तस्य परस्यातो वाक्यात्प्रवृत्तिर्भवेत्। यावतोद्भावितायामप्यनेन वाक्येनासिद्धतायां नातो वाक्यात्प्रेक्षावतो यथोक्तव्यापकात्तत्त्वनिश्चयः समुत्पद्यते येनासौ प्रवर्त्तितो भवेत्। पूर्ववद्वाक्यस्यास्याप्रमाणत्वात्। संशयेन च प्रेक्षापूर्वकारिणो भवन्मतेन प्रवृत्त्यसम्भवात्। अतो विफलमेवासिद्धतोद्भावनम्। नापि कश्चित्प्रेक्षावानविदितशास्त्रशरीरोऽकस्माद्व्यापकाभावं निश्चित्यानेन प्रत्यवतिष्ठते। नापि तत्प्रत्यवस्थानात् स्वयं विदितशास्त्रप्रयोजनोऽपि शास्त्रकृन्नारभेत कर्तुं श्रोता वा प्रेक्षापूर्वकारीनिर्निबन्धनाद्वाक्यान्निवर्त्तते येन तयोः प्रवृत्त्यर्थमसिद्धतोद्भावनं स्यात्। अथापि स्याद्योऽप्रेक्षापूर्वकारी सोऽनिबन्धनमकस्मादपि यथोक्तव्यापकाभावं गृह्णीयात्। परैश्च ग्राहयेदपि, अतस्तं प्रत्यसिद्धतोद्भावनं क्रियत इत्येतदप्ययुक्तम्॥ § 24

यदि तत्तेषां प्रवृत्त्यङ्गं शास्त्रेषु न भवति, तदा विफलमेव तं प्रत्यसिद्धतोद्भावनम्; अन्यथा ह्यतिप्रसङ्गः स्यात्। सन्ति हि बहुतरा असम्बद्धप्रलापिनः केचित्, तेषामप्ययुक्ताभिधायित्वप्रतिपादनाय बहुतरं शास्त्रप्रवृत्तावनुपयुज्यमानकमपि वक्तव्यमापद्येत। तस्मादवश्यमेव हेत्वसिद्धतोद्भावनं शास्त्रारम्भे माभूद्विफलमतिप्रसङ्गो वेति श्रोतृजनप्रवृत्तिफलमेव वर्णनीय-

म्। ततश्च योऽपि व्यापकानुपलब्ध्या न प्रत्यवतिष्ठेत न चाश्रुत्वा प्रयोजनं
007/k प्रवर्त्तेत तं प्रत्यपि सार्थकमेव किं न भवेत्। यथा वि भक्तं प्राक्।
तस्मान्न श्रो(तस्मात् श्रो ?)तृजनप्रवृत्त्यर्थमेवाभिधेयादिकथनमिति स्थित-
म्। न तु पुनः स्वार्थम्, ततः स्वयमप्रवृत्तेरन्यथोन्मत्तकप्रलापवदसम्बद्ध-
मेव स्यात्। यत्पुनरुक्तमाचार्येण न्यायविन्दौ— स्वयमप्येवं प्रतिपत्तिर्भव-
तीति स्वार्थानुमानेऽप्यस्याः प्रयोग इति, न तद्बहिर्भूतं प्रयोगमधिकृत्य।
किं तर्हि अन्तर्जल्पात्मकमेव। स्वार्थानुमानस्य ज्ञानात्मकत्वात्। यच्च प्रायः
प्राकृतशक्ती त्यादिकमुक्तं। तदपि वक्रोक्त्या परेषामीर्ष्यादिमलोपहतचेतसां
भाजनीकरणार्थमित्यलं बहुना॥ § 25

शास्तृपूजाविधानं तु भगवति सर्वश्रेयोधिगतिहेतोः प्रसादस्योत्पादनार्थम्।
तथाहि गुणगणाख्यानविधिनाऽमुना भगवतो माहात्म्यमुद्भाव्यते। तदुपश्रुत्य
च श्रद्धानुसारिमनसां तावदसंशयं भगवति झगिति चित्तप्रसादः समुदेति।
येऽपि प्रज्ञानुसारिणस्तेऽपि तथाविधेषु बाधमपश्यन्तः प्रज्ञादीनां च गुणानाम-
भ्यासात्प्रकर्षमवगच्छन्तोवक्ष्यमाणादप्यतीन्द्रियार्थदृक्साधकात्प्रमाणान्नूनं ज-
गति संभाव्यन्त एव तथाविधाः सूरय इत्यवधार्य भगवति प्रसादमुपजनय-
न्त्येव। तत्प्रसादाच्च तद्गुणास्तत्प्रवचनेषु तदाश्रिते च शास्त्रादौ परीक्षापुरःस-
रमुद्ग्रहणाद्यर्थमाद्रियन्ते ततः श्रुतमय्यादिप्रज्ञोदयक्रमेण यावत्परं श्रेयोऽधिग-
च्छन्तीति महत्सु प्रसादः सर्वश्रेयोधिगतेः प्रधानं कारणम्। अत एव प्रायेण
प्रसिद्धशास्तृकप्रवचनाश्रयेण प्रणीयमानेषु शास्त्रेषु शास्त्रकृतः शास्त्रस्यादौ
तावत् स्वशास्तृपूजामेव विदधति। तस्यास्तत्प्रवृत्तावप्यङ्गभावस्य लेशतो विद्य-
मानत्वात्। अतएवोक्तम्— शास्त्रं प्रणेतुकामः स्वशास्तुर्माहात्म्यज्ञापनार्थं त-
स्मै नमस्कारमारभत इति। अतो नानर्थकं शास्तृपूजाविधानमिति स्थितम्॥
§ 26

तत्र तं प्रणम्येत्येतत्पर्यन्तेन शास्तृपूजाविधानं निर्दिष्टम्। क्रियते त-
त्त्वसङ्ग्रह इत्यनेनाभिधेयप्रयोजने प्राह—तथाह्यभिधेयमस्य शास्त्रस्य प्र-
कृत्यादिव्यापाररहितत्वादीनि प्रतीत्यसमुत्पादविशेषणानि तत्त्वानि। तानि च
सामर्थ्यात्तत्त्वशब्देन दर्शितान्येव, अन्येषां तत्त्वार्थत्वानुपपत्तेः। ननु च वाक्य-
स्यैवाभिधेयवत्त्वं नान्यस्येति न्यायः, न च सकलं शास्त्रं वाक्यमपि तु
वाक्यसमूहस्तत्कुतोऽस्याभिधेयसंभवः। नैतदस्ति। यद्यपि वाक्यसमूहात्मकं
शास्त्रं तथाऽपि तानि वाक्यानि परस्परव्यपेक्षासंबन्धावस्थितानि, अन्य-
थोन्मत्तादिवाक्यसमूहवदसङ्गतार्थमेव स्यात्। ततश्च परस्परसंबद्धानेकशब्द-
समूहात्मकत्वात् तदन्यवाक्यवद्वाक्यमेव शास्त्रम्। न हि पदैरेव वाक्यमार-
भ्यतेऽपि तु वाक्यैरपि। अतो महावाक्यत्वादभिधेयवदेव शास्त्रमित्यचोद्य-
008/k म्। प्रयोजन तु सङ्ग्रहशब्देन दर्शितम्। तथाहि—प्रयोजनमुपदर्श्यमानं
शास्त्रेषु प्रवृत्तिकामानां शास्त्रगतमेवोपदर्शनीयं नान्यगतम्, अन्यथा ह्य-
सङ्गताभिधानं स्यात्। उक्तञ्च—शास्त्रेषु हि परं प्रवर्त्तयितुकामो वक्ता
शास्त्रादौ प्रयोजनमभिधत्ते न व्यसनितया (इति)। कथं च परः प्र-

योजनोपदेशाच्छास्त्रेषु प्रवर्तितो भवति। यदितद्गतमेव प्रयोजनमभिधीयते नान्यगतम्। नह्यन्य(दपि) (गत ?) प्रयोजनाभिधानादन्यत्र प्रेक्षावतः प्रवृत्तिर्भवेत्। विशिष्टार्थप्रतिपादनसमर्थं च वचनं शास्त्रमुच्यते। नाभिधेयमात्रं नापि शब्दमात्रमर्थप्रतिपादनसामर्थ्यशून्यमतो नाभिधेयादिगतं प्रयोजनमुपदर्शनीयम्। यत्पुनः सम्यग्ज्ञानपूर्विका सर्वज्ञत्वेनार्थसिद्धिरि(ति, तत्.... ....?) इत्यनेनाभिप्रायेण प्रयोज(नम्।) (न ?) प्रयोजनस्य कथनं नाभिधेयप्रयोजनस्य सम्यग्ज्ञानव्युत्पत्तेरेव सम्यग्ज्ञानशब्देन विवक्षितत्वात्। सम्यग्ज्ञानव्युत्पत्ते (स्तदर्थत्व एव सर्वज्ञत्वेनार्थसिद्धिः ?) इत्येतत्प्रयोजनाभिधानं सङ्गतार्थं भवेत्। अन्यथा दुःश्लिष्टमेव स्यात्। तच्च प्रयोजनं शास्त्रस्य त्रिविधं क्रियारूपं क्रियाफलं क्रियाफलस्य फलम्। तथा हि—शास्त्रस्य परप्रतिपादनायाऽऽरभ्यमाणस्य का रणत्वं वा भवेत्। कर्तृत्वं वा, कर्तृकरणयोश्च साधनत्वान्न यथोक्तप्रयोजनव्यतिरिक्तंप्रयोजनमस्ति, क्रियापेक्षत्वात्साधनस्य। त्रिविधस्यापि च क्रियादेस्तदविनाभावित्वात्तत्प्रयोजनत्वं युक्तमेव। साक्षात्पारम्पर्यकृतस्तु विशेषः। फलाख्यं तु प्रयोजनं प्रधानम्, तदर्थत्वात्क्रियारम्भस्य। तत्र सर्ववाक्यानां स्वाभिधेयप्रतिपादनलक्षणा क्रियासाधारणा। सा चातिप्रतीततया न प्रयोजनत्वेनोपदर्शनीया तस्यां शास्त्रस्य व्यभिचाराभावात्। अनभिधेयत्वाशाङ्काव्युदासार्थमुपदर्शनीयेति चेत्। न। अभिधेयकथनादेव तदाशङ्काया व्युदस्तत्वात्। नाप्यभिधेयविशेषप्रतिपिपादयिषया तदुपदर्शनम्,अभिधेयविशेषकथनादेव तस्य प्रतिपादितत्वात्। तस्मादसाधारणा या क्रिया सोपदर्शनीया सा त्वस्य शास्त्रस्य विद्यत एव तत्त्वसङ्ग्रहलक्षणा। यतोऽनेन शास्त्रेण तेषांतत्त्वानामितस्ततो विप्रकीर्णानामेकत्र बुद्धौ विनिवेशलक्षणः सङ्ग्रहः क्रियते। अतस्तामेव सङ्ग्रहशब्देन दर्शितवान्। अस्याश्च तत्त्वसङ्ग्रहक्रियायाः प्रतिपाद्य(पत्तृ ?)सन्तानगतस्तत्त्वसुखावबोधः फलम्। तदपि सङ्ग्रहशब्देन प्रकाशितमेव। एकत्र हि सङ्क्षिप्तस्य तत्त्वस्य प्रतिपत्तुः सुखेनोद्ग्रहो जायते, दुःखेन तु विप्रकीर्णस्येति कृत्वा सुखोद्ग्रहकारणं सङ्ग्रहं सङ्ग्रहशब्देन प्रतिपादयंस्तत्त्वसुखावबोधार्थमिदमारभ्यत इतिप्रकाशयति। न तु तत्त्वावबोधमात्रमस्य फलम्, एवं हि शास्त्रस्य प्रणयनवैयर्थ्यं 009/k पूर्वाचार्यैरेव तत्त्वनिश्चयस्य कृतत्वात्। अतो विशेषतः परानुग्रहस्यापि भावात्। परार्थत्वाच्च शास्त्रस्य। तस्मात्पूर्वाचार्यैः प्रतिपादितान्यपि तत्त्वानि यो मन्दधीरतिविप्रकीर्णतया सुखमवधारयितुमशक्तंस्तं प्रति सुखावधारणाय तत्त्वसङ्ग्रह आरभ्यमाणो न विफलतामेष्यतीति मन्यमानः शास्त्रमिदमारभते। अत एव तत्त्वसङ्ग्रह इत्याह। अन्यथा क्रियते तत्त्वनिश्चय इत्येवमुक्तं स्यात्। एवं हि यथाविवक्षितार्थप्रतिपादनं स्फुटमेव कृतं भवेत्तस्मात्तत्त्वसुखावबोध एव तत्त्वसङ्ग्रहक्रियायाः फलम्। तस्यापि च सुखावबोधस्याचिरेणाभ्युदयनिःश्रेयसावाप्तिः प्रयोजनम्। तच्चातिप्रतीतमेवेति नोक्तम्,तत्त्वज्ञानादभ्युदयनिःश्रेयसावाप्तिर्भवतीति सर्वास्तिकानां प्रसिद्धत्वात्॥ § 27

अथवा—जगद्धितविधित्सयेत्येतस्योत्तरत्रानुवृत्तेस्तदपि दर्शितमेव। तथाहि—तदनुवृत्तौ जगद्धितविधित्सया तत्त्वसङ्ग्रहः क्रियत इति वाक्या-

र्थो जायते। जगद्धितविधित्सा च तत्त्वसङ्ग्रहक्रियायाः कथं हेतुर्भवति। यदि जगद्धितविधानं तत्त्वसङ्ग्रहक्रियायाः फलं स्यात्। यथा पिपासया सलिलमानयतीत्यत्र सलिलपानं तदानयनक्रियायाः फलमिति गम्यते, तद्वदिहापि; ततश्च जगद्धितविधानार्थं तत्त्वसङ्ग्रहः क्रियत इत्यर्थः संतिष्ठते। एतच्चानुगुणोपायमेव प्रयोजनमुपदर्शितम्। तथाह्यभ्युदयनिःश्रेयसावाप्तिर्जगद्धितमुच्यते। तस्य चाविपर्यासो हेतुः, सर्वसंक्लेशस्य विपर्यासमूलत्वात्; संक्लेशविपरीतत्वाच्च जगद्धितस्य। अतस्तद्धेतुविपरीतोऽस्य हेतुरवतिष्ठते। अविपर्यासश्च यथावत्कर्मफलसंबन्धाभिसम्प्रत्ययः, अविपरीतपुद्गलधर्मनैरात्म्यावबोधश्च। स चास्मादविपरीतप्रतीत्यसमुत्पादसंप्रकाशकाच्छास्त्राच्छ्रवणचिन्ताभावनाक्रमेणोपजायत इत्यतोऽवगम्यत एव तत्त्वसङ्ग्रहक्रियातो जगद्धितमपि सम्पद्यत इति।अभ्युदयनिःश्रेयसावाप्तौ च सत्यामभिमतार्थपरिसमाप्त्या पुरुषस्याकाङ्क्षाविच्छेदादतो नापरमूर्ध्वं प्रयोजनं मृग्यमिति प्रयोजननिष्ठा॥ § 28

संबन्धस्त्वभिधेयप्रयोजनाभ्यां न पृथगुपदर्शनीयो निष्फलत्वात्। तथाहि—सम्प्रदर्श्यमानः शास्त्रप्रयोजनयोः साध्यसाधनभावलक्षणो दर्शनीयो नान्यो गुरुपर्वक्रियादिलक्षणस्तस्यार्थिप्रवृत्तेरनन्तत्वात्। स च साध्यसाधनभावः प्रयोजनाभिधानादेव दर्शितः। तथाहीदमस्य प्रयोजनमिति दर्शयता दर्शितं भवतीदमस्य साधनमिति। न हि यो यन्न साधयति तत्तस्य प्रयोजनं भवत्यतिप्रसङ्गात्। तस्मात्सामर्थ्यलभ्यत्वान्नासौ प्रयोजनाभिधेयाभ्यां पृथग-
010/k भिधानीयः। स हि नाम तस्मात्पृथगुपा दानमर्हति यो यस्मिन्नभिहितेऽपि न गम्यते। यथाऽभिधेयप्रयोजनयोरन्यतराभिधानेऽपि नेतरावगतिर्भवति न च
TSP_{msJ}:8a संभवोऽस्ति, यत्प्रयोजनाभिधानेऽपि यथोक्तः संबन्धो नाभिहितः स्यादिति द्वे एवाभिधेयप्रयोजने वाच्ये। एतच्चाभिधेयादि न वाक्यार्थतया विभक्तमस्माभिः। अपि तु वाक्यादवयवानपोद्धृत्य तदर्थतया। वाक्यार्थस्तु यथोक्तसङ्ग्रहकरणमेव। यदा गुणीभूतस्याप्यभिधेयादेर्वाक्यादस्मात्प्रतीयमानत्वाद्वाक्यार्थत्वमविरुद्धमेव। प्राधान्येन हि वाक्यस्यानेकार्थाभिधानं विरुद्धम्। न तु गुणप्रधानभावेन॥ § 29

अथापरिमितगुणगणाधारे भगवति किमिति प्रतीत्यसमुत्पाददेशनयैव स्तोत्राभिधानम्। तदेतदचोद्यम्। सर्वत्रैव तुल्यपर्यनुयोगत्वात्। न च शक्यमपरिमितगुणोद्भावनया पूजाभिधानं कर्तुमिति गुणैकदेशोद्भावनयैव सा विधेया। तेन प्रतीत्यसमुत्पाददेशनोद्भावनया वा सा विहिताऽन्यथा वेति न कश्चिद्विशेषः॥ § 30

तथाप्युच्यते विशेषः। तथाहि—यथाभूतगुणसंपद्योगादभ्युदयनिःश्रेयसप्रापणतो जगतः शास्ता भवति भगवान् स एवाभ्युदयनिःश्रेयसार्थिनां भगवच्छरणादिगमनहेतुरभिधानीयः। प्रतीत्यसमुत्पाददेशनया चाभ्युदयादिसम्प्रापको भगवान्। तथाहि—अविपरीतप्रतीत्यसमुत्पाददेशनातस्तदर्थावधारणात्सुगतिहेतुरविपरीतकर्मफलसंबन्धादिसंप्रत्यय उपजायते, पुद्गलधर्म-

नैरात्म्यावबोधश्च निःश्रेयसहेतुः श्रुतचिन्ताभावनाक्रमेणोत्पद्यते, तदुत्पत्तौ ह्यविद्या संसारहेतुर्निवर्त्तते, तन्निवृत्तौ च तन्मूलं सकलं क्लेशज्ञेयावरणं निवर्त्तत इति सकलावरणविगमादपवर्गसंप्राप्तिर्भवति। तेन प्रतीत्यसमुत्पादप्रधानमिदं भगवतः प्रवचनरत्नमित्यविपरीतप्रतीत्यसमुत्पादाभिधायित्येव भगवतः स्तोत्राभिधानम्। स चायं प्रतीत्यसमुत्पादः परैर्विषमहेतुः प्रमाणव्याहतपदार्थाधिकरणश्चेष्यते। अतस्तन्निरासेन यथावदेव भगवतोक्त इति दर्शनार्थं वक्ष्यमाणसकशास्त्रप्रतिपाद्यार्थतत्वोपक्षेपार्थं च बहूनां यथोक्तप्रतीत्यसमुत्पादविशेषणानामुपादानमिति समुदायार्थः। अवयवार्थस्तूच्यते। तत्र प्रकृतीशोभयात्मादिव्यापाररहितमित्यादौ सर्वत्र यः प्रतीत्यसमुत्पादं जगादेति संबन्धः। तत्र प्रकृतिः साङ्ख्यपरिकल्पितं सत्वरजस्तमोरूपं प्रधानम्, ईशः—ईश्वरः, उभयम्—एतदेव द्वयम्, आत्मा—सृष्टिसंहारकारक एकः पुरुषस्तदन्यश्च संसारीआदिग्रहणेन कालादिपरिग्रहः—तेषां व्यापारः—कारणभावः, तेन रहितम्—तद्या पारशून्यमित्यर्थः। तत्रेदमुक्तं भगवता— स चायमङ्कुरो न 011/k
स्वयं कृतो नोभयकृतोनेश्वरनिर्मितो न प्रकृतिसंभूतो नैककारणाधीनो नाप्यहेतुः समुत्पन्न इति। एतेनप्रधानेश्वरोभयाहेतुकशब्दब्रह्मात्मपरीक्षाणामुपक्षेपः। अथ स तमेवंभूतं प्रतीत्यसमुत्पादं किमक्षणिकं जगाद ? नेत्याह—चलमिति। चलम्—अस्थिरम्, क्षणिकमिति यावत्। अन्यस्य चलत्वायोगादिति भावः। तत्रेदमुक्तं भगवता— क्षणिकाः सर्वसंस्कारा अस्थिराणां कुतः क्रिया। भूतिर्येषां क्रिया सैव कारकं सैव चोच्यत इति। अयं च स्थिरभावपरीक्षोपक्षेपः। यद्येवं कर्मफलसंबन्धादिव्यवस्थायाः प्रतीत्यसमुत्पाद आश्रयो न प्राप्नोति चलत्वादित्यत आह—कर्मेत्यादि। एतच्च पश्चात्प्रतिपादयिष्याम इति भावः। तत्र कर्म—शुभाशुभम्, तत्फलं चेष्टानिष्टम्, तयोः संबन्धो जन्यजनकभावलक्षणः, तस्य व्यवस्था संस्थितिः, व्यवहार इति यावत्। आदिशब्देनस्मृतिप्रत्यभिज्ञानसंशयनिश्चयस्वयंनिहितप्रत्यनुमार्गणदृष्टार्थकुतूहलविरमणकार्यकारणभावतदधिगन्तृप्रमाणबन्धमोक्षादिव्यवस्थापरिग्रहः तेषां समाश्रय इति विग्रहः। तत्रोक्तं भगवता— इति हि भिक्षवोऽस्तिकर्मास्तिफलं कारकस्तु नोपलभ्यते य इमान् स्कन्धान्विजहात्यन्यांश्च स्कान्धानुपादत्तेऽन्यत्र धर्मसंकेतात्। तत्रायं धर्मसंकेतो यदुतास्मिन्सतीदं भवतीत्यादि। अयं च कर्मफलसंबन्धपरीक्षोपक्षेपः। स पुनरयं प्रतीत्यसमुत्पादः स्कन्धधात्वायतनानां द्रष्टव्यः, तेषामेव प्रतीत्यसमुत्पन्नत्वात्॥ १॥

§ 31

ननु द्रव्यगुणकर्मादयो वस्तुभूताःसन्ति तेषां कस्मान्न भवतीत्यत्राह—गुणेत्यादि। गुणाश्च द्रव्याणि च क्रियाश्च जातिश्च समवायश्चेति द्वन्द्वः। जातिशब्देन परमपरं च द्विविधमपि सामान्यं गृह्यते। आदिशब्देन अन्त्यद्रव्यवर्त्तिनां विशेषाणाम्, ये च धर्मिव्यतिरेकिणो धर्माः कैश्चिदुपवर्ण्यन्ते यथा षण्णामपि पदार्थानामस्तित्वं सदुपलम्भकप्रमाणविषयत्वमित्येवमादयस्तेषां ग्रहणम्। गुणादयश्च ते उपाधयश्च विशेषणानीति विशेषणसमासः।

तैः शून्यं रहितमित्यर्थः। तत्रेदमुक्तं भगवता— सर्वं सर्वमिति ब्राह्मण ? यावदेव पञ्च स्कन्धा द्वादशायतनान्यष्टादश धातवइति। अयं चषद्दार्थपरीक्षोपक्षेपः। ननु चोपाध्यभावे कथं प्रतीत्यसमुत्पादः शब्दविकल्पाभ्यां विषयीक्रियते, न च ताभ्यामविषयीकृतमभिधातुं पार्यते, न च शब्दविकल्पयोरुपाधिमन्तरेण प्रवृत्तिरस्ति, तत्कथं तं भगवान् जगादेत्याह— 012/k आरोपिताकारेत्यादि। आरोपितो—बाह्यत्वेनाध्यारोपित आकारः—स्वभावो यस्य शब्दप्रत्यययोर्गोचरस्य स तथोक्तः, आरोपिताकारः—शब्दप्रत्यययोर्गोचरो—विषयो यत्र प्रतीत्यसमुत्पादे स तथोक्तः। प्रत्ययशब्दः शब्दशब्दसन्निधानादाविष्टाभिलापात्मके प्रत्ययविशेषे विकल्पे द्रष्टव्यः, तयोरेकविषयत्वाव्यभिचारित्वेन सहचरितत्वात्। तेनैतदुक्तं भवति। यद्यप्युपाधयो न सन्ति, तथापीतरेतरव्यावृत्तवस्तुदर्शनद्वारायातो बहीरूपत्वेनाध्यवसितो विकल्पः प्रतिबन्धात्मकः शब्दार्थस्तत्रास्ति। नहि परमार्थतः शब्दानामसौ गोचरः, तत्र सर्वविकल्पानामतीतत्वात्। किंतु यथैवाविचारितरमणीयतया लोके शब्दार्थः सिद्धस्तथैव भगवद्भिरपि समु(म ?)पेक्षिततत्त्वार्थैर्गजनिमीलिकया परमार्थावताराय तद्भावनासंवृत्त्या प्राकाश्यते, उपायान्तराभावात्। समारोपिताकारत्वेऽपि शब्दार्थस्य पारम्पर्येण वस्तुप्रतिबन्धात्तदधिगमे हेतुत्वमस्त्येवेति तथाविधं वस्तु तेषां सामर्थ्यात्प्रकाशितमेव भवतीति न विप्रलम्भसंभवः। तत्रेदमुक्तं तायिना— येन येन हि नाम्ना वै यो यो धर्मोऽभिलप्यते। नासौ संविद्यते तत्र धर्माणां सा हि धर्मता। इति। अयं च शब्दार्थपरीक्षोपक्षेपः॥ २॥ § 32

अथ किमयं तीर्थिकपरिकल्पितपदार्थवत्प्रतिपादकप्रमाणद्रविणदरिद्रतया वचनरचनामात्रसार आहोस्विदस्ति किंचिदस्य प्रतिपादयितृ प्रमाणम् ? अस्तीत्याह—स्पष्टेत्यादि। स्पष्टं च तल्लक्षणं चेति विशेषणसमासः। स्पष्टत्वं च लक्षणस्यासंभवाव्याप्त्यतिव्याप्तिदोषरहितत्वात्। तीर्थिकप्रमाणलक्षणं त्वस्पष्टमिति दर्शनार्थं स्पष्टलक्षणमित्याह। तेन संयुक्तम्—समन्वितं यत्प्रमाद्वितयम्—प्रत्यक्षानुमानाख्यं तेन निश्चितम्। एतच्च सर्वपरीक्षासु प्रतिपादयिष्यति। एतदपि भगवतोऽनुमतम् ; यथोक्तम्— तापाच्छेदाच्च निकषात्सुवर्णमिव पण्डितैः। परीक्ष्य भिक्षवो ग्राह्यं मद्वचो नतु गौरवात्॥ इति। तत्र प्रत्यक्षस्य लक्षणं भ्रान्तिकल्पनाभ्यां रहितत्वम्। तच्च भगवतोक्तमेव। यदाह — चक्षुर्विज्ञानसङ्गी नीलं विजानाति, नो तु नीलमिति। तथाहि नीलं विजानातीत्यनेनाविपरीतविषयत्वख्यापनादभ्रान्तत्वमुक्तम्, नो तु नीलमित्यनेन नामानुविद्धार्थग्रहणप्रतिक्षेपात् कल्पनारहितत्वम्। अनुमानस्यापि लक्षणमुक्तमेवानुमानाश्रयं लिङ्गं दर्शयता। तथाहि— साध्यार्थाविनाभूतं लिङ्गं विनिश्चितं सदनुमानज्ञानस्य कारणम्, तच्च यत्किंचिद्भिक्षवः समुदयधर्मकं सर्वत्र निरोधधर्मकमिति। एवं साध्येन हेतोर्व्याप्तिमुपदर्शयता स्फुटतरमेव 013/k प्रकाशितम्। यथोक्तम्—अनुमानाश्रयो लिङ्गमविनाभावलक्षणम्। व्याप्तिदर्शनाद्धेतोः। साध्ये(ध्यो ?)नोक्तः स च स्फुट इति। तच्च लिङ्गं स्वभाव-

कार्यानुपलम्भविशेषभेदेन त्रिधा भिद्यते। तत्र यत्किंचिद्भिक्षवस्समुदयधर्मकमित्यनेन स्वभावाख्यं लिङ्गमुपदर्शितमेव। कार्याख्यमपि— धूमेन ज्ञायते वह्निः सलिलं च बलाकया। निमित्तैर्ज्ञायते गोत्रं बोधिसत्वस्य धीमतः॥ इति ब्रुवता दर्शितम्। अनुपलम्भविशेषाख्यमपि दर्शितमेवानुपलम्भमात्रस्य प्रामाण्यं प्रतिक्षिपता। यथोक्तम्— मा भिक्षवः पुद्गलः पुद्गलं प्रमिणोतु पुद्गले वा प्रमाणमुद्गृह्णातु, क्षण्यते हि भिक्षवः पुद्गलः पुद्गलं प्रमिण्वन्, अहं वा पुद्गलं प्रमिणुयां यो वास्यान्मादृशइति। एतेन हि स्वभावविप्रकृष्टेष्वनुपलम्भमात्रस्य प्रामाण्यं प्रतिक्षिप्तम्, अहं वेत्यादि ब्रुवताऽनुपलम्भविशेषस्यैव प्रामाण्यमित्येतदपि स्फुटतरमेव दर्शितम्। अयं च प्रत्यक्षानुमानप्रमाणान्तरपरीक्षाणामुपक्षेपः। अथ किमयं प्रतीत्यसमुत्पादः केनचिद्वस्तुत्वादिना रूपेण सान्वयः ? यथाहुः स्याद्वादिनः, आहोस्विदसंकीर्णस्वभावः, किं चातः सान्वयत्वे प्रत्यक्षादीनां लक्षणसांकर्यम्, कार्यकारणयोश्च स्वभावाभेदादजन्यजनकत्वम्, ततश्च न स्पष्टलक्षणयोगिप्रमाद्वितयनिश्चितत्वम्। नापिप्रतीत्यसमुत्पादार्थो युक्तः। असङ्कीर्णस्वभावत्वेऽपि सहकारिणां भेदाविशेषादजनकाभिमतपदार्थवदेकार्थक्रियाकारित्वं न भवेत्; अत्राह— अणीयसापीत्यादि। एवं मन्यते, उत्तर एवात्र पक्षो न चात्र यथोक्तदोषावसर इति, पश्चात्प्रतिपादयिष्यामः। मिश्रीभूतः—सङ्कीर्णः अपरात्मा यत्रेति विग्रहः। अपरस्य कारणादेः स्वभावस्य यत्र लेशतोऽपि कार्याद्यात्मन्यनुगमो नास्तीत्यर्थः। अणीयसापीति—सूक्ष्मतरेणापि। न केवलं बहुभिः सत्वज्ञेयत्वादिभिरित्यपिशब्देन दर्शयति। एकस्यापि हि रूपस्यानुगमे सर्वात्मनानुगतिः स्यादिति भावः। एतच्च पश्चात्प्रतिपादयिष्यति। स चायमुक्तो भगवता— कथं नु शाश्वतोऽङ्कुरः, यस्मादन्याङ्कुरोऽन्यद्बीजम्। न तु यएवाङ्कुरस्तदेव बीजम्। तथा विसदृशो बीजादङ्कुर इति, अतो न संक्रमतइति। अयं च स्याद्वादपरीक्षोपक्षेपः॥ ३॥ § 33

अथ किमसङ्कीर्णस्वभावा अपि स्कन्धादयोऽध्वस्वजहत्स्वभावा एव वर्त्तन्ते ? यथाहुरेके संक्रान्तिवादिनः सर्वास्तिवादाः। नैवमित्याह— असंक्रान्तिमिति— यदि तु संक्रान्तिः स्यात्तदा सर्वात्मना सत्वान्न किंचिज्जन्यमस्तीति प्रतीत्यसमुत्पादस्यैवायोग इति भावः। न विद्यते संक्रान्तिः—अध्वसु सञ्चारः स्कन्धादीनां यत्रेति विग्रहः। एतच्चाभिहितं भगवता। यथोक्तम्— 014/k
चक्षुरुत्पद्यमानं न कुतश्चिदागच्छति निरुध्यमानं न क्वचित्सन्निचयं गच्छति। इति हि भिक्षवश्चक्षुरभूत्वा भवति भूत्वा च प्रतिविगच्छतीति। अयं च त्रैकाल्यपरीक्षोपक्षेपः। अथ किमयं दृष्टमात्रकालभावी ? यथाहुश्चार्वाकाः— भस्मीभूतस्य शान्तस्य पुनरागमनं कुतः इति। नेत्याह—अनाद्यन्तमिति। अविद्यमानावाद्यन्तावस्मिन्निति विग्रहः। एतदपिनिर्दिष्टं भगवता— अनवराग्रो हि भिक्षवो जातिसंसारइत्यादिना। अवरमित्यन्तोऽभिधीयते, अग्रमिति चादिः, तयोः प्रतिषेधादनवराग्र इत्युच्यते। एतच्चानुत्पन्ना(र्य)मार्गानधिकृत्योक्तं, उत्पन्नार्यमार्गाणां तु शान्त एव संसारः। अतएवोक्तम्—दीर्घो बालस्य सं-

सारः सद्धर्ममविजानतःइति। अयं च लोकायतपरीक्षोपक्षेपः। अथ किमयं प्रतीत्यसमुत्पादो बहिरर्थात्मक आहोस्विच्चित्तमात्रशरीर इति, आह—प्रतिबिम्बादिसन्निभमिति। एतेन चित्तमात्रात्मक एवेति दर्शयति। तथाहीदमुक्तं भवति। यथाहि प्रतिबिम्बालातचक्रगन्धर्वनगरादयश्चित्तमात्रशरीरास्तथाऽयमपीति। एतच्चोक्तंभगवता— बाह्यो न विद्यते ह्यर्थो यथा बालैर्विकल्प्यते। वासनालुठितं चित्तमर्थाभासं प्रवर्त्तते॥ इति। अयं च बहिरर्थपरीक्षोपक्षेपः। तदेवं यथोक्तासदर्थकल्पनाजालरहितत्वं प्रतीत्यसमुत्पादस्य प्रतिपाद्योपसंहरन्नाह—सर्वप्रपञ्चेत्यादि। सर्वेषांयथोक्तानां प्रकृतिहेतुत्वादीनां प्रपञ्चानां सन्दोह :—समूहः, तेन निर्मुक्तः। अथ किमयमन्यैरपि हरिहरहिरण्यगर्भादिभिरेवमभिसम्बुद्धः ? नेत्याह—अगतं परैरिति। सर्वतीर्थानां वितथात्मदृष्ट्यभिनिविष्टत्वाद्भगवत एवायमावेणिकोऽभिसम्बोध इति दर्शयति। एतच्च सर्वपरीक्षासु प्रतिपादयिष्यति॥ ४॥ § 34

अथायमेवंभूतः प्रतीत्यसमुत्पादः किं स्वयमभिसम्बुध्य गदितो भगवता, आहोस्वित्पराभिमतापौरुषेयवेदाश्रयेण, यथाहुर्जैमिनीयाः—तस्मादतीन्द्रियार्थानां साक्षाद्द्रष्टा न विद्यते। वचनेन तु नित्येन यः पश्यति स पश्यति॥ इति। नैवमित्याह—स्वतन्त्रश्रुतिनिःसङ्ग इति—स्वतन्त्रा श्रुतिः—स्वतःप्रमाणभूतो वेदः, नित्यं वचनमिति यावत्। तस्या निःसङ्गः—निरास्थः, तन्निरपेक्ष एव साक्षाद्दर्शी प्रतीत्यसमुत्पादं गदितवानित्यर्थः। न चाप्यपौरुषेयं वाक्यमस्ति। यथोक्तं भगवता — इत्येते आनन्दपौराणा महर्षयो वेदानां कर्त्तारो मन्त्राणां प्रवर्त्तयितारइति। एतच्च पश्चात्प्रतिपाद-
015/k यिष्याम इति भावः। अयं च श्रुतिपरीक्षायाः स्वतन्त्रप्रामाण्य परीक्षायाश्चोपक्षेपः। अथ समधिगताशेषस्वार्थसम्पत्तेर्भगवतः किमर्थमियं प्रतीत्यसमुत्पाददेशनेत्याह—जगद्धितविधित्सयेति। जगते हितं जगद्धितं। तत्पुनरविपरीतप्रतीत्यसमुत्पादावबोधोपायमशेषक्लेशज्ञेयावरणप्रहाणम्, तद्विधातुमिच्छा जगद्धितविधित्सा, सा तद्देशनायाः कारणम्। साऽपि जगद्धितविधित्सा कुतोऽस्य जायेतेत्याह—अनल्पेत्यादि। अनल्पैः कल्पासङ्ख्येयैः सात्मीभूता महादया यस्येतिविग्रहः। सा च महादया भगवतः समधिगताशेषस्वार्थसम्पत्तेरपि परार्थकरणव्यापारापरित्यागादवगम्यते॥ ५॥ § 35

अथासौ सात्मीभूतमहादयः किं कृतवानित्याह—यइत्यादि। य इति सामान्यवचनोऽपि बुद्धे भगवति प्रवर्त्तते, अन्यस्य यथोक्तगुणासंभवात्। प्रतीत्यसमुत्पादमिति। हेतून्प्रत्ययान्प्रतीत्य—समाश्रित्य यः स्कन्धादीनामुत्पादः स प्रतीत्यसमुत्पादः। एतदुक्तं भवति। हेतुप्रत्ययबलेनोत्पन्नान्स्कन्धादीन्यो जगादेति। यद्यपि समुत्पाद इति व्यतिरेकीव निर्देशस्तथापि प्रतीत्यसमुत्पन्नमेव वस्तु भेदान्तरप्रतिक्षेपमात्रजिज्ञासायां तथा निर्दिश्यते। यद्वा—समुत्पद्यत इति समुत्पादः कृत्यल्युटो बहुलमिति वचनात्कर्त्तरि घञ्। ततः प्रतीत्यशब्देन सुप्सुपेति मयूरव्यंसकादित्वाद्वा समासः। असमस्तमेव वा। एतेन च सर्वेण भगवतः सम्यक्परहितानुष्ठानसम्पत्सोपाया परिदीपिता भव-

ति। तथाहि—यः प्रतीत्यसमुत्पादमेवंभूतं जगादेत्यनेन यथावत्परहितानुष्ठानं भगवतो दर्शितम्। इदमेव हितानुष्ठानं भगवतो यत्परेषामविपरीतस्वर्गापवर्गमार्गोपदेशः। यथोक्तम्— युष्माभिरेव कर्त्तव्यमाख्यातारस्तथागताःइति। अस्याश्चाविपरीतपरहितानुष्ठानसम्पद उपायो धर्मेषु साक्षाद्दर्शित्वं महाकरुणा च, यतः कृपालुरपि यथाभूतापरिज्ञानान्न सम्यक्परहितमुपदेष्टुं समर्थः, परिज्ञानवानपि कृपाहीनो नैवोपदिशेत्, उपदिशन्नप्यहितमप्युपदिशेत्। तस्मात्प्रज्ञाकृपेद्वे अपि सम्यक् परहितानुष्ठानोपायो भगवतः। तच्च साक्षाद्दर्शित्वं स्वतन्त्रश्रुतिनिःसङ्गत्वेन दर्शितम्; सात्मीभूतमहादयत्वेन च महाकरुणायोगः। ननु चाविपरीतः प्रतीत्यसमुत्पादो बोधिसत्त्वश्रावकादिभिरपि निर्दिष्टः, तत् कोऽत्रातिशयो भगवत इत्याह—गदतांवरइति। यद्यपि ते श्रावकादयः प्रतीत्यसमुत्पादं गदन्ति, तथापि भगवानेव तेषां गदतांवरः। भगवदुपदिष्टस्यैव धर्मतत्त्वस्य प्रकाशनान्नहि तेषां स्वतो यथोक्तप्रतीत्यसमुत्पाददेशनायां शक्तिरस्ति। सर्वगुणदोषप्रकर्षापकर्षनिष्ठाधिष्ठान त्वाद्वा भगवानेव श्रेष्ठो नेतरे। 016/k
तेषां तद्विपरीतत्वात्। एतेन च भगवतः श्रावकादिभ्यो विशिष्टत्वप्रतिपादनेन सवासनाशेषक्लेशज्ञेयावरणप्रहाणलक्षणा स्वधि(धी ?)सम्पत्परिदीपिता भवति। अन्यथा कथमिव तेभ्यो विशिष्टो भवेत्, यदि यथोक्तगुणयोगिता न स्याद्भगवतः। अतएवाह—तं सर्वज्ञमिति। अयं च सर्वज्ञसिद्ध्युपक्षेपः। अथ तं प्रणम्य किं क्रियत इत्याह—क्रियते तत्त्वसङ्ग्रहइति। यथोक्तान्येव प्रतीत्यसमुत्पादविशेषणानि तत्त्वानि, अविपरीतत्वात्, तेषामितस्ततो विप्रकीर्णानामेकत्र हि सङ्क्षेपः सङ्ग्रहः, तत्प्रतिपादकत्वाद्ग्रन्थस्यापि तथा व्यपदेशः। सीताहरणं काव्यमिति यथा। अथवा सम्यक् समन्ताद्वा गृह्यन्ते अनेन तत्त्वानीति सङ्ग्रहो ग्रन्थ एवोच्यते क्रियत इति प्रारब्धापरिसमाप्तकालापेक्षया वर्तमानकालनिर्देशः॥ ६॥ § 36

तत्र प्रकृतिव्यापाररहितत्वप्रतिपादनाय साङ्ख्यमतमुपदर्शयन्नाह—अशेषशक्तिप्रचितादित्यादि। § 37

०.२ प्रकृतिपरीक्षा।

अशेषशक्तिप्रचितात्प्रधानादेव केवलात्।
कार्यभेदाः प्रवर्त्तन्ते तद्रूपा एव भावतः॥ ७॥ § 39

यदशेषाभिर्महदादिकार्यग्रामजनिकाभिरात्मभूताभिः शक्तिभिः, प्रचितम्—युक्तं सत्त्वरजस्तमसां साम्यावस्थालक्षणं प्रधानम्, तत एवैते महदादयः कार्यभेदाः प्रवर्त्तन्ते इति कापिलाः। प्रधानादेवेत्यवधारणं कालपुरुषादिव्यवच्छेदार्थम्। केवलादिति वचनं सेश्वरसाङ्ख्योपकल्पितेश्वरनिरासार्थम्। प्र-

वर्त्तन्त इति—साक्षात्पारम्पर्येण वोत्पद्यन्त इत्यर्थः। तथाहि तेषां प्रक्रिया। प्रधानाद्बुद्धिः प्रथममुत्पद्यते, बुद्धेश्चाहङ्कारः, अहङ्कारात्पञ्चतन्मात्राणि शब्दस्पर्शरसरूपगन्धात्मकानि, इन्द्रियाणि चैकादशोत्पद्यन्ते। पञ्च बुद्धीन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणलक्षणानि, पञ्च कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्था मनश्चेकादशमिति। पञ्चभ्यश्च तन्मात्रेभ्यः पञ्च भूतानि। शब्दादाकाशम्, स्पर्शाद्वायुः, रूपात्तेजः, रसादापः, गन्धात्पृथिवीति। यथोक्तमीश्वरकृष्णेन—प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः। तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि॥इति। तत्र महानिति बुद्धेराख्या। बुद्धिश्चायं घटः पट इति विषयाध्यवसायलक्षणा। अहङ्कारस्तु—अहं सुभगोऽहं दर्शनीय इत्याद्यभिधानलक्षणः। मनस्तु सङ्कल्पलक्षणम्। तद्यथा—कश्चिदेवं बटुः शृणोतिग्रामान्तरे
017/k भोजनमस्तीति, तत्र तस्य सङ्कल्पः स्यात्, यास्यामीति, किं तत्र गुडदधि स्यादुतस्विद्दधीति। एवं सङ्कल्पवृत्ति मन इति। तदेवं बुद्ध्यहङ्कारमनसां परस्परं विशेषो बोद्धव्यः। शेषं सुबोधम्। एते च महदादयः प्रधानपुरुषौ चेति पञ्चविंशतिरेषां तत्त्वानि। यथोक्तम्— पञ्चविंशतितत्त्वज्ञो यत्र यत्राश्रमे रतः। जटी मुण्डी शिखी वाऽपि मुच्यते नाऽत्र संशयः॥ इति। एते यथोक्ताः कार्यभेदाः प्रधानात्प्रवर्त्तमाना न बौद्धाद्यभिमता इव कार्यभेदाः कारणादत्यन्तभेदिनो भवन्ति, किंतु तद्रूपा एव—तत्—प्रधानम् रूपम्—आत्मा येषामिति विग्रहः। त्रैगुण्यादिरूपेण प्रकृत्यात्मभूता एवेति। तथाहि—लोके यदात्मकं कारणं भवति तदात्मकमेव कार्यमुपलभ्यते। यथा कृष्णैस्तन्तुभिरारब्धः पटः कृष्णो भवति शुक्लैस्तु शुक्लः। एवं प्रधानमपि त्रिगुणात्मकम्, तथा बुद्ध्यहङ्कारतन्मात्रेन्द्रियभूतात्मकं व्यक्तमपि त्रिगुणमुपलभ्यते तस्मात्तद्रूपम्। किंच—अविवेकि। तथाहीमे सत्त्वादयः इदं च महदादि व्यक्तमिति पृथङ् शक्यते कर्तुम्। किंतु ये गुणास्तद्व्यक्तं यद्व्यक्तं ते गुणा इति। किंच—द्वयमपि व्यक्तमव्यक्तं च विषयः। भोग्यस्वभावत्वात्। सामान्यं च सर्वपुरुषाणाम्। भोग्यत्वात्। मल्लदासीवत्। अचेतनात्मकं च। सुखदुःखमोहावेदकत्वात्। प्रसवधर्मि च। तथाहि—प्रधानं बुद्धिं जनयति, बुद्धिरप्यहङ्कारम्, अहङ्कारोऽपि तन्मात्राणीन्द्रियाणि चैकादश, तन्मात्राणि महाभूतानि जनयन्तीति। तस्मात्त्रैगुण्यादिरूपेण तद्रूपा एवामी कार्यभेदाः प्रवर्त्तन्ते। यथोक्तम्— त्रिगुणमविवेकिविषयः सामान्यमचेतनं प्रसवधर्मि। व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्॥ इति। ननु यदि तद्रूपा एव कार्यभेदास्तत्कथं शास्त्रे व्यक्ताव्यक्तयोर्वैलक्षण्यमुपवर्णितम्। तथाहीश्वरकृष्णोक्तम्— हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्। सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्॥ इति। तत्र ह्ययमर्थः हेतुमत्—कारणवत्, व्यक्तमेव। तथाहि—प्रधानेन हेतुमती बुद्धिः, अहङ्कारो बुद्ध्या हेतुमान्, पञ्चतन्मात्राण्येकादशेन्द्रियाण्यहङ्कारेण हेतुमन्ति, भूतानि तन्मात्रैः। नत्वेवमव्यक्तम्। तस्य कुतश्चिदप्यनुत्पत्तेः। तथा व्यक्तमनित्यम्, उत्पत्तिधर्मकत्वात्। नत्वेवमव्यक्तम्, तस्यानुत्पत्तिमत्त्वात्। यथा च प्रधानपुरुषौ दिवि भुवि चान्त-

रिक्षे च सर्वत्र व्यापितया वर्त्तते न तथा व्यक्तं वर्त्तते, किंतु तदव्यापि। यथा च संसारकाले त्रयोदशविधेन बुद्ध्यहङ्कारेन्द्रियलक्षणेन शरीरेण करणेन संयुक्तं सूक्ष्मशरीराश्रितं व्यक्तं संसरति नत्वेवमव्यक्तम्, तस्य विभुत्वेन सक्रियत्वायोगात्। बुद्ध्यहङ्कारादिभेदेन चानेकविधं व्यक्तमुपलभ्यते, नाव्यक्तम्, तस्यैकस्यैव सतो लोकत्रय कारणत्वात्। आश्रितं च व्यक्तम्, 018/k यद्यस्मादुत्पद्यते तस्य तदाश्रितत्वात्। नत्वेवमव्यक्तम्, तस्याकार्यत्वात्, लिङ्गं च व्यक्तम्, लयं गच्छतीति कृत्वा। तथाहि—प्रलयकाले भूतानि तन्मात्रेषु लीयन्ते, तन्मात्राणीन्द्रियाणि चाहङ्कारे, अहङ्कारो बुद्धौ, बुद्धिश्च प्रधाने, न त्वेवमव्यक्तं क्वचिदपि लयं गच्छति; तस्याविद्यमानकारणत्वात्। सावयवं च व्यक्तम्, शब्दस्पर्शरसरूपगन्धात्मकैरवयवैर्युक्तत्वात्। नत्वेवमव्यक्तम्, प्रधानात्मनि शब्दादीनामनुपलब्धेः। किंच—यथा पितरि जीवति पुत्रो न स्वतन्त्रो भवति तथा व्यक्तं सर्वदा कारणायत्तत्वात्परतन्त्रम्, नत्वेवमव्यक्तम्, तस्य नित्यमकारणाधीनत्वात्। तदेतत्सर्वमाशङ्क्याह—भावतइति। भावतः—परमार्थतः,ताद्रूप्यम्। प्रकृतिविकारभेदेन तु परिणामविशेषाद्भेदो यथोक्तो न विरुध्यत इत्यर्थः। अथवा—भावत इति। स्वभावतस्त्रैगुण्यरूपेण तद्रूपा एव प्रवर्त्तन्ते। सत्वरजस्तमसां तूत्कटानुत्कटत्वविशेषात्सर्गवैचित्र्यं महदादिभेदेनाविरुद्धमेवेत्यर्थः। तदनेन कारणात्मनि कार्यमस्तीति प्रतिज्ञातं भवति॥ ७॥ § 40

तत्र कथमवगम्यते प्रागुत्पत्तेः सत्कार्यमित्याह—यदीत्यादि— § 41

यदि ह्यसद्भवेत्कार्यं कारणात्मनि शक्तितः।
कर्तुं तन्नैव शक्येत नैरुप्याद्वियदब्जवत्॥ ८॥ § 43

सत्कार्यत्वप्रसिद्धये परैः पञ्च हेतव उक्ताः—असदकरणादुपादानग्रहणात्सर्वसंभवाभावात्। शक्तस्य शक्यकरणात्करणभावाच्च सत्कार्यम् इति तत्र प्रथमहेतुसमर्थनार्थमिदमुच्यते। यदि ह्यसद्भवेत्कार्यमित्यादि। यदि हि कारणात्मनि प्रागुत्पत्तेः कार्यं नाभविष्यत्तदा तन्न केनचिदकरिष्यत यथा गगननलिनम्। प्रयोगः— यदसत्तन्न केनचित्क्रियते। यथा गगनाम्भोरुहम्। असच्च प्रागुत्पत्तेः परमते न कार्यमिति व्यापकविरुद्धोपलब्धिप्रसङ्गः। न चैवं भवति। तस्माद्यत्क्रियते तिलादिभिस्तैलादिकार्यं तत्तस्मात्प्रागपि सदिति सिद्धम्। शक्तित इति। शक्तिरूपेण; व्यक्तिरूपेण तु कापिलैरपि प्राक् सत्वस्यानिष्टत्वात्। नैरुप्यादिति। निःस्वभावत्वात्॥ ८॥ § 44

द्वितीयहेतुसमर्थनार्थमाह—कस्माच्चेत्यादि— § 45

कस्माच्च नियतान्येव शालिबीजादिभेदतः।

उपादानानि गृह्णन्ति तुल्येऽसत्त्वेऽपरं न तु॥ ९ ॥§ 47

019/k

यदि ह्यसद्भवेत्कार्यं तदा पुरुषाणां प्रतिनियतोपादानग्रहणं न स्यात्। तथाहि— शालिफलार्थिनः शालिबीजमेवोपाददते न कोद्रवबीजम्। तथा श्वो मे ब्राह्मणा भोक्तार इति दध्यर्थिनः क्षीरमुपाददते न सलिलम्। तत्र यथा शालिबीजादिषु शाल्यादीनामसत्त्वं तथा कोद्रवबीजादिष्वपीति, तत्किमिति तुल्येऽपि सर्वत्र शालिफलादीनामसत्त्वे प्रतिनियतान्येव शालिबीजादीन्युपादीयन्ते। यावता कोद्रवादयोऽपि शालिफलार्थिभिरुपादीयेरन्, असत्त्वाविशेषात्। अथ तत्फलशून्यत्वात्तैस्तैर्नोपादीयन्ते। यद्येवं शालिबीजमपि शालिफलार्थिना नोपादेयं स्यात्तत्फलशून्यत्वात्। कोद्रवबीजवत् न चैवं भवति। तस्मात्तत्र तत्कार्यमस्तीति गम्यते॥ ९ ॥ § 48

तृतीयहेतुसमर्थनार्थमाह—सर्वं चेत्यादि— § 49

सर्वं च सर्वतो भावाद्भवेदुत्पत्तिधर्मकं।
तादात्म्यविगमस्येह सर्वस्मिन्नविशेषतः॥ १० ॥§ 51

यदि चासदेव कार्यमुत्पद्यत इति भवतां मतम्, तस्मात्सर्वस्मात्पदार्थात्तृणपांसुलोष्टादिकात्सर्वं सुवर्णरजतादि कार्यमुत्पद्येत। कस्मात् ? तादात्म्यविगमस्य सर्वस्मिन्नविशिष्टत्वात्। विवक्षिततृणादिभावात्मताविरहस्य सर्वस्मिन्नुत्पत्तिमति भावे निर्विशिष्टत्वादित्यर्थः। पूर्वं कारणमुखेन प्रसङ्ग उक्तः, सम्प्रति तु कार्यद्वारेणेति विशेषः। न च सर्वं सर्वतो भवति। तस्मादयं नियमस्तत्रैव तस्य संभवादिति गम्यते॥ १० ॥ § 52

स्यादेतत्कारणानां प्रतिनियतेष्वेव कार्येषु शक्तयः प्रतिनियताः, तेन कार्यस्यासत्त्वेऽपि किंचिदेव कार्यं क्रियते न गगनाम्भोरुहम्, किंचिदेवोपादानमुपादीयते। यदेव समर्थम्, नतु यत्किंचित्, किंचिदेव तु कुतश्चिद्भवति नतु सर्वं सर्वत इत्येतच्चोद्यमुत्थाप्योत्तराभिधानव्याजेन चतुर्थहेतुसमर्थनार्थमाह—शक्तीनामित्यादि। § 53

शक्तीनां नियमादेषां नैवमित्यप्यनुत्तरं।
शक्यमेव यतः कार्यं शक्ताः कुर्वन्ति हेतवः॥
११ ॥§ 55

एषामिति। कारणाभिमतानां भावानाम्। नैवमिति। यथोक्तं दूषणं न भवतीत्यर्थः। तदेतदनुत्तरं बौद्धादेः। कस्मात् ? यस्माच्छक्ता अपि हेतवः कार्यं कुर्वाणाः शक्यक्रियमेव कुर्वन्ति, नाशक्यम्॥ ११ ॥ § 56

१ तुल्येऽसत्त्वे] Correction : ; तुल्यसत्त्वे (sic !)तुल्येऽसत्त्वे

ननु केनैतदुक्तमशक्यं कुर्वन्तीति, येनैतत्प्रतिषिध्यते भवताः किंत्वसदपि कार्यं कुर्वन्तीत्येतावदुच्यते। तच्च तेषां शक्यक्रियमेवेत्यत आह—अकार्यातिशयमित्यादि। § 57

020/k

अकार्यातिशयं यत्तु नीरूपमविकारि च।
विकृतावात्महान्याप्तेस्तत्क्रियेत कथं नु तैः॥
१२ ॥§ 59

एवं मन्यते। असत्कार्यकारित्वाभ्युपगमादेवाशक्यक्रियं कुर्वन्तीत्युक्तं भवति। तथाहि—यदसत् तन्नीरूपं निःस्वभावम्, यच्च नीरूपं तच्छशविषाणादिवदकार्यातिशयम्—अनाधेयातिशयम्, यच्च नाधेयातिशयं तदाकाशवदविकारि। तत्तथाभूतमसमासादितविशेषरूपं कथं केनचिच्छक्यते कर्तुम्। अथापि स्यात्सदवस्थाप्रतिपत्तेर्विक्रियत एव तदित्यत आह—विकृतावात्महान्याप्तेरिति। यस्माद्विकृताविष्यमाणायां यस्तस्यात्मा स्वभावो नीरूपाख्यो वर्ण्यते, तस्य हानिः प्राप्नोति। नह्यसतः स्वभावापरित्यागे सति तद्रूपतापत्तिर्युक्ता। परित्यागे वा न तर्हि असदेव सद्रूपतां प्रतिपन्नमिति सिध्येत्। अन्यदेव हि सद्रूपमन्यच्चासद्रूपम्; परस्परपरिहारेण तयोरवस्थितत्वात्। तस्माद्यदसत्तदशक्यक्रियमेव। तथाभूतपदार्थकारित्वाभ्युपगमे हि कारणानामशक्यकारित्वमेवाभ्युपगतं स्यात्। न चाशक्यं केनचित्क्रियते यथा गगनाम्भोरुहम्। अतः शक्तिप्रतिनियमादित्यनुत्तरमेतत्॥ १२॥ § 60

पञ्चमहेतुसमर्थनार्थमाह—कार्यस्यैवमित्यादि। § 61

कार्यस्यैवमयोगाच्च किंकुर्वत्कारणं भवेत्।
ततः कारणभावोऽपि बीजादेर्न विकल्पते॥
१३ ॥§ 63

एवम्—अनन्तरोक्तया नीत्या। यद्वा—यथोक्ताद्धेतुचतुष्टयात्। असत्कार्यवादे सर्वथापि कार्यस्यायोगात्, किंकुर्वद्बीजादि कारणं भवेत्। ततश्चैवं शक्यते वक्तुम्। न कारणं बीजादिरविद्यमानकार्यत्वाद्गगनाब्जवदिति। न चैवं भवति। तस्माद्विपर्यय इति सिद्धं प्रागुत्पत्तेः सत्कार्यमिति॥ १३॥ § 64

स्यादेतद्यद्यपि नाम सत्कार्यमित्येवं सिद्धम्। प्रधानादेवैते कार्यभेदाः प्रवर्त्तन्ते इत्येतत्तु कथं सिध्यतीत्याह—सुखाद्यन्वितमित्यादि। § 65

सुखाद्यन्वितमेतच्च व्यक्तं व्यक्तं समीक्ष्यते।

प्रसादतापदैन्यादिकार्यस्येहोपलब्धितः॥ १४॥§ 67

तत्र प्रधानास्तित्वसाधने पञ्चामी वीतप्रयोगाः परैरुक्ताः। यथोक्त-
म्—भेदानां परिमाणात्समन्वयात् शक्तितः प्रवृत्तेश्च। कारणकार्यविभागाद-
विभागाद्वैश्वरूप्यस्य। कारणमस्त्यव्यक्तम्। इति। अयमर्थः। अस्ति प्रधानम्,
021/k भेदानां परिमाणात्। इह लोके यस्य कर्त्ता भवति तस्य परिमाणं दृष्टम्।
यथा कुलालः परिमितान्मृत्पिण्डात्परिमितं घटं करोति प्रस्थग्राहिणमाढक-
ग्राहिणम्। इदं च महदादि व्यक्तं परिमितं दृष्टम्, एका बुद्धिरेकोऽहङ्कार;
पञ्च तन्मात्राण्येकादशेन्द्रियाणि पञ्चभूतानि (इति)। अतोऽनुमानेन साध-
यामोऽस्ति प्रधानं यत्परिमितं व्यक्तमुत्पादयतीति। यदि प्रधानं न स्यान्निष्प-
रिमाणमिदं व्यक्तं स्यात्। इतश्चास्ति प्रधानम्, भेदानामन्वयदर्शनात्। य-
ज्जातिसमन्वितं हि यदुपलभ्यते, तत्तन्मयकारणसम्भूतम्। यथा घटशरावाद-
यो भेदा मृज्जात्यन्वितास्ते मृदात्मककारणसम्भूताः। सुखदुःखमोहादिजातिस-
मन्वितं चेदं व्यक्तमुपलभ्यते। कुतः ? प्रसादतापदैन्यादिकार्योपलब्धेः।
तथाहि—प्रसादलाघवाभिष्वङ्गोद्धर्षप्रीतयः सत्वस्य कार्यम्। सुखमिति च स-
त्वमेवोच्यते। तापशोषभेदस्तम्भोद्वेगापद्वेगा रजसः कार्यम्। रजश्च दुःख-
म्। दैन्यावरणसादनाध्वंसबीभत्सगौरवाणि तमसः कार्यम्। तमश्च मोह-
शब्देनोच्यते। एषां च महदादीनां प्रसादतापदैन्यादिकार्यमुपलभ्यते। त-
स्मात्सुखदुःखमोहानां त्रयाणामेते सन्निवेशविशेषा इत्यव (नु ?)मीयते। तेन
सिद्धमेषां प्रसादादिकार्यतः सुखाद्यन्वितत्वम्,तदन्वयाच्च तन्मयप्रकृतिसम्भूत-
त्वं सिद्धम्, तत्सिद्धौ च सामर्थ्याद्याऽसौ प्रकृतिस्तत्प्रधानमिति सिद्धमस्ति
प्रधानं भेदानामन्वयदर्शनादिति। इतश्चास्ति प्रधानम्,शक्तितः प्रवृत्तेः। इह
लोके यो यस्मिन्नर्थे प्रवर्त्तते स तत्र शक्तो यथा तन्तुवायः पटकरणे।
अतः साधयामः। प्रधानस्यास्ति शक्तिर्यया व्यक्तमुत्पादयतीति। सा च श-
क्तिर्निराश्रया न संभवति। तस्मादस्ति प्रधानं यत्र शक्तिर्वर्त्तत इति। इत-
श्चास्ति प्रधानम्, कारणकार्यविभागात्। इह लोके कार्यकारणयोर्विभागो
दृष्टः, तथाहि— मृत्पिण्डः कारणं घटः कार्यं सच मृत्पिण्डाद्विभक्तस्वभावः,
तथाहि—घटो मधूदकपयसां धारणसमर्थो, न मृत्पिण्डः। एवमिदं मह-
दादिकार्यं दृष्ट्वा साधयामोऽस्ति प्रधानं यस्मान्महदादिकार्यमुत्पन्नमिति। इत-
श्चास्ति प्रधानम्, वैश्वरूप्यस्याविभागात्। वैश्वरूप्यमिति त्रयो लोका उच्यन्ते।
एते हि प्रलयकाले क्वचिदविभागं गच्छन्ति। तथाहि—पञ्चभूतानि पञ्चसु त-
न्मात्रेष्वविभागं गच्छन्ति, तन्मात्राणि पञ्चेन्द्रियाणि चाहङ्कारे, अहङ्कारो बुद्धौ,
बुद्धिः प्रधाने, तदेवं प्रलयकाले त्रयो लोका अविभागं गच्छन्ति। अवि-
भागो नाम अविवेकः, यथा क्षीरावस्थायामन्यत्क्षीरमन्यद्दधीति विवेको न
022/k शक्यते कर्तुं तद्वत्प्रलयकाले इदं व्यक्तमिदमव्यक्तमिति विवेको न शक्यते
कर्तुम्। अतो मन्यामहेऽस्ति प्रधानं यत्र महदादिलिङ्गविभागं गच्छतीति।
तदत्राचार्येण समन्वयादित्ययमेव हेतुरुक्तः परिशिष्टानामुपलक्षणार्थः। तत्र
सुखादीत्यादिशब्देन दुःखमोहयोर्ग्रहणम्। व्यक्तमिति महदादिभूतपर्यन्तम्।

व्यक्तं समीक्ष्यत इति। स्पष्टमुपलभ्यत इत्यर्थः। कथमित्याह—प्रसादेत्यादि। आदिशब्दःप्रत्येकमभिसम्बध्यते। एतच्चास्माभिः पूर्वमेव व्याख्यातम्॥ १४॥ § 68

एवं समन्वयादित्यस्य हेतोः सिद्धिमुपदर्श्य प्रमाणं रचयन्नाह—तत इत्यादि। § 69

ततस्तन्मयसम्भूतं तज्जात्यन्वयदर्शनात्।
कुटादिभेदवत्तच्च प्रधानमिति कापिलाः॥ १५॥ § 71

तन्मयसम्भूतमिति। सुखादिमयं यत्कारणं तस्मात्सम्भूतमित्यर्थः। अयं च साध्यनिर्देशः। तज्जात्यन्वयदर्शनादिति हेतुः। तया त्रैगुण्यलक्षणया जात्या अनुगतत्वदर्शनादित्यर्थः। कुटादिभेदवदिति। घटादिभेदवत्। यच्च तन्मयं कारणं तत्प्रधानमिति कापिलाः—साङ्ख्या वर्णयन्ति॥ १५॥ § 72

तदत्रेत्यादिना प्रतिविधानमारभते— § 73

तदत्र सुधियः प्राहुस्तुल्या सत्त्वेऽपि चोदना।
यत्तस्यामुत्तरं वः स्यात्तत्तुल्यं सुधियामपि॥ १६॥ § 75

तत्र यत्तावदुक्तं प्रधानादेरमी कार्यभेदास्तद्रूपा एव प्रवर्त्तन्त इति तत्रेदं निरूप्यते। यद्यमी कार्यभेदाः प्रधानस्वभावा एव तत्कथमेषां ततः कार्यतया प्रवृत्तिर्भवति। नहि यद्यस्मादव्यतिरिक्तं तत्तस्य कारणं कार्यं TSP$_{msJ}$:18a वा युक्तम्, भिन्नलक्षणत्वात्कार्यकारणयोः। अन्यथा हीदं कार्यमिदं कारणं वेत्यसङ्कीर्णव्यवस्था कथं भवेत्। ततश्च यद्भवद्भिर्मूलप्रकृतेः कारणत्वमेव, भूतेन्द्रियलक्षणस्य षोडशकस्य गणस्य कार्यत्वमेव,बुद्ध्यहङ्कारतन्मात्राणां च पूर्वोत्तरापेक्षया कार्यत्वं कारणत्वं चेति व्यवस्थानं कृतं तन्न स्यात्। यथोक्तम्— मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः॥ इति। सर्वेषामेव हि परस्पराव्यतिरेकात्कार्यत्वं कारणत्वं वा प्रसज्येत। यद्वाऽऽपेक्षिकत्वात्कार्यकारणभावस्य रूपान्तरस्यचापेक्षणीयस्याभावात्सर्वेषां पुरुषवन्न प्रकृतित्वं नापि विकृतित्वं स्यात्। अन्यथा पुरुषस्यापि प्रकृतिविकारव्यपदेशः स्यात्। आह च— यदेव दधि तत्क्षीरं यत्क्षीरं तद्दधीति च। वदता रुद्रिलेनैव ख्यापिता विन्ध्यवासिता इति। यच्चेदं हेतुमत्त्वादि धर्मयोगि व्यक्तं विपरीतम- 023/k व्यक्तमिति वर्णितं तदपि बालप्रलपितमेव। नहि यद्यस्मादभिन्नस्वभावं तत्तद्विपरीतं युक्तम्, रूपान्तरत्वलक्षणत्वाद्वैपरीत्यस्य। अन्यथा भेदव्यवहारोच्छेद एव स्यात्। ततश्च सत्त्वरजस्तमसां चैतन्यानां च परस्परं भेदाभ्युपगमोनिर्निबन्धन एव स्यात्। सर्वमेव च विश्वमेकरूपं स्यात्। ततश्च स-

होत्पत्तिविनाशप्रसङ्गः, एकयोगक्षेमलक्षणत्वादभेदव्यवस्थानस्य, तस्माद्व्यक्तरूपाव्यतिरिक्तत्वादव्यक्तमपि हेतुमत्त्वादिधर्मयोगि प्राप्नोति व्यक्तस्वरूपवत्, व्यक्तं वा हेतुमत्त्वादिधर्मयुक्तं स्यादव्यक्तरूपाव्यतिरेकात्तत्स्वरूपवदित्येकान्त एव। अन्यथाऽतिप्रसङ्गः स्यात्। किंचान्वयव्यतिरेकनिश्चयसमधिगम्यो लोके कार्यकारणभावः प्रसिद्धः। नच प्रधानादिभ्यो महदाद्युत्पत्तिव्यवहारः। नचापि नित्यस्य कारणभावोऽस्ति। येन प्रधानात्कार्यभेदानामुत्पत्तिः सिद्ध्येत्। नित्यस्य क्रमाक्रमाभ्यामर्थक्रियाविरोधात्। स्यादेतत्—नास्माभिरपूर्वस्वभावोत्पत्त्या कार्यकारणभावोऽभीष्टो येन स्वरूपाभेदे सति सविरुध्यते यावता प्रधानं सर्पकुण्डलादिवन्महदादिरूपेण परिणामं गच्छत्तेषां महदादीनां कारणमिति व्यपदिश्यते, ते च महदादयस्तत्परिणामरूपत्वात्तत्कार्यतयाव्यपदिश्यन्ते। परिणामश्चैकवस्त्वधिष्ठानत्वादभेदेऽपि न विरुध्यत इति। तदेतदसम्यक्। परिणामासिद्धेः। तथाहि परिणामो भवेत्पूर्वरूपपरित्यागाद्वा, भवेदपरित्यागाद्वा। यद्यपरित्यागात्तदाऽवस्थासाङ्कर्यं स्यात्, बृहत्त्वाद्यवस्थायामपि युवत्वाद्यवस्थोपलब्धिप्रसङ्गात्। अथ परित्यागात्तदा स्वभावहानिप्रसङ्गः, ततश्च पूर्वकं स्वभावान्तरं निरुद्धमपूर्वं स्वभावान्तरमुत्पन्नमिति न कस्यचित्परिणामः सिद्ध्येत्। किंच तस्यैवान्यथाभावलक्षणः परिणामो वर्ण्यते, तच्चान्यथात्वमेकदेशेन वा भवेत्, सर्वात्मना वा। न तावदेकदेशेन, एकस्यैकदेशासम्भवात्। नापि सर्वात्मना, तदर्थान्तरोत्पादे पूर्वविनाशप्रसङ्गात्। तस्मान्न तस्यैवान्यथात्वं युक्तम्, स्वभावान्तरोत्पादनिबन्धनत्वात्तस्येति। अथापि स्याद्व्यवस्थितस्य धर्मिणो धर्मान्तरनिवृत्त्या धर्मान्तरप्रादुर्भावः परिणामो वर्ण्यते नतु स्वभावस्यान्यथात्वादिति। तदेतदसम्यक्। तथाहि—सप्रवर्त्तमानो निवर्त्तमानश्च धर्मो धर्मिणोऽर्थान्तरभूतो वा स्यादनर्थान्तरभूतो वा। यद्यर्थान्तरभूतस्तदा धर्मी तदवस्थ एवेति कथमसौ परिणतो नाम। नह्यर्थान्तरभूतयोः पटाश्वयोरुत्पादविनाशे सत्यविचलितात्मस्वरूपस्य घटादेः परिणामो भवत्यतिप्रसङ्गात्। एवं हि पुरुषोऽपि परिणामी स्यात्। तत्सम्बद्धयोर्धर्म- 024/k योरुत्पादवि नाशात्तस्य परिणामो व्यवस्थाप्यते नान्यस्येति चेन्न। सदसतोः सम्बन्धाभावेन तत्सम्बन्धित्वासिद्धेः। तथाहि—सम्बन्धो भवेत्सतो वा, भवेदसतो वा। न तावत्सतस्तस्य, समधिगताशेषस्वभावसम्पत्तेरनपेक्षतया क्वचिदपि पारतन्त्र्यायोगात्। नाप्यसतस्तस्य, सर्वोपाख्याविरहलक्षणतया क्वचिदप्याश्रितत्वानुपपत्तेः। नहि शशविषाणादिः क्वचिदाश्रितो युक्तः। न चापि व्यतिरिक्तधर्मान्तरोत्पादविनाशे सति परिणामो व्यवस्थाप्यते भवद्भिः। किं तर्हि ? यत्रात्मभूतैकस्वभावानुवृत्तिरवस्थाभेदश्च तत्रभवतां परिणामव्यवस्था। नच धर्मिणः सकाशाद्धर्मयोर्व्यतिरेके सति एकस्वभावानुवृत्तिरस्ति। धर्म्येव हि तयोरेक आत्मा स च व्यतिरिक्त इति नात्मभूतैकस्वभावानुवृत्तिः। नचापि प्रवर्त्तमाननिवर्त्तमानधर्मद्वयव्यतिरिक्तो धर्म उपलब्धिलक्षणप्राप्तो दर्शनपथमवतरति कस्यचिदित्यतः स तादृशोऽसद्व्यवहारविषय एव विदुषाम्। अथानर्थान्तरभूत इति पक्षस्तथाप्येकस्माद्धर्मिस्वरूपाद-

व्यतिरिक्तत्वाद्विनाशोत्पादवतोर्द्धर्मयोरपि धर्मिस्वरूपवदेकत्वमेवेति केनाश्रयेण धर्मी परिणतः स्याद्धर्मो वा। अवस्थातुश्च धर्मिणः सकाशादव्यतिरेकाद्धर्मयोरवस्थातृस्वरूपवन्न निवृत्तिर्नापि प्रादुर्भावः। धर्माभ्यां च धर्मिणोऽनन्यत्वाद्धर्मस्वरूपवदपूर्वस्योत्पादः पूर्वस्य च विनाश इति नैकस्य कस्यचित्परिणामः सिद्ध्यति। तस्मान्न परिणामवशादपि भवतां कार्यकारणव्यवहारो युक्त इति। एतच्च स्पष्टमेव दूषणमिति कृत्वा तदुपेक्ष्य यश्चायमसत्कार्यवादे दोषः परैरुक्तस्तं पश्चात्प्रतिविधास्याम इति मन्यमानस्तुल्यदोषापादनव्याजेन सत्कार्यवादमेव तावद्दूषयते—तदत्रेत्यादि। सुधिय इति सौगतास्ते प्राहुः। येयमसदकरणादित्यादिना पञ्चधा चोदना कृता सा सत्त्वेऽपि सत्कार्यवादपक्षेऽपि तुल्या। तथाहि—शक्यमिदमित्थमभिधातुम्। न सदकरणादुपादानग्रहणात्सर्वसंभवाभावात्। शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यमिति। न सत्कार्यमिति व्यवहितेन सम्बन्धः। कस्मात् ? सदक रणादुपादानग्रहणादित्यादेर्हेतोः। यश्चोभयोर्दोषो न तमेकश्चोद्यो युक्त (श्चोदयेदिति ?) भावः। ननु च कथमियं समता भवति। यावता तत्रासदकरणादित्येवं चोदना, अन्यत्र सदकरणादिति। न। अभिप्रायापरिज्ञानात्। अकरणनियतोपादानपरिग्रहादिमात्रविवक्षया हीदमुक्तम्। सत्कार्यवादेप्यकरणादीनां तुल्यत्वात्। तस्यां च चोदनायां यदुत्तरं भवतां सत्कार्यवादिनां तदसत्कार्यवादिनां सुधियां बौद्धानां भविष्यति॥ १६॥ § 76

025/k

कथमसौ तुल्येत्याह—यदीत्यादि। § 77

यदि दध्यादयः सन्ति दुग्धाद्यात्मसु सर्वथा।
तेषां सतां किमुत्पाद्यं हेत्वादिसदृशात्मनाम्॥
१७॥ § 79

सदकरणादित्येतत्समर्थनार्थमिदम्। यदि दुग्धाद्यात्मसु क्षीरादीनां स्वभावेषु दध्यादिलक्षणानि कार्याणि सर्वथा सर्वात्मना विशिष्टरसवीर्यविपाकादिना विभक्तेनरूपेण मध्यावस्थावत्सन्ति, तदा तेषां सतां किमुत्पाद्यं रूपमस्ति, येन ते कारणैर्दुग्धादिभिर्जन्याः स्युः। हेत्वादिसदृश आत्मा येषामिति विग्रहः। हेतुः—प्रकृतिः, आदिशब्देन चैतन्यम्, तेषां च मध्यावस्थाभाव्यपुनर्जन्यं निष्पन्नं रूपं गृह्यते। एतेन कार्यकारणभाव(भङ्ग)प्रसङ्गसाधनं प्रमाणद्वयं सूचितम्॥ १७॥ § 80

साम्प्रतं स्फुटमेव प्रमाणयन्नाह—हेतुजन्यमित्यादि। § 81

हेतुजन्यं न तत्कार्यं सत्तातो हेतुवित्तिवत्।

अतो नाभिमतो हेतुरसाध्यत्वात्परात्मवत्॥ १८॥ § 83

हेतुः—प्रधानं लोकप्रसिद्धं च क्षीरादि। तत्कार्यमिति। महदादि लोकप्रसिद्धं च दध्यादि। सत्तात इति। सत्वात्। हेतुवित्तिवदिति। हेतुः—प्रधानं लोकप्रसिद्धं च क्षीरादि। वित्तिः—चैतन्यम्। ताभ्यां तुल्यं वर्तत इति हेतुवित्तिवत्। प्रयोगः— यत्सर्वाकारेण सन्न तत्केनचिज्जन्यम्, यथा प्रकृतिश्चैतन्यं वा। सदेव च कार्यं मध्यावस्थायाम्। सच्च सर्वात्मना परमतेन दध्यादीति व्यापकविरुद्धोपलब्धिप्रसङ्गः। न वाऽनैकान्तिकताहेतोः। अनुत्पाद्यातिशयस्यापि जन्यत्वे सर्वेषां जन्यत्वप्रसङ्गोऽनवस्थाप्रसङ्गश्च बाधकं प्रमाणम्। जनितस्यापि पुनर्जन्यत्वप्रसङ्गात्। एवं तावत्कार्यत्वाभिमतानामकार्यत्वप्रसङ्गापादनं कृतम्। इदानीं कारणाभिमतानामकारणत्वप्रसङ्गापादनं कुर्वन्नाह—अतो नाभिमत इत्यादि। अभिमतः—पदार्थ इति शेषः। तेनायमर्थो भवति। मूलप्रकृत्यादिर्बीजदुग्धादिश्चाभिमतः पदार्थो विवक्षितस्य महदादेर्दध्यादेश्च न हेतुः—जनकव्यवहारयोग्यो न प्राप्नोतीत्यर्थः। कस्मात् ? असाध्यत्वात्—नास्य साध्यमस्तीत्यसाध्यस्तद्भावस्तत्वम्। एतच्चानन्तरोक्तात्कार्यत्वप्रतिषेधात्सिद्धम्। अतएवात इत्युक्तम्। परात्मवदिति। अन्यस्वभाववत्। अकारणाभिमतपदार्थस्वभाववदित्यर्थः। अकारणाभिमतश्च पदार्थश्चैतन्यम्। न प्रकृतिर्न विकृतिः पुरुष इति वचनात्। प्रयोगः—य- 026/k दविद्यमानसाध्यं न तत्कारणं यथा चैतन्यम्। अविद्यमानसाध्यश्चाभिमतः पदार्थ इति व्यापकानुपलब्धिः। एतच्च द्वयमपि प्रसङ्गसाधनमतो नोभयसिद्धोदाहरणेन किंचित्। यस्तु मन्यते साङ्ख्यः पुरुषस्यापिप्रतिबिम्बोदयन्यायेन भोगं प्रति कर्तृत्वमस्तीति। तं प्रत्येवं व्याख्या। परश्चासावात्मा च—मुक्त इत्यर्थः। तस्य हि मुक्तत्वाद्भोगं प्रत्यपि कर्तृत्वं नास्तीति नोदाहरणासिद्धिः॥ १८॥ § 84

अथेत्यादिना परमते हेत्वोरसिद्धिमाशङ्कते। § 85

अथास्त्यतिशयः कश्चिदभिव्यक्त्यादिलक्षणः।
यं हेतवः प्रकुर्वाणा न यान्ति वचनीयताम्॥
१९॥ § 87

तत्र यदि प्रथमो हेतुः सर्वात्मनाऽभिव्यक्त्यादिरूपेणापि सत्वादिति सविशेषणः क्रियते, तदा न सिद्ध्यति। नह्यस्माभिरभिव्यक्त्यादिरूपेणापि सत्वमिष्यते कार्यस्य। किं तर्हि ?। शक्तिरूपेण। अथ सामान्येन निर्विशेषणस्तदाऽनैकान्तिकः, यस्मादभिव्यक्त्यादिलक्षणस्यातिशयस्योत्पद्यमानत्वात्, न सर्वस्य कार्यत्वप्रसङ्गो भविष्यति। अतएव द्वितीयोऽपि हेतुरसिद्धः, साध्यस्य विद्यमानत्वात्। अभिव्यक्त्यादिलक्षण इति। आदिशब्देनोद्रेकाद्यवस्थाविशेषपरिग्रहः। यमिति—अतिशयम्। वचनीयतामिति—वाच्यताम्। नाभिमतो हेतुरसाध्यत्वादित्यादिर्दोषो न भवतीति यावत्॥ १९॥ § 88

प्रागासीदित्यादिना प्रतिविधत्ते— § 89

प्रागासीद्यद्यसावेवं न किंचिद्दत्तमुत्तरं।
नो चेत्सोऽसत्कथं तेभ्यः प्रादुर्भावं समश्नुते॥
२० ॥§ 91

तत्र विकल्पद्वयम्, कदाचिदसावतिशयोऽभिव्यक्त्याद्यवस्थातः प्राक् प्रकृत्यवस्थायामप्यासीद्वा न वा, यद्यासीत्तदा भवद्भिर्द्वयोरपि हेत्वोर्न किंचिदसिद्धत्वादिकमुक्तमुत्तरम्, नो चेत्प्रागासीदेवमपि सोऽतिशयः कथं तेभ्यो हेतुभ्यः प्रादुर्भावमश्नुवीत,असदकारणादिति भवतां न्यायान्न युक्तमेतदित्यभिप्रायः॥ २०॥ § 92

एवं तावत्सदकरणादित्ययं हेतुः समर्थितः। साम्प्रतमुपादानपरिग्रहादित्यादिहेतुचतुष्टयसमर्थनार्थमाह—नातः साध्यमित्यादि। § 93

नातः साध्यं समस्तीति नोपादानपरिग्रहः।
नियतादपि नो जन्म न च शक्तिर्न च क्रिया॥
२१ ॥§ 95

यथोक्तया नीत्या साध्यस्याभावादुपादानपरिग्रहो न प्राप्नोति, तत्साध्यफलवाञ्छ यैव तेषां प्रेक्षावद्भिः परिग्रहात्। नियतादेव क्षीरादेर्दध्यादीनां ज- 027/k
न्मेत्येतदपि न प्राप्नोति, साध्यस्यासंभवादेव। एतच्च सर्वसंभवाभावादित्येतस्य समर्थनम्। तथाहि—सर्वस्मात्संभवाभाव एव नियताज्जन्मेत्युच्यते, तच्च सत्कार्यवादपक्षे साध्याभावान्न युज्यते। तथा शक्तस्येति शक्यकरणमित्येतदपि द्वयं न युज्यते। साध्यस्याभावादेव। यदि हि केनचित्किंचिदभिनिर्वर्त्येत तदा निर्वर्त्तकस्य शक्तिर्व्यवस्थाप्यते। निवर्त्त्यस्य च करणं सिध्येत्। नान्यथा। तद्दर्शयति नच शक्तिर्नच क्रियेति॥ २१॥ § 96

कारणभावोऽपि पदार्थानां न युक्तः, साध्यभावादेव। तद्दर्शयति—सर्वात्मनेत्यादि। § 97

सर्वात्मना च निष्पत्तेर्न कार्यमिह किंचन।
कारणव्यपदेशोऽपि तस्मान्नैवोपपद्यते॥ २२॥§ 99

एतच्च कारणभावादित्येतस्य हेतोः समर्थनम्। नचैवं भवति, तस्मान्न सत्कार्यमिति सर्वहेतुषु प्रसङ्गप्रत्ययो योज्यः॥ २२॥ § 100

भूयः प्रकारान्तरेण सत्कार्यवादं दूषयन्नाह—सर्वं चेत्यादि। § 101

सर्वं च साधनं वृत्तं विपर्यासनिवर्तकं।
निश्चयोत्पादकं चेदं न तथा युक्तिसङ्गतम्॥
२३ ॥§ 103

वृत्तमिति। प्रवृत्तम्। विपर्यासग्रहणेन संशयोऽपि गृह्यते, तस्योभयांशावलम्बेनारोपकत्वसंभवात्। सर्वमेव हि साधनं स्वविषये प्रवृत्तं द्वयं करोति। प्रमेयार्थविषये प्रवृत्तौ संशयविपर्यासौ निवर्त्तयति, निश्चयं च तद्विषयमुत्पादयति। तदेतत्सत्कार्यवादे युक्त्या न सङ्गच्छते॥ २३॥ § 104

कथमित्याह—न सन्देहेत्यादि। § 105

न सन्देहविपर्यासौ निवर्त्त्यौ सर्वदा स्थितेः।
नापि निश्चयजन्मास्ति तत एव वृथाऽखिलम्॥
२४ ॥§ 107

तथाहि—सन्देहविपर्यासौ भवतां मतेन चैतन्यात्मकौ वा स्यातां बुद्धिमनःस्वभावौ वा। पक्षद्वयेऽपि न तयोर्निवृत्तिः संभवति। चैतन्यबुद्धिमनसां नित्यत्वेनतयोरपि नित्यत्वात्। नापि निश्चयोत्पत्तिः साधनात्संभवति। तत एव सर्वदा स्थितेः कारणात्। तस्माद्यदेतत्साधनमुक्तं भवता तदखिलं सर्वमेव वृथा। एतेन स्ववचनविरोध उद्भावितो भवति। तथाहि—निश्चयोत्पादनाय
028/k साधनं ब्रुवता नि श्चयस्यासत उत्पत्तिरङ्गीकृता भवेत्। सत्कार्यमिति च प्रतिज्ञया सा निषिद्धेति स्ववचनव्याघातः॥ २४॥ § 108

अथाऽपि निश्चयोऽभूतस्समुत्पद्येत साधनात्।
ननु तेनैव सर्वेऽमी भवेयुर्व्यभिचारिणः॥ २५ ॥§ 110

अथ माभूत्साधनप्रयोगवैयर्थ्यमिति। निश्चयोऽभूतोऽसन्नेव साधनादुत्पद्यत इत्यङ्गीक्रियते। एवं तर्हि, असदकरणादित्यादेर्हेतुगणस्य समस्तस्यैवानैकान्तिकता प्राप्नोति, निश्चयवदसतोऽप्युत्पत्त्यविरोधात्। ततश्च यथा निश्चयस्यासतोऽपि करणं तन्निष्पत्तये च यथा विशिष्टसाधनपरिग्रहः, यथा च तस्य न सर्वस्मात्साधनाभासादेः संभवः, यथा चासावसन्नपि शक्तैर्हेतुभिः क्रियते, तत्रच यथा हेतूनां कारणभावोऽस्ति, तथाऽन्यत्रापि भविष्यति॥ २५॥ § 111

अव्यक्तो व्यक्तिभाक्तेभ्य इति चेद्व्यक्तिरस्य का।

न रूपातिशयोत्पत्तिरविभागादसङ्गतेः॥ २६॥§ 113

अथापि स्याद्यद्यपि प्राक्साधनप्रयोगात्सन्नेव निश्चयः, तथापि न साधनवैयर्थ्यम्, यतः प्रागनभिव्यक्तोऽसौ पश्चात्तेभ्यः साधनेभ्योऽभिव्यक्तिमासादयति।तस्मादभिव्यक्त्यर्थं साधनानि व्याप्रियन्त इति नानर्थक्यमेषामिति। तदेतदयुक्तम्।व्यक्तेरसिद्धत्वात्तथाहि—व्यक्तिः स्वभावातिशयोत्पत्तिर्वा भवेत्, यद्वा तद्विषयं ज्ञानम्, तदुपलम्भावरणापगमो वा। तत्र न तावत्स्वभावातिशयोत्पत्तिः। तथाहि— असौ स्वभावातिशयो निश्चयस्वरूपादपृथग्भूतो वा, पृथग्भूतो वा। यद्यपृथग्भूतस्तदा तस्य निश्चयादविभागादपृथक्त्वान्निश्चयस्वरूपवत्सर्वदैवावस्थितेर्नोत्पत्तिर्युक्ता। अथ पृथग्भूतः, एवमपि तस्यासाविति सम्बन्धानुपपत्तिः। तथाहि—आधाराधेयलक्षणो वा सम्बन्धो भवेत्, जन्यजनकभावलक्षणो वा। न तावदाद्यः परस्परानुपकार्योपकारकयोस्तदसंभवात्। उपकारे वा तस्याप्युपकारस्य व्यतिरेकित्वे सम्बन्धासिद्धेरनवस्थाप्रसङ्गात्। अव्यतिरेकित्वे च साधनप्रयोगवैयर्थ्यम्, निश्चयादेवोपकाराव्यतिरिक्तस्यातिशयस्योत्पत्तेः। अमूर्त्तत्वाच्चातिशयस्याधःप्रसर्पणासंभवान्न तस्य कश्चिदाधारो युक्तः, अधोगतिप्रतिबन्धकत्वेनाधारस्य व्यवस्थानात्। नापि जन्यजनकभावलक्षणः, सर्वदैव निश्चयाख्यस्य कारणस्य सन्निहितत्वान्नित्यमतिशयोत्पत्तिप्रसङ्गात्। नच साधनप्रयोगापेक्षया निश्चयस्यातिशयोत्पादकत्वं युक्तम्। अनुपकारि ण्यपेक्षानुपपत्तेः। उपकारित्वे वा पूर्ववद्दोषोऽनवस्था च। अपिच 029/k योऽसावतिशयः पृथग्भूतः क्रियते स किमसन्नाहोस्वित्सन्निति विकल्पद्वयमत्राप्यवतरत्येव। तत्रासत्त्वेपूर्ववत्साधनानामनैकान्तिकतापत्तिः। सत्त्वे च साधनवैयर्थ्यम्। तत्राप्यभिव्यक्ताविष्यमाणायां केयमभिव्यक्तिरित्यनवस्थाप्रसङ्गो दुर्निवारः। तस्माद्व्यतिरेकपक्षेऽप्यसङ्गतेरसम्बन्धान्न रूपातिशयोत्पत्तिर्युज्यते॥ २६॥ § 114

न तद्विषयसंवित्तिर्नोपलम्भावृतिक्षयः।
नित्यत्वादुपलम्भस्य द्वितीयस्याप्यसंभवात्॥
२७॥§ 116

नापि तद्विषयज्ञानोत्पत्तिलक्षणाभिव्यक्तिर्युक्ता, नित्यत्वात्तद्विषयायाः संवित्तेः। तथाहि—याऽसौ तद्विषया संवित्तिः सा भवतः सत्कार्यवादिनो मतेन नित्यैवेति किं तस्या उत्पाद्यं (उत्पाद्यत्वं ?) स्यात्। द्वितीयस्योपलम्भस्यासंभवाच्च न तद्विषयज्ञानोत्पत्तिलक्षणाभिव्यक्तिर्युक्ता। अपिशब्दः समुच्चये, भिन्नक्रमश्च, असम्भवादित्यस्यानन्तरं द्रष्टव्यः। तेनैतदुक्तं भवति। एकैव भवतां मतेन संवित्, आसर्गप्रलयादेका बुद्धिरिति सिद्धान्तात्, सैव च निश्चयः, तत्र कोऽपरस्तदुपलम्भोऽभिव्यक्त्याख्योऽस्ति, यः साधनैः क्रियेत। स्यादेतत्, न बुद्धिस्वभावा तद्विषयसंवित्तिः, किं तर्हि ?। मनःस्वभावेति। तदसम्यक्, बुद्धिरुपलब्धिरध्यवसायो मनःसंवित्तिरित्यादीनामनर्थान्तरत्वात्। एतच्च

पश्चान्निवेदयिष्यते। नापि तद्विषयोपलम्भावरणक्षयलक्षणाभिव्यक्तिः, अतएव कारणद्वयात्। तथाहि—यत्तदुपलम्भावरणं तस्य नित्यत्वान्न क्षयः सम्भवति। नापि तिरोभावलक्षणः क्षयो युक्तः, अत्यक्तपूर्वरूपस्य तिरोभावासम्भवात्। द्वितीयस्य चोपलम्भस्यासम्भवान्नोपलम्भावरणमस्ति। नह्यसत आवरणं युक्तम्, वस्तुसद्विषयत्वात्तस्य। तस्मान्न तत्क्षयो युक्तः। अथवा—नित्यत्वादिति तद्विषयायाः संवित्तेर्नित्यत्वान्नावरणं सम्भवति तदसम्भवान्न क्षयो युक्त इत्यर्थः। न चाप्यावरणक्षयः केनचित्क्रियते। तस्य निःस्वभावत्वात्। न केवलं सत्कार्यवादपक्षे साधनप्रयोगवैयर्थ्यम्, बन्धमोक्षाभावप्रसङ्गः सर्वलोकव्यवहारोच्छेदप्रसङ्गश्चानिवार्यः। तथाहि—प्रधानपुरुषयोः कैवल्योपलम्भलक्षणस्य तत्त्वज्ञानस्योत्पत्तौ सत्यां मोक्षो भवद्भिरिष्यते। तच्च तत्त्वज्ञानं सर्वदावस्थितमेवेति मुक्ताः सर्व एव देहिनः स्युः, अतो न बन्धः। मिथ्याज्ञानवशाच्च बन्ध इष्यते तस्य च सर्वदाऽवस्थितत्वेन सर्वदा सर्वेषां बद्धत्वात्कुतो मोक्षः,
030/k लोकश्च हिताहितप्राप्तिपरिहारार्थं प्र वर्त्तते। सत्कार्यवादपक्षे च न किंचिदप्राप्यमहेयं वास्तीति निरीहमेव जगत्स्यात्,अन्ततस्सर्वव्यवहारोच्छेदप्रसङ्गः॥ २७॥ § 117

एवं तावत्सत्कार्यवादं निराकृत्यासत्कार्यवादपक्षभाविनो दोषान्परिहर्तुमाह—त्रैगुण्यस्येत्यादि। § 118

त्रैगुण्यस्याविभेदेऽपि न सर्वं सर्वकारकम्।
यद्वत्तद्वदसत्त्वेऽपि न सर्वं सर्वकारकम्॥ २८॥ § 120

सत्कार्यनिषेधादेव सामर्थ्यादसत्कार्यमिति सिद्धमेव, सदसतोरन्योन्यपरिहारस्थितलक्षणत्वेन प्रकारान्तरासम्भवात्। तथाऽपि परोपन्यस्तस्य दूषणस्य दूषणाभासताप्रतिपादनायोच्यते। तत्र यत्तावदुक्तम् कर्तुं तन्नैव शक्येत नैरूप्या दिति, तदसिद्धम्, वस्तुस्वभावस्यैव क्रियमाणत्वाभ्युपगमात्। तस्य च वस्तुस्वभावस्य नीरूपत्वासिद्धेः। प्रागुत्पत्तेस्तन्निःस्वभावमेवेति चेन्न। तस्यैव निःस्वभावत्वायोगात्। नहि स्वभाव एव निःस्वभावो युक्तः, वस्तुस्वभावप्रतिषेधलक्षणत्वान्निःस्वभावत्वस्य। नचाप्युत्पादात्प्राक् तदस्ति। क्रियमाणं वस्तु येन तदेव निःस्वभावं सिद्ध्येत्। अथ वस्तुविरहलक्षणमेव नीरूपं धर्मिणं पक्षीकृत्य नैरूप्यादिति हेतुः क्रियते, तदा सिद्धसाध्यता। नहि वस्तुविरहः केनचित्क्रियमाणतयाऽभ्युपगतः। अपि च नैकान्तिकोऽपि हेतुः। विपक्षे बाधकप्रमाणानुपदर्शनात्। यतः कारणशक्तिप्रतिनियमात्किंचिदेवासत्क्रियते यस्योत्पादकं कारणमस्ति, यस्य तु वियदब्जादेर्नास्ति कारणं तन्न क्रियत इत्यनेकान्त एव। नहि सर्वं सर्वस्य कारणमिष्टम्। नापि यद्यदसत्तत्तत्क्रियत एवेतिव्याप्तिरिष्टा। किंतर्हि ?। यक्रि(?)यते तत्प्रागुत्पत्तेरसदेवेति। स्यादेतत्तुल्येप्यसत्कारित्वे कारणानां किमिति सर्वं सर्वस्यासतः कारणं न भवतीति। तदेतद्भवतोऽपि समानं चोद्यम्, तुल्ये हि सत्कारित्वे किमिति

सर्वं सर्वस्य सतः कारणं न भवतीति। नच भवतां मतेन किंचिदसदस्ति
येन तन्न क्रियेत। कारणशक्तिप्रतिनियमात्सदपि शशविषाणादि न क्रिय-
त इति चेत्। तदितरत्रापि समानम्। अपिच यथा भवतांत्रैगुण्यस्य सर्व-
त्राविशेषेऽपि न सर्वं सर्वकारकं भवति, शक्तिप्रतिनियमात्। सर्वस्य कारकं
सर्वं वा कारकमस्येति विग्रहः। तद्वदसत्वेपि कार्यस्यान्वयिनो वा कस्य-
चिद्रूपस्य न सर्वं सर्वकारकं भविष्यति। एतच्चाभ्युपगम्योक्तं यद्वत्तद्वदिति। न
पुनः साम्यमिति। तथाहि—सत्यपि भेदे कस्यचित्कश्चिदेव हेतुर्भवति। स्व-
हेतुपरम्परास मायातत्वात्तथाभूतस्वभावभेदप्रतिनियमस्येत्यविरुद्धम्। अभेदे 031/k
त्वेकस्यैकस्मिन्नेव काले हेतुत्वमहेतुत्वं च परस्परविरुद्धं कथं सम्भाव्य-
ते। विरुद्धधर्माध्यासनिबन्धनत्वाद्वस्तुभेदस्य। तथाचाह— भेदे हि कारणं
किंचित् वस्तुधर्मतया भवेत्। अभेदे तु निरुध्येते तस्यैकस्य क्रियाक्रिये॥
इति॥ २८॥ § 121

अवधीनामित्यादिना परः शक्ति(त्त्य ?) नियमं सम्भावयन्प्रत्यवतिष्ठते— § 122

अवधीनामनिष्पत्तेर्नियतास्ते न शक्तयः।
सत्वे तु नियमस्तासां (युक्तः)सावधिको न नु॥
२९ ॥§ 124

त इति तव बौद्धस्यासत्कार्यवादिनः, न कारणानां नियताः शक्तयो घटन्ते। कस्मात् ? अवधीनां कार्यभूतानामनिष्पत्तेः। नह्यवधिमन्तरेणावधिमतोऽस्ति सद्भावः प्रयोगः। ये सद्भूतकार्यावधिशून्या न ते नियतशक्तयो यथा शशविषाणादयः, सद्भूतकार्यावधिशून्याश्च शालिबीजादयो भावा इति व्यापकानुपलब्धिः। स्वपक्षस्य सौस्थित्यं दर्शयन्नाह—सत्व इति। कार्याणां सद्भावे सतीत्यर्थः। तासामिति शक्तीनाम्॥ २९॥ § 125

नैवमित्यादिना हेतोरनैकान्तिकतामाह— § 126

नैवं तेषामनिष्पत्त्या माभूच्छब्दस्तथापरम्।
सर्वोपाधिविविक्तस्य वस्तुरूपस्य न क्षतिः॥
३० ॥§ 128

तथाहि—तेषामवधीनामनिष्पत्तौ यदि परं क्षीरस्य दध्युत्पादने शक्तिरित्येष व्यपदेशो माभूत्, यत्पुनस्तथाविधं सर्वोपाधिशून्यमनध्यारोपितं वस्तु यदनन्तरमदृष्टपूर्वं वस्त्वन्तरमुदेति, तस्याप्रतिषेध एव॥ ३०॥ § 129

५ मनध्यारोपितं] Correction : ;
मध्यारोपितं (sic !)मनध्यारोपितं

स्यादेतद्यत्र शब्दविकल्पानामप्रवृत्तिस्तत्र वस्तुस्वभावोऽपि निवर्त्तत एवेत्याह—ननामरूपमित्यादि। § 130

न नाम रूपं वस्तूनां विकल्पा वाचकाश्च यत्।
विश्वकल्पाः प्रवर्त्तन्ते यथाऽभ्यासमभेदिनि॥
३१ ॥§ 132

स्वभाव एव हि व्यापको निवर्त्तमानः स्वं व्याप्यं निवर्त्तयति, कारणं वा कार्यं, प्रतिबन्धसद्भावात्। नत्वन्योऽतिप्रसङ्गात्। नच क्षीरस्य दध्नि शक्तिरित्येवमादिनामव्यपदेशो वस्तूनां रूपं स्वभावो भवति। येन तन्निवर्तमानं तथाविधं वस्तु निवर्त्तयेत्। नामग्रहणमुपलक्षणम्। विकल्पोऽपि 032/k तत्संसृष्टो गृह्यते। रूपग्रहणं चोपलक्ष णम्। (कारणं गृह्यते) कारणमपि वस्तूनां नाम न भवत्येव, तदन्तरेणापि वस्तुसम्भवात्। अत्र कारणमाह—विकल्पा इत्यादि। यत्—यस्मात्, नामसंसर्गभाजो विकल्पा वाचकाश्च शब्दा विश्वकल्पाः—नानाप्रकाराः, अभेदिनि—निरंशैकस्वभाववस्तुनि यथाभ्यासं वर्त्तन्ते। तथाहि—एक एव शब्दादिर्भावो नित्यादिरूपेण भिन्नसमयस्थायिभिः प्रवादिभिर्विकल्प्यते व्यपदिश्यते च। तेषां च शब्दविकल्पानां तादात्म्ये तद्विषयत्वे वा वस्तुनश्चित्रत्वं प्राप्नोति। वस्तुस्वरूपवदेव वा शब्दविकल्पानामेकरूपत्वप्रसङ्गः। नह्येकं चित्रमिति युक्तमतिप्रसङ्गात्। तस्माच्छक्तिप्रतिनियमात्किंचिदेवासत्क्रियते न सर्वमित्यतो नैरूप्यादित्यनैकान्तिकोऽपि हेतुः। अतएवोपादानग्रहणादित्यादिकस्य हेतुचतुष्टयस्यानैकान्तिकत्वम्। तथाहि—यदि कार्यसत्ताकृतमेव प्रतिनियतोपादानग्रहणं क्वचित्सिद्धं स्यात्तदैतत्स्यात्। यावता कारणशक्तिनियमकृतमपि नियतोपादानग्रहणं युज्यत एव। कारणशक्तिप्रतिनियमादेव च न सर्वस्य सर्वस्मात्सम्भवः, सर्वस्य सर्वार्थक्रियाकारित्वस्वभावासम्भवात्। यत्पुनरुक्तमकार्यातिशयं यत्त्वित्यादि तदप्यभिप्रायापरिज्ञानादुक्तम्। नह्यस्माभिरभावः क्रियत इत्यभिधीयते। येन विकृतौ सत्यां तस्य स्वभावहानिप्रसङ्गः स्यात्। किंतु वस्त्वेव क्रियत इति पूर्वं प्रतिपादितम्। तच्च वस्तु उपलब्धिलक्षणप्राप्तस्यानुपलब्धेर्निष्पन्नस्य च कार्यत्वानुपपत्तेः प्रागुत्पादादसदित्युच्यते, यस्य च कारणस्य सन्निधानमात्रेण तत्तथाभूतमुदेति तेन तत्क्रियत इति व्यपदिश्यते, नतु व्यापारसमावेशात्केनचित्किंचित्क्रियते, निर्व्यापारत्वात्सर्वधर्माणाम्। नाप्यसन्नाम किंचिदस्ति, यद्विक्रियते, न वा वस्तुस्वभावः, प्रतिषेधमात्रलक्षणत्वादसत्वस्य। अपिच यद्यकार्यातिशयत्वादसन्न क्रियत इत्यभिधीयते। सदपि च स्वभावनिष्पत्तेरकार्यातिशयमेवेति तत्कथं क्रियते। तस्माच्छक्तस्य शक्यकरणादित्येषोनैकान्तः। असत्कार्यवादे च कारणभावस्य युज्यमानत्वात्कारणभावादित्ययमप्यनैकान्तिकः। यद्वा पूर्वं सतः कार्यत्वासम्भव-

स्य प्रतिपादितत्वात्, असत्कार्यवाद एव चोपादानग्रहणादिनियमस्य युज्यमानत्वात्, उपादानग्रहणादित्यादेर्हेतुचतुष्टयस्य विरुद्धता; साध्यविपर्ययसाधनात्॥ ३१॥ § 133

ननु यद्यसदेवोत्पद्यत इति भवतां मतं तत्कथं सूत्रे सदसतोरुत्पादः प्रतिषिद्धः। यथोक्तम्, अनुत्पन्ना महामते सर्वधर्माः, सदसतोरनुत्पन्नत्वात् इति अत्राह—उत्पाद इत्यादि। § 134

033/k

उत्पादो वस्तुभावस्तु सोऽसता न सता तथा।
सम्बध्यते कल्पिकया केवलं त्वसता धिया॥
३२॥ § 136

तुशब्दोऽवधारणार्थः। वस्तूनां पूर्वापरकोटिशून्यक्षणमात्रावस्थायी स्वभाव एवोत्पाद इत्युच्यते। भेदान्तरप्रतिक्षेपेण तन्मात्रजिज्ञासायाम्। न-तु वैभाषिकविकल्पिताजातिः संस्कृतलक्षणम्। तस्याः प्रतिषेत्स्यमानत्वात्। नापि वैशेषिकपरिकल्पितः सत्तासमवायः स्वकारणसमवायो वा, तयोरपि निषेत्स्यमानत्वात्। परमतेन च तयोर्नित्यत्वात्। नित्यस्य च जन्मानुपपत्तेः। यथोक्तम्—सत्तास्वकारणाश्लेषकरणात्कारणं किल। सा सत्ता स च सम्बन्धो नित्यौ कार्यमथेह किम्॥ इति। स एवमात्मक उत्पादो नासता तादात्म्येन सम्बध्यते। सदसतोर्विरोधात्। नह्यसद्भवति।नापि सता पूर्वभाविना सम्बध्यते। तस्य पूर्वमसत्वात्। कथमिदानीमसत्कार्यवादिनो यूयमित्याह—कल्पिकयेत्यादि। कल्पिकया धिया कर्तृभूतया करणभूतया वा, केवलमसता कर्त्रा सम्बध्यते—सम्बन्धमुपनीयत इत्यर्थः। नह्यसन्नाम किंचिदस्ति यदुत्पत्तिमाविशेत्, किं तु काल्पनिकोऽयं व्यवहारो यदसदुत्पद्यत इति यावत्॥ ३२॥ § 137

किं पुनरिह कल्पनाया बीजं येनायमेवं व्यवहार इष्यत इत्याह—यदिदमित्यादि। § 138

यदिदं वस्तुनो रूपमेकानन्तरमीक्ष्यते।
प्रागासीन्नेति तद्बीजं प्राग्भूते त्विदमस्ति न॥
३३॥ § 140

यदेतदेकस्य प्रतिनियतस्य कस्यचित्पदार्थस्यानन्तरमदृष्टपूर्वं वस्तुरूपमुपलभ्यते, तन्मध्यावस्थातः प्राङ्नासीत्, उपलब्धिक्षणप्राप्तस्यानुपलब्धेः। तस्मादिदं प्रागसत्समुत्पद्यत इत्यस्याः कल्पनाया बीजम्। कस्मादित्याह—प्राग्भूत इत्यादि। मध्यावस्थातः प्राक्, मध्यावस्थातद्भूते विद्यमाने सति

वस्तुरूपे, नास्तीदं कल्पनानिबन्धनमुत्पद्यत इति। तथाहि—उत्पद्यत इत्यनेन मध्यावस्थभाव्येव प्रतिनियतं स्वरूपमुच्यते। यदिच तस्य प्रागपि भावः स्यात्तदा तस्य मध्यावस्थाभाव्येवेत यदेतन्नियतं स्वरूपं तस्य हानिः स्यात्। आकाशवत्सर्वदाऽवस्थितस्य पूर्वापरमध्यावस्थाभावात्। ततश्च सर्वदा सर्वमुत्पद्यत इत्येवं व्यपदिश्येत, विशेषाभावात्॥ ३३॥ § 141

पुनरपि सत्कार्यवादं प्रकारान्तरेण दूषयन्नाह—क्षीरादिषु चेत्यादि। § 142

क्षीरादिषु च दध्यादि शक्तिरूपेण यन्मतम्।
का शक्तिस्तत्र दध्यादि यदि दृश्येत दुग्धवत्॥
३४॥§ 144

034/k

कारणे कार्यमस्तीति यदुच्यते भवद्भिस्तत्र कोऽर्थोऽभिप्रेतः। किं व्यक्तिरूपेण ? तन्न। क्षीराद्यवस्थायामपि दध्यादीनां पश्चाद्वदुपलब्धिप्रसङ्गात्। अथ शक्तिरूपेण ? तथाऽपि यत्तच्छक्तिरूपं दध्यादेः कार्यरूपादुपलब्धिलक्षणप्राप्तादन्यत्, आहोस्वित्तदेव। यदि तदेव तदा पूर्ववदुपलब्धिप्रसङ्गः॥ ३४॥ § 145

अन्यच्चेत्कथमन्यस्य भावेऽभक्त्यान्यदुच्यते।
नहि सत्त्वस्य सद्भावः सद्भावो दुःखमोहयोः॥
३५॥§ 147

अथान्यदिति पक्षः तदा कारणात्मनि कार्यमस्तीति पक्षस्त्यक्तो भवेत्; कार्यव्यतिरिक्तस्य शक्त्याख्यस्य पदार्थान्तरस्य भावाभ्युपगमात्। तथाहि—यदेवाविर्भूतं विशिष्टरसवीर्यविपाकादिगुणोपेतं रूपं तदेव दध्यादिकं कार्यमुच्यते। तच्च क्षीरावस्थायामुपलम्भयोग्यस्यानुपलब्धेरसद्व्यवहारविषयः। यच्चान्यदस्ति शक्तिरूपं तत्कार्यमेव न भवति। न चान्यस्य भावेऽन्यदस्त्यतिप्रसङ्गात्। ननु चायुर्घृतम्, नड्वलोदकं पादरोग, इत्यन्यस्य सद्भावेऽन्यदुच्यमानं दृष्टमेवेत्याह—अभक्त्येति। अभक्त्या—अनुपचारेणेत्यर्थः। कारणे हि कार्योपचारादायुर्घृतमित्युच्यते। न मुख्यतः।यदि तु भवताऽप्युपचारात्कारणे कार्यमस्तीत्युच्यते, तदा न कश्चिद्विरोधः। मुख्यतस्तु विरोध उच्यते। एतदेव दृष्टान्तेनोपपादयन्नाह—नहीत्यादि। नहि यदेव सत्त्वरूपं तदेव दुःखमोहयोर्भवद्भिर्व्यवस्थाप्यते, तेषां परस्परं भिन्नलक्षणव्यवस्थानात्॥ ३५॥ § 148

साम्प्रतं भेदानामन्वयदर्शनादित्यस्य हेतोरसिद्धत्वं प्रतिपादयन्नाह—सत्त्वाद्यनुगतमित्यादि। § 149

सत्त्वाद्यनुगतं व्यक्तं न सिद्धं नः कथंचन।
आन्तरत्वात्सुखादीनां व्यक्तत्वात्तत्स्वसंविदः॥
३६ ॥§ 151

शब्दादिलक्षणं व्यक्तम्—सुखादिरूपम्, नः—अस्माकमसिद्धम्। कस्मात् ? सुखादीनामान्तरत्वात्—संविद्रूपत्वात्। शब्दादीनां चाचेतनत्वात्कथमेते सुखाद्यन्विता भवेयुः। प्रयोगः—ये संविद्रूपा न भवन्ति न ते सुखादिमयाः, यथा परोपगतोऽचेतनः पुरुषः। संविद्रूपरहिताश्च शब्दादय इति व्यापकानुपलब्धिः। स्यादेतत्संविद्रूपत्वेन सुखादिमयत्वस्य यदा व्याप्तिः सिद्धा भवेत्तदा तन्निवर्त्तमानं शब्दादिषु सुखादिमयत्वं निवर्त्तयेद्यावता सैव न सिद्धा, पुरुषस्यैव संविद्रूपत्वेनेष्टत्वादित्यत आह—व्यक्तत्वात्तत्स्वसंविद इति। तत्—संविद्रूपत्वं सूखादीनां सिद्धम् कस्मात् ? सुखादीनां स्वसंविदः—स्वसंवेदनस्य 035/k व्यक्तत्वात्। अतिस्पष्टेयं सुखप्रीतितापादिरूपेण सत्यसति वा शब्दादिविषयसन्निधाने प्रकाशान्तरनिरपेक्षा स्वयंप्रकाशात्मलक्षणा स्वसंवित्तिः। यदेव हि प्रकाशान्तरनिरपेक्षं सातादिरूपतः स्वयं सिद्धम्, तच्चैतन्यं सुखं संवेदनं ज्ञानमित्यादिभिः पर्यायैः कथ्यते। यदि च सुखादीनामन्येन संवेदनेनानुभवादनुभवख्यातिः स्यात्तदा तेषां संवेदनमसातादिरूपं स्यात्, स्वयमतदात्मकत्वात्। यथा योगिनोऽनुमातुश्च परकीयं सुखादि संवेदयतः। अन्यथा तेऽपि योग्यादयः साक्षात्सुखाद्यनुभाविन इवातुरादयः स्युः। योग्यादिवद्वाऽन्येषामप्यनुग्रहोपघातौ न स्यातामविशेषात्। संवेदनस्य च सातादिरूपत्वेऽभ्युपगम्यमाने सिद्धं सुखादेः संविद्रूपत्वम्। इदमेव हि नः सुखं दुःखं च, यत्सातमसातं च संवेदनम्।तस्मान्नानैकान्तिकता हेतोर्नाप्यसिद्धता। बाह्यार्थवादिनां सर्वेषामेव शब्दादिषु संविद्रूपरहितत्वस्य सिद्धत्वात्। अन्यथा विज्ञानवादिमतमेवाङ्गीकृतं स्यात्। तच्चेष्टमेव। नापि विरुद्धता हेतोः सपक्षे भावात्॥ ३६॥ § 152

स्यादेतत्—यथा बहिरवस्थितनीलादिसन्निधानादनीलादिरूपमपि संवेदनं नीलादिरूपनिर्भासं भवति, तथा बाह्यसुखाद्युपधानवशादसातादिरूपमपि सातादिरूपमिव लक्ष्यते, तेन संवेदनस्य सातादिरूपत्वेऽपि न सुखादीनां संविद्रूपत्वं सिध्यत्यतो नैकान्तिकता मौलस्य हेतोरित्याशङ्क्याह एकत्रेत्यादि।
§ 153

एकत्रैव च शब्दादौ भावनाजातिभेदतः।
सङ्गादयः संभविनो लक्ष्यन्ते नियताः स्फुटम्॥
३७ ॥§ 155

भावनाजातिभेदत इति। भावनाः—अभ्यासाः, जातिस्तु—निजा प्रकृतिः, तयोर्भेदो—विशेषः। सङ्गादय इति। सङ्गोऽभिलाषः, आदिश-

ब्देन प्रीत्यादयो द्वेषोद्वेगादयो दैन्यावरणादयश्च त्रैगुण्यकार्यगणा गृह्यन्ते। नियता इति चैकाकाराः। तथाहि—भावनाविशेषान्मद्याङ्गनादिषु भावितशुभाशुभादिनिमित्तानां कामुकादीनाम्,जातिविशेषाच्च कुरङ्गकरभादीनां केषांचिदेव प्रतिनियताः प्रीत्यादयः सम्भवन्ति। न सर्वेषाम्, एतच्च शब्दादीनां सुखादिरूपत्वे सति न युक्तम्॥ ३७॥ § 156

कस्मादित्याह—एकवस्त्वनुपातित्व इत्यादि। § 157

एकवस्त्वनुपातित्वे चित्रा संवित्प्रसज्यते।
अदृष्टादिवशान्नो चेन्न स्याद्वस्त्वनुयायिनी॥ ३८॥§ 159

036/k

सर्वेषामेव हि तेषामभिन्नवस्तुविषयत्वान्नीलादिविषयसंवेदनवत्प्रत्येकं चित्रा संवित्प्रसज्येत। स्यादेतद्यद्यपि त्र्यात्मकं वस्तु, तथाऽप्यदृष्टादेर्धर्मादिलक्षणस्य सहकारिणो वशेन कस्यचित्किंचिदेव रूपं प्रतिभासते, न सर्वं सर्वस्येति। आदिशब्देन भावनाजातिभेदजिघृक्षादीनां ग्रहणम्। यद्येवं न स्याद्वस्त्वनुयायिनी—वस्त्वालम्बना सा संविन्न प्राप्नोति, तदाकारशून्यत्वादिति भावः॥ ३८॥ § 160

तदेव तदाकारशून्यत्वं दर्शयन्नाह—त्र्याकारमिति। § 161

त्र्याकारं वस्तुनो रूपमेकाकाराश्च तद्विदः।
ताः कथं तत्र युज्यन्ते भाविन्यस्तद्विलक्षणाः॥
३९॥§ 163

सत्वरजस्तमसां रूपम्। एकाकाराश्च तद्विद इति। तेषां—पुरुषाणां विदः —संवित्तयः प्रत्येकमभिष्वङ्गादिमात्रैकरूपनियमादेकाकाराः संवेद्यन्त इत्यर्थः। ता इति—संविदः, तत्रेति—शब्दादौ, भाविन्य इति—पारमार्थिक्य इत्यर्थः। कस्मान्न युज्यन्त इत्याह—तद्विलक्षणा इति। तदालम्बनवस्तुविलक्षणा इत्यर्थः। प्रयोगः— यद्यदाकारसंवेदनं न भवति न तत्तद्विषयं यथा चक्षुर्ज्ञानं न शब्दविषयम्। त्र्यात्मकवस्त्वाकारशून्याश्च यथोक्ताः संविद इति व्यापकानुपलब्धिरतिप्रसङ्गापत्तिविपर्ययेबाधकं प्रमाणम्। स्यादेतद्यथा प्रत्यक्षेण गृहीतेऽपि सर्वात्मना शब्दादिके वस्तुनि भावनादिवशेन क्वचिदेव क्षणिकत्वादौ निश्चयोत्पत्तिर्भवति न सर्वत्र, तद्वददृष्टादिवशेनैकाकारा संविद्भविष्यतीति। तदेतदसम्यक्। न हि क्षणिकादिविकल्पस्यादि(ल्पास्पदे?)परमार्थतो वस्तुविषयत्वमस्माकमिष्टम्। सर्वविकल्पातीतत्वाद्वस्तुनः। पारम्पर्येण तु वस्तुनि प्रतिबन्धात्तथाविधवस्तुप्राप्तिहेतुतया तस्य प्रामाण्यम्। प्रीत्यादीनां तु परैर्वस्तुविषयत्वमेव परमार्थत इष्टम्। अन्यथा हि निरालम्बनत्वे सति

सुखाद्यात्मनां शब्दादीनामनुभवात्सुखाद्यनुभवख्यातिरित्येतन्न स्यात्। तेषां च प्रीत्यादीनां सविकल्पकत्वादनिश्चितं न किंचिद्रूपमस्तीति सर्वात्मनानुभवख्यातिः स्यात्। इयमेव हि निश्चयानां स्वार्थप्रतिपत्तिर्यत्तन्निश्चयनं नाम॥ ३९॥ § 164

यच्चोक्तम्, प्रसादतापदैन्यादिकार्योपलम्भात्सुखाद्यनुगतत्वं शब्दादीनां सिद्धमिति। तदनैकान्तिकमिति दर्शयन्नाह—प्रसादोद्वेगेत्यादि। § 165

प्रसादोद्वेगवरणान्येकस्मिन्पुंसि योगिनाम्।
जायन्ते न च तद्रूपः पुमानभिमतः परैः॥ ४०॥ § 167

037/k

तथा हि कापिलयोगिनां पुरुषं प्रकृतिविभक्तं भावयतां पुरुषमालम्ब्य स्वभ्यस्तयोगानां प्रसादो भवति प्रीतिश्च। अजितयोगानां क्षिप्रतरमपश्यतां उद्वेगः, ये चप्रकृत्या जडमतयस्तेषां वरणमुपजायते। न चासौ पुरुषस्तद्रूपस्त्रिगुणात्मकोऽभीष्टः परैः। तस्मात्प्रसादतापदैन्यादिकार्योपलब्धेरित्यनैकान्तिकमेतत्। सङ्कल्पात्तानि प्रीत्यादीनि भवन्ति, न पुरुषादिति चेत्। एतच्छब्दादिष्वपि समानम्। ततश्च सङ्कल्पमात्रभावित्वे बाह्याः सुखादयो न सिध्यन्ति। सङ्कल्पस्य संविद्रूपत्वात्। अत एव च बाह्यसुखाद्युपधानवशात्संवेदनस्य सातादिरूपत्वमित्येतदपि व्यभिचारि। अन्तरेणापि बाह्यविषयोपधानं पुरुषालम्बनेन प्रीत्यादीनामुत्पत्तिदर्शनात्। यच्चेष्टानिष्ठविकल्पादनपेक्षितबाह्यविषयसन्निधानं सुखादिसंवेदनं प्रसिद्धं तत्कथं परोपधानात्स्यात्। मनोऽपि त्रिगुणं तदुपधानाद्भवतीति चेत्। न। तस्यापि यदेव हि प्रकाशान्तरानपेक्षं स्वयं सिद्धमित्यादिना संविद्रूपत्वस्य प्रतिपादितत्वात्। तस्मात्समन्वयादित्यसिद्धोहेतुः॥ ४०॥ § 168 TSP$_{msJ}$:28a

इदानीं हेतुसिद्धिमभ्युपगम्यानैकान्तिकत्वं प्रतिपादयन्नाह—सिद्धेऽपीत्यादि। § 169

सिद्धेऽपि त्रिगुणे व्यक्ते न प्रधानं प्रसिध्यति।
एकं तत्कारणं नित्यं नैकजात्यन्वितं हि तत्॥
४१॥ § 171

यदि नाम व्यक्तं त्रिगुणात्मकं सिद्धं तथापि तस्य यत्तदभीष्टं कारणं प्रधानाख्यं तन्न सिध्यति। तथाभूतेन कारणेन क्वचिदपि हेतोरन्वयासिद्धेरिति भावः। तथाहि—त्रिगुणात्मकमेकं नित्यं व्यापि च तस्य कारणं साधयितुमिष्टम्। न चैवंभूतेन कारणेन क्वचिद्धेतोः प्रतिबन्धः सिद्धः। नापि यदात्मकं कार्यमुपलभ्यते कारणेनावश्यं तदात्मना भवितव्यम्। कार्य-

कारणयोर्भेदात्। तथाहि—हेतुमत्त्वानित्यत्वाव्यापितादिभिर्धर्मैः समन्विते व्यक्ताख्यं कार्यमिष्यते भवद्भिः, नच तत्कारणस्य तादूप्यमिष्टम्, तस्मादनैकान्तिको हेतुः। धर्मविशेषविपरीतभावनाद्विरुद्धोऽपीति दर्शयन्नाह—एकं तत्कारणमित्यादि। एको नित्यस्त्रिगुणात्मकः कारणभूतो धर्मः साधयितुमिष्टः, स च तथाभूतो न सिध्यति, किं तर्हि, विपरीत इति भावः। कस्मादित्याह—नैकजात्यन्वितं हि तदिति। हिशब्दो हेतौ। तस्मात्तद्व्यक्ताख्यं कार्यं नैकया त्रिगुणात्मकया स्वात्मभूतया जात्या समन्वितं सिद्धम्। किं तर्हि ? अनेकत्वानित्यत्वादिधर्मान्वितमेवोपलभ्यते। यदि हि व्यक्तमेकया यथोक्तया जात्या
038/k समन्वितं भवेत्तदा तत्कारणमपि यथोक्तधर्मविशिष्टं सिध्येत्। यावता कार्यस्यानित्यत्वानेकत्वधर्मान्वयदर्शनात्तत्कारणमपि तथैवानुमीयते। नित्यस्य क्रमाक्रमाभ्यामर्थक्रियाविरोधात्। कारणभेदकृतत्वाच्च कार्यवैचित्र्यस्य। अन्यथा निर्हेतुकत्वप्रसङ्गात्। तस्मान्न नित्यैकरूपप्रधानसिद्धिः। यदि पुनरनित्यानेकरूप एव कारणं प्रधानमिति संज्ञा क्रियेत, तदा नास्ति विवाद इति भावः॥ ४१॥ § 172

कस्मात्पुनरेकजात्यन्वितं व्यक्तं न भवतीत्याह—अयःशलाकाकल्पा—इत्यादि। § 173

अयःशलाकाकल्पा हि क्रमसङ्गतमूर्त्तयः।
दृश्यन्ते व्यक्तयः सर्वाः कल्पनामिश्रितात्मिकाः॥
४२॥ § 175

यथा ह्ययोमय्यः शलाकाः परस्परमसङ्गतास्तद्वदिमाः शब्दादिव्यक्तयः स्वस्वभावव्यवस्थिततया देशकालशक्तिप्रतिभासादिभेदान्न परस्परमन्वाविशन्ति। एतेनानेकत्वं प्रतिपादितम्। अनित्यत्वप्रतिपादनायाह—क्रमसङ्गतमूर्त्तय इति। उत्पादक्रमेण सङ्गता—समालिङ्गिता मूर्त्तिर्यासामिति विग्रहः। कथं तर्हि (क्षि)त्यादिनैकेन रूपेण तथा स एवायमिति च स्थिरेण स्वभावेनानुगता व्यवसीयन्ते भावा इत्याह—कल्पनामिश्रितात्मिका इति। मिथ्याविकल्पोऽयमर्थेष्वेकात्मताग्रह इत्यर्थः। एतच्च पश्चात्प्रतिपादयिष्यते क्षणभङ्गादौ॥ ४२॥ § 176

एवं तावत्समन्वयादित्यस्य हेतोरसिद्धविरुद्धानैकान्तिकत्वं प्रतिपादितम्, अधुना कुटादिभेदवदिति दृष्टान्तस्य साध्यसाधनधर्मानन्वयत्वं प्रतिपादयन्नाह—मृद्विकारादय इत्यादि। § 177

मृद्विकारादयो भेदा नैकजात्यन्वितास्तथा।
सिद्धा नैकनिमित्ताश्च मृत्पिण्डादेर्विभेदतः॥
४३॥ § 179

आदिशब्देन कनकादिविकाराणां च ग्रहणम्। तथेति दूषणान्तरसमुच्चये सादृश्ये वा। नैकजात्यन्विता इत्यनेन साधनधर्मवैकल्यं दर्शितम्। नैकनिमित्ताश्चेति। सिद्धा इति प्रकृतेन सम्बन्धः। अनेन साध्यधर्मानन्वयो दर्शितः। ननु चैकं मृत्पिण्डकनकादि कारणं तेषां सिद्धमेव, तथा मृत्सुवर्णत्वादिजातिश्चैषामेषाऽनुगामिनी दृष्टा, तत्कथमुभयवैकल्यमित्याह— मृत्पिण्डादेर्विभेदत इति। नह्येकोऽवयवी मृत्पिण्डादिरस्ति, एकदेशावृतौ सर्वावरणप्रसङ्गात्। नाप्येका जातिः प्रतिव्यक्ति प्रतिभासभेदात्॥ ४३॥ § 180

039/k

पुनरपि समन्वयादित्यस्य हेतोः स्वतोऽनैकान्तिकत्वमिति प्रतिपादयन्नाह—चैतन्येत्यादि। § 181 TSP$_{msJ}$:29a

चैतन्याद्यन्वितत्वेऽपि नैकपूर्वत्वमिष्यते।
पुरुषाणाममुख्यं चेत्तदिहापि समं न किम्॥
४४॥ § 183

तथाहि—चेतनत्वभोक्तृत्वादिभिरपरिमितैर्धर्मैरन्विताः पुमांसोऽभीष्टाः, न च ते तथाविधैककारणपूर्वका भवद्भिरिष्यन्ते। अथापि स्याच्चैतन्याद्यन्वितत्वं पुरुषाणां नमुख्यमिष्टम्, किं तर्हि ? गौणम्, यतोऽचैतन्यादिव्यावृत्ताः सर्वे एव पुमांसस्तेनार्थान्तरव्यावृत्तिरूपा चैतन्यं जातिस्तदनुगामिनी कल्प्यते, नत्वेका तात्त्विकी साऽस्तीति। यद्येवं तदमुख्यम्, सुखाद्यन्वितत्वमसत्यपि तथाभूतैककारणपूर्वत्वे पुरुषवदिहापि व्यक्ते किमिति समम्—तुल्यं न कल्प्यते। तस्मादनैकान्तिको हेतुः। पुरुषाणामित्युपलक्षणम्। तथा सुखादयो मूलप्रकृत्यवस्थाभाविनो गुणत्वाचेतनत्वाभोक्तृत्वादिभिरन्विताः, प्रधानपुरुषाश्च नित्यत्वादिभिर्युक्ताः, न च ते तथाभूतैककारणपूर्वका इत्यनैकान्तिका एव॥ ४४॥ § 184

एवं तावत्समन्वयादित्ययं हेतुः प्रतिषिद्धः। साम्प्रतं निगमनव्याजेन परिशिष्टहेतुदूषणार्थं दिङ्मात्रमाह—प्रधानहेत्वभावेऽपीत्यादि। § 185

प्रधानहेत्वभावेऽपि ततः सर्वं प्रकल्पते।
शक्तेर्भेदेन वैचित्र्यं कार्यकारणतादिकम्॥ ४५॥ § 187

तत्र यत्तावदुक्तं परिमाणाच्छक्तितः प्रवृत्तेः कार्यकारणभावाच्चास्ति प्रधानमिति।एते त्रयोऽपि हेतवोऽनैकान्तिकाः, साध्यविपर्यये। बाधकप्रमाणानुपदर्शनात्। प्रधानाख्यस्य हेतोरभावेऽप्येषां परिमाणादीनामविरोधात्। तथाहि—यदि तावत्कारणमात्रस्यास्तित्वं साध्यते, तदा सिद्धसाध्यता, न ह्यस्माकं कारणमन्तरेण कार्यस्योत्पादोऽभीष्टः; कारणमात्रस्य च प्रधान-

मिति संज्ञाकरणे न किंचिद्बाध्यते। अथैवं साध्यते— अस्ति प्रेक्षावत्कारणम्, यदेतन्नियतपरिमाणं व्यक्तिमुत्पादयति, शक्तितश्च प्रवर्त्तत इति। तदाऽनैकान्तिकता, विनाऽपि हि प्रेक्षावता कर्त्रा(?)स्वहेतुसामर्थ्यप्रतिनियमात्प्रतिनियतपरिमाणादियुक्तस्योत्पत्त्यविरोधात्। न चापि प्रधानं प्रेक्षावद्युक्तं तस्याचेतनत्वात्। प्रेक्षायाश्च चैतन्यपर्यायत्वात्। किंच—शक्तितः प्रवृत्तेरित्यनेन यद्यव्यतिरिक्तशक्तियोगि कारणमात्रं साध्यते, तदा सिद्धसाध्यता। 040/k अथ व्यतिरिक्तविचित्र शक्तियुक्तमेकं नित्यं कारणं तदाऽनैकान्तिकता हेतोः। तथाभूतेन क्वचिदप्यन्वयासिद्धेरसिद्धश्च हेतुः, न हि व्यतिरिक्तशक्तिवशात्कस्यचित्कारणस्य क्वचित्कार्ये प्रवृत्तिः सिद्धा, शक्तीनां स्वात्मभूतत्वात्। यच्चोक्तम्, अविभागाद्वैश्वरूपस्येतितदसिद्धम्। निरन्वयविनाशधर्मत्वात्सर्वभावानां क्वचिदपि लयासिद्धेः। तथाहि—लयो भवन्पूर्वस्वभावप्रच्युतौ वा सत्यां भवेदप्रच्युतौ वा, यदि तावत्प्रच्युतौ तदा निरन्वयविनाशप्रसङ्गः, अथाप्रच्युतौ तदा लयानुपपत्तिः, न ह्यविकलमात्मतत्वमनुभवतः कस्यचिल्लयो युक्तोऽतिप्रसङ्गात्। तस्मात्परस्परविरुद्धमिदमविभागो वैश्वरूप्यं चेति। तदेवं प्रधानहेत्वभावेऽपि कारणस्य शक्तिभेदेन हेतुना कार्यस्य परिमाणादिरूपेण वैचित्र्यं कार्यकारणविभागादिश्चोत्पद्यत इत्यनैकान्तिकता हेतूनाम्। आदिशब्देन शक्तितःप्रवृत्तेरित्येतस्य ग्रहणम्। अथवा प्रधानहेत्वभावेऽपित्यपिशब्दोऽवधारणे। तेनायमर्थो भवति। प्रधानहेत्वभाव एव कारणशक्तिभेदेन हेतुना कार्यस्य परिमाणादिरूपेणवैचित्र्यं(त्र्यस्य ?) कार्यकारणतादेश्चोपपद्यमानत्वाद्विरुद्धता हेतूनामिति। तथाहि —यदि प्रधानं व्यक्तस्य कारणं स्यात् तदा तदात्मत्वेन सर्वमेव विश्वं तत्स्वरूपवदेकमेव द्रव्यं स्यात्। ततश्चैका बुद्धिरहङ्कारपञ्चतन्मात्राणीत्यादिपरिमाणविभागो न स्यात्। तथा च सति निष्परिमाणमेव जगत्स्यात्। तथा कुलालादीनां घटादिकरणे शक्तितः प्रवृत्तिः प्रधानहेत्वभाव उपपद्यते, न तु तद्भावे। यथोक्तं प्राक् न च शक्तिर्न च क्रियेति। कार्यकारणविभागोऽपि प्रधानहेत्वभाव एव सति युक्तः। पूर्वमावेदितं वैश्वरूप्यं च प्रधाने सति नोपपद्यत एव। तन्मयत्वेन सर्वस्य जगतः तत्स्वरूपवदेकत्वप्रसङ्गादित्युक्तम्, ततश्च वैश्वरूप्यमादित एव नास्तीति कुतस्तस्याविभागः स्यादिति॥ ४५॥ § 188

इति प्रकृतिपरीक्षा।

०.३ ईश्वरपरीक्षा।

इदानीमीशव्यापाररहितत्वं प्रतिपादयन्नाह—सर्वोत्पत्तिमतामित्यादि।
§ 190

सर्वोत्पत्तिमतामीशमन्ये हेतुं प्रचक्षते।
नाचेतनं स्वकार्याणि किल प्रारभते स्वयम्॥
४६ ॥§ 192

अनुत्पत्तिमतामण्वाकाशादीनां नित्यत्वान्न किंचित्कारणमस्तीत्यत उत्प- TSP$_{msJ}$:30a त्तिमतामित्युक्तम्। ईशमिति ईश्वरम्। अन्य इति नैयायिकादयः। तत्र विशिष्टगुणमात्मान्तरमेव सर्वस्य जगतः कर्तृ सर्वज्ञमीश्वरमिति केचित्। आत्मव्यतिरिक्तं नित्यैकसर्वार्थ विषयबुद्ध्युपेततया भिन्नगुणत्वाद्द्रव्यान्तरमेवेत्य- 041/k परे। ननु धर्माधर्मपरमाण्वादि जगतः कारणमस्त्येव तत्किमर्थमीश्वरमपरं कारणत्वेन कल्पयन्तीत्यत आह—नाचेतनमित्यादि। यद्यपि धर्मादि कारणं तथाऽपि तदचेतनत्वादधिष्ठायकमन्तरेण न स्वयं स्वकार्यमारब्धुमुत्सहत इत्यतस्तदधिष्ठायकेन केनचित्कर्त्रा भवितव्यम्, न हि किंचिदचेतनं स्वतन्त्रमधिष्ठायकं दृष्टमिति। प्रयोगः—यदचेतनं तदधिष्ठातारमन्तरेण नस्वकार्यमारभते, यथा मृत्पिण्डदण्डसलिलसूत्रादयः कुम्भकाररहिताः कुम्भम्, अचेतनं च धर्मादीनीति व्यापकविरुद्धोपलब्धिः। तस्माद्योसावधिष्ठाता (स) ईश्वर इति सिद्धम्। न चैवं सति धर्माधर्मादीनां वैयर्थ्यम्, निमित्तकारणत्वादीश्वरस्येति। स्यादेतद्यदात्मसमवेतौ धर्माधर्मौ स एवात्माऽधिष्ठाता भविष्यति। तत्किमीश्वरेण परिकल्पितेनेति। तदसम्यक्। तस्यात्मनस्तदानीमज्ञत्वात्, यावद्धि तस्य शरीरेन्द्रियादिः कार्यकारणसंघातो नोत्पद्यते तावदयमज्ञ उपलभ्यानपि रूपादीन्विषयान्नोपलभते,कुतोऽनुपलभ्यौ धर्माधर्मावुपलप्स्यत इति। यथोक्तम् अज्ञो जन्तुरनीशोयमात्मनः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वेति॥ ४६॥ § 193

तत्राविद्धकर्णोपन्यस्तमीश्वरसाधने प्रमाणद्वयमाह—यत्स्वारम्भकेत्यादि।
§ 194

यत्स्वारम्भकावयवसन्निवेशविशेषवत्।
बुद्धिमद्धेतुगम्यं तत्तद्यथा कलशादिकम्॥ ४७ ॥§ 196

द्वीन्द्रियग्राह्यमग्राह्यं विवादपदमीदृशम्।
बुद्धिमत्पूर्वकं तेन वैधर्म्येणाणवो मताः॥ ४८ ॥§ 198

तदुक्तम्— द्वीन्द्रियग्राह्याग्राह्यं विमत्यधिकरणभावापन्नं बुद्धिमत्कारणपूर्वकं स्वारम्भकावयवसंनिवेशविशिष्टत्वात्, घटादिवत्, वैधर्म्येण परमाणव इति। तत्र— द्वाभ्यां दर्शनस्पर्शनेन्द्रियाभ्यां ग्राह्यं महदनेकद्रव्यवत्त्वरूपाद्युपलब्धिकारणोपेतं पृथिव्युदकज्वलनसंज्ञितं त्रिविधं द्रव्यं द्वीन्द्रियग्राह्यम्। अग्राह्यं वाय्वादि, यस्मान्महत्त्वमनेकद्रव्यवत्त्वं रूपसम-

वायादिश्चोपलब्धिकारणमिष्यते, तच्च वाय्वादौ नास्ति। यथोक्तम्—महदनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिः। अद्रव्यवत्त्वात्परमाण्वाव(द्य ?)नुपलब्धिः। रूपसंस्काराभावाद्वायो(र)नुपलब्धिः। रूपसंस्कारो रूपसमवायः। द्व्यणुकादीनां त्वनुपलब्धिरमहत्त्वादिति। अत्र सामान्येन द्वीन्द्रियग्राह्याग्राह्यस्य बुद्धिमत्कार-
042/k णपूर्वत्वसाधने सिद्धसाध्यता दोषो घटादिषु। उभयसिद्धेः। विवादाभावात्। अभ्युपेतबाधा च, अण्वाकाशादीनां तथाऽनभ्युपगमात्। तेषां च नित्यत्वात्प्रत्यक्षादिबाधा। अतस्तदर्थं विमत्यधिकरणभावापन्नग्रहणम्। विविधा मतिर्विमतिर्विप्रतिपत्तिरिति यावत्, अस्या अधिकरणभावापन्नं विवादास्पदीभूतमित्यर्थः। एवंविधे सतिशरीरेन्द्रियभुवनादय एव पक्षीकृता इति नाण्वादिषु प्रसङ्गः। कारणमात्रपूर्वत्वेऽपि साध्ये सिद्धसाध्यता माभूदिति बुद्धिमत्कारणग्रहणम्। सांख्यं प्रति बुद्धिसत्त्वानुपपत्तेर्न सिद्धसाध्यता, अव्यतिरिक्ता हि बुद्धिः प्रधानात्सांख्यैरिष्यते। न च तेनैव तदेव तद्धद्भवति। स्वारम्भकाणामवयवानां संनिवेशः प्रचयात्मकः संयोगः। तेन विशिष्टं व्यवच्छिन्नं तद्भावस्तस्मात्। अवयवसन्निवेशविशिष्टत्वं गोत्वादिभिर्व्यभिचारीत्यतः स्वारम्भकग्रहणम्। गोत्वादीनि तु द्रव्यारम्भकावयवसन्निवेशेन विशेष्यन्ते, नतु स्वारम्भकावयवसन्निवेशेनेति। तेन योऽसौ बुद्धिमान स ईश्वर इति। तदेतत्प्रमाणंयदित्यादिश्लोकद्वयेन निर्दिष्टम्। स्वारम्भकावयवसंनिवेश एव विशेषो—विशेषणं सोऽस्यास्तीति तत्तथोक्तम्। तेन विशिष्टमित्यर्थः। एतेन हेतोर्व्याप्तिर्दर्शिता। पक्षधर्मत्वादि दर्शयन्नाह—द्वीन्द्रियेत्यादि। विवादपदमिति। विवादाधिकरणापन्नमित्यर्थः॥ ४७॥ ४८॥ § 199

द्वितीयं च तदुक्तं प्रमाणं बोधयन्नाह—तन्वादीनामित्यादि। § 200

तत्त्वादीनामुपादानं चेतनावदधिष्ठितम्।
रूपादिमत्त्वात्तन्त्वादि यथा दृष्टं स्वकार्यकृत्॥
४९॥§ 202

तन्वादीना—शरीरादीनाम्, उपादानं परमाण्वादि चेतनेन कारणेनाधिष्ठितं सत्स्वकार्यकृदिति संबन्ध। रूपादिमत्त्वादिति हेतुः। तन्त्वादीति दृष्टान्तः। यथोक्तम्—तनुभुवनकरणोपादानानि चेतनावादधिष्ठितानि स्वकार्यमानभन्त इति प्रतिजानीमहे। रूपादिमत्त्वात्तन्त्वादिवदिति॥ ४९॥ § 203

उद्योतकारस्तु प्रमाणयति— भुवनहेतवः प्रधानपरमाण्वदृष्टाः स्वकार्योत्पत्तावतिशयबुद्धिमन्तमधिष्ठातारमपेक्षन्ते स्थित्वा प्रवृत्तेस्तन्तुतुर्यादिवदिति। एतदेव दर्शयति —धर्माधर्माणव इत्यादि। § 204

१--२ महदनेक] Correction: ; महत्त्वादनेक (sic!)महदनेक
१ तन्वादीना] Correction: ; तत्त्वादीना (sic!)तन्वादीना
४ तन्वादीना] Correction: ; तत्त्वादीना (sic!)तन्वादीना

धर्माधर्माणवस्सर्वे चेतनावदधिष्ठिताः।
स्वकार्यारम्भकाः स्थित्वा प्रवृत्तेस्तुरितन्तुवत्॥
५० ॥§ 206

सुबोधम्॥ ५०॥ § 207
043/k

प्रशस्तमतिस्त्वाह— सर्गादौ पुरुषाणां व्यवहारोऽन्योपदेशपूर्वकः, उत्तरकालं प्रबुद्धानां प्रत्यर्थनियतत्वात्। अप्रसिद्धवाग्व्यवहाराणां कुमाराणां गवादिषु प्रत्यर्थनियतो वाग्व्यवहारो यथा मात्राद्युपदेशपूर्वक इति। प्रबुद्धानां प्रत्यर्थनियतत्वादिति। प्रबुद्धानां सतां प्रत्यर्थनियतत्वादित्यर्थः। यदुपदेशपूर्वकः सर्गादौ व्यवहारः स ईश्वरः प्रलयकालेप्यलुप्तज्ञानातिशय इति सिद्धं दर्शयति—सर्गादावित्यादि। § 208

सर्गादौ व्यवहारश्च पुंसामन्योपदेशजः।
नियतत्वात्प्रबुद्धानां कुमारव्यवहारवत्॥ ५१ ॥§ 210

सर्गः सृष्टिरुत्पाद इति यावत्। तस्यादिः प्रथमः कालः। शेषं तु सुबधम्॥ ५१॥ § 211

तथा अपराण्युद्योतकारस्तानि प्रमाणानि बुद्धिमत्कारणाधिष्ठितं महाभूतादिकं व्यक्तं सुखदुःखनिमित्तं भवति। अचेतनत्वात्कार्यत्वाद्विनाशित्वाद्रूपादिमत्त्वात्, वास्यादिव दिति। एतानि दर्शयति—महाभूतादिकमित्यादि। § 212

महाभूतादिकं व्यक्तं बुद्धिमद्धेत्वधिष्ठितम्।
याति सर्वस्य लोकस्य सुखदुःखनिमित्तताम्॥
५२ ॥§ 214

अचेतनत्वकार्यत्वविनाशित्वादिहेतुतः।
वास्यादिवदतस्स्पष्टं तस्य सर्वं प्रतीयते॥ ५३ ॥§ 216

(बुद्धिमद्धेत्वधिष्ठितम्—)चेतनावताऽधिष्ठितम्। अत इति। यथोक्ताद्धेतुकदम्बकात्। तस्येति। ईश्वरस्य सर्वजगद्धेतोः॥ ५२॥ ५३॥ § 217

८ त्प्रबुद्धानां] Correction: ; त्प्रवृद्धानां (sic!)त्प्रबुद्धानां

१ अपराण्यु] Correction: ; अपराणू (sic!)अपराण्यु

अथ सर्वज्ञत्वं कथं तस्य सिद्धं येनासौ निःश्रेयसाभ्युदयकामानां भक्तिविषयतां यायादित्याह—सर्वकर्तृत्वसिद्धौ चेत्यादि। § 218

सर्वकर्तृत्वसिद्धौ च सर्वज्ञत्वमयत्नतः।
सिद्धमस्य यतः कर्ता कार्यरूपादिवेदकः॥
५४ ॥§ 220

तथाचाहुः प्रशस्तमतिप्रभृतयः—सकलभुवनहेतुत्वादेवास्य सर्वज्ञत्वं सिद्धम्। कर्तुः कार्योपादानोपकरणप्रयोजनसंप्रदानपरिज्ञानात्। इह हि यो यस्य कर्त्ता भवति स तस्योपादानादीनि जानीते। यथा कुलालः कुम्भादीनां कर्त्ता तदुपादानं मृत्पिण्डमुपकरणानि च चक्रादीनि प्रयोजनमुदकाहरणादि कुटुम्बिनं च संप्रदानं जानीत इत्येतत्प्रसिद्धम्, तथेश्वरः सकलभुवनानां कर्ता स तदुपादानानि परमाण्वादिलक्षणणानि तदुपकरणानि ध-
044/k र्माधर्मदिक्कालादीनि व्यवहारोपकरणानि सामान्यविशेषसम वायलक्षणानि प्रयोजनमुपभोगं संप्रदानसंज्ञाकांश्च पुरुषान् जानीत इति। अतः सिद्धमस्य सर्वज्ञत्वमिति। कार्यरूपादिवेदक इति। कार्यस्य ये रूपादयः—स्वभावादयः, आदिशब्देनोपादानादीनां ग्रहणम्, तेषां वेदक इति समासः। याजकादेराकृतिगतणत्वात, कर्मण्ययं वा विधाय स्वार्थिकः को विधेयः। शेषं सुबोधम्॥ ५४॥ § 221

तथा—अपरं प्रमाणकदम्बकं तैरुक्तम्। विचित्रोदयप्रस्पन्दास्पदानास्पदं विमत्यधिकरणभावापन्नं द्वितीयादिप्रमाणपञ्चकव्यतिरिक्तप्रमाणान्तरावच्छेद्यम्। वस्तुत्वादिभ्यो रूपादिवत्। वैधर्म्येण कूर्मरोमादय इति। तत्र विचित्रोदयो गुणपदार्थ उच्यते, विचित्र उदयोऽस्येति कृत्वा, प्रस्पन्दः कर्मपदार्थः तयोरास्पदं समवायिकारणं द्रव्यम्, अनास्पदं गुणादयः पञ्च समवायपर्यन्ताः, द्वितीयादिप्रमाणपञ्चकमनुमानमारभ्याभावपर्यन्तं, तद्व्यतिरिक्तं प्रमाणान्तरं प्रत्यक्षं, शेषं सुबोधम्। अयमपरो हेतुस्तैरुक्तः।सदाद्यविशेषास्कन्दितानास्कन्दितं विमत्यधिकरणभावापन्नं कस्यचित्प्रत्यक्षं सत्त्वाद्रूपादिवदिति। तत्र सदादयः षडविशेषाः—सदनित्यं द्रव्यवत्कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणां विशेषाः, तैरास्कन्दितमाक्रान्तं यथासंभवं द्रव्यगुणकर्मात्मकं पदार्थत्रयमनास्कन्दितं सामान्यादि। शेषं सुगमम्। तदेतत्प्रमाणकदम्बकंदर्शयति—विमतेत्यादि। § 222

विमतेरास्पदं वस्तु प्रत्यक्षं कस्य चित्स्फुटम्।
वस्तुसत्त्वादिहेतुभ्यः सुखदुःखादिभेदवत्॥ ५५॥§ 224

तदत्रासिद्धतेत्यादिनोत्तरपक्षमारभते। § 225

तदत्रासिद्धता हेतोः प्रथमे साधने यतः।
सन्निवेशो न योगाख्यः सिद्धो नाववयवी तथा॥
५६ ॥§ 227

तत्र यदचेतनं तदधिष्ठातारमन्तरेण न स्वकार्यमारभत इत्यादौ प्रयोगे साध्यविपर्यये हेतोर्बाधकप्रमाणाभावात्संदिग्धविपक्षव्यावृत्तिकतया हेतोरनैकान्तिकतेति भावः। यच्चायं स्वारम्भकावयवसंनिवेशविशिष्टत्वादितिहेतुः प्रथमे साधनप्रयोगे, सोऽसिद्धः, कथमित्याह—यत इत्यादि। अवयवसंनिवेशशब्देन हि संयोगविशेषोऽभिप्रेतः, तद्विशिष्टत्वं चावयव्याख्यस्य द्रव्यस्य, तयोरपि विशेषणविशेष्ययोरसिद्धत्वाद्विध हेत्वसिद्धिः॥ ५६॥ § 228

कथं पुनर्द्वयमसिद्धमित्याह—दृश्यत्वेनेत्यादि। § 229

045/k

दृश्यत्वेनाभ्युपेतस्य द्वयस्यानुपलम्भनात्।
साधनानन्वितं चेदमुदाहरणमप्यतः॥ ५७ ॥§ 231

तत्र संक्षेपेण स्वभावानुपलम्भाख्यमेव प्रमाणं बाधकमाह। विस्तरेण षट्पदार्थपरीक्षायामनयोर्दूषणमभिधास्यते—द्वयस्यापीति। संनिवेशावयविसंमतस्य। तथाहि —संनिवेशो दृश्यत्वेनाभ्युपेतः, संख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिसमवायाच्चाक्षुषाणीति वचनात्। अवयवी च दृश्यत्वेनेष्टः,महदनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिरिति वचनात्। न रूपादिव्यतिरेकेणापरः संयोगोऽवयवी च दृश्यत्वेनेष्टो बुद्धौ प्रतिभासत इति। अत उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः शशविषाणवदसद्व्यवहारविषयता। न च परमाणूनामतीन्द्रियत्वाद्रूपादीनामनुपलब्धिप्रसङ्गः, विशिष्टानामिन्द्रिय(गम्य)त्वाभ्युपगमादतीन्द्रियत्वासिद्धेः। अत एव संयोगावयविनोरभावात्साधर्म्यदृष्टान्तो घटः साधनधर्मविकल इति दर्शयति—साधनानन्वितमित्यादि॥ ५७॥ § 232

एवं तावद्विशेषणविशेष्यासिद्ध्या स्वरूपतोऽसिद्धत्वं हेतोः प्रतिपादितमिदानीमाश्रयैकदेशसिद्ध्याऽप्यसिद्धत्वमिति दर्शयति—चक्षुरित्यादि। § 233

चक्षुःस्पर्शनविज्ञानं भिन्नाभमुपजायते।
एकालम्बनता नास्ति तयोर्गन्धादिवित्तिवत्॥
५८ ॥§ 235

---

८ महदनेक] Correction : ; महत्यनेक (sic !)महदनेक

अत्र हि द्विविधो धर्मी निर्दिष्टो द्वीन्द्रियग्राह्यमग्राह्यं च। तत्र द्वीन्द्रियग्राह्यो न कश्चिद्धर्मी सिद्धः। तथाहि—चक्षुर्ज्ञानं स्पर्शज्ञानं चोभयं यथाक्रमं नीलादिरूपमात्रप्रतिभासित्वात्कर्कशादिस्प्रष्टव्यभेदमात्रप्रसिद्धत्वाच्च भिन्नाभमुपजायते। ततश्च तयोश्चक्षुःस्पर्शनविज्ञानयोरेकविषयता नास्ति भिन्नाभत्वाद्गन्धरसादिवित्तिवत्। प्रयोगोऽयम्—भिन्नप्रतिभासे ज्ञाने ते नैकविषये, यथा गन्धरसविज्ञाने, भिन्नाभे च चक्षुःस्पर्शनविज्ञाने, इति व्यापकविरुद्धोपलब्धिः। आभासभेदेप्येकविषयत्वे रूपशब्दादिवित्तीनामप्येकविषयत्वप्रसङ्ग इत्येतदत्र बाधकं प्रमाणम्॥ ५८॥ § 236

यदि तर्हि नैकविषयताऽनयोस्तत्कथमिदं प्रतिसन्धानज्ञानं भवति। यः प्रकाशे मया दृष्टो घटः स एवान्धकारे स्पृश्यत इति, तस्मादनुमानबाधितेयं प्रतिज्ञा, तत्रेदमनुमानमुद्योतकारोक्तम्—विवादविषयापन्नौ दर्शनस्पर्शनप्रत्ययावेकविषयौ प्रतिसन्धीयमानत्वान्नीलोत्पलप्रत्ययवदिति तत्राह—तत्सामर्थ्येत्यादि। § 237

046/k

तत्सामर्थ्यसमुद्भूतकल्पनानुगतात्मकम्।
प्रतिसन्धानविज्ञानं समुदायं व्यवस्यति॥ ५९॥ § 239

जलानलादि नैवेदं द्वीन्द्रियग्राह्यमस्त्यतः।
आश्रयासिद्धताऽसिद्धेर्यथाऽभिहितधर्मिणः॥
६०॥ § 241

तयोः—वर्णस्प्रष्टव्यमात्रप्रतिभासिनोश्चक्षुःस्पर्शनविज्ञानयोः सामर्थ्यम्—शक्तिः ततः समुद्भूतः कल्पनानुगत आत्माऽस्येति विग्रहः। तदनेन प्रतिसन्धानप्रत्ययस्याप्रत्यक्षत्वं प्रतिपादितं भवति। अनेकस्मिन्नेकत्वाध्यवसायित्वेनास्य भ्रान्तित्वात्, कल्पनानुगतात्मत्वाच्च। नापि प्रमाणान्तरम्, पूर्वज्ञानपरिच्छिन्नविषयावसायित्वेन गृहीतग्रहणात्, भ्रान्तत्वाच्च। तस्मात्प्रतिसंधीयमानत्वादित्यनैकान्तिको हेतुः। यदि हि प्रतिसन्धानप्रत्ययस्य प्रामाण्यं सिद्धं भवेत्तदा न स्याद्धेतोरनैकान्तिकता, यावता येषु रूपादिषु साधारणा(:) सामर्थ्यप्रकाशनाय घटादिप्रज्ञप्तयः कृतास्तेषु यथास्वं चक्षुःस्पर्शनाभ्यामनुभूतेषूत्तरकालं यथापरिदृष्टविषयमनुरूपसङ्केताहितसंस्कारभेदमेकत्वाध्यवसायि प्रकृतिभ्रान्तं स्मार्त्तमिदं ज्ञानमुत्पद्यते। तथा हि—तथा समन्वाहारे तत्र वर्णोऽपि नीलादिः प्रतीभासते। न च स्पर्शनविज्ञाने वर्णप्रतिभासनं युक्तम्, तस्य चक्षुर्विज्ञानविषयत्वात्। तस्माद्यदेतदाचार्यैरुक्तम्—चक्षुःस्पर्शनाभ्यां यथास्वं भिन्नं विषयमुपल भ्यान्यदेव तत्सहचरं समुदायविषयं

स्मार्तमभेज्ञाननमुत्पद्यतइति तदेव न्याय्यम्। ननु यदि समुदायः प्रागनुभूतः स्यात्तदा स्मार्त्तमिदं युक्तम्, यावता न रूपादिव्यतिरिक्तः समुदायो भवतामभीष्टो येनासावनुभूयेत, रूपादिषु चानुभूतेषु रूपादिरिति स्यात्, न घट इति, न चाननुभूते स्मृतिर्युक्ता, तत्कथमिदं समुदायविषयं स्मार्त्तं ज्ञानमुत्पद्यते। नैतदस्ति। न हि रूपादिभ्योऽन्यः समुदायः प्रागनुभूत इत्युच्यते, येनैतत्स्यात्, किं तु त एव रूपादयः सलिलादिधारणार्थक्रियाकारिणः समुदायो घट इति व्यपदिश्यन्ते। तेषु च प्रत्येकमिन्द्रियज्ञानानुभूतेषु यथासङ्केताहितमिदं घट इति स्मरणमुत्पद्यत इत्यभिधीयते। अथवा कल्पितः समुदायः कल्पनाज्ञानात्मकत्वात्स्वसंविदाऽनुभूयत एवेति किमिति तस्य स्मरणं नोत्पद्यत इति। अतः स्वारम्भकावयवसंनिवेशविशिष्टत्वादित्यस्य हेतोराश्रयासिद्धता कस्मादित्याह—असिद्धेर्यथाऽभिहितधर्मिण इति। यथाऽभिहितस्य द्वीन्द्रियग्राह्यधर्मिणोऽसिद्धेःकारणादाश्रयैकदेशसिद्ध्या हेतोरसिद्धिः॥ ५९॥ ६०॥ § 242

047/k

तदेवं विशेष्यविशेषणाश्रयाणामसिद्धेस्त्रिविधा हेतोरसिद्धतोक्ता, चतुर्थमप्याचार्यनिर्दिष्टमसिद्धप्रकारमाह—सन्निवेशेत्यादि। § 243

सन्निवेशविशिष्टत्वं यादृग्देवकुलादिषु।
कर्त्तर्यनुपलब्धेऽपि यद्दृष्टौ बुद्धिमद्गतिः॥ ६१ ॥§ 245

तादृगेव यदीक्ष्येत तन्वगादिषु धर्मिषु।
युक्तं तत्साधनादस्माद्यथाऽभीष्टस्य साधनम्॥
६२ ॥§ 247

यो हि संनिवेशविशेषो बुद्धिमत्पुरुषव्यापारपूर्वकत्वेन देवकुलादिष्वन्वयव्यतिरेकाभ्यां लोके प्रसिद्धो यस्य दर्शनाददृष्टतत्कर्तृकस्याऽपि बुद्धिमत्कारणावगतिर्भवति, तथाभूतो यदि तनुतरुगिरिप्रभृतिषु साध्यधर्मिषु हेतुत्वेनोपादीयते, तदा स्याद्भवतामभिमतसाध्यसिद्धिः। नह्यन्वयव्यतिरेकाभ्यां सुविवेचितं कार्यं कारणं व्यभिचरति, तस्याहेतुकत्वप्रसंगात्। न च तथाभूतसन्निवेशविशेषस्तरुगिरिप्रभृतिषु प्रसिद्धः, केवलं संनिवेश इति प्रलापमात्रं प्रसिद्धम्। न च प्रकृत्या परस्परमर्थान्तरत्वेन व्यवस्थितोऽपि धर्मः शब्दमात्रेणाभेदी हेतुत्वेनोपादीयमानोऽभिमतसाध्यसिद्धये पर्याप्तो भवति। साध्यविपर्ययेऽपि तस्य भावाविरोधात्। यथा वल्मीके धर्मिणि कुम्भकारकृत-

१ स्मार्तमभे] Correction : ; स्मार्त्तभेद (sic !)स्मार्तमभे

त्वसिद्धये मृद्विकारमात्रं हेतुत्वेनोपादीयमानमिति समुदायार्थः। अवयवार्थ-स्तूच्यते। यद्दृष्टौ बुद्धिमद्गतिरिति। यस्य सन्निवेशस्य दृष्टौ सत्यां बुद्धिमतः कारणस्य गतिरनुमितिर्भवतीत्यर्थः। तन्वगादिष्विति। तनुः—शरीरम्, अगाः—पर्वता वृक्षा वा, आदिशब्देन सागरादयो गृह्यन्ते। यथाऽभीष्टस्येति। बुद्धिमत्पूर्वकत्वस्य। साधनमिति। सिद्धिः॥ ६१॥ ६२॥ § 248

कथं युक्तमित्याह—अन्वयेत्यादि। § 249

अन्वयव्यतिरेकाभ्यां यत्कार्यं यस्य निश्चितम्।
निश्चयस्तस्य तद्दृष्टाविति न्यायो व्यवस्थितः॥
६३ ॥§ 251

सन्निवेशविशेषस्तु नैवामीषु तथाविधः।
तनु तर्वादिभेदेषु शब्द एव तु केवलः॥ ६४ ॥§ 253

तादृशः प्रोच्यमानस्तु सन्दिग्धव्यतिरेकताम्।
आसादयति वल्मीके कुम्भकारकृतादिषु॥
६५ ॥§ 255

यत्कार्यमिति—धूमादि। यस्येति—अनलादेः। निश्चयस्तस्येति—अन-
048/k लादेरेव। तद्दृष्टाविति—धूमादिकार्यदृष्टौ सत्याम्। यद्येवमिहापि तथैव भविष्यतीत्याह —सन्निवेशविशेषस्त्वित्यादि। यस्तर्हि शब्दसामान्यतः सिद्धः सन्निवेशः स एव हेतुर्भविष्यतीति चेदाह—तादृश इत्यादि। तादृशः—शब्दमात्रेणाभेदी। कुम्भकारकृताविवेति। मृद्विकारत्वमात्रमिति शेषः। तदेवं सन्निवेशविशेषस्यासिद्धिः, सन्निवेशमात्रस्य त्वनैकान्तिकत्वमिति प्रतिपादितं भवति॥ ६३॥ ६४॥ ६५॥ § 256

नन्वित्यादिना परो जात्युत्तरमुद्भावयति। § 257

ननु जात्युत्तरमिदं धर्मभेदविकल्पनात्।
सामान्यमेव कार्यादि साधनं प्रतिपादितम्॥
६६ ॥§ 259

५ तनु] Correction: ; न तु (sic!)तनु

कार्यसमं जात्युत्तरमेतत्। तथाहि कृतकत्वादनित्यः शब्द इत्युक्ते जातिवादी चोदयति। किमिदं घटादिगतं कृतकत्वं हेतुत्वेनोपादीयते। किं वा शब्दगतमथोभयगतमिति। आद्ये पक्षे हेतोरसिद्धिः। न ह्यन्यधर्मोऽन्यत्र विद्यते। द्वितीयेऽपि साधनविकलो दृष्टान्तः। तृतीयेऽप्येतावेव दोषाविति। एतच्च कार्यसमं नाम जात्युत्तरमितिप्रतिपादितम्। यथोक्तम्—कार्यत्वान्यत्वलेशेन यत्साध्यासिद्धिदर्शनं तत्कार्यसममिति। यतः कार्यत्वसामान्यमेव गृहीत्वाऽनित्यत्वानुमानमिष्यते न विशेषम्। तेन सामान्येन साधनेऽभीष्टे धर्मविशेषविकल्पेन यदुत्तरं तत्कार्यसमं जात्युत्तरमिति व्यवस्थितम्। एतच्च धर्मभेदेन विकल्पनमतो जात्युत्तरमिति॥ ६६॥ § 260

अतद्रूपेत्यादिना परिहरति। § 261

अतद्रूपपरावृत्तं वस्तुमात्रमनित्यताम्।
तादात्म्यत्साधयत्येष न न्यायोऽस्तीह साधने॥
६७ ॥§ 263

युक्तमेतत्। यतः कृतकत्वमात्रमनित्यतां साधयति। तस्य तादात्म्यलक्षणप्रतिबन्धसद्भावादिति। इह तु स्वारम्भकावयवन्निवेशविशिष्टत्वमात्रसाधने नायं न्यायोऽस्ति। सन्निवेशसामान्यस्य विपर्यये बाधकाभावात्प्रतिबन्धासिद्धेः यस्य तदुत्पत्तिलक्षणः प्रतिबन्धः सिद्धः, यदुपलम्भादक्रियादर्शिनोऽपि कृतबुद्धिर्भवति तस्यासिद्धेरिति भावः॥ ६७॥ § 264

अथ तदुत्पत्त्याप्रतिबन्धविशेषं परित्यज्य सामान्यमेव लिङ्गमुच्यते तदा व्यभिचारितेति दर्शयन्नाह—धूमेत्यादि। § 265

धूमात्मा धवलो दृष्टः पावकाव्यभिचारवान्।
सिताभिधेयतामात्रान्न हिमादपि तद्गतिः॥ ६८ ॥§ 267

049/k

कथं तर्हि कार्यसमं जात्युत्तरमुदाहृतमित्याह—सामान्येत्यादि। § 268

सामान्यप्रतिबन्धे तु विशेषाश्रयणी यदा।
चोदना क्रियते तत्र जात्युत्तरमुदाहृतम्॥ ६९ ॥§ 270

साध्येन सह सामान्येन साधनधर्मस्य विपक्षे बाधकप्रमाणवृत्त्या प्रतिबन्धे सिद्धेऽपि सति यत्र धर्मविशेषमाश्रित्य चोदना क्रियते, तज्जात्युत्तरम्, न चेह सामान्येन प्रतिबन्धः सिद्धः, यस्य तु सन्निवेशविशेषप्रबन्धोऽस्ति सोऽसिद्ध इति न जात्युत्तरमेतत्॥ ६९॥ § 271

अथाप्रतिबद्धमपि सामान्यं गमकं स्यात्, तदातिप्रसङ्गः स्यादिति दर्शयन्नाह—गोशब्देत्यादि। § 272

गोशब्दवाच्यतामात्राद्दिगादीनां विषाणिता।
संसिद्ध्येदन्यथा ह्येष न्यायो नाश्रीयते यदि॥
७० ॥§ 274

एवं हि स्वर्गदिग्वचनलोचनकिरणकुलिशभूपयसामपि गोशब्दाभिधेयतामात्राद्वाहुलेयादिवद्विषाणवत्तानुमानप्रसङ्गः॥ ७०॥ § 275

स्यादेतत्कृतकत्वादिवदस्यापि सन्निवेशविशिष्टत्वस्य बुद्धिमत्कारणपूर्वकत्वेन,प्रतिबन्धोऽस्त्येवेत्याह—यदि त्वित्यादि। § 276

यदि तु प्रतिबन्धोऽस्मिन्प्रमाणे नोपपद्यते।
तदत्र युक्तितः सिद्धे न विवादोऽस्ति कस्यचित्॥
७१ ॥§ 278

किं तु स एव प्रतिबन्धो न सिद्ध इति दर्शयन्नाह—किंत्वित्यादि। § 279

किन्तु नित्यैकसर्वज्ञनित्यबुद्धिसमाश्रयः।
साध्यवैकल्यतोऽव्याप्तेर्न सिद्धिमुपगच्छति॥
७२ ॥§ 281

न हि भवतां बुद्धिमत्पूर्वकत्वमात्रं साधयितुमिष्टं किं तु नित्य एकः, सर्वज्ञाया बुद्धेर्नित्याया आश्रयः सकलभुवनहेतुर्बुद्धिमानीश्वराभिधानो यः पदार्थः, तत्पूर्वकत्वमस्य साधयितुमिष्टम्। तस्यैव विवादास्पदीभूतत्वात्, स च तथाभूतो न सिद्धिमुपगच्छति। कस्मात् ? साध्यवैकल्यतोऽव्याप्तेः। घटादेः साधर्म्यदृष्टान्तस्य यथोक्तसाधर्म्यवैकल्यात्तथाभूतेन साध्यधर्मेण हेतोर्व्याप्त्यसिद्धेः। न हि यथोक्तसाध्यधर्मेण क्वचिद्दृष्टान्ते हेतोः प्रतिबन्धोऽस्तीति यावत्॥ ७२॥ § 282

050/k

तदेव दर्शयन्नाह—तथाहीत्यादि। § 283

१ त्वस्य] Correction: ; (त्वेन ?) (sic!)त्वस्य
१--२ पूर्वकत्वेन] Correction: ; पूर्वकत्वमेव (sic!)पूर्वकत्वेन

तथाहि सौधसोपानगोपुराट्टालकादयः।
अनेकानित्यविज्ञानपूर्वकत्वेन निश्चिताः॥ ७३॥§ 285

किंच न केवलमसिद्धोऽनैकान्तिकश्च हेतुः, अपि तु विरुद्धोऽपीति दर्शयति—अत एवेत्यादि। § 286

अत एवायमिष्टस्य विघातकृदपीच्य (ष्य ?) ते।
अनेकानित्यविज्ञानपूर्वकत्वप्रसाधनात्॥ ७४॥§ 288

अत एवेति। साध्यविपरीतधर्मव्याप्तितः। न केवलं पूर्वोक्तेन विधिनाऽसिद्धोऽनैकान्तिकश्चेत्यपिशब्देनाह॥ ७४॥ § 289

ननु च विपर्यये प्रतिबन्धसद्भावे सति विरुद्धः स्यात्। अस्य च बुद्धिमत्पूर्वकमात्रेऽपि न प्रतिबन्धोऽस्ति, तत्कथं तद्विशेषे स्यादित्याह—बुद्धिमद्धेतुमात्रे हीत्यादि। § 290

बुद्धिमद्धेतुमात्रे हि प्रतिबन्धस्त्वयोदितः।
द्वितीये पुनरस्माभिर्विस्पष्टमभिधीयते॥ ७५॥§ 292

त्वयेश्वरवादिना बुद्धिमद्धेतुमात्र प्रतिबन्धो वर्णितः। अन्यथा सामान्येनापि प्रतिबन्धासिद्धौ कथमीश्वरहेतुकत्वं भावानां सिद्ध्येत्। तस्माद्भवदभिप्रायातो बुद्धिमत्पूर्वकत्वमात्रस्य सिद्धस्य सिद्धत्वमभ्युपेत्य भवदभिमतात्साध्यविशेषाद्यदेतद्द्वितीयमनित्यानेकविज्ञानपूर्वकत्वलक्षणमिष्टविपरीतसाध्यं तस्मिन्द्वितीये साध्यविशेषेऽस्माभिर्हेतोर्विस्पष्टं प्रतिबन्धोऽभिधीयते॥ ७५॥ § 293

कथमसौ विस्पष्टमभिधीयत इत्याह—क्रमाक्रमेत्यादि। § 294

क्रमाक्रमविरोधेन नित्या नो कार्यकारिणः।
विषयाणां क्रमित्वेन तज्ज्ञानेष्वपि च क्रमः॥
७६॥§ 296

न हिश्वरादयो नित्यभावाः कार्यकारिणः, नित्यस्य क्रमयौगपद्याभ्यामर्थक्रियाविरोधात्। तस्मादनित्या एवार्थक्रियाकारिणः। ते च प्रतिक्षणमपरापरस्वभावा भवन्तीति सिद्धमनित्यमनेकत्वं न बुद्धिमतः कर्तुः। यदपीश्वरस्य नित्यैकबुद्ध्युपेतत्वंप्रतिज्ञातं तदप्यनुमानविरुद्धमिति दर्शयन्नाह—विषयाणामित्यादि॥ ७६॥ § 297

क्रमभावीत्यादिना प्रमाणयति। § 298

क्रमभावीश्वरज्ञानं क्रमिविज्ञेयसङ्गतेः।
देवदत्तादिविज्ञानं यथा ज्वालादिगोचरम्॥ ७७॥§ 300

051/k

यत्क्रमिविज्ञेयविषयं ज्ञानं तत्क्रमभावि, यथा देवदत्तादिविज्ञानं ज्वालादिगोचरम्, क्रमिविज्ञेयविषयं चेश्वरज्ञानमिति स्वभावहेतुः। प्रसङ्गसाधनं चेदम्। तेनाश्रयासिद्धता हेतोर्नाशङ्कनीया। सामान्यादिपदार्थविषयं देवदत्तादिविज्ञानं साधनधर्मविकलमिति ज्वालादिगोचरमुदाहृतम्। किं पुनरत्र बाधकं प्रमाणम् ? उच्यते—यदि क्रमवता विषयेण तदीश्वरज्ञानं स्वनिर्भासमुपजन्येत, तदा सिद्धमेव क्रमित्वम्। अथ न जन्यते, तदा प्रत्यासत्तिनिबन्धनाभावान्न तज्ज्ञानीयात्। विषयमन्तरेणापि भवतः प्रामाण्यं वाऽभ्युपगतं हीयेत। नष्टाजाते च विषये निर्विषयत्वप्रसङ्गः स्यादिति। इदमत्र बाधकं प्रमाणम्॥ ७७॥ § 301

यच्चोक्तं वैधर्म्येणाणवो मताः इति तदपि वैधर्म्योदाहरणमनिवृत्तसाध्यधर्मकमित्यादर्शयन्नाह—अणुसंहतिमात्रमित्यादि। § 302

अणुसंहतिमात्रं च घटाद्यस्माभिरिष्यते।
तत्कारकः कुलालादिरणूनामेव कारकः॥
७८॥§ 304

न व्यावृत्तस्ततो धर्मः साध्यत्वेनाभिवाञ्छितः।
अणूदाहरणादस्माद्वैधर्म्येण प्रकाशितात्॥ ७९॥§ 306

अवयविनो विस्तरेण प्रतिषेत्स्यमानत्वात् प्रतिषिद्धत्वाच्चेत्यतः कुलालादेरणूनामेव कारकत्वं प्रसिद्धम्। अतो बुद्धिमत्पूर्वकत्वं साध्यधर्मोऽणुभ्यो वैधर्म्येण प्रकाशितेभ्यो न व्यावृत्त इत्यव्यावृत्तसाध्यधर्मता दोषो वैधर्म्यदृष्टान्तस्य॥ ७८॥ ७९॥ § 307

स्यादेतत्—यद्यस्माभिर्विशेषः साधयितुमिष्टः स्यात्तदा साध्यविकलता साधर्म्यदृष्टान्तस्य पूर्वोक्ता स्यात्, यावता सामान्येन बुद्धिमत्पूर्वकत्वमात्रं साध्यते, तस्मिंश्च सिद्धे तर्वादीनां सामर्थ्यादीश्वरः कर्ता सिद्ध्यति, न हि घटादिवत्तेषां कुलालादिः कर्त्ता संभवति, तेन सामान्यस्य विशेषविशिष्टत्वात्, तर्वादिषु चान्यस्य कर्तुरसंभाव्यमानत्वात्, सामर्थ्याद्विशेषपरिग्रहमन्तरेणापीश्वर एव कर्त्ताऽमीषां सिध्यतीत्याह—बुद्धिमत्पूर्वकत्वेत्यादि। § 308

बुद्धिमत्पूर्वकत्वं च सामान्येन यदीष्यते।
तत्र नैव विवादो नो वैश्वरूप्यं हि कर्मजम्॥
८० ॥§ 310

एवं हि सिद्धसाध्यतादोषः। कस्मादित्याह—वैश्वरूप्यं हीत्यादि—वैश्वरूप्यम्— सत्वभाजनलोकस्य वैचित्र्यम्, कर्मजमिति। साधारणासाधारणशुभाशुभकर्मजनितम्। अतः शुभाशुभकर्मकारिणः पुरुषा बुद्धिमन्तोऽस्य कारणतामापद्यन्त इति सिद्धसाध्यता॥ ८०॥ § 311

052/k

विशेषेण तर्हि साध्यत इति चेदाह—नित्येत्यादि। § 312

नित्यैकबुद्धिपूर्वत्वसाधने साध्यशून्यता।
व्यभिचारश्च सौधादेर्बहुभिः करणेक्षणात्॥ ८१ ॥§ 314

एतच्च पूर्वमुक्तमपि निगमनार्थं पुनरभिहितम्। एका बुद्धिरस्येत्येकबुद्धिः, नित्यश्चासावेकबुद्धिश्चेति विग्रहः। यद्वा—नित्यैका बुद्धिरस्येति समासः। साध्यशून्यतेति। साधर्म्यदृष्टान्तस्येति शेषः। व्यभिचारश्चेति। हेतोरित्यध्याहारः। कथमित्याह ? सौधेत्यादि॥ ८१॥ § 315

यच्चोक्तं तर्वादीनामित्यादि; तत्राह—एतदेवेत्यादि। § 316

एतदेव यथायोग्यमवशिष्टेषु हेतुषु।
योज्यं दूषणमन्यच्च किञ्चिन्मात्रं प्रकाश्यते॥
८२ ॥§ 318

तत्रापि हि रूपादिमत्त्वादित्यादिसाधनेष्वेतदेव हि यथासंभवं दूषणं वाच्यम्।एतदेवेति। असिद्धत्वं, प्रतिबन्धाभावाद्व्यभिचारः, सति प्रतिबन्धे विरुद्धत्वं, साध्यवैकल्यम्, सामान्येन सिद्धसाध्यतेत्यादि। तथाहि—तत्रापि यादृशं रूपादिमत्त्वं चेतनावदधिष्ठितं तादृशं तर्वादिषु न सिद्धम्, रूपादिमत्त्वमात्रस्य प्रतिबन्धासिद्धेर्व्यभिचारः, प्रतिबन्धाभ्युपगमे सति इष्टविपरीतसाधनाद्विरुद्धत्वम्, साधर्म्यदृष्टान्तस्य साध्यविकलता, नित्यैकचेतनाधिष्ठितत्वेन साध्यधर्मेणान्वयासिद्धेः, सामान्येन सिद्धसाध्यता, विशेषेण व्यभिचारो घटादिष्वन्यथादर्शनादिति। एवमन्येष्वपि हेतुषु योज्यम्॥ ८२॥ § 319

यच्च स्थित्वा प्रवृत्तेरिति साधनमुक्तं तत्राधिकं दूषणमाह—स्थित्वेत्यादि। § 320

स्थित्वा प्रवृत्तिरण्वादेर्न सिद्धा क्षणभङ्गतः।

व्यभिचारश्च तेनैव तस्यापि क्रमवृत्तिता॥ ८३ ॥§ 322

सर्वभावानामुदयसमनन्तरापवर्गितया क्षणमात्रमपि न स्थितिरस्तीति कुतः स्थित्वा प्रवृत्तिर्भविष्यति, तस्मात्प्रतिवाद्यसिद्धो हेतुः। अनैकान्तिकश्च तेनैवेश्वरेण, यत ईश्वरः क्रमवत्सु कार्येषु स्थित्वा प्रवर्त्तते। अथ च नासौ चेतनावदधिष्ठितोऽनवस्थाप्रसङ्गात्। अथाचेतनत्वे सतीति सविशेषणो हेतुः क्रियते, यथा प्रशस्तमतिना कृतः, तथाऽपि संदिग्धविपक्षव्यावृत्तिकतयाऽनैकान्तिकत्वमनिवार्यमेव। येदव हि विशेषणं विपक्षाद्धेतुं निवर्त्तयति तदेव न्याय्यम्, यत्पुनर्विपक्षे सन्देहं न व्यावर्तयति तदुपात्तमप्यसत्कल्पमेव। पूर्वोक्तश्चासिद्धतादिदोषः सविशेषणत्वेऽपि तदवस्थ एव॥ ८३ ॥ § 323
053/k

यच्चोक्तं सर्गादौ व्यवहारश्चेत्यादि, तत्राह—प्रलय इत्यादि। § 324

प्रलये लुप्तविज्ञानस्मृतयः पुरुषा न नः।
आभास्वरादिसम्भूतेस्तत एवेह संभवात्॥ ८४ ॥§ 326

उत्तरकालं प्रबुद्धानामित्येतद्विशेषणमसिद्धम्, तथाहि—नास्मन्मतेन प्रलयकाले प्रलुप्तज्ञानस्मृतयो वितनुकरणाः पुरुषाः सन्तिष्ठन्ते, किन्त्वाभास्वरादिषु स्पष्टज्ञानातिशययोगिषु देवनिकायेषूत्पद्यन्ते; ये तु प्रतिनियतनिरयादिविपाकसंवर्त्तनीयकर्माणस्ते लोकधात्वन्तरेषूत्पद्यन्त इति विवर्त्तकालेऽपि तत एवाभास्वरादेश्चयुत्वेहालुप्तज्ञानस्मृतय एव संभवन्ति। तस्मादुत्तरकालं प्रबुद्धानामिति विशेषणमसिद्धम्। अनैकान्तिकश्च हेतुः, सन्दिग्धविपक्षाव्यावृत्तिकत्वात्। किंचान्योपदेशपूर्वकत्वमात्रे साध्ये सिद्धसाध्यता, अनादेर्व्यवहारस्य सर्वेषामेवान्योपदेशपूर्वकत्वस्येष्टत्वात्। अथेश्वरलक्षणपुरुषोपदेशपूर्वकत्वं साध्यते, तदाऽनैकान्तिकत्वम्। अन्यथाऽपि व्यवहारसंभवाद्दृष्टान्तस्य साध्यविकलता। एतच्च पूर्वमेव सामान्यं दूषणमुक्तम्॥ ८४ ॥ § 327

विरुद्धश्च हेतुरभ्युपेतबाधा च प्रतिज्ञाया इति दर्शयन्नाह—विमुखस्योपदेष्टृत्वमित्यादि। § 328

विमुखस्योपदेष्टृत्वं श्रद्धागम्यं परं यदि।
वैमुख्यं वितनुत्वेन धर्माधर्मविवेकतः॥ ८५ ॥§ 330

यदीश्वरोपदेशपूर्वकत्वं व्यवहारस्य संभवेत्तदा स्यादविरुद्धता हेतोः, यावताऽसौ विगतमुखत्वादुपदेष्टा न युक्तः। तच्च विमुखत्वं वितनुत्वेन—शरीरविर-

६ विगत] Correction : ; विमत (sic !)विगत

हादित्यर्थः।तच्च विमततनुत्वमस्य कथं सिद्धमित्याह—धर्माधर्मविवेकत इति। शरीकारणधर्माधर्मविरहादित्यर्थः। तथाचोद्योतकारेणोक्तम्। यथा बुद्धिसत्तायामीश्वरस्य प्रमाणसंभवो नैवं धर्मादिसत्त्वे प्रमाणमस्तीति तस्मादीश्वरस्योपदेष्टृत्वासंभवात्तदुपदेशकत्वं व्यवहारस्य न सिद्ध्यति, किं त्वीश्वरव्यतिरिक्तान्यपुरुषोपदेशपूर्वकत्वमत इष्टविघातकारित्वाद्विरुद्धो हेतुः। अथेश्वरस्योपदेष्टृत्वमङ्गीक्रियते, तदा विमुखत्वमभ्युपेतं हीयत इत्यभ्युपेतबाधा। महाभूतादिकं व्यक्तमित्यादौ तु प्रयोगे हेतूनां पूर्ववदनेकान्तिकत्वं विपक्षे बाधकप्रमाणाभावात्, सामान्येन सिद्धसाध्यता, विशेषेण दृष्टान्तस्य साध्यविकलतेति योजनीयम्॥ ८५॥ § 331

054/k

एवं विस्तरेणेश्वरसाधकानि प्रमाणानि निराकृत्य साम्प्रतं व्याप्तिदोषोद्भावनमुखेन तद्बाधकं प्रमाणं स्वपक्षसिद्ध्यर्थमुपदर्शयितुमाह—अनुमानविरोधेत्यादि। § 332

अनुमानविरोधश्च व्याप्तेः सर्वत्र साधने।
न विरुद्धेन धर्मेण व्याप्तिर्हेतोः प्रकल्पते॥ ८६॥ § 334

सर्वत्र यथोक्ते साधने साध्येन या हेतोर्व्याप्तिस्तस्या अनुमानविरोधो वक्ष्यमाणः। अथ प्रतिज्ञायाः कस्मादनुमानविरोधो नोद्भाव्यते ? यदि प्रतिज्ञा साधनाङ्गं स्यात्तदातद्दोषोद्भावनं स्यात्, यावता साक्षात्पारम्पर्येण वाऽसौ न साध्यसिद्धेरङ्गभावं प्रतिपद्यते, ततश्च साधनदोषाभिधाने प्रस्तुते यत्प्रतिज्ञादोषोद्भावनं तददोषोद्भावनं वादिनो निग्रहस्थानं स्यात्, तस्मान्न साधनप्रयोगेषु प्रतिज्ञादोषो वाच्यः। यत्र तु क्वचित्प्रतिज्ञाविरोध उद्भाव्यते, तत्र तन्मुखेन व्याप्तेरेव तद्विघटनं क्रियत इति ग्रहीतव्यम्। यद्वा—साधनप्रयोगादन्यत्र तद्द्रष्टव्यम्। अथ व्याप्तिकालेऽपि कथमनुमानविरोधो भवतीत्याह—न विरुद्धेनेत्यादि। विरुद्धेनेति। प्रमाणव्याहतेन तस्याऽसंभवादेव न युक्ता व्याप्तिः, न ह्यसता व्याप्तिरवकल्प्यत इति यावत्॥ ८६॥ § 335

किं तदनुमानं येन व्याप्तिर्बाध्यत इत्याह—नेश्वरो जन्मिनामित्यादि। § 336

नेश्वरो जन्मिनां हेतुरुत्पत्तिविकलत्वतः।
गगनाम्भोजवत्सर्वमन्यथा युगपद्भवेत्॥ ८७॥ § 338

यदुत्पत्तिविकलं न तत्कस्यचित्कारणम्, यथा गगनाम्भोजम्, उत्पत्तिविकलश्चेश्वर इति व्यापकविरुद्धोपलब्धिः। प्रसङ्गसाधनं चेदम्, तेनाश्रयासिद्धता न चोदनीया। सर्वमन्यथा युगपद्भवेदिति। अप्रतिबद्धसामर्थ्यकारणत्वादेककालाभिमतकार्यग्रामवत्सर्वं युगपद्भवेदित्यर्थः। एतदत्रबाध-

कं प्रमाणम्, अथवाऽर्थकथनमात्रमेतत्। एवं तु प्रसङ्गसाधनं कर्त्तव्यम्। यदविकलकारणं तद्भवत्येव। यथाऽन्त्यावस्थाप्राप्तायां सामग्र्यामविकलकारणो भवन्नङ्कुरः। अविकलकारणं च सर्वमीश्वरहेतुकं जगदिति युगपद्भवेत्। स्यादेतत्—नेश्वर एव केवलं कारणमपि तु धर्मादिसहकारिकारणान्तरमपेक्ष्य करोति, निमित्तकारणत्वादीश्वरस्य, तेन धर्मादेः कारणान्तरस्य वैकल्यादविकलकारणत्वमसिद्धमिति। तदेतदसम्यत्। यदि हि तस्य सहकारिभिःकश्चिदुपकारिभिः कश्चिदुपकारः कर्त्तव्यो भवेत्, तदा तस्य सहकारिणि व्यपेक्षा, यावता नित्यत्वात्परैर- 055/k नाधेयातिशयस्य न किंचित्तस्य सहकारिभ्यः प्राप्तव्यमस्तीति किमिति तांस्तथाभूताननुपकारिणः सहकारिणोऽपेक्षेत। किं च येऽपि ते सहाकारिणस्तेऽपि सर्व एवेश्वरस्यायत्तजन्मतया नित्यं समवहता एवेति कथमसिद्धता हेतोः। न चानैकान्तिकता, अविकलकारणत्वहानिप्रसङ्गात्, अविकलकारणस्याप्यनुत्पत्तौसर्वदैवानुत्पत्तिप्रसङ्गोऽविशेषात्। उद्योतकरस्त्वाह—यद्यपि नित्यमीश्वराख्यं कारणमविकलं भावानां संनिहितम्। तथाऽपि न युगपदुत्पत्तिरीश्वरस्य, बुद्धिपूर्वकारित्वात्। यदीश्वरसत्तामात्रेणैवाबुद्धिपूर्वं भावानामुत्पादकः स्यात्तदा स्यादेतच्चोद्यम्। यदा तु बुद्धिपूर्वकं करोति तदा न दोषः, तस्य स्वेच्छया कार्येषु प्रवृत्तेः। अतोऽनैकान्तिकतैव हेतोरिति। तदेतदयुक्तम्। न हि कार्याणां कारणस्येच्छाभावाभावापेक्षया प्रवृत्तिनिवृत्ती भवतः, येनाप्रतिबद्धसामर्थ्येऽपीश्वराख्ये कारणे सदा सन्निहिते तदीयेच्छाऽभावान्न प्रवर्त्तन्त इति स्यात्। किं तर्हि ? कारणगतसामर्थ्यभावाभावानुविधायिनो भावाः। तथाहि—इच्छावतोऽपि कर्तुरसमर्थान्नोत्पद्यन्ते, समर्थाच्च बीजादेरनिच्छावतोऽपि समुत्पद्यन्ते। तत्र यदीश्वराख्यं कारणं कार्योत्पादकालवदप्रतिहतशक्ति सदैवावस्थितम्, भावास्तत्किमिति तदीयामनुपकारिणीं तामिच्छामपेक्षन्ते, येनोत्पादकालवद्युगपत्त उत्पद्येरन्। एवं हि तैरविकलकारणत्वमात्मनो दर्शितं भवेत्, यदि युगपद्भवेयुः। न चापीश्वरस्य परैरनुपकार्यस्य काचिदपेक्षाऽस्ति, येनेच्छामपेक्षेत। अपि च—बुद्धिव्यतिरेकेण नान्येच्छाऽस्ति, बुद्धिश्चेश्वरस्य भवद्भिर्नित्यैकरूपाऽभीष्टा, ततश्च बुद्धिपूर्वकारित्वेऽपीश्वरस्य किमिति भावानां युगपदुत्पादो न भवति। ईश्वरवत्तद्बुद्धेरपि सदा सन्निहितत्वात्। अथाप्यनित्या तस्य बुद्धिरङ्गीक्रियते, तथाऽपीश्वरसत्तामात्रभावित्वात्तस्या ईश्वरवत्सदाभाव एवेति, स एव दोषः। तस्माद्बुद्धिमत्वादिति विशेषणमकिंचित्करमेवेति नानैकान्तिकता हेतोः। न चापि विरुद्धता सपक्षे भावात् न चैवं भवति, तस्माद्विपर्ययः। प्रयोगः—यद्यदा न भवति, नतत्तदानीमविकलकारणम्, यथा कुशूलस्थितबीजावस्थायामनुत्पद्यमानोऽङ्कुरः। न भवति चैकपदार्थोत्पादकाले सर्वं विश्वमिति, व्यापकानुपलब्धिः। न च सिद्धसाध्यता, ईश्वरस्य कारणत्वे सति विकलकारणत्वानुपपत्तेः प्रसाधितत्वात्॥ ८७॥ § 339

अपरमपि प्रमाणमाह—ये वा क्रमेणेत्यादि। § 340

ये वा क्रमेण जायन्ते ते नैवेश्वरहेतुकाः।
यथोक्तसाधनोद्भूता जडानां प्रत्यया इव॥
८८ ॥§ 342

056/k

तेषामपि तदुद्भूतौ विफला साधनाभिधा
नित्यत्वादचिकित्स्यस्य नैव सा सहकारिणी॥
८९ ॥§ 344

यथोक्तेभ्यः स्वारम्भकावयवसन्निवेशविशिष्टत्वादिभ्यः साधनेभ्य उद्भूता इष्टसाध्यधर्मिविषया जडानामीश्वरकारणाभिनिवेशिनां प्रत्ययाः—निश्चया इवेत्यर्थः। ननु यथोक्तदोषदुष्टत्वान्नैतेभ्य इष्टे साध्ये प्रत्ययाः समुत्पद्यन्त इति न दृष्टान्तधर्मिसिद्धिः। सत्यमेतत्। अत एव जडानामित्युक्तम्। जडानां हि साधनाविवेकाक्षमतया साधनाभासेभ्योऽपि तेषां प्रत्ययाः समुत्पद्यन्त एव। नन्वेवमपि साध्यविकलो दृष्टान्तः, तेषामपि जडप्रत्ययानामीश्वरस्य निमित्तकारणत्वेनेष्टत्वादित्यत आह—तेषामपीत्यादि। तेषामपि—जडप्रत्ययानाम, तदुद्भूताविति। ईश्वरादुद्भूताविष्यमाणायाम्, विफला साधनाभिधा—साधनाभिधानं व्यर्थं स्यात्। ईश्वरादेव तेषामुत्पत्तेरिति भावः। ननु साधनाभिधां सहकारिणीमपेक्ष्य तेषामीश्वरो जनको भविष्यति न केवलस्तेनासौ विफला न भविष्यतीत्यत आह—नित्यत्वादित्यादि। यद्यसौ साधनाभिधा तस्येश्वरस्यासमर्थं स्वभावमपनीय समर्थमादधीत, तदा स्यात्सा तस्य सहकारिणी, यावता नित्यत्वादीश्वरोऽनुत्पाद्यानिवर्त्यस्वभावतया न केनचित्किंचित्स नीयत इति न साधनाभिधा तस्यासौ सहकारिणी युक्ता॥ ८८॥ ८९॥ § 345

अपि च—यथा परिदृष्टसामर्थ्यसाधनादिकारणव्यतिरेकेणापरिदृष्टसामर्थ्यस्यापीश्वरस्य कारणभावे कल्प्यमानेऽतिप्रसङ्गो भवतां प्राप्नोति, यतस्तमपीश्वरं परिकल्प्यापरमपि ढेट$_{क}$षकादिकं (?) कल्पनीयमेव, विशेषाभावादिति दर्शयन्नाह—येष्वित्यादि। § 346

येषु सत्सु भवद्दृष्टमसत्सु न कदाच।
तस्यान्यहेतुताक्लृप्तावनवस्था कथं न ते॥ ९० ॥§ 348

भवद्दृष्टं यदित्युपस्कारः। अन्यहेतुताक्लृप्ताविति। यथा परिदृष्टसामर्थ्येभ्यो हेतुभ्योऽन्यो हेतुस्तद्भावोऽन्यहेतुता, तस्याः क्लृप्तिः—कल्पनेति विग्रहः॥ ९०॥ TSP$_{msJ}$:37a
§ 349

५ येषु] Correction: ; ये तु (sic!)येषु

यदुक्तं सर्वकर्तृत्वसिद्धौ चेत्यादि तत्राह—कर्तृत्वेत्यादि। § 350

कर्तृत्वप्रतिषेधाच्च सर्वज्ञत्वं निराकृतम्।
बोद्धव्यं तद्बलेनैव सर्वज्ञत्वोपपादनात्॥ ९१ ॥§ 352

सर्वकर्तृत्वबलेनासौ सर्वज्ञो भवद्भिरिष्यते, तेन तन्निराकरणात्सर्वज्ञत्वमपि तस्यायत्नतो निराकृतमेव॥ ९१ ॥ § 353

057/k

अभ्युपेत्य साधनानामदुष्टत्वं दूषणान्तरमाह—यथोक्तेत्यादि। § 354

यथोक्तदोषदुष्टानि माभूवन्साधनानि वा।
तथाऽपि कर्तुर्नैकत्वं व्यभिचारोपदर्शनात्॥
९२ ॥§ 356

...s.93ab एककर्तुरसिद्धौ च सर्वज्ञत्वं किमाश्रयम्।§ 357

यथोक्ता दोषा अनुमानविरोधपर्यन्ताः। अयमत्र समुदायार्थः। यद्यपि तनुगिरिप्रभृतीनामेभ्यः साधनेभ्यो बुद्धिमान्कर्त्ता सिद्ध्यति। तथाऽप्यसौ य एवैकस्य हेतुः स एवान्यस्यापीति न निश्चित एवेति प्रतिकार्यं भिन्नस्यापि कर्तुः संभाव्यमानत्वात्सौधादेश्चैकस्यापि बहुभिः करणेक्षणादतो नैकः कर्त्ता प्रतिपादयितुं शक्यते, यावच्चैकः कर्ता न सिद्धस्तावत्कुतः सर्वज्ञत्वसिद्धिरिति। अत्र प्रशस्तमतिरेककर्तृत्वसिद्धये प्रमाणयति। एकाधिष्ठाना ब्रह्मादयः पिशाचान्ताः परस्परातिशयवृत्तित्वात्, इह येषां परस्परातिशयवृत्तित्वं तेषामेकायत्तता दृष्टा, यथेह लोके गृहग्रामनगरदेशाधिपतीनामेकस्मिन्सार्वभौमे नरपतौ, तथा च भुजगरक्षोयक्षप्रभृतीनां परस्परातिशयवृत्तित्वम्, तेन मन्यामहे तेषामप्येकस्मिन्नीश्वरे पारतन्त्र्यमिति। तत्र यद्येत ईश्वराख्येनाधिष्ठिता इत्ययमर्थः साधयितुमिष्टस्तदाऽनैकान्तिकता। विपर्यये बाधकप्रमाणाभावात्। प्रतिबन्धासिद्धेः। दृष्टान्तस्य च साध्यविकलता। अथाधिष्ठायकमात्रेण साधिष्ठानेति साध्यते, तदा सिद्धसाध्यता, यत इष्यत एवास्माभिर्भगवतासंबुद्धेन सकललोकचूडामणिना सर्वमेव जगत्कारुण्यवशादधिष्ठितम्। यत्प्रभावादद्याप्यभ्युदयनिःश्रेयससंपदमासादयन्ति साधवः। इदं चापरं तेनैव साधनमुक्तम्।सप्तभुवनान्येकबुद्धिनिर्मितानि, एकवस्त्वन्तर्गतत्वात्। एकावसथान्तर्गतापवरकवत्।यथैकावसथान्तर्गतानामपरवरकाणां सूत्रधारैकबुद्धिनिर्मितत्वं दृष्टं तथैकस्मिन्नेव भुवनेऽन्तर्गतानि सप्तभुवनानि। तस्मात्तेषामप्येकबुद्धिनिर्मितत्वं निश्चीयते। यद्बुद्धिनिर्मितानि चैतानि स भ-

गवान्महेश्वरः सकलभुवनैकसूत्रधार इति। तदत्र हेतुरसिद्धः, नैकं भुवनमावसथादि वाऽस्ति, व्यवहारलाघवार्थं बहुष्वियं संज्ञा कृता। अत एव दृष्टान्तोऽपि साधनविकलः। एकसौधान्तर्गतानामपवरकादीनामनेकसूत्रधारघटितत्वदर्शनाच्चानैकान्तिको हेतुः। एवमन्येष्वपि साधनेषु यथायोगं दूषणं वाच्यम्॥ ९२॥ § 358

यच्चोक्तं विमतेरास्पदं वस्त्वित्यादि। तत्राह—तत्सिद्धौ साधनमित्यादि। § 359

…s.93cd तत्सिद्धौ साधनं प्रोक्तं जैमनीयेषु राजते॥ ९३॥
इतीश्वरपरीक्षा।§ 361

058/k

यदि सामान्येनास्ति कश्चित्सर्वज्ञ इति साध्यते, तदा नास्मान्प्रतीदं भवतां साधनं राजते। सिद्धसाध्यतादोषात्। किंतु ये सर्वज्ञापवादिनो जैमिनीयास्तेष्वेव शोभते।अत्रेश्वराख्यः सर्वज्ञः साध्यते, तदा प्रतिबन्धासिद्धेर्हेतोरनैकान्तिकता, दृष्टान्तस्य साध्यविकलतेति। अतो नास्मान्प्रति साधनमेतद्राजत इति भावः। यच्चापि विचित्रोदयेत्यादि धर्मिविशेषणमुपात्तं तस्य न कश्चिदुपयोगोऽस्ति। केवलं परव्यामोहनाय स्वप्रक्रियाघोषणमिदं क्रियते भवद्भिः। तथाहि—विना धर्म्यादिविशेषणेनैवंविधेनयदि साधनमसिद्धतादिदोषरहितं तदा भवत्येवाभिमतसाध्यसिद्धिः। अथासिद्धतादिदोषदुष्टं साधनम्, तदेवंविधविशेषणोपादानेऽपि न साध्यसिद्धिरस्तीति, सर्वथा व्यर्थमेव विशेषणम्। यत्पुनर्विपक्षाद्धेतुं व्यावर्त्तयति तदेव विशेषणं न्याय्यम्। किंचाश्रयासिद्धो हेतुः। न हि यथोक्तविशेषणविशिष्टो धर्मी प्रसिद्धोऽस्ति प्रतिवादिनः, तस्मान्न शास्त्रप्रसिद्धो धर्मी कर्त्तव्यः॥ ९३॥ § 362

इतीश्वरपरीक्षा।

०.४ उभयपरीक्षा।

उभयव्यापाररहितत्वप्रतिपादनार्थमाह—प्रकृतीश्वरयोरित्यादि। § 364

प्रकृतीश्वरयोरेवं हेतुत्वप्रतिषेधनात्।
प्रत्येकं सहितं कर्तृ नोभयं जन्मिनामिदम्॥
९४॥§ 366

तत्र केचित्साङ्ख्या आहुः—न प्रधानादेव केवलादमी कार्यभेदाः प्रवर्तन्ते, तस्याचेतनत्वात्। न ह्यचेतनोऽधिष्ठायकमन्तरेण स्वकार्यमारभमाणो दृष्टः। न च पुरुषोऽधिष्ठायको युक्तस्तस्य तदानीमज्ञत्वात्। तथा हि—बुद्ध्यध्यवसितमेवार्थं पुरुषश्चेतयते। बुद्धिसंसर्गाच्च पूर्वमसावज्ञ एव, न जातु कंचिदर्थं विजानाति। न चाविज्ञातमर्थं शक्तः कश्चित्कर्तुमिति नासौ कर्त्ता। तस्मादीश्वर एव प्रधानापेक्षः कार्यभेदानां कर्त्ता, न केवलः। न हि देवदत्तादिः केवलः पुत्रं जनयति नापि केवलः कुलालो घटं करोतीति। तदेतदपि प्रत्येकं प्रकृतीश्वरयोर्हेतुत्वनिषेधात्सहितमपि नेदमीश्वरप्रधानाख्यमुभयं जन्मिनाम्—उत्पत्तिमताम्, कर्तृ—जनकम्' इति सिद्धम्॥ ९४॥
§ 367

ननु यदि नाम प्रत्येकमनयोः कर्तृत्वं निषिद्धम्, तथाऽपि सहितयोरनिषिद्धमेव, न हि केवलानां चक्षुरादीनां चक्षुर्ज्ञानोत्पत्तिं प्रति सामर्थ्याभावे सहितानामपि न भवतीत्याशङ्क्याह—साहित्यमित्यादि। § 368

059/k

साहित्यं सहकारित्वादेतयोः कल्प्यते च यत्।
तत्स्यादतिशयाधानादेकार्थक्रिययाऽपि वा॥
९५॥§ 370

न युक्ता कल्पनाऽऽद्यस्य निर्विकारतया तयोः।
न द्वितीयस्य कार्याणां यौगपद्यप्रसङ्गतः॥ ९६॥§ 372

साहित्यं नाम सहकारित्वं तच्च द्विविधम्, परस्परातिशयाधानाद्वा स्यादेकार्थकारित्वाद्वा। तत्र न तावदाद्यस्यातिशयाधानलक्षणस्य सहकारित्वस्य कल्पना युक्ता, कस्मात् ? तयोरीश्वरप्रधानयोर्नित्यत्वेन निर्विकारत्वात्। नापि द्वितीयस्य, कल्पना युक्तेति प्रकृतेन संबन्धः। कस्मात् ? कार्याणां यौगपद्यप्रसङ्गात्। अविकलाप्रतिहतसामर्थ्यस्येश्वरप्रधानाख्यकारणस्य सदा सन्निहितत्वेनाविकलकारणात्। अत्र चपूर्ववद्यदविकलकारणमित्यादि प्रसङ्गसाधनं वाच्यम्॥ ९५॥ ९६॥ § 373

अथोच्यत इत्यादिना परमतेन यदविकलकारणमित्यस्य हेतोरसिद्धतामुद्भावयति। § 374

४ कल्प्यते] Correction : ; कल्पिते
(sic !)कल्प्यते

अथोच्यते प्रधानस्य त्रिरूपत्वं व्यवस्थितम्।
तत्रायं रजसा युक्तः सर्गहेतुर्महेश्वरः॥ ९७ ॥§ 376

उद्भूतवृत्तिसत्त्वं तु यदा संश्रयते पुनः।
तदा सर्वस्य लोकस्य स्थितेर्याति निमित्तताम्॥
९८ ॥§ 378

उद्भूतशक्तिरूपेण तमसा युज्यते यदा।
प्रलयं सर्वजगतस्तदा किल करोत्ययम्॥
९९ ॥§ 380

रजःसत्त्वादिरूपादि तदेवं सहकारिणः।
क्रमेणैवास्य वर्तन्ते कार्याणां नाक्रमस्ततः॥
१०० ॥§ 382

यद्यपि कारणद्वयमेतन्नित्यसन्निहितम्। तथाऽपि क्रमेणैवाऽमी कार्यभेदाः प्रवर्त्तिष्यन्ते, यत ईश्वरस्य प्रधानगतास्त्रयो गुणाः सत्त्वादयः सहकारिणः, तेषां च क्रमवृत्तित्वात्तत्कार्येष्वपि क्रमो भवति। तथा हि—यदोद्भूतवृत्तिना रजसा युक्तो भवतिमहेश्वरस्तदा सर्गहेतुः प्रजानां भवति, प्रसवकार्यत्वाद्रजसः। यदा तु सत्त्वं समुद्भूतवृत्तिं संश्रयते तदा लोकानां स्थितिकारणं भवति, सत्त्वस्य स्थितिहेतुत्वात्। यदा तु तमसोद्भूतशक्तिना समायुक्तो भवति तदा प्रलयं नाशं सर्वजगतः करोति, तमसः प्रत्यहेतुत्वात् यथोक्तम्—रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमःस्पृशे। अजाय सर्गस्थितिनाशतन्त्रिणे त्रयीमयाय त्रिगुणात्मने नमः॥ इति। किलशब्दोऽसंभावनायाम्॥ ९७॥ ९८॥ ९९॥ १००॥ § 383

060/k

इहोच्यत इत्यादिना प्रतिविधत्ते। § 384

इहोच्यते तयोरेकक्रियाकाले समस्ति किम्।
तदन्यकार्यनिष्पत्तिसामर्थ्यं यदि वा न तत्॥
१०१ ॥§ 386

यद्यस्ति सर्गकालेऽपि द्वयमप्यपरं भवेत्।
एवमन्यस्य सद्भावे द्वयमन्यत्प्रसज्यते॥ १०२॥§ 388

तयोरिति। प्रकृतीश्वरयोः। एकक्रियाकाल इति। सर्गस्थितिप्रलयानामन्यतमस्यैकस्य क्रियाकाले तदपरकार्यद्वयोत्पादनसामर्थ्यं किमस्त्युत नास्तीति विकल्पद्वयम्। तत्र यद्यस्ति तदा सर्गकालेष्वविकलकारणत्वादपरं कार्यद्वयं स्थितिप्रलयात्मकं भवेदुत्पादवत्। एवं स्थितिकालेऽप्युत्पादविनाशौ प्राप्नुतः। प्रलयकाले च स्थित्युत्पादौ स्याताम्। न चैवं युक्तम्। न हि परस्परपरिहारेणावस्थितानामेकत्र धर्मिण्येकदासद्भावो युक्तः॥ १०१॥ १०२॥
§ 389

स्यादेतत्तदेककार्योत्पादकाले तयोः प्रकृतीश्वरयोरपरकार्यद्वयोत्पादनाय रूपान्तरं न सन्निहितमिति, तेन तदानीं तयोर्न प्रसङ्ग इत्याह—न हीत्यादि।
§ 390

न हि तत्पररूपेण पुनरन्यस्य कारकम्।
स्वरूपं च तदेवास्य तत्क्रियाविरतिः कुतः॥
१०३॥§ 392

तदिति। प्रकृतीश्वराख्यं कारणम्—अन्यस्येति। पाश्चात्त्यस्य कार्यद्वयस्य। न पररूपेण, किं तर्हि ? स्वरूपेणैव कारणमिति भावः॥ १०३॥
§ 393

स्यादेतद्यद्यपि तत्पररूपेण न कारणं तथाप्येककार्योत्पादकाले परिशिष्टकार्यद्वयोत्पत्तये सामर्थ्यमस्य नास्ति। तेन कार्यद्वयस्य तदानीमनुत्पाद इत्याह—तत्सामर्थ्येत्यादि। § 394

तत्सामर्थ्यवियोगे तु नैव तज्जनकं भवेत्।
अन्यदा शक्तिशून्यत्वाद्वियदम्भोरुहादिवत्॥
१०४॥§ 396

अन्यदेति। अभिमतकार्यारम्भकाले॥ १०४॥ § 397

स्यादेतद्यद्यपि प्रधाने सर्वा शक्तिः सन्निहिता, तथाऽपि योद्भूतवृत्तिर्भवति। सैव कारणतां प्रतिपद्यते, नान्या, तेन यौगपद्यं कार्याणां न भविष्यतीत्याह—उत्कटमित्यादि। § 398

उत्कटं शक्तिरूपं च यदि तन्मात्रकारणम्।

सर्वदा तद्भवेद्धेतोर्नित्यरूपस्य सन्निधेः॥ १०५॥§ 400

061/k

इदं हि सर्वा(त्वा?)दीनामुत्कटं रूपं न तावन्नित्यं युक्तं वक्तुम्, कादाचित्कत्वात्। ततश्चास्य भावः कदाचित्प्रकृतीश्वरादेव कारणादन्यतो वा हेतोः स्वतन्त्रो वा स्यादिति त्रयो विकल्पाः। तत्र प्रथमे पक्षे तदुत्कटं रूपं सर्वदा भवेत्, प्रकृतीश्वराख्यस्यहेतोर्नित्यरूपत्वेन सदा सन्निहितत्वात्॥ १०५॥ § 401

द्वितीयेऽपि पक्षे प्राह—न चापरमित्यादि। § 402

न चापरंपरैरिष्टमतो नैवान्यतोऽपि तत्।
नापि स्वतन्त्रमेवेदं कादाचित्कत्वसंभवात्॥
१०६॥§ 404

न हि प्रकृतीश्वरव्यतिरिक्तमपरं कारणमिष्टम्, येनान्यतस्तदुद्भवेत्। नापि तृतीयः पक्षो युक्त इत्याह—नापीत्यादि॥ १०६॥ § 405

अथ स्वातन्त्र्ये सति कादाचित्कत्वस्य को विरोध इत्याह—स्वत इत्यादि। § 406

स्वतो भावे ह्यहेतुत्वं स्वक्रियाया विरोधतः।
अपेक्षया हि भावानां कादाचित्कत्वसंभवः॥
१०७॥§ 408

स्वतः—स्वभावात्, भावे—जन्मनि सति, अहेतुकत्वं नियमतो भवेत्। ननु स्वभावादुत्पद्यमानः कथमहेतुको भवति यावता स्वभाव एव तस्य हेतुः प्रतीयत इत्याह—स्वक्रियाया विरोधत इति स्वस्मिन्स्वरूपे क्रियाया हेतुभावस्य विरोधात्। स्यादेतद्भवत्वहेतुकत्वम्, तथाऽपि किमिति कादाचित्कत्वं न युज्यत इत्याह—अपेक्षया हीत्यादि। स्वभावान्तरायत्तवृत्तयो हि भावाः कादाचित्का युक्ताः। परभावाभावप्रतिबद्धत्वात्तेषां सदसत्तयोः। ये पुनरपरायत्तवृत्तयस्तेषामपेक्षणीयस्य कस्यचिदभावात्किमिति कदाचिद्भवेयुः॥ १०७॥ § 409

अथ स्वक्रियाविरोध एव कथं सिद्ध इत्याह—तथा हीत्यादि। § 410

तथा हि न ह्यभावस्य स्वात्मनि व्यापृतिर्मता।
निष्पन्नस्यात्मनोऽप्यस्यामवस्थायां प्रसिद्धितः॥
१०८॥§ 412

आत्मानं हि जनयन्स्वभावो निष्पन्नो वा न वा। न तावन्निष्पन्नः। तस्यामवस्थायामात्मनोऽपि निष्पन्नरूपाव्यतिरेकित्वेन प्रसिद्धेर्निष्पन्नत्वात्, स्वभाववत्। ततश्च जन्यासंभवात्कुत्रासौ भावो व्याप्रियेत॥ १०८॥ § 413

नाप्यनिष्पन्न इति दर्शयति—अनिष्पन्नेत्यादि। § 414

अनिष्पन्नात्मतत्वस्तु नैव व्याप्रियते क्वचित्।
सर्वशक्तिवियुक्तत्वादाकाशकमलादिवत्॥ १०९॥
इत्युभयपरीक्षा।§ 417

062/k

क्वचिदिति सामान्यवचनम्। न स्वात्मभूते नापि परभूत इत्यर्थः। सति व्यापारे निष्पन्नात्मतत्व एव स्यात्। एतावन्मात्रलक्षणत्वान्निष्पन्नस्येति भावः॥ १०९॥ § 418

इत्युभयपरीक्षा।

०.५ स्वाभाविकवादपरीक्षा।

आदिशब्दोपात्तस्वभाववादिवादमल्पवक्तव्यतया क्रममनाश्रित्यैव निराकुर्वन्नाह—सर्वेत्यादि। § 420

सर्वहेतुनिराशंसं भावानां जन्म वर्ण्यते।
स्वभाववादिभिस्ते हि नाहुः स्वमपि कारणम्॥
११०॥§ 422

स्वतोभाववादस्तु यद्यप्यादिशब्देनाहत्यनोपात्तः। तथाऽपि स्वभाववादिन(म?)तोपादानात्सूचित एव। तत्र ये स्वत एव भावा जायन्त इति वर्णयन्ति। ते स्वक्रियाया विरोधत इत्यादिना निरस्ताः। साम्प्रतं स्वभाववादिनो निरस्यन्ते। त एवमाहुर्न स्वतो नापि परतो भावानां जन्म किं तर्हि ? सर्वहेतुनिराशंसम्—स्वपरकारणनिरपेक्षमित्यर्थः। ननु ये स्वत एव भावा भवन्तीति वर्णयन्ति, तेभ्य एषां को भेद इत्याह—ते हीत्यादि। ते—स्वभाववादिनः, स्वमिति। स्वरूपम्। अपिशब्दात्पररूपमपि। पूर्वकास्तु स्वभावं कारणमिच्छन्ति, एते तमपि नेच्छन्तीति भेदः॥ ११०॥ § 423

५ स्वतोभाव] Correction : ; स्वभाव (sic !)स्वतोभाव

अत्र च युक्तिं वर्णयन्ति—यदुपलब्धिलक्षणप्राप्तं सदनुपलभ्यमानसत्ताकम्, तत्प्रेक्षावतामसद्व्यवहारविषयः। यथा शशविषाणमनुपलभ्यमानसत्ताकं च भावानां कारणमिति स्वभावानुपलब्धिः। न चायमसिद्धो हेतुरित्यादर्शयन्नाह—राजीवेत्यादि। § 424

राजीवकेसरादीनां वैचित्र्यंकः करोति हि।
मयूरचन्द्रकादिर्वा विचित्रः केन निर्मितः॥
१११॥§ 426

राजीवम्—पद्मम्, तस्य केसरादय इति विग्रहः। आदिग्रहणान्नालदलकर्णिकादीनां कण्टकतैक्ष्ण्यादीनां च ग्रहणम्। वैचित्र्यमिति। संस्थानवर्णकार्कश्यादिभेदम्।कः करोतीति। नैव कश्चित्। ईश्वरादेः कारणस्यानुपलभ्यमानत्वादिति भावः॥ १११॥ § 427

स्यादेतत्—यदि नाम ब्याह्यानां भावानां कारणानुपलब्धेरहेतुत्वं सिद्धम्, आध्यात्मिकानां तु कथं सिद्धमित्याह—यथैवेत्यादि। § 428

यथैव कण्टकादीनां तैक्ष्ण्यदिकमहेतुकम्।
कादाचित्कतया तद्वद्दुःखादीनामहेतुता॥ ११२॥§ 430

063/k

यदि नाम प्रत्यक्षतो निर्हेतुकत्वं दुःखादीनां न सिद्धं तथाऽप्यनुमानतः सिद्धमेव। तथा हि—यत्कादाचित्कं तदहेतुकं निश्चितं यथा कण्टकतैक्ष्ण्यादि, कादाचित्कं च दुःखादीनीति स्वभावहेतुः। न चापि यस्य भावाभावयोर्यस्य भावाभावौ नियमेन भवतः, तत्तस्य कारणमिति युक्तम्, व्यभिचारात्। तथाहि—सति स्पर्शे चक्षुर्विज्ञानं भवत्यसति च न भवति। अथ च नासौ चक्षुर्विज्ञानकारणम्। तस्मात्कार्यकारणभावलक्षणमेतद्व्यभिचारीत्यतः सिद्धं सर्वहेतुनिराशंसं भावानां जन्मेति॥ ११२॥ § 431

सरोजकेसरादीनामित्यादिना प्रतिविधत्ते। § 432

सरोजकेसरादीनामन्वयव्यतिरेकवत्।
अवस्थातिशयाक्रान्तं बीजपङ्कजलादिकम्॥
११३॥§ 434

प्रत्यक्षानुपलम्भाभ्यां निश्चितं कारणं यदा।
किमित्यन्यस्तदा हेतुरमीषां परिपृच्छ्यते॥
११४॥§ 436

अनेन हेतोरसिद्धिं प्रत्यक्षविरोधं च प्रतिज्ञार्थस्य दर्शयति। यदुक्तं राजीवकेसरादीनां कारणं नोपलभ्यत इति, तदसिद्धम्, प्रत्यक्षानुपलम्भाभ्यां बीजपङ्कजलादेरन्वयव्यतिरेकवतः कारणत्वेन निश्चितत्वात्। तथाहि—यस्मिन्सत्येव यस्य जन्म भवति यस्य च विकाराद्यस्य विकारस्तत्तस्य कारणमुच्यते। तच्चैवंभूतं बीजादिकमुच्छूनादिविशिष्टावस्थाप्राप्तं राजीवकेसरादीनामन्वयव्यतिरेकवत्—भावाभाववत्।प्रत्यक्षानुपलम्भाभ्यां निश्चितमित्यसिद्धो हेतुः। यच्चाप्युक्तं कार्यकारणलक्षणं व्यभिचारीति, तदसिद्धम्। स्पर्शस्यापि रूपहेतुतया चक्षुर्विज्ञानेऽपि निमित्तभावस्येष्टत्वात्। तथाहि—स्पर्श इति भूतान्युच्यन्ते। तानि चोपादायोपादाय रूपं वर्त्तते, ततश्चक्षुर्विज्ञानं प्रति स्पर्शस्य निमित्तभावोऽस्त्येव। केवलं साक्षात्पारंपर्यकृतो विशेषः। न चापि व्यतिरेकमात्रमस्माभिः कार्यकारणभावनिश्चयहेतुत्वेनाभ्युपगतम्। किं तर्हि ? विशिष्टमेव। तथा हि—येषु सत्सु समर्थेषु तदन्येषु हेतुषु यस्यैकस्याभावाद्यन्न भवति तत्तस्य कारणमिति वर्ण्यते। न तु यस्याभावे यन्न भवतीति व्यतिरेकमात्रम्। अन्यथा मातृविवाहोचितदेशजन्मनः पिण्डखर्जूरस्य मातृविवाहाभावे सत्यभावप्रसङ्गात्। न चैवंभूतस्य व्यतिरेकस्य स्पर्शेन व्यभिचारोऽस्ति। तथा हि—यदि रूपादिसन्निधानं प्रदर्श्य स्पर्श- 064/k स्यैकस्याभावाच्चक्षुर्विज्ञानं न भवतीत्येवं प्रदर्श्येत तदा स्या द्व्यभिचारो न चैतच्छक्यं प्रदर्शयितुम्। अतो नास्ति कार्यकारणभावलक्षणस्य व्यभिचारः॥ ११३॥ ११४॥ § 437

न केवलं बीजादिः कारणत्वेन निश्चितो भावानां देशकालावपि प्रतिनियतौ निश्चिताविति दर्शयति—नियतावित्यादि। § 438

नियतौ देशकालौ च भावानां भवतः कथम्।
यदि तद्धेतुता नैषां स्युस्ते सर्वत्र सर्वदा॥
११५॥§ 440

क्वचित्कदाचित्कस्मिंश्चिद्भवन्तो नियताः पुनः।
तत्सापेक्षा भवन्त्येते तदन्यपरिहारतः॥ ११६॥§ 442

यदि हि राजीवादीनां तद्धेतुता—प्रतिनियतदेशकालहेतुता, न स्यात्, तदा येयमुपलादिदेशपरिहारेण सलिलादावेव प्रतिनितदेशे वृत्तिः, या च शिशिरादिसमयपरिहारेण निदाघादिसमये वृत्तिः, सा न प्राप्नोति। किं तु

सर्वत्र देशे काले च ते राजीवादयो भावा भवेयुस्तन्निरपेक्षत्वात्। तदन्यदेशकालपरिहारान्नियमेन प्रतिनियतदेशादौ वर्त्तमानास्तत्सापेक्षा भवन्तीति निश्चीयते॥ ११५॥ ११६॥ § 443

नन्‌ निरभिप्रायाणां भावानां केयमपेक्षेत्याह—तदपेक्षा तथावृत्तिरिति। § 444

तदपेक्षा तथावृत्तिरपेक्षा कार्यतोच्यते।
प्रत्यक्षा च तथा वृत्तिः सिद्धास्तेनेह हेतवः॥
११७॥§ 446

तदन्यदेशादिपरिहारेण नियते देशादौ या वृत्तिरियमेवापेक्षेत्युच्यते। नत्वभिप्रायात्मिका। स्यादेतद्यदि नाम तदपेक्षा तेषाम्, तथाऽपि तत्कार्यता कथमवसितेत्याह—अपेक्षा कार्यतोच्यत इति। न ह्यन्या तत्कार्यता, किं तर्हि ? येयं तथावृत्तिलक्षणाऽपेक्षा सैव तत्कार्यतोच्यते। सा च तथावृत्तिरेषां कथं सिद्धेति चेदाह—प्रत्यक्षेत्यादि॥ ११७॥ § 447

तत्स्वाभाविकवादोऽयं प्रत्यक्षेण प्रबाध्यते।
प्रत्यक्षानुपलम्भाभ्यां हेतुरूपस्य निश्चयात्॥
११८॥§ 449

तदिति। तस्मात्। तेषु वा राजीवादिषु स्वाभाविकवाद इति समासः। प्रत्यक्षेणप्रबाध्यत इति। अनुपलम्भस्याप्यन्योपलम्भनतया प्रत्यक्षात्मकत्वात्। यत्पुनः सुखादीनामहेतुकत्वसाधनाय कादाचित्कत्वादिति साधनमुक्तं तत्साध्यविपरीतसाधनाद्विरुद्धम्। अहेतोरनपेक्षस्य कादाचित्कत्वानुपपत्तेः। दृष्टान्तस्य च साध्यविकलतेति भावः॥ ११८॥ § 450

065/k

एवं तावत्प्रत्यक्षविरुद्धत्वं प्रतिज्ञार्थस्य हेतोश्चासिद्धतोद्भाविता। सांप्रतमभ्युपगम्यहेतोः सिद्धिमनैकान्तिकत्वं प्रतिपादयन्नाह—मा वेत्यादि। § 451

मा वा प्रमाणसत्ता भूद्धेतुसद्भावसिद्धये।
तथाऽपि मानाभावेन नैवार्थासत्त्वनिश्चयः॥
११९॥§ 453

यद्यनुपलम्भमात्रं हेतुत्वेनोपादीयते तदाऽनैकान्तिकता। यतो मानाभावेन प्रमाणाभावमात्रेण हेतुना नैवार्थसत्ताया अभावनिश्चयः॥ ११९॥ § 454

कस्मान्न भवतीत्याह—यस्मादित्यादि। § 455

यस्मादर्थस्य सत्ताया व्यापकं न च कारणम्।
प्रमाणं भेदसद्भावाद्व्यभिचारात्तदुद्भवात्॥ १२०॥§ 457

व्यापको हि स्वभावो निवर्त्तमानः स्वं व्याप्यं निवर्त्तयति, कारणं वा कार्यम्। तत्र तादात्म्यतदुत्पत्तिभ्यां व्याप्यकार्ययोः प्रतिबद्धत्वात्। न च प्रमाणार्थसत्तयोरभेदो भिन्नाभासत्वात्। नापि प्रमाणमर्थस्य कारणं व्यभिचारात्। प्रमाणमन्तरेणापि भावात्। तथाहि—देशकालस्वभावविप्रकृष्टानामर्थानां प्रमाणेनाविषयीकृतानामपि सत्त्वमविरुद्धमेव। न च येन विनाऽपि यद्भवति तत्तस्य कारणं युक्तमतिप्रसङ्गात्।कारणत्वाभ्युपगमे वा स्वपक्षपरित्यागः। तदुद्भवाच्च न प्रमाणमर्थसत्ताकारणम्। तथा हि—अर्थादेव विषयभूतात्प्रमाणमुद्भवति। न पुनः प्रमाणात्प्रमेयोऽर्थः॥ १२०॥ § 458

अथापि स्यादप्रतिबद्धमपि प्रमाणमर्थसत्ताया निवर्त्तकं भविष्यतीत्याह—यश्चेत्यादि। § 459

यश्च नैवंविधो भावस्तस्य नैव निवृत्तितः।
ऐकान्तिकमसंबन्धाद्गम्यतेऽन्यनिवर्त्तनम्॥
१२१॥§ 461

नैवंविध इति। न कारणं नापि व्यापकम्। न ह्यप्रतिबद्धस्य निवृत्त्याऽन्यस्य नियमेन निवृत्तिर्युक्ता, अतिप्रसङ्गात्। एवं ह्यश्वनिवृत्तौ गोरपि निवृत्तिः स्यात्॥ १२१॥ § 462

सर्वादृष्टिश्च सन्दिग्धा स्वादृष्टिर्व्यभिचारिणी।
विन्ध्याद्रिरन्ध्रदूर्वादेरदृष्टावपि सत्त्वतः॥ १२२॥§ 464

अपि चानुपलब्धेर्हेतुत्वेनोपादीयमाना सर्वपुरुषोपलम्भनिवृत्तिलक्षणा वोपादीयते ? स्वोपलम्भनिवृत्तिलक्षणा वा ? न तावदाद्या, तस्या अर्वाग्दर्शि-
066/k नेन निश्चेतुमशक्यतया संदिग्धत्वात्। न हि सर्वैः पुरुषैर्मयूरचन्द्रिकादीनामदृष्टं कारणं नोपलभ्यत इत्यत्रार्वाग्दर्शिनः किंचिदस्ति प्रमाणम्। याऽपि स्वेनादृष्टिः सा व्यभिभारिणी, कस्मात् ?गिरिकुहरान्तर्गतस्य दूर्वाप्रवालशिलाशकलादेरनुपलब्धस्यापि सत्त्वतः—सत्त्वाविरोधादित्यर्थः। तत्र निश्चितमेवासत्त्वं सन्देहात्॥ १२२॥ § 465

अहेतुकत्वसिद्ध्यर्थं न चेद्धेतुः प्रयुज्यते।

न चाप्रमाणिकी सिद्धिरतः पक्षो न सिद्ध्यति॥
१२३ ॥§ 467

तत्सिद्धये च हेतुश्चेत्प्रयुज्येत तथाऽपि न।
सिद्धेस्तद्धेतुजन्यत्वात्पक्षस्ते संप्रसिद्ध्यति॥
१२४ ॥§ 469

अपि चैवं भवान्पर्यनुयोज्यः। किं निर्हेतुका भावा इत्यस्य स्वपक्षस्य सिद्धये भवता हेतुः कश्चिदुपादीयते आहोस्विन्न। तत्र यदि नोपादीयते, तदा पक्षस्ते नसिद्ध्यति। न हि प्रमाणमन्तरेणार्थस्य सिद्धिरस्ति। अथोपादीयते, तथाऽपि न हि पक्षस्ते संप्रसिद्ध्यतीति वक्ष्यमाणेन संबन्धः। कस्मात् ?। सिद्धेस्तद्धेतुजन्यत्वात्— प्रमेयार्थविषयायाः सिद्धेर्निश्चयस्य तेन हेतुना जन्यमानत्वात्। तथा चोक्तमाचार्यसूरिपादैः। "न हेचुरस्तीति वदन्सहेतुकं ननु प्रतिज्ञां स्वयमेव सादयेत्। अथापि हेतुः प्रणयालसो भवेत्प्रतिज्ञया केवलयाऽस्य किं भवेत्" इति॥ १२३॥ १२४॥ § 470

स्यादेतत्—ज्ञापको हेतुर्मया प्रयुज्यते न कारकः। तत्कस्मात्पक्षो मे न सिध्यतीत्याह—तथा हीत्यादि। § 471

तथाहि ज्ञापको हेतुर्वचो वा तत्प्रकाशकम्।
सिद्धेर्निमित्ततां गच्छन्साध्यज्ञापकमुच्यते॥
१२५ ॥§ 473

ज्ञापको हेतुरिति। त्रिरूपं लिङ्गं स्वार्थानुमानकाले। वचो वेति। परार्थानुमानकाले। तत्प्रकाशकमिति। तस्य हेतोः प्रकाशकम्। सिद्धेरिति। प्रमेयार्थनिश्चयस्य। अन्यथा यदि सिद्धेरपि निमित्तभावं न यायात्तदा कथं नु ज्ञापकं भवेत्। एवं हि सर्वं सर्वस्य ज्ञापकं प्रसज्यते॥ १२५॥ § 474

यद्येवं कथमयमाचार्यैर्विभागः कारकाज्ज्ञापकस्य क्रियते ?। अत्र च ज्ञानवशादर्थनिर्देशो नोत्पादकवद्भूतार्थवशादित्याह— § 475

अतः कारक एवायं ज्ञापको हेतुरुच्यते।
साध्यानुत्पादकत्वात्तु कारको न प्रकाश्यते॥
१२६ ॥§ 477

७--८ कथं नु] Correction: ; कथं न (sic !)कथं नु

साध्यानुत्पादकत्वादसौ ज्ञापक उच्यते न कारक इति, यस्तु साध्य-
067/k स्याङ्कुरादेरुत्पा दकः स कारक उच्यत इत्यदोषः। एतेन सर्वेण यदाचार्य-
सूर्युक्तदूषणस्योपरिचोद्यमापतति तत्प्रतिविहितं भवति। तथाहि—तत्रेदं चोद्यं
भवति। न हेतुरस्तीति सहेतुकं वदन्नपि किमिति प्रतिज्ञां सादयेत्। स हि
ज्ञापकं हेतुं ब्रूते कारकं तु प्रतिक्षिपतीति। तदत्रोत्तरम्—ज्ञापकोऽपि कारक
एव ज्ञानहेतुकत्वादिति। एतेन स्ववचनविरोध उद्भाव्यते। न त्वहेतुत्वसाधकः
कश्चिद्धेतुरस्ति व्याप्तेः प्रत्यक्षादिबाधितत्वात्॥ १२६॥ § 478

तस्मादित्यादिनोपसंहारव्याजेनानुमानबाधितत्वं च प्रतिज्ञार्थस्य दर्शयति— § 479

तस्मात्सहेतवोऽन्येऽपि भावा नियतजन्मतः।
साध्यार्थविषयं यद्वज्ज्ञानं साधनभावि ते॥ १२७॥
इति स्वाभाविकजगद्वादपरीक्षा।§ 482

अन्येऽपीति। साध्यार्थविषयज्ञानव्यतिरेकिणो राजीवकेसरादयः। नियतजन्मतइति। नियतपदार्थसन्निधाने सतीति शेषः। प्रयोगः—ये नियतपदार्थसन्निधाने सति नियतजन्मानस्ते सहेतुकाः। यथा—भवत्साधनसन्निधानभाविसाध्यार्थविषयं ज्ञानम्, तथा च राजीवादयो भावा इति स्वभावहेतुः॥ १२७॥ § 483

इति स्वाभाविकवादपरीक्षा।

०.६ शब्दब्रह्मपरीक्षा।

नाशोत्पादेत्यादिना शब्दब्रह्मवादिनो ब्रुवते— § 485

नाशोत्पादासमालीढं ब्रह्म शब्दमयं परम्।
यत्तस्य परिणामोऽयं भावग्रामः प्रतीयते॥
१२८॥§ 487

पूर्वापरादिविभागरहितमनुत्पन्नमविनाशि यच्छब्दमयं ब्रह्म तस्यायं रूपादिर्भावग्रामः परिणाम इति प्रतीयते यथोक्तम्। अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम्। विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥ इति। तत्र—आदिः—उत्पादः, निधनम् —नाशः, तदभावादनादिनिधनम्। अक्षरमिति। अकाराद्यक्षरस्य निमित्तत्वात्।एतेनाभिधानरूपेण विवर्त्तो दर्शितः। अर्थभावेनेत्यादिना पुनरभिधेयविवर्त्तः। प्रक्रियेति भेदाः। ब्रह्मेति नामसंकीर्त्तनम्।

अस्यैव श्लोकस्यार्थं निर्दिशति—नाशोत्पादासमालीढमिति। नाशोत्पादग्रहण-मुपलक्षणम्। इदमप्यत्र बोद्धव्यम्, पूर्वापरदेशविभागरहितमिति। तथाहि—अनादिनिधनत्वं पूर्वापरदेशविभागरहितत्वमपि तत्र निर्दिष्टम्। शब्दमयमिति। शब्दस्वभावम्, अत एव शब्दस्तत्त्वमस्य शब्दतत्त्वं तदुच्यते। शब्दोऽस्याविप- 068/k
रीतं रूपमित्यर्थः। परमिति। प्रणवात्मकम्। प्रणवो हि किल सर्वेषां शब्दानां सर्वेषां चार्थानां प्रकृतिः स च वेदः। अयं तु वर्णपदक्रमेणावस्थितो वेदस्तदधिगमोपायस्तस्य प्रतिच्छन्दकन्यायेनावस्थितः। तं तु परमं ब्रह्माण-मभ्युदयनिःश्रेयसफलधर्मानुगृहीतान्तः(करणाः)पश्यन्तीति। अत्र च प्रमाणयन्ति। ये यदाकारानुस्यूतास्ते तन्मया यथा घटशरावोदञ्चनादयो मृद्विकाराः मृदाकारानुगताः पदार्था मृण्मयत्वेन प्रसिद्धाः। शब्दाकारानुस्यूताश्च सर्वभावा इति स्वभावहेतुः। यतः प्रत्यक्षत एव सर्वार्थानां शब्दाकारानुगमः सिद्धः। तथा हि—शब्द एव प्रत्ययोऽर्थेषूपजायमानः शब्दोल्लेखानुगत एवोपजायते। यथोक्तम्—न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन वर्त्तते॥ इति। ज्ञानाकारनिबन्धना च वस्तूनां स्वभावप्रज्ञप्तिः। अतः सिद्धमेषां शब्दाकारानुस्यूतत्वं तत्सिद्धौ च तन्मयत्वमपि सिद्धमेव, तन्मात्रभावित्वात्तन्मयत्वस्येति॥ १२८॥ § 488

ते वाच्या इत्यादिना प्रतिज्ञार्थ........दूषयति। § 489

इति संचक्षते येऽपि ते वाच्याः किमिदं निजम्।
शब्दरूपं परित्यज्य नीलादित्वं प्रपद्यते॥
१२८॥ § 491

न वा तथेति यद्याद्यः पक्षः संश्रीयते तदा।
अक्षरत्ववियोगः स्यात्पौरस्त्यात्मविनाशतः॥
१३०॥ § 493

अथाप्यनन्तरः पक्षस्तत्र नीलादिवेदने।
अश्रुतेरपि विस्पष्टं भवेच्छब्दात्मवेदनम्॥
१३१॥ § 495

अत्र कादाचिच्छब्दपरिणामरूपत्वाद्वा जगतः शब्दमयत्वं साध्यत्वेनेष्टम्, कदाचिच्छाब्दादुत्पत्तेर्वा। यथाऽन्नमयाः प्राणा इति हेतौ मयड्विधानात्। अत्र न तावदाद्यःपक्षः, परिणामस्यैवानुपपत्तेः। तथा हि—शब्दात्मकं ब्र-

ह्म नीलादिरूपतां प्रतिपद्यमानं कदाचिन्निजं स्वाभाविकं शब्दरूपं परित्यज्य प्रतिपद्येतापरित्यज्य वा। तत्र यदि परित्यज्येत्याद्यः पक्ष आश्रीयते, तदाऽनादिनिधनमित्यनेन वचनेन यदक्षरत्वमविनाशित्वमभ्युपगतं तस्य हानिः स्यात्, पैरस्त्यस्वभावविनाशात्। अथापरित्यज्येत्यनन्तरः पक्षः, तदा नीलादिसंवेदनकालेऽप्यश्रुतेर्बधिरस्य शब्दः संवेदनं प्राप्नोति। नीलादिसंवेदनवत्तदव्यतिरेकात्। प्रयोगः—यद्यदव्यतिरिक्तं तत्तस्मिन्संवेद्यमाने संवेद्यते,
069/k यथा नीलादिसंवेदनावस्थायां तस्यैव नीलादेरात्मा, नीलादव्यतिरिक्तश्च शब्द इति स्वभावहेतुः। अन्यथा भिन्नयोगक्षेमत्वात्तत्स्वभावत्वमेव प्रसिध्येदित्येतदत्र बाधकं प्रमाणम्॥ १२९॥ १३०॥ १३१॥ § 496

एतदेव विस्तरेण प्रतिपादयन्नाह—येनेत्यादि। § 497

येन शब्दमयं सर्वं मुख्यवृत्त्या व्यवस्थितम्।
शब्दरूपापरित्यागे परिणामाभिधानतः॥ १३२॥ § 499

येन—यस्मात्, भवद्भिर्मुख्यत एव शब्दस्वभावं जगदिति वर्ण्यते। कस्मादित्याह—शब्दरूपापरित्याग इति॥ १३२॥ § 500

यदि नाम मुख्यतः शब्दमयमवस्थितं ततः किमित्याह—अगौणे चेत्यादि। § 501

अगौणे चैवमेकत्वे नीलादीनां व्यवस्थिते।
तत्संवेदनवेलायां कथं नास्त्यस्य वेदनम्॥
१३३॥ § 503

एकत्वे नीलादीनामिति। शब्देन सहेति शेषः। तत्संवेदनवेलायामिति।तेषां नीलादीनां संवेदनावस्थायाम्। कथं नास्त्यस्य वेदनमिति। तस्यापि नीलादिस्वभाववदुपलब्धिलक्षणप्राप्तत्वाद्युक्तमेव संवेदनमित्यभिप्रायः॥ १३३॥ § 504

अस्यावित्तौ हि नीलादेरपि न स्यात्प्रवेदनम्।
ऐकात्म्याद्भिन्नधर्मत्वे भेदोऽत्यन्तं प्रसज्यते॥
१३४॥ § 506

अथास्य वेदनं नेष्यते, तदा नीलादेरपि शब्दस्वरूपवदसंवेदनप्रसङ्गः। ऐकात्म्यात्—शब्देन सह नीलादीनामेकस्वभावत्वादित्यर्थः। अन्यथा नीला-

३ भिधानतः] Correction : ; निधानतः (sic !)भिधानतः

दीनां शब्देन सह भिन्नधर्मत्वेऽभ्युपगम्यमानेऽत्यन्तभेदोऽङ्गीकर्त्तव्यः॥ १३४॥
§ 507

कस्मादित्याह— § 508

विरुद्धधर्मसङ्गो हि बहूनां भेदलक्षणम्।
नान्यथा व्यक्तिभेदानां कल्पितोऽपि भवेदसौ॥
१३५॥§ 510

न ह्येकस्यैकदेकप्रतिपत्रपेक्षया ग्रहणमग्रहणं च युक्तम्। एकत्वहानिप्रसङ्गात्। अन्यथा हि यदि विरुद्धधर्माध्यासेऽप्येकत्वं स्यात्तदा घटादीनां यः कल्पित इष्टो व्यक्तिभेदः सोऽपि न भवेत्। न केवलं ब्रह्मणः स्वरूपभेदो नास्तीत्यपिशब्दः। यतस्तस्य स्वात्मनि व्यवस्थितस्य नास्ति भेदो विकारविषयत्वादस्येति सिद्धान्तः। तथा हि—न घटाद्यात्मना तस्यानादिनिधनत्वमिष्यते। किं तर्हि ?। परमात्मना घटादयो हि दृश्यमानोदयव्ययाः परिच्छिन्नदेशाश्चोपलभ्यन्त इति। अयं चाश्रुतेः स्पष्टं शब्दसंवेदनं स्यादिति यः प्रसङ्ग 070/k
उक्तः स यदि ब्रह्मणो रूपमुपलब्धिलक्षणप्राप्तमिष्यते तदा द्रष्टव्यः। यदि पुनरतिसूक्ष्ममतीन्द्रियमिति वर्ण्यते तदाऽयमदोषः। किं तु नीलादीनामपि ताद्रूप्यात्तत्स्वरूपवदग्रहणप्रसङ्ग इत्ययं दोषो वाच्यः। ततश्चायं नियमो नोपपद्यते। उदयव्ययवतीमेवार्थमात्रामपरदर्शनाः प्रतियन्तीति। स्यादेतद्यथा भवतां क्षणिकत्वं नीलाद्यव्यतिरिक्तं नीलादिसंवेदनेऽपि न संवेद्यते तद्वच्छब्दरूपमिति। तदेतदसम्यक्। न हि नीलादिसंवेदने क्षणिकत्वं न संवेद्यते। किं तु गृहीतमपि निर्विकल्पेन चेतसा भ्रान्तिनिमित्तेन गुणान्तरसमारोपान्न विनिश्चीयत इत्युच्यते। तेनानुभवापेक्षया तद्गृहीतमेव निश्चयज्ञानापेक्षया त्वगृहीतमिति ज्ञानभेदेनैकस्य गृहीतत्वमगृहीतत्वं चाविरुद्धमेव। न चैवं भवतां पक्षे शब्दस्य ग्रहणाग्रहणे युक्ते। सर्वज्ञानानां सविकल्पकताऽभ्युपगमात्। एकेनैवज्ञानेन सर्वात्मना तस्य निश्चितत्वात्। अगृहीतस्वभावान्तरानुपपत्तेः। यथोक्तम्—"निश्चयैः। यन्न निश्चीयते रूपं तत्तेषां विषयः कथ"मिति। अथ किञ्चिदविकल्पमपि ज्ञानमभ्युपगम्यते। न तर्हि वक्तव्यं—"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते"। इति। शब्दाकारानुस्यूतत्वादिति च हेतुर्न सिद्ध्येत्। ततश्च प्रमाणाभावाच्छब्दात्मकत्वव्यवस्थानंभावानामनिबन्धनमेव स्यात्। किंच क्षणिकत्वं भावानां प्रमाणान्तरतः सिद्धेरनुभूतमपि न निश्चीयत इति व्यपदिश्यते। शब्दात्मता तु भावानां कुतः सिद्धा येनसाऽप्येवं व्यवस्थाप्यते॥ १३५॥ § 511

अपरमपि दूषणमार्गमाह—प्रतिभावं चेत्यादि। § 512

२२ निश्चयैः] Correction: ; निश्चयः (sic !)निश्चयैः

प्रतिभावं च यद्येकः शब्दात्मा भिन्न इष्यते।
सर्वेषामेकदेशत्वमेकाकारा च विद्भवेत्॥
१३६॥§ 513

स हि शब्दात्मा परिणामं गच्छन् प्रतिपदार्थं भेदं वा प्रतिपद्यते न वा। तत्र यदि न भिन्न इति पक्षस्तदा सर्वेषां नीलादीनामेकदेशत्वं प्राप्नोति। एकदेशत्वमित्युपलक्षणम्। कालपरिणामव्यापारावस्थाविशेषाद्यपि ग्राह्यम्। एकाकारा च, वित —प्रतिभासः, भवेत्—प्राप्नोति। सर्वेषां नीलादीनामेकशब्दरूपाव्यतिरेकात्॥ १३६॥ § 514

प्रतिव्यक्ति तु भेदेऽस्य ब्रह्मानेकं प्रसज्यते।
विभिन्नानेकभावात्मरूपत्वाद्व्यक्तिभेदवत्॥
१३७॥§ 516

अथ प्रतिव्यक्ति भेदोऽस्य शब्दात्मनोङ्गीक्रियते। तदा ब्रह्मणोऽनेक-
071/k त्वं प्राप्नोति। विभिन्नानेकभावात्मरूपत्वात्—विभिन्नोऽनेकभावात्माऽनेकप-
दार्थस्वभावो रूपं स्वभावो यस्येति विग्रहः, तद्भावस्तत्वम्। एकं च पर-
मब्रह्मेष्यते। अतोऽभ्युपेतबाधाप्रतिज्ञाया इति भावः॥ १३७॥ § 517

दूषणान्तरमप्याह—नित्यशब्दमयत्वे चेत्यादि। § 518

नित्यशब्दमयत्वे च भावानामपि नित्यता।
तद्यौगपद्यतः सिद्धेः परिणामो न सङ्गतः॥
१३८॥§ 520

नित्यशब्दमयत्वे—नित्यशब्दस्वभावत्वे, जगतः शब्दः स्वरूपं चेद्भावानामपि नित्यत्वं प्राप्नोति। ततश्च सर्वकालं भावानां शब्देन सह यौगपद्यतः सिद्धेः—सिद्धत्वात्, परिणामात्मा न प्राप्नोति। तदिति तस्मादित्यर्थे, तेषां वा नीलादीनां यौगपद्यं तद्यौगपद्यमिति विग्रहः॥ १३८॥ § 521

अथ यौगपद्यतः सिद्धस्यापि कस्मात्परिणामो न भवतीत्याह—एकरूपेत्यादि। § 522

एकरूपतिरोभावे ह्यन्यरूपसमुद्भवे।
मृदादाविव संसिध्येत्परिणामस्तु नाक्रमे॥
१३९॥§ 524

नाक्रमे तु वस्तुनि परिणामः सिद्ध्येदिति भिन्नक्रमस्तुशब्दः। एवं तावत्परिणामकृतं शब्दमयत्वं भावानां न युक्तम्॥ १३९॥ § 525

नापि द्वितीयः पक्षो युज्यत इति दर्शयन्नाह—अथापीत्यादि। § 526

अथापि कार्यरूपेण शब्दब्रह्ममयं जगत्।
तथाऽपि निर्विकारत्वात्ततो नैव क्रमोदयः॥
१४०॥ § 528

एवमपि शब्दस्य नित्यत्वेनाविकारित्वात्ततः क्रमेण कार्यादयो न प्राप्नोति। सर्वेषामविकलाप्रतिबद्धसामर्थ्यकारणाद्युगपदेवोत्पादः स्यात्। कारणवैकल्याद्धि कार्याणि प्रतिलम्बन्ते, तच्चेदविकलं तत्किमपरमपेक्षेरन्। येन युगपन्न भवेयुः॥ १४०॥ § 529

अन्यान्यरूपसंभूतौ तस्मादेकस्वरूपतः।
विवृत्तमर्थरूपेण कथं नाम तदुच्यते॥ १४१॥ § 531

अपि च—यदि तस्मादेकस्वभावाच्छब्दात्मनोऽन्यान्यस्य स्वभावस्योत्पत्तिरङ्गीक्रियते, तदा तद्ब्रह्म विवृत्तमर्थरूपेणेत्येतन्न सिद्ध्येत्, न ह्यर्थान्तरस्योत्पादेऽन्यस्य तत्स्वभावमनाविशतस्ताद्रूप्येण विवर्त्तो युक्तः। तस्मात्सर्वथाऽपि प्रतिज्ञार्थो नावकल्पते॥ १४१॥ § 532
072/k

शब्दाकारानुस्यूतत्वादिति च हेतुरसिद्ध इति दर्शयन्नाह—अतद्रूपेत्यादि। § 533

अतद्रूपपरावृत्तमृद्रूपत्वोपलब्धितः।
कुम्भकोशादिभेदेषु मृदात्मैकोऽत्र कल्पते॥
१४२॥ § 535

नीलपीतादिभावानां नत्वेवमुपलभ्यते।
अशब्दात्मपरावृत्तिरबीजा कल्पनाऽपि तत्॥
१४३॥ § 537

१ अन्यान्य] Correction: ; अन्योऽन्य
(sic !)अन्यान्य

न हि भावानां परमार्थेनैकरूपानुगमोऽस्ति। सर्वेषां स्वस्वभावव्यवस्थिततया समानजातीयव्यावृत्तस्वभावत्वात्। काल्पनिकं तु विजातीयव्यावृत्तिकृतमेकाकारानुस्यूतत्वमेषां व्यवस्थाप्यते। यथा घटशरावोदञ्चनादिषु परमार्थतो भिन्नेष्वप्यमृदात्मकपदार्थव्यावृत्तिकृतो मृदात्मा कल्प्यते तत्र। तदपि काल्पनिकमेषां नीलादीनां शब्दाकारानुस्यूतत्वं न संभवति। न हि नीलपीतादिषु शब्दरूपमुपलभामहे। अनुपलभमानाश्च कथमशब्दात्मकव्यवच्छेदकृतं शब्दाकारानुस्यूतत्वं कल्पयामः। तस्मादबीजेयंकल्पनेत्यसिद्धो हेतुः॥ १४२॥ १४३॥ § 538

यदुक्तम्—सर्वेषामेकदेशत्वमेकाकारा च विद्भवेदिति, तत्र परमतमाशङ्कते। अथाविभागमेवेत्यादि— § 539

अथाविभागमेवेदं ब्रह्मतत्त्वं सदा स्थितम्।
अविद्योपप्लवाल्लोको विचित्रं त्वभिमन्यचे॥
१४४॥ § 541

अथाऽपि स्यादविभक्तमेव सदा ब्रह्मात्मकं तत्वमविकारि परमार्थतोऽवस्थितम्। न तस्य परमार्थेन परिणामः, किन्त्वविद्यातिमिरोपहतबुद्धिलोचना नीलादिभेदेन विचित्रमिव मन्यन्ते। यथोक्तम्—यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः। सङ्कीर्णमिव मात्राभिश्चित्राभिरभिमन्यते॥ तथेदममृतं ब्रह्म निर्विकारमविद्यया। कलुषत्वमिवापन्नं भेदरूपं विवर्त्तते॥ इति। तेन सर्वेषामेकदेशत्वप्रसङ्गो न भविष्यति तेषामवस्तुरूपत्वात्। संविद्भेदश्च भविष्यति, अविद्योपप्लवकृतत्वात्तस्येति भावः॥ १४४॥ § 542

तत्रापीत्यादिना प्रतिविधत्ते— § 543

तत्रापि वेद्यते रूपमविद्योपप्लुतैर्जनैः।
यन्नीलादिप्रकारेण त्यागादाने निबन्धनम्॥
१४५॥ § 545

तद्रूपव्यतिरेकेण ब्रह्मरूपमलक्षितम्।
कथं व्युत्थितचेतोभिरस्तित्वेन प्रतीयते॥ १४६॥ § 547

073/k

प्रमाणवशाद्धि प्रमेयसत्ताव्यवस्थितिः, न चेवं रूपस्य ब्रह्मणः सिद्धये किंचन प्रमाणमस्ति। तथाहि—न तावत्प्रत्यक्षतस्तस्य सिद्धिः। न हि नीलादेर्हिताहितप्राप्तिपरिहाराधिष्ठानाद्व्यतिरिक्तमपरं ब्रह्मरूपं प्रतिभासते।

अप्रतिभासमानं च कथं तद्व्युत्थितचेतोभिर्न्यायमार्गावस्थितैरस्तित्वेन प्रतीयताम्॥ १४५॥ १४६॥ § 548

न तत्प्रत्यक्षतः सिद्धमविभागमभासनात्।
नित्यादुत्पत्त्ययोगेन कार्यलिङ्गं च तत्र न॥
१४७ ॥§ 550

धर्मिसत्वाप्रसिद्धेस्तु न स्वभावः प्रसाधकः।
न चैतदतिरेकेण लिङ्गं सत्ताप्रसाधकम्॥
१४८ ॥§ 552

स्यादेतत्। स्वसंवेदनप्रत्यक्षत एव तत्सिद्धं ज्ञानात्मरूपत्वात्। तथाहि— ज्योतिस्तदेव शब्दात्मकत्वाच्चैतन्यरूपत्वाच्चेति। तदेतत्स्वसंवेदनविरुद्धम्। तथाह्यन्यत्र गतमानसोऽपि चक्षुषा रूपमीक्षमाणोऽनाधिष्ठा(दिष्टा ?)भिलापमेव नीलादिप्रत्ययमनुभवतीति। एतच्च विस्तरेण प्रतिपादयिष्यते। एतेन यदुक्तम्— न सोऽस्ति प्रत्ययोलोके इत्यादि,तदपि प्रत्युक्तं भवति। तस्मादविभागं शब्दमयं ब्रह्म न प्रत्यक्षतः सिद्धम्। तस्य तथाभूतस्याप्रतिभासनात्। नाप्यनुमानतः। तथा ह्यनुमानं भवत्कार्यलिङ्गं भवेत् ? स्वभावलिङ्गं वा ? अनुपलब्धेस्तु प्रतिषेधविषयत्वाद्विधावनधिकार एव। तत्र न तावत्कार्यलिङ्गम्, नित्यात्कस्यचित्कार्यस्यानुपपत्तेः, क्रमयौगपद्याभ्यांनित्यस्यार्थक्रियाविरोधात्। नापि स्वभावलिङ्गमस्ति। तस्यैव ब्रह्माख्यस्य धर्मिणोऽसिद्धेः। न ह्यसिद्धे धर्मिणि तत्स्वभावभूतो धर्मः स्वतनत्र्येण सिद्ध्येत्। अन्यत्तर्हि लिङ्गं भविष्यतीत्याह—न चैतदित्यादि। स्वभावकार्यव्यतिरेकेणान्यस्य साध्यार्थप्रतिबन्धाभावात्। न चाप्रतिबद्धं लिङ्गं युक्तमतिप्रसङ्गात्। यदपि च शब्दरूपान्वयत्वं भावानामुक्तम्। तदसिद्धत्वादलीकत्वाच्च न शब्दरूपत्वं पारमार्थिकं ब्रह्मणः साधयितुमलम्। नाप्यागमात्तस्य सिद्धिस्तस्यानवस्थितत्वात्। यद्यप्यनुपलम्भाख्यमस्ति लिङ्गम्। तत्तु स्वभावहेतावेवान्तर्गतमिति भावः। यद्वा—सत्ताप्रसाधकस्य विवक्षितत्वादत एवाह—सत्ताप्रसाधकमिति॥ १४७॥ १४८॥ § 553

अपि च—ज्ञानमात्रार्थकरणेऽप्ययोग्यं ब्रह्म गम्यताम्। तदयोग्यतया रूपं तद्व्यवस्तुत्वलक्षणम्। इत्येतत्प्रतिपादयन्नाह—ज्ञानं ज्ञेयक्रमात्सिद्धमित्यादि। § 554

ज्ञानं ज्ञेयक्रमात्सिद्धं क्रमवत्सर्वमन्यथा।

यौगपद्येन तत्कार्यं विज्ञानमनुषज्यते॥ १४९॥§ 556

074/k

ज्ञानमात्रेऽपि नैवास्य शक्र(क्य ?)रूपं ततः परम्।
भवतीति प्रसक्ताऽस्य वन्ध्यासूनुसमानता॥
१५०॥§ 558

एतच्च पूर्वमीश्वरपरीक्षायां प्रसाधितम्। ततः परमिति। त्यागादाननिबन्धनान्नीलादेः परमन्यदित्यर्थः। यदि वा—तत इति निगमनम्। परमिति त्यागादाननिबन्धनान्नीलादेः परमन्यदित्यर्थः। यदि वा—तत इति निगमनम्। परमिति तात्विकम्। वन्ध्यासूनुसमानतेति। न हि वन्ध्यासूनोरवस्तुत्वव्यवस्थायामर्थक्रियासामर्थ्यविरहव्यतिरेकेणान्यन्निबन्धनमस्ति॥ १४९॥ १५०॥

§ 559

अथेदमुच्यते। तं तु परमं ब्रह्मात्मानमभ्युदयनिःश्रेयसफलधर्मानुगृहीतान्तःकरणा योगिन एव पश्यन्तीति, तदपि नोपपद्यत इति दर्शयति—विशुद्धेत्यादि। § 560

विशुद्धज्ञानसन्ताना योगिनोऽपि ततो न तत्।
विदन्ति ब्रह्मणो रूपं ज्ञाने व्यापृत्य सङ्गतेः॥
१५१॥§ 562

यदि हि ज्ञाने योगजे तस्य व्यापारः स्यात्तदा योगिनस्तस्य रूपं पश्यन्तीति स्यात्। यावता यथोक्तेन प्रकारेण ज्ञाने तस्य व्यापाराभावादयुक्तमेतत्। स्यादेतन्न तद्विषयज्ञानोत्पत्त्या योगिनस्तं पश्यन्ति। तद्व्यतिरिक्तस्य योगिनो योगिज्ञानस्य चाभावात्। किन्तु योगित्वावस्थायां स्वमात्मानं ज्योतीरूपं तत्प्रकाशमानं योगिनस्तं पश्यन्तीति। उच्यते। यद्येवं प्रागयोगित्वावस्थायां किं तस्य रूपमिति वाच्यम्। यदि सदैव ज्योतीरूपं तदा तर्हि न कदाचिदयोगित्वावस्थाऽस्ति, सदैवात्मज्योतीरूपत्वाद्ब्रह्मणः। ततश्चायत्नतः सर्वेषां मोक्षप्रसङ्गः। अथापि स्याद्यथा भवतां स्वप्नाद्यवस्थासु ज्ञानमद्वयमपि विचित्राकारपरिग्रहेण प्रतिभासते तथा तदद्वयमप्यविद्यावशादविशुद्धसन्ततीनां तथाप्रकाशत इति। तदसम्यक्। न हि तद्व्यतिरेकेणान्ये केचिदविशुद्धसन्ततयः सन्ति येषां तत्तथा प्रतिभासते। स्वयमेव तथा प्रतिभासत इति चेत्, एवं तर्हि मोक्षाभावप्रसङ्गः। सर्वदैव ब्रह्मणोऽद्वयरूपप्रतिभासात्मकत्वात्। अस्माकं तु विशुद्धज्ञानान्तरोदयान्मुक्तिर्युज्यत एव। न चापि भवतां तद्व्यतिरेकिण्यविद्याऽस्ति। यद्वशात्तत्तथा प्रतिभासत इति स्यात्। अव्यतिरेके चाविद्यायास्तद्वशात्तदेव तथा प्रतिभासत इति सुव्याहृतमेतत्।

अथापि स्यादविद्यावशात्ख्यातीत्यनेनाविद्यात्मकत्वमेव तस्य ख्याप्यत इति। यद्येवं सुतरां मोक्षाभावप्रसङ्ग एव ख्यापितो भवति। न हि नित्यैकरूपे ब्रह्मण्यविद्यात्मके स्थिते सति तदात्मिकाया अविद्याया व्यपगमः संभवति। येनाविद्याव्यपगमा न्मुक्तिर्भवेत्। अथ व्यतिरिक्ताऽविद्याऽङ्गीक्रियते, एवमपि नित्यत्वादनाधेयातिशयस्य ब्रह्मणः सा (न) तत्किंचित्करोतीति, 075/k न युक्तमविद्यावशात्तथा प्रतिभासनम्। ततश्चाविद्यया सह तस्य संबन्धाभावात्संसाराभावप्रसङ्गः। न चापि सा तत्त्वान्यत्वाभ्यां निर्वक्तुं शक्यत इति युक्तं वक्तुम्, वस्तुधर्मस्य गत्यन्तराभावात्। अन्यथा वस्तुत्वमेव न स्यात्। न चावस्तुवशात्तथा तस्य ख्यातिर्युक्ताऽतिप्रसङ्गात्। तथाभूतस्य चार्थक्रियाकारिणः स्वभावस्यावस्थितिनामकरणे न ना(नो ?)स्ति विवादः। अस्माकं तु वितथाभिनिवेशवासनैवाविद्या सा च वासना शक्तिरुच्यते। शक्तिश्च कारणात्मकज्ञानात्मभूतैवेति। तेन पूर्वपूर्वतः कारणभूतादविद्यात्मनो ज्ञानादुत्तरोत्तरकार्यज्ञानस्यवितथाकाराभिनिवेशिन उत्पत्तेरविद्यावशात्तथाख्यातिर्युक्ता। तस्याश्चाविद्याया योगाभ्यासादसमर्थतरतमक्षणोत्पादक्रमेण व्यपगमात्परिशुद्धज्ञानसन्तानोदयादपवर्गप्राप्तिरित्यतो बन्धमोक्षव्यवस्था युक्तिमती। नत्वेवं भवतां संभवति, नित्यैकरूपत्वाद्ब्रह्मणोऽवस्थाद्वयासंभवात्। एकत्वाच्च तस्य ब्रह्मण एकस्य मुक्तौ सर्वेषां मुक्तिप्रसङ्गः, एकस्यामुक्तौ सर्वेषाममुक्तिप्रसङ्गश्चानिवार्यः। न चाप्ययोगित्वावस्थायामात्मज्योतीरूपत्वेऽस्य किंचित्प्रमाणमस्ति। प्रसाधकं ज्ञानं हि प्रकाशात्मतया स्वसंवेदनप्रसिद्धम्। न त्वेवं शब्दात्मा सर्वत्र प्रत्ययात्मनि संवेद्यत इति निर्दिष्टमेतत्। अथायोग्यवस्थायामात्मज्योतिष्ट्वमस्य नाङ्गीक्रियते, एवमपि प्रागविद्यमानं तदात्मज्योतिष्ट्वमत्यक्तपूर्वरूपस्य ब्रह्मणः, पश्चाद्योग्यवस्थायां कुतः संभूतमिति वाच्यम्। तस्मान्मिथ्याप्रवादोऽयं शब्दब्रह्मवादो भवतामित्यलं बहुना॥ १५१॥ § 563

प्रधानेत्यादिना पूर्वोक्तं दूषणमार्गमिहाप्यतिदिशति। § 564

प्रधानपरिणामेन समं च ब्रह्मदर्शनम्।
तद्दूषणानुसारेण बोद्धव्यमिह दूषणम्॥ १५२॥
इति शब्दब्रह्मपरीक्षा।§ 567

तत्रैवं दूषणं वाच्यम्—न शब्दजन्यं तत्कार्यं सत्तातो हेतुवित्तिवत्। अतो नाभिमतो हेतुरसाध्यत्वात्परात्मवत्॥ इत्यादि॥ १५२॥ § 568

इति शब्दब्रह्मपरीक्षा।

०.७ पुरुषपरीक्षा।

अन्य इत्यादिना वेदवादिमतमुपक्षिपति। § 570

अन्ये त्वीशसधर्माणं पुरुषं लोककारणम्।
कल्पयन्ति दुराख्यातसिद्धान्तानुगबुद्धयः॥
१५३॥§ 572

076/k

समस्तवस्तुप्रलयेऽप्यलुप्तज्ञानशक्तिमान्।
ऊर्णनाभ इवांशूनां स हेतुः किल जन्मिनाम्॥
१५४॥§ 574

त एवमाहुः—पुरुष एवैकः सकललोकस्थितिसर्गप्रलयहेतुः प्रलयेप्यलुप्तज्ञानातिशयशक्तिरिति। तथा चोक्तम्—ऊर्णनाभ इवांशूनां चन्द्रकान्त इवाम्भसाम्। प्ररोहाणामिव प्लक्षः स हेतुः सर्वजन्मिनाम्॥ इति। तथा पुरुष एवैतत्सर्वं यद्भूतं यच्च भाव्यमिति। ईशसधर्माणम्—ईश्वरतुल्यधर्माणम्, द्वयोरपि विश्वसर्गस्थितिप्रलयनिमित्तत्वात्। एतावांस्तु विशेषः, ईश्वरव्यतिरिक्तमन्यदप्यात्मादिकं समवाय्यादिकारणमीश्वरकारणकैरिष्यते। पुरुषवादिभिस्तु पुरुष एव कारणम्, विश्वसर्गस्थितिप्रलयनिमित्तभावस्तु द्वयोरपि समानः। दुराख्यातसिद्धान्तानुगबुद्धय इति। दुराख्यातसिद्धान्तानुगा बुद्धिर्येषामिति विग्रहः। ऊर्णनाभो मर्कटकः॥ १५३॥ १५४॥ § 575

अस्यापीत्यादिना दूषणमारभते—ईश्वरवदिति। § 576

अस्यापीश्वरवत्सर्वं वचनीयं निषेधनम्।
किमर्थं च करोत्येष व्यापारमिममीदृशम्॥
१५५॥§ 578

षष्ठ्यन्ताद्वतिः। अत्राप्येवं दूषणं वाच्यम्—पुरुषो जन्मिनां हेतुर्नोत्पत्तिविकलत्वतः। गगनाम्भोजवत्सर्वमन्यथा युगपद्भवेत्। इत्यादि। यदि चेश्वरसिद्धये यथा परैः साधनान्युक्तानि। तथैव पुरुषसिद्धये पुरुषवादिभिरुपादीयन्ते। तदा तद्वदेवासिद्धतादिदोषो वाच्यः। अन्यदपि दूषणप्रकारमाह—किमर्थं चेत्यादि। प्रेक्षापूर्वकारिप्रवृत्तेः प्रयोजनवत्तया व्याप्तत्वादतः किमर्थमयं पुरुषो जगद्रचनाव्यापारमीदृशं करोतीति वक्तव्यम्॥ १५५॥ § 579

यद्यन्येन प्रयुक्तत्वान्न स्यादस्य स्वतन्त्रता।
अथानुकम्पया कुर्यादेकान्तसुखितं जगत्॥
१५६॥ § 581

आधिदारिद्य(?)शोकादिविविधायासपीडितम्।
जनं तु सृजतस्तस्य काऽनुकम्पा प्रतीयते॥
१५७॥ § 583

यद्यन्येनेश्वरादिना प्रयुक्तोऽनिच्छन्नपि करोति तदाऽस्य यत्स्वातन्त्र्यमभ्युपगतं तद्धीयेत। अथ कृपया परानुग्रहार्थं करोति तदा नारकादिदुःखितमत्वनिर्माणं न कुर्यादेकान्तसुखितमेव कुर्यात्॥ १५६॥ १५७॥ § 584

सृष्टेः प्रागनुकम्प्यानामसत्त्वे नोपपद्यते।
अनुकम्पाऽपि यद्योगाद्धाताऽयं परिकल्प्यते॥
१५८॥ § 586

077/k

किं च सृष्टेः—सर्गात्प्रागनुकम्प्यसत्त्वाभावात्। यस्या अनुकम्पाया वशादयं धाता—स्रष्टा कल्प्येत॥ १५८॥ § 587

न चायं प्रलयं कुर्यात्सदाऽभ्युदययोगिनाम्।
तददृष्टव्यपेक्षायां स्वातन्त्र्यमवहीयते॥ १५९॥ § 589

यदि चायमनुकम्पया कुरुते तदा यदेव मनुष्याः सदाऽभ्युदययोगिनस्तेषां किमिति प्रलयं करोति। ये दुःखितसन्ततय आपायिकाः सत्त्वास्तेषामेव कामं करोतु प्रलयमिति भावः। अथापि स्यात्तेषामनुकम्प्यानां यददृष्टं धर्माधर्मलक्षणं तदपेक्ष्य सुखदुःखसमन्वितं लोकं करोति। नैतदस्ति। एवं हि स्वातन्त्र्यमभ्युपगतं हीयते। न चापि समर्थस्य काचिदपेक्षा। असामर्थ्ये वाऽपेक्ष्यादेव लोकस्योत्पत्तेस्तत्कारणत्वमस्यहीयते॥ १५९॥ § 590

पीडाहेतुमदृष्टं च किमर्थं स व्यपेक्षते।

१ प्रागनुकम्प्या] Correction : ;
प्रागनुकम्पा (sic !)प्रागनुकम्प्या

उपेक्षैव पुनस्तत्र दयायोगेऽस्य युज्यते॥ १६० ॥§ 592

भवतु नाम तस्यादृष्टापेक्षा। तथाऽपि यददृष्टं धर्माधर्मात्मकं पीडाहेतुस्तदपेक्षा कृपालोर्न युक्ता, किन्त्ववधीरणमेव तत्र तस्य कृपापरतन्त्रतया युक्तं कर्तुम्। न हि कृपालवः परदुःखहेतुमेवान्विच्छन्ति, तेषां परदुःखवियोगेच्छयैव प्रवृत्तेः॥ १६० ॥ § 593

क्रीडार्था तस्य वृत्तिश्चेत्क्रीडायां न प्रभुर्भवेत्।
विचित्रक्रीडनोपायव्यपेक्षातः शिशुर्यथा॥ १६१ ॥§ 595

अथ नानुकम्पया करोति। किं तर्हि ?। क्रीडार्थम्। एतदप्यसम्यक्। एवं क्रीडोत्पादे स्वातन्त्र्यमस्य न स्यात्, सर्गस्थितिप्रलयात्मकस्य विचित्रक्रीडनोपायस्यापेक्षणात्॥ १६१॥ § 596

क्रीडासाध्या च या प्रीतिस्तस्या यदपि साधनम्।
तत्सर्वं युगपत्कुर्याद्यदि तत्कृतिशक्तिमान्॥
१६२ ॥§ 598

क्रमेणापि न शक्तः स्यान्नो चेदादौ स शक्तिमान्।
नाविभक्तस्य युज्येते शक्त्यशक्ती हि वस्तुनः॥
१६३ ॥§ 600

किं च ये ते विचित्राः क्रीडनोपायाः, तत्कारणे यदि शक्तिरस्यास्ति तदा युगपदेव कुर्यात्। अथादौ तस्य न शक्तिस्तदा क्रमेणापि न कुर्यात्। अशक्तावस्थाया अविशिष्टत्वात्। न ह्येकस्यैकत्र वस्तुनि शक्तत्वमशक्तत्वं च
078/k परस्परविरुद्धं धर्मद्वयं युक्तम्। किमर्थं च व्यापारमीदृशमारभत इत्यादि सर्वो विकल्प ईश्वरेऽपि साधारणः। तेन— यदाह प्रशस्तमतिः परानुग्रहार्थमीश्वरः प्रवर्त्तते। यथा कृतार्थः कश्चिन्मुनिरात्महिताहितप्राप्तिपरिहारार्थासंभवेऽपि परहितार्थमुपदेशं करोति। तथेश्वरोप्यात्मीयामैश्वर्यविभूतिं विख्याप्य प्राणिनोऽनुग्रहीष्यन्प्रवर्त्तत इति। अथ वा शक्तिस्वाभाव्यात्, यथा कालस्य, वसन्तादीनां पर्यायेणाभिव्यक्तौ स्थावरजङ्गमविकारोत्पत्तिः स्वभावतः।तथेश्वरस्याप्याविर्भावानुग्रहसंहारशक्तीनां पर्यायेणाभिव्यक्तौ प्राणिनामुत्पत्तिस्थितिप्रलयहेतुकत्व मिति। तदप्यनेनैव प्रतिविहितम्। तथा हि—परानुग्रहार्थं प्रवर्त्तत इत्यत्रेदमेव प्रतिविधानम्। अनुग्रहः परं कुर्यादेकान्त-

१६ परं] Correction : ; परः (sic !)परं

सुखितं जगदित्यादि। शक्तिस्वाभाव्यादित्यत्रापीदमेव दूषणम्। सर्गस्थित्युपसंहारान्युगपद्व्यक्तशक्तिकः। युगपज्जगतः कुर्यान्नो चेत्सोऽव्यक्तशक्तिकः॥ न व्यक्तशक्तिरीशोऽयं क्रमेणाप्युपपद्यते। व्यक्तशक्तिरतोऽन्यश्चेद्भावो ह्येकः कथं भवेत्॥ इति। कालस्यापि वसन्ताद्यभिव्यक्तौ पर्यायेण प्रवृत्तावयमेव दोषः। शीतोष्णान्वयभेदभाजस्तु भावा एव हि प्रतिक्षणविनाशिनः काल इत्येतत्पश्चात्प्रतिपादयिष्यते॥ १६२॥ १६३॥ § 601

अथ स्वभावतो वृत्तिरित्यादिनोद्योतकरमतमाशङ्कते। § 602

अथ स्वभावतो वृत्तिः सर्गादावस्य वर्ण्यते।
पावकादेः प्रकृत्यैव यथा दाहादिकर्मणि॥
१६४ ॥§ 604

यद्येवमखिला भावा भवेयुर्युगपत्ततः।
तदुत्पादनसामर्थ्ययोगिकारणसन्निधेः॥ १६५ ॥§ 606

स ह्याह—नहि भगवतः क्रीडार्था प्रवृत्तिः। अपि तु यथा पृथिव्यादीनां महाभूतानां स्वभाव एव स तादृशो यत्स्वकार्येषु प्रवृत्तिः, तथेश्वरस्यापीति। तदेतदयुक्तम्।एवं हि सर्वभावानां तद्व्यापारमात्रभाविनां समर्थाविकलकारणसन्निधानाद्युगपदेवोत्पादः स्यात्। न चापि बुद्धिमत्त्वं विशेषकं युक्तमिति पूर्वमेवास्माभिः प्रतिपादितम्॥ १६४॥ १६५॥ § 607

यद्येवं पावकादिकार्याणामपि किं न यौगपद्यं भवतीत्याह—स्वहेतुबलसंभूता इत्यादि। § 608

स्वहेतुबलसंभूता नियता एव शक्तयः।
असर्वकालभाविन्यो ज्वलनादिषु वस्तुषु॥
१६६ ॥§ 610

079/k

अन्यथा यौगपद्येन सर्वं कार्यं समुद्भवेत्।
तेषामपि न चेदेष नियमोऽभ्युपगम्यते॥
१६७ ॥§ 612

तेषामिति। पावकादीनाम्। न केवलमीश्वरस्येत्यपिशब्दः। एष नियम इति।स्वहेतुबलसंभवकृतः॥ १६६॥ १६७॥ § 613

स्यादेतदूर्णनाभः स्वभावतः प्रवृत्तः किमिति स्वकार्याणि जालादीनि युगपन्न करोतीत्याह—प्रकृत्यैवेत्यादि। § 614

प्रकृत्यैवांशुहेतुत्वमूर्णनाभेऽपि नेष्यते।
प्राणिभक्षणलाम्पट्याल्लालाजालं करोति यत्॥
१६८॥§ 616

ऊर्णनाभोऽपि न स्वभावतः प्रवर्त्तते। किं तर्हि प्राणिभक्षणलाम्पट्यात्कादाचित्कात्प्रतिनियतहेतुसंभूतादित्यभिप्रायः। न ह्यसौ नित्यैकरूपः, तस्यापि स्वहेतुबलभावित्वेन कादाचित्की शक्तिः॥ १६८॥ § 617

अथापि स्यात्। नानुकम्पया न क्रीडया किन्त्वबुद्धिपूर्वकमेव यथाकथंचित्प्रवर्त्तत इत्याह—यथाकथंचिदित्यादि। § 618

यथाकथंचिद्वृत्तिश्चेद्बुद्धिमत्ताऽस्य कीदृशी।
नासमीक्ष्य यतः कार्यं शनकोऽपि प्रवर्त्तते॥
१६९॥§ 620

एवं हि कैवर्त्तादिः प्राकृतपुरुषादप्यत्यन्तानभिज्ञतया कथमसौ प्रेक्षावतामवधेयवचनः स्यात्। बुद्धिमत्तेति। प्रेक्षावत्ता। शनकः—कैवर्त्तः ॥ १६९ ॥ एतेनैव पुरुषदूषणेन ये वा शौरिप्रभृतयः परैर्जगतो धातारः कल्पितास्तेऽपि निरस्ता बोद्धव्या इति दर्शयति— § 621

शौर्यात्मजादय इत्यादि। § 622

शौर्यात्मजादयो येऽपि धातारः परिकल्पिताः।
एतेनैव प्रकारेण निरस्तास्तेऽपि वस्तुतः॥ १७०॥
इति पुरुषपरीक्षा।§ 625

तत्र शौरिर्विष्णुः। आत्मजो ब्रह्मा। आदिशब्देन यो बुद्धिमान्कालः परैरिष्यते तस्य ग्रहणम्........। यथोक्तम्॥ १७०॥ § 626

इति पुरुषपरीक्षा।

---

८ यति—] Correction : ; यति॥ १६९॥ (sic !)यति—

०.८ आत्मपरीक्षा।

०.८.१ नैयायिकवैशेषिकपरिकल्पितात्मपरीक्षा।

अन्ये पुनरिहात्मानमिच्छादीनां समाश्रयम्।
स्वतोऽचिद्रूपमिच्छन्ति नित्यं सर्वगतं तथा॥
१७१ ॥§ 629

080/k

शुभाशुभानां कर्त्तारं कर्मणां तत्फलस्य च।
भोक्तारं चेतनायोगाच्चेतनं न स्वरूपतः॥
१७२ ॥§ 631

ज्ञानयत्नादिसम्बन्धः कर्तृत्वं तस्य भण्यते।
सुखदुःखादिसंवित्तिसमवायस्तु भोक्तृता॥
१७३ ॥§ 633

निकायेन विशिष्टाभिरपूर्वाभिश्च सङ्गतिः।
बुद्धिभिर्वेदनाभिश्च जन्म तस्याभिधीयते॥
१७४ ॥§ 635

प्रागात्ताभिर्वियोगस्तु मरणं जीवनं पुनः।
सदेहस्य मनोयोगो धर्माधर्माभिसत्कृतः॥
१७५ ॥§ 637

शरीरचक्षुरादीनां वधाद्धिंसाऽस्य कल्प्यते।
इत्थं नित्येऽपि पुंस्येषा प्रक्रिया विमलेक्ष्यते॥
१७६ ॥§ 639

(..)॥ १७१॥ १७२॥ १७३॥ १७४॥ १७५॥ १७६॥ § 640

(सदाद्यविशेषविषयाविषयोभयात्मकज्ञेयप्रत्यक्षानुमानोपमानशाब्दसिद्ध-दर्शनप्रातिभज्ञानारेकविपर्यय)स्वप्नस्वप्नान्तिकाः प्रज्ञानविशेषा मदीय-शरीरादिव्यतिरिक्तसंवेदकसंवेद्याः स्वकारणायत्तजन्मवत्त्वसामान्यविशेषवत्त्व-बोधात्मकत्वाशुतरविनाशित्वसंस्काराधायकत्वप्रत्ययत्वेभ्यः पुरुषान्तरप्रत्ययवत् वैधर्म्येण प्रमिता(?) घटादय इति। तत्र सदादयः षडविशेषाः पूर्वं व्याख्याताः। तेषां सदादीनां षण्णां विषयो द्रव्यगुणकर्माणि। अविषयः सामान्यविशेषसमवायाः। तदेतदुभयात्मकं ज्ञेयं विषयः प्रत्यक्षादीनां ज्ञान-विशेषाणां ते तथोक्ताः। प्रत्यक्षानुमानोपमानेत्यादिस्तु द्वन्द्वनिर्देशः। सिद्धदर्शनं ज्योतिःशास्त्राद्युपनिबद्धम्। तद्धि सिद्धानां दर्शनं सिद्धं वा दर्शनमितिकृत्वा सिद्धदर्शनमुच्यते। प्रातिभं तु ज्ञानमार्षं यथाश्वो मे भ्राता गमिष्यतीति। तद्धि प्रायेणर्षीणां भवतीति कृत्वार्षमुच्यते। आरेकः संशयः। विपर्ययो विपर्यासः। प्रथमस्वप्नावस्थाभावी प्रत्ययः स्वप्नः। तद्विषयं स्वप्नेऽपि यदपरं ज्ञानं भवति स स्वप्नान्तिकः। एत एव प्रज्ञानविशेषाः। शेषं सुबोधम्। तदेतत्प्रमाणमर्थतो निर्दिशन्नाह—ज्ञानानि चेत्यादि। § 641

ज्ञानानि च मदीयानि तन्वादिव्यतिरेकिणा।
संवेदकेन वेद्यानि प्रत्ययत्वात्तदन्यवत्॥ १७७॥ § 643

तन्वादित्यत्रादिशब्देन बुद्धीन्द्रियवेदनाः परिगृह्यन्ते। प्रत्ययत्वादित्युपलक्ष-णम्। तदन्येऽपि स्वकारणायत्तजन्मवत्त्वादयो ग्राह्याः॥ १७७॥ § 644

081/k

शङ्करस्वामी पुनरन्यथा प्रमाणयति, इच्छादयः क्वचिदाश्रिताः वस्तुत्वे सति कार्यत्वाद्रूपादिवदिति, तद्दर्शयति—इच्छादयश्चेत्यादि। § 645

इच्छादयश्च सर्वेऽपि क्वचिदेते समाश्रिताः।
वस्तुत्वे सति कार्यत्वाद्रूपवत्स च नः पुमान्॥
१७८॥ § 647

वस्तुत्वग्रहणादेष न नाशे व्यभिचारवान्।

५ प्रमिता] Correction: ; प्रशस्तमिता (sic!)प्रमिता
१५ तन्वादि] Correction: ; तत्वादि (sic!)तन्वादि
१७ तन्वादि] Correction: ; तत्वादी (sic!)तन्वादि

हेतुमत्त्वेऽपि नाशस्य यस्मान्नैवास्ति वस्तुता॥
१७९॥§ 649

वस्तुत्वग्रहणादित्यादिना वस्तुत्वे सतीति विशेषणस्य साफल्यं दर्शयति ॥ १७८॥ १७९॥ § 650

उद्योतकरस्तु प्रमाणयति, देवदत्तस्य रूपरसगन्धस्पर्शप्रत्यया एकानेकनिमित्ताः, मयेति प्रत्ययेन प्रतिसन्धीयमानत्वात्। कृतसमयानामेकस्मिन्नर्तकीभ्रूक्षेपे युगपदनेकंपुरुषाणां प्रत्ययवत्। अस्यायमर्थः—यथा किल नर्त्तकीभ्रूभङ्गानन्तरमस्माभिर्वस्त्राणि प्रक्षेप्तव्यानीत्येवं कृतसमयानां बहूनां नानाकर्त्तृका नानाभूताः प्रत्यया निमित्तस्यभ्रूभङ्गस्यैकत्वान्मया दृष्टो मया दृष्ट इति प्रतिसन्धीयन्ते, तथेहापि नानाविषयाः प्रत्यया निमित्तस्यैकत्वात्प्रतिसन्धास्यन्ते। यच्च तदेकं निमित्तं स आत्मेति। प्रतिसन्धानं पुनर्मया दृष्टं मया श्रुतमित्येवमादीनां प्रत्ययानामेकज्ञातृनिमित्तत्वेन घटनम्। नर्त्तकीभ्रूक्षेपे तु प्रत्ययानामेकविषयत्वापादनम्। सर्वथा प्रतिसन्धानमुच्यते यदेकमर्थं निमित्तीकृत्य प्रत्ययानां संबन्धनम्। तदेतत्प्रमाणं दर्शयन्नाह—रूपादिप्रत्यया इति। § 651

रूपादिप्रत्ययाः सर्वेऽप्येकानेकनिमित्तकाः।
मयेति प्रत्ययेनैषां प्रतिसन्धानभावतः॥ १८०॥§ 653

नर्त्तकीभ्रूलताभङ्गे बहूनां प्रत्यया इव।
अन्यथा प्रतिसन्धानं न जायेतानिबन्धनम्॥
१८१॥§ 655

सुबोधम्॥ १८०॥ १८१॥ § 656

अयमपरस्तदीयः प्रयोगः—आत्मेति पदं शरीरेन्द्रियमनोबुद्धिवेदनासंघातव्यतिरिक्तवचनं प्रसिद्धपर्यायव्यतिरिक्तत्वे सत्येकपदत्वात् घटादिशब्दवत्। तदाह—बुद्धिन्द्रियादीत्यादि। § 657

बुद्धीन्द्रियादिसंघातव्यतिरिक्ताभिधायकम्।
आत्मेति वचनं यस्मादिदमेकपदं मतम्॥
१८२॥§ 659

082/k

सिद्धपर्यायभिन्नत्वे यच्चैवं परिनिश्चितम्।
यथानिर्दिष्टधर्मेण तद्युक्तं पटशब्दवत्॥ १८३॥ § 661

सिद्धपर्यायभिन्नत्व इति। बुद्धीन्द्रियादीनां ये सिद्धाः पर्याया धीप्रभृतयस्तेभ्यो भिन्नत्वे सतीत्यर्थः। यच्चैवं परिनिश्चितमिति। सिद्धपर्यायभिन्नत्वे सत्येकपदत्वेन।यथानिर्दिष्टधर्मेणेति। बुद्ध्यादिव्यतिरिक्तार्थाभिधायित्वेन॥ १८२॥ १८३॥ § 662

पुनः स एव व्यतिरेकिणं हेतुमात्मसिद्धये प्रयुक्तवान्। नेदं निरात्मकं जीवच्छरीरमप्राणादिमत्त्वप्रसङ्गाद्घटादिवदिति। तद्दर्शयति—प्राणादिभिरित्यादि। § 663

प्राणादिभिर्वियुक्तश्च जीवद्देहो भवेदयम्।
नैरात्म्याद्घटवत्तस्मान्नैवास्त्यस्य निरात्मता॥
१८४॥ § 665

अस्य निरात्मतेति। जीवद्देहस्य। यद्वा—अस्यात्मनो निरात्मता निःस्वभावतानास्ति, अपि तु सत्त्वं सिद्धमित्यर्थः॥ १८४॥ § 666

अथ नित्यत्वविभुत्वे कथमस्य प्रतिपत्तव्ये इत्यत्राविद्धकर्णस्तावत्प्रमाणयति—मातुरुदरनिष्क्रमणोत्तरकालं मदीयाद्यप्रज्ञानसंवेदकसंवेद्यान्यतत्कालानि मदीयानि प्रज्ञानानि मदीयप्रज्ञानत्वात् आद्यमदीयप्रज्ञानवत्। एवं दुःखादयोऽपि पक्षीकर्त्तव्याः। एतच्च नित्यत्वेऽनुमानम्, तदेतद्दर्शयति—सद्योजाताद्येत्यादि। § 667

सद्योजाताद्यविज्ञानवेदकेनैव वेद्यते।
सर्वमुत्तरविज्ञानं मज्ज्ञानत्वात्तदाद्यवत्॥ १८५॥ § 669

तदाद्यवदिति। तस्योत्तरकालभाविनो ज्ञानस्याद्य तदाद्यम्॥ १८५॥ § 670

विभुत्वसिद्धये प्रमाणयति। अवनिजलानिलमनांसि विप्रतिपत्तिविषयभावापन्नानिदूरतरवर्त्तीनि मदीयेनात्मना सह संबध्यन्ते। मूर्त्तत्ववेगवत्त्वपरत्वापरत्वमिथःसंयोगविभागवत्त्वेभ्यो मदीयशरीरादिवदिति। तद्दर्शयति—मदीयेत्यादिना। § 671

मदीयेनात्मना युक्तं दूरदेशनिवर्त्त्यपि।
क्षित्यादिमूर्त्तिमत्त्वादेरस्मदीयशरीरवत्॥ १८६॥ § 673

एवमित्यादिनोपसंहरति। § 674

एवं च सत्त्वनित्यत्वविभुत्वानां विनिश्चये।
आत्मनो न निरात्मानः सर्वधर्मा इति स्थितम्॥
१८७॥§ 676

तदत्रेत्यादिना प्रतिविधत्ते। § 677
083/k

तदत्र प्रथमे तावत्साधने सिद्धसाध्यता।
सर्वज्ञादिप्रवेद्यत्वं त्वज्ज्ञानस्येष्यते यतः॥ १८८॥§ 679

प्रथमे साधन इति। ज्ञानानि च मदीयानीत्यादौ। तत्र सिद्धसाध्यता भवदीयप्रत्ययानामस्माभिर्भवच्छरीरादिव्यतिरेकिणा सर्वविदा श्रावकप्रत्येकबुद्धैस्तदन्यैश्च परचित्तवेदिभिर्वेदनाभ्युपगमात्॥ १८८॥ § 680

यश्चापि पुरुषान्तरप्रत्ययवदिति साधर्म्यदृष्टान्तःस साध्यविकल इति दर्शयन्नाह—प्रकाशकानपेक्षं चेत्यादि। § 681

प्रकाशकानपेक्षं च स्वचिद्रूपं प्रजायते।
अन्यविज्ञानमप्येवं साध्यशून्यं निदर्शनम्॥
१८९॥§ 683

यतः पुरुषान्तरीयकमपि ज्ञानं प्रकाशकान्तरानपेक्षं स्वसंविद्रूपमेवोपजायते। तेनतत्वादिव्यतिरिक्तसंवेदकसंवेद्यत्वेन साध्येन शून्यमिदं निदर्शनम्॥ १८९॥ § 684

अथापि स्यान्नान्यदीयं चित्तमात्रमुदाहरणत्वेनाभिप्रेतं किन्तु यस्मिन्विषये विज्ञानमागृहीततदाकारमुपजायते तदिहोदाहरणमिष्टमित्याह—तदाकारोपरक्तेनेत्यादि। § 685

तदाकारोपरक्तेन यदन्येन प्रवेद्यते।
तस्योदाहरणत्वेऽपि भवेदन्येन संशयः॥ १९०॥§ 687

एवमपि यत्स्वसंविद्रूपमेव ज्ञानं ज्ञानान्तरसंवेदनरहितमुत्पद्यते तेन संशयो भवेद(तो) नैकान्तिको हेतुरिति यावत्। अथ तदपि स्वव्यतिरिक्त-

६ पर] Correction: ; परि (sic!)पर (sic!)चित्त
६ चित्त] Correction: ; वित्त

संवेदकसंवेद्यमुदयव्ययधर्मकत्वप्रमेयत्वस्मर्यमाणप्रमाणत्वेभ्यो विषयवदिति मतम्। तदत्रापि साध्यविपर्यये बाधकाभावाद्व्यतिरेको न निश्चितः। उत्तरोत्तरज्ञानानुभवे चानवस्था। न ह्यव्यक्तव्यक्तिको विषयः सिद्ध्येत्। ततश्चैकविषयसिद्ध्यर्थं ज्ञानपरम्परामनुसरतः सकलमेव पुरुषायुषमुपयुज्येत। अथापि किंचिज्ज्ञानमनवस्थाभयात्स्वसंविदितरूपमेवोत्पद्यत इति। तथा तेनैवोदयव्ययधर्मकत्वादीनां हेतूनामनैकान्तिकता। तद्वदेवान्येषामपि ज्ञानानां स्वसंवेदनत्वाभ्युपगमे कः प्रद्वेषः। अथ तदसंविदितरूपमेवेष्यते। एवमपि तदसिद्धौ सर्वेषां पूर्वज्ञानानामप्रसिद्धिरनभिव्यक्तव्यक्तिकत्वात्। ततश्च विषयोऽपि न प्रसिद्ध्येत्। येषां तु विज्ञानवादिनां मतं सर्वमेव ज्ञानं ग्राह्यग्राहकवैधुर्यात्स्वयमेव प्रकाशते—न तु ज्ञानान्तरेण वेद्यत इति, तान्प्रति साध्यविकलता दोषोऽकम्प्य एव। एवमन्येष्वपि कारणायत्तजन्मवत्त्वादिषु साधनेषु सिद्धसाध्यतादिदोषा वाच्याः। यच्चापि सदादीत्यादि धर्मिविशेषणं कृतं तत्पूर्ववदनर्थकं, न ह्यस्य प्रस्तुतसाध्यसिद्धावङ्ग भावोऽस्ति। तथाहि—एतावता किं न गतम्, मदीयाः प्रत्यक्षादिप्रत्यया मदीयशरीरादिव्यतिरिक्तसंवेदकसंवेद्या इति। प्रत्यक्षानुमानादिप्रविभागेनापि धर्मिप्रभेदोऽनर्थक एव, मदीयाः प्रत्यया इत्येतावतैव गतत्वात्। न चापि प्रतिवादिनो यथोक्तविशेषणविशिष्टो धर्मी सिद्ध इत्याश्रयासिद्धता च हेतूनाम्। अथाऽपि विफलं विशेषणमुपादाय तत्साधनार्थमन्यदेव साधनमुच्यते। तथा सति प्रकृतादर्थादप्रकृतसंबद्धार्थमर्थान्तरं निग्रहस्थानं भवेत्॥ १९०॥ § 688

(084/k at the margin of the line beginning नर्थकं)

क्वचित्समाश्रितत्वं च यदीच्छादेः प्रसाध्यते।
तत्र कारणमात्रं चेदाश्रयः परिकल्प्यते॥ १९१॥ § 690

इष्टसिद्धिस्तदाधारस्त्वाश्रयश्चेन्मतस्तव।
तथाऽपि गतिशून्यस्य निष्फलाऽऽधारकल्पना॥
१९२॥ § 692

यच्चोक्तम्—इच्छादयश्चेत्यादि, तत्र यदि कारणमात्रमाश्रय इच्छादीनां साध्यते, तदा सिद्धसाध्यता, न हि निष्कारणा इच्छादयोऽस्माभिरिष्यन्ते। चतुर्भिश्चित्तचैत्ता हीति वचनात्। परिकल्प्यत इति। वर्ण्यत इत्यर्थः। अथाधारलक्षण आश्रयः साध्यते तदाऽपि प्रतिज्ञार्थस्यानुमानबाधितत्वान्न तेन हेतोर्व्याप्तिः सिद्ध्यतीति दर्शयति—तदाधार इत्यादि। तेषामिच्छादीनामाधारस्तदाधारः। मूर्त्तानां हि भावानां प्रसर्पणधर्माणां स्यादधःपातप्रतिबन्धादाधारकल्पना। ये तु सुखादयो गतिशून्यास्तेषामधःपतनासंभवात्किंकुर्वन्नात्मादिराधारः स्यात्॥ १९१॥ १९२॥ § 693

ननु यथा घटादयो बदरादीनामकिंचित्करा अप्याधारास्तद्वदात्मा सुखादीनामाधारो भविष्यतीत्याह—आश्रय इत्यादि। § 694

आश्रयो बदरादीनां कुण्डादिरुपपद्यते।
गतेर्विबन्धकरणाद्विशेषोत्पादनेन वा॥ १९३॥§ 696

गतेर्विबन्धकरणादित्यक्षणिकपक्षे। विशेषोत्पादनेन वेति क्षणिकपक्षे। उपादानकारणसमानदेशोत्पादनं तत्। अयं द्विविधोऽपि प्रकार इच्छादीनां न संभवतीति नतेषां कश्चिदाधारो युक्तः॥ १९३॥ § 697

यद्यापि वस्तुत्वे सतीति विशेषणं तदनर्थकमेव व्यवच्छेद्याभावादिति दर्शयन्नाह—नीरूपस्येत्यादि। § 698

नीरूपस्य च नाशस्य कार्यत्वं नैव युक्तिमत्।
अतो विशेषणं व्यर्थं हेतावुक्तं परैरिह॥ १९४॥§ 700

085/k

यदि हि विनाशस्य कार्यत्वं संभवेत्तदा तद्व्यवच्छेदाय वस्तुत्वे सतीति विशेषणं सार्थकं भवेत्। यावता तस्यावस्तुतया हेतुभिर्न किंचित्क्रियत इति कथं हेतुमत्ता भवेत्। प्रयोगः—यदवस्तु न तत्कस्यचित्कार्यम्, यथा शशविषाणम्। अवस्तु च नाश इति व्यापकविरुद्धोपलब्धेः। कार्यत्वे सति वस्तुत्वप्रसङ्गः सुखादिवदितीदमत्र बाधकं प्रमाणम्। किंचाभ्युपगमविरोधो भवताम्। तथाहि—कार्यमित्यात्मलाभाख्यात्स्वकारणसमवायात्सत्तासमवायाद्वाऽभिधानप्रत्ययौ भवतः। न च विनाशस्य द्रव्यादिस्वभावरहितस्य स्वकारणे समवायोऽस्ति। तत्र वा सत्तायाः। तस्य नीरूपत्वात्। अन्यथा ह्यसौ द्रव्यादिवदाश्रितोऽपि स्याद्वस्तु चेति न हेतुविशेषणेन व्यवच्छेद्यो भवेत्। अतो वस्तुत्वे सतीति विशेषणं व्यर्थम्॥ १९४॥ § 701

रूपादिप्रत्यया इत्यादावाह—मयेत्यादि। § 702

मयेति प्रतिसन्धानमविद्योपप्लवादिदम्।
क्षणिकेष्वपि सर्वेषु कर्त्रेकत्वादिभासतः॥ १९५॥§ 704

मिथ्याविकल्पतश्चास्मान्न युक्ता तत्त्वसंस्थितिः।
सामर्थ्यभेदाद्भिन्नोऽपि भवत्येकनिबन्धनम्॥
१९६॥§ 706

मया दृष्टं श्रुतमित्येवं यदेकज्ञातृनिमित्तत्वेन प्रत्ययानां घटनलक्षणं प्रतिसन्धानं तदेतदनैकान्तिकम्। यतः क्षणिकेष्वपि भावेषु भ्रान्तादेकर्कर्तृत्वाभिमानतः प्रतिसन्धानसंभवात्। तस्मादेवंभूतात्प्रतिसन्धानान्न युक्ता वस्तुव्यवस्था। कथं पुनर्भवतः क्षणाः प्रतिसन्धाननिमित्ततामुपगच्छन्तीत्याह—सामर्थ्यभेदादित्यादि। सामर्थ्यभेदात्—सामर्थ्यविशेषात्। अनेकोऽप्यर्थ एकाकारपरामर्शादिकार्यस्यैकस्य निबन्धनम्—कारणम्, यथा गुडूच्यादयो ज्वरादिशमन इति पश्चाद्विस्तरेण प्रतिपादयिष्यति॥ १९५॥ १९६॥ § 707

अथ भ्रान्तत्वमेव कथमस्य निश्चितमित्याह—एकानुगामीत्यादि। § 708

एकानुगामिकार्यत्वे पौर्वापर्यं विरुध्यते।
रूपशब्दादिचित्तानां शक्तकारणसन्निधेः॥
१९७॥§ 710

यदि ह्येकस्य पूर्वोत्तरकालानुयायिन आत्मादेर्नित्यस्य कार्यत्वमेषां नीलादिप्रत्ययानां स्यात्तदा क्रमभावित्वमेषां विरुध्येत। अविकलकारणत्वेन युगपदेवोत्पादप्रसङ्गात्। न चापि नित्यस्य परापेक्षाऽस्ति। तस्य केनचिदनुपकार्यत्वात्॥ १९७॥ § 711

086/k

किं च सामान्येन कारणपूर्वकत्वमात्रं प्रसाध्यते तदा सिद्धसाध्यतेति दर्शयति—एकानन्तरेत्यादि। § 712

एकानन्तरविज्ञानात् षड्विज्ञानसमुद्भवः।
युगपद्वेद्यते व्यक्तमत इष्टप्रसाधनम्॥ १९८॥§ 714

यत एकस्मादनन्तरविज्ञानात्समनन्तरप्रत्ययात् षण्णां चक्षुरादिविज्ञानानामुत्पादः स्पष्टं संवेद्यते। तथा हि—यदैव नर्तकीरूपं पश्यति, तदैव मुरजादिशब्दं शृणोति, कुवलयादिगन्धं च जिघ्रति, कर्पूरादिरसमास्वादयति, व्यजनानिलादिस्पर्शं चानु(?)भवति, वस्त्वादि च मनसाऽऽदातुं चिन्तयति। न चालातचक्रदर्शनवत्तद्दृष्टिराशुसंचारादिति युक्तं वक्तुम्। अस्पष्टप्रतिभासितत्वप्रसङ्गात्। तथा हि—दर्शनानां प्रतिसन्धानादयं सकृद्ग्रहाभिमानो भवता वर्ण्यते। प्रतिसन्धानं च स्मृत्या क्रियते। सा चातीतविषयत्वादस्पष्टा। स्पष्टश्चायं सकृद्रूपादिप्रतिभासः संवेद्यते। किंच सरो रस इत्यादौ सुतरामाशु सकारादिवर्णग्राहिणां ज्ञानानामुदयोऽस्तीति। अत्राऽपि सकृद्ग्रहाभिमानः स्यात्। ततश्च न क्वचित् क्रमो व्यवसीयेत। एतच्च पश्चाद्विस्तरेण प्रतिपादयिष्यते। इह तु व्यक्तमिति वचनात्परिहारदिक् प्रदर्शितैव॥ १९८॥ § 715

अथ नित्यैकरूपपदार्थहेतुत्वादेषामेकनिमित्तत्वं प्रसाध्यते, तदा व्याप्तेरनुमानबाधेति दर्शयति—क्रमिणामित्यादि। § 716

क्रमिणां त्वेकहेतुत्वं नैवेत्युक्तमनन्तरम्।
अतोऽनुमानबाधाऽस्मिन्व्याप्तेर्व्यक्तं समीक्ष्यते॥
१९९ ॥§ 718

अनन्तरमिति। एकानुगामीत्यादिना। तत्रेदं बाधनम्, ये सन्निहिता अप्रतिबद्धसामर्थ्यकारणास्ते युगपदेव भवन्ति। यथा समग्रसामग्रीकाः सकृद्भाविनोऽङ्कुरादयः। सन्निहिताप्रतिबद्धसामर्थ्यकारणाश्च देवदत्तश्च रूपादिविषयाः प्रत्यया इतिस्वभावहेतुः। न चैवं संभवति। तस्माद्विपर्ययः॥ १९९॥ § 719

दृष्टान्तस्यापि साध्यविकलतेति दर्शयति—नर्त्तकीत्यादि। § 720

नर्त्तकीभ्रूलताभङ्गो नैवैकः परमार्थतः।
अनेकाणुसमूहत्वादेकत्वं तस्य कल्पितम्॥
२०० ॥§ 722

न हि नर्त्तकीभ्रूलतादिरेकोऽस्ति तस्यानेकाणुसमूहत्वात्। यद्येवं कथमेकशब्दविषयत्वं तस्य भवतीत्याह—एकत्वं तस्य कल्पितमिति॥ २००॥ § 723

087/k

अथ कल्पनायाः किं निबन्धनमित्याह—एककार्योपयोगित्वादित्यादि। § 724

एककार्योपयोगित्वादेकशब्दस्य गोचरः।
साध्योऽप्येवंविधोऽभीष्टो यदि सिद्धप्रसाधनम्॥
२०१ ॥§ 726

यस्मादसौ भ्रूलताभङ्ग एकस्मिन्कार्ये चक्षुर्विज्ञानादिक उपयुज्यते, तस्माद्भिन्नोऽप्येकशब्दविषयो भवति। अथापि स्यादस्माभिरेवंविध एव कल्पितैकत्वः साध्योऽभिप्रेतः (अतः) साध्यविकलता दृष्टान्तस्य न भवतीत्याह—साध्योऽपीत्यादि। एवंहि सिद्धसाध्यता, पूर्वापरीभूतानां संस्काराणामेकप्रत्ययनिमित्तानेकसत्वप्रज्ञप्तिविषयत्वात्॥ २०१॥ § 727

यच्चोक्तं बुद्धीन्द्रियादीत्यादि, अत्राह—बुद्धिचित्तेत्यादि। § 728

बुद्धिचित्तादिशब्दानां व्यतिरिक्ताभिधायिता।
नैवैकपदभावेऽपि पर्यायाणां समस्ति नः॥
२०२॥§ 730

अतोऽनैकान्तिको हेतुर्ननूक्त तद्विशेषणम्।
उच्यते नैव सिद्धं तच्चेतःपर्यायतास्थितेः॥
२०३॥§ 732

अहङ्काराश्रयत्वेन चित्तमात्मेति गीयते।
संवृत्त्या वस्तुवृत्त्या तु विषयोऽस्य न विद्यते॥
२०४॥§ 734

एकपदत्वादित्यनैकान्तिको हेतुः। तथाहि—बुद्धिश्चित्तं ज्ञानमिन्द्रियमक्षं वेदना चित्तनुः कायः शरीरमित्यादीनां बुद्धिन्द्रियवेदनाशरीरपर्यायाणामेकपदत्वेऽपि नास्मन्मतेऽस्ति तद्व्यतिरिक्तपदार्थाभिधायितेति ततो विपक्षाद्व्यावृत्त्यसिद्धेरनैकान्तिकत्वम्। ननु चेदमेवाशङ्क्य सिद्धपर्यायाभिन्नत्वे सतीति तस्य हेतोर्विशेषणमुक्तं तत्कथमनैकान्तिकता भवति, तदत्राभिधीयते। असिद्धमेतद्धेतुविशेषणम्, कस्मात् ? चेतःपर्ययतास्थितेः। आत्मेत्येतस्य चित्तपर्यायत्वव्यवस्थानात्। यथोक्तम्, चित्तमेवाहङ्कारसंश्रयत्वादात्मेत्युपचर्यते इति। आत्मेत्युपचर्यते—व्यवह्रियत इत्यर्थः। तेन यदुक्तमुद्द्योतकारेण मुख्यासंभवादुपचारो न युक्त इति तदभिप्रायापरिज्ञानादिति ग्रहीतव्यम्। एतदेव गीयत इत्यनेन स्पष्टयति। तस्मादसिद्धविशेषणो हेतुः। एतच्च संवृत्त्या सविषयत्वमुपगम्यास्य हेतोरनैकान्तिकत्वमुक्तम्। यदि तु परमार्थेन तु बुद्ध्यादिव्यतिरिक्तार्थाभिधायित्वं प्रसाध्यते तदा व्याप्तेरनुमानबाधितत्वादयुक्त एवायंहेतुरिति
088/k दर्शयन्नाह—वस्तुवृत्त्येत्यादि। अध्यारोपितार्थविषयत्वात्सर्वस्यैव शाब्दस्य व्यवहारस्येति पश्चात्प्रतिपादयिष्यते। तेनास्यात्मशब्दस्य विषयो नास्त्येवेति कथंहेतोः साध्येन व्याप्तिर्भवेदिति भावः॥ २०२॥ २०३॥ २०४॥ § 735

सविशेषणोऽप्यनैकान्तिको हेतुरिति दर्शयन्नाह—नभस्तलारविन्दादावित्यादि।
§ 736

नभस्तलारविन्दादौ यदेकं विनिवेश्यते।

कारकादिपदं तेन व्यभिचारोऽपि दृश्यते॥
२०५॥§ 738

यथा हि गगनकुसुमादावत्यन्ताभावेन केनचित्कारकादिपदं निवेश्यते तदा तस्योभयप्रसिद्धेः शरीरादिवाचकव्यतिरिक्तत्वे सत्येकपदत्वमस्ति, न च शरीरादिव्यतिरिक्तवस्तुविषयत्वमपीत्यनैकान्तिको हेतुः॥ २०५॥ § 739

कथं पुनः कारकादिपदं निरुपाख्ये शक्यं नियोक्तुमित्याह—सङ्केतमात्रभाविन्य इत्यादि। § 740

सङ्केतमात्रभाविन्यो वाचः कुत्र न सङ्गताः।
नैवात्मादिपदानां च प्रकृत्याऽर्थप्रकाशनम्॥
२०६॥§ 742

स्वतन्त्रेच्छामात्रभावी हि सङ्केतः तन्मात्रवाचिन्यश्च वाचः, तत्कथमासां क्वचिदपि प्रवृत्तिप्रसररोधो भवेत्। अथापि स्यादसामयिकैकपदत्वादित्ययं हेत्वर्थो विवक्षितस्तेन व्यभिचारो न भविष्यतीत्याह—नैवेत्यादि। न हि सङ्केतमन्तरेण शब्दानां प्रकृत्याऽर्थप्रकाशनमस्ति, अव्युत्पन्नस्यापि ततोऽर्थप्रतीतिप्रसङ्गात। स्वेच्छया च नियोगाभावप्रसङ्गात्। सङ्केतवैयर्थ्यप्रसङ्गाच्च। तस्मादात्मादिपदानां नैव प्रकृत्याऽर्थप्रकाशनं सिद्धमित्यसिद्धो हेतुः। अथाविशेषास्पदपदार्थान्तर्भूतज्ञेयविषयत्वे सतीत्यपरं विशेषणमुपादीयते। यथोक्तं भाविविक्तेन। एवमपि यथोक्तविशेषणासिद्धेरसिद्धोहेतुर्व्याप्त्यभावाच्चानैकान्तिकः॥ २०६॥ § 743

यच्चोक्तं प्राणादिभिर्वियुक्तश्चेत्यादि, तत्राह—प्राणादीनां चेत्यादि। § 744

प्राणादीनां च सम्बन्धो यदि सिद्धः सहात्मना।
भवेत्तदा प्रसङ्गोऽयं युज्यते ऽसङ्गतोऽन्यथा॥
२०७॥§ 746

न वन्ध्यासुतशून्यत्वे जीवद्देहः प्रसज्यते।
प्राणादिविरहे ह्येवं तवाप्येतत्प्रसञ्जनम्॥ २०८॥§ 748

यदि हि प्राणादीनामात्मना सह तादात्म्यलक्षणस्तदुत्पत्तिलक्षणो वा कश्चित्संबन्धः सिद्धो भवेत्तदाऽऽत्मनिवृत्तौ शरीरे प्राणादिनिवृत्तिप्रसङ्गो युक्तिमान्भवेत्। अन्यथा ह्यप्रतिबद्धस्य निवृत्तावन्यनिवृत्तिप्रसङ्गोऽसङ्गत एव 089/k

३ ऽसङ्गतो] Correction : ; सङ्गतो (sic !)ऽसङ्गतो

स्यादतिप्रसङ्गात्। न हि वन्ध्यापुत्रनिवृत्तौ तदसंबद्धानां प्राणादीनां निवृत्तिर्भवति। तस्माद्यथा वन्ध्यासूनुनिवृत्तौ तदसंबद्धानामपि प्राणादीनां निवृत्तिः प्राप्नोति घटादिवदिति केनचित्प्रसङ्गापादनंक्रियमाणमनैकान्तिकं भवति, एवं तवाप्येतदात्मनिवृत्तौ प्राणादिनिवृत्तिप्रसञ्जनमनैकान्तिकमेव, संबन्धासिद्धेरिति भावः॥ २०७॥ २०८॥ § 749

कथं पुनः संबन्धासिद्धिरित्याह—न तावदित्यादि। § 750

न तावदिह तादात्म्यं भेदाङ्गीकरणात्तयोः।
कार्यकारणता नापि यौगपद्यप्रसङ्गतः॥ २०९ ॥§ 752

तदात्मनो निवृत्तौ हि तत्सम्बन्धविवर्जिताः।
किममी विनिवर्तन्ते प्राणापानादयस्तनोः॥
२१० ॥§ 754

भेदाङ्गीकरणात्तयोरिति। तयोरात्मप्रणादिकयोर्न तादात्म्यलक्षणः संबन्धोऽस्ति, स्वभावभेदाभ्युपगमात्। तथाहि—अनित्या अव्यापिनो मूर्ताश्च प्राणादयः, तद्विपरीतस्त्वात्मा। नापि तदुत्पत्तिलक्षणः, प्राणादीनामविकलकारणत्वेन यौगपद्यप्रसङ्गात्। न चैतद्व्यतिरेकेण संबन्धान्तरमस्ति। तस्मात्संबन्धरहिताः प्राणादयः किमिति तनोः शरीराज्जीवनविशिष्टाद्विनिवर्त्तन्ते। नैव। तेनानैकान्तिको हेतुरिति भावः। एतेनेच्छाद्वेषप्रयत्नसुखदुःखज्ञानादीनि यान्यात्मलिङ्गत्वेन परैरुक्तानि तानि प्रतिषिद्धानि द्रष्टव्यानि, संबन्धासिद्धेः। प्रयोगः—ये यत्र न प्रतिबद्धास्ते तस्य गमका न भवन्ति, यथा तिलादेर्बलाकादयः, न प्रतिबद्धाश्च प्राणादय आत्मनीति व्यापकानुपलब्धिः। न चासिद्धो हेतुः। पूर्वं द्विविधस्यापि संबन्धस्य निरस्तत्वात्। न चाप्यनैकान्तिकः, सर्वस्य सर्वगमकत्वप्रसङ्गात्। न चापि विरुद्धः, सपक्षे भावादिति। यच्चाप्याह— कर्तुः प्रसिद्धिः करणप्रसिद्धेरिति, तदसिद्धम्। न हि चक्षुरादीनां परमार्थेन करणत्वं सिद्धम्, विज्ञानोत्पत्तौ सर्वेषां हेतुभावस्य तुल्यत्वात्। स्वेच्छामात्रपरिकल्पितत्वाच्च कर्तृकरणव्यवहारस्येति। कर्तृत्वमात्रसाधने सिद्धसाध्यता, परिकल्पितस्यानिरस्तत्वात्। पारमार्थिककर्तृत्वसाधनेऽनैकान्तिकता। तथाभूतेन कर्त्रा(?)क्वचिदपि चक्षुरादीनां प्रतिबन्धासिद्धेः॥ २०९॥ २१०॥ § 755

यच्चोक्तं सद्योजाताद्यविज्ञानेत्यादि, तत्राह—एवं चेत्यादि। § 756

१७ यच्चाप्याह] Correction: ;
यश्चाप्याह (sic!)यच्चाप्याह

एवं च साधनैः सर्वैरात्मसत्त्वाप्रसिद्धितः।
नित्य(व्यापित्वयो)रुक्तं साध्यहीनं निदर्शनम्॥
२११॥§ 758

090/k

आद्यज्ञानवत्, मदीयशरीरवत्, इति यदेतन्निदर्शनमुक्तं तद्यथोक्तसाध्यधर्मविकलमात्मनोऽसिद्धत्वात्। अतोऽनैकान्तिकता हेतोः॥ २११॥ § 759

अन्यैरित्यादिना पुनरप्युद्योतकरभाविविक्तादेर्मतमाशङ्कते। § 760

अन्यैः प्रत्यक्षसिद्धत्वमात्मनः परिकल्पितम्।
स्वसंवेद्यो ह्यहङ्कारस्तस्यात्मा विषयो मतः॥
२१२॥§ 762

ते ह्येवमाहुः—प्रत्यक्षत एवात्मा सिद्धः, तथाहि—लिङ्गलिङ्गिसंबन्धस्मृत्यनपेक्षमहमिति ज्ञानं रूपादिज्ञानवत्प्रत्यक्षम्। अस्य च न रूपादिर्विषयः, तद्विज्ञानभिन्नप्रतिभासत्वात्। तस्मादन्य एव विषय इति॥ २१२॥ § 763

तदयुक्तमित्यादिना प्रतिविधत्ते। § 764

तदयुक्तमहङ्कारे तद्रूपानवभासनात्।
न हि नित्यविभुत्वादिनिर्भासस्तत्र लक्ष्यते॥
२१३॥§ 766

गौरवर्णादिनिर्भासो व्यक्तं तत्र तु विद्यते।
तत्स्वभावो न चाऽऽत्मेष्टो नायं तद्विषयस्ततः॥
२१४॥§ 768

असिद्धमहङ्कारस्यात्मविषयत्वं तदाकारशून्यत्वात्। प्रयोगः—यद्यदाकारशून्यं न तद्विषयम्। यथा चक्षुर्ज्ञानं न शब्दविषयम्। आत्माकारशून्यं चाहमिति ज्ञानमिति व्यापकानुपलब्धिः। न चायमसिद्धो हेतुरिति दर्शयति—न हीत्यादि। तथा हि— नित्यविभुत्वचेतनत्वादिगुणोपेत आत्मेष्यते। न चात्राहम्प्रत्यये नित्यत्वादिप्रतिभासो लक्ष्यते। किंतु गौरोऽहं मन्दलोचनः परिकृशस्तीव्रवेदनाभिन्न इत्यादिदेहावस्थासंस्पर्शेनोत्पत्तेर्गौरवर्णादिलक्षणः प्रतिभासः प्रतीयते। तस्माद्देहाद्यवस्थासंस्पर्शेनोत्पद्यमानोऽहङ्कारो देहाद्यालम्बन एवेति ज्ञायते। व्यक्तमिति। स्पष्टमस्खलद्वृत्तित्वात्। ततश्च यदुक्तमुद्योतकरप्रभृतिभिः—उपभोगायतने शरीरेऽयमात्मोपचारः, यथाऽनुकूले भृत्ये

राजा ब्रूते, य एवाहं स एवायं मे भृत्य इति। तदपास्तं भवति। तथा हि—यद्ययं गौणः स्यात्तदा स्खलद्वृत्तिर्भवेत्। न हि लोके सिंहमाणवकयोर्मुख्यारोपितयोर्द्वयोरपि सिंह इत्यस्खलिता बुद्धिर्भवति। मदीयाः शरीरादय इति व्यतिरेकदर्शनात् स्खलद्वृत्तिरहङ्कारः शरीरादिष्विति चेत्। न। आत्मन्यपि स्खलद्वृत्तित्वप्रसङ्गात्। तत्रापि हि मदीय आत्मेति व्यतिरेको दृश्यते। कल्पितोऽत्र भेद इति चेत्। इतरत्रापि समानमस्तु। तर्हि
091/k गौरोऽहमित्यादिप्रत्ययो मुख्यस्तथाऽपि कस्मा दात्माऽस्य विषयो न भवतीत्याह—तत्स्वभाव इति। गौरादिस्वभावः। तस्य रूपादिगुणासंभवात्॥ २१३॥ २१४॥ § 769

एवं तावत्तदाकारशून्यत्वान्नात्मविषयोऽहङ्कारो युक्त इति वर्णितम्। तत्र विवादाभावप्रसङ्गाच्च न युक्त इति दर्शयति—यदीत्यादि। § 770

यदि प्रत्यक्षगम्यश्च सत्यतः पुरुषो भवेत्।
तत्किमर्थं विवादोऽयं तत्सत्त्वादौ प्रवर्त्तते॥
२१५॥ § 772

तस्यात्मनः सत्त्वनित्यत्वविभुत्वादौ॥ २१५॥ § 773

स्यादेतद्यथा भवतां प्रत्यक्षीकृतेऽपि नीलादौ तत्स्वभावाव्यति(रिक्ते)क्षणिकत्वादौविवादः प्रवर्त्तते। तथाऽऽत्मन्यपि भविष्यतीत्याह—तथा हीत्यादि। § 774

तथा हि निश्चयात्माऽयमहङ्कारः प्रवर्त्तते।
निश्चयारोपबुद्ध्योश्च बाध्यबाधकता स्थिता॥
२१६॥ § 776

युक्तो हि नीलादौ प्रत्यक्षेण गृहीतेऽपि तदव्यतिरिक्ते क्षणिकत्वादौ विवादः, तस्य प्रत्यक्षस्य निर्विकल्पत्वेनानिश्चायकतया क्षणिकत्वादेरनिश्चितत्वात्। भवत्पक्षे तु न युक्तोऽहम्प्रत्ययस्य सविकल्पकत्वेन निश्चयात्मकतयाऽऽत्मनो निश्चितत्वात्। न चनिश्चयेन विषयीकृते वस्तुनि तद्विपरीताकारग्राहिणः समारोपप्रत्ययस्य प्रवृत्तिरस्ति, येन विवादो भवेत्। तयोः सहावस्थायित्वेन बाध्यबाधकभावात्। इयमेव हि निश्चयानां स्वार्थप्रतिपत्तिर्यत्तन्निश्चयनं ते चेन्न निश्चिन्वन्ति, न गृह्णन्त्येवेति प्राप्तम्॥ २१६॥ § 777

तदेवं परपक्षं निराकृत्य स्वपक्षं स्थापयन्नाह—तस्मादित्यादि। § 778

तस्मादिच्छादयः सर्वे नैवात्मसमवायिनः।

क्रमेणोत्पद्यमानत्वाद्बीजाङ्कुरलतादिवत्॥ २१७ ॥§ 780

अथ वाऽऽध्यात्मिकाः सर्वे नैरात्म्याक्रान्तमूर्त्तयः।
वस्तुसत्त्वादिहेतुभ्यो यथा बाह्या घटादयः॥
२१८ ॥§ 782

प्रयोगः—ये क्रमेणोत्पद्यन्ते ते नात्मसमवायिनो यथा बीजाङ्कुरलतादयः, क्रमेणोत्पद्यन्ते च सुखादय इति विरुद्धव्याप्तोपलब्धेः। आत्मसमवायित्वविरुद्धेनानात्मसमवायित्वेन क्रमोत्पत्तेर्व्याप्तत्वात्। सन्निहिताविकलकारणत्वाद्युगपदुत्पत्तिप्रसङ्गो विपर्यये बाधकं प्रमाणम्। अथवा—ये वस्तुत्वकृतकत्वोत्पत्तिमत्त्वादिधर्मोपेतास्ते सर्वे निरात्मानो यथा बाह्या घटादयः, वस्तुत्वादिधर्मोपेताश्चाध्यात्मिका जीवच्छरीरमनोबुद्धिदुःखसुखादय इति स्वभावहेतुः॥ २१७॥ २१८॥ § 783

092/k

कथं पुनरत्र व्याप्तिः सिद्धेत्याह—सात्मकत्वेत्यादि। § 784

सात्मकत्वे हि नित्यत्वं तद्धेतूनां प्रसज्यते।
नित्याश्चार्थक्रियाऽशक्ता नातः सत्त्वादिसम्भवः॥
२१९ ॥§ 786

यदि सात्मकत्वम्—आत्माधिष्ठितत्वं देहादीनां भवेत्, तदेषामात्मा हेतुः स्यात्। न ह्यकारणमधिष्ठाता युक्तोऽतिप्रसङ्गात्। ततश्च तद्धेतूनाम्—आत्महेतुकानां शरीरादीनामविकलकारणतया नित्यत्वम्—अक्रमित्वं प्रसज्येत। स्यादेतद्यदि नाम नित्यत्वमेषां प्रसक्तम्, तथाऽपि वस्तुत्वादिकमनुवृत्तमेवेत्याह—नित्याश्चेत्यादि। नित्याश्चसन्तः शरीरादयोऽर्थक्रियायामशक्ताः, प्रसज्यन्त इति प्रकृतमर्थाद्वचनपरिणामेन संबध्यते। नित्यस्य क्रमयौगपद्याभ्यामर्थक्रियाविरोधादिति भावः। अर्थक्रियासामर्थ्यनिवृत्तौ च वस्तुत्वनिवृत्तिरर्थक्रियासामर्थ्यलक्षणत्वाद्वस्तुनः। वस्तुत्वनिवृत्तौ सत्त्वादीनामपि वस्तुधर्माणां निवृत्तिरिति सिद्धा व्याप्तिः॥ २१९॥ § 787

उद्योतकरस्त्वाह—अथ निरात्मकमिति कोऽर्थः साध्यत्वेनेष्टः। यदि तावदात्मनोऽनुपकारकमिति, न दृष्टान्तोऽस्ति। न हि किंचिदात्मनोऽनुपकारकमस्ति। अथात्मप्रतिषेध आत्मा शरीरं न भवतीति। कस्य चात्मा शरीरम्, उत्तरपदविषयत्वाच्च निसः, किं सात्मकमिति वाच्यम्। न ह्यसत्युत्तरपदे निसः प्रयोगं पश्यामः, यथा निर्मक्षिकमिति। अथ शरीर आत्मा प्रतिषिध्य-

९ जीवच्छरीर] Correction : ; जीवशरीर (sic !)जीवच्छरीर

ते, सिद्धं साधयसि। कस्य वा शरीरआत्मा विद्यते। अथ शरीरमात्मसंबन्धे(न्धि ?)न भवतीति। पुनर्दृष्टान्तो नास्ति। सर्वे चैते विशेषप्रतिषेधाः, विशेषप्रतिषेधाच्च सामान्यं गम्यते। एवं सति यत्प्रतिषेद्धव्यं तदभ्यनुज्ञातं भवति। अथात्मशब्दः शब्दत्वादनित्यविषय इति साध्यते। तथाऽपि नित्यशब्देनानैकान्तिकः। शरीरादीनां चोपचारादात्मवाच्यत्वात्सिद्धसाधनम्। अथ शरीरादिव्यतिरिक्तानित्यपदार्थविषयत्वेनानित्यविषय आत्मशब्दः साध्यते। तथापि रूपादिव्यतिरिक्तविषयाभ्युपगमाद्विरोध इति। तदेतत्प्रतिविधत्ते—घटादिष्वित्यादि। § 788

घटादिषु समानं च यवैरात्मा(यन्नैरात्म्यं ?)निषिध्यते।
परैर्जीवच्छरीरेऽस्मिंस्तदस्माभिः प्रसाध्यते॥ २२० ॥§ 790

तदेतद्भवतोऽपि तुल्यं चोद्यम्। तथाहि—घटादिषु बाह्येषु आत्मानधिष्ठितत्वेन तदुपभोगानायतनत्वेन वा नैरात्म्यं भवद्भिरपीष्यत एव। अन्यथा नेदं निरात्मकं जीवशरीरमप्राणादिमत्त्वप्रसङ्गाद्घटादिवदिति प्रसङ्गे दृष्टान्तत्वेन
093/k तेषामुपादानं न स्यात्। ततश्च तत्रापि घटादिषु तुल्यं चोद्यं कथमेषां नैरात्म्यं यदि तावदात्मानुपकारकमित्यादि। तस्माद्येन प्रकारेणात्मानधिष्ठितत्वेन वा तदुपभोगानायतनत्वेन वा तेषु घटादिषु बाह्येषु सर्वेषु साधारणं नैरात्म्यं भवतामपि प्रसिद्धम्। यच्च जीवच्छरीरे भवद्भिर्निषिध्यते नेदं निरात्मकं जीवच्छरीरमिति, यस्य निषेधाज्जीवच्छरीरमेव सात्मकमुपगम्यते न मृतशरीरघटादय इति, तदेवास्माभिः प्रसाध्यते, निरात्मकं जीवच्छरीरं वस्तुत्वादिभ्य इति। तस्मादात्मनोऽनुपकारकमित्यादिविकल्पोऽनास्पद एव, भवतामपि नैरात्म्यस्य प्रसिद्धत्वात्। किंच—यत्तावदुक्तमात्मानुपकारित्वसिद्धौन दृष्टान्तोऽस्तीति, तदसम्यक्। तथाहि—शक्यमेवं प्रसाधयितुम्, यो यस्य स्वभावातिशयं नाधत्ते नासौ तस्योपकारी, यथा विन्ध्यो हिमवतः, नाधत्ते चात्मनोनित्यैकरूपस्य स्वभावातिशयं शरीरादय इति व्यापकानुपलब्धेः। न चासिद्धो हेतुः। स्वभावातिशयस्यात्माव्यतिरिक्तत्वात्। तदाधाने सत्यात्मन एवाऽऽधानं स्यात्।ततश्चानित्यत्वप्रसङ्गः। व्यतिरेके च स्वभावातिशयस्य संबन्धनिबन्धनाभावात्तदीयोऽसाविति संबन्धो न सिद्ध्येत्। तस्मान्नित्यस्य न कश्चिदुपकारी संभवति, तस्य तत्राकिंचित्करत्वात्। यच्चोक्तम्—कस्य चात्मा शरीरमिति, तदप्यसम्यक्। सन्ति हि केचिदेवंविधा ये शरीरादीनात्मपरिणामरूपान्वर्णयन्ति। यथोपनिषद्वादिनः। अतस्तान्प्रति(प्रति)षिध्यते। यच्चोक्तम्—उत्तरपदार्थविषयत्वान्निसः किं सात्मकमिति वाच्यमिति। तदप्यसङ्गतम्। न ह्युत्तरपदार्थः सन्नेव निषिध्यते। किं तर्हि ?। समारोपितः। सतः प्रतिषेद्धुमशक्यत्वात्। ततश्च योऽसौ परेण भ्रान्त्या समारोपितोऽर्थः

स एवोत्तरपदार्थो भवति। यतस्तमेवानूद्य परस्य मिथ्याज्ञानत्वमाख्यापयितुं प्रतिषेधः क्रियते। अन्यथा ह्यक्षणिकाः प्रदीपादय इत्यादौ बौद्धपरिकल्पितक्षणिकत्वनिषेधे भवता क्रियमाणे चोद्यमेतदापतत्येव, न ह्यसत्युत्तरपदे नञः प्रयोगं पश्याम इति। यच्चोक्तम्—कस्य वा शरीरे आत्मा विद्यत इति, तदप्यसम्यक्। तथा हि— येषां दर्शनमङ्गुष्ठपर्वार्द्धश्यामकादिफलप्रमाण आत्मेति, तेषां मतेनात्मनो मूर्त्तत्वाच्छरीरस्थितिरस्त्येवेति, तान्प्रति (प्रति)षेधो युज्यत एव। यच्चोक्तम्—शरीरस्यात्मसंबन्धित्वनिषेधे दृष्टान्तो नास्तीति, तदसिद्धम्। परस्परमुपकार्योपकारकत्वाभावाद्विन्ध्यहिमवतोरिव नात्मशरीरयोः संबन्धोऽस्तीति पूर्ववत्प्रसाधयितुं शक्यत्वात्। यच्चोक्तम्— विशेषप्रतिषेधाच्च सामान्यं गम्यत इति, तदनेकान्तम्। भवद्भिः प्रदीपादीनां क्षणिकत्वप्रतिषेधेऽपि कस्यचित्क्षणिकत्वसामान्येनानभ्युपगमात्। अथाऽपि स्यादिष्यत एवा स्माभिरचिरकालावस्थायित्वनिबन्धना प्रदीपादौ क्षणिकशब्दप्रवृत्तिर- 094/k
तः सामान्येन क्षणिकत्वं सिद्धमेवेति। यद्येवमात्मशब्दप्रवृत्तिरप्यस्माभिरहङ्कारसंमिश्रिते चेतसीष्टैवेति सिद्धः सामान्येनात्मा। यच्चोक्तम्—अथात्मशब्दोऽनित्यत्वविषय इत्यादिपक्षद्वयम्, तदप्यसङ्गतमेव। अनभ्युपगमात्। न ह्यात्मशब्दस्य कश्चित्परमार्थेन विषयोऽभ्युपगतः। नापि रूपादिव्यतिरिक्तः। न चापि नित्यशब्दस्य परमार्थेन क्वचिन्नित्ये वस्तुनि वृत्तिः सिद्धा, येन व्यभिचारः स्यात्। नापि शरीरादिष्वात्मशब्दस्योपचाराद्वृत्तिरस्खलद्गतित्वादित्युक्तमतो न प्रसिद्धसाधनम्॥ २२०॥ § 791

इत्थमात्माप्रसिद्धौ च प्रक्रिया तत्र या कृता।
निरास्पदैव सा सर्वा वन्ध्यापुत्र इव स्थिता॥
२२१॥
इति नैयायिकवैशेषिकपरिकल्पितात्मपरीक्षा।§ 794

तदेवमात्माख्यस्य धर्मिणः प्रमाणव्याहतत्वेनाप्रसिद्धत्वात्तत्र या कर्तृत्वभोक्तृत्वादिप्रक्रिया भवद्भिरुपचरिता सा वन्ध्यापुत्र इव निरास्पदेति न पृथग्दूषणमस्याः क्रियते। आश्रयनिराकरणेनैवास्याः प्रतिक्षिप्तत्वात्। कृतनाशाकृताभ्यागमदोषश्च यथा न भवति तथा कर्मफलसंबन्धपरीक्षायां प्रतिपादयिष्यते॥ २२१॥ § 795

इति नैयायिकवैशेषिकपरिकल्पितात्मपरीक्षा।

०.८.२ मीमांसकपरिकल्पितात्मपरीक्षा।

मीमांसकपरिकल्पितात्मनिराकरणमाह—व्यावृत्त्यनुगमात्मानमित्यादि।
§ 797

व्यावृत्त्यनुगमात्मानमात्मानमपरे पुनः।
चैतन्यरूपमिच्छन्ति चैतन्यं बुद्धिलक्षणम्॥
२२२॥§ 799

व्यावृत्तिः—सुखदुःखाद्यवस्थानां परस्परतो भेदाः, अनुगमः—चैतन्यद्रव्यत्वसत्त्वादीनामनुवृत्तिः, तावेतौ व्यावृत्त्यनुगमावात्मा स्वभावो यस्येति विग्रहः। एतदुक्तं भवति—सुखादिरुपेण व्यावृत्तं सत्त्वादिरुपेणानुगतमात्मानं चिद्रूपमपरे जैमिनीया वर्णयन्ति। तच्च चैतन्यं न बुद्धिव्यतिरेकेणान्यत्, यथा साङ्ख्यैरिष्यते, किं तर्हि ? बुद्धिरेवेति दर्शयति—चैतन्यं बुद्धिलक्षणमिति। बुद्धिलक्षणम्—बुद्धेः स्वरूपमित्यर्थः। बुद्धिव्यतिरेकेणापरस्य चिद्रूपत्वाप्रतीतेरिति भावः॥ २२२॥ § 800

कथं पुनरेकस्यात्मनः परस्परविरुद्धं व्यावृत्त्यनुगमात्मकं स्वभावद्वयं युज्यत इत्याह—यथाऽहेरित्यादि। § 801
095/k

यथाऽहेः कुण्डलावस्था व्यपैति तदनन्तरम्।
संभवत्यार्जवावस्था सर्पत्वं त्वनुवर्त्तते॥ २२३॥§ 803

तथैव नित्यचैतन्यस्वभावस्यात्मनोऽपि न।
निःशेषरूपविगमः सर्वस्यानुगमोऽपि वा॥
२२४॥§ 805

किन्त्वस्य विनिवर्त्तन्ते सुखदुःखादिलक्षणाः।
अवस्थास्ताश्च जायन्ते चैतन्यं त्वनुवर्त्तते॥
२२५॥§ 807

यथा किलाहेः—सर्पस्यैकस्यापि सतः कुण्डलावस्थानिवृत्तावार्जवावस्थाप्रादुर्भावः, सर्पत्वं पुनरवस्थाद्वयेऽप्यनुवर्त्तते, तथाऽऽत्मनोऽपि नित्यचैतन्यस्वभावस्यैकस्यापि सतोनाशेषस्वभावविगमो नापि नैयायिकादिपरिकल्पितात्मवदशेषस्वभावानुगमः, किं तर्हि ? सुखाद्यवस्था निवर्त्तन्ते प्रवर्त्तन्ते च, चैतन्यरूपं तु सर्वत्रानुयायीत्यतो न विरोध इति समुदायार्थः। अवयवार्थस्तूच्यते—नित्यचैतन्यस्वभावस्येति। नित्यं चैतन्यं स्वभावो यस्येति विग्र-

हः। सर्वस्येति। रूपस्येति शेषः। अनुगमोऽपि वेति। नेति प्रकृतेन संबन्धः। ताश्चेति। सुखदुःखाद्यवस्थाः॥ २२३॥ २२४॥ २२५॥ § 808

अथ कस्मादेकान्तेन व्यावृत्तिपक्ष एव नाश्रीयते यथा बौद्धैर्निरन्वयविनाशवादिभिरिष्यते, एकान्तिको वाऽन्वयो यथा नैयायिकादिभिराश्रीयत इत्याह—स्यातामित्यादि। § 809

स्यातां ह्यत्यन्तनाशेऽस्य कृतनाशाकृतागमौ।
सुखदुःखादिभोगश्च नैव स्यादेकरूपिणः॥
२२६॥§ 811

यदि हि निरन्वयो विनाशः स्यात्, तदा कृतस्य कर्मणो नाशः स्यात्, कर्तुः फलानभिसंबन्धात्। अकृताभ्यागमश्च स्यादकर्तुः फलाभिसंबन्धनात्। एकरूपत्वेचात्मनः सुखदुःखादिभोगो न स्यात्, आकाशवत्। अभोक्रवस्थातो भोक्रवस्थायां विशेषाभावात्। तथा चोक्तं कुमारिलेन— तस्मादुभयहानेन व्यावृत्त्यनुगमात्मकः। पुरुषोऽभ्युपगन्तव्यः कुण्डलादिषु सर्पवदिति॥ २२६॥
§ 812

ननु चोभयरूपे पुंसि याऽवस्था कर्त्री न सा भोक्रीति, तावेव कृतनाशाकृताभ्यागमाविहापि प्राप्तावित्याह—न चेत्यादि। § 813

न च कर्तृत्वभोक्तृत्वे पुंसोऽवस्थां समाश्रिते।
ततोऽवस्थावतस्तत्त्वात्कर्त्तैवाप्नोति तत्फलम्॥
२२७॥§ 815

096/k

न हि पुंसः कर्तृत्वभोक्तृत्वे अवस्थां समाश्रिते, किन्तु पुरुषमेव। यस्मात्पुमानेव करोति भुङ्क्ते च, न त्ववस्था। ततः—तस्मात्, (तस्य) अवस्थावतः पुरुषस्य, तत्त्वात्— अपरित्यक्तपूर्वरूपत्वात्, कर्त्तैव तत्फलम्—तस्य कर्मणः फलमाप्नोतीत्यदोषः॥ २२७॥ § 816

किं पुनरस्यात्मनोऽस्तित्वे साधकं प्रमाणमित्याह—पुमा नित्यादि। § 817

पुमानेवंविधश्चायं प्रत्यभिज्ञानभावतः।

४ नाशेऽस्य] Correction : ; नाशे हि (sic !)नाशेऽस्य
४ वतस्त] Correction : ; सु तत्त (sic !)वतस्त

७ अपरित्यक्त] Correction : ; परित्यक्त (sic !)अपरित्यक्त

प्रमीयते प्रबाधा च नैरात्म्यस्यामुनैव हि॥
२२८॥§ 819

अहमेव ज्ञातवानहमेव वेद्मीत्यादेरेककर्तृविषयस्य प्रत्यभिज्ञानस्य—भावतः सत्वात्, आत्मा प्रसिद्धः। अमुनैव च प्रत्यभिज्ञानेन बौद्धादिपरिकल्पितस्य नैरात्म्यस्य बाधाऽपि सिद्धा। यथोक्तम्— तेनास्मात्प्रत्यभिज्ञानात्सर्वलोकावधारितात्। नैरात्म्यवादबाधः स्यात् इति॥ २२८॥ § 820

कथं पुनः प्रत्यभिज्ञानप्रत्ययत एतद्द्वयं प्रसिध्यतीत्याह—अहमित्यादि। § 821

अहं वेद्मीत्यहंबुद्धिर्ज्ञातारं प्रतिपद्यते।
स चात्मा यदि वा ज्ञानं स्यादेकान्तविनश्वरम्॥
२२९॥§ 823

यद्यात्मा विषयस्तस्याश्चतुरस्रं तदाऽखिलम्।
क्षणिकज्ञानपक्षे तु सर्वमेवातिदुर्घटम्॥ २३०॥§ 825

तथा हि ज्ञातवान्पूर्वमहमेव च सम्प्रति।
अहमेव प्रवेद्मीति या बुद्धिरुपजायते॥ २३१॥§ 827

तस्या ज्ञानक्षणः को नु विषयः परिकल्प्यते।
अतीतः साम्प्रतः किं वा किं वाऽसावथ सन्ततिः॥
२३२॥§ 829

तत्राऽऽद्ये विषये ज्ञाते ज्ञातवानिति युज्यते।
जानामीति न युक्तं च नेदानीं वेत्त्यसौ ततः॥
२३३॥§ 831

वर्त्तमाने तु विषये प्रवेद्मीत्युपपद्यते।

ज्ञातवानित्यसत्यं तु नैवासीत्प्रागिदं यतः॥
२३४॥§ 833

अत एव द्वयं ग्राह्यं नैव तस्याः प्रकल्प्यते।
न ह्युभौ ज्ञातवन्तौ वा जानीतो वाऽधुना पुनः॥
२३५॥§ 835

सन्तानोऽपि न तद्ग्राह्यो द्वितयस्याप्यसंभवात्।
न ह्यसौ ज्ञातवान्पूर्वमवस्तुत्वान्न वाऽधुना॥
२३६॥§ 837

097/k

तस्मादयमहङ्कारो वर्त्तते यत्र गोचरे।
उक्तादन्यत्र सिद्धोऽसावात्मा शाश्वतरूपवान्॥
२३७॥§ 839

अहं वेद्मीत्ययमहम्प्रत्ययो ज्ञातारं प्रतिपद्यत इत्यत्राविवाद एव, वेद्मीति कर्तृप्रत्ययसामानाधिकरण्यात्। स च ज्ञाता भवन्नात्मा वा भवेत् ज्ञानं वा भवत्परिकल्पितमेकान्तविनश्वरं क्षणिकमिति कल्पनाद्वयम्। तत्र यद्यात्मेति पक्षस्तदाऽखिलं चतुरस्रम्, अभिमतार्थप्रसिद्धेः। अथ ज्ञानमिति पक्षस्तदा सर्वमतिदुर्घटम्। तथा हि— अहं ज्ञातवानहमेव च सांप्रतं वेद्मीति योऽयमेककर्तृप्रत्यवमर्शेनाहम्बुद्धिरुपजायते तस्याविज्ञानक्षणो विषयत्वेन कल्प्यमानः कदाचिदतीतो वा कल्प्यते यद्वा साम्प्रतो वर्तमान उतातीतसाम्प्रतो यद्वा सन्ततिरिति चत्वारः पक्षाः। तत्राद्ये—अतीते ज्ञाने विषयत्वेन कल्प्यमानो ज्ञातवानित्ययमाकारावसायो युज्यते, पूर्वं तेन ज्ञातत्वात्। संप्रति जानामीत्येतत्तु न युक्तम्, न ह्यसावतीतज्ञानक्षण इदानीं वर्त्तमानकाले वेत्ति, तस्य पूर्वनिरुद्धत्वात्। अथ वर्त्तमानं विषय इति द्वितीयः पक्षस्तदा वेद्मीत्येतद्युक्तम्, इदानीं तस्य वेदकत्वात्। ज्ञातवानित्येवमाकारग्रहणं तु न युक्तम्। कस्मात् ? नैवासीत्प्रागिदं यतः। इदमिति वर्त्तमानं ज्ञानम्। अत एव—अस्या बुद्धेर्वैमुख्येन प्रवृत्तेः, नातीतं सांप्रतं च विज्ञानद्वयं ग्राह्यमिति सिद्धम्। न हि वर्त्तमानातीतावुभौ ज्ञानलक्षणौ ज्ञातवन्तौ, नापि सांप्रतं

४ तद्ग्राह्यो] Correction: ; तद्ग्राह्यो (sic !)तद्ग्राह्यो

जानीतः। किं तर्हि ? एको ज्ञातवानपरो जानाति। अत एव सन्तानोऽपि तयाऽहम्बुद्ध्या ग्राह्यो न भवति, द्वितयस्य—अतीतवर्त्तमानज्ञानक्रियाद्वय-स्यासंभवात्। तथाहि— नासौ सन्तानो ज्ञातवान्पूर्वं, नाप्यधुना जानाति, तस्य कल्पितत्वेनावस्तुत्वात्, नचावस्तुनो ज्ञातृत्वं भवति, तस्य वस्तुधर्मत्वात्। तस्माद्यथोक्तज्ञानव्यतिरेकेण यत्रविषयेऽयमहङ्कारो वर्त्तते स आत्मेति सिद्ध-म्॥ २२९॥ २३०॥ २३१॥ ॥ २३२॥ २३३॥ २३४॥ २३५॥ २३६॥ २३७॥ § 840

अथ शाश्वतरूपत्वमस्य कथं सिद्धमित्याह—व्यतीतेत्यादि। § 841

व्यतीताहङ्कृतिग्राह्यो ज्ञाताऽद्याप्यनुवर्त्तते।
अहम्प्रत्ययगम्यत्वादिदानीन्तनबोद्धृवत्॥ २३८॥ § 843

एष वा ह्यस्तनो ज्ञाता ज्ञातृत्वात्तत एव वा।
ह्यस्तनज्ञातृवत्तेषां प्रत्ययानां च साध्यता॥
२३९॥ § 845

098/k

योऽतीताहम्प्रत्ययगम्यः सोऽद्याप्यनुवर्त्तते, यथेदानीन्तनो बोद्धा। अह-म्प्रत्ययगम्यश्चायमिदानीन्तनो बोद्धेति स्वभावहेतुः। एष वेति। इदानीन्तनो बोद्धा। तत एवेति।अहम्प्रत्ययगम्यत्वात्। एवं ज्ञातारं धर्मिणं कृत्वा प्र-योगो दर्शितः। सांप्रतमहम्प्रत्ययानां साध्यधर्मितां कृत्वा प्रयोगान्तरं दर्शय-न्नाह—तेषामित्यादि। तेषामिति—अतीताद्यतनानामहम्प्रत्ययानाम्, साध्य-तेति। साध्यधर्मितेत्यर्थः॥ २३८॥ २३९॥ § 846

कथमित्याह—एकसन्तानेत्यादि। § 847

एकसन्तानसम्बन्धज्ञात्रहम्प्रत्ययत्वतः।
ह्यस्तनाद्यतनाः सर्वे तुल्यार्था एकबुद्धिवत्॥
२४०॥ § 849

ह्यस्तनाद्यतनाः सर्वे अहम्प्रत्यया इत्ययं साध्यधर्मिनिर्देशः। तुल्यार्था इति साध्यधर्मः। एकविषया इत्यर्थः। एकेन देवदत्तादिसन्तानेन संब-द्धो यो ज्ञाता तत्र तस्य वा येऽहम्प्रत्यया एकसन्तानसंबद्धज्ञात्रहम्प्रत्ययाः,

२ ग्राह्यो] Correction : ; श्राद्यो (sic !)ग्राह्यो
६ योऽतीताह] Correction : ; योऽह (sic !)योऽतीताह

तद्भावस्तत्त्वम्। अयं च हेतुनिर्देशः। अहम्प्रत्ययत्वमात्रं पुरुषान्तरीयेष्वप्यहङ्कारेषु प्रवर्त्तत इत्यतोऽनैकान्तिकत्वपरिहारार्थमेकसन्तानसंबद्धज्ञातृविषयत्वं हेतुविशेषणं कृतम्। एकबुद्धिवदिति दृष्टान्तः। तेषामेवाहम्प्रत्ययानां मध्ये विवक्षितैकबुद्धिवदित्यर्थः॥ २४०॥ § 850

तदत्रेत्यादिनोत्तरपक्षमारभते। § 851

तदत्र चिन्त्यते नित्यमेकं चैतन्यमिष्यते।
यदि बुद्धिरपि प्राप्ता तद्रूपैव तथा सति॥
२४१॥ § 853

यदि हि चैतन्यं नित्यैकरूपमङ्गीक्रियते तदा बुद्धिरपि चैतन्यरूपाव्यतिरेकान्नित्यैकरूपा प्राप्नोति। न चैवमिष्टमतोऽभ्युपगमविरोधः प्रतिज्ञायाः। तथा हि भाष्यकारेणोक्तम्—क्षणिका हि सा न बुद्ध्यन्तरकालमवतिष्ठत इति। तथा जैमिनिनाऽप्युक्तम्— सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमिति। नित्यत्वे सति जन्मायोगात्। स्ववचनविरोधश्च कुमारिलस्य, यथोक्तं तेनैव— न हि तत्क्षणमप्यास्ते जायते वाऽप्रमात्मकम्। येनार्थग्रहणे पश्चाद्व्याप्रियेतेन्द्रियादिवत्॥ इति। एकत्वाच्च बुद्धेः प्रमाणषटाक्भ्युपगमविरोधश्च। तथा प्रत्यक्षविरोधोऽपि, निरन्तरमध्यारोपितानेकविधार्थचिन्तायामुदयव्ययानुषङ्गिणीनां बुद्धीनामतिविस्पष्टमनुभूयमानत्वात्॥ २४१॥ § 854

कुमारिलस्तु सर्वं विरोधराशिमपश्यन्नाह—बुद्धीनामित्यादि। § 855

बुद्धीनामपि चैतन्यस्वाभाव्यात्पुरुषस्य च।
नित्यत्वमेकताचेष्टा भेदश्चेद्विषयाश्रयः॥ २४२॥ § 857

099/k

बुद्धीनां पुरुषस्य च नित्यत्वमेकता चेष्टा, कस्मात् ? चैतन्यस्वाभाव्यात्—बुद्धिलक्षणचैतन्यस्वाभाव्यात्पुरुषस्यास्मन्मतेनेत्यर्थः। कथं तर्हि रूपबुद्धी रसबुद्धिरित्यादिभेदः प्रतीयत इत्याह—भेदश्चेद्विषयाश्रय इति। चेच्छब्दः परमताभ्युपगमे। यद्येवं कल्प्यत इत्यर्थः॥ २४२॥ § 858

स्यादेतद्यदि नित्यैका बुद्धिस्तदा किमिति क्रमेण रूपादीन्प्रतिपद्यते। यावता सकृदेव प्रतीयाद्विशेषाभावादित्याह—स्वरूपेणेत्यादि। § 859

स्वरूपेण तथा वह्निर्नित्यं दहनधर्मकः।
उपनीतं दहत्यर्थं दाह्यं नान्यन्न चान्यदा॥
२४३॥ § 861

यथा किल वह्निर्नित्यं दहनात्मकोऽपि सन्न सर्वदा सर्वं दहति, किं तर्हि ? उपनीतम्—ढौकितमेव दहति। तत्रापि यदेव दाह्यं दग्धुं शक्यं तदेव दहति नाभ्रादिकमित्यतो दाह्यमित्याह॥ २४३॥ § 862

यथा वेत्यादिना दृष्टान्तान्तरमाह। § 863

यथा वा दर्पणः स्वच्छो यथा वा स्फटिकोपलः।
यदेवाऽऽधीयते तत्र तच्छायां प्रतिपद्यते॥
२४४॥ § 865

तथैव नित्यचैतन्याः पुमांसो देहवृत्तयः।
गृह्णन्ति करणानीतान् रूपादीन्धीरसौ च नः॥
२४५॥ § 867

मलिनस्य च्छायाप्रतिपत्त्यभावात्स्वच्छ इत्युक्तम्। आधीयत इति। ढौक्यत इत्यर्थः। तथैवेति दार्ष्टान्तिकोपदर्शनम्। यद्यपि पुमांसो व्यापिनस्तथाऽप्यदृष्टवशाद्देह एव वर्त्तमानाश्चक्षुरादिकरणोपनीतान्विषयान् गृह्णन्ति, नान्यत्र। यत्त्वेतन्नित्यं चैतन्यमसावस्माकं धीः—बुद्धिः, न तु साङ्ख्यवत्तद्व्यतिरेकिणी बुद्धिः॥ २४४॥ २४५॥ § 868

यद्येवं कथमसौ धीर्भङ्गिनी प्रसिद्धेत्येतदाशङ्क्य तेनेत्यादिना सूचितमेव कारणमुपदर्शयन्बुद्धेर्भङ्गिनीत्वं समर्थयते। § 869

तेनोपनेतृसंरम्भभङ्गित्वाद्भङ्गिनी मतिः।
न नित्यं दाहको वह्निर्दाह्यासन्निधिना यथा॥
२४६॥ § 871

उपनेतारः रूपादीनां विषयाणां प्रापयितारश्चक्षुरादयः, तेषां संरम्भः—व्यापारः, तस्य भङ्गित्वात्—विनाशित्वात्, भङ्गिनी मतिर्लक्ष्यते। न त्वसौ स्वतो विनाशिनी। यदि तर्हि न स्वतो विनाशिनी, तदा सर्वमर्थमुपलभेतेति तदव-
100/k स्थमेव चोद्यमित्यत आह—न नित्यं दाहक इत्यादि। तथा न नित्यं बुद्धिः सर्वमर्थमुपलभते, सर्वदासर्वस्य विषयस्यासन्निधानादिति भावः॥ २४६॥ § 872

अथ नित्यत्वमस्याः कथमवगम्यत इत्याह—तत्रेत्यादि। § 873

तत्र बोधात्मकत्वेन प्रत्यभिज्ञायते मतिः।
घटहस्त्यादिबुद्धित्वं तद्भेदाल्लोकसंमतम्॥
२४७॥ § 875

तत्रेति वाक्योपन्यासे। बोधात्मकत्वेन—बुद्धिर्बुद्धिरिति, प्रत्यभिज्ञायमानत्वात्, शब्दवन्नित्या बुद्धिः। यद्येवमियं घटबुद्धिरियं पटबुद्धिरिति कथमिदं बुद्धीनां वैलक्षण्यं लोके प्रतिपत्तृभिरुपगतमित्याह—घटेत्यादि। तद्भेदादिति। घटहस्त्यादिभेदात्॥ २४७॥ § 876

सैवेत्यादिना, एतदेव स्पष्टयति। § 877

सैवेति नोच्यते बुद्धिरर्थभेदानुसारिभिः।
न चास्त्यप्रत्यभिज्ञानमर्थभेदेऽनुपाश्रिते॥
२४८॥ § 879

अर्थभेदानुसारिभिरिति। प्रतिपत्तृभिः। अनेनान्वयव्यतिरेकाभ्यां अर्थभेदकृत एव बुद्धेर्भेद इति दर्शयति। न चास्त्यप्रत्यभिज्ञानमिति। अस्त्येव प्रत्यभिज्ञानमित्यर्थः॥ २४८॥ § 880

नन्वित्यादिना प्रतिविधत्ते। § 881

ननु हस्त्यादिशून्यायां भूमावारोपकारिणः।
प्रत्यया ये प्रवर्त्तन्ते भेदस्तत्र किमाश्रयः॥
२४९॥ § 883

यदि ह्यर्थभेदकृत एव बुद्धेर्भेदस्तदा ये हस्त्यादिशून्यायां भुवि क्रमेण गजतुरगादीनवस्थितान्समारोपयन्तः प्रत्ययाः प्रवर्त्तन्ते तेषु भेदः किमाश्रयः प्रतीयेत। नैव कश्चिद्भेदव्यवस्थाश्रयोऽस्तीति यावत्। तथा हि—न स्वतो भेदोऽस्ति। सर्वबुद्धीनामेकत्वाभ्युपगमात्। नाप्युपधानभूतविषयनानात्वात्, तत्रोपधायकस्य कस्यचिदर्थस्याभावात्॥ २४९॥ § 884

स्यादेतत्—अर्थशून्यत्वमसिद्धम्, तथाचोक्तं कुमारिलेन—स्वप्नादिप्रत्यये बाह्यं सर्वथा नहि नेष्यते। सर्वत्रालम्बनं बाह्यं देशकालान्यथात्मकम्॥ इति तदेतदाशङ्कते—अन्यदेशादिभाविन्य इत्यादि। § 885

अन्यदेशादिभाविन्यो व्यक्तयश्चेन्निबन्धनम्।

३ भेदेऽनुपा] Correction: ; भेद उपा (sic !)भेदेऽनुपा

सर्वत्रालम्बनं यस्माद्देशकालान्यथात्मकम्॥
२५० ॥§ 887

101/k

निबन्धनमिति। बुद्धेर्भेदव्यवस्थानं प्रति कारणमित्यर्थः। देशकालावन्यथात्मकावन्यप्रकारौ यस्य तत्तथोक्तम्, देशकालाभ्यां वाऽन्यथाऽऽत्मा यस्येति विग्रहः॥ २५०॥ § 888

नन्वित्यादिना प्रतिविधत्ते। § 889

ननु तद्देशसम्बन्धो नैव तासां तथाऽस्ति तत्।
किमिति प्रतिभासन्ते तेन रूपेण तत्र च॥
२५१ ॥§ 891

यस्मिन्हि देशे येन क्रमेण ताः समारोपिता व्यक्तयस्तदा प्रतिभासन्ते तेन देशेन संबन्धो नैव तासां देशान्तरकालान्तरगतानां तथा तेन क्रमेणास्ति, तत्किमिति तेन स्वेच्छासमारोपितरूपेण प्रतिभासन्ते। न ह्यन्येन रूपेणान्यस्य प्रतिभासनं युक्तमतिप्रसङ्गात्। एवं हि सर्वमेव ज्ञानं सर्वविषयं प्रसज्येत। ततश्च प्रतिनियतार्थव्यवस्थोच्छेद एव स्यात्॥ २५१॥ § 892

भवन्मते हि नाकारो बुद्धेर्बाह्यस्तु वर्ण्यते।
न विवक्षितदेशे च गजयष्ट्यादयः स्थिताः॥
२५२ ॥§ 894

किं च भवतो मीमांसकस्य मते यो भासमानः स आकारो न बुद्धेः, किन्त्वसौ बाह्यार्थस्वभावो वर्ण्यते। आकारवान्बाह्योऽर्थो निराकारा बुद्धिरिति वचनात्। यदि नामैवंभूतं ततः किमित्याह—न विवक्षितेत्यादि। विवक्षितो देशो यत्र तत्समारोपः कृतः। ततश्च यद्देशकालसंबद्धास्ते गजादयस्तद्देशसंबन्धित्वेनैव प्रतिभासेरन्।स्वविरहिणि तु देशान्तरे कालान्तरे च किमिति प्रतिभासन्ते। तस्मान्निरालम्बना एवैते प्रत्ययाः परमार्थतोऽसङ्कीर्णस्वभावाश्चलात्मानश्च, कादाचित्कत्वादिति सिद्धम्। तत्स्वभावस्य च पुंसोऽनित्यत्वानेकत्वे च सिद्धे। स्यान्मतम्—प्रत्ययस्तस्य पुरुषस्य धर्मः, तेन तस्य भेदेऽपि न पुंसो भेदो धर्मित्वात्तस्येति। तदयुक्तम्। प्रत्ययश्चैतन्यंबुद्धिर्ज्ञानमित्यनर्थान्तरत्वात्। न हि नामभेदमात्रेण वस्तूनां स्वभावो भिद्यते। किं च नामभेदेऽपि तेषां प्रत्ययानां चैतन्यात्मकमेकमनुगामिरूपमिष्टमेव। तस्य च चैतन्यस्याभेदे प्रत्ययानामपि तत्स्वभावानामविभाग एव। अन्यथा हि विरुद्धधर्माध्यासादैकान्तिको भेद एव स्यात्। एतेनैव निरालम्बनप्रत्ययप्रतिपादनेनाप्रत्यक्षत्वं बुद्धेः प्रत्युक्तम्। तथा हि—स परिस्फुरन्नाकारो

न बाह्यो गजादिरिति साधितम्, ततश्च तं तथा परिस्फुरन्तमाकारमात्मभूतमेव प्रतिपद्यमाना बुद्धयः स्वयंप्रकाशरूपत्वात् स्वसंविद्रूपाः सिद्ध्यन्ति॥ २५२॥ § 895

102/k

यच्चोक्तम्—स्वरूपेण यथा वह्निरित्यादि, तद्दूषणार्थमत्रैवोपचयन्नाह—सर्वार्थेत्यादि। § 896

सर्वार्थबोधरूपा च यदि बुद्धिः सदा स्थिता।
सर्वदा सर्वसंवित्तिस्तत्किमर्थं न विद्यते॥
२५३ ॥§ 898

यदि सर्वार्थबोधरूपा सदा बुद्धिरवस्थिता तदा सर्वदा सर्वार्थवेदनप्रसङ्गः॥ २५३॥ § 899

कथमित्याह—शब्दोपधानेत्यादि। § 900

शब्दोपधाना या बुद्धी रसरूपादिगोचरा।
सैव हीति न चेद्भेदास्त्वया चैवोपपादिताः॥
२५४ ॥§ 902

तथा हि—या शब्दोपधाना—शब्दविषया, बुद्धिः, सैव रसरूपादिविषया, नान्या,ततश्चैकार्थानुभववेलायामशेषार्थानुभवप्रसङ्गः, तदुपलम्भात्मिकाया बुद्धेः सर्वदा व्यवस्थितत्वात्। यथोक्तम्— एकयाऽनेकविज्ञाने बुध्येत सकृदेव तत्। अविशेषात्क्रमेणापि माभूत्तदविशेषतः॥ इति। न चेदिति। यदि या शब्दोपधाना बुद्धिः सैव रसादिगोचरा नाङ्गीक्रियते, एवं सति भेदो बुद्धीनां भवता स्ववाचैवोपपादितः स्यात्॥ २५४॥ § 903

यश्चायं वह्निदृष्टान्तः सोऽप्यसिद्ध इति दर्शयन्नाह—समस्तेत्यादि। § 904

समस्तदाह्यरूपाणां न नित्यं दहनात्मकः।
कृशानुरपि निःशेषमन्यथा भस्मसाद्भवेत्॥
२५५ ॥§ 906

न ह्यशेषदाह्यदहनस्वभावो दहनो नित्यमवस्थितोऽन्यथा सकलमेव दाह्यं भस्मसाद्भवेत्, दहनज्वालानुषक्तदाह्यवत्सदासन्निहितस्वदाहकत्वात्। न केवलं बुद्धिः सर्वार्थबोधस्वभावा न भवतीत्यपिशब्देन दर्शयति॥ २५५॥ § 907

यद्येवं नित्यदहनात्मकः कृशानुर्न भवति, कथं तर्ह्युपनीतमप्यर्थं दहेदित्याह—दाह्यार्थसन्निधावित्यादि। § 908

दाह्यार्थसन्निधावेव तस्य तद्दाहकात्मता।
युक्ता सर्वार्थदाहो हि सकृदेवं न सज्यते॥
२५६॥§ 910

एवमिति। समनन्तरोदितार्थाभ्युपगमे सति, सर्वार्थदाहो युगपन्न सज्यते—न प्रसज्यत इत्यर्थः ॥ १५६ ॥ यच्चोक्तम्—यथा वा दर्पण इत्यादि। तदपि दर्पणादेर्नित्यैकरूपत्वे सति न युज्यत इति दर्शयन्नाह- § 911
103/k

नीलोत्पलादिसंबन्धादित्यादि। § 912

नीलोत्पलादिसम्बन्धाद्दर्पणस्फटिकादयः।
तच्छायाविभ्रमोत्पादहेतवः क्षणभङ्गिनः॥ २५७॥§ 914

सोपधानेतरावस्थ एक एवेति सर्वदा।
तच्छायस्तद्वियुक्तो वा स दृश्येतान्यथा पुनः॥
२५८॥§ 916

स्फटिकदर्पणादिः प्रतिक्षणध्वंसी सन् नीलोत्पलादिसंपर्काद्विपर्यस्तज्ञानोत्पत्तावाधिपत्यं प्रतिपद्यते। अन्यथा—यद्यक्षणिकः सन् छायां प्रतिपद्येत, तदा य एव सोपधानावस्थः स एवानुपधानावस्थितिरिति कृत्वा, नीलाद्युपधानवियुक्तोऽपि नीलादिच्छायः समुपलभ्येत, अपरित्यक्तपूर्वरूपत्वात्। यद्वोपधानावस्थायामपि नीलाद्याकारवियुक्तो दृश्येत, पूर्वरूपाविशेषादिति। एतेन—अक्षणिकपक्षे सामान्येन सर्वेषामेव स्फटिकदर्पणादीनां छायाप्रतिपत्तिरपास्ता॥ २५७॥ २५८॥ § 917

संप्रति क्षणिकाक्षणिकपक्षयोश्छायाप्रतिपत्तिं प्रत्येकं निराकरोति—स्थिरत्वादित्यादि। § 918

स्थिरत्वान्निर्विभागत्वान्मूर्त्तानामसहस्थितेः।

६ इत्यर्थः ॥ १५६ ॥] Correction : ; इत्यर्थः। (sic !)इत्यर्थः ॥ १५६ ॥

७ न्नाह-] Correction : ; न्नाह॥ १५६॥ (sic !)न्नाह-

बिभर्त्ति दर्पणतलं नैव च्छायां कदाचन॥
२५९ ॥§ 920

स्थिरत्वात्—अक्षणिकत्वात्, दर्पणतलं पूर्वच्छायां बिभर्त्तीति संबन्धः। क्षणिकत्वेऽपि निर्विभागत्वान्न बिभर्त्तीति संबन्धनीयम्। तथा हि—कूपान्तर्गतोदकवद्दर्पणतले प्रतिबिम्बकमन्तर्गतमुपलभ्यते, न च दर्पणतलस्य विभागः—रन्ध्रमस्ति,निबिडतरावयवसन्निवेशात्, तस्माद्भ्रान्तिरियम्। अथवा—निर्विभागत्वं पूर्वोत्तरावस्थायामनानात्वम्। अत्र कारणं स्थिरत्वादिति। तेनायमर्थो भवति। स्थिरत्वेन निर्विभागत्वात्—पूर्वोत्तरावस्थारहितत्वादित्यर्थः। किं च—मूर्त्तानामसहस्थितेः, नैव दर्पणतलं छायां बिभर्त्तीति संबध्यते। तथा हि—दर्पणतले तद्देशान्येव पर्वतादिप्रतिबिम्बान्युपलभ्यन्ते, न च मूर्त्ताः पदार्थाः कदाचिदेकदेशतामापद्यन्ते, ऐकात्म्यप्रसङ्गात्। एतच्च क्षणिकाक्षणिकत्वे साधारणं दूषणम्॥ २५९॥ § 921

स्फटिकस्यापि भावतो नोपधानच्छायाप्रतिपत्तिरस्तीति दर्शयति—पार्श्वेत्यादि। § 922

पार्श्वद्वितयसंस्थाश्च सुशुक्लं स्फटिकोपलम्।
समीक्ष्यन्ते तदेषोऽपि न च्छायां प्रतिपन्नवान्॥
२६० ॥§ 924

104/k

तथाहि—यदैवाग्रतः स्थितः प्रतिपत्ता जपाकुसुमसंपर्काद्रक्तं स्फटिकमुपलभते, तदैव ये पार्श्वद्वितयावस्थितास्ते सकलमेव स्फटिकोपलं सुशुक्लमुपलभन्ते, न भागशः। ततश्च यदि छायाप्रतिपत्तिस्तस्याभविष्यत्तदा पुरोऽवस्थितपुंस इव पार्श्वद्वितयावस्थितयोरपि प्रतिपत्रो रक्तावभासा प्रतिपत्तिरभविष्यत्। अयं च क्षणिकाक्षणिकपक्षयोरपि साधारणो दोषः॥ २६०॥ § 925

भेदः प्रत्युपधानं चेत्यादिना त्वक्षणिकत्वपक्ष एव दोषमाह। § 926

भेदः प्रत्युपधानं च स्फटिकादेः प्रसज्यते।
तच्छायाप्रतिपत्तिश्चेत्तस्य विद्येत तात्विकी॥
२६१ ॥§ 928

यदि हि परमार्थतः स्फटिकादेरुपधानोपरागप्रतिपत्तिर्भवेत्तदा यथाक्रमभाविनीनामुपधानमुपधानं छायानां स्वभावभेदान्नैकात्म्यम्। तद्वत्तदात्मनः स्फटिकादेरप्युपधानमुपधानं प्रति—प्रत्युपधानं—भेदः प्रसज्येत। यदि पुनर्भ्रान्तिरियमित्यङ्गीक्रियते तदाऽयमदोष इति ज्ञापनार्थं तात्विकीत्याह॥ २६१॥ § 929

....262ab तस्माद्भ्रान्तिरियं तेषु विचित्राचिन्त्यशक्तिषु।§ 930

यतश्चैवं पक्षद्वयेऽपि छायाप्रतिपत्तिर्न युज्यते तस्माद्भ्रान्तिरियमिति स्थितम्। यद्येवंकस्मात्स्फटिकादावेव सा भ्रान्तिर्भवति न कुड्यादावित्याह— विचित्राचिन्त्यशक्तिष्विति। विचित्राः—नानाप्रकाराः, अचिन्त्याः शक्तयो येषां ते तथोक्ताः। न हि भावानां शक्तिप्रतिनियमः पर्यनुयोगमर्हति, स्वहेतुपरम्पराकृतत्वात्तस्य। भवतामपि चात्रांशे नास्ति विवादः। यथोक्तम्— अग्निर्दहति नाकाशं कोऽत्र पर्यनुयुज्यताम्। इति। § 931

यद्येवं बुद्धावपि तर्हि विषयच्छायाप्रतिपत्तिर्भ्रान्तिरेवास्तु माभूच्छायाप्रतिपत्तिरित्याह— § 932

....262cd न बुद्धौ भ्रान्तिभावोऽपि युक्तो भेदवियोगतः॥ २६२॥§ 933

न बुद्धौ भ्रान्तिसद्भावो युक्तः। न केवलं छायाप्रतिपत्तिर्न युक्तेत्यपिशब्दः। कस्मात् ? भेदवियोगतः—भेदाभावात्। स्फटिकादिषु हि भ्रान्तिर्युक्ता, तेभ्यो भिन्नाया बुद्धेर्भ्रान्तायाः संभवात्, नत्वेवं बुद्धावपरा भ्रान्तिरूपा बुद्धिरस्ति, यस्मादेकैव बुद्धिरिष्टा। न च स्वयमेव विभ्रमरूपा जायते धीरिति युक्तं वक्तुम्, बुद्धेर्नित्यत्वाभ्युपगमात्॥ २६२॥ § 934

105/k

यत्पुनरेकत्वनित्यत्वसाधनार्थं तत्र बोधात्मकत्वेन प्रत्यभिज्ञायते मतिरित्युक्तं तत्राह—अबोधरूपभेदं त्वित्यादि। § 935

अबोधरूपभेदं तु समानं सर्वबुद्धिषु।
आरोप्य प्रत्यभिज्ञानं नानात्वेऽपि प्रवर्त्तते॥ २६३॥§ 937

अनैकान्तिकमेतत्प्रत्यभिज्ञानम्, यस्मादबोधरूपेभ्यो घटादिभ्यो भेदम्— व्यावृत्तिं समारोप्य प्रत्यभिज्ञानं सर्वबुद्धिषु नानात्वे सत्यपि प्रवर्त्तमानमविरुद्धमेव। अवश्यं चैतद्विज्ञेयम्—यन्नानात्व एव सति विजातीयव्यावृत्तिनिबन्धनकृतमेतत्प्रत्यभिज्ञानम्, न पुनरनानात्व एवेति। तथाहि—निरालम्बनासु समारोपबुद्धिष्वर्थभेदेऽनुपाश्रितेऽप्यप्रत्यभिज्ञानमस्त्येव, न हि तत्रैवं भवति, यैव गजबुद्धिरासीत्सैव तुरङ्गस्यन्दनबुद्धिरिति। प्रसाधितं चानालम्बनत्वमासां बुद्धीनामिति न पुनरुच्यते। तेन यदुक्तम्— न चास्त्यप्रत्यभिज्ञानमर्थभेदेऽनुपाश्रिते इति, तदसिद्धमिति ग्रहीतव्यम्॥ २६३॥ § 938

किं च—यदि नित्यैकरूप आत्मेष्यते भवद्भिस्तदा सुखाद्यवस्थाभेदो न प्राप्नोति। अथ सुखाद्यवस्थाभेदोऽभ्युपगम्यते, न तर्हि नित्यैकरूपत्व-मस्याभ्युपेतव्यम्। न ह्येकस्य भेदाभेदौ परस्परविरुद्धौ स्वभावौ युक्ता-विति। एतच्चोद्यपरिहारार्थं यत्कुमारिलेनोक्तं तत्तावद्दूषयितुमुपक्षिपन्नाह—,अवस्थाभेदभेदेनेत्यादि। § 939

अवस्थाभेदभेदेन शून्येऽप्येकान्ततः स्थिते।
स्थिरात्मनि.... ....र्यत्परैः परिकल्प्यते॥
२६४॥§ 941

अवस्थानाम्—सुखादीनाम्, भेदः—नानात्वम्, तेन भेदः—पुरुषस्य नानात्वमेव, तेन शून्य इति। अवस्थानानात्वेऽप्येकस्वभाव एवेत्यर्थः। अत्र कारणमाह—स्थिरात्मनीति। स्थिरः—नित्यः, आत्मा—स्वभावो यस्यात्मनः, स तथोक्तः। यदि वा—अवस्थाभेदाः—अवस्थाविशेषाः सुखादयः, तेभ्य एकान्तेन भेदः— पृथग्भावः, तेन शून्यस्तदव्यतिरिक्तोऽपीत्यर्थः॥ २६४॥
§ 942

किं तद्यत्परिकल्प्यत इत्याह—सुखेत्यादि। § 943

सुखदुःखाद्यवस्थाश्च गच्छन्नपि नरो मम।
चैतन्यद्रव्यसत्त्वादिरूपं नैव विमुञ्चति॥ २६५॥§ 945

गच्छन्नपीति। प्रतिपद्यमानोऽपि। नर इति। आत्मा। सत्त्वादीत्यादिश-ब्देनज्ञेयत्वप्रमेयत्वकर्तृत्वभोक्तृत्वादिसामान्यधर्मपरिग्रहः॥ २६५॥ § 946
106/k

नापि विशेषधर्मस्याप्यत्यन्तसमुच्छेद इति दर्शयन्नाह—न चेत्यादि।
§ 947

न चावस्थान्तरोत्पादे पूर्वाऽत्यन्तं विनश्यति।
उत्तरानुगुणार्थं तु सामान्यात्मनि लीयते॥
२६६॥§ 949

पूर्वेति। सुखाद्यवस्था। यद्येवं सुखाद्यवस्थायामपि दुःखावस्था किं न संवेद्यतइत्याह—उत्तरानुगुणार्थमित्यादि। स्वरूपेणैव हि स्थितायां सुखाव-स्थायां नोत्तरादुःखावस्था भवतीत्यतः सा लीयमाना सामान्यात्मनि सर्वाव-

६ शून्ये] Correction: ; शून्यो (sic !)शून्ये

स्थानुगामिनि चैतन्यद्रव्यत्वादिलक्षणे उत्तरदुःखावस्थोत्पादानुगुणा भवतीति तदर्थं सा तत्र लीयते॥ २६६॥ § 950

यद्येवमवस्थान्तरवत्सामान्यात्मन्यपि लयोऽवस्थानामयुक्तो विरोधादित्याशङ्क्याह—स्वरूपेण हीत्यादि। § 951

स्वरूपेण ह्यवस्थानामन्योन्यस्य विरोधिता।
अविरुद्धस्तु सर्वासु सामान्यात्मा प्रतीयते॥
२६७ ॥§ 953

स्वेन सुखादिरूपेणावस्थानां परस्परं विरोधादन्योन्यं लयो न युक्तः, अवस्थान्तरे तु सामान्यात्मनि लये को विरोधो येनासौ तत्र न भवेत्, तथा ह्यसौ सामान्यात्मा सर्वावस्थास्वविरुद्धोऽनुयायी दृश्यते। सर्वस्यामवस्थायां चैतन्यादीनामुपलम्भात्॥ २६७॥ § 954

तत्रेत्यादिना प्रतिविधत्ते। § 955

तत्र नो चेदवस्थानामेकान्तेन विभिन्नता।
पुरुषात्तद्व्ययोत्पादे स्यातामस्यापि तौ तथा॥
२६८ ॥§ 957

यदि हि पुरुषादवस्थानामेकान्तेन भेदो नेष्यते, तदा तद्व्ययोत्पादे—तासामवस्थानां व्ययोत्पादे सति, अस्यापि पुंसस्तौ व्ययोत्पादौ स्याताम्। एकान्तेनेति वचनंकथंचिदप्यव्यतिरेकेऽवस्थावदुदयव्ययप्रसङ्गो दुर्वार इति ज्ञापनार्थम्। प्रयोगः—यो यदव्यतिरिक्तस्तस्य तदुत्पादविनाशे सत्युत्पादविनाशौ भवतः, यथा तेषामेव सुखादीनां स्वरूपस्य। सुखाद्यव्यतिरिक्तस्वभावश्च पुरुष इति स्वभावहेतुः॥ २६८॥ § 958

न चायमनैकान्तिको हेतुरित्यादर्शयन्नाह—विरुद्धेत्यादि। § 959

विरुद्धधर्मसङ्गे तु भेद एकान्तिको भवेत्।
पुंसामिव स्वभावेन प्रतिस्वं नियतेन ते॥
२६९ ॥§ 961

यदि ह्यवस्थानामेवोत्पादव्ययौ न पुरुषस्येत्येवमुत्पादानुत्पादलक्षणो
107/k विरुद्धधर्मस ङ्गोऽभ्युपगम्यते, तदा भेदप्रसङ्गः, यथा पुंसां बहूनां परस्परं
प्रतिस्वं नियतेन-प्रत्यात्मनियतेन स्वभावेन परस्परतो भेदः। एतावन्मात्रनिबन्धनत्वाद्भेदव्यवहारस्येति भावः। पुंसामपि वस्त्वादिरूपेण परस्परतो भेदो

नास्तीत्यतः साध्यविकलतानिवृत्त्यर्थं प्रतिस्वं नियतेनेत्युक्तम्। प्रत्यात्मनियतं रूपमेषामेकान्तेन भिन्नम्, अन्यथाऽनुभवस्मरणादीनां प्रतिनियमाभावाद्यव-स्थासङ्करः स्यात्। प्रयोगः—यद्यदेकयोगक्षेमं न भवति न तत्तेन सहाभेदि, यथा पुमांसः परस्परं प्रत्यात्मनियतेन रूपेण भिन्नयोगक्षेमाः। नैकयोगक्षेमाश्च सुखाद्यवस्थाः पुंसा सहेति व्यापकानुपलब्धेः॥ २६९॥ § 962

यच्चोक्तम्—न चायमवस्थान्तरोत्पादे पूर्वाऽत्यन्तं विनश्यतीति तत्राह—स्वरूपेणैवेत्यादि। § 963

स्वरूपेणैव लीयन्ते यद्यवस्थाश्च पुंसि वः।
दुःखाद्यप्यनुभूयेत तत्सुखादिसमुद्भवे॥ २७०॥ § 965

अवस्था हि सामान्यात्मनि लीयमानाः स्वरूपेणैव वा लीयेरन्, पर-रूपेण वा। यद्याद्यः पक्षः, तदा सुखादिसमुद्भवेऽपि—सुखाद्यवस्थानुभवेऽपि, तद्दुःखमप्यनुभूयेत उपलब्धिलक्षणप्राप्तत्वात्॥ २७०॥ § 966

अथ पररूपेणेति पक्षः, तत्राह—न चेत्यादि। § 967

न चान्यरूपसङ्क्रान्तावन्यसङ्क्रान्ति(सम्भवः)।
तादात्म्येन च सङ्क्रान्तिरित्यात्मोदयवान्भवेत्॥
२७१॥ § 969

किं च पुंसि सुखादीनां संक्रान्तिस्तादात्म्येनैवेष्टा। ततश्च दुःखादिवत्तद-व्यतिरेकादात्मा—पुरुष उदयवान्—उत्पत्तिमान् भवेत्॥ २७१॥ § 970

यच्चोक्तम्— न च कर्तृत्वभोक्तृत्वे पुंसोऽवस्थां समाश्रिते इति तत्राह—यदीत्यादि। § 971

यदि कर्तृत्वभोक्तृत्वे नैवावस्थां समाश्रिते।
तदवस्थावतस्तत्वान्न कर्तृत्वादिसंभवः॥ २७२॥ § 973

यदि हि पुमांसमेवाश्रितं कर्तृत्वादि स्यात्तदत्यक्तपूर्वरूपस्यात्मनो न संभ-वेत्।प्रयोगः—योऽपरित्यक्ताकर्त्रभोक्रवस्थः स न करोति न चापि भुङ्क्ते, यथाऽऽकाशम्, अपरित्यक्ताकर्त्रभोक्रवस्थश्च सर्वदा पुरुष इति व्यापक-विरुद्धोपलब्धिः॥ २७२॥ § 974

108/k

बुद्धिजन्मनि पुंसश्च विकृतिर्यद्यनित्यता। अथाविकृतिरात्माख्यः प्र-मातेति नयुज्यते इति यदेतदाचार्यदिङ्नागपादैरुक्तं तत्र कुमारिलेनोक्तम्—

नानित्यशब्दवाच्यत्वमात्मनो विनिवार्यते। विक्रियामात्रवाचित्वे न ह्युच्छेदोऽस्य तावता॥ इति तदत्र निगमनव्याजेन दोषमाह—तदित्यादि। § 975

तन्नित्यशब्दवाच्यत्वं नात्मनो विनिवार्यते।
स्वरूपविक्रियावत्त्वाद्व्युच्छेदस्तस्य विद्यते॥
२७३॥§ 977

तत्—तस्मात्, नित्यशब्दवाच्यत्वं न वार्यतेऽस्माभिः, स्वोपादानपुरस्सरस्यप्रतिक्षणध्वंसिनश्चैतन्यस्याऽऽसंसारमविच्छेदात्। किन्तु स्वरूपस्य—स्वभावस्य, विक्रियावत्वात्—नियमेन पूर्वस्वभावपरित्यागात्, स्वभावान्तरप्रादुर्भावश्चेति, व्युच्छेदः विनाशोऽस्य स्फुटतरमेवाऽऽसज्यते॥ २७३॥ § 978

यश्चापि सर्पादिदृष्टान्त उपात्तः स नित्यैकरूपो न सिध्यतीति दर्शयन्नाह—सर्पोऽपीत्यादि। § 979

सर्पोऽपि क्षणभङ्गित्वात्कौटिल्यादीन्प्रपद्यते।
स्थिररूपे तु पुंसीव नावस्थान्तरसङ्गतिः॥
२७४॥§ 981

यथैव हि पुंसि स्थिरैकरूपत्वादवस्थान्तरसंभवो न युक्तस्तथा सर्पस्यापि। यदाऽनुक्षणभङ्गिताऽस्य भवेत्तदा युक्तोऽवस्थान्तरसंभवः, स्वभावान्तरोदयलक्षणत्वादवस्थान्तरप्रादुर्भावस्य॥ २७४॥ § 982

यच्चोक्तमहं विद्मीत्यहम्बुद्धिर्ज्ञातारं प्रतिपद्यत इति तदसिद्धमिति दर्शयन्नाह—निरालम्बन एवायमित्यादि। § 983

निरालम्बन एवायमहङ्कारः प्रवर्त्तते।
अनादिसत्त्वदृग्बीजप्रभावात्क्वचिदेव हि॥
२७५॥§ 985

न ह्यस्याहङ्कारस्य परमार्थतः किंचिदालम्बनमस्ति येनास्य विषयो ज्ञाता स्यात्। यद्येवं किमस्योत्पत्तेर्निबन्धनमित्याह—अनादीत्यादि। सत्त्वदृक्—सत्कायदृष्टिः, तस्या बीजम्—वासनाशक्तिरित्यर्थः। अनादि च तत्सत्त्वदृग्बीजं चेति विग्रहः। तस्य प्रभावः—आधिपत्यम्। क्वचिदेवेति। अध्यात्मनियत एव षडायतने॥ २७५॥ § 986

अथ सर्वत्र कस्मान्न प्रवर्त्तत इत्याह—केचिदेव हीत्यादि। § 987

---

१ त्वे न ह्यु] Correction: ; त्वात्तद्यु (sic!)त्वे न ह्यु

केचिदेव हि संस्कारास्तद्रूपाध्यवसायिनि।
अवेत्यं (आधिपत्यं?) प्रपद्यन्ते तन्न सर्वत्र वर्त्तते॥
२७६॥ § 989

109/k

तद्रूपाध्यवसायिनीति। पूर्वोत्तरकालानुयायिज्ञातृरूपाध्यवसायिन्यहङ्कारे। न सर्वत्रेति। सन्तानान्तरे घटादौ॥ २७६॥ § 990

तुल्यः पर्यनुयोगोऽयमन्यथा पुरुषेऽपि वः।
तच्छक्तिभेदसद्भावात्सर्वमेव निराकुलम्॥
२७७॥ § 992

किं चात्मालम्बनत्वेऽप्यहङ्कारस्य, तुल्यः पर्यनुयोगः किमित्यात्मान्तरेऽपि न प्रवर्त्तत इति। शक्तिप्रतिनियमान्नैवमिति चेत्, यद्येवमस्माकमपि शक्तिनियमात्क्वचिदेवाध्यात्मिके वस्तुनि प्रवर्त्तते, न सर्वत्रेति व्यवस्थानं सर्वमेव निराकुलम्॥ २७७॥ § 993

स्यादेतत्—भवत्वे(त)द्व्यवस्थानम्, किन्तु निरालम्बनत्वमस्य कथं सिद्धमित्याह—नित्येत्यादि। § 994

नित्यालम्बनपक्षे तु सर्वाहङ्कृतयस्ततः।
सकृदेव प्रसूयेरन् शक्तहेतुव्यवस्थितेः॥ २७८॥ § 996

अनित्यालम्बनत्वेऽपि स्पष्टाभाः स्युस्ततः परे।
आलम्बनार्थसद्भावं व्यर्थं पर्यनुयुञ्जते॥ २७९॥ § 998

तथा ह्यस्यालम्बनं भवन्नित्यं वा भवेदनित्यं वा। यदि नित्यम्, तदा सर्वा अहङ्कृतयः—अहङ्कारा युगपद्भवेयुरविकलकारणत्वात्। न ह्यकारणमालम्बनं युक्तमतिप्रसङ्गात्। न चापि शक्तस्य कारणस्य सहकारिकारणापेक्षा भवतीत्यसकृच्चर्वितमेतत्।न चैक एवायमहङ्कार इति शक्यं वक्तुम्, कादाचित्कतयाऽनेकत्वसिद्धेः। तथा हि—गाढस्वापमदमूर्छासु नाहङ्कारः संवेद्यते, पुनरन्यदा च संवेद्यत इति सिद्धमस्य सर्वदाऽनुपलम्भात्कादाचित्कत्वम्। कादाचित्कत्वाच्चानेकत्वमपि सिद्धमिति सर्वाअहङ्कृतयस्तद्भावमात्रभाविन्यो युगपत्प्रसूयेरन्। अथानित्यमालम्बनमिति पक्षः, तदाचक्षुरादिविज्ञानवत्स्फुटतरप्रतिभासाः सर्वा अहंकृतयः प्रसज्येरन्।

साक्षाद्वस्तुस्वलक्षणग्राहित्वात्। ततः—तस्मात्, परे तीर्थिकाः कुमारिलप्रभृतयो व्यर्थमेवास्यालम्बनं पर्यनुयुञ्जते। तस्याज्ञानलक्षणः को नु विषयः परिकल्पित इत्यादि ॥ २७८॥ २७९॥ § 999

तत्र यदुक्तमनालम्बन एवायमहङ्कारोऽनादिसत्कायदृष्टिवासनाबलाद्भ्रान्तः प्रवर्त्तत इति। अत्र कुमारिलेनोक्तं दूषणमाशङ्कते—ज्ञातरीत्यादि। § 1000

ज्ञातरि प्रत्यभिज्ञानं वासना कर्तुमर्हति।
नातस्मिन्स इति प्रज्ञां न ह्यसौ भ्रान्तिकारणम्॥
२८० ॥§ 1002

110/k

....281ab तन्नाहंप्रत्ययो भ्रान्तिरिष्टश्चेद्बाधवर्जनात्।§ 1003

वासना हि ज्ञातृविषयां प्रत्यभिज्ञां कर्तुमर्हति। न पुनरतस्मिन्—अज्ञातरि, सः—ज्ञाता, इति प्रज्ञाम्—ज्ञानं वासना कर्तुमर्हतीति संबन्धः। कस्मात् ? न ह्यसौ भ्रान्तिकारणम्, अपि तु यथाऽनुभूतार्थविषयमेवासौ ज्ञानं जनयति न भ्रान्तमित्यर्थः। तस्मादयमहङ्कारो वासनात उत्पद्यमानत्वात् बाधकप्रमाणाभावाच्च न भ्रान्तो युक्त इति। चेच्छब्दो भिन्नक्रमो बाधवर्जनादित्यस्यानन्तरं द्रष्टव्यः॥ २८०॥ =॥ § 1004

नेत्यादिना प्रतिविधत्ते। § 1005

....281cd नानन्तरोक्तया युक्त्या तस्य बाधोपदर्शनात्॥
२८१ ॥§ 1006

अनन्तरोक्ता युक्तिर्नित्यालम्बनपक्षे त्वित्यादिः॥ २८१॥ § 1007

यच्चोक्तम्—न वासना भ्रान्तिकारणमिति तदनैकान्तिकमिति दर्शयन्नाह—ईश्वरादिष्वित्यादि। § 1008

ईश्वरादिषु भक्तानां तद्धेतुत्वादिविभ्रमाः।
वासनामात्रभावाच्च जायन्ते विविधाः कथम्॥
२८२ ॥§ 1010

निरालम्बनता चैवमहङ्कारे यदा स्थिता।
तन्नाहंप्रत्ययग्राह्ये ज्ञाता कश्चन विद्यते॥
२८३॥§ 1012

ततः सर्वप्रमाणेषु न दृष्टान्तोऽस्ति सिद्धिभाक्।
हेतवश्चाश्रयासिद्धा यथायोगमुदाहृताः॥ २८४॥
मीमांसपरिकल्पितात्मपरीक्षा।§ 1015

यदि हि वासना भ्रान्तिकारणं न भवेत्तदानीमीश्वरः सर्वोत्पत्तिमतां हेतुः सर्वज्ञो नित्यबुद्धिसमाश्रय इत्यादयो विभ्रमाः कथमिव वासनामात्रसंभवादुद्भवेयुः।तथा हि कुमारिलेनापीश्वरादिर्जगतः कर्त्ता प्रतिषिद्ध एव। वासनामात्रभावाच्चेति मात्रग्रहणं तथाभूतालम्बनार्थव्यवच्छेदार्थम्। तस्मादहङ्कारस्य निरालम्बनत्वान्न तद्ग्राह्यो ज्ञाता कश्चित्प्रसिद्धोऽस्तीति न तस्मादात्मा सिध्यतीति। यच्च व्यतीताहंकृतिग्राह्य इत्यादिनित्यसाधनमुक्तम्, तत्राह—तदित्यादि। कश्चनेति। नित्योऽनित्यो वा ज्ञाता दृष्टान्तधर्मी नास्तीत्यसिद्धो दृष्टान्तः। तथा हि—प्रथमद्वितीययोः प्रयोगयोर्द्धर्म्यसिद्धिर्दृष्टान्तदोषः, इदानींतनस्य ह्यस्तनस्य चाहंप्रत्ययगम्यस्य ज्ञातुः कस्यचिदभावात्। तृतीये तु प्रयोगे एकबुद्धिवदिति दृष्टान्तः साध्यसाधनविकलः। अभिम ताया एकबुद्धेरेकसन्तानसंबद्धज्ञात्रहंप्रत्ययत्वस्य एकविषयत्व- 111/k
स्य चासिद्धत्वात्। अतोधर्मद्वयासिद्धिमुखेनास्याप्यसिद्धत्वमुक्तम्। यथायोगमुदाहृता इति। उदाहृताः—पूर्वमुपन्यस्ता ये हेतवः, यथायोगम्—यथासंभवम्। आश्रयासिद्ध इति। तथाहि—प्रथमद्वितीययोः प्रयोगयोर्ये हेतवस्त आश्रयासिद्धाः, अहंप्रत्ययग्राह्यस्य कस्यचिदपि धर्मिणो ज्ञातुरसिद्धत्वात्। तृतीये तु प्रयोगे नाश्रयासिद्धिः। प्रत्ययानां धर्मिणां सिद्धत्वात्। किन्तु तेषामेकसन्तानसंबद्धज्ञातृविशेषणमसिद्धम्। निरालम्बनत्वस्य प्रसिद्धत्वात्। अतो यथायोगमित्युक्तम्॥ २८२॥ २८३॥ २८४॥ § 1016

इति मीमांसकपरिकल्पितात्मपरीक्षा।

०.८.३ कापिलकल्पितात्मपरीक्षा।

सांप्रतं सांख्यपरिकल्पितात्मनिराकरणार्थमाह—चैतन्यमित्यादि। § 1018

चैतन्यमन्ये मन्यन्ते भिन्नं बुद्धिस्वरूपतः।

आत्मनश्च निजं रूपं चैतन्यं कल्पयन्ति ते॥
२८५॥§ 1020

प्रधानेनोपनीतं च फलं भुङ्क्ते स केवलम्।
कर्तृत्वं नैव तस्यास्ति प्रकृतेरेव तन्मतम्॥
२८६॥§ 1022

अन्य इति। सांख्याः। ते हि बुद्धिव्यतिरिक्तं चैतन्यमात्मनो निजं रूपं कल्पयन्ति। यतो बुद्धिः प्रधानस्वभावा, चैतन्यं तु पुरुषस्यैव स्वरूपमिति तेषां समयः। स च पुरुषः शुभाशुभकर्मफलस्य प्रधानोपनीतस्य भोक्ता, न तु कर्मणां कर्त्ता, प्रकृतेरेवाशेषजगत्परिणतिरूपायाः कर्तृत्वस्येष्टत्वात्। अत्र च प्रमाणयन्ति—यत्संघातरूपं वस्तु तत्परार्थं दृष्टम्, तद्यथा शयनादि, संघातरूपाश्च चक्षुरादय इति स्वभावहेतुः।यश्चासौ परः स सामर्थ्यादात्मेति सिद्धम्। इति परस्य भावः॥ २८५॥॥ २८६॥ § 1023

तत्रापीत्यादिना प्रतिज्ञार्थं तावद्दूषयति। § 1024

तत्रापि रूपशब्दादिचेतसां वेद्यते कथम्।
सुव्यक्तं भेदवद्रूपमेका चेच्चेतनेष्यते॥ २८७॥§ 1026

तथा हि—चैतन्यं पुरुषस्य निजं रूपमिति ब्रुवता चैतन्यं नित्यैकरूपमित प्रतिज्ञातं भवति, नित्यैकरूपात्पुरुषात्तस्याव्यतिरिक्तत्वात्। एतच्च प्रत्यक्षविरुद्धम्, यतो रूपशब्दादिचेतसां सुव्यक्तम्—स्फुटतरमेव, स्वसंविदा, भेदवद्रूपम्—भिन्नस्वभावः, वेद्यते। तच्चैकत्वे सति चेतनाया नोपपद्यते॥ २८७॥ § 1027

112/k

अभ्युपगमविरोधं च दर्शयन्नाह—एकरूपेत्यादि। § 1028

एकरूपे च चैतन्ये सर्वकालमवस्थिते।
नानाविधार्थभोक्तृत्वं कथं नामोपपद्यते॥
२८८॥§ 1030

एकरूपश्चात्मा, अथ च नानाविधस्यार्थस्य भोक्तेति, परस्परविरुद्धम्। अभोक्त्क(?)वस्थानिर्विशिष्टत्वात्॥ २८८॥ § 1031

दिदृक्षादियोगादविरोध इति चेदाह—नेत्यादि। § 1032

न दिदृक्षादयो भिन्नास्तस्य भोगनिबन्धनम्।
भवन्ति हि तथा भावे पुमानुत्पत्तिमान्भवेत्॥
२८९॥§ 1034

यदि रूपादिषु दिदृक्षाशुश्रूषादयस्तस्य परस्परतो भिन्ना भोगनिबन्धनत्वेनोपकल्पितास्तेऽप्यस्यात्मनो न भवन्ति—न जायन्ते। यदि हि जायेरंस्तदा, तथा— भेदेन, भावे—जातौ सत्याम्, पुमानुत्पत्तिमान्भवेत्। दिदृक्षादिवत्तदव्यतिरेकात्॥ २८९॥ § 1035

एतदेव व्यक्तीकुर्वन्नाह—चैतन्यव्यतिरिक्तं हीत्यादि। § 1036

चैतन्यव्यतिरिक्तं हि न दिदृक्षादि विद्यते।
तस्योदयव्ययावेशे दुर्वारः पुरुषेऽप्यसौ॥
२९०॥§ 1038

व्यतिरेके हि तस्य त इति संबन्धानुपपत्तिः। उपकारस्य संबन्धनिबन्धनस्याभावात्। असाविति। उदयव्ययसमावेशः। प्रयोगः—यस्य सद्भावव्यवस्थानिबन्धनं नास्ति, नासौ प्रेक्षावता तद्भावेन व्यवस्थाप्यः, यथाऽऽकाशं मूर्त्तत्वेन। नास्ति च भोक्तृव्यवस्थानिबन्धनं पुरुषादिदृक्षादीति कारणानुपलब्धेः। न चायमसिद्धो हेतुरिति प्रतिपादितम्॥ २९०॥ § 1039

इतश्च कर्तृत्वाभावाद्भोक्तृत्वमपि तस्य न युक्तमिति दर्शयति—शुभाशुभं चेत्यादि। § 1040

शुभाशुभं च कर्मास्ति नैव चेदात्मना कृतम्।
तदेष भोगभेदोऽस्य कुतः समुपजायते॥
२९१॥§ 1042

न ह्यकृतस्य कर्मणः कश्चित्फलमुपभुङ्क्ते, अकृताभ्यागमादिदोषप्रसङ्गात्॥ २९१॥ § 1043

अत्र परस्योत्तरमाशङ्कते—अभिलाषानुरूपेणेत्यादि। § 1044

अभिलाषानुरूपेण प्रकृतिश्चेत्प्रयच्छति।
पङ्ग्वन्धवद्धि संबन्धस्तयोरेष व्यवस्थितः॥
२९२॥§ 1046

113/k

यद्यपि पुरुषः कर्मणां कर्त्ता न भवति, तथाऽपि प्रकृतिरस्य यथाऽभिलषितमर्थमुपनयति, तमसौ भुङ्क्ते इत्यदोषः। ननु प्रकृतिरचेतना सती कथं शुभादिकर्मणां कर्त्री भवति येनासौ यथाऽभिमतं कर्मफलं पुरुषस्य सम्पादयतीत्याह—पङ्ग्वन्धवद्धीत्यादि। यथा किलान्धस्य चक्षुष्मत्पुरुषसंबन्धादर्थेषु प्रवृत्तिर्भवति, तथा महदादिकं लिङ्गं चेतनपुरुषसंपर्काच्चेतनावदिव धर्मादिषु कार्येष्वध्यवसायं करोतीत्यदोषः। तथा चोक्तम्— पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः इति॥ २९२॥ § 1047

यद्येवमित्यादिना प्रतिविधत्ते। § 1048

यद्येवमिष्टवाञ्छायां सत्यामपि न सिध्यति।
किमिति प्रकृतिर्नैव किञ्चिदन्यदपेक्षते॥ २९३॥§ 1050

यदि हि प्रकृतिरकृतस्यापि कर्मणः फलमभिलषितमुपनयतीति स्यात्तदा सर्वदैवेष्टवाञ्छायां सर्वस्य पुंसोऽभिलषितोऽर्थः किमिति न सिध्येत्। स्यान्मतम्—तत्कारणस्य धर्मस्याभावान्न सिध्यतीति, आह—प्रकृतिर्नैवेत्यादि। प्रकृतेर्हि धर्मः कार्यम्, स च तदव्यतिरिक्तत्वात्सदैवास्तीति भवेदेवाभिमतं फलम्। तथा हि— एतदेव सर्वं यदुत प्रकृतिपुरुषौ, तौ च सदा सन्निहिताविति। अतो नित्यमेव फलं भवेत्। किं च यद्यभिलषितमर्थं प्रकृतिः प्रयच्छति तदाऽनिष्टं किमिति प्रयच्छेत्, न ह्यनिष्टं कश्चिदभिलषति॥ २९३॥
§ 1051

अपि च। यदि नाम प्रकृतिरस्यार्थमुपनयति, तथाऽपि भोक्तृत्वमस्यायुक्तमविकारित्वादिति दर्शयति—अर्थोपभोगकाले चेत्यादि। § 1052

अर्थोपभोगकाले च यदि नैवास्य विक्रिया।
नैव भोक्तृत्वमस्य स्यात्प्रकृतिश्चोपकारिणी॥
२९४॥§ 1054

विक्रियायाश्च सद्भावे नित्यत्वमवहीयते।
अन्यथात्वं विकारो हि तादवस्थ्ये च तत्कथम्॥
२९५॥§ 1056

यदि हि सुखदुःखादिनाऽऽह्लादपरितापादिरूपां विकृतिं नोपनीयते तदाऽऽकाशवदभोक्तृत्वमेव स्यात्। प्रकृतिश्चोपकारिणी न स्यादिति संबन्धः।

अविकृतात्मन्युपकारस्य कर्तुमशक्यत्वात्। अथ विकारित्वमस्याभ्युपगम्यते, तदा नित्यत्वहानिप्रसङ्गः। यतोऽतादवस्थ्यमेवानित्यतां ब्रूमः। तच्च विकारित्वे सत्यस्तीति कथमस्य नित्यता स्यात्। तादवस्थ्यरूपत्वान्नित्यत्वस्य॥ २९४॥ २९५॥ § 1057

114/k

स्यान्मतमित्यादिना परमतेनान्यथा भोक्तृत्वमाशङ्कते। § 1058

स्यान्मतं विषयाकारा बुद्धिरादौ विवर्त्तते।
तया व्यवसितं चार्थं पुरुषः प्रतिपद्यते॥
२९६॥ § 1060

प्रतिबिम्बोदयद्वारा चैवमस्योपभोक्तृता।
न जहाति स्वरूपं तु पुरुषोऽयं कदाचन॥
२९७॥ § 1062

न हि विकारापत्त्या भोक्तृत्वमस्येष्टम्, किं तर्हि ? बुद्ध्यवसितस्यार्थस्य प्रतिबिम्बोदयन्यायेन। तथा हि—बुद्धिदर्पणारूढमर्थप्रतिबिम्बकं द्वितीयदर्पणकल्पे पुंसि संक्रामति तदेवास्य भोक्तृत्वम्, न तु विकारापत्तिः। न च प्रतिबिम्बमात्रसंक्रान्तावपि पुरुषः स्वरूपं जहाति, दर्पणवत्तदवस्थत्वात्। अतो यदभोक्रवस्थानिर्विशिष्टं (तदभोक्तृ,) इत्यत्र प्रयोगेऽनैकान्तिकता हेतोः॥ २९६॥ २९७॥ § 1063

उच्यत इत्यादिना प्रतिविधत्ते। § 1064

उच्यते प्रतिबिम्बस्य तादात्म्येन समुद्भवे।
तदेवोदययोगित्वं विभेदे तु न भोक्तृता॥
२९८॥ § 1066

यत्तद्बुद्धिदर्पणारूढमर्थप्रतिबिम्बकं द्वितीयदर्पणकल्पे पुंसि संक्रामतीतीष्यते, तद्यदिपुरुषादव्यतिरिक्तम्, तदा तदेवानन्तरोक्तमुदयव्यययोगित्वं प्रसज्यते। उदयव्यययोगिप्रतिबिम्बरूपवत्तदव्यतिरेकात्। अथ व्यतिरिक्तमिति पक्षस्तदा भोक्तृता न प्राप्नोति, अभोक्रवस्थातो विशेषस्य कस्यचिदभावात्। न चाप्यर्थप्रतिबिम्बेन सह पुंसः संबन्धाद्भोक्तृत्वं युक्तम्, परस्परमनुपकारकयोः संबन्धासिद्धेः॥ २९८॥ § 1067

दिदृक्षाद्यानुकूल्येन प्रधानं संप्रवर्त्तते।
विचित्ररचनाभेदे कथं वाऽचेतनात्मकम्॥
२९९॥ § 1069

किं च यदि प्रधानं पुरुषस्य दिदृक्षादि जानीयात्, तदानुकूल्येन तस्य पुरुषस्यार्थं प्रति प्रवृत्तिर्युक्ता, यावता जडरूपत्वात्सत्यपि चेतनावता संबन्धे पङ्ग्वन्धवत् प्रवृत्तिर्न युक्ता। तथा हि—अन्धो यदि नाम मार्गं नोपलभते, तथाऽप्यसौ पङ्गोर्विवक्षां चेतयत्येव तस्य चेतनावत्त्वात्। न चैवं प्रधानं पुरुषस्य दिदृक्षादि वेत्ति, तस्याचेतनात्मकत्वेन जडरूपत्वात्। न चापि तयोः परस्परमनुपकारिणोः पङ्ग्वन्धव(?)त्संबन्धोऽस्ति॥ २९९॥ § 1070

कर्तुं नाम प्रजानाति प्रधानं व्यञ्जनादिकम्।
भोक्तुं च न विजानाति किमयुक्तमतः परम्॥
३००॥ § 1072

115/k

अथ पुरुषस्य दिदृक्षादि वेत्ति प्रधानमितीष्यते। तथा च सति भोक्तृत्वमप्यस्य प्रसज्येत। यो हि नाम कर्तुं विजानाति स कथं भोक्तुमपि न जानीयात्। तस्मात्कर्तुं जानाति न भोक्तुमित्यतः परं किमयुक्तमस्ति नैव किंचिदित्यर्थः। न हि सूपकारोव्यञ्जनादेः कर्त्ता तद्भोक्तुं न विजानातीति। अत्रेतिशब्दोऽध्याहार्यः॥ ३००॥ § 1073

बुद्धिमत्त्वादित्यादिना परस्योत्तरमाशङ्कते। § 1074

बुद्धिमत्त्वात्प्रधानस्य सर्वमस्याविरोधि चेत्।
बुद्धिमत्त्वेन तु प्राप्तं चैतन्यं पुरुषेष्विव॥ ३०१॥ § 1076

बुद्धिरध्यवसायो हि संवित्संवेदनं तथा।
संवित्तिश्चेतना चेति सर्वं चैतन्यवाचकम्॥
३०२॥ § 1078

सर्वमिति। दिदृक्षाद्यानुकूल्येन प्रवर्त्तनम्। अस्येति। प्रधानस्य। एतदुक्तं भवति— यदि नाम प्रधानं चिद्रूपं न भवति तथाऽपि बुद्ध्याऽध्यवसायलक्षणया युक्तत्वात्पुरुषगतं दिदृक्षादि परिज्ञाय प्रवर्त्तिष्यत इत्यतः सर्वमविरोधीति। अत्रोत्तरमाह—बुद्धिमत्त्वेनेत्यादि। यदि हि प्रधानस्य बुद्धिमत्त्वमङ्गीक्रियते तदाऽस्य पुरुषवच्चैतन्यवत्त्वप्रसङ्गः। बुद्ध्यादीनां चैतन्यपर्यायत्वात्। तथा हि—

यत्प्रकाशात्मतया स्वसंविदितरूपं परनिरपेक्षमेव प्रकाशते तच्चैतन्यमुच्यते, तत्त्वं बुद्धेरप्यस्तीति किमिति सा चिद्रूपा न भवेत्। न चापि बुद्धिव्यतिरेकेणापरं चिद्रूपमुपलक्षयामः। येन तद्व्यतिरिक्तस्य पुरुषस्य सिद्धिर्भवेत्॥ ३०१॥ ३०२॥ § 1079

अत्र परश्चिद्रूपाद्बुद्धेर्भेदप्रसाधनायाह—अचेतनात्मिका बुद्धिरित्यादि। § 1080

अचेतनात्मिका बुद्धिः शब्दगन्धरसादिवत्।
उत्पत्तिमत्त्वनाशित्वहेतुभ्यामिति चेन्मतम्॥
३०३॥ § 1082

प्रयोगः—यद्यदुत्पत्तिमत्त्वनाशित्वादिधर्मयोगि, तत्तदचेतनम्, यथा रसादयः, तथा च बुद्धिरिति स्वभावहेतुः॥ ३०३॥ § 1083

नैतावित्यादिना प्रतिविधत्ते। § 1084

नैतौ हेतू द्वयोः सिद्धौ स्वतन्त्रे साधने मते।
न विपर्ययबाधाऽस्ति प्रसङ्गेऽप्यभिधित्सिते॥
३०४॥ § 1086

कदाचिदिदं स्वातन्त्र्येण साधनं स्यात्प्रसङ्गसाधनं वा। यदि स्वातन्त्र्येण तदाऽन्यतरासिद्धो हेतुः। तथा हि—यथाविधमुत्पत्तिमत्त्वमंपूर्वोत्पादलक्षणं नाशित्वं वाऽत्यन्तस मुच्छेदात्मकं बौद्धस्य प्रसिद्धं न तथाविधं भवतः साङ्ख्यस्य। 116/k तयोः परिणामतिरोधानरूपत्वेन भवद्भिरङ्गीकरणात्। यथा च भवतस्तथा न बौद्धस्य सिद्धमित्यन्यतरासिद्धोहेतुः। न च शब्दमात्रस्य सिद्धौ हेतुसिद्धिः, वस्तुनो हि वस्तुसिद्धेर्वस्तुन एव हेतुत्वात्।यथोक्तम्— तस्यैव व्यभिचारादौ शब्देऽप्यव्यभिचारिणि। दोषवत्साधनं ज्ञेयं वस्तुनो वस्तुसिद्धितः॥ इति। अथ प्रसङ्गसाधनमितिपक्षस्तथाऽपि साध्यविपर्ययेबाधकप्रमाणानुपदर्शनादनैकान्तिकता हेत्वोः। को ह्यत्र प्रतिबन्धो यच्चैतन्यस्योत्पत्तिमत्त्वनाशित्वाभ्यां न भवितव्यमिति। याऽपीयं कल्पना, वत्सविवृद्धिनिमित्तंक्षीरस्य यथा प्रवृत्तिरज्ञस्य। पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्येति।साऽप्यकल्पनैव। न हि क्षीरं स्वातन्त्र्येण वत्सविवृद्धिनिमित्तं प्रवर्त्तते। किं तर्हि ? प्रतिनियतेभ्यः कादाचित्केभ्यः स्वहेतुप्रत्ययेभ्यः समुत्पद्यते। तच्चोत्पन्नं सद्वत्सविवृद्धेर्निमित्ततां यातीत्यज्ञमपि प्रवर्त्तत इति निर्दिश्यते। न चैवं प्रधानस्य प्रवृत्तिर्युक्ता। तथा हि—नित्यत्वात्तदन्यहेत्वभावाच्च न तावत्कादाचित्ककारणसंनिधानायत्ता तस्य कादाचित्की शक्तिर्युक्ता। नापि स्वाभाविकी, सदा संनिहिताविकल-

कारणत्वेन सर्वस्याभ्युदयनिःश्रेयसलक्षणस्य पुरुषार्थस्य युगपदुत्पत्तिप्रसङ्गात्॥ ३०४॥ § 1087

अथाऽपि स्याद्भवतु बुद्धिचैतन्ययोरभेदस्तथाऽप्यात्मत्वमस्याप्रतिषिद्ध-मेवेत्याह—चैतन्ये इत्यादि। § 1088

चैतन्ये चात्मशब्दस्य निवेशेऽपि न नः क्षतिः।
नित्यत्वं तस्य दुःसाध्यमक्ष्यादेः सफलत्वतः॥
३०५॥ § 1090

अक्ष्यर्थाद्यफलं तु स्याच्चैतन्यं शाश्वतं यदि।
न भवेदिन्धनेनार्थो यदि स्याच्छाश्वतोऽनलः॥
३०६॥ § 1092

न ह्यात्मशब्दनिवेशनमात्रमस्माभिश्चैतन्ये प्रतिषिध्यते, किं तर्हि ? यस्तत्र नित्यत्वलक्षणः समारोपितो धर्मः स निषिध्यते। कस्मात् ? अक्ष्यालोकमनस्कारादेः साफल्यात्। अन्यथा यदि शाश्वतं नित्यं चैतन्यं स्यात्तदाऽक्ष्यादि विफलमेव स्यात्।तदुत्पत्त्यर्थत्वात्तेषाम्। नित्यस्य चोत्पत्त्यसंभवात्। अत्रैव दृष्टान्तमाह—न भवेदित्यादि। यदि शाश्वतो वह्निर्भवेत्तदा नैव जनोऽनलार्थमिन्धनमुपाददीत तस्मान्ननित्यैकरूपं चैतन्यं युक्तम्॥ ३०५॥ ३०६॥ § 1093

यत्संघातरूपं तत्परार्थं दृष्टमित्यादि। तत्र कोऽसौ परोऽभिप्रेत इति निरूपयन्नाह—पारार्थ्यमित्यादि। § 1094
117/k

पारार्थ्यं चक्षुरादीनां यत्पुनः प्रतिपाद्यते।
शय्याशनादिवत्तेन संघातत्वेन हेतुना॥ ३०७॥ § 1096

आधेयातिशयार्थत्वं यद्येषामुपपाद्यते।
इष्टसिद्धिर्यदिष्टास्तेऽस्माभिर्ज्ञानोपकारिणः॥
३०८॥ § 1098

अविकार्युपकारित्वसाधने साध्यशून्यता।
दृष्टान्तस्य चलस्यैव युक्तास्तेऽप्युपकारिणः॥
३०९॥§ 1100

सामान्येन तु पारार्थ्यं यद्येषां संप्रसाध्यते।
तथाऽपि साधनं व्यर्थं सिद्धाश्चित्तोपयोगिनः॥ ३१०॥
इति कापिलकल्पितात्मपरीक्षा।§ 1103

आधेयातिशयो वा परोऽभिप्रेतो भवेत्, यद्वाऽनाधेयातिशयरूपत्वाद-विकारी, अथ वा सामान्येन पारार्थ्यमात्रमविचारितरमणीयं साध्यत इति त्रयो विकल्पाः। तत्र प्रथमपक्षे सिद्धसाध्यता, यतस्ते चक्षुरादयोऽस्माभिर्विज्ञानोपकारिण इष्टाः।चक्षुः प्रतीत्य रूपाणि चोत्पद्यते तच्चक्षुर्विज्ञानाम्, यावत्कायं प्रतीत्य स्प्रष्टव्यानित्यो(चो?)त्पद्यते कायविज्ञानमिति वचनात्। अथ द्वितीयः पक्षस्तदा विरुद्धता हेतोरित्यादर्शयन्नाह—अविकार्युपकारित्वेत्यादि। अविकारिणो नित्यस्योपकारित्वमविकार्युपकारित्वम्, तस्य चक्षुरादीनां साधने सति दृष्टान्ते साध्यविपर्ययेणैव हेतोर्व्याप्तत्वाद्विरुद्धता, यतस्ते शयनादयश्चलस्यानित्यस्यैवोपकारिणो युक्ताः, अविकारिण्यतिशयस्याधातुमशक्यत्वात्। अथ सामान्येनाधेयातिशयादिविकल्पमपास्य पारार्थ्यमात्रं साध्यत इति तृतीयः पक्षः, तदाऽपि सिद्धसाध्यता, चित्तोपकारित्वेन चक्षुरादीनामिष्टत्वात्। अथ चित्तमपि साध्यधर्मित्वेनाभ्युपगम्यते यथा नैयायिकैरभ्युपगतम्। एवमपि भवतां नेष्टसिद्धिः, चित्तव्यतिरेकेणाऽऽत्मनोऽनिष्टत्वात्। नापिनैयायिकानामभिमतार्थसिद्धिः, परस्परोपकारित्वेन चक्षुरादीनां परोपकारित्वस्येष्टत्वात्। पारावारवदापेक्षिकत्वात्परत्वस्य। चित्तस्य चानेककारणकृतोपकारोपग्रहेणोत्पत्तेः संघातत्वं कल्पितमस्त्येवेति हेतोरपि ना(न?)सिद्धिः॥ ३०७॥ ३०८॥ ॥ ३०९॥ ३१०॥
§ 1104

इति कापिलकल्पितात्मपरीक्षा।

०.८.४ दिगम्बरपरिकल्पितात्मपरीक्षा।

118/k

दिगम्बरपरिकल्पितात्मप्रतिषेधार्थमाह—जैमिनीया इवेत्यादि। § 1106

जैमिनीया इव प्राहुर्जैनाश्चिल्लक्षणं नरम्।

द्रव्यपर्यायरूपेण व्यावृत्त्यनुगमात्मकम्॥
३११ ॥§ 1108

जैना इति। दिगम्बरास्त एवं प्राहुः। चिल्लक्षण एवात्मा स च द्रव्यरूपेणसर्वावस्थास्वभिन्नत्वादनुगमात्मकः, पर्यायरूपेण तु प्रत्यवस्थं भिन्नत्वाद्व्यावृत्त्यात्मकः। एतच्च प्रत्यक्षत एव सिद्धमात्मनो द्वैरूप्यमिति न प्रमाणान्तरतः प्रसाध्यम्। तथा हि—सुखाद्यवस्थाभेदेऽपि यदवस्थातृ सर्वावस्थासु चैतन्यमुपलभ्यते तद्द्रव्यम्।पर्यायस्तु क्रमभाविनः सुखाद्यवस्थाभेदाः। ते च प्रत्यक्षत एव सिद्धा इति परस्य भावः॥ ३११॥ § 1109

तत्रापीत्यादिना प्रतिविधत्ते। § 1110

तत्राप्यविकृतं द्रव्यं पर्यायैर्यदि सङ्गतम्।
न विशेषोऽस्ति तस्येति परिणामि न तद्भवेत्॥
३१२ ॥§ 1112

अत्र पक्षद्वयम्—यत्तच्चैतन्यात्मकं द्रव्यं तत्पर्यायैः संबध्यमानं कदाचिदविकृतमत्यक्तपौरस्त्यचैतन्यादिरूपं सत्संबध्यते, यद्वा परित्यक्तपूर्वरूपम्। तत्र यद्यनन्तरःपक्षस्तदा नित्यत्वहानिप्रसङ्गः, अवस्थातुः कस्यचिदप्यभावात्। अथाविकृतमिति प्रथमपक्षस्तदा पूर्वोत्तरयोरवस्थयोर्न विशेषः—अन्यथात्वम्, अस्तीति परिणामि तच्चैतन्यं न भवेत्—न प्राप्नोति। अन्यथात्वलक्षणत्वात्परिणामस्य। इष्टं च परिणामि। प्रयोगः—यत्पूर्वोत्तरावस्थासु न विशिष्यते तत्परिणामि न भवति यथाकाशम्, न विशिष्यते च चैतन्यं सर्वावस्थास्विति व्यापकानुपलब्धेः॥ ३१२॥ § 1113

देशकालस्वभावानामित्यादिना हेतोः परमतेनासिद्धिमाशङ्कते। § 1114

देशकालस्वभावानामभेदादेकतोच्यते।
सङ्ख्यालक्षणसंज्ञार्थभेदाद्भेदस्तु वर्ण्यते॥ ३१३ ॥§ 1116

रूपादयो घटश्चेति सङ्ख्यासंज्ञाविभेदिता।
कार्यानुवृत्तिव्यावृत्ती लक्षणार्थविभेदिता॥
३१४ ॥§ 1118

द्रव्यपर्याययोरेवं नैकान्तेनाऽविशेषवत्।

द्रव्यं पर्यायरूपेण विशेषं याति चे(त्स्व)यम्॥
३१५॥§ 1120

तथा हि—यद्येकान्तेन पर्यायेभ्यो द्रव्यं व्यतिरेकि भवेत्तदा स्यात्तस्या विशेषः, यावता देशकालस्वभावाभेदाद्द्रव्यपर्याययोरैक्यमिष्टम्। सङ्ख्यादिभेदात्तु 119/k भेदः। तत्र सङ्ख्या, एकत्वबहुत्वादि। तथा हि—द्रव्यमेकसङ्ख्यायुक्तम्, पर्यायास्तु सुखादयोनेकसङ्ख्याविशिष्टाः। लक्षणमपि भिन्नम्। यतोऽनुवृत्तिलक्षणं द्रव्यम्, पर्यायास्तु व्यावृत्तिलक्षणाः, संज्ञा—नाम, अर्थः—कार्यम्। तथा चोक्तम्—देशकालस्वभावाभेदादभेदो धर्मधर्मिणोः, सङ्ख्यासंज्ञालक्षणकार्यभेदात्तु भेदः, तद्यथा घटस्य रूपादीनां चेति। तथा हि—घटतद्रूपादीनां देशादिभिरभेदः, य एव हि देशकालस्वभावश्चघटस्य स एव रूपादीनाम्, सङ्ख्यादिभिश्च घटात्तेषां भेदः। तथा ह्येको घटो बहवस्तु रूपादय इति सङ्ख्याभेदः। घटो रूपादय इति च संज्ञाभेदः। अनुवृत्तिलक्षणंघटादिद्रव्यं व्यावृत्तिलक्षणास्तु रूपादयः पर्याया इति लक्षणभेदः। घटेनोदकाहरणं कार्यं क्रियते रूपादिभिस्तु वस्त्ररागादीति कार्यभेदः। एवमात्मद्रव्येऽपि चैतन्यात्मके सुखदुःखादिषु पर्यायेषु चोह्यम्। कार्यभेदस्तु तत्रैवं बोद्धव्यः—चैतन्येनार्थानुभवः क्रियते, सुखादिभिस्तु पीडानुग्रहादीति। तदेतद्दर्शयति रूपादय इत्यादि। सङ्ख्यासंज्ञाविभेदितेति। द्रव्यपर्याययोरिति वक्ष्यमाणं संबध्यते। कार्यानुवृत्तिव्यावृत्ती लक्षणार्थविभेदितेति। यथायोगं संबन्धः। कार्यभेदोऽर्थविभेदिता, अनुवृत्तिव्यावृत्तीलक्षणविभेदितेति संबन्धः। द्रव्यपर्याययोरित्यत्र छेदः। एवमित्यादिनाहेतोरसिद्धिमुपसंहरति। एवं च कृत्वा द्रव्यमेकान्तेन नाविशिष्टं किन्तु पर्यायरूपभेदेन विशेषं प्रतिपद्यते। तेन पर्यायेभ्यो द्रव्यस्यैकान्तेन भेदाभावादविशेषादित्यसिद्धो हेतुः ॥ ३१३॥ ३१४॥ ३१५॥
§ 1121

स्वभावाभेद इत्यादिना प्रतिविधत्ते। § 1122

स्वभावाभेद एकत्वं तस्मिन्सति च भिन्नता।
कथंचिदपि दुःसाध्या पर्यायात्मस्वरूपवत्॥
३१६॥§ 1124

यदि हि द्रव्यपर्याययोरभेदोऽप्यङ्गीक्रियते। तदा सर्वात्मनैवाभेदोऽयं भवेत्, भेदश्च तद्विपरीतः कथं भवेत्, न ह्येकस्यैकदा विधिप्रतिषेधौ परस्परविरुद्धौ युक्तौ। तथाह्येकमित्यनेन भेदनिषेधनान्तरीयकः स्वभावाभेद उच्यते, तस्मिंश्च स्वभावाभेदे सति कथं तदानीमेव भेदस्तत्प्रतिषेधात्मा भवेत्। प्रयोगः—यत्राभेदस्तत्र तद्विपरीतो न भेदोऽवकाशं लभते, यथा तेषामेव प-

२१ भावादविशेषादि] Correction : ; भावादि (sic !)भावादविशेषादि

र्यायाणां द्रव्यस्य च यत्प्रतिनियतमसाधारणमात्मरूपं तस्य न स्वभावाद्भेदः, अभेदश्च द्रव्यपर्याययोरवस्थित इति विरुद्धोपलब्धेः॥ ३१६॥ § 1125
120/k

ततश्च परमार्थेन द्रव्यपर्याययोरभेदे सति लक्षणभेदोऽपि न प्राप्नोतीति दर्शयति।अगौणे चैवमित्यादि। § 1126

अगौणे चैवमेकत्वे द्रव्यपर्याययोः स्थिते।
व्यावृत्तिमद्भवेद्द्रव्यं पर्यायाणां स्वरूपवत्॥
३१७॥§ 1128

यदि वा तेऽपि पर्यायाः सर्वेऽप्यनुगतात्मकाः।
द्रव्यवत्प्राप्नुवन्त्येषां द्रव्येणैकात्मता स्थितेः॥
३१८॥§ 1130

यद्व्यावृत्तिमद्रूपाभिन्नस्वभावं तद्व्यावृत्तिमत्, यथा पर्यायाणां स्वरूपम्, व्यावृत्तिमद्रूपाव्यतिरिक्तं च द्रव्यमिति स्वभावहेतुः। अथ वा—यदनुगतात्मरूपाव्यतिरिक्तं तदनुगतात्मकमेव, यथा द्रव्यरूपम्, अनुगतात्मरूपाविभिन्नस्वभावाश्च सुखादयःपर्याया इति स्वभावहेतुरेव। अन्यथा विभिन्नयोगक्षेमत्वाद्भेद एव भवेत्। विरुद्धधर्माध्यासितस्याप्येकत्वे भेदव्यवहारोच्छेद एव स्यादिति विपर्यये बाधकं प्रमाणम् ॥ ३१७॥ ३१८॥ § 1131

तत इत्यादिनोपसंहरति। § 1132

ततो नावस्थितं किञ्चिद्द्रव्यमात्मादि विद्यते।
पर्यायाव्यतिरिक्तत्वात्पर्यायाणां स्वरूपवत्॥
३१९॥§ 1134

आत्मादीति। आदिशब्देन घटव्रीह्यादिपरिग्रहः॥ ३१९॥ § 1135

न चेत्यादिना द्वितीयप्रसङ्गसाधनफलमाह। § 1136

न चोदयव्ययाक्रान्ताः पर्याया अपि केचन।
द्रव्यादव्यतिरिक्तत्वात्तद्द्रव्यनियतात्मवत्॥
३२०॥§ 1138

तस्यापि द्रव्यस्य पर्यायरूपेणोदयव्ययाक्रान्तस्येष्टत्वादतो माभूत्साध्यवैकल्यप्रसङ्ग इति नियतात्मवदित्युक्तम्। नियतश्चासावात्मा स्वभावो द्रव्यादिरूपेणेति विशेषणसमासः॥ ३२०॥ § 1139

ततो निरन्वय इत्यादिना निगमयति। § 1140

ततो निरन्वयो ध्वंसः स्थिरं वा सर्वमिष्यताम्।
एकात्मनि तु नैव स्तो व्यावृत्त्यनुगमाविमौ॥
३२१॥§ 1142

न केवलं पर्यायादभिन्नस्वभावाद्द्रव्यरूपस्यानुगतात्मनोऽसिद्धिः, इतोऽपि पर्यायव्यतिरेकेणोपलब्धिलक्षणप्राप्तस्यानुपलब्धेरसद्व्यवहारविषयत्वमेवास्येति दर्शयन्नाह—न चेत्यादि। § 1143

121/k

न चोपलभ्यरूपस्य पर्यायानुगतात्मनः।
द्रव्यस्य प्रतिभासोऽस्ति तन्नास्ति गगनाब्जवत्॥
३२२॥§ 1145

तेन यदुक्तं प्रत्यक्षत एवानुगतो द्रव्यात्मा सिद्ध इति, तदसिद्धम्। न हि पर्यायव्यतिरिच्यमानशरीरः क्वचिदपि विज्ञाने प्रत्यक्षसंमते प्रतिभासमानोऽनुगतैकरूपो द्रव्यात्मा लक्ष्यते॥ ३२२॥ § 1146

यद्येवं यदि पर्यायव्यतिरेकेण द्रव्यात्मा नास्ति तदा संख्यादिभेदः कथं सिध्यतीत्याह—विविधार्थेत्यादि। § 1147

विविधार्थक्रियायोग्यास्तुल्यादिज्ञानहेतवः।
तथाविधार्थसङ्केतशब्दप्रत्ययगोचराः॥ ३२३॥§ 1149

विविधाः—नानाप्रकाराः, अर्थक्रियाः—रूपादीनां पर्यायाणां समानासमानभेदात्, तत्र समाना जलसंधारणादिलक्षणाः, असमाना वस्त्ररागलोचनादिज्ञानोत्पादलक्षणाः, तत्र योग्याः समर्था इति विग्रहः। तत्र साधारणे कार्ये सर्वेषामेव यौगपद्येनोपयोग इति समस्तानां हेतुत्वज्ञापनार्थमभिन्नद्रव्यरूपाभावेऽपि त एव भेदिनोऽपि घट इत्यादिना शब्देनैकसङ्ख्याविशिष्टा उच्यन्ते। असाधारणकार्योपयोगित्वविवक्षायां तु नानासङ्ख्यास्त इति सङ्ख्याभेदः कार्यभेदश्च तेषु व्यवस्थाप्यते। लक्षणभेदस्तर्हि कथमित्याह—तुल्यादिज्ञानहेतव इति। आमपक्वाद्यवस्थासु प्रतिक्षणध्वंसिनोऽपि सदृशसन्निवेशा विशेषा एवोत्पद्यमाना निर्विकल्पानुभवविषया अनुभूयमानाः सर्वावस्थासु घ-

टो घट इत्यादिसदृशप्रत्ययहेतवो भवन्ति। श्यामलोहितादिवर्णवैलक्षण्येन जायमाना अतुल्यप्रत्ययहेतव इत्येवमेकरूपानुगममन्तरेणापि तुल्यातुल्यज्ञानहेतवो भवन्तोऽनुवृत्तिव्यावृत्तिरूपेण व्यवस्थाप्यन्त इति लक्षणभेदो व्यवस्थाप्यते। तुल्यादीत्यादिग्रहणेनातुल्यं ज्ञानं गृह्यते। कस्तर्हि संज्ञाभेद इत्याह—तथाविधेत्यादि। तथाविधः—विविधार्थक्रियायोग्यस्तुल्यादिज्ञानहेतुश्च पदार्थो रूपादिः, अर्थः—विषयो यस्य, घट इति रूपादय इति च सङ्केतस्य, स तथोक्तः, तथाविधार्थः सङ्केतो येषां शब्दप्रत्ययानां ते तथोक्ताः, तेषां गोचरा इति विग्रहः॥ ३२३॥ § 1150

तेन प्रत्यक्षत एव भावानां नैरात्म्यं प्रसिद्धमित्युपसंहारेण दर्शयति—उदयेत्यादि। § 1151

उदयव्ययधर्माणः पर्याया एव केवलाः।
संवेद्यन्ते ततः स्पष्टं नैरात्म्यं चातिनिर्मलम्॥
३२४॥§ 1153

122/k

पर्याया इति। रूपादयः, स्वसंविदितस्वभावाश्च दुःखादयः। केवला इति। अभिन्नैकद्रव्यरूपविरहिणः। नित्यस्य च क्रमयौगपद्याभ्यामर्थक्रियाविरोधात्। अर्थक्रियाकारित्वमेषामुदयव्ययधर्मित्व एव सति युज्यत इत्यनुमानतोऽप्येषामर्थक्रियाकारिणांसत्त्वलिङ्गान्नैरात्म्यं प्रसिद्धम्॥ ३२४॥ § 1154

यदुक्तं न चोपलभ्यरूपस्येत्यादि, तत्राथेत्यादिना परस्योत्तरमाशङ्कते। § 1155

अथ सन्मूर्छितं रूपं द्रव्यपर्याययोः स्थितम्।
तद्द्विरूपं हि निर्भागं नरसिंहवदिष्यते॥ ३२५॥§ 1157

संमूर्छितम्—एकलोलीभूतम्, अतो विवेकेन द्रव्यरूपं न प्रतिभासते विद्यमानमपीति भावः। संमूर्छितत्वे कारणमाह—तद्द्विरूपं हीत्यादि। तत्—आत्मादिकं वस्तु। यस्मात्तद्द्विरूपमपि सन्निर्भागमिष्यते यथा नरसिंहस्तस्मान्निर्भागत्वात्संमूर्छितोभयरूपं तदिति न पृथगुपलभ्यते॥ ३२५॥ § 1158

तदेतत्परस्परपराहतमभिधीयते भवतेति दर्शयन्नाह—नन्वित्यादि। § 1159

३ उदयव्यय] Correction : ; उदययव्य (sic !)उदयव्यय

ननु द्विरूपमित्येव नानार्थविनिबन्धनः।
निर्देशो रूपशब्देन स्वभावस्याभिधानतः॥
३२६॥§ 1161

यदि हि निर्भागं तदा द्विरूपमित्येतद्व्याहतम्, नानार्थविनिबन्धनत्वादस्य व्यपदेशस्य, कस्मात् ? रूपशब्देन स्वभावस्याभिधानात्। तथा हि द्वे रूपे द्वौ स्वभावौ यस्य स द्विरूप उच्यते न चैकस्य स्वभावद्वयं युक्तमेकत्व-हानिप्रसङ्गात्। केवलं द्वावेव स्वभावौ भवता प्रतिपादितौ, न पुनरेकं वस्तु द्विरूपम्, परस्परपरिहारस्थितलक्षणत्वादेकत्वानेकत्वयोः॥ ३२६॥ § 1162

यश्च नरसिंहः सोऽप्येकः सन् द्विरूपो न सिद्ध इति दर्शयति—नर-सिंहोऽपीत्यादिना। § 1163

नरसिंहोऽपि नैवैको द्व्यात्मकश्चोपपद्यते।
अनेकाणुसमूहात्मा स तथा हि प्रतीयते॥ ३२७॥
दिगंबरपरिकल्पितात्मपरीक्षा।§ 1166

केवलं विवादास्पदीभूतं नोपपद्यत इत्यपिशब्दः। स इति। नर-सिंहः। तथेति।अवयववैचित्र्येण, पृथुतरदेशाक्रान्तिरूपेण च। अन्यथैवं न प्रतिभासेत। मक्षिकापदमात्रेणापि च पिधाने तस्य तथाविधस्यावरणप्रसङ्गश्च। एतेन मेचकमणिकल्पावर्णादयः प्रत्युक्ताः। एतच्च विस्तरेणावयविनिषेधे प्रतिपादयिष्याम इति भावः॥ ३२७॥ § 1167

इति दिगम्बरपरिकल्पितात्मपरीक्षा।

123/k

०.८.५ औपनिषदिकात्मपरीक्षा।

अपरेऽद्वैतदर्शनावलम्बिनश्चौपनिषदिकाः क्षित्यादिपरिणामरूपनित्यैक-ज्ञानस्वभावमात्मानं कल्पयन्ति। अतस्तेषामेव मतमुपदर्शयन्नाह—नित्येत्यादि। § 1169

नित्यज्ञानविवर्त्तोऽयं क्षितितेजोजलादिकः।
आत्मा तदात्मकश्चेति सङ्गिरन्तेऽपरे पुनः॥
३२८॥§ 1171

तदात्मक इति। क्षित्यादिपरिणामरूपनित्यैकज्ञानात्मक इत्यर्थः। अपर इति। औपनिषदिकाः॥ ३२८॥ § 1172

किमत्र प्रमाणमित्याह—ग्राह्येत्यादि। § 1173

ग्राह्यलक्षणसंयुक्तं न किञ्चिदिह विद्यते।
विज्ञानपरिणामोऽयं तस्मात्सर्वः समीक्ष्यते॥
३२९॥§ 1175

न हि क्षित्यादयो ज्ञानव्यतिरेकेण ग्राह्यलक्षणापन्नाः सन्ति येन ते प्रतिभासेरन्नवयविनः। परमाणूनां चासत्त्वात्। तस्मात्सामर्थ्याद्विज्ञानप्रतिभासरूपा एवामी क्षित्यादय इति व्यवसीयन्ते। अयमिति। क्षित्यादिः॥ ३२९॥ § 1176

तेषामित्यादिना प्रतिविधत्ते। § 1177

तेषामल्पापराधं तु दर्शनं नित्यतोक्तितः।
रूपशब्दादिविज्ञानां(ने?) व्यक्तं भेदोपलक्षणात्॥
३३०॥§ 1179

एकज्ञानात्मकत्वे तु रूपशब्दरसादयः।
सकृद्वेद्याः प्रसज्यन्ते नित्येऽवस्थान्तरं न च॥
३३१॥§ 1181

अल्पापराधमिति। ज्ञानमात्रस्य युक्त्युपेतस्याभ्युपगमात्। यद्येवं स्वल्पोऽपि किमिति तत्रापराध उच्यत इत्याह—नित्यतोक्तित इत्यादि। कस्मात्पुनर्नित्यत्वाभ्युपगमो न युक्त इत्याह—रूपशब्दादीत्यादि। नित्यता हि नाम तादवस्थ्यमुच्यते, अतादवस्थ्यं त्वनित्यता, न च रूपशब्दादिप्रतिभासिविज्ञानमेकावस्थं सर्वदाऽनुभूयते, किन्तु क्रमेण कदाचिद्रूपप्रतिभासमन्यदा च शब्दादिप्रतिभासम्। तद्यदिनित्यैकज्ञानप्रतिभासात्मका अमी शब्दादयः स्युस्तदा विचित्रास्तरणप्रतिभासवत्सकृदेव प्रतिभासेरन्। तत्प्रतिभासात्मकस्य ज्ञानस्य सर्ददाऽवस्थितत्वात्। अथापि स्यादवस्थान्तरमेतत्क्रमेण शब्दादिप्रतिभासं ज्ञानस्योत्पद्यते। तेन सकृदेव शब्दादिसंवेदनं न भविष्यतीत्याह—नित्येऽवस्थान्तरं न चेति। अवस्थानामवस्थातुरनन्यत्वादवस्थावदवस्थातुरपि नाशोत्पादौ स्याताम्। अवस्थातृवद्वाऽवस्थानामपि नि-
124/k त्य त्वप्रसङ्गः। व्यतिरेके चावस्थानां तस्यैता इति संबन्धासिद्धिः, उपकाराभावात्।नित्यैकविज्ञानमात्राभ्युपगमविरोधश्च॥ ३३०॥ ३३१॥ § 1182

किंच—नित्यस्य ज्ञानात्मनः प्रत्यक्षतो वा सिद्धिर्भवेदनुमानतो वा न तावत्प्रत्यक्षत इति दर्शयति—रूपेत्यादि। § 1183

रूपादिवित्तितो भिन्नं न ज्ञानमुपलभ्यते।
तस्याः प्रतिक्षणं भेदे किमभिन्नं व्यवस्थितम्॥
३३२॥§ 1185

न हि क्रमप्रतिभासिरूपादिसंविद्व्यतिरेकेण नित्यैकरूपमवस्थातृ ज्ञानमनुभूयते, येन प्रत्यक्षतः सिद्धिः स्यात्। तस्याश्च रूपादिसंवित्तेः क्रमेणानुभूयमानायाः प्रतिक्षणं ध्वंसे सिद्धे किमपरमभिन्नमस्तीति वाच्यम्। तस्मादुपलब्धिक्षणप्राप्तस्य तथाविधज्ञानात्मनोऽनुपलब्धेरसद्व्यवहारविषयतैवेति भावः। न चाप्यनुमानतः सिद्धिरिति मन्यते। तथाह्यनुमानं भवत्स्वभावलिङ्गं वा भवेत्, कार्यं वा, न तावत्स्वभावस्तथाभूतस्य ज्ञानात्मनः साधकं प्रमाणमस्ति, बाधकं तु प्रत्यक्षादि विद्यत इत्ययुक्तोनित्यज्ञानविवर्त्तः॥ ३३२॥ § 1186

किंचास्मिन्पक्षे बन्धमोक्षव्यवस्था न प्राप्नोतीति दर्शयति—विपर्यस्तेत्यादि। § 1187

विपर्यस्ताविपर्यस्तज्ञानभेदो न विद्यते।
एकज्ञानात्मके पुंसि बन्धमोक्षौ ततः कथम्॥
३३३॥§ 1189

यस्य हि प्रतिक्षणध्वंसि प्रतिपुरुषमनेकमेव विज्ञानं सन्तानभेदि प्रवर्त्तत इति पक्षस्तस्य विपर्यस्ताविपर्यस्तज्ञानप्रबन्धोत्पादवशाद्बन्धमोक्षव्यवस्था युक्तिमती। योगाभ्यासक्रमेण च परिशुद्धतरतमज्ञानोत्पादादपरिशुद्धज्ञानसंताननिवृत्तेरपवर्गः प्राप्यत इति सफलो मोक्षप्राप्तये प्रयासः। यस्य तु पुनर्भवतो नित्यैकज्ञानस्वभाव आत्मेति पक्षस्तस्य कथमेकज्ञानात्मके पुंसि बन्धमोक्षौ भवतः। तथाहि—यदि विपर्यस्तस्वभावमेकं ज्ञानं सदा तदाऽपरस्यावस्थान्तरस्याभावान्न मोक्षव्यवस्था स्यात्। अथाविपर्यस्तं तदा नित्यं परिशुद्धस्वभावत्वान्न बन्धः स्यात्। अस्माकं तु सन्तानभेदेन विज्ञप्तिः संक्लिष्टा शुद्धा चेष्यत इति युक्ता बन्धमोक्षव्यवस्था। यथोक्तम्—संक्लिष्टा च विशुद्धा च समला निर्मला च सा। संक्लिष्टा चेद्भवेन्नासौ मुक्ताः स्युः सर्वदेहिनः॥ विशुद्धा चेद्भवेन्नासौ व्यायामो निष्फलो भवेत्। इति॥ ३३३॥ § 1190
125/k

अथापि स्यात्कल्पितावेव बन्धमोक्षौ न पारमार्थिकाविति, तदत्र कल्पनाया अपि निबन्धनं वाच्यम्। अनित्यज्ञानपक्षे तु निबन्धनमुपदर्शितमेव। ततश्च योऽयं भवतामपवर्गप्राप्तये संसारसमतिक्रमाय च तत्त्वभावनाप्रयत्नः स केवलमायासफल एवेति दर्शयति—किं वेत्यादि। § 1191

किं वा निवर्त्तयेद्योगी योगाभ्यासेन साधयेत्।
किं वा न हातुं शक्यो हि विपर्यासस्तदात्मकः॥
३३४॥ § 1193

तत्त्वज्ञानं न चोत्पाद्यं तादात्म्यात्सर्वदा स्थितेः।
योगाभ्यासोऽपि तेनायमफलः सर्व एव च॥ ३३५॥
औपनिषदकल्पितात्मपरीक्षा। § 1196

यदि हि तत्त्वभावनया योगी किंचिन्निवर्त्तयेत्प्रवर्त्तयेद्वा तदा स्यादस्य सफलः प्रयासः, यावता न तावदसौ विपर्यासं निवर्त्तयति, यस्मादसौ विपर्यासस्तदात्मकः— नित्यज्ञानात्मकः, तस्मान्न हातुं शक्यः। नित्यस्याविनाशितया त्यागासम्भवात्। नापि तत्त्वज्ञानं भावनया साधयति, नित्यज्ञानात्मतया सर्वदा तत्त्वज्ञानस्यावस्थितत्वात्। तस्मान्न युक्तमेतत्॥ ३३४॥ ३३५॥ § 1197

इत्यौपनिषदिकात्मपरीक्षा।

०.८.६ वात्सीपुत्रीयात्मपरीक्षा।

वात्सीपुत्रीयपरिकल्पितपुद्गलप्रतिषेधार्थमाह—केचित्त्वित्यादि। § 1199

केचित्तु सौगतम्मन्या अप्यात्मानं प्रचक्षते।
पुद्गलव्यपदेशेन तत्त्वान्यत्वादिवर्जितम्॥ ३३६॥ § 1201

केचिदिति। वात्सीपुत्रीयाः। ते हि सुगतसुतमात्मानं मन्यमाना अपि पुद्गलव्याजेन स्कन्धेभ्यस्तत्त्वान्यत्वाभ्यामवाच्यमात्मानं कल्पयन्ति। ये हि नाम भगवतो नैरात्म्यवादिनस्सुगतस्य सुतत्वमभ्युपगतास्ते कथमिव वितथात्मदृष्टिमभिनिविष्टास्स्युरिति दर्शयन्नुपहासपदमाह—सौगतम्मन्या अपीति। तथाहीदमात्मनो लक्षणम्—यो हि शुभाशुभकर्मभेदानां कर्त्ता स्वकृतकर्मफलस्य चेष्टानिष्टस्य च भोक्ता यश्चपूर्वस्कन्धपरित्यागादपरस्कन्धान्तरोपादानात्संसरति भोक्ता च स आत्मेति। एतच्च सर्वं पुद्गलेऽपीष्टमिति केवलं नाम्नि विवादः॥ ३३६॥ § 1202

अथ पुद्गलस्यावाच्यत्वे का पुनर्युक्तिरित्याह—स्कन्धेभ्य इत्यादि। § 1203

स्कन्धेभ्यः पुद्गलो नान्यस्तीर्थदृष्टिप्रसङ्गतः।

नानन्योऽनेकताद्याप्तेः साध्वी तस्मादवाच्यता॥
३३७ ॥§ 1205

126/k

यदि स्कन्धेभ्योऽन्यः पुद्गलः स्यात्तदानीं तैर्थिकपरिकल्पितात्मदृष्टिर्भवेत्, ततश्चशाश्वतात्मप्रसङ्गः। न च शाश्वतस्यात्मनः कर्तृत्वभोक्तृत्वादि युक्तम्, आकाशवत्तस्य सर्वदा निर्विशिष्टत्वात्। प्रतिषिद्धश्च भगवता शाश्वत आत्मा, निरात्मानः सर्वे धर्मा इति च वचनं व्याहन्येत। अनन्यस्तर्हि भवत्विति चेदाह—नानन्य इत्यादि। यदि हि स्कन्धा एव रूपादयः पुद्गलः स्यात्तदा बहुभ्यः स्कन्धेभ्योऽनन्यत्वात्तत्स्वरूपवदनेकता प्राप्नोति पुद्गलस्य। एकश्चेष्यते। यथोक्तम्— एकः पुद्गलो लोक उत्पद्यमान उ(त्प)द्यते यद्धत्तथा गत इति (?)। आदिशब्देनानित्यत्वादिपरिग्रहः। एवं च सति उच्छेदित्वं स्कन्धवत्पुद्गलस्यापि स्यात्। ततश्च कृतकर्मविप्रणाशप्रसङ्गः प्रतिषिद्धश्च भगवतोच्छेदवाद इत्यतोऽस्त्यवाच्यः पुद्गल इति सिद्धम्॥ ३३७॥ § 1206

ते वाच्या इत्यादिना वस्तुवत्पुद्गलो न भवत्यवाच्यत्वादिति स्ववचनादेव भवद्भिःप्रतिपादितमिति दर्शयति। § 1207

ते वाच्याः पुद्गलो नैव विद्यते पारमार्थिकः।
तत्त्वान्यत्वादवाच्यत्वान्नभःकोकनदादिवत्॥
३३८ ॥§ 1209

प्रयोगः—यद्वस्तुनः सकाशात्तत्त्वान्यत्वाभ्यां वाच्यं न भवति न तद्वस्तु, यथा गगननलिनम्, न भवति च वाच्यः पुद्गल इति व्यापकानुपलब्धेः। वैधर्म्येणवेदनादि॥ ३३८॥ § 1210

कथं पुनरत्र व्याप्तिः सिद्धेत्याह—अन्यत्वमित्यादि। § 1211

अन्यत्वं वाऽप्यनन्यत्वं वस्तु नैवातिवर्त्तते।
वस्तुतो यत्तु नीरूपं तदवाच्यं प्रकल्प्यते॥
३३९ ॥§ 1213

वस्तुनो हि सकाशाद्वस्तु नैव तत्त्वान्यत्वे व्यतिक्रामति, गत्यन्तराभावात्। अन्यथा रूपादीनामपि परस्परतोऽवाच्यत्वं स्यात्। तस्मान्नीरूपमस्वभावमेवावाच्यं प्रकल्प्यते, न तु वस्तु॥ ३३९॥ § 1214

कथमित्याह—भेदाभेदविकल्पस्येत्यादि। § 1215

१० भगवतो] Correction: ; भवतो (sic !)भगवतो

भेदाभेदविकल्पस्य वस्त्वधिष्ठानभावतः।
तत्त्वान्यत्वाद्यनिर्देशो निःस्वभावेषु युज्यते॥
३४० ॥§ 1217

न वस्तुनि यदेतद्धि तन्नेति प्रतिषेधनम्।
तद्वस्त्वन्तरवत्तस्माद्व्यक्तमन्यत्वमुच्यते॥ ३४१ ॥§ 1219

127/k

अतद्भावनिषेधश्च तत्त्वमेवाभिधीयते।
नातिक्रामति तद्वस्तु तत्त्वं भेदं च वस्तुनः॥
३४२ ॥§ 1221

वस्त्वेव हि भेदाभेदविकल्पयोरधिष्ठानम्, नावस्तु। तेन तत्त्वान्यत्वाद्यनिर्देशोनिःस्वभावेष्वेव—स्वभावविरहितेष्वेव युज्यते। न वस्तुनि तत्त्वान्यत्वाद्यनिर्देशो युज्यत इति संबन्धः। तत्र भेदाभेदाभ्यां गत्यन्तराभावात्। कथं पुनर्गत्यन्तराभाव इत्याह—यदेतद्धीत्यादि। तथा हि—रूपादिस्वभावः पुद्गलो न भवतीति यदेतत्तन्निषेधनम्, तत्तस्माद्रूपादेः सकाशादन्यत्वमेवाभिधीयते। स्वभावान्तरविधिनान्तरीयकत्वाद्वस्तुनो वस्त्वन्तरभावनिषेधस्य। प्रयोगः—यद्वस्तुयत्स्वभावविरहितं तत्ततोऽन्यत्, यथा रूपं वेदनातः, रूपादिस्वभावविरहि च पुद्गलाख्यं वस्तु, इति स्वभावहेतुः। यश्चायंवस्तुनोऽतद्भावनिषेधः—अतद्रूपनिषेधः स तत्त्वमव्यतिरेक एवाभिधीयते। तत्त्वविधिनान्तरीयकत्वाद्वस्तुसतोऽर्थान्तरभावनिषेधस्य। अन्यथा हि यदि तस्य न कश्चित्स्वभावो विधीयते तदा सर्वस्वभावनिषेधादवस्तुत्वमेव स्यात्। सर्वस्वभावनिषेधलक्षणत्वादवस्तुत्वस्येति। प्रयोगः—यद्वस्तु यतोऽर्थान्तरत्वेन प्रतिषिद्धात्मतत्त्वं तत्तदेव, यथा रूपं स्वस्वभावादर्थान्तरत्वेन प्रतिषिद्धात्मतत्त्वम्। प्रतिषिद्धात्मतत्त्वश्च रूपादिभ्योऽर्थान्तरत्वेन पुद्गल इति स्वभावहेतुः। तत्तस्माद्वस्तुनः सकाशात्तत्त्वान्यत्वेवस्तु नातिक्रामतीति सिद्धा व्याप्तिर्मौलस्य हेतोः॥ ३४०॥ ३४१॥ ३४२॥ § 1222

एवं तावदवाच्यत्वाभ्युपगमे प्रज्ञप्तिसत्वं पुद्गलस्य प्राप्तमिति प्रतिपादितम्। इदानीं वस्तुत्वाभ्युपगमे वा पुद्गलस्यावाच्यत्वमयुक्तमन्यथा स्ववचनविरोधः प्रतिज्ञायाः स्यादिति मन्यमानो निगमयति—स्कन्धेभ्य इत्यादि। § 1223

स्कन्धेभ्यः पुद्गलो नान्य इत्येषाऽनन्यसूचना।

स्कन्धो न पुद्गलश्चेति व्यक्ता तस्येयमन्यता॥
४४३ ॥§ 1225

अपि चावाच्यः पुद्गल इति ब्रुवाणैर्भवद्भिः स्फुटतरमेव स्कन्धेभ्यः पुद्गलस्यान्यत्वमुच्चैरुद्घोषितमिति दर्शयति—विरुद्धधर्मसङ्गो हीत्यादि। § 1226

विरुद्धधर्मसङ्गो हि वस्तूनां भेद उच्यते।
स्कन्धपुद्गलयोश्चैव विद्यते भिन्नता न किम्॥
३४४ ॥§ 1228

प्रयोगः—यौ परस्परपरिहारस्थितधर्माध्यासितौ तौ परस्परभिन्नौ, यथा रूपवेदने मूर्त्तत्वामूर्त्तत्वयुक्ते, वाच्यत्वावाच्यत्वादिपरस्परविरुद्धधर्माध्यासितौ च स्कन्धपुद्गलाविति स्वभावहेतुः॥ ३४४॥ § 1229
128/k

न चायमसिद्धो हेतुरिति दर्शयन्नाह—तथा हीत्यादि। § 1230

तथा हि वेदनादिभ्यः पुद्गलोऽवाच्य उच्यते।
तत्त्वान्यत्वेन वाच्यास्तु रूपसंज्ञादयस्ततः॥
३४५ ॥§ 1232

तथा हि पुद्गलो वेदनासंज्ञादिभ्यस्तत्त्वान्यत्वाभ्यामवाच्य इष्यते। रूपवेदनादयस्तु, ततः—वेदनादिभ्यः, परस्परमन्यत्वेन वाच्या इत्यतो नासिद्धता हेतोः॥ ३४५॥ § 1233

इतोऽपि विरुद्धधर्माध्यासः सिद्ध इत्यादर्शयति—अनित्यत्वेनेत्यादि। § 1234

अनित्यत्वेन वाच्याश्च रूपस्कन्धादयो मताः।
पुद्गलस्तु तथा नेति ततो विस्पष्टमन्यता॥
३४६ ॥§ 1236

अनित्याः सर्वसंस्कारा इति वचनाद्रूपादयो ह्यनित्यत्वेन वाच्याः, पुद्गलस्तु तथा नानित्यत्वेन वाच्य इष्टः सर्वप्रकारेण तस्यावाच्यत्वात्। न चाप्यनैकान्तिकता हेतोः, एतावन्मात्रनिबन्धनत्वाद्भेदव्यवहारस्य, अन्यथा हि सकलमेव विश्वमेकं वस्तु स्यात्,ततश्च सहोत्पादविनाशप्रसङ्गः॥ ३४६॥ § 1237

न केवलं तत्त्वान्यत्वाभ्यामवाच्यत्वादवस्तु पुद्गलोऽयमिति प्रतिपादितम्, इतोऽप्यनित्यत्वेनावाच्यत्वादेवावस्त्विति प्रतिपादयन्नाह—अर्थक्रियास्वित्यादि। § 1238

अर्थक्रियासु शक्तिश्च विद्यमानत्वलक्षणम्।
क्षणिकेष्वेव नियता तथाऽवाच्ये न वस्तुता॥
३४७ ॥§ 1240

इदमेव हि विद्यमानत्वलक्षणं वस्तुस्वभावो यदुतार्थक्रियासु शक्तिः, सर्वसामर्थ्यविरहलक्षणत्वादवस्तुत्वस्येति सामर्थ्यादर्थक्रियासामर्थ्यलक्षणमेव वस्तुत्वमवतिष्ठते। सा चार्थक्रिया क्षणिकेष्वेव नियता। क्षणिकत्वेनैव व्याप्तेति यावत्। नित्यस्य क्रमयौगपद्याभ्यामर्थक्रियाविरोधात्। अतस्तथा क्षणिकत्वेनावाच्ये पुद्गले वस्तुता नास्ति। तत्र तद्व्यापकस्य क्षणिकत्वस्य निवृत्तेः वृक्षत्वनिवृत्तौ शिंशपात्वादिनिवृत्तिवदिति। यथोक्तम्—अनित्यत्वेन योऽवाच्यः स हेतुर्नहि कस्यचिदिति। स्यादेतद्यदि पुद्गलो नित्यः स्यात्तदा तस्य क्रमयौगपद्याभ्यामर्थक्रियाविरोधः स्यात्, यावता यथाऽसावनित्यत्वेनावाच्यः तथा नित्यत्वेनापीति, अतोऽर्थक्रियासामर्थ्यमस्याविरुद्धमेवेति।तदसम्यक्, न ह्युभयाकारविनिर्मुक्तं वस्तु स्वलक्षणं युक्तम्, नित्यानित्ययोरन्योन्यवृत्तिपरिहारस्थितलक्षणत्वात्। वस्तुन्येकाकारत्यागपरिग्रहयोस्तदपराकारपरिग्रहत्यागनान्तरीयकत्वात्। न ह्यस्माभिरवाच्यशब्दनिवेशनं पुद्गले
129/k प्रतिषिध्यते, स्वतंत्रेच्छा मात्रानीतस्य केनचित्प्रतिषेद्धुमशक्यत्वात्, किंत्विदमिह वस्तुरूपं निरूप्यते। किमसौ पुद्गलाख्यस्य वस्तुनः स्वभावः सर्वदाऽस्त्याहोस्विन्नास्तीति, यद्यस्ति तदा नित्य एवासौ, न हि नित्यो नामान्य एव कश्चित्, अपि तु यः स्वभावः सदाऽवस्थायी न विनश्यति स नित्य उच्यते। यथोक्तम्— नित्यं तमाहुर्विद्वांसो यः स्वभावो न नश्यति इति। अथ नास्तीति पक्षस्तदाऽप्यनित्य एवासावनवस्थायिस्वभावलक्षणत्वादनित्यस्य। अतः क्षणिकाक्षणिकव्यतिरेकेण गत्यन्तराभावादक्षणिकस्य चक्रमयौगपद्याभ्यामर्थक्रियाविरोधात् क्षणिकत्वेनार्थक्रियासामर्थ्यलक्षणं सत्त्वं व्याप्तमिति पुद्गले क्षणिकत्वनिवृत्तौ सत्त्वनिवृत्तिः सिद्धा॥ ३४७॥ § 1241

यद्येवं यदि पुद्गलो नास्त्येव कस्माद्भगवता स जीवस्तच्छरीरमन्यो जीवोऽन्यच्छरीरमिति पृष्टेनोक्तमव्याकृतमेतदिति, यावता नास्त्येवेति कस्मान्नोक्तमित्याह—आगमार्थविरोधे त्वित्यादि। § 1242

आगमार्थविरोधे तु पराक्रान्तं महात्मभिः।
नास्तिक्यप्रतिषेधाय चित्रा वाचो दयावतः॥
३४८ ॥§ 1244

यदि हि पुद्गलो धर्मी सिद्धो भवेत्तदा तस्य तत्त्वान्यत्वादिधर्मोऽव्याकृतमर्हेत्।यावता स एव धर्मी न सिद्धस्तत्कथमसतस्तस्य धर्मो निर्दिश्येत। न ह्य-

२ पृष्टेनो] Correction: ; पृष्टे नो (sic !)पृष्टेनो

सतः खरविषाणादेस्तीक्ष्णतादि संभवति येनासौ व्याक्रियते। अतः प्रज्ञप्तिसत्त्वमेव ख्यापयन्पुद्गलस्याव्याकृतमेतदिति भगवानुवाच। नास्तीत्येवं तु नोक्तम्, परेण धर्मिस्वरूपस्यापृष्टत्वात्। अथवा प्रज्ञप्तिसतोऽप्यभावाभिनिवेशपरिहारार्थं शून्यतादेशनायामभव्यविनेयजनाशयापेक्षया नास्तीत्येव नोक्तम्। यथोक्तम्—दंष्ट्रिदंष्ट्रावभेदं च भ्रंशं चावेक्ष्य कर्मणाम्। देशयन्ति जिना धर्मं व्याघ्रीपोतापहारवत्॥ (?) इति एवमाचार्यवसुबन्धप्रभृतिभिः कोशपरमार्थसप्ततिकादिष्वभिप्रायप्रकाशनात्पराक्रान्तम्, अतस्तत एवावगन्तव्यम्। इह त्वतिग्रन्थविस्तरभिया न लिख्यत इति भावः। यद्येवम्, अस्ति सत्त्व उपपादक इत्येतत्कथं नीयत इत्याह—नास्तिक्येत्यादि। सत्त्वास्तित्वाभिधायिन्यो हि देशनाश्चित्रा दयावतः, न विरुध्यन्त इति वाक्यशेषः। यत्र हि चित्तसन्ताने सत्त्वप्रज्ञप्तिस्तस्यां सत्यामनुच्छेदमभिसन्धायास्ति सत्त्व इत्युक्तं भगवता। अन्यथा ह्यनुपरतकार्यकारणक्षणपरम्पराणामपि संस्काराणामभावावगमात्परलोकिनोऽसत्त्वात्परलोकासिद्धिरिति नास्तिक्यदृष्टयो भवेयुर्विनेयाः॥ ३४८॥ § 1245

130/k

यत्तर्हीदमुक्तम्— भारं वो भिक्षवो देशयिष्यामि भारादानं भारनिक्षेपं भारहारं च। तत्र भारः पञ्चोपादानस्कन्धाः, भारादानं तृष्णा, भारनिक्षेपो मोक्षः, भारहारः पुद्गला इति, तदेतत्कथं नीयते, न हि भार एव भारहारो युक्त इत्याह—समुदायादीत्यादि। § 1246

समुदायादिचित्तेन भारहारादिदेशना।
विशेषप्रतिषेधश्च तद्दृष्टीन्प्रति राजते॥ ३४९॥
इति वात्सीपुत्रीयपरिकल्पितात्मपरीक्षा।§ 1249

तत्र समानकालाः स्कन्धा एव सामस्त्येन विवक्षिताः समुदायव्यपदेशभाजः, त एव हेतुफलभूताश्च युगपत्कालभाविनः सन्तान इति व्यपदिश्यन्ते, एकाकारपरामर्शहेतवश्च संभवन्तः संतानिसमुदायिशब्दाभ्यां निर्दिश्यन्त इत्यतः, समुदायादिचित्तेन—समुदायाद्यभिप्रायेण, भारहारादिदेशना, न विरुध्यत इति शेषः। प्रथमेनादिशब्देन सन्तानादिपरिग्रहः, द्वितीयेन भारादेः। तत्र त एव स्कन्धाः समुदायसन्तानादिरूपेण विवक्षिताः पुद्गलो भारहार इति च व्यपदिश्यन्ते। तत्रैव लोके पुद्गलाभिधानात्। अत एव भगवता— भारहारः कतमः पुद्गल इत्युक्त्वा,योऽसावायुष्मन्नेवंनामा, एवंजातिः, एवंगोत्र, एवमाहार, एवं सुखदुःखं प्रति संवेदी, एवं दीर्घायुरित्यादिना पुद्गलो व्याख्यातः। स एवं स्कन्धसमुदायलक्षणः प्रज्ञप्तिः सन्नन्यथा विज्ञायेत

---

५ यथोक्तम्] Correction: ; यचोक्तम् (sic!)यथोक्तम्
५ दंष्ट्रि] Correction: ; दृष्टि (sic!)दंष्ट्रि
१३ मात्पर] Correction: ; मात्। पर (sic!)मात्पर

नान्यो नित्यो द्रव्यं सन् परपरिकल्पितो विज्ञायेतेति प्रदशार्थं (प्रदेशनार्थः ?) अवश्यं चैवं विज्ञेयम्, अन्यथा भारादीनामपि स्कन्धेभ्यः पृथग्देशितत्वात्पुद्गलवत्स्कन्धानन्तर्गतं तत्स्यात्। तस्मात्त एव स्कन्धा येस्कन्धान्तरस्योत्पादाय वर्त्तन्ते पूर्वकास्ते भार इति कृत्वोक्ताः। ये तूपेष्यन्ते फलभूतास्ते भारहारा इत्युक्ताः इत्यज्ञापकमेतत्। उद्योतकरस्त्वाह—आत्मानमनभ्युपगच्छता नेदं तथागतवचनमर्थवत्तायां शक्यं व्यवस्थापयितुम्, यस्मादिदमुक्तम्। रूपं भदन्त नाहम्, वेदना संज्ञा संस्कारो विज्ञानं भदन्त नाहम्, एवमेतद्भिक्षो रूपं न त्वम्, वेदना संज्ञा संस्कारो विज्ञानं न त्वमिति। एतेन हि रूपादयः स्कन्धा अहङ्कारविषयत्वेन प्रतिषिद्धाः। विशेषप्रतिषेधश्चायं न सामान्यप्रतिषेधः। आत्मानं चानभ्युपगच्छता सामान्येनैव प्रतिषेद्धव्यम्। नैव त्वमसीति। विशेषप्रतिषेधस्त्वन्यविधिनान्तरीयको भवति। यथा वामेनाक्ष्णा न 131/k पश्यामीत्युक्ते गम्यत एव दक्षिणेन पश्यामीति। तेनाप्यदर्शने वामग्रहणमनर्थकम्, न पश्यामीत्येव वाच्यं स्यात्। तथेहापि न रूपमात्मा यावन्नहि विज्ञानमात्मेत्युक्ते तद्विलक्षणोऽस्त्यात्मेति सूचितं भवति। स चावाच्योऽन्यो वा भवतु सर्वथाऽस्त्यात्मेति। अत्राह—विशेषप्रतिषेधश्चेत्यादि। एतदुक्तं भवति। विंशतिशिखरसमुद्गतोऽयं सत्कायदृष्टिशैलः कुमतीनां प्रवर्त्तते। यदुत रूपमात्मा, यावद्विज्ञानमात्मा, रूपवानात्मा, यावद्विज्ञानवानात्मा, आत्मनि रूपं यावद्विज्ञानमात्मनीति। तत्राद्यदृष्टिपञ्चकप्रतिषेधाय तद्दृष्टिकान्प्रति विशेषरूपेण प्रतिषेधः शोभते। सारूपमात्मेत्यादिका दृष्टिर्येषां ते तद्दृष्टिकाः। यदेव हि मूढमतेराशङ्कास्थानं तदेवानूद्य निवर्त्त्यते। न त्वत्र कस्यचिद्विधिरभिप्रेतः। अन्यथा ह्यश्रोतृसंस्कारकं वाक्यं ब्रुवाणोऽप्रेक्षावानेव प्रतिपादकः स्यादिति॥ ३४९॥ § 1250

इति वात्सीपुत्रीयात्मपरीक्षा।

०.९ स्थिरभावपरीक्षा।

चलमित्येतद्विशेषणसमर्थनार्थमाह—अथवेत्यादि। § 1252

अथवाऽस्थान एवायमायासः क्रियते यतः।
क्षणभङ्गप्रसिद्ध्यैव प्रकृत्यादि निराकृतम्॥
३५०॥ § 1254

उक्तस्य वक्ष्यमाणस्य जात्यादेश्चाविशेषतः।

निषेधाय ततः स्पष्टं क्षणभङ्गः प्रसाध्यते॥

३५१ ॥§ 1256

निरवशेषपदार्थव्यापिनः क्षणभङ्गस्य प्रसाधनादेव प्रकृतीश्वरादेः परपरिकल्पितस्य सकलपदार्थराशेरेकप्रहारेणैव निरस्यमानस्यापि सतो यदिदमस्माकमतिग्रन्थविस्तरसंदर्भेण प्रतिपदमुच्चार्य दूषणोपक्रमणं तत्केवलमायासफलमेव, स्वल्पोपायेनैव तस्य दूषितत्वादिति भावः। तथा हि—सर्वमेव प्रकृत्यादि परैरुदयानन्तरापवर्गि निरन्वयनिरोधधर्मकं वा कैश्चिन्नेष्यते। तत्तश्चैतत्समस्तवस्तुव्यापकक्षणभङ्गप्रसाधनेनैव निरस्तं भवतीति मन्यमानैरस्माभिरुक्तस्य प्रकृत्यादेः पुद्गलपर्यन्तस्य वक्ष्यमाणस्य च जातिगुणद्रव्यादेः शब्दार्थयोः प्रमाणप्रमेययोर्मेचकादिमणिप्रख्यचित्रस्य वस्तुनस्त्रिकालानुयायिनो भावस्य चार्वाकाद्युपगतस्य च भूतचतुष्टयस्य जैमिनीयेष्टस्य च वैदिकशब्दराशेर्निरासाय विशेषेण क्षणभङ्गः प्रसाध्यते। स्पष्टमिति। तत्साधकस्य हेतोस्त्रिरूपस्य प्रदर्शनात्। अतोऽस्यामेव स्थिरभावपरीक्षायां सकलशास्त्रार्थपरिसमाप्तिर्भवतीत्युक्तं भवति॥ ३५०॥ ३५१॥ § 1257

132/k

कथमसौ प्रसाध्यत इत्याह—कृतकाकृतकत्वेनेत्यादि। § 1258

कृतकाकृतकत्वेन द्वैराश्यं कैश्चिदिष्यते।
क्षणिकाक्षणिकत्वेन भावानामपरैर्मतम्॥

३५२ ॥§ 1260

इह हि नैयायिकादयः क्षणिकमेकमपि वस्तु नास्तीति मन्यमानाः कृतकाकृतकत्वेन भावानां द्वैराश्यमवस्थापयन्ति। तत्र—केचित्कृतका यथा घटादयः, केचिदकृतका यथा परमाण्वाकाशादयः। अपरैस्तु वात्सीपुत्रीयादिभिः क्षणिकाक्षणिकत्वेनापि भावानां द्वैराश्यमिष्यते। तथाहि—बुद्धिशब्दार्चिःप्रभृतयस्तन्मतेन क्षणिकाः, क्षितिव्योमादयस्त्वक्षणिका इति॥ ३५२॥ § 1261

तदेवं दर्शनविभागेऽवस्थिते ये कृतकत्वेनाभीष्टास्तांस्तावत्पक्षीकृत्य प्रमाणमभिधीयत इति दर्शयन्नाह—तत्रेत्यादि। § 1262

तत्र ये कृतका भावास्ते सर्वे क्षणभङ्गिनः।
विनाशं प्रति सर्वेषामनपेक्षतया स्थितेः॥

३५३ ॥§ 1264

विनाशं प्रति सर्वेषां हेत्वन्तरानपेक्षतया स्थितत्वादित्यनेन हि त्रिलक्षणो हेतुः सूचितस्तमेव स्पष्टयन्नाह—यद्भावं प्रतीत्यादि। § 1265

यद्भावं प्रति यन्नैव हेत्वन्तरमपेक्षते।
तत्तत्र नियतं ज्ञेयं स्वहेतुभ्यस्तथोदयात्॥
३५४॥§ 1267

निर्निबन्धा हि सामग्री स्वकार्योत्पादने यथा।
विनाशं प्रति सर्वेऽपि निरपेक्षाश्च जन्मिनः॥
३५५॥§ 1269

प्रयोगः—ये यद्भावं प्रत्यनपेक्षास्ते तद्भावनियताः। यथा समनन्तरफला सामग्री स्वकार्योत्पादने नियता। विनाशं प्रत्यनपेक्षाश्च सर्वे जन्मिनः कृतका भावा इतिस्वभावहेतुः। हेत्वन्तरमिति। जनकाद्व्यतिरिक्तम्। नियतमित्यत्र कारणमाह—स्वहेतुभ्य इति। तथा—तेन नियतेन रूपेणोत्पन्नत्वादित्यर्थः। ये तु पुनर्यत्र ननियतास्ते तत्रानपेक्षा अपि न भवन्त्येव, यथा घटादयोऽपक्वाः पाकादिष्वितीदमत्र वैधर्म्येणोदाहरणम्॥ ३५३॥ ३५४॥ ३५५॥ § 1270

ननु चानैकान्तिको हेतुस्तथाहि—यदि नाम विनाशं प्रति हेत्वन्तरानपेक्षा भावास्तथाऽपि स्थित्वा देशान्तरे कालान्तरे च भावस्य विनाशसंभवादुदयानन्तरापवर्गित्वमभीष्टमेषां साधयितुं न सिध्यतीत्याह—अनपेक्षोऽपीत्यादि। § 1271

133/k

अनपेक्षोऽपि यद्येष देशकालान्तरे भवेत्।
तदपेक्षतया नैष निरपेक्षः प्रसज्यते॥ ३५६॥§ 1273

एष इति। विनाशः। तदपेक्षतयेति। देशकालान्तरापेक्षतया। यो हि यत्रानपेक्षः स यदि क्वचिद्भवेत्, कदाचिद्वा, तदा तद्देशकालापेक्षत्वादनपेक्ष एव न स्यादिति कुतो व्यभिचारः। तथा हि—एकदेशकालापरिहारेणान्यत्र देशकालादौ वर्त्तमानः कथमनपेक्षो नाम, यतस्तथावृत्तिरेव तस्यापेक्षा, न तु समीहा, तस्याभिप्रायशून्यत्वात्॥ ३५६॥ § 1274

यदि तर्हि सर्वथा निरपेक्षत्वादिति हेत्वर्थोऽभिप्रेतः, त तर्हि हेतुः सिद्धः। तथाहि —केचिद्विनाशं प्रति मुद्गरादिकमपेक्षमाणा दृश्यन्ते। यथा घटादयः। येऽपि बुद्धिशब्दादयोऽनपेक्षत्वेन प्रसिद्धास्तेऽपि यदि नाम मुद्गरादिकं नापेक्षन्ते तथाऽपि देशकालावपेक्षन्त इत्यतोऽसिद्धता हेतोरित्याशङ्क्य परिहरन्नाह—सर्वत्रैवेत्यादि। § 1275

सर्वत्रैवानपेक्षाश्च विनाशे जन्मिनोऽखिलाः।
सर्वथा नाशहेतूनां तत्राकिञ्चित्करत्वतः॥
३५७॥§ 1277

सर्वत्रेति। सर्वस्मिन्देशकालादिके विनाशहेतौ निरपेक्षा जन्मिन इत्यर्थः। नाशहेतुत्वेनाभ्युपेतानामकिंचित्करत्वादनुपकारित्वात्, न चानुपकार्यपेक्षो युक्तोऽतिप्रसङ्गात्॥ ३५७॥ § 1278

कथमकिंचित्करत्वमित्याह—तथाहीत्यादि। § 1279

तथाहि नाशको हेतुर्न भावाव्यतिरेकिणः।
नाशस्य कारको युक्तः स्वहेतोर्भावजन्मतः॥
३५८॥§ 1281

विनाशो हि क्रियमाणः कदाचिद्वस्तु वा स्यादवस्तु वा, तत्र यदि वस्तु, तदाऽसौ विनाशहेतुना ततो विनाशहेतोर्भावादनर्थान्तरभूतो वा क्रियेत, अर्थान्तरभूतो वा। वस्तुसतो विकल्पद्वयानतिवृत्तेरुभयानुभयपक्षस्त्वयुक्त एव। वस्तुन्येकाकारत्यागपरिग्रहयोस्तदपराकारपरिग्रहत्यागनान्तरीयकत्वात्। एकस्य विधिप्रतिषेधो(भया) योगादित्युक्तम्। तत्र न तावदनर्थान्तरभूत इति पक्षः, भावस्वभावस्य स्वहेतोरेव जन्मत उत्पत्तेः। तस्यापि भाववत्तदव्यतिरेकिणो निष्पन्नत्वात्। न च निष्पन्नस्य कारणं युक्तम्, करणाविरामप्रसङ्गात्॥ ३५८॥ § 1282

स्यादेतन्नासौ भावः स्वहेतोः सर्वात्मना निष्पन्नोऽतः कारणान्तरतो नाशाख्यं स्वभावान्तरं लभत इत्याह—न चानंश इत्यादि। § 1283
134/k

न चानंशे समुद्भूते भावात्मन्यात्महेतुतः।
तदात्मैव विनाशोऽन्यैराधातुं पार्यते पुनः॥
३५९॥§ 1285

न ह्येकस्य स्वभावद्वयमस्ति, येनांशेन निष्पत्तिः स्यात्, किं तु निरंश एव भावः स च स्वहेतोरुत्पद्यमानः सर्वात्मनैवोत्पन्न इति कथं तस्योत्तरकालं कारणान्तरैः स्वभावान्तरमाधीयेत। न हि यन्निष्पत्तौ यो न निष्पन्नः स तस्य स्वभावो युक्तः, एकयोगक्षेमलक्षणत्वादभेदस्य, तस्माद्योऽसावुत्तरकालमुत्पद्यते नाशात्मा भावः सोऽपरः स्वभावः, यश्चापरः स कथं तस्य भवेदिति यत्किंचिदेतत्॥ ३५९॥ § 1286

३ भावा] Correction: ; भवा (sic!)भावा

अथार्थान्तरभूत इति पक्षस्तत्राप्यकिंचित्कर एव विनाशहेतुर्भावस्येति दर्शयति —पदार्थव्यतिरिक्त इत्यादि। § 1287

पदार्थव्यतिरिक्ते तु नाशनाम्नि कृते सति।
भावे हेत्वन्तरैस्तस्य न किंचिदुपजायते॥
३६० ॥§ 1289

तेनोपलम्भकार्यादि प्राग्वदेवानुषज्यते।
तादवस्थ्याच्च नैवास्य युक्तमावरणाद्यपि॥
३६१ ॥§ 1291

न ह्यन्यस्य करणेऽन्यदुपकृतं नाम, अतिप्रसङ्गात्। नापि तत्संबन्धिनो नाशस्य करणाद्भाव उपकृतो भवतीति युक्तं वक्तुम्, संबन्धासिद्धेः। तथाहि—भेदाभ्युपगमान्न तादात्म्यलक्षणः संबन्धः, नापि तदुत्पत्तिलक्षणः, विनाशहेतोरेव तदुत्पत्तेः, नचान्यो वास्तवः संबन्धोऽस्ति। सत्यपि वा संबन्धे भावस्यावस्थितत्वात्तथैवोपलम्भादिकार्यप्रसङ्गः। उपलम्भ एव कार्यम्। आदिशब्देन जलसंधारणजङ्घाभङ्गादिपरिग्रहः। तेन व्यतिरिक्तेन नाशेनावृतत्वात्प्रतिबद्धत्वाद्वा नोपलम्भादिकार्यं करोतीति चेदाह—तादवस्थ्यादित्यादि। न हि भावस्य स्वभावातिशयमखण्डयन्ननुत्पादयन्वातस्याऽऽवारकः प्रतिबन्धको वा युक्तोऽतिप्रसङ्गात्। तस्मा(द)त्यक्तानावृताप्रतिबद्धपूर्वस्वभावत्वात्तस्यावरणं प्रतिबन्धश्च न युज्यते॥ ३६०॥ ३६१॥ § 1292

स्यादेतन्न प्राग्वदुपलब्ध्यादिप्रसङ्गः, तेन व्यतिरिक्तेन नाशेन भावस्य विनाश्यमानत्वादित्याह—नाशनाम्नेत्यादि। § 1293

नाशनाम्ना पदार्थेन भावो नाश्यत इत्यसत्।
अन्यत्वादिविकल्पानां तत्राप्यर्थानुवृत्तितः॥
३६२ ॥§ 1295

नाशो हि भावं नाशयन्किमन्यमनन्यं वा, यद्वा प्रध्वंसलक्षणं नाशं
135/k कुर्वाणो नाशयति मुद्गरादिवदित्यत्रापि तुल्या एव विकल्पाः पुनरावर्तन्ते। तत्र चोक्तो दोषः, वक्ष्यते च तत्रापीति। योऽसौ नाशनाम्नाऽपरो नाशः क्रियते तत्रापि। अर्थानुवृत्तित इति। अन्यत्वादिविकल्पानामनुवृत्तेरित्यर्थः। एवं तावद्वस्तुभूतो न क्रियत इति प्रतिपादितम्॥ ३६२॥ § 1296

६ मावरणाद्यपि] Correction : ; माचरणादपि (sic !)मावरणाद्यपि

नाप्यवस्तुभूत इति दर्शयन्नाह—भावाभावात्मक इत्यादि। § 1297

भावाभावात्मको नाशः प्रध्वंसापरसंज्ञकः।
क्रियते चेन्न तस्यापि करणं युक्तिसंगतम्॥
३६३॥§ 1299

अभावस्य च कार्यत्वे वस्तुतैवाङ्कुरादिवत्।
प्रसक्ताजन्यरूपस्य हेतुशक्त्या समुद्भवात्॥
३६४॥§ 1301

भावस्य हि करणं भवति नाभावस्य, निमित्तीकर्त्तव्यसकलस्वभावविरहलक्षणत्वान्नकिंचिदुत्पाद्यं रूपमस्ति। अतो भावाभावात्मकः—भावनिषेधात्मको नाशो न केनचित्क्रियते, अवस्तुत्वात्, खरविषाणवत्। अन्यथा हि कार्यत्वादङ्कुरादिवद्वस्तुत्वमेवस्यात्। प्रयोगः—यत्कार्यं तदुस्तु यथाऽङ्कुरादयः, कार्यश्च नाश इति स्वभावहेतुः। व्याप्तिमस्य साधयन्नाह—हेतुशक्त्या समुद्भवादिति। तदेव हि कार्यमुच्यते। यत्कारणशक्त्या विशिष्टमात्मातिशयमासादयति। समासादितात्मातिशयमेव च वस्तु। अत्र चार्थे नैयायिकादेरप्यविवादः। तथाहि—सत्तासमवायः स्वकारणसमवायो वा कार्यत्वमुच्यते। न च नाशे सत्तासमवायः स्वकारणसमवायो वा, तस्य द्रव्यादिवदस्तित्वाश्रयत्वप्रसङ्गात्॥ ३६३॥ ३६४॥ § 1302

यद्येवं भवतु वस्तुत्वं नाशस्य तत्र को दोष इत्याह—विधिनैवमित्यादि। § 1303

विधिनैवमभावश्च पर्युदासाश्रयात्कृतः।
यस्तत्र व्यतिरेकादिविकल्पो वर्त्तते पुनः॥
३६५॥§ 1305

कथं पुनरभावस्य विधिना करणमित्याकाङ्क्षायामिदमुक्तम्—पर्युदासाश्रयादिति।पर्युदासस्याश्रयणादित्यर्थः। विवक्षावशाद्धि कुतश्चन भावाद्विलक्षणो भाव एवाभाव इत्याख्यायते, तत्र च व्यतिरेकादिविकल्पे प्राक्तनो दोषः पुनरावर्त्तते॥ ३६५॥ § 1306

४ वस्तुते] Correction : ; वस्तुने (sic !)वस्तुते

अथैतद्दोषभयान्न पर्युदासात्मकोऽभावो विनाशहेतुभिः क्रियते, किं तर्हि? प्रसज्य(प्रतिषेधा)त्मक इत्यङ्गीक्रियते। तत्रापि विनाशहेतोः स्फुटतरमेवाकिंचित्करत्वंप्रतिपादितमिति दर्शयन्नाह—अथेत्यादि। § 1307

136/k

अथ क्रियानिषेधोऽयं भावं नैव करोति हि।
तथाप्यहेतुता सिद्धा कर्तुर्हेतुत्वहानितः॥ ३६६॥§ 1309

तथाहि—प्रसज्यप्रतिषेधे सति नञः करोतिना संबन्धादभावं करोति भावं न करोतीति क्रियाप्रतिषेधादकर्तृत्वं नाशहेतोः प्रतिपादितं भवेत्, यश्चाकर्त्ता स कथं हेतुः स्यादित्यतो न विनाशहेतुः कश्चित्॥ ३६६॥ § 1310

अत्राविद्धकर्णोक्तानि विनाशस्य हेतुमत्वसाधने प्रमाणानि निर्दिदिक्षुराह—नन्वित्यादि। § 1311

ननु नैव विनाशोऽयं सत्ताकालेऽस्ति वस्तुनः।
न पूर्वं न चिरात्पश्चाद्वस्तुनोऽनन्तरं त्वसौ॥
३६७॥§ 1313

एवं च हेतुमानेष युक्तो नियतकालतः।
कादाचित्कत्वयोगो हि निरपेक्षे निराकृतः॥
३६८॥§ 1315

तथाहि न वस्तुनः सत्ताकाले निनाशः क्षणमात्रावस्थायिनोऽप्यभावप्रसङ्गात्, नाप्युत्पादात्पूर्वम्, अजातस्य विनाशायोगात्, न हि वन्ध्यापुत्रादयोऽनुत्पन्ना एव विनश्यन्ति, पश्चादपि भवन्नचिराद्भवति, तृतीयादिषु क्षणेषु विनष्टस्य पुनर्विनाशायोगात्, भस्मीकृतज्वलनवत्, किन्तु वस्त्वनन्तरं द्वितीये क्षणे विनाशः। ततश्चनियतकालत्वाद्धेतुमान्विनाशोऽङ्कुरादिवदिति सिद्धम्। नियतकालत इति। कादांचित्कत्वादित्यर्थः। व्याप्तिमस्य साधयन्नाह—कादाचित्कत्वयोगो हीत्यादि। नह्यनपेक्षे कादाचित्कत्वं युक्तम्, नित्यं सत्त्वादिप्रसङ्गात्। तस्मात्कादाचित्कत्वात्सिद्धमस्य सहेतुत्वम्॥ ३६८॥ § 1316

इतोऽपि सिद्धमिति दर्शयति—वस्त्वनन्तरभावाच्चेत्यादि। § 1317

वस्त्वनन्तरभावाच्च हेतुमानेव युज्यते।

अभूत्वाभावतश्चापि यथैवान्यः क्षणो मतः॥
३६९॥§ 1319

तदेवमेते त्रयो हेतव उक्ताः। सहेतुको विनाशः, कादाचित्कत्वात्, वस्तूत्पत्त्यनन्तरभावित्वेन बौद्धैरभ्युपगम्यमानत्वात्, प्रागभूत्वाऽऽत्मलाभाच्च; क्षणान्तरवत्। वैधर्म्येण शशविषाणादय इति॥ ३६९॥ § 1320

उद्योतकरोक्तामपि युक्तिमाह—अहेतुकत्वादित्यादि। § 1321

अहेतुकत्वात्किंचायमसन्वन्ध्यासुतादिवत्।
अथवाऽऽकाशवन्नित्यो न प्रकारान्तरं यतः॥
३७०॥§ 1323

137/k

असत्त्वे सर्वभावानां नित्यत्वं स्यादनाशतः।
सर्वसंस्कारनाशित्वप्रत्ययश्चानिमित्तकः॥
३७१॥§ 1325

नित्यत्वेऽपि सह स्थानं विनाशेनाविरोधतः।
अजातस्य च नाशोक्तिर्नैव युक्त्यनुपातिनी॥
३७२॥§ 1327

स ह्येवमाह—विनाशस्य हेतुर्नास्तीति ब्रुवाणः पर्यनुयोज्यः। किमकारणत्वाद्विनाशो नास्ति व्योमोत्पलादिवत्, अथाकारणत्वान्नित्यो व्योमादिवदिति। भवतां हि पक्षे अकारणं द्विधा दृष्टं नित्यमसच्च, न हि सत्त्वासत्त्वव्यतिरेकेण प्रकारान्तरमस्ति। तत्र यद्यकारणत्वादसत् विनाशः, तदा सर्वभावानां नित्यत्वप्रसङ्गः, विनाशाभावात्। किंच सर्वसंस्कारा विनश्यन्तीत्येष प्रत्ययो निर्निमित्तः प्राप्नोति, न ह्यसत्यां गतौ गच्छतीति भवति। अथ नित्यः, तदा भावस्य विनाशेन सहावस्थानं प्राप्नोति, सर्वदाऽवस्थानात्। न चैतद्युक्तं भावाभावयोः परस्परपरिहारस्थितलक्षणत्वात्। अथ सहावस्थानं नेष्यते, तदा कार्यस्योत्पादो न प्राप्नोति, तत्प्रत्यनीकभूतस्य नाशस्य सदाऽवस्थितत्वात्। ततश्चाजातस्य विनाशोऽपि न संगच्छते, न ह्यजाताः शशविषाणादयो विनश्यन्तीति लोके प्रतीतम्, तेनाजातस्य विनाश इति वचनं नैव युक्त्यनुपाति॥ ३७०॥ ३७१॥ ३७२॥ § 1328

तदत्रेत्यादिना सर्वं प्रतिविधत्ते— § 1329

तदत्र कतमं नाशं परे पर्यनुयुञ्जते।
किं क्षणस्थितिधर्माणं भावमेव तथोदितम्।§ 1331

अथ भावस्वरूपस्य निवृत्तिं ध्वंससंज्ञिताम्।
पूर्वपर्युनुयोगे हि नैव किञ्चिद्विरुध्यते॥ ३७४॥§ 1333

द्विविधो हि विनाशो विधिः प्रतिषेधलक्षणः। तथाहि—क्षणस्थितिधर्मा भाव एव चलो विनश्यतीति कृत्वा विनाश इत्याख्यायते। यद्वा भावस्वभावप्रच्युतिलक्षणप्रध्वंसापरनामा विनशनं विनाश इति। तत्र पूर्वस्मिन्नाशे यद्ययं हेतुमत्वसाधनपर्यनुयोगः क्रियते यथोक्तैर्हेतुभिः, तदा सिद्धसाध्यता॥ ३७३॥ ३७४॥ § 1334

तामेव सिद्धसाध्यतां यो हीत्यादिना दर्शयति— § 1335

यो हि भावः क्षणस्थायी विनाश इति गीयते।
तं हेतुमन्तमिच्छामः पराभावात्वहेतुकम्॥
३७५॥§ 1337

138/k

यद्येवं कथमहेतुको विनाशो भवतां प्रतीत इत्याह—पराभावात्वहेतुकमिति। परस्य स्वकारणव्यतिरिक्तस्योत्तरकालं मुद्गरादेर्नाशकस्याभावादहेतुकमिच्छाम इति प्रकृतेन संबन्धः॥ ३७५॥ § 1338

अत्र चैवंभूते विनाशे धर्मिणि कादाचित्कत्वात्प्रागभूत्वाऽऽत्मलाभादितीमौ हेतू सिद्धौ। वस्त्वनन्तरभावित्वमपि यदि सामान्येन विवक्षितं तदा सिद्धमेव, कारणभूतवस्त्वनन्तरमस्य भावप्रसिद्धेः। अथात्मभूतविनश्वरवस्त्वनन्तरभावित्वमस्य विवक्षितं तदा हेतुरसिद्ध इति दर्शयति—वस्त्वनन्तरभावित्वमित्यादि।
§ 1339

वस्त्वनन्तरभावित्वं न तत्र त्वस्ति तादृशि।
चलभावस्वरूपस्य भावेनैव सहोदयात्॥
३७६॥§ 1341

तादृशीति चलवस्तुस्वभावाव्यतिरेकिणि। न हि निरंशवस्तुनो भागोऽस्ति येन तदनन्तरभावित्वमस्य भवेत्। तत्स्वभाववत्तदव्यतिरेकिणो नाशस्य त-

५ विधिः] Correction : ; विधेः (sic !)विधिः

न्निष्पत्तावेव निष्पन्नत्वात्। अन्यथा तत्स्वभावत्वमेव तस्य न स्यादित्युक्तम्॥ ३७६॥ § 1342

यच्चोक्तं "सर्वसंस्कारनाशित्वप्रत्ययश्चानिमित्तक"इति, तदप्यत एव प्रतिक्षिप्तमिति दर्शयति—अत इति। § 1343

अतो विनाशसद्भावान्न नित्याः सर्वसंस्कृताः।
न विनाशीतिबुद्धिश्च निर्निमित्ता प्रसज्यते॥
३७७॥§ 1345

यत एव हि क्षणस्थितिधर्माणः पदार्थास्तथाऽध्यवसीयमानतनवस्तस्या बुद्धेर्निमित्तमतो नानिमित्तत्वप्रसङ्गः॥ ३७७॥ § 1346

अथ प्रध्वंसलक्षणो विनाशो धर्म्यभिप्रेतस्तदा त्रयोऽपि हेतवोऽसिद्धा इति दर्शयति—प्रध्वंसस्येत्यादि। § 1347

प्रध्वंसस्य तु नैरात्म्यान्नास्त्यनन्तरभाविता।
नाभूत्वाभावयोगस्य गगनेन्दीवरादिवत्॥
३७८॥§ 1349

वस्तुन्येव ह्यनन्तरभावित्वादयो धर्माः समाश्रिता नावस्तुनि यथा शशविषाणादौ, प्रध्वंसश्च निरात्मा—निःस्वभावः, तत्कथमस्यानन्तरभावित्वादयः संभवेयुः। नाभूत्वा भावयोगश्चेति। चकारात्कादाचित्कत्वपरिग्रहः॥ ३७८॥ § 1350

यद्येवम्—यदि ध्वंसस्यानन्तरभावित्वं नास्ति, तदा भावस्य ध्वंसो भवतीति (कथम्)। न हि यो न भवत्येव तस्य भवतीति स्यादित्याशङ्क्याह—प्रध्वंस इत्यादि। § 1351
139/k

प्रध्वंसो भवतीत्येव न भावो भवतीत्ययम्।
अर्थः प्रत्याय्यते त्वत्र न विधिः कस्यचिन्मतः॥
३७९॥§ 1353

यद्यपि ध्वंसो विधीयमानतया निर्दिश्यते, तथाऽपि भावनिषेध एव प्रतीयते, न परमार्थतः कस्यचिद्वस्तुरूपस्य विधिः॥ ३७९॥ § 1354

ननु चैत्रस्य पुत्रो भवतीत्यादिवद्भवतिशब्दप्रयोगादत्रापि भवनमेव विधीयत इत्याह—न हीत्यादि। § 1355

न हि बालेय इत्येवन्नाममात्रे कृते क्वचित्।
सर्वो रासभधर्मोऽस्मिन्प्रसक्तिं लभते नरे॥
३८० ॥§ 1357

न हि वस्तूनां शब्दप्रयोगमात्रानुविधायिनी सदसत्त्वे, तस्येच्छामात्रप्रतिबद्धप्रवृत्तित्वात्। अन्यथा हि क्वचित्पुंसि केनचिदिच्छावशाद्बालेय इति नाम्नि निवेशिते सर्वस्य गर्दभधर्मस्य तत्र प्रसङ्गः स्यात्। बालेयरासभशब्दौ गर्दभपर्यायौ॥ ३८०॥ § 1358

अवश्यं चैतद्विज्ञेयम्, यदुत वस्तुस्वभावनिषेध एव न तु किंचिद्विधीयत इति— § 1359

ध्वंसनाम्नः पदार्थस्य विधाने पुनरस्य न।
वस्तुनो जायते किञ्चिदित्येतत्किं निवर्त्तते॥
३८१ ॥§ 1361

अन्यथआ ध्वंसाख्यस्य पदार्थान्तरस्य विधाने सति न किंचिद्वस्तुनो जातमिति तद्वस्तु किमिति निवर्त्तते॥ ३८१॥ § 1362

यच्चोक्तमसत्त्वे सर्वभावानामित्यादि, तत्राह—भावध्वंसात्मनश्चैवमित्यादि। § 1363

भावध्वंसात्मनश्चैवं नाशस्यासत्त्वमिष्यते।
वस्तुरूपवियोगेन न भावाभावरूपतः॥ ३८२॥§ 1365

एवमिति। वस्तुस्वभाववियोगरूपत्वात्, न तु भावस्वभावस्य सतः स्वरूपनिवृत्तेरसत्त्वम्, तत्कथं सर्वभावानां नित्यत्वं स्यात्, यदि हि स्वभावनिषेधलक्षणो विनाशस्तेषामसन् स्यात्तदा नित्यत्वमेषां स्यात्। यावता स्वभावनिषेधलक्षणो नाशः स्वयमसद्रूपस्तेषामस्त्येवेति कथं नित्या भवेयुः। सर्वसंस्कारनाशित्वप्रत्ययस्य तु निमित्तमभिहितमेव॥ ३८२॥ § 1366

यच्चोक्तं नित्यत्वेऽपि सहस्थानमित्यादि, तत्राह—निवृत्तिरूपतेत्यादि। § 1367

निवृत्तिरूपताऽप्यस्मिन्विधिना नाभिधीयते।
वस्तुरूपानुवृत्तिश्च क्षणादूर्ध्वं निषिध्यते॥
३८३ ॥§ 1369

140/k

अतो व्यवस्थितं रूपं विहितं नास्य किंचन।
इति नित्यविकल्पोऽस्मिन्क्रियमाणो निरास्पदः॥
३८४॥§ 1371

निवृत्तिर्भवतीत्यनेनापि वचनेनास्मिन्प्रध्वंसे विधिरूपेण निवृत्तिरूपता नाभिधीयते, यतो नास्य विधेयं किंचिद्रूपमस्ति। किं तर्हि? वस्तुस्वरूपस्य क्षणादूर्ध्वं स्वभावानुवृत्तिर्निषिध्यते। तस्मादयमेकान्तेनाभावरूप एवेति नित्यविकल्पोऽनास्पद एव, निःस्वभावत्वादेव सदा व्यवस्थितरूपायोगात्। स्वभावप्रतिबद्धत्वान्नित्यानित्यस्वभावप्रतिबद्धधर्मयोः। यच्चोक्तमकारणं भवतां द्विधा नित्यमसच्चेति तत्परसिद्धान्तानभिज्ञतया, यतो न्यायवादिनां बौद्धानामकारणमसदेव। यथोक्तं भगवता—सधर्मेषुधर्मानुदर्शी विहरन् बोधिसत्त्वोऽणुमपि धर्मं न समनुपश्यति। यः प्रतीत्य समुत्पादविनिर्मुक्त इति। ये च वैभाषिकाः आकाशादिवस्तु सत्त्वेन कल्पयन्ति ते युष्मत्पक्षएव निक्षिप्ता न शाक्यपुत्रीया इति न तन्मतोपन्यासो द्यायात्। एवं नाशहेतूनांसर्वेषामकिञ्चित्करत्वान्नासिद्धता हेतोः। इतश्च नाशहेतूनामकिंचित्करत्वं वक्तव्यम्। तथाहि—भावः स्वहेतोरुत्पद्यमानः कदाचित्प्रकृत्या स्वयं नश्वरात्मैवोत्पद्यते, अनश्वरात्मा वा। यदि नश्वरस्तस्य न किञ्चिन्नाशहेतुता, स्वयं तत्स्वभावतयैव नाशात्। यो हि यस्य स्वभावः स स्वहेतोरेवोत्पद्यमानस्तादृशो भवति न पुनस्तद्भावे हेत्वन्तरमपेक्षते। यथा प्रकाशद्रवोष्णकठिनादयस्तदात्मान उत्पन्ना न पुनः प्रकाशादिभावहेत्वन्तरमपेक्षन्ते। स्यादेतत्—यथा बीजादयोऽङ्कुरादिजननस्वभावाः सन्तोऽपि न केवला जनयन्ति सलिलादिकारणान्तरापेक्षत्वात्, तद्वद्भावोनश्वरस्वभावोऽपि नाशे कारणान्तरापेक्षो भविष्यतीति। तदेतदसम्यक्। अन्त्यावस्थाप्राप्तस्यैव जनकस्वभावत्वाभ्युपगमात्, नान्यस्य। तेन योऽसौ तत्स्वभावः स जनयत्येव, नासौ परमपेक्षते। यस्तु कुशूलादिस्थो न जनयति नासौ तत्स्वभावः। कारणकारणत्वात्तु तस्यापि कारणव्यपदेशो न मुख्यत इति नास्ति व्यभिचारः। अथानश्वरात्मेति पक्षस्तदापि नाशहेतुरकिंचित्कर एव। तस्य केनचित्स्वभावान्यथाभावस्य कर्तुमशक्यत्वात्। तथाहि। यदि स्वभाव उत्पादानन्तरं न विनश्येत्तदा पश्चादपि स एव तस्य स्थितिधर्मा स्वभावस्तदवस्थ इति किं नाशहेतुना तस्य कृतम्, येन विनश्येत। अथापि स्यात्—यथा ताम्रादीनां कठिनरूपाणामपि सतामग्न्यादिसंपर्कादन्यथात्वं भवति। तथा भावस्याविनश्वरस्वभावस्यापि सतो विनाशहेतुनाऽन्यथात्वं क्रियते। तेन विनाशहेतुं प्राप्य विनश्यतीति। तदेतदसम्यक्। न हि स 141/k
एवान्यथा भवति। स्वभावान्तरोत्पत्तिलक्षणत्वादन्यथात्वस्य। तथाहि—यत्तद-

२० नश्वर] Correction: ; ऽनश्वर (sic!)नश्वर

न्यथात्वं नाम तत्किं भावादर्थान्तरमाहोस्विद्भाव एव, न तावद्भाव एव, तस्य स्वहेतोरेव पूर्वं निष्पन्नत्वात्। अथार्थान्तरम्, तथा सति भावोऽच्युतिधर्मा तथैवावस्थित इति न तस्यान्यथाभावः। ताम्रादिदृष्टान्तोऽप्यसिद्ध एव तथाहि—ताम्रादीनां पूर्वकस्य कठिनादिक्षणस्य स्वरसनिरोधित्वाद्विनाशे सत्यदग्न्यादेः सहकारिकारणान्तरात्स्वोपादानकारणाच्च सामग्र्यन्तराद्द्रवाख्यमपरमेव स्वभावान्तरमुत्पद्यते। पुनरपि द्रवादिस्वभावस्य स्वरसनिरोधितया विनाशे सति सहकारिकारणान्तरात्स्वोपादानकारणाच्च काठिन्याख्यमपरमेव स्वभावान्तरमुत्पद्यत इति नैकस्यान्यथात्वमस्ति। तस्मात्सर्वथाऽप्यकिंचित्कर एव नाशहेतुरिति नासिद्धो हेतुः। नचापि विरुद्धः, स्वपक्षे भावात्। नचाप्यनैकान्तिकः, पूर्वं प्रसाधितत्वात्। स्यादेतत्—यथाऽऽकाशं मूर्त्तत्वाय न परमपेक्षते अथ च तत्र नियतं न भवति, तद्वद्भावः कृतकोऽपि सन्कश्चिन्नैव नाशे नियतो भविष्यतीति। तदेतदसम्यक्। नहि स कश्चित्कृतकोऽस्ति यः परेणानित्यो नेष्यते। हेतुमतः सर्वस्यानित्यत्वाभ्युपगमात्। त एव चेह पक्षीकृता नान्य इति कुतोऽऽनैकान्तिकता। ये तु पुनः कृतका अपि सन्तो नित्या एव भविष्यन्तीत्यविनाशितयेति संभाव्यन्तेते परमार्थतोऽकृतकराश्यन्तर्गता एवेति तन्निराकरणादेव तन्निराक्रिया बोद्धव्येत्यदोषः। नाप्याकाशादेर्मूर्त्तत्वादिधर्मं प्रत्यनपेक्षा सिद्धा, यस्य हि यो धर्मो नास्ति स तं प्रति सापेक्ष एव, न हि प्राप्तं धर्मं प्रति काचिदपेक्षा भावानां व्यवस्थाप्यते, किं तर्हि ? अप्राप्तमेवेत्यसिद्धो दृष्टान्तः॥ ३८४॥ § 1372

इदानीमकृतकराशिमधिकृत्याह—ये त्वित्यादि। § 1373

ये तु व्योमादयो भावा अकृतत्वेन संमताः।
वस्तुवृत्त्या न सन्त्येव ते च शक्तिवियोगतः॥
३८५॥ § 1375

क्षणिकाक्षणिकत्वादिविकल्पस्तेष्वनास्पदः।
तदा वस्त्वेव येन स्यात्क्षणिकं यदिवान्यथा॥
३८६॥ § 1377

यदि हि व्योमादयो भावाः सिद्धसत्ताकाः स्युस्तदा तेषु क्षणिकत्वादिधर्मचिन्ताऽवतरेत्, न हि धर्माणां स्वातन्त्र्येण सिद्धिरस्ति, अन्यथा हि धर्मत्वमेव तेषां हीयते। न चाकाशादयोऽकृतका धर्मिणस्तेषां सर्वसामर्थ्यविरहित्वेन
142/k वन्ध्यापुत्रवदस द्व्यवहारविषयत्वात्। प्रयोगः—यत्सर्वसामर्थ्यशून्यं तदवस्तु, यथा वन्ध्यापुत्रः, सर्वसामर्थ्यशून्यं चाकाशादीति स्वभावहेतुः। वस्तुतो व्यापकानुपलब्धिर्वा। न चानैकान्तिको हेतुः, एतावन्मात्रनिबन्धनत्वादसद्व्यवहारस्य

नाप्यसिद्धिरिति पश्चात्प्रतिपादयिष्यामः। सपक्षे भावान्नापि विरुद्धः॥ ३८५॥ ३८६॥ § 1378

कस्मात्पुनरवस्तुनि क्षणिकाक्षणिकविकल्पो नावतरतीत्याह—क्षणावस्थितरूपं हीत्यादि। § 1379

क्षणावस्थितरूपं हि वस्तु क्षणिकमुच्यते।
स्थिररूपसमाक्रान्तं वस्त्वेवाक्षणिकं पुनः॥
३८७ ॥§ 1381

सुबोधम्॥ ३८७॥ § 1382

उद्योतकरस्त्वाह—क्षणिक इति मत्वर्थीयानुपपत्तिः, तथाहि—यदि निरुक्तन्यायेन क्षयः क्षणः सोऽस्यास्तीति क्षणिक इति बोध्यते, तन्न युक्तं कालभेदात्, यदा हि क्षयो न तदा क्षयीति भिन्नकालयोर्न मत्वर्थीयो दृष्टः। अथ पुनर्भावानन्तरविनाशेन विशिष्यमाणः क्षण इत्युच्यते। तदाऽपि स तेनैव तद्वान्न भवतीति न युक्तो मत्वर्थीयः। अथ क्षणस्थितिकालाः क्षणिकाः, सर्वान्त्यो हि कालः क्षणस्तं येऽवतिष्ठन्ते ते क्षणिकाः। एतदपि न युक्तम्। संज्ञामात्रेण कालस्याभ्युपगमात्, न चसंज्ञामात्रं वस्तुविशेषणत्वेन युक्तमिति। तत्राह—उत्पादानन्तरास्थायीत्यादि। § 1383

उत्पादानन्तरास्थायि स्वरूपं यच्च वस्तुनः।
तदुच्यतेः क्षणः सोऽस्ति यस्य तत्क्षणिकं मतम्॥
३८८ ॥§ 1385

उत्पादानन्तरविनाशिस्वभावो वस्तुनः क्षण उच्यते, स यस्यास्ति स क्षणिक इति। तथाचोक्तम्—आत्मलाभानन्तरविनाशी क्षणः स यस्यास्ति स क्षणिक इति॥ ३८८॥ § 1386

नन्वेवमपि स्वभावस्यानर्थान्तरत्वात्सोऽस्यास्तीति व्यतिरेकनिबन्धनः प्रत्ययो नोपपद्यत इत्याह—असत्यपीत्यादि। § 1387

असत्यप्यर्थभेदे च सोऽस्त्यस्येति न बाध्यते।
इच्छारचितसङ्केतमात्रभावि हि वाचकम्॥
३८९ ॥§ 1389

यथा स्वस्य स्वभावः, शिलापुत्रकस्य शरीरम्, इत्यादावसत्यपि वास्तवे भेदे बुद्धिपरिकल्पितं भेदमाश्रित्य व्यतिरेकषष्ठीविभक्तिर्भवति तथेहापि भ-

विष्यति, न हि वस्तुस्वभावानुविधायिन्यो वाचः। किं तर्हि ? वक्तुरिच्छामनुविदधते॥ ३८९॥ § 1390

143/k

अपिच—यावत्यर्थे यावानेव वक्तृभिर्विनियुज्यते ध्वनिः स तावानेव तमर्थं सङ्केतवशात्प्रत्याययति न तु परमार्थतः प्रकृतिः प्रत्ययो वाऽस्ति। क्षणिक इति चायं शब्द उत्पादानन्तरास्थायिनि वस्तुमात्रे नियुक्तो विद्वद्भिः। तत्र चैवम्भूते वस्तुनि क्षणिकशब्देन विवक्षिते क्षणिकः शब्दः सप्रत्ययो वा प्रयुज्यतां प्रत्ययरहितो वेति नात्रास्माकमिच्छामात्रानुरोधिनि साङ्केतिके वचस्यत्यादर इत्येतद्दर्शयति—उदयानन्तरास्थायीत्यादि। § 1391

उदयानन्तरास्थायि वस्त्वेवं तु विवक्षितम्।
तत्र सप्रत्ययः शब्दोऽप्रत्ययो वा प्रयुज्यताम्॥
३९० ॥§ 1393

एवमिति। क्षणिकमित्यनेन। सह प्रत्ययेन मत्वर्थीयेन वर्त्तत इति सप्रत्ययः॥ ३९०॥ § 1394

एवं व्योमादीनामकृतकत्वाभ्युपगमे सति नियमेनासद्व्यवहारविषयतैवेति प्रतिपादितम्, इदानीं सत्त्वाभ्युपगमे तु क्षणिकत्वमेवैषां प्रसज्यत इति साधयन्नाह—यदि त्वित्यादि। § 1395

यदि तु व्योमकालाद्याः सन्तः स्युस्ते तथासति।
नातिक्रामन्ति तेऽप्येनं क्षणभङ्गं कृता इव॥
३९१ ॥§ 1397

कृता इवेति। कृतका इवेत्यर्थः। एतेन सत्त्वादित्ययं हेतुः सूचितः॥ ३९१॥ § 1398

तमेव स्पष्टीकुर्वन्नाह—तथाहीत्यादि। § 1399

तथाहि सन्तो ये नाम ते सर्वे क्षणभङ्गिनः।
तद्यथासंस्कृता भावास्तथासिद्धा अनन्तरम्॥
३९२ ॥§ 1401

४ प्रत्ययो] Correction : ; प्रत्ययो (sic !)प्रत्ययो

२--३ साधयन्ना] Correction : ; साधनयन्ना (sic !)साधयन्ना

सन्तश्चामी त्वयेष्यन्ते व्योमकालेश्वरादयः।
क्षणिकत्वावियोगे तु न सत्तेषां प्रसज्यते॥
३९३॥§ 1403

क्रमेण युगपच्चापि यस्मादर्थक्रियाकृतः।
न भवन्ति स्थिरा भावा निःसत्वास्ते ततो मताः॥
३९४॥§ 1405

प्रयोगः—यत्सत्तत्सर्वं क्षणिकम्, यथा समनन्तरं प्रतिपादिताः क्षणिकाः पदार्थाः, सन्तश्च भवता व्योमादयो भावा इष्यन्ते, इति स्वभावहेतुः। तथासिद्धा इति। क्षणिकत्वेन। एतेन न साध्यविकलता दृष्टान्तस्याशङ्कनीया, प्रसाधितत्वादिति दर्शयति। त्वयेष्यन्त इत्यनेन प्रसङ्गसाधनमेतदिति दर्शयति। अन्यथा हेतोरन्यतरासिद्धता स्यात्। कथं पुनरस्य हेतोर्व्याप्तिः सिद्धेत्याह— क्षणिकत्व वियोगे त्वित्यादि। अर्थक्रियासामर्थ्यलक्षणमिह सत्त्वं हेतुत्वेनेष्टम्, 144/k
तच्च क्षणिकत्वनिवृत्तौ निवर्त्तते। तथाहि—भावा अर्थक्रियां कुर्वन्तिः क्रमेण वा कुर्वीरन्यौगपद्येन वा, न हि क्रमयौगपद्याभ्यामन्यः प्रकारः संभवति, तयोरन्योन्यव्यवच्छेदरूपत्वात्। एतच्च प्रत्यक्षत एव प्रसिद्धम्। तथाहि—घटो मधूदकादींस्तदन्यद्रव्यव्यतिभिन्नान्क्रमेणाहरन्स्वज्ञानोदकाहरणे न च यौगपद्येन कुर्वन्प्रत्यक्षेणैव परिच्छिद्यते। तत्रयान्कार्यभेदान्क्रमेणाहरन्समुपलभ्यते घटः, कुलालो वा शरावोदञ्चनादीन्, न तदैव तान्यौगपद्येन जनयितुं समर्थः। घटो वा स्वविषये ज्ञानादीन्यौगपद्येन जनयन्नुपलभ्यते, न तदैव तान्क्रमेणेति प्रत्यक्षावसितमेतत्सर्वम्। अतः क्रमस्य यौगपद्यव्यवच्छेदेनैव परिच्छेदाद्यौगपद्यस्य च क्रमव्यवच्छेदेनैवेत्येकप्रमाणवृत्तिर्द्व(?)योरन्यतरत्परिच्छिन्दती ततः परं प्रतियोगिनं व्यवच्छिनन्ति, प्रकारान्तराभावं च सूचयतीति,प्रत्यक्षप्रमाणावसित एवानयोरन्योन्यवृत्तिपरिहारस्थितलक्षणो विरोधः। तेन तृतीयस्याभावात्क्रमयौगपद्याभ्यामर्थक्रिया व्याप्ता। सा च स्थिरेषु भावेषु स्वव्यापकनिवृत्तौ निवर्त्तमाना तल्लक्षणं सत्त्वं निवर्त्तयतीति सिद्धा व्याप्तिः। न चैतच्छक्यं वक्तुम्, क्रमयौगपद्ये एव भावानां न सिद्धे व्यतिरिक्तकालपदार्थानभ्युपगमादिति। न हि वयं भावानामर्थान्तरभूतकालपदार्थकृतं क्रमयौगपद्यं ब्रूमः। किं तर्हि ? तथातथोत्पादकृतम्। तथाहि—यदि चैकः सत्तामनुभवति तदैव यदा परे तद्वदेव तामनुभवन्ति, त एवं सर्वे तथोत्पद्यमाना अक्रमव्यपदेशनिबन्धनं भवन्ति।तद्यथा—समग्रसामग्रीका बहवोऽङ्कुराः समुत्पद्यमानाः। विपर्ययात्क्रमव्यपदेशभाजो यथाऽङ्कुरकाण्ड-

३ क्रियाकृतः] Correction : ; क्रिया कृता (sic !)क्रियाकृतः

पत्रादयः। एते च प्रत्यक्षत एव सिद्धास्तथैव च व्यपदिश्यन्ते जनैः। तथाभूतपदार्थविषयोऽपि कारणव्यापारस्तद्विषयक्रमयौगपद्याभ्यां व्यपदिश्यत इत्यचोद्यमेतत्। ननु च यदि स्थिरो भावः सिद्धो भवेत्तदा तत्र क्रमयौगपद्यनिवृत्तौ सत्यामर्थक्रियायाः सामर्थ्यनिवृत्तिः सिद्ध्येत्। यथा क्वचित्प्रदेशे धर्मिणि वृक्षनिवृत्तौ शिंशपानिवृत्तिः। अन्यथा ह्यसिद्धे प्रदेशधर्मिणि कुत्र शिंशपाऽभावः प्रतीयते। न चासौ सिद्धस्तस्यैव प्रतिषेद्धुमिष्टत्वात्। अथापि सिद्धोऽङ्गीक्रियते, न तर्हि तस्य प्रतिक्षेपो युक्तः, तस्य धर्मिणः स्वरूपेण सिद्ध्यभ्युपगमात्। ततश्च सत्त्वादिभ्य(इत्य)यमप्यनैकान्तिक एव हेतुः विपक्षे वृत्तेरिति। नैतदस्ति। न ह्यस्माभिः स्वातन्त्र्येण प्रमाणतया व्यतिरेकसाधिन्या अस्या व्या(?)पकानुपलब्धेः प्रयोगः क्रियते। किं तर्हि ?
145/k प्रसङ्गापादनं परं प्रति क्रियते। यदि भवता तेषां स्थिररूपताऽङ्गी क्रियते तदाऽर्थक्रियासामर्थ्यमपि नाङ्गीकर्त्तव्यम्, तत्र क्रमयौगपद्ययोगस्य तद्व्यापकस्याभावात्। नहि व्यापकनिवृत्तौ व्याप्यमवस्थातुमुत्सहते। अन्यथा व्याप्यव्यापकभाव एव तयोर्न स्यात्। ततश्चार्थक्रियासामर्थ्यनिवृत्तौ सत्वमपि तेषां नाङ्गीकर्त्तव्यम्, अर्थक्रियासामर्थ्यलक्षणत्वात्सत्वस्येति। अनेनोपायेन तेषामभाव एव प्रतिपाद्यते। न चापि वैधर्म्यदृष्टान्तेऽवश्यं वस्तुभूतो धर्म्याश्रयणीयः, तत्र साध्यनिवृत्तौ साधननिवृत्तिमात्रस्य साधयितुमिष्टत्वात्। तच्च व्याप्यव्यापकभूतयोर्धर्मयोर्व्याप्यव्यापकभावसिद्धौ सत्यां धर्मिविशेषपरिग्रहमन्तरेणैव सामान्येन व्यापकाभावे व्याप्यमपि न भवतीति वचनमात्रादेव प्रतीयते। यथा वृक्षाभावे शिंशपा न भवतीति यथोक्तम्—तस्माद्वैधर्म्यदृष्टान्ते नेष्टोऽवश्यमिहाश्रयः। तदभावे(तु) तन्नेति वचनादपि तद्गतेः॥ इति॥ ३९२॥ ३९३॥ ३९४॥ § 1406

न तावत्स्थिरस्य भावस्य क्रमेणार्थक्रिया युक्तेति दर्शयति—कार्याणीत्यादि। § 1407

कार्याणि हि विलम्बन्ते कारणासन्निधानतः।
समर्थहेतुसद्भावे क्षेपस्तेषां हि किङ्कृतः॥
३९५॥§ 1409

नहि कार्यस्य स्वेच्छया भवनमभवनं वा, किन्तु कारणसदसत्तानुविधायिनी तस्य सदसत्त्वे। तत्र यद्यसौ स्थिरैकरूपो भावः सर्वदा सर्वकार्याणां हेतुभावेनावस्थितस्तदा किमिति तत्सत्तामात्राकाङ्क्षीणि सकृदेव सर्वाणि नोत्पद्यन्ते, येन क्रमेण भवेयुः। क्षेप इति। परिविलम्बः। तेन पाश्चात्यमपि तदीयं कार्यं प्रागेव भवेत्। अप्रतिबद्धसामर्थ्यकारणत्वादभिमतकार्यवदिति भावः॥ ३९५॥ § 1410

अथापीत्यादिना परस्योत्तरमाशङ्कते। § 1411

अथापि सन्ति नित्यस्य क्रमिणः सहकारिणः।
यानपेक्ष्य करोत्येष कार्यग्रामं क्रमाश्रयम्॥
३९६॥§ 1413

यद्यपि स्थिरः पदार्थः सर्वदा सन्निहितस्तथापि क्रमेण सहकारीणि तस्य संनिधीयन्ते। अतस्तदपेक्षया क्रमेणासौ कार्याणि जनयिष्यतीति॥ ३९६॥ § 1414

साध्वित्यादिना प्रतिविधत्ते। § 1415

साध्वेतत्किंतु ते तस्य भवन्ति सहकारिणः।
किं योग्यरूपहेतुत्वादेकार्थकरणेन वा॥
३९७॥§ 1417

योग्यरूपस्य हेतुत्वे स भावस्तैः कृतो भवेत्।
स चाशक्यक्रियो यस्मात्तत्स्वरूपं तदा स्थितम्॥
३९८॥§ 1419

146/k

कृतो वा तत्स्वरूपस्य नित्यताऽस्यावहीयते।
विभिन्नोऽतिशयस्तस्माद्यद्यसौ कारकः कथम्॥
३९९॥§ 1421

न हि तस्य नित्यस्य कश्चित्सहकारी संभवति; तथाहि—अतिशयाधानाद्वा सहकारी भवेत्; यथा बीजस्य क्षित्यादय उच्छूनाद्यवस्थाविशेषमादधानाः सहकारिणः।एकार्थक्रियया वा; यथोन्मिषितमात्रेण रूपदर्शने चक्षुषो रूपादयः। तत्र न तावदाद्यः पक्षः। तथाह्यसावतिशयस्तस्य सहकारिभिराधीयमानः क्वचित्तत्स्वभावादभिन्नोभिन्नो वा भवेत्, यद्वोभयानुभयरूपः, यथाऽऽहुराजीवका इति चत्वारः पक्षाः। तत्र न तावदाद्यः पक्षः, तत्स्वरूपवत्तदव्यतिरेकितया तस्यापि सदाऽवस्थितत्वात्सतश्च करणायोगात्करणे वा तद्वदेव भावस्यापि करणप्रसङ्गात्। ततश्च नित्यत्वहानिः। अथ द्वितीयः पक्षस्तदाऽतिशयादेव कार्योत्पत्तेर्भावस्याकारक(त्व)प्रसङ्गः। असाविति। नित्यः पदार्थः॥ ३९७॥ ३९८॥ ३९९॥ § 1422

एतदेव स्पष्टयति—तस्मिन्सतीत्यादि। § 1423

तस्मिन्सति हि कार्याणामुत्पादस्तदभावतः।
अनुत्पादात्स एवैवं हेतुत्वेन व्यवस्थितः॥
४०० ॥§ 1425

तस्मिन्निति। अतिशये सतीत्यर्थः। एवमिति। तद्गतान्वयव्यतिरेकानुविधानात् ४०० § 1426

अथापीत्यादिनाऽत्रैव परस्योत्तरमाशङ्कते। § 1427

अथापि तेन सम्बन्धात्तस्याप्यस्त्येव हेतुता।
कः सम्बन्धस्तयोरिष्टस्तादात्मयं न विभेदतः॥
४०१ ॥§ 1429

न च तस्य तदुत्पत्तिर्यौगपद्यप्रसङ्गतः।
ततश्च यौगपद्येन कार्याणामुदयो भवेत्॥
४०२ ॥§ 1431

तेनेति। अतिशयेन। तस्यापीति। नित्यस्य। कः संबन्ध इत्यादिनोत्तरमाह। कः संबन्धः—नैव कश्चिदित्यर्थः। द्विविध एव हि संबन्धस्तादात्म्यं तदुत्पत्तिश्च। तत्र न तावत्तादात्म्यलक्षणो भेदस्याङ्गीकृतत्वात्। नापि तदुत्पत्तिलक्षणः सहकारिभ्य एव तस्योत्पत्तेः। यदि ततस्तस्योत्पत्तिरङ्गीक्रियते, तदा तन्मात्रभावित्वादतिशयानां युगपदेवोत्पत्तिः स्यात्। ततश्च सर्वकार्याणां युगपदुत्पत्तिप्रसङ्गः। अतिशयवतः कारणस्य सर्वदाऽवस्थितत्वात्॥ ४०१॥ ४०२॥ § 1432

तत्राप्यन्यव्यपेक्षायामनवस्था प्रसज्यते।
एकदापि ततः कार्यं नासम्बन्धात्प्रकल्प्यते॥
४०३ ॥§ 1434

147/k

अथ तत्राप्यतिशयोत्पत्तौ, सहकारिकारणापेक्षणात्क्रमेणातिशयोत्पत्तेर्न कार्याणां यौगपद्यं भवतीति स्यात्तदयुक्तम्, एवं ह्यनवस्था स्यात्। त-

२ तादात्मयं न] Correction: ; तादात्म्येन (sic!)तादात्मयं न
८ यदि ततस्तस्यो] Correction: ; ततस्तस्यो (sic!)यदि ततस्तस्यो

थाहि—तत्रापि सहकारिणामतिशयान्तरकरणात्सहकारित्वं वक्तव्यम्, तस्य चातिशयस्य व्यतिरेकित्वात्संबन्धासिद्धिः, तदुत्पत्तौ सकृदुत्पत्तिप्रसङ्गः, तत्रापि सहकारिव्यपेक्षायां पुनरियमेव चिन्ताऽवतरति। ततश्चानवस्थायां न कदाचिदतिशयेन सह तस्य संबन्धः सिद्ध्येत्। तदसिद्धौ न तस्मात्कार्योत्पत्तिरतिशयादेव कार्योत्पत्तेः॥ ४०३॥ § 1435

सम्बन्धः समवायश्चेत्तत्राप्येवं विचिन्त्यते।
उपकारीभवंस्तस्य समवायीष्यते स किम्॥
४०४॥ § 1437

न वा तथेति प्रथमो विकल्पो यदि गृह्यते।
सैव प्राप्ता तदुत्पत्तिर्व्यपास्ता साऽप्यनन्तरम्॥
४०५॥ § 1439

अथापि स्यान्न तदुत्पत्तिलक्षणस्तस्यातिशयेन सह सम्बन्धः। किं तर्हि ? तत्समवायलक्षणः, तत्र नित्ये धर्मिणि तस्यातिशयस्य समवेतत्वात्। तदेतदयुक्तमितिदर्शयन्नाह—तत्रापीत्यादि। न वा तथेति। नोपकारी संस्तस्य समवायीष्यत इति संबन्धः। तत्र प्रथमपक्षे उपकारस्योपक्रियमाणपदार्थाव्यतिरेकात् स एव तदुत्पत्तिलक्षणः संबन्धोऽङ्गीकृतः स्यात्। स चानन्तरमेव निरस्तः॥ ४०४॥ ४०५॥ § 1440

अथ द्वितीयः पक्षस्तदा विशेषाभावात्सर्वः सर्वस्य समवायी स्यात्। तद्दर्शयति—अन्येऽपीत्यादि। § 1441

अन्येऽपि सर्वभावाः स्युस्तथैव समवायिनः।
अविशेषान्न तस्यायमुपकारी मतो यदि॥
४०६॥ § 1443

तथैवेति। अभिमतपदार्थवदनुपकारित्वेनाविशिष्टत्वात्॥ ४०६॥ § 1444

उभयानुभयपक्षावधिकृत्याह—भेदाभेदेत्यादि। § 1445

भेदाभेदविकल्पस्य प्रत्येकं प्रतिषेधनात्।
द्विरूपोऽतिशयस्तस्य व्यस्तो भवति वस्तुनः॥
४०७॥ § 1447

प्रत्येकपक्षनिराकरणादेवोभयात्मकपक्षस्य निराकरणम्, तद्व्यतिरेकेणोभयात्मकपक्षाभावात्। किंचैकाकारत्यागपरिग्रहयोरपराकारपरिग्रहत्यागानान्तरीयतकत्वादयुक्तं वस्तुसत उभयानुभयरूपत्वम्, न ह्येकस्यैकदा विधिप्रतिषेधौ परस्परविरुद्धौ युक्तावेकत्वहानिप्रसङ्गात्॥ ४०७॥ § 1448

148/k

एतच्च पुद्गलादिपरीक्षायां प्रतिपादितं तद्दर्शयति—पुद्गलादीत्यादि। § 1449

पुद्गलादिपरीक्षासु द्वैराश्यप्रतिषेधनात्।
द्विरूपोऽतिशयो नास्ति न वाऽप्यनुभयात्मकः॥
४०८॥§ 1451

अथैकार्थक्रियाकारित्वेन सहकारिणस्तस्येति द्वितीयः पक्ष आश्रीयते। यथाऽहुरेके—नैवासौ सहकारिणोऽपेक्षते, न चापि सहकारिवियुक्तः कार्यस्य कारकः, यत ईदृशस्तस्य निसर्गसिद्धः स्वभावो यत्सन्निहितसकलसहकारिकारण एव कारकोऽन्त्यहेतुवन्न केवलः। तेन तस्य भावेऽपि न कार्यस्य सर्वदोत्पत्तिप्रसङ्ग इति। तदेतद्दर्शयति—अथेत्यादि। § 1452

अथ नापेक्षते नित्यः प्रत्ययान्सहकारिणः।
तथाऽपि तद्वियुक्तोऽयं कारको नान्यहेतुवत्॥
४०९॥§ 1454

निजस्तस्य स्वभावोऽयं तेषामेव हि सन्निधौ।
कारकत्वमतः कार्यं तद्भावेऽपि न सर्वदा॥
४१०॥§ 1456

नेति। कारक इत्यनेन संबन्धनीयम्। अन्त्यहेतुवदिति वैधर्म्यदृष्टान्तः। यद्वोत्तरेण कारकत्वमित्यनेन साधर्म्यदृष्टान्ततया संबध्यते। षष्ठ्यन्ताच्च वतिः कार्यः।तद्भावेऽपीति। तस्य नित्यस्य पदार्थस्य सद्भावेऽपि॥ ४०९॥ ४१०॥
§ 1457

अस्त्वेवमित्यादिना प्रतिविधत्ते। § 1458

अस्त्वेवं किन्तु साकल्ये या तस्य प्रकृतिर्मता।
वैकल्ये सैव चेदिष्टा नित्याः स्युः सहकारिणः॥
४११॥§ 1460

भवत्वेवं कल्पना, किंत्विदमिह निरूप्यते या तस्य सहकारिसाकल्यावस्थायां प्रकृतिः किं सैव वैकल्यावस्थायाम्, आहोस्विदन्या, यदि सैव तदा सहकारिणोऽपि नित्याः प्राप्नुवन्ति॥ ४११॥ § 1461

कथमित्याह—तत्संबद्धस्वभावस्येत्यादि। § 1462

तत्सम्बद्धस्वभावस्य भावे तेषामपि स्थितेः।
अन्यच्चेद्विकलं रूपमेकत्वमवहीयते॥ ४१२॥§ 1464

व्यपेक्षयाऽप्यतश्चैवं न कार्याणां क्रमोदयः।§ 1465

तैः सहकारिभिः संबद्धः स्वभावो यस्येति विग्रहः। तेषामपीति। सहकारिणाम्। निगडबद्धपुरुषाकर्षणे निगडाकर्षणवत्तेषामप्यनुवृत्तेः। एवं हि स एव पूर्वं स्वभावापरित्यागेनानुवृत्तो भवति। यदि हि सहकारिणा संबद्धं 149/k
स्वभावं न जहाति, तत्संबद्धस्वभावापरित्यागेन सामर्थ्यात्सहकारिणामप्यपरित्यागः। प्रतियोगिसव्यपेक्षत्वात्संबन्धित्वस्य। अन्यथा सैव तस्य प्रकृतिर्न भवेत्। अथान्येति पक्षस्तत्राह—अन्यच्चेत्यादि। यदि हि सहकारिविकलं रूपमस्यान्यदितीष्यते तदा नित्यत्वहानिप्रसङ्गः, रूपस्य भावाव्यतिरेकात्। तस्मात्सहकारिणोऽपेक्षायामपि न स्थिराणां क्रमेणार्थक्रिया युक्ता॥ ४१२॥ =॥ § 1466

नापि यौगपद्येनेति दर्शयति—यौगपद्यं च नैवेष्टमित्यादि। § 1467

यौगपद्यं च नैवेष्टं तत्कार्याणां क्रमेक्षणात्॥
४१३॥§ 1468

परैरपि नित्यपदार्थकार्याणां नैव यौगपद्यमिष्टम्। तथाहि—नित्यानामेतानि कार्याणि वर्ण्यन्ते। आत्मनः सुखदुःखादीनि, नभसः शब्दाः, मनसः क्रमवर्त्तीनि विज्ञानानि, अणूनां द्व्यणुकादिक्रमेण स्थूलाः, कालदिगीश्वरादीनां सर्वाण्येवोत्पत्तिमन्तीति। एषां च प्रत्यक्षादेव क्रमोदयः प्रसिद्धः॥ ४१३॥ § 1469

तदेवं यौगपद्याभ्युपगमे प्रत्यक्षविरोधोऽभ्युपगमविरोधश्चोक्तो भवति। इदानीमनुमानविरोधं प्रतिपादयन्नाह—निःशेषाणीत्यादि। § 1470

निःशेषाणि च कार्याणि सकृत्कृत्वा निवर्त्तते।

१ क्रमेक्षणात्] Correction: ; क्षयेक्षणात् (sic!)क्रमेक्षणात्

सामर्थ्यात्मा स चेदार्थः सिद्धाऽस्य क्षणभङ्गिता॥
४१४॥§ 1472

तथाहि—युगपदशेषाणि कार्याणि कृत्वा स किं तस्यार्थक्रियासमर्थः स्वभावो निवर्त्तते, आहोस्विदनुवर्त्तत इति पक्षद्वयम्। तत्र यदि निवर्त्तत इति पक्षस्तदा तस्यक्षणभङ्गित्वं सिद्धम्। प्रतिक्षणमपरापरस्वभावोत्पत्तेः पूर्वपूर्वस्य च स्वभावस्य स्वरसविनाशात्॥ ४१४॥ § 1473

तद्रूपस्यानुवृत्तौ तु कार्यमुत्पादयेत्पुनः।
अकिञ्चित्कररूपस्य सामर्थ्यं चेष्यते कथम्॥
४१५॥§ 1475

सर्वसामर्थ्यशून्यत्वात्तारापथसरोजवत्।
असन्तोऽक्षणिकाः सर्वे शक्तिर्यद्वस्तुलक्षणम्॥
४१६॥§ 1477

अथ द्वितीयः पक्ष आश्रीयते तदा तद्रूपस्य समर्थात्मनोऽनुवृत्तौ सत्यां पुनः कार्यमुत्पादयेत्, अत्यक्तपूर्वरूपत्वात्, प्रागवस्थावत्। ततश्च स एव क्रमो जात इति यौगपद्याभ्युपगमोऽनुमानविरुद्धः। अथापि स्यान्माभूत्तस्य क्र-
150/k मयौगपद्याभ्याम र्थक्रिया, तथाऽपि सामर्थ्यमस्यास्त्येवेत्याह—अकिंचित्कररूपस्येत्यादि। कार्योत्पादनिबन्धनं हि भावानां सामर्थ्यं व्यवस्थाप्यते। यश्च न किंचित्करोति स कथं समर्थः स्यात्। अन्यथा ह्याकाशकुशेशयादेरपि सामर्थ्यं किं न व्यवस्थाप्येत। स्यादेतद्यदि नाम सामर्थ्यमस्य निवृत्तं तथाऽपि सत्त्वमनिवृत्तमेव। ततश्च सत्त्वादित्यनैकान्तिक एव हेतुरित्याह—असन्त इत्यादि। इदमेव हि वस्तुलक्षणं यदर्थक्रियासामर्थ्यं तच्चेन्निवृत्तं तत्कथं वस्तुत्वं तल्लक्षणं तेष्ववस्थां लभते। तदेवं क्रमाक्रमाभ्यामर्थक्रियासामर्थ्यशून्यत्वाद्वन्ध्यापुत्रादिवदसद्व्यवहारयोग्या अक्षणिकत्वेनाभिमता आकाशादय इति सिद्धम्॥ ४१५॥ ४१६॥ § 1478

अथ नाङ्गीक्रियेतेदं वस्तुत्वं शक्तिलक्षणम्।
येदवमन्यन्निर्दिश्यं वस्तूनां लक्षणं परैः॥
४१७॥§ 1480

अथापि स्याद्यदर्थक्रियासामर्थ्यलक्षणमेव वस्तुलक्षणं भवेत्, तदैतत्सर्वं शोभेत। यद्येवं किमन्यद्वस्तुलक्षणमिति वक्तव्यम्। त-

थाहि—शशविषाणादौ यदवस्तुत्वमिष्टंतत्रार्थक्रियासामर्थ्यविरह एव निबन्धनम्। वस्त्ववस्तुनोश्चान्योन्यव्यवच्छेदरूपत्वात्। सामर्थ्यादवस्तुलक्षणविपरीतमर्थक्रियासामर्थ्यमेव वस्तुलक्षणमवतिष्ठत इति भावः॥ ४१७॥ § 1481

अत्र परस्योत्तरमाशङ्कते—सत्तेत्यादि। § 1482

सत्तासम्बन्ध इष्टश्चेद्वस्तूनां लक्षणं न तत्।
असिद्धेः समवायादेः कथं वाऽन्योऽन्यलक्षणम्॥
४१८॥§ 1484

न ह्यर्थक्रियासामर्थ्यं वस्तुलक्षणम्, किं तर्हि ? सत्तासंबन्धः सत्तासमवाय इति यावत्। न तदिति। वस्तुलक्षणं युक्तमिति शेषः। समवायादेरसिद्धत्वात्। आदिशब्देन सत्तापरिग्रहः। यदि समवायादिः सिद्धो भवेत्तदा समवायो वस्तुलक्षणं स्यात्। यावता तेषामेव साध्यत्वेन प्रस्तुतत्वात्। वक्ष्यमाणबाधकप्रमाणसद्भावाच्च। यदि वा पूर्वोक्तादेव बाधकात्प्रमाणात्सत्तायाः समवायस्य चासिद्धिः। केनचित्सह सत्तायाः संबन्धासिद्धेस्तस्यानुपकार्यत्वात्। न ह्यनुपकारिणोः परस्परं संबन्धोऽतिप्रसङ्गादित्युक्तम्। किंच तयोरपि सत्तासमवाययोरन्त्यानां च विशेषाणां वस्तुत्वे किं लक्षणमिति वक्तव्यम्। न हि समवाये विशेषेषु च सत्ता समवैति। नापि सत्तायाम्, किं तर्हि ? द्रव्यगुणकर्मसु त्रिपदार्थसत्करी सत्तेति समयात्। तस्मादव्यापीदं वस्तुलक्षणम्। भवतु नाम 151/k सत्तादेः सिद्धिः। तथाऽपि न सत्तासमवायो लक्षणं युक्तमर्थान्तरत्वात्। न ह्यर्थान्तरमर्थान्तरस्य स्वरूपम्, येन तस्य तल्लक्षणं भवेत्। तथाहि—वस्तुस्वरूपापरिज्ञानान्मूढधियं प्रति तल्लक्षणे प्रकृते तत्स्वभाव एव कुतश्चिद्व्यावृत्त्या प्रतीतो लक्षणत्वेन वाच्यो येन तदेव वस्तुस्वरूपत्वेनावधारयति, यथा पृथिवी खरकटत्वेन। न चान्यः पदार्थोऽन्यपदार्थस्वरूपमन्यत्वहानिप्रसङ्गात्। तत्कथं तल्लक्षणं भवेत्। लक्षणशब्दस्य स्वभाववचनस्य प्रस्तुतत्वात्॥ ४१८॥ § 1485

केचिदाहुः—यद्वस्त्वन्तशः सर्वज्ञस्यापि न ज्ञानमुत्पादयति तस्य तादृशस्यास्तितायां किं बाधकं प्रमाणम्, यत इयं व्याप्तिः सर्वोपसंहारेण सिद्ध्येत्, यत्सत्तत्सर्वं क्षणिकमिति। नच तदपरिज्ञाने सर्वज्ञत्वहानिस्तस्य ज्ञेयेष्वेवाधिकारात्। ज्ञानयोग्यस्य हिवस्तुनोऽपरिज्ञाने स्यादसर्वज्ञः, तत्तु न ज्ञेयम्। ज्ञानोत्पादनेऽपि तस्यायोग्यत्वादिति। तान्प्रत्याह—सर्वश्चेत्यादि। § 1486

सर्वश्चार्थविचारादिव्यापारोऽर्थक्रियार्थिनः।
निराकुलधियो युक्तो नोन्मत्तकतया पुनः॥
४१९॥§ 1488

तन्न यन्नाम केषाञ्चित्कथञ्चिदुपयुज्यते।
क्वचित्कदाचित्तत्रैव युक्ता सत्ताव्यवस्थितिः॥
४२० ॥§ 1490

तद्रूपस्यैव चार्थस्य क्षणिकत्वं प्रसाध्यते।
व्याप्तिः सर्वोपसंहारा तस्मिन्नेवाभिधीयते॥
४२१ ॥§ 1492

अर्थस्य हि वस्तुमात्रस्य योऽयमस्तित्वनास्तित्वेन विचारः स सर्वोऽर्थक्रियार्थिनः, न व्यसनितया। अन्यथा ह्युन्मत्तः स्यात्। तेन यदेव पदार्थजातं केषांचिदर्थक्रियार्थिनां कथंचित्साक्षात्पारम्पर्येण वा क्वचिद्देशे कदाचित्काल उपयुज्यते तत्रैव वस्तुव्यवस्था युक्ता प्रेक्षावतः। न त्वन्यत्र निबन्धनाभावान्निष्प्रयोजनत्वादिति भावः।आदिग्रहणेनार्थविशेषाणां दहनसलिलादीनां विचारो गृह्यते। ततश्च प्रेक्षापूर्वकारिणां यदेवार्थक्रियाकारि तदेव वस्त्विति येदतत्प्रसिद्धम्, तस्यैव तद्रूपस्य—अर्थक्रियाकारिरूपस्यास्माभिः क्षणिकत्वं प्रसाध्यते। यतोऽर्थक्रियासामर्थ्यलक्षणस्य हेतुत्वेनाभीष्टत्वान्नास्ति व्यभिचारः। तस्यैवंभूतस्य हेतोः सर्वोपसंहारात्साध्येन व्याप्तिसिद्धेः। या हि पक्षसपक्षविभागमकृत्वा सामान्येन हेतोर्व्याप्तिः प्रदर्श्यते सा सर्वोपसंहारा व्याप्तिः॥ ४१९॥ ४२०॥ ४२१॥ § 1493

152/k

अथार्थक्रियासामर्थ्यशून्यस्यापि कस्माद्वस्तुत्वं नेष्यत इत्याह निःशेषेत्यादि। § 1494

निःशेषशक्तिशून्यं तु यद्वन्ध्यासुतसन्निभम्।
सर्वज्ञचेतसोऽप्येति हेतुत्वं न कदाचन॥
४२२ ॥§ 1496

क्रियते तत्र नैवेदं कार्यरूपाद्यदृष्टितः।
निर्निबन्धनमस्तित्वव्यवस्थानं विचक्षणैः॥
४२३ ॥§ 1498

न तस्मिन्साधितेनार्थः क्षणिकत्वेन कश्चन।
तत्र पर्यनुयोगश्च क्रियमाणोऽपि निष्फलः॥
४२४॥§ 1500

सर्वज्ञचेतसोऽपीति। न केवलं समानजातीयस्य क्षणस्य, जलधारणादेश्च कार्यस्येत्यपिशब्दः। कार्यरूपाद्यदृष्टित इति। कार्यम्—तदीयं फलम्, रूपम्— तस्य स्वभावः, आदिशब्देन तस्य देशः कालोऽवस्थाविशेषश्च गृह्यते। तस्य चैवंरूपस्य शशविषाणादिभ्यो न कश्चिद्विशेषोऽस्तीति भावः। नचापि तस्मिंस्तथाभूते वस्तुनि क्षणिकत्वेन साधितेनार्थक्रियार्थिनः किंचित्प्रयोजनमस्ति। तस्य दृष्टादृष्टयोर्हिताहितप्राप्तिपरिहारायोग्यत्वात्। यथोक्तम्—अर्थक्रियाऽसमर्थस्य विचारैः किं तदर्थिनां। षण्डस्य रूपवैरूप्ये कामिन्याः किं परीक्षया॥ इति। अतएव कथमिदं गम्यते तत्क्षणिकमित्यादिपर्यनुयोगः प्रतिवादिना क्रियमाणो विफल एव, तस्य वादिना क्षणिकत्वेन साधयितुमनिष्टत्वात्॥ ४२२॥ ४२३॥ ४२४॥ § 1501

इदानीं परोऽर्थक्रियासामर्थ्यमपि वस्तुलक्षणमयुक्तमतिव्यापित्वादिति दर्शयति—ननु चेत्यादि। § 1502

ननु चार्थक्रियाशक्ता नभस्तामरसादयः।
स्वज्ञानहेतुभावेन न चैते सन्ति भाविकाः॥
४२५॥§ 1504

तथाहि—नभस्तामरसादयो नभस्तामरसं नभस्तामरसमित्यादिज्ञानोत्पादलक्षणायामर्थक्रियायां समर्थाः, नच से परमार्थतः सन्ति, अतोऽतिव्यापीदं लक्षणंशक्तिर्भावलक्षणमिति॥ ४२५॥ § 1505

अत्र परिहारमाह—निरालम्बनमेवेत्यादि। § 1506

निरालम्बनमेवेदमम्बराम्भोरुहादिषु।
तज्जल्पवासनामात्रभावि ज्ञानं प्रवर्त्तते॥ ४२६॥§ 1508

असिद्धमाकाशाम्भोरुहादीनामर्थक्रियासामर्थ्यम्, तद्विकल्पानां स्वविकल्पवासनापरिपाकमात्रेणैवोत्पत्तेर्निरालम्बनत्वात्॥ ४२६॥ § 1509

153/k

अथाकाशाम्भोरुहादिभ्य उत्पत्तौ किं बाधकं प्रमाणमित्याह—अभावकारणत्वे त्वित्यादि। § 1510

अभावकारणत्वे तु नैरन्तर्येण संभवेत्।

नाभावोऽपेक्षते किञ्चिन्निर्विशेषतया सदा॥
४२७॥§ 1512

अभावो नभस्तामरसादि कारणं यस्य तत्तथोक्तम्, तद्भावस्तत्त्वम्, तस्मिन्सति तन्नभस्तामरसादिज्ञानं सर्वदैव भवेत्—उत्पद्येत, नित्यसन्निहिताविकलकारणत्वात्।नचापि तस्य परैरनुपकार्यस्य तदपेक्षा युक्ता, येन सहकारिवैकल्यात्कदाचिज्जनयेदिति स्यात्॥ ४२७॥ § 1513

क्षणिकेष्वपीत्यादिना भदन्तयोगसेनमतशङ्कते। § 1514

क्षणिकेष्वपि भावेषु ननु चार्थक्रिया कथम्।
विशेषाधायिनोऽन्योन्यं न ह्याद्याः सहकारिणः॥
४२८॥§ 1516

जातौ सर्वात्मना सिद्धेरजातौवस्त्वभावतः।
निर्विशेषाद्विशेषस्य भावे कार्यं न किं भवेत्॥
४२९॥§ 1518

नचान्यतो विशिष्टास्ते तुल्यपर्यनुयोगतः।
सहकारिकलापानामनवस्था च ते भवेत॥
४३०॥§ 1520

क्रमेण युगपच्चापि यतस्तेऽर्थक्रियाकृतः।
न भवन्ति ततस्तेषां व्यर्थः क्षणिकताश्रयाः॥
४३१॥§ 1522

सहकारिकृतश्चैवं यदा नातिशयः क्वचित्।
सर्वदा निर्विशेषैव तदा सन्ततिरिष्यते॥
४३२॥§ 1524

४ सिद्धेरजातौ] Correction : ; सिद्धेरजाता (sic !)सिद्धेरजातौ

विनाशे यद्यहेतुः स्यादादावेव भवेदयम्।
सम्भवो यदि नास्यादावन्तेऽपि स कथं भवेत्॥
४३३॥§ 1526

स्वहेतोर्यदि भावानामिष्यतेऽन्यन्न कारणम्।
विनाशस्य कथं तेषां क्वचिदेव विरुद्धता॥
४३४॥§ 1528

स ह्याह—क्षणिकत्वेऽपि भावानां क्रमयौगपद्याभ्यामर्थक्रियाविरोध एव। यतस्ते स्वयं समर्था भवेयुरसमर्था वा, यदि समर्थास्तदा सहकारिकारणं नापेक्षेरन्। न हिसमर्थस्य काचिदपेक्षा युक्ता। अथासमर्थास्तथाऽपि तेषां तदपेक्षा सुतरामयुक्तिमती। तथाहि—ये प्रथमकलापान्तश्चरिष्णवस्ते न परस्परतो विशेषमाप्नुवन्ति। उत्पन्नानु त्पन्नावस्थायाः सदसत्त्वेनानुपकार्योपकार- 154/k कत्वात्। ततश्च प्रथमावस्थायां तेषां निर्विशिष्टत्वात्तेभ्यो विशिष्टक्षणान्तरोत्पादो न स्यात्। निर्विशेषेभ्यश्च तेभ्यः क्षणान्तरस्यविशिष्टस्योत्पत्तौ कार्यमपि किं नोत्पद्येत। न चापि पूर्वकात्कलापाद्विशिष्टात्ते समुत्पन्ना इति युक्तं वक्तुम्, तत्कलापान्तर्गतानामप्यत एव परस्परतो विशेषाभावात्। तेषामप्यन्यतो विशेषोत्पत्तौ सत्यामनवस्था स्यात्। तदेवं विशेषाभावात्कथमविशिष्टात्कारणकलापात्कार्यमुत्पद्यते। अविशिष्टाच्चोत्पत्तौ सर्वं सर्वस्माद्भवेत्। ततश्च क्रमयौगपद्याभ्यामेवमर्थक्रियाविरोधेऽपि यथैव भवन्त्येवार्थक्रियाकारिणस्तथा नित्या अपि सन्तो भविष्यन्तीति व्यर्थस्तेषां क्षणिकताश्रयः। तेन सत्त्वादिति हेतुरनैकान्तिकइति भावः। न चापि सन्ततेरवस्थाविशेषप्राप्तायाः कार्योत्पत्तिर्भविष्यति न सर्वदेति वक्तुं युक्तम्। यथोक्तया नीत्या सहकारिकृतस्य विशेषस्याभावात्सर्वदेव सन्ततेरविशिष्टत्वात्। नचापि स्वोपादानकारणमात्रप्रतिबद्धो विशेषः सन्ततिरिति युक्तं वक्तुम्। दृष्टविरोधात्। तथाहि—सहकारिणामुपायापाययोः कार्यव्यक्तिविरामौ दृष्टौ। यदि च स्वोपादानकारणमात्रप्रतिबद्धो विशेषः स्यात्, तदा सहकारिनिरपेक्षस्यैव जनकत्वं भवेत्। अपिच यथोक्तया नीत्या सन्ततेः सर्वदा निर्विशिष्टत्वात्। घटादीनां कपालादिविशेषोत्पत्त्यसंभवात्। सजातीयक्षणसन्तानोच्छेदलक्षणो विनाशो यदि निर्हेतुकः स्यात्तदा निरपेक्षत्वात्प्रागेव भवेत्। अथादौ न भवेत्, पश्चादपि न भवेत्, प्राग्वद्विशेषाभावात्। किं च यदि भावानां विनाशं प्रति स्वहेतुव्यतिरेकेणान्यत्सन्तानान्तरं कारणं नेष्यते तदाऽनलादयः शीतादीनां कथं विरोधिनो भवेयुः, नह्यकिंचित्करो विरोधी युक्तोऽतिप्रसङ्गापत्तेः, एवं हि सर्वः सर्वस्य विरोधी प्रसज्येत। ततश्च विरोधद्वारेणानुपलब्धिप्रयोगः

प्राणातिपातादिव्यवस्थानं चातिदुर्घटमिति भावः ॥ ४२८॥ ४२९॥ ४३०॥ ४३१॥ ४३२॥ ४३३॥ ४३४॥ § 1529

उच्यत इत्यादिना प्रतिविधत्ते। § 1530

उच्यते प्रथमावस्था नैवान्योन्योपकारिणः।
एकार्थक्रियया त्वेते भवन्ति सहाकारिणः॥
४३५॥§ 1532

अन्योन्यानुपकारेऽपि नाविशिष्टा इमे यतः।
स्वोपादानबलोद्भूताः कलापोत्पादकः पृथक्॥
४३६॥§ 1534

समर्थादेव हि कार्योत्पत्तिः, नच सहकारिवैयर्थ्यम्। तथाहि—द्विविधं सहकारित्वं एकार्थक्रियाकारितया परस्परोपकारितया च। तत्र (अ ?)
155/k व्यवहितकार्यापे क्षया एकार्थक्रियाकारित्वमेव, न परस्परोपकारित्वम्। एकस्मिन्क्षणे निर्विभागतया विशेषस्याधातुमशक्यत्वात्। व्यवहितकार्यापेक्षया तु परस्परत उत्तरविशिष्टक्षणोत्पत्तेः, सन्तानापेक्षया परस्परोपकारेण व्यवहितकार्यजनकत्वात्परस्परोपकारित्वलक्षणं सहकारित्वम्। तत्र प्रथमावस्थाभाविनां यद्यपि परस्परतो विशेषो नास्ति, तथापि तेषां सहकारित्वमविरुद्धमेव, एकार्थक्रियाकारित्वात्। नापि ते समनन्तरविशिष्टक्षणोत्पादनं प्रत्यविशिष्टाः, पूर्वकेभ्य एव स्वहेतुप्रत्ययेभ्यस्तथाविधोत्तरकार्यकलापोत्पादनं प्रति प्रत्येकं समर्थानामुत्पन्नत्वात्। तेषामपि हेतुप्रत्ययानामपरेभ्यः स्वहेतुप्रत्ययेभ्यः, तेषामप्यपरेभ्य इत्यनादेर्हेतुपरम्पराया इष्टत्वादनवस्थाऽप्यदुष्टैव। प्रत्येकं च सामर्थ्येऽपि नापरेषां वैयर्थ्यम्, स्वहेतुबलेन तेषां तथोत्पन्नत्वात्। नापि तेषां पृथग्भावः संभवति, तथाविधकारणाभावात्। नापि पश्चात्, क्षणिकत्वात्। कलापोत्पादकाः पृथगिति। प्रत्येकं द्वितीयक्षणभाविकलापोत्पादनसमर्था इत्यर्थः। स्वोपादानग्रहणं प्रथमावस्थाभाविसहकारिकृतोपयोगनिषेधपरं द्रष्टव्यम्। नतु स्वोपादानमात्रभावि किंचित्कार्यं संभवति, सामग्रीतः सर्वस्य संभवात्। यथोक्तम्—"न किंचिदेकमेकस्मात्सामग्र्याः सर्वसंभव" इति॥ ४३५॥ ४३६॥ § 1535

ततः प्रभृति ये जाता विशेषास्ते तु तत्कृताः।
तद्रूपप्रकृतित्वेन तेषां तदुपयोगिनाम्॥ ४३७॥§ 1537

ततः प्रभृति—द्वितीयक्षणोत्तरकालमारभ्येत्यर्थः। तत्कृता इति। सहकारिकृतविशेषकारणकृताः। कस्मात् ? तद्रूपप्रकृतित्वात्तेषाम्—तद्रूपा—विशिष्टसहकारिकृतविशेषकारणजन्या, प्रकृतिः—स्वभावो येषां ते तथोक्ताः। तेषां तदुपयोगिनामिति। तद्रूपप्रकृतित्वादिति संबन्धनीयम्। तदुपयोगिनमित्यत्र चकारो लुप्तनिर्दिष्टस्तेनायमर्थो भवति। तत्र तृतीयावस्थाभाविनि कार्ये ये द्वितीयक्षणभाविनोविशेषा उपयुज्यन्ते कारणभावेन, तेषां च तदुपयोगिनां सहकारिकृतविशेषकारणजन्यकार्योत्पादनयोग्यप्रकृतित्वात्, तृतीयादिक्षणभाविनो विशेषास्तत्कृता भवन्तीति ॥ ४३७ ॥ § 1538

अयमपि नियमः कथमेषां भवतीत्याह—नियतेत्यादि। § 1539

नियताचिन्त्यशक्तीनि वस्तूनीह प्रतिक्षणम्।
भवन्ति नानुयोज्यानि दहने दाहशक्तिवत्॥
४३८ ॥§ 1541

156/k

न हि भावानां स्वभावाः पर्यनुयोगमर्हन्ति, तेषां स्वहेतुप्रत्ययपरम्परासमायातत्वात्स्वभावभेदस्य, यथाऽग्नेर्दाहकत्वम्, यस्मादेते परापरप्रत्ययोपयोगेन प्रतिक्षणं भिन्नशक्तयः समुत्पद्यन्ते। अतो यद्यप्येते कुतश्चित्साम्यात्समानरूपाः प्रतीयन्ते तथाऽपि भिन्न एवैषां स्वभावः। तेन किंचिदेव कस्यचित्कारणं न सर्वः सर्वस्येति यत्किंचिदेतत्। भवन्तीति। जायन्त इत्यर्थः॥ ४३८॥ § 1542

यदप्युक्तं विनाशो यद्यहेतुः स्यादिति, तत्राह—सन्तानोच्छेदरूपस्त्वित्यादि। § 1543

सन्तानोच्छेदरूपस्तु विनाशो यो न हेतुमान्।
तस्यान्तेऽपि न भावोऽस्ति तथा जन्म तु वार्यते॥
४३९ ॥§ 1545

विलक्षणकपालादेरुत्पादस्तु सहेतुकः।
सोऽप्यादौ जायते नैव तदा हेतोरसम्भवात्॥
४४० ॥§ 1547

द्विविधो हि विनाशः सन्तानोच्छेदरूपो विसदृशसन्तानोत्पादलक्षणश्च। तत्र यदि सन्तानोच्छेदरूपं विनाशमधिकृत्योच्यते तदयुक्तम्, नहि तस्यान्तेऽपि भावोऽस्तीति, नीरूपत्वात्, तत्किमुच्यते अन्तेऽपि स कथं भवेदिति। त-

स्मात्तस्य कदाचिदपि भवनानभ्युपगमादादावन्ते च यद्भावाभावप्रसञ्जनं तदसङ्गतमेव। केवलम्,तथा—सदृशक्षणान्तरप्रतिसन्धानेन, जन्म—उत्पादः, तत्र प्रतिषिध्यते। घटादेरुच्छेदो भवति (इत्यस्य ?) स एव न भवतीत्यर्थः। न तु तत्र किंचिद्विधीयते। अथ विसदृशक्षणोत्पादलक्षणो द्वितीयो विनाशोऽभिप्रेतस्तस्याहेतुकत्वमसिद्धम्। वस्तुतया तस्य मुद्गरादिकारणबलेनोत्पादनाभ्युपगमात्। अतएवासावादौ न जायते, स्वहेतोर्मुद्गरादेस्तदानीमभावात्॥ ४३९॥ ४४०॥ § 1548

विरोधव्यवस्थासमर्थनार्थमाह—द्विविध इत्यादि। § 1549

द्विविधाः क्षणिकाः भावाः केचिद्धा(?)सस्य हेतवः।
शीतादेरेव वह्न्याद्या अपरे न तथाविधाः॥
४४१ ॥§ 1551

अदृष्टतत्त्वो लोकस्तु विरोधमभिमन्यते।
कार्यकारणभावेऽपि प्रथमोक्तेष्वनेकधा॥
४४२ ॥§ 1553

बाध्यबाधकभावस्तु वस्तुनो नैव तात्त्विकः।
विद्यते तत एवोक्तं विरोधगतिरित्यपि॥
४४३ ॥§ 1555

केचिद्धि भावाः केषांचिन्मन्दतर(त)मक्षणोत्पत्तिक्रमेण यो ह्रासस्त-
157/k त्र हेतवो भवन्ति। यथा—वह्न्यादयः शीतादीनाम्, अपरे न तथाविधाः—नापकर्षहेतवः, तद्यथा त एव वह्न्यादयो धूमादीनाम्। तत्र प्रथमोक्तेषु ह्रासहेतुषु कार्यकारणभावेऽपि सत्यज्ञानतिमिरतिरोधीयमानज्ञानालोको लोको विरुद्धत्वमभिमन्यते। अनेकधेति। शीतस्याग्निर्विरुद्धः प्रदीपस्य वायुरालोकोऽन्धकारस्येत्यादिना भेदेन। नतुवस्तूनां परमार्थतः कश्चिद्बाध्यबाधकभावोऽस्ति, सतः सर्वात्मना निष्पत्तेः, स्वभावान्यथात्वस्य कर्तुमशक्यत्वात्, तस्य व्यतिरेकाव्यतिरेकविकल्पे सत्युभयथाऽपिकरणासंभवात्। असतोऽप्यवस्तुत्वादेव न किंचित्क्रियते, इत्युभयथाऽप्यकिञ्चित्करो विरोधी। अत एवाविकलकारणस्य भवतोऽन्यभावेऽभावाद्विरोधगतिरित्याचार्येणोक्तम्। विरोधगतिः—विरोधव्यवसायः, न तु विरोधस्तात्त्विक इति भावः। अपिशब्दश्चार्थे। भिन्नकमश्च। एवेत्यस्यानन्तरं द्रष्टव्यः॥ ४४१॥ ४४२॥ ४४३॥ § 1556

ननु चेत्यादिना जैमिनीयादिमतेन क्षणभङ्गप्रतिज्ञायाः प्रत्यक्षबाधितत्व-माशङ्कते। § 1557

ननु च प्रत्यभिज्ञानं स एवेत्युपजायते।
अक्षव्यापारसद्भावे निष्प्रकम्पबाधितम्॥
४४४॥§ 1559

ततः प्रत्यक्षबाधेयं दुर्वारा सर्वहेतुषु।
क्षणभङ्गप्रसिद्ध्यर्थमुपात्तेषु प्रसज्यते॥ ४४५॥§ 1561

तथाहि—स एवायमिति गिरितनुवज्रादिष्वक्षव्यापारानन्तरं प्रत्यभिज्ञानाख्यं प्रत्यक्षं प्रमाणं भावानां क्षणभङ्गं निराकुर्वदुदेति। यद्यपि नूनं पुनर्जातनखकेशतृणादिषु प्रत्यभिज्ञानं दृष्टम्। तथापि न वज्रादिविषयोः प्रत्यभिज्ञानयोरप्रामाण्यमबाधितविषयत्वात्। अतएवाह—निष्प्रकम्पमबाधितमिति। नहि तिमिरोपहतलोचनोपजनितं केशविज्ञानमप्रमाणमुपलब्धमित्येतावता स्वच्छनेत्रजनितमपि सत्यकेशविषयं चक्षुर्विज्ञानमप्रमाणमिति युक्तं स्वच्छचेतसोऽभिधातुमिति भावः। तत्र निष्प्रकम्पत्वेनासंशयरूपतामाह। स एवायमथान्य इत्येवंविधस्य संशयस्याभावात्। अबाधितमित्यनेनाविपर्यस्तत्वम्॥ ४४४॥ ४४५॥ § 1562

न खल्वित्यादिना प्रतिविधत्ते। § 1563

न खलु प्रत्यभिज्ञानं प्रत्यक्षमुपपद्यते।
वस्तुरूपमनिर्देश्यं साभिलापं च तद्यतः॥
४४६॥§ 1565

भ्रान्तं च प्रत्यभिज्ञानं प्रत्यक्षं तद्विलक्षणम्।
अभेदाध्यवसायेन भिन्नरूपेऽपि वृत्तितः॥
४४७॥§ 1567

158/k

३ साभिलापं] Correction : ; साभिलाषं (sic !)साभिलापं
४ प्रत्यक्षं] Correction : ; प्रत्येकं (sic !)प्रत्यक्षं

तत्र प्रत्यक्षत्वं तावदसिद्धमस्यास्तथाहि—वस्तुत्वलक्षणस्यानन्वयित्वेनाशक्यसमयत्वात्। तद्ग्राहिज्ञानं मनसि जल्पनेव। अवगृहीतसंबन्धस्यार्थस्य शब्देन संयोज्य ग्रहणा(ण ?) संभवात्। अतोऽवश्यं प्रत्यक्षेण सता स्वलक्षणविषयत्वात्कल्पनापोढेन भवितव्यम्। प्रमाणत्वाचाभ्रान्तेन। ततश्च प्रत्यक्षं कल्पनापोढमभ्रान्तमिति न्यायानुयातमिदं प्रत्यक्षलक्षणमाचक्षते कुशलाः। नच प्रत्यभिज्ञानं कल्पनापोढम्, स एवायमित्येवमन्तर्जल्पाकारतया संवेद्यमानत्वात्। नाप्यभ्रान्तम्, भिन्नेष्वभेदाध्यवसायेन प्रवृत्तेः॥ ४४६॥ ४४७॥
§ 1568

कथमित्याह—पूर्वमित्यादि। § 1569

पूर्वं संविहिताकारगोचरं चेदिदं भवेत्।
जायेत पूर्वमेवेदं तादर्थ्यात्पूर्वबुद्धिवत्॥ ४४८॥§ 1571

यदि हि पूर्वोपलब्धार्थविषयमिदमभविष्यत्तदा पूर्वमेवोदयिष्यत, तद्विषयत्वेनाविकलकारणत्वात्। पूर्वज्ञानवत्, तादर्थ्यादिति। स पूर्वसंविदितो भावोऽर्थो विषयोऽस्येति तदर्थम्, तद्भावस्तादर्थ्यम्॥ ४४८॥ § 1572

नचैवमिति प्रसङ्गविपर्ययमाह। § 1573

नचैवं तेन नैवेदं तदर्थग्राहकं मतम्।
तज्ज्ञानकाल उत्पादाद्विषयान्तरबुद्धिवत्॥
४४९॥§ 1575

अभेदाध्यवसायेन भिन्नरूपेऽपि वृत्तितः।
मायागोलकविज्ञानमिव भ्रान्तमिदं स्थितम्॥
४५०॥§ 1577

प्रयोगाः—यद्यस्मिन्विकलेऽपि सति न भवति, न तत्तद्विषयम्, यथा रूपेऽविकलेऽपि सति तत्राभवच्छ्रोत्रविज्ञानम्, भवत्यविकलेऽपि वज्रादौ तद्विज्ञानवेलायांप्रत्यभिज्ञानमिति व्यापकानुपलब्धेः। तदेवं नित्यत्वे सति वज्रादेरनपरापेक्षस्य तद्विषयं प्रत्यभिज्ञानमविकलकारणत्वात्पूर्वमेव भवेत्, नच भवति, तस्मादनित्यत्वमस्य सिद्धम्। ततश्च भिन्नेष्वभेदाध्यवसायेन

४--५ प्रत्यक्षं] Correction: ; प्रत्येकं (sic !)प्रत्यक्षं
६ मन्तर्जल्पा] Correction: ; मतिजल्पा (sic !)मन्तर्जल्पा
४ दयिष्यत] Correction: ; दशिष्यत (sic !)दयिष्यत

प्रवृत्तेर्मायागोलकविज्ञानवद्भ्रान्तमिदमित्यविकलमेतत्। अत एवाबाधितविषयत्वमप्यसिद्धम्। यथोक्तभ्रान्तत्वप्रसाधकादेवहेतोर्बाधितविषयत्वात्॥ ४४९॥ ४५०॥ § 1578

इतश्च गृहीतग्रहणान्नास्याः प्रामाण्यम्, यथा स्मृतेरिति दर्शयन्नाह—निष्पादितेत्यादि। § 1579

159/k

...s_451 निष्पादितक्रिये चार्थे प्रवृत्तेः स्मरणादिवत्।
न प्रमाणमिदं युक्तं करणार्थविहानितः॥
४५१॥§ 1581

यदेव हि प्रमितिक्रियासिद्धौ प्रकृष्टमुपकरणं तदेव साधकतमं कारकं प्रमाणमुच्यते। यदि च प्रत्यभिज्ञा पूर्वप्रमाणगृहीतार्थविषया स्यात्, तदा निष्पन्नप्रमितिक्रियेऽर्थे प्रवृत्त्याऽसाधकतमत्वात्कथमिव प्रमाणतामश्नुवीत। अन्यथा हि स्मृतेरपिप्रामाण्यं स्यात्। न चानधिगतप्रमाणभावा सती बाधकत्वाय कल्पते, अतिप्रसङ्गात्। स्यादेतत्—मा भूदस्याः पृथक्प्रामाण्यम्, तथाऽप्यनया पूर्वार्थविषयतयाक्षणभङ्गित्वं बाध्यत एवेति। तदसम्यक्। न ह्यस्याः परमार्थतः पूर्वार्थविषयत्वमस्ति माभि(मति ?)जल्पत्वात् केवलम(ति)विषयाऽपि सती विभ्रमबलात्पूर्वदृष्टार्थाध्यवसायिनी समुत्पद्यत इत्यध्यवसायवशात्पूर्वदृष्टार्थविषयेत्युच्यते तत्कुतोऽस्मात्प्रत्यभिज्ञानात्प्रकृतिभ्रान्तात्क्षणभङ्गनिराक्रिया सिध्येत्॥ ४५१॥ § 1582

इदानीन्तनमित्यादिना कुमारिलमतेन गृहीतग्राहित्वस्यासिद्धिमुद्भावयति। § 1583

इदानीन्तनमस्तित्वं न हि पूर्वधिया गतम्।
तदस्त्यस्य विशेषश्चेत्स्मरणे यो न विद्यते॥
४५२॥§ 1585

पूर्वप्रमितमात्रे हि जायते स इति स्मृतिः।
स एवायमितीयं तु प्रत्यभिज्ञाऽतिरेकिणी॥
४५३॥§ 1587

स ह्याह—न हि पूर्वप्रत्यक्षेणार्थस्येदानीन्तनमस्तित्वमधिगतम्, तस्य स एवायमित्येवमाकारोपग्राहेणानुत्पत्तेः। तस्मादस्य प्रत्यभिज्ञानस्य स्मरणाद-

स्ति विशेषः।कथमित्याह—पूर्वेत्यादि। स इति हि पूर्वज्ञानाकारोपग्रहेणैव स्मृतिः प्रवर्त्तते।प्रत्यभिज्ञा त्वयमित्येवमतिरिक्तमप्यर्थाकारं गृह्णाति। स्मृतेः सकाशादतिरेकिणी— विशिष्टेत्यर्थः। तस्मादौ संशयविपर्ययौ तौ बाधित्वा प्रत्यभिज्ञा प्रमाणतां लभते ॥ ४५२॥ ४५३॥ § 1588

कस्मात्तौ बाधत इत्यत्र कारणमाह—ज्ञाते चाविद्यमानत्वादिति। § 1589

ज्ञाते चाविद्यमानत्वाद्यौ संशयविपर्ययौ।
बाधित्वा तौ लभेतैव प्रत्यभिज्ञा प्रमाणताम्॥
४५४ ॥§ 1591

ज्ञातेऽर्थे तयोरविद्यमानत्वाद्बहलवह्निशिखाकलापपरिगत इव देशे शीतस्य ॥ ४५४॥ § 1592

160/k

ननु यथानुमानप्रसिद्धस्याप्यर्थस्य पुत्रादिगतश्यामत्वादेः पुनः कालान्तरेण प्रत्यक्षेण बाध्यमानस्यान्यथात्वं भवति तथाऽत्रापि यदि नाम प्रत्यभिज्ञा(न)तो नित्यत्वमर्थस्य सिद्धम्, तथाऽप्युत्तरकालं तत्कार्येण क्रमिणा क्रमस्यानुमानतः सिद्धेरन्यथात्वं सिद्धमेव, तत्कथं क्षणभङ्गित्वं बाध्यत इत्याशङ्क्याह—विज्ञातोऽपीत्यादि। § 1593

विज्ञातोऽपीतरैरर्थः प्रत्यक्षेणान्यथा भवेत्।
प्रत्यक्षेणावरुद्धे तु नेतरोत्पत्तिसंभवः॥ ४५५ ॥§ 1595

इतरैरिति। अनुमानादिभिः। यथा किल श्यामस्तत्पुत्रत्वाद्दृश्यमानतत्पुत्रवदित्यादि। प्रत्यक्षेणान्यथा भवेदिति। प्रत्यक्षेण करणभूतेन, अन्यथा—अनुमानादिप्रमिताकारविपरीतो भवेदित्यर्थः। अवरुद्ध इति। विषयीकृत इत्यर्थः। नेतरोत्पत्तिसंभव इति। प्रत्यक्षादितरस्यानुमानादेर्नैव बाधकत्वेनोत्पत्तिः संभवतीत्यर्थः॥ ४५५॥ § 1596

कस्मादित्याह—को हीत्यादि। § 1597

को हि ज्येष्ठप्रमाणेन दृढेनार्थेऽवधारिते।
दुर्बलैरितरैः पश्चादध्यवस्येद्विपर्ययम्॥ ४५६ ॥§ 1599

युक्तं हि यदनुमानप्रसिद्धस्यार्थस्य प्रत्यक्षेणान्यथात्वं क्रियत इति। तस्य सर्वप्रमाणज्येष्ठत्वात्। न तु प्रत्यक्षप्रसिद्धस्यान्यथात्वमनुमानादयः कर्तुमीहन्ते, तेषां दुर्बलत्वात्। दृढेनेति। संशयविपर्ययाभ्यां रहितेन। विपर्ययमिति। अन्यथात्वम्॥ ४५६॥ § 1600

नन्वित्यादिना प्रतिविधत्ते। § 1601

नन्विदानीन्तनास्तित्वं यदि भिन्नं त्वयेष्यते।
पूर्वभावात्तदा भेदस्त्वयैव प्रतिपादितः॥ ४५७॥§ 1603

यत्तदिदानीन्तनमस्तित्वं प्रत्यभिज्ञानस्य विषयः, किं तत्पूर्वप्रत्यक्षगृहीताद-स्तित्वाद्भिन्नमाहोस्वित्तदेव, यदि भिन्नं तदा स्ववचनेनैव भेदस्य प्रतिपादित-त्वादभ्युपेतहानिर्भवतो भवेत्। अस्माकं पुनरिष्टसिद्धिः॥ ४५७॥ § 1604

अनन्यत्वेऽपि सत्त्वस्य कथं पूर्वधियाऽगतम्।
तस्यागतौ हि वस्त्वेव नोपलब्धं प्रसज्यते॥
४५८॥§ 1606

अथानन्यदिति पक्षस्तदा कथं पूर्वधिया तदगतं येनोच्येत, न हि पूर्व-धिया गतमिति। स्यादेतत्—यथा क्षणिकत्वं शब्दादेरव्यतिरिक्तमपि सत्तद्ग्रहणे 161/k सत्यप्यगृहीतमुच्यते, तद्वदिदमपि भविष्यतीति। तदयुक्तम्। न हि शब्दे ध-र्मिणि गृहीतेऽपि तदव्यतिरेकि क्षणिकत्वमगृहीतमिति व्यवस्थाप्यते। किं (तर्हि ?) गृहीतमपि तन्निश्चयोत्पत्तिकारणाभावादनिश्चितमित्यभिधीयते। न ह्यनुभवमात्रादेव निश्चयो भवति। तस्यार्थित्वाभ्याससाद्गुण्यादिसापेक्षत्वात्। न चैवं भवतः संभवति। पूर्वप्रत्यक्षस्यापि व्यवसायात्मकत्वात्। तेन च व-स्तुरूपे निश्चीयमाने तदव्यतिरिक्तमिदानीन्तनमस्तित्वं निश्चितमेव। तदनिश्चये वस्तुस्वरूपस्यापि तद्वदेवानिश्चितरूपाव्यतिरेकादनिश्चितत्वप्रसङ्गः। येऽप्याहुः—सन्दिग्धवस्तुनिर्णयनिबन्धनं प्रत्यभिज्ञाने प्रामाण्यमिति तदप्यनेनैव प्रत्युक्त-म्। न चाप्यत्र सन्दिग्धवस्तुसद्भावनिर्णयोऽस्ति, सदृशापरापरोत्पत्तावपि केशादिवत्प्रत्य(?)भिज्ञानदर्शनेन सन्देहात्॥ ४५८॥ § 1607

यच्चोक्तं विज्ञातोऽपीतरैरर्थ इत्यादि, तत्राह—प्रत्यक्षेण चेत्यादि। § 1608

प्रत्यक्षेण च बाधायामनुमानादिगोचरे।
नानुमानादिमानं स्याद्बाधातस्तैमिरादिवत्॥
४५९॥§ 1610

यस्य त्वत्पुत्रत्वादित्यादिकस्यानुमानादेर्गोचरे विषये प्रत्यक्षेण बाधा संभ-वेत्तस्य प्रामाण्यमेव नास्ति बाध्यमानविषयत्वेनार्थसंवादाभावात्तैमिरिकादिज्ञान-वत्। तेनेतरैर्विज्ञातोऽप्यर्थः प्रत्यक्षेणान्यथा भवेदिति यदुक्तं तदसङ्गतमेव, असंभवात्॥ ४५९॥ § 1611

यच्च प्रत्यक्षस्य ज्येष्ठत्वमुक्तं तदप्यसद्भूतमेवेति दर्शयन्नाह—अर्थसंवादकत्वे चेत्यादि। § 1612

अर्थसंवादकत्वे च समाने द्वेष्यताऽस्य का।
तदभावे तु नैव स्यात्प्रमाणमनुमादिकम्॥
४६० ॥§ 1614

इदमेव हि प्रमाणानां प्रमाणत्वम्, यदुतार्थप्रमाणसामर्थ्यम्। तच्चेत्सर्वप्रमाणानामभ्युपगम्यते तत्केनास्य प्रत्यक्षस्य ज्येष्ठता भवेत्। अथापि स्यात्—प्रत्यक्षस्यैवार्थसंवादकत्वं नानुमानादेरित्याह—तदभाव इत्यादि। तस्य—अर्थादिसंवादकत्वस्य अभावे सति नैव प्रमाणमनुमानादि स्यात्। अर्थाविसंवादकत्वनिबन्धनत्वात्प्रमाणव्यवहारस्य, तस्य चात्र भावात्॥ ४६० ॥
§ 1615

नन्वनेनेत्यादिना भाविविक्तोक्तानि प्रमाणान्याशङ्कते। § 1616

नन्वनेनानुमानेन बाध्यते सर्वहेतुषु।
व्याप्तिः सर्वोपसंहारा प्रतिज्ञार्थस्य वा क्षतिः॥
४६१ ॥§ 1618

162/k

किं तदनुमानमित्याह—विवक्षितेत्यादि। § 1619

विवक्षितार्कचन्द्रादिविषयं यत्प्रवर्त्तते।
ज्ञानं तत्कालसम्बद्धसूर्यादिविषयं परम्॥
४६२ ॥§ 1621

पार्थिवाविषयत्वे हि तज्ज्ञानत्वाभिधानतः।
तद्यथा प्रथमं ज्ञानं तत्कालार्कादिगोचरम्॥
४६३ ॥§ 1623

तदुक्तम्—विमत्यधिकरणभावापन्नानि चन्द्रार्कग्रहनक्षत्रादिज्ञानानि विवक्षितचन्द्रार्कग्रहतारकादिविषयं यद्देवदत्तादिविज्ञानं तत्कालावच्छिन्नचन्द्रार्कग्रहनक्षत्रतारकादिविषयाण्येव, पृथिवीसंबन्धित्वेनानुपलभ्यमानत्वे सति चन्द्रार्कग्रहनक्षत्रतारकादिज्ञानशब्दवाच्यत्वात्, प्रथमकालभाविदेवदत्त-

तारकादिज्ञानवदिति। विवक्षितार्कचन्द्रादिविषयमिति। तैजसद्रव्यविषयम्। पृथिवीसंबन्धित्वेनानुपलभ्यमानत्वे सतीति विशेषणं चित्रादिगतादित्यादिविषयैर्ज्ञानैर्व्यभिचारपरिहारार्थम्। परमिति। तस्मादन्यत्। अतत्कालमित्यर्थः॥ ४६२॥ ४६३॥ § 1624

इदमपरं तदीयमेव प्रमाणम्। ये रूपत्वादिसामान्याश्रयाः, ये च तदाश्रयाः, तद्विषयाश्च ये प्रत्यक्षानुमानोपमानशाब्दस्मृतिप्रत्यभिज्ञानार्थसिद्धदर्शनारेकविपर्ययानुव्यवसायस्वप्नस्वप्नान्तिकाः प्रज्ञानविशेषाः, ते सर्वे स्वात्मलाभानन्तरप्रध्वंसिनो न भवन्ति, ज्ञेयत्वप्रमेयत्वाभिधेयत्वसदसदन्यतरत्वसदसद्व्यतिरिक्तज्ञेयविषयज्ञानावच्छेद्यत्वाग्राह्यविषयग्रहणाग्राह्यत्वानभिधेयाभिधायकानभिधेयत्वसमानासमानजातीयद्रव्यसंयोगविभागजनितशब्दकार्यशब्दाभिधेयत्वेभ्यः, प्रागभावादिवत्। तत्र रूपत्वादिसामान्याश्रया रूपादयः, तेषां च रूपादीनामाश्रयास्तदाश्रयाः, के ते ? घटादयः, सिद्धदर्शनं योगिविज्ञानम्, शेषं पूर्वमेव व्याख्यातम्। सदसदन्यतरत्वं सत्त्वमसत्त्वं वा। सदसद्भ्यां व्यतिरिक्तस्य ज्ञेयस्याभावादेव तद्विषयज्ञानं नास्ति, तस्य चासत्त्वादेव तेनापरिच्छेद्यत्वं सिद्धम्। एवमग्राह्यविषयस्य ग्रहणस्याभावादेव तदग्राह्यत्वसिद्धिः। तथा च विद्यतेऽभिधेयं यस्यासावनभिधेयो योभिधायकस्तेनानभिधेयत्वमनर्थकत्वादेव सिद्धम्। समानजातीयानि द्रव्याण्यधरदशनादीनि, कृतकत्वादिसामान्यात्, असमानजातीयान्याकाशादीनि तेषां यौ मिथःसंयोगविभागौ, ताभ्यां जनितो यः प्रथमः शब्दस्तस्य परम्परया यः कार्यभूतः श्रुतिपथमवतीर्णस्तेनाभिधेयत्वम्। तथाह्येषामियं प्रक्रिया—प्रथमः किल शब्दः संयोगविभागयोनिस्तस्माच्छब्दान्तराणि कदम्बगोलकन्यायेन प्रादुर्भवन्ति। तत्र यः कर्णशष्कुलीमध्यमाकाशदे शमाप्नोति स उपलभ्यते नेतर 163/k इति। तदेव प्रमाणकदम्बकं दर्शयति—रूपत्वाद्याश्रयाः सर्वे इत्यादि। § 1625

रूपत्वाद्याश्रयाः सर्वे ये च तेषां समाश्रयाः।
ये च तद्विषयाः केचिज्ज्ञायन्ते प्रत्ययास्तथा॥
४६४॥§ 1627

उत्पादानन्तरं ध्वंसभाजो नैव भवन्ति ते।
प्रमेयत्वाभिधेयत्वहेतुतः खारविन्दवत्॥ ४६५॥§ 1629

प्रमेयत्वाभिधेयत्वग्रहणमुपलक्षणम्। तदन्येऽपि हेतवो द्रष्टव्याः। खे—नभसि, अरविन्दम्, आकाशकमलमिति यावत्॥ ४६४॥ ४६५॥ § 1630

उद्योतकरस्त्वाह—विप्रतिपन्ना अयु(ग) पत्कालाः प्रत्यया एकविषयाः, अव्युत्थायितत्प्रत्ययसामानाधिकरण्ये सति समानशब्दवाच्यत्वात्, व-

२--१ वर्त्तमानैकल] Correction: ; वर्त्तमानल (sic !)वर्त्तमानैकल

र्त्तमानैकलक्षणानेकपुरुषप्रत्ययवत्। तत्र व्युत्थातुम्—अन्यथाभवितुं बाधकप्रमाणवशात् शीलमस्येति व्युत्थायि न व्युत्थायि अव्युत्थायि, तेषां घटादिप्रत्ययानां सामानाधिकरण्यं तत्प्रत्ययसामानाधिकरण्यम्, अव्युत्थायि च तत् तत्प्रत्ययसामानाधिकरण्यं चेति तथोक्तम्। अबाधितसामानाधिकरण्ये सतीत्यर्थः। इदं च विशेषणं प्रदीपादिप्रत्ययैर्व्यभिचारपरिहारार्थम्। समानशब्दवाच्यत्वं चैत्रज्ञानं चैत्रज्ञानमित्यादि। तदेतद्दर्शयति—विवादविषया इत्यादि। § 1631

विवादविषया ये च प्रत्ययाः क्रमभाविनः।
एकार्थविषयास्तेऽपि सर्व इत्यवघोषणा॥
४६६॥§ 1633

अबाधैकाश्रयत्वे हि समानोक्तिनिवेशनात्।
वर्त्तमाने यथैकस्मिन्क्षणे नैकविधा धियः॥
४६७॥§ 1635

अवघोषणेति। प्रतिज्ञा। एकाश्रयत्वम्—सामानाधिकरण्यम्, अबाधम्—अविद्यमानबाधं च तदेकाश्रयत्वं चेति विग्रहः॥ ४६६॥ ४६७॥ § 1636

अत्र प्रतिविधत्ते साध्येनेत्यादि। § 1637

साध्येन विकलं तावदाद्ये हेतौ निदर्शनम्।
हेतुत्वाद्विषयः सर्वो न हि स्वज्ञानकालिकः॥
४६८॥§ 1639

आद्ये हेताविति। तज्ज्ञानत्वाभिधानत इत्यत्र। प्रथममपि हि चन्द्रादिज्ञानं सत्का(स्वका ?)लावच्छिन्नचन्द्रादिविषयं न भवति। हेतुभूतस्यैव विषयत्वात्।
164/k समा नकालं च कार्यकारणभावानुपपत्तेः। यथोक्तम्— असतः प्रागसामर्थ्यात्पश्चादनुपयोगतः। प्राग्भावः सर्वहेतूनां नातोऽर्थः स्वधिया सहेति॥ ४६८॥ § 1640

यदेत्यादिना पृथिवीसंबन्धित्वेनानुपलभ्यमानत्वे सतीति सविशेषणेऽपि हेतावनैकान्तिकतेति दर्शयति। § 1641

यदा सूर्यादिशब्दाश्च विवक्षामात्रभाविनः।

दीपादौ विनिवेक्ष्यन्ते तज्ज्ञानैर्व्यभिचारिता॥
४६९ ॥§ 1643

द्वितीयेऽपि हेतुकदम्बके जात्यादेर्धर्मिणोऽसत्त्वादेव क्षणभङ्गित्वस्यानिष्टत्वात्तत्र तदभावसाधने सिद्धसाध्यतेति दर्शयति—जात्यादेरित्यादि। § 1644

जात्यादेर्निःस्वभावत्वान्नेवेष्टा क्षणभङ्गिता।
तदभावप्रसिद्ध्यर्थं निर्दिष्टं साधनं वृथा॥
४७० ॥§ 1646

आदिशब्देन तदाश्रयाणां रूपघटादीनां तद्विषयाणां च प्रत्ययानां ग्रहणम्। एषामपि हि यथोक्तविशेषणविशिष्टानामसत्त्वमेव, तस्मात्तेषु तस्याः क्षणभङ्गिताया अभावसिद्ध्यर्थं यदुक्तं साधनं तद्वृथा, तत्र विवादाभावादिति भावः। अत्रापि सूक्ष्मेक्षिका न कृता। यदि सा क्रियते तदा बहुतरमत्र दोषजालमवतरति। तथाहि—यदेतत्सदसदन्यतरत्वं साधनमुक्तं तत्साध्यधर्मिणि दृष्टान्तधर्मिणि चासिद्धम्, विकल्पविषयत्वादन्यतरशब्दस्य, विकल्पश्चानेकपदार्थसंभवे सति भवति, नैकस्मिन्। न च साध्यधर्मिणि द्वयोः सदसत्त्वयोः संभवोऽस्ति। तस्य वस्तुरूपत्वेन सत्त्वस्यैव संभवात्। नापि दृष्टान्तधर्मिणि द्वयसम्भवः। तस्यावस्तुत्वेनासत्त्वस्यैव संभवात्। हेतुश्च व्यर्थविशेषणः। तथाहि—शब्दाभिधेयत्वादित्येवमपि तावदत्र प्रयोगो न युक्तोऽभिधेयत्ववचनादेव शब्दस्य सिद्धेः। यत्पुनः समानजातीयादिपदैर्विशेषणं तदतिपेलवमेव।एवमन्यदपि हेतुविशेषणमनर्थकमेवेति ग्रहीतव्यम्। सर्वे चामी हेतवोऽनैकान्तिकाः। साध्यविपर्ययेऽमीषां बाधकप्रमाणानुपदर्शनात्। एतच्च पश्चादभिधास्यत एव॥ ४७०॥
§ 1647

यच्चोक्तं विवादविषया ये चेत्यादि, तत्राह—समानेत्यादि। § 1648

समानशब्दवाच्यत्वं दीपादिप्रत्ययेष्वपि।
वर्त्तते व्यभिचार्येष हेतुस्तेन भवत्यतः॥ ४७१ ॥§ 1650

दीपज्ञानमिति दीपादिप्रत्ययेषु भिन्नविषयेष्वपि समानशब्दप्रवृत्तिदर्शनादतस्तेनदीपादिप्रत्ययविषयेण शब्दवाच्यत्वेनैष समानशब्दवाच्यत्वादिति हेतुर्व्यभिचारी। अथवा काक्का पाठः। अतस्तेषु वर्त्तमानत्वादेव हेतुस्ते—तव न 165/k
व्यभिचारी भवति, अपितु भवत्येवेत्यर्थः॥ ४७१॥ § 1651

सामानाधिकरण्यं चेदिति परमतमाशङ्कते। § 1652

२ धर्मिणोऽस] Correction : ; धर्मिणः स (sic !)धर्मिणोऽस

सामानाधिकरण्यं चेद्बाधितं तेषु कल्प्यते।
विवक्षितेऽपि विस्पष्टा बाधैषा किं न वीक्ष्यते॥
४७२॥§ 1654

अव्युत्थायितत्प्रत्ययसामानाधिकरण्ये सतीति हेतोर्विशेषणं दीपादिप्रत्ययैर्व्यभिचारपरिहारार्थमेव कृतम्, एषां हि दीपादिप्रत्ययानामेकविषयत्वस्य बाधितत्वात्। तथाहि—तत्क्षणमेव दीपो दीर्घशिखो नम्रशिखश्च दीप्रो दीप्रतरश्चोपलभ्यते। तत्कृतो व्यभिचारिता हेतोरिति परस्य भावः। तदेतद्विशेषणमप्यसिद्धमिति दर्शयन्नाह—विवक्षितेऽपीत्यादि। विवक्षितसाध्यधर्मे तत्रापि बाधा किं न वीक्ष्यते। तथाहि चैत्रादावपि बालकुमारतरुणादिभेदेन व्यावर्त्तमानाकार एव प्रत्ययो जायते, पर्वतादौ शीतोष्णादिभेदेन, ततः स्पष्टतरमेवान्यथात्वमेषां प्रदीपादिवत्प्रसिद्धम्। अन्यथा हि य एव शीतसंबद्धः स एव यदि पश्चादुष्णसंबद्धः स्यात्तदाऽवस्थाद्वयेऽपि शीतोष्णयोरुपलम्भः स्यात्। तत्संबद्धस्वभावस्य भावे तयोरपि भावस्य प्रसङ्गापत्तेः। निगडबद्धपुरुषाकर्षणे निगडाकर्षणवदित्युक्तप्रायमेतत्। अतः सविशेषणोऽपि हेतुरसिद्धः॥ ४७२॥
§ 1655

अनुमानबाधामप्याह—विवादपदमित्यादि। § 1656

विवादपदमारूढा नैकार्थविषया धियः।
क्रमेणोत्पद्यमानत्वाद्विद्युद्दीपादिबुद्धिवत्॥
४७३॥§ 1658

क्रमभावविरोधो हि ज्ञानेष्वेकार्थभाविषु।
अन्यैरकार्यभेदस्य तदपेक्षाविरोधतः॥ ४७४॥§ 1660

प्रयोगः—यत्क्रमभावि तत्सदा सन्निहिताविकलकारणं न भवति यथा विद्युद्दीपादिबुद्धयः, क्रमभाविन्यश्च विवादास्पदीभूता बुद्धय इति व्यापकविरुद्धोपलब्धिः।नचानैकान्तिकत्वं हेतोः, एकवस्तुविषयत्वे सत्यविकलकारणस्य क्रमभावानुपपत्तेः। नापि कारणान्तरापेक्षा नित्यस्य तेनानुपकार्यत्वात्। नचानुपकारिण्यपेक्षा युक्ताऽतिप्रसङ्गात्। उपकारे वा नित्यत्वहानिप्रसङ्ग इति शतशश्चर्चितमेतत्॥ ४७३॥ ॥ ४७४॥ § 1661
166/k

सर्वेष्वेव च प्रयोगेषु हेतूनामनैकान्तिकत्वं विपक्षे बाधकप्रमाणाभावादिति दर्शयति—सन्दिग्धेत्यादि। § 1662

सन्दिग्धव्यतिरेकित्वं सर्वेष्वेतेषु हेतुषु।
विपक्षे वर्त्तमानानां बाधकानुपदर्शनात्॥ ४७५॥
इति स्थिरभावपरीक्षा।§ 1665

सुबोधम्॥ ४७५॥ § 1666

इति स्थिरभावपरीक्षा।

०.१० कर्मफलसंबन्धपरीक्षा॥

इदानीं कर्मतत्फलसंबन्धव्यवस्थादिसमाश्रयमित्येतत्समर्थनार्थं चोद्योपक्रमपूर्वकमाह—क्षणिकेत्यादि। § 1668

क्षणिकानित्यतालीढं सर्वं चेद्वस्तु तत्कथम्।
कर्मतत्फलसम्बन्धकार्यकारणतादयः॥ ४७६॥§ 1670

क्षणिकानित्यताग्रहणं कालान्तरस्थाय्यनित्यताव्यवच्छेदार्थम्। क्षणिकानां सतामनित्यता क्षणिकानित्यता तया लीढम्—समाक्रान्तं यदि सर्वमेव वस्तुजातं प्रतिज्ञायते भवद्भिस्तदा येऽमी कर्मफलसंबन्धादयो लोकशास्त्रयोः प्रतीतास्ते कथं सिद्ध्येयुः। आदिग्रहणद्धेतुफलाधिगन्तृ प्रमाणम्, अनुभवे प्रत्यभिज्ञानम्, अन्यस्मिन्नर्थे दृष्टेऽर्थान्तरेऽभिलाषः, बन्धमोक्षौ, स्मरणम्, संशयपूर्वको निर्णयः, स्वयं निहितप्रत्यनुमार्गणम्, दृष्टार्थकुतूहलविरमणमित्येवंप्रकाराः कुमतिपरिकल्पिताश्चोद्यरश्रयो गृह्यन्ते। न हि लोकशास्त्रप्रतीतार्थविरोधेन प्रतिज्ञायमानोऽर्थः सिद्धिमासादयतीत्यभ्युपेतप्रतीतबाधा दोषः प्रतिज्ञाया इति भावः। तथाहि येनैव कृतं कर्म सुभादिकं तेनैव तत्फलमुपभुज्यत इति लोके प्रतीतम्। न हि देवदत्तेन कृते कर्मणि शुभादिके यज्ञदत्तस्तत्फलमिष्टमनिष्टं चोपभुङ्क्ते इति प्रसिद्धम्। नापि शास्त्रे, यथोक्तम्— अनेनैव कृतं कर्म कोऽन्यः प्रत्यनुभविष्यति इति। तच्चैतत्क्षणिकपक्षे विरुध्यते। कर्मफलपरिग्राहकस्यैकस्य कर्तुरभावेन कृतनाशाकृताभ्यागमदोषप्रसङ्गात्॥ ४७६॥ § 1671

कथमित्याह—य इत्यादि। § 1672

यः क्षणः कुशलादीनां कर्तृत्वेनावकल्प्यते।
फलप्रसवकाले तु नैवासावनुवर्त्तते॥ ४७७॥§ 1674

167/k

यः फलस्य प्रसूतौ च भोक्ता संवर्ण्यते क्षणः।
तेन नैव कृतं कर्म तस्य पूर्वमसंभवात्॥
४७८॥§ 1676

कर्मतत्फलयोरेवमेककर्त्रपरिग्रहात्।
कृतनाशाकृतप्राप्तिरासक्ताऽतिविरोधिनी॥
४७९॥§ 1678

नैवासावनुवर्त्तत इति। तस्योत्पादानन्तरमेव निरुद्धत्वात्। एककर्त्रपरिग्रहा- दिति। एकेन कर्त्रा तयोः कर्मफलयोरपरिगृहीतत्वादित्यर्थः। कर्तुः फलेनानभिसंबन्धात्कृतनाशः, अकर्तुश्च फलेन योगादकृताभ्यागमः। अतिविरोधिनीति। लोकशास्त्रयोरेवमदर्शनादिति भावः॥ ४७७॥ ४७८॥ ४७९॥ § 1679

एवं तावत्प्रवृत्तिमभ्युपगम्य कृतनाशाकृताभ्यागमप्रसङ्ग उक्तः। इदानीं प्रवृत्तिरेव न संभवतीति कुमारिलमतोपन्यासेन दर्शयति—नैरात्म्येत्यादि। § 1680

नैरात्म्यवादपक्षे तु पूर्वमेवावबुध्यते।
मद्विनाशात्फलं न स्यान्मत्तोन्यस्यापि वा भवेत्॥
४८०॥§ 1682

इति नैव प्रवर्त्तेत प्रेक्षावान्फललिप्सया।
शुभाशुभक्रियारम्भे दूरतस्तु फलं स्थितम्॥
४८१॥§ 1684

क्षणिकत्वाभ्युपगमे हि सर्वभावानां नैरात्म्यमेवाभ्युपगतं भवेत्। हेतुपरतन्त्रतया सर्वस्यास्वतन्त्रत्वात्। तस्मिन्सति प्रेक्षावान् क्रियाप्रवृत्तेः पूर्वमेवावबुध्यते—अवधारयति। किं तदित्याह—मद्विनाशादित्यादि। मम विनाशादूर्ध्वं फलं मम न स्यात्, फलप्रसवकाले ममाभावात्। अथापि फलं भवेत्, तदा मत्तोऽन्यस्य क्षणान्तरस्य स्यादिति ज्ञात्वा प्रवृत्तिरेव प्रेक्षावतो न संभवति,

किं पुनः प्रवृत्तिपूर्वककर्मजनितं फलं भविष्यति। तस्य दूरत एवासंभाव्यमानत्वेनावस्थितत्वात्॥ ४८०॥ ॥ ४८१॥ § 1685

एवं कर्मफलसंबन्धो नोपपद्यत इति प्रतिपादितम्। इदानीं कार्यकारणभावानुपपत्तिं कुमारिलमतेनैव प्रतिपादयन्नाह—नाऽनागत इत्यादि। § 1686

नाऽनागतो न वाऽतीतो भावः कार्यक्रियाक्षमः।
वर्त्तमानोऽपि तावन्तं कालं नैवावतिष्ठते॥
४८२॥ § 1688

तावन्तमिति। उत्पद्य यावता कालेन कार्यं निवर्त्तयति तावन्तं कालं नावतिष्ठते क्षणिकत्वादिति भावः॥ ४८२॥ § 1689

168/k

नाऽनागत इत्यादेर्यथाक्रमं समर्थनमाह—न ह्यलब्धात्मकमित्यादि § 1690

न ह्यलब्धात्मकं वस्तु पराङ्गत्वाय कल्पते।
न विनष्टं नच स्थानं तस्य कार्यकृतिक्षमम्॥
४८३॥ § 1692

पूर्वक्षणविनाशे च कल्प्यमाने निरन्वये।
पश्चात्तस्यानिमित्तत्वादुत्पत्तिर्नोपपद्यते॥ ४८४॥ § 1694

अनागतं हि नामोच्यते यदलब्धात्मतत्वम्, यच्चालब्धात्मतत्त्वं तदसत्, यच्चासत्तदशेषसामर्थ्यशून्यम्, यच्चाशेषसामर्थ्यरहितं तत्कथं पराङ्गत्वाय कल्पते—परं प्रति हेतुभावं प्रतिपद्यत इत्यर्थः। समर्थस्यैव हेतुभावसंप्रतिपत्तेः। एवं विनष्टमपिसर्वसामर्थ्यशून्यत्वान्न पराङ्गत्वाय कल्पत इति संबन्धः। न चापि वर्त्तमानस्य स्थानमस्ति, यत्कार्यकृतौ—कार्यकरणे क्षमं भवेत्। किंच—यदि पूर्वकक्षणो निरन्वयं विनश्यतीति कल्प्यते तदा पाश्चात्त्यस्य क्षणस्य निमित्ताभावादुत्पत्तिर्न प्राप्नोति ॥ ४८३॥ ४८४॥ § 1695

स्यादेतद्यथा तुलान्तयोर्नामोन्नामौ समं भवतस्तद्वद्धेतुफलयोर्नाशोत्पादाविष्टावतोवर्त्तमानादविनष्टादेव कार्योत्पत्तेरिष्टत्वान्नानिमित्ता तस्योत्पत्तिर्भविष्यतीत्याह—नाशोत्पादसमत्वेऽपीत्यादि। § 1696

नाशोत्पादसमत्वेऽपि नैवापेक्षा परस्परम्।
न कार्यकारणत्वे स्तस्तद्व्यापारानानुग्रहात्॥
४८५॥§ 1698

नाशोत्पादयोः समत्वेऽपि कल्प्यमाने न नाशोत्पादयोस्तद्वतोर्वा कार्यकारणत्वे स्तः —संभवतः, तयोः परस्परानपेक्षत्वात्। कथमनपेक्षत्वमित्याह—तद्व्यापारानानुग्रहादिति। तस्य—नाशस्य तद्वतो वा व्यापारेण कार्यस्याननुग्रहात्—अननुगृहीतत्वादित्यर्थः। नाशस्य हि नीरूपत्वाद्व्यापाराभावः, हेत्वभिमतस्यापि वस्तुनः कार्यसत्ताकाले सन्निधानाभावाद्व्यापाराभावः॥ ४८५॥ § 1699

स्यादेतदन्तरेणापि व्यापारमानन्तर्यमात्रेण हेतुफलभावो भविष्यतीत्याह—जायमानश्चेत्यादि। § 1700

जायमानश्च गन्धादिर्घटरूपे विनश्यति।
तत्कार्यं नेष्यते यद्वत्तथा रूपान्तराण्यपि॥
४८६॥§ 1702

यदि यदनन्तरं यज्जायते तत्तस्य कार्यमिति स्यात्तदा घटादिस-
169/k न्निवेशिनो रूप क्षणस्यानन्तरं समानजातीयरूपक्षणवत्तत्कलापान्तर्गत एव गन्धादिर्जायत इति सोऽपि तत्कार्यं स्यात्। न चासौ सत्यप्यानन्तर्ये तत्कार्यमिष्यते। न हि भौतिकानामन्योन्यं हेतुफलभावोऽस्ति, यथा भूतानाम्, भिन्नसन्तानत्वादिति परो मन्यते तथा रूपान्तराण्यपीति, समानजातीयरूपक्षणान्तराणि नैव रूपस्यानन्तर्यमात्रेण तत्कार्यतया गृहीतव्यानि, मा भूदतिप्रसङ्ग इति भावः॥ ४८६॥ § 1703

तदेवमानन्तर्यमात्रं कारणभावव्यवस्थानिबन्धनं न युक्तमिति प्रतिपाद्य स्वपक्षमुपसंहारेण दर्शयति—तस्मादित्यादि। § 1704

तस्मात्प्राक्कार्यनिष्पत्तेर्व्यापारो यस्य दृश्यते।
तदेव कारणं तस्य न त्वानन्तर्यमात्रकम्॥
४८७॥§ 1706

न त्वानन्तर्यमात्रकमिति। कार्यकारणव्यवस्थानिबन्धनमिति शेषः॥ ४८७॥ § 1707

यथोक्तमेवार्थं संक्षिप्य दर्शयन्नाह—संक्षेपोऽयमित्यादि। § 1708

संक्षेपोऽयं विनष्टाच्चेत्कारणात्कार्यसम्भवः।

प्रध्वस्तस्यानुपाख्यत्वान्निष्कारणमिदं भवेत्॥
४८८॥§ 1710

अविनष्टाच्च तज्जातावनेकक्षणसंभवात्।
क्षणिकत्वं न भावानां व्याहन्येत तदा कथम्॥
४८९॥§ 1712

अत्र द्वयी कल्पना। विनष्टाद्वा कारणात्कार्यं भवेदविनष्टाद्वा। नष्टानष्टविनिर्मुक्तस्य वस्तुनोऽभावात्। तत्र न तावदाद्यः पक्षः, नष्टस्यासत्त्वेन तत उत्पादाभ्युपगमे कार्यस्य निर्हेतुकत्वप्रसङ्गात्। ततश्च नित्यं सत्त्वादिर्युज्यते। नापि द्वितीयोऽनेकक्षणावस्थायित्वेन भावानां क्षणिकत्वहानिप्रसङ्गात्। न कथं व्याहन्येतेति। व्याहन्यत एवेत्यर्थः। तथा हि भावः प्रथमं तावदुत्पद्यते, ततो व्याप्रियते, ततः कार्यमुत्पाद्य पश्चाद्विनश्यतीत्येवमेकस्यैव वस्तुनोऽनेकस्मिन्क्षणे सन्निधानमिति क्षणिकत्वव्याहतिः स्यात्॥ ४८८॥ ४८९॥ § 1713

एवं कार्यकारणभावानुपपत्तिं प्रतिपाद्य तदधिगन्तृप्रमाणानुपपत्तिं दर्शयन्नाह—क्षणस्थायीत्यादि। § 1714

क्षणस्थायी घटादिश्चेन्नोपलभ्येत चक्षुषा।
न हि नष्टाः प्रतीयन्ते चिरातीतपदार्थवत्॥
४९०॥§ 1716

कार्यकारणभावोऽपि प्रत्यक्षानुपलम्भतः।
ते पूर्त्ति(नैवैति?)सिद्धिं भावानां
स्वभावानुपलम्भनात् ४९१§ 1718

170/k

प्रत्यक्षानुपलम्भसाधनो हि कार्यकारणभावः क्षणिकत्वे च भावानां स्वज्ञानकालेऽनवस्थानादप्रत्यक्षतैव। समानकालं कार्यकारणभावानुपपत्तेः। ततश्च प्रत्यक्षानुपलम्भयोरभाव एव। अनन्यसंसृष्टवस्तूपलम्भात्मरूपत्वेनानुपलम्भस्यापि प्रत्यक्षविशेषात्मत्वात्। अतः पदार्थोपलम्भाभावे तस्याप्ययोग एवेति कथं प्रत्यक्षानुपलम्भसाधनः कार्यकारणभावः स्यात्॥ ४९०॥ ४९१॥
§ 1719

भवतु नामोपलम्भो वस्तुनस्तथाऽपि पूर्वोत्तरयोः क्षणयोः प्रतिसन्धातुरेकस्य कस्यचिदभावात्संबन्धो न सिद्ध्यतीति दर्शयन्नाह—को वेत्यादि। § 1720

को वा व्यवस्थितः कर्त्ता संधत्ते क्रमवद्गतिम्।
अस्य दृष्टाविदं दृष्टं नास्यादृष्टौ तु लक्ष्यते॥
४९२॥§ 1722

गतिरुपलब्धिः। क्रमवती चासौ गतिश्चेति क्रमवद्गतिः। तां कः प्रतिसंधत्ते— घटयति। नैव कश्चित्। यदि हि कश्चिदस्याग्नेरुपलम्भादिदं धूमाद्युपलब्धमस्यानुपलब्धौ नोपलभ्यत इत्येवं क्रमवतीं गतिमेककर्तृत्वेन प्रतिसंदधीत, तदा स्यात्कार्यकारणभावसिद्धिः, स च नास्ति प्रतिसन्धाता त्वन्मतेनेति न कार्यकारणभावःसिद्ध्येदित्यर्थः॥ ४९२॥ § 1723

इदानीं प्रत्यभिज्ञानानुपपत्तिं दर्शयन्नाह—क्षणभङ्गिष्वित्यादि। § 1724

क्षणभङ्गिषु भावेषु प्रत्यभिज्ञा च दुर्घटा।
न ह्यन्यनरदृष्टोऽर्थः प्रत्यभिज्ञायते परैः॥
४९३॥§ 1726

य एव मया पूर्वं दृष्टोऽर्थः स एवायमेतर्हि दृश्यत इत्येवं पूर्वोत्तरयोर्दर्शनयोरेकविषयतया एकज्ञातृतया च यद्घटनं तत्प्रत्यभिज्ञानम्। तच्च सर्वभावानां क्षणभङ्गित्वे सति नोपपद्यते। ज्ञातुर्ज्ञायमानस्य कस्यचिदेकस्याभावात्। न हि देवदत्तेन दृष्टमर्थं विष्णुमित्रः प्रत्यभिजानीते। अन्यतरग्रहणमुपलक्षणम्। नाप्यन्योऽर्थः प्रत्यभिज्ञायत इत्यपि द्रष्टव्यम्॥ ४९३॥
§ 1727

ननु लूनपुनर्जातकेशनखादिष्विव भेदेऽपि सादृश्यात्प्रत्यभिज्ञानं भविष्यतीत्येतदाशङ्क्याह—सादृश्यादित्यादि। § 1728

सादृश्यात्प्रत्यभिज्ञानं भिन्ने केशादिके भवेत्।
ज्ञातुरेकस्य सद्भावाद्विभेदे त्वनिबन्धनम्॥
४९४॥§ 1730

प्रतिसन्धानकारी च यद्येकोऽर्थो न विद्यते।
रूपे दृष्टेऽभिलाषादिस्तत्कथं स्याद्रसादिषु॥
४९५॥§ 1732

171/k

यदि ह्येको ज्ञाता भवेत्तदा स्यात्प्रतिसन्धातृवशाज्ज्ञेयस्य भेदेऽपि सादृश्यकृतं प्रत्यभिज्ञानम्। द्विभेदे तु—द्वयोर्ज्ञातृज्ञेययोर्भेदो द्विभेदः, तस्मिन्सत्यनिबन्धनमेव प्रत्यभिज्ञानम्। अपि च—यदि न कश्चिदेकः प्रतिसन्धाता पुरुषो भवेत्तदा यदेतन्मातुलुङ्गफलादिरूपे दृष्टे तद्रूपाविनाभाविषु रसादिषु स्मरणपूर्वमभिलषणं परिभोगाय च प्रवृत्तिस्तत्कथं भवेत्। न ह्न्येन दृष्टेऽन्यस्याभिलाषादिर्भवेत्॥ ४९४॥ ॥ ४९५॥ § 1733

बन्धमोक्षावपि न प्राप्नुत इति दर्शयन्नाह—रागादीत्यादि। § 1734

रागादिनिगडैर्बद्धः क्षणोऽन्यो भववारके।
अबद्धो मुच्यते चान्य इतीदं नावबुध्यते॥
४९६॥ § 1736

अन्यो हि क्षणो रागादिभिर्बद्धोऽन्यस्तु मुच्यत इत्येतन्नावबुध्यते—न संभाव्यत इति यावत्। भववारक इति। भवः संसारः, स एव वारकम्—बन्धनागारम्॥ ४९६॥ § 1737

प्रयत्नश्च मोक्षार्थो व्यर्थो मोक्षाभावादिति दर्शयन्नाह—मोक्षो नैव हीत्यादि। § 1738

मोक्षो नैव हि बद्धस्य कदाचिदपि संभवी।
एकान्तनाशतस्तेन व्यर्थो मुक्त्यर्थिनां क्षणः॥
४९७॥ § 1740

नन्वबद्धस्यैव मोक्षो भविष्यति, तत्कोऽत्र विरोध इत्याह—मोक्षमित्यादि। § 1741

मोक्षमासादयन्दृष्टो बद्धः स निगडादिभिः।
अबद्धो मुक्तिमेतीति दृष्टाव्याहतमीदृशम्॥
४९८॥ § 1743

य एव हि बद्धः स एव मुच्यत इति लोके प्रतीतं दृष्टं च। अबद्धस्य तु मोक्षप्रतिज्ञानं लोकप्रतीत्या प्रत्यक्षेण च बाध्यत इति प्रत्यक्षप्रतीतिविरोधः प्रतिज्ञाया इति भावः॥ ४९८॥ § 1744

अनुमानबाधामप्याह—एकाधिकरणावित्यादि। § 1745

एकाधिकरणावेतौ बन्धमोक्षौ तथा स्थितेः।

लौकिकाविव तौ तेन सर्वं चारुतरं स्थितम्॥
४९९ ॥§ 1747

प्रयोगः—यौ बन्धमोक्षौ तावेकाधिकरणौ, यथा लौकिकौ बन्धमोक्षौ, बन्धमोक्षौ च विवादास्पदीभूतावेतावनुशयतद्विसंयोगलक्षणौ बन्धमोक्षाविति स्व-
172/k भावहेतुः। तथा स्थितेरिति। बन्धमोक्षात्मना स्थितेः, बन्धमोक्षरूपत्वादित्यर्थः। ताविति। बन्धमोक्षौ। अतश्चैकस्याधिकरणस्यात्मनः सिद्धेः सर्वकर्मफलसंबन्धादि चारुतरं स्थितम्—शोभनतरमवस्थितमित्यर्थः। यथोक्तदोषाभावात्॥ ४९९॥ § 1748

एतेनैवेति। § 1749

एतेनैव प्रकारेण स्मृत्यादीनामसम्भवः।
एकाधिकरणाभावात्क्षणक्षयिषु वस्तुषु॥ ५०० ॥§ 1751

एकस्य कर्तुरभावात्। पूर्वोक्तानां स्मृतिनिश्चयस्वयंनिहितप्रत्यनुमार्गणादीनामसम्भवो बोद्धव्यः। तत्रापि भिन्नाधिकरणत्वे दृष्टादिविरोधप्रसङ्गात्। नहि चैत्रेऽनुभवितरि सन्दिहाने निधातारि वाञ्छावति च सति मैत्रस्य स्मृतिनिश्चयानुमार्गणकुतूहलविरत्यादयः संभवन्ति॥ ५००॥ § 1752

अत्राभिधीयत इत्यादिना प्रतिविधत्ते। § 1753

अत्राभिधीयते सर्वकार्यकारणतास्थितौ।
सत्यामव्याहता एते सिध्यन्त्येवं निरात्मसु॥
५०१ ॥§ 1755

सत्यपि हि भावानां नैरात्म्ये कार्यकारणताप्रभावितेयं कर्मफलसंबन्धादिव्यवस्था सति च कार्यकारणभावे सर्वमविरुद्धमेवेति न किंचित्क्षियते॥ ५०१॥ § 1756

स्यादेतत्—स एव कार्यकारणभावप्रतिनियमो नान्तरेणात्मानमुपपद्यत इत्याह—यथा हीत्यादि। § 1757

यथाहि नियता शक्तिर्बीजादेरङ्कुरादिषु।
अन्वय्यात्मवियोगेऽपि तथैवाध्यात्मिके स्थितिः॥
५०२ ॥§ 1759

यथैव हि बीजादेरङ्कुरादिषु नियता शक्तिरन्तरेणाप्यात्मानमधिष्ठातारं तथाऽध्यात्मिकेऽपि वस्तुनि भविष्यति। न हि बीजादिः शरीरवदुपभोगायतन-

त्वेनात्मनाऽधिष्ठितः। अन्यथा हि नेदं निरात्मकं जीवच्छरीरमप्रमाणादिमत्त्वप्रसङ्गादित्येतन्नोपपद्यते। घटादौ किलात्मनिवृत्तौ प्राणादि निवर्त्तमानं दृष्टमिति व्यतिरेकिता हेतोः सिद्ध्येत्। यदि तु घटादेरपि सात्मकत्वं भवेत्तत्कथमयं हेतुर्व्यतिरेकी भवेत्।अन्वय्यात्मवियोगेऽनपीति। अन्वयिनः कस्यचित्स्वभावस्य वियोगेऽपीत्यर्थः॥ ५०२॥ § 1760

का पुनरसौ स्थितिरित्याह—पारम्पर्येणेत्यादि। § 1761

पारम्पर्येण साक्षाद्वा कचित्किञ्चिद्धि शक्तिमत्।
ततः कर्मफलादीनां सम्बन्ध उपपद्यते॥
५०३॥§ 1763

173/k

त(यथै?)थैव हि बाह्ये नियता हेतुफलव्यवस्था तथैवाध्यात्मिके संस्कारराशावियम्, कारणशक्तिनियमात्। कुतश्चिदेवहि शुभाशुभकर्मणः क्षणपरम्परया नियतफलमिष्टमनिष्टं वाऽऽविर्भवति, रूपाद्यनुभवात्स्मरणम्, विमर्शान्निर्णयः, स्थापनादन्वेषणम्, अभिवाञ्छतोऽर्थदर्शनम्, ततः कुतूहलविरतिरिति सर्वमविरुद्धम्। न हिक्वचिदेकपदार्थान्वयित्वेन स्मरणादयो बौद्धस्य प्रसिद्धाः। किं तर्हि ? इदं प्रत्ययमात्रम्। यथोक्तम्— अस्ति कर्मास्तिफलं कारकस्तु नोपलभ्यते, य इमान् स्कन्धान्निक्षिपति, अन्यांश्च स्कन्धानुपादत्ते, अन्यत्र धर्मसङ्केतात्। तत्रायं धर्मसङ्केतः,यदुतास्मिन् सतीदं भवति, अस्योत्पादादिदमुत्पद्यत इति। कर्मफलादीनामित्यादिशब्देन स्मृत्यादिपरिग्रहः। संबन्धस्तु जन्यजनकभावः॥ ५०४॥ § 1764

यद्येवं कथं तर्हि लोके शास्त्रे च तत्तत्पुद्गलमधिकृत्योच्यते, अनेनैव कृतं कर्म कोऽन्यः प्रत्यनुभविष्यतीत्याह—कर्तृत्वादीत्यादि। § 1765

कर्तृत्वादिव्यवस्था तु सन्तानैक्यविवक्षया।
कल्पनारोपितैवेष्टा नाङ्गं सा तत्त्वसंस्थितेः॥
५०४॥§ 1767

प्रचुरतराज्ञानतिमिरसङ्घातोपहतज्ञानालोको लोक आत्मनि तत्त्वान्यत्वासत्त्वादिविचारमवधूय विशिष्टहेतुफलभावनियतरूपाणां संस्काराणां प्रबन्धमेकत्वेनाध्यवसाय स एवाहं करोमिति व्यवहरति, मुक्तये च प्रवर्त्तते। तदभिमानानुरोधेन च भगवन्तस्तथागताः समुच्छेददृष्टिप्रपाततो विनेयजनरिरक्षयिषया सन्तानैकतां दर्शयन्तः कर्तृत्वादि व्यवस्थापयन्ति। तथाविधाया एव व्यवस्थातो वस्तुसिद्धिरिति चेदाह—नाङ्गं सेत्यादि। न हि तत्त्वपरिक्षापराङ्मुखमतीनां संवृतिपतितानां बालजनानामभिनिवेशवशेन शक्यं तत्त्वं

व्यवस्थापयितुम्, तदभिनिवेशस्य नैतात्म्यक्षणभङ्गविहितप्रमाणबाधितत्वात्॥ ५०४॥ § 1768

बीजादिषु किलान्वय्यात्मवियोगोऽसिद्ध इति दृष्टान्तासिद्धिं मन्यमानस्य परस्य चोद्यमाशङ्कयन्नाह—अन्वयासंभवे सैवेत्यादि। § 1769

अन्वयासंभवे सैव कार्यकारणता भवेत्।
विशिष्टा युज्यते यद्वत्सन्तानान्तरभाविभिः॥
५०५॥ § 1771

ननु बीजाङ्कुरादीनां कार्यकारणतेक्ष्यते।
नियता तत्र सूक्ष्मोऽपि नांशोऽस्त्यनुगमात्मकः॥
५०६॥ § 1773

अन्वयोऽनुगमः कस्यचित्स्वभावस्येति शेषः॥ ५०५॥ ५०६॥ § 1774
174/k

स्यादेतत्—बीजादिष्वप्यन्वयोऽस्त्येव। यथोक्तमुद्योतकारेण—तत्रापि ये बीजावयवास्ते पूर्वव्यूहपरित्यागेन व्यूहान्तरमापद्यन्ते, व्यूहान्तरापत्तौ च पृथिवीधातुरब्धातुना संगृहीतमान्तरेण तेजसा पच्यमानो रसद्रव्यं निर्वर्त्तयति। स रसः पूर्वावयवसहितोऽङ्कुरादिभावमापद्यत इति। तत्कथं तत्र सूक्ष्मोऽपि नांशोस्तीत्युच्यत इत्याह—क्षित्यादीनामित्यादि। § 1775

क्षित्यादीनामवैशिष्ट्ये बीजाङ्कुरलतादिषु।
न भेदो युक्त ऐकात्म्यात्तदा सिद्धा निरन्वया॥
५०७॥ § 1777

तस्मात्कर्मफलादीनां भावाभावप्रसिद्धये।
कार्यकारणतासिद्धौ यत्नः कार्यः परैरलम्॥
५०८॥ § 1779

एतदुक्तं भवति। यदि पृथिव्यादय उत्तरस्मिन्सन्निवेशे वर्त्तमाना अपरित्यक्तप्राक्तनस्वभावा एव वर्तन्ते, तदा न तेषां पूर्वव्यूहत्यागे व्यूहान्तराप-

४ यत्नः कार्यः] Correction : ; यत्तत्कार्यं (sic !)यत्नः कार्यः

त्तिश्चोपपद्यते, तादात्म्यात्। पूर्ववत्। ततश्च बीजाङ्कुरादीनां परस्परं भेदो न प्राप्नोति। एकस्वभावत्वात्। अथ भेदोऽङ्गीक्रियतेऽङ्कुरादीनां तदा नियमेन प्राक्तनस्वभावपरित्यागे सति क्षित्यादीनां पूर्वव्यूहत्यागो व्यूहान्तरापत्तिश्चाङ्गीकर्त्तव्या। अन्यथा भेद एव न स्यादित्युक्तम्। ततश्चापरापरस्वभावानामुत्पत्तेः कुतोऽन्वेतृम्। यतश्चैवं कार्यकारणभावे साधिते सर्वं कर्मफलसंबन्धादि घटते, दूषिते च विघटते, तस्मात्कर्मफलादीनां भावसिद्धये कार्यकारणतासिद्धौ यत्नो विधातव्यः। परैः—उत्तमदर्शनानुसारितयोत्कृष्टैर्बौद्धैरिति यावत्। तेषां चाभावसिद्धये तस्या एव कार्यकारणताया अभावसिद्धौ यत्नः कार्यः परैः—तीर्थिकैरित्यर्थः। कार्यकारणतासिद्धावित्येतद्विरावर्त्तनीयम्। एकत्राऽकारप्रश्लेषः कार्यः॥ ५०७॥ ५०८॥ § 1780

अत्र यौ नष्टानष्टविकल्पौ परेण कृतौ तदुत्सारणेन कार्यकारणभावं तावत्सर्वव्यवस्थामूलं साधयन्नाह—अत्रोच्यत इत्यादि। § 1781

अत्रोच्यते द्वितीये हि क्षणे कार्यं प्रजायते।
प्रथमे कारणं जातमविनष्टं तदा च तत्॥
५०९॥§ 1783

क्षणिकत्वात्तु तत्कार्यक्षणकाले न वर्त्तते।
वृत्तौ वा विफलं कार्यं निर्वृत्तं तद्यतस्तदा॥
५१०॥§ 1785

अविनष्टादेव कारणात्कार्यं भवतीति न पक्षः, न चैवं यौगपद्यप्रसङ्गः। 175/k
तथाहि—प्रथमक्षणभाविकारणतासादितात्मलाभमविनष्टमेव प्रतीत्य द्वितीये क्षणे कार्यं प्रजायते। तच्च तथा जायमानमविनष्टादेव जायते। प्रथमे क्षणे तस्याविनष्टत्वात्। कार्यसत्ताकालं च न कारणमनुवर्त्तते। क्षणिकतयाऽनवस्थानात्। सत्यामपि चानुवृत्तौ न तदानीं तस्य कारणत्वम्, निष्पन्ने कार्ये तस्याकिञ्चित्करत्वात्॥ ५०९॥ ५१०॥ § 1786

तदेवाकिञ्चित्करत्वं दर्शयति—नचेत्यादि। § 1787

न च जातं पुरस्तेन शक्यं जनयितुं पुनः।

---

५ तत्कार्यक्षण] Correction : ; तत्कार्यं क्षण (sic !)तत्कार्यक्षण

अभूतभावरूपत्वाज्जन्मनो नान्यथा स्थितिः॥
५११ ॥§ 1789

नान्यथा स्थितिरिति। अन्यथा, स्थितिः—नियमो न भवेदिति यावत्। अनवस्था भवेदिति यावत्। यदि हि जातमपि जन्येत, तदा पुनरप्यविशेषात्तस्य जननप्रसङ्गः। ततश्चानवस्था जन्मनां स्यात्। कारणानां च व्यापारानुपरतिः कारणस्यापि जन्यत्वप्रसङ्गो विशेषाभावात्। ततश्चेदं कारणमिदं कार्यमिति व्यवस्था न स्यात्॥ ५११॥ § 1790

तस्मादित्यादिनोपसंहृत्य स्थितपक्षस्यादुष्टतां दर्शयति। § 1791

तस्मादनष्टात्तद्धेतोः प्रथमक्षणभाविनः।
कार्यमुत्पद्यते शक्ताद्द्वितीयक्षण एव तु॥
५१२ ॥§ 1793

विनष्टात्तु भवेत्कार्यं तृतीयादिक्षणे यदि।
विपाकहेतोः प्रध्वस्ताद्यथा कार्यं च वक्ष्यते॥
५१३ ॥§ 1795

यौगपद्यप्रसङ्गोऽपि प्रथमे यदि तद्भवेत्।
सहभूहेतुवत्तच्च न युक्त्या युज्यते पुनः॥
५१४ ॥§ 1797

विनष्टविकल्पस्त्वनभ्युपगमादेवायुक्तः। तथाहि—यदि तृतीयादिषु क्षणेषु कार्यं भवतीत्यभ्युपेतं भवेत्, यथा वैभाषिकैरङ्गीकृतमेकोऽतीतः प्रयच्छतीति। तदाविनष्टात्कारणात्कार्योत्पादोऽङ्गीकृतः स्यात। न चायं पक्षोऽस्माकम्। अयुक्त्यपेतत्वात। यौगपद्यप्रसङ्गोऽपि कदाचिद्भवेत्, यदि प्रथम एव क्षणे कार्यमिष्यते। यथा तैरेव वैभाषिकैः सहभूर्हेतुरिष्यते। तच्चैतदयुक्तम्॥ ५१२॥ ५१३॥ ५१४॥ § 1798

कस्मादित्याह—असत इत्यादि। § 1799

असतः प्रागसामर्थ्यात्सामार्थ्ये कार्यसंभवात्।

१ जन्मनो] Correction: ; जन्मतो (sic!)जन्मनो

कार्यकारणयोः स्पष्टं यौगपद्यं विरुध्यते॥
५१५ ॥§ 1801

176/k

सहभूतं हि कार्यं जनयन्हेतुरनुत्पन्नो वा जनयेदुत्पन्नो वा। न तावदनुत्पन्नः, तस्य कार्योत्पत्तेः प्रागसत्त्वात्। असतश्चाशेषसामर्थ्यशून्यत्वात्। यदा तर्ह्युत्पन्नस्तदा समर्थत्वाज्जनयिष्यतीति चेदाह—सामर्थ्ये कार्यसंभवादिति। यदा हि तस्योत्पन्नावस्थायां सामार्थ्यं तदा कार्यमपि तत्स्वभाववदेवोत्पन्नमिति क्वास्य सामर्थ्यमुपयोगमश्नुवीत। तस्मादनुमानप्रमाणविरुद्धःकार्यकारणयौगपद्याभ्युपगमः॥ ५१५॥ § 1802

ननु कार्यकारणभावो हि कर्मकर्तृभावः स च भिन्नकाले विरुद्ध्यते। न हि घटकुलालयोरयौगपद्ये सति कर्मकर्तृभावो दृष्ट इत्याह—नहीत्यादि। § 1803

न हि तत्कार्यमात्मीयं संदंशेनेव कारणम्।
गृहीत्वा जनयत्येतद्यौगपद्यं यतो भवेत्॥
५१६ ॥§ 1805

नापि गाढं समालिङ्ग्य प्रकृतिं जायते फलम्।
कामीव दयिता येन सकृद्भावस्तयोर्भवेत्॥
५१७ ॥§ 1807

यदि हि संदंशग्रहणन्यायेन कारणं कार्योत्पत्तौ व्याप्रियेत, कार्यं वा वनितोपगूहनवत्स्वकारणाऽऽश्लेषात्स्वजन्मनि व्यापारं प्रतिपद्येत, तदा सह भाविता नियमेनस्यात्। यावता निर्व्यापारमेवेदं विश्वं न हि पारमार्थतः कश्चित्कर्त्ता कर्म वास्त्यन्यत्र धर्मसङ्केतादिति समुदायार्थः। प्रकृतिमिति। कारणम्॥ ५१६॥ ५१७॥ § 1808

यद्येवं यदि निर्व्यापारमेव कार्यं कारणं वा। तत्कथं भवन्ति वक्तारो धूममग्निर्जनयति धूमोऽग्निमाश्रित्योत्पद्यत इत्याह—नियमादित्यादि। § 1809

नियमादात्महेतूत्थात्प्रथमक्षणभाविनः।
यद्यतोऽनन्तरं जातं द्वितीयपक्षणसन्निधिः॥
५१८ ॥§ 1811

तत्तज्जनयतीत्याहुरव्यापारेऽपि वस्तुनि।
विवक्षामात्रसंभूतसङ्केतानुविधायिनः॥ ५१९ ॥§ 1813

स्वहेतुप्रत्ययसमुत्थापितात्कारणस्य शक्तिप्रतिनियमाद्धेतोर्यत्कार्यं यतः क्षणप्रथमभाविनः कारणाज्ञातं किंचिद्विशिष्टम्, द्वितीये क्षणे सन्निधिः सद्भावो यस्येति विग्रहः, तत्कारणं तत्कार्यं जनयतीत्युच्यते। जनयतीत्युपलक्षणम्। तत्तदाश्रित्योत्पद्यतइत्यपि विज्ञेयम्। के पुनस्त एवमाहुः ?। इत्यादि। बहिरर्थनिरपेक्षविवक्षाभाविसङ्केतानुरूपव्यवहारकारिणो व्यवहर्तार एवामाहुरित्यर्थः॥ ५१८॥ ५१९॥ § 1814

ननु य उत्पद्य व्यापारं नाविशेत् विशेषोत्पादार्थं स कथं हेतुः स्यादित्याह—जन्मातिरिक्तेत्यादि। § 1815

177/k

जन्मातिरिक्तकालेन व्यापारेणात्र किं फलम्।
सत्तैव व्यापृतिस्तस्यां सत्यां कार्योदयो यतः॥
५२० ॥§ 1817

कारणसत्तासमनन्तरमेव कार्यस्य निष्पन्नत्वादकिंचित्कर एव कार्यस्य जन्मोत्तरकालभावी व्यापारः कार्ये। तथाहि—व्यापारो नाम कारणस्य क उच्यते। यदनन्तरमेव कार्यमुदयमासादयति कारणसत्तानन्तरमेव च कार्यमुद्भवतीति सत्तैव व्यापारशब्दवाच्याऽस्तु किं जन्मातिरेकिणा व्यापारेण कल्पितने॥ ५२०॥ § 1818

यद्येवमसति भावानां व्यपारे कथमिदमधीयते कार्यस्य कारणेऽपेक्षा कारणस्य च कार्ये व्यापार इत्याह—य आनन्तर्येत्यादि। § 1819

य आनन्तर्यनियमः सैवापेक्षाभिधीयते।
कार्योदये सदा भावो व्यापारः कारणस्य च॥
५२१ ॥§ 1821

इदमेव हि कार्यस्य कारणेऽपेक्षा यत्तदनन्तरभावित्वम्, कारणस्यापि कार्येऽयमेव व्यापारो यत्कार्योदयकाले सदा सन्निहितत्वम्॥ ५२१॥ § 1822

अपि च व्यापारस्य व्यापारवतो वा भावस्य कार्यं प्रति हेतुभावस्तद्भावभावित्वादेव भवता ग्रहीतव्यः, न ह्यन्वयव्यतिरेकाभ्यामन्यः कार्यकारणभावाधिगमेऽभ्युपायोऽस्ति, ततश्चैवं सति वस्तुमात्रस्यापि किमिति कारणभावो न गृह्यते, नहि कार्यस्यवस्तुमात्रगतान्वयव्यतिरेकानुविधायित्वं न प्र-

सिद्धम्, अतस्तदेव वस्तुमात्रं वरं कारणमस्तु चद्गतान्वयव्यतिरेकानुविधायित्वं कार्यस्य सिद्धमित्येतद्दर्शयति—तद्भावेत्यादि। § 1823

तद्भावभाविताभावमात्राद्व्यापारोप्यवकल्पितः।
हेतुत्वमेति तद्वान्वा तदेवास्तु ततो वरम्॥
५२२॥§ 1825

अवकल्पित इति। भवद्भिर्योऽन्य उभ्यानुभयरूपो वा व्यापारः परिकल्पित इत्यर्थः। तद्वा(?)निति व्यापारवान्। तद्भावभावितामात्राद्धेतुत्वमेतीति प्रकृतेन संबन्धः।तदेवेति। विलक्षणव्यापाररहितं वस्तुमात्रं हेतुरस्त्वित्यर्थः॥ ५२२॥ § 1826

कस्तत्रातिशयो येन वरमित्युच्यत इत्याह—भाव इत्यादि। § 1827

भावे सति हि दृश्यन्ते बीजादेवाङ्कुरोदयाः।
न तु व्यापारसद्भावे भवत्किञ्चित्समीक्ष्यते॥
५२३॥§ 1829

भावे—भावमात्रे, बीजादौ व्यापारान्तरसमावेशशून्ये सतीत्यर्थः। एतेन भाव मात्रगतान्वयव्यतिरेकानुविधायित्वमेव कार्याणां सिद्धं न तु व्यापारग- 178/k
तान्वयाद्यनुविधायित्वमिति दर्शितं भवति॥ ५२३॥ § 1830

स्यादेतद्यद्यपि व्यापारगतान्वयाद्यनुविधानं कार्यस्य न सिद्धम्, तथापि तस्य कारणभावो भविष्यतीत्याह—अदृष्टशक्तेरित्यादि। § 1831

अदृष्टशक्तेर्हेतुत्वे कल्प्यमानेऽपि नेष्यते।
किमन्यस्यापि हेतुत्वं विशेषो वाऽस्य कस्ततः॥
५२४॥§ 1833

एवं हि व्यापारमपि हेतुं प्रकल्प्यापरोऽपि कल्पनीयः स्यात्। अदृष्टशक्तित्वेन विशेषाभावात्, ततश्चानवस्था स्यात्। अथान्यो न कल्पते निबन्धनाभावात्तदा व्यापारस्यापि कल्पना माभूत्तत्रापि निबन्धनाभावस्य तुल्यत्वात्। किंच योऽप्यसौ व्यापारः कार्यं जनयति स किं व्यापारान्तरसमावेशादाहोस्वित्सत्तामात्रेण, यदि व्यापारान्तरसमावेशात्तदा व्यापारान्तरस्यैव कारणत्वं स्यान्न व्यापारस्य,, तस्यापि व्यापारान्तरस्य कारणत्वे तुल्यः

६ तद्भावभावि] Correction : ; तद्भावि (sic !)तद्भावभावि

पर्यनुयोगः। तस्यापि हि यदि व्यापारान्तरसमावेशात्कारणभावः कल्प्येत तदाऽनवस्था स्यात्॥ ५२४॥ § 1834

अथ सत्तामात्रेणेति पक्षस्तदा पदार्थोऽपि व्यापारवत्सत्तामात्रेणैव कार्यं जनयिष्यतीति व्यार्था व्यापारकल्पनेति दर्शयति—अन्येन चेत्यादि। § 1835

अन्येन च विना हेतुर्यथा व्यापार इष्यते।
कार्यस्य वा भवेत्तद्वत्किमन्येऽपि न हेतवः॥
५२५॥§ 1837

यथैव हि व्यापारोऽन्येन व्यापारान्तरेण विनाऽपि कार्येऽङ्कुरादिके हेतुरिष्यते, तद्वदन्येऽपि भावा विलक्षणव्यापारशून्य एव हेतवः किं नेष्यन्ते॥ ५२५॥ § 1838

अथापि स्यान्न व्यापारः कार्यं साक्षादुपकरोति। किं तर्हि भावमेव व्यापारवन्तमित्याह—अथवा भाव इत्यादि। § 1839

....।
....॥
५२६॥§ 1841

हेतुरिष्यत इति प्रकृतेन संबन्धः। तवापि हि व्यापारवति हेतुरसौ भवन्व्यापारान्तरसमावेशरहित एव भवतीति स एव दृष्टान्तो भविष्यतीति भावः॥ ५२६॥ § 1842

नचापि सत्ताव्यतिरेकेण व्यापारः पदार्थस्यास्ति। उपलब्धिलक्षणप्राप्तस्यानुपलब्धेरिति दर्शयति—दृश्यत्वाभिमतमित्यादि। § 1843
179/k

दृश्यत्वाभिमतं नैवं वयं चोपलभामहे।
तत्कथं तस्य सम्बन्धमङ्गीकुर्मो निबन्धनम्॥
५२७॥§ 1845

दृश्यत्वेन हि भवतां व्यापारोऽभिमतः, यथोक्तं कुमारिलेन—प्राक्कार्यनिष्पत्तेर्व्या(?)पारो यस्य दृश्यत इत्यादि। अपि च स व्यापारात्मा पदार्थस्तस्माद्व्यापारवतोभावादर्थान्तरभूतो वा स्यादनर्थान्तरभूतो वा, वस्तुसतः प्रकारान्तराभावात्, उभयानुभयबिकल्पस्यासंभव एव। सच यद्यर्थान्तरभूतस्तदा पदार्थस्य कारणत्वं न प्राप्नोति। तद्व्यतिरेकिणो व्यापारस्यैव कारण-

भावात्। व्यापारेण संबन्धात्तस्यापि कारणभावोऽस्तीति चेत्। न। परस्परानुपकारिणोः संबन्धासिद्धेः। अथोपक्रियत एव व्यापारः पदार्थेनेति स्यात्। तदप्ययुक्तम्। न हि तस्यापरो व्यापारोऽस्ति, येन व्यापारमुपकुर्यादन्यथा ह्यनवस्थायां व्यापाराणामेव परस्परं घटनात्पदार्थेन सह व्यापारस्य न कदापि संबन्धः सिद्ध्येत्। अथ व्यापारान्तरमन्तरेणैव पदार्थो व्यापारमुपकरोतीति स्यात्तदा कार्यमपि व्यापारवद्व्यापाररहित एव सत्तामात्रेण किं नोपकुर्वीत येन व्यापारोऽर्थान्तरभूतः कल्प्यते। नहि तस्य कार्येऽपि सत्तामात्रेणोपयोगं व्रजतः कश्चित्प्रतिरोद्धाऽस्ति। तस्मान्नार्थान्तरभूतो व्यापारो युक्तः। अथानर्थान्तरभूत इति पक्षस्तदा सिद्धं सत्तैव व्यापृतिरिति। पदार्थस्वभावस्यैव सत्ताशब्दवाच्यत्वात्। ततश्च न सिद्ध्यति जन्मातिरेकित्वं व्यापारस्य॥ ५२७॥ § 1846

अपि च। यथा बुद्धिरर्थप्रतिच्छित्तौ जायमानैव व्यापाररहितापि सत्तामात्रेण व्याप्रियते तथा सर्वेषामपि भावानां हेतुत्वमुत्तरकालभाविव्यापारमन्तरेण भविष्यतीत्येतद्दर्शयति—बुद्धेरित्यादि। § 1847

बुद्धेर्यथा न जन्मैव प्रमाणत्वं निरुध्यते।
तथैव सर्वभावेषु तद्धेतुत्वं न किं मतम्॥
५२८॥ § 1849

न हि बुद्धेर्जन्मातिरेकी व्यापारोऽस्ति। तथाहि— सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमित्यत्र सूत्रे जन्मग्रहणस्य प्रयोजनं वर्णयता कुमारिलेनोक्तम्,बुद्धिजन्मेति च प्राह जायमानप्रमाणताम्। व्यापारः कारणानां हि दृष्टो जन्मातिरेकतः। प्रमाणेऽपि तथा माभूदिति जन्म विवक्ष्यत इति। तद्धेतुत्वमिति। तत्— करणजन्म हेतुर्येषां ते तथोक्ताः। तद्भावस्तत्त्वम्॥ ५२८॥ § 1850

स्यादेतद्बुद्धेर्व्यापारो भावो युक्तो न हि सोत्तरकालमवतिष्ठते क्षणिकत्वादित्याह —क्षणिका हीत्यादि। § 1851
180/k

क्षणिका हि यथा बुद्धिस्तथैवान्येऽपि जन्मिनः।
साधितास्तद्वदेवातो निर्व्यापारमिदं जगत्॥
५२९॥ § 1853

साधिता इति। स्थिरभावपरीक्षायां सकलवस्तुव्यापिनः क्षणभङ्गस्य साधितत्वात्। तद्वदेवेति। बुद्धिवदेव। अत इति। क्षणिकत्वात्। प्रयोगः—ये क्षणिकास्तेजन्मातिरिक्तव्यापारशून्याः, यथा बुद्धिः क्षणिकाश्च बीजादयः पू-

र्वं प्रसाधिता इति स्वभावहेतुः। पश्चादवस्थित्यभावेन निराधारव्यापारायोगो बाधकं प्रमाणं तस्मादानन्तर्यकमात्रमेव कार्यकारणभावव्यस्थानिबन्धनं न व्यापार इति स्थितमेतत्॥ ५२९॥ § 1854

यच्चोक्तं जायमानश्च गन्धादीत्यादि, तत्रापि न व्यभिचार इति दर्शयन्नाह—प्रबन्धेत्यादि। § 1855

प्रबन्धवृत्त्या गन्धादेरिष्टैवान्योन्यहेतुता।
तदबाधकमेवेदं तद्धेतुत्वप्रसञ्जनम्॥ ५३०॥§ 1857

रूपरसादीनां हि परस्परं प्रबन्धापेक्षया सहकारिकारणभावोऽभीष्ट एव। यथोक्तम्— शक्तिप्रवृत्त्या न विना रसस्यैवान्यकारणम्। इत्यतीतैककालानां गतिस्तत्कार्यलिङ्गजेति॥ ५३०॥ § 1858

ननु चाग्नेरिव गवाश्वादेरप्यनन्तरं कदाचिद्धूमो भवति तत्कथमानन्तर्यं न व्यभिचारीत्याह—अन्यानन्तरभावेऽपीत्यादि। § 1859

अन्यानन्तरभावेऽपि किञ्चिदेव न कारणम्।
तथैव नियमादिष्टं तुल्यं चैतत्स्थिरेष्वपि॥
५३१॥§ 1861

न हि वयमानन्तर्यमात्रं कार्यकारणभावाधिगतिनिबन्धनं ब्रूमः किं तर्हि ? यन्नियतम्। तथाहि—यस्यैवानन्तरं यद्भवति तत्तस्य कारणमिष्यते। न च धूमो गवादेरेवानन्तरं भवति, असत्यपि गवादौ तस्य भावात्। किंच भवतोऽप्यत्र स्थिरवादिनश्चोद्यमेतदवतरति, कस्माद्गवादेरनन्तरं धूमो भवन्नपि तत्कार्यं न भवतीति॥ ५३१॥ § 1862

अत्र पर आह—यो यत्रेत्यादि। § 1863

यो यत्र व्यापृतः कार्ये न हेतुस्तस्य चेन्मतः।
यस्मिन्नियतसद्भावो यः स हेतुरितीष्यताम्॥
५३२॥§ 1865

यस्मिन्नित्यादिना स्वपक्षेऽपि परिहारमाह॥ ५३२॥ § 1866

एवं तावत्क्षणिकत्वेऽपि भावानां कार्यकारणभाव उपपादितः। इदानीं तदधिगन्तृप्रमाणोपपादनार्थमाह—भावाभावावित्यादि। § 1867
181/k

भावाभावाविमौ सिद्धौ प्रत्यक्षानुपलम्भतः।
यदि साकारविज्ञानविज्ञेयं वस्तु चेन्मतम्॥
५३३॥§ 1869

यदाऽनाकारधीवेद्यं वस्तु युष्माभिरिष्यते।
तत्क्षणत्वादिपक्षेऽपि समानमुपलभ्यते॥ ५३४॥§ 1871

पूर्वकेभ्यः स्वहेतुभ्यो विज्ञानं सर्वमेव हि।
समांशकालरूपादि बोधरूपं प्रजायते॥
५३५॥§ 1873

यथैव हि भवतः स्थिरपदार्थोपलम्भः सिद्ध्येत्तथाऽस्माकं क्षणिकस्यापि सेत्स्यति। तथाहि—पदार्थस्योपलम्भो भवन्साकारेणैव विज्ञानेन भवेदनाकारेण वा। तत्र यदि साकारेण तदा स्वाकारानुभव एव ज्ञानस्यार्थानुभव इति स्थिरास्थिरपक्षयोर्न कश्चिद्विशेषः। अथानाकारेण तदाप्यविशेष एव। तथाहि—पूर्वकेभ्य एव स्वहेतुभ्यस्तथा तत् ज्ञानमुपजायते, येन स समानकालभाविरूपाद्येवावबुध्यते नान्यत्। तद्बोधात्मकस्यैव तस्योत्पन्नत्वात्। अतः समानकालभाविरूपादिबोधस्वभावे ज्ञानेऽङ्गीक्रियमाणे न काश्चिदर्थस्य स्थिरास्थिरत्वे विशेषः। अवश्यं च भवता पूर्वहेतुकृत एव समानकालभाविप्रतिनियतरूपादिग्रहणे ज्ञानस्य स्वभावोऽङ्गीकर्त्तव्यो येन तुल्येऽपिसमानकालभावित्वे रूपाद्येव ज्ञानं परिच्छिनत्ति नेन्द्रियमिति स्यात्। तच्च क्षणिकत्वेऽपि भावानां तुल्यमेवेति यत्किंचिदेतत्॥ ५३३॥ ५३४॥ ५३५॥
§ 1874

साकार इत्यादिना परो द्वयोश्चोदयति। § 1875

साकारे ननु विज्ञाने वैचित्र्यं चेतसो भवेत्।
नाकारानङ्कितत्वेऽस्ति प्रत्यासत्तिनिबन्धनम्॥
५३६॥§ 1877

यदि साकारं ज्ञानं तदा। चित्रास्तरणादिषु ज्ञानस्य चित्रत्वं भवेत्। न चैकस्य चित्रत्वं युक्तमतिप्रसङ्गात्। अथानाकारं तदा नीलास्पदं संवेदनं न पीतस्येति व्यवस्थानं न सिद्ध्येत्। सर्वत्र बोधरूपतया विशेषाभावेन प्रत्यासत्तिनिबन्धनाभावात् ॥ ५३६॥ § 1878

भवद्भिरपीत्यादिना प्रतिविधत्ते। § 1879

भवद्भिरपि वक्तव्ये तदस्मिन्किंश्चिदुत्तरे।
यच्चात्र वः समाधानमस्माकमपि तद्भवेत्॥
५३७॥§ 1881

समानमेतद्द्वयोरपि चोद्यम्, यतो भवताऽपि साकारानाकारपक्षाभ्यामव-
182/k श्यमन्य तरः पक्षोऽङ्गीकर्त्तव्योऽन्यथाऽर्थग्राहिज्ञानं न सिद्ध्येत्। न चाप्येतत्पक्षद्वयव्यतिरेकेणान्यः प्रकारोऽस्ति। येन ज्ञानमर्थं ग्रहीष्यति। यच्चोभयोर्दोषो न तत्रैकश्चोद्यो युक्तः। तेन यदत्रोत्तरं भवतस्तदस्माकमपि भविष्यति। तथाहि—साकारपक्षे भवताऽवश्यमाकाराणामलीकत्वं सहोपलम्भनियमाद्वैकज्ञानाव्यतिरेकित्वं सत्यपि भेद इत्युत्तरमुपवर्णनीयम्। तदेवास्माकं भविष्यति, निराकारपक्षेऽपि पूर्वहेतुकृत एवप्रतिनियतार्थावबोधकः स्वभावो ज्ञानस्येति वर्णनीयम्। तदैतदस्माकमपि निराकारविज्ञानवादिनां बौद्धानामुत्तरं भविष्यतीत्यचोद्यमेतत्समाधानमिति परिहारः॥ ५३७॥ § 1882

तदेवं कार्यकारणभावाधिगन्तृ प्रमाणं प्रतिपाद्य कृतनाशाकृताभ्यागमदोषं परिहरन्नाह—कृतनाश इत्यादि। § 1883

कृतनाशो भवेदेवं कार्यं न जनयेद्यदि।
हेतुरिष्टं न चैवं यत्प्रबन्धे नास्ति हेतुता॥
५३८॥§ 1885

अकृताभ्यागमोऽपि स्याद्यदि येन विना क्वचित्।
जायेत हेतुना कार्यं नैतन्नियतशक्तितः॥
५३९॥§ 1887

यदि हि परमार्थतः कश्चित्कर्त्ता भोक्ता वाऽभीष्टः स्यात्तदा क्षणभाङ्गित्वाङ्गीकरणे कृतनाशादिप्रसङ्गः स्यात्, यावतेदं प्रत्ययतामात्रमेव विश्वं न केनचित्कर्त्रा किंचित्कृतं नाभि(पि ?)भुज्यते। तत्कथं कृतनाशादिप्रसङ्गापादनं स्यात्। अथ पूर्वकुशलादिचेतनाहितेष्टानिष्टफलोत्पादनसामर्थ्यविप्रणाशात्पूर्वकर्मानाहितसामर्थ्यविशेषाच्च कारणतः फलोत्पत्तेर्यथाक्रमं कृतनाशाकृताभ्यागमदोषप्रसङ्गो विधीयते। तदयुक्तम्। न हि पूर्वकर्माहितसामर्थ्यानुबन्धनस्य नैरात्म्येन सह कश्चिद्विरोधः। तथाहि— लाक्षादिरसावसिक्तानामिव बीजानां सन्तानमनुवर्त्तन्त एव पूर्वकर्माहिताः सामर्थ्यविशेषाः यत उत्तरकालं लब्धपरिपाकेभ्य इष्टमनिष्टं वा फलमुदेति। नापि पूर्वकर्मानाहितसंस्कारात्सन्तानात्फलोत्पत्तिरिष्यत इति कुतः अकृताभ्याग-

मो दोषः। उद्योतकरस्त्वाह—अस्थिरत्वाच्चित्तस्य न कर्मभिर्वासनं संभवतीति। तदयुक्तम्। न हिस्थिरस्यापरित्यक्तप्राक्तनस्वरूपस्य वासनमस्ति। अस्थिरस्य तु विशिष्टस्वभावान्तरोत्पादनमेव वासना। यत्पुनः स्थिरमव्याकृतं वास्यमित्युक्तं शास्त्रे तत्प्रबन्धस्थिरतामभिप्रेत्य। यो ह्युच्छेदी सन्तानस्तस्य चिरतरकालभाविफलप्रसवकाले सन्निधानाभावान्न कारणत्वमस्ति, तेन तस्य तथाविधफलोत्पादं प्रति वासनाधारत्वमयुक्तमित्यभि प्रायः। तस्मात्पर- 183/k
सिद्धान्तानभिज्ञतया यत्किञ्चिदभिहितमनेनेत्युपेक्षामर्हति॥ ५३८॥ ॥ ५३९॥
§ 1888

कुमारिलस्त्वाह—न वयं केनचित्कर्त्रा कृतस्य कर्मणो विप्रणाशात्कृतनाशाकृताभ्यागमौ ब्रूमः, नहि भवतां मते कश्चित्कर्त्तास्ति, किं तर्हि, निरन्वयकर्मतत्फलयोर्विनाशोत्पादाभ्युपगमात्कृतनाशाकृताभ्यागमौ प्रसज्येते इति। तदत्रैवंविधस्य कृतनाशस्याकृताभ्यागमस्य चेष्टत्वान्नानिष्टापादनं युक्तमिति दर्शयन्नाह—क्षणभेदविकल्पेनेति। § 1889

क्षणभेदविकल्पेन क्षणनाशादि चोद्यते।
यच्चैव नैवानिष्टं तु किञ्चिदापादितं परैः॥
५४० ॥§ 1891

पूर्वकस्य कर्मक्षणस्य निरन्वयं विनाशात्कृतनाशः फलक्षणस्य वाऽपूर्वस्यैवोत्पादादकृताभ्यागम इत्येवं यत्क्षणभेदविकल्पेन कृतनाशादि चोद्यते तदिष्टमेव। न हि स्वल्पीयसोऽपि वस्त्वंशस्य कस्यचिदन्वयोऽस्तीति प्रतिपादयिष्यामः॥ ५४०॥ § 1892

यच्चोक्तं नैव प्रवर्त्तेत प्रेक्षावानिति, तत्राह—अहीनसत्त्वेत्यादि। § 1893

अहीनसत्त्वदृष्टीनां क्षणभेदविकल्पना।
सन्तानैक्याभिमानेन न कथञ्चित्प्रवर्त्तते॥
५४१ ॥§ 1895

अभिसंबुद्धतत्त्वास्तु प्रतिक्षणविनाशिनाम्।
हेतूनां नियमं बुद्ध्वा प्रारभन्ते शुभाः क्रियाः॥
५४२ ॥§ 1897

ये तावदप्रहीणसहजेतरसत्कायदर्शनादयस्तेषामयं क्षणभेदविकल्पो नास्त्येव। तथाहि—ते सन्ततिमेकत्वेनाध्यवसाय सुखिता वयं भविष्याम

इत्याहितपरितोषाः कर्मसु प्रवर्त्तन्ते। येऽपि पृथग्जनकल्याणा एवं युक्त्यागमाभ्यां यथावत्क्षणिकानात्मतयोरवबोधादभिसंबुद्धतत्त्वास्तेऽप्येवं प्रतीत्यसमुत्पादधर्मतां प्रतिपद्यन्ते। करुणादिपूर्वकेभ्यो दानादिभ्यः स्वपरहितोदयशालिनः संस्काराः क्षणिका एवापरापरे परम्परया समुत्पद्यन्ते। न तु हिसादिभ्य इत्यतस्ते हेतुफलप्रतिनियममवधार्य शुभादिक्रियासु प्रवर्त्तन्ते। यथोक्तं— यावच्चात्मनि न प्रेम्णो हानिः सपरितस्यति (संपरि सेत्स्यति ?) तावद्दुःखितमारोप्य न च स्वस्थोऽवतिष्ठते। मिथ्याध्यारोपहानार्थं यत्नोऽसत्यपि भोक्तरीति। कार्यकारणभावस्तदधिगन्तृ च प्रमाणं यथा सिध्यति तथा प्रतिपादितमेव॥ ५४१॥ ५४२॥ § 1898

184/k

यच्चोक्तं क्षणभङ्गिषु भावेषु प्रत्यभिज्ञा च दुर्घटेति। तत्राह— केषाञ्चिदेवेत्यादि। § 1899

केषाञ्चिदेव चित्तानां विशिष्टा कार्यकार्यिता।
नियता तेन निर्बाधाः सर्वत्र स्मरणादयः॥
५४३॥ § 1901

कार्यकार्यितेति। कार्यमस्यास्तीति कार्यि, कारणमित्यर्थः। कार्यकार्यिणोर्भावःकार्यकार्यिता। कार्यकारणभवा इत्यर्थः। न हि कश्चित्परमार्थतः स्मर्त्ताऽनुभविता वाऽस्ति। यतो येनैवानुभूतं स एव स्मरतीति स्यात्। किं तर्हि ? यत्र सन्ताने पटीयसाऽनुभवेनोत्तरोत्तरविशिष्टतरतमक्षणोत्पादात्स्मृत्यादिबीजमाहितं तत्रैव स्मरणादयः समुत्पद्यन्ते, नान्यत्र प्रतिनियतत्वात्कार्यकारणभावस्येति समासार्थः। यथोक्तम्—अन्यस्मरणभोगादिप्रसङ्गश्च न बाधकः। अस्मृतेः कस्यचित्तेन ह्यनुभूते स्मृतोद्भव इति। स्मरणादिपूर्वकाश्च प्रत्यभिज्ञानादयः प्रसूयन्त इत्यविरुद्धम्। न चापि क्वचिदेकज्ञातृनिबन्धनाः प्रत्यभिज्ञानादयः सिद्धाः, येनोच्यते द्विभेदे त्वनिबन्धनमिति, कार्यकारणभावमात्रतया सर्वत्रैव भेदाभ्युपगमात्॥ ५४३॥ § 1902

यच्चोक्तं—रागादिनिगडैर्बद्ध इत्यादिना बन्धमोक्षव्यवस्थानमनुपपन्नमिति, तत्राह—कार्यकारणभूताश्चेत्यादि। § 1903

कार्यकारणभूताश्च तत्राविद्यादयो मताः।
बन्धस्तद्विगमादिष्टो मुक्तिर्निर्मलता धियः॥
५४४॥ § 1905

---

२ क्षणिकानात्म] Correction: ; क्षणिकात्म (sic!)क्षणिकानात्म

६ संपरि सेत्स्यति] Correction: ; सपदि नश्यति (sic!)संपरि सेत्स्यति

नहि क्वचिदस्माकमेकपुरुषाधिकरणौ बन्धमोक्षौ प्रसिद्धौ, कस्यचिद्बध्यमानस्य मुच्यमानस्य चासिद्धेः। केवलमविद्यादयः संस्कारा जरामरणपर्यन्ता दुःखोत्पादहेतुतया बन्ध इति व्यवह्रि(?)यन्ते। तथाचोक्तम्— एवमस्य केवलस्य हेतोर्दुःखस्कन्धस्य समुदायो भवतीति। तेषां चाविद्यादीनां तत्त्वज्ञानाद्विगतौ सत्यां या निर्मलता धियः सा मुक्तिरित्युच्यते। यथोक्तम्— चित्तमेव हि संसारो रागादिक्लेशवासितम्। तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यत इति॥ ५४४॥ § 1906

यद्योक्तमेकाधिकरणावित्यादि, तत्रापि दृष्टान्तस्य साध्यविकलतेति दर्शयन्नाह—एकाधिकरणौ सिद्धावित्यादि। § 1907

एकाधिकरणौ सिद्धौ नैवैतौ लौकिकावपि।
बन्धमोक्षौ प्रसिद्धं हि क्षणिकं सर्वमेव तत्॥
५४५॥§ 1909

सर्वमेव हि वस्तूदयानन्तरापवर्गीति प्रसाधितं यदा तदा न क्वचिदेकाधिड्करणत्वं बन्धमोक्षयोः प्रसिद्धमस्तीत्यप्रसिद्धो दृष्टान्तः॥ ५४५॥ § 1910

185/k

तदेवं स्वपक्षं व्यवस्थाप्य सर्वथेत्यादिना परपक्षं प्रतिषेधयति। § 1911

सर्वथाऽतिशयासत्त्वाद्व्याहता त्वात्मनीदृशी।
कर्तृभोक्तृत्वबन्धादिव्यवस्थाऽनित्यताऽन्यथा॥ ५४६॥
इति कर्मफलसम्बन्धपरीक्षा।§ 1914

यदि हि रागादिभिः क्लेशैर्बन्धो भावनादिभिश्चातिशयः कश्चिदात्मनः क्रियेत, तदा तस्य बन्धमोक्षादिव्यवस्था भवेत्। यावता नित्यतया न तस्यातिशयाधानमस्तीति नेयमीदृशी नियतकार्यकारणमर्यादालक्षणा बन्धमोक्षादिव्यवस्था घटते, यथाऽऽकाशस्येति भावः। अन्यथेति। यद्यतिशयोत्पादो भवेदात्मनस्तदाऽतिशयस्यात्मभूतत्वादात्मनोऽपि तदव्यतिरेकेणातिशयवदनित्यता स्यात्। परभूतस्त्वतिशयो न युक्तः संबन्धासिद्धेरिति शतधा चर्चितमेतत्॥ ५४६॥ § 1915

इति कर्मफलसंबन्धपरीक्षा॥

५ मुक्ति] Correction: ; निर्मुक्ति (sic!)मुक्ति

०.११ द्रव्यपदार्थपरीक्षा।

इदानीं गुणद्रव्यक्रियाजातिसमवायाद्युपाधिभिः। शून्यमित्येतत्समर्थनार्थं षट्पदार्थपरीक्षोपक्षेपं कुर्वन्नाह—जात्यादेरित्यादि। § 1917

जात्यादेर्निःस्वभावत्वमयुक्तं प्राक्प्रकाशितम्।
द्रव्यादयः षडर्था ये विद्यन्ते पारमार्थिकाः॥
५४७॥§ 1919

इत्याक्षपादकाणादाः प्राहुरागममात्रकाः।
द्रव्यादिप्रतिषेधोऽयं सङ्क्षेपेण तदुच्यते॥ ५४८॥§ 1921

प्राक् स्थिरभावपरीक्षायां जात्यादेर्निःस्वभावत्वान्नैवेष्टा क्षणभङ्गिते त्यनेन यज्जात्यादेः निःस्वभावत्वं प्राक्प्रकाशितं तदयुक्तम्। यतो द्रव्यगुणकर्मसामान्यविशेषसमावायाख्याः षट् पदार्थाः पारमार्थिकाः सन्तीत्याहुराक्षपादादयः। अक्षपादशिष्यत्वादाक्षपादा नैयायिकाः। कणादशिष्यास्तु वैशेषिकाः काणादा उच्यन्ते। आगममात्रका इति। आगममात्रमपेतयुक्तिकमेषामस्तीत्यागममात्रकाः॥ ५४७॥ ५४८॥ § 1922

तत्र क्षित्यादीत्यादिना द्रव्यपदार्थप्रतिषेधार्थं तावत्तद्विभागमाह— § 1923

क्षित्यादिभेदतो भिन्नं नवधा द्रव्यमिष्यते।
चतुःसङ्ख्यं पृथिव्यादि नित्यानित्यतया द्विधा॥
५४९॥§ 1925

विभक्तस्य हि भेदेन सुखं दूषणस्य वक्तुं शक्यत्वादिति भावः। नवधेति। पृथिव्यापस्तेजोवायुराकाशं कालो दिगात्मा मन इति सूत्रात्। तत्र पृथिव्यापस्तेजोवायुरित्येतच्चतुःसङ्ख्यं द्रव्यं नित्यानित्यभेदेन द्विप्रकारम्॥ ५४९॥ § 1926

186/k

तदेव द्वैविध्यमस्य दर्शयन्नाह—पृथिव्याद्यात्मकास्तावदित्यादि § 1927

पृथिव्याद्यात्मकास्तावद्य इष्टाः परमाणवः।

तेनित्या ये तदाद्यैस्तु प्रारब्धास्ते विनाशिनः॥
५५० ॥§ 1929

परमाण्वात्मका हि पृथिव्यादयो नित्याः, परमाणूनां नित्यत्वात्। तदाद्यैस्तु प्रारब्धा अनित्याः हेतुमदनित्यमिति न्यायात्। तदाद्यैरिति। ते परमाणव आद्या येषां ते तदाद्याः। आकाशादयस्तु नित्या एवेति भावः॥ ५५०॥ § 1930

तत्रैतच्चतुःसङ्ख्यं तावद्द्रव्यं निषेद्धुमाह—तत्रेत्यादि। § 1931

तत्र नित्याणुरूपाणामसत्त्वमुपपादितम्।
निःशेषवस्तुविषयक्षणभङ्गप्रसाधनात्॥ ५५१ ॥§ 1933

तत्र य एते नित्याणुरूपाः पृथिव्यादयो वर्णितास्तेषामशेषवस्तुव्यापिनः क्षणभङ्गस्य प्रसांधनान्नित्यत्वरूपेणासत्त्वं प्रसाधितमेव। यत्सत्तत्सर्वं क्षणिकमक्षणिकस्ययौगपद्याभ्यामर्थक्रियाविरोधात्तल्लक्षणं सत्त्वं हीयत इति व्याप्तेः प्रसाधितत्वात्॥ ५५१॥ § 1934

अत्रापि बाधकं प्रमाणमाह—नित्यत्व इत्यादि। § 1935

नित्यत्वे सकलाः स्थूला जायेरन्सकृदेव हि।
संयोगादि न चापेक्ष्यं तेषामस्त्यविशेषतः॥
५५२ ॥§ 1937

यदि पर्वतादीनां स्थूलानां कारभूताः परमाणवो नित्याः सन्तीत्यभ्युपगम्यते तदा तत्कार्याणां स्थूलानामविकलकारणत्वात्सकृदेवोत्पत्तिप्रसङ्गः। प्रयोगः—ये समग्राप्रतिबद्धकारणास्ते सकृदेव भवन्ति। यथा बहवोऽङ्कुरास्तुल्योत्पादाः समग्राप्रतिबद्धकारणाश्च। नित्याणुकार्यत्वेनाभिमताः स्थूला भावा इति स्वभावहेतुः। समग्रकारणस्याप्यनुत्पादे सर्वदैवानुत्पादप्रसङ्गो विशेषाभावादिति बाधकं प्रमाणम्। स्यादेतन्त्रिविधं कारणमिष्टं समवायिकारणमसमवायिकारणं निमित्तकारणं च। तत्र हियत्समवैति कार्यं तत्तस्य समवायिकारणं। असमवेतं तु यद्यस्य कारणभावं प्रतिपद्यते तदसमवायिकारणं यथाऽवयविद्रव्यारम्भेऽवयवसंयोगः। परीशेषं तु कारणं निमित्तकारणं तद्यथा धर्मादय इत्ययमेषां विभागः। तत्रापेक्षणीयस्य संयोगादेरसन्निहितत्वात्समग्रकारणत्वमसिद्धमतोऽसिद्धो हेतुरित्याशङ्क्याह—संयोगादीति। यदि हि संयोगादिना कश्चिद्विशेषोऽणूनामाधीयेत तदा ते तमपेक्षेरन्। यावता परैरनाधेयविशेषा एवाणवो नित्यत्वात्। तत्कथं संयो-

१ तेनित्या] Correction : ; अनित्या (sic !)तेनित्या

187/k गादि तेषामपेक्ष्यं स्यात्। न च सकृ देव स्थूलानां तनुभवनादीनामुदयोऽस्ति क्रमेण तन्वादीनामुत्पत्तिदर्शनात्। तस्माद्विपर्ययः। प्रयोगः—ये क्रमवत्कार्यहेतवस्ते नित्या यथा क्रमवदङ्कुरादिकार्यनिर्वर्त्तका बीजादयस्तथा च परमाणव इति स्वभावहेतुः॥ ५५२॥ § 1938

अविद्धकर्णस्त्वणूनां नित्यत्वप्रसाधनाय प्रमाणमाह—परमाणूनामुत्पादकाभिङमतंसद्धर्मोपगतं न भवति। सत्त्वप्रतिपादकप्रमाणाविषयत्वात्, खरविषाणवदिति। सतो विद्यमानस्य धर्मः सद्धर्मोऽस्तित्वं तेनोपगतं प्राप्तमस्तीत्यर्थः। तस्य प्रतिषेधोऽयम्। अणूत्पादकं कारणं नास्तीत्यर्थः। तदेतत्प्रमाणमाशङ्कापूर्वमुपदर्शयन्नाह—सद्धर्मोपगतमित्यादि। § 1939

सद्धर्मोपगतं नोचेदणूत्पादकमिष्यते।
विद्यमानोपलम्भार्थप्रमाणाविषयत्वतः॥ ५५३॥ § 1941

अणूत्पादकं सद्धर्मोपगतं नोचेदिष्यत इति संबन्धः। विद्यमानस्योपलम्भोऽधिगमः सोऽर्थः प्रयोजनं यस्य प्रमाणस्य तत्तथोक्तं। शेषं सुबोधम्। एतेनाणूनामनित्यत्वप्रतिज्ञाया अनुमानबाधितत्वमुद्भावितम्, सदकारणवन्नित्यमिति वचनात्। अकारणवत्त्वेनाणूनां नित्यत्वस्य सिद्धत्वात्॥ ५५३॥ § 1942

नासिद्धेरित्यादिना हेतोरसिद्धतामाह। § 1943

नासिद्धेर्दृश्यते येन कुविन्दाद्यणुकारणम्।
परमाण्वात्मका एव येन सर्वे पटादयः॥
५५४॥ § 1945

ननु कुविन्दादयः पटादीनामेव कारणत्वेन सिद्धा नाणूनां तत्कथमणुकारणं कुविन्दादि दृश्यत इत्याह—परमाण्वात्मका इत्यादि। एतच्च पश्चात्प्रतिपादयिष्याम इति भावः॥ ५५४॥ § 1946

अपिच देशकालस्वभावविप्रकृष्टानामर्थानामुपलम्भकप्रमाणनिवृत्तावपि सद्भावा विरोधात्ततोऽनैकान्तिकता च हेतोरिति दर्शयति—सद्ग्राहकेत्यादि। § 1947

सद्ग्राहकप्रमाभावान्न वा सत्ता प्रसिध्यति।
प्रमाणविनिवृत्तौ हि नार्थाभावेऽस्ति निश्चयः॥
५५५॥ § 1949

नार्थाभावेऽस्ति निश्चय इति। पिशाचादिवदिति भावः॥ ५५५॥ § 1950

एवं तावत्कारणद्रव्यं निषिद्ध कार्यद्रव्यनिषेधार्थमाह—तदारब्ध इत्यादि। § 1951

तदारब्धस्त्ववयवी गुणावयवभेदवान्।
नैवोपलभ्यते तेन न सिध्यत्यप्रमाणकः॥
५५६॥§ 1953

188/k

गुणा रूपादयः, अवयवास्तन्त्वादयः, तेषां भेदो व्यतिरेकः सोऽस्यास्तीति तथोक्तः। स तथाभूतो गुणावयवव्यतिरिक्तोऽवयवी नोपलभ्यते। नहि पटादिलक्षणमवयवि द्रव्यमविकलं शुक्लादिगुणेभ्योऽवयवेभ्यश्च तन्त्वादिभ्योऽर्थान्तरभूतं क्वचिच्चक्षुरादिज्ञाने च भासते। तदत्र गुणेभ्योऽर्थान्तरभूतद्रव्यानुपलम्भने गुणगुणिवादो निरस्तः। अवयवव्यतिरिक्तावयव्यनुपलम्भेन त्ववयवावयविवादः। प्रयोगः—यदुपलब्धिलक्षणप्राप्तं सद्यत्र नोपलभ्यते तत्तत्र नास्ति, यथा क्वचित्प्रदेशविशेषे घटादिरनुपलभ्यमानः, नोपलभ्यते च गुणावयवेभ्योऽर्थान्तरभूतस्तत्रैव देशे गुणी दृश्यत्वेनाभिमतोऽवयवी चेति स्वभावानुपलब्धेः। न चासिद्धो हेतुः, महत्यनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिरिति वचनात्तयोर्दृश्यत्वेनाभिमतत्वात्॥ ५५६॥ § 1954

नन्वित्यादिना—उद्योतकरभाविविक्तादयो हेतोरसिद्धतामुद्भावयन्ति। § 1955

ननूपधानसंपर्के दृश्यते स्फटिकोपलः।
तद्रूपाग्रहणेप्येवं बलाकादिश्च दृश्यते॥ ५५७॥§ 1957

कञ्चुकान्तरिते पुंसि तद्रूपाद्यगतावपि।
पुरुषप्रत्ययो दृष्टो रक्ते वाससि वस्त्रधीः॥
५५८॥§ 1959

त एवमाहुर्गुणव्यतिरिक्तो गुणी समुपलभ्यत एव। तद्रूपादिगुणाग्रहणेऽपि तस्य ग्रहणात्। तथाहि स्फटिकोपलः सन्निहितोपधानावस्थायां स्वगतशुक्लगुणानुपलम्भेऽपि दृश्यत एव। बलाकादिश्च रात्रौ मन्दमन्दप्रकाशायां तद्गतसितादिरूपादर्शनेऽपि गृह्यत एव। तथाऽऽप्रपदीनकञ्चुकावच्छन्नशरीरे पुंसि तदा श्यामादिरूपाद्यग्रहणेऽपि पुमान् पुमानिति प्रत्ययः प्रसूयत एव। कषायकुङ्कुमादिरक्ते वाससि तद्रूपस्य संसर्गिरूपेणाभिभूतस्यानुपलम्भेऽपि वस्त्रधीर्भवत्येव॥ ५५७॥ ५५८॥ § 1960

तदेवं तावत्प्रत्यक्षत एव गुणगुणिनोर्भेदः सिद्ध इति प्रतिपादितम्। इदानीमनुमानतोऽपि सिद्ध इति प्रतिपादयन्नाह—रूपादीत्यादि। § 1961

रूपादीन्दीवरादिभ्य एकान्तेन विभिद्यते।
तेन तस्य व्यवच्छेदाच्चैत्रादेश्च तुरङ्गमः॥ ५५९ ॥§ 1963

क्षित्यादिरूपगन्धादेरत्यन्तं वा विभिद्यते।
एकानेकवचोभेदाच्चन्द्रनक्षत्रभेदवत्॥ ५६० ॥§ 1965

इन्दीवरादिभ्यो गुणो भिन्न इन्दीवरस्य रूपादय इत्येवं तेनेन्दीवरादिना तस्य रूपादेर्व्यवच्छेदात्। यथा चैत्रस्य तुरङ्गम इति चैत्रेण स्वाम्यन्तरेभ्यो
189/k व्यवच्छिद्य मानस्तुरङ्गमस्ततो भिद्यते तथाऽपरः प्रयोगः। प्रत्येकं पृथिव्यप्तेजोवायवो द्रव्याणिरूपरसगन्धस्पर्शेभ्यो भिन्नान्येकवचनबहुवचनविषयत्वात्, यथा चन्द्रो नक्षत्राणीति। यथैव हि चन्द्र इत्येकवचनं नक्षत्राणीति बहुवचनं चन्द्रनक्षत्राणां भेदनिबन्धनमुपलभ्यते, तथात्रापि पृथिवीत्येकवचनं रूपरसगन्धस्पर्शा इति बहुवचनं। एवं जलादिष्वपि योज्यम्। नक्षत्रभेदास्तु पुष्यादयः॥ ५५९॥ ५६०॥ § 1966

एवं गुणगुणिनोर्भेदं प्रसाध्यावयवावयविनोर्भेदप्रसाधनायाह—विभिन्नेत्यादि। § 1967

विभिन्नकर्तृशक्त्यादेर्भिन्नौ तन्तुपटौ तथा।
विरुद्धधर्मयोगेन स्तम्भकुम्भादिभेदवत्॥
५६१ ॥§ 1969

प्रयोगः—ये भिन्नकर्तृकार्यकालपरिमाणास्ते विभिन्नाः यथ स्तम्भकुम्भादयः, विभिन्नकर्तृकार्यकालपरिमाणाश्च विचारविषयाः। नासिद्धो हेतुर्नाप्यनैकान्तिकः। विरुद्धधर्माध्यासमात्रनिबन्धनो हि भावानां परस्परतो भेदः, यथा स्तम्भादीनां सचावयवावयविनोरप्यस्ति। तथाहि—तन्तूनां योषित्कर्त्री, पटस्य कुविन्दः, शीतापनोदादिकार्यसमर्थः पटो न तन्तवः, प्रागपि तन्तूनामुपलब्धेः पूर्वकालभावित्वं, पटस्य तु पश्चात्कुविन्दादिव्यापारोत्तरकालभावित्वम्, पटस्यायामविस्तराभ्यां यावत्प्रमाणं न तावत्प्रत्येकं तन्तूनामस्तीति भिन्नपरिमाणत्वमतो नानैकान्तिकता हेतूनामिति भावः॥ ५६१॥ § 1970

एवं तावदनुमानतोऽवयवावयविनोर्भेदं प्रसाध्य प्रत्यक्षतोऽपि साधयन्नाह—स्थूलार्थेत्यादि। § 1971

स्थूलार्थासंभवे तु स्यान्नैव वृक्षादिदर्शनम्।
अतीन्द्रियतयाऽणूनां नचाणुवचनं भवेत्॥
५६२॥§ 1973

स्थूलवस्तुव्यपेक्षो हि सुसूक्ष्मोऽर्थस्तथोच्यते।
स्थूलैकवस्त्वभावे तु किमपेक्षास्य सूक्ष्मता॥
५६३॥§ 1975

यदि ह्यवयवी न स्यात्सर्वाग्रहणप्रसंगः, परमाणूनामतीन्द्रियत्वात्। स्थूलाभावेऽणुरिति व्यपदेश एव न स्यात्। कस्मादित्याह—स्थूलवस्तुव्यपेक्षो हीत्यादि। सुबोधम्॥ ५३२॥ ५६३॥ § 1976

ननु रक्तादिरूपेण गृह्यन्ते स्फटिकादयः।
नच तद्रूपता तेषां स्वपक्षक्षयसङ्गतेः॥ ५६४॥§ 1978

190/k

नन्वित्यादिना प्रतिविधत्ते—यदुक्तं स्फटिकादयः स्वगतगुणानुपलम्भेऽपि केवलाः समुपलम्भ्यन्त इति तदसिद्धम्। तज्ज्ञानस्यायथार्थतया भ्रान्तत्वेनाविषयत्वात्। तथाहि—जपाकुसुमाद्युपधाने रक्तादिरूपेणासन्नेव(न ?) स्फटिक उपलभ्यते। बलाकादयोऽपि धवलाः सन्तः श्यामरूपा वीक्ष्यन्ते। नच तेषां तात्त्विकी तद्रूपता—रक्तादिरूपताऽस्ति। कस्मात् ? स्वपक्षक्षयसंगतेः—यदि हि तेषां तद्रूपता तात्त्विकी स्यात्तदा तद्रूपाग्रहणेऽपि तेषां ग्रहणमस्तीति योऽयं भवतामनन्तरोदितः पक्षस्तस्य क्षतिः स्यात्॥ ५६४॥
§ 1979

स्यादेतल्लोहितादिरूपव्यतिरिक्तः स्फटिकादिरप्युपलभ्यत एवेत्याह—तद्रूपेत्यादि। § 1980

तद्रूपव्यतिरिक्तश्च नापरात्मोपलभ्यते।
नचान्याकारधीवेद्या युक्तास्तेऽतिप्रसङ्गतः॥
५६५॥§ 1982

नहि तस्माल्लोहितादिरूपाद्यतिरिक्तोऽपरात्मा—स्वभावः स्फटिकादिलक्षणो दृश्यते, रक्तादिरूपस्यैवोपलम्भात्। अतद्रूपा अपि स्फटिकादयो रक्तादिरूपेणोपलभ्यन्त इति चेदाह—नचेत्यादि। आकारवशेन हि प्रतिनिय-

तार्थविषयता ज्ञानस्यावस्थाप्यते। यदि चान्याकारस्यापि ज्ञानस्यान्यो विषयः स्यात्। एवं सति रूपज्ञानमपि शब्दादिविषयं स्याद्विशेषाभावात्॥ ५६५॥
§ 1983

किंच भवतु नामान्याकारस्यापि ज्ञानस्यान्यो विषयस्तथापि नेष्टसिद्धिर्भवत इति दर्शयन्नाह—शुक्लादयस्तथेति। § 1984

शुक्लादयस्तथा वेद्या इत्येवं चापि संभवेत्।
तस्माद्भ्रान्तमिदं ज्ञानं कम्बुपीतादिबुद्धिवत्॥
५६६॥§ 1986

तथाहि—शुक्लादय एव तद्व्यतिरिक्तगुणिपदार्थरहितास्तथा रक्तादिरूपेण विद्यन्त इत्येवमपि संभाव्यते। ततश्च न गुणिसिद्धिः। चकारोऽवधारणे, भिन्नक्रमश्च, शुक्लादय इत्यस्यानन्तरं द्रष्टव्यः। भ्रान्तमिदमिति। अयथार्थत्वादिति शेषः॥ ५६६॥ § 1987

यच्चोक्तं कञ्चुकान्तर्गते पुंसीत्यादि। तदपि न प्रत्यक्षं साभिजल्पत्वादस्फुटाकारत्वाच्च। किं तर्ह्यानुमानिकमेतज्ज्ञानं रूपादिसंहतिमात्रलक्षणपुरुषविषयमित्यतो नावयविसिद्धिरिति दर्शयति—कञ्चुकेत्यादि। § 1988

कञ्चुकान्तर्गते पुंसि न ज्ञानं त्वानुमानिकम्।
तद्धेतुसन्निवेशस्य कञ्चुकस्योपलम्भनात्॥
५६७॥§ 1990

191/k

स पुरुषो रूपादिप्रचयमात्रात्मको हेतुर्यस्य सन्निवेशस्य स तथोक्तः—तद्धेतुः सन्निवेशः—संस्थानविशेषो यस्य कञ्चुकस्य तत्तथोक्तम्। एतेन कार्याख्यलिङ्गविशेषजनितत्वमनुमानप्रत्ययस्योपदर्शितं भवति॥ ५६७॥
§ 1991

यच्चोक्तं रक्ते वाससि वस्त्रधीरिति तत्राह—कषायेत्यादि। § 1992

कषायकुङ्कुमादिभ्यो वस्त्रे रूपान्तरोद्भयः।
पूर्वरूपविनाशे हि वाससः क्षणिकत्वतः॥
५६८॥§ 1994

तत्र हि क्षणिकत्वाद्वाससः पूर्वशुक्लादिरूपविनाशे सत्यपूर्वमेव रूपादि सामग्र्यन्तरबलादुपजायते तस्मिंश्च प्रत्यक्षेण गृहीते पश्चाद्यथा समयाहितभेदं

समुदायविषयं वासो वास इति प्रत्यक्षपृष्ठभावि सांवृतं परमार्थतो निर्विषयमेव प्रत्यवमर्शज्ञानमुत्पद्यत इत्यसिद्धमस्य प्रत्यक्षत्वम्। नाप्येतदनुमानं पूर्वप्रत्यक्षगृहीतविषयत्वादलैङ्गिकत्वाच्च।तस्मान्नात्र किंचिदभिभूतं रूपमस्ति॥ ५६८॥ § 1995

स्यादेतत्—यद्यदृष्टं शुक्लादिरूपं वाससो नास्त्येव तत्कथं धौताद्यवस्थायां पुनरुपलभ्यत इत्याह—पुनरित्यादि। § 1996

पुनर्जलादिसापेक्षात्तस्मादेवोपजायते।
रूपाद्रूपान्तरं शुक्लं लोहादेः श्यामतादिवत्॥
५६९ ॥§ 1998

यथाग्निसंपर्कात्समुपजातभासुरादिरूपस्य लोहादेः पुनः श्यामादिरूपोत्पत्तिस्तद्वद्रूपान्तरमेवोपजायते शुक्लादीत्यविरोधः॥ ५६९॥ § 1999

स्यादेतत्कथमिदमवगम्यते रूपान्तरमेवोपजायते न पुनः प्राक्तनं रूपमभिभूतत्वात्प्रागनुपलब्धं सत्पश्चादभिभवाभावादुपलभ्यत इत्याह—तादवस्थ्य इत्यादि। § 2000

तादवस्थ्ये तु रूपस्य नान्येनाभिभवो भवेत्।
प्राक्तनानभिभूतस्य स्वरूपस्यानुवर्त्तनात्॥
५७० ॥§ 2002

प्रयोगः—यदपरित्यक्तानभिभूतस्वभावं न तस्य परेणाभिभवोऽस्ति। यथा तस्यैव प्राक्तनावस्थायाम्, अपरित्यक्तानभिभूतस्वभावं च रूपमभिभवावस्थायामिति व्यापकविरुद्धोपलब्धिः। परित्यक्तानभिभूतस्वभावत्वेऽङ्गीक्रियमाणे सिद्धमस्यान्यत्वम् ५७० § 2003

रूपादीन्दीवरादिभ्य इत्यादावाह—षष्ठीत्यादि। § 2004

षष्ठीवचनभेदादि विवक्षामात्रसंभवि।
ततो न युक्ता वस्तूनां तत्स्वरूपव्यवस्थितिः॥
५७१ ॥§ 2006

192/k

यदि हि यथावस्तु षष्ठ्यादीनां प्रवृत्तिः सिद्धा स्यात्तदा भवेत्ततो वस्तुसिद्धिः। यावता स्वतन्त्रेच्छामात्रभाविन एते, न बाह्यवस्तुगतभेदाद्यपेक्षिणः, तत्कथमेतेभ्यो वस्तुसिद्धिः। तत्र षष्ठी पटस्य रूपादय इति, पटो रूपादय

इति वचनभेदः। आदिग्रहणादिह पटे रूपादय इति सप्तमी, पटस्य भावः पटत्वमिति तद्धितोत्पत्तिरित्यादिपरिग्रहः॥ ५७१॥ § 2007

तथाहीत्यादिनाऽनैकान्तिकत्वमेव समर्थयते। § 2008

तथाहि भिन्नं नैवान्यैः षण्णामस्तित्वमिष्यते।
तेषां वर्गश्च नैवैकः कश्चिदर्थोऽभ्युपेयते॥
५७२॥§ 2010

तथाहि—षण्णां पदार्थानामस्तित्वं तेषां च षण्णां वर्ग इत्यादावसत्यपि वास्तवे भेदे षष्ठ्यादि भवत्येव। नहि भवद्भिः षड्पदार्थव्यतिरिक्तमस्तित्वादीष्यते। उपलक्षणमेतत्। तथा दाराः सिकता इत्यादौ सत्यपि बहुवचने नार्थभेदं पश्यामः। स्वस्य भावः स्वत्वमिति न भावोऽन्य इष्यते॥ ५७२॥ § 2011

संज्ञापकेत्यादिना परस्योत्तरमाशङ्कते। § 2012

संज्ञापकप्रमाणस्य विषये तत्त्वमिष्यते।
षण्णामस्तित्वमिति चेत्षड्भ्योऽन्यस्ते प्रसज्यते॥
५७३॥§ 2014

संज्ञापकप्रमाणविषयस्य भावस्तत्त्वं सदुपलम्भकप्रमाणविषयत्वं नाम धर्मान्तरं षण्णामस्तित्वमिष्यत इत्यर्थः। अतो नास्ति व्यभिचार इति भावः। अत्रोत्तरमाह—षड्भ्योऽन्यस्ते प्रसज्यते—पदार्थ इति शेषः। सप्तमः पदार्थः प्राप्नोति। ततश्च षड्पदार्थाभ्युपगमो हीयत इति भावः॥ ५७३॥ § 2015

इष्टत्वाददोष इति चेत्। यद्येवं कथं षड्पदार्था इति प्रोक्तमित्याह—षडेत इति। § 2016

षडेते धर्मिणः प्रोक्ता धर्मास्तेभ्योऽतिरेकिणः।
इष्टा एवेति चेत्कोऽयं संबन्धस्तस्य तैर्मतः॥
५७४॥§ 2018

द्रव्येषु नियमाद्युक्ता न संयोगो न चापरः।
समवायोस्ति नान्यश्च संबन्धोऽङ्गीकृतः परैः॥
५७५॥§ 2020

धर्मिरूपा एव ये भावास्ते षड्पदार्था इति प्रोक्ताः, धर्मरूपास्तु षड्पदार्था व्यतिरिक्ता इष्टा एव। तथाहि पदार्थप्रवेशके ग्रन्थः— एवं धर्मैर्विना धर्मिणामेष निर्देशः कृत इति। कोयमित्यादिनोत्तरमाह—तस्य—अस्तित्वादेर्धर्मस्य। तैरिति। षड्भिः पदार्थैः। कः संबन्धो येन तेषामसौ धर्मो भवति। नहि 193/k
संबन्धमन्तरेण धर्मिधर्मभावो युक्तोऽतिप्रसङ्गात्। एवं हि सर्वस्य सर्वधर्मत्वं स्यात्, नहि कश्चित्तैः सह संबन्धोऽस्ति। तथाहि—द्विविध एव संबन्धः संयोगलक्षणः समवायलक्षणश्च, तत्र न तावत्संयोगलक्षणस्तस्य गुणत्वेन द्रव्येष्वेव नियतत्वात्। नच समवायात्मकस्तस्य भाववदेकत्वेनेष्टत्वात्। समवायेन च समवायात्मके संबन्धे सति द्वितीयःसमवायोऽङ्गीकृतः स्यात्॥ ५७४॥ ५७५॥ § 2021

विनैव संबन्धं धर्मधर्मिभावो भविष्यतीति चेत्प्राह—संबन्धानुपपत्तावित्यादि। § 2022

संबन्धानुपपत्तौ च तेषां धर्मो भवेत्कथम्।
तदुत्पादनमात्राच्चेदन्येऽपि स्युस्तथाविधाः॥
५७६ ॥§ 2024

एवं ह्यतिप्रसङ्गः स्यादित्युक्तम्। अथ तैः षड्भिः पदार्थैर्धर्मस्योत्पादनात्तेषामयं धर्मः संबन्धीत्युच्यते। यद्येवमन्येऽपि तर्हि जलादयस्तदुत्पत्तिलक्षणसंबन्धमात्रादेवतथाविधाः—कुण्डादिसंबन्धिनः स्युः—भवेयुः। ततश्च संयोगसमवायाख्यसंबन्धान्तरकल्पना तेषु व्यर्था स्यात्॥ ५७६॥ § 2025

तस्याप्यस्तित्वमित्येवं वर्तते व्यतिरेकिणी।
विभक्तिस्तस्य चान्यस्य भावेऽनिष्ठा प्रसज्यते॥
५७७ ॥§ 2027

किंच भवतु नाम षण्णामस्तित्वं नाम धर्मान्तरं तथापि व्यभिचार एव। तथाहि तस्याप्यस्तित्वमस्त्येव वस्तुत्वात्। ततश्च तत्र व्यतिरेकनिबन्धना विभक्तिः कथं भवेत्। अथ तत्राप्यपरमस्तित्वमङ्गीक्रियते तदाऽनवस्था स्यात्॥ ५७७॥ § 2028

इष्टत्वान्नानवस्था बाधिकेति चेदाह—अन्येत्यादि। § 2029

अन्यधर्मसमावेशे प्राप्ता तत्र च धर्मिता।
द्रव्यादेरपि धर्मित्वमस्मादेव च संमतम्॥
५७८ ॥§ 2031

सर्वेषामेव ह्युत्तरोत्तरधर्मसमावेशाद्धर्मित्वं स्यात्। ततश्च षडेते धर्मिण एव प्रोक्ता इत्येतन्नोपपद्यते, षद्दार्थव्यतिरेकेणान्येषामपि धर्मिणां विद्यमानत्वादिति भावः। अथापि स्यात्—ये धर्मिरूपा एव त एव षट्त्वेनावधारिताः, इत्येतदप्यसारम्। एवं हि गुणकर्मसामान्यविशेषसमवायानामनिर्देशः स्यात्। नह्येषां धर्मिरूपत्वमेव, किं तर्हि, धर्मरूपत्वमपि, द्रव्याश्रितत्वादेषाम्। अस्मादेवेति। अन्यधर्मसमावेशात्। अन्यः पुन-
194/k राह—षण्णामस्तित्वं हि सदुपलम्भकप्रमाणगम्यत्वम्। गम्यत्वं च षट् पदार्थविषयं विज्ञानं, तस्मिन् सति सद्व्यवहारप्रवर्त्तनात्। तथा ज्ञानजनितं ज्ञेयत्वम्, अभिधानजनितमभिधेयत्वमिति। अतो व्यतिरेकनिबन्धना षष्ठी भवत्येव। नचाप्यनवस्था, नापि षद्दार्थान्तरप्रसङ्ग इति। तस्यापीदं कल्पनामात्रमेव। यदिह्यर्थक्रियासमर्थपदार्थात्मकमात्मतत्त्वमेषामस्त्येव तदा तेऽर्थक्रियासमर्थाः पदार्था एवभेदान्तरप्रतिक्षेपमात्रजिज्ञासायां तेषामस्तित्वमित्येवं यदि व्यतिरेकविभक्त्या व्यपदिश्येरंस्तदा को विरोधः। तदव्यतिरिक्तमपि हि स्वरूपं बुद्ध्या ततोऽवकृष्य व्यतिरिक्तमिवाभिधीयमानमविरोध्येव, वाचामिच्छामात्रवृत्तित्वादुत्पाद्यकथोपरचितेषु बाहुल्यसौन्दर्यादिधर्मपरिकल्पनवदिति यत्किंचिदेतत्॥ ५७८॥ § 2032

विभिन्नकर्तृशक्त्यादेरित्यादावाह—प्रथमेभ्यश्चेत्यादि। § 2033

प्रथमेभ्यश्च तन्तुभ्यः(?) पटस्य यदि साध्यते।
भेदः साधनवैफल्यं दुर्निवारं तदा भवेत्॥
५७९ ॥§ 2035

प्राप्तावस्थाविशेषा हि ये जातास्तन्तवोऽपरे।
विशिष्टार्थक्रियासक्ताः प्रथमेभ्योऽविलक्षणाः॥
५८० ॥§ 2037

यदि प्रथमावस्थाभाविभ्योऽसमधिगतपटाख्यानेभ्यस्तन्तुभ्यः पटस्य भेदः साध्यते तदा सिद्धं साध्यते। सर्वभावानां क्षणिकत्वेन पूर्वकेभ्यस्तन्तुभ्यः पटशब्दवाच्यानां तन्तूनां तद्विलक्षणपदार्था(र्थत्वा ?)संभवेऽप्युत्पादस्याङ्गीकरणात्॥ ५७९॥ ॥ ५८०॥ § 2038

अथ पटसमानकालभाविनो ये तन्तवस्तेभ्यः पटस्यान्यत्वं प्रसाध्यते तदा हेतूनामसिद्धतेति दर्शयन्नाह—एकेत्यादि। § 2039

एककार्योपयोगित्वज्ञापनाय पृथक्श्रुतौ।

गौरवाशक्तिवैफल्यदोषत्यागाभिवाञ्छया॥
५८१॥§ 2041

साकल्येनाभिधानेन व्यवहारस्य लाघवम्।
मन्यमानैः कृता येषु वागेका व्यवहर्तृभिः॥
५८२॥§ 2043

तेभ्यः समानकालस्तु पटो नैव प्रसिद्ध्यति।
विभिन्नकर्तृसामर्थ्यपरिमाणादिधर्मवान्॥
५८३॥§ 2045

यदि तदानीं तन्तुव्यतिरिक्तस्तत्समानकालभावी पटः प्रसिद्धो भवेत्तदा तस्य तन्तुव्यपेक्षया विभिन्नकर्तृत्वादयो धर्माः सिध्येयुर्यावता स एवायं तन्तुव्यतिरेकी पटो न सिद्धः। तद्भेदस्यैव प्रसाधयितुं प्रस्तुतत्वात्। न च 195/k पटस्तन्तव इति संज्ञामात्राद्वस्तूनां भेदः, प्रयोजनान्तरवर्शनापि संज्ञान्तरस्य निवेशात्। तथाहि—केचित्तन्तवो विशिंष्टावस्थाप्राप्ताः शीतापनोदनाद्येकार्थक्रियासमर्था भवन्ति, नापरे ये योषित्कर्तृकाः। तत्रैकार्थक्रियोपयोगिनस्तन्तून्विशिष्टान्प्रतिपादयितुं पट इत्येका श्रुतिर्विनिवेश्यते व्यवहर्तृभिरसाङ्कर्येण व्यवहारायासत्यप्यर्थान्तरत्वे। कस्मात्पुनरेका श्रुतिर्विनिवेश्यत इत्याह—पृथक्श्रुतावित्यादि। पृथक्पृथक्—प्रत्येकं श्रुतौ—अभिधाने सति गौरवदोषः। तथाहि—तत्र यावन्तः पदार्था विवक्षितैककार्यसाधनयोग्यास्तावन्त एव शब्दाः प्रयोक्तव्या इति गौरवदोषः। नचाप्येषामसाधारणं रूपं शक्यं निर्देष्टुमित्यशक्तिदोषः। उत्प्रेक्षितसामान्याकारेण च निर्देशे वरमेकयैव श्रुत्या प्रतिपादनं, न चास्य पृथक्पृथक्प्रतिपादनप्रयासस्य किंचित्फलमुपलभ्यत इति वैफल्यदोषः। सामस्त्येन त्वभिधाने कृते सति व्यवहारलाघवं गुणः। समस्तवस्तुविवक्षायां जगत्त्रि(?)भुवनविश्वादिशब्दवदेका वागिति। पट इत्येवं वचनमित्यर्थः। कर्ता चसामर्थ्यपरिमाणादिधर्मश्चेति तौ तथोक्तौ, ततो विभिन्नशब्देन विशेषणसमासं कृत्वा मतुप् कार्यः॥ ५८१॥ ५८२॥ ५८३॥ § 2046

यच्चोक्तं स्थूलार्थासंभव इत्यादि तत्राह—अन्योन्याभिसरा इति। असिद्धमणूनामतीन्द्रियत्वं विशिष्टावस्थाप्राप्तानामिन्द्रियग्राह्यत्वात्। यस्य हि नित्याः परमाणव इति पक्षस्तं प्रत्यणूनां विशेषाभावात्सर्वदैवातीन्द्रियत्वं स्यात्, नास्मान्प्रति। अन्योन्याभिसरा इति। § 2047

अन्योन्याभिसराश्चैवं ये जाताः परमाणवः।
नैवातीन्द्रियता तेषामन्यानां गोचरत्वतः॥
५८४॥§ 2049

अन्योन्यसहाया इत्यर्थः॥ ५८४॥ § 2050

नीलादिरित्यादिना तदेवाक्षगोचरत्वं दर्शयति। § 2051

नीलादिः परमाणूनामाकारः कल्पितो निजः।
नीलादिप्रतिभासा च वेद्यते चक्षुरादिधीः॥
५८५॥§ 2053

ननु च पौर्वापर्यादिदिग्भेदेन परमाणवोऽवस्थिता इष्यन्ते नच तेन रूपेणोपलक्ष्यन्ते। तत्कथमेषां प्रत्यक्षतेत्याह—पौर्वापर्यविवेकेनेत्यादि। § 2054

पौर्वापर्यविवेकेन यद्यप्येषामलक्षणम्।
तथाऽप्यध्यक्षताऽबाधा पानकादाविव स्थिता॥
५८६॥§ 2056

196/k

अध्यक्षताया अबाधा अध्यक्षताऽबाधेति समासः। असमस्तं वैतत्। अविद्यमानबाधत्वादबाधा। पानकादिष्विवाध्यक्षताऽवस्थितेत्यर्थः। तथाहि—पानके तप्तोपले सूतहेमादौ च मिश्रे परमाणव एव तथोपलभ्यन्ते। नहि तत्रावयविद्रव्यमस्ति, विजातीयानां द्रव्यारम्भकत्वात्। नचापि परमाणुश्चोध्यति(भ्योऽवयवि ?)भेदे संयोगो दृश्य उपपद्यते, अदृष्टाश्रयत्वात्। यत्र ह्येकोऽपि संयोगी न दृश्यस्तत्र संयोगो न दृश्यते। यथा पिशाचघटसंयोगः सूर्यमण्डलाकाशदिग्देशसंयोगश्च। यत्र पुनः सर्व एव संयोगी परमाण्वात्मको न दृश्यते, तत्र कथं संयोगस्तदाश्रितो दृश्यः स्यात् ॥ ५८६॥ § 2057

यद्येवं सर्वप्रकारेणानिश्चये सति कथं नाम प्रत्यक्षता तेषां युक्तिमतीत्याह—सर्वेषामित्यादि। § 2058

सर्वेषामेव वस्तूनां सर्वव्यावृत्तिरूपिणाम्।
दृष्टावपि तथैवेति न सर्वाकारनिश्चयः॥
५८७॥§ 2060

नह्यपरदर्शनानां क्वचिदपि वस्तुनि प्रत्यक्षेण गृहीतेऽपि सर्वाकारनिश्चयोऽस्ति। यावता तु रूपेणार्थान्तरव्यावृत्तिकृतेन निश्चीयत, तावता तत्प्रत्य-

६ निश्चीयत] Correction : ; न निश्चीयते (sic !)निश्चीयत

क्षमिति व्यवस्थाप्यते। न सर्वाकारेण। गृहीतस्यापि प्रकारान्तरस्य निश्चयानुत्पत्तेर्व्यवहारायोग्यत्वेनागृहीतकल्पत्वात्। तथैवेति। यथा तद्वस्त्वनुभूतम्॥ ५८७॥ § 2061

ननु च निरंशतया सर्वात्मनैव प्रत्यक्षेणानुभूतत्वाद्वस्तुनः कस्मात्सर्वात्मना निश्चयो न भवतीत्याह—अकल्पनाक्षगम्येऽपीत्यादि। § 2062

अकल्पनाक्षगम्येऽपि निरंशेऽर्थस्य लक्षणे।
यद्भेदव्यवसायेऽस्ति कारणं स प्रतीयते॥
५८८॥§ 2064

अक्षे भवमाक्षमिन्द्रियज्ञानमित्यर्थः। अकल्पनमविद्यमानकल्पनं च तदाक्षं चेति विग्रहः। तेन गम्येऽपि—निर्विकल्पेन्द्रियज्ञानगम्येऽपीत्यर्थः। यद्भेदव्यवसाय इति। यस्माद्भेदो व्यावृत्तिर्यद्भेदस्तत्र व्यवसायो निश्चयस्तस्य कारणमभ्यासः प्रत्यासत्तिस्तारतम्यबुद्धिपाटवं चेत्यादि। नह्यनुभवमात्रमेव निश्चयकारणं किंत्वभ्यासादयोऽपि। तेन यत्र ते सन्ति तत्र निश्चयः प्रसूयत इत्यर्थः। एतच्च सर्वं परमाणूनां सिद्धिं बाह्यस्य चार्थस्य प्रत्यक्षत्वसिद्धिमभ्युपगम्योक्तम्। यस्य तु विज्ञानवादिनो न बाह्योऽर्थो नीलादिरूपतया प्रत्यक्षसिद्धः स्वप्नादौ विनापि बाह्यमर्थं तथाविधनीलादि प्रतिभासोपल- 197/k
म्भेन संशयात्, तस्य च नीलादिरूपस्यैकानेकस्वभावशून्यत्वेन भ्रान्तज्ञानप्रतिभासात्मकत्वात्, नापि परमाणवः सिद्धास्तेषां पौर्वापर्यावस्थायितया दिग्भागभेदिनामेकत्वासिद्धेः। तं प्रति कथं नीलादिरूपतया परमाणूनां प्रत्यक्षत्वं पौर्वापर्यस्य वानुपलक्षणं भ्रान्तिनिमित्तेनार्थान्तरसमारोपादिति शक्यं वक्तुम्॥ ५८८॥ § 2065

स्यादेतद्यद्यवयवी न स्यात्तदा कथं बहुषु परमाणुष्वेकः पर्वत इति व्यवसायो व्यापृताक्षस्य भवतीत्याह—समानेत्यादि। § 2066

समानज्वालासंभूतेर्यथा दीपेन विभ्रमः।
नैरन्तर्यस्थितानेकसूक्ष्मवित्तौ तथैकधा॥
५८९॥§ 2068

यथाहि—दीपादौ नैरन्तर्येण सदृशापरापरज्वालापदार्थसंभवात्सत्यपि भेद एकत्वविभ्रमो भवति तथा नैरन्तर्येणानेकसूक्ष्मतरपदार्थसंवेदनतोऽयमेकत्वविभ्रम इत्यदोषः॥ ५८९॥ § 2069

यद्येवं भेदेनानुपलक्ष्यमाणाः कथमणवः प्रत्यक्षाः सिध्यन्तीत्याह—विवेकेत्यादि। § 2070

विवेकालक्षणात्तेषां नो चेत्प्रत्यक्षतेष्यते।
दीपादौ सा कथं दृष्टा किं वेष्टोऽवयवी तथा॥
५९० ॥§ 2072

यदि हि विवेकेनानवधार्यमाणं न प्रत्यक्षमिष्यते, तदा दीपादौ पूर्वापरविभागेनानुपलक्ष्यमाणे सा प्रत्यक्षता कथं दृष्टा। अवयवी वाऽवयवविवेकेनागृह्यमाणोऽपि किं तथा प्रत्यक्षत्वेनेष्ट इत्यनैकान्तिकमेतत्॥ ५९०॥
§ 2073

एतावदित्यादिना परं चोदयितुं शिक्षयति— § 2074

एतावत्तु भवेदत्र कथमेषां न निश्चये।
नीलादिपरमाणूनामाकार इति गम्यते॥
५९१ ॥§ 2076

तदप्यकारणं यस्मान्नैव ज्ञानमगोचरम्।
नचैकस्थूलविषयं स्थौल्यैकत्वविरोधतः॥
५९२ ॥§ 2078

एषामिति। परमाणूनाम्। तदपीति। परमाणूनां विवेकेनालक्षणं यत्तदकारणम्, परमाणुगतनीलाद्यग्रहणस्यान्यतोऽपि निश्चयोत्पत्तेः। तथाहीदं ज्ञानमविषयं तावद्बहिरर्थवादिना सता नैवेष्टव्यमन्यथा हि विज्ञानमात्रतादर्शनमेव स्यात्। स चायं रूपादिविषयः स्थूलरूपतयावभासमान एको वा स्यादनेको वा, एकोऽपि भवन्नारब्धो वा स्यादवयवैरनारब्धो वा। तत्र न तावदुभयात्माऽप्ययमेको युक्तः प्रत्यक्षादिविरोधात्॥ ५९१॥ ५९२॥ § 2079
198/k

कोऽसौ विरोध इत्याह—स्थूलस्यैकस्वभावत्व इत्यादि। § 2080

स्थूलस्यैकस्वभावत्वे मक्षिकापदमात्रतः।
पिधाने पिहितं सर्वमासज्येताविभागतः॥
५९३ ॥§ 2082

रक्ते च भाग एकस्मिन्सर्वं रज्येत रक्तवत्।

विरुद्धधर्मभावे वा नानात्वमनुषज्यते॥ ५९४॥ § 2084

यदि हि स्थूलमेकं स्यात्तदैकदेशपिधाने सर्वस्य पिधानम्, एकदेशरागे च सर्वस्य रागः प्रसज्येत, पिहितापिहितयो रक्तारक्तयोश्च भवन्मतेनाभेदात्। नचैकस्य परस्परविरुद्धधर्माध्यासो युक्तः, अतिप्रसङ्गात्। एवं हि विश्वमेकं द्रव्यं स्यात्, ततश्च सहोत्पादादिप्रसङ्ग। नचैकदेशपिधाने सर्वं पिहितमीक्ष्यत इति प्रत्यक्षविरोधः। तथानुमानविरोधोऽपि। तथाहि—यत्परस्परविरुद्धधर्माध्यासितं न तदेकं भवति, यथा गोमहिषम्, उपलभ्यमानानुपलभ्यमानरूपं पिहितादिरूपेण च विरुद्धधर्माध्यासितं स्थूलमिति व्यापकविरुद्धोपलब्धिः। सर्वस्यैकत्वप्रसङ्गो बाधकं प्रमाणम् ॥ ५९३॥ ५९४॥ § 2085

उद्योतकरस्त्वाह—एकस्मिन्भेदाभावात्सर्वशब्दप्रयोगानुपपत्तिरिति। तदेतन्नन्नु चेत्यादिना शङ्कते। § 2086

ननु चैकस्वभावत्वात्सर्वशब्दो(?)ऽत्र किंकृतः।
स ह्यनेकार्थविषयो नानात्मावयवी न च॥
५९५॥ § 2088

तथाहि—सर्वशब्दोऽनेकार्थविषयः, न चावयवी नानात्मेति, तत्कथं सर्वशब्दप्रयोगो येनोच्यते सर्वं पिहितमासज्यत इति॥ ५९५॥ § 2089

नन्वित्यादिना प्रतिविधत्ते। § 2090

ननु ये लोकतः सिद्धा वासोदेहनगादयः।
त एवावयवित्वेन भवद्भिरुपवर्णिताः॥ ५९६॥ § 2092

रक्तं वासोऽखिलं सर्वं निःशेषं निखिलं तथा।
तत्रेच्छामात्रसंभूतमिति सर्वे प्रयुञ्जते॥ ५९७॥ § 2094

तथाविधविवक्षायामस्माभिरपि वर्ण्यते।
सर्वं स्याद्रक्तमित्यादि निर्निबन्धा हि वाचकाः॥
५९८॥ § 2096

य एव हि लोके वासोदेहप्रभृतयः प्रसिद्धास्त एव भवद्भिरवयवित्वेनावकल्पिताः। तत्र च लोके सर्वैकदेशशब्दयोः प्रवृत्तिः प्रसिद्धैव। तथाच वक्तारो 199/k
भवन्ति सर्वं वासो रक्तमित्यादेः। तथाविधायां च विवक्षायां येयं लोके पृथुत-

रदेशावक्रान्तिव्यवस्थितशाटकादिपदार्थगतरक्तादिप्रतिपादनेच्छा, तस्या सत्यामस्माभिरपि प्रतीतिमनुसृत्य भवतो विरोधप्रतिपादनाय सर्वादिशब्दप्रयोगः क्रियते। अपि च—भवत एवायं स्थूलस्यैकत्वमभ्युपगच्छतो दोषो नास्माकम्, नह्यस्माभिः स्थूलस्यैकत्वमिष्यते ॥ ५९६ ॥ ५९७ ॥ ५९८ ॥ स्यादेतन्ममाप्यदोष एव यस्माद्भाक्तमुपचरितमेतत्तन्त्वादिष्ववयवेषु तत्कारणतया पटाद्यभिधानम्, तेन सर्वादिशब्दप्रयोगो भविष्यतीति॥ ५९६॥ ५९७॥ ५९८॥ § 2097

भाक्तं तदभिधानं चेद्वचोभेदः प्रसज्यते।
नच बुद्धेर्विभेदोऽस्ति गौणमुख्यतयेष्टयोः॥
५९९ ॥§ 2099

यद्येवं—वचोभेदः—बहुवचनं, सर्वदैव प्रसज्यते सर्वाणि वासांसि रक्तानीति। न च भवन्तो बहुष्वेकवचनमिच्छन्ति। अथापि स्यादवयविगतां संख्यामादायावयवेषुवस्त्रादिशब्दोऽपरित्यक्तात्माभिधेयगतलिङ्गसंख्य एव वर्तत इति। तदप्ययुक्तमिति दर्शयन्नाह—नचेत्यादि। यदि हि भाक्तोऽयं व्यपदेशः स्यात्तदा गौणमुख्यार्थविषयाया बुद्धेर्विभेदो वैलक्षण्यं स्खलद्गतित्वेत प्राप्नोति, नच भदोऽस्ति। तथाहि—सर्वं वासो रक्तमित्यत्र नैवं बुद्धिः प्रवर्त्तते न च वस्त्रं रक्तं किंतु तत्कारणभूतास्तन्तवो रक्ता इति। चकारान्न च सर्वशब्दवाच्यं वासो युष्माभिरिष्यते तस्यैकत्वात्, तत्कथंतत्संख्यामादाय सर्वशब्दो वस्त्रादिशब्दरहितोऽवयवेषु वर्त्तते। अथवा बुद्धेर्भेदो नानात्वं सोऽस्मिन् गौणमुख्यत्वेनेष्टयोर्न विद्यते। नहि तन्तुवस्त्रयोर्भिन्नं रूपं समुपलभ्यते रूपरसादिवत्, नचानुपलब्धभिन्नरूपयोर्गौणमुख्यभावः संभवति॥ ५९९॥ § 2100

ननु चेत्यादिना—शङ्करस्वामिनः परिहारमाशङ्कते। § 2101

ननु चाव्याप्यवृत्तित्वात्संयोगस्य न रक्तता।
सर्वस्यासज्यते नापि सर्वमावृतमीक्ष्यते॥
६०० ॥§ 2103

स ह्याह—राग उच्यते वाससः कषायकुङ्कुमादिद्रव्येण संयोगः। संयोगश्चाव्याप्यवृत्तिस्ततो न रक्त एकस्मिन्सर्वस्य रागो भवति। नच वस्त्रादिभिः शरीरैकदेशस्यावरणे सर्वस्यावरणमिति॥ ६००॥ § 2104

तदेतदयुक्तमित्यादर्शयति—ननु चानंशक इत्यादि। § 2105

---

४ मिष्यते ॥ ५९६ ॥ ५९७ ॥ ५९८ ॥] ५९६ ॥ ५९७ ॥ ५९८ ॥
Correction: ; मिष्यते, (sic!)मिष्यते ॥

ननु चानंशके द्रव्ये किमव्याप्तं व्यवस्थितम्।
स्वरूपं तदवस्थाने भेदः सिद्धोऽतएव वा॥
६०१ ॥§ 2107

200/k

बहुदेशस्थितिस्तेन नैवैकस्मिन्कृतास्पदा।
ततः सिद्धा पटादीनामणुभ्योऽनेकरूपता॥
६०२ ॥§ 2109

यदि हि पटादिरेकमेव द्रव्यं, तदा किं तत्र निरंशके द्रव्ये कषायादिभिरव्याप्तं, येनाव्याप्यवृत्तिः संयोगः स्यात्। अथाव्याप्तस्वरूपस्यावस्थानमङ्गीक्रियते तदा तदवस्थाने भेदोऽतएव सिद्धः, व्याप्ताव्याप्तयोर्विरोधेनैकस्वभावत्वायोगात्। नचैकस्य पृथुतरदेशावस्थानं युक्तमनंशत्वात्। अन्यथा हि सर्वेषामेवोदकजन्तुहस्त्यादीनामेकत्वेनाविशेषात्स्थूलसूक्ष्मादिभेदो न प्राप्नोति। अल्पबहुतरावयवारम्भानारम्भादिकृतो विशेष इति चेत्, अवयवा एव तर्ह्यल्पबहुतरास्तथातथोत्पद्यमानाः स्थूलसूक्ष्मादिव्यवस्थानिबन्धनं सन्तु, किं तदारब्धेनावयविना, तस्यादृष्टसामर्थ्यात्। नच सत्यप्यवयवाल्पबहुत्वेऽवयविनां निरंशतया परस्परं कश्चिद्विशेषोऽस्ति, येन स्थूलसूक्ष्मादिभेदो भवेत्, तेषामवयवाल्पबहुत्वग्रहणकृते विशेषेऽवयवमात्रमेवाभ्युपगतं स्यात्तत्रैव स्थूलादिव्यवहारात्ततश्चाणुमात्रमेव दृश्यत्वेनाभ्युपेतं स्यात्। स्थूलसूक्ष्मा(क्ष्म ?) व्यतिरेकेणान्यस्य(स्या ?) दृश्यमानत्वात्। अपि चाव्याप्यवृत्तिः संयोग इति कोऽर्थः ? यदि सर्वं द्रव्यं न व्याप्नोतीत्यर्थः तदयुक्तम्। द्रव्यस्य सर्वशब्दाविषयत्वाभ्युपगमात्। अथाश्रयस्यैकदेशे वर्त्तत इति तदप्ययुक्तं तस्यैकदेशासम्भवात्। तदारम्भकेऽवयवे वर्त्तत इति चेत्, यद्येवमवयवानामेव रक्तत्वादवयविरूपमरक्तमिति रक्तारक्तं समं दृश्येत। किंच योऽप्यसौ तदारम्भकोऽवयवः स यद्यवयविरूपस्तदा तत्राप्येकदेशवृत्तित्वं संयोगस्येति तुल्यः पर्यनुयोगः। अथाणुरूपस्तदाऽतीन्द्रियत्वादणूनां तदाश्रितोऽपि संयोगोऽतीन्द्रिय एवेति रक्तोपलम्भो न स्यात्। स्यान्मतं यथाव्याप्तिरङ्गुलिरूपस्याश्रयोपलब्धावेवोपलब्धिरुच्यते नैवं संयोगस्याश्रयोपलब्धावेवोपलब्धिरिति ततोऽसावव्याप्यवृत्तिरुच्यत इति। तदेतदसम्यक्। न हि संयोगस्याश्रयानुपलब्धावुपलब्धिरस्ति। यथा घटपिशाचसंयोगस्य, ततश्च रागस्याप्यदृष्टाश्रयस्यानुपलब्धेराश्रयोपलब्धावेवोपलब्धिरिति सोऽप्येवं व्याप्यवृत्तिर्भवेत्। स्यादेतत्— अवयवान्तरेष्वरक्तेषु समवेतस्य द्रव्यस्योपलब्धावपि न संयोगात्मकस्य रागस्योपलब्धिस्तेन नास्याश्रयोपलब्धावुपलब्धिरिति तदप्ययुक्तम्। एवं हि रक्तारक्तसमवेतस्यावयविन एकत्वाद्रक्तेऽप्यवयवे रागस्य तद्द्वारेणानुपलब्धिप्र-

सङ्गः, आश्रयोपलम्भेऽपि तस्यानुपलम्भात्। न चाश्रयोपलम्भादन्यसंयोगग्र-हणाभ्युपायोऽस्ति। तस्मान्नैकरूपो § 2110
201/k

विषयो युक्तः। अनेकरूपोऽपि भवनसामर्थ्यादणुसंचयात्मक एवाव-भिद्यते। संभवदवयवस्यैकत्वायोगात्। अतः सिद्धा घटादीनामणुरूपता तेन नीलादि परमाणूनामाकार इति सिद्धम्। अन्यस्यैकरूपस्य विषयस्यासम्भ-वात्॥ ६०१॥ ६०२॥ § 2111

यच्चोक्तं न चाणु वचनं भवेदिति तत्राह—अविज्ञातार्थतत्त्व इत्यादि। § 2112

अविज्ञातार्थतत्त्वस्तु पिण्डमेकं च मन्यते।
लोकस्तत्कल्पितापेक्षः परमाणुरिहोच्यते॥
६०३॥§ 2114

तत्कल्पितापेक्ष इति। तस्मिन्कल्पिते सूत्रे अपेक्षा यस्येति विग्रहः॥ ६०३॥ § 2115

परिहारान्तरमाह—निमित्तेत्यादि। § 2116

निमित्तनिरपेक्षा वा संज्ञेयं तादृशि स्थिता।
सङ्केतान्वयिनी यद्वन्निर्वित्तेऽपीश्वरश्रुतिः॥
६०४॥§ 2118

तादृशीति। अनंशेऽप्रतिघे। यथा दरिद्रेऽपीश्वरश्रुतिः सङ्केतवशादैश्वर्याख्यं निमित्तमन्तरेणैव प्रवर्तते, तद्वदियमप्यणुश्रुतिरित्यदोषः॥ ६०४॥ § 2119

एवं तावत्सामान्येनैवावयवैरारब्धमनारब्धं वा स्थूलमेकं द्रव्यं न युज्य-त इति प्रतिपादितम्। इदानीं येनावयवी प्रारब्ध इष्यते, तस्य विशेषेण दूषणमाह—एकेत्यादि। § 2120

एकावयव्यनुगता नैव तन्तुकरादयः।
अनेकत्वाद्यथासिद्धाः कटकुट्यकुटादयः॥
६०५॥§ 2122

यदि वाभिमतं द्रव्यं नानेकावयवाश्रितम्।

एकत्वादणुवद्वृत्तेरयुक्तिर्बाधिका प्रमा॥ ६०६॥§ 2124

प्रयोगः—यदनेकं न तदेकद्रव्यानुगतम्, यथा कटकुट्यादयो बहवो नैकद्रव्यानुगताः, अनेके चामी तन्तुकरादय इति व्यापकविरुद्धोपलब्धेः। अथवा—यदेकंतदेकद्रव्याश्रितं यथैकः परमाणुः एकं चावयविसंज्ञितं द्रव्यमिति व्यापकविरुद्धोपलब्धिप्रसङ्गः। प्रसङ्गसाधनं चैतत्। प्रयोगद्वयेऽपि विपर्यये बाधकं प्रमाणमाह—वृत्तेरयुक्तिर्बाधिका प्रमेति। अवयवेषु याऽवयविनो वृत्तिस्तस्या अयोगः प्रमाणैरघटनं तदत्र बाधकं प्रमाणम्॥ ६०५॥ ६०६॥ § 2125

कथं पुनरयोग इत्याह—तद्धीत्यादि। § 2126

तद्ध्येकवृत्तिभाजैव रूपेणावयवान्तरे।
वर्त्तेत यदि वाऽन्येन न प्रकारान्तरं यतः॥
६०७॥§ 2128

202/k

तत्र तेनैव नान्यत्र वृत्तिरस्यावकल्पते।
तेन क्रोडीकृतत्वेन नान्यथा तत्र वृत्तिमत्॥
६०८॥§ 2130

तदेकं द्रव्यमेकावयवक्रोडीकृतं यत्तस्य रूपं तेनैवावयवान्तरेषु वर्त्तते, यद्वाऽन्येनेति पक्षद्वयं, नहि वस्तुतस्तत्त्वान्यत्वाभ्यामन्यत्प्रकारान्तरमस्ति। तत्र न तावदाद्यः पक्षस्तेनैवावयवेन तस्य क्रोडीकृतत्वात्कुतोऽवयवान्तरे वर्त्तितुमस्यावसरस्तदानीमेव स्यात्। अन्यथा हि यद्यन्यत्रापि वर्त्तेत, तदाऽत्राभिमते द्रव्ये तस्य वृत्तिः सर्वात्मना न भवेत्। नहि तस्यापरः स्वभावोऽस्ति, येनान्यत्रापि वर्त्तेत, एकत्वहानिप्रसङ्गात्॥ ६०७॥ ६०८॥ § 2131

प्रमाणं रचयन्नाह—नैवेत्यादि। § 2132

नैव धात्र्यन्तरक्रोडमध्यास्ते हि यथा शिशुः।
एकक्रोडीकृतं द्रव्यं नाश्रयेत तथाऽपरम्॥
६०९॥§ 2134

प्रयोगः—यदेकवस्तुक्रोडीकृतं वस्तु न तत्तदानीमेवान्यत्र वर्त्तते। यथैकधात्रीक्रोडीकृतः शिशुर्न धात्र्यन्तरक्रोडमध्यास्ते एकावयवक्रोडीकृतं च द्रव्यमिति व्यापकविरुद्धोपलब्धिः। द्रव्यं नाश्रयेत तथापरमिति प्रमाणफलकथनम्॥ ६०९॥ § 2135

साध्यविपर्ययेऽस्य बाधकं प्रमाणमाह—तत्संबद्धस्वभावस्येति। § 2136

तत्संबद्धस्वभावस्य ह्यतद्देशेऽपि वृत्तितः।
प्राप्तं तदेकदेशत्वमैकात्म्यं चाविभागतः॥
६१० ॥§ 2138

अन्येनैवात्मना वृत्तौ नैकोऽनेकव्यवस्थितः।
सिध्येत्स्वभावभेदस्य वस्तुभेदात्मकत्वतः॥
६११ ॥§ 2140

अभिमतावयवसंबद्धस्वभावस्य हि द्रव्यस्यातद्देशेऽप्यवयवान्तरे यदि वृत्तिः स्यात्तदा तेषामवयवानामेकदेशता स्यात्, ततश्चैकात्म्यमेकस्वभावताऽवयवानां प्राप्ता।कस्मात् ? अविभागतः—अविभक्तरूपतयाऽवस्थितत्वात्। अन्यथा हि विभक्तरूपावस्थितौ सत्यां नैकदेशत्वं भवेत्, अथान्येन स्वभावेनेति द्वितीयः पक्षस्तदैकोऽनेकव्यवस्थित इति न सिध्येत्, स्वभावान्तरस्यान्यत्र वृत्तेः स्वभावभेदात्मकत्वाच्च वस्तुभेदस्य॥ ६१०॥ ६११॥ § 2141

उद्योतकरस्त्वाह—आश्रयाश्रितधर्मिनिर्देशमात्रमेतत्, अवयव्यवयवेषु प्रवर्त्तत इति, आश्रितभावलक्षणा हि समवायरूपा प्राप्तिरुच्यत इति तत्राह—समवायात्मिकेत्यादि। § 2142
203/k

समवायात्मिका वृत्तिस्तस्य तेष्विति चेन्ननु।
तस्यामपि विचारोऽयं कोपेनैव प्रधावति॥
६१२ ॥§ 2144

तस्यामप्येवंरूपायां वृत्तावयमनन्तरोदितः—किमेकावयवसमवेतेनैव स्वभावेनावयवान्तरेषु वर्त्तते, अथान्येनेति विचारः कुमतिरचितदोषजालमसहमानकोपादिवाभिधावति॥ ६१२॥ § 2145

एवं तावत्कृत्स्नैकदेशविकल्पमकृत्वा वृत्तिरपास्ता। संप्रत्युपादाय प्रज्ञप्तिविहितेन प्रकारेण वृत्तिनिषेधमाह—यद्वेत्यादि। § 2146

यद्वा सर्वात्मना वृत्तावनेकत्वं प्रसज्यते।

१ धर्मि] Correction: ; धर्म (sic!)धर्मि

एकदेशेन चानिष्टा नैको वा न क्वचिच्च सः॥
६१३ ॥§ 2148

कदाचित्तद्द्रव्यं प्रत्येकमवयवेषु सर्वात्मना वर्त्तते, एकदेशेन वा। यदि सर्वात्मना तदा यावन्तोऽवयवास्तावन्तस्तस्यात्मानः प्राप्नुवन्ति, नहि प्रत्यवयवं तस्य स्वभावाभेदेऽसति सर्वात्मना वृत्तिरस्ति। असंविद्यमानेनात्मना वृत्त्यसंभवात्। ततश्च सर्वात्मना वृत्तेर्युगपदनेककुण्डादिव्यवस्थितकुवलयादिवदनेकत्वमवयविनः प्राप्नोति। अथैकदेशेनेति पक्षस्तदाऽनवस्था स्यादेकदेशानाम्। तथाहि यैरेकदेशैस्तद्द्रव्यमवयवेषु वर्त्तते तेऽपि तस्यैकदेशा इति, तेष्वप्यनेन वर्त्तितव्यम्, तथैवापरेष्वित्यनिष्ठा। अथापि स्याद्यैरसावेकदेशैरवयवेषु वर्त्तते। ते तस्य स्वात्मभूता एव नार्थान्तरभूतास्तद्व्यतिरेकेण चापरेषामेकदेशानामभावादतो नानिष्ठा भविष्यतीत्याशङ्क्याह—नैको वेति। एवं हि सत्येकोऽवयवी न स्यादवयवप्रचयमात्ररूपत्वात्तस्य। तथाच सतिदृष्टपाण्यादिसमुदायमात्रात्मक एवास्तां वस्तु, किमपरैस्तस्य स्वात्मभूतैरवयवैः परिकल्पितैः। दोषान्तरमप्याह—न क्वचिच्च स इति। वृत्तः स्यादिति शेषः। एतदुक्तं भवति। यद्येकदेशाः प्रत्येकावयविनः स्युस्तदाऽवयवे ह्यवयवी वृत्तः स्यात्। यावता नैकदेशाः प्रत्येकमवयविनः, तेषामेकदेशत्वहानिप्रसङ्गात्। नचापरोऽवयवी स्वरूपेणास्ति। तत्कथमवयवेष्वसौ वृत्तो नाम॥ ६१३॥
§ 2149

स्वातन्त्र्येणेत्यादिना शङ्करस्वामिनः परिहारमाशङ्कते— § 2150

स्वातन्त्र्येण प्रसङ्गेन साधनं यत्प्रवर्त्तते।
स्वयं तदुपलब्धौ हि सत्यं सङ्गच्छते न तु॥
६१४ ॥§ 2152

नच कार्त्स्न्यैकदेशाभ्यां वृत्तिः क्वचन लक्षिता।
यस्या असंभवाद्द्रव्यमसत्स्यादपरोऽपि च॥
६१५ ॥§ 2154

204/k

दृष्टौ वा क्वचिदेतस्या द्रव्यादावनिवारणम्।
अथ तस्मिन्नदृष्टौ तु भेदे प्रश्नो न युज्यते॥
६१६ ॥§ 2156

एतावत्तु भवेद्वाच्यं वृत्तिर्नास्तीति तच्च न।
युक्तं प्रत्यक्षतः सिद्धेरिहेदमिति बुद्धितः॥
६१७॥ § 2158

प्रत्यक्षं न तदिष्टं चेद्बाधकं किञ्चिदुच्यताम्।
रूपादिचेतसोऽपि स्यान्नैव प्रत्यक्षताऽन्यथा॥
६१८॥ § 2160

स ह्याह—स्वातन्त्र्येण प्रसङ्गमुखेन वा यत्साधनं क्रियते तत्स्वयमुपलब्धौ सत्यां संगच्छते, अन्यथा ह्यसिद्धता दोषः स्यात्, नच भवता क्वचिदप्येकस्यानेकस्मिन्कार्त्स्न्यैकदेशाभ्यां वृत्तिरुपलब्धा, यस्या वृत्तेरसंभवादवयविद्रव्यमसत्स्यात्। सति संभवेऽपरोऽपि वा भवेदवयवोऽवयवी चेति। अथ क्वचिदेवंभूता वृत्तिरुपलक्षिता भवेत्तदा तद्वदेव द्रव्यादावपि सा भविष्यतीत्यप्रतिषेधः। अथ न दृष्टा सा वृत्तिस्तदा किमेकदेशेनाहोस्वित्सर्वात्मनेत्येवं भेदप्रश्नो न युज्यते, सिद्धे हि धर्मिणि विशेषप्रतिषेधो युक्तः। यदा तु धर्म्येवासिद्धस्तदा तस्यैव प्रतिषेधो ज्यायान्, तेनैतावदेव वक्तव्यं वृत्तिरेव नास्तीति, नतु विशेषप्रतिषेधः, तच्च न युक्तं प्रत्यक्षत एवावयवेष्ववयविनो वृत्तिसिद्धेः। किंभूतात्प्रत्यक्षादित्याह—इहेदमिति बुद्धित इति। इह तन्तुष्विदं वस्त्रादीत्येवंभूतात्प्रत्यक्षादित्यर्थः। अथापि स्यात्—प्रत्यक्षत्वमस्या बुद्धेरसिद्धमिति। यद्येवं किंचिदत्र बाधकं प्रमाणं वक्तव्यम्। यतोऽप्रत्यक्षता स्यात्। अथासत्यपि बाधके प्रमाणे प्रत्यक्षत्वमस्या न भवेदेवं तर्हि रूपादिविज्ञानस्यापि भवदीयस्य प्रत्यक्षत्वं न भवेद्विशेषाभावात्॥ ६१४॥ ६१५॥ ६१६॥ ॥ ६१७॥ ६१८॥ § 2161

तदत्रेत्यादिना प्रतिविधत्ते। § 2162

तदत्र वृत्तिर्नास्तीति प्रागभेदेन साधितम्।
इहेत्यस्ति नच ज्ञानं तद्रूपाप्रतिभासनात्॥
६१९॥ § 2164

तद्ध्येकवृत्तिभाजैवेत्यादिना प्राक् सामान्येनैवानेकस्मिन्नेकस्य वृत्तिरपास्ता। यच्चेदमुच्यते प्रत्यक्षत एव वृत्तिः सिद्धा इहेदमिति बुद्धित इति, तदप्यलौकिकम्। नहीह शृङ्गे गौरिह तन्तुषु पट इत्येव लोके विकल्पिकाऽपि
205/k धीः प्रवर्त्तते। किं तर्हि ? इह गवि शृङ्गं पटे तन्तव इति। नाप्यध्यक्षचेतसि तन्त्वादिसमवेतं तद्व्यतिरेकि वस्त्रादिरूपमाभासते। नच विवेकेनाप्रतिभासिते

सतीदमिह वर्त्तत इति धीर्भवेत्। नहि कुण्डादौ विवेकिनामप्रतिभासमाने पयसि भवति सलिलमिहेति प्रत्ययः॥ ६१९॥ § 2165

यच्चोक्तं नच कार्त्स्न्यैकदेशाभ्यां वृत्तिः क्वचन लक्षितेति तत्राह—कृत्स्नैकदेशशब्दाभ्यामित्यादि। § 2166

कृत्स्नैकदेशशब्दाभ्यामयं चार्थः प्रकाश्यते।
नैरंश्येनास्य किं वृत्तिः किं वा तस्यान्यथैव सा॥
६२० ॥§ 2168

यथा पात्रादिसंस्थस्य श्रीफलादेर्यथाऽथवा।
अनेकासनसंस्थस्य चैत्रादेरुपलक्षिता॥ ६२१ ॥§ 2170

कृत्स्नशब्देन हि यादृशं स्वरूपमनंशं किं तथैव नैरंश्येन सर्वावयवेषु तस्य वृत्तिर्यथा क्वचिद्भाजनावस्थितस्य श्रीफलादेरुपलक्षितेत्ययमर्थः प्रकाश्यते, आहोस्विदन्यथा यथाऽनेकपीठाधिशयितस्य चैत्रादेरुपलक्षितेत्ययमेकदेशशब्देन प्रकाश्यतइति। यत्किंचिदेतत्। यदप्युद्योतकारेणोक्तम्—एकस्मिन्नवयविनि कृत्स्नैकदेशशब्दप्रवृत्त्यसंभवादयुक्तोऽयं प्रश्नः किमेकदेशेन वर्त्तताथ कृत्स्नो वर्त्तत इति। कृत्स्नमिति खल्वशेषाभिधानम्, एकदेश इति चानेकत्वे सति कस्यचिदभिधानम्, ताविमौ कृत्स्नैकदेशशब्दावेकस्मिन्नवयविन्यनुपपन्नाविति तदप्यनेनैव प्रत्युक्तम्। तथाच लोके कृत्स्नः पदः कुण्डे वर्त्तते एकदेशेन वेत्येवं पदादिषु कृत्स्नैकदेशशब्दप्रवृत्तिर्दृश्यत एव। नचेयमुपचरितेति युक्तम्, अस्खलद्गतित्वादिति प्रागभिहितमेतत्॥ ६२०॥ ॥ ६२१॥
§ 2171

एवं वायुपर्यन्तं चतुर्विधं द्रव्यमपास्तम्। आत्माख्यं तु प्रागेवात्मपरीक्षायां निरस्तम्। इदानीमाकाशकालदिङ्मनसां प्रतिषेधार्थमाह—समाश्रिता इत्यादि। § 2172

समाश्रिताः क्वचिच्छब्दा विनाशित्वादिहेतुतः।
घटदीपादिवत्तच्च किल व्योम भविष्यति॥
६२२ ॥§ 2174

तत्राकाशाख्यं तावद्द्रव्यं परेण साध्यते—अस्त्याकाशाख्यं द्रव्यं नित्यमेकं भुवि शब्दलिङ्गं, शब्दोऽस्य गुणत्वाल्लिङ्गम्। प्रयोगः—ये ये विनाशित्वोत्पत्तिमत्त्वादिधर्मोपेतास्ते क्वचिदाश्रिताः, यथा घटदीपादयः, तथाचामी शब्दाः, तस्मात्क्वचिदाश्रितैरेभिर्भवितव्यम्, योऽसावाश्रयोऽमीषां स सामर्थ्याद्व्योम—

206/k आकाशं भविष्यति। तथा ह्ययंशब्दो न पृथिव्यादीनां चतुर्णां गुणो युक्तः, प्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वात्, अयावद्द्रव्यभावित्वात्, आश्रयादन्यत्रोपलब्धेश्च। यथोक्तधर्मविपरीता हि स्पर्शवतां गुणा दृष्टाः। प्रत्यक्षत्वे सतीति विशेषणं पाकजैः परमाणुगतैरनेकान्तत्वपरिहारार्थम्। बाह्येन्द्रियप्रत्यक्षत्वादात्मान्तरग्राह्यत्वादहङ्कारेण विभक्तग्रहणाच्च नात्मनो गुणः। आत्मगुणानां हि सुखादीनामेतद्वैपरीत्यदर्शनात्। श्रोत्रग्राह्यत्वाच्च न दिक्कालमनसाम्। अतः पारिशेष्याद्गुणो भूत्वाऽऽकाशस्य लिङ्गम्। तच्चाकाशं शब्दलिङ्गाविशेषाद्विशेषलिङ्गाभावादेकं सर्वत्रोपलभ्यमानगुणत्वात्—विभुगुणवत्त्वात्।अनाश्रितत्वाच्च द्रव्यम्। अकृतकत्वान्नित्यमित्येषा प्रक्रिया परेषाम्॥ ६२२॥ § 2175

आदित्यादीत्यादिना कालसाधनमाह— § 2176

आदित्यादिक्रियाद्रव्यव्यतिरेकनिबन्धनम्।
परापरादिविज्ञानं घटादिप्रत्ययो यथा॥ ६२३॥ § 2178

वलीपलितकार्कश्यगत्यादिप्रत्ययादिदम्।
यतो विलक्षणं हेतुः स च कालः किलेष्यते॥
६२४॥ § 2180

द्रव्यशब्देन वलीपलितादयो ग्रहीतव्याः। परः पिता, अपरः पुत्रः, युगपत्, चिरं, क्षिप्रं, क्रियते, कृतं, करिष्यते चेति यदेतत्परापरादिज्ञानं तदादित्यादिक्रियाद्रव्यव्यतिरिक्तपदार्थनिबन्धनम्, वलीपलितादिप्रत्ययविलक्षणत्वात्, घटादिप्रत्ययवत्। यो हेतुरस्य स सामर्थ्यात्कालः। तथाहि—न तावद्देशकृतोऽयं परापरादिप्रत्ययः। परदिग्भागावस्थितेऽपि स्थविरे पर इति ज्ञानोत्पत्तेः। तथाऽपरदिग्भागावस्थायिन्यपि पुत्रेऽपर इति। नापि वलीपलितादिकृतः, तत्प्रत्ययविलक्षणत्वात्।नापि क्रियाकृतः, तज्ज्ञानविलक्षणत्वादेव। तथाच सूत्रम्—अपरं परं युगपदयुगपच्चिरं क्षिप्रमिति काललिङ्गानीति। नित्यत्वैकत्वादयो धर्मा आकाशवदेवास्य बोद्धव्याः ॥ ६२३॥ ६२४॥ § 2181

दिक्प्रसाधनार्थमाह—पूर्वापरादिबुद्धिभ्य इति। § 2182

पूर्वापरादिबुद्धिभ्यो दिगेवमनुमीयते।
क्रमेण ज्ञानजात्या च मनसोऽनुमितिर्मता॥
६२५॥ § 2184

चक्षुरादिविभिन्नं च कारणं समपेक्षते।
क्रमेण जाता रूपादिप्रतिपत्ती रथादिवत्॥
६२६॥§ 2186

207/k

मूर्त्तं द्रव्यमवधिं कृत्वा मूर्त्तेष्वेव द्रव्येषु तस्मादिदं पूर्वेण, दक्षिणेन, पश्चिमेन उत्तरेण, पूर्वदक्षिणेन, दक्षिणापरेण, अपरोत्तरेण, उत्तरपूर्वेण, अधस्तादुपरिष्टादिति दश प्रत्यया अमी यतो भवन्ति सा दिगिति। तथाच सूत्रं—इत इदमिति यतस्तद्दिशो लिङ्गमिति। यत एते विशेषप्रत्ययाः, नच विशेषप्रत्यया आकस्मिका युक्ताः, नच परस्परं मूर्त्तद्रव्यव्यपेक्षा, इतरेतराश्रयत्वेनोभयाभावप्रसङ्गात्, तस्मादन्यनिमित्तासम्भवाद्दिश एतानि लिङ्गानि तस्याश्च दिशः कालवदेकत्वविभुत्वादयो गुणा बोद्धव्याः। एकत्वेऽपि दिशः कार्यविशेषात्प्राच्यादिभेदेन नानात्वम्। प्रयोगः—यदेतत्पूर्वापरादिज्ञानं तन्मूर्त्तद्रव्य(भिन्न ?)पदार्थनिबन्धनम्, तत्प्रत्ययविलक्षणत्वात्सुखादिज्ञानवदिति। मनसो लिङ्गमाह—क्रमेणेत्यादि। युगपदनेकेन्द्रियार्थसन्निकर्षसान्निध्येऽपि क्रमेण ज्ञानोत्पत्तिदर्शनादस्तीन्द्रियार्थव्यतिरिक्तं कारणान्तरं यस्य सन्निधानासन्निधानाभ्यां ज्ञानस्योत्पत्त्यनुत्पत्ती भवत इति। तस्मात्क्रमेण ज्ञानजात्या—ज्ञानोत्पत्त्या, मनसोऽनुमितिः क्रियते। तथाच सूत्रम्—युगपज्ज्ञानानुत्पत्तिर्मनसोलिङ्गमिति। प्रयोगः—येयं रूपादिप्रतिपत्तिः सा चक्षुरादिव्यतिरिक्तकारणापेक्षिणी, क्रमेण जायमानत्वात्, रथादिवदिति॥ ६२५॥ ६२६॥ § 2187

उपात्तादीत्यादिना प्रतिविधत्ते। § 2188

उपात्तादिमहाभूतहेतुत्वाङ्गीकृतेर्ध्वनेः।
सिद्धा एवाश्रिताः शब्दास्तेष्वित्याद्यमसाधनम्॥
६२७॥§ 2190

यदि सामान्येनाश्रितत्वमात्रमेषां साध्यते शब्दानां तदा सिद्धसाध्यता हेतोः। तथाहि—शब्दा उपात्तानुपात्तमहाभूतहेतुका इष्यन्ते। तेषु च भूतेषु तत्कार्यतया समाश्रिता एव। तत्प्रतिबद्धात्मलाभतया कार्याणां कारणाश्रितत्वात्। उपात्तानि—चित्तचैत्तैः स्वीकृतानि। आदिशब्देनानुपात्तमहाभूतहेतुकत्वपरिग्रहः। तेष्विति। उपात्तादिमहाभूतेषु। इतीति। तस्मादित्यर्थः। आद्यमिति। समाश्रिताःक्वचिच्छब्दा इत्यादिना यदुक्तं तदसाधनं सिद्धसाध्यतादोषादिति भावः॥ ६२७॥ § 2191

अथामूर्त्तनित्यैकविभुद्रव्यसमवेतत्वेनामीषामाश्रितत्वं विशिष्टमेव साधयितुमिष्टं तदा साध्यान्वितस्य दृष्टान्तस्याभावादनैकान्तिकता हेतोरित्येतद्दर्शयति—एकेत्यादि। § 2192

एकव्यापिध्रुवव्योमसमवायस्तु सिध्यति।
नैषामन्वयवैकल्यादक्रमाद्याप्तितस्तथा॥ ६२८॥§ 2194

208/k

नैषामिति। सिध्यतीति पूर्वेण संबन्धः। प्रतिज्ञायाश्चानुमानविरोधित्वमिति दर्शयति—अक्रमाद्याप्तितस्तथेति। यथोक्तं नभःसमवायित्वमेषां न सिध्यतीति संबन्धः। यदि हि नित्यैकनभोद्रव्यसमवेता अमी स्युः, तदा सकृदुत्पन्नानेकशब्दवदतत्काला अपि शब्दा अभिमत एव काले स्युः, अविकलकारणत्वात्, एकाश्रयत्वाच्च। नच नित्यस्य परापेक्षास्तीति प्रतिपादितमेतत्। नचाप्यनुपकारिणः समवायित्वं युक्तमतिप्रसङ्गात्। तदेवमक्रमत्वप्रसङ्गः। आदिशब्देन सर्वपुरुषैर्ग्रहणादिदोषप्रसङ्गश्च। तथाह्याकाशात्मकमेव श्रोत्रं नभश्चैकमेव, ततश्च तत्प्राप्तानां सर्वेषामपि शब्दानां श्रवणं भवेत्, नहि निर्विभागत्वेन तस्यायं प्रतिनियमो युक्तः, इदमात्मीयं श्रोत्रमिदं परकीयमिति। स्यान्मतम्—तदीयादृष्टाभिसंस्कृता या कर्णशष्कुली तत्परिच्छिन्नस्यैवाकाशस्य श्रोत्रत्वमत एव न मुखनासिकादिविवरान्तरेण शब्दोपलम्भो जायते, तस्या एव च कर्णशष्कुल्या उपघाताद्बाधिर्यादिर्व्यवस्थाप्यत इति। एतदयुक्तमेव, निरंशतयाऽऽकाशस्यैवंविधविभागस्यायोगात्। नच परिकल्पिता अवयवविभागा भाविकवस्तुविभागसंसाध्यामर्थक्रियामारोपवशात्संपादयितुमीशते। नहि जलमनल इत्युपचर्यमाणं ज्वलति दहति वा। अथ मतमाकाशस्य(स्यैक ?) देश इतिसंयोगस्याऽव्याप्यवृत्तित्वमु(त्वादु ?)च्यत इति। एतदपि प्रत्युक्तमेव। किंच—घटकर्णशष्कुल्यादयोऽप्यभिन्नैकव्योमसंसर्गितया समानदेशा भवेयुः। येनैव हि व्योमस्वभावेनैकः संयुज्यते तेनैवापरेऽपीति, ततश्चाभिमतदेशभाविन एवापरेऽपि घटादयः स्युः, तत्संयुक्तस्वभावाकाशसंयोगित्वात्, तद्देशावस्थितघटादिवत्। अतएव शब्दानामप्येकदेशत्वं भवेत्, ततश्च दूरासन्नतरदेशभेदावस्थाऽतिप्रतीता येयं पदार्थानां केषांचित्सा विरोधिनी त्यादित्येवमादयो दोषा बहवः प्रसर्पन्ति॥ ६२८॥ § 2195

कालदिक्साधनयोरपि सामान्येन सिद्धसाध्यता विशेषेणान्वयासिद्धिर्हेतोः प्रतिज्ञायाश्चानुमानबाधेति दर्शयति—विशिष्टेत्यादि। § 2196

विशिष्टसमयोद्भूतमनस्कारनिबन्धनम्।
परापरादिविज्ञानं न कालान्न दिशश्च तत्॥
६२९॥§ 2198

निरंशैकस्वभावत्वात्पौर्वापर्याद्यसम्भवः।

तयोः संबन्धिभेदाच्चेदेवं तौ निष्फलौ ननु॥
६३० ॥§ 2200

विशिष्टसमयः—पौर्वापर्यादिनोत्पन्नेष्वेवार्थेषु पूर्वापरादिसङ्केतः, तदुद्भूतो मन स्कारः—आभोगः स निबन्धनमस्येति तथोक्तम्। अतएव नेतरेत- 209/k राश्रयदोषः, विशिष्टपदार्थसङ्केतनिबन्धनत्वादस्य ज्ञानस्येति। अतः कारणमात्रे साध्ये सिद्धसाध्यता, विशेषेण साधनेऽनुमानबाधा, अनन्वयदोषश्च पूर्ववदिति सूचयन् हेतोश्चेष्टविपरीतसाधनाद्विरुद्धतेति दर्शयति—निरंशेत्यादि। तयोरिति। दिक्कालयोः। परापरादिज्ञानस्य निरंशैकदिक्कालाख्यपदार्थनिबन्धनत्वं साधयितुमिष्टं, तच्च न सिध्यति। तथाहि—स्वाकारानुरूपं प्रत्ययमुत्पादयन् विषयो भवति। नच निरंशस्य पौर्वापर्यादिविभागः संभवति, येन तत्कृतं पौर्वापर्यादिज्ञानं भवेत्। अत इष्टविपरीतसाधनाद्विरुद्धो हेतुः। संबन्धिभेदाच्चेदित्यनेन परस्योत्तरमाशङ्कते। अथ मतम्—दिक्कालसंबन्धिनो भावा बाह्याध्यात्मिकाः प्रदीपशरीरादयः, तेषां पौर्वापर्यादि विद्यते, ततस्तयोरपि दिक्कालयोः संबन्धिगतमेतत्पौर्वापर्यादि निर्दिश्यते, तस्मान्न विरुद्धता हेतोरिति भावः। अत्रोत्तरमाह—एवं तौ निष्फलौ नन्विति। एवं हि कल्प्यमाने तौ दिक्कालौ निष्फलौ स्याताम्। तत्साध्याभिमतस्य कार्यस्य तैरेव संबन्धिभिर्निष्पादितत्वात्। तथाहि—कालः पूर्वापरक्षणलवनिमेषकाष्ठाकलामुहूर्त्ताहोरात्राऽर्द्धमासादिप्रत्ययप्रसवहेतुः। दिक(?) पूर्वोत्तरादिव्यवस्थाहेतुरिष्यते। अयं च भेदः सकलस्तयोर्न स्वात्मनि विद्यते। भेदेषु पुनरस्तीति व्यर्थैव तत्परिकल्पना॥ ६२९॥ ॥ ६३०॥ § 2201

मनःसाधनहेतोरपि सामान्येन कारणमात्रे साध्ये सिद्धसाध्यतेति दर्शयति—चक्षुरादीत्यादि। § 2202

चक्षुराद्यतिरिक्तं तु मनोऽस्माभिरपीष्यते।
षण्णामनन्तरोद्भूतप्रत्ययो यो हि तन्मनः॥
६३१ ॥§ 2204

नित्ये तु मनसि प्राप्ताः प्रत्यया यौगपद्यतः।
तेन हेतुरिह प्रोक्तो भवतीष्टविघातकृत्॥
६३२ ॥§ 2206

विशेषेण तु नित्यैकमनस्साधनेऽनन्वयः प्रतिज्ञाया अनुमानबाधा विरुद्धता च हेतोर्दर्शयति—नित्ये त्वित्यादि। इष्टविघातकृदिति। चक्षुरादिव्यतिरिक्तानित्यकारणसापेक्षत्वसाधनात्, अन्यथा नित्यकारणत्वे सत्यविकलकारणत्वात्क्रमोत्पत्तिर्विरुध्येत चेतसाम्॥ ६३१॥ ६३२॥ § 2207

तामेव च विरुद्धतां हेतोरुपहासपूर्वकं दृढीकुर्वन्नाह—सौगतेत्यादि।
§ 2208

210/k

सौगतापरनिर्दिष्टमनःसंसिद्ध्यसिद्धये।
साकारमन्यथाऽऽवृत्तं मन्ये सूत्रमिदं कृतम्॥
६३३॥

इति द्रव्यपदार्थपरीक्षा।§ 2211

एतदेवं मन्ये सौगततीर्थिकयोरभीष्टस्य मनसः सिद्ध्यसिद्ध्यर्थमिदं युगपत् ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति सूत्रम्। एकस्मिन्पक्षेऽकारप्रश्लेषादिति समुदायार्थः। अवयवार्थस्तूच्यते। सौगताश्चापरे च तीर्थिकास्तैर्निर्दिष्टे च ते मनसी चेति विग्रहः। तयोर्यथाक्रमं संसिद्ध्यसिद्धी संसिद्धिसहिता वाऽसिद्धिः, तदर्थं तन्निमित्तम्। कथं पुनरेकं सूत्रं विरुद्धमर्थद्वयं गमयतीत्याह—साकारमित्यादि। सहाकारेण वर्त्तत इति।परकीयमनोऽसिद्ध्यर्थमलिङ्गमिति प्रश्लिष्टाकारो निर्देशः। सौगतमनस्सिद्धयेऽन्यथा भवति—अनकारमित्यर्थः। साकारत्वानकारत्वे कथमेकस्य सिद्ध्यत इत्याह—आवृत्तमिति। आवृत्तिस्तत्र न्याय्येति यावत्॥ ६३३॥ § 2212

इति द्रव्यपदार्थपरीक्षा।

०.१२ गुणपदार्थपरीक्षा।

गुणादीनां निषेधमाह—द्रव्याणामित्यादि। § 2214

द्रव्याणां प्रतिषेधेन सर्व एव तदाश्रिताः।
गुणकर्मादयोऽपास्ता भवन्त्येव तथा मताः॥
६३४॥§ 2216

गुणकर्मादयो विशेषपर्यन्ता द्रव्याणां प्रतिषेधादेवापास्ताः, तदाश्रितत्वादेषाम्। आश्रयाभावे चाश्रितानां परतन्त्रतयाऽवस्थानुपपत्तेः। तथा मता इति। तथा साक्षात्पारम्पर्येण वा द्रव्याश्रितत्वेनेष्टाः। तथाहि—गुणकर्मणी साक्षादेव द्रव्याश्रितत्वेनाभीष्टे। तथा च सूत्रम्। द्रव्याश्रय्यगुणवान्संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्। एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षं कारणमिति कर्मलक्षणम्। एकद्रव्यमिति। एकद्रव्याश्रितमित्यर्थः। गु-

णास्तु केचिदनेकद्रव्यवर्त्तिनो भवन्ति, यथा—संयोगविभागादयः। सामान्यविशेषाश्च केचिद्द्रव्यवृत्तय एव, यथा —पृथिवीत्वादयः। गुणत्वकर्मत्वादयश्च द्रव्यसंबद्धगुणकर्मपदार्थवृत्तयः, महासामान्यं तु सत्ताख्यं द्रव्यादिपदार्थत्रयवृत्ति। तस्माद्द्रव्ये प्रतिषिद्धे सत्ययत्नेनैव गुणादयोऽपि निषिद्धा भवन्तीति। परिशिष्टपदार्थपरीक्षाफलं द्रव्यपरीक्षायामेव समाप्तमिति दर्शितं भवति॥ ६३४॥ § 2217

समवायप्रतिषेधस्तर्हि पृथगारब्धव्य इति चेदाह—क्व कस्येत्यादि। § 2218

211/k

क्व कस्य समवायश्च संबन्धिन्यपहस्तिते।
विशेषप्रतिषेधोऽयं तथापि पुनरुच्यते॥ ६३५॥§ 2220

पञ्चपदार्थवृत्तिरूपो हि समवायो वर्ण्यते। द्रव्यादौ च संबन्धिनि पञ्चप्रकारेऽपहस्तिते क्व कस्य समवायो नैव कस्यचित्क्वचिदित्यर्थः। सर्वेषामाश्रयाश्रितानां प्रतिषिद्धत्वात् तत्र गुणानां तावद्विशेषप्रतिषेध उच्यते॥ ६३५॥ § 2221

तत्र रूपरसगन्धस्पर्शाः सङ्ख्यापरिमाणानि पृथक्त्वसंयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नश्च गुणा इति सूत्रम्। चशब्दाद्गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाश्च परिगृह्यन्ते। तत्र रूपं चक्षुर्ग्राह्यं पृथिव्युदकज्वलनवृत्ति। रसो रसनेन्द्रियग्राह्यः पृथव्युदकवृत्तिः। गन्धो घ्राणग्राह्यः पृथिवीवृत्तिः। स्पर्शस्त्वगिन्द्रियग्राह्यः क्षित्युदकज्वलनवायुवृत्तिः। एषां चतुर्णामाद्यानां रूपादीनां प्रतिषेधमाह—द्रव्ये महतीत्यादि। § 2222

द्रव्ये महति नीलादिरेक एव यदीष्यते।
रन्ध्रालोकेन तद्व्यक्तौ व्यक्तिर्दृष्टिश्च नास्य किम्॥
६३६॥§ 2224

महत्येव हि द्रव्ये समवेतानामुपलब्धिलक्षणप्राप्तत्वमतो महतीत्याह। तत्र च द्रव्ये यद्येकमेवानवयवं नीलादि चतुर्विधमिष्यते, तदा सूक्ष्मेणाऽपि कुञ्चिकादिविवरवर्त्तिना प्रदीपाद्यालोकेन त्वपवरकादिस्थितपृथुतरघटादिद्रव्यसमवेतस्य नीलादिरूपस्याभिव्यक्तौ सत्यां सकलस्यैव यावद्द्रव्यवर्त्तिनो रूपादेरभिव्यक्तिरुपलब्धिश्च प्राप्नोति निरवयवत्वात्। नह्येकस्यावयवाः सन्ति, येनैकदेशाभिव्यक्तिर्भवेत्। रन्ध्रालोकेनेत्युपलक्षणम्। भुव एकदेशे जलेन गन्धस्याभिव्यक्तौ प्रदेशान्तरेप्यभिव्यक्त्युपलब्ध्योः प्रसङ्गः। ज्वालादेराम्रफ-

लादेश्चैकदेशस्य स्पृष्टावास्वादने च तद्द्रव्यसमवायिनस्तावतः स्पर्शस्य रसस्य चोपलब्धिः स्यात्॥ ६३६॥ § 2225

स्यादेतद्भवत एव सकलस्य नीलादेरुपलब्ध्यभिव्यक्ती इत्याह—न चेत्यादि। § 2226

न च देशविभागेन स्थितो नीलादिरिष्यते।
व्यज्यते यस्तदा तेन तस्य भेदोऽणुशस्ततः॥
६३७॥ § 2228

तदेति। तस्मिन्काले। तेनेति। रन्ध्रालोकेन। तस्येति। नीलादेः। अणुशः स्वभेदेऽङ्गीक्रियमाणे पृथिव्यादिपरमाणुद्रव्यवदणुपरिमाणयोगित्वेन गुणवत्त्वाद्द्रव्यरूपतैव स्यात्, न गुणत्वम्। एवम्भूतानां चाणुशो भिन्नानां गुण इति 212/k संज्ञाकरणेन नाम्नि विवादः। न चाणुत्वेऽप्याश्रितत्वाद्गुणत्वं युक्तम्। सदसतोराश्रयानुपपत्तेरतिप्रसङ्गाच्च। तथा ह्यवयविद्रव्यमवयवद्रव्याश्रितमिति तदपि गुणः स्यादिति भावः ॥ ६३७॥ § 2229

तत्रैकादिव्यवहारहेतुरेकत्वादिलक्षणा सङ्ख्या, सा पुनरेकद्रव्या चानेकद्रव्या च, तत्रैकसङ्ख्यैकद्रव्या। अनेकद्रव्या तु द्वित्वादिसङ्ख्या। तत्रैकद्रव्यायाः सलिलादिपरमाण्वादिगतरूपादीनामिव नित्यत्वनिष्पत्तयो बोद्धव्याः। अनेकद्रव्यायास्तु—एकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिरपेक्षाबुद्धिविनाशाद्विनाशः क्वचिदाश्रयविनाशादिति। इयं च द्विविधाऽपि सङ्ख्या किल प्रत्यक्षत एव सिद्धा। विशेषबुद्धेश्च निमित्तान्तरापेक्षत्वादनुमानतोपीति परो मन्यते। तत्रास्याः प्रतिषेधमाह—अतद्रूपेत्यादि। § 2230

अतद्रूपपरावृत्तगजादिव्यतिरेकिणी।
न सङ्ख्या भासते ज्ञाने दृश्येष्टा नैव सास्ति तत्॥
६३८॥ § 2232

येषु हि समुच्चयादिव्यावृत्तेषु गजादिषु संज्ञा निवेशिता न तद्व्यतिरेकेणोपलब्धिर्लक्षणप्राप्ता सङ्ख्या ख्यातास्तीति सा शशविषाणवदसद्व्यवहारविषया। तथाह्यसौ दृश्यत्वेनेष्टा। तथा च सूत्रम्— सङ्ख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिसमवायाच्चाक्षुषाणी ति॥ ६३८॥ § 2233

नचापि विशेषबुद्धितः सङ्ख्यासिद्धिरिति दर्शयन्नाह—इत्छारचितेत्यादि। § 2234

इच्छारचितसङ्केतमनस्कारान्वयं त्विदम्।

घटेष्वेकादिविज्ञानं ज्ञानादाविव वर्तते॥ ६३९ ॥§ 2236

अद्रव्यत्वान्न सङ्ख्याऽस्ति तेषु काचिद्विभेदिनी।
तज्ज्ञानं नैव युक्तं तु भाक्तमस्खलितत्वतः॥
६४० ॥§ 2238

यथा ह्येकं ज्ञानं द्वे ज्ञाने इत्यादौ सङ्ख्यामंन्तरेणाप्येकादिबुद्धिर्भवत्येवं घटादिष्वप्यसहायादिषु पदार्थेष्वेक इत्यादिः स्वेच्छया यः सङ्केतो विहितस्तत्र यो मनस्कार आभोगस्तदन्वयमेकादिज्ञानं भविष्यतीत्यनैकान्तिकमेतत्। नहि तेषु ज्ञानादिषु सङ्ख्याऽस्ति, एषामद्रव्यत्वात्। सङ्ख्यायाश्च गुणत्वेन द्रव्याश्रितत्वात्। अथ मतं गौणमिदं तेषु, ज्ञानमेकमिवैकं, साधर्म्यं चात्रासहायत्वादि (तत्राह ?)—तज्ज्ञानमिति। नैव ह्येतज्ज्ञानं भाक्तं युक्तमस्खलद्गतित्वादस्य प्रत्ययस्य। नहि यथा वाहीको गौरिति स्खलति प्रत्ययः, 213/k
गौरिव गौर्नतु गौरेव सास्नाद्यभावादिति, न तथायं स्खलति, एकमिवैकं ज्ञानादि नत्वेकमेवेति। किं तर्हि यादृशी घटादिष्वस्खलिता बुद्धिर्भवतितादृशी ज्ञानादिष्वपि॥ ६३९॥ ६४०॥ § 2239

स्यादेतन्न सादृश्यापेक्षमेतज्ज्ञानमुपवर्ण्यते। किन्तु यत्तेषामाश्रयभूतं द्रव्यं तद्गतैकत्वादिकादेकार्थसमवायित्वादेतद्गुणकर्मसमवायादिष्वेकादिज्ञानं भवतीति तदेतदाशङ्कयन्नाह—तद्द्रव्येत्यादि। § 2240

तद्द्रव्यसमवेताच्चेदेकत्वात्परिकल्प्यते।
गुणादिष्वेकविज्ञानमेकार्थसमवायतः॥ ६४१ ॥§ 2242

अत्रोत्तरमाह—अस्तुनामेत्यादि। § 2243

अस्तुनामैवमेकत्र ज्ञाने व्याप्ति(द्व्यादि ?)मतिस्तु
कम्।
एतेष्वपेक्षते हेतुं षद्पदार्थादिकेषु वा॥ ६४२ ॥§ 2245

एकार्थसमवायादेर्गौणोऽयं प्रत्ययो भवन्।
तथा च स्खलितो यस्मान्माणवेऽनलबुद्धिवत्॥
६४३ ॥§ 2247

यदि हि तद्द्रव्यसमवेतादेकत्वादेरेतज्ज्ञानं तदाऽस्तु नामैकत्र ज्ञाने सुखादौ चैकात्मद्रव्यसमवायिन्येकमेकमिति ज्ञानम्। द्वे त्रीणि चत्वारि ज्ञानानीत्यादिज्ञानस्य तु को हेतुः, नहि तत्रैकात्मगतं द्वित्वाद्यस्ति। यच्चैतदुच्यते षट्पदार्थाः, सुखदुःखे, इच्छाद्वेषौ, पञ्चविधं कर्म, सामान्यं द्विविधं परमपरं च, एको भावः, एकः समवाय इति, तत्र को हेतुः। नहि तत्रैकार्थसमवायिनी सङ्ख्यास्ति, तस्मादव्यापिनीत्वादियमपि कल्पना न युक्ता। किं चैकार्थसमवायोऽन्यो वा स्वमतिपरिकल्पितोहेतुरुच्यते। तथाऽप्येकार्थसमवायादेरयं भवन्प्रत्ययो गौणः स्याद्वस्त्वन्तराभावात्। ततस्तु स्खलितः स्याद्यथा माणवकेऽनलप्रत्ययस्तत्प्रवृत्तिनिमित्ताभावात्, नचैवं भवति तस्मात्पूर्वोक्तदोषानिवृत्तिरेव॥ ६४२॥ ६४३॥ § 2248

गजादीत्यादिनाऽविद्धकर्णोक्तं सङ्ख्यासिद्धये प्रमाणमाशङ्कते। § 2249

गजादिप्रत्ययेभ्यश्च वैलक्षण्यात्प्रसाध्यते।
सङ्ख्याबुद्धिस्तदन्योत्था नीलवस्त्रादिबुद्धिवत्॥
६४४ ॥§ 2251

स ह्याह—सङ्ख्याप्रत्ययो गजतुरङ्गस्यन्दनादिव्यतिरिक्तनिबन्धनो गजादिप्रत्ययविलक्षणत्वान्नीलपटप्रत्ययवदिति। तदन्योत्थेति। तस्माद्गजतुरगस्यन्दनादेरन्यस्तदन्यस्तत उत्थानं यस्या इति विग्रहः॥ ६४४॥ § 2252

214/k

इच्छेत्यादिना प्रतिविधत्ते। § 2253

इच्छारचितसङ्केतमनस्काराद्युपायतः।
तत्रेष्टसिद्धिर्बुद्ध्यादौ सङ्ख्येतेनैव वा भवेत्॥
६४५ ॥§ 2255

गजादिव्यतिरिक्तस्य सङ्केतमनस्कारादेरान्तरस्य निमित्तत्वेनेष्टत्वात्सिद्धसाध्यतैव। आदिशब्देन सङ्केतस्मरणादिपरिग्रहः। अथ सङ्केताभोगादिव्यतिरिक्तपदार्थनिबन्धनं साधयितुमभिप्रेतं तदानैकान्तिकतेति प्रसङ्गोद्भावनव्याजेन दर्शयति—बुद्ध्यादौ सङ्ख्येतेनैव वा भवेदिति। एतेनैव—तत्प्रत्ययविलक्षणत्वादित्यनेन। एका बुद्धिर्द्वे बुद्धी पञ्च कर्माणीत्यादावपि सङ्ख्या भवेत्—प्राप्नोति। तत्राप्येकादिबुद्धेस्तत्प्रत्ययविलक्षणत्वात् न च भवति, तस्मादनैकान्तिक इति भावः॥ ६४५॥ § 2256

किंच याऽनेकद्रव्या द्वित्वादिसङ्ख्या तस्या येऽयमेकत्वेभ्योऽनेकबुद्धिसहितेभ्योनिष्पत्तिर्वर्ण्यते भवद्भिः सा निर्निबन्धनेति दर्शयति—बुद्ध्यपेक्षा चेत्यादि। § 2257

बुद्ध्यपेक्षा च सङ्ख्याया निष्पत्तिर्यदि वर्ण्यते।
सङ्केताभोगमात्रेण तद्बुद्धिः किं न संमता॥
६४६ ॥§ 2259

मात्रग्रहणमेकत्वद्वित्वादितत्सामान्यतत्सम्बन्धज्ञानव्यवच्छेदार्थम्। तद्बुद्धिरिति।सङ्ख्येयेषु द्वे त्रीणि चत्वारीत्यादिका बुद्धिः सङ्केताभोगमात्रेण किं न संमता। एवं ह्यदृष्टसामर्थ्यस्य हेतुत्वं न कल्पितं स्यादन्यथा हि हेतूनामनवस्था भवेत्। तथाह्यपेक्षा बुद्धिसद्भावे तद्गतान्वयव्यतिरेकानुविधानात्सैव कल्पयितुं युक्ता। अन्यथा हि हरीतकीं प्राप्य देवता विरेचयन्तीत्यपि कल्पनीयं भवेत्। नापि समुच्चयादिव्यावृत्तपदार्थव्यतिरेकेणोपलब्धिलक्षणप्राप्ताऽभिमता द्वित्वादयो दृश्यन्ते संगच्छन्ते वा, एकस्यानेकस्मिन्वृत्तेः प्रतिषिद्धत्वात्। सामान्यसमवाययोश्च निषेत्स्यमानत्वादिति भावः॥ ६४६॥ § 2260

महदित्यादिना परिमाणप्रतिषेधमाह— § 2261

महद्दीर्घादिभेदेन परिमाणं यदुच्यते।
तदप्यर्थे तथा रूपभेदादेव न किं मतम्॥
६४७ ॥§ 2263

परिमाणव्यवहारकारणं परिमाणं तच्चतुर्विधं महदणु दीर्घं ह्र(?)स्वमिति। तत्र महद्द्विविधं नित्यमनित्यं च। नित्यमाकाशकालदिगात्मसु परममहत्त्वं। अनित्यं त्र्यणुकादिद्रव्येषु। तथाऽण्वपि द्विविधं नित्यमनित्यं च। नित्यं परमाणु मनः सुपरिम ण्डललक्षणम्। अनित्यं द्व्यणुक एव। कुव- 215/k
लामलबिल्वादिषु च महत्स्वपि तत्प्रकर्षाभावमपेक्ष्य भाक्तोयं व्यवहारः। यादृशं ह्यामलके महत्परिमाणं न तादृशं कुवल इति। एवमन्यत्रापि योज्यम्। अत्र त्र्यणुकादिषु वर्त्तमानयोर्महत्त्वदीर्घत्वयोर्द्व्यणुकेचाणुत्वह्र(?)स्वत्वयोः को विशेषः ?। उच्यते। तत्रास्ति महत्त्वदीर्घत्वयोः परस्परतो विशेषः। महत्सु दीर्घमानीयतां दीर्घेषु च महदानीयतामिति व्यवहारभेददर्शनात्। अणुत्वह्र(?)स्वत्वयोस्तु विशेषस्तद्दर्शिनां योगिनां प्रत्यक्ष इत्येषा परेषां प्रक्रिया। एतच्च महदादि रूपादिभ्योऽर्थान्तरत्वेन सिद्धं तत्प्रत्ययविलक्षणबुद्धिग्राह्यत्वात्सुखादिवदिति परो मन्यते। तत्र यदि तावद्रूपादिविषयेन्द्रियबुद्धिविलक्षणप्रत्यक्षप्रत्ययग्राह्यत्वादिति हेत्वर्थोऽभिप्रेतस्तदा हेतोरसिद्धता। नहि तथातथाऽवस्थितरूपादिपदार्थव्यतिरेकेणमहदादिपरिमाणमिन्द्रियबुद्धौ प्रतिभासमानमुपलक्ष्यते। अथ—अणु महदादीत्येवं या विकल्पिका बुद्धिः सा तत्प्रत्ययविलक्षणा बुद्धिरभिप्रेता। एवमप्यनैकान्तिकता हेतोर्विपक्षे बाधकप्रमाणाभावात्। नह्यस्याः परमार्थतः किंचिदपि ग्राह्यमस्ति साभिजल्पत्वात्। केवलं तेष्वेव रूपादिष्वेकदिङ्मुखादिप्रवृत्तेषु दृष्टेषु तद्विलक्षणेभ्यो रूपादिभ्यो

भेदप्रतिपादनाय कृतसमयानुरोधान्महदित्यध्यवस्यन्ती जायत इति नातो वस्त्वन्तरसिद्धिः। अतएव चाऽस्या न रूपादिव्यतिरिक्तमवसेयमस्तीत्यसिद्धताऽपिहेतोः। प्रतिज्ञायाश्च प्रत्यक्षबाधा, प्रत्यक्षत्वेनेष्टस्य महदादे रूपत्वादिव्यतिरेकेणानुपलम्भात्। तस्मात्तदपि परिमाणमर्थे रूपादावेकदिङ्मुखादिप्रवृत्ते तस्यार्थस्यातथोद्भूताद्भेदमाश्रित्य किं न तादात्म्येनेष्टम्। एवं ह्यदृष्टायुक्तपदार्थकल्पना न कृता स्यादित्येवकारेण दर्शयति। तथाह्येकदिङ्मुखप्रवृत्ते भूयसि रूपादिके दृष्टे स्पृष्टे वा दीर्घमितिव्यवहरन्ति। तदपेक्षया चाल्पीयसि समुत्पन्ने ह्रस्वमिति। एवं महदादिष्वपि योज्यम्। रूपादिनिषेधवच्चैकानेकविकल्पाभ्यां महदादिनिषेधो वाच्यः॥ ६४७॥ § 2264

अपि च साध्याभावेऽपि हेतोर्वृत्तिदर्शनादनैकान्तिकता स्फुटतरेति दर्शयन्नाह—दीर्घेत्यादि। § 2265

दीर्घा प्रासादमालेति महती वेद्यते यथा।
नहि तत्र यथारूपं परिमाणं प्रकल्पितम्॥
६४८ ॥§ 2267

एकार्थसमवायेन तथा चेद्व्यपदिश्यते।
न महत्त्वं न दैर्घ्यं च धामस्वस्ति विवक्षितम्॥
६४९ ॥§ 2269

216/k

तथाह्यसत्यपि भवत्परिकल्पिते महत्त्वादौ प्रासादमालादिषु महदादिप्रत्ययप्रसूतिरनुभूयते। नचेत्थं शक्यं वक्तुम्। यत्रैव प्रासादादिषु मालाख्यो गुणः समवेतस्तत्र महत्त्वादिकमपि, तेनैकार्थसमवायबलात्तथा महतीत्येवं तन्मालादि व्यपदिश्यत इति। तदेतदपि स्वसमयविरुद्धमिति दर्शयन्नाह—न महत्त्वमित्यादि। धामस्विति। प्रासादेषु। विवक्षितमिति। क्रोशार्धक्रोशादि परिमाणम्॥ ६४८॥ ६४९॥ § 2270

कस्मान्नास्तीत्याह—प्रासादश्लेष्यत इति। § 2271

प्रासादश्लेष्यते योगो गुणः सोऽपरिमाणवान्।
न तस्यास्त्यपरा माला नोपचारस्य चाश्रयः॥
६५० ॥§ 2273

तथाहि—भवद्भिः प्रासादः संयोगात्मको गुण इष्यते नावयविद्रव्यं विजातीयद्रव्यानारम्भात्। स च गुणः परीमाणवान्न भवति निर्गुणा गुणा इति समयात्। ततश्च गुणानां प्रासादादीनां मालाख्यस्यापरस्य गुणस्याभावात्प्रासादमालेत्येतदेव न स्यात्। कुतो महती ह्र(?)स्वेत्यादि भविष्यति। तथाहि—माला सङ्ख्यास्वभावेष्टा, सङ्ख्या च गुणत्वाद्द्रव्यमेवाश्रिता न गुणम्। यदाऽप्यवयविस्वभावा मालेष्यते तथापि द्रव्यस्य द्रव्यमेवाश्रयो न गुण इति न मालायाः प्रासादाश्रयत्वं युक्तम्। अथ जातिस्वभावा मालाऽङ्गीक्रियते। एवमपि जातेस्सर्वात्मना प्रत्याश्रयपरिसमाप्तत्वादेकोऽपि प्रासादो मालेत्युच्येत वृक्षवत्। यथोक्तम्— गेहो यद्यपि संयोगस्तन्माला किन्नु तद्भवेत्। जातिश्चेदिह एकोऽपि मालेत्युच्येत वृक्षवत्॥ इति। एका दीर्घा महतीत्यादिव्यपदेशानुपपत्तिश्च तदवस्थैव मालायाम्, तदाश्रये च प्रासादादावेकत्वादिगुणाभावात्। काष्ठादिषु च विवक्षितदैर्घ्याद्यसद्भावात्। बह्वीषु च प्रासादमालासु मालामालेत्यनुगामी व्यपदेशो न स्यात्। जातेरजातितः। यदाह— माला बहुत्वे तच्छब्दः कथं जातेरजातितः इति। अत उपचारस्याश्रयः परिग्रहो यद्वाऽऽश्रयोऽधिष्ठानं न युक्तमित्यर्थः। नचाप्ययं स्खलद्गतिर्मालादिषु महत्त्वादिप्रत्ययः।तस्मान्नोपचारिको युक्तः। नहि मुख्यप्रत्ययाविशिष्टो गौणो युक्तोऽतिप्रसङ्गात्। यदाह— मालादौ च महत्त्वादिरिष्टो यश्चौपचारिकः। मुख्याविशिष्टविज्ञानग्राह्यत्वान्नौपचारिकः॥ इति॥ ६५०॥ § 2274

तत्र इदमस्मात्पृथगिति यद्वशात् संयुक्तमपि द्रव्यमपोद्ध्रि(?)यते, तदपोद्धारकारणं पृथक्त्वं नाम, तच्च घटादिभ्योऽर्थान्तरं तत्प्रत्ययविलक्षणबुद्धिग्राह्यत्वादिति पूर्ववत्प रस्याभिप्रायः। तदत्रापि परिमाणवदसिद्धत्वम- 217/k
नैकान्तिकत्वं च हेतोरिति हृदि कृत्वाह —अपोद्धारेत्यादि। § 2275

अपोद्धारव्यवहृतिः पृथक्त्वाद्या तु कल्प्यते।
कारणात्सा विभिन्नात्मभावनिष्ठा न किं मता॥
६५१॥ § 2277

तथाह्यत्रापि रूपादिभ्यो विवेकेन नापरमर्थान्तरं पृथक्त्वं नाम प्रत्यक्षबुद्धौ प्रतिभासत इति न सिद्धमस्य तत्प्रत्ययविलक्षणबुद्धिग्राह्यत्वम्। अत एव च तस्योपलब्धिलक्षणप्राप्तत्वेनाभिमतस्यानुपलम्भादसत्त्वमेव। न चापि पृथगिति विकल्पप्रत्ययवशात्तस्य सिद्धिः। त एव हि रूपादयो भावाः स्वस्वभावस्थितेः सर्वभावानां सजातीयविजातीयव्यावृत्तात्मतयाऽपेक्ष्यमाणाः पृथगिति व्यवहारनिबन्धनं भविष्यन्तीति नातो वस्त्वन्तरसिद्धिः। तस्माद्येयमपोद्धारव्यवहृतिः—व्यवहारः पृथक्त्वात्कारणाद्वर्ण्यते सा किमिति समानासमानजातीयविभिन्नस्वभावभावनिष्ठा न मता।तन्निष्ठैव युक्तेति भावः। एतेनानैकान्तिकत्वं

हेतोर्दर्शितम्। विभिन्न आत्मा स्वभावो येषां ते तथोक्ताः। ते च ते भावाश्च, तेषु निष्ठा—परिसमाप्तिर्यस्या इति विग्रहः ॥ ६५१॥ § 2278

साध्यविपक्षेऽपि हेतोर्वृत्तिर्दृश्येतेति दर्शयन्नाह—परस्परविभिन्ना हीत्यादि। § 2279

परस्परविभिन्ना हि यथा बुद्धिसुखादयः।
पृथग्वाच्यास्तदङ्गं च विनाऽन्येन तथाऽपरे॥
६५२॥§ 2281

नहि सुखादिषु गुणेषु पृथक्त्वं गुणोऽस्ति, निर्गुणत्वाद्गुणानाम्। अथ च परस्परव्यावृत्तात्मतया ते पृथगिति वाच्या भवन्ति। तस्याश्चापोद्धारव्यवहृतेरङ्गं निमित्ततां प्रतिपद्यन्ते। तथाऽपरेऽपि घटादयो द्रव्याभिमता विनाऽन्येन—स्वव्यतिरिक्तेन पृथक्त्वनाम्ना गुणेन भविष्यन्तीति। नचापि तेषु भाक्तोऽयं प्रत्ययो मुख्यप्रत्ययाविशिष्टत्वादिति भावः। यद्वा—अपोद्धारव्यवहृतिं विभिन्नात्मपदार्थनिबन्धनां दर्शयन्प्रतिज्ञाया अनुमानबाधामाह—परस्परेत्यादि। प्रयोगः—ये परस्परव्यावृत्तात्मानस्ते न स्वव्यतिरिक्तपृथक्त्वसमाश्रयाः, यथा सुखादयः। परस्परव्यावृत्तात्मानश्च घटादय इति स्वभावहेतुः। एकस्यानेकवृत्त्यसम्भवः, समवायस्य निषेत्स्यमानत्वात्सम्बन्धानुपपत्तिः, सुखादिषु तद्व्यवहाराभावप्रसङ्गश्च बाधकं प्रमाणम्॥ ६५२॥ § 2282
218/k

तत्र संयोगविभागयोर्दूषणार्थमाह—यावित्यादि। § 2283

यौ संयोगविभागौ च द्रव्येषु नियतौ परैः।
संयुक्तादिधियो हेतू कल्पितौ तावनर्थकौ॥
६५३॥§ 2285

यथाक्रमं द्रव्येषु संयुक्तविभक्तप्रत्ययहेतू अप्राप्तप्राप्तानां प्राप्त्यप्राप्तिस्वभावावन्यतरोभयकर्मजौ च संयोगविभागजौ च संयोगविभागाविति परप्रक्रिया। एतच्च प्रक्रियामात्रमेव। नत्वनयोर्वस्तुसत्त्वसिद्धौ किंचन प्रमाणमस्तीत्यतोऽनर्थकावेतौ कल्पितौ परैः। प्रयोगः—यस्य न किंचित्साधकं प्रमाणमस्ति न तत्प्रेक्षावतां सद्व्यवहारविषयो यथा वन्ध्यासुतादि, नास्ति च संयोगविभागयोः साधकं प्रमाणं परेषामितिव्यापकानुपलब्धेः॥ ६५३॥ § 2286

बीजोदकेत्यादिनोद्योतकरमतोपदर्शनाद्धेतोरसिद्धतामाशङ्कते— § 2287

बीजोदकपृथिव्यादि सर्वदा कार्यकारकम्।
प्रसक्तं निर्विशेषत्वात्संयोगासंभवेन तु॥
६५४॥§ 2289

क्षेत्रबीजजलादीनि सापेक्षाणीति गम्यते।
स्वकार्यकरणान्नित्यं दण्डचक्रोदकादिवत्॥
६५५॥§ 2291

यस्तैरपेक्ष्यते भावः स संयोगो भविष्यति।
सविशेषणभावाच्च भिन्न एवेति गम्यते॥ ६५६॥§ 2293

संयुक्ते आहरेत्युक्ते संयोगं प्रेक्षते ययोः।
तदन्यपरिहारेण ते एवाहरति ह्ययम्॥ ६५७॥§ 2295

स ह्याह। यदि संयोगो नार्थान्तरं भवेत्तदा क्षेत्रबीजादयो निर्विशिष्टत्वात्सर्वदैवाङ्कुरादि कुर्युः, न चैवम्। तस्मात्सर्वदा कार्यानारम्भात्क्षेत्रादीन्यङ्कुरादिकार्योत्पत्तौ कार्यान्तरसापेक्षाणि, यथा मृत्पिण्डदण्डसलिलसूत्रादयो घटादिकरणे कुम्भकारादिसापेक्षाः। योऽसावपेक्ष्यः स संयोग इति सिद्धम्। किंच योऽसौ संयोगो द्रव्ययोः स विशेषणभावेन प्रतीयमानत्वात्ततोऽर्थान्तरत्वेन प्रत्यक्षत एव सिद्धः। तथाहि—कश्चित्केनचित्संयुक्ते द्रव्ये आहरेत्युक्ते ययोरेव द्रव्ययोः संयोगमुपलभते। त एवाहरति न द्रव्यमात्रम्, अन्यथा यत्किंचिदाहरेत्। एतच्च सर्वं विपर्ययाद्विभागसाधनेऽपि योज्यम्॥ ६५४॥ ६५५॥ ६५६॥ ६५७॥ § 2296

निरन्तरमिदं वस्तु सान्तरं चेदमित्ययम्।
बुद्धिभेदश्च केनैष विद्यते तौ न चेदिह॥
६५८॥§ 2298

219/k

अपि चाविशिष्टेऽपि निरन्तरमिदं वस्तु सान्तरमिदमिति बुद्धिभेदः कथं युज्यते, यद्येतौ संयोगविभागाविह वस्तुन्यर्थान्तरभूतौ न स्यातां, नहि

२ तौ न चेदिह] Correction : ; तौ च चेदिह (sic !)तौ न चेदिह

विशेषप्रत्ययो वस्तुविशेषमन्तरेण संभवी भवितुमर्हति, सर्वदा सर्वत्र भावप्रसङ्गात्॥ ६५८॥ § 2299

या चेयं सान्तरे बुद्धिर्नैरन्तर्यावसायिनी।
निरन्तरेऽपि या चान्या मिथ्याबुद्धिरियं द्विधा॥
६५९ ॥§ 2301

मिथ्याबुद्धिश्च सर्वैव प्रधानार्थानुकारिणी।
प्रधानं चेह वक्तव्यं तदुक्तौ तौ च सिद्ध्यतः॥
६६० ॥§ 2303

किंच येयं दूरतरावस्थितेऽपि धवखदिरादौ विदूरदेशवर्त्तिनः पुंसो निरन्तरावसायिनी बुद्धिरुदयमासादयति, या चेयमीषत्तरुशिखरावलग्ने बलाकादौ निरन्तरेऽपिसान्तरत्वमिवावस्यन्ती जायतेऽन्या, सेयं द्विविधाऽप्यतस्मिंस्तथारूपेण प्रवृत्तत्वान्मिथ्याबुद्धिः, न च मिथ्याधीर्मुख्यपदार्थानुभवमन्तरेण क्वचिदुपजायते। नह्यननुभूतगोदर्शनस्य गवयपदार्थदर्शनाद्गौरयमिति विभ्रमो भवति। तस्मादवश्यं कश्चिन्मुख्यः पदार्थोऽस्या विभ्रमधियो निबन्धनमभिधानीयः। तस्याभिधाने च तौ संयोगविभागौ सिध्यतः। नहि तद्व्यतिरेकेणान्यदस्या बुद्धेर्निबन्धनमुपपादयितुं शक्यते ॥ ६५९॥ ६६०॥ § 2304

कुण्डलीति मतिश्चेयं किन्निमित्तोपजायते।
नरकुण्डलभावान्नो सर्वदा तत्प्रसङ्गतः॥
६६१ ॥§ 2306

अन्यत्र दृष्टभावस्य निषेधोऽन्यत्र युज्यते।
संयोगश्च भवेद्दृष्टः स कथं प्रतिषिध्यते॥
६६२ ॥§ 2308

चैत्रोऽकुण्डल इत्येवं तस्मादस्त्येव वास्तवः।
यन्निषेधविधानादि विभागेन प्रवर्त्तते॥ ६६३ ॥§ 2310

अपिच कुण्डली देवदत्त इति मतिरियमुपजायमाना किंनिबन्धनोपजायत इति वचनीयम्। नच पुरुषकुण्डलभावमात्रभाविनी भवितुमर्हति। सर्वदा तत्र देवदत्तकुण्डलयोस्तस्याः सद्भावप्रसङ्गात्। किंच यदेव केनचित्क्वचिदुपलब्धसत्त्वं तस्यैवान्यत्र विधिप्रतिषेधमुखेन लोकव्यवहारप्रवृत्तिर्दृष्टा। यदि भवता संयोगो न कदाचिदुपलब्धस्तत्कथमस्य चैत्रोऽकुण्डलः कुण्डली चेत्येवंविभागेन व्यवहारो भवेत्। तथाह्यत्र चैत्रोऽकुण्डलीत्यनेन न कुण्डलं प्रतिषिध्यते तस्य देशकालभेदेन सत्त्वाध्या सितमूर्त्तः प्रतिषेद्धुमशक्यत्वात्, 220/k
नापि चैत्रस्य, तत्तुल्ययोगक्षेमत्वात्, तस्माच्चैत्रस्य कुण्डलसंयोगः प्रतिषिध्यते। तथा चैत्रः कुण्डलीत्यनेनापि विधिवाक्येन चैत्रकुण्डलयोर्नान्यतरस्य विधानं तयोः सिद्धत्वात्। पारिशेष्यात्संयोगस्यैवाप्रतीतस्य विधेर्ज्ञायते। तस्मादस्त्येव संयोगादिर्वास्तवो यद्वशाच्चैत्रः कुण्डली न भवतीत्यादिनिषेधविधानादि प्रविभक्तमेव प्रतीयते। आदिशब्देन विशेषणत्वेनोपादानमित्यादि पूर्वोक्तपरिग्रहः॥ ६६१॥ ६६२॥ ६६३॥ § 2311

उच्यत इत्यादिना प्रतिविधत्ते। § 2312

उच्यते क्षणिकत्वेन नाविशेषा जलादयः।
सत्त्वेऽप्यव्यवधानादि तेऽपेक्षन्ते दशान्तरम्॥
६६४ ॥§ 2314

यदुक्तमविशेषाद्बीजादयः सदैव कार्यं कुर्युरिति, तस्याविशिष्टत्वं बीजादीनामसिद्धम्, क्षणभङ्गितया सर्वभावानां विशिष्टावस्थानामेव जनकत्वात्। यच्चोक्तं क्षेत्रबीजादीत्यादि, तत्रापि सामान्येन सापेक्षत्वमात्रे साध्ये सिद्धसाध्यतेति दर्शयति—सत्त्वेऽपीत्यादि। इष्यन्त एवास्माभिरव्यवधानाद्यवस्थान्तरसापेक्षा बीजादयोऽङ्कुरादिकार्यनिर्वर्तनसमर्था विद्यमानत्वेऽपीति सिद्धसाध्यता। तत्राविद्यमाना व्यवधानादयो यत्र देशान्तरेऽवस्थाविशेषे तत्तथोक्तम्। आदिशब्देन विरोधिप्रत्ययप्रतिघातादिपरिग्रहः। यत्रावस्थान्तरे व्यवधानं दूरदेशावस्थानं विरोधिना प्रतिहतिरित्यादिकार्योत्पत्तिप्रतिबन्धकं नास्तीत्यर्थः। अवस्थायाश्च स्वभावाव्यतिरेकान्नार्थान्तरभूतसंयोगसिद्धिः। अथ भवदभिमतसंयोगाख्यपदार्थान्तरसापेक्षत्वं साधयितुमिष्टं तदा तथाविधेन धर्मेण हेतोरन्वयासिद्धेरनैकान्तिकता, दृष्टान्तस्य च साध्यविकलतेति भावः ॥ ६६४॥ § 2315

स्यादेतत्कथमिदमवगम्यतेऽवस्थान्तरविशेषसापेक्षाः क्षित्यादयोऽङ्कुरादिकार्यप्रसवहेतवो न पुनरर्थान्तरभूतसंयोगसापेक्षा येन सामान्येन सापेक्षत्वमात्रे साध्ये सिद्धसाध्यता भवेद्भवत इत्याशङ्क्याह—संयोगमात्रेत्यादि। § 2316

संयोगमात्रसापेक्षा यदि तु स्युर्जलादयः।
योगानन्तरमेव स्यात्कार्यमेतेन वा भवेत्॥
६६५ ॥§ 2318

यदि हि संयोगमात्रसापेक्षाः स्युस्तदा प्रथमोपनिपात एव क्षित्यादिभ्योऽङ्कुरादिकार्योदयप्रसङ्गः पश्चाद्वदविकलकारणत्वात्। अथ प्रथ-
221/k मोपनिपाते न भवति पश्चा दप्यनुत्पत्तिप्रसङ्गः। पूर्ववदजनकावस्थायां विकलकारणताया निर्विशिष्टत्वात्। नचक्षित्यादीनामनुपकारिणि संयोगेऽपेक्षा युक्तिमती, अतिप्रसङ्गात्। नचापि संयोगानां कादाचित्कत्वं युक्तं तत्कारणानां क्षित्यादीनां नित्यं सन्निहितत्वात्। अथ तत्रापि संयोगे जन्ये क्षित्यादीनां कर्मादिसापेक्षत्वमिष्यते। न। तत्रापि तुल्यपर्यनुयोगत्वात्। तथाहि—तदपि कर्म कस्मान्न जनयतीति पर्यनुयोगे किं वक्तव्यं स्यात्। तत्कारणनोदनाभावादिति चेत्, तस्यापि कस्मादभाव इति नित्यकारणाभ्युपगमे सर्वत्र तुल्यः पर्यनुयोगः। यस्य तु सर्वमेवानित्यं वस्तु तस्यानादित्वाद्धेतुपरम्परायाः सर्वभावानां सकृदुत्पत्तिप्रसङ्गो न भवति। पूर्वपूर्वकारणप्रतिबद्धत्वादुत्तरेषाम्। तेषांच सर्वेषां युगपत्कारणवैकल्येनासन्निधानात्। तस्माद्भवत एव दर्शनेऽङ्कुरादिकार्यप्रसवहेतुत्वं क्षित्यादीनां सर्वदा प्रसज्यत इति न संयोगार्थान्तरसापेक्षाः क्षित्यादय इति सिद्धम्॥ ६६५॥ § 2319

यच्चोक्तं सविशेषणभावाच्चेत्यादि, तत्राह—प्राप्तावस्थेत्यादि। § 2320

प्राप्तावस्थाविशेषे हि नैरन्तर्येण जातितः।
ये पश्यत्याहरत्येष वस्तुनी ते तथाविधे॥
६६६ ॥§ 2322

नहि संयुक्तपदार्थान्तरभूतः संयोगः प्रतिपत्तुर्दर्शनपथमवतरति, येन तद्दर्शना(त्त)द्विशिष्टे द्रव्ये आहरति। किं तर्हि प्राग्भाविनी ये सान्तरजातावस्थे ततो विशिष्टे ये निरन्तरोत्पन्ने वस्तुनी ते एव संयुक्तशब्दवाच्ये, अवस्थाविशेषे प्रसाधितत्वात्संयोगशब्दस्य। तेन यत्र तथाविधे वस्तुनी संयोगशब्दविषयभावापन्ने पश्यति, ते एवाहरति नान्ये, न हि शब्देनाबोधितेऽर्थे शब्दात्प्रवर्त्तते प्रेक्षावान्॥ ६६६॥ § 2323

यच्चोक्तं निरन्तरमित्यादि, तत्राह—विच्छिन्नमित्यादि। § 2324

विच्छिन्नमन्यथा चैव जातमेति निमित्तताम्।
सान्तरानन्तरज्ञाने गेहविन्ध्यहिमाद्रिवत्॥
६६७ ॥§ 2326

वस्त्वन्तरमेव तथोत्पद्यमानं बुद्धिभेदनिबन्धनमतोऽनैकान्तिकमेतदिति समुदायार्थः। तत्र विच्छिन्नं यज्जातं वस्तु तत्सान्तरबुद्धेर्निमित्ततामेतीति संबन्धः। अन्यथा चेति। अविच्छिन्नम्, यज्जातमिति संबन्धः। गेहविन्ध्यहिमाद्रिवदिति। अनयोरेव यथायोगमुदाहरणम्। न ह्यविच्छेदेनोत्पन्नयोः स्वयं संयोगात्मनोर्गेहयोरपरः संयोगो निरन्तरबुद्धेर्निबन्धनमस्ति परमतेऽपि नापि विच्छेदेनोत्पन्नयोस्त योरेव विभागः सान्तरप्रत्ययनिमित्तमस्ति, निर्गुण- 222/k
त्वाद्गुणानामित्युक्तमेतत्। नहि हिमविन्ध्ययोरपि विभागः सान्तरबुद्धेर्हेतुरस्ति। प्राप्तिपूर्विका ह्यप्राप्तिर्विभाग इतिसमयात्॥ ६६७॥ § 2327

यच्चोक्तं या चेयं सान्तरे बुद्धिरित्यादि, तत्राह—मिथ्येत्यादि। § 2328

मिथ्याबुद्धिर्न सर्वैव प्रधानार्थानुसारिणी।
साधर्म्यनिरपेक्षापि काचिदन्तरुपप्लवात्॥
६६८॥ § 2330

अन्यत्र गतचित्तस्य द्विचन्द्रादिमतिर्यथा।
अविच्छिन्नादिजातं वा प्रधानमिह विद्यते॥
६६९॥ § 2332

सर्वा मिथ्याबुद्धिः साधर्म्यग्रहणादुपजायत इत्यसिद्धमेतत्। कस्याश्चित्साधर्म्यमनपेक्ष्यापीन्द्रियवैगुण्यमात्रेणोत्पत्तिदर्शनात्। यथाऽन्यत्रगतविकल्पचेतसोऽपिपुरोऽवस्थितैकचन्द्राविपत्य (दिप्रत्यय ?)मात्रेण तिमिरोपपादितेन्द्रियवैगुण्याद्यन्द्रद्वयाकारानुस्यूता विशदतरप्रविभासिनी कल्पनाकलङ्कानङ्कितैव धीरुपजायते। अन्यत्र गतचित्तस्येत्यनेन निर्विकल्पत्वं द्विचन्द्रधियो दर्शयति। नहि निर्विकल्पचेतसि साधर्म्यग्रहणमस्ति। तस्य पूर्वापरदृष्टपदार्थैकत्वाध्यवसायात्मकत्वेन पूर्वानुभूतार्थाऽभिजल्पात्मकत्वात्। अथवा भवतु नाम पूर्वस्या मिथ्याबुद्धेः प्रधानार्थानुसारित्वं तथापि नेष्टसिद्धिर्भवत इति दर्शयति—अविच्छिन्नादिजातं वेत्यादि। आदिग्रहणेन विच्छिन्नजातं वस्तु गृह्यते। तदेव हि वस्तु विच्छिन्नमविच्छिन्नं चोपजायमानमतज्जातीयपरिहारेण प्रवृत्त्यर्थं प्रथमतरं विनिवेशितविभक्ताद्यभिधानतया मुख्यमस्तीति नेष्टसिद्धिर्भवतः॥ ६६८॥ ६६९॥ § 2333

यदुक्तं कुण्डलीति मतिश्चेयमित्यादि, तत्राह—कुण्डलीत्यादि। § 2334

कुण्डलीति मतिश्चेयं जातावस्थाविशेषयोः।

चैत्रकुण्डलयोरेव संयोग इव जायते॥
६७० ॥§ 2336

यथैव हि संयोगश्चैत्रकुण्डलयोर्विशिष्टावस्थाप्राप्तौ सत्यामुपजायते, नहि सर्वदा, तद्वदियमपि कुण्डलीति मतिरवस्थाविशेषनिबन्धना भवन्ति किमिति सर्वदा भवेत्। जातोऽवस्थाविशेषो ययोश्चैत्रकुण्डलयोस्ते तथोक्ते॥ ६७०॥
§ 2337

यच्चोक्तमन्यत्र दृष्टभावस्येत्यादि, तत्राह—सोऽवस्थातिशय इत्यादि।
§ 2338

सोऽवस्थातिशयस्तादृग्दृष्टोऽन्यत्र निषिध्यते।
चैत्रे कुण्डल इत्यादौ न संयोगस्त्वदृष्टितः॥
६७१ ॥§ 2340

223/k

यदवस्थाविशेषनिबन्धनेयं मतिरुपवर्णिता तस्योपलब्धिलक्षणप्राप्तस्यान्यस्यामवस्थायामनुपलम्भे सति प्रतिषेधो विधीयते, न तु भवत्परिकल्पितस्य संयोगस्य, तस्य संयोगिपदार्थविवेकेन क्वचिदपि बुद्धावप्रतिभासनात्। तस्मान्नासिद्धता हेतोः॥ ६७१॥ § 2341

स्यादेतत्—यदि नाम साधकं प्रमाणं संयोगं प्रति न जातमस्माकं, भवतां तु किं बाधकं प्रमाणमित्याह—न पराभिमतादित्यादि। § 2342

न पराभिमताद्योगाज्जायते युक्तवस्तुधीः।
युक्तबुद्धितया यद्वत्प्रासादादिषु युक्तधीः॥
६७२ ॥§ 2344

अनेकवस्तुसद्भावे जायमानतयाऽथवा।
विभक्तानेकतत्त्वादिविषया इव बुद्धयः॥
६७३ ॥§ 2346

विभागेऽपि यथायोगं वाच्यमेतत्प्रमाद्वयम्।
एकस्यानेकवृत्तिश्च न युक्तेति प्रबाधकम्॥
६७४ ॥§ 2348

प्रयोगः—या संयुक्तबुद्धिः सा भवत्परिकल्पितसंयोगानास्पदवस्तुविशेषमात्रभाविनी, यथा संयुक्तौ प्रासादावित्यादौ, संयुक्तबुद्धिश्चेयं चैत्रः कुण्डलीत्यादाविति स्वभावहेतुः। अथवा—याऽनेकवस्तुसन्निपाते सत्युपजायते, सा भवत्परिकल्पितसंयोगरहितानेकवस्तुविषयमात्रभाविनी, यथा प्रविरलावस्थितानेकतन्तुविषयाः प्रत्ययास्तथा चेयं संयुक्तधीरिति स्वभावहेतुः। युक्तधीरिति। संयुक्तबुद्धिरित्यर्थः। एतदेव प्रमाणद्वयं विभागप्रतिषेधे वाच्यम्। विभक्तबुद्धित्वादनेकपदार्थासन्निधानायत्तोदयत्वाद्वा पराभिमतविभागरहितपदार्थविशेषमात्रनिबन्धना मेषादिषु विभागबुद्धिः, यथा दूरतरावस्थितमेषद्वयविषया विन्ध्यहिमवद्विषया वा धीरिति। अथ किमत्र साध्यविपर्यये हेतोर्बाधकं प्रमाणं येन हेतोर्विपक्षे प्रचारशङ्का निवर्त्तेत इत्याह—एकस्येत्यादि। यथैकस्यानेकत्र वृत्तिर्न युक्ता तथा तद्ध्येकवृत्तिभाजैव रूपेणेत्यादिनाऽवयविनिषेधे प्रतानितमिति नेह पुनः प्रतायते॥ ६७२॥ ६७३॥ ६७४॥ § 2349

परत्वापरत्वयोर्दूषणमाह—परापरेत्यादि। § 2350

परापराभिधानादिनिमित्तं यच्च कल्प्यते।
परत्वमपरत्वं च दिक्कालावधिकं न तत्॥
६७५॥ § 2352

यथा नीलादिरूपाणि क्रमभावव्यवस्थितेः।
अन्योपाधिविवेकेऽपि तथोऽच्यन्ते तथाऽपरे॥
६७६॥ § 2354

224/k

इदं परमिदमपरमिति यतोऽभिधानप्रत्ययौ भवतस्तत्परत्वमपरत्वं च यथाक्रमं परापराभिध्याननिमित्तं सिद्धम्। आदिशब्देन प्रत्ययो गृह्यते। प्रयोगः—येयं परमपरमिति संवित्सा घटादिव्यतिरिक्तार्थान्तरनिबन्धना, तत्प्रत्ययविलक्षणत्वात्सुखादिबुद्धिवदिति। तथा ह्येकस्यां दिशि स्थितयोः पिण्डयोः परमपरमिति बुद्धिप्रवृत्तिर्न तावदियं दिङ्निबन्धना। नापि कालनिबन्धना, एकस्मिन्नपि प्रवर्त्तमाने काले वर्त्तमानयोरनियतदिग्देशसंयुक्तयोर्युवस्थविरयोर्विभागेन परापरबुद्धिप्रवृत्तेस्तदविशेषेऽपिविशेषादिति भावः। नचान्यदस्या बुद्धेर्निबन्धमभिधातुं पार्यते। तस्माद्यन्निबन्धनेयं तत्परत्वमपरत्वमिति सिद्धम्। दिक्कालावधिकं न तदिति। दिक्कालप्रदेशसंयुक्तसन्निकृष्टविप्रकृष्टपदार्थावधिकं न भवतीत्यर्थः। दिक्कालशब्दाभ्यां ह्युपचाराद्दिक्कालप्रदेशसंयुक्तयोर्निर्देशः। तथा ह्येतत्परत्वमपरत्वं च द्विविधमपि दिक्कृतं काल-

कृतं चेति वर्णितं परेण। तत्र दिक्कृतस्यैवमुत्पत्तिः। एकस्यां दिश्यवस्थितयोः पिण्डयोरेकस्य द्रष्टुः संनिकृष्टमवधिं कृत्वैतस्माद्विप्रकृष्टोऽयमिति परत्वाधारे बुद्धिरुत्पद्यते, ततस्तामपेक्ष्य परेण दिक्प्रदेशेन संयोगात्परत्वमुपजायते। विप्रकृष्टं चावधिं कृत्वैतस्मात्सन्निकृष्टोऽयमित्यपरत्वाधारे बुद्धिरुत्पद्यते, तामपेक्ष्यापरेण दिक्प्रदेशेन संयोगादपरत्वस्योत्पत्तिः। कालकृतयोस्त्वयमुत्पत्तिक्रमः। तथाहि—वर्त्तमानकालयोरनियतदिग्देशसंयुक्तयोर्युवस्थविरयोर्मध्ये यस्य वलीपलितरूढश्मश्रुतादिनाऽनुमितमादित्योदयास्तमयानां बहुत्वं तत्रैकस्य द्रष्टुर्युवानमवधिं कृत्वा विप्रकृष्टा बुद्धिरुत्पद्यते तामपेक्ष्य परेण कालप्रदेशेन संयोगात्परत्वस्योत्पत्तिः। स्थविरं चावधिं कृत्वा यस्यारूढश्मश्रुतादिनाऽनुमितमादित्योदयास्तमयानामल्पत्वं, तत्र यूनि सन्निकृष्टबुद्धिरुत्पद्यते, तामपेक्ष्यापरेण कालप्रदेशेन संयोगादपरस्योत्पत्तिरिति। तदेतत्परत्वापरत्वसाधनमनैकान्तिकं साध्यविपक्षेऽपि हेतोर्वृत्तेरिति दर्शयति—यथा नीलादिरूपाणीत्यादि। भाव उत्पादस्तत्सहिता व्यवस्थितिः, क्रमेण भावव्यवस्थितिरिति विग्रहः। एतदुक्तं भवति—यथा नीलादिषु क्रमेणोत्पादात्कालोपाधेः क्रमेण व्यवस्था, न गुणोपाधेः, परं नीलमपरं नीलमिति परापरव्यपदेशो भवत्यसत्यपि परत्वापरत्वलक्षणे गुणे, निर्गुणत्वाद्गुणानां, तथा घटादिष्वपि किं नेष्यते। एतेनैतद्दर्शयति। यद्यर्थान्तरनिमित्तत्वमात्रमिह साधयितुमिष्टं तदाऽनैकान्तिकता हेतोः, साध्यविपर्ययेऽपि तस्य वृत्तेः। अथ नित्यभूतदिक्कालपदार्थहेतुको यो गुणविशेषस्तन्निबन्धनत्वमस्या बुद्धेः साधयितुमिष्टं तदा दृष्टान्ताभावः। प्रतिज्ञायाश्चानुमानबाधा। तथाहि शक्यमिदं क-
225/k र्तुं, या परापर बुद्धिः सा परपरिकल्पितगुणरहितार्थमात्रकृतक्रमोत्पादव्यवस्थानिबन्धना, परापरबुद्धित्वात्, यथा रूपादिषु परापरबुद्धिः, परापरबुद्धिश्चेयं घटादिष्विति स्वभावहेतुः।नीलादिष्वेकार्थसमवायादुपचरितेयं परत्वादिबुद्धिरतोऽनैकान्तिकता हेतोः, पारंपर्येण नीलादिष्वपि परत्वादेर्निमित्तभावोपगमात्साध्यविकलता च दृष्टान्तस्येति चेन्न। प्रतिविहितमेतदस्खलद्वृत्तित्वान्नौपचारिकत्वं युक्तमिति। स्वाश्रयेऽपि तयोरुपलब्ध्यभावाच्च न तद्बलेन प्रत्ययो युक्तः। तत्कृतो रूपादिषु तन्निबन्धनो भविष्यति। सुखादिषु वा पूर्वोत्तरकालभाविषु किं कल्प्येत, नहि तत्रैकार्थसमवायोऽस्ति। अपिच दिक्कालयोः पूर्वं प्रतिषिद्धत्वेनाभावात्तद्धेतुकयोरपि परत्वापरत्वयोरभाव इति कुतस्तन्निमित्तत्वाशङ्का। येन हेतोरनैकान्तिकता भवेत्। नचापि दिक्कालयोर्भवतः प्रदेशाः, सन्ति, यत्संयोगादपेक्षाबुद्धिसहितात्परत्वादेरुत्पत्तिः स्यात्, तयोरेकात्मतया निरवयवत्वात्। न चोपचरितोऽवयवभेदोऽर्थक्रियानुरोधी युक्तः, वस्तुस्वभावप्रतिबद्धत्वात्तस्याः, उपचरितस्याचालीकत्वादिति नानैकान्तिकता। परकीयस्य च हेतोःपूर्ववदसिद्धत्वं वाच्यम्॥ ६७५॥ ६७६॥ § 2355

सङ्ख्येत्यादिना परकीयं प्रस्तुतसङ्ख्यादिगुणपदार्थसाधनमाशङ्कते। § 2356

सङ्ख्यायोगादयः सर्वे न द्रव्याव्यतिरेकिणः।
तद्व्यवच्छेदकत्वेन दण्डादिरिव चेन्मतम्॥
६७७॥§ 2358

तेषां संवृतिसत्त्वेन वर्णनादिष्टसाधनम्।
तत्त्वान्यत्वेन निर्वाच्यं नैव संवृतिसद्यतः॥
६७८॥§ 2360

सर्व एवामी यथोक्ताः सङ्ख्यादयो गुणा न द्रव्यादव्यतिरेकिणस्तस्य द्रव्यस्य तेषां व्यवच्छेदहेतुत्वात्, यो हि यद्व्यवच्छेदको नासौ तदव्यतिरेकी, यथा दण्डादिर्देवदत्तस्येति। तदत्र द्रव्यादव्यतिरेकित्वनिषेधमात्रे साध्ये सिद्धसाध्यता दोषः प्रतिज्ञायाः। संवृतिसतां सर्वेषामवस्तुतया तत्त्वान्यत्वाभ्यामवाच्यतयाऽभीष्टत्वात्॥ ६७७॥ ६७८॥ § 2361

अथेत्यादिनात्राविद्धकर्णस्योत्तरमाशङ्कते। § 2362

अथानिर्वचनीयत्वं समूहादेर्निषिध्यते।
यस्मान्नियतधर्मत्वं रूपशब्दरसादिवत्॥ ६७९॥§ 2364

सह्याह—समूहसन्तानावस्थाविशेषास्तत्त्वान्यत्वाभ्यामवचनीया न भवन्ति प्रतिनियतधर्मयोगित्वाद्रूपरसादिवदिति॥ ६७९॥ § 2365

226/k

तदेतन्निःस्वभावतयेत्यादिना प्रतिविधत्ते। § 2366

निःस्वभावतया तस्य तत्त्वतोऽम्बरपद्मवत्।
न सिद्धा नियता धर्माः कल्पनारोपितास्तु ते॥
६८०॥§ 2368

तथैवोक्तावनेकान्तो वियत्पद्मादिभिर्यतः।
अभेदो व्यतिरेकश्च वस्तुन्येव व्यवस्थितः॥
६८१॥§ 2370

यदि हि पारमार्थिकनियतधर्मत्वं हेतुरिष्टस्तदा हेतोरसिद्धता। नहि बौद्धं प्रतिसन्तानादीनां संवृतिसतां पारमार्थिकनियतधर्मयोगित्वं सिद्धम्। अथ सामान्येन हेतुस्तदा वियत्पद्मादीनामप्यभावत्वामूर्त्तत्वादयः कल्पिता निय-

तधर्माः सन्त्येवेत्यनैकान्तिकता हेतोः। तथैवोक्ताविति। सामान्येन विकल्पितानुपाख्यवृत्तिधर्मपरित्यागेनोक्तौ सत्यामित्यर्थः। इतश्चानैकान्तिकत्वमस्य हेतोः। यस्मादभेदोऽनन्यत्वं, व्यतिरेकोऽन्यत्वम्, एतौ वस्तुन्येव व्यवस्थितौ, नान्यत्र। सन्तानादयश्च प्रज्ञप्तिसत्त्वेनावस्तुसन्तस्तत्कथमेषां वस्तुनः सकाशाद्भेदाभेदौ सिद्ध्यतः। तदेवं प्रथमे प्रयोगे सङ्ख्यादीनां द्रव्यादव्यतिरेकप्रतिषेधमात्रे साध्ये सिद्धसाध्यतेति प्रतिपादितम् ॥ ६८० ॥ ६८१ ॥ § 2371

सङ्ख्यादेर्द्रव्यतोऽन्यत्वमेवं चेत्प्रतिपाद्यते।
आश्रयासिद्धता हेतोः सङ्ख्यादीनामसिद्धितः॥
६८२ ॥§ 2373

अथापि स्यान्नाव्यतिरेकप्रतिषेधमात्रं साध्यते, किं तर्हि ? द्वौ प्रतिषेधौ विधिमेव गमयत इति प्रतिषेधद्वयेन द्रव्याद्व्यतिरेकित्वमेव साध्यत इति। तदेतत्सङ्ख्यादेरित्यादिनाऽऽशङ्क्याश्रयासिद्धतेत्यादिना प्रतिषेधति—एवमिति। न द्रव्याव्यतिरेकिणः। किं तर्हि ? व्यतिरेकिण इत्यर्थः॥ ६८२ ॥ § 2374

तदेव सङ्ख्यादेराश्रयस्यासिद्धत्वं दर्शयति—समुच्चयादीत्यादिना। § 2375

समुच्चयादिभिन्नं तु द्रव्यमेव तथोच्यते।
स्वरूपादेव भेदश्च व्याहतः साधितो भवेत्॥
६८३ ॥§ 2377

तथोच्यत इति। एको द्वौ बहव इत्येवमादिः। स्यादेतत्—द्रव्यात्मकस्यापि सतः सङ्ख्यादेर्भेदः प्रसाध्यत इत्याह—स्वरूपादेवेत्यादि। नहि वस्तुनः स्वरूपाद्भेदोऽस्ति, तस्य निःस्वभावत्वप्रसङ्गात्। व्याहत इति। परस्परविरुद्धः। भेदाभेदयोःपरस्परपरिहारस्थितलक्षणतया युगपदेकत्र विरुद्धत्वात्।
227/k एवं तावत्परत्वान्ता गुणाः प्रतिषिद्धाः। बुद्ध्यादयस्तु प्रयत्नान्ता आत्माश्रितत्वेन तद्गुणा इष्टाः। ते चात्मनिषेधादेव निषिद्धा द्रष्टव्याः। नचैषामात्माऽऽश्रयो युक्तः, तथाहि—उत्पत्तिहेतुतया चामीषामात्माऽऽश्रयो भवेत्स्थितिहेतुतया वा। न तावदुत्पत्तिहेतुतया, सर्वदैवाविकलकारणतया सुखादीनामुत्पत्तिप्रसङ्गात्। न च परैरनाधेयातिशयस्य सहकारिव्यपेक्षा काचिदस्तीति शतशश्चर्चितमेतत्। न चापि नित्यस्य कार्योत्पादनसामर्थ्यमस्ति, तस्य क्रमयौगपद्याभ्यां व्याप्तत्वात्। नित्यस्य च क्रमयौगपद्याभ्यामर्थक्रियाविरोधस्यप्रतिपादितत्वात्। नापि स्थितिहेतुतया युक्तः, स्थितेः स्थातुरव्यतिरिच्यमानरूपत्वात्। तद्धेतुत्वे स्थातृहेतुत्वमेवोक्तं स्यात्। तच्चानन्तरमेव निषिद्धम्। तस्य च स्थातुः परिनिष्ठितात्मस्वरूपत्वान्न कश्चिद्धेतुः संभवति। तस्य तत्राकिंचित्करत्वात्। व्यतिरेकेऽपि स्थितेः स्थातुस्तेन न किंचित्कृत-

मर्थान्तरभूतायाः स्थितेः करणात्। ततश्चाकिंचित्करः कथं तस्याश्रयो भवेत्। नापि तत्सम्बन्धिन्याः स्थितेः करणात्तस्यायमुपकारको युक्तस्तत्सम्बन्धित्वासिद्धेः। न चापि स्थितिं प्रति हेतुत्वं युक्तम्। नित्यस्य क्वचिदपि सामर्थ्यानुपपत्तेरित्युक्तम्। किंचासौ स्थाप्यमानो भावः स्वयमस्थिरस्वभावो वा भवेत्, स्थिरस्वभावो वा। यद्यस्थिररूपस्तत्कथं परेण स्थापयितुं शक्येत। तत्स्वभावहानिप्रसङ्गात्। अथ स्थिरस्वभावस्तथापि स्थापकोऽकिंचित्कर एव, स्वयमेव तत्स्वभावतया तस्य स्थितिसिद्धेः। किंच— ये तावन्मूर्त्ता भावास्तेषामधोगमनप्रतिबन्धकत्वेन भवेन्नामाश्रयकल्पना, ये पुनरमी सुखादयस्तेषाममूर्त्ततया नाधोगमनमस्तीति किंकुर्वाणस्तेषामाश्रयो भवेत्। सदसतोश्च निराशंसत(या)नुपाख्यत्वेन चाश्रयणानुपपत्तिरिति। एवं सुखादीनामन्येषां च यथायोगमाश्रितत्वासिद्धेर्नगुणो नामास्तीति भावः। किंच बुद्धिर्ज्ञानस्वभावाऽङ्गीकृता परैः। यथोक्तम्— बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमिति। तस्याश्चैवंरूपाया अपि न स्वसंविदितरूपमिष्टं परैः। किन्तु बुद्ध्यन्तरगम्यत्वमेव। तथाभूतायाश्च रूपादिवत्स्वतोऽसिद्धेर्बुद्धित्वमेवायुक्तमिति प्रतिपादयिष्यति॥ ६८३॥ § 2378

सुखदुःखेच्छाद्वेषप्रयत्नानामप्यज्ञानरूपत्वमिष्टम्। तदपि प्रमाणलक्षणपरीक्षायां निषेत्स्यते। गुरुत्वद्रवत्वस्नेहानां तु रूपादिवत्प्रतिषेधो विधेय इत्येवमालोच्यैषां प्रतिषेधमकृत्वा संस्कारप्रतिषेधमाह—वेगाख्य इत्यादि। § 2379

वेगाख्यो भावनासंज्ञः स्थितस्थापकलक्षणः।
संस्कारस्त्रिविधः प्रोक्तो नासौ संगच्छतेऽखिलः॥
६८४॥ § 2381

228/k

क्षणिकत्वात्पदार्थानां न काचिद्विद्यते क्रिया।
यत्प्रबन्धस्य हेतुः स्यात्संस्कारो वेगसंज्ञकः॥
६८५॥ § 2383

त्रिविधः संस्कारो वेगो भावना स्थितस्थापकश्चेति। तत्र वे(?)गाख्यः पृथिव्यप्तेजोवायुमनस्सु पञ्चसु मूर्तिमत्सु द्रव्येषु प्रयत्नाभिघातविशेषापेक्षात्कर्मणो जायते। स च नियतदिक्क्रियाप्रबन्धहेतुः, स्पर्शवद्द्रव्यसंयोगविरोधी। तथाहि—शरादिषु प्रयत्नविशेषजनितकर्मविशेषहेतुक एव। यद्वशादन्तरालशिरस्यापतनं भवत्यतएवासौ नियतादिक्रियाकार्योन्नीयमानसद्भावतया सिद्धः। शाखादौ तु लोष्टाभिघातजनितकर्मजः। भावनासंज्ञस्त्वात्मगुणः। योऽसौ ज्ञानजो ज्ञानहेतुश्चोच्यते, स च दृष्टश्रुतानुभूतेषु स्मृतिप्रत्यभिज्ञानकार्योन्नीत-

सत्त्वतया सिद्धः। स्थितस्थापकस्तु मूर्त्तिमद्द्रव्यगुणः, यो हि घनावयवसन्निवेशविशिष्टं कालान्तरावस्थायिनं स्वमाश्रयं प्रयत्नेनान्यथाकृतं पूर्ववद्यथावस्थितं स्थापयति। यथा चिरकालसंवेष्टितस्य तालपत्रादेःप्रसार्यावमुक्तस्य पुनस्तथैवावस्थानम्। धनुःशाखाश्रृङ्गदन्तादिषु वस्त्रादिषु च भुग्नावर्त्तितेषु तस्य कार्यं लक्ष्यत एव। अखिल इति। त्रिविधोऽपि। तत्र वेगाख्यस्य कर्मसम्बन्धाख्यं कार्यमसिद्धम्। अशेषपदार्थजातव्यापिनः क्षणभङ्गस्य प्रसाधितत्वात्। ततश्च स्वभावप्रतिलम्भादूर्ध्वं सर्वभावानामसत्त्वान्न काचित्क्रियाऽस्ति, यस्याः क्रियायाः प्रबन्धस्य हेतुरसौ भवेत्। अथ स्वोपादानदेशपरिहारेण प्रतीयमानो भावानामुत्पाद एव क्रियाप्रबन्धोऽभिप्रेतस्तथाऽप्यनैकान्तिकत्वम्, यतः पूर्वका एव हेतुप्रत्यया भावानां तथा तथोत्पद्यमानानां तथाविधात्मभूतक्रियाप्रबन्धतोऽनुमीयन्ते, न यथोक्तः संस्कारः। तेन सह क्वचिदप्यन्वयासिद्धेः। किंच यदि तथाविधसंस्कारबलादपतनमिष्वादीनां स्यात्तदा न कदाचिदपि ते पतेयुः, सर्वत्र पातप्रतिबन्धहेतोर्वेगस्यावस्थितत्वात्। ततश्चाविशिष्टाकाशदेशप्रसर्पिणो विशिखस्याकस्माद्यदेतत्पतनमुपलभ्यते तत्कथमुपपद्यते। नच मूर्त्तिमतां सतां वाय्वादीनां संयोगादुपहतशक्तित्वाद्वेगस्य विनाशात्पतनमिति शक्यं वक्तुम्, अर्वागेव पतनप्रसङ्गात्, सर्वत्रैववायुसंयोगस्तद्विरोधी विद्यत एव। अथापि स्यादर्वागेकान्तबलीयस्त्वाद्वेगस्य विरोधिनमपि वायुसंयोगं प्रतिविध्यासौ वेगो नयति देशान्तरमिषुमिति। यद्येवं परस्मात्केन तस्याबलीयस्त्वं येन सुदूरमपि देशं तं न नयेत्। दृश्यते हि सर्वत्राविशिष्टवायुसंयोगवत्याकाशतले प्रसर्पतोऽपि शरस्यान्तराले पतनम्। नच वेगस्य पश्चाद न्यत्वं
229/k शक्यं वक्तुम्, अन्यथोत्पत्तिकारणाभावात्। सर्वत्रैव हि तत्समवायिकारणमिष्वादि निर्विशिष्टमेव। नच कर्माख्यं कारणं पश्चाद्विशिष्यत इति युक्तमभिधातुम्, तस्यापि तुल्यपर्यनुयोगत्वात्। अन्यत्वेऽपि वा पश्चाद्वेगस्य पूर्वकस्य विनाशकारणाभावात्तादवस्थ्यमेवेत्यपात एव स्याच्छरस्य। नच वायुसंयोगस्तस्य विनाशकारणमर्वागेव पतनप्रसङ्गादित्युक्तमेतत्, सर्वत्र वायोरविशेषेण तत्संयोगस्याप्यविशिष्टत्वादिति यत्किंचिदेतत्॥ ६८४॥ ६८५॥ § 2384

भावनाख्यस्य दूषणमाह—भावनाख्यस्त्वित्यादि। § 2385

भावनाख्यस्तु संस्कारश्चेतसो वासनात्मकः।
युक्तो नात्मगुणश्चेदं युज्यते तन्निराकृतेः॥
६८६॥ § 2387

यदि हि स्मृत्यादिकार्यतः सामान्येन भावनामात्रं तदा सिद्धसाध्यता। तथाहि —पूर्वानुभवाहितसामर्थ्यलक्षणा चेतसः स्वात्मभूता भावना स्मृत्यादिहेतुरिष्यत एव। यस्या वासनेति प्रसिद्धिः। अथात्मगुणस्वभावा भावना साधयितुमिष्टा, तदा क्वचिदपि तथाविधया सह स्मृत्यादीनाम-

न्वयासिद्धेरनैकान्तिकता हेतोः। प्रतिज्ञायाश्चानुमानबाधा। आत्मनस्तदाधारस्य पूर्वं निराकृतत्वेनासत्त्वात्तस्या अप्यसत्त्वसिद्धिः। प्रयोगः—ये यदाश्रितास्ते तस्याभावे सति नावस्थितिमश्नुवते, यथा चित्रं कुड्याद्यभावे, आश्रितश्चात्मानं संस्कारः परमतेनेति व्यापकविरुद्धोपलब्धेर्नचेष्टासिद्धिः। तस्यात्मनः पूर्वं निराकृतत्वात्। तस्माच्चेतसो वासनात्मक एव युक्तः संस्कारो नात्मगुण इति प्रमाणफलमेतत्। एकस्य प्रमाणसिद्धत्वादपरस्य विपर्ययादिति भावः॥ ६८६॥ § 2388

तृतीयस्यापि दूषणमाह—स्थितेत्यादि। § 2389

स्थितस्थापकरूपस्तु न युक्तः क्षणभङ्गतः।
स्थितार्थासम्भवाद्भावे ताद्रूप्यादेव संस्थितिः॥
६८७॥§ 2391

तथाहि—यमसौ पदार्थं स्थितं स्थापयति कदाचिदसौ स्वयमस्थिरस्वभाव एव, यद्वा स्थिरस्वभाव एवेति पक्षद्वयम्। यद्यस्थिरस्वभावस्तदा तस्य क्षणादूर्ध्वमभावात्कस्यासौ स्थापको भवेत्। अथ द्वितीयः पक्षस्तदा भावे—सत्त्वे, स्थितानामर्थानांताद्रूप्यादेव—अप्रच्युतस्थितरूपत्वात्, स्थितिरिति किमकिंचित्करेण स्थापकेन परिकल्पितेनेति पूर्ववद्दूषणं वाच्यम्॥ ६८७॥ § 2392

230/k

अथापि स्यात्क्षणिकत्वेऽपि सर्वभावानामेकक्षणावस्थितौ प्रबन्धेन चानुवृत्तौ तस्य सामर्थ्यमुच्यत इत्यत्राप्याह—क्षणं त्वेकमित्यादि। § 2393

क्षणं त्वेकमवस्थानं स्वहेतोरेव जातितः।
पूर्वपूर्वप्रभावाच्च प्रबन्धेनानुवर्त्तनम्॥ ६८८॥§ 2395

स्वहेतोरेव निष्पद्यमाना एकक्षणस्थायिनः सिध्यन्ति। तथाह्यात्मप्रतिलम्भलक्षणैवामीषां स्थितिरुच्यते, नतु प्रतिलब्धात्मसत्ताकानामुत्तरकालमात्मरूपसन्धारणलक्षणा, स्वयं चलात्मन उत्तरकालमवस्थानाभावात्। अवस्थाने वा कदाचिदप्यनिवृत्तिप्रसङ्गः पूर्ववत्। पश्चादप्यविशिष्टत्वात्, अतत्स्वभावप्रसङ्गाच्च। पूर्वपूर्वकारणसामर्थ्यकृतश्चोत्तरोत्तरकार्यप्रसव इति प्रबन्धेऽपि न संस्कारस्य सामर्थ्यं सिध्यति ॥ ६८८॥ § 2396

अक्षणिकस्य तर्हि स्थापकोऽसौ भवत्वित्याह—नान्यथेत्यादि। § 2397

नान्यथोदयवानेष कस्यासौ स्थापकस्ततः।

नचास्य दृष्टं हेतुत्वं संस्कारोऽन्योऽपि वा भवेत्॥
६८९॥§ 2399

उत्पन्नस्यैव चेष्टोऽयं वस्त्रादेः स्थापको गुणः।
गुणसंस्कारनामैवं सर्वथापि न संभवी॥
६९०॥§ 2401

यो ह्यक्षणिकस्तस्यान्यथात्वासम्भवात्स्वत एव स्थितिरिति किं कुर्वाणस्तस्यासौ स्थापको भवतीत्युक्तमेतत्। अथापि स्यात्—माभूदसौ स्थापकः, किन्तु क्षणस्यैवोत्पादको भवतीत्याह—नचास्येत्यादि। प्रमाणाधीना हि प्रमेयस्य तत्त्वव्यवस्थितिः, नचास्य प्रसिद्धकारणव्यतिरेकेण वस्त्रादिषु प्रत्यक्षानुपलम्भाभ्यां चक्षुरादिवद्वा कार्यव्यतिरेकतो दृष्टं—निश्चितं हेतुत्वम्, येन तद्व्यवहारः स्यात्। अथादृष्टसामर्थ्यस्यापि हेतुत्वं कल्प्यते, तदा संस्कारः, अन्योऽपि वा—शुकबकादिरुत्पत्तेर्हेतुर्भवेत्। कल्पनीय इति शेषः। न ह्यदृष्टशक्तित्वेन कश्चिद्विशेषोऽस्ति, येनैकस्मिन्नेव संस्कारात्मन्यपरिनिश्चितसामर्थ्ये कल्पनापरितोषो भवतां स्यात्। नचाप्ययमुत्पादहेतुरिष्टो भवद्भिः, अपि तूत्पन्नस्य सतो वस्त्रादेरुत्तरकालं स्थापको गुण इष्यते। तत्र चाकिंचित्करत्वमस्येति पूर्वमुपवर्णितम्। अभ्युपगम्य तूत्पत्तिहेतुत्वं दूषणमिदमभिहितम्। कदाचित्कश्चित्स्वसमयसीमानमप्यतिपत्यैवं कल्पयेदिति भावः। गुणसंस्कारनामेत्यादिना पूर्वमुपसंहरति॥ ६८९॥ ६९०॥ § 2402

231/k

धर्माधर्मलक्षणगुणदूषणमाह—मन इत्यादि। § 2403

मनोयोगात्मनां पूर्वं विस्तरेण निबन्धनात्।
परोक्तलक्षणोपेतं नादृष्टमुपपद्यते॥ ६९१॥
गुणपदार्थपरीक्षा।§ 2406

कर्तृफलदाय्यात्मगुण आत्ममनःसंयोगजः स्वकार्यविरोध्यदृष्टम्। तच्च द्विविध धर्माधर्मभेदात्। तत्र धर्मः कर्तुः प्रियहितमोक्षहेतुः। अधर्मस्त्वप्रियाहितप्रत्यवायहेतुरिति परोक्तादृष्टलक्षणम्। तदेतदात्मनो मनसस्तद्योगस्य च तत्कारणत्वेनाभिमतस्य पूर्वं निषिद्धत्वात्कारणाभावादेवासदिति सिद्धम्। शब्दस्त्वाकाशगुणतयाऽभीष्टः स प्रागेव निरस्तोऽक्रमाद्यापतित इत्यादिनेति न पुनरस्य दूषणमुच्यते॥ ६९१॥ § 2407

इति गुणपदार्थपरीक्षा।

०.१३ कर्मपदार्थपरीक्षा।

कर्मपदार्थदूषणार्थमाह—क्षणेत्यादि। § 2409

क्षणक्षयिषु भावेषु कर्मोत्क्षेपाद्यसम्भवि।
जातदेशे च्युतेरेव तदन्यप्राप्त्यसम्भवात्॥
६९२॥§ 2411

उत्क्षेपणमपक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणीति सूत्रम्। तत्रोत्क्षेपणमूर्ध्वाधःप्रदेशाभ्यां संयोगविभागकारणं यत्कर्मोत्पद्यते। यथा—शरीरावयवे तत्संबद्धे वा मूर्त्तिमति द्रव्ये लोष्टादावूर्ध्वदिग्भागोपाधिभिराकाशप्रदेशाद्यैः संयोगकारणमधोदिग्भागावच्छिन्नैश्च विभागकारणं प्रयत्नादिवशाद्यत्कर्मोपजायते तदुत्क्षेपणमुच्यते। एतद्विपरीतं संयोगविभागकारणं कर्मावक्षेपणं। ऋजुद्रव्यस्य कुटिलत्वहेतुराकुञ्चनम्, यथोक्तम्—ऋजुनो बाह्वादिद्रव्यस्य येऽग्रावयवा अङ्गुल्यादयस्तेषां स्वसंयोगिभिराकाशाद्यैर्विभागे सति मूलप्रदेशैश्चांशादिभिः संयोगे सति येन कर्मणाऽवयवी बाह्वादिलक्षणः कुटिलः समुत्पद्यते तदाकुञ्चनमिति। एतद्विपर्ययेण तु संयोगविभागोत्पत्तौ येन कर्मणाऽवयवी ऋजुः संपद्यते तत्प्रसारणम्। यदनियतदिक्प्रदेशैर्घटादिभिः संयोगविभागकारणं तद्गमनम्। उत्क्षेपणादिकं चतुःप्रकारं कर्म नियतदिग्देशैराकाशैराशादिभिः संयोगविभागकारणम्। गमनं तु—अनियतदिग्भिः सर्वतोदिक्कैः प्रदेशैः संयोगविभागौ करोति। अत एव पञ्चैव कर्माणि संभवन्ति। भ्रमणस्यन्दनरेचनादीनां गमन एवान्तर्भावात्। एतच्च पंचविधमपि कर्म मूर्त्तिमद्द्रव्यवृत्तिसंयोगविभागकार्योन्नीतसत्त्वतया सिद्धम्। सर्वस्यैव संयोगविभागविशेषः साधारणं कार्यमतः कार्यतः सिद्धिरस्य। तथा प्रत्यक्ष- 232/k
तोऽपि। यथोक्तम्—"सङ्ख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिसमवायाच्चाक्षुषाणी"ति। तदेषा सङ्क्षेपात्परप्रक्रियोक्ता। तदत्र संयोगविभागयोः पूर्वं निषिद्धत्वात्कार्यमसिद्धम्। अथ नैरन्तर्येणोत्पादादिमात्रलक्षणौ संयोगविभागौ तत्कार्यतया हेतुत्वेनोच्यते, एवमप्यनैकान्तिकता हेतोः। तथाविधेन कर्मणा तयोः क्वचिदप्यन्वयासिद्धेः। साध्यविपर्ययेण च हेतोर्व्याप्तेर्विरुद्धताऽपि। कारणमात्रास्तित्वे च साध्ये सिद्धसाध्यता, वाय्वादीनां तथाविधसंयोगविभागकारणत्वेनाभीष्टत्वात्। विशेषे च साध्ये प्रतिज्ञाया अप्यनुमानबाधा। तथाहि—क्रियासमावेशो भवन्पदार्थस्य क्षणिकस्य वा(ऽक्षणिकस्य वा)। न तावत्क्षणिकस्य, तस्य जन्मदेश एव च्युतेः—नाशाद्देशान्तरप्राप्तसंभवात्। प्रयोगः—यो यत्र देशे च्यवते न स तदुत्तरकालं तदन्यदेशमाप्नोति, यथा प्रदीपादिः। जन्मदेश एव च्यवन्ते च सर्वे भावा विवक्षिता इति व्यापकविरुद्धोपलब्धिः॥ ६९२॥ § 2412

नानैकान्तिकता हेतोरिति दर्शयन्नाह—जन्मेत्यादि। § 2413

जन्मातिरिक्तकालं हि क्रियाकालं परे जगुः।
इष्टाशुतरनाशेषु दीपादिष्वपि वस्तुषु॥ ६९३ ॥§ 2415

इष्ट आशुतरो विनाशो येषां ते तथा। प्रदीपादेरपि हि शीघ्रतरकालविनाशितयाऽभीष्टस्यापि जन्मोत्तरकालभाविन्येव क्रिया, षड्गुणस्थायित्वेनास्याक्षणिकत्वात् ॥ ६९३ ॥ § 2416

कथमित्याह—तथाहीत्यादि। § 2417

तथाहि कारणाऽऽश्लेषः सामान्यस्याभिव्यञ्जनम्।
स्वावयवे ततः कर्म विभागस्तदनन्तरम्॥
६९४ ॥§ 2419

संयोगस्य विनाशश्च ततो द्रव्यस्य संक्षयः।
षड्गुणस्थायितैवेष्टा दीपादावपि वस्तुनि॥
६९५ ॥§ 2421

तथाहि—स्वकारणसंबन्धकालस्तावत्प्रथमं भवति। ततः पश्चात्स्वसामान्याभिव्यक्तिकालस्ततोऽवयवकर्मकालस्तदनन्तरमवयवविभागकालस्ततः स्वारम्भकावयवसंयोगविनाशस्ततो द्रव्यविनाश इति षड्गुणस्थायितैव दीपादेरपि वस्तुनोऽभीष्टा।अतः क्षणिकस्य कस्यचिद्गतिमतः पदार्थस्याभावात्सर्वेषामेव क्रियावतां जन्मोत्तरकालभाविन्येव क्रिया। नाप्यसिद्धता हेतोरन्यस्य क्षणिकत्वायोगात्॥ ६९४॥ ६९५॥ § 2422

233/k

अथापि स्याद्यदि नाम क्षणिकता भावानामस्माभिरिष्यते। तथाप्यमीषां जन्मकालभाविन्येव क्रिया कस्मान्न भवतीत्याह—पश्चिमेत्यादि। § 2423

पश्चिमाग्रिमदेशाभ्यां विश्लेषाऽऽश्लेषसंभवे।
गन्ताऽपरो वा सर्वश्च कर्माधारः प्रकल्पितः॥
६९६ ॥§ 2425

यो जन्मः क्षणमध्यास्ते नैव जातु चलात्मकः।
तस्याण्वन्तरमात्रेऽपि देशसंक्रान्त्यसम्भवः॥
६९७ ॥§ 2427

यस्य हि पाश्चात्त्यदेशविश्लेषः संभवति, पुरोवर्त्तिना देशेनाऽऽश्लेषः स गन्ता भवत्यपरो वा प्रसारणाद्याधारः, नत्वन्यो यथाऽऽकाशादि। नचैकक्षणमात्रभाविनङ्खयान्परिलम्बोऽस्ति, येन पूर्वदेशपरिहारपूर्वकमपरदेशमाक्रामेत्। सत्ताकाल एवास्तमयवशीकृतत्वादपर्याप्तो देशान्तरमाक्रमितुम्। तस्माज्जन्मकालभाविन्यपि क्रिया न युक्ता। नापि पूर्वोत्तरयोः कोट्योस्तदानीं तस्यानुपाख्यत्वात्। अतो यः क्षणमपि नास्तेतस्याऽऽस्तां तावद्विदूरतरदेशान्तरावक्रमण(णा ?) सम्भवः। अपितु परमाणुमात्रप्रदेशसंक्रमणमपि नास्तीति कुतः क्षणिकस्य क्रिया॥ ६९६॥ ६९७॥ § 2428

नाप्यक्षणिकस्येति दर्शयति—स्थैर्ये त्वित्यादि। § 2429

स्थैर्ये तु वस्तुनः सर्वे दुर्घटा गमनादयः।
सुतरामेव सर्वासु दशास्वस्याविशेषतः॥
६९८ ॥§ 2431

एकरूपं हि सदा वस्त्वक्षणिकमुच्यते, तस्य सुतरामेव क्रियासमावेशो न संभवति, आकाशवत्सर्वदा निर्विशिष्टत्वात्। प्रयोगः—यत्सर्वदा निर्विशिष्टं न तस्य क्रियासंभवति, यथाऽऽकाशस्य, निर्विशिष्टं चाक्षणिकभिमतं सर्वदा वस्त्विति व्यापकविरुद्धोपलब्धिः॥ ६९८॥ § 2432

स्यादेतद्यदि नामाविशिष्टमक्षणिकं वस्तु, तथापि प्रकृत्यैव तस्य गन्त्रादिरूपत्वात्क्रियावत्त्वं भविष्यतीत्यतोऽनैकान्तिकता हेतोरित्याशङ्क्याह—यदीत्यादि। § 2433

यदि गन्त्रादिरूपं तत्प्रकृत्या गमनादयः।
सदा स्युः क्षणमप्येवं नावतिष्ठेत निश्चलम्॥
६९९ ॥§ 2435

यस्माद्गत्याद्यसत्त्वेऽपि प्राप्नुवन्त्यस्य चे ध्रुवम्।
अत्यक्तपूर्वरूपत्वाद्गत्याद्युदयकालवत्॥ ७०० ॥§ 2437

यदि ह्यमी देवदत्तादयः क्षणिकत्वेनाभिमताः प्रकृत्या गमनोत्क्षेपणादियोगिनस्तदा न कदाचिदपि निश्चलमवतिष्ठेरन्, सर्वदा गन्त्रादिरूपत्वात्। 234/k

ततश्चास्य देवदत्तादेर्गत्यादिमतो गत्याद्यसत्त्वेऽपि—निश्चलावस्थायामपि, ते—गमनादयः, प्राप्नुवन्ति। गत्याद्युत्पत्तिकाल इवात्यक्तपूर्वरूपत्वात्॥ ६९९॥ ७००॥ § 2438

अथागन्त्रादिरूपं तत्प्रकृत्याऽगमनादयः।
सदा स्युः क्षणमप्येकं नैव प्रस्पन्दवद्भवेत्॥
७०१॥§ 2440

यस्माद्गत्यादिभावेऽपि निश्चलात्मकमेव तत्।
अत्यक्तपूर्वरूपत्वान्निश्चलात्मककालवत्॥
७०२॥§ 2442

अथैतद्दोषभयादगन्त्रादीरूपत्वमस्याङ्गीक्रियते। तथासत्यगमनादयः सर्वदा स्युरेकरूपत्वादाकाशवत्। आदिशब्दादुत्क्षेपणादिपरिग्रहः। ततश्च गत्यादिभावेऽपि तस्य निश्चलत्वमेव प्राप्नोती, अपरित्यक्तागत्यादिरूपत्वाद्यथा निश्चलावस्थायाम्। प्रस्पन्दः—कर्म सोऽस्यास्तीति प्रस्पन्दवत्। निश्चलात्मककालवदिति सप्तम्य(?)न्ताद्वतिः॥ ७०१॥ ७०२॥ § 2443

अथापि स्यात्—नैवाऽस्यैकरूपता, किं तर्हि ? गन्त्वगन्तृरूपतयोभयरूपत्वादतोयथोक्तदोषप्रसङ्गः, हेतोश्चासिद्धतेत्याशङ्क्याह—यदि त्वित्यादि। § 2444

यदि तु स्यादगन्ताऽयमेकदा चान्यथा पुनः।
परस्परविभिन्नात्मसंगतेर्भिन्नता भवेत्॥ ७०३॥§ 2446

एकदा चेति। चकारो विभिन्नक्रमः, पुनरित्यस्यानन्तरं द्रष्टव्यः। पुनश्च—अन्यथेत्यर्थः। एवं हि गन्तृत्वागन्तृत्वादिविरुद्धधर्माध्यासादेकत्वहानिप्रसङ्गः॥ ७०३॥ § 2447

अत एव तस्य क्षणिकत्वं सिद्धमिति दर्शयन्नाह—अत्यन्तभिन्नावित्यादि। § 2448

अत्यन्तभिन्नावात्मानौ ताविति व्यवसीयते।
विरुद्धधर्मवृत्तित्वाच्चलनिश्चलवस्तुवत्॥ ७०४॥§ 2450

ताविति। चलाचलावस्थाभाविनौ। चलनिश्चलवस्तुवदिति। लतापर्वतादिवदित्यर्थः॥ ७०४॥ § 2451

एवं तावदनुमानबाधां प्रतिज्ञायाः प्रतिपाद्य प्रत्यक्षबाधामपि प्रतिपादयन्नाह—दृश्यत्वेत्यादि। § 2452

दृश्यत्वाभिमतं कर्म न वस्तुव्यतिरेकि च।
दृश्यते सोपि नैवास्य सत्ता युक्त्यनुपातिनी॥
७०५॥§ 2454

235/k

यदुपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते तत्प्रेक्षावतामसद्व्यवहारमवतरति, यथा कस्मिंश्चित्प्रदेशे पटोऽनुपलभ्यमानः नोपलभ्यते च रूपादिवस्तुव्यतिरेकेण कर्मेति स्वभावानुपलब्धिः। नहि रूपादेस्तथा देशान्तरावष्टम्भेनोत्पद्यमानस्य व्यतिरेकेण क्वचिदिन्द्रियज्ञाने प्रतिभासमानामालक्ष्यते कर्म। या चेयमुत्क्षेपणमवक्षेपणमिति जल्पानुषङ्गिणी धीरुपजायते, सा साभिजल्पत्वान्न प्रत्यक्षं, नचाप्येषा कर्मपदार्थानुभवभाविनीयुक्ता, रूपादेरेव तथातथोत्पद्यमानस्य दर्शनात्, यथासङ्केतं तेष्वेवाध्यवसायेन वृत्तेः। एतच्चानन्तरमेव प्रतिपादितं नित्यानित्ययोर्गत्याद्यभावादिति। अतोऽसिद्धमेतद्यदुक्तं प्रत्यक्षत एव कर्म सिद्धमिति॥ ७०५॥ § 2455

यथोक्तमेवार्थमुपसंहरन्नाह—अस्थिरे वेत्यादि। § 2456

अस्थिरे वा स्थिरे वैवं गत्यादीनामसम्भवः।
प्राक्तनापरदेशाभ्यां विभागप्राप्त्ययोगतः॥
७०६॥§ 2458

एवमिति—अनन्तरोक्ताभ्यां प्रत्यक्षानुमानाभ्यां निराकृतत्वात्। विभागप्राप्त्ययोगत इति। प्राक्तनेन विभागायोगात्, अपरदेशेन प्राप्त्ययोगादिति यथाक्रमं सम्बन्धः॥ ७०६॥ § 2459

यद्येवं कथं तर्हि गतिव्यवहारो लोके भवतीत्याह—देशान्तरेत्यादि। § 2460

देशान्तरोपलब्धेस्तु नैरन्तर्येण जन्मनः।
समानापरवस्तूनां गतिभ्रान्तिः प्रदीपवत्॥ ७०७॥
इति कर्मपदार्थपरीक्षा।§ 2463

समानापरवस्तूनामिति। समानानि च तान्यपराणि चेति समस्य तानि च वस्तूनि चेति विग्रहः कार्यः। तेषां समानापरवस्तूनां यन्नैरन्तर्येण—स्वोपादानकारणदेशपरिहारेण जन्म—सद्भावः, तस्य जन्मन उपलब्धेः कारणात्स

एवायं गच्छतीति, यथा प्रदीपस्य केनचिन्नीयमानस्य देशान्तरं गच्छतीति बुद्धिहेतुत्वं भवति। नहि प्रदीपः स एव देशान्तरमाक्रामति। तस्य षट्क्षणस्थायित्वेनाभिमतत्वात्। भावस्वभाव एव हि पूर्वापरकोटिशून्यो जन्मेत्यभिधीयते। तेन तस्योपलब्धिर्युज्यत एव। अथवा जन्मन इति पञ्चम्यन्तमेतत्। नैरन्तर्येणोत्पादात्समानापरवस्तूनां देशान्तरोपलब्धेरिति सम्बन्धः॥ ७०७॥ § 2464

इति कर्मपदार्थपरीक्षा।

०.१४ सामान्यपरीक्षा।

236/k द्रव्यादिष्वित्यादिना—सामान्यविशेषदूषणमारभते। § 2466

द्रव्यादिषु निषिद्धेषु जातयोऽपि निराकृताः।
पदार्थत्रयवृत्ता हि सर्वास्ताः परिकल्पिताः॥
७०८॥ § 2468

जातय इति। सामान्यानि। ताश्च द्रव्यगुणकर्मात्मकपदार्थत्रयाश्रितत्वात्तन्निराकरणादेवापास्ताः। नह्याश्रयमन्तरेणाश्रितानां क्वचिदवस्थितिरस्ति, अनाश्रितत्वप्रसङ्गात्। जातिग्रहणमुपलक्षणम्, विशेषा अप्यन्त्यद्रव्यवृत्तित्वादाश्रिता एवेष्टाः, अतस्तेऽप्याश्रयनिराकरणादेवापास्ताः॥ ७०८॥ § 2469

तथाऽपि पुनर्विशेषेण दूषणं वक्तुकामोऽनिर्ज्ञातस्वरूपस्याशक्यदूषणत्वात्सामान्यविशेषयोस्तावत्स्वरूपं दर्शयन्नाह—तत्रेत्यादि। § 2470

तत्रेयं द्विविधा जातिः परैरभ्युपगम्यते।
सामान्यमेव सत्ताख्यं समस्तेष्वनुवृत्तितः॥
७०९॥ § 2472

द्रव्यत्वादि तु सामान्यं सद्विशेषोऽभिधीयते।
स्वाश्रयेष्वनुवृत्तस्य चेतसो हेतुभावतः॥ ७१०॥ § 2474

विजातिभ्यश्च सर्वेभ्यः स्वाश्रयस्य विशेषणात्।
व्यावृत्तिबुद्धिहेतुत्वं तेषामेव ततः स्थितम्॥
७११॥§ 2476

तत्र सामान्यं द्विविधं परमपरं च, परं सत्ताख्यं, तच्च समस्तेषु त्रिषु द्रव्यगुणकर्मस्वनुवृत्तिप्रत्ययस्यैव कारणत्वात्सामान्यमेव न विशेषः। अपरं तु द्रव्यत्वकर्मत्वादिलक्षणं, तच्च स्वाश्रयेषु द्रव्यादिष्वनुवृत्तिप्रत्ययहेतुत्वात्सामान्यमित्युच्यते, स्वाश्रयस्य च विजातीयेभ्यो व्यावृत्तिप्रत्ययहेतुतया विशेषणात्सामान्यमपि सद्विशेष इत्यभिधीयते। तथाहि—गुणादिष्वद्रव्यमगुण इत्यादिका येयं व्यावृत्तबुद्धिरुदयमासादयति, तां प्रति हेतुत्वमेषामेव गुणत्वद्रव्यत्वादीनां व्यवस्थितं नान्यस्य, न ह्यद्रव्यत्वादिकमपरमस्ति। अपेक्षाभेदाच्चैकस्य सामान्यविशेषभावो न विरुध्यत एवेति भावः॥ ७०९॥ ७१०॥ ७११॥ § 2477

परेषां विशेषाणां लक्षणमाह—विशेषा एवेत्यादि। § 2478

विशेषा एव केचित्तु व्यावृत्तेरेव हेतवः।
नित्यद्रव्यस्थिता येऽन्त्या विशेषा इति वर्णिताः॥
७१२॥§ 2480

केचिद्विशेषा एवेष्यन्ते, न सामान्यानि। व्यावृत्तिरेव—व्यावृत्तिप्रत्ययस्यैव हेतु त्वादित्यर्थः। के पुनस्त इत्याह—नित्येत्यादि। तथाचोक्तम्—नित्यद्र- 237/k
व्यवृत्तयोऽन्त्या विशेषा इति। नित्यद्रव्यवृत्तय इति। परमाण्वाकाशकालदिगात्ममनःसु वृत्तेः। परमाणूनां जगद्विनाशारम्भकोटिभूतत्वात्, मुक्तात्मनां मुक्तमनसां च संसारपर्यन्तरूपत्वादन्तत्वम्,अतस्तेषु भवा अन्त्या इत्युच्यन्ते। तेषु स्फुटतरमालक्ष्यमाणत्वात्।वृत्तिस्तु पुनरेषां सर्वस्मिन्नेव परमाण्वादौ नित्ये द्रव्ये। अत एव नित्यद्रव्यवृत्तयोऽन्त्या इत्युभयोरुपादानम्। तत्र परस्परमत्यन्तव्यावृत्तबुद्धिहेतुत्वात्स्वाश्रयमन्यतो विशेषयन्तीति विशेषा उच्यन्ते॥ ७१२॥ § 2481

कुतः पुनरमी सिद्धा इत्याह—यद्बलादित्यादि। § 2482

यद्बलात्परमाण्वादौ जायन्ते योगिनां धियः।
विलक्षणोऽयमेतस्मादिति प्रत्येकमाश्रिताः॥
७१३॥§ 2484

यथा ह्यस्मदादीनां गवादिष्वाकृतिगुणक्रियावयवसंयोगनिमित्तोऽश्वादिबुद्धिव्यावृत्तः प्रत्ययो दृष्टः, तद्यथा—गौः शुक्लः शीघ्रगतिः पीनककुद्मो महाघण्ट इति यथाक्रमम्, तथाऽस्मद्विशिष्टानां योगिनां नित्येषु तुल्याकृतिगुणक्रियेषु पर-

माणुषु मुक्तात्ममनःसु चान्यनिमित्तासंभवाद्यद्बलात्प्रत्येकं विलक्षणोऽयमिति प्रत्ययव्यावृत्तिर्देशकालविप्रकर्षदृष्टे च स एवायमिति प्रत्यभिज्ञानं यतो भवति, ते योगिनां विशेषप्रत्ययोन्नीतसत्त्वा अन्त्या विशेषाः सिद्धाः। ते च यथास्वं प्रत्येकमाश्रयमाश्रिताः योगिनां प्रत्यक्षत एव सिद्धाः॥ ७१३॥ § 2485

अथ जातयः कथं सिद्धा इत्याह—प्रत्यक्षत इत्यादि। § 2486

प्रत्यक्षतः प्रसिद्धास्तु सत्त्वगोत्वादि जातयः।
अक्षव्यापारसद्भावे सदादिप्रत्ययोदयात्॥
७१४॥ § 2488

यद्गतान्वयव्यतिरेकानुविधायि यद्भवति तत्ततो भवतीति व्यवस्थाप्यते। द्रव्यादिषु च सदादिप्रत्ययप्रसूतिरक्षगतान्वयव्यतिरेकावनुविदधती किमितीन्द्रियजन्यताव्यपदेशं नाश्नुवीत, तदन्येन्द्रियज्ञानवत्, अन्यथाऽतिप्रसङ्गः स्यात्॥ ७१४॥ § 2489

अनुमानतोऽपि सत्त्वमासां प्रतिपादयन्नाह—अनुमानेत्यादि। § 2490

अनुमानबलेनापि सत्त्वमासां प्रतीयते।
विशेषप्रत्ययो येन निमित्तान्तरभाविकः॥
७१५॥ § 2492

विशेषप्रत्यय इति। द्रव्यादिवस्तुविलक्षणाकारः प्रत्ययः। निमित्तान्तर-
238/k भाविकः —निमित्तान्तराद्भाव उत्पादः सोऽस्यास्तीति कृत्वा। प्रयोगः—यद्वस्त्वाकारविलक्षणो यः स तद्व्यतिरिक्तनिमित्तान्तरभावी, यथा वस्त्रचर्मकम्बलेषु रक्तादिप्रत्ययः, तथा चायं द्रव्यादिषु सदादिप्रत्यय इति स्वभावहेतुं मन्यते परः॥ ७१५॥ § 2493

एनमेव प्रमाणार्थं गवादीत्यादिना भाविविक्तादिरचितप्रमाणोपन्यासेन दर्शयति। § 2494

गवादिशब्दप्रज्ञानविशेषा गोगजादिषु।
समयाकृतिपिण्डादिव्यतिरिक्तार्थहेतवः॥
७१६॥ § 2496

गवादिविषयत्वे हि सति तच्छब्दबुद्धितः।

अन्यत्वात्तद्यथैष्वेव सवत्साङ्कुशधीध्वनी॥
७१७॥§ 2498

शशशृङ्गादिविज्ञानैर्व्यभिचाराद्विशेषणम्।
तत्स्वरूपाभिधानं च वैधर्म्येण निदर्शनम्॥
७१८॥§ 2500

गवादिष्वनुवृत्तं च विज्ञानं पिण्डतोऽन्यतः।
विशेषकत्वान्नीलादिविज्ञानमिव जायते॥
७१९॥§ 2502

गोतश्चार्थान्तरं गोत्वं भिन्नधीविषयत्वतः।
रूपस्पर्शादिवत्तस्येत्युक्तेश्चैत्र तुरङ्गवत्॥ ७२०॥§ 2504

तत्र भाविविक्तः प्राह—गवाश्वमहिषवराहमातङ्गादिषु गवाद्यभिधानप्रज्ञानविशेषाः समयाकृतिपिण्डादिव्यतिरिक्तस्वरूपाऽनुरूपसंसर्गिनिमित्तान्तरनिबन्धना इत्यवघोषणा। गवादिविषयत्वे सति पिण्डादिस्वरूपाभिधानप्रज्ञानव्यतिरिक्ताभिधानज्ञानत्वात्, तेष्वेव गवादिषु सवत्सा गौर्भाराक्रान्तो महिषः सशल्यो वराहः साङ्कुशो मातङ्ग इत्याद्यभिधानप्रज्ञानविशेषवत्। वैधर्म्येण पिण्डादिस्वरूपाभिधानप्रज्ञानविशेषाः। यानि च तानि निमित्तान्तराणि तानि गोत्वादीनीति सिद्धम्। तत्राभिधानं —शब्दः, प्रज्ञानं—प्रत्ययो ज्ञानमित्यर्थः। अभिधानप्रज्ञानान्येव विशेषा इति विशेषणसमासः। समयः—सङ्केतः, आकृतिः—संस्थानं, पिण्डो—द्रव्यम्, आदिशब्देन रूपादिपरिग्रहः, एभ्यो व्यतिरिक्तं स्वरूपं येषां स्वाभिधानप्रत्ययं प्रत्यनुरूपाणामुपाधित्वात्संसर्गिणां निमित्तान्तराणां तानि निबन्धनं येषामिति विग्रहः। अथवा समयादिव्यतिरिक्तानि च तानि सदादिप्रत्ययाभिधानं प्रतिस्वरूपानुरूपसंसर्गीणि चेति विग्रहः कार्यः। शेषं पूर्ववत्। अवघोषणेति। प्रतिज्ञा। शशविषाणादि प्रत्ययैर्व्यभिचारशङ्का तत्परिहारार्थं गवादिविषयत्वे 239/k सतीति विशेषणम्। पिण्डादिस्वरूपाभिधानप्रज्ञानव्यतिरिक्ते अभिधानप्रज्ञाने येषां तद्भावस्तत्त्वमिति विग्रहः। वैधर्म्येण पिण्डादिस्वरूपाभिधानप्रज्ञानविशेषा इति। तत्र हि पिण्डादिव्यतिरिक्तनिमित्तान्तरनिबन्धनत्वाभावे हेतोर-

६ गोतश्चा] Correction : ; गोतत्त्वा (sic !)गोतश्चा

७ श्चैत्र] Correction : ; श्चैव (sic !)श्चैत्र

पि यथोक्तस्याभावात्। उद्योतकरस्त्वाह—गवादिष्वनुवृत्तिप्रत्ययः पिण्डादिव्यतिरिक्तान्निमित्ताद्भवति, विशेषकत्वान्नीलादिप्रत्ययवत्। तथा गोतोऽर्थान्तरं गोत्वं, भिन्नप्रत्ययविषयत्वाद्रूपस्पर्शादिवत्, तस्येति च व्यपदेशविषयत्वाद्यथा चैत्रस्याश्व इति चैत्राद्व्यतिरेकेण व्यपदिश्यमान इति। तदेतद्दर्शयतिगवादिष्वित्यादि। सुबोधम्॥ ७१६॥ ७१७॥ ७१८॥ ७१९॥ ७२०॥ § 2505

असारमित्यादिना प्रतिविधत्ते। § 2506

असारं तदिदं कार्यं प्रक्रियामात्रवर्णनम्।
न तु तज्ज्ञापकं किञ्चित्प्रमाणमिह विद्यते॥
७२१॥ § 2508

अक्षव्यापारसद्भावान्नह्यनन्तरभाविनः।
सदादिप्रत्ययास्तिद्धा सङ्केताभोगतस्तु ते॥
७२२॥ § 2510

यदुक्तमक्षव्यापारसद्भावात्सदादिप्रत्ययानामक्षाश्रितत्वमिति। तत्र यदि साक्षादक्षव्यापारान्तरभावित्वादिति हेत्वर्थोऽभिप्रेतस्तदा हेतुरसिद्धः, सविकल्पत्वेन सङ्केताभोगस्मरणादिव्यवहितत्वात्॥ ७२१॥ ७२२॥ § 2511

न चैतच्छक्यं वक्तुम्, एकमनुगामिनमन्तरेण कथं परस्परव्यावृत्तात्मानो भावाःपारम्पर्येणाप्यभिन्नाकारप्रत्ययनिबन्धनं युज्यन्त इत्याशङ्क्याह—यथेत्यादि। § 2512

यथा धात्र्यभयादीनां नानारोगनिवर्तने।
प्रत्येकं सह वा शक्तिर्नानात्वेऽप्युपलभ्यते॥
७२३॥ § 2514

न तेषु विद्यते किंचित्सामान्यं तत्र शक्तिमत्।
चिरक्षिप्रादिभेदेन रोगशान्त्युपलम्भतः॥ ७२४॥ § 2516

सामान्येऽतिशयः कश्चिन्नहि क्षेत्रादिभेदतः।

एकरूपतया नित्यं धात्र्यादेस्तु स विद्यते॥
७२५॥§ 2518

एवमत्यन्तभेदेऽपि केचिन्नियतशक्तितः।
तुल्यप्रत्यवमर्शादेर्हेतुत्वं यान्ति नापरे॥ ७२६॥§ 2520

यथा ह्यामलक्यादयः परस्परमत्यन्तविभिन्नमूर्त्तयेऽपि प्रत्येकं समुदिता वा नाना विधव्याधिव्यावर्त्तनसामर्थ्याध्यासिता भवन्त्यन्तरेणाप्यनुगामिनम्, 240/k नहि तत्र सामान्यमेव तथाविधामर्थक्रियां संपादयतीति युक्तं वक्तुम्। यतस्तेषु विविधार्थक्रियासंपादनयोग्यं न सामान्यमस्ति। यदि स्यात्तदा येयं क्वचित्कदाचित्कासांचिद्धात्र्यादीनां चिरक्षिप्ररोगाद्युपशमनसामर्थ्योपलब्धिः सा न स्यात्, सामान्यस्यैकरूपत्वात्। नच क्षेत्रक्षीरावसेकादिसंस्कारविशेषवशादासादितातिशयं सामान्यमेवैतामर्थक्रियां विचित्रां सम्पादयतीति युक्तम्। तस्य नित्यतया परैरनाधेयविकारस्य क्षेत्रादिभेदतोऽपि नातिशयः कश्चिदेकरूपत्वात्। धात्र्यादीनां त्वनित्यानां सोऽतिशयः क्षेत्रादिभेदतो भिद्यत इत्यतस्त एवं रोगाद्युपशमनसामर्थ्योपेताः। ततश्च तद्वदेवान्येऽपि घटादयो भावाः स्वहेतुप्रत्ययेभ्यस्तथोत्पत्तेः प्रकृत्यैवैकाकारप्रत्यवमर्शादिहेतवो भविष्यन्तीत्यदोषः। तुल्यप्रत्यवमर्शादेरित्यादिशब्देन सलिलसंधारणाद्यर्थक्रियासामर्थ्यपरिग्रहः॥ ७२३॥ ७२४॥ ७२५॥ ७२६॥ § 2521

कथं पुनः सङ्केताभोगादिव्यवहितत्वमेषां सिध्यतीत्याह—कार्येत्यादि। § 2522

कार्यमात्रोपयोगित्वविवक्षायां च सच्छ्रुतेः।
समयः क्रियते तेषु यद्वान्यस्या यथारुचि॥
७२७॥§ 2524

वाहदोहादिरूपेण कार्यभेदोपयोगिनि।
गवादिश्रुतिसङ्केतः क्रियते व्यवहर्तृभिः॥ ७२८॥§ 2526

तत्सङ्केतमनस्कारात्सदादिप्रत्यया इमे।
जायमानास्तु लक्ष्यन्ते नाक्षव्यापृत्यनन्तरम्॥
७२९॥§ 2528

नह्यगृहीतसमयानां सदादिप्रत्ययप्रसूतिरन्यथा सङ्केतकरणवैयर्थ्यं स्यात्। तस्माद्यस्मिन्नेकाकारपरामर्शव्यवस्थितार्थक्रियासामर्थ्यमात्रप्रतिपादितमेवाभेदं परामृश्य सदिति श्रुतिं विनिवेशयन्ति समयकृतः (तस्मिन्सदादिप्रत्ययः।) यद्वाऽन्यस्या इति। वस्त्वित्यस्याः श्रुतेः। एवं गवादिविशेषश्रुतेरपि वाहादिसामर्थ्यविशेषजिज्ञासायां समयः क्रियत इति योज्यम्। ततश्च सङ्केतोत्तरकालं व्यवहारकाले गवादिषु दृष्टेष्वपि पूर्वकृतसङ्केताभोगस्ततस्तन्नामस्मरणं ततः पश्चात्सदादिप्रत्ययोदय इति स्फुटतरमालक्ष्यत एव। क्वचिदत्यभ्यासत आशुतरोत्पादादमीषां क्रमो नावधार्यते। मन्दाभ्यासास्तु स्फुटतरमवधारयन्त्येव तदित्युपसंहरति। तत्तस्मात्तदेवं समयाभोगादिव्यवहितत्वात्साक्षादनुत्पत्तेः प्रत्यक्षत्वमेषामसिद्धम्, न चापि पारम्पर्येणोत्पद्यमानस्य प्रत्यक्षत्वं न्याय्यमतिप्रसङ्गादिति भावः॥ ७२७॥ ७२८॥ ७२९॥ § 2529

241/k

इतश्च स्मार्त्तत्वात्तदन्यस्मृतिवत्प्रत्यक्षत्वमयुक्तं सदादिप्रत्ययस्येति दर्शयन्नाह—अजल्पेत्यादि। § 2530

अजल्पाकारमेवादौ विज्ञानं तु प्रजायते।
ततस्तु समयाभोगस्तस्मात्स्मार्त्तं ततोऽपि ते॥
७३०॥§ 2532

स्वलक्षणे सङ्केतस्याकरणाद्दृष्ट्वाच विकल्पनात्प्रथमतरं वस्तुस्वलक्षणविषयतयाऽभिलापसंसर्गविवेकि विज्ञानमक्षाश्रितमुपजायते। ततः पश्चात्तस्मिन्नेव परिदृष्टे वस्तुनि समयाभोगस्तदनन्तरं यथासमयं परिदृष्टार्थविषयास्तदव्य(ध्य ?)वसायितया सदादिप्रत्ययास्तमेवार्थं परिदृष्टमभिलपन्तः समुत्पद्यमानाः कथमिव स्मार्त्ततां नासादयेयुः। ततोऽपीति। यथा परिदृष्टाव्य(ध्य ?)वसायात्। त इति। सदादिप्रत्ययाः ॥ ७३०॥ § 2533

कुतः पुनरयमुत्पत्तिक्रमो विज्ञानानामालक्षित इत्याह—अन्यत्रेत्यादि। § 2534

अन्यत्र गतचित्तस्य वस्तुमात्रोपलम्भनम्।
सर्वोपाधिविवेकेन तत एव प्रवर्त्तते॥ ७३१॥§ 2536

यतस्ते सदादिप्रत्यया अमुना क्रमेणोपजायन्ते, तत एवान्यत्र—विषयान्तरे गतचित्तस्य—व्यासक्तमनसः पुरोऽवस्थितं वस्तु पश्यतः संमुखीभूतवस्तुसङ्केतमनस्कारावप्रवृत्तेः प्रथमतरं सर्वोपाधिविविक्तवस्तुमात्रदर्शनं प्रवर्त्तते। अन्यथा हि यदि सर्वमेव साभिजल्पं विज्ञानं स्यात्तदा पुरोऽवस्थितं वस्तु सर्वोपाधिशून्यमन्यत्र गतमनाः कथमीक्षेत। न ह्येकस्मिन्काले युगपद-

भिलापद्वयं संवेद्यते। तदेवं साक्षादक्षगतान्वयव्यतिरेकानुविधायित्वमसिद्धम्॥ ७३१॥ § 2537

तत्र यदुक्तं गवादीत्यादि तत्राह—हेतावित्यादि। § 2538

हेतावाद्येऽपि वैफल्यं समयाभोगभाविता।
तेषामिष्टैव संसर्गी सोऽन्वयव्यतिरेकवान्॥
७३२॥§ 2540

यदि सामान्येनानुरूपसंसर्गिनिमित्तान्तरमात्रनिबन्धनत्वमेषां प्रसाध्यते तदा सिद्धसाध्यता, यतो गवादिसङ्केताभोग एव गवादिप्रत्ययव्यपदेशानामनुरूपसंबन्धी।तथाहि—तस्मिन्सति भवन्ति विजातीयमनस्कारे, (असति) च न भवन्ति। अतः स एवान्वयव्यतिरेकवान्हेतुरेषां सिद्धः, तद्गतान्वयव्यतिरेकस्यैवानुविधानात्, अतो वैफल्यं हेतुप्रयोगप्रयासस्य॥ ७३२॥ § 2541
242/k

तस्य पक्षाबहिर्भावे साध्यशून्यं निदर्शनम्।
नैवं तद्धेतवः साक्षाद्वाह्यवत्साङ्कुशादयः॥
७३३॥§ 2543

नाभिधानविकल्पानां वृत्तिरस्ति खलभणे।
सर्वं वाग्गोचरातीतमूर्त्तिर्येत स्वलक्षणम्॥
७३४॥§ 2545

अथैनं सङ्केतमनस्कारं पक्ष एवान्तर्भाव्य तद्व्यतिरिक्तनित्यैकानुगामिसामान्याख्यसंसर्गिनिबन्धनत्वमेषां साध्यते तदा दृष्टान्तस्य साध्यविकलता, न ह्येवंभूतेन क्वचिदन्वयः सिद्धः। ये चामी वत्साङ्कुशादयः सवत्साद्यभिधानप्रज्ञानहेतुत्वेन वर्णितास्तेऽपि तद्धेतुत्वेन न सिद्धाः, न ह्येषामासादितस्वलक्षणभावानां साक्षादभिधानप्रज्ञानहेतुत्वमस्ति, सर्ववाग्विकल्पगोचरातीतरूपत्वात्स्वलक्षणस्येत्यतः साध्यविकलता दृष्टान्तस्य। पारम्पर्येण तु हेतुत्वकल्पनायामतिप्रसङ्गः स्यात्, सर्वस्यैव सर्वत्र पारम्पर्येणोपयोगस्य विद्यमानत्वात्॥ ७३३॥ ७३४॥ § 2546

यद्येवं कथं तर्हि लोकोऽङ्कुशादि बाह्यमेव तद्धेतुत्वेनाध्यवस्यतीत्याह—अन्तर्मात्रेत्यादि। § 2547

अन्तर्मात्रासमारूढं सांवृतं त्ववलम्ब्य ते।
बहीरूपाध्यवसितं प्रवर्त्तन्तेऽङ्कुशादिकम्॥
७३५॥ § 2549

यत्तावदङ्कुशादिप्रज्ञप्त्युपादानं स्वलक्षणं न तद्विकल्पैः स्पृश्यत इत्युक्तम्। यत्तु सांवृतं तत्कल्पनाशिल्पिनिर्मितात्मरूपतयाऽन्तर्मात्रारूढमेव न बाह्यं, दृश्यविकल्पयोस्तु विवेकेनानभिज्ञतया जनो बाह्यमिव तमाकारं मन्यमानो बाह्यमेव वस्त्वभिधावतीति नातो बाह्यरूपतासिद्धिरङ्कुशादीनाम्। अङ्कुशादिकमित्यवलम्ब्येत्यनेन पूर्वकेणसंबन्धनीयम्। अन्तर्मात्रासमारूढं बहीरूपतयाऽध्यवसितं सांवृतमङ्कुशादिकमालम्ब्य बाह्ये प्रवर्त्तत इत्यर्थः। अन्तर्मात्रा—बुद्धिः॥ ७३५॥ § 2550

यच्च गवादिविषयत्वे सतीति विशेषणं तदप्ययुक्तमेव, व्यवच्छेद्याभावादिति दर्शयन्नाह—क्रियेत्यादि। § 2551

क्रियागुणव्यपदेशाभावो हेतुश्च वर्ण्यते।
अभावप्रत्ययस्येति विशेषणमनर्थकम्॥
७३६॥ § 2553

तदप्ययुक्तं हेतुत्वे वस्तुता शक्तितोऽपि च।
अभावप्रत्ययः प्राप्तः सत्तादिष्वविशेषतः॥
७३७॥ § 2555

243/k

अभावप्रत्ययस्यापि क्रियागुणव्यपदेशाभाव एव हेतुत्वेन भवद्भिर्वर्ण्यते। तदप्ययुक्तमिति। क्रियाद्यभावस्य हेतुत्वोपवर्णनम्। तथाहि—कार्योत्पादनसामर्थ्यमेव हेतुत्वमुच्यते, तच्च सामर्थ्यं वस्त्वाधारमेव, तल्लक्षणत्वाद्वस्तुनः। यदि चाभावोऽपितथाविधसामर्थ्याध्यासितो भवेत्तदा कथमिव वस्तुत्वं नासादयेत्, एतावन्मात्रनिबन्धनत्वाद्वस्तुनः। ततश्चाभावरूपतामेव विजह्यात्। वस्तुस्वभावप्रच्युतिरूपत्वादभावस्य। अपिच—यदि क्रियागुणव्यपदेशाभावोऽभावप्रत्ययहेतुः स्यात्तदा सत्तादिष्वप्यभावप्रत्ययः प्राप्तस्तत्रापि शशविषाणादिवत्क्रियागुणव्यपदेशाभावाविशेषात्॥ ७३६॥ ७३७॥ § 2556

हेतुश्चासिद्ध इति दर्शयन्नाह—वैलक्षण्यमिति। § 2557

वैलक्षण्यमसिद्धं च पिण्डाकृत्यादिबुद्धिः।
तज्ज्ञानानामसिद्धोऽपि हेतुरेष भवत्यतः॥
७३८॥§ 2559

नहि गवादिप्रत्ययानां पिण्डादिव्यतिरिक्तमर्थान्तरमध्यवसेयमस्ति, येन तत्प्रत्ययान्यवत्मेषां भवेत्॥ ७३८॥ § 2560

प्रतिज्ञायाश्चानुमानबाधेति दर्शयन्नाह—अन्वयीत्यादि। § 2561

अन्वयी प्रत्ययो यस्माच्छब्दव्यक्त्यवभासवान्।
वर्णाकृत्यक्षराकारशून्या जातिस्तु वर्ण्यते॥
७३९॥§ 2563

एतदुक्तं भवति—अनुगामिप्रत्ययानां पिण्डादिव्यतिरिक्तं निमित्तमालम्बनभूतमेव भवद्भिः सिसाधयिषितम्, तच्चायुक्तम्, तस्याप्रतिभासनात्; तद्विलक्षणवर्णाकृत्यादिप्रतिभासनाच्च। तथाहि—भवद्भिर्वर्णाकृत्यक्षराकारशून्यमेव वर्ण्यते गोत्वादिसामान्यम्, विज्ञानं च वर्णादिप्रतिभासानुगतमनुभूयते, तत्कथमस्य वर्णादिशून्यमालम्बनं भवेत्, न ह्यन्याकारस्य विज्ञानस्यान्यदालम्बनं युक्तमतिप्रसङ्गात्। प्रयोगः—यो यद्विलक्षणार्थप्रतिभासः प्रत्ययः स तद्ग्राहको न भवति, तद्यथा शब्दज्ञानं न रूपग्राहकं, जातिविलक्षणवर्णादिप्रतिभासश्चान्वयी प्रत्यय इति व्यापकविरुद्धोपलब्धेः। शब्दव्यक्त्यवभासवानिति। शब्दो—गौरित्यादिव्यपदेशः, व्यक्तिः —वर्णसंस्थानात्मिका, तयोरवभासः सोऽस्यास्तीति तद्वान्। अक्षराणि—गकारौकारविसर्जनीयादीनि॥ ७३९॥ § 2564

शङ्करस्वामी त्वाह—सामान्यमपि नीलत्वादि नीलाद्याकारमेव, अन्यथा हि नील इत्येवममुवृत्तिप्रत्ययो न स्यात्, ततश्च हेतोरसिद्धत्वान्नानुमान- 244/k
बाधेति। तदत्राह—सामान्यस्यापीत्यादि। § 2565

सामान्यस्यापि नीलादिरूपत्वे गुणतोऽस्य कः।
भेदो नानुगतश्चैको नीलादिरूपलक्ष्यते॥
७४०॥§ 2567

भासमानोऽपि चेदेष न विवेकेन लक्ष्यते।

तत्कथं धीध्वनी व्यक्तौ वर्त्तेते तद्बलेन तौ॥
७४१॥§ 2569

निश्चयात्मक एवायं सामान्यप्रत्ययः परैः।
इष्टश्चाग्रहणे प्राप्ते युक्तं नानुपलक्षणम्॥
७४२॥§ 2571

एवं सति गुणान्नीलादेर्नीलत्वादिसामान्यस्य विशेषो न प्राप्नोति, आकाराभेदात्। स्यान्मतं गुणो हि नीलादिरनुगतो न भवति। सामान्यं तु भिन्नदेशकालव्यक्त्यनुगामीत्यत आकारभेदोऽस्तीत्याह—नानुगतश्चैक इत्यादि। नहि नीलादिगुणव्यतिरिक्तमपरं नीलत्वादि नीलाद्याकारानुगतमनुगामि प्रतिभासमानमालक्ष्यते। अध्यक्षत एकस्यैव नीलादेरसाधारणस्य प्रतिभासनात्। नापि विकल्पचेतसि नीलत्वादि द्वितीयं प्रतिभासते, यथादृष्टस्यैव तेनाध्यवसायात्। स्यादेतद्यथा भवतां क्षणिकत्वं भासमानमपि नोपलक्ष्यते विवेकेन मन्दैस्तथेदमपि सामान्यमिति तदप्ययुक्तम्। एवं हि तद्दर्शनबलाद्भिन्नास्वपि व्यक्तिष्वभिन्नौ धीध्वनी भवत इति यदेतद्वर्णितं तन्नोपपद्यते, नहि विशेषणानुपलक्षणे विशेष्ये धीरुपजायते, यथा दण्डानुपलक्षणे दण्डीति प्रत्ययो न भवति तद्वदत्रापि स्यात्। तथाहि स्वतःशब्दप्रत्ययगोचरातिवृत्ता भेदा भवद्भिरुपवर्ण्यन्ते। तांश्च भेदान्स्वतो बुद्धिशब्दविषयव्यतिवृत्तशरीरान्सामान्यदर्शनबलेन प्रतियन्प्रतिपत्ता कथं तस्यैवानुपलक्षको नाम। अपिच यस्याविकल्पकमेव प्रत्यक्षं तस्यैतद्युक्तं वक्तुं प्रतिभासमानमपि नोपलक्ष्यत इति, निश्चयप्रत्ययव्यापारत्वादुपलक्षणस्य, यस्य तु भवतः सर्वमेव सविकल्पकं प्रत्यक्षमिति पक्षस्तस्यायुक्तमनुपलक्षणमग्रहणप्रसङ्गात्। इयमेव हि निश्चयानां स्वार्थप्रतिपत्तिर्यत्तन्निश्चयनं तच्चेन्न निश्चिन्वन्ति न गृह्णन्तीत्येव प्राप्तम्॥ ७४०॥ ७४१॥ ७४२॥ § 2572

अभ्युपेत्यापि नीलादिव्यतिरिक्तार्थान्तरसिद्धिं नेष्टसिद्धिर्भवतामभिमतसाध्यार्थस्यानुमानबाधितत्वात्तेन व्याप्त्यसिद्धेरिति दर्शयन्नाह—सिद्धेऽपीत्यादि।
§ 2573

सिद्धेऽप्यन्यनिमित्तत्वे न सामान्यं प्रसिद्ध्यति।
अनुगाम्येकमध्रौव्यविविक्तं च क्रमोदयात्॥
७४३॥§ 2575

245/k

अध्रौव्यविविक्तमिति। अनित्यत्वविविक्तं, नित्यमिति यावत्। कस्मान्न सिद्ध्यतीति ? क्रमोदयात्। गवाद्यभिधानप्रत्ययानामिति शेषः। यदा

हि तथाविधसामान्यधर्महेतुकत्वमेषामभविष्यत्तदा क्रमेणामी नोदपत्स्यन्त, अविकलकारणत्वाद्युगपदेवोत्पद्येरन्, युगपदुत्पद्यमानानेकपदार्थवत्। नहि परैरनुपकार्यस्य काचिदपेक्षाऽस्ति ॥ ७४३॥ § 2576

सम्प्रति हेतोः सिद्धिमभ्युपगम्य व्यभिचारमाह—पदार्थशब्द इति। § 2577

पदार्थशब्दः कं हेतुमपरं षट्स्वपेक्षते।
अस्तीति प्रत्ययो यश्च सत्तादिष्वनुवर्त्तते॥
७४४॥ § 2579

नहि पदार्थत्वं नाम षट्सु पदार्थेष्वपरमस्ति, येन पदार्थः पदार्थ इत्यनुगामी प्रत्ययो भवेत्। तथा सामान्यविशेषसमवायेषु न सत्तास्ति, येनास्तीति तेषु प्रत्ययः स्यात्, द्रव्यगुणकर्मस्वेव सत्तायाः स्थितत्वात्। द्रव्यादिषु तु सामान्यनिबन्धन एवव्यपदेशः परेषामभीष्ट इति न तेन व्यभिचारश्चोद्यते॥ ७४४॥ § 2580

स्यादेतत्तत्रापि सत्तादिसदुपलम्भकप्रमाणविषयत्वं धर्मोऽस्ति, तेनान्यनिमित्तोऽयमत्रापि व्यपदेश इत्यव्यभिचार एवेत्याह—अन्यधर्मेत्यादि। § 2581

अन्यधर्मनिमित्तश्चेत्तत्राप्यस्त्यस्तितामतिः।
तदन्यधर्महेतुत्वेऽनिष्ठासक्तेरधर्मिता॥ ७४५॥ § 2583

व्यभिचारी ततो हेतुरमीभिरयमिष्यते।
नच सर्वोपसंहाराद्व्याप्तिरस्य प्रसाधिता॥
७४६॥ § 2585

अन्यधर्मनिमित्तत्वेऽप्यभ्युपगम्यमाने व्यभिचारदोषस्तदवस्थ एव, यस्मात्तत्राप्यस्मिन्धर्मेऽस्त्येवास्तितामतिः अस्ति सद्धर्म इति। तत्राप्यन्यधर्माभ्युपगमेऽनवस्थाप्रसङ्गः स्यात्। अन्येषामपि धर्मान्तराश्रयत्वाद्धर्मित्वप्रसङ्गश्च। ततश्च षडेव पदार्था धर्मिण इति षट्सङ्ख्यानियमो न स्यात्। अथानवस्थाभयाद्धर्मान्तरं नाश्रीयते तदाऽमीभिः पदार्थेषु सत्तादौ धर्मे वा प्रवृत्तैः प्रत्ययैर्व्यभिचारिता हेतोः। माभूद्वाऽस्य साधारणानैकान्तिकता, संदिग्धव्यतिरेकिता तु केन परिह्रियत इत्येतदाह—नच सर्वोपसंहारादित्यादि। सर्वस्मिन्धर्मिणि हेतोः साध्येन व्याप्तिप्रदर्शनं सर्वोपसंहारः। स्यादेतद्व्याप्तिरत्र युक्तैवेति, निमित्तान्तराभावे हि तद्वस्तुप्रत्ययवैलक्षण्यं कथमुपपद्येत, न-

246/k ह्येकविषयाणां बहूनामपि प्रत्ययानां वैलक्षण्यमस्ति, यदि स्यात्तदा रूपरसादिप्रत्ययानामपि नानाविषयो न सिद्ध्येत्। प्रत्ययभेदकृतत्वाद्विषयभेदव्यवस्थानस्येति। तदप्ययुक्तम्। नहि सामान्यप्रत्ययो वस्तुस्वलक्षणविषयः परमार्थतो युक्तः। आविष्टाभिलापेन प्रत्ययेन स्वलक्षणस्याविषयीकारणात्। किन्तु यतो यतस्तस्यैकस्यापि वस्तुनो व्यावृत्तिस्तन्निबन्धनास्तत्र यथासङ्केताभ्यासं तद्वस्त्वनुभवद्वारा यतो विकल्पा वाचकाश्च विश्वकल्पा यदि प्रवर्त्तेरन्नसत्यपि सामान्ये तदा को विरोध इत्यतो व्याख्याभाव उच्यते॥ ७४५॥ ७४६॥
§ 2586

यच्चोक्तं गवादिष्वनुवृत्तं चेत्यादि, तत्राह—तदनन्तरमित्यादि। § 2587

तदनन्तरमुद्दिष्टमनेनैव निराकृतम्।
सामान्यसाधनं तस्मिन्निष्टसिद्ध्यादयः समाः॥
७४७॥§ 2589

अनेनैवेति समनन्तरोक्तहेतुदूषणेनैव। तत्रापि तुल्यदोषत्वात्। तथाहीष्टसिद्ध्यादयोऽत्रापि समानाः। आदिशब्देन साध्यशून्यता दृष्टान्तस्य हेतोरसिद्धिर्व्यभिचारश्चेत्यादि परिगृह्यते॥ ७४७॥ § 2590

प्रकारान्तरेणापि व्यभिचारमाह—पाचकादिष्वित्यादि। § 2591

पाचकादिषु च ज्ञानं विशिष्टमुपजायते।
अभावेऽभावबुद्धिश्च विनैकेनानुगामिना॥
७४८॥§ 2593

इच्छारचितरूपेषु नष्टाजातेषु वा ततः।
अनैकान्तिकता हेतोः सर्वैरेभिर्यथोदितैः॥
७४९॥§ 2595

नहि तत्रैकमनुगामि निमित्तं पाचकत्वपाठकत्वादिकमस्ति, येन पाचकः पाठक इत्यनुवृत्तिप्रत्ययो भवेत्। तथा प्रागभावादिषु चतुर्ष्वभावोऽभाव इति कथमनुवृत्तप्रत्ययो भवेत्, नह्यत्रापि सामान्यमस्ति तस्य वस्त्वाश्रितत्वात्। इच्छारचितरूपेषु चन्द्रापीडादिषु नभस्तलोपकल्पितधवलगृहादिषु नष्टाजातेषु च महासम्मतशङ्खप्रभृतिषु बुद्धिर्विनैकेनानुगामिना कथं भवेत्। नहि तत्रापि सामान्यमस्ति, व्यक्त्याश्रितत्वात्तस्य॥ ७४८॥ ७४९॥ § 2596

न पाचकादीत्यादिना पाचकादिषु ज्ञानं समर्थयते। § 2597

न पाचकादिबुद्धीनामस्ति किञ्चिन्निबन्धनम्।
कर्मास्ति चेत्प्रतिव्यक्ति ननु तद्भिद्यते तथा॥
७५० ॥§ 2599

भिन्नेष्वन्वयिनोऽसत्वे न युक्ताऽन्वयिनी मतिः।
इत्येकमिष्टं सामान्यं सर्वव्यक्त्यनुवृत्तिमत्॥
७५१ ॥§ 2601

247/k

कर्मान्वयदरिद्रं च यदि हेतुः प्रकल्प्यते।
तदा व्यक्तय एवास्याः किमितीष्टा न हेतवः॥
७५२ ॥§ 2603

पाचकादिमतिर्न स्यात्तत्र चोपरतक्रिये।
न सदासन्निधानं हि कर्मेष्टं जातिवत्परैः॥
७५३ ॥§ 2605

अतीतानागतं कर्म निमित्तीकृत्य तेषु चेत्।
पाचकादिषु धीशब्दौ, तन्न हेतुरसत्त्वतः॥
७५४ ॥§ 2607

नहि पाचकादिषु कर्मनिबन्धना बुद्धिरिति युक्तं वक्तुम्। तस्यापि कर्मणः प्रतिव्यक्तिवद्भेदाभ्युपगमात्, भिन्नेषु हि विनैकेनानुगामिनाऽन्वयी प्रत्ययो नोपपद्यत इतिकृत्वा सामान्यं सर्वव्यक्त्यनुगतं परिकल्प्यते भवद्भिः। यदि चान्वयशून्यमपि कर्माभिन्नाभिधानप्रत्ययहेतुः स्यात्तदा को व्यक्तिषु प्रद्वेषो येन ताः परिहृत्य सामान्यं तद्धेतुत्वेन कल्प्यते। किंच यदि कर्मनिबन्धनः पाचकादिषु प्रत्ययः स्यात्तदा परतःक्रिये पाकमकुर्वति पाचक इति प्रत्ययो न स्यात्। नहि जातिवद्भवद्भिः सदा सन्निहितं कर्माभीष्टं, येनोपरतक्रियेऽपि प्रत्ययः स्यात्। नहि यो यन्निबन्धनः स तदभावे भवितुमर्हति, अतिप्रसङ्गत्, एवं हि सर्वः सर्वनिबन्धनं स्यात्। नचाप्यतीतानागतं कर्म तत्प्रत्ययनिबन्धनं

युक्तं, तस्यातीतादेरसत्त्वात्, असतश्च हेतुभावानुपपत्तेः॥ ७५०॥ ७५१॥ ७५२॥ ७५३॥ ७५४॥ § 2608

शङ्करस्वामी प्राह—पाचकाद्यनुवृत्तिप्रत्ययस्तत्कर्मजातिसंबद्धया क्रियया योगस्तस्माद्भवति, तेनोपरतक्रियेऽपि क्रियया ध्रुवनिमित्तस्योपलक्षणात्पाचकादिप्रत्यय इत्यवसेयमिति। तदेतद्दर्शयति—क्रियेत्यादि। § 2609

क्रियात्वजातिसम्बन्धक्रियायोगान्मतिर्यदि।
नष्टक्रियेऽपि च तया ध्रुवहेतूपलक्षणात्॥
७५५॥§ 2611

तयेति। क्रियया। ध्रुवनिमित्तं क्रियात्वजातिः॥ ७५५॥ § 2612
न त्वित्यादिना प्रतिविधत्ते। § 2613

न तु नष्टक्रिये तत्र लक्षितापि न विद्यते।
गृह्यते या ध्रुवा जातिः स्वाधारविनिवृत्तितः॥
७५६॥§ 2615

स्वस्या आधारः—क्रिया(त्व)जातेः सैव क्रिया। नहि जातेराश्रयग्रहणमन्तरेण केवलाया ग्रहणमवस्थितिर्वास्ति, अनाश्रितत्वप्रसङ्गात्॥ ७५६॥ § 2616

248/k

स्यादेतदेकदा जातेर्लक्षितत्वादुपरतेऽपि कर्मणि तदाधारे प्रवर्त्तत एव तन्निबन्धनप्रत्यय इत्याह—दण्डेत्यादि। § 2617

दण्डाङ्गदादिजातीनामेकदा न हि लक्षणे।
तद्वियोगेऽपि दण्ड्यादिमतिस्तेषु प्रवर्त्तते॥
७५७॥§ 2619

अथापि पाचकत्वादिजातिरन्यैव वर्त्तते।
सद्योजातेऽपि तद्योगात्पाचकादिमतिर्भवेत्॥
७५८॥§ 2621

सदादिमतिवन्नो चेत्तदा सा समवायिनी।
पश्चादपि न सा तत्र तथा स्यादविशेषतः॥
७५९॥ § 2623

तत्सम्बद्धस्वभावस्य वैगुण्यान्न तयोरसौ।
समवायस्तथा पश्चात्तादात्म्ये च कथं भवेत्॥
७६०॥ § 2625

एवं ह्यतिप्रसङ्गः स्यात्, नहि दण्डादिजातीनामेकदा लक्षितत्वात्परित्यक्तदण्डेष्वपि तेषु देवदत्तादिषु दण्डी कुण्डलीत्यादिमतिर्भवेत्। नच पाचकत्वादिजातिरत्राप्यस्तीति युक्तं, सद्योजातेऽपि जातेर्विद्यमानत्वात्पाचकादिबुद्धिप्रसङ्गः स्यात्। स्यादेतद्यथा सत्तानिबन्धनापि सदिति मतिर्भवन्ती न सर्वदा भवति, तथा जातिरप्याश्रयविशेषसमवायिनी भवन्ती न सर्वदा भविष्यति, तेन सद्योजातावस्थायां जातिर्नैव समवायिनी भविष्यति। समवायिनीत्युपलक्षणम्, नाभिव्यक्तेत्यपि ज्ञेयम्। एवं तर्हि न कदाचिदपि सा तत्समवायिनी प्राप्नोति। तथाहि—प्रथमतरं तयोर्जातिद्रव्ययोस्तत्सम्बद्धस्वभाववैगुण्यान्न समवायो जातेः, पश्चादपि तद्वैगुण्यं तदवस्थमेवेति कथं सा समवेयात्, नहि द्रव्यं भवतां मतेन क्षणिकं, येन पश्चाद्विशिष्टता तस्य भवेत्। तथेति। समवायिनी। तयोरिति। जातिद्रव्ययोः। तादात्म्य इति। अपरित्यक्तप्राक्तनविगुणरूपत्वे॥ ७५७॥ ७५८॥ ७५९॥ ७६०॥ § 2626

अथापि द्रव्यमनित्यमङ्गीक्रियते तदापि दोष इति दर्शयन्नाह—यदि नामेत्यादि। § 2627

यदि नामाध्रुवा व्यक्तिर्लभेतातिशयं तदा।
जातेस्तु विगुणं रूपं न कदाचिन्निवर्त्तते॥
७६१॥ § 2629

यदि नामाध्रुवतया व्यक्तिरतिशयं पश्चाल्लभते, जातेस्तु ध्रुवत्वात्प्राग्वत्पश्चादपि तत्समवायविगुणं रूपमस्ति, कथमिव पश्चादपि समवायिनी भवेत्। न चापि पश्चात्कालभाविद्रव्यसमवायाविगुणरूपैव जातिः सर्वदावस्थितेति शक्यं वक्तुम्, द्रव्य स्यापि नित्यत्वप्रसङ्गात्, तत्सम्बद्धस्वभावाया जातेः स- 249/k
दावस्थितत्वात्। नहि द्वितीयसम्बन्ध्यभावे तत्सम्बद्धस्वभावावैगुण्यं युक्तम्॥ ७६१॥ § 2630

पचनादीत्यादिनोद्योतकरविहितं परिहारमाशङ्कते। § 2631

पचनादिक्रियायाश्च प्रधानं साधनं मतम्।
पाचकादीति तच्चास्ति प्राधान्यं पाचकान्तरे॥
७६२॥§ 2633

स ह्याह—हेत्वर्थापरिज्ञानादिदमुच्यते। यथा पाचकादिशब्दा अनुवृत्ताश्च भवन्ति, नच पाचकत्वं नाम सामान्यमस्ति, तथा गवादिष्वनुवृत्तिप्रत्यया इति। यस्माद्विशेषप्रत्ययानामनाकस्मिकत्वादित्यस्य हेतोरयमर्थः। पिण्डप्रत्ययव्यतिरिक्तप्रत्ययस्य निमित्तान्तरादुत्पाद इति, न पुनः सर्वोऽनुवृत्तिप्रत्ययः सामान्यादेव भवतीति। एवं सति पचनक्रियाया यत्प्रधानं साधनं तत्पाचकशब्देनोच्यते, तच्च प्राधान्यं पाचकान्तरेऽप्यस्तीति न दोष इति॥ ७६२॥ § 2634

तदेतत्प्राधान्यमित्यादिना प्रतिविधत्ते। § 2635

प्राधान्यं किमिदं नाम न शक्तिरसमन्वयात्।
द्रव्यक्रियागुणात्मादि नात एवावकल्प्यते॥
७६३॥§ 2637

किमिदं प्राधान्यं नाम, यदि शक्तिः, तदयुक्तम्, तस्याः प्रत्याधारनियताया व्यक्त्यन्तरासमन्वयात्। नापि द्रव्यादीनामात्मा स्वभावः स्वातन्त्र्यमत एवासमन्वयात्। आदिशब्देन षड्दार्थव्यतिरिक्त इष्टो धर्मो गृह्यते। यत्पुनरुक्तं निमित्तान्तरादुत्पाद इत्यस्यायमर्थ इति, तत्र प्रतिविहितमेव सामान्येन किंचिन्निमित्तान्तरमस्तीति साधने सिद्धसाध्यता, सङ्केतमनस्कारस्य निमित्तत्वेनेष्टत्वात्, विशेषेण त्वन्वयवैकल्यंव्यभिचारश्च पाचकादिप्रत्ययैरिति॥ ७६३॥
§ 2638

तदित्यादिनोपसंहरति। § 2639

तद्विजातीयविश्लेषिरूपमात्रावसायिनी।
सङ्केतभेदसापेक्षा पाचकादिषु शेमुषी॥
७६४॥§ 2641

यथासङ्केतमेवातः शब्दा बुद्धय एव च।
विभागे न प्रवर्तन्ते विनैकेनानुगामिना॥
७६५॥§ 2643

तत्—तस्मात्, यद्यतो निमित्तान्तरं निरूप्यमाणं पाचकादिधियो नोपपद्यते। तस्मात्। विजातीयस्य व्यवच्छिन्नवस्तुमात्राध्यवसायिनी यथासमयं

पाचकः पाचक इत्येवमाकाराऽनुगता भिन्नेष्वपि वस्तुष्वभेदेन पाचकादिषु शेमुषी—धीरुपजायते, सर्वत्र विजातीयव्यवच्छेदस्य विद्यमानत्वात्। यत एवं 250/k
गवादिष्वपि यथासङ्केतमभिन्नाकारव्यवसायिनः प्रत्ययाः शब्दाश्च प्रवर्त्तिष्यन्ते विनापि सामान्यमित्यनैकान्तिकता हेतोः॥ ७६४॥ ७६५॥ § 2644

तथा चेत्यादिनाऽभावेऽभावबुद्धिश्चेत्येतत्समर्थयते। § 2645

तथा चाभावविज्ञानं नाभावेषु विरुध्यते।
ध्वनिर्वाऽनुगतोऽनर्थसङ्केतानुगमात्तयोः॥
७६६॥ § 2647

इदमेव हि सामान्यप्रत्ययस्य निबन्धनं व्यापि यदुत सङ्केताभोगः, अन्यथा ह्यभावेष्वभाव इत्यनुगतः प्रत्ययो ध्वनिश्च केन न विरुध्येत, न ह्यत्र जातिरस्ति वस्तुसमवायिनीत्वात्तस्याः। कस्मान्न विरुध्यत इत्यत्र कारणमाह—अनर्थसङ्केतानुगमात्तयोरिति। अविद्यमानो जात्यादिरर्थो यस्मिन्सङ्केते स तथोक्तः, तस्मादनुगमात —अन्वयात् तयोः—ध्वनिविज्ञानयोः। शब्दज्ञानयोः सङ्केतमात्रान्वयव्यतिरेकानुविधायित्वादिति यावत्॥ ७६६॥ § 2648

घटस्येत्यादिना शङ्करस्वामिन उत्तरमाशङ्कते। § 2649

घटस्य प्रागभावोऽयं घटप्रध्वंस इत्ययम्।
तद्वस्तूपाधिकानेव धीरभावान्प्रपद्यते॥ ७६७॥ § 2651

उपाधिगतसामान्यवशादेवानुवृत्तता।
तस्याः सर्वत्र चेन्नैवं वैलक्षण्यातदाश्रयात्॥
७६८॥ § 2653

घट इत्यादिका बुद्धिस्तेभ्यो युक्ताऽनुगामिनी।
नाभावो भाव इत्येषा तन्मतिस्तु विलक्षणा॥
७६९॥ § 2655

नहि सत्तावशाद्बुद्धिर्गौरश्च इति चेष्यते।

एकमेवान्यथा कल्प्यं सामान्यं सर्वसाधनम्॥
७७० ॥§ 2657

स ह्याह न हि तेष्वभावेष्वनुपाधिकाः प्रत्यया दृश्यन्ते, किं तर्हि ? घटस्य प्रागभावः घटस्य प्रध्वंसाभावः इत्येवं सर्वत्राभावप्रत्ययो वस्तूपाधिकानेवाभावानवलम्बते। तस्मात्सर्वत्रैव तस्या धिय उपाधिगतसामान्यवशादेवानुवृत्ततेति नास्ति व्यभिचार इति। तस्या इति। धियः प्रकृतत्वात्संबन्धः। नैवमित्यादिना प्रतिविधत्ते।वैलक्षण्यसहितोऽतदाश्रय इति विग्रहः। समाहारद्वन्द्वो वा। वैलक्षण्यादतदाश्रयाच्च नैव युक्तमित्यर्थः। तत्र वैल-
251/k क्षण्यादित्यस्य तावद्विस्तरेण समर्थनमाह—घट इत्यादि। न ह्येकोपाधिनिबन्धना भिन्नाकारा बुद्धयो युक्ताः, एकेनैव सर्वसामान्यकार्यसाधनादनेकसामान्यकल्पनावैयर्थ्यप्रसङ्गात्। तस्माद्घटत्वादिसामान्यवशाद्घट इत्यादिका धियो भवन्तु, अभाव इत्यादिकास्तु कथमिवात्यन्तविलक्षणास्तन्निबन्धना युज्येरन्,नहि सत्तावशाद्गोत्वादिधीर्भवेत्॥ ७६७॥ ७६८॥ ७६९॥ ७७०॥
§ 2658

भाविविक्तस्त्वाह—नहि सर्वत्र निमित्तानुरूपः प्रत्यय इष्यते। तथाहि—गजतुरगधवखदिरादिसमवायिनी बहुत्वसङ्ख्या सेनावनादिबुद्धीनां निमित्तं, पानककाञ्जिकादिबुद्धीनां विजातीयद्रव्यसंयोगो निमित्तम्, अन्यथाहि बहवः संयुक्ता इति च प्रत्ययः स्यादिति। तदेतन्न निमित्तेत्यादिनाऽऽशङ्क्य यद्येवमित्यादिना प्रतिविधत्ते। § 2659

न निमित्तानुरूपा चेत्सर्वस्मिन्बुद्धिरिष्यते।
यतस्सेनादिबुद्धीनां सङ्ख्यादीष्टं निबन्धनम्॥
७७१ ॥§ 2661

यद्येवमियमेष्वेव भेदेष्विष्टा न किं मतिः।
इच्छारचितसङ्केतभेदाभोगानुसारिणी॥ ७७२ ॥§ 2663

इयमिति। सामान्यधीः। सङ्केतस्य भेदो विशेषः॥ ७७१॥ ७७२॥
§ 2664

कः पुनरत्रातिशयो येनैवमुच्यत इत्याह—भेदेत्यादि। § 2665

भेदज्ञाने सतीच्छा हि सङ्केतकरणे ततः।
तत्कृतिस्तच्छ्रुतिश्चास्या आभोगस्तन्मतिस्ततः॥
७७३ ॥§ 2667

अन्वयव्यतिरेकाभ्यामिदमेव विनिश्चितम्।
समर्थं कारणं तस्यामन्येषामनवस्थितिः॥
७७४॥§ 2669

अन्वयव्यतिरेकसमधिगम्यः कार्यकारणभावः, स च सामान्यधियं प्रतीच्छारचितसङ्केताभोगमात्रस्य निश्चितः। तथाहि—प्रथमतरं तावद्भेदविषयमनुभवज्ञानमुत्पद्यते, तस्मिन्नुत्पन्ने सङ्केतकरणेच्छा जायते, ततश्चेच्छातस्तस्य सङ्केतस्य कृतिः— करणम्, ततस्तस्यैव व्यवहारकाले श्रुतिः—श्रवणम्, अस्याश्च श्रुतेः सकाशादुत्तरकालमाभोगो यथा श्रुतसङ्केतविषयः, ततश्चाभोगात्तेष्वेव भेदेषु तदध्यवसायेन प्रवृत्तेर्घट इत्यादिका मतिरुदयमासादयति। आगोपालमेतावन्मात्रमेवास्यां बुद्धौ कारणत्वेन निश्चितम्। अपरिदृष्टसामर्थ्यस्य तु सामान्यस्य कारणत्वोपकल्पनेऽतिप्रसङ्गः स्यात्, तदपि कल्पयित्वाऽपरमप्यदृष्टसामर्थ्येन तुल्यत्वात्किमिति न कल्प्येत॥ ७७३॥ ॥ ७७४॥ § 2670

252/k

तत्रैवोपचयमाह—अनुरूपो हीत्यादि। § 2671

अनुरूपो हि संसर्गी स्यादित्यन्यार्थकल्पना।
वैलक्षण्ये तु बुद्धीनामियदेवाश्रितं वरम्॥
७७५॥§ 2673

सामर्थ्यनियमो ह्यत्र कल्पनीयो वरं स च।
अन्वयव्यतिरेकाभ्यां कल्पितो ज्ञातशक्तिषु॥
७७६॥§ 2675

तथाहि भवद्भिः सामान्यबुद्धीनामनुरूपमालम्बनाख्यं हेतुं निरूपयद्भिः भेदन्यर्बुदस्य सामान्यमुपकल्पितम्, यदि च तदपि कल्पितं सामान्यमन्याकारा अपि बुद्धीर्जनयति तदा वरमियदेव, यदेव यथोपवर्णितं दृष्टसामर्थ्यं कल्पितं भवेत्। एवं ह्यदृष्टार्थकल्पना न कृता स्यात्। अपिच कथमभिन्नं सामान्यं विलक्षणा बुद्धीर्जनयतीति पृष्टेन सता वक्तव्यमिदमवश्यं, यदुत शक्तिप्रतिनियमोऽयं पदार्थानां यदेकमपि सदनेकाकारप्रत्ययोपजननायालमिति। यद्येवं, ज्ञातशक्तिषु निश्चितसामर्थ्येषु भेदादिष्वेव सामर्थ्यनियामकमिति न कल्प्येत। एवं हि नानुभवविरुद्धमनुष्ठितं स्यात्॥ ७७५॥ ७७६॥
§ 2676

स्यादेतत्सामान्यस्याप्यन्वयव्यतिरेकाभ्यां सामर्थ्यं निश्चितमेवेत्याह—अन्वयेत्यादि। § 2677

अन्वयानुविधानं च सामान्येषु न विद्यते।
सदाऽसत्त्वान्न नित्यानां व्यतिरेकस्तु संभवी॥
७७७ ॥§ 2679

सदा सदादिप्रत्ययानामसत्त्वादनुत्पत्तेर्नैषां तद्गतान्वयानुविधायित्वं युक्तम्। यदि ह्येते सामान्यानुविधायिनः स्युस्तदा सर्वदा सामान्यस्यावस्थितत्वात्किमिति सदा न भवेयुः, नहि सामान्यस्य काचिदपेक्षास्ति, परैस्तस्यानुपाधेयविशेषत्वादतो न तद्गतान्वयानुविधानमेषाम्। नापि व्यतिरेकानुविधानम्, तथाहि—यदाऽमी सदादिप्रत्यया नोत्पद्यन्ते तदा तत्र सामान्याभावः कारणमिति न शक्यं वक्तुम्, नित्यानां सदाऽवस्थायितया व्यतिरेकासम्भवात्, अतो नापि तद्गतव्यतिरेकानुविधानमेषामस्ति ॥ ७७७ ॥ § 2680

यतश्चैवं निमित्तान्तराभ्युपगमे सामान्यादिधियां दोषस्तस्माद्यत्परैरुच्यते गुणत्वादिरेव सामान्यविशेषो गुणादिष्वद्रव्याकर्मादिप्रत्ययहेतुः, सामान्येषु च सत्तादिषु सामान्यमित्यनुगतप्रत्ययस्यानेकार्थसमवायो निमित्तमिति, तदपास्तं भवतीत्येतदाह—अद्रव्यादीत्यादि। § 2681

253/k

अद्रव्यादिधियो हेतुर्न गुणत्वादि युक्तिमत्।
अनेकसमवायश्च न सामान्यधियस्ततः॥
७७८ ॥§ 2683

अतिप्रसङ्गश्चास्यामपि कल्पनायामिति दर्शयन्नाह—अनेकेत्यादि। § 2684

अनेकसमवायश्च सङ्ख्यादिष्वपि विद्यते।
सामान्येष्विव तेषु स्युः सामान्यमिति बुद्धयः॥
७७९ ॥§ 2686

यद्यनेकार्थसमवायः सामान्येषु सामान्यधियो निबन्धनं स्यात्, तदा सङ्ख्यासंयोगविभागावयविद्रव्यादिष्वनेकद्रव्याश्रितत्वमस्तीति, तेष्वपि सामान्यमिति धियः स्युर्निमित्ताविशेषात्। एकबुद्धिहेतुत्वमपि सत्तादीनां सदाद्याकारेण स्वात्मनियतत्वान्न सामान्यान्तरमास्कन्दति, ततश्च तद्बलेनापि न सामान्येषु सामान्यं सामान्यमित्यनुगतः प्रत्यय उपपद्यते। ततश्चासम्बद्धमिदं

कुमारिलेनोक्तम्— तस्मादेकस्य भिन्नेषु या वृत्तिस्तन्निबन्धनः। सामान्यशब्दः सत्तादावेकधीकरणेन वेति॥ ७७९॥ § 2687

एवं तावद्वैलक्षण्यादित्येतद्व्याख्यातम्, अतदाश्रयादित्येतद्व्याचिख्यासुराह— घटत्वादि चेत्यादि। § 2688

घटत्वादि च सामान्यं घटादावेव वर्त्तते।
नाभावेष्वस्य वृत्तिस्तु तस्मात्तेषु कथं नु धीः॥
७८० ॥§ 2690

नाश्रयान्तरवृत्ताद्धि युक्तावन्यत्र धीध्वनी।
हस्तित्वादि न कर्कादावत्रैकार्थाश्रयोऽपि न॥
७८१ ॥§ 2692

रसः शीतो गुरुश्चेति स्यादेकार्थाश्रयान्मतिः।
इहायमपि नैवास्ति नाभावो वर्तते क्वचित्॥
७८२ ॥§ 2694

घटादिष्वेव सामान्यं समवेतं नाभावेषु तस्यावस्तुत्वात्। तत्कथं तेष्वभावेषु तस्माद्घटत्वादेरन्यसमवायिनः सामान्यानुकारानुगतः प्रत्ययो भवेत्। नहि गजत्वादि कर्कादिष्वेकाकारप्रत्ययनिबन्धनं भवति। ननु चान्यत्र समवेतादप्यन्यत्र प्रत्ययो दृष्टस्तद्यथा मधुरो रसः स्निग्धः शीतो गुरुश्चेति। अत्राह—एकार्थाश्रयोऽपि नेति। यत्रैव हि द्रव्ये माधुर्यं समवेतं तत्रैव शीतत्वादयोऽपीत्येकार्थसमवायबलादत्र भवति सामानाधिकरण्यम्, न तु पुनरभावो घटत्वादिसामान्यैः सह क्वचिदप्येकस्मिन्द्रव्ये समवैति। नीरूपस्य क्वचिदपि समवायायोगात्॥ ७८०॥ ७८१॥ ७८२॥ § 2695

254/k

विशेषणेत्यादिनाऽत्रोद्योतकरस्य परिहारमाशङ्कते। § 2696

विशेषणविशेष्यत्वसम्बन्धोऽप्यस्ति चेदिह।
सम्बन्धान्तरसद्भावे ननु चासौ प्रकल्प्यते॥
७८३ ॥§ 2698

---

६ हस्तित्वादि न] Correction: ;
हस्तित्वादिव (sic!)हस्तित्वादि न

तयोरासत्तिमाश्रित्य विशेषणविशेष्यता।
कल्प्यते तदभावे तु साऽनिमित्ता न सिद्ध्यति॥
७८४॥§ 2700

स ह्याह। घटत्वादीनां सामान्यानां घटादिभिः समवायलक्षणः सम्बन्धः, अभावानां तु विशेषणविशेष्यभावलक्षणस्ततश्च सामान्याभावयोरेकार्थसम्बन्धोऽत्रापिव्यपदेशहेतुरस्त्येवेति। तदत्र प्रतिविधानमाह—सम्बन्धान्तरेत्यादि। सम्बन्धान्तरोपजनितो हि भावानां परस्परं विशेषणविशेष्यभावः, तद्यथा दण्डदेवदत्तयो राजपुरुषयोश्च संयोगस्वस्वामिभावादिकं सम्बन्धमाश्रित्य विशेषणविशेष्यता, तस्य तु सम्बन्धान्तरस्य विशेषणविशेष्यभावं प्रति निमित्तभूतस्याभावे सा विशेषणविशेष्यता कथमिव भवेत्, अन्यथा ह्यतिप्रसङ्गः स्यात्। एवं हि सर्वं सर्वस्य विशेषणं भवेत् ॥ ७८३॥ ७८४॥ § 2701

कथमिदानीं घटस्य प्रागभाव इत्यादिविशेषणविशेष्यभावो लोके सम्बन्धमन्तरेण प्रतीत इत्याह—घटस्येत्यादि। § 2702

घटस्य प्रागभावोऽयमित्यादि वचनं पुनः।
कल्पनामात्रनिर्माणं कल्पिते शूरतादिवत्॥
७८५॥§ 2704

विशेषणविशेष्यत्वं यत्र वस्तुसमाश्रयम्।
सम्बन्धान्तरसद्भावस्तथावश्यं प्रकल्प्यते॥
७८६॥§ 2706

प्रागभूत्वाभवतीत्येतन्मात्रार्थजिज्ञासायां बुद्धिरियं कल्पिका भावादर्थान्तरभूतमिव सम्बन्धेन प्रागभावमुपदर्शयन्ती प्रसूयते। तदभिप्रायवशादत्र विशेषणविशेष्यभावः, नंतु वास्तवः। यथा कल्पनाशिल्पिघटितस्य शूरत्वादयो धर्मा विशेषणत्वेनोपादीयन्ते। यत्र तु भवद्भिर्वस्तुसमाश्रयो विशेषणविशेष्यभावो गृहीतस्तत्रावश्यं सम्बन्धान्तरमन्वेषणीयमन्यथा व्यवस्थानियमो न स्यात्॥ ७८५॥ ७८६॥ § 2707

अपिचायं न नवो(नश्चो ?)द्यानुरूप एव परिहारः शङ्करस्वामिनोक्त इति दर्शयन्नाह—अभावोऽभाव इत्यादि। § 2708

अभावोऽभाव इत्येव ज्ञानमत्रावचोदितम्।

उपाधिस्थं च सामान्यं स्वाश्रयेष्वेव वर्त्तते॥
७८७॥§ 2710

255/k

यदिदं घटाभावे पटाभावे शशविषाणाद्यभावे वाऽभावोऽभाव इत्यनुगामिज्ञानं प्रवृत्तं तत्रास्माभिरसत्यपि सामान्येऽनुगतप्रत्ययदर्शनाद्यथाऽन्यत्रापि सामान्यकल्पनेति चोदितम्, न तु सजातीयानां बहूनां घटादीनां ये प्रागभावादयस्तत्र यज्ज्ञानं (तत्र)। यदि नामैवं ततः किमित्याह—उपाधिस्थं चेत्यादि। घटाद्युपाधिगतं यत्सामान्यं घटत्वादि, तत्स्वाश्रयेष्वेव घटादिषु वर्त्तते, नाश्रयान्तरे पटादौ, तत्कथं विजातीयपटादिगतप्रागभावादौ तस्मात्प्रत्ययः स्यादिति भावः॥ ७८७॥ § 2711

सर्वत्रैकमनुगामि सामान्यमस्तीति चेदाह—नचेत्यादि। § 2712

नचानुयायि तेष्विष्टमन्यत्सत्त्वं यदीष्यते।
न षडर्थातिरेकेण जायन्तेऽभावबुद्धयः॥
७८८॥§ 2714

नहि सकलपटादिविजातीयानेकपदार्थव्याप्यपरं सामान्यमस्ति, यतोऽसौ प्रत्ययो भवेत्। स्यान्मतं सत्ताख्यं महासामान्यमस्ति तद्बलादभावप्रत्ययो भविष्यतीति, तदयुक्तम्, व्यभिचारात्। तथाहि—षड्पदार्थव्यतिरेकेणापरस्य प्रतिसङ्ख्यानिरोधादेः पदार्थस्याभाव इति भवतामभावबुद्धयो याः समुदाचरन्ति, तथोत्पाद्यकथारचितानांकपिञ्जलादीनामभावः परमार्थत इति मतयस्तासु कतमदुपाधिगतं सामान्यं, यत्तासां निमित्तं स्यात्। न ह्येषां प्रतिसङ्ख्यानिरोधादीनां सत्त्वमस्ति भवन्मतेन। एतेनैतदपि प्रत्युक्तं यदुक्तं कुमारिलेन— ननु च प्रागभावादौ सामान्यं वस्तु नेष्यते। सत्तैव ह्यत्र सामान्यमनुत्पत्त्यादिरूपतेति। अनुत्पत्त्यादिरूपता—अनुत्पादादिविशिष्टेत्यर्थः। अत्रापि ह्ययमेव दोषः। नहि मतान्तरीयानां पदार्थानामुत्पाद्यकथार्थानां च सत्तास्ति, येन तदभावप्रतीतिः स्यात्। तदध्यवसायिविकल्पसत्ता तत्र बहिरर्थशून्या प्रतीयत इति चेत्। यद्येवं नित्यैकसत्तारहितो विकल्पमात्रात्मक एव सकलशब्दार्थः किं नेष्यते। अन्यथा हि नित्यैकसत्तादिरूपसामान्याभ्युपगमे सत्तापुरुषत्वादीनां सर्वत्र स्वभेदे निरतिशयत्वात्कथं भिन्नरूपा प्रतीतिः स्यादिति चोद्यं दुष्परिहारमेव स्यादिति॥ ७८८॥ § 2715

इदानीमिच्छारचितरूपेषु नष्टाजातेषु चैतत्समर्थनमाह—इच्छारचितेत्यादि। § 2716

इच्छारचितरूपादावर्थे जातिर्न विद्यते।

व्यक्तेरसम्भवादेव स्थिता तद्व्यभिचारिता॥
७८९ ॥§ 2718

अतीतानुपजातेषु नित्यसामान्यगोचरम्।
ज्ञानं चेत्केवलं चेदं सामान्यं गृह्यते न तु॥
७९० ॥§ 2720

256/k

केवलस्योपलम्भे वा न व्यक्तीनामिदं भवेत्।
सामान्यं न च तद्व्यङ्ग्यं विन्ध्यस्येव हिमालयः॥
७९१ ॥§ 2722

नोत्पत्तिपारतन्त्र्येण प्रतिबद्धं हि तास्विदम्।
न ज्ञानपारतन्त्र्यं च नित्यत्वात्केवलग्रहात्॥
७९२ ॥§ 2724

स्वाश्रयेन्द्रिययोगादिव्यपेक्षाया असम्भवात्।
तत्सदैवोपलभ्येत यदि वा न कदाचन॥
७९३ ॥§ 2726

स्वात्मनि ज्ञानजनने योग्यं वाऽयोग्यमेव वा।
यद्येकदा तदा रूपं सर्वदैव हि तद्भवेत्॥
७९४ ॥§ 2728

तस्य योग्यमयोग्यं वा रूपं यत्प्रकृतिस्थितम्।
तद्धौ(?)व्यादप्रकम्प्यं हि को नाम चलयिष्यति॥
७९५ ॥§ 2730

इच्छया रचितं रूपं स्वभावो यस्य स तथोक्तः, स आदिर्यस्येति विग्रहः। आदिशब्देन नष्टाजातपरिग्रहः। नहि तत्र कल्पितादिषु सामान्यमस्ति, येन तन्निबन्धना तेषु मतिः स्यात्। स्यादेतन्माभूत्कल्पितेषु सामान्यम्, अतीताजाते तु तन्निबन्धना बुद्धिर्भविष्यतीति, तदेतन्मिथ्या, न ह्याश्रितानामयं धर्मो यदाश्रयमन्तरेणापि केवलानामवस्थानं भवेत्, अनाश्रितत्वप्रसङ्गात्। भवतु नाम केवलानामवस्थानं तथापि दोष एव, केवलस्य सामान्यस्य ग्रहणानभ्युपगमात्। तथाचोक्तं—स्वाश्रयेन्द्रियसन्निकर्षापेक्षप्रतिपत्तिकं सामान्यमिति। केवलस्य सामान्यस्य ग्रहणे सामान्यधियो व्यक्तिव्यवसायो न प्राप्नोति व्यक्तेस्तदानीमभावात्। व्यक्तीनामिदं सामान्यमिति संबद्धश्च न स्यात्, निबन्धनाभावात्। तथाहि—निबन्धनं भवत्संबन्धस्य तद्व्यङ्ग्यत्वं वा सामान्यस्य भवेत्, तज्जन्यता वा, तद्ग्रहणापेक्षग्रहणता वा। तत्र न तावत्ताभिर्व्यङ्ग्यत्वात्तत्संबद्धं सामान्यं, नित्यतया परैरनुपकार्यस्य विशेषाभावाद्व्यङ्ग्यत्वानुपपत्तेः। यो हि यस्यानुपकारकः स तस्याभिव्यञ्जको न भवति, यथा विन्ध्यस्य हिमवान्। तथाच व्यक्तयः सामान्यस्येति व्यापकविरुद्धोपलब्धेः। अनुपकारकस्यापि व्यञ्जकत्वेऽतिप्रसङ्गः, सर्वः सर्वस्य व्यञ्जकः स्यात्। अत एव नित्यतया तस्याभ्युपगतत्वात्तासु नोत्पत्तिपारतन्त्र्यमपि तस्य युक्तम्। केवलस्यापि ग्रहणान्नापि तज्ज्ञानपारतन्त्र्यमिति, त्रयाणामपि पक्षाणामसम्भवः। ततश्च यदिदमुच्यतेस्वाश्रयेन्द्रियसन्निकर्षापेक्षप्रतिपत्तिकं सामान्यमिति तदयुक्तमाश्रयस्यैवायोगात्, कुत स्तद्गतेन्द्रियसन्निकर्षाद्यपेक्षता भविष्यति। आदिग्रह- 257/k
णेनात्ममनःसन्निकर्षादिपरिग्रहः। नित्यतया परैरनुपाधेयविशेषत्वान्नाप्यस्य क्वचिदपेक्षाऽस्ति। ततश्च यदि तत्स्वविषयज्ञानोत्पादनसमर्थं तदा सर्वदैव तज्जनयेत्, अथासमर्थं तदा न कदापि जनयेत्, नहि तस्य तद्रूपं समर्थमसमर्थं वा तत्क्वचिदन्यथाकर्तुमीशते नित्यत्वहानिप्रसङ्गात्। यथोक्तम्— तस्य शक्तिरशक्तिर्वा या स्वभावेन संस्थिता। नित्यत्वादचिकित्स्यस्य कस्तां क्षपयितुं क्षम॥ इति॥ ७८९॥ ७९०॥७९१॥ ७९२॥ ॥ ७९३॥ ७९४॥ ७९५॥
§ 2731

यच्चोक्तं—गोतश्चार्थान्तरं गोत्वमित्यादि। तस्य पाचकादिभिरनैकान्त इति दर्शयति—गोत इत्यादि। § 2732

गोतश्चार्थान्तरं गोत्वं भिन्नधीविषयत्वतः।
रूपस्पर्शादिवत्तस्येत्युक्तेश्चैत्रतुरङ्गवत्॥ ७९६॥§ 2734

इत्यस्मिन्व्यभिचारोक्तिः पाचकत्वादिभिस्तथा।
अनया च दिशाऽन्येऽपि सर्वे दूष्याः कुहेतवः॥
७९७॥§ 2736

तथाहि पाचकादिभ्यः पाचकत्वादेरसत्यप्यर्थान्तरभावे पाचकः पाचक इति भिन्नधीविषयत्वं भवत्येव, देवदत्तस्य पाचकत्वमिति च व्यतिरेकविभक्तिर्भवतीत्यतः साधारणानैकान्तिकता हेतोः। अन्येऽपि कुहेतव इति। कुमारिलगदिताः। तत्रामी तेन कुहेतव उक्ताः। गोपिण्डभेदेषु या गोबुद्धिरियमेकगोत्वनिबन्धना गवाभासत्वादेकाकारत्वाच्च। एकगोपिण्डविषयबुद्धिवत्। अथवा येयं गोबुद्धिः सा साबलेयान्न भवति, यद्वा तद्व्यतिरिक्तार्थालम्बना, तदभावेऽपि भावात्, यथा घटे पार्थिवबुद्धिः। सर्वगतत्वं कथं तस्य सिद्धमिति चेदुच्यते। येयं गोमतिः सा प्रत्येकसमवेतार्थविषया प्रतिपिण्डं कृत्स्नरूपपदार्थाकारत्वात्, प्रत्येकव्यक्तिविषयबुद्धिवत्। एकत्वमपि सिद्धमेव, तथाहि यद्यपि सामान्यं प्रत्येकं सर्वात्मना परिसमाप्तम्, तथापि तदेकमेव, एकाकारबुद्धिग्राह्यत्वात्, यथा नञ्युक्तेषु ब्राह्मणादिनिवर्त्तनम्। न चैतच्छक्यं वक्तुम्—भिन्नेषु योऽयमभिन्नाकारप्रत्ययः स भ्रान्तस्तेन तद्बलाद्वस्तुतत्त्वव्यवस्थानमसङ्गतमिति, यतो नास्य कारणदुष्टताऽस्ति। नापि बाधकप्रत्ययोद्भवस्तस्मान्मिथ्यात्वनिबन्धनाभावादयुक्तमेतदिति। आह च— पिण्डभेदेषु गोबुद्धिरेकगोत्वनिबन्धना। गवाभासैक- 258/k रूपाभ्यामेकगोपिण्डबुद्धिवत्॥ न साबलेयाद्गोबुद्धिस्त तोऽन्यालम्बनापि वा। तदभावेऽपि सद्भावाद्घटे पार्थिवबुद्धिवत्॥ प्रत्येकसमवेतार्थविषया वाऽथ गोमतिः। प्रत्येकं कृत्स्नरूपत्वात्प्रत्येकव्यक्तिबुद्धिवत्॥ प्रत्येकसमवेताऽपि जातिरेकैकबुद्धितः। नञ्युक्तेष्विव वाक्येषु ब्राह्मणादिनिवर्त्तनम्॥ नैकरूपाममतिर्गोत्वे मिथ्या वक्तुं च शक्यते। नात्र कारणदोषोऽस्ति बाधकप्रत्ययोऽपि वा॥ इति। तदत्र प्रथमे साधने तावत्साध्यविकलमुदाहरणम्, एकस्य गोत्वस्यासिद्धेस्तन्निबन्धनत्वमेकगोबुद्धेरप्यसिद्धमेव। अथ सामान्येनैकनिबन्धनत्वं साध्यते, तदा सिद्धसाध्यता, विजातीयव्यवच्छेदेन कल्पितैकगोव्यावृत्तिनिबधनत्वस्येष्टत्वात्। न साबलेयाद्गोबुद्धिरित्यत्रापि साक्षात्तदुत्पत्तिनिषेधे साध्ये सिद्धसाध्यता, त(स्य)स्वलक्षणानुभवसङ्केतमनस्कारादिव्यवहितत्वात्। अथ परम्परयापि ततो न भवतीति साध्यते, तदा प्रतिज्ञाया अनुभवबाधा दृष्टान्तस्य च साध्यविकलता। अन्यालम्बनत्वेऽपि साध्ये —यदि सन्निहिते साबलेये गौरयमिति या बुद्धिरुत्पद्यते सा ततोऽन्यालम्बनेति साध्यते, तदाऽत्राप्यनुभवविरोधः। तथाहि—सा सन्निहितपिण्डाध्यवसायेनैव वर्त्तते। दृष्टान्तस्य च साध्यविकलता। अथ तदसन्निधाने या बाहुलेयादिसन्निधौ तथा प्रवृत्ता बुद्धिः सा ततोऽन्यालम्बनेति साध्यते, तदा सिद्धसाध्यता। यदि तु साक्षाद्वस्तुसदालम्बनेति साध्यते तदाऽनैकान्तिकता। न ह्यस्य किंचित्परमार्थतोवस्तु सदालम्बनमस्तीति प्रतिपादितत्वात्। यच्च प्रत्येकपरिसमाप्तार्थविषयत्वसाधनम्, तत्रापि सामान्येन साध्ये सिद्धसाध्यता, प्रतिपदार्थमतद्रूपपरावृत्तवस्तुरूपाध्यवसायेन प्रवृत्तत्वात्। अथ नित्यैकप्रत्येकपरिसमाप्तवस्तुभूतसामान्याख्यपदार्थविषयत्वं साध्यते, तदा दृष्टान्तस्य साध्यविकलता हेतोश्चानैकान्तिकता, तथाविधेन

धर्मेण क्वचिदप्यन्वयासिद्धेः। एकस्य च सर्वात्मना बहुषु परिसमाप्तत्वे सर्वेषां
व्यक्तिभेदानां परस्परमेकरूपतापत्तिः, एकव्यक्तिपरिनिष्ठितस्वभावसामान्यप-
दार्थसंस्पृष्टत्वादेकव्यक्तिरूपत्वात्। सामान्यस्य वाऽनेकत्वापत्तिर्युगपदनेकव-
स्तुपरिसमाप्तात्मरूपत्वात्, दूरदेशावस्थितानेकभाजनगतबिल्वादिफलवदित्य-
नुमानबाधा। तेन यदुक्तं—न चात्र बाधकः प्रत्ययोऽस्तीति, तदसिद्धम्।
पूर्वं चोक्तत्वाद्वक्ष्यमाणत्वाच्च बाधकस्य। यच्चैकत्वसाधनं जातेः, तत्रापि जा-
तेः प्रत्येकसमवेताया असिद्धत्वादेकबुद्धिग्राह्यत्वमसिद्धमित्याश्रयासिद्धो हेतुः।
ब्राह्मणादिनिवर्त्तनं च परमार्थतो नैकमवस्तुत्वादिति साध्यविकलमुदाहर-
णम्। काल्पनिके चैकत्वे साध्ये सिद्धसाध्यता, कल्पितस्यापोहरूपत्वेनेष्ट-
त्वात्। यच्चाप्युच्यते—न चात्र कारणदोषोऽस्तीति, तदप्यसिद्धमेव, अनादेरवि 259/k
द्यावासनालक्षणस्य कारणदोषस्य विद्यमानत्वात्। तदेवमनया दिशा कुहेत-
वोऽमी दूष्याः॥ ७९६॥ ७९७॥ § 2737

एवं तावद्विस्तरेण परोक्तसामान्यसाधनानां दूषणमभिधाय सामान्यस्य
बाधकं प्रमाणमभिधातुकाम आह—अपिचेत्यादि। § 2738

अपिचानेकवृत्तित्वं सामान्यस्य यदुच्यते।
तत्र केयं मता वृत्तिः स्थितिः किं व्यक्तिरेव वा॥
७९८॥ § 2740

स्वरूपाप्रच्युतिस्तावत्स्थितिरस्य स्वभावतः।
नाधारस्तत्कृतौ शक्तो येन स्थापकता भवेत्॥
७९९॥ § 2742

गमनप्रतिबन्धोऽपि न तस्य बदरादिवत्।
विद्यते निष्क्रियत्वेन नाधारोऽतः प्रकल्प्यते॥
८००॥ § 2744

स्थितिस्तत्समवायश्चेन्न तदेव विचार्यते।
सोऽभीष्टोऽयुतसिद्धानामाश्रयाश्रयितात्मकः॥
८०१॥ § 2746

९ तदेव] Correction : ; तथैव (sic !)तदेव

अवश्यं सामान्यस्य भेदेषु वृत्तिरेष्टव्या। अन्यथा कथं तेषु प्रतिनियमेनैकाकारा बुद्धिस्तन्निबन्धना सेत्स्यति। तत्र च वृत्तिरस्य भवन्ती स्थितिलक्षणा वा भवेत्, तदभिव्यक्तिलक्षणा वा, स्थितिरपि द्विधा—स्वभावाप्रच्युतिलक्षणा वा, यद्वाऽधोगतिप्रतिबन्धलक्षणा। तत्र न तावदाद्या—नित्यत्वात्स्वत एव स्वभावाप्रच्युतेः सिद्धत्वात्। नापि द्वितीया—अमूर्त्तसर्वगतत्वाभ्यां निष्क्रियतयाऽधोगमनासम्भवादतो न तत्प्रतिबन्धकत्वसाधारणं युक्तम्। भेदेषु यः सामान्यस्य समवायः सा स्थितिरित्येतदप्यनुत्तरमेव, तस्यैव समवायस्य विचार्यमाणत्वात्। तथाहि—अपृथक्सिद्धानामाश्रयाश्रयिभावलक्षणः सम्बन्धः समवाय उच्यते, तच्चाश्रितत्वं सामान्यस्य तत्प्रतिबद्धस्थितितया वा भवेत्, तदभिव्यङ्गितया वेतीदमेव निरूपयितुमारब्धम्। नहि परस्परासङ्कीर्णात्मनामकिञ्चित्करमर्थान्तरं समवायो युक्तोऽतिप्रसङ्गात्। एवं हि सर्वः सर्वस्य समवायः स्यात्, तथाहि—परस्परव्यावृत्तशरीरान्भावान्यः संश्लेषयति स समवायः कल्पितः। न चार्थान्तरसद्भावेऽपि स्वात्मनि व्यवस्थिताः परस्परस्वभावमन्वाविशन्ति, स्वरूपहानिप्रसङ्गात्। तस्य चार्थान्तरस्य समवाय इति नामकरणे न विवाद इत्ययुक्तमर्थान्तरं स्थितिरिति॥ ७९८॥ ७९९॥ ८००॥ ८०१॥ § 2747

260/k

स्यादित्यादिना सामान्यं प्रत्याधारकल्पनाया अत्यन्तासम्बद्धतां दर्शयति। § 2748

स्यादाधारो जलादीनां गमनप्रतिबन्धकः।
अगतीनां किमाधारैः सामान्यानां प्रकल्पितैः॥
८०२॥§ 2750

स्वज्ञानोत्पत्तियोग्यत्वे किमभिव्यक्तिकारणैः।
स्वज्ञानोत्पत्त्ययोग्यत्वे किमभिव्यक्तिकारणैः॥
८०३॥§ 2752

ह्यः समर्थः समर्थात्मा व्यञ्जकैः क्रियते यदि।
भावोऽस्थिरो भवेदेवं दीपव्यङ्ग्यघटादिवत्॥
८०४॥§ 2754

अगतीनामिति। गतिरहितानाम्। अमूर्त्तसर्वगतत्वाभ्यां गतेरभावात्। तदभिव्यक्तिलक्षणापि स्थितिरयुक्ता, तथाहि—तद्विषयज्ञानोत्पादनमेव त-

स्याभिव्यक्तिर्न तु स्वभावपरिपोषणलक्षणा नित्यस्य स्वभावान्यथाकरणासम्भवात्, ततश्च तस्य यदि स्वतएव ज्ञानोत्पादनसामर्थ्यं तदा किमित्यभिव्यक्तिकारणमपेक्षते। अथासामर्थ्यं तदा परैरनाधेयविषयत्वान्न तदपेक्षा युक्तिमती। परैराधेयविशेषत्वे चाङ्गीक्रियमाणे सत्यनित्यत्वप्रसङ्गः, ततश्च व्यक्तिवदेवासाधारणत्वान्न सामान्यं स्यात्। भाव इति। भवतोऽस्मादभिधानप्रत्ययाविति कृत्वा कृत्स्न एव सामान्यपदार्थ उच्यते। प्रयोगः— यस्य यस्मिन्वृत्तिनिबन्धनं न किंचिदस्ति न तत्तस्मिन्वर्तते, यथा विन्ध्ये हिमवान्, नास्ति च सामान्यस्य भेदेषु वृत्तिनिबन्धनं किंचिदिति व्यापकानुपलब्धिः॥ ८०२॥ ॥ ८०३॥ ८०४॥ § 2755

घटादीत्यादिना दूषणान्तरमप्याह। § 2756

घटादिजातिभेदाश्च स्वाश्रयेष्वेव भाविनः।
सर्वत्र वृत्तिभाजो वा भवेयुः परजातिवत्॥
८०५॥§ 2758

घटत्वादिजातिभेदादि। घटत्वपार्थिवत्वादयः सर्वगतत्वेन वर्ण्यमानाः कदाचित्स्वाश्रयमात्रव्यापितया वर्ण्येरन्, यद्वा व्यक्तिशून्येऽपि देशे सर्वत्र भावादिति पक्षद्वयम्। परजातिवदिति। महाविषयतया सत्ता परेऽत्यभिधीयते। इयं च महाविषयत्वमात्रसाम्येनैव दृष्टान्तीकृता। नतु व्यक्त्यन्तरालवर्त्तिदेशव्यापितया, तस्या अपितद्धर्माप्रतीतेः॥ ८०५॥ § 2759

तत्र प्रथमे पक्षे दोषमाह—तत्रेत्यादि। § 2760

तत्र देशान्तरे वस्तुप्रादुर्भावे कथं नु ते।
दृश्यन्ते वृत्तिभाजो वा तस्मिन्निति न गम्यते॥
८०६॥§ 2762

261/k

घटादिव्यक्तिशून्ये देशे घटादिवस्तुप्रादुर्भावे सति ते जातिभेदा घटत्वादयः कथं तत्र घटादौ दृश्यन्ते वर्त्तन्ते चेति न गम्यते—नावबुध्यत इति यावत्॥ ८०६॥ § 2763

कथमित्याह—नहीत्यादि। § 2764

न हि तेन सहोत्पन्ना नित्यत्वान्नाप्यवस्थिताः।
तत्र प्रागविभुत्वेन नचाऽऽयान्त्यतोऽक्रियाः॥
८०७॥§ 2766

तथाहि—यदि घटादिना व्यक्तिभेदेन सहोत्पन्नास्ते भवेयुः प्राग्वा तत्राव-स्थिताः स्युरन्यतो वा देशान्तरादागच्छेयुस्तदा तत्र दृश्येरन्वर्त्तेरन्वा। यावता न तेषामुत्पादो नित्यत्वात्, नापि प्रागवस्थानं असर्वव्यापित्वात्; नाप्यन्यदेशादागमनमक्रियत्वात्; तत्कथं तेषु तेषां वृत्तिरुपलब्धिर्वा भवेत्। प्रयोगः—ये यत्र नोत्पन्ना नापि प्रागवस्थायिनो नापि पश्चादन्यतो देशादागतिमन्तस्ते तत्र नोपलभ्यन्ते नापि वर्त्तन्ते, यथा शशशिरसि तद्विषाणम्, तथाच सामान्यं तच्छून्यदेशोत्पादवति घटादिके वस्तुनीति व्यापकानुपलब्धिः। न चायमनैकान्तिको हेतुः, तत्र वृत्त्युपलम्भयोः प्रकारान्तराभावात्॥ ८०७॥ § 2767

द्वितीयेऽपि पक्षे दोषमाह—स्वाश्रयेत्यादि। § 2768

स्वाश्रयेन्द्रिययोगादेरेकस्मिंस्तद्ग्रहे सति।
सर्वत्रैवोपलभ्येरंस्तत्स्वरुपाविभागतः॥ ८०८॥§ 2770

स्वाश्रयेन्द्रियसंयोगादेः—उपलम्भहेतोः। आदिशब्देनात्ममनःसन्निकर्षादिपरिग्रहः। एकस्मिन्व्यक्तिभेदे तेषां जातिभेदानां ग्रहणे सति सर्वत्रैव विजातीयेऽपि व्यक्तिभेदेऽन्तराले चोपलभ्येरन्, तेषां यथास्वमेकरूपतया प्रत्येकं गृहीतरूपाव्यतिरेकात्॥ ८०८॥ § 2771

एतदेव स्पष्टयन्नाह—ज्ञातादित्यादि। § 2772

ज्ञातादव्यतिरिक्तं चेत्तस्यापि ग्रहणं भवेत्।
तद्वदेव न वा तस्य ग्रहणं भेद एव वा॥
८०९॥§ 2774

तथाहि—दृष्टव्यक्तिसमवेतसामान्यरूपाद्विज्ञातादव्यतिरिक्तं चेद्व्यक्त्यन्तरालवर्त्ति सामान्यरूपं तदा तस्यापि ग्रहणं भवेत्, गृहीतादभिन्नत्वात्, गृहीतस्वरूपवत्। अथ तस्य ग्रहणं न भवति, तथासत्यगृहीतरूपाव्यतिरेकात्तद्वद्दृष्टव्यक्तिसमवायिनोऽपि ग्रहणं न स्यात्। अथोभयरूपताऽङ्गीक्रियते तदा
262/k स्वभावभेदप्रसङ्गः, परस्परविरु द्धधर्माध्यासात्। न ह्यन्योन्यप्रत्यनीकग्रहणाग्रहणधर्माध्यासितमपि सदेकमिति युक्तमभिधातुं स्वच्छचेतसः, अतिप्रसङ्गात्। एवं हि विश्वमेकमेव द्रव्यं स्यात्, ततश्च सहोत्पादविनाशादिप्रसङ्गः, अन्यथैकमिति नाममात्रमेव स्यात्, नच नाम्नि विवादः ॥ ८०९॥ § 2775

तदेवं सर्वप्रकारेण जातिमभिदूष्य प्रयोगं रचयन्नाह—नान्येत्यादि। § 2776

३ असर्व] Correction : ; सर्व (sic !)असर्व

नान्यकल्पितजातिभ्यो वृक्षादिप्रत्यया इमे।
क्रमित्वानुगमादिभ्यः पाचकादिधियो यथा॥
८१० ॥§ 2778

नित्यस्याजनकत्वं च बाधकं संप्रतीयते।
संयोगदूषणे सर्वं यदेवोक्तं प्रबाधकम्॥
८११ ॥§ 2780

ये क्रमित्वानुगामित्ववस्तुत्वोत्पत्तिमत्त्वादिधर्मोपेतास्ते परपरिकल्पितनित्यैकसर्वगतसामान्यतो न भवन्ति, यथा पाचकादिप्रत्ययाः, तथाचामी वृक्षादिप्रत्यया इति विरुद्धव्याप्तोपलब्धिः। नित्यताभावविरुद्धानित्यताभावेन क्रमित्वादेर्व्याप्तत्वात्। नित्यस्य च क्रमाक्रमाभ्यामर्थक्रियाविरोधान्नानैकान्तिकता हेतोः। दृष्टान्तस्य च साध्याविकलतायाः पूर्वं विस्तरेण प्रसाधितत्वान्नासिद्धो दृष्टान्तः। बाधकान्तरमप्याह-संयोगेत्यादि। तत्र संयोगदूषणे बाधकमुक्तम्, एकस्यानेकवृत्तिश्च न युक्तेति प्रबाधकमित्यनेन। यथाचानेकत्रैकस्य वृत्तिर्न युक्ता, तथाऽवयविदूषणे तद्ध्येकवृत्तिभाजेत्यादिना प्रदर्शिता॥ ८१०॥ ८११॥ § 2781

एवमित्यादिनोपसंहरति। § 2782

एवमेकान्ततो भिन्नजातिरेषा निराकृता।
जैमिनीयाभ्युपेता तु स्याद्वादे प्रतिषेत्स्यते॥ ८१२॥
इति सामान्यपरीक्षा।§ 2785

यैर्वैशेषिकादिभिर्व्यक्तितो जातिरेकान्तभिन्नेष्टा तेषामिदं दूषणमुक्तम्। ये पुनरभिन्नामुभयरूपां च जातिमिच्छन्ति जैनजैमिनीयसाङ्ख्यादयः, तदुपवर्णिता जातिःप्रस्तावात्स्याद्वादे निषेत्स्यते। इह तु वैशेषिकनैयायिकोपकल्पिताया जातेः प्रस्तुतत्वान्न दूष्यते प्रस्तावाभावादिति भावः॥ ८१२॥ § 2786

इति सामान्यपरीक्षा।

०.१५ विशेषपरीक्षा।

263/k

विशेषदूषणमाह—ये पुनरित्यादि। § 2788

ये पुनः कल्पिता एते विशेषा अन्त्यभाविनः।
नित्यद्रव्यव्यपोहेन तेऽप्यसंभविताः क्षणाः॥
८१३॥§ 2790

यत्तावन्नित्यद्रव्यवृत्तित्वमन्त्यद्रव्यभावित्वं च विशेषाणां लक्षणमुक्तं तदसम्भवदोषदुष्टत्वादलक्षणमेव, नहि नित्यं किंचिद्द्रव्यमस्ति, तस्य पूर्वं द्रव्यपरीक्षायां व्यपोढत्वात्, तत्कथं तद्वृत्तित्वमेषां सिद्ध्येत्॥ ८१३॥ § 2791

यदपि योगिनां विशेषप्रत्ययबलात्सत्त्वमेषां साध्यते, तत्राप्यनैकान्तिकतेति दर्शयति-अण्वाकाशदिगादीनामित्यादि। § 2792

अण्वाकाशदिगादीनामसङ्कीर्णं यदा स्थितम्।
स्वरूपं च तदैतस्माद्वैलक्षण्योपलक्षणम्॥
८१४॥§ 2794

मिश्रीभूतापरात्मानो भवेयुर्यदि ते पुनः।
नान्यभावेऽप्यविभ्रान्तं वैलक्षण्योपलक्षणम्॥
८१५॥§ 2796

कथं तेषु विशेषेषु वैलक्षण्योपलक्षणम्।
स्वत एवेति चेन्नैवमण्वादावपि किं मतम्॥
८१६॥§ 2798

तथा—अण्वादीनां रूपं स्वस्वभावावस्थानात्परस्परमसङ्कीर्णं वा भवेत्, मिश्रीभूतं वा। यद्याद्यः कल्पस्तदा स्वत एवासङ्कीर्णवस्तूपलम्भात्तेषु योगिनां परस्परवैलक्षण्यबुद्धिर्भविष्यतीति व्यर्था विशेषान्तरकल्पना। अथ द्वितीयः पक्षस्तदा कथमिव विशेषाख्यपदार्थान्तरसन्निधानेऽपि तेषु परस्पराव्यतिभिन्नस्वभावेषु विलक्षणं ज्ञानं योगिनामभ्रान्तमुत्पद्यते, भ्रान्तमेव तत्स्यादतस्मिंस्तथावृत्तत्वात्। ततश्चायोगिन एव स्युः, भ्रान्तज्ञानसंसर्गित्वादिति भावः। किंच—यदि विशेषाख्यपदार्थान्तरमन्तरेण विलक्षणा धीर्न जायते तत्कथं तेष्वेव विशेषेषु विलक्षणा धीर्भवति, नहि तेष्वपरे विशेषाः सन्त्यनवस्थाप्रसङ्गात्। नित्यद्रव्यवृत्तयोऽन्त्या इति चाभ्युपगमहानिप्रसङ्गाच्च, विशेषेष्वपि वृत्तेः। अतः स्वत एवैषां परस्परवैलक्षण्यमतिहेतुत्वमङ्गीक्रियते तदा परमाण्वादीनामपि तद्धेतुत्वं स्वत एवास्तु, को ह्यत्र तेषु प्रद्वेषो येन तेषां स्वत एव परस्प-

रव्यावृत्तमूर्त्तीनामपि सतां परमाण्वादीनां परस्परवैलक्षण्यज्ञानोत्पत्तिहेतुत्वं नेष्यते विशेषाणां त्विष्यत इति। नात्र किंचित्कारणमुत्पश्यामोऽन्यत्र जाड्यात् ॥ ८१४॥ ८१५॥ ८१६॥ § 2799

264/k

स्वत एवेत्यादिना प्रशस्तमतेरत्रोत्तरमाशङ्कते। § 2800

स्वत एवाशुचित्वं हि श्वमांसादेर्यथा स्थितम्।
तद्योगादपरेषां तु तथेहापि यदीष्यते॥ ८१७॥ § 2802

यथा प्रकाशको दीपो घटादेश्च स्वतः स्थितः।
तत्प्रकाशात्मतायां च नियतोऽयमिदं तथा॥
८१८॥ § 2804

स ह्याह—यथा श्वमांसादीनां स्वत एवाशुचित्वं, तद्योगाच्चान्येषां तथेहापि तादात्म्यादन्त्येषु विशेषेषु स्वत एव व्यावृत्तिप्रत्ययहेतुत्वं, तद्योगात्परमाणुषु। किंचातदात्मकेष्वप्यन्यनिमित्तः प्रत्ययो भवत्येव, यथा घटादिषु प्रदीपात्, नतु प्रदीपेषु घटादिभ्य इति। नियतोऽयमिति। घटादिः। इदं तथेति। वैलक्षण्योपलक्षणं विशेषेभ्य एवाण्वादीनां, विशेषाणां स्वत एवेत्यर्थः॥ ८१७॥ ८१८॥ § 2805

ननु चेत्यादिना प्रतिविधत्ते। § 2806

ननु चाशुचिभावोऽऽयं सांवृतो न तु तात्त्विकः।
तत्स्वयं परतो वाऽयं कथं नाम भविष्यति॥
८१९॥ § 2808

अथवा भाविकत्वेऽपि श्वमांसादिवशादिमे।
जायन्तेऽशुचयो भावा नैव नित्या अजन्मतः॥
८२०॥ § 2810

प्रदीपादिप्रभावाच्च ज्ञानोत्पादस्वरूपताम्।

लभन्ते क्षणिका ह्यर्थाः कलशाभरणादयः॥
८२१ ॥§ 2812

न विवादास्पदीभूतविशेषबलभाविनी।
वैलक्षण्यमतिस्तेषु क्रमोत्पत्तेः सुखादिवत्॥ ८२२॥
इति विशेषपरीक्षा।§ 2815

अशुचित्वं हि नाम भावानां कल्पनोपरचितं, न पारमार्थिकमनवस्थितत्वात्। तथाहि—यदेव द्रव्यं कस्यचिच्छ्रोत्रियादेरशुचित्वेनाभाति, तदेवान्यस्य कौटिकादेः शुचित्वेन, न चैकस्य परस्परप्रत्यनीकानेकरूपसंपातो युक्त एकत्वहानिप्रसङ्गात्। अथवा भवतु भाविकमशुचित्वं भावानां, तथापि नेदं दृष्टान्तेन समम्। तथाहि—श्वमांसादिकाशुचिद्रव्यसंपर्कादन्नादयो भावाः परित्यक्तपूर्वशुचिस्वभावा अन्य एवाशुचयो जायन्ते। अतो युक्तमेषां परोपाधिकमशुचित्वम्। नत्वेवं किंचित्परमाण्वादिषु निबन्धनमस्ति, येनैषां
265/k परोपाधिकं वैलक्षण्यं भवेत्तथा, नित्यत्वादेवाजन्मतोऽनुत्पत्तेः। एवं प्रदीपदृष्टान्तेऽपि घटादीनां ज्ञानोत्पत्तिहेतुत्वं परोपाधिकं योज्यम्। नेत्यादिना —विशेषाणां बाधकं प्रमाणमाह। तस्यापि पूर्ववत् स्वरूपं प्रतिबन्धश्च वाच्यः ॥ ८१९॥ ८२०॥ ८२१॥ ८२२॥ § 2816

इति विशेषपरीक्षा।

०.१६ समवायपदार्थपरीक्षा।

समवायदूषणार्थमाह—तन्तुष्वित्यादि। § 2818

तन्तुष्वेव पटोऽमीषु वीरणेषु कटः पुनः।
इत्यादीहमतेर्भावात्समवायोऽवगम्यते॥
८२३ ॥§ 2820

अयुतसिद्धानामाधार्याधारभूतानामिहबुद्धिहेतुर्यः सम्बन्धः स समवायः, स चायमिह तन्तुषु पट इत्यादीहबुद्धिविशेषतो द्रव्यादिभ्योऽर्थान्तरत्वेनावगम्यते। यथाहिसत्ताद्रव्यत्वादीनां स्वाधारेष्वात्मानुरूपप्रत्ययकर्तृत्वात्स्वाश्रयादिभ्यः परस्परतश्चार्थान्तरभावस्तथा समवायस्यापि पञ्चसु पदार्थेषु—इह तन्तुषु पटः, इह द्रव्ये गुणकर्मणी, इह द्रव्यगुणकर्मसु सत्ता, इह द्रव्ये द्रव्यत्वम्, इह गुणेषु गुणत्वम्, इह कर्मणि कर्मत्वम्, इह द्रव्येष्वन्त्या वि-

शेषा, इत्यादिप्रत्ययदर्शनात्पञ्चभ्यः पदार्थेभ्योऽर्थान्तरत्वं गम्यते। प्रयोगः—यो येषु यदाकारविलक्षणः प्रत्ययः, स तदर्थान्तरनिबन्धनः, यथा देवदत्ते दण्डीति प्रत्ययः, तथाचायं पञ्चसु पदार्थेष्विहप्रत्यय इति स्वभावहेतुं मन्यते॥ ८२३॥ § 2821

प्रतिबन्धमस्य दर्शयन्नाह—तस्याभाव इत्यादि। § 2822

तस्याभावे स चेत्किं हि मतेरस्या निबन्धनम्।
न विशेषमतिर्दृष्टा निमित्तान्तरवर्जिता॥ ८२४॥ § 2824

इहबुद्ध्यविशेषाच्च योगवन्न विभिद्यते।
सर्वस्मिन्भाववत्त्वेष एक एव प्रतीयते॥ ८२५॥ § 2826

कारणानुपलब्धेश्च नित्यो भाववदेव सः।
न ह्यस्य कारणं किञ्चित्प्रमाणेनोपलभ्यते॥
८२६॥ § 2828

निबन्धनमन्तरेण भवतो नित्यं सत्तादिप्रसङ्गो बाधकं प्रमाणम्। एवं तावद्वैशेषिकाणां मतेन—इहबुद्धिलिङ्गानुमेयः समवायः, नैयायिकमतेन तु—इहबुद्धिप्रत्यक्षगम्य एव। तथाहि ते—अक्षव्यापारे सतीह तन्तुषु पट इत्यादिप्रत्ययोत्पत्तेः प्रत्यक्षत्वमाचक्षते। स चायं समवायो यथा संयोगः सम्बन्धेषु भिन्नस्तथा नायं भिद्यते, किं तर्हि ? भाववत् सत्तावत्, त- 266/k
ल्लिङ्गाविशेषाद्विशेषलिङ्गाभावात्सर्वत्रैक एवसमवायः। योगवदिति। वैधर्म्यदृष्टान्तः। अकारणत्वाच्च भाववदेव नित्यः सिद्धः, अकारणत्वं च प्रमाणतः कारणानुपलब्धेः सिद्धम्॥ ८२४॥ ८२५॥ ८२६॥ § 2829

तदेतदित्यादिना दूषणमारभते। § 2830

तदेतदिहविज्ञानं परेषामेव वर्त्तते।
स्वसिद्धान्तानुरागेण न दृष्टं लौकिकं तु तत्॥
८२७॥ § 2832

तदनेन हेतोराश्रयासिद्धतामाह। इह तन्तुषु पट इत्यादिका हि धियः स्वसिद्धान्तानुरागोपकल्पिता एव। नतु लोके तथोत्पद्यमानाः संवेद्यन्त इत्यतः साध्यधर्मी नसिद्धः॥ ८२७॥ § 2833

नानात्वेत्यादिना—तामेव धर्म्यसिद्धिं समर्थयते। § 2834

नानात्वलक्षणे हि स्यादाधाराधेयभूतयोः।
इदमत्रेति विज्ञानं कुण्डादौ श्रीफलादिवत्॥
८२८॥§ 2836

नैव तन्तुपटादीनां नानात्वेनोपलक्षणम्।
विद्यते येन तेषु स्युरिदमत्रेति बुद्धयः॥ ८२९॥§ 2838

ययोर्हि नानात्वमुपलक्षितं भवेत्तयोरेवाधाराधेयभावे सतीहबुद्धिरुद्भवन्ती लोके दृष्टा, यथेह कुण्डे श्रीफलानीति, नच तन्तुपटोर्नानात्वमुपलक्षितं विद्यते च, तत्कथंतत्रेहबुद्धिर्भवेत्॥ ८२८॥ ८२९॥ § 2839

स्यादेतद्यदि नामाऽस्माभिः सिद्धान्तबलादुपकल्पितेयमिहमतिस्तथाप्यस्या भवद्भिर्निबन्धनं वक्तव्यमित्याह—स्वेच्छेत्यादि। § 2840

स्वेच्छया रचिते वाऽस्मिन्कल्पितेष्विव वस्तुषु।
न कारणनियोगोऽयं परं प्रत्युपपद्यते॥
८३०॥§ 2842

यो हि यत्कारणमेव नेच्छति स कथं कार्यं स्वयमुपकल्प्य तत्कारणं पर्यनुयुज्यते, आत्मैव हि भवता पर्यनुयोक्तव्यः, येनेदं कार्यमुपकल्पितमिच्छावशात्, नैवेच्छानां वस्तुस्वभावानुरोधः, स्वातन्त्र्यवृत्तित्वादासाम्, नातो वस्तुसिद्धिरनवस्थाप्रसङ्गात्। तथाहि—भवदुपकल्पितस्यापि हि वस्तुनः कैश्चिदन्यथाऽपि कल्पयितुं शक्यत्वात् ॥ ८३०॥ § 2843

अपिच न केवलमिह तन्तुषु पट इत्यादिका धियो लोके न सिद्धाः, किन्तु तद्विपरीता एव प्रसिद्धा इति दर्शयन्नाह—वृक्ष इत्यादि। § 2844
267/k

वृक्षे शाखाः शिलाश्चाग इत्येषा लौकिकी मतिः।
अगाख्यपरिशिष्टाङ्गनैरन्तर्योपलम्भनात्॥
८३१॥§ 2846

तौ पुनस्तास्विति ज्ञानं लोकातिक्रान्तमुच्यते।

घटे रूपं क्रियादीति तादात्म्यं त्ववगच्छति॥
८३२ ॥§ 2848

रूपकुम्भादिशब्दा हि सर्वावस्थाभिधायकाः।
तद्विशेषाभिधानाय तथा ते विनिवेशिताः॥
८३३ ॥§ 2850

तानाश्रित्यैषु विज्ञानं तेनाकारेण वर्त्तते।
समवायान्न भेदस्य सर्वेषामप्यनीक्षणात्॥
८३४ ॥§ 2852

वृक्षे शाखाः पर्वते शिला इत्येवं लोके दृश्यते, नतु शाखायां वृक्षः शिलासु पर्वत इति। सापि च वृक्षे शाखेत्यादिका मतिर्न समवायवशात्, किन्तु—अगाख्यानि यानि परिशिष्टानि—विवक्षितशाखाशिलाव्यतिरिक्तान्यधोव्यवस्थितानि स्कन्धादीन्यङ्गानि, तेषां नैरन्तर्योपलम्भात्। अगशब्देनात्र न गच्छन्तीति कृत्वा तरवो गिरयश्चाभिप्रेताः। ताविति। अगवृक्षौ। तास्विति। शिलाशाखासु। यत्तर्हीदमिह घटे रूपरसगन्धस्पर्शाश्चलनं चेत्यादि लोके प्रसिद्धं ज्ञानं तस्य समवायं मुक्त्वा कोऽन्यो विषय इत्याह—घट इत्यादि। तादात्म्यं—घटस्वभावत्वं, रूपादीनामवगच्छति—ज्ञानं लोको वेति शेषः। घटे रूपं—घटस्वभावं रूपं, न घटाद्यात्मकमित्यर्थः। बहुषु रूपादिषु साधारणशक्तिविशेषप्रतिपादनेच्छया तदन्यरूपादिव्यवच्छेदेन घटादिश्रुतेर्निवेशः, रूपादिश्रुतिस्तु प्रत्येकमसाधारणचक्षुर्विज्ञानादिकार्यनिर्वर्तनसामर्थ्यद्योतनाय निवेशितेत्यतो घटादिश्रुती रूपादिभेदानाक्षिपतीति सामानाधिकरण्याभावाद्वैयधिकरण्येनैव तादात्म्यं प्रतीपाद्यते। उभयोस्तु किमर्थं प्रयोग इत्याह —रूपकुम्भेत्यादि। रूपादिशब्दा हि सर्वावस्थस्य रूपादेर्वाचकाः। तथाहि—यथाघटात्मनाऽवस्थितरूपादि रूपादीत्युच्यते तथा पटाद्यात्मनाऽवस्थितमपि, ततश्च केवलेभ्यो रूपादिशब्देभ्यो न विशेषः प्रतीयते किमवस्था रूपादय इति, घटे रूपादयइत्येवं तु प्रयोगे घटात्मकास्त इति पटादिव्यवच्छेदेन प्रतीयन्ते। तथा घटशब्दोऽपि सर्वावस्थं घटं ब्रूते, शुक्लं पीतं चलं निश्चलमित्यादिकम्, अतः केवलान्न विशेषप्रतीतिः, घटे शुक्लं रूपमित्यादिप्रयोगे तु तदन्यरूपादिव्यवच्छेदेन प्रतिपत्तिर्भवति, ततश्च तस्यैवम्भूतस्य विशेषस्याभिधानाय यथा तथा घटे रूपमिति ते निवेशिताः। शब्दा इति शेषः। तान् शब्दानाश्रित्यैषु घ- 268/k
टादिषु तेनाकारेण घटे रूपमित्यादिना प्रवर्त्तते ज्ञानं, नतु समवायमाश्रित्य

वर्त्तत इति सम्बन्धः। अत्र कारणमाह—भेदस्येत्यादि। नहि समवायघटरूपादीनां सर्वेषां परस्परतो भेद उपलभ्यते। येनेयं समवायनिबन्धना बुद्धिर्भवेत्। एतेन हेतोरनैकान्तिकत्वं प्रतिज्ञायाश्चानुमानादिबाधितत्वमुक्तम्॥ ८३१॥ ८३२॥ ८३३॥ ८३४॥ § 2853

यच्चोक्त मिहबुद्ध्यविशेषा दित्यादि, तत्राह—यद्येक इत्यादि। § 2854

यद्येकः समवायः स्यात्सर्वेष्वेव च वस्तुषु।
कपालादिष्वपि ज्ञानं पटादीति प्रसज्यते॥
८३५॥ § 2856

गजादिष्वपि गोत्वादि समस्तीत्यनुषज्यते।
ततो गवादिरूपत्वममीषां शावलेयवत्॥
८३६॥ § 2858

पटस्तन्तुषु योऽस्तीति समवायात्प्रतीयते।
अस्ति चासौ कपालेषु तस्येति न तथेति किम्॥
८३७॥ § 2860

नाश्रितः स कपाले चेन्ननु तन्तुष्वपीष्यते।
आश्रितः समवायेन स कपालेऽपि नास्ति किम्॥
८३८॥ § 2862

तन्तोर्यः समवायो हि पटस्येत्यभिधीयते।
स घटस्य कपालेषु तद्धीरनवधिर्भवेत्॥
८३९॥ § 2864

यद्येकस्त्रैलोक्ये समवायः स्यात्तदा कपालेषु (पट) इत्यादयोऽपि धियः प्रसूयेरन्। अश्वादिषु च गोत्वादिर्विद्यत इत्येवं स्यात्। ततश्च सावलेयादिभेदवद्गजादिष्वपि गवादिप्रत्ययो भवेत्। तथाहि—तन्तुषु पट इति यत्समवायबलात्प्रतीतिरुपवर्णिता स समवायस्तस्य पटस्य कपालादिष्वप्यस्तीति

किमिति तथा प्रतीतिर्न भवेत्। स्यादेतत् न कपाले पट आश्रितस्तेन तथा प्रत्ययो न भवतीति। एतदपि मिथ्या। यतस्तन्तुष्वपि पट आश्रित इति यत्समवायबलादुपवर्ण्यते, स समवायः कपालेषु किं नास्ति, येन तत्र तन्तुष्विव पटोऽस्तीति तद्बुद्धिर्न भवेत्। किन्तु य एव तन्तौ पटस्य समवाय इति निर्दिश्यते स एव पटस्य समवायः कपालेषु, तत्कथं सङ्करो न स्यात्।तत्—तस्मात्, धीरनवधिः—अवधिरहिता भवेत्। ततश्च द्रव्यगुणकर्मणां द्रव्यत्वगुणत्वकर्मत्वादिविशेषणैः सम्बन्धस्यैकत्वात्। पञ्चपदार्थविभागो न स्यात्॥ ८३५॥ ॥ ८३६॥ ८३७॥ ८३८॥ ८३९॥ § 2865

269/k

एवमित्यादिना गजादिषु गवादिबुद्धिप्रसङ्गं समर्थयते। § 2866

एवं यश्च गजत्वादिसमवायो गजादिषु।
गोत्वादिजातिभेदानां स एव स्वाश्रयेष्वपि॥
८४० ॥§ 2868

आधारेत्यादिनाऽत्र प्रशस्तमतेरुत्तरमाशङ्कते। § 2869

आधाराधेयनियमः स चैकत्वेऽपि विद्यते।
द्रव्येष्विव हि तज्जातिकर्मस्वेव च कर्मता॥
८४१ ॥§ 2871

स ह्याह—यद्यप्येकः समवायस्तथापि पञ्चपदार्थसङ्करो न भवति, आधाराधेयनियमात्। तथाहि—द्रव्येष्वेव द्रव्यत्वं, गुणेष्वेव गुणत्वं, कर्मस्वेव कर्मत्वम्, इत्येवंद्रव्यत्वादीनां प्रतीनियताधारावच्छेदेन प्रतिपत्तिरुपजायते॥ ८४१॥ § 2872

यद्येवं तर्हि समवायः प्रतिपदार्थं भिन्नः प्राप्नोतीत्याह—इहेत्यादि। § 2873

इहेति समवायोत्थविज्ञानान्वयदर्शनात्।
सर्वत्र समवायोऽयमेक एवेति गम्यते॥
८४२ ॥§ 2875

द्रव्यत्वादिनिमित्तानां व्यतिरेकस्य दर्शनात्।

धियां द्रव्यादिजातीनां नियमस्त्ववसीयते॥
८४३ ॥§ 2877

इहेति समवायनिमित्तस्य प्रत्ययस्य सर्वत्राभिन्नाकारतयाऽन्वयदर्शनात्सर्वत्रैकःसमवाय इति गम्यते। सत्यपि चैकत्वे द्रव्यत्वादिनिमित्तानां धियां प्रतिनियताधारावच्छेदेनोत्पत्तेः व्यतिरेकस्यानन्वयलक्षणस्य दर्शनाद्द्रव्यत्वादिजातीनां व्यतिरेको विज्ञायते। तेन पञ्चपदार्थसङ्करो न भवति॥ ८४२॥ ८४३॥ § 2878

कथं पुनः सम्बन्धाविशेषेऽप्यमीषामाधाराधेयप्रतिनियमो युज्यत इत्याह—तद्यथेत्यादि। § 2879

तद्यथा कुण्डदध्नोश्च संयोगैक्येऽपि दृश्यते।
आधाराधेयनियमस्तथेह नियमो मतः॥
८४४ ॥§ 2881

व्यङ्ग्यव्यञ्जकसामर्थ्यभेदाद्द्रव्यादिजातिषु।
समवायैकभावेऽपि नैव चेत्स विरुध्यते॥
८४५ ॥§ 2883

यथाहि कुण्डदध्नोः संयोगैकत्वेऽपि भवत्याश्रयाश्रयिप्रतिनियमः, तथा द्रव्यत्वादीनां समवायैकत्वेऽपि व्यङ्ग्यव्यञ्जकशक्तिभेदादाधाराधेयप्रतिनियम इति। स इत्याधाराधेयनियमः॥ ८४४॥ ८४५॥ § 2884
270/k

आधाराधेय इत्यादिना—प्रतिविधत्ते। § 2885

आधाराधेयनियमो नन्वेकत्वेऽस्य दुर्घटः।
द्रव्यत्वं द्रव्य एवेष्टं कथं तत्समवायतः॥
८४६ ॥§ 2887

तस्यासौ समवायश्च गुणादिष्वपि विद्यते।
गुणजात्यादिसम्बन्धादेक एव ह्ययं तयोः॥
८४७ ॥§ 2889

न ह्यस्माकं रूपत्वादीनां रूपादिष्वाधेयनियमः सिद्धः, किन्तु भवतामेव, स च सर्वत्र समवायमेकमेवाभ्युपगच्छतां दुर्घट इत्यादिप्रसङ्गापादानं क्रियते। तथाहि द्रव्य एव द्रव्यत्वमित्येवं यो नियम इष्यते स समवायबलादेव, तस्य च द्रव्यत्वादेर्यः समवायः स एव गुणादिष्वप्यस्ति, गुणत्वादिजात्या तेषां सम्बन्धत्वात्। यदि नाम सम्बन्धस्तथापि स एव तत्र समवायोऽस्तीति कथमवसीयत इत्याह—एक एवेत्यादि। तयोरिति। द्रव्यत्वगुणादिजात्योः। ततश्चाभिन्ननिमित्तत्वात्तत्सङ्करप्रसङ्गो दुर्निवार इति भावः॥ ८४६॥ ८४७॥
§ 2890

अन्यथा गुणजात्यादिभिन्न एव भवेदयम्।
योगिभेदात्प्रतिव्यक्ति यथा योगो विभिद्यते॥
८४८॥§ 2892

अन्यथेति। यदि द्रव्ये द्रव्यत्वस्य यः समवायः स एव गुणादिषु गुणत्वादीनां न भवेत्तदा संयोगवत्प्रत्याधारं समवायो भिद्यते॥ ८४८॥ § 2893

यच्चोक्तं द्रव्यत्वादिनिमित्तानामित्यादि, तत्राह—द्रव्यत्वादीत्यादि। § 2894

द्रव्यत्वादिनिमित्तानां व्यतिरेको न युज्यते।
धियां निमित्तसद्भावादतस्तन्नियमोऽपि न॥
८४९॥§ 2896

न ह्यविकले निमित्ते सति कार्यस्य व्यतिरेकोऽभावो युक्तोऽतत्कार्यत्वप्रसङ्गात्। ततश्च धियां व्यतिरेकायोगात्तस्याप्याधाराधेयभावस्य नियमो न युक्तः॥ ८४९॥ § 2897

ननु द्रव्य एव द्रव्यत्वमाश्रितं स्थितमित्यादिव्यपदेशतो नियमो भविष्यतीत्याह —तदाश्रितत्वेत्यादि। § 2898

तदाश्रितत्वस्थानादि तस्मादेवाभिधीयते।
समवायादतश्चैतन्न युक्तं तन्नियामकम्॥
८५०॥§ 2900

तस्मादेव हि समवायादाश्रितत्वादिव्यवस्थानमुपवर्ण्यते भवद्भिः, तस्य च सर्वत्राविशिष्टत्वे कथमेष नियमो योक्ष्यते। तस्मादेतदप्याश्रितत्वादि न तस्याधाराधेयभावस्य नियामकं युक्तम्, आधाराधेयभावेन सहैकयोगक्षेमत्वादेषाम्॥ ८५०॥ § 2901
271/k

व्यङ्ग्यव्यञ्जकशक्तिप्रतिनियमात्तर्हि नियमो भविष्यतीत्याह—व्यङ्ग्येत्यादि। § 2902

व्यङ्ग्यव्यञ्जकसामर्थ्यभेदोऽपि समवायतः।
नान्यतस्तु स नित्यानामुत्पादानुपपत्तितः॥
८५१॥ § 2904

द्रव्यत्वादिसामान्यव्यञ्जकत्वं द्रव्यादीनां यदुच्यते तत्समवायबलादेव। तथाहि —यस एव द्रव्यत्वं द्रव्ये समवेतं तत एव तेन तद्व्यज्यत इत्युच्यते। अन्यत इति। सौगतोपवर्णितात् ज्ञानोत्पादनयोग्यस्वभावोत्पादनात्। यस्मान्नित्यानामपि सत्तादीनां समवाय इष्टः, न च नित्यानामुत्पत्तिर्युक्ता॥ ८५१॥ § 2905

एतदेव न हीत्यादिना समर्थयते। § 2906

नहि दीपादिसद्भावाज्जायन्ते यादृशा इमे।
विज्ञानजनने योग्या घटाद्या जातयस्तथा॥
८५२॥ § 2908

यश्चापि दधिकुण्डसंयोगो दृष्टान्तत्वेनोक्तः, सोऽप्यस्माकमसिद्ध इति दर्शयति—कुण्डदध्नोरित्यादि। § 2909

कुण्डदध्नोश्च संयोग एकः पूर्वं निराकृतः।
न चासौ नियतस्तस्माद्युज्यते(तिप्रसङ्गतः)॥
८५३॥ § 2911

पूर्वमिति। संयोगपदार्थदूषणे। भवतु नाम संयोग एकः, तत्रापि तुल्य एव प्रसङ्ग इति दर्शयति—न चासावित्यादि। तस्मादिति। संयोगात्। दध्नि कुण्डमित्यादिबुद्धिप्रसङ्गोऽतिप्रसङ्गः। संयोगस्य निमित्तस्य निर्विशिष्टत्वात्॥ ८५३॥ § 2912

यच्चोक्तं कारणानुपलब्धेर्नित्यः समवाय इति तत्राह—नित्यत्वेनेत्यादि। § 2913

नित्यत्वेनास्य सर्वेऽपि नित्याः प्राप्ताः (घटादयः)।
आधारेषु सदा तेषां समवायो न संस्थितेः॥
८५४॥ § 2915

यदि हि समवायो नित्यः स्यात्तदा घटादीनामपि नित्यत्वप्रसङ्गः, स्वाधारेषु तेषां सर्वदाऽवस्थानात्। तथाहि—समवायास्तित्वादेवैषां स्वाधारेष्ववस्थानमिष्यते, स च समवायो नित्य इति किमिति सदाऽमी न संतिष्ठेरन्॥ ८५४॥ § 2916

स्वारम्भकेत्यादिना परस्योत्तरमाशङ्कते। § 2917

स्वारम्भकविभागाद्वा यदि वा तद्विनाशतः।
ते नश्यन्ति क्रियाद्या (दीव) योगादेरिति चेन्न तत्॥
८५५ ॥§ 2919

स्वाधारैस्समवायो हि तेषामपि सदा मतः।
तेषां विनाशभावे तु नियताऽस्यापि नाशिता॥
८५६ ॥§ 2921

272/k

स्यादेतत्—घटादीनां ये स्वारम्भकावयवास्तेषां विभागाद्विनाशाद्वा घटादीनां विनाशः। यथा घटस्योद्वेष्टनपाकावस्थयोः क्रियादयः स्पर्शवद्द्रव्यसंयोगादिभ्यो विनश्यन्ति। यथोक्तम्—स्पर्शवद्द्रव्यसंयोगात्कर्मणो नाशः कार्यविरोधि च कर्मेति। तथा बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दस्य शब्दान्तरादिति परप्रक्रिया। तेन सत्यपि समवायेऽवस्थितिहेतौ सहकारिकारणान्तराभावाद्विरोधिप्रत्ययोपनिपाताच्च न नित्यत्वप्रसङ्गो घटादीनामिति परस्य भावः। न तदित्यादिना प्रतिषेधति। नैतद्युक्तं, यतस्तेषामपि स्वारम्भकावयवानां कपालादीनां स्वारम्भकेष्ववयवान्तरेषु समवायः सर्वदाऽस्त्येवेति कुतो विनाशो विभागो वा। न केवलं तदारब्धानां द्रव्याणां क्रियादीनां चेत्यपिशब्देन दर्शयति। यदि तु स्वारम्भकाणामवयवानां विनाशोऽभ्युपगम्येत, तदा नियतमस्य समवायस्यापि विनाशः प्राप्नोति॥ ८५५॥ ८५६॥ § 2922

कस्मादित्याह—सम्बन्धिनो निवृत्तौ हीत्यादि। § 2923

सम्बन्धिनो निवृत्तौ हि सम्बन्धोऽस्तीति दुर्घटम्।
नहि संयुक्तनाशेऽपि संयोगो नोपतिष्ठते॥
८५७ ॥§ 2925

यथा संयोगभावे तु संयुक्तानामवस्थितिः।

समवायस्य सद्भावे तथा स्यात्समवायिनाम्॥
८५८ ॥§ 2927

एतदेव घटयन्नाह—नहीत्यादि। ततश्च विनष्टसम्बन्धित्वान्नष्टसंयोगिसंयोगवदनित्यः समवायः प्राप्नोतीत्युक्तं भवति। सम्बन्धिनां वा स्थितिः प्राप्नोति, अविनष्टसंबन्धत्वात्, अनुपरतसंयोगद्रव्यद्वयवत्। अन्यथा तत्सम्बन्धस्वभावहानिरुभयेषामपि प्रसज्येत॥ ८५७॥ ८५८॥ § 2928

एकसम्बन्धनाशेऽपीत्यादिना परः प्रत्यवतिष्ठते। § 2929

एकसम्बन्धिनाशेऽपि समवायोऽवतिष्ठते।
अन्यसम्बन्धिसद्भावाद्योगो नो चेन्न भेदतः॥
८५९ ॥§ 2931

एवं मन्यते यदि प्रथमे हेतौ विनष्टाशेषसम्बन्धित्वादिति हेत्वर्थोऽभिप्रेतः।
तदा पक्षैकदेशासिद्धता हेतोः। न ह्यशेषाणां सम्बन्धिनां विनाशः क्वचिद-
स्ति। प्रलयेऽपिपरमाण्वादीनामवशिष्यमाणत्वात्। अथ यथाकथंचिद्विनष्टस-
म्बन्धित्वसम्बन्धमधिकृत्यहेतुरुच्यते, तदाऽनैकान्तिकता, यदि नामैकः सम्ब-
न्धी क्वचिद्विनष्टस्तथाऽप्यपरसम्बन्धिनिबन्धनावस्थितिरस्य भविष्यति। यद्येवं
273/k संयोगस्याप्यनया नीत्या नित्यत्वं प्राप्नो तीत्याशङ्क्य परः प्रतिविधत्ते—न
भेदत इति। संयोगो हि प्रतिसंयोगि भिद्यते। तेनास्यानित्यत्वं युक्तं, सम-
वायस्तु—इहप्रत्ययनिबन्धनस्याभिन्नत्वादेक एव जगति। तेनास्यानित्यत्वम-
युक्तमन्यत्रापि सम्बन्ध्यन्तरे तस्योपलभ्यमानत्वात्॥ ८५९॥ § 2932

यद्येवमित्यादिना प्रतिविधत्ते। § 2933

यद्येवं ये विनश्यन्ति घटाद्याः समवायिनः।
तेषां वृत्त्यात्मको योऽसौ समवायः प्रकल्पितः॥
८६० ॥§ 2935

स एव व्यवतिष्ठेत किं सम्बन्ध्यन्तरस्थितेः।
अथान्य एव संयोग........बहुतादिवत्॥
८६१ ॥§ 2937

नाद्यस्तल्लक्षणस्यैव समवायस्य संस्थितौ।

पूर्ववत्ते स्थिता एव प्राप्नुवन्ति घटादयः॥
८६२ ॥§ 2939

न तेषामनवस्थाने तेषां (वृत्त्यात्मकः क्वचित्)।
सम(वायोऽ)वतिष्ठेत संज्ञामात्रेण वा तथा॥
८६३ ॥§ 2941

अतः प्रागपि सद्भावान्न ते वृत्ताः स्युराश्रये।
पश्चादिव तथा ह्येषा वृत्तिस्तेषामवस्तुतः॥
८६४ ॥§ 2943

तथाहि ये ते विनश्यन्ति घटादयः स्वकारणादिसमवायिनस्तेषां स्वकारणेषु वृत्त्यात्मको योऽसौ समवायः कल्पितः स एव किं तेषु विनष्टेषु सम्बन्ध्यन्तरेष्वस्ति, आहोस्विदन्य एव, यथा संयोगो बहुत्वं वा प्रतिसंयोगि भिद्यते। आदिशब्दाद्विभागादिपरिग्रहः। तत्र यद्याद्यः पक्षस्तदा प्रागवस्थावदप्रच्युतप्रवृत्तित्वादवस्थिता एवघटादयः प्राप्नुवन्ति, तेषां वा घटादीनामनवस्थानेऽनवस्थितप्रवृत्तित्वान्नावस्थितिः समवायस्य प्राप्नोति, अन्यथा न वृत्त्यात्मकः स्यात्। तथाभूतस्य च स्वतन्त्रत्स्यानुपकारिणो वृत्तिः समवाय इति वा नामकरणे संज्ञामात्रमेव स्यात्, न तु वस्तुतथाभावस्तथेति। तद्वृत्त्यात्मक इत्येवं ततः संज्ञामात्रान्वयो दोषस्तं दर्शयति—अत इत्यादि। प्रागपि सम्बन्धिनाशात्। अविनष्टसम्बन्ध्यवस्थायामपीत्यर्थः। ते घटादयः। स्वाश्रये वृत्तास्तस्य समवायस्य भावात्सद्भावबलान्न सिध्येयुः। पश्चादिव—विनष्टसमवायिकारणवत्, परमार्थतो वृत्त्यभावात्। तथाहीत्यादिना हेत्वर्थं दर्शयति ॥ ८६०॥ ८६१॥ ८६२॥ ८६३॥ ८६४॥ § 2944

अथान्य एव संयोगविभागबहुतादिवत्।
सम्बन्ध्यन्तरसद्भावे समवायोऽवतिष्ठते॥
८६५ ॥§ 2946

274/k

संयोगादिवदेवं हि नन्वस्य बहुता भवेत्।
एवमाद्यस्य सद्भावे बहु स्यादसमञ्जसम्॥ ८६६॥

इति समवायपदार्थपरीक्षा।§ 2949

अथान्य एवेति द्वितीयः पक्षस्तदा संयोगादिवत्समवायबहुत्वं प्राप्नोति, ततश्च नसमवायो भेदवानित्यस्याभ्युपेतस्य हानिः। एवमादीत्यादिशब्देन कारणवैफल्यं, अनेकसूत्रविरोधः, प्रत्यक्षादिविरोधः, सर्वपदार्थानामक्रमोत्पत्तिरित्यादिदोषान्तरपरिग्रहः। तथाहि—स्वकारणसमवाय सत्तासमवायो वा जन्मोच्यते, समवायश्च नित्य इति न क्वचिदपि कार्यजन्मनि कारणानां सामर्थ्यमिति कारणवैफल्यम्। तथा अन्यतरकर्मज उभयकर्मजः संयोगजश्च संयोगः, इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमित्यादिजन्मप्रतिपादकसूत्रविरोधः। तथा प्रत्यक्षादिप्रतीतिकारणानि चक्षुरादीनि विरुध्यन्ते। तथा समवायलक्षणस्य जन्मनो नित्यतया न क्रमोस्तीति क्रमोत्पत्तिर्दृष्टभावानां विरुध्यते। ततश्च युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति स्वसिद्धान्तव्याहतिः। नित्यत्वाच्चजन्मनोऽनुपकार्योपकारकभूतं जगदिति व्यर्थं शास्त्रप्रणयनमित्यादिबहुतरमसमञ्जसमालूनविशीर्णं स्यात्॥ ८६५॥ ८६६॥ § 2950

इति समवायपदार्थपरीक्षा।

०.१७ शब्दार्थपरीक्षा।

आरोपिताकारशब्दप्रत्ययगोचरत्वसमर्थनार्थं प्रस्तावमारचयन्नाह—यदीत्यादि। § 2952

यदि नोपाधयः केचिद्विद्यन्ते (परमार्थतः)।
(दण्डी शुक्लश्चलत्यस्ति गौ)रिहेत्यादिधी(ध्वनी)॥
८६७॥§ 2954

(स्यातां) किंविषयावेतौ नानिमित्तौ च तौ मतौ।
सर्वस्मिन्नविभागेन तयोर्वृत्तिरसम्भवी॥ ८६८॥§ 2956

वस्त्वेव हि परमार्थतः शब्दप्रत्ययग्राह्यम्, अतः शब्दैः साक्षाद्विधिनिषेधाभ्यांवस्तुस्वभावप्रतिपादनाद्विधिरेव शब्दार्थ इति विधिशब्दार्थवादिनां दर्शनम्। अपोहवादिनां तु न परमार्थतः शब्दानां किंचिद्वाच्यं वस्तुस्वरूपमस्ति। सर्व एव हि शब्दप्रत्ययो भ्रान्तो भिन्नेष्वर्थेष्वभेदाकाराध्यवसायेन प्रवृत्तेः, यत्र तु पारम्पर्येण वस्तुप्रतिबन्धः, तत्रार्थासंवादो भ्रान्तत्वेऽपीति दर्शनम्। तत्र यत्तदारोपितं विकल्पधियाऽर्थेष्वभिन्नं रूपं तदन्यव्यावृत्तपदार्थानुभवबलायातत्वात्स्वयं चान्यव्यावृत्ततया प्रख्यानाद्भ्रान्तैश्चान्यव्यावृत्तार्थेन सहैक्येनाध्यव-

सितत्वादन्यापोढपदार्थाधिगतिफलत्वाद्वा न्यापोढ इत्युच्यते। तेनापोहः श- 275/k
ब्दार्थ इति प्रसिद्धम्। तत्र विधिवादिनश्चोदयन्ति। यदि भवतां द्रव्यगुणकर्मसामान्यविशेषसमवायलक्षणा उपाधयो विशेषणानि शब्दप्रत्ययं प्रति निमित्तानि परमार्थतो न सन्ति, तत्कथं लोके दण्डीत्यभिधानप्रत्ययाःप्रवर्त्तन्ते द्रव्याद्युपाधिनिमित्ताः। तथाहि—दण्डी विषाणीत्यादिधीध्वनी लोके द्रव्योपाधिकौ प्रसिध्दौ, शुक्लः कृष्ण इति गुणोपाधिकौ, चलति भ्रमतीति कर्मनिमित्तौ, अस्ति विद्यत इति सत्ताप्रवृत्तिनिमित्तकौ, गौरश्वो हस्तीति सामान्यविशेषोपाधी, इह तन्तुषु पट इति समवायबलात्। तत्रैषां द्रव्यादीनामभावे दण्डीत्यादिधीध्वनी निर्विषयौ स्यातामिति। आदिग्रहणं प्रत्येकमभिसम्बध्यते। तेन प्रत्येकं छत्री विषाणीत्यादिसमानजातीयधीध्वनीनां ग्रहणं भवति। अन्त्यास्तु विशेषा योगिनामेव ग्राह्याइति न तेषामादिशब्देन परिग्रहः। न चानिमित्तावेतौ युक्तौ, सर्वत्राविशेषेण सर्वदा तयोर्वृत्तिप्रसङ्गात्। न चाविभागेन तयोः प्रवृत्तिरस्ति। तस्मात्सन्ति द्रव्यादय इति परः। प्रयोगः—ये परस्परमसङ्कीर्णप्रवृत्तयस्ते सनिमित्ताः, यथा श्रोत्रादिप्रत्ययाः, असङ्कीर्णप्रवृत्तयश्च दण्डीत्यादिशब्दप्रत्यया इति स्वभावहेतुः। अनिमित्तत्वे सर्वत्राविशेषेण प्रवृत्तिप्रसङ्गो बाधकं प्रमाणम्॥ ८६७॥ ८६८॥ § 2957

उच्यत इत्यादिना प्रतिविधत्ते। § 2958

उच्यते विषयोऽमीषां धीध्वनीनां न कश्चन।
अन्तर्मात्रानिविष्टं तु बीजमेषां निबन्धनम्॥
८६९॥ § 2960

तत्र यदि मुख्यतो बाह्येन विषयभूतेन सनिमित्तत्वमेषां साधयितुमिष्टं तदाऽनैकान्तिकता हेतोः साध्यविपर्यये बाधकप्रमाणाभावात्। अथ येन केनचिन्निमित्तेन सनिमित्तत्वमिष्यते तदा सिद्धसाध्यता। तथा ह्यस्माभिरिष्यत एवैषामन्तर्जल्पवासनाप्रबोधो निमित्तम्, न तु विषयभूतं, भ्रान्तत्वेन पूर्वस्य शाब्दप्रत्ययस्य निर्विषयत्वात्।अन्तर्मात्रानिविष्टमिति। विज्ञानसन्निविष्टं, वासनेति यावत्॥ ८६९॥ § 2961

एतदेवागमेन संस्पन्दयन्नाह—यस्य यस्येत्यादि। § 2962

यस्य यस्य हि शब्दस्य यो यो विषय उच्यते।
स स (संविद्य)ते नैव वस्तूनां सा हि धर्मता॥
८७०॥ § 2964

यो यो विषय इति। स्वलक्षणसामान्यादिः। सा हि धर्मतेति। सा— प्रकृतिः, सर्ववाक्पथातीतत्वं वस्तूनां स्वभाव इति यावत्। यथोक्तम्— येन

येन हि नाम्ना वै यो यो धर्मोऽभिलप्यते। न स संविद्यते तत्र धर्माणां सा हि धर्मतेति॥ ८७०॥ § 2965

276/k

अथशब्दप्रत्ययस्य भ्रान्तत्वाविषयत्वयोः किं प्रमाणमिति चेत्, उक्तमत्र प्रमाणमस्माभिर्यद्भिन्नेष्वभेदाध्यवसायेन प्रवृत्तेः सर्व एवायं शाब्दप्रत्ययो भ्रान्त इति। तथाहि—योऽतस्मिंस्तदिति प्रत्ययः स भ्रान्तो यथा मरीचिकायां जलप्रत्ययः, तथा चायं भिन्नेष्वर्थेष्वभेदाध्यवसायी शाब्दप्रत्यय इति स्वभावहेतुः। नच सामान्यं वस्तुभूतं ग्राह्यमस्यास्ति, येनासिद्धता हेतोरिति स्यात्, तस्य पूर्वं विस्तरेण निरस्तत्वात्। भवतु वा सामान्यं, तथापि तस्य भेदेभ्योऽर्थान्तरत्वे भिन्नेष्वभेदाध्यवसायो भ्रान्तिरेव, न ह्यन्येनान्ये समाना युक्तास्तद्वन्तो नाम स्युः। अनर्थान्तरत्वेऽपि सामान्यस्य सर्वमेव विश्वमेकमेव वस्तु परमार्थत इति तत्र सामान्यस्य प्रत्ययो भ्रान्तिरेव। नह्येकवस्तुविषयः सामान्यप्रत्ययः, भेदग्रहणपुरःसरत्वात्तस्य। भ्रान्तत्वे च सिद्धे निर्विषयत्वमपि सिद्धम्। स्वाकारार्पणेन जनकस्य कस्यचिदर्थस्यालम्बनलक्षणप्राप्तस्याभावात्। अथवा—अन्यथा निर्विषयत्वं साध्यते। यत्रैव हि कृतसमया ध्वनयः, स एव तेषामर्थो युक्तो नान्योऽतिप्रसङ्गात्। न च क्वचिद्वस्तुन्येषां परमार्थतः समयः समस्तीत्यतो निर्विषया धीध्वनयः। प्रयोगः—ये यत्र भावतः कृतसमया न भवन्ति, न ते परमार्थतस्तमभिदधति, यथा सास्नादिमति पिण्डेऽश्वशब्दोऽकृतसमयः, न भवन्ति च भावतः कृतसमयाः सर्वस्मिन्वस्तुनि सर्वे ध्वनय इति व्यापकानुपलब्धेः। कृतसमयत्वेनाभिधायकत्वस्य व्याप्तत्वात्, तस्य चेहाभावः। नचायमसिद्धो हेतुरित्यादर्शयन्नाह—यत इत्यादि। § 2966

यतः स्वलक्षणं जातिस्तद्योगो जातिमांस्तथा।
बुद्ध्याकारो न शब्दार्थे घटामञ्चति तत्त्वतः॥
८७१॥ § 2968

तथाहि गृहीतसमयं वस्तु शब्दार्थत्वेन व्यवस्थाप्यमानं कदाचित्स्वलक्षणं वा व्यवस्थाप्यते, जातिर्वा, तद्योगो वा, तया—जात्या, योगः—सम्बन्धः, यद्वा जातीमान्,पदार्थबुद्धेर्वा आकार, इति विकल्पाः। तत्र सर्वेष्वेव समयासम्भवान्न युक्तं शब्दार्थत्वम्। तत्त्वत इत्यनेन सांवृतस्य शब्दार्थस्याप्रतिषेधं दर्शयति। तेन स्ववचनव्याघातो न भवति। अन्यथा हि प्रतिज्ञायाः स्ववचनविरोधः स्यात्। तथा ह्येतान्स्वलक्षणादीन्शब्देनाप्रतिपाद्य न शक्यमशब्दार्थत्वमेषां प्रतिपादयितुम्। तत्प्रतिपिपादयिषया च शब्देन स्वलक्षणादीनुपदर्शयता शब्दार्थत्वमेषामभ्युपेतं स्यात्। पुनश्च तदेव प्रतिज्ञया प्रतिषिद्धमिति स्ववचन-
277/k व्याघातः। एतेन यदुक्तमुद्योतकरेण अवाचकत्वे श ब्दानां प्रतिज्ञाहेत्वोर्व्याघात इति तदपि प्रत्युक्तं भवति, नहि सर्वथा शब्दार्थापवादोऽस्माभिः क्रियते,

तस्यागोपालमपि प्रतीतत्वात्। किन्तु तात्त्विकत्वं धर्मो यः परैस्तत्रारोप्यते तस्य निषेधः क्रियते। न तु धर्मिणः॥ ८७१॥ § 2969

तत्र स्वलक्षणे तावत्सङ्केतासम्भवोपदर्शनादशब्दार्थत्वं प्रतिपादयन्नाह— तत्रेत्यादि। § 2970

तत्र स्वलक्षणं तावन्न शब्दैः प्रतिपाद्यते।
सङ्केतव्यवहाराप्तकालव्याप्तिवियोगतः॥ ८७२॥ § 2972

न शब्दैः प्रतिपाद्यत इति। तत्र सङ्केताभावादिति भावः। कथं सङ्केताभाव इत्याह—सङ्केतेत्यादि। सङ्केतव्यवहाराभ्यामाप्तः प्राप्तो यः कालस्तस्य व्याप्तिर्व्यापनं तया वियोगात्कारणात्। न तत्र स्वलक्षणे समय इति शेषः। एतदुक्तं भवति—समयो हि व्यवहारार्थं क्रियते, न व्यसनितया, तेन यस्यैव सङ्केतव्यवहाराप्तकालव्यापकत्वमस्ति तत्रैव समयो व्यवहर्तॄणां युक्तो नान्यत्र। न च स्वलक्षणस्य सङ्केतव्यवहाराप्तकालव्यापकत्वमस्ति। तस्मान्न तत्र समय इति॥ ८७२॥ § 2973

कस्मात्पुनः स्वलक्षणस्य सङ्केतव्यवहाराप्तकालव्यापकत्वं न सम्भवतीत्याह—व्यक्त्यात्मान इत्यादि। § 2974

व्यक्त्यात्मानोऽनुयन्त्येते न परस्पररूपतः।
देशकालक्रियाशक्तिप्रतिभासादिभेदतः॥
८७३॥ § 2976

तस्मात्सङ्केतदृष्टोऽर्थो व्यवहारे न दृश्यते।
नचागृहीतसङ्केतो (बोध्येता)न्य इव ध्वनेः॥
८७४॥ § 2978

सावलेयादयो हि व्यक्तिभेदा देशादिभेदेन परस्परतोऽत्यन्तव्यावृत्तमूर्त्तयो नैते परस्परमन्वाविशन्ति। तत्रैकत्र कृतसमयस्य पुंसोऽन्यैर्व्यवहारो न स्यात्। प्रतिभासादीत्यादिशब्देन वर्णसंस्थानावस्थाविशेषादिपरिग्रहः। व्यवहारो न दृश्यत इति। तेन तत्र समयाभावान्नासिद्धता हेतोरिति भावः। न चाप्यनैकान्तिकत्वमिति दर्शयन्नाह —नचागृहीतेत्यादि। गृहीतः सङ्केतो यत्र स तथा, न गृहीतसङ्केतोऽगृहीतसङ्केतः। अन्य इवेति। विजातीयार्थवत्। ध्वनेरिति। शब्दात्। एतदुक्तं भवति।यद्यगृहीतसङ्केतमर्थं शब्दः प्रतिपादयेत्त-

१ सङ्केता] Correction : ; सङ्केत (sic !)सङ्केता

दा गोशब्दोऽप्यश्वं प्रतिपादयेत्। सङ्केतकरणानर्थक्यं च स्यात्। तस्मादतिप्रसङ्गापत्तिर्बाधकं प्रमाणमिति सिद्धा व्याप्तिः। अयमेव चाकृतसमयत्वादिति 278/k हेतुराचार्यदिग्नागेन न जातिशब्दो भेदानां वाचक आनन्त्यादित्यनेन निर्दिष्टः। तथाह्यानन्त्यादित्यनेन समयासम्भव एव दर्शितः। तेन यदुद्योतकरेणोक्तम्—यदि शब्दान्पक्षयसि, तदाऽनन्त्यादित्यस्य वस्तुधर्मत्वाद्व्यधिकरणो हेतुः। अथ भेदा एव पक्षीक्रियन्ते, तदा नान्वयी न व्यतिरेकी दृष्टान्तोऽस्तीत्यहेतुरानन्त्यमिति, तत्प्रत्युक्तं भवति। पुनः स एवाह— यस्य निर्विशेषणा भेदाः शब्दैरभिधीयन्ते, तस्यायं दोषः, अस्माकं तु सत्तादिविशेषणानि द्रव्यगुणकर्माण्यभिधीयन्ते। तथाहि—यत्र यत्र सत्तादिकं सामान्यं पश्यति तत्र तत्र सदादिशब्दं प्रयुङ्क्ते। एकमेव च सत्तादिकं सामान्यम्, अतः सामान्योपलक्षितेषु भेदेषु समयक्रियासम्भवादकारणमानन्त्यमिति। तदेतदसम्यक्—न हि सत्तादिकं वस्तुभूतं सामान्यं तेभ्यो भिन्नमभिन्नं वाऽस्तीति प्रसाधितमेतत्। भवतु वा सामान्यं,तथाऽप्येकस्मिन्भेदेऽनेकसामान्यसम्भवादसाङ्कर्येण सदादिशब्दप्रयोजनं न स्यात्। नच शब्देनानुपदर्श्य सत्तादिकं तेन सत्तादिना भेदान्परमुपलक्षयितुं समयकारः शक्नुयात्। न चाकृतसमयेषु सत्तादिशब्दप्रवृत्तिरस्ति। ततश्चेतरेतराश्रयदेषः स्यात्। अथापि स्यात्—स्वयमेव प्रतिपत्ता व्यवहारोपलम्भादन्वयव्यतिरेकाभ्यां सदादिशब्दैः समयं प्रतिपद्यत इति। तदेतदसम्यक्। न ह्यनन्तरभेदविषयं निःशेषं कश्चिद्व्यवहारमुपलभते। एकदा सत्तादिमत्सु भेदेष्वसकृद्व्यवहारमुपलभ्यादृष्टेष्वपि तज्जातीयेषु ताच्छब्द्यं प्रतिपद्यत इति चेन्न। अदृष्टत्वात्। नह्यदृष्टेष्वतीतानागतभेदभिन्नेष्वनन्तेषु भेदेषु समयः सम्भवत्यतिप्रसङ्गात्। विकल्पबुद्ध्या व्याहृत्य तेषु प्रतिपद्यत एवेति चेत्। एवं तर्हि विकल्पसमारोपितार्थविषय एव शब्दसन्निवेशनं, न परमार्थतो भेदेष्विति प्राप्तम्। तथाह्यतीतानागतयोरसत्त्वेनासन्निहितत्वात्तत्र विकल्पबुद्धिर्भवन्ती निर्विषयैवेति तथा व्याहृतमसदेव। ततश्च तत्र भवन्समयः कथं परमार्थतो वस्तुभूतो भवेदित्यलं बहुना। सपक्षे भावान्नापि हेतोर्विरुद्धतेति सिद्धं स्वलक्षणाविषयत्वं शब्दानाम्॥ ८७३॥ ८७४॥ § 2979

स्यादेतद्ये हिमाचलादयो भावास्तेषां स्थिरैकरूपत्वान्न देशकालभेदादिभेदः सम्भवत्यतः सङ्केतव्यवहाराप्तकालव्यापकत्वात्तेषु समयः सम्भवतीत्यतः पक्षैकदेशासिद्धता हेतोरित्यत आह—हिमाचलादय इत्यादि। § 2980

हिमाचलादयो येऽपि देशकालाद्यभेदिनः।
(दृष्टास्तेष्वणवो भिन्नाः) क्षणिकाश्च प्रसाधिताः॥
८७५॥ § 2982

279/k

आदिशब्देन मलयादिपरिग्रहः। एते ह्यनेकाणुप्रचयस्वभावाः, अतो नैषामशेषावयवपरिग्रहेण समयः समस्ति। प्रसाधितोदयानन्तरविनाशाश्च।

तेनैतेष्वपि समयकालपरिदृष्टस्य स्वभावस्य न व्यवहारकालेष्वन्वयोऽस्तीति नासिद्धता हेतोः॥ ८७५॥ § 2983

एवं तावत्स्वलक्षणे व्यवहारानुपपत्तेः समयवैयर्थ्यप्रसङ्गान्न समय सम्भवतीति प्रतिपादितम्। साम्प्रतमशक्यक्रियत्वादेव न सम्भवतीति प्रतिपादयन्नाह—अशक्यमित्यादि। § 2984

अशक्यं समय(स्यास्य जातेऽजाते च कल्पनम्।)
नाजाते समयो युक्तो भाविकोऽश्वविषाणवत्॥
८७६॥ § 2986

उप(नापि?)जाते गृहीता(नां पूर्वं) वाचामनुस्मृतौ।
क्रियते समयस्तत्र चिरातीते(कथं नु तत्)॥
८७७॥ § 2988

सर्व एव भावाः पूर्वं प्रसाधितोदयानन्तरापवर्गास्तेषु समयः क्रियमाणः कदाचिदनुत्पन्नेषु वा क्रियेत, उत्पन्नेषु वा। तत्र न तावदनुत्पन्नेषु परमार्थेन समयो युक्तः, असतः सर्वोपाख्याविरहलक्षणत्वेनाधारत्वानुपपत्तेः। भाविकग्रहणं सांवृतनिषेधार्थम्। तेनाजातेऽपि पुत्रादौ समयदर्शनान्न दृष्टविरोधः, तस्य विकल्पनिर्मितार्थविषयत्वेनाभाविकत्वात्। अश्वविषाणवदिति। सप्तम्यन्ताद्वतिः। नाप्युत्पन्ने समयो युक्तः, तथाहि—तस्मिन्ननुभवोत्पत्तौ सत्यां तत्पूर्वके च नामभेदस्मरणे सति समयः कार्यो नान्यथाऽतिप्रसङ्गात्। ततश्च नामभेदस्मरणकाले क्षणध्वंसितया चिरनिरुद्धं स्वलक्षणमिति, नाजातवज्जातेऽपि भाविकः समयः समस्ति, समयक्रियाकाले द्वयोरप्यसन्निहितत्वात्। तथाह्यनुभवावस्थायामपि तावत्तत्कारणतया स्वलक्षणं क्षणिकं न सन्निहितसत्ताकं भवति। किं पुनरनुभवोत्तरकालभाविनामभेदाभोगस्मरणोत्पादकाले भविष्यति॥ ८७६॥ ८७७॥ § 2989

अथापि स्यात्तज्जातीये तत्सामर्थ्यबलोपजाते समयक्रियाकालभाविनि क्षणे समयः करिष्यत इति, अत आह—यश्चापीत्यादि। § 2990

यश्चापि (तत्सजातीयस्तद्व)लेन तदापरः।
न तत्र समयाभोगः सादृश्यं च विकल्पितम्॥
८७८॥ § 2992

यद्यपि समयक्रियाकाले सन्निहितं क्षणान्तरमस्ति, तथापि तत्र समयाभोगासम्भवान्न समयो युक्तः, न ह्यश्वमुपलभ्य तन्नामस्मरणोपक्रमपूर्वकं

280/k समयं कुर्वाणस्तत्काल सन्निहिते गवादावाभोगाविषयीकृतेऽश्व इति समयं समयकृत्कश्चित्करोति। अथापि स्यात्—सर्वेषां स्वलक्षणक्षणानां सादृश्यमस्ति तेनैकत्वमध्यवसाय समयः करिष्यत इत्याह—सादृश्यं च विकल्पितमिति। विकल्पबुद्धिसमारोपितं हि सादृश्यं, तस्य च ध्वनिभिः प्रतिपादने सति स्वलक्षणमवाच्यमेव स्यात्। तदेवं न स्वलक्षणे समयः सम्भवति। नापि शब्दस्वलक्षणस्य, तथाहि समयकारः स्मृत्युपस्थापितमेव नामभेदमर्थे योजयति। न च स्मृतिर्भावतोऽनुभूतमेवाभिलापमुपस्थापयितुं शक्नोति, तस्य चिरनिरुद्धत्वात्। यच्चोच्चारयति तस्य पूर्वमननुभूतत्वान्न तत्र स्मृतिः, नचाविषयीकृतस्तया समुपस्थापयितुं शक्यः। अतः स्मृत्युपस्थापितमनुसन्धीयमानं विकल्पनिर्मितत्वेनास्वलक्षणमेवेति न स्वलक्षणस्य समयः। तस्मादव्यपदेश्यं स्वलक्षणमिति सिद्धम्॥ ८७८॥ § 2993

अत्रैव स्वलक्षणावाच्यत्वसिद्धौ प्रमाणान्तरमाह—उष्णादीत्यादि। § 2994

(उष्णादिप्रतिपत्तिर्या) नामादिध्वनिभाविनी।
विस्पष्टा(भासते नैषा) तदर्थेन्द्रियबुद्धिवत्॥
८७९॥§ 2996

यथा ह्युष्णाद्यर्थविषयेन्द्रियबुद्धिः स्फुटप्रतिभासा वेद्यते न तथोष्णादिशब्दभाविनी, न ह्युपहतनयनरसनघ्राणादयो मातुलिङ्गादिशब्दश्रवणात्तद्रूपरसाद्यनुभाविनो भवन्ति यथाऽनुपहतनयनादय इन्द्रियधियाऽनुभवन्तः। यथोक्तम्— अन्यथैवाग्निसंबन्धाद्दाहं दग्धोऽभिमन्यते। अन्यथा दाहशब्देन दाहार्थः संप्रकाश्यते॥ इति।तदर्थेन्द्रियबुद्धिवदिति वैधर्म्योदाहरणम्। तदर्था चासाविन्द्रियबुद्धिश्चेति विग्रहः ॥ ८७९॥ § 2997

यदि नाम सा तथा न भवति, तथापि किमिति शब्दस्य स्वलक्षणमर्थो न भवतीत्याह—न स तस्येत्यादि। § 2998

न स तस्य च शब्दस्य युक्तो योगो न तत्कृते।
प्रत्यये सति भात्यर्थो रूपबोधे तथा रसः॥
८८०॥§ 3000

प्रयोगः—यो हि तत्कृते प्रत्यये न प्रतिभासते न स तस्यार्थः, यथा रूपजनिते प्रत्यये रसः, न प्रतिभासते च शाब्दे प्रत्यये स्वलक्षणमिति स्थापकानुपलब्धिः।अत्र चातिप्रसङ्गो बाधकं प्रमाणम्। तथाहि—शब्दस्य तद्विषयज्ञानजनकत्वमेव तद्वाचकत्वमुच्यते नान्यत्, नच यद्विज्ञानं यदाकारशु(?)न्यं
281/k तत्तद्विषयं युक्तमतिप्रसङ्गात्। नचैकस्य वस्तुनो रूपद्वयमस्ति स्पष्टास्पष्टं, येनास्पष्टं वस्तुगतमेव रूपं शब्दैरभिधीयत इति। स्यात्। एकस्य द्वित्व-

विरोधात्, भिन्नसमयस्थायिनां च परस्परविरुद्धस्वभावप्रतिपादनात्॥ ८८०॥

§ 3001

नैयायिकास्तु ब्रुवते व्यक्त्याकृतिजातयस्तु पदार्थ इति। पदस्यार्थः पदार्थः, शब्दार्थ इति यावत्। तत्र व्यक्तिशब्देन द्रव्यगुणविशेषकर्माण्यभिधीयन्ते। तथाच सूत्रं व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिरिति। अस्यार्थो वार्त्तिककारमतेन तावदुच्यते—विशेष्यत इति विशेषः, गुणेभ्यो विशेषो गुणविशेषः, कर्माभिधीयते। द्वितीयश्चात्र गुणविशेषशब्द एकशेषं कृत्वा निर्दिष्टः, तेन गुणपदार्थो गृह्यते। गुणाश्च तेविशेषाश्चेति गुणविशेषाः, विशेषग्रहणमाकृतिनिरासार्थम्। तथा ह्याकृतिः संयोगविशेषः, स्वस्वभावात्, संयोगश्च गुणपदार्थान्तर्गतः, ततश्चासति विशेषग्रहणे आकृतेरपि ग्रहणं स्यात्। नच तस्या व्यक्तावन्तर्भाव इष्यते, पृथक्श(?)ब्देन तस्या उपादानात्। आश्रयशब्देन द्रव्यमभिधीयते, तेषां गुणविशेषाणामाश्रयस्तदाश्रयो द्रव्यमित्यर्थः। सूत्रे तच्छब्दलोपं कृत्वा निर्देशः कृतः। एवं विग्रहः कर्त्तव्यः—गुणविशेषाश्च गुणविशेषाश्चेति गुणविशेषाः, गुणविशेषाश्च तदाश्रयश्चेति गुणविशेषाश्रयः, समाहारद्वन्द्वश्चायम्, लोकाश्रयत्वाल्लिङ्गस्येति नपुंसकलिङ्गानिर्देशः। तेनायमर्थो भवति—योऽयं गुणविशेषाश्रयः सा व्यक्तिश्चोच्यते मूर्त्तिश्चेति। तत्र यदा द्रव्येमूर्त्तिशब्दस्तदाऽधिकरणसाधनो द्रष्टव्यः, मूर्च्छन्त्यस्मिन्नवयवा इति मूर्त्तिः। यदा तु रूपादिषु तदा कर्तृसाधनः, मूर्च्छन्ति द्रव्ये समवयन्तीति रूपादयो मूर्त्तिः। व्यक्तिशब्दस्तु द्रव्ये कर्मसाधनो रूपादिषु करणसाधनः। भाष्यकारमतेन तु यथाश्रुतिसूत्रार्थः—गुणविशेषाणामाश्रयो द्रव्यमेव व्यक्तिर्मूर्तिश्चेति तस्येष्टम्। यथोक्तम् — गुणविशेषाणां रूपरसगन्धस्पर्शानां गुरुत्वद्रवत्वघनत्वसंस्काराणामव्यापिनश्च परिमाणविशेषस्याश्रयो यथासम्भवं तद्द्रव्यं मूर्त्तिर्मूर्च्छितावयवत्वादिति। आकृतिशब्देन प्राण्यवयवानां पाण्यादीनां तदवयवानां चाङ्गुल्यादीनां संयोगोऽभिधीयते। तथाच सूत्रम्— आकृतिर्जातिलिङ्गाख्या इति। अस्य भाष्यम्— यया जातिर्जातिलिङ्गानि चाख्यायन्ते तामाकृतिं विद्यात्, सा च नानासत्त्वानां तदवयवानां च नियताद्व्यूहात् इति। व्यूहशब्देन संयोगविशेष उच्यते। नियतग्रहणेन कृत्रिमसंयोगनिरासः। तत्र जातिलिङ्गानि प्राण्यवयवाः शिरःपाण्यादयः, तैर्हि गोत्वादिलक्षणा जातिर्लिङ्ग्यते। आकृत्या तु कदाचित्साक्षाज्जातिर्व्यज्यते—यदा शिरःपाण्यादिसंनिवेशदर्शनाद्गोत्वं व्यज्यते। कदाचिज्जातिलिङ्गानि—यदा 282/k विषाणादिभिरवयवैः पृथक्पृथक्स्वावयवसन्निवेशाभिव्यक्तैर्गोत्वादिर्व्यज्यते। तेन जातेस्तल्लिङ्गानां च प्रख्यापिका भवत्याकृतिः। जातिशब्देनाभिन्नाभिधानप्रत्ययप्रसवनिमित्तं सामान्याख्यं वस्तूच्यते। तथाच सूत्रं समानप्रसवात्मिका जातिरिति समानप्रत्ययोत्पत्तिकारणं जातिरित्यर्थः। तत्र व्यक्त्याकृत्योरेतेनैव

२४ नानासत्त्वानां] Correction : ;
नान्या सत्त्वावयवानां (sic !)नानासत्त्वानां

स्वलक्षणस्य शब्दार्थत्वनिराकरणेन शब्दार्थत्वनिराकरणं बोद्धव्यमिति दर्शयन्नाह—एतेनैवेत्यादि। § 3002

एतेनैव प्रकारेण व्यक्त्याकृत्योर्निराकृतिः।
स्वलक्षणात्मतैवेष्टा तयोरपि यतः परैः॥ ८८१॥§ 3004

जातेस्तु पश्चान्निराकरणं भविष्यतीत्यभिप्रायः। निराकृतिरिति। शब्दार्थत्वेनेति शेषः। कस्मादित्याह—स्वलक्षणात्मतैवेत्यादि। तयोरिति। व्यक्त्याकृत्योः। तेन यथा स्वलक्षणस्याकृतसमयत्वादशब्दार्थत्वं तथा तयोरपीत्यतोऽकृतसमयत्वादित्यस्यहेतोर्नासिद्धिर्नाप्यनैकान्तिकतेति भावः॥ ८८१॥
§ 3005

किंच—व्यक्तिर्द्रव्यगुणविशेषकर्मलक्षणा, आकृतिश्च संयोगात्मिका, एते च द्रव्यादयः प्रागेव प्रतिषिद्धा इत्यतोऽपि शब्दार्थत्वमनयोरसद्भावान्न युक्तमिति दर्शयति—द्रव्यादीत्यादि। § 3006

द्रव्यादियोगयोः प्राक्तु प्रतिषेधाभिधानतः।
न तात्त्विकी तयोर्युक्ता शब्दार्थत्वव्यवस्थितिः॥
८८२॥§ 3008

एवं तावत्स्वलक्षणे समयासम्भवं प्रतिपाद्य जात्यादिषु त्रिषु समयासम्भवं प्रतिपादयन्नाह—जातिसम्बन्धयोरित्यादि। § 3009

जातिसम्बन्धयोः पूर्वं व्यासतः प्रतिषेधनात्।
नानन्तराः प्रकल्प्यन्ते शब्दार्थास्त्रिविधाः परे॥
८८३॥§ 3011

अनन्तरा इति। स्वलक्षणमुक्त्वा जातिस्तद्योगो जातिमानिति जातितद्योगयोरभावात्तद्वतोऽप्यसम्भव एव, तत्कृतत्वात्तद्व्यपदेशस्य, तद्वतश्च स्वलक्षणात्मकत्वात्। तत्पक्षभावी दोषः समान एवेति भावः। जातिः पदार्थ इति वाजा (का ?) त्यायनः, द्रव्यमिति व्याडिः, उभयं पाणिनिः। तदप्यनेनैव निरस्तम्, जातेरयोगाद्द्रव्यस्य च स्वलक्षणात्मकत्वात्तत्पक्षभाविदोषानिवृत्तेः॥ ८८३॥ § 3012
283/k

उपसंहरन्नाह—तद्व्यक्त्याकृतीत्यादि। § 3013

तद्व्यक्त्याकृतिजातीनां पदार्थत्वं यदुच्यते।
तदसम्भवि सर्वासामपि नीरूपता यतः॥
८८४ ‖§ 3015

तदिति। तस्मात्। नीरूपतेति। निःस्वभावता॥ ८८४॥ § 3016

बुद्ध्याकारश्च बुद्धिस्थो नार्थबुद्ध्यन्तरानुगः।
नाभिप्रेतार्थकारी च सोऽपि वाच्यो न तत्त्वतः॥
८८५ ‖§ 3018

बुद्ध्याकारो हि तादात्म्येन बुद्धावेवावस्थित इति नासौ तद्बुद्धिस्वरूपवत्प्रतिपाद्यमर्थं बुद्ध्यन्तरं वाऽनुगच्छति, ततश्च सङ्केतव्यवहाराप्तकालाव्यापकत्वात्स्वलक्षणवन्न तत्रापि समयः सम्भवति, भवतु वा तस्य व्यवहारकालान्वयस्तथापि न तत्र समयो व्यवहर्तृ(?)णां युक्तः। तथा हि—अपि नामेतः शब्दादर्थक्रियार्थी पुमानर्थक्रियाक्षमानर्थान्विज्ञाय प्रवर्त्तिष्यते तेष्विति मन्यमानैर्व्यवहर्तृभिरभिधायकानि योज्यन्ते, नव्यसनितया, न चासौ विकल्पबुद्ध्याकारोऽभिप्रेतं शीतापनोदादि कार्यं तदर्थिनः सम्पादयितुमलम्, तदनुभवोत्पत्तावपि तदभावात्। तेन तत्रापि समयाभावान्नासिद्धोऽकृतसमयत्वादिति हेतुः॥ ८८५॥ § 3019

स्यादेतत्—अस्त्यर्थादयोऽपरे शब्दार्थाः सन्ति। ततश्च तत्र समयसम्भवादसिद्धतैव हेतोरित्यत आह—येऽन्येऽन्यथैवेत्यादि। § 3020

येऽन्येऽन्यथैव शब्दार्थमस्त्यर्थादीन्प्रचक्षते।
निरस्ता एव तेऽप्येतैस्तथापि पुनरुच्यते॥
८८६ ‖§ 3022

एतैरिति। स्वलक्षणादिशब्दार्थप्रतिषेधैः। तेषां स्वलक्षणादिष्वेवान्तर्भावादिति भावः॥ ८८६॥ § 3023

के पुनस्तेऽस्त्यर्थादय इति दर्शयन्नाह—अस्त्यर्थ इत्यादि। § 3024

अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम्।
अपूर्वदेवतास्वर्गैः सममाहुर्गवादिषु॥
८८७ ‖§ 3025

इतिशब्दो भिन्नक्रमः अस्त्यर्थ इत्यस्यानन्तरे सम्बध्यते। तेनायमर्थो भवति— अस्त्यर्थ इति यदेतत्प्रतीयते, तत्सर्वशब्दानां प्रत्याय्यस्याभिधेयस्य

लक्षणम्। शब्दार्थस्य लक्षणमिति यावत्। तेन गवादिष्वर्थेषु विषयभूतेषु यद्ग-वादिशब्दप्रत्याय्यं तदपूर्वदेवतास्वर्गैस्तुल्यमित्याहुः। अपूर्वादिशब्दार्थैस्तत्तुल्य-मित्येवमाहुरित्यर्थः। यथैव ह्यपूर्वादिशब्दा नार्थाकारविशेषं बुद्धिषु सन्निवेशय-
284/k न्ति, केवलं तत्रैतावत्प्रतीयते—सन्ति केऽप्यर्था येष्वपूर्वादयः शब्दाः प्रयुज्यन्त इति, तथा दृष्टार्थेष्वपि गवादिशब्देषु तुल्यम्। यतस्तेभ्योऽप्येवं प्रतीयते—अस्ति कोऽप्यर्थो गवादिशब्दाभिधेयो गोत्वादिसामान्यसम्बद्धो वेति। यस्तु तत्राकारविशेषपरिग्रहः केषांचिदुपजायते, स तेषांसिद्धान्तबलात्॥ ८८७॥
§ 3026

आदिशब्देनोपात्ताञ्शब्दार्थान्दर्शयन्नाह—समुदाय इत्यादि। § 3027

समुदायोऽभिधेयो वाऽप्यविकल्पसमुच्चयः।
असत्यो वाऽपि संसर्गः शब्दार्थः कैश्चिदुच्यते॥
८८८॥ § 3029

केचिद्ब्राह्मणादिशब्दैस्तपोजातिश्रुतादिसमुदायो विना विकल्पसमुच्च-याभ्यामभिधीयत इत्याहुर्यथा वनादिशब्दैर्धवादय इति। तथाहि—वन-मित्युक्ते धवो वा खदिरो वा पलाशो वेति न विकल्पेन प्रतीतिर्भवति, नापि धवश्च खदिरश्च पलाशश्चेति समुच्चयेन, अपितु सामान्येन प्रतीयन्ते धवादयः। तथा ब्राह्मण इत्युक्ते तपो वा जातिर्वा श्रुतं वा, तपश्च जातिश्च श्रुतं चेति, न प्रतिपत्तिर्भवति। अपि तु साकल्येनसम्बन्ध्यन्तरव्यवच्छिन्नास्त-पःप्रभृतयः संहताः प्रतीयन्त इति। तत्र बहुष्वनियतैकसमुदायिभेदावधारणं विकल्पः, एकत्र युगपदभिसम्बध्यमानस्य नियतस्यानेकस्य स्वरूपभेदाव-धारणं समुच्चयः। अविद्यमानौ विकल्पसमुच्चयौ यस्य स तथोक्तः। अन्ये तु द्रव्यत्वादिभिरनिर्द्धारितरूपैर्यः सम्बन्धो द्रव्यादीनां स शब्दार्थः, स च सम्बन्धिनां शब्दार्थत्वेनासत्यत्वादसत्य इत्युच्यते। यद्वा—तपःश्रुतादीनां मेच-कवर्णवदैक्येन भासनादेषामेव परस्परमसत्यः संसर्गः। तथाह्येते प्रत्येकं समुदिता वा न स्वेन रूपेणोपलभ्यन्ते, किन्त्वलातचक्रवदेषां समूहः स्वरूप-मुत्क्रम्यावभासत इति॥ ८८८॥ § 3030

असत्योपाधि यत्सत्यं तद्वा शब्दनिबन्धनम्।
शब्दो वाऽप्यभिजल्पत्वमागतो याति वाच्यताम्॥
८८९॥ § 3032

अन्ये त्वाहुः—यदसत्योपाधि सत्यं स शब्दार्थ इति। तत्र शब्दार्थत्वेनास-त्या उपाधयो विशेषा वलयाङ्गुलीयकादयो यस्य सत्यस्य, सर्वभेदानुयायिनः सुवर्णादिस्सामान्यात्मनः, तत्सत्यमसत्योपाधि। शब्दनिबन्धनमिति। शब्दप्र-

वृत्तिनिमित्तमभिधेयमित्यर्थः। अन्ये तु ब्रुवते—शब्द एवाभिजल्पत्वमागतः शब्दार्थ इति॥ ८८९॥ § 3033

285/k

तत्र कोऽसावभिजल्प इत्याह—सोऽयमित्यादि। § 3034

सोऽयमित्यभिसम्बन्धाद्रूपमेकीकृतं यदा।
शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते॥
८९० ॥§ 3036

शब्द एवार्थ इत्येवं शब्देऽर्थस्य निवेशनं सोऽयमित्यभिसम्बन्धः, तस्मात्कारणाद्यदा शब्दस्यार्थेन सहैकीकृतं रूपं भवति तं स्वीकृतार्थाकारं शब्दमभिजल्प्यमित्याहुः ॥ ८९०॥ § 3037

अन्ये तु बुद्ध्यारूढमेवाकारं बाह्यवस्तुविषयं बाह्यवस्तुतया गृहीतं बुद्धिरूपत्वेनाविर्भावितं शब्दार्थमाहुः—तद्दर्शयति—यो वेत्यादि। § 3038

यो वाऽर्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः।
स बाह्यं वस्त्विति ज्ञातः शब्दार्थः कैश्चिदिष्यते॥
८९१ ॥§ 3040

बुद्धिविषय इति। बुद्धौ विपरिवर्त्तमानः, बुद्धिस्थ इति यावत्। बाह्यवस्तुनिबन्धन इति। सदसद्वाह्यं वस्तु निबन्धनमक्षरचिह्नस्थानीयं स्वरूपमुपदर्शयितुं प्रक्र(?)म्यते यस्य, स बाह्यवस्तुनिबन्धनः। बाह्यं वस्त्वितिज्ञात इति। बुद्धिरूपत्वेनाविर्भावितो बाह्यतयाध्यवसित इत्यर्थः। तथाहि—यावद्बुद्धिरूपमर्थेष्वप्रत्यस्तं बुद्धिरूपमेवेति तत्त्वभावनया गृह्यते, तावत्तस्य शब्दार्थत्वं नावसीयते, तत्र क्रियाविशेषसम्बन्धाभावात्। न हि गामानय दधि खादेत्यादिकाः क्रियास्तादृशि बुद्धिरूपे सम्भवन्ति, क्रियायोगसम्भवी चार्थः शब्दैरभिधीयते। अतो बुद्धिरूपतया गृहीतोऽसौ न शब्दार्थः। यदा तु बाह्यवस्तुनि प्रत्यस्तो भवति तदा तस्मिन् प्रतिपत्ता बाह्यतया विपर्यस्तः क्रियासाधनसामर्थ्यं तस्य मन्यत इति भवति शब्दार्थः। ननु चापोहवादिपक्षादस्य को विशेषः ? तथाहि—अपोहवादिनाऽपि बुद्ध्याकारो बाह्यरूपतया गृहीतः शब्दार्थ इति भाष्यत एव। यथोक्तम्—तद्रूपारोपगत्यान्यव्यावृत्त्यधिगतेः पुनः। शब्दार्थोऽर्थः स एवेति वचने न विरुध्यते॥ इति। नैतदस्ति—अयं हिबुद्ध्याकारवादी बाह्ये वस्तुन्यभ्रान्तं सविषयं द्रव्यादिषु पारमार्थिकेष्वध्यस्तं बुद्ध्याकारं परमार्थतः शब्दार्थमिच्छति। नतु निरालम्बनं भिन्नेष्वभेदाध्यवसायेन प्रवृत्तेर्भ्रान्तमित-

११ नतु] Correction: ; ननु (sic!)नतु

रेतरभेदनिबन्धनमिच्छति। यदि तु यथाऽस्माभिरुच्यते— सर्वो मिथ्यावभासोऽयमर्थेष्वेकात्मना ग्रहः। इतरेतरभेदोऽस्य बीजं संज्ञा यदर्थिका॥ इति। तदा सिद्धसाध्यता। तथा च वक्ष्यति— इतरेतरभेदोऽस्य बीजं चेत्पक्ष एष नः इति। न चापोहवादिना परमार्थतः किंचिद्वाच्यं बुद्ध्याकारोऽन्यो
286/k वा शब्दानामि ष्यते। तथाहि—य एव शाब्दे प्रत्यये व्यवसीयमानतया प्रतिभासते स शब्दार्थः।नच बुद्ध्याकारः शाब्दप्रत्ययेन व्यवसीयते, किं तर्हि ? बाह्यमेवार्थक्रियाकारि वस्तु। नचापि तेन बाह्यं परमार्थतो व्यवसीयते, यथातत्त्वमनध्यवसायात्, यथाव्यवसायमतत्त्वात्। अतः समारोपित एव शब्दार्थः। यच्च समारोपितं तन्न किंचिदिति न किंचिद्भावतोऽभिधीयते शब्दैः। यत्पुनरुक्तम्— शब्दार्थोऽर्थः स एवेति तत्समारोपितमेवार्थमभिसन्धाय। बुद्ध्याकारवादिना तु बुद्ध्याकारः परमार्थतो वाच्य इष्यत इति महान्विशेषः॥ ८९१॥ § 3041

अन्ये त्वाहुरभ्यासात्प्रतिभाहेतुः शब्दो न तु बाह्यार्थप्रत्यायक इति (तदेतत्) दर्शयति—अभ्यासादित्यादि। § 3042

अभ्यासात्प्रतिभाहेतुः सर्वः शब्दः समासतः।
बालानां च तिरश्चां च यथाऽर्थप्रतिपादने॥
८९२॥ § 3044

शब्दस्य क्वचिद्विषये पुनः पुनः प्रवृत्तिदर्शनमभ्यासः। नियतसाधनावच्छिन्नक्रियाप्रतिपत्त्यनुकूला प्रज्ञा प्रतिभा। सा प्रयोगदर्शनावृत्तिसहितेन शब्देन जन्यते। प्रतिवाक्यं प्रतिपुरुषं च सा भिद्यते। स तु तस्या अपरिमाणो भेदः शब्दव्यवहारस्यानन्त्यान्न शक्यते विधातुमित्यत आह—बालानां च तिरश्चां चेत्यादि। यथैव ह्यङ्कुशाभिघातादयो हस्त्यादीनामर्थप्रतिपत्तौ क्रियमाणायां प्रतिभाहेतवो भवन्ति। तथा सर्वेऽर्थवत्सम्मता वृक्षादयः शब्दा यथाभ्यासं प्रतिभामात्रोपसंहारहेतवो भवन्ति, न त्वर्थं साक्षात्प्रतिपादयन्ति। अन्यथा हि कथं परस्परपराहताः प्रवचनभेदा उत्पाद्यकथाप्रबन्धाश्च स्वविकल्पोपरचितपदार्थभेदद्योतकाः स्युरिति॥ ८९२॥ § 3045

तत्रेत्यादिना प्रतिविधत्ते। § 3046

तत्रास्त्यर्थोऽभिधेयोऽयं किं स्वलक्षणमिष्यते।
जातिर्योगोऽथ यद्वाऽन्य(त्) बुद्धेर्वा
प्रतिबिम्बकम्॥ ८९३॥ § 3048

एते स्वदोषाः पूर्वोक्ता अस्त्यर्थे केवलेऽपि च।
प्रतिपाद्ये न भेदेन व्यवहारोऽवकल्पते॥
८९४॥§ 3050

यद्यस्त्यर्थः पूर्वोदितस्वलक्षणादिस्वभाव इष्यते। तदा पूर्वोदितदोषप्रसङ्गः।किंचानिर्धारितरूपविशेषत्वादस्त्यर्थस्य तस्मिन्केवले शब्दैः प्रतिपद्यमाने गौर्गवयो गज इत्यादिभेदेन व्यवहारो न स्यात्, तस्य शब्दैरप्रतिपादितत्वात्॥ ८९३॥ ८९४॥ § 3051
287/k

गोत्वेत्यादिना परस्योत्तरमाशङ्कते। § 3052

गोत्वशब्दविशिष्टार्थसत्तामात्रगतेर्भवेत्।
विषाणाकृतिनीलादिभेदाख्यातेस्तु तन्मतम्॥
८९५॥§ 3054

स्यादेतत्—गोत्वशब्दाभ्यां विशिष्टस्यार्थसत्तामात्रस्य सावलेयत्वादिभेदरहितस्यगोशब्दाद्गतेः—प्रतीतेः कारणात्। भेदेन व्यवहारो भविष्यतीति। यद्येवं कथं तर्हि शब्दार्थत्वमस्त्यर्थमात्रस्य मतं यावता गवादिविशेषः प्रतिपाद्योऽस्त्येवेत्याशङ्क्य परः परिहारमाह—विषाणाकृतीत्यादि। विषाणादेर्विशेषस्य शब्दादख्यातेरप्रतीतेः कारणात्तदुक्तम्—अस्ति कश्चिदर्थः प्रत्याय्य इति, न तु गोत्वादिगोत्वादिशब्दयोर्विशेषणभूतयोरप्रतीतेरित्यदोषः॥ ८९५॥ § 3055

नन्वेवमित्यादिना प्रतिविधत्ते। § 3056

नन्वेवं तद्वतोऽर्थस्य भेदानां चाभिधा भवेत्।
तद्भावे तत्र दोषश्च नान्योऽस्त्यर्थश्च दृश्यते॥
८९६॥§ 3058

यदा गोत्वादिना विशिष्टमर्थमात्रमुच्यते इति मतं, तदा तद्वतोऽर्थस्याभिधानमङ्गीकृतं स्यात्। तत्र च जातेस्तत्समवायस्य च निषेधात्तद्वतोऽर्थस्यासम्भव इति पूर्वोक्तो दोषः। किंच—तद्वतोऽर्थस्य स्वलक्षणात्मकत्वादशक्यसमयत्वमव्यवहार्यत्वमस्पष्टावभासप्रसङ्गश्च पूर्ववदापद्यते एव। स्वलक्षणादिव्यतिरेकेणान्य एवास्त्यर्थ इति चेदाह—नान्योऽस्त्यर्थश्च दृश्यत इति। स्वलक्षणादिव्यतिरेकेणान्योऽस्त्यर्थो निरूप्यमाणो न बुद्धेर्गोचरतामवतरति॥ ८९६॥ § 3059

समुदायाभिधानपक्षे दोषमाह—समुदायाभिधानेऽपीत्यादि। § 3060

समुदायाभिधानेऽपि जातिभेदाभिधा स्फुटा।
तपोजातिक्रियादीनां सामस्त्येनाभिधानतः॥
८९७ ॥§ 3062

समुदायाभिधानपक्षे स्फुटतरमेव जातेर्भेदानां च तपःप्रभृतीनामभिधानमङ्गीकृतमिति प्रत्येकाभिधानपक्षभाविनो दोषाः समुदायाभिधाने सर्वे युगपत्प्राप्नुवन्ति॥ ८९७॥ § 3063

असत्यो वाऽपीत्यादिपक्षद्वये दोषमाह—निर्द्धारितेत्यादि। § 3064

निर्द्धारितस्वरूपाणां द्रव्यादीनां तु योगतः।
सम्बन्धो यच्च सामान्यं सत्यं तद्वारितं पुरा॥
८९८ ॥§ 3066

भेदजात्यादिरूपेण शब्दार्थानुपपत्तितः।
अर्थेनैकीकृतं रूपं न शब्दस्योपपद्यते॥
८९९ ॥§ 3068

288/k

जल्पो बुद्धिस्थ एवायं बाह्ययोगविभेदतः।
ततः को भेद एतस्य बुद्धिपक्षादनन्तरात्॥
९०० ॥§ 3070

बुद्ध्याकारोऽपि शब्दार्थः प्रागेव विनिवारितः।
ज्ञानादव्यतिरिक्तस्य व्यापकत्ववियोगतः॥
९०१ ॥§ 3072

पूर्वं षद्दार्थपरीक्षायां संयोगसमवायलक्षणस्य वारितत्वात्, सामान्यस्य च त्रिगुणात्मकस्य सत्यस्याव्यतिरिक्तस्य साङ्ख्यपरीक्षायां, व्यतिरिक्तस्यापि षद्दार्थपरीक्षायां निरस्तत्वान्नासत्यसंयोगो नाप्यसत्योपाधिसामान्यं वाच्य-

७ बुद्धि] Correction : ; त्रुटि (sic !)बुद्धि

म्। अभिजल्पपक्षेऽप्याह—यदि शब्दस्य कश्चिदर्थः सम्भवेत्, तदा तेन सहैकीकरणं भवेत्, यावतास्वलक्षणादिरूपस्य शब्दार्थस्यासम्भवः पूर्वं प्रतिपादितस्तत्कथं तेनैकीकरणं भवेत्। अपिचायमभिजल्पो बुद्धिस्थ एव—तथाहि बाह्ययोः शब्दार्थयोर्भिन्नेन्द्रियग्राह्यत्वादिभ्यो भेदस्य सिद्धेस्तयोरैक्यापादनमयुक्तमेव भाविकम्। अतो बुद्धिस्थयोरेव शब्दार्थयोरेकबुद्धिगतत्वादेकीकरणं युक्तम्। तथाह्युपगृहीताभिधेयाकारस्तिरोभूतशब्दस्वभावो बुद्धौ विपरिवर्त्तमानः शब्दात्मा स्वरूपानुगतमर्थविभागेनान्तःसन्निवेशयन्नभिजल्प उच्यते। स च बुद्धेरात्मगत एवाकारो युक्तो न बाह्यस्तस्यैकान्तेन परस्परं विविक्तस्वभावत्वात्। ततश्च बुद्धिशब्दार्थपक्षादनन्तरोक्तादस्य को भेदः ?—नैव कश्चित्। उभयत्रापि बौद्ध एवार्थः। एतावन्मात्रं तु भिद्यते, शब्दार्थावेकीकृताविति। दोषस्तु समान एव ज्ञानादव्यतिरिक्तं च कथमर्थान्तरं व्रजेदिति। तदेव दर्शयति —बुद्ध्याकारोऽपीत्यादि॥ ८९८॥ ८९९॥ ९००॥ ९०१॥ § 3073

प्रतिभापक्षे दोषमाह— § 3074

प्रतिभाऽपि च शब्दार्थो बाह्यार्थविषया यदि।
एकात्मनियते बाह्ये विचित्राः प्रतिभाः कथम्॥
९०२ ॥§ 3076

अथ निर्विषया एता वासनामात्रभावतः।
प्रतिपत्तिः प्रवृत्तिर्वा बाह्यार्थेषु कथं भवेत्॥
९०३ ॥§ 3078

बाह्यरूपाधिमोक्षेण स्वाकारे यदि ते मते।
शब्दार्थोऽतात्त्विकः प्राप्तस्तथा भ्रान्त्या प्रवर्त्तनात्॥
९०४ ॥§ 3080

निर्बीजा न च सा युक्ता सर्वत्रैव प्रसङ्गतः।
इतरेतरभेदोऽस्य बीजं चेत्पक्ष एष नः॥
९०५ ॥§ 3082

289/k

यदि प्रतिभा परमार्थतो बह्यार्थविषया तदेकत्र वस्तुनि शब्दादौ विरुद्धसमयावस्थायिनां विचित्राः प्रतिभा न प्राप्नुवन्ति, एकस्यानेकस्वभावासम्भवात्। अथ निर्विषयास्तदाऽर्थे प्रवृत्तिप्रतिपत्ती न प्राप्नुतः, अतद्विषयत्वाच्छब्दस्य। अथ स्वप्रतिभासेऽनर्थेऽर्थाध्यवसायेन भ्रान्त्या ते प्रवृत्तिप्रतिपत्ती भवतस्तदा भ्रान्तः शब्दार्थः प्राप्नोति। तस्याश्च भ्रान्तेर्बीजं कारणं वक्तव्यम्, अन्यथा निर्बीजा भ्रान्तिर्भवन्ती सर्वतः सर्वदैव स्यात्। अथ भावानां परस्परतो भेद एव बीजमस्या अभ्युपगम्यते, तदाऽस्मत्पक्षमेव भवान् साधयतीति सिद्धसाध्यता॥ १०२॥ १०३॥ १०४॥॥ १०५॥ § 3083

साम्प्रतं सर्वेष्वेव पक्षेषु समानं दूषणमाह—यदि वेत्यादि। § 3084

यदि वा सर्वमेवेदं क्षणिकं स्यन्न वा तथा।
क्षणिकत्वेऽन्वयायोगः क्रमिज्ञानं च नान्यथा॥
१०६॥ § 3086

सर्वमेतत्स्वलक्षणजात्यादि क्षणिकं वा स्यादक्षणिकं वा ? तत्राद्ये पक्षे सङ्केतकालदृष्टस्य व्यवहारकालेऽन्वयासम्भवान्न तत्र समयः। अक्षणिकपक्षे च नाक्रमात् क्रमिणो भाव इति शब्दार्थविषयस्य क्रमिज्ञानस्याभावप्रसङ्गः। अन्यथेति। अक्षणिकत्वे॥ १०६॥ § 3087

अन्ये त्वाहुः—अर्थविवक्षां शब्दोऽनुमापयतीति। यथोक्तम्— अनुमानं विवक्षायाः शब्दादन्यन्न विद्यत इति। अत्राह—एतेनैवेत्यादि। § 3088

एतेनैव विवक्षाऽपि शब्दगम्या निराकृता।
शब्दार्थासम्भवे हीत्थं क्व विवक्षा क्व वा श्रुतिः॥
१०७॥ § 3090

यदि पारमार्थतो विवक्षा पारमार्थिकशब्दार्थविषयेष्यते, तदसिद्धम्, स्वलक्षणादेः शब्दार्थस्य कस्यचिदसम्भवात्। अतो न क्वचिदर्थे परमार्थतो विवक्षाऽस्ति, अन्वयिनोऽर्थस्याभावात्। नापि तत्प्रतिपादकः शब्दोऽस्ति, तदाह—क्व वा श्रुतिरिति।श्रुतिः—शब्दः। विवक्षायां न प्रतिपाद्यायां श्रुतेः शब्दाद्बहिरर्थे प्रवृत्तिर्न प्राप्नोति।तस्याचोदितत्वादर्थान्तरवत्॥ १०७॥ § 3091

अथ मतं यो विवक्षाविपरिवर्त्ती रूपादिरर्थो यश्च बाह्यस्तयोः सारूप्यमस्त्यतः सारूप्यादचोदिते बाह्ये प्रवृत्तिर्भविष्यतिं यमलकवदित्यय आह—सारूप्यादिति। § 3092

२ स्वभावा] Correction : ; स्वभाव (sic !)स्वभावा

(सारूप्याच्च) श्रुतेर्वृत्तिःकथं वा (ऽशब्द)चोदिते।
सारूप्या (द्यमलकव) न्नामाद्येतेन दूषितम्॥
९०८ ॥§ 3094

290/k

एवं सति सर्वदा बाह्ये प्रवृत्तिर्न प्राप्नोति, कदाचिद्विवक्षापरिवर्त्तिन्यपि चोदितेप्रवृत्तिर्भवेत्। यथा यमलकयोरिव। योऽपि वैभाषिकः शब्दविषयं नामाख्यं निमित्ताख्यं चार्थचिह्नरूपं विप्रयुक्तं संस्कारमिच्छति, तदप्येतेनैव दूषितं द्रष्टव्यम्। तथाहि—तन्नामादि यदि क्षणिकं तदाऽन्वयायोगः, अक्षणिकत्वे क्रमिज्ञानानुपपत्तिः, बाह्ये च प्रवृत्त्यभावप्रसङ्गः, सारूप्या(च्च) न सर्वदेति सर्वं यथोक्तं दूषणमखण्डमेवावतरति। अथवा—एतेनेति। यथासम्भवं स्वलक्षणादिदूषणेन। तथाह्यत्राप्येवं वक्तव्यम्— अशक्यसमयो ह्यात्मा नामादीनामनन्यभाक्। तथाऽसतो न वाच्यत्वंकथंचिदुपपद्यते॥ इति॥ ९०८॥ § 3095

यदुक्तं विवक्षासमारूढार्थद्योतकत्वे शब्दानां बाह्ये प्रवृत्तिर्न प्राप्नोति। अत्र परस्योत्तरमाशङ्कयन्नाह—विवक्षेत्यादि। § 3096

विवक्षानु(मितिश्लिष्टमाकारं बाह्यभावतः।
व्यवस्ततोः प्रवृत्ति)श्चेत्तदेवास्मन्मतं पुनः॥
९०९ ॥§ 3098

विवक्षा च वक्तृसन्तानवर्त्तिनी, तस्या एव विवक्षाया अनुमितिश्च श्रोतृसन्तानगतेति विवक्षानुमिती ताभ्यां श्लिष्टः—सम्बद्धः, तत्प्रतिभासीत्यर्थः। तमाकारं बाह्यतया व्यवस्यतोर्वक्तृश्रोत्रोरत्र बाह्ये प्रवृत्तिर्भविष्यति। एतदुक्तं भवति—परमार्थतः स्वप्रतिभासानुभवेऽपि वक्तुरेवमध्यवसायो भवति, मयाऽस्मै बाह्य एवार्थः प्रतिपाद्यते। श्रोतुरप्येवं भवति, ममायं बाह्यमेव प्रतिपादयतीति। अतस्तैमिरिकद्वयद्विचन्द्रदर्शनवदयं सर्वः शाब्दो व्यवहार इति। यद्येवमस्मत्पक्ष एव पतितोऽसीति सिद्धसाध्यता। पूर्वं प्रतिभाद्वारेणागतत्वादित्यतः पुनरित्याह। तदेवमकृतसमयत्वादित्यस्य हेतोर्नासिद्धतेति प्रतिपादितम्। अनैकान्तिकत्वविरुद्धत्वे तु पूर्वमेव निरस्ते। तस्मात्सिद्धा यथोक्तापोहकृतः शब्दा इति॥ ९०९॥ § 3099

अत्र परोऽपोहशब्दश्रवणाच्छलितमतिरविदितविवक्षितापोहस्वरूपः प्रतिज्ञायाः प्रतीत्यादिविरोधमुत्पादयन्नाह—नन्वन्यापोहकृच्छब्दो युष्माभिः कथमुच्यत इति। § 3100

१० तथाऽसतो] Correction : ; तथा मतो (sic !)तथाऽसतो

नन्वन्यापोहकृच्छब्दो युष्माभिः कथमुच्यते।
निषेधमात्रं नैवेह प्रतिभासेऽवगम्यते॥ ११० ॥§ 3102

किंतु गौर्गवयो हस्ती वृक्षश्चे(त्या)दिशब्दतः।
विधिरूपावसायेन मतिः शाब्दी प्रवर्त्तते॥
१११ ॥§ 3104

291/k

अन्यापोहकृच्छब्द इत्यत्रेतिशब्दोऽध्याहार्यः। अन्यापोहकृच्छब्द इत्येवं कथमभिधीयत इत्यर्थः। कस्मान्नाभिधेयमित्याह—निषेधमात्रमित्यादि। निषेधमात्रमेव किलान्यापोहोऽभिप्रेतः, नचेह शाब्दे प्रतिभासे निषेधमात्रं गम्यते। किं तर्हि वस्तुरूपाध्यवसायेनैव शाब्दी धीः प्रवर्त्तमाना समालक्ष्यते। नच शाब्दे ज्ञाने यो न प्रत्यवभासते स शब्दार्थो युक्तोऽतिप्रसङ्गात्। तस्मात्प्रतीतिविरोधः प्रतिज्ञायाः ॥ ११०॥ १११॥ § 3105

यदि गौरित्यादिना श्लोकत्रयेण भामहस्य मतेन प्रतीत्यादिबाधामुद्भावयति। § 3106

यदि गौ (रित्ययं शब्दः कृतार्थोऽद) न्यनिराकृतौ।
जनको गवि गोबुद्धेर्दृश्यतामपरो ध्वनिः॥
११२ ॥§ 3108

यदि गोशब्दोऽन्यव्यवच्छेदप्रतिपादनपरस्तदा तस्य तत्रैव चरितार्थत्वात्सास्नादिमति पदार्थे गोशब्दात्प्रतीतिर्न प्राप्नोति, ततश्च सास्नादिमत्पदार्थविषयाया गोबुद्धेर्जनकोऽपरो ध्वनिरन्वेषणीयः स्यात्॥ ११२॥ § 3109

स्यादेतदेकेनैव गोशब्देन बुद्धिद्वयस्य जन्यमानत्वान्नापरो ध्वनिर्मृग्यत इत्याह—नन्वित्यादि। § 3110

ननु ज्ञानफलाः (शब्दा न चैकस्य फलद्व)यम्।
अपवादविधि(ज्ञाने फलमेकस्य वा कथम्)॥
११३ ॥§ 3112

---

३ रित्ययं शब्दः कृतार्थोऽ] Correction: ; रितिशब्दोऽयं भवे (sic!)रित्ययं शब्दः कृतार्थोऽ
२ नन्वि] Correction: ; न बि (sic!)नन्वि
३ ननु] Correction: ; न तु (sic!)ननु
४ ज्ञाने] Correction: ; ज्ञानं (sic!)ज्ञाने

विधिविषयं प्रतिषेधविषयं च ज्ञानं फलं येषां ते तथोक्ताः। ततः किमित्याह—न चैकस्येत्यादि। न ह्येकस्य विधिकारिणः प्रतिषेधकारिणे वा शब्दस्य युगपद्विज्ञानद्वयलक्षणं फलम्। उपलभ्यत इति शेषः। नचापि परस्परविरुद्धमपवादविधिज्ञानं फलं युक्तम्॥ ९१३॥ § 3113

प्रागित्यादिनोपचयहेतुमाह। § 3114

प्रागगौरिति विज्ञानं गोशब्दश्राविणो भवेत्।
येनागोः प्रतिषेधाय प्रवृत्तो गौरिति ध्वनिः॥
९१४॥§ 3116

यदि च गोशब्देनागोनिवृत्तिर्मुख्यतः प्रतिपाद्यते तदा गोशब्दश्रवणानन्तरं प्रथमतरमगौरित्येषा श्रोतुः प्रतिपत्तिर्भवेत्। यत्रैव ह्यव्यवधानेन शब्दात्प्रत्यय उपजायते स एव शब्दार्थो व्यवस्थाप्यते। नचाव्यवधानेनागोव्यवच्छेदे मतिरुपजायते। अतोगोबुद्ध्यनुत्पत्तिप्रसङ्गात्प्रथमतरमगोप्रतीतिप्रसङ्गाच्च नापोहः शब्दार्थ इति॥ ९१४॥ § 3117

292/k

अगोनिवृत्तिरित्यादिना कुमारिलमतेन प्रतिज्ञादोषमुद्भावयति। § 3118

अगोनिवृत्तिः सामान्यं वाच्यं यै (रुररीकृतम्।)
(गोत्वं) वस्त्वेव तैरुक्त(मेतया हि गिरा स्फुटम्)॥
९१५॥§ 3120

स ह्येवमाह—अपोहलक्षणं सामान्यं वाच्यत्वेनाभिधीयमानं कदाचित्पर्युदासलक्षणं वाऽभिधीयते प्रसज्यलक्षणं वा। तत्र प्रथमे पक्षे सिद्धसाध्यता प्रतिज्ञादोषः—तथाह्यस्माभिर्गोत्वाख्यं सामान्यं गोशब्देन वाच्यमित्येवमिष्यते, भवता चागोनिवृत्तिलक्षणं सामान्यं गोशब्देनोच्यत इति ब्रुवता तदेव शब्दान्तरेणाभिधीयत इति केवलं नाम्नि विवादः॥ ९१५॥ § 3121

अथ कथं तदेव शब्दान्तरेणाभिहितमित्याह—भावान्तरात्मक इत्यादि। § 3122

भावान्तरात्मकोऽभावो येन सर्वो व्यवस्थितः।
तत्राश्वादिनिवृत्तात्मा भावः स(क?)इति कथ्यताम्॥
९१६॥§ 3124

२ गोत्वं] Correction: ; वाच्यं (sic!)गोत्वं

४ त्मा भावः] Correction: ; त्माऽभावः (sic!)त्मा भावः

येन यस्मात्प्रागभावादिलक्षणश्चतुर्विधः सर्व एवाभावो भावान्तरात्मको व्यवस्थितः। यच्चोक्तम्— क्षीरे दध्यादि यन्नास्ति प्रागभावः स खथ्यते। नास्तिता पयसो दध्नि प्रध्वंसाभावलक्षणम्॥ गवि ह्यश्वाद्यभावश्च सोऽन्योन्याभाव उच्यते। शिरसोऽवयवा निम्ना वृद्धिकाठिन्यवर्जिताः॥ शशशृङ्गादिरूपेण (रूपाणां ?) सोऽत्यन्ताभाव उच्यते। न चावस्तुन एते स्युर्भेदास्तेनास्य वस्तुता॥ इति। एतेन क्षीरादय एव च दध्यादिरूपेणाविद्यमानाः प्रागभावादिव्यपदेशभाज इति दर्शितं भवति। तत्रैवमभावस्य भावान्तरात्मकत्वे स्थिते सति कोऽयं भवद्भिरश्वादिनिवृत्तिस्वभावोऽभावोऽभिप्रेत इति कथ्यताम्॥ ९१६॥ § 3125

स्यान्मतम्—किमत्र कथ्यते, गवादिस्वलक्षणात्मैवासावित्यत आह—नेष्ट इत्यादि। § 3126

(नेष्टोऽसाधारणात्मा वो) विशेषो निर्विकल्पनात्।
तथा च शाबलेयादिरसामान्यप्रसङ्गतः॥
९१७॥ § 3128

तस्मात्सर्वेषु यद्रूपं प्रत्येकं परिनिष्ठितम्।
गोबुद्धिस्तन्निमित्ता स्या........स्ति तत्॥
९१८॥ § 3130

योऽसावसाधारणो विशेषः सोऽश्वादिनिवृत्त्यात्मा नेष्टो भवतां। कस्मादित्याह— निर्विकल्पनात्। तत्र सर्वविकल्पप्रत्यस्तमयात्। विकल्पज्ञान-
293/k गोचरः सामान्यमेवेष्यते, असाधारणस्त्वर्थः सर्वविकल्पानामगोचरः। यथोक्तम्—स्वसंवेद्यमनिर्देश्यं रूपमिन्द्रियगोचर इति। विशेषात्मकत्वे कारणमसाधारणात्मकता, असाधारणात्मतया यो विशेष इत्यर्थः। एवमविशेषेणोक्तम्। साम्प्रतं विशेषेणैनमेवार्थमाह—तथाचेत्यादि। यथैव भवतामसाधारणो विशेषोऽश्वादिनिवृत्त्यात्मा गोशब्दाभिधेयो नेष्टस्तथैव शाबलेयादिशब्दवाच्यतया नेष्टोऽश्वादिनिवृत्त्यात्मा भाव इत्यत्राप्यनुवर्त्तते। कस्मादित्याहि—असामान्यप्रसङ्गत इति। यदीष्येत तदा सामान्यं शब्दवाच्यं न स्यात्, तस्यानन्वयात्। यत एवमश्वादिनिवृत्त्यात्मा भावोऽसाधारणो न घटते,तस्मात्सर्वेषु सजातीयेषु शाबलेयादिपिण्डेषु यत्प्रत्येकं परिसमाप्तं तन्निबन्धना गोबुद्धिः। तच्च गोत्वाख्यमेव सामान्यम्। तस्यागोऽपोहशब्देनाभिधानात्केवलं नामान्तरमित्यतः सिद्धसाध्यता प्रतिज्ञादोषः॥ ९१७॥ ९१८॥ § 3131

अथ प्रसज्यलक्षणमिति पक्षस्तत्राह—निषेधमात्ररूपश्चेत्यादि। § 3132

निषेधमात्ररूपश्च शब्दार्थो यदि कल्प्यते।
अभावशब्द(वाच्या स्याच्छून्यताऽन्यप्रकारिका)॥
९१९॥§ 3134

अभावशब्दवाच्येति। अगोऽपोहलक्षणोऽ (णा ?) भाववाचकः शब्दोऽभावशब्दस्तद्वाच्य बहिरर्थशून्यता स्यात्, वस्तुरूपापह्नवात्। अन्यप्रकारिकेति। पूर्वं विज्ञानमात्रवादोपन्यासकाले भवद्भिरुपन्यस्ता, निरस्ता चास्माभिः, पुनरप्यत्र शब्दर्थचिन्ताप्रस्तावे सैवापोहव्याजेनाभिहिता, प्रतितिसिद्धस्यार्थस्यापवादात्॥ ९१९॥ § 3135

ततश्च को दोष इत्याह—तस्यां चेत्यादि। § 3136

तस्यां चाश्वादिबुद्धीनामात्मांशग्रहणं भवेत्।
तत्रान्यापोहवाच्यत्वं मुधैवाभ्युपगम्यते॥ ९२०॥§ 3138

तस्याम्—शून्यतायां वाच्यायां, शाब्दीनामश्वादिबुद्धीनामात्मांशग्रहणं प्राप्नोति, बाह्यवस्तुस्वरूपाग्रहात्। एवं च सति को दोष इत्याह—तत्रेत्यादि। तत्रैवं स्थिते सति, अपोहस्य वाच्यत्वं मुधैवाभ्युपगतं स्यात्। बुद्ध्याकारस्यानपेक्षितबाह्यार्थावलम्बनस्य विधिरूपस्यैव शब्दार्थत्वापत्तेः। ततश्चाभ्युपगमबाधा प्रतिज्ञाया इति भावः ॥ ९२०॥ § 3139

एतदेव दर्शयति—सामान्यमित्यादि। § 3140

सामान्यं (वस्तुरूपं हि बुद्ध्या)कारो भविष्यति।
शब्दार्थ..........................प्रकल्पितः॥
९२१॥§ 3142

294/k

बुद्ध्याकार एव वस्तुरूपं सामान्यं शब्दार्थो भविष्यतीति सम्बन्धः॥ ९२१॥ § 3143

स्यादेनालम्बनापि सा बुद्धिर्विजातीयगवादिबुद्धिभ्यो व्यावृत्तरूपा प्रवर्त्तते तेनापोहकल्पना युक्तैवेत्यत आह—वस्तुरूपेत्यादि। § 3144

वस्तुरूपा च सा बुद्धिः शब्दार्थेषूपजायते।
तेषु वस्त्वेव (कल्प्येत वाच्यं) बुद्ध्यनपोहकम्॥
९२२॥§ 3146

१ शब्दार्थो] Correction : ; शब्दर्थो (sic !)शब्दार्थो

वस्तुरूपेति विधिरूपावसायिनी। सा बुद्धिरिति। अनालम्बनाऽश्वादिबुद्धिः।शब्दार्थेष्विति। अश्वादिष्वध्यवसितेषु। वस्त्वेवेति। अश्वादिपिण्डाध्यवसायिबुद्ध्यात्मकम्। अवधारणफलं दर्शयति—बुध्यनपोहकमिति। अविद्यमानोऽपोहो यत्र वाच्ये बुद्ध्यात्मके वस्तुनि तत्तथोक्तम्। बुद्धेरनपोहकम्। बुद्ध्यन्तरापोहरहितमित्यर्थः। अथवाअपोहत इत्यपोहकं, नापोहकमनपोहकं, बुद्धेरनपोहकं बुद्ध्यनपोहकमिति समासः। एतदुक्तं भवति। यद्यपि बुद्धिर्बुद्ध्यन्तराद्व्यवच्छिन्ना, तथापि सा न बुद्ध्यन्तरव्यवच्छेदावसायिनी जायते। किं तर्हि ? अश्वादिष्वर्थेषु विधिरूपावसायिनी, तेन वस्त्वेवविधिरूपं वाच्यं कल्पेत युक्तिमत्, नापोहः, बुद्ध्यन्तरस्य बुद्ध्यन्तरानपोहकत्वात् ॥ ९२२॥
§ 3147

किंच योऽयं भवद्भिरपोहः पदार्थत्वेन कल्पितः स वाक्यादपोद्धृत्य कल्पितस्य पदस्यार्थ इष्टो वाक्यार्थस्तु प्रतिभालक्षण एव। यथोक्तम्— अपोद्धारे पदस्यायं वाक्यादर्थो विवेचितः। वाक्यार्थः प्रतिभाख्योऽयं तेनादावुपजन्यते॥ इति। अत्रोच्यते—असत्यपीत्यादि। § 3148

(असत्यपि च बाह्येऽर्थे वाक्यार्थः प्रतिभा) यथा।
पदार्थोऽपि तथैव स्यात्किमपोहः प्रकल्प्यते॥
९२३ ॥§ 3150

यथा बाह्येऽर्थे शब्दवाच्यत्वेनासत्यपि वाक्यार्थो भवद्भिः प्रतिभालक्षण एव वर्ण्यते नापोहलक्षणस्तथा पदार्थोऽपि वाक्यार्थवत्प्रतिभालक्षण एव स्यादित्यपोहःपदार्थतया किमिति कल्प्यते। द्वयोरपि पदवाक्यार्थयोर्विधिरूपत्वमेवास्त्विति भावः ॥ ९२३॥ § 3151

स्यादेतत्प्रतिभायाः प्रतिभान्तराद्विजातीयाद्व्यवच्छेदोऽस्तीत्यतोऽपोहः कल्प्यत इत्याह—बुद्ध्यन्तरादित्यादि। § 3152

बुद्ध्यन्तरा(द्व्यवच्छेदो न च बुद्धौ) प्रतीयते।
स्वरूपोत्पादमात्राच्च (नान्यमंशं बिभर्त्ति सा)॥
९२४ ॥§ 3154

295/k

यद्यप्यसौ न प्रतीयते तथाऽप्यस्त्येवेति चेदाह—स्वरूपोत्पादेत्यादि। यद्यपिबुद्धेर्बुद्ध्यन्तराद्व्यावृत्तिरस्ति, तथापि तस्यां न शब्दव्यापारोऽस्ति। त-

५ बाह्येऽर्थे वाक्यार्थः प्रतिभा] Correction : ; वाक्यार्थः प्रतिभालक्षणो (sic !)बाह्येऽर्थे वाक्यार्थः प्रतिभा

४ नान्यमंशं बिभर्त्ति सा] Correction : ; विधिरूपावसायिनी (sic !)नान्यमंशं बिभर्त्ति सा

थाहि—शब्दादियं बुद्धिरुत्पद्यमाना न स्वरूपोत्पादव्यतिरेकेणान्यं बुद्ध्यन्तरव्यवच्छेदलक्षणं शब्दादवसीयमानमंशं बिभ्रती लक्ष्यते, किं तर्हि ? विधिरूपावसायिन्येवोत्पद्यत इत्यर्थः। न च शब्दादवसीयमानो वस्त्वंशः शब्दार्थो युक्तोऽतिप्रसङ्गत्। तस्मात्प्रतीतिबाधितत्वं प्रतिज्ञाया इति भावः॥ ९२४॥
§ 3155

पुनरपि प्रसङ्गापादनेन प्रतीत्यादिबाधितत्वमेव दर्शयन्नाह—भिन्नेत्यादि।
§ 3156

भिन्नसामान्यवचना विशेषवचनाश्च ये।
सर्वे भवेयुः पर्याया यद्यपोहस्य वाच्यता॥
९२५॥§ 3158

ये हि भिन्नसामान्यवचना गवाश्वादयो ये च विशेषवचनाः शाबलेयादयस्ते सर्वे भवतां पर्यायाः प्राप्नुवन्त्यर्थभेदाभावात्, वृक्षपादपादिशब्दवत्॥ ९२५॥ § 3159

कस्मात्पुनरर्थभेदो न स्म्भवतीत्याह—संसृष्टेत्यादि। § 3160

संसृष्टैकत्वनानात्वविकल्प(रहितात्मनाम्।
अवस्तुत्वादपोहानां) नैव भेदोऽपि विद्यते॥
९२६॥§ 3162

वस्तुन्येव हि संसृष्टत्वैकत्वनानात्वविकल्पाः सम्भवन्ति, नावस्तुनि, अपोहानां चावस्तुत्वान्न परस्परं संसृष्टत्वादिविकल्पो युक्तः, तत्कथमेषां परस्परं भेदः सिद्ध्यति ॥ ९२६॥ § 3163

अथ भेदस्तेषामभ्युपगम्यते, तथा सति नियमेन वस्तुत्वमापद्यत इति दर्शयति —यदि वेत्यादि। § 3164

यदि वा भिद्यमानत्वा (द्वस्त्व साधारणांशवत्)।
अवस्तुत्वे (त्वनानात्वा) त्पर्यायत्वान्न मुच्यते॥
९२७॥§ 3166

वस्त्विति साध्यनिर्देशः। प्रयोगः—ये परस्परं विभिद्यन्ते ते वस्तु, यथा स्वलक्षणानि, परस्परं विभिद्यन्ते चापोहा इति स्वभावहेतुः। ततश्च वस्तुत्वे

---

२ तात्मनाम्] Correction:; तोहि सः (sic!)तात्मनाम्
३ द्वस्त्व] Correction:; द्वस्तु (sic!)द्वस्त्व

सति विधिरेव शब्दार्थ इति सिद्धम्। एतेन चानुमानबाधितत्वं प्रतिज्ञाया उक्तं भवति। अथावस्तुत्वमभ्युपगम्यतेऽपोहानां तदा नानात्वाभावात्पूर्ववत्पर्यायत्वप्रसङ्ग इत्येकान्त एषः॥ ९२७॥ § 3167

296/k

अत्र परो बौद्धस्य परिहारमाशङ्कते—ननु चेत्यादि। § 3168

....928ab ननु चाश्वादिभेदेन भेदोऽपोहस्य सेत्स्यति।§ 3169

यथोक्तम्— अपोह्यभेदाद्भिन्नार्थाः स्वार्थभेदगतौ जडा इति। ततश्च स्वतोभेदाभावेऽप्यपोह्यस्याश्वादेर्भेदादपोहस्यागवादिव्यावृत्तिरूपस्य भेदे सिद्धे न पर्यायत्वं भविष्यते। § 3170

न विशेष इत्यादिना परो दूषणमाह— § 3171

....928cd न विशेषः स्वतस्तस्य परतश्चोपजायते॥ ९२८॥§ 3172

स्वतो न तस्यापोहस्य विशेषो नानात्वमस्ति अभावैकरसत्वात्। परतोऽप्यसौ भवन्काल्पनिकः स्यान्न पारमार्थिकः। न हि स्वतोऽसतो भेदस्य परतः सम्भवो युक्तः ॥ ९२८॥ § 3173

कस्मान्न युक्त इत्याह—संसर्गिण इत्यादि। § 3174

संसर्गिणोऽपि ह्याधारा यं न भिन्दन्ति रूपतः।
अपोह्यै(र्बहिरङ्गैस्स भिद्येतेत्य) तिकल्पना॥
९२९॥§ 3176

तथाहि—संसर्गिणः—संबन्धिनः शाबलेयादयः, आधारा—अन्तरङ्गा अपि सन्तो, यम्—अपोहं, रूपतः—स्वभावतो भेत्तुमशक्ताः, बहुष्वपि शाबलेयादिष्वेकस्यागोव्यवच्छेदलक्षणस्यापोहस्य प्रवृत्तेरिष्टत्वात्, स कथं बहिरङ्गभूतैरपोह्यैरश्वादिभिर्भिद्येत। न हि यस्यान्तरङ्गोऽप्यर्थो न भेदकस्तस्य बहिरङ्गो भविष्यति। बहिरङ्गत्वहानिप्रसङ्गात्। तस्मादतिशयवती कल्पनेयमित्युपहसति॥ ९२९॥ § 3177

एवं तर्ह्यन्तरङ्गा एवाधाराः संसर्गिणो भेदका न भविष्यन्तीति चेदाह—तथैवेत्यादि। § 3178

तथैवाधारभेदेनाप्यस्य भेदो न युज्यते।

न हि सम्बन्धिभेदेन भेदो वस्तुन्यपीष्यते॥
९३० ॥§ 3180

किमुतावस्त्वसंसृष्टमव्यावृत्तं निवर्त्तते।
अनवाप्तविशेषांशं यत्किमप्यनिरूपितम्॥
९३१ ॥§ 3182

अस्येति। अपोहस्य। कस्मान्न युज्यत इत्याह—न हीत्यादि। आस्तां तावद्यदवस्तु सम्बन्धिभेदान्न भिद्यत इति, तस्य निःस्वभावत्वात्। वस्तुन्यपि हि यावत्संबन्धिभेदाद्भेदो नोपलभ्यत एव। तथाहि—देवदत्तादिकमेकं वस्तु युगपत्क्रमेणवाऽनेकैरासनादिभिः सम्बध्यमानमनासादितभेदमेवोपलभ्यते, किं पुनर्यदन्यव्यावृत्ति रूपमवस्तु। अवस्तुत्वादेव च क्वचिदसंसृष्टम्—असम्ब- 297/k
द्धम्, अन्यतश्च विजातीयादव्यावृत्तमवस्तुत्वादेव। अत एवानधिगतविशेषांशं तत्तादृशं सम्बन्धिभेदादपि कथमिव भेदमश्नवीत॥ ९३०॥ ९३१॥ § 3183

किंच—भवतु नाम सम्बन्धिभेदाद्भेदस्तथापि वस्तुभूतसामान्यानभ्युपगमे भवतां स एवापोहाश्रयः सम्बन्धी न सिद्ध्यति। यस्य भेदात्तद्भेदोऽवकल्प्यत इति दर्शयति -न चाप्रसिद्धेत्यादि। § 3184

न चाप्रसिद्धसारूप्यमपोहविषयात्मना।
शक्तः कश्चिदपि ज्ञातुं गवादीन........तः॥
९३२ ॥§ 3186

यदि हि गवादीनां वस्तुभूतं सारूप्यं प्रसिद्धं भवेत्तदाऽश्वाद्यपोहश्रयत्वमेषामविशेषेण सिद्ध्येन्नान्यथा, ततश्चापोहविषयत्वमेषामिच्छताऽवश्यं सारूप्यमङ्गीकर्त्तव्यम्, तदेव सामान्यं वस्तुभूतं शब्दवाच्यं भविष्यतीत्यपोहकल्पना निरर्थकैवेति भावः। विषयशब्दोऽत्राश्रयवचनः, जलविषया मत्स्या इति यथा॥ ९३२॥ § 3187

यैरप्यपोह्यभेदेन भेदः कल्प्यते, तेषां सोऽपि वस्तुभूतसामान्यमन्तरेण न सिध्यतीति दर्शयति—अपोह्यानपीत्यादि। § 3188

अपोह्यानपि चाश्वादीनेकधर्मा(न्व)यादृते।

३ अनवाप्त] Correction : ; अ(त एवा) (sic !)अनवाप्त
३ यत्किमप्य] Correction : ; य (द्विम) त्य (sic !)यत्किमप्य

न निरूपयितुं शक्तिस्तदपोहो न सिद्ध्यति॥
९३३॥§ 3190

यदि ह्यश्वादीनामेकः कश्चित्सर्वव्यक्तिसाधारणो धर्मोऽनुगामी स्यात्तदा ते सर्वे गवादिशब्दैरविशेषेणापोह्येरन्, नान्यथा, विशेषापरिज्ञानात्। साधारणधर्माभ्युपगमे चापोहकल्पनावैयर्थ्यम्, तत्—तस्मात्, अपोहो न सिद्ध्यति॥ ९३३॥ § 3191

अपि चापेहः शब्दलिङ्गाभ्यामेव प्रतिपाद्यत इति भवद्भिरिष्यते। तयोश्च शब्दलिङ्गयोर्वस्तुभूतसामान्यमन्तरेण प्रवृत्तिर्न युक्ता। ततश्च केनापोहः प्रतिपाद्यतामित्येतद्दर्शयति—न चान्वयेत्यादि। § 3192

न चान्वयविनिर्मुक्ता प्रवृत्तिः शब्दलिङ्गयोः।
ताभ्यां च न विनाऽपोहो न चासाधारणेऽन्वयः॥
९३४॥§ 3194

अन्वयविनिर्मुक्तेति। अन्वयमन्तरेणेत्यर्थः। ताभ्यामिति। शब्दलिङ्गाभ्यां विना नापोहः। गम्यत इति शेषः। स्वलक्षणेनैवान्वयं कृत्वा शब्दलिङ्गयोः प्रवृत्तिः करिष्यत इति चेदाह—न चासाधारणेऽन्वय इति। स्वलक्षणमसाधार-
298/k णमनन्य भाक्, तत्कथं तेनान्वयो भवेत्। तदेवमपोहकल्पनायां शब्दलिङ्गयोः प्रवृत्तिरेव नप्राप्नोति॥ ९३४॥ § 3195

भवतु वा प्रवृत्तिस्तथाऽप्यनयोः प्रामाण्यमभ्युपगतं हीयत इति दर्शयति—अपोहश्चेत्यादि। § 3196

अपोहश्चाप्यनिष्पन्नः साहचर्यं क्व कथ्यताम्।
तस्मिन्नदृश्यमाने च न तयोः स्यात्प्रमाणता॥
९३५॥§ 3198

प्रतिपाद्यार्थाव्यभिचारे सति शब्दलिङ्गयोः प्रामाण्यं स्यात्, प्रतिपाद्यश्चार्थोऽपोहस्त्वयेष्यते, स चाभावरूपत्वादनिष्पन्नो निःस्वभावतः। ततश्च साहचर्यमव्यभिचारित्वं क्व कस्मिन्विषये कथ्यतां शब्दलिङ्गयोः। किं तेन कथितेनेति चेदाह—तस्मिन्नित्यादि। तस्मिन्निति। साहचर्ये। तयोरिति। शब्दलिङ्गयोः। अविसंवादलक्षणत्वात्प्रामाण्यस्येति भावः॥ ९३५॥ § 3199

अथापि स्याद्विजातीयादर्शनमात्रेणैव शब्दलिङ्गे अगृहीतसादचर्ये एतत्स्वमर्थं गमिष्यत इत्याह—न चादर्शनमात्रेणेत्यादि। § 3200

न चादर्शनमात्रेण ताभ्यां प्रत्यायनं भवेत्।

सर्वत्रैव ह्यदृष्टत्वात्प्रत्ययो न विशिष्यते॥
९३६ ॥§ 3202

मात्रग्रहणमन्वयदृष्टिव्यवच्छेदार्थम्। कस्मान्न भवेदित्याह—सर्वत्रैवेत्यादि।सर्वत्र—सजातीये विजातीये स्वार्थे च। ततश्चायं स्वार्थोऽयं परार्थ इत्येवं प्रत्ययो ज्ञानं न विशिष्येत। स्वार्थमपि न गमयेत्, तत्राप्यदृष्टत्वात्परार्थवदिति यावत्। क्वचित्प्रत्याय्य इति पाठः। तत्र प्रत्याय्योऽभिधेयोऽर्थो न विशिष्यते—न भिद्यतइत्यर्थः। तदेवं शब्दलिङ्गयोः प्रवृत्तिप्रामाण्याभ्युपगमहानिप्रसङ्गान्नापोहः शब्दार्थो युक्तः॥ ९३६॥ § 3203

यदुक्तं न चाप्रसिद्धसारूप्यमित्यादि, तत्र परस्योत्तरमाशङ्कते—अथासत्यपीत्यादि। § 3204

अथासत्यपि सारूप्ये स्यादपोहस्य कल्पना।
गवाश्वयोरयं कस्मादगोऽपोहो न कल्प्यते॥
९३७ ॥§ 3206

यदि सारूप्यमन्तरेण शाबलेयादिष्वगोपोहस्य कल्पना स्यात्तदा गवाश्वयोरपि कस्मान्न प्रकल्प्येत, अविशेषात्। गवाश्वप्रभृतीनि चेत्यस्य लक्षणस्य विस्मृतत्वाद्विप्रेण गवाश्वयोरित्युक्तम्॥ ९३७॥ § 3207
299/k

तमेवाविशेषं दर्शयति—शाबलेयाच्चेत्यादि। § 3208

शाबलेयाच्च भिन्नत्वं बाहुलेयाश्वयोः समम्।
सामान्यं नान्यदिष्टं चेत्क्वागोऽपोहः प्रवर्त्तताम्—॥
९३८ ॥§ 3210

क्वागोऽपोहः प्रवर्त्ततामिति। यथैव शाबलेयाद्वैलक्षण्यादश्वे न प्रवर्त्तते, तथाबाहुलेयस्यापि ततो वैलक्षण्यमस्तीति तत्रापि न प्रवर्त्तेत। एवं शाबलेयादिष्वपि योज्यम्, सर्वत्र वैलक्षण्याविशेषात्॥ ९३८॥ § 3211

अपि च—यदा स्वलक्षणादिषु समयासम्भवान्न शब्दर्थत्वं युक्तं तथाऽपोहेऽपीति दर्शयन्नाह—इन्द्रियैरित्यादि। § 3212

इन्द्रियैर्नाप्यगोऽपोहः प्रथमं व्यवसीयते।
नान्यत्र शब्दवृत्तिश्च किं दृष्ट्वा स प्रयुज्यताम्॥
९३९ ॥§ 3214

स्वयं निश्चितार्थो हि समयकृत्समयं करोति, नचापोहः केनचिदिन्द्रियैर्व्यवसीयते। प्रथमम्—व्यवहारकालात्पूर्वम्, संज्ञासंज्ञिसम्बन्धकाल इत्यर्थः। तस्यावस्तुत्वादिन्द्रियाणां च वस्तुविषयत्वादिति भावः। स्यादेतदन्यव्यावृत्तस्वलक्षणमुपलभ्य शब्दः प्रयोक्ष्यत इत्यत आह—नान्यत्रेत्यादि। अन्यापोहादन्यत्र स्वलक्षण इत्यर्थः ॥ ९३९॥ § 3215

माभूदिन्द्रियैरपोहस्य व्यवसायोऽनुमानेन भविष्यतीति चेदाह—पूर्वोक्तेनेत्यादि। § 3216

पूर्वोक्तेन प्रबन्धेन नानुमाऽप्यत्र विद्यते।
सम्बन्धानुभवोऽप्यस्य तेन नैवोपपद्यते॥
९४० ॥§ 3218

तत्र पूर्वोक्तः प्रबन्धः— न चान्वयविनिर्मुक्ता प्रवृत्तिः शब्दलिङ्गयोरित्यादिः।सम्बन्धानुभवोऽपीति। शब्देन सहेति शेषः। न केवलं पूर्वोक्ताश्व(श्च?) वैलक्षण्यादिर्नोपपद्यत इत्यपिशब्देन दर्शयति। तेनेति। तस्मात्। तदेवमकृतसमयत्वादित्यस्य हेतोरनैकान्तिकत्वं प्रतिपादितम्। अकृतसमयत्वेऽप्यपोहे शब्दप्रवृत्त्यभ्युपगमात्॥ ९४०॥ § 3219

पुनरप्यपोहे सङ्केतासम्भवं प्रतिपादयन्नाह—अगोशब्दाभिधेयत्वमित्यादि। § 3220

अगोशब्दाभिधेयत्वंगम्यतां च कथं पुनः।
न दृष्टो यत्र गोशब्दः सम्बन्धानुभवक्षणे॥
९४१ ॥§ 3222

इदं हि भवान्वक्तुमर्हति। कथमश्वादीनाम् अगोशब्दाभिधेयत्वं—गोश-
300/k ब्दानभि धेयत्वं भवद्भिरवगम्यत इति। बौद्ध आह—न दृष्टो यत्रेत्यादि—सम्बन्धानुभवक्षण इति। सङ्केतप्रतिपत्तिवेलायामित्यर्थः॥ ९४१॥ § 3223

एकस्मादित्यादिना परो दूषणमाह। § 3224

एकस्मात्तर्हि गोपिण्डाद्यदन्यत्सर्वमेव तत्।
भवेदपोह्यमित्येतन्न सामान्यस्य वाच्यता॥
९४२ ॥§ 3226

३ गम्यतां च] Correction: ; (भव)तां च (sic!)गम्यतां च

२ एकस्मात्तर्हि] Correction: ; एकस्मान्न हि (sic!)एकस्मात्तर्हि

यदि हि यदेव सङ्केतानुभववेलायामुपलब्धं ततोऽन्यत्र गोशब्दप्रवृत्तिर्नेष्यतेष, तदैकस्मात्सङ्केतेन विषयीकृताच्छाबलेयादिकाद्गोपिण्डात्सकाशाद्यदन्यद्बाहुलेयादि तदपि गोशब्देनापोह्यं भवेत्। ततश्च सामान्यं वाच्यमित्येतन्न सिध्येत्॥ ९४२॥ § 3227

इतश्चेतरेतराश्रयदोषप्रसङ्गादपोहे सङ्केतोऽशक्यक्रिय इति दर्शयन्नाह—सिद्धश्चेत्यादि। § 3228

सिद्धश्चागौरपोह्येत गोनिषेधात्मकश्च सः।
तत्र गौरेव वक्तव्यो नञा यः प्रतिषिध्यते॥
९४३॥ § 3230

स चेदगोनिवृत्त्यात्मा भवेदन्योन्यसंश्रयः।
सिद्धश्चेद्गौरपोहार्थं वृथाऽपोहप्रकल्पनम्॥
९४४॥ § 3232

अगोव्यवच्छेदेन गोप्रतिपत्तिः, सचागौर्गोनिषेधात्मा, ततश्चागौरित्यत्रोत्तरपदार्थो वक्तव्यो यो न गौरगौरित्यत्र नञा प्रतिषिध्येत। न ह्यनिर्ज्ञातस्वरूपस्य निषेधः शक्यते कर्तुम्। अथापि स्यात्किमत्र वक्तव्यमगोनिवृत्त्यात्माऽसौ गौरित्यत आह—स चेत्यादि। स इति। गौः। तथाह्यगोनिवृत्तिस्वभावत्वाद्गोरगोप्रतिपत्तिद्वारेणैव प्रतीतिः, अगोश्च गोप्रतिषेधात्मकत्वाद्गोप्रतिपत्तिद्वारिकैव प्रतीतिरिति स्फुटतरमवतरतीतरेतराश्रयत्वम्। अथापि स्यादगोशब्देन यो गौर्निषेध्यते स विधिरूप एव सिद्धोऽपोहार्थम्—अगोव्यवच्छेदलक्षणापोहसिध्यर्थं, तेनेतरेतराश्रयत्वं न भविष्यतीत्यत आह—सिद्धश्चेदित्यादि। यद्येवं, सर्वस्य शब्दस्यापोहोऽर्थ इत्येवमपोहकल्पनं वृथा, विधिरूपस्य शब्दार्थस्य भावात्। तस्मान्न कश्चिद्विधिरूपः शब्दार्थः सिद्धोऽङ्गीकर्त्तव्यस्तदनङ्गीकरणे चेतरेतराश्रयदोषो दुर्निवारः॥ ९४३॥ ९४४॥ § 3233

तदेवेतरेतराश्रयत्वमुपसंहरन्नाह—गव्यसिद्ध इत्यादि। § 3234

गव्यसिद्धे त्वगौर्नास्ति तदभावे तु गौः कुतः।
नाधाराधेयवृत्त्यादिसम्बन्धश्चाप्यभावयोः॥
९४५॥ § 3236

301/k

तदभाव इति। गोरभावे। आचार्यदिङ्ःागेन विशेष्यविशेषणभावसमर्थनार्थमुक्तम्—नीलोत्पलादिशब्दा अर्थान्तरनिवृत्तिविशिष्टानर्थानाहुरित्यादि।

तदेतदयुक्तमिति दर्शयन्नाह—नाधाराधेयेत्यादि। यस्य हि येन सह कश्चिद्वास्तवः सम्बन्धः सिद्धो भवेत्तत्तेन विशिष्टमिति युक्तं वक्तुम्। न च नीलोत्पलयोरनीलोत्पलव्यवच्छेदरूपत्वेनाभावरूपयोराधाराधेयादिसम्बन्धः सम्भवति नीरूपत्वात्। आदिग्रहणेन संयोगसमवायैकार्थसमवायादिसम्बन्धग्रहणम्। न चासति वास्तवे सम्बन्धे तद्विशिष्टस्य प्रतिपत्तिर्युक्ताऽतिप्रसङ्गात्॥ ९४५॥ § 3237

अथापि स्यान्नैवास्माकमनीलादिव्यावृत्त्या विशिष्टोऽनुत्पलादिव्यवच्छेदोऽभिमतो यतोऽयं दोषः स्यात्। किं तर्हि ? अनीलानुत्पलाभ्यां व्यावृत्तं वस्त्वेव तथा व्यवस्थितम्। तदर्थान्तरनिवृत्त्या विशिष्टं शब्देनोच्यत इत्ययमर्थोऽत्राभिप्रेत इत्यत आह —न चासाधारणं वस्त्वित्यादि। § 3238

न चासाधारणं वस्तु गम्यतेऽपोहवत्तया।
कथं वा परिकल्प्येत सम्बन्धो वस्त्ववस्तुनोः॥
९४६॥§ 3240

स्वलक्षणस्यावाच्यत्वात्तत्पक्षभाविदोषप्रसङ्गाच्चेति भावः। गम्यतां नामासाधारणं वस्तु, तथाऽपि तस्यान्यव्यावृत्त्या विशिष्टत्वं न सिध्यतीति दर्शयति—कथं वेत्यादि। अवस्तु अपोहः, असाधारणं तु वस्तु, न चावस्तुवस्तुनोः सम्बन्धो युक्तो वस्तुद्वयाधारत्वात्तस्य॥ ९४६॥ § 3241

अपि च—भवतु नाम सम्बन्धस्तथापि विशेषणत्वमपोहस्य न युक्तमिति दर्शयति—स्वरूपेत्यादि। § 3242

स्वरूपसत्त्वमात्रेण न स्यात्किञ्चिद्विशेषणम्।
स्वबुद्ध्या रज्यते येन विशेष्यं तद्विशेषणम्॥
९४७॥§ 3244

नहि सत्तामात्रेणोत्पलादीनां नीलादि विशेषणं भवति। किं तर्हि ? ज्ञातं सद्यत्स्वाकारानुरक्तया बुद्ध्या विशेष्यं रञ्जयति तद्विशेषणमुच्यते॥ ९४७॥ § 3245

नचापोहेऽयं प्रकारः सम्भवतीति दर्शयति—न चापीत्यादि। § 3246

न चाप्यश्वादिशब्देभ्यो जायतेऽपोहबोधनम्।
विशेष्यबुद्धिरिष्टेह न चाज्ञातविशेषणा॥ ९४८॥§ 3248

न ह्यश्वादिबुद्ध्याऽपोहो व्यवसीयते किं तर्हि ? वस्त्वेव। ततश्चापोहस्य
302/k बोधासम्भवान्न तेन स्वबुद्ध्या रज्यतेऽश्वादिः। स्यादेतदज्ञातोऽप्यपोहो विशेष-

णं भविष्यतीत्याह—विशेष्येत्यादि। न ह्यगृहीतविशेषणा विशेष्ये बुद्धिर्भवति। न ज्ञातं विशेषणं यस्याः सा तथोक्ता॥ ९४८॥ § 3249

भवतु नामापोहबोधनम्, तथापि वस्तुनि तदाकारबुद्ध्यभावात्तस्य तद्विशेषणमयुक्तमिति दर्शयन्नाह—न चान्यरूपमित्यादि। § 3250

न चान्यरूपमन्यादृक्कुर्याज्ज्ञानं विशेषणम्।
कथं चान्यादृशे ज्ञाने तदुच्येत विशेषणम्॥
९४९ ॥§ 3252

सर्वमेव हि विशेषणं स्वाकारानुरूपं विशेष्ये बुद्धिं जनयद्दृष्टम्। न त्वन्यादृशं विशेषणमन्यादृशीं बुद्धिं विशेष्ये जनयति। न हि नीलमुत्पले रक्तमिति प्रत्ययमुत्पादयति, दण्डो वा कुण्डलीति। न चात्राश्वादिष्वभावानुरक्ता शाब्दी बुद्धिरुपजायते। किं तर्हि ? भावाकाराध्यवसायिनी। स्यादेतदन्यादृशमपि ज्ञानं जनयद्विशेषणमुच्यत इत्याह—कथं चान्यादृश इत्यादि। अन्यादृशे—विशेषणाननुरूपे ॥ ९४९॥ § 3253

यदि स्यात्को दोष इत्याह—अथान्यथेत्यादि। § 3254

अथान्यथा विशेष्येऽपि स्याद्विशेषणकल्पना।
तथा सति हि यत्किञ्चित्प्रपद्येत विशेषणम्॥
९५० ॥§ 3256

अथ यदि भवतो विशेषणाननुरूपतयाऽन्यथा व्यवस्थितेऽपि विशेषे स्याद्विशेषणकल्पना, तथा सति सर्वमेव नीलादि सर्वस्य विशेषणं स्यात्, ततश्चाव्यवस्था स्यात् ॥ ९५०॥ § 3257

अथ स्यादपोहेनापि स्वबुद्ध्या विशेष्यं वस्तु रज्यत इत्याह—अभावगम्येत्यादि। § 3258

अभावगम्यरूपे च न विशेष्येऽस्ति वस्तुता।
विशेषितमपोहेन वस्तु वाच्यं न तेऽस्त्यतः॥
९५१ ॥§ 3260

अभावोऽपोहः, तेनापोहेन ताद्रूप्याद्गम्यम्—अभावगम्यम्, अभावगम्यं रूपं स्वभावो यस्य वस्तुनस्तत्तथोक्तम्। यद्यभावरूपेण वस्तुनः प्रतीतिः स्यात्तदा तस्यवस्तुत्वमेव न स्यात्, भावाभावयोर्विरोधात्। प्रकृतमुपसंहरन्नाह—विशेषितमित्यादि॥ ९५१॥ § 3261

स्यादेतदन्यव्यावृत्त एव वस्तुनि शब्दलिङ्गयोः प्रवृत्तिर्दृश्यते, नापोहरहिते,
303/k तेना पोहः शब्दलिङ्गाभ्यां प्रतिपाद्यत इत्यभिधीयते, नतु प्रसज्यमात्रप्रतिपादनात्, तेन यथोक्तः सर्वः प्रतीत्यादिविरोधो न भविष्यतीत्याशङ्क्याह—यद्यपीत्यादि। § 3262

यद्यप्यपोहनिर्मुक्ते न वृत्तिः शब्दलिङ्गयोः।
युक्तस्तथापि बोधस्तु ज्ञातुं वस्त्ववलम्बते॥
९५२॥ § 3264

यदि नाम तद्वस्त्वन्यतो व्यावृत्तं, तथापि तत्रोत्पद्यमानः शब्दलिङ्गोद्भवो बोधोऽन्यव्यावृत्तिं सतीमपि नावलम्बते, किं तर्हि ? वस्त्वंशमेवाभिधावति, तत्रैवानुरागात्। य एवांशो वस्तुनः शाब्देन लैङ्गिकेन वा प्रत्ययेनावसीयते, स एव तस्य विषयो नानवसीयमानः सन्नपि, नहि मालतीशब्दस्य गन्धादयो विद्यमानतया वाच्या व्यवस्थाप्यन्ते॥ ९५२॥ § 3265

न चाप्येतद्युक्तम्, यदन्यव्यावृत्ते वस्तुनि शब्दलिङ्गयोः प्रवृत्तिरित्येतद्दर्शयति—न चेत्यादि। § 3266

न चासाधारणं वस्तु बुद्धौ विपरिवर्त्तते।
न चापि निर्विकल्पत्वात्तस्य युक्ताऽधिगम्यता॥
९५३॥ § 3268

अन्यव्यावृत्तं हि वस्तु भवद्भवतां मतेन स्वलक्षणमसाधारणमेव भवेत्, नच तच्छब्दलिङ्गजायां बुद्धौ विपरिवर्त्तत इति भवतां मतम्। तस्य निर्विकल्पबुद्धिग्राह्यत्वात्। शब्दलिङ्गजबुद्धेश्च सामान्यलक्षणविषयत्वात्। अथापि स्वलक्षणविषयत्वमस्या अभ्युपगम्यते, तदपि युक्त्या न सङ्गच्छत इति दर्शयन्नाह—न चापीत्यादि। न ह्यसाधारणं वस्तु शब्दलिङ्गजप्रत्ययाधिगम्यं, तत्र सर्वविकल्पानां प्रत्यस्तमयात्। तथाहि—विकल्पो जात्यादिविशेषणसंस्पर्शेनैव प्रवर्त्तते नच शुद्धवस्तुपरिग्रहेण ॥ ९५३॥ § 3269

अथापि स्याच्छब्देनागम्यमानमप्यसाधारणं वस्तु व्यावृत्त्या विशिष्टमित्युच्यत इत्याह—शब्देनागम्यमानं चेत्यादि। § 3270

शब्देनागम्यमानं च विशेष्यमिति साहसम्।
तेन सामान्यमेष्टव्यं विषयो बुद्धिशब्दयोः॥
९५४॥ § 3272

प्रकारान्तरेणापि सामान्यस्य वस्तुत्वं साधयन्नाह—यदेत्यादि। § 3273

यदा चाशब्दवाच्यत्वान्न व्यक्तीनामपोह्यता।
तदाऽपोह्येत सामान्यं तस्यापोहाच्च वस्तुता॥
९५५॥§ 3275

304/k

व्यक्तीनामिति। असाधारणवस्तुरूपाणामवाच्यत्वान्नापोह्यता, अनुक्तस्य निराकर्तुमशक्यत्वात्। अपोह्येत सामान्यमिति। तस्य वाच्यत्वादिति भावः॥ ९५५॥ § 3276

स्यादेतद्यदि नाम सामान्यमपोह्येत, तथापि कथं तस्य वस्तुत्वं सिध्यतीत्यत आह —नापोह्यत्वमित्यादि। § 3277

नापोह्यत्वमभावानामभावाभाववर्जनात्।
व्यक्तोऽपोहान्तरापोहस्तस्मात्सामान्यवस्तुनः॥
९५६॥§ 3279

अभावानामिति। अपोहानां। यदि भवेद्वस्तुत्वमेव स्यात्। अत्रोपपत्तिमाह—अभावाभाववर्जनादिति। अभावानामभावरूपत्यागादित्यर्थः। एतदुक्तं भवति— यद्यपोहानामपोह्यत्वं भवेत्, तदैषामभावरूपत्वं प्रतिषिद्धं भवेत्, तत्प्रतिषेधे च भवत्यभावैरभावरूपत्वं त्यक्तं स्यात्। ततश्चाभावानामपोहलक्षणानामभावरूपत्यागाद्वस्तुत्वमेव भवेदित्येके। अन्ये त्वाहुः—अभावाभाववर्जनादिति। अभावानामभावाभावादित्यर्थः। न ह्यभावस्वभावा अपोहा अपोह्या युज्यन्ते। वस्तुविषयत्वात्प्रतिषेधस्येति यावत्। तस्माद्व्यक्तः स्फुटोऽपोहान्तरेऽश्वादावपोहान्तरस्य गवादेरपोहो भवन्सामान्यभूतस्यैवेति निश्चीयते। अतः सिद्धमपोह्यत्वाद्वस्तुत्वं सामान्यस्येति ॥ ९५६॥
§ 3280

अपिचापोहानां परस्परतो वैलक्षण्यं वा स्यादवैलक्षण्यं वा, तत्राद्ये पक्षे तावद्दोषमाह—अभावस्य चेत्यादि। § 3281

अभावस्य च योऽभावः स चेत्तस्माद्विलक्षणः।
भाव एव भवेन्नो चेद्गौरगौस्ते प्रसज्यते॥
९५७॥§ 3283

अभावस्य—अगोशब्दाभिधेयस्य अभावो यो गोशब्दाभिधेयोऽर्थः। स चेत्तस्मात्पूर्वोक्तादभावाद्विलक्षणोऽन्य इत्यर्थः। तदानीं भाव एव भवेत्,

१ वाच्यत्वान्न] Correction: ; वाच्यत्वं न (sic!)वाच्यत्वान्न

अभावनिवृत्तिमात्ररूपत्वाद्भावस्य। नो चेद्विलक्षणस्तदा गौरप्यगोर्भवतः प्रसज्यते तदवैलक्षण्येन तादात्म्यप्रतिपत्तेः॥ ९५७॥ § 3284

स्यादेतद्गवाश्वादिशब्दैः स्वलक्षणान्येव परस्परतो व्यावृत्तान्यपोह्यन्ते, नाभावाः, तेनाऽऽपोह्यत्वेन तेषां वस्तुत्वप्रसङ्गापादानं नानिष्टमित्यत आह—यद्यपीत्यादि। § 3285

यद्यप्यन्येषु शब्देषु वस्तुनः स्यादपोह्यता।
सच्छब्दस्य त्वभावाख्यान्नापोह्यं भिन्नमिष्यते॥
९५८॥§ 3287

305/k

यद्यपि सच्छब्दादन्येषु गवादिशब्देषु वस्तुनः पर्वतादेरपोह्यता सिध्यति, सच्छब्दस्य त्वभावाख्यादपोह्यान्नान्यदपोह्यमस्ति, अभाव एवापोह्य इत्यर्थः। असद्व्यवहारव्यवच्छेदेन सच्छब्दस्य प्रवृत्तत्वात्॥ ९५८॥ § 3288

ततश्च को दोष इत्याह—तत्रासतोऽपीत्यादि। § 3289

तत्रासतोऽपि भावत्वमिति क्लेशो महान्भवेत्।
तदसिद्धौ न सत्ताऽस्ति न चासत्ता प्रसिद्ध्यति॥
९५९॥§ 3291

पूर्ववदभावाभाववर्जनादसतोऽपोहे वस्तुत्वमेव स्यात्। ततश्चापोहवादिनोऽभ्युपगमादिविरुद्धमसतोऽपि वस्तुत्वं प्रसक्तमिति महद्बत कष्टमापतितम्। अस्वभावस्यापि वस्तुत्वमिति चेदाह—तदसिद्धावित्यादि। तस्याभावस्यासिद्धौ सत्यां न सत्ता कस्यचिद्भावस्य सिद्ध्येत्। अभावव्यवच्छेदेन तस्य भवन्मतेन स्थितलक्षणत्वात्। तस्यचाभावस्यापोह्यत्वे सति वस्तुत्वप्रसङ्गेन स्वरूपासिद्धेरसत्तापि न सिद्ध्यति, तस्याः सत्ताव्यवच्छेदरूपत्वात्, सत्तायाश्च यथोक्तेन प्रकारेणायोगात्॥ ९५९॥ § 3292

यत्पूर्वमुक्तम्— अपोह्यैः स बहिःसंस्थैर्भिद्येतेत्यादि, यच्चोक्तम्— अवस्तुत्वादपोहानां नैव भेद इत्यादि। तत्र केचिद्बौद्धाः परिहारमाहुः—न खल्वपोह्यभेदा (दा) धारभेदाद्वाऽपोहानां भेदोऽपि त्वनादिकालप्रवृत्तविचित्रवितत्त्वार्थविकल्पवासनाभेदान्वयैस्तत्त्वतो निर्विषयैरपि भिन्नविषयालम्बिभिरिव प्रत्ययैर्भिन्नेष्वर्थेषु बाह्येषु भिन्ना इवार्थात्मान इवास्वभावा अप्यपोहाः समारोप्यन्ते, ते च तथा तैः समारोपिता भिन्नाः सन्तश्च प्रतिभासन्ते, तेन वासनाभेदाद्भेदः सद्रूपता चापोहानां भविष्यतीत्यत्राह—न चापीत्यादि। § 3293

३ न चासत्ता] Correction : ; न वा सत्ता (sic !)न चासत्ता

न चापि वासनाभेदाद्भेदः सद्रूपताऽपि वा।
अपोहानां प्रकल्प्येत न ह्यवस्तुनि सा मता॥
९६० ॥§ 3295

न ह्यवस्तुनि वासनेत्येवं मन्यते। निर्विषयो न कश्चित्प्रत्ययोऽस्तीति निर्लोडितमेतद्विज्ञानवादविचारे। ततश्च वितथार्थानां विकल्पानामयोगात्तदाहिताऽपि वासनाकुतो भविष्यति। अवस्तुनीति। आलम्बनभूते वस्तुन्यसति निर्विषयविज्ञानायोगेनवासनाधायकविज्ञानाभावात्कुतो वासनेत्यर्थः। ततश्च वासनाभावात्कुतो वासनाकृतोऽपोहानां भेदः सद्रूपता वा भविष्यतीति भावः॥ ९६०॥ § 3296

एवं तावद्वाच्याभिमतमपोहं निराकृत्य वाचकाभिमतमपि निराकर्तुमाह—भवद्भिरित्यादि। § 3297

306/k

भवद्भिः शब्दभेदोऽपि तन्निमित्तो न लभ्यते।
न ह्यसाधारणः शब्दो वाचकः प्रागदृष्टितः॥
९६१ ॥§ 3299

तत्र शब्दान्तरापोहे सामान्ये परिकल्पिते।
तथैवावस्तुरूपत्वाच्छब्दभेदो न कल्प्यते॥
९६२ ॥§ 3301

वाचकानां यथा चैवं वाच्यवाचकयोर्मिथः।
न चाप्यपोह्यभेदेन भेदोऽस्तीत्युपपादितम्॥
९६३ ॥§ 3303

शब्दानां भिन्नसामान्यवचनानां विशेषवचनानां च परस्परतो भेदः शब्दभेदः।तन्निमित्त इति। स वासनाभेदो वाच्यापोहभेदो वा निमित्तं कारणमस्येति तन्निमित्तः। ननु प्रत्यक्षत एव शब्दानां कारणभेदाद्विरुद्धधर्माध्यासाच्च भेदः प्रसिद्ध एवेत्याह—न ह्यसाधारण इत्यादि। वाचकं हि शब्दमधिकृत्यैतदुच्यते, न चश्रोत्रज्ञानावसेयो यः स्वलक्षणात्माऽसाधारणशब्दो वाचकः।

७ यथा चैवं] Correction: ; यथा नैव (sic !)यथा चैवं

कस्मादित्याह—प्रागदृष्टित इति। यो हि व्यवहारकालावस्थायी शब्दः स व्यवहारकालात्प्राक् सङ्केतकाले न दृष्टः, यो दृष्टस्तस्य चिरनिरुद्धत्वान्न तेन व्यवहारः, न च सङ्केतकाले यो न दृष्टस्तेन व्यवहारो युक्तोऽतिप्रसङ्गात्। तस्मान्न स्वलक्षणस्य वाचकत्वम्। भवतामपि चात्र विवाद एव। यथोक्तम्—नार्थशब्दविशेषस्य वाच्यवाचकतेष्यते। तस्य पूर्वमदृष्टत्वात्सामान्यं तूपदेक्ष्यते॥ इति। तस्माद्वाचकं शब्दमधिकृत्याभिधानाददोषः।तत्रैवमवस्थिते सति शब्दान्तरापोहः शब्दसामान्यं वाचकं यदि कल्प्यते, यथार्थान्तरापोहोऽर्थसामान्यं, तदा तथैव—पूर्वोक्तेन विधिना संसृष्टैकत्वनानात्वेत्यादिनोक्तेन, वाच्यापोहानामिव शब्दापोहानामपि परस्परतो भेदो न घटते। नीरूपत्वात्। यथाच वाचकानां परस्परतो भेदो न सङ्गच्छते, एवं वाच्यवाचकयोरपि मिथः परस्परतो भेदो न कल्प्यते, निःस्वभावत्वात्। स्यादेतदपोह्यभेदेन भेदो भविष्यतीत्यत आह—न चापीत्यादि। यथा चापोह्यभेदादपि भेदो न विकल्प्यते तथा न विशेषः स्वतस्तस्येत्यादिना प्रतिपादितम्॥ ९६१॥ ९६२॥ ९६३॥ § 3304

तदेवं प्रतिज्ञायाः प्रतीत्यभ्युपेतबाधा प्रतिपादिता। साम्प्रतं वाच्यवाचकत्वाभावप्रसङ्गापादनाभ्युपेतबाधादिदोषं प्रतिपिपादयिषुः प्रमाणयन्नाह—न गम्येत्यादि। § 3305

न गम्यगमकत्वं स्यादवस्तुत्वादपोहयोः।
भवत्पक्षे यथा लोके खपुष्पशशशृङ्गयोः॥
९६४॥ § 3307

307/k

ये अवस्तुनी च तयोर्गम्यगमकत्वमस्ति, यथा खपुष्पशशशृङ्गयोः, अवस्तुनी च वाच्यवाचकापोहौ भवेतामिति व्यापकविरुद्धोपलब्धेः॥ ९६४॥ § 3308

ननु च मेघाभावाद्वृष्ट्यभावप्रतीतेरनैकान्तिकता हेतोरित्याह—वृष्टिमेघासतोरित्यादि। § 3309

वृष्टिमेघासतोर्दृष्ट्वा यद्यनैकान्तिकं वदेत्।
वस्त्वस्त्वेवात्र मत्पक्षे भवत्पक्षेऽप्यदः कुतः॥
९६५॥ § 3311

वृष्टिमेघयोरसती—असत्त्वे, अभावाविति यावत्। भावप्रधानत्वान्निर्देशस्य। तयोर्दृष्ट्वा—गम्यगमकमित्यधिकृतम्। यद्यनैकान्तिकमवस्तुत्वादिति हेतुं वदेद्बौद्धस्तदप्ययुक्तम्, यस्मात्तद्विविक्ताकाशालोकात्मकं वस्तु मत्पक्षेऽत्रापि

वृष्टिमेघाभावप्रयोगेऽस्त्येव। अभावस्य वस्तुत्वप्रतिपादनात्। भवतस्तु बौद्धस्य पक्षे अदोऽपि—एतद्वृष्टिमेघाभावयोर्गम्यगमकत्वं कुतः—नैव। अपिशब्दो भिन्नक्रमः, अद इत्यस्यानन्तरं सम्बध्यते। तेनायमर्थो भवति। न केवलमपोहयोर्विवादास्पदीभूतयोर्गम्यगमकत्वं भवतो न युक्तम्, एतदपि वृष्टिमेघाभावयोर्गम्यगमकत्वं न युज्यत एवेति ॥ ९६५॥ § 3312

किंच—यदेतद्भवद्भिरन्वयोपसर्जनयोर्व्यतिरेकप्रधानयोः शब्दलिङ्गयोः स्वविषयप्रतिपादकत्वं वर्ण्यते, यच्च—अदृष्टेरन्यशब्दार्थे स्वार्थस्यांशेऽपि दर्शनात्। श्रुतेः सम्बन्धसौकर्यं न चास्ति व्यभिचारितेत्यादि वर्णितम्, तदपोहाभ्युपगमे न युक्तमित्येतत्प्रतिपादयन्नाह—विधिरूपश्चेत्यादि। § 3313

विधिरूपश्च शब्दार्थो येन नाभ्युपगम्यते।
न भवेद्व्यतिरेकोऽपि तस्य तत्पूर्वको ह्यसौ॥
९६६ ॥§ 3315

तत्पूर्वक इति। विधेः पूर्वकः। विधेर्निवृत्तिलक्षणत्वाद्व्यतिरेकस्येति भावः।किंच—नीलोत्पलादिशब्दानां विशेषणविशेष्यभावः सामानाधिकरण्यं च यदेतल्लोकप्रतीतं तस्यापह्नवोऽपोहवादे प्राप्नोति॥ ९६६॥ § 3316

यच्चेदमुच्यते—विशेषणविशेष्यत्वसामानाधिकरण्यसमर्थनार्थम्—अपोह्यभेदाद्भिन्नार्थाः स्वार्थभेदगतौ जडाः। एकत्राभिन्नकार्यत्वाद्विशेषणविशेष्यकाः॥ तन्मात्राकाङ्क्षणाद्भेदः स्वसामान्येन नोज्झितः। नोपात्तः संशयोत्पत्तेः साम्ये चैकार्थतातयोः॥ इति। तदेतन्नोपपद्यत इति दर्शयन्नाह—अपोहमात्रवाच्यत्वमित्यादि। § 3317

308/k

अपोहमात्रवाच्यत्वं यदिहाभ्युपगम्यते।
नीलोत्पलादिशब्देषु शबलार्थाभिधायिषु॥
९६७ ॥§ 3319

विशेषणविशेष्यत्वसामानाधिकरण्ययोः।
न सिद्धिर्न ह्यनीलत्वव्युदासेऽनुत्पलच्युतिः॥
९६८ ॥§ 3321

नापि तत्रेतरस्तस्मान्न विशेष्यविशेषणे।
शब्दयोर्नापि ते स्यातामभिधेयानपेक्षयोः॥
९६९॥§ 3323

पूर्वमर्थयोरेव विशेष्यविशेषणभावो निरस्तः। इदानीं शब्दयोरपि निरस्यत इति न पुनरुक्तता। तत्र परस्परं व्यवच्छेदकभावो विशेषणविशेष्यभावः, स च वाक्य एव व्यवस्थाप्यते, यथा नीलमुत्पलमिति। तथा व्यधिकरणयोरपि भवति, यथा राज्ञः पुरुष इत्यादौ। भिन्ननिमित्तप्रयुक्तयोस्त्वेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम्, तच्च नीलोत्पलमित्यादौ वृत्तावेव व्यवस्थाप्यते। तत्र नीलोत्पलादिशब्देषु शबलार्थाभिधायिषु यदेतत्सामानाधिकरण्यादि, तस्य न सिद्धिः। शबलोर्थः—चित्रः, यथोक्तम्— न हि तत्केवलं नीलं न च केवलमुत्पलम्। समुदायाभिधेयत्वात् इति। कस्मात्सिद्धिर्न भवतीत्याह— न हीत्यादि। यस्मादनीलत्वव्युदासेऽनुत्पलव्युदासो नास्ति। तत्र—अनुत्पलच्युतौ। इतरः—नीलव्युदासः। क्वचिदितरेति स्त्रीलिङ्गस्य पाठः। स च्युतिशब्दापेक्षया द्रष्टव्यः। इतरा—अनीलच्युतिरित्यर्थः। नानयोःपरस्परमाधाराधेयसम्बन्धोऽस्ति, नीरूपत्वादिति यावत्। नचासति सम्बन्धे विशेष्यविशेषणभावो युक्तोऽतिप्रसङ्गादित्युक्तम्। एतेन युष्मन्मते शबलार्थाभिधायित्वमेव नास्ति, सर्वेषामभाववाचित्वादित्युक्तं भवति। तस्मान्न विशेष्यविशेषणे युक्ते।स्यादेतन्माभूदर्थयोर्विशेष्यविशेषणभावस्तद्वाचकयोस्तु शब्दयोः किमिति न भवतीत्यत आह—शब्दयोरित्यादि। अभिधेयद्वारेणैव हि तदभिधायिनोः शब्दयोर्विशेष्यविशेषणभाव उपचर्यते, अभिधेये च तस्यासम्भवे सत्यभिधानेऽपि कुतस्तदारोपः ॥ ९६७॥ ९६८॥ ९६९॥ § 3324

सामानाधिकरण्यं दूषयन्नाह—सामानाधिकरण्यं चेति। § 3325

सामानाधिकरण्यं च न भिन्नत्वादपोहयोः।
अर्थतश्चेत्तदिष्येत कीदृश्याधेयता तयोः॥
९७०॥§ 3327

एकस्मिन्नर्थे वृत्तौ सत्यां सामानाधिकरण्यं भवति। न च नीलोत्प-
309/k लशब्दयोरेक स्मिन्नर्थे वृत्तिः सम्भवति। तद्वाच्ययोरनीलानुत्पलव्यवच्छेदलक्षणयोरपोहयोर्भिन्नत्वात्। तथाहि—भवद्भिरेवोक्तमपोह्यभेदाद्भिन्नार्था इति। प्रयोगः—न नीलोत्पलादिशब्दाः सामानाधिकरण्यव्यवहारविषयाः, भिन्नविषयत्वात्, घटपटादिशब्दवत्। अथापि स्याद्यत्रैव ह्यनुत्पलव्युदासो वर्त्तते तत्रैवानीलव्युदासोऽपि स्थित इत्यतोनीलोत्पलशब्दवाच्ययोरपोहयोरेकस्मिन्नर्थे वृत्तेरर्थद्वारकं सामानाधिकरण्यं शब्दयोरपि निर्दिश्यत इत्यत आह—अर्थतश्चेत्यादि। तदिति। सामानाधिकरण्यम्।तयोरिति—अनीलानुत्पलव्युदासयोः। नैव काचिद्वास्तवी तयोराधेयता सम्भवति, नीरूपस्य क्वचिदवस्थानासम्भवात्, यथा वन्ध्यापुत्रस्येति भावः॥ ९७०॥ § 3328

किंच—भवतु नाम नीलोत्पलादिष्वर्थेषु तयोराधेयता, तथापि सा विद्यमानापि सती न शब्दैः प्रतिपाद्यत इति दर्शयति—न चेत्यादि। § 3329

न चासाधारणं वस्तु गम्यतेऽन्यच्च नास्ति ते।
अगम्यमानमैकार्थ्यं शब्दयोः क्वोपयुज्यते॥
९७१ ॥§ 3331

यस्मात्तदेव तावदसाधारणं नीलोत्पलादि वस्तु न शब्देन गम्यते, तत्र सर्वविकल्पानां प्रत्यस्तमयादित्युक्तम्। ततश्च तस्मिन्नाधारभूते वस्तुन्यज्ञाते तदधिकरणयोरपोहयोस्तदाधेयता कथं ग्रहीतुं शक्यते, धर्मिग्रहणनान्तरीयकत्वाद्धर्मग्रहणस्येतिभावः। अथापि स्यादसाधारणार्थव्यतिरेकेण तयोरन्यदेवाधिकरणमस्त्यतोऽयमदोष इत्यत आह—अन्यच्चेत्यादि। त इति। त(व)। स्यादेतद्यदि नामैकार्थ्यं न गम्यते, तथापि वस्तुस्थित्याऽवस्थितमेवेत्याह—अगम्यमानमित्यादि। ऐकार्थ्यमिति। सामानाधिकरण्यम्। क्वोपयुज्यत इति। न क्वचिदित्यर्थः। सतोऽप्यज्ञातस्य शाब्दे व्यवहारेऽनङ्गत्वात्॥ ९७१ ॥ § 3332

अथापि स्यात्—यदि व्यावृत्तिमात्रं शब्देनोच्येत तदाऽयं दोषः स्यात्, यावता व्यावृत्तिमद्वस्तु वाच्यम्, अतो व्यावृत्तिद्वयोपाधिकयोः शब्दयोरेकस्मिन्नपोहवतिवस्तुनि वृत्तेः सामानाधिकरण्यमस्त्येवेत्यत आह—अथेत्यादि। § 3333

अथान्यापोहवद्वस्तु वाच्यमित्यभिधीयते।
तत्रापि परतन्त्रत्वाद्व्याप्तिः शब्देन दुर्लभा॥
९७२ ॥§ 3335

तत्रापीति। अपोहवति वस्तुनि वाच्यत्वेनाङ्गीक्रियमाणेऽनीलादिभेदानामुत्पलादीनां नीलादिशब्दैर्व्याप्तिराक्षेपो दुर्लभः, किं कारणम् ? परतन्त्रत्वान्नीलादिशब्दस्य, स हि व्यावृत्त्युपसर्जनं तद्वन्तमर्थमाह, न साक्षात्। 310/k
ततश्च साक्षादनभिधानात्तद्गतभेदाक्षेपो नास्ति, यथा मधुरशब्देन शुक्लादेः। यद्यपि वस्तुस्थित्या शुक्लादीनां (अ)मधुरादिभेदत्वमस्ति। तथापि शब्दस्य साक्षादभिहितार्थगतस्यैव भेदस्याक्षेपसामर्थ्यं न तु पारतन्त्र्येणाभिहितार्थगतस्येति भावः। ततश्च नीलादिशब्देन तद्गतभेदानाक्षेपादुत्पलादीनामतद्भेदत्वं स्यात्, अतद्भेदत्वे च सामानाधिकरण्यं न प्राप्नोति। तेन जातिमन्मात्रपक्षे यो दोष उक्तो भवता तद्वतो न बाधकः शब्दोऽस्वतन्त्रत्वादिति, स

५ अथान्या] Correction : ; अथाप्य
(sic !)अथान्या

व्यावृत्तिमन्मात्रपक्षेऽपि तुल्य इति दर्शितं भवति। तथाहि—जातिमन्मात्रे शब्दार्थे—सच्छब्दो जातिस्वरूपोपसर्जनं द्रव्यमाह न साक्षादिति तद्गतघटादिभेदानाक्षेपादतद्भेदत्वे सामानाधिकरण्याभावप्रसङ्ग उक्तः, स व्यावृत्तिमन्मात्रपक्षेऽपि समानः, तत्रापि हि सच्छब्दो व्यावृत्त्युपसर्जनं द्रव्यमाह न साक्षादिति, तद्गतभेदानाक्षेपोऽत्रापि समान एव, को ह्यत्र विशेषो जातिर्व्यावृत्तिर्जातिमान्व्यावृत्तिमानिति॥ ९७२॥ § 3336

दोषान्तरमाह—लिङ्गेत्यादि। § 3337

लिङ्गसङ्ख्यादिसम्बन्धो न चापोहस्य विद्यते।
व्यक्तेश्चाव्यपदेश्यत्वात्तद्द्वारेणापि नास्त्यसौ॥
९७३॥ § 3339

लिङ्गानि—स्त्रीत्वपुंस्त्वनपुंसकानि, सङ्ख्या—एकत्वद्वित्वबहुत्वानि, आदिग्रहणेन क्रियाकालादिसम्बन्धपरिग्रहः। एभिः सम्बन्धो नास्त्यपोहस्य, अवस्तुत्वात्, एषांच वस्तुधर्मत्वात्। न च लिङ्गादिविविक्तः पदार्थः शक्यः शब्देनाभिधातुम्। अतः प्रतीतिबाधाप्रसङ्गः प्रतिज्ञाया इति भावः। अथापि स्याद्व्यावृत्त्याधारभूताया व्यक्तेर्वस्तुत्वाल्लिङ्गादिसम्बन्धोऽस्ति, एतद्द्वारेणापोहस्यापि व्यवस्थाप्यत इत्याह—व्यक्तेश्चेत्यादि। सा हि व्यक्तिर्निर्विकल्पत्वाल्लिङ्गसङ्ख्यादिसम्बन्धेन व्यपदेष्टुं न पार्यते, ततः कथमपोहे तद्द्वारेण तद्व्यवस्था सिद्ध्येत्॥ ९७३॥ § 3340

अव्यापित्वं चापोहशब्दार्थव्यवस्थयोर्दर्शयन्नाह—आख्यातेष्वित्यादि। § 3341

आख्यातेषु च नान्यस्य निवृत्तिः सम्प्रतीयते।
न पर्युदासरूपं हि निषेध्यं तत्र विद्यते॥
९७४॥ § 3343

आख्यातेषु—तिङन्तेषु पचति गच्छतीत्येवमादिषु क्रियाप्रधानेषु शब्देषु, नान्यव्यवच्छेदो गम्यते, कस्मादित्याह—न पर्युदासरूपं हीत्यादि। यथा
311/k सुबन्तेषु घटादिशब्देषु निष्पन्नरूपमघटादिकं पर्युदासरूपं निषेध्यमस्ति न तथा पचतीत्यादिषु, प्रतियोगिनो निष्पन्नस्य कस्यचिदप्रतीतेः॥ ९७४॥ § 3344

स्यादेतन्माभूत्पर्युदासरूपं निषेध्यं, न पचतीत्येवमादि प्रसज्यरूपं पचतीत्यादेर्निषेध्यं भविष्यतीत्याह—न नेति हीत्यादि। § 3345

न नेति ह्युच्यमानेऽपि निषेधस्य निषेधनम्।

पचतीत्यनिषिद्धं तु स्वरूपेणैव तिष्ठति॥
१७५॥§ 3347

साध्यत्वप्रत्ययश्चात्र तथा भूतादिरूपणम्।
निष्पन्नत्वादपोहस्य निर्निमित्तं प्रसज्यते॥
१७६॥§ 3349

न न पचतीत्येवमुच्यमानेऽपि प्रसज्यप्रतिषेधस्य निषेधनमेवोक्तं स्यात्। ततश्च को दोष इत्याह—पचतीत्यनिषिद्धमित्यादि। प्रतिषेधद्वयस्य विधेर्विषयत्वात्पचतीत्येतत्स्वरूपेणैव विध्यात्मनैव तिष्ठतीति विधिरेव शब्दार्थः स्यात्। किंच—अत्र पचतीत्यादौ साध्यत्वं प्रतीयते। यस्याः क्रियायाः केचिदवयवा निष्पन्नाः केचिदनिष्पन्नाः सा पूर्वापरीभूतावयवा क्रिया साध्यत्वप्रत्ययविषया। तथाऽभूद्भविष्यतीत्यादौभूतादिकालविशेषप्रतीतिरस्ति। नचापोहस्य साध्यत्वादिसम्भवः, निष्पन्नत्वादभावैकरसत्वेन। तस्मादपोहशब्दार्थपक्षे साध्यत्वप्रत्ययो भूतादिप्रत्ययश्च निर्निमित्तः प्राप्नोतीति प्रतीतिबाधा। भूतादिरूपणमिति। भूतादीनामवधारणं प्रत्यय इति यावत् ॥ १७५॥ १७६॥ § 3350

पुनरप्यव्यापिनं दर्शयन्प्रतीतिबाधामेव दर्शयति—विध्यादावित्यादि। § 3351

विध्यादावर्थराशौ च नान्यापोहनिरूपणम्।
नञश्चापि नञा युक्तावपोहः कीदृशो भवेत्॥
१७७॥§ 3353

चादीनामपि नञ्योगो नैवास्तीत्यनपोहनम्।
वाक्यार्थेऽन्यनिवृत्तिश्च व्यपदेष्टुं न शक्यते॥
१७८॥§ 3355

अनन्यापोहशब्दादौ वाच्यं न च निरूप्यते।
प्रमेयज्ञेयशब्दादेरपोह्यं कुत एव तु॥ १७९॥§ 3357

आदिशब्देन निमन्त्रणामन्त्रणादीनां ग्रहणम्—अन्यापोहस्य—अन्यव्यवच्छेदस्य न निरूपणमुपलम्भोऽस्ति। न पर्युदासरूपं हि निषेध्यं तत्र विद्यत इत्येतत्पूर्वोक्तमेवात्र कारणमिति भावः। न न पचति देवदत्त इत्यादौ

312/k नञोऽपरेण नञा योगे सति कीदृशोऽपोहो भवेत्। नैव कश्चित्। प्रतिषेधद्वये विधेरेव संस्पर्शनात्। अपिच चादीनां निपातोपसर्गकर्मप्रवचनीयानां पदत्वमिष्टम्, नचैषां नञा सम्बन्धोऽस्त्यसत्त्ववचनत्वात्। तथाहि—यथा घटादिशब्दानामघट इत्यादौ नञा सम्बन्धे सत्यर्थान्तरस्य पटादेः परिग्रहात्तद्व्यवच्छेदेन नञा रहितस्य घटशब्दस्यार्थोऽवकल्प्यते, न तथा चादीनां नचेत्यादि नञा सम्बन्धोऽस्ति। नचासम्बध्यमानस्य नञाऽपोहनं युक्तम्। अतश्चादिष्वनपोहनम्। अपोहाभाव इत्यर्थः। किंच—वाक्यार्थः कल्माषवर्णवच्छबलैकरूप इष्यते, अतस्तत्रान्यनिवृत्तिर्व्यपदेष्टुं न शक्यते। निष्पन्नरूपस्य प्रतियोगिनोऽप्रतीतेः। या चात्र चैत्र गामानयेत्यादावचैत्रादिव्यवच्छेदरूपान्यनिवृत्तिरवयवपरिग्रहेण वर्ण्यते, सा पदार्थ एव स्यान्न वाक्यार्थः। तस्यानवयवस्येत्थं विवेक्तुमशक्यत्वादित्यव्यापिनी शब्दार्थव्यवस्था। अपि च—नान्यापोहोऽनन्यापोह इत्यादौ शब्दे विधिरूपादन्यद्वाच्यं न निरूप्यते—नोपलभ्यत इत्यर्थः। तथाहि— नापोहरूपमात्रं वाच्यं गम्यते, प्रतिषेधद्वयेन विधेरेवावसायात्। आदिशब्देनाऽनन्यव्यावृत्तिरनन्यव्यवच्छेद इत्यादिपर्यायग्रहणम्। ननु च नञश्चापि नञा युक्तावित्यनेनैव गतत्वात्पुनरुक्तमेतत्। सत्यमेतत्। किंत्वन्यापोहः शब्दार्थ इत्येवं वादिना स्ववचनेनैव विधिरिष्ट इति ज्ञापनार्थं पुनरुच्यते। तथा ह्यन्यापोहशब्दस्यानन्यापोहशब्दार्थो व्यवच्छेद्यः, स च विधेर्नान्यो लक्ष्यते। ये च प्रमेयज्ञेयाभिधेयादयः शब्दास्तेषां न किंचिदपोह्यमस्ति। सर्वस्यैव प्रमेयत्वादिस्वभावत्वात्। तथाहि—यन्नाम किंचिद्व्यवच्छेद्यमेषां कल्प्यते, तत्सर्वं व्यवच्छेदाकारेणालम्ब्यमानं ज्ञेयादिस्वभावमेवावतिष्ठते, नह्यविषयीकृतं व्यवच्छेत्तुं शक्यते। ततश्चैषामपोह्यार्थाभावादव्यापिनी व्यवस्था॥ ९७७॥ ९७८॥ ९७९॥ § 3358

ननु हेतुमुखे निर्दिष्टम्—अज्ञेयं कल्पितं कृत्वा तद्व्यवच्छेदेन ज्ञेयेऽनुमानमिति। तत्कथमव्यापित्वं शब्दार्थव्यवस्थाया इत्याह—अपोह्येत्यादि। § 3359

अपोह्यकल्पनायां च वरं वस्त्वेव कल्पितम्।
ज्ञानाकारनिषेधाच्च नान्तरार्थोऽभिधीयते॥
९८० ॥§ 3361

नचाप्यपोह्यता तस्मान्नापोहस्तेषु सिद्ध्यति।
एवमित्यादिशब्दानां न चापोह्यं निरूप्यते॥
९८१ ॥§ 3363

यदि ज्ञेयमपि सर्वं ज्ञेयत्वेनापोह्यमस्य कल्प्यते तदा वरं वस्त्वेव
313/k विधिरूपमेव शब्दार्थत्वेन विकल्पितं भवेद्यदध्यवसीयते लोकेन। एवं ह्य-

दृष्टारोपो दृष्टार्थापलापश्च न कृतः स्यादिति भावः। अत एव वरमित्युक्तम्। ये त्वाहुर्विकल्पप्रतिबिम्बकमेव सर्वशब्दानामर्थस्तदेव चाभिधीयते व्यवच्छिद्यत इति चोच्यत इति। तान्प्रतीदमाह —ज्ञानाकारनिषेधाच्चेत्यादि। निराकारा बुद्धिराकारवान्बाह्योऽर्थः, स च बहिर्देशसम्बन्धो विस्पष्टमुपलभ्यत इत्येवमस्माभिर्ज्ञानाकारो निषिद्धः, तस्मादान्तरस्यबुद्ध्यारूढस्याकारस्यासत्त्वात्तदभिधायकत्वं शब्दानामयुक्तम्। नापि तस्यान्तरस्यार्थस्यापोह्यत्वं युक्तम्, असत्त्वादेव। तेष्विति। प्रमेयादिशब्देषु। ये च—एवमित्थमित्यादयः शब्दास्तेषामपि न किंचिदपोह्यमुपलभ्यते, कस्यचित्प्रतियोगिनः पर्युदासरूपस्याभावात्। अथापि स्यात्—नैवमित्यादि प्रसज्यरूपं निषेध्यं भवतीति। नैतदस्त्युक्तमत्र। तथाहि—अत्रापि न नैवमिति निर्देशे निषेधस्य निषेधनम्, एवमित्यनिषिद्धं तु स्वरूपेणैव तिष्ठतीति सैव पूर्वोक्ता नीतिरवतरति॥ ९८०॥ ९८१॥ § 3364

एतत्सर्वं कुमारिलोक्तमुपन्यस्तम्, साम्प्रतं सर्वशब्दस्येत्यादिनोद्योतकारोक्तमपोहदूषणमाशङ्कते— § 3365

सर्वशब्दस्य कश्चार्थो व्यवच्छेद्यः प्रकल्प्यते।
नासर्वनाम किञ्चिद्धि भवेद्यस्य निराक्रिया॥
९८२॥ § 3367

एकाद्यसर्वमिति चेदर्थापोहः प्रसज्यते।
अङ्गानां प्रतिषिद्धत्वादनिष्टेश्चाङ्गिनः पृथक्॥
९८३॥ § 3369

एवं समूहशब्दार्थे समुदायिव्यपोहतः।
अन्यानिष्टेश्च सर्वेऽपि प्राप्नुवन्ति निरर्थकाः॥
९८४॥ § 3371

द्व्यादिशब्दा इहेष्टाश्च ये समुच्चयगोचराः।
एकादिप्रतिषेधेन न भवेयुस्तथाविधाः॥ ९८५॥ § 3373

नागौरिति च योऽपोहो गोशब्दस्यार्थ उच्यते।
स किं भावोऽथवाऽभावो भावो
गौर्वाऽथवाऽप्यगौः॥ ९८६ ॥§ 3375

गौश्चेन्नास्ति विवादोऽयमर्थस्तु विधिलक्षणः।
अगौर्गोशब्दवाच्यश्चेदतिशब्दार्थकौशलम्॥
९८७ ॥§ 3377

अभावोऽपि न युक्तोऽयं प्रैषादीनामसम्भवात्।
न हि गोशब्दतः कश्चिदभावं प्रतिपद्यते॥
९८८ ॥§ 3379

314/k

स ह्याह। अपोहः शब्दार्थ इत्ययुक्तमेतत्, अव्यापकत्वात्। यत्र द्वैराश्यं भवति तत्रेतरप्रतिषेधादितरत्प्रतीयते—यथा गौरिति पदे गौः प्रतीयमानोऽगौर्निषिध्यमानः। न पुनः सर्वपदे एतदस्ति। न ह्यसर्वं नाम किंचिदस्ति, यत्सर्वशब्देन निवर्त्येत। अथ मन्यसे—एकाद्यसर्वं तत्सर्वशब्देन निवर्त्यत इति। तन्न, स्वार्थापवाददोषप्रसङ्गात्। एवं ह्येकादिव्युदासेन प्रवर्त्तमानः सर्वशब्दोऽङ्गप्रतिषेधादङ्गव्यतिरिक्तस्याङ्गिनोऽनभ्युपगमादनर्थकः स्यात्। अङ्गशब्देनैकदेश उच्यते। एवं सर्वे समुदायशब्दा एकदेशप्रतिषेधरूपेण प्रवर्त्तमानाः समुदायिव्यतिरिक्तस्यान्यस्य समुदायस्यानभ्युपगमादनर्थकाः प्राप्नुवन्ति। द्व्यादिशब्दानां च विषयसमुच्चयत्वादेकादिप्रतिषेधेप्रतिषिध्यमानानामर्थानामसुच्चयत्वादनर्थकत्वम्, तद्दर्शयति—न भवेयुस्तथाविधा इति। इष्टास्ते समुच्चयगोचरास्तथाविधा न भवेयुरित्यर्थः। यश्चायमगोऽपोहोगौर्न भवतीति गोशब्दस्यार्थः स किं भावोऽथाभावः ? यदि भावः स किं गौरथाऽगौरिति। यदि गौः, नास्ति विवादः। अथागौः, गोशब्दस्यागौरर्थ इत्यतिशब्दार्थकौशलम्। अथाभावः, तन्न युक्तम्, प्रैषसम्प्रतिपत्त्योरविषयत्वात्। न हि शब्दश्रवणादभावे प्रैषः सम्प्रतिपत्तिश्च भवेत्। तदेतद्दर्शयति—अभावोऽपि न युक्तोऽयमित्यादि। प्रैषणं प्रैषः, प्रतिपादकेन श्रोतुरर्थे विनियोगः, सोऽयं प्रतिपादकधर्मः। सम्प्रतिपत्तिः श्रोतृधर्मः। आदिशब्देन भावधर्माः सर्वे वाहदोहादयो गृह्यन्ते। अपि च शब्दार्थः प्रतीत्या प्रतीयते, न च गोशब्दादभावं कश्चित्प्रतिपद्यते ॥ ९८२॥ ९८३॥ ९८४॥ ९८५॥ ९८६॥ ९८७॥ ९८८॥

§ 3380

किंच क्रियारूपत्वादपोहस्य विषयो वक्तव्यः, तत्रागौर्न भवतीत्ययमपोहः किं गोविषयोऽथागोविषयः। यदि गौर्विषयः, कथं गोर्गव्येवाभावः।

अथागोर्विषयः,कथमन्यविषयादपोहादन्यत्र प्रतिपत्तिः, नहि खदिरे च्छिद्यमाने पलाशे छिदा भवति। अथागोर्गवि प्रतिषेधो गौरगौर्न भवतीति, केनागोत्वं प्रसक्तं यत्प्रतिषिध्यत इति। तदत्र प्रथमौ विकल्पावत्यसम्बद्धाविति मत्वा तृतीयमेव दर्शयन्नाह—नागौर्गौरित्यादि। § 3381

नागौर्गौरिति शब्दार्थः कस्माच्चापोह इष्यते।
केन ह्यगोत्वमासक्तं गौर्येनैतदपोह्यते॥ ९८९ ॥§ 3383

अगोरपोहो यश्चायं गवि शब्दार्थ उच्यते।
स किं गोर्व्यतिरिक्तो वाऽव्यतिरिक्त उपेयते॥
९९० ॥§ 3385

315/k

विभिन्नोऽप्याश्रितो वा स्यादथवा स्यादनाश्रितः।
आश्रितत्वे गुणः प्राप्तो न द्रव्यवचनं ततः॥
९९१ ॥§ 3387

अतो गौरितिशब्देन गुणमात्राभिधानतः।
सामानाधिकरण्यं स्यान्न गौर्गच्छति तिष्ठति॥
९९२ ॥§ 3389

अथानाश्रित एवायं यद्यर्थस्तस्य को भवेत्।
येनासौ प्रतिषेधायागोरिति व्यपदिश्यते॥
९९३ ॥§ 3391

अथ चाव्यतिरिक्तोऽयमन्यापोहस्त्वयेष्यते।

७ अगो] Correction : ; अगौ (sic !)अगो
१४ प्रतिषेधायागो] Correction : ; प्रतिषेधाय गौ (sic !)प्रतिषेधायागो

गौरेवायमतः प्राप्तः किमुक्तमधिकं ततः॥
१९४॥§ 3393

चशब्दः समुच्चये। कस्माच्च भवता गौरित्येतस्य नागौरित्येषोऽपोहलक्षणः शब्दार्थ उच्यत इति वाक्यार्थः। कस्मात्पुनर्न वक्तव्या इत्याह—केनेत्यादि। इतश्चायुक्तोऽपोहो विकल्पानुपपत्तेः। तथाहि—योऽयमगोरपोहो गवि स किं गोव्यतिरिक्तः ? आहोस्विदव्यतिरिक्तः ? यद्यतिरिक्तः स किमाश्रितोऽथानाश्रितः। यद्याश्रितस्तदाऽऽश्रितत्वाद्गुणः प्राप्तः, ततश्च गोशब्देन गुण एवाभिधीयते नागौरिति गौस्तिष्ठति गौर्गच्छतीती सामानाधिकरण्यं न प्राप्नोति। अथानाश्रितस्तदा केनार्थेनागोरपोह इति षष्ठी स्यात्। अथाव्यतिरिक्तस्तदा गौरेवासाविति न किंचित्कृतं भवति॥ १८९॥ ॥ १९०॥ १९१॥ १९२॥ १९३॥ १९४॥ § 3394

प्रतिभावमपोहोऽयमेकोऽनेकोऽपिवा भवेत्।
यद्येकोऽनेकगोयुक्तो गोत्वमेव भवेदसौ॥
१९५॥§ 3396

अनेकत्वेऽपि चानन्त्यं पिण्डवत्संप्रयुज्यते।
तेन भेदवदेवास्य वाच्यता नोपयुज्यते॥
१९६॥§ 3398

अयं चापोहः प्रतिवस्त्वेकोऽनेको वेति वक्तव्यम्। यद्येकस्तदाऽनेकगोद्रव्यसम्बन्धी गोत्वमेवासौ भवेत्। अथानेकस्ततः पिण्डवदानन्त्यादाख्यानानुपपत्तेरवाच्य एव स्यात्॥ १९५॥ १९६॥ § 3399

अन्यापोहश्च किं वाच्यः किं वाऽवाच्योऽयमिष्यते।
वाच्योऽपि विधिरूपेण यदि वाऽन्यनिषेधतः॥
१९७॥§ 3401

विध्यात्मनाऽस्य वाच्यत्वे त्याज्यमेकान्तदर्शनम्।
सर्वत्रान्यनिरासोऽयं शब्दार्थ इति वर्णितम्॥
१९८॥§ 3403

316/k

अथापोहव्युदासेन यद्यपोहोऽभिधीयते।
तत्र तत्रैवमिच्छायामनवस्था भवेत्ततः॥ ९९९॥§ 3405

अथाप्यवाच्य एवायं यद्यपोहस्त्वयेष्यते।
तेनान्यापोहकृच्छब्द इति बाध्येत ते वचः॥
१०००॥§ 3407

किंचेदं तावत्प्रष्टव्यो भवति भवान्, किमपोहो वाच्योऽथावाच्य इति। वाच्यत्वे विधिरूपेण वा वाच्यः स्यादन्यव्यावृत्त्या वा। तत्र यदि विधिरूपेण तदा नैकान्तिकः शब्दार्थोऽन्यापोहः शब्दार्थ इति। अथान्यव्यावृत्त्येति पक्षस्तदा तस्याप्यन्यव्यवच्छेदस्यापरेणान्यव्यवच्छेदरूपेणाभिधानं तस्याप्यपरेणेत्यव्यवस्था स्यात्। अथावाच्यस्तदाऽन्यशब्दार्थापोहं शब्दः करोतीति व्याहन्येत॥ ९९७॥ ९९८॥ ॥ ९९९॥ १०००॥ § 3408

एतत्सर्वमुद्योतकरेणोक्तमुपन्यस्तम्, तत्राचार्यदिग्नागेनोक्तम्—सर्वत्राभेदादाश्रयस्यानुच्छेदात्कृत्स्नार्थपरिसमाप्तेश्च यथाक्रमं जातिधर्मा एकत्वनित्यत्वप्रत्येकपरिसमाप्तिलक्षणा अपोह एवावतिष्ठन्ते, तस्माद्गुणोत्कर्षादप्यर्थान्तरापोह एव शब्दार्थः साधुरिति। एतदाशङ्क्य कुमारिल उपसंहरन्नाह—अपि चैकत्वेत्यादि। § 3409

अपि चैकत्वनित्यत्वप्रत्येकसमवायिताः।
निरुपाख्येष्वपोहेषु कुर्वतोऽसूत्रकः पटः॥
१००१॥§ 3411

तस्माद्येष्वेव शब्देषु नञ्योगस्तेषु केवलम्।
भवेदन्यनिवृत्त्यंशः स्वात्मैवान्यत्र गम्यते॥
१००२॥§ 3413

येष्वेव शब्देषु नञ्योग इति। अभक्ष्यो ग्रामसूकर इत्यादिषु। स्वात्मैवेति। स्वरूपमेव विधिलक्षणम्। अन्यत्रेति। नञ्रहिते॥ १००१॥ १००२॥ § 3414

---

६ समवायिताः] Correction: ; समवायिनः (sic!)समवायिताः
७ ऽसूत्रकः पटः] Correction: ; स्तत्र कः परः (sic!)ऽसूत्रकः पटः

एवं यथाप्रधानं परमतमाशङ्क्य, अन्यापोहापरिज्ञानादित्यादिना समाधानमारभते। § 3415

अन्यापोहापरिज्ञानादेवमेते कुदृष्टयः।
स्वयं नष्टा दुरात्मानो नाशयन्ति परानपि॥
१००३ ॥§ 3417

तथाहि द्विविधोऽपोहः पर्युदासनिषेधतः।
द्विविधः पर्युदासोऽपि बुद्ध्यात्मार्थात्मभेदतः॥
१००४ ॥§ 3419

पर्युदासनिषेधत इति। पर्युदासान्निषेधाच्च पर्युदासलक्षणः प्रसज्यप्रतिषेधश्चेति यावत्। बुद्ध्यात्मार्थात्मभेदत इति। बुद्ध्यात्मभेदादर्थात्मभेदादित्यर्थः। तत्र बुद्ध्यात्मा—बुद्धिप्रतिभासोऽर्थेष्वनुगतैकरूपत्वेनाध्यवसितः अर्थात्मा—अर्थस्वभावोविजातीयव्यावृत्तमर्थस्वलक्षणमित्यर्थः। अनयोर्भेदो विभाग इति समासः॥ १००३॥ ॥ १००४॥ § 3420

317/k

तत्र बुद्ध्यात्मनः स्वरूपं दर्शयन्नाह—एकेत्यादि। § 3421

एकप्रत्यवमर्शस्य य उक्ता हेतवः पुरा।
अभयादिसमा अर्थाः प्रकृत्यैवान्यभेदिनः॥
१००५ ॥§ 3423

तानुपाश्रित्य यज्ज्ञाने भात्यर्थप्रतिबिम्बकम्।
कल्पकेऽर्थात्मताऽभावेऽप्यर्था इत्येव निश्चितम्॥
१००६ ॥§ 3425

पुरेति। पूर्व सामान्यपरीक्षायां यथा धात्र्यभयादीनामित्यादिनोक्ताः। तत्रोक्तम्—यथा हरीतक्यादयो बहवोऽन्तरेणापि सामान्यमेकं ज्वरादिशमनलक्षणं कार्यं कुर्वन्ति। तथा सावलेयादयोऽप्यर्थाः सत्यपि भेदे प्रकृत्यैकाकारप्रत्यवमर्शस्य हेतवो भविष्यन्त्यन्तरेणापि वस्तुभूतं सामान्यमिति। अभयादिसमा इति। हरीतक्यादितुल्याः। एकार्थकारितया साम्यम्।

४ नष्टा] Correction : ; तुष्टा
(sic !)नष्टा

तानुपाश्रित्येति। तानभयादिसमानर्थानाश्रित्य हेतूकृत्य तदनुभवबलेन यदुत्पन्नं विकल्पकं ज्ञानं तत्र यदर्थाकारतयार्थप्रतिबिम्बकमर्थाभासो भाति तादात्म्येन, तत्रान्यापोह इत्येषा संज्ञोक्तेति सम्बन्धः। कल्पक इति। विकल्पके, सविकल्प इति यावत्। एतच्च ज्ञान इत्यनेन समानाधिकरणम्। अर्थात्मताऽभावेऽपीति। बाह्यार्थात्मताया अभावेऽपि। निश्चितमिति।अध्यवसितम्॥ १००५॥ १००६॥ § 3426

अथ कथं तस्यापोह इत्येष व्यपदेश इत्याह—प्रतिभासान्तरादित्यादि। § 3427

प्रतिभासान्तराद्भेदादन्यव्यावृत्तवस्तुनः।
प्राप्तिहेतुतयाऽश्लिष्टवस्तुद्वारा गतेरपि॥
१००७॥ § 3429

विजातीयपरावृत्तं तत्फलं यत्स्वलक्षणम्।
तस्मिन्नध्यवसायाद्वा तादात्म्येनास्य विप्लुतेः॥
१००८॥ § 3431

तत्रान्यपोह इत्येषा संज्ञोक्ता सनिबन्धना।§ 3432

चतुर्भिर्निमित्तैरपोह इति तस्याख्या। विकल्पान्तरारोपितप्रतिभासान्तराद्भेदेनस्वयं प्रतिभासनान्मुख्यतः। अपोह्यत इत्यपोहोऽन्यस्मादपोहोऽन्यापोह इति व्यु त्पत्तेः। उपचारात्तु त्रिभिः। (१) कारणे कार्यधर्मारोपाद्वा, 318/k
य(त?)दाह—अन्यव्यावृत्त वस्तुनः प्राप्तिहेतुतयेति। (२) कार्ये वा कारणधर्मोपचारात्, तद्दर्शःयति—अश्लिष्टवस्तुद्वारा गतेरपीति। अश्लिष्टम्—अन्यासम्बद्धम्, अन्यतो व्यावृत्तमिति यावत्। तदेव वस्तुद्वारमुपायः, तदनुभवबलेन तथाविधविकल्पोत्पत्तेः। (३) विजातीयापोहपदार्थेन सहैक्येन भ्रान्तैः प्रतिपत्तृभिरध्यवसितत्वाच्चेति चतुर्थ कारणम, तद्दर्शयति—विजातियेत्यादि। अस्येति। विकल्पबुद्ध्यारूढस्यार्थप्रतिबिम्बस्य। सनिबन्धनेति। सह निबन्धनेने प्रतिभासान्तराद्भेदादिनोक्तेन चतुर्विधेन वर्त्तत इति सनिबन्धना॥ १००७॥ १००८॥ § 3433

अर्थात्मनोपोहस्य स्वरूपं दर्शयन्नाह—स्वलक्षणेऽपीत्यादि। § 3434

स्वलक्षणेऽपि तद्धेतावन्यविश्लेषभावतः॥
१००९॥§ 3435

अन्यापोह इत्येषा संज्ञोक्ता सनिबन्धनेति प्रकृतेन सम्बन्धः। तत्र निबन्धनमाह—अन्यविश्लेषभावत इति। अन्यस्माद्विजातीयाद्विश्लेषो व्यावृत्तिस्तस्य भावात्। विजातीयविश्लेषस्य विद्यमानत्वादिति यावत्। एतेन मुख्यत एव स्वलक्षणेऽन्यापोहव्यपदेश इत्युक्तं भवति॥ १००९॥ § 3436

प्रसज्यप्रतिषेधलक्षणस्यापोहस्य स्वरूपं दर्शयति—प्रसज्येत्यादि। § 3437

प्रसज्यप्रतिषेधश्च गौरगौर्न भवत्ययम्।
अतिविस्पष्ट एवायमन्यापोहोऽवगम्यते॥
१०१०॥§ 3439

तदेवं त्रिविधमपोहं प्रतिपाद्य प्रकृते शब्दार्थत्वे योजयन्नाह—तत्रायमित्यादि। § 3440

तत्रायं प्रथमः शब्दैरपोहः प्रतिपाद्यते।
बाह्यार्थाध्यवसायिन्या बुद्धेः शब्दात्समुद्भवात्॥
१०११॥§ 3442

प्रथम इति। यथोक्तार्थप्रतिबिम्बात्मा। तत्र कारणमाह—बाह्यार्थाध्यवसायिन्या इत्यादि। यदेव हि शाब्दे ज्ञाने प्रतिभासते स एव शब्दार्थो युक्तः, न चात्रप्रसज्यप्रतिषेधाध्यवसायोऽस्ति न चापीन्द्रियज्ञानवत्स्वलक्षणप्रतिभासः, किं तर्हि ? बाह्यार्थाध्यवसायिनी केवलं शाब्दी बुद्धिरुपजायते। तेन तदेवार्थप्रतिबिम्बकं शाब्दे ज्ञाने साक्षात्तदात्मतया प्रतिभासनाच्छब्दार्थो युक्तो नान्य इति भावः॥ १०११॥ § 3443

यश्चापि शब्दस्यार्थेन सह वाच्यवाचकभावलक्षणः सम्बन्धः प्रसिद्धो नासौ कार्यकारणभावादन्योऽवतिष्ठते, अपितु कार्यकारणभावात्मक एवेति दर्शयति—तद्रूपप्रतिबिम्बस्येत्यादि। § 3444
319/k

तद्रूपप्रतिबिम्बस्य धियः शब्दाच्च जन्मनि।
वाच्यवाचकभावोऽयं जातो हेतुफलात्मकः॥
१०१२॥§ 3446

तत्—अध्यवसितबहिर्भावत्वलक्षणं रूपं—स्वभावो यस्य तत्तथोक्तम्, तद्रूपं च तत्प्रतिबिम्बं चेति समासः, तस्य तद्रूपप्रतिबिम्बस्य धियः सम्बन्धिनः

शब्दाज्ज्ञानमन्युत्पादे सति स वाच्यवाचकलक्षणो निरूप्यमाणः कार्यकारणभावात्मक एव जातः। तथाहि—शब्दः प्रतिबिम्बस्य जनकत्वाद्वाचक उच्यते, तच्च प्रतिबिम्बं शब्देनजन्यमानत्वाद्वाच्यम्। तेन, यदुक्तम्—निषेधमात्रं नैवेह शाब्दे ज्ञानेऽवभासते इति, तदसंगतम्, निषेधमात्रस्य शब्दार्थत्वानभ्युपगमादिति भावः॥ १०१२॥ § 3447

एवं तावत्प्रतिबिम्बलक्षणोऽपोहः साक्षाच्छब्दैरुपजन्यमानत्वान्मुख्यः शब्दार्थ इति दर्शितम्, शेषयोरप्यपोहयोर्गौणं शब्दार्थत्वमुपवर्ण्यमानमविरुद्धमेवेति दर्शयन्नाह—साक्षादित्यादि। § 3448

साक्षादाकार एतस्मिन्नेवं च प्रतिपादिते।
प्रसज्यप्रतिषेधोऽपि सामर्थ्येन प्रतीयते॥
१०१३ ॥§ 3450

न तदात्मा परात्मेति सम्बन्धे सति वस्तुभिः।
व्यावृत्तवस्त्वधिगमोऽप्यर्थादेव भवत्यतः॥
१०१४ ॥§ 3452

तेनायमपि शब्दस्य स्वार्थ इत्युपचर्यते।
न तु साक्षादयं शाब्दो द्विविधोऽपोह उच्यते॥
१०१५ ॥§ 3454

एवं चेति। जन्यत्वेन। कस्मात्पुनः सामर्थ्येन प्रसज्यप्रतिषेधः प्रतीयत इति दर्शयन्नाह—न तदात्मेति। तस्य गवादिप्रतिबिम्बस्यात्मा यः परस्याश्वादिप्रतिबिम्बस्यात्मा स्वभावो न भवतीति कृत्वा। एवं प्रसज्यलक्षणापोहस्य नान्तरीयकतया प्रतीतेर्गौणं शब्दार्थत्वं प्रतिपाद्य स्वलक्षणस्यापि प्रतिपादयन्नाह—सम्बन्धे सतीत्यादि। तत्र सम्बन्धः शब्दस्य वस्तुनि पारम्पर्येण कार्यकारणलक्षणः प्रतिबन्धः। प्रथमं यथास्थितवस्त्वनुभवस्ततो विवक्षा ततस्ताल्वादिपरिस्पन्दस्ततः शब्द इत्येवं परम्परया यदा शब्दस्य वस्तुभिर्बाह्यैरग्न्यादिभिः सम्बन्धः स्यात्तदा तस्मिन्सम्बन्धे सति विजातीयव्यावृत्तस्यापि वस्तुनोऽर्थापत्तितोऽधिगमो भवति। अतो द्विविधोऽपि प्रसज्यप्रतिषेधोऽन्यव्यावृत्तवस्त्वात्मा चापोहः शब्दार्थ इत्युपचर्यते। अयमिति। स्वलक्षणात्मा। अपिशब्दात्प्रसज्यात्मा च॥ १०१३॥ १०१४॥ १०१५॥ § 3455

२ शब्दः प्रति] Correction : ; शब्दप्रति (sic !)शब्दः प्रति

320/k

आचार्यदिङ्ागस्योपरि यदुद्योतकरेणोक्तम्—यदि शब्दस्यापोहो नाभिधेयोऽर्थस्तदाऽभिधेयार्थव्यतिरेकेणास्य स्वार्थो वक्तव्यः, अथ स एवास्य स्वार्थस्तथापि व्याहतम्, अन्यशब्दार्थापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्त इत्युच्यत इति, अस्य हि वाक्यस्यायमर्थस्तदानीं भवति, अभिदधानाऽभिधत्त इति। तदेतद्वाक्यार्थापरिज्ञानादुक्तमिति दर्शयन्नाचार्यीयवाक्याविरोधं प्रतिपादयति— अर्थान्तरेत्यादि। § 3456

अर्थान्तरव्यवच्छेदं कुर्वती श्रुतिरुच्यते।
अभिधत्त इति स्वार्थमित्येतदविरोधि तत्॥
१०१६॥§ 3458

स्वलक्षणमपि हि शब्दस्योपचारात्स्वार्थ इति प्रतिपादितमतस्तस्मिन्स्वलक्षणात्मकेस्वार्थेऽर्थान्तरव्यवच्छेदं प्रतिबिम्बान्तराद्व्यावृत्तं प्रतिबिम्बात्मकमपोहं कुर्वती जनयन्ती श्रुतिरभिधत्त इत्युच्यते इत्येतदाचार्यीयं वचनमविरोधि॥ १०१६॥ § 3459

बाह्यार्थेत्यादिनैतदेवाचार्यीयं वचनमाचष्टे। § 3460

बाह्यार्थाध्यवसायेन प्रवृत्तं प्रतिबिम्बकम्।
उत्पादयति येनेयं तेनाहेत्यपदिश्यते॥
१०१७॥§ 3462

नतु स्वलक्षणात्मानं स्पृशत्येषा विभेदिनम्।
तन्मात्रांशातिरेकेण नास्त्यस्या अभिधाक्रिया॥
१०१८॥§ 3464

अयमाचार्यस्याभिप्रायः। न शब्दस्य बाह्यार्थाध्यवसायिविकल्पप्रतिबिम्बोत्पादव्यतिरेकेणान्यो बाह्याभिधानव्यापारः सम्भवति। निर्व्यापारत्वात्सर्वधर्माणाम्। अतो बाह्यार्थाध्यवसायेन प्रवृत्तविकल्पप्रतिबिम्बं जनयन्ती, श्रुतिः स्वार्थमभिधत्त इत्युच्यत इति। नतु विभेदिनं सजातीयविजातीयव्यावृत्तं स्वलक्षणमेषा स्पृशति,अकिंचित्करत्वात्। तन्मात्रांशातिरेकेणेति।

१ शब्दस्यापोहो नाभि] Correction : ; शब्दस्यापोहोऽभि (sic !)शब्दस्यापोहो नाभि

३ अन्य] Correction : ; एतदन्य (sic !)अन्य

तथाविधप्रतिबिम्बजनकत्वव्यतिरेकेण नापरा श्रुतेरभिधाक्रियाऽस्तीत्यर्थः॥ १०१७॥ १०१८॥ § 3465

एवमपोहस्य स्वरूपमभिधाय साम्प्रतं परोक्तानि दूषणान्युद्धर्तुमारभते। तत्र यदुक्तंयदि गौरिति शब्दश्चेदित्यादि, तत्राह—तस्य चेत्यादि। § 3466

तस्य च प्रतिबिम्बस्य गतावेवानुगम्यते।
सामर्थ्यादन्यविश्लेषो नास्यान्यात्मकता यतः॥
१०१९ ॥§ 3468

गोबुद्धिमेव हि शब्दो जनयति, अन्यविश्लेषस्तु सामर्थ्याद्गम्यते, नतु शब्दात्, तस्य गोप्रतिबिम्बस्य प्रतिभासान्तरात्मरहितत्वात्, अन्यथा नियतरूपस्य तस्य प्रति पत्तिरेव न स्यात्। तेनापरो ध्वनिर्गोबुद्धेर्जनको न 321/k
मृग्यते। तेनैव गोशब्देन गोबुद्धेर्जन्यमानत्वात्॥ १०१९॥ § 3469

ननु ज्ञानफलाः शब्दा इत्यादावाह—दिवाभोजनेत्यादि। § 3470

दिवाभोजनवाक्यादेरिवास्यापि फलद्वयम।
साक्षात्सामर्थ्यतो यस्मान्नान्वयोऽव्यतिरेकवान्॥
१०२० ॥§ 3472

यथाहि दिवा न भुङ्क्ते पीनो देवदत्त इत्यस्य वाक्यस्य साक्षाद्दिवाभोजनप्रतिषेधः स्वार्थाभिधानं, गम्यस्तु रात्रिभोजनविधिः, न साक्षात्, तद्वद्गौरित्यादेरन्वयप्रतिपादकस्य शब्दस्यान्वयज्ञानं साक्षात्फलम्, व्यतिरेकगतिस्तु सामर्थ्यात्। अत्र कारणमाह—यस्मादित्यादि। यस्मादन्वयो विधेरव्यतिरेकवान्नास्ति। किं तर्हि ? विजातीयव्यवच्छेदाव्यभिचार्येव। नहि विजातीयादव्यावृत्तस्य कस्यचित्सम्भवोऽस्ति।तेनैकस्य शब्दस्य फलद्वयमविरुद्धमेव॥ १०२०॥ § 3473

कस्मादित्याह—नाभिमुख्येनेत्यादि। § 3474

नाभिमुख्येन कुरुते यस्माच्छब्द इदं द्वयम्।
स्वार्थाभिधानमन्यस्य विनिवृत्तिं च वस्तुनः॥
१०२१ ॥§ 3476

यदि साक्षादेकस्य शब्दस्य विधिनिषेधज्ञानलक्षणं फलद्वयं युगपदभिप्रेतं भवेत्तदा स्याद्विरोधः। यदि तु दिवाभोजनवाक्यवदेकं साक्षात्, अपरं सामर्थ्यलभ्यं फलमितीष्टं, तदा न विरोधः। यच्चोक्तं प्रागगौरिति विज्ञानमित्यादि। तदपि निरस्तम्। अनभ्युपगमात्। न ह्यगोप्रतिषेधमाभिमुख्येन गोशब्दः क-

रोतीत्यभ्युपगतमस्माभिः। किं तर्हि ? सामर्थ्यादिति प्रतिपादितम्॥ १०२१॥ § 3477

यदुक्तमगोनिवृत्तिः सामान्यमित्यादि, तत्राह—तादृश इत्यादि। § 3478

तादृशः प्रतिभासश्च सामान्यं गोत्वमिष्यते।
सर्वत्र शाबलेयादौ समानत्वावसायतः॥
१०२२॥§ 3480

तादृश इति। बाह्यरूपतयाऽध्यस्तो बुद्ध्यारूढः। अत्रोपपत्तिमाह—सर्वत्रेत्यादि। सर्वत्र शाबलेयादौ गौर्गौरिति समरूपतयाऽवसानात्तेषां तत्सामान्यमित्युच्यते ॥ १०२२॥ § 3481

बाह्यवस्तुरूपत्वमपि तस्य भ्रान्तप्रतिपत्तृवशाद्व्यवह्रि(?)यते, न परमार्थत इति दर्शयति—वस्त्वित्यध्यवसायाच्चेति। § 3482
322/k

वस्त्वित्यध्यवसायाच्च वस्त्वित्यपि तदुच्यते।
झटित्येव हि तज्ज्ञानं भ्रान्तं जातं स्वबीजतः॥
१०२३॥§ 3484

ननु यदि कदाचिन्मुख्यवस्तुभूतं सामान्यं बाह्यवस्त्वाश्रितमुपलब्धं भवेत्तदा साधर्म्यदर्शनात्तत्र सामान्यं भ्रान्तिर्भवेत्, यावता मुख्यार्थासम्भवे सैव भवतां सामान्यभ्रान्तिरनुपपन्नेत्याशङ्क्याह—झटित्येव हीत्यादि। झटिति—सामान्यदर्शनाद्यनपेक्ष्य द्विचन्द्रादिज्ञानादिवदन्तरुपप्लवादेतज्जातं ज्ञानम्। नहि सर्वा भ्रान्तयः साधर्म्यदर्शनादेव भवन्ति। किं तर्हि ? अन्तरुपप्लवादपीत्यदोषः॥ १०२३॥ § 3485

तेन सिद्धसाध्यतादोषो न भवतीति दर्शयन्नाह—स एवेत्यादि। § 3486

स एव च तदाकारशब्दार्थोऽपोह उच्यते।
सामान्यं वस्तुरूपं च तथा भ्रान्त्याऽवसायतः॥
१०२४॥§ 3488

स एव बुद्ध्याकारो बाह्यतयाऽध्यस्तोऽपोह इति शब्दार्थ इति बाह्यवस्तुभूतं सामान्यमिति चोच्यते। अत्र कारणमाह—तथा भ्रान्त्यावसायत इति। सामान्यरूपत्वेन वस्तुरूपत्वेन चावसायात्। शब्दार्थत्वापोहरूपत्वयोः प्रागेव कारणमुक्तम् — बाह्यार्थाध्यवसायिन्या बुद्धेः शब्दात्समुद्भवात्। प्रतिभासान्तराद्भेदात् इत्यादिना॥ १०२४॥ § 3489

कस्मात्पुनः परमार्थतः सामान्यं तन्न भवतीत्याह—सामान्येत्यादि।
§ 3490

सामान्यवस्तुरूपत्वं न युक्तं त्वस्य भाविकम्।
बुद्धेरनन्यरूपं हि यायादर्थान्तरं कथम्॥
१०२५ ॥§ 3492

परमार्थतो हि बुद्धेरव्यतिरिक्तोऽसौ, तत्कथमर्थान्तरं व्रजेत, येनार्थानां तत्सामान्यं भावतो भवेत्। यथोक्तं ज्ञानादव्यतिरिक्तं च कथमर्थान्तरं व्रजेत् इति। तस्मात्सिद्धसाध्यतादोषो न भवति, न हि भवद्भिर्बुद्ध्याकारो गोत्वाख्यं सामान्यमवस्तुरूपमिष्टम्, किं तर्हि ? बाह्यशाबलेयादिगतमेकमनुगामि पारमार्थिकं गोत्वादिसामान्यमुपकल्पितमतो न सिद्धसाध्यतेति भावः। यच्चोक्तम् निषेधमात्ररूपश्चेत्यादि, तस्यानभ्युपगतत्वादेव न दोषः॥ १०२५॥ § 3493

यच्चेदमुक्तम्— तस्यां चाश्वादिबुद्धीनाम् इत्यादि, तत्राह—यद्यपीत्यादि।
§ 3494

यद्यप्यव्यतिरिक्तोऽयमाकारो बुद्धिरूपतः।
तथापि बाह्यरूपत्वं भ्रान्तैस्तस्यावसीयते॥
१०२६ ॥§ 3496

323/k

सुबोधम्॥ १०२६॥ § 3497

यच्चोक्तम् शब्दार्थोऽर्थानपेक्ष इति तत्राह—तस्येत्यादि। § 3498

तस्य नार्थानपेक्षत्वं पारम्पर्यात्तदागतेः।
तेनात्मना च वस्तुत्वं नैवास्तीत्युपपादितम्॥
१०२७ ॥§ 3500

यत्र हि पारम्पर्याद्वस्तुनि प्रतिबन्धोऽस्ति तस्य भ्रान्तस्यापि सतो विकल्पस्य मणिप्रभायां मणिबुद्धिवन्न बाह्यार्थानपेक्षत्वमस्ति। अतोऽसिद्धं बाह्यार्थानपेक्षत्वम्। यदुक्तं वस्तुरूपा च सा बुद्धिः इत्यादि, तत्राह—तेनेत्यादि। यद्यपि वस्तुरूपा सा बुद्धिस्तथापि तस्यास्तेन बाह्यात्मना बुद्ध्यन्तरात्मना च वस्तुत्वं नास्तीत्युपपादितम् न तदात्मा परात्मा इत्यादिना। तेन बुद्धेर्बुद्ध्यन्तरापोहो न गम्यत इत्यसिद्धं सामर्थ्येन गम्यमानत्वादिति भावः॥ १०२७॥ § 3501

असत्यपि च बाह्यार्थे इत्यत्राह—प्रतिबिम्बात्मक इत्यादि। § 3502

प्रतिबिम्बात्मकोऽपोहः पदादप्युपजायते।
प्रतिभाख्यो झटित्येव पदार्थोऽप्ययमेव नः॥
१०२८॥§ 3504

यथैव हि प्रतिबिम्बात्मकप्रतिभाख्योऽपोहो वाक्यार्थेऽस्माभिरुपवर्णितस्तथैव पदार्थोऽपि। यस्मात्पदादपि प्रतिबिम्बात्मकोऽपोह उत्पद्यत एव तेनात्माकमयमेव प्रतिबिम्बात्मकोऽपोहः पदार्थोऽपि मतो न केवलं वाक्यार्थ इत्यपिशब्दः। तेन विप्रतिपत्तेरभावान्नोपालम्भो युक्त इति भावः॥ १०२८॥ § 3505

बुद्ध्यन्तराद्यवच्छेदो नच बुद्धेः प्रतीयत इत्यत्राह—स्वरूपोत्पादमात्राद्धीत्यादि। § 3506

स्वरूपोत्पादमात्राद्धि नान्यमंशं बिभर्त्ति सा।
बुद्ध्यन्तराद्यवच्छेदस्तेन बुद्धेः प्रतीयते॥
१०२९॥§ 3508

यत एव हि स्वरूपोत्पादमात्रादन्यमंशं सा बुद्धिर्न बिभर्त्ति तत एव स्वस्वभावव्यवस्थितत्वाद्बुद्धेर्बुद्ध्यन्तराद्यवच्छेदः प्रतीयते, अन्यथा ह्यन्यस्य रूपं बिभ्रती कथं ततो व्यवच्छिन्ना प्रतीयते। तेनेति। स्वव्यतिरिक्तपदार्थस्वरूपानवधारणेना॥ १०२९॥ § 3509

भिन्नसामान्यवचना इत्यादावाह—यथैवेत्यादि। § 3510

यथैवाविद्यमानस्य न भेदः पारमार्थिकः।
अभेदोऽपि तथैवेति तेन पर्यायता भवेत्॥
१०३०॥§ 3512

324/k

यथैव ह्यपोहस्य निःस्वभावत्वादविद्यमानरूपस्य परस्परतो भेदो नास्तीत्युच्यते तथैवाभेदोऽपीति तत्कथमभिन्नार्थाभावे पर्यायत्वप्रसञ्जनं क्रियते॥ १०३०॥ § 3513

एतदेव स्पष्टीकुर्वन्नाह—अभेदो ह्येकरूपत्वमिति। § 3514

४ वाक्यार्थे] Correction : ; बाह्यार्थो (sic !)वाक्यार्थे
६ वाक्यार्थ] Correction : ; बाह्यार्थ (sic !)वाक्यार्थ

अभेदो ह्येकरूपत्वं नीरूपेषु च तत्कुतः।
एकत्वेऽर्थस्य पर्यायाः प्राप्नुवन्ति च वाचकाः॥
१०३१॥ § 3516

यदि नाम नीरूपेष्वेकरूपत्वं नास्ति तथापि किमिति पर्यायता न भवेदिति चेदाह—एकत्वेऽर्थस्येत्यादि॥ १०३१॥ § 3517

स्यादेतद्यदि नाम नीरूपेष्वेकरूपत्वं भावतो नास्ति तथापि काल्पनिकमस्ति तेन पर्यायताप्रसञ्जनं युक्तमेवेत्यत आह—रूपाभावेऽपीत्यादि। § 3518

रूपाभावेऽपि चैकत्वं कल्पनानिर्मितं यथा।
विभेदोऽपि तथैवेति कुतः पर्यायता ततः॥
१०३२॥ § 3520

रूपाभावेऽपीति। स्वभावाभावेऽपीत्यर्थः॥ १०३२॥ § 3521

यद्येवं पर्यायापर्यायव्यवस्था कथं शब्दानां प्रसिद्धेत्याह—भावतस्त्वित्यादि। § 3522

भावतस्तु न पर्याया नापर्यायाश्च वाचकाः।
नह्येकं बाह्यमेतेषामनेकं चेति वर्णितम्॥
१०३३॥ § 3524

यदि हि परमार्थतो भिन्नमभिन्नं वा किंचिद्वाच्यं वस्तु शब्दानां स्यात्तदाऽपर्यायता पर्यायता वा भवेत्। यावता स्वलक्षणं जातिस्तद्योगो जातिमांस्तथेत्यादिना वर्णितं यथैषां न किंचिद्वाच्यमस्तीति॥ १०३३॥ § 3525

कथं सा तर्हि पर्यायादिव्यवस्थेत्याह—किंत्वित्यादि। § 3526

किंत्वनेकोऽपि यद्येककार्यकारी य ईक्ष्यते।
तत्रैकधर्मारोपेण श्रुतिरेका निवेश्यते॥
१०३४॥ § 3528

तत्रान्तरेणापि सामान्यं सामान्यशब्दत्वव्यवस्थाया इदं निबन्धनम्, यद्बहूनामेकार्थक्रियाकारित्वम्। प्रकृत्यैव हि केचिद्भावा बहवोऽप्येकार्थक्रियाकारिणो भवन्ति। तेषामेकार्थक्रियासामर्थ्यप्रतिपादनाय व्यवहर्तृभिर्लाघवार्थमेकरूपाध्यारोपेणैका श्रुतिर्निवेश्यते। यथा बहुषु रूपा-

दिषु मधूदकाद्याहरणलक्षणैकार्थक्रियासमर्थेषु घट इत्येषा श्रुतिर्निवेश्यते॥ १०३४॥ § 3529

कथं पुनरेकेनानुगामिना विना बह्वेका श्रुतिर्युज्यत इत्याह—लोचनादावित्यादि। § 3530

325/k

लोचनादौ यथा रूपविज्ञानैकफले क्वचित्।
कश्चिद्यदि श्रुतिं कुर्याद्भिन्नैकेनानुगामिना॥
१०३५॥§ 3532

इच्छामात्रप्रतिबद्धो हि शब्दानामर्थेषु नियोगः, तथाहि—चक्षूरूपालोकमनस्कारेषुरूपविज्ञानैकफलेषु यदि कश्चिदिच्छावशाद्भिनाप्येकेनागुमिना सामान्येन ० ० ० इत्यादिकां श्रुतिं निवेशयेत्, तत्किं तस्य कश्चित्प्रतिरोद्धा भवेत्। नहि तेषु लोचनादिष्वेकं चक्षुर्विज्ञानजनकत्वं नाम सामान्यमस्ति। यतः सामान्यविशेषसमवाया अपि भवद्भिश्चक्षुर्विज्ञानजनका इष्यन्ते। तेषु न सामान्यसमवायोऽस्ति निःसामान्यत्वात्सामान्यस्य, समवायस्य च द्वितीयसमवायाभावात्॥ १०३५॥ § 3533

ननु च घटादिरेककार्यकारी कथमुच्यते। यावता तत्कार्यमुदकधारणादि तद्ग्राहकं च विज्ञानं स्वलक्षणभेदाद्भिद्यत एवेत्यत आह—घटादीनां चेत्यादि। § 3534

घटादीनां च यत्कार्यं जलादेर्धारणादिकम्।
यच्च तद्विषयं ज्ञानं भिन्नं यद्यपि तद्द्वयम्॥
१०३६॥§ 3536

एकप्रत्यवमर्शस्य हेतुत्वादेकमुच्यते।
ज्ञानं तथापि तद्धेतुभावादर्था अभेदिनः॥
१०३७॥§ 3538

यद्यपि स्वलक्षणभेदात्तत्कार्यं भिद्यते। तथापि ज्ञानाख्यं तावत्कार्यमेकार्थाध्यवसायिपरामर्शज्ञानहेतुतयैकमित्युच्यते तस्य च ज्ञानस्य हेतुभावादर्था अपि मधूदकाद्याहरणादिलक्षणा घटादिव्यक्तिलक्षणाश्चाभेदिन इत्युच्यन्ते, तद्दर्शयति—तथापि तद्धेतुभावादर्था अभेदिन इति। उच्यत इति प्रकृतं वचनपरिणामाद्बहुवचनान्तंसम्बध्यते। अपिशब्दो भिन्नक्रमोऽर्थाइत्य-

नन्तरं सम्बन्ध्यते। तेनैकार्थक्रियाकारित्वमुपपद्यत एव। ननु चैवमनवस्था प्राप्नोति। तथाहि—योऽसौ प्रत्यवमर्शप्रत्ययस्तस्यापि स्वलक्षणभेदेन भिद्यमानत्वादेकत्वमसिद्धम्। ततश्च तस्याप्येकत्वसिद्धये परमेकाकारप्रत्यवमर्शकार्यमनुसरतोऽनवस्था स्यात्। ततश्चानवस्थितैककार्यतया न क्वचिदेकश्रुतिनिवेशः सिद्ध्येत्। नैतदस्ति। नहि प्रत्यवमर्शप्रत्ययस्यैककार्यतयैकत्वमुच्यते। किं तर्हि ? एकार्थाध्यवसायितया, तेन नानवस्था भविष्यति। स्वत एव सर्वेषां प्रत्यवमर्शप्रत्ययानामेकार्थाध्यवसायित्वस्य सिद्धत्वात्। तेनायमर्थो भवति। एकाकारप्रत्यवमर्शहेतुत्वात् ज्ञानाख्यं कार्यमेकमित्युच्यते, तद्धेतुभावाद्यार्था अपि घटादय एकत्वव्यपदेशभाज इति॥ १०३६॥ १०३७॥
§ 3539

326/k

तेन विनापि सामान्यं वस्तुभूतं सामान्यवचना घटादयः सिद्ध्यन्तीति निगमयन्नाह—तत्रेत्यादि। § 3540

तत्र सामान्यवचना उक्ताः शब्दा घटादयः।
विजातीयव्यवच्छिन्नप्रतिबिम्बैकहेतवः॥
१०३८॥§ 3542

एकस्मिन्नपि वस्तुन्यन्तरेणापि सामान्यविशेषमसङ्कीर्णानेकशब्दप्रवृत्तिर्भवत्येवेति दर्शयन्नाह—तथेत्यादि। § 3543

तथाऽनेकार्थकारित्वादेको नैक इवोच्यते।
अतत्कार्यपरावृत्तिबाहुल्यपरिकल्पितः॥
१०३९॥§ 3545

कश्चिदेकोऽपि सन्प्रकृत्यैव सामाग्र्यन्तरान्तःपातवशादनेकार्थक्रियाकारी भवति। तत्रान्तरेणापि वस्तुभूतसामान्यादिधर्मभेदमतत्कार्यपदार्थभेदबाहुल्यादनेकधर्मसमारोपादनेका श्रुतिर्निविश्यते॥ १०३९॥ § 3546

अत्रोदाहरणमाह—यथेत्यादि। § 3547

यथा सप्रतिघं रूपं सनिदर्शनमित्यपि।
प्रयत्नानन्तरज्ञातो यथा वा श्रावणो ध्वनिः॥
१०४०॥§ 3549

स्वदेशे परस्योत्पत्तिप्रतिबन्धकारित्वाद्रूपं सप्रतिघमित्युच्यते। निदर्शनं—चक्षुर्विज्ञानं, तज्जनकत्वात्, सह तेन वर्त्तत इति सनिदर्शनम्। द्वितीय-

मप्युदाहरणमाह —प्रयत्नेत्यादि। यथाहि ध्वनिरेकोऽपि सन्प्रयत्नान्तरज्ञानफलतया प्रयत्नानन्तरं ज्ञात इत्युच्यते। श्रोत्रज्ञानफलत्वाच्च श्रावणः। श्रवणं हि श्रुतिः श्रोत्रज्ञानमिति यावत्। तत्प्रतिभासितया तत्र भवः श्रावणः। यद्वा श्रवणेन गृह्यत इति श्रावणः ॥ १०४०॥ § 3550

एवमतत्कार्यभेदेनैकस्मिन्नप्यनेका श्रुतिर्निवेश्यत इति दर्शितम्, इदानीमतत्कारणभेदेनापि क्वचित् श्रुतिर्निवेश्यत इति दर्शयति—अतत्कारणभेदेनेत्यादि। § 3551

अतत्कारणभेदेन क्वचिच्छब्दो निवेश्यते।
प्रयत्नोत्थो यथाशब्दो भ्रामरं वा यथा मधु॥
१०४१ ॥§ 3553

भ्रामरमिति। भ्रमरकृतम्, क्षुद्रादिकृतान्मधुनो व्यावृत्तम्॥ १०४१॥
§ 3554

एवमतत्कार्यकारणपदार्थभेदादेकस्मिन्वस्तुनि श्रुतिभेदो दर्शितः। इदानीं तत्कार्यकारणपदार्थव्यवच्छेदमात्रप्रतिपादनेच्छयाऽन्तरेणापि सामान्यं श्रुतेर्भेदनिवेशनं दर्शयन्नाह—तत्कार्येत्यादि। § 3555
327/k

तत्कार्यहेतुविश्लेषात्क्वचिच्छ्रुतिरिहोच्यते।
अश्रावणं यथा रूपं विद्युद्वाऽयत्नजा यथा॥
१०४२ ॥§ 3557

तौ—पूर्वोक्ता, कार्यहेतू येषां ते तथोक्ताः। तेभ्यो विश्लेषो—व्यावृत्तिः। का पुनरसौ श्रुतिरित्याह—अश्रावणमित्यादि। श्रोत्रज्ञानफलशब्दव्यवच्छेदेनाश्रावणं रूपमित्युच्यते। तथा प्रयत्नकारणघटादिपदार्थव्यवच्छेदेन विद्युदप्रयत्नजेत्यभिधीयते ॥ १०४२॥ § 3558

एवमन्तरेणापि सामान्यादिकं वस्तुभूतं व्यावृत्तिकृतमेव शब्दानां भेदेन निवेशनमिति प्रतिपाद्य पर्यायत्वप्रसङ्गाभावं दर्शयन्नाह—इत्यादिनेत्यादि।
§ 3559

इत्यादिना प्रभेदेन विभिन्नार्थनिबन्धनाः।
व्यावृत्तयः प्रकल्प्यन्ते तन्निष्ठाः श्रुतयस्तथा॥
१०४३ ॥§ 3561

यथासङ्केतमेवातोऽसङ्कीर्णार्थाभिधायिनः।
शब्दा विवेकतो वृत्ताः पर्याया न भवन्ति नः॥
१०४४॥§ 3563

आदिग्रहणेनावस्थाविशेषवाचका बालादिशब्दा नैरात्म्यादिशब्दाश्च गृह्यन्ते। विभिन्नार्थनिबन्धना इति। विभिन्नस्ततस्ततो व्यावृत्तोऽर्थो निबन्धनं यासां व्यावृत्तीनां तास्तथोक्ताः। तथेति। व्यावृत्तिवत्। तन्निष्ठा इति। व्यावृत्तार्थनिष्ठाः। प्रणालिकया तथाविधपदार्थाधिगतिहेतुत्वात्। श्रुतय इति। शब्दाः॥ १०४३॥ ॥ १०४४॥ § 3564

स्यादेतत्—माभूत्पर्यायत्वमेषाम्, अर्थभेदस्य परिकल्पितत्वात्, सामान्यविशेषवाचित्वव्यवस्था तु विना सामान्यविशेषाभ्यां कथमेषां सिद्ध्यतीत्यत आह—बह्वल्पेत्यादि। § 3565

बह्वल्पविषयत्वेन तत्सङ्केतानुमानतः।
सामान्यभेदवाच्यत्वमप्येषां न विरुध्यते॥
१०४५॥§ 3567

वृक्षशब्दो हि सर्वेष्वेव धवखदिरपलाशादिष्ववृक्षव्यवच्छेदमात्रानुमानं प्रतिबिम्बकं जनयति। तेनास्य बहु(विष)यत्वात् सामान्यं वाच्यमुच्यते। धवादिशब्दस्य तु खदिरादिव्यावृत्तिः कतिपयपादपावसायिविकल्पोत्पादकत्वाद्विशेषो वाच्य उच्यते ॥ १०४५॥ § 3568

ननु चापोह्यभेदेनत्यादावाह—ताश्चेत्यादि। § 3569
328/k

ताश्च व्यावृत्तयोऽर्थाना कल्पनामात्रनिर्मिताः।
नापोह्याधारभेदेन भिद्यन्ते परमार्थतः॥
१०४६॥§ 3571

यदि हि पारमार्थिकोऽपोह्यभेदेनाधारभेदेनापोहभेदोऽभीष्टः स्यात्तदैतद्दूषणं स्यात्, यावता कल्पनया सजातीयविजातीयपदार्थभेदनिबन्धना व्यावृत्तयो भिन्नाः, कल्प्यन्ते न परमार्थतः॥ १०४६॥ § 3572

ताश्च कल्पनावशाद्यतिरिक्ता एव वस्तुनो भासन्ते न परमार्थत इति दर्शयति—तासां हीत्यादि। § 3573

तासां हि बाह्यरूपत्वं कल्पितं तन्न वास्तवम्।
भेदाभेदौ च तत्त्वेन वस्त्वन्येव व्यवस्थितौ॥
१०४७॥§ 3575

कस्माद्वास्तवं न भवतीत्याह—भेदाभेदौ चेत्यादि॥ १०४७॥ § 3576

परमार्थतस्तु विकल्पा एव भिद्यन्त इति दर्शयति। स्वबीजानेकेत्यादि। § 3577

स्वबीजानेकविश्लिष्टवस्तुसङ्केतशक्तितः।
विकल्पास्तु विभिद्यन्ते तद्रूपाध्यवसायिनः॥
१०४८॥§ 3579

नैकात्मतां प्रपद्यन्ते च भिद्यन्ते च खण्डशः।
स्वलक्षणात्मका अर्था विकल्पः प्लवते त्वसौ॥
१०४९॥§ 3581

स्वबीजं—वातादिविकल्पवासना, अनेकस्माद्विश्लिष्टं वस्तु च सङ्केतश्चेति विग्रहः, तेषां शक्तिः—सामर्थ्यम्, ततो विजातीयानेकपदार्थव्यावृत्तवस्तुव्यवसायिनो विकल्पा भिद्यन्ते। नत्वर्थाः। तथाहि—वृक्षत्वादिसामान्यरूपेण नैकात्मतां धवादयः प्रतिपद्यन्ते नापि क्षणिकात्मकादिधर्मभेदेन खण्डशो भिद्यन्ते। केवलं विकल्प एव तथा प्लवते नत्वर्थः। यथोक्तम्— संसृज्यन्ते न भिद्यन्ते स्वतोऽर्थाः पारमार्थिकाः। रूपमेकमनेकं च तेषु बुद्धेरुपप्लवः॥ इति॥ १०४८॥ १०४९॥ § 3582

यच्चोक्तं— नचाप्रसिद्धसारूप्यानित्यादि, तत्राह—एकधर्मान्वयासत्त्वेऽपीत्यादि। § 3583

एकधर्मान्वयासत्त्वेऽप्यपोह्यापोहगोचराः।
वैलक्षण्येन गम्यन्ते भिन्नप्रत्यवमर्शतः॥
१०५०॥§ 3585

अपोह्यश्चापोहगोचराश्चेति विग्रहः। तत्रापोह्या अश्वादयः, गोशब्दस्य तदपोहेन प्रवृत्तत्वात्। अपोहगोचराः शाबलेयादयः, तद्विषयत्वादगोपोहस्य। तेन
329/k यद्यप्येकस्य सामान्यरूपस्यान्वयो नास्ति, तथाप्यभिन्नप्रत्यवमर्शहेतवो ये ते प्रसिद्धसारूप्या भवन्ति, ये तु विपरीतास्ते विपरीता इति॥ १०५०॥ § 3586

स्यादेतत्—तस्यैवैकप्रत्यवमर्शस्य हेतवोऽन्तरेण सामान्यमेकं कथमर्था भिन्नाः सिद्ध्यन्तीत्यत आह—एकप्रत्यवमर्शे हीत्यादी। § 3587

एकप्रत्यवमर्शे हि केचिदेवोपयोगिनः।
प्रकृत्या भेदवत्त्वेऽपि नान्य इत्युपपादितम्॥
१०५१॥§ 3589

प्रतिपादितमेतत्सामान्यपरीक्षायाम्, यथा धात्र्यादयोऽन्तरेणापि सामान्यमेकार्थक्रियाकारिणो भवन्ति, तथैव प्रत्यवमर्शहेतवो भिन्ना अपि भावाः केचिदेव भविष्यन्तीति॥ १०५१॥ § 3590

नचान्वयविनिर्मुक्तेत्यादावाह—अतद्रूपेत्यादि। § 3591

अतद्रूपपरावृत्तं वस्तुमात्रं स्वलक्षणम्।
यत्नेन क्रियमाणोऽयमन्वयो न विरुध्यते॥
१०५२॥§ 3593

यद्यपि सामान्यं वस्तुभूतं नास्ति, तथापि विजातीयव्यावृत्तस्वलक्षणमात्रेणैवान्वयः क्रियमाणो न विरुध्यते॥ १०५२॥ § 3594

कथमित्याह—यस्मिन्नित्यादि। § 3595

यस्मिन्नधूमतो भिन्नं विद्यते हि स्वलक्षणम्।
तस्मिन्ननग्नितोऽप्यस्ति परावृत्तं स्वलक्षणम्॥
१०५३॥§ 3597

यथा महानसे चेह विद्यतेऽधूमभेदि तत्।
तस्मादनग्नितो भिन्नं विद्यतेऽत्र स्वलक्षणम्॥
१०५४॥§ 3599

यस्मिन्निति। प्रदेशे। इह च विद्यते स्वलक्षणमधूमतो भेदीति पक्षधर्मोपदर्शनम्।तस्मादित्यादिना प्रमाणफलोपदर्शनम्। यदि वाऽ(यद्वाऽ ?)बयवपञ्चकमपि स्वलक्षणेनान्वये क्रिमाणे शय्यो(क्यो ?)पदर्शनमिति दर्शयति॥ १०५३॥ १०५४॥ § 3600

इदं च कार्यहेतावुक्तम्। स्वभावहेतावाह—असत इत्यादि। § 3601

असतो नरशृङ्गादेर्यच्च भिन्नं स्वलक्षणम्।
बुद्धिदीपादिवत्सर्वं व्यावृत्तं तत्स्थिरादपि॥
१०५५॥§ 3603

असद्रूपं तथा चेदं न शब्दादिस्वलक्षणम्।
इत्थं निर्दिष्टभेदेन भवत्येवान्वयोऽमुना॥
१०५६॥§ 3605

330/k

यदसतो व्यावृत्तं स्वलक्षणमताद्रूप्यात्तत्सर्वं स्थिरादपि व्यावृत्तं, यथा बुद्धिदीपादयः। तथाचेदं शब्दादिस्वलक्षणमसद्रूपं न भवतीति। अतोऽमुना न्यायेन विशेषासंस्पर्शात्स्वलक्षणेनान्वयः क्रियमाणो न विरुध्यते। अयं च सत्त्वादित्यस्य हेतोरन्वये दर्शितः॥ १०५५॥ १०५६॥ § 3606

यद्येवं स्वलक्षणेनैवान्वयः, कथमिदानीं सामान्यलक्षणविषयमनुमानं सिध्यतीत्यत आह—अविवक्षितभेदं चेत्यादि। § 3607

अविविक्षतभेदं च तदेव परिकीर्त्तितम्।
सामान्यलक्षणत्वेन नानिष्टेरपरं पुनः॥
१०५७॥§ 3609

तदेव हि स्वलक्षणमविवक्षितभेदं सामान्यलक्षणमित्युक्तम्। सामान्येन—भेदापरामर्शेन, लक्ष्यते—व्यवसीयत इति सामान्यलक्षणम्। नापरं पुनरिति। तीर्थिकाभिमतम्, तस्यानिष्टत्वात्। यथोक्तम्— नस्य स्वपर-रूपाभ्यां गतेर्मेयद्वयंमतम् इति। तथाऽपरमुक्तम्—अतद्रूपपरावृत्तवस्तुमात्र-समाश्रयात्। सामान्यविषयं प्रोक्तं लिङ्गं भेदाप्रतिष्ठितेः॥ इति। तेन साह-चर्यमपि लिङ्गशब्दयोः स्वलक्षणेनैव कथ्यते। नचाप्यदर्शनमात्रेणास्माभिर्विप-क्षे लिङ्गस्याभावोऽवसीयते। किं तर्हि ? अनुपलम्भविशेषादिति भावः॥ १०५७॥ § 3610

यच्चोक्तं साबलेयाच्च भिन्नत्वमित्यादि, तत्राह—शबलापत्यत इत्यादि। § 3611

शबलापत्यतो भेदे बाहुलेयाश्वयोः समे।

७ नस्य] Correction: ; तस्यैव (sic!)नस्य

तुरङ्गपरिहारेण गोत्वं किं तत्र वर्त्तते॥
१०५८॥§ 3613

इदं हि भवान्वक्तुमर्हति, साबलेयाद्य बाहुलेयाद्य तुल्येऽपि भेदे सति किमिति तुरङ्गमपरिहारेण गोत्वं तत्रैव साबलेयादौ वर्त्तते नाश्व इति॥ १०५८॥ § 3614

स्यादेतत्—किमत्र वक्तव्यं, तस्य हि गोत्वस्याभिव्यक्तौ साबलेयादिरेव समर्थो नाश्वादिरतस्तत्रैव तद्वर्त्तते नान्यत्र। नचायं पर्यनुयोगो युज्यते, कस्मात्तस्याभिव्यक्तौ स एव साबलेयादिः समर्थो भवति, (इति) यतो वस्तुस्वभावप्रतिनियमोऽयं, नहि वस्तूनां स्वभावः पर्यनुयोगमर्हति। तेषां स्वहेतुपरम्पराकृतत्वात्स्वभावभेदप्रतिनियमस्येति, अत्राह—तस्य व्यक्तावित्यादि। § 3615

तस्य व्यक्तौ समर्थात्मा स एवेति यदीष्यते।
तुल्यप्रत्यवमर्शेऽपि स शक्तो न तुरङ्गमः॥
१०५९॥§ 3617

331/k

तस्येति। गोत्वस्य। स एवेति। सावलेयादिर्न पुनरश्वः। यद्येवं सत्यपि भेदेसामान्यमन्तरेणापि तुल्यप्रत्यवमर्शोत्पादने सावलेयादिरेव शक्तो न तुरङ्गम इत्ययमस्मत्पक्षो न विरुध्यत एव॥ १०५९॥ § 3618

ततश्च किं जातमित्याह—तादृगित्यादि। § 3619

तादृक्प्रत्यवमर्शश्च विद्यते यत्र वस्तुनि।
तत्राभावेऽपि गोजातेरगोऽपोहः प्रवर्त्तते॥
१०६०॥§ 3621

यत्र साबलेयादौ वस्तुनि तादृक्—गौर्गौरिति, प्रत्यवमर्शः—प्रत्ययो जायते। तत्रैवासत्यामपि गोजातौ वस्तुभूतायामगोपोहः प्रतिबिम्बात्मा प्रवर्त्तते॥ १०६०॥ § 3622

यच्चोक्तमिन्द्रियैरित्यादि, तदसिद्धमिति दर्शयन्नाह—अगोभिन्नं चेत्यादि। § 3623

अगोभिन्नं च यद्वस्तु तदक्षैर्व्यवसीयते।
प्रतिबिम्बं तदध्यस्तं स्वसंवित्त्याऽवगम्यते॥
१०६१॥§ 3625

इदं दृष्ट्वा च लेकेन शब्दस्तत्र प्रयुज्यते।
संबन्धानुभवोऽप्यस्य व्यक्तं तेनोपपद्यते॥
१०६२॥§ 3627

तत्र स्वलक्षणात्मा तावदपोह इन्द्रियैरवगम्यत एव। यत्स्वार्थप्रतिबिम्बात्माऽपोहः स परमार्थतो बुद्धिस्वभावत्वात्स्वसंवेदनप्रत्यक्षत एव सिद्धः। चकारोऽनुक्तार्थसमुच्चये। तेन प्रसज्यात्मापि सामर्थ्यात्प्रतीयत एव न तदात्मा परात्मेति दर्शितं भवति। तेनेदमेव स्वलक्षणादिरूपमपोहं दृष्ट्वा शब्दो लोकेन प्रयुज्यते, नतु सामान्यं वस्तुभूतं, तस्यासत्त्वादप्रतिभासनाच्च। यदेव च दृष्ट्वा लोकेन शब्दः प्रयुज्यते, तेनैव तस्य सम्बन्धोऽवगम्यते नान्येनातिप्रसङ्गात्॥ १०६१॥ १०६२॥ § 3628

यदुक्तम् अगोशब्दाभिधेयत्वं च कथं पुनरिति, अत्राह—तादृगित्यादि। § 3629

तादृक्प्रत्यवमर्शश्च यत्र नैवास्ति वस्तुनि।
अगोशब्दाभिधेयत्वं विस्पष्टं तत्र गम्यते॥
१०६३॥§ 3631

यच्चोक्तं सिद्धश्चागौरपोह्येतेत्यादि तत्राह—गावोऽगावश्चेत्यादि। § 3632

गावोऽगावश्च संसिद्धा भिन्नप्रत्यवमर्शतः।
शब्दस्तु केवलोऽसिद्धो यथेष्टं संप्रयुज्यते॥
१०६४॥§ 3634

न ह्यन्यग्रहणं वस्तु भिन्नं वित्तावपेक्षते।
अन्योन्याश्रयदोषोऽयं तस्मादस्मिन्निरास्पदः॥
१०६५॥§ 3636

332/k

स्वत एव हि गवादयो भावा भिन्नप्रत्यवमर्शं जनयन्तो विभागेन सम्यङ्निश्चिताः। तेषु व्यवहारार्थं व्यवहर्तृभिर्यथेष्टं शब्दोऽसिद्धः प्रयुज्यते। तथाहि—यदि भिन्नवस्तुत्वरूपं प्रतिपत्त्यर्थमन्यपदार्थग्रहणमपेक्षते तदा स्यादितरेतराश्रयदोषः, यावताऽन्यग्रहणमन्तरेणैव भिन्नं वस्तु संवेद्यते, त-

स्मिन्भिन्नाकारप्रत्यवमर्शहेतुया विभागेन सिद्धे सति गौरगौरिति च यथेष्टं सङ्केतः क्रियत इति कथमितरेतराश्रयत्वं भवेत्।वित्ताविति। वित्त्यर्थम्॥ १०६४॥ १०६५॥ § 3637

यच्चोक्तं नाधाराधेयवृत्त्यादि (इति) तत्राह—अवेद्यबाह्यतत्त्वापीत्यादि। § 3638

अवेद्यबाह्यतत्त्वाऽपि प्रकृष्टोपप्लवादियम्।
स्वोल्लेखं बाह्यरूपेण शब्दधीरध्यवस्यति॥
१०६६॥§ 3640

एतावत्क्रियते शब्दैर्नार्थं शब्दाः स्पृशन्त्यपि।
नापोहेन विशिष्टश्च कश्चिदर्थोऽभिधीयते॥
१०६७॥§ 3642

नहि परमार्थेन कश्चिदपोहेन विशिष्टोऽर्थः शब्दैरभिधीयते। यतः प्रतिपादितमेतत्, यथा न किंचिदपि शब्दैर्वस्तु संस्पृश्यते, क्वचिदपि सामग्र्यभावादिति। तथाहि शाब्दी बुद्धिरबाह्यार्थविषयापि सती स्वोल्लेखं स्वाकारं बाह्यार्थतयाऽध्यवस्यन्ती जायते, न परमार्थतो वस्तुस्वभावं स्पृशति, यथातत्त्वमनध्यवसायात्॥ १०६६॥ ॥ १०६७॥ § 3643

यद्येवं कथमाचार्येणोक्तं नीलोत्पलादिशब्दा अर्थान्तरनिवृत्तिविशिष्टानर्थानाहुरित्यत आह—अर्थान्तरेत्यादि। § 3644

अर्थान्तरनिवृत्त्याऽहुर्विशिष्टानिति यत्पुनः।
प्रोक्तं लक्षणकारेण तत्रार्थोऽयं विवक्षितः॥
१०६८॥§ 3646

कोऽसावर्थो विवक्षित इत्याह—अन्यान्यत्वेनेत्यादि। § 3647

अन्यान्यत्वेन ये भावा हेतुना करणेन वा।
विशिष्टा भिन्नजातीयैरसङ्कीर्णा विनिश्चिताः॥
१०६९॥§ 3649

वृक्षादीनाहतान्ध्वानस्तद्भावाध्यसायिनः।
ज्ञानस्योत्पादनादेतज्जात्यादेः प्रतिषेधनम्॥
१०७० ॥§ 3651

द्विविधो ह्यर्थो बाह्यो बुद्ध्यारूढश्च। तत्र बाह्ये न परमार्थतोऽभिधानं शब्दैः, केवलं तदध्यवसायिविकल्पोत्पादादुपचारादुक्तं शब्दोऽर्थानाहेति। उपचारस्य
333/k च प्रयोजनं जात्यभिधाननिराकरणमिति समुदायार्थः। अवयवार्थस्तूच्यते— अन्यान्यत्वेनेति। अन्यस्मादन्यत्वं व्यावृत्तिः, तेनान्यान्यत्वेन हेतुना करणेन वा वृक्षादयो भावा विशिष्टा निश्चिताः। अन्यतो व्यावृत्ता निश्चिता इति यावत्। एतेनार्थान्तरनिवृत्तिविशिष्टानित्यत्र पदे निवृत्त्येति तृतीयार्थो व्याख्यातः। ध्वान इति। शब्दः ॥ १०७०॥ § 3652

यस्तु बुद्ध्यारूढोऽर्थस्तस्य मुख्यत एव शब्दैरभिधानमिति दर्शयति— बुद्धावित्यादि। § 3653

बुद्धौ ये वा विवर्त्तन्ते तानाहाभ्यन्तरानयम्।
निवृत्त्या च विशिष्टत्वमुक्तमेषामनन्तरम्॥
१०७१ ॥§ 3655

अयमिति। ध्वानः। अथार्थान्तरनिवृत्तिविशिष्टत्वं कथमेषां योजनीयमित्याह—निवृत्त्या चेत्यादि। अनन्तरमिति। अन्यान्यत्वेनेत्यादिना तेषामपि बुद्धिसमारूढानामर्थानामन्यतोव्यावृत्ततया प्रतिपादनात्॥ १०७१॥ § 3656

ननु यदि न कश्चिदेव वस्त्वंशः शब्देन प्रतिपाद्यते तत्कथमुक्तमाचार्येणार्थान्तरनिवृत्त्या कश्चिदेव वस्तुनो भागो गम्यत इत्यत आह— अर्थान्तरपरावृत्त्येत्यादि। § 3657

अर्थान्तरपरावृत्त्या गम्यते तस्य वस्तुनः।
कश्चिद्भाग इति प्रोक्तं तदेव प्रतिबिम्बकम्॥
१०७२ ॥§ 3659

ननु बुद्धिधर्मत्वात्प्रतिबिम्बस्य कथं वस्तुभागत्वमुपपद्यत इत्यत आह— अर्थान्तरपरावृत्तेत्यादि। § 3660

अर्थान्तरपरावृत्तवस्तुदर्शनसंश्रयात्।
आगतेस्तत्र चारोपात्तस्य भागोऽपदिश्यते॥
१०७३ ॥§ 3662

अर्थान्तरपरावृत्तवस्तुदर्शनद्वारायातत्वात्तत्रार्थान्तरपरावृत्ते वस्तुनि भ्रान्तैस्तादात्म्येनारोपितत्वात्तदेव प्रतिबिम्बकमुपचाराद्वस्तुनो भाग इति व्यपदिश्यते॥ १०७३॥
§ 3663

अत्राप्यर्थान्तरपरावृत्त्येति तृतीयार्थं योजयन्नाह—हेत्वर्थ इत्यादि। § 3664

हेत्वर्थः करणार्थश्च पूर्ववत्तेन वात्मना।
यदि वस्तु विजातीयान्न स्याद्भिन्नं न तत्तथा॥
१०७४॥§ 3666

पूर्ववदिति। यथाऽर्थान्तरनिवृत्तिविशिष्टानाहेत्यत्रान्यान्यत्वेनेत्यादिना दर्शितं त(था)त्रापि योजनीयमित्यर्थः। अथवा सर्वत्रैवेत्थम्भूतलक्षणा तृतीयेयमिति दर्शयति—तेन वात्मनेति। ननु बाधान्तरनिवृत्तिर्बाह्यवस्तुगतो धर्मः, 334/k
सा कथं प्रतिबिम्बाधिगमे हेतुभावं करणभावं वा प्रतिपद्यत इत्यत्राह—यदि वस्तु विजातीयादित्यादि। यदि हि विजातीयात्पदार्थाद्व्यावृत्तं वस्तु न स्यात्तदा न तत्प्रतिबिम्बात्मकं तथा विजातीयपरावृत्तवस्त्वात्मना व्यवसीयेत, तस्मादर्थान्तरपरावृत्तेर्हेतुभावः करणभावश्च युज्यत इति भावः॥ १०७४॥
§ 3667

नचान्यरूपमन्यादृक्कुर्याज्ज्ञानं विशेषणम् इत्यादावाह—अगोनिवृत्तिरन्यत्वमित्यादि। § 3668

अगोनिवृत्तिरन्यत्वं तस्य चात्मगतैव सा।
भेदोक्तावप्यभावस्तु केवलो न निवर्त्तते॥
१०७५॥§ 3670

तद्विशेषणभावेऽपि वस्तुधीर्न विहीयते।
कल्पनानिर्मितं चेदमभेदेऽपि विशेषणम्॥
१०७६॥§ 3672

सोपकृष्य ततो धर्मः स्थापितो भेदवानिव।
येन दण्डादिवत्तस्य जायते हि विशेषणम्॥
१०७७॥§ 3674

यदि ह्यन्यव्यावृत्तिर्भावरूपा वस्तुनो विशेषणत्वेनाभिप्रेता स्यात्तदैतत्सर्वं दूषणमुपपद्यते, यावता वस्तुस्वरूपैवान्यनिवृत्तिर्विशेषणत्वेनोपादीयते, तेन विशेषणानुरूपैव विशेष्यबुद्धिर्भवत्येव। तथाहि—अगोनिवृत्तिर्या गोरभिधीयते साऽश्वादिभ्योगोर्यदन्यत्वं तत्स्वभावैव नान्या। ततश्च यद्यप्यसौ व्यतिरेकेणागोनिवृत्तिर्गोरित्यभिधीयते भेदान्तरप्रतिक्षेपमात्रजिज्ञासायां, तथापि परमार्थतस्तस्य गोरात्मगतैव सा, यथाऽन्यत्वम्, नह्यन्यत्वं नामान्यस्माद्वस्तुनोऽन्यत्, अपितु तदेव। अन्यथा तद्वस्तु ततोऽन्यस्मिन्न सिद्ध्येत्। तत्—तस्मात्, विशेषणभावेऽप्यन्यव्यावृत्तेर्विशेष्ये वस्तुधीर्भवत्येव। स्यादेतद्व्यतिरिक्तमेव हि विशेष्याद्विशेषणं लोके प्रसिद्धम्, यथा दण्डः पुरुषस्य, व्यावृत्तिश्चाव्यतिरिक्ता वस्तुनः, तत्कथमसौ तस्य विशेषणं युज्यत इत्याह —कल्पनेत्यादि। नहि परमार्थेन न किंचित्कस्यचिद्विशेषणं युक्तम्, अनुपकारकस्य विशेषणत्वायोगात्, उपकारकत्वे चाङ्गीक्रियमाणे कार्यकाले कारणस्यानवस्थानादयुगपत्कालभाविनोर्न विशेषणविशेष्यभावो युक्तः, युगपत्कालभावित्वेतु तदानीं सर्वात्मना परिनिष्पत्तेर्न परस्परमुपकारोऽस्तीति न युक्तो विशेषणविशेष्यभावः। तत्तस्मात्सर्वभावानां स्वस्वभावस्थितत्वेनायःश-
335/k लाकाकल्पत्वात्केवलं कल्पनयाऽमीषां मिश्रीकरणम्। तेन परमार्थतो यद्यपि व्यावृत्तितद्वतोरभेदस्तथापि कल्पनारचितंभेदमाश्रित्य विशेष्यविशेषणभावो भविष्यति॥ १०७५॥ १०७६॥ १०७७॥ § 3675

यच्चोक्तम्— यदाचाशब्दवाच्यत्वान्न व्यक्तीनामपोह्यतेइत्यादि। तत्राह—प्रतिभासश्चेत्यादि। § 3676

प्रतिभासश्च शब्दार्थ इत्याहुस्तत्त्वचिन्तकाः।
दृश्यकल्पाविभागज्ञो लोको बाह्यं तु मन्यते॥
१०७८॥ § 3678

तस्यातोऽध्यवसायेन व्यक्तीनामेव वाच्यता।
तत्त्वतश्च न शब्दानां वाच्यमस्तीति साधितम्॥
१०७९॥ § 3680

व्यक्तीनामवाच्यत्वादित्यसिद्धम्। तथाहि—यद्व्यक्तीनामवाच्यत्वमस्माभिर्वर्णितंतत्परमार्थचिन्तायाम्, न पुनः संवृत्त्यापि, संवृत्त्या तु व्यक्तीनामेव वाच्यत्वमविचाररमणीयतया प्रसिद्धमित्यसिद्धो हेतुः। दृश्यः—बाह्यः स्वलक्षणात्मा, (कल्पः—)विकल्प्यो विकल्पज्ञानपरिवर्त्ती प्रतिभासः। अथ पारमार्थिकम-

१ यदाचा] Correction: ; यदा धी (sic !)यदाचा

वाच्यत्वं हेतुत्वेनोपादीयते तदाऽपोह्यत्वमपि व्यक्तीनां परमार्थतो नेष्टमित्यतः सिद्धसाध्यतेति दर्शयति —तत्त्वतश्चेत्यादि॥ १०७८॥ १०७९॥ § 3681

इत्थमित्यादिना हेतोरसिद्धतामेव निगमयति। § 3682

इत्थं च शब्दवाच्यत्वाद्व्यक्तीनामस्त्यपोह्यता।
सामान्यस्य तु नापोहो न चापोहेऽपि वस्तुता॥
१०८०॥§ 3684

यच्चोक्तम्— तदाऽपोह्यो न सामान्यं तस्यापोहाच्च वस्तुता। इति, तत्राप्यपोह्यत्वादित्यस्य हेतोरसिद्धत्वमनैकान्तिकत्वं चेति दर्शयति—सामान्यस्येत्यादिना।अपोह इति। व्यक्तीनामेवापोहस्य प्रतिपादितत्वात्। न चापोहेऽपि वस्तुतेति। साध्यविपर्यये हेतोर्बाधकप्रमाणाभावादिति भावः॥ १०८०॥ § 3685

यच्चोक्तं नापोह्यत्वमभावानामित्यादि, तत्राह—नाभाव इत्यादि। § 3686

नाभावोऽपोह्यते ह्येवं नाभावोऽभाव इत्ययम्।
भावस्तु न तदात्मेति तस्यैष्टैवमपोह्यता॥
१०८१॥§ 3688

अभावो नाभाव इत्येवमभावो नापोह्यते येनाभावरूपतायास्त्यागः स्यात्। किं तर्हि ?। भावो यः स विधिरूपत्वादभावरूपविवेकेनावस्थित इति सामर्थ्यादपोह्यत्वं तस्याभावस्येष्टम्॥ १०८१॥ § 3689
336/k

एतदेव स्पष्टीकुर्वन्नाह—यो नामेत्यादि। § 3690

यो नाम न यदात्मा हि स तस्यापोह उच्यते।
न भावोऽभावरूपश्च तदपोहे न वस्तुता॥
१०८२॥§ 3692

तदपोह इति। तस्याभावस्यैवमपोहे सति न वस्तुता प्राप्नोति॥ १०८२॥ § 3693

अत्रोभयपक्षप्रसिद्धोदाहरणोपदर्शनेनानैकान्तिकतामेव स्फुटयन्नाह—प्रकृतीशादिजन्यत्वमित्यादि। § 3694

प्रकृतीशादिजन्यत्वं वस्तूनां नेति चोदिते।

प्रकृतीशादिजन्यत्वं नहि वस्तु प्रसिद्ध्यति॥
१०८३॥§ 3696

तथाहि प्रकृतीश्वरकालादिकृतत्वं भावानां भवद्भिर्मीमांसकैरपि नेष्यत एव। तस्य च प्रतिषेधे सत्यपि यथा न वस्तुत्वमापद्यते तथाऽपोह्यत्वेऽप्यभावस्य वस्तुत्वापत्तिर्न भविष्यतीत्यनेकान्तः॥ १०८३॥ § 3697

यदुक्तम्— तत्रासतोऽपि वस्तुत्वमिति क्लेशो महान्भवेत् इति। तदप्यनेनैवानैकान्तत्वप्रतिपादनेन प्रतिविहितमिति दर्शयति—नातोऽसतोऽपीत्यादि। § 3698

नातोऽसतोऽपि भावत्वमिति क्लेशो न कश्चन।
तस्य सिद्धौ च सत्ताऽस्ति सा चासत्ता प्रसिध्यति॥
१०८४॥§ 3700

तदसिद्धौ न सत्तास्ति न चासत्ता प्रसिद्ध्यतीत्यत्राह—तस्य सिद्धौ च सत्ताऽस्तीत्यादि। तस्याभावस्य यथोक्तेन प्रकारेण सिद्धौ सत्यामपि भावस्य सत्ता सिद्ध्यत्वेव तस्य स्वस्वभावव्यवस्थितत्वात्। या चाभावस्य यथोक्तेन प्रकारेण सिद्धिः सैवासत्तेति प्रसिद्ध्यति। एतच्च प्रतिसमाधानस्य समानत्वादिति कृत्वाऽत्रैव प्रतिविहितम्॥ १०८४॥ § 3701

इदानीं यथानुक्रममेव प्रतिसमाधानमाह। तत्र यदुक्तम् अभावस्य च योऽभावइत्यादि, तत्राह—अगोत इत्यादि। § 3702

अगोतो विनिवृत्तिश्च गौर्विलक्षण इष्यते।
भाव एव ततो नायं गौरगोर्मे प्रसज्यते॥
१०८५॥§ 3704

भाव एव स चेदित्येतन्नानिष्टत्वापादनमिष्टत्वात्। तथाहि—अगोरूपादश्वादेर्गोर्भावविशेषरूप एव विलक्षण इष्यते, नाभावात्मा, तेन भाव एव भवेत्। अगोतश्च गोर्वैलक्षण्यस्येष्टत्वादगोर्न गोत्वप्रसङ्गः॥ १०८५॥ § 3705
337/k

यच्चोक्तम्— न ह्यवस्तुनि सा मता इति तदसिद्धमनैकान्तिकं चेति दर्शयन्नाह —अवस्तुविषयेऽप्यस्तीत्यादि। § 3706

अवस्तुविषयेऽप्यस्ति चेतोमात्रविनिर्मिता।

६ न चासत्ता] Correction: ; नचासत्स (sic!)न चासत्ता

विचित्रकल्पनाभेदरचितेष्विव वासना॥
१०८६॥§ 3708

ततश्च वासनाभेदाद्भेदः सद्रूपतापि च।
प्रकल्प्यते ह्यपोहानां कल्पनारचितेष्विव॥
१०८७॥§ 3710

अवस्तुविषयं चेतो नास्तीत्येतदसिद्धम्। तथाहि—उत्पाद्यकत्वा(ल्प ?)विषयसमुद्भूतवस्त्वाकारसमारोपेण प्रवर्त्तत एव चेतः। तच्चानागतसजातीयविकल्पोत्पत्तयेऽनन्तरचेतसि वासनामाधत्त एव। यतः पुनरपि सन्तानपरिपाकवशात्प्रबोधकं प्रत्ययमासाद्य तथाविधमेव चेतः समुपजायते, तद्वदपोहानामपि परस्परतो भेदः सद्रूपता च कल्पनावशाद्भविष्यतीत्यनैकान्तिकता। अवयवार्थस्तु सुबोधत्वान्न विभक्तः॥ १०८६॥ १०८७॥
§ 3711

यच्चोक्तं भवद्भिः— शब्दभेदोऽपि तन्निमित्तो न लभ्यत इति, तत्राह— याद‍ृश इत्यादि। § 3712

याद‍ृशोऽर्थान्तरापोहो वाच्योऽयं प्रतिपादितः।
शब्दान्तरव्यपोहोऽपि ताद‍ृगेवावगम्यताम्॥
१०८८॥§ 3714

याद‍ृश इति। प्रतिबिम्बात्मा। तस्य च प्रतिबिम्बान्तराद्भेदः स्फुटतरमेव संवेद्यत इति। अतो विस्तरेण यदुक्तं तत्सर्वमसङ्गतमिति भावः॥ १०८८॥
§ 3715

न गम्यगमकत्वं स्यादित्यादिप्रयोगे प्रतिविधानमाह—वस्त्वित्यादि।
§ 3716

वस्त्वित्यध्यवसायत्वान्नावस्तुत्वमपोहयोः।
प्रसिद्धं सांवृते मार्गे तात्त्विके त्विष्टसाधनम्॥
१०८९॥§ 3718

यद्यवस्तुत्वादिति सामान्येनोपादीयते तदा हेतुरसिद्धः, यतः प्रतिबिम्बात्मनोर्वाच्यवाचकापोहयोर्बाह्यवस्तुत्वेन भ्रान्तैरध्यवसितत्वात्सांवृतं वस्तुत्वमस्त्येव॥ १०८९॥ § 3719

अथ पारमार्थिकमवस्तुत्वमाश्रित्य हेतुरभिधीयते तदा सिद्धसाध्यता। नहि परमार्थतोऽस्माभिः किंचिद्वाच्यं वाचकं चेष्यते। एतदेव दर्शयति—न वाच्यमित्यादि। § 3720

न वाच्यं वाचकं वापि परमार्थेन किञ्चन।
क्षणभङ्गिषु भावेषु व्यापकत्ववियोगतः॥
१०९० ॥§ 3722

338/k

व्यापकत्ववियोगत इति। क्षणिकत्वेन सङ्केतव्यवहाराप्तकालव्यापकत्वाभावात्स्वलक्षणस्येत्यर्थः। स्यादेतन्नास्माभिस्तात्त्विको वाच्यवाचकभावो निषिध्यते। किं तर्हि तात्त्विकीमपोहयोरवस्तुतामाश्रित्य सांवृतमेव गम्यगमकत्वं निषिध्यते, न भाविकम्, तेन न हेतोरसिद्धता नापि सिद्धसाध्यता प्रतिज्ञादोषो भविष्यति॥ १०९०॥ § 3723

द्वयोरपि सांवृतत्वे तात्त्विकत्वे चाश्रीयमाणे स्यादेतद्दोषद्वयमित्यत आह—तद्गम्यगमकत्वं चेत्यादि। § 3724

तद्गम्यगमकत्वं चेत्सांवृतं प्रतिषिध्यते।
तात्त्विकीं समुपाश्रित्य विनिवृत्त्योरवस्तुताम्॥
१०९१ ॥§ 3726

तथापि व्यभिचारित्वं दुर्वारमनुषज्यते।
विकल्परचितैरर्थैः शब्दैस्तद्वाचकैरपि॥
१०९२ ॥§ 3728

एवं सति हेतोरनैकान्तिकता, कल्पनारचितेषु महाश्वेतादिष्वर्थेषु तद्वाचकेषु च शब्देषु परमार्थतो वस्तुत्वाभावेऽपि सांवृतस्य वाच्यवाचकभावस्य दर्शनात्। तद्(?)र्शयति—विकल्परचितैरित्यादि॥ १०९१॥ १०९२॥ § 3729

स्यादेतत्—तत्रापि महाश्वेतादिषु सामान्यं वाच्यं वाचकं च परमार्थतोऽस्त्येव। ततो न तैर्व्यभिचार इत्याशङ्क्याह—न हीत्यादि। § 3730

न हि तेष्वस्ति सामान्यं वाच्यं तस्य च वाचकम्।
न वाचकत्वं शब्दस्य क्षणभङ्गि स्वलक्षणम्॥
१०९३ ॥§ 3732

सामान्यपरीक्षायां सामान्यस्य विस्तरेण निरस्तत्वान्न तेषु सामान्यं वाच्यं वाचकं चास्तीत्यनैकान्तिकता हेतोः। तस्येति। सामान्यस्य। वाचकमित्यत्रापि सामान्यमिति प्रकृतेन सम्बध्यते। स्यादेतद्यद्यपि तत्र वस्तुभूतं नास्ति वाच्यं, वाचकं तुमहाश्वेतादिशब्दस्वलक्षणमस्त्येवेत्यत आह—न वाचकत्वं शब्दस्येत्यादि। सर्वपदार्थव्यापिनः क्षणभङ्गस्य प्रतिपादितत्वान्न शब्दस्वलक्षणस्य वाचकत्वं, क्षणभङ्गित्वेन तस्य सङ्केतासम्भवात्। व्यवहारकालानन्वयाच्चेति प्रतिपादितम्॥ १०९३॥ § 3733

तस्मादित्यादिनोपसंहरति। § 3734

तस्मात्तद्द्वयमेष्टव्यं प्रतिबिम्बादि सांवृतम्।
तेषु तद्व्यभिचारित्वं दुर्निवारमवस्थितम्॥
१०९४॥§ 3736

द्वयमिति। वाच्यं वाचकं च। प्रतिबिम्बादीत्यादिशब्देन निराकारज्ञानाभ्युप गमेऽपि स्वगतमन्यत्किंचित्प्रतिनियतमनर्थेऽर्थाध्यवसायिरूपस्य 339/k विज्ञानस्यावश्यमङ्गीकर्त्तव्यमिति दर्शयति—तेष्विति। कल्पनोपरचितेष्वर्थेषु। तदिति। तस्मात्। तस्य वा हेतोर्व्यभिचारित्वम्॥ १०९४॥ § 3737

विधिरूपश्च शब्दार्थो येन नाभ्युपगम्यते इत्यत्राह—विधिरूपश्चेत्यादि। § 3738

विधिरूपश्च शब्दार्थो येन नाभ्युपगम्यते।
तदाभं जायते चेतः शब्दादर्थावसायि हि॥
१०९५॥§ 3740

स्वार्थाभिधाने शब्दानामर्थादन्यनिवर्त्तनम्।
तद्योगो व्यतिरेकोऽपि मम तत्पूर्वको ह्यसौ॥
१०९६॥§ 3742

न ह्यस्माभिः सर्वथा विधिरूपः शब्दार्थो नाभ्युपगम्यते, येनैतद्भवताऽनिष्टप्रसङ्गापादनं क्रियते। यावता शब्दादर्थाध्यवसायिनश्चेतसः समुत्पादात्सांवृतो विधिरूपः शब्दार्थोऽभीष्यत एव। तत्त्वतस्तु न किंचिद्वाच्यमस्ति शब्दानामिति विधिरूपस्तात्त्विको निषिध्यते। तेन सांवृतस्य विधिरूपस्य शब्दार्थस्येष्टत्वात्स्वार्थाभिधाने विधिरूपे सत्यन्यव्यतिरेकस्य सामर्थ्यादधिगतेर्विधिपूर्वको व्यतिरेको युज्यत एव॥ १०९५॥ ॥ १०९६॥ § 3743

स्यादेतद्यदि विधिरूपः शब्दार्थोऽभ्युपगम्यते, कथं तर्हि हेतुमुखे लक्षणकारेणासम्भवो विधेरित्युक्तमित्यत आह—असम्भव इत्यादि। § 3744

असम्भवो विधेरुक्तः सामान्यादेरसम्भवात्।
शब्दानां च विकल्पानां वस्तुनो विषयत्वतः॥
१०९७ ॥§ 3746

सामान्यलक्षणादेर्वाच्यस्य वाचकस्य च परमार्थतोऽसम्भवाच्छब्दानां विकल्पानां च वस्तुतः परमार्थतो विषयासम्भवात्परमार्थमाश्रित्य विधेरसम्भव उक्त आचार्येणेत्यविरोधः॥ १०९७॥ § 3747

अपोहमात्रवाच्यत्व मित्यादावाह—नीलोत्पलादीत्यादि। § 3748

नीलोत्पलादिशब्देभ्य एक एवावसीयते।
अनीलानुत्पलादिभ्यो व्यावृत्तं प्रतिबिम्बकम्॥
१०९८ ॥§ 3750

एकमेवानीलानुत्पलव्यावृत्तमर्थाकारमुभयरूपं प्रतिबिम्बकं नीलोत्पलशब्दो वदति नाभावमात्रम्, अतः सबलार्थाभिधायित्वमध्यवसायवशान्नीलोत्पलादिशब्दानामस्त्येवेति तदनुरोधात्सामानाधिकरण्यमुपपद्यत एव॥ १०९८॥ § 3751
340/k

यदुक्तम्— अथान्यापोहवद्वस्तु वाच्यमित्यभिधीयते इति अत्राह—नत्वन्यापोहवदित्यादि। § 3752

नत्वन्यापोहवद्वस्तु वाच्यमस्माभिरिष्यते।
व्यावृत्तादन्यतोऽभावान्नान्याद्व्यावृत्तिरस्ति नः॥
१०९९ ॥§ 3754

तत्पारतन्त्र्यदोषोयं जाताविव न संगतः।
अवदातमिति प्रोक्ते शब्दस्यार्थेऽपृथक्त्वतः॥
११०० ॥§ 3756

विशेषणविशेष्यत्वसामानाधिकरण्ययोः।
तस्मादपोहे शब्दार्थे व्यवस्था न विरुध्यते॥
११०१ ॥§ 3758

यदि हि व्यावृत्ताद्भावाद्यावृत्तिर्नामान्या भवेत्तदा स्यात्तद्वत्पक्षोदितदोषप्रसङ्गः,यावताऽन्यतो व्यावृत्ताद्भावान्नास्माकमन्या व्यावृत्तिरस्ति, अपि तु व्यावृत्त एव भावोभेदान्तरप्रतिक्षेपमात्रजिज्ञासायां तथाऽभिधीयते। तेन यथाजातौ प्राधान्येन वाच्यायां पारतन्त्र्येण तद्वतोऽभिधानात्तद्गतभेदानाक्षेपात्तेन सह सामानाधिकरण्यादेरभावप्रसङ्गः उक्तः, तद्वदपोहपक्षे नावतरति व्यतिरिक्तान्यापोहवतोऽनभिधानात्।तद्दर्शयति—तत्पारतन्त्र्यदोषोयमित्यादि। तदिति। तस्मात्। अवदातमिति प्रोक्त इति। विशुद्धधियाऽऽचार्यदिङ्ःागेन प्रोक्तेऽपोहलक्षणे शब्दार्थे। अत्र कारणमाह—अपृथक्त्वत इति। तस्यान्यापोहलक्षणस्य शब्दार्थस्याऽन्यापोढात्पदार्थादपृथक्त्वादव्यतिरेकादिति यावत्। विशेषणविशेष्येत्यादि। सुबोधम्॥ १०९९॥ ॥ ११००॥ ११०१॥ § 3759

यथा च न विरुध्यते सामानाधिकरण्यादि तथा दर्शयन्नाह—केवलादित्यादि। § 3760

केवलान्नीलशब्दादेर्विशिष्टं प्रतिबिम्बकम्।
कोकिलोत्पलभृङ्गादौ प्लवमानं प्रवर्त्तते॥
११०२ ॥§ 3762

पिकाञ्जनाद्यपोहेन विशिष्टविषयं पुनः।
तदिन्दीवरशब्देन स्थाप्यते परिनिश्चितम्॥
११०३ ॥§ 3764

सामानाधिकरण्यादिरेवमस्तिन्न बाधितः।
परपक्षे तु सर्वेषां तद्व्यवस्थातिदुर्घटा॥
११०४ ॥§ 3766

तथाहि—नीलमित्युक्ते पीतादिव्यावृत्तान्यपदार्थव्यवसायिभ्रमरकोकिलाञ्जनादिषु संशय्यमानरूपं विकल्पप्रतिबिम्बकमुदेति। तच्चोत्पलशब्देन कोकिलादिभ्यो व्यवच्छेद्यानुत्पलव्यावृत्तवस्तुविषये व्यवस्थाप्यमानं परिनिश्चितात्म- 341/k
कं प्रतीयते। तेन परस्परं यथोक्तबुद्धिप्रतिबिम्बकापेक्षया व्यवच्छेद्य-

व्यवच्छेदकभावान्नीलोत्पलशब्दयोर्विशेष्यविशेषणभावो न विरुध्यते। द्वाभ्यां वाऽनीलानुत्पलव्यावृत्तैकप्रतिबिम्बात्मकवस्तुप्रतिपादनादेकार्थवृत्तितया सामानाधिकरण्यं च भवतीति समुदायार्थः। अवयावार्थस्तूच्यते—प्लवमानमिति। अलभमानप्रतिष्ठं संशयरूपमिति यावत्। पिकशब्दः कोकिलपर्यायः। शेषं सुबोधम्। स्यादेतस्मत्पक्षेऽपि सामानाधिकरण्यादिरविरुद्ध एवेत्यत आह—परपक्षे त्वित्यादि। तद्व्यवस्थेति। तस्यसामानाधिकरण्यादेर्व्यवस्था तद्व्यवस्था॥ ११०२॥ ११०३॥ ११०४॥ § 3767

कथं दुर्घटेत्याह—तथाहीत्यादि। § 3768

तथाह्येकेन शब्देन सर्वथोक्तं स्वलक्षणम्।
तथाचाभिहिते तस्मिन्कस्माद्भेदान्तरेऽमतिः॥
११०५॥§ 3770

यदर्थमपरः शब्दः प्रयुज्येतात्र वस्तुतः।
सर्वथाऽभिहिते नो चेत्तदनेकं प्रसज्यते॥
११०६॥§ 3772

विधिशब्दार्थवादिपक्षे नीलादिशब्देनैवैकेनोत्पलादिस्वलक्षणेऽभिहिते किमुत्पलमाहोस्विदञ्जनमित्येवमज्ञानं विशेषान्तरे न प्राप्नोति, सर्वात्मना तस्य वस्तुनः प्रतिपादितत्वात्। एकस्यैकदेकप्रतिपत्रपेक्षया ज्ञाताज्ञातत्वविरोधात्। तद्दर्शयति—कस्माद्भेदात्रतेऽमतिरिति। अमतिरज्ञानम्। कुत्सिता सा मतिरमतिः। संशयो विपर्यासश्चेति यावत्। ततश्च संशयविपर्यासाभावादुत्पलादिशब्दान्तरप्रयोगाकाङ्क्षा प्रयोक्तुश्च न प्राप्नोतीति दर्शयति—यदर्थमित्यादि। यदर्थमिति। यस्या अमतेर्निवृत्त्यर्थमित्यर्थः। अथापि स्यात्—तद्वस्त्वेकदेशेनाभिहितं न सर्वात्मना, तेन स्वभावान्तरभिधानायापरः शब्दोऽन्वेष्यत एवेत्यत आह—सर्वथेत्यादि। न ह्येकस्य वस्तुन एकदेशाः सन्ति, येनैकदेशेनाभिधानं स्यात्, एकत्वानेकत्वयोः परस्परपरिहारस्थितलक्षणत्वात्। ततश्च यावन्तश्चैकदेशास्तावन्त्येव केवलं भवता वस्तूनि प्रतिपादितानीति नैकमनेकं सिध्येत्॥ ११०५॥ ११०६॥ § 3773

स्यादेतत्र नीलशब्देन द्रव्यमभिधीयते, किं तर्हि ? नीलाख्यो गुणस्तत्समवेता वानीलत्वजातिः,उत्पलशब्देनाप्युत्पलजातिरेवोच्यते, न द्रव्यं, तेन भिन्नार्थाभिधानादुत्पलशब्दान्तराकाङ्क्ष युज्यत एवेत्यत आह—नीलजातिरित्यादि। § 3774

342/k

नीलजातिर्गुणो वाऽपि नीलशब्देन चेद्गतः।
अन्येन्दीवरजातिस्तु व्यवसेयोत्पलश्रुतेः॥
११०७॥§ 3776

एवं सति तयोर्भेदाद्बकुलोत्पलशब्दवत्।
सामानाधिकरण्यादि सुतरां नोपपद्यते॥
११०८॥§ 3778

अन्येन्दीवरजातिस्त्विति। अन्या चासाविन्दीवरजातिश्चेति समासः। व्यवसेयेति। व्यवसातव्या। उत्पलश्रुतेरिति पञ्चम्यन्तम्। अस्मिन्पक्षे सुतरामेव सामानाधिकरण्यमनुपपन्नं बकुलोत्पलशब्दयोरिवैकस्मिन्नर्थे नीलोत्पलशब्दयोर्वृत्त्यभावात्। नहि भवति बकुलमुत्पलमिति॥ ११०७॥ ११०८॥ § 3779

स्यादेतत्—नीलशब्दो यद्यपि जातिगुणविशेषवचनः, तथापि तद्द्वारेण नीलगुणतज्जातिभ्यां संबद्धं द्रव्यमपि तेनाभिधीयते तथोत्पलशब्देनापि जातिद्वारेण तदेव द्रव्यमभिधीयत इति। अतस्तयोरेकार्थवृत्तिसम्भवात्सामानाधिकरण्यं भविष्यति, न बकुलोत्पलशब्दयोरित्यत आह—गुणतज्जातीत्यादि। § 3780

गुणतज्जातिसम्बद्धं द्रव्यं चेत्प्रतिपाद्यते।
नीलशब्देन यद्येवं व्यर्था स्यादुत्पलश्रुतिः॥
११०९॥§ 3782

ताभ्यां यदेव सम्बद्धं तदेवोत्पलजातिमत्।
नीलश्रुत्यैव तत्रोक्तं व्यर्था नीलोत्पलश्रुतिः॥
१११०॥§ 3784

गुणश्च नीलाख्यः, तज्जातिश्च नीलत्वाख्येति गुणतज्जाती, ताभ्यां सम्बद्धमिति विग्रहः। व्यर्था स्यादुत्पलश्रुतिरिति। नीलशब्देनैव तस्य द्रव्यस्य प्रतिपादितत्वात्। एतदेव दर्शयति—ताभ्यामित्यादि। ताभ्यामिति। गुणतज्जातिभ्याम्। स्यादेतत्—यद्यपि नीलशब्देन गुणतज्जातिमद्द्रव्यमभिधीयते, तथापि तस्य नीलशब्दस्यानेकार्थवृत्तिदर्शनात्प्रतिपत्तुरुत्पलार्थे निश्चितरूपा न बुद्धिरुपजायते, कोकिलादेरपि नीलत्वात्। अतोऽर्थान्तरसंशयव्यवच्छेदादुत्पलश्रुतेः प्रयोगः सार्थक एवेति। तदसम्यक् प्रकृतार्थान-

भिन्नतयाऽभिधानात्। विधिशब्दार्थपक्षे हि सामानाधिकरण्यादि नोपपद्यत इत्येतदत्र प्रकृतम्। यदि चोत्पलशब्दः संशयव्यवच्छेदायैव व्याप्रियते न द्रव्यप्रतिपत्तये, न तर्हि विधिः शब्दार्थः स्यात्, उत्पलशब्देन भ्रान्तिसमारोपिताकारव्यवच्छेदमात्रस्यैव प्रतिपादनात्। परस्परविरुद्धं चेदमभिधीयते —नीलशब्देनोत्पलादिकं द्रव्यमभिधीयते, अथ च प्रतिपत्तुस्तत्र निश्चयो न
343/k जायत इति। नहि यत्र संशयो जायते स शब्दार्थो युक्तोऽतिप्रसङ्गात्। नापि निश्चयेन विषयीकृते वस्तुनि संशयोऽवकाशं लभते। निश्चयारोपमनसोर्बाध्यबाधकभावात्।स्यादेतत्—यद्यपि नीलोत्पलशब्दयोरेकस्मिन्नर्थे वृत्तिर्नास्ति, तदर्थयोस्तु गुणजात्योरेकस्मिन्द्रव्ये वृत्तिरस्तीति। अतोऽर्थद्वारकमनयोः सामानाधिकरण्यं भविष्यतीति तदेतदयुक्तमतिप्रसङ्गात्। एवं हि रूपरसशब्दयोरपि सामानाधिकरण्यं स्यात्, तदर्थयो रूपरसयोरेकस्मिन्पृथिव्यादिद्रव्ये वृत्तेः। किं च नीलमुत्पलमित्येकार्थविषया बुद्धिर्न प्राप्नोति, एकद्रव्यसमवेतयोर्गुणजात्योर्द्वाभ्यां पृथक्पृथगभिधानात्, न चैकार्थविषयज्ञानानुत्पादे शब्दयोः सामानाधिकरण्यमस्तीत्यलं बहुना॥ ११०९॥ ॥ १११०॥ § 3785

स्यादेतत्—न यदेव नीलगुणतज्जातिभ्यां सम्बद्धं वस्तु तदेवोत्पलशब्देनोच्यते, किं तर्हि ? अन्यदेव, तेनोत्पलश्रुतिर्व्यर्था न भविष्यतीत्यत आह—गुणतज्जातिसम्बद्धादित्यादि। § 3786

गुणतज्जातिसम्बद्धादन्यदुत्पलजातिमत्।
यदि भिन्नाश्रये स्यातां पुनर्नीलोत्पलश्रुती॥
१११९ ॥§ 3788

यदीत्यवच्छेदः। भिन्नाश्रये स्यातामिति। व्यधिकरणे स्यातामित्यर्थः ११११॥ § 3789

अथापि स्यात्—यद्यपि तदेव द्रव्यं नीलशब्देनोच्यते, उत्पलशब्देनापि तदेव। तथापि नीलशब्दो नोत्पलजातिसम्बन्धिरूपेण द्रव्यमभिधत्ते, किं तर्हि ? नीलगुणतज्जातिसम्बन्धिरूपेणैव, तेनोत्पलत्वजातिसम्बन्धिरूपत्वमस्याभिधातुमुत्पलश्रुतिः प्रवर्त्तमाना नानार्थिका भविष्यतीति तदेतदाशङ्क्य परिहरति—अथोत्पलत्वेत्यादि। § 3790

अथोत्पलत्वसम्बन्धिरूपत्वेन न चोदयेत्।
गुणतज्जातिसम्बद्धं द्रव्यं नीलमिति ध्वनिः॥
१११२ ॥§ 3792

अथ नीलमिति ध्वनिरुत्पलत्वसम्बन्धिरूपत्वेन गुणतज्जातिसम्बद्धं द्रव्यं न चोदयेदिति सम्बन्धः॥ १११२॥ § 3793

स्यान्नामोत्पलतायोगिरूपत्वमतदात्मकम्।
उत्पलत्वेन सम्बद्धं त्वाभ्यां सम्बद्धमेव तत्॥
११११३॥ § 3795

नीलश्रुत्या च तत्प्रोक्तं शाब्द्यात्र विषयीकृतम्।
बुद्ध्या सर्वात्मना नांशोस्तदनर्थोत्पलश्रुतिः॥
११११४॥ § 3797

344/k

तदेतदसम्यक्। नहि नीलगुणतज्ञातिसम्बन्धिरूपत्वादन्यदेवोत्पलजातिसम्बन्धिरूपत्वम्, येन नीलोत्पलादिसम्बन्धिरूपत्वाभिधाने द्रव्यस्योत्पलत्वजातिसम्बन्धिरूपत्वाभिधानं न भवेत्। यावतैकस्माद्द्रव्याद्द्वयोरपि सम्बन्धिरूपत्वयोरव्यतिरेकात्तद्द्वत्तयोरप्येकत्वमेवेत्ययुक्तमेकरूपाभिधानेऽपररूपानभिधानम्। किंचाभ्युपगम्योच्यते— भवतु नामोत्पलत्वसम्बन्धिरूपत्वं नीलतज्ञातिसम्बन्धिरूपत्वादन्यत्, तथाप्युत्पलश्रुतिरनर्थकैव। तथाहि—यत्तदनंशं वस्तूत्पलजात्या सम्बद्धं तदेवाभ्यां नीलगुणतज्ञातिभ्यां सम्बध्यते नान्यत्। तच्चानंशत्वात्सर्वात्मना नीलश्रुत्यैवाभिहितं शाब्द्या च बुद्ध्या व्यवसायात्मिकया विषयीकृतमिति किमपरमनभिहितमस्य स्वरूपमस्ति यदभिधानायोत्पलश्रुतिः सार्थिका भवेत्॥ ११११३॥ ११११४॥ § 3798

उद्योतकरस्त्वाह—निरंशे वस्तुनि सर्वात्मना विषयीकृतं नांशेनेत्येष विकल्पो नावतरति, सर्वशब्दस्यानेकार्थविषयत्वात्, एकशब्दस्य चावयववृत्तित्वादिति। तदेतदाशङ्क्य परिहरति—नचेदित्यादि। § 3799

न चेद्भेदविनिर्मुक्ते कात्स्न्र्यभेदविकल्पनम्।
न वाक्यार्थापरिज्ञानादिदं ह्यत्र विवक्षितम्॥
११११५॥ § 3801

प्रथमेनैव शब्देन सर्वथा तत्प्रकाशितम्।
नात्मा कश्चित्परित्यक्तो यादृशं तत्तथोदितम्॥
११११६॥ § 3803

भेदविनिर्मुक्तं इति। निरवयवे वस्तुनीत्यर्थः। कात्स्न्र्यभेदविकल्पनमिति। सर्वात्मना विषयीकृतं वैकदेशेनेत्येवं कात्स्न्र्यभेदाभ्यां विकल्पनम्।

तदेतद्वाक्यार्थापरिज्ञानादुक्तम्। तथाहि—प्रथमेनैव नीलशब्देन सर्वात्मना तत्प्रकाशितमित्यस्यायमर्थो विवक्षितः, यादृशं तद्वस्तु तादृशमेवाभिहितं, न तस्य कश्चित्स्वभावस्त्यक्तोयदभिधानायोत्पलश्रुतिर्व्याप्रियेत, निरंशत्वात्तस्य वस्तुन इत्यतो वाक्छलमेतत् ॥ १११५॥ १११६॥ § 3804

एवं यथाचोत्पलश्रुतिरनर्थिका तथान्येषामप्यनित्यादिशब्दानां प्रयोगोऽनर्थकः प्राप्नोति, सति प्रयोगे पर्यायत्वमेव स्यात्तरुपादपादिशब्दवदित्यतिदेशं कुर्वन्नाह—एतेनैवेत्यादि। § 3805

एतेनैव प्रकारेण नान्येषामप्युदीरणम्।
सफलं तत्र शब्दानामुक्तौ पर्यायता ध्रुवम्॥
१११७ ॥§ 3807

345/k

उदीरणमिति। प्रयोगः। उक्ताविति। उच्चारणे। तदुक्तम्— अन्यथैकेन शब्देन व्याप्त एकत्र वस्तुनि। बुद्ध्या वा नान्यविषय इति पर्यायता भवेदिति॥ १११७॥ § 3808

स्यादेतत्—भवत्पक्षेऽप्येकेन शब्देनाभिहिते वस्तुनि भेदान्तरे संशयविपर्यासाभावप्रसङ्गः, शब्दान्तराप्रवृत्तिप्रसङ्गश्च कस्मान्न भवतीत्यत आह—अस्माकं त्वित्यादि। § 3809

अस्माकं तु न शब्देन बाह्यार्थः प्रतिपाद्यते।
शब्दान्न चापि विज्ञानं बाह्यार्थविषयं मतम्॥
१११८ ॥§ 3811

यतः सर्वात्मना ताभ्यां विषयीतकरणात्परम्।
शब्दज्ञानान्तरं तत्र पर्यायत्वं प्रयास्यति॥
१११९ ॥§ 3813

ताभ्यामिति। शब्दज्ञानाभ्याम्। परमिति। उत्तरकालम्॥ १११८॥ १११९॥ § 3814

अथ सांवृते शब्दार्थे कस्मादेव सामानाधिकरण्याभावो दोषो न भवतीत्यत आह —प्रतिबिम्बं त्वित्यादि। § 3815

प्रतिबिम्बं तु शब्देन क्रमेणैवोपजन्यते।
एकत्वेन च तद्भाति बाह्यत्वेन च विभ्रमात्॥
११२० ॥§ 3817

सामानाधिकरण्यादि प्रतिबिम्बानुरोधतः।
परमार्थेन शब्दास्तु मता निर्विषया इमे॥
११२१ ॥§ 3819

नीलशब्देन हि प्रथमतरमनीलपदार्थव्यावृत्तमुत्पलादिषु प्लवमानरूपतया तेषामप्रतिक्षेपकमध्यवसितबाह्यरूपं विकल्पप्रतिबिम्बकमुपजन्यते, पुनरुत्पलश्रुत्या तदेवानुत्पलव्यावृत्तमारोपितबाह्यैकवस्तुस्वरूपमुपजन्यते, तदेवं क्रमेणानीलानुत्पलव्यावृत्तमध्यवसितबह्यैकरूपं भ्रान्तं विकल्पप्रतिबिम्बकमुपजन्यत इति तदनुरोधात्सांवृतं सामानाधिकरण्यादि युज्यत एव। परमार्थस्तु कस्मान्न युज्यत इत्याह —परमार्थेनेत्यादि॥ ११२०॥ ११२१॥ § 3820

यदुक्तं— लिङ्गसङ्ख्यादिसम्बन्धो न चापोहस्य विद्यत इति, अत्राह— लिङ्गसङ्ख्यायादीत्यादि। § 3821

लिङ्गसङ्ख्यादियोगस्तु व्यक्तीनामपि नास्त्ययम्।
इच्छारचितसङ्केतनिमित्तो नहि वास्तवः॥
११२२ ॥§ 3823

वस्तुधर्मत्वमेषां लिङ्गसङ्ख्यादीनामसिद्धम्। स्वतन्त्रेच्छाविरचितसङ्केतमात्रभा वित्वात्। व्यक्तीनामपीत्यपिशब्दादपोहस्यापि। प्रयोगः—यो यदन्वयव्य- 346/k तिरेकौनानुविधत्ते, नासौ तद्धर्मः, यथा शीतत्वमग्नेः, नानुविधत्ते च लिङ्गसङ्ख्यादि वस्तुतोऽन्वयव्यतिरेकाविति व्यापकानुपलब्धिः॥ ११२२॥ § 3824

नचायमसिद्धो हेतुरिति दर्शयन्नाह—तटस्तटीत्यादि। § 3825

तटस्तटी तटं चेति नैरूप्यं न च वस्तुनः।
शबलाभासताप्राप्तेः सर्वेषां तत्र चेतसाम्॥
११२३ ॥§ 3827

यदि हि लिङ्गं वस्तुगमो धर्मः स्यात्, तदेकस्मिंस्तटाख्ये वस्तुनि तटस्तटी तटमिति लिङ्गत्रययोगिशब्दप्रवृत्तेरेकस्य वस्तुनस्त्रैरूप्यप्रसङ्गः स्यात्। नचैकस्य स्त्रीपुन्नपुंसकाख्यं स्वभावत्रयं युक्तमेकत्वहानिप्रसङ्गत्। विरुद्धधर्माध्यासितस्याप्येकत्वे सर्वं विश्वमेकमेव वस्तु स्यात्। ततश्च स-

होत्पत्तिविनाशप्रसङ्ग। किंच—सर्वस्यैवैकशब्देन शब्दान्तरेण वा लिङ्गत्रयप्रतिपत्तिदर्शनात्तद्विषयाणां सर्वचेतसां मेचकादिरत्नवच्छबलाभासताप्रसङ्ग॥ ११२३॥ § 3828

अथापि स्यात्—सत्यपि लिङ्गत्रययोगित्वे सर्ववस्तूनां यदेव रूपं वक्तुमिष्टं प्रतिपादकेन तन्मात्रावभासान्येव विवक्षावशाच्चेतांसि भविष्यन्तीति न शबलाभासानीत्यत आह—विवक्षानुगतत्वे वेत्यादि। § 3829

विवक्षानुगतत्वे वा न स्युस्तद्विषयाणि ते।
तद्वशादेकरूपाणि नैकरूपं च वस्तु तत्॥
११२४॥§ 3831

विवक्षानुगतत्वे वा चेतसामिति शेषः। यदि हि विवक्षावशादेकरूपाणि चेतांसि भवन्तीत्यङ्गीक्रियते, तदा तानि चेतांसि त्र्यात्मकवस्तुविषयाणि न प्राप्नुवन्ति, तदाकारशून्यत्वात्, चक्षुर्विज्ञानवच्छब्दविषयम्। तद्वशादिति। विवक्षावशात्॥ ११२४॥ § 3832

योऽपि मन्यते संस्त्यानप्रसवस्थितिषु यथोक्तस्त्रीपुत्रपुंसकत्वव्यवस्थेति, तस्यापि न युक्तमित्यादर्शयन्नाह—स्थितीत्यादि। § 3833

स्थितिप्रसवसंस्त्यानसंश्रया लिङ्गसंस्थितिः।
यदि स्यादविभागेन विलिङ्गत्वं प्रसज्यते॥
११२५॥§ 3835

लिङ्गसंस्थितिर्यदि स्यादित्यत्र छेदः। यदि हि स्थित्याद्याश्रया लिङ्गास्थितिर्लिङ्गव्यवस्था, तदा तटशृङ्खलादिवत्सर्वपदार्थेष्वविभागेन त्रीणि लिङ्गानि प्राप्नुवन्ति, सर्वत्र तटादिवत्स्थित्यादेर्विद्यमानत्वात्। अन्यथा तटस्तटीतटमित्यादावपि लिङ्गत्रयं नस्यात्, विशेषाभावात्। तस्मादतिव्यापिता लक्षणदोषः॥ ११२५॥ § 3836

347/k

व्यभिचारदर्शनाच्चाव्यापितेति दर्शयन्नाह—अभाव इत्यादि। § 3837

अभावो निरुपाख्यत्वं तुच्छतेति यदुच्यते।
तत्र स्थित्यादिसम्बन्धः कोऽसत्सु परिकल्प्यते॥
११२६॥§ 3839

असत्यपि हि स्थित्यादिके शशविषाणादिष्वसद्रूपेष्वभावो निरुपाख्यत्वं तुच्छतेत्यादिभिः शब्दैर्लिङ्गत्रयप्रतिपत्तिदर्शनादव्यापिनीयं लिङ्गव्यवस्था॥ ११२६॥ § 3840

उत्पादः प्रसवश्चैषां नाशः संस्त्यानमिष्यते।
आत्मरूपं तु भावानां स्थितिरित्यभिधीयते॥
११२७॥ § 3842

तत्रोत्पादे न नाशोऽस्ति तत्किमुत्पत्तिरुच्यते।
नात्माकारा स्थितिश्चास्ति तत्कथं जन्म गीयते॥
११२८॥ § 3844

संस्त्याने न द्वयं चान्यत्तत्कथं व्यपदिश्यते।
तिरोभावश्च नाशश्च तिरोभवनमित्यपि॥
११२९॥ § 3846

स्थितौ स्थितिः स्वभावश्च हेतुना केन वोच्यते।
अथाविभक्तमेवैषां रूपं स्यादेकलिङ्गता॥
११३०॥ § 3848

इतश्चाव्यापिनी, तेष्वेव स्थित्यादिषु प्रत्येकं लिङ्गत्रययोगिशब्दप्रवृत्तिदर्शनात्। तथाहि प्रसव उत्पाद उच्यते संस्त्यानं विनाशः आत्मस्वरूपं तु स्थितिः। तत्र प्रसवे स्थितिसंस्त्यानयोरभावात्कथमुत्पादे उत्पत्तिर्जन्मेत्यादेः स्त्रीनपुंसकलिङ्गस्य प्रवृत्तिर्भवेत्। तथा संस्त्याने स्थितिप्रसवयोरभावात्कथं तिरोभावो विनाशस्तिरोभवनमित्यादिभिः शब्दैर्व्यपदिश्येत। अपिशब्देन संस्त्यानमित्यपि स्वशब्देन कथं व्यपदिश्यत इति दर्शयति। तथा स्थितौ संस्त्यानप्रसवयोरसम्भवात् स्थितिस्वभावश्चेत्यादिभिः शब्दैः सा स्थितिः केन हेतुनोच्यत इति वाच्यम्। अथापि स्यादेषां स्थित्यादीनांपरस्परमविभक्तरूपत्वात्प्रत्येकमेषु लिङ्गत्रययोग्यता भविष्यतीत्यत आह—अथाविभक्तमित्यादि। यदि ह्येषां परस्परमविभक्तं रूपं स्यात्तदेकमेव परमार्थतो लिङ्गं स्यान्न लिङ्गत्रयम्॥ ११२७॥ ११२८॥ ११२९॥ ११३०॥ § 3849

अन्यस्त्वाह—सामान्यविशेषाः स्त्रीत्वादयो गोत्वादय इवेति, तं प्रत्याह—गोत्वादय इवेत्यादि। § 3850

गोत्वादय इवैतेऽपि यदि स्त्रीत्वादयो मताः।

सामान्यस्य निरासेन तेऽपास्ता एव तादृशाः॥
११३१॥§ 3852

348/k

पूर्वं सामान्यपरीक्षायां सामान्यविशेषाणां निरस्तत्वात्, तद्रु(?)पाणां स्त्रीत्वादीनामसम्भवादसम्भविलक्षणम्॥ ११३१॥ § 3853

किंच तेष्वेव सामान्यविशेषेष्वन्तरेणाप्यपरं सामान्यविशेषं जातिर्भावः सामान्यमित्यादि स्त्रीपुन्नपुंसकलिङ्गस्य शब्दस्य प्रवृत्तिदर्शनादव्यापिता च लक्षणस्येति दर्शयति—जातिर्भाव इत्यादि। § 3854

जातिर्भावश्च सामान्यमिति वा तेषु संमतम्।
न सामान्यानि युज्यन्ते सामान्येष्वपराणि हि॥
११३२॥§ 3856

न सामान्यानि युज्यन्ते सामान्येष्वपराणीति। निःसामान्यानि सामान्यानीति सिद्धान्तात्। एतच्च वैशेषिकसिद्धान्ताश्रयेणोक्तम्। यदा तु सामान्येष्वपराणि सामान्यानीष्यन्ते वैयाकरणैः, यथोक्तम्— अर्थजात्यभिधानेऽपि सर्वे जात्यभिधायिनः। व्यापारलक्षणा यस्मात्पदार्थाः समवस्थिताः॥ नहि शास्त्रान्तरपरिदृष्टा जातिव्यवस्था नियोगतो वैयाकरणैरभ्युपेतव्या। प्रत्ययाभिधानान्वयव्यापारकार्योन्नीयमानरूपा हि जातयो नहि तासामियत्ता काचित्। अतो यत्रोदितकार्यदर्शनात् सामान्याधारा जातिः सती जातय इत्यस्याः श्रुतेर्निबन्धनमिति। व्यापारलक्षणा इति अभिधानप्रत्ययव्यापारतो व्यवस्थितलक्षणा इत्यर्थः। तदानन्तरोक्तमेव दूषणंसामान्यस्य निरासेन तेऽपास्ता एव तादृशा इति॥ ११३२॥ § 3857

इदं च साधारणं दूषणमाह—अभाव इत्यादि। § 3858

अभावो निरुपाख्यत्वं तुच्छतेत्यादि वा कथम्।
सामायिक्येव तेनैषा लिङ्गत्रितयसंस्थितिः॥
११३३॥§ 3860

नह्यसत्सु शशविषाणादिषु जातिरस्ति, वस्तुधर्मत्वात्तस्येत्यतस्तेष्वभावादिशब्दप्रयोगो न प्राप्नोति। तस्मादव्यापिनी लिङ्गव्यवस्था। तेनेच्छारचितसङ्केतमात्रभाविन्येवेयं लिङ्गत्रितयव्यवस्थेति सिद्धम्॥ ११३३॥ § 3861

सङ्ख्याय अपि वस्तुगतान्वयव्यतिरेकानुविधानाभावं दर्शयन्नाह—सङ्ख्यापीत्यादि। § 3862

सङ्ख्याऽपि सामायिक्येव कल्प्यते हि विवक्षया।
भेदाभेदविवेकेपि दारादिविपिनादिवत्॥
११३४॥§ 3864

सङ्ख्यापि सामायिक्येव, न वास्तवी। दारादिष्वसत्यपि वास्तवे भेदे विवक्षावशे नोपकल्पितत्वात्। अतो नासिद्धो हेतुः। तथाहि—बहुत्वैकत्वादिसङ्ख्या 349/k न वस्तुगतभेदाभेदलक्षणा, दाराः सिकता वर्षा इत्यादावसत्यपि वस्तुतो भेदे बहुत्वसङ्ख्या परिवर्त्तते। तथा वनं त्रिभुवनं जगत् षण्णगरीत्यादिष्वसत्यभेदेऽर्थस्यैकत्वसङ्ख्या व्यपदिश्यत इति। अतो नासिद्धता हेतोः। नाप्यनैकान्तिकः सर्वस्य सर्वधर्मत्वप्रसङ्गात्। सपक्षे भावाच्च न विरुद्धः॥ ११३४॥
§ 3865

नन्वित्यादिना कुमारिलमतेन हेतोरसिद्धतामाशङ्कते। § 3866

ननु व्यक्तौ च जातौ च दारादिश्चेत्प्रयुज्यते।
व्यक्तेरवयवानां वा संख्यामादाय वर्त्तते॥
११३५॥§ 3868

वनशब्दः पुनर्व्यक्तीर्जातिसङ्ख्याविशेषिताः।
बह्वीराहाथवा जातिं बहुव्यक्तिसमाश्रिताम्॥
११३६॥§ 3870

सह्याह—दारादिशब्दः कदाचिज्जातौ प्रसज्यते कदाचिद्व्यक्तौ। तत्र यदा जातौ तदा व्यक्तिगतां सङ्ख्यामादाय वर्त्तते, व्यक्तयश्च बह्व्यो योषितः, यदा व्यक्तौप्रयुज्यते तदा तद्व्यक्त्यवयवानां पाणिपादादीनां बहुत्वसङ्ख्यामादाय वर्त्तते। वनशब्देन त्वाम्रखदिरपलाशादिविलक्षणव्यक्तयस्तत्समवेतवृक्षत्वजातिगतसङ्ख्याविशिष्टाः प्रतिपाद्यन्ते, तेन वनमित्येकवचनं भवति। जातिगतैकसङ्ख्याविशिष्टद्रव्याभिधानात्। अथवा—धवादिव्यक्तिसमाश्रिता जातिरेव वनशब्देनोच्यते, तेनैकवचनं भवति,जातेरेकत्वादिति॥ ११३५॥ ११३६॥ § 3871
नन्वित्यादिना प्रतिविधत्ते। § 3872

ननु चैतेन विधिना सर्वमेकं वचो हतम्।
नान्यत्रास्ति विवक्षा चेत्सैवास्त्वस्य निबन्धनम्॥
११३७॥§ 3874

एतेन यथोक्तेन विधिना सर्वं—वृक्ष इत्याद्येकवचनं—हतम्—उत्सन्नं स्यात्, सर्वत्रैवास्य न्यायस्य तुल्यत्वात्। तथा ह्यत्रापि शक्यमेवं वक्तुम्—तत्र

व्यक्तौ च जातौ च वृक्षादिश्चेत्प्रयुज्यत इत्यादि। अथ मतम्—अन्यत्र—वृक्षादौ, व्यक्तेरवयवानां च सङ्ख्याविवक्षा नास्तीति, यद्येवं न तर्हि वस्तुगतान्वयाद्यनुविधायिनीसङ्ख्या, विवक्षाया एवान्वयव्यतिरेकानुविधानात्। ततश्च सैव विवक्षा दारा इत्यादिष्वस्य बहुवचनस्य निबन्धनमस्तु भेदाभावेप्येकमपि वस्तु बहुत्वेन विवक्ष्यच इत्यतो नासिद्धता हेतोः॥ ११३७॥ § 3875

350/k

यच्चोक्तं वनशब्दो जातिसङ्ख्याविशेषिता व्यक्तिराहेति, तत्राह—जातेरित्यादि। § 3876

जातेरपि न सङ्ख्याऽस्ति भावे वा तद्विशेषिताः।
कथं सम्बद्धसम्बन्धाद्यदि सम्बन्धतोऽपि वा॥
११३८॥§ 3878

नहि जातेः सङ्ख्यास्ति, द्रव्यसमाश्रितत्वात्तस्याः। अथेयं वैशेषिकप्रक्रिया नाश्रीयते, तदा भावे वा सङ्ख्यायास्तया कथं वा धवादिव्यक्तयो विशेषिताः सिद्ध्यन्ति। स्यादेतत्—सम्बन्धसम्बन्धात्तत्सम्बन्धाद्वा सिद्ध्यन्ति। तथाहि—यदा जातेर्व्यतिरेकिणी सङ्ख्या तदेकत्वसङ्ख्यासम्बद्धया जात्या धवादिव्यक्तीनां सम्बन्धात्पारम्पर्येण तया धवादिव्यक्तयो विशेष्यन्ते, यदा तु जातेरव्यतिरिक्तैव सङ्ख्या तदा साक्षादेव सम्बन्धात्तया विशेष्यन्त इत्यतो जातिसङ्ख्याविशेषिताः सिध्यन्ति॥ ११३८॥ § 3879

यद्येवमित्यादिना प्रतिविधत्ते। § 3880

यद्येवमभिधीयेत वनमेकोऽपि पादपः।
बहवोऽपि हि कथ्यन्ते सम्बन्धादेव सोऽस्ति च॥
११३९॥§ 3882

यदि सम्बन्धसम्बन्धात्सम्बन्धतो वा धवादिव्यक्तिषु वनशब्दस्य प्रवृत्तिस्तदैकोऽपि पादपो वनमित्येवमुच्येत, प्रवृत्तिनिमित्तस्य विद्यमानत्वात्। तथाहि—बहवोऽपि धवादयो जातिसङ्ख्यासम्बन्धादेव वनमित्युच्यन्ते नान्यतः, स च सम्बन्धएकस्मिन्नपि पादपेऽस्तीति किमिति न तथोच्येत॥ ११३९॥ § 3883

अथवा जातिं बहुव्यक्तिसमाश्रितामित्यत्राह—बहुव्यक्त्याश्रितेत्यादि। § 3884

बहुव्यक्त्याश्रिता या च सैवैकस्यामपि स्थिता।

तन्निमित्तस्य तुल्यत्वात्तत्रापि वनधीर्भवेत्॥
११४० ॥§ 3886

अस्मिन्नपि हि पक्षे एकस्यापि तरोर्वनमित्यभिधानं स्यात्। तथाहि—येनासौ वनशब्देन जातिर्बहुव्यक्त्याश्रिताऽभिधीयते। सैवैकस्यामपि धवादिव्यक्तौ व्यवस्थिता, ततश्च तस्या वनधियो निमित्तस्य सर्वत्र तुल्यत्वात्तत्रैकत्रापि पादपे किमिति वनधीर्न भवेत्॥ ११४०॥ § 3887

अन्वयव्यतिरेकाभ्यामित्यादिना हेतुत्वमुपसंहरति। § 3888

अन्वयव्यतिरेकाभ्यामेकादिवचसस्ततः।
नियमोऽयं विवक्षातो नार्थात्तद्व्यभिचारतः॥
११४१ ॥§ 3890

तद्व्यभिचारत इति। तस्यार्थस्य व्यभिचारात्॥ ११४१॥ § 3891

351/k

लिङ्गसङ्ख्यादिसम्बन्धो न चापोहस्य विद्यत इत्यत्रादिग्रहणेन यः क्रियाकालादिसम्बन्धो निर्दिष्टस्तत्राह—क्रियेत्यादि। § 3892

क्रियाकालादियोगोऽपि पूर्वमेव निराकृतः।
तस्मात्साङ्केतिका एते न व्यक्तिष्वपि भाविनः॥
११४२ ॥§ 3894

पूर्वमेव कर्मकालादिपदार्थनिषेधे क्रियादियोगस्य निराकृतत्वादयुक्तमेषामपि वस्तुधर्मत्वम्। सङ्केते भवाः साङ्केतिकाः॥ ११४२॥ § 3895

भवतु वा वस्तुधर्मत्वमेषाम्, तथापि प्रतिबिम्बलक्षणस्यापोहस्य भ्रान्तैर्बाह्यव्यक्तिरूपत्वेनावसितत्वादध्यवसायवशाद्व्यक्तिद्वारको लिङ्गसङ्ख्यादिसम्बन्धो भविष्यति, तेन, यदुक्तम्— व्यक्तेश्चाव्यपदेशत्वात्तद्वारेणापि सास्त्यसौ इति तदनैकान्तिकं संवृतिपक्षे चासिद्धमिति दर्शयति—व्यक्तिरूपावसायेनेत्यादि। § 3896

व्यक्तिरूपावसायेन यदि वाऽपोह उच्यते।
तल्लिङ्गाद्यभिसम्बन्धो व्यक्तिद्वारोऽस्य विद्यते॥
११४३ ॥§ 3898

अपोह उच्यत इति। शब्देनेति शेषः। तदिति। तस्मात्। अस्येति। अपोहस्य॥ ११४३॥ § 3899

आख्यातेषु न चान्यस्येत्यादावाह—अभिप्रेते निवेशार्थमित्यादि। § 3900

अभिप्रेते निवेशार्थं बुद्धेः शब्दः प्रयुज्यते।
अनभीष्टव्युदासोऽतः सामर्थ्येनैव सिद्ध्यति॥
११४४॥§ 3902

आख्यातेष्वन्यनिवृत्तिर्न संप्रतीयत इत्यसिद्धम्—तथाहि—जिज्ञासिते कस्मिंश्चिदर्थे श्रोतुर्बुद्धेर्निवेशाय शब्दः प्रयुज्यते व्यवहर्तृभिर्न व्यसनितया, तेनाभीष्टार्थप्रतिपत्तौ सामर्थ्यादनभीष्टव्यवच्छेदः प्रतीयत एव। अभीष्टानभीष्टयोरन्योन्यव्यवच्छेदरूपत्वात्॥ ११४४॥ § 3903

सर्वमेवाभीष्टमिति चेदाह—सर्वमेवेत्यादि। § 3904

सर्वमेव नचाभीष्टं सर्वार्थानियमाप्तितः।
तत्पचत्यादिशब्दानां विनिवर्त्त्यं परिस्फुटम्॥
११४५॥§ 3906

यदि सर्वमेवाभीष्टं स्यात्तदा प्रतिनियतः शब्दार्थो न प्राप्नोति, ततश्च या कस्यचिदर्थपरिहारेण श्रोतुः क्वचिदर्थे शब्दात्प्रवृत्तिः सा न प्राप्नोति, तस्मात्सर्वमेवाभीष्टमित्येतदयुक्तम्। तस्मात् पचतीत्यादिशब्दानामनभीष्टव्यवच्छेदः सामर्थ्यात्— तत्स्फुटतरमवगम्यत एव॥ ११४५॥ § 3907
352/k

तथाहीत्यादिना तमेव सामर्थ्यगम्यमनभीष्टव्यवच्छेदं दर्शयति। § 3908

तथाहि पचतीत्युक्ते नोदासीनोऽवतिष्ठते।
भुङ्क्ते दीव्यति वा नेति गम्यतेऽन्यनिवर्त्तनम्॥
११४६॥§ 3910

औदासीन्यमतश्चैवमस्त्यन्यच्च क्रियान्तरम्।
पर्युदासात्मकापोह्यं नियतं यद्यदिष्यते॥
११४७॥§ 3912

तस्मात्पचतीत्येतस्यौदासीन्यमन्यच्च भुङ्क्ते दीव्यति चेत्यादिक्रियान्तरपर्युदासात्मकमपोह्यमस्ति, तेन, यदुक्तं—पर्युदासरूपं हि निषेध्यं तन्न विद्यत इति तदसिद्धम्।पर्युदासात्मकापोह्यमिति। पर्युदासात्मकं च तदपोह्यं चेति

विग्रहः। नियतं यद्यदिष्यत इति। तस्य तस्यौदासीन्यादिपर्युदासात्मकमपोह्यमस्तीति सम्बन्धः॥ ११४६॥ ॥ ११४७॥ § 3913

यच्चोक्तं पचतीत्यनिषिद्धं तु स्वरूपेणैव तिष्ठतीति। तत्र स्ववचनव्याघातं परस्य प्रतिपादयन्नाह—पचतीत्यादि। § 3914

पचतीत्यनिषिद्धं तु स्वरूपेणैव तिष्ठति।
इत्येतच्च भवद्वाक्यं परस्परपराहतम्॥
११४८॥§ 3916

अन्यरूपनिषेधोऽयं स्वरूपेणैव तिष्ठति।
इत्यन्यथा निरर्थं स्यात्प्रयुक्तमवधारणम्॥
११४९॥§ 3918

कथं पुनरेतत्परस्परपराहतमित्याह—अन्यरूपनिषेधोऽयमित्यादि। पचतीत्येतस्यार्थस्वरूपेणैव तिष्ठतीत्यनेनावधारणेनाचरितरूपं दर्शयता पचतीत्येतस्यान्यरूपनिषेधेनात्मस्थितिरिति दर्शितं भवति। अन्यथा स्वरूपेणैवेत्येतदेवावधारणं भवत्प्रयुक्तमनर्थकं स्यात्, व्यवच्छेद्याभावात्॥ ११४८॥ ११४९॥ § 3919

यदुक्तं— साध्यत्वप्रत्ययश्चात्रेत्यादि, तत्राह—निष्पन्नत्वमित्यादि। § 3920

निष्पन्नत्वमपोहस्य निरुपाख्यस्य कीदृशम्।
गगनेन्दीवरादीनां निष्पत्तिर्नहि काचन॥
११५०॥§ 3922

वस्त्वित्यध्यवसायाच्चेत्सोपाख्यात्वेन भात्यसौ।
ततः किं तुल्यधर्मत्वं वस्तुभिश्चास्य गम्यते॥
११५१॥§ 3924

यद्यपोहो भवता निरुपाख्यस्वभावतया गृहीतस्तत्कथमिदमुच्यते निष्पन्नत्वादिति, नह्याकाशोत्पलादीनां काचिदस्ति निष्पत्तिः। सर्वोपाख्याविरहलक्षणत्वात्तेषां स्यादे तद्यद्यप्यसौ निरुपाख्यः परमार्थतस्तथापि भ्रान्तैः 353/k
प्रतिपत्तृभिर्बाह्यवस्तुरूपतया व्यवसितत्वादसावपोहः सोपाख्यत्वेन भातीति। अत्राह—ततः किमिति। यदि नामासौ सोपाख्यत्वेन भाति तथाऽपि किम-

त्र प्रकृतार्थानुकूलं जातमिति। अत्र पर आह—तुल्यधर्मत्वं वस्तुभिश्चास्य गम्यत इति। तेन, यथा वस्तु निष्पन्नरूपं प्रतीयते तथाऽपोहोऽपि वस्तुभिस्तुल्यधर्मतया ख्यातो निष्पन्न इव प्रतीयत इति सिद्धं निष्पन्नत्वादिति वचनम्॥ ११५०॥ ११५१॥ § 3925

यद्येवं भवतैव साध्यत्वप्रत्ययस्य भूतादिप्रत्ययस्य च निमित्तमुपदर्शितमिति नच वक्तव्यमेतन्निर्निमित्तं प्रसज्यत इति, तदेतद्दर्शयन्नाह—साध्यत्वप्रत्ययस्तस्मादित्यादि। § 3926

साध्यत्वप्रत्ययस्तस्मात्तथाभूतादिरूपणम्।
वस्तुभिस्तुल्यरूपत्वात्तन्निमित्तं प्रसज्यते॥
११५२॥ § 3928

तन्निमित्तमिति। वस्तुभिस्तुल्यधर्मत्वावसायनिमित्तम्॥ ११५२॥ § 3929

यदुक्तम्— विध्यादावर्थराशौ च नान्यापोहनिरूपणम् इति, तत्राह—विध्यादावित्यादि। § 3930

विध्यादावर्थराशौ च नास्तितादि निषिध्यते।
सामर्थ्यान्न तु शब्देन यदेव न विवक्षितम्॥
११५३॥ § 3932

विध्यादेरर्थस्य निषेधादिव्यावृत्ततयाऽवस्थितत्वात्तत्प्रतिपत्तौ सामर्थ्यादविवक्षितं नास्तितादि निषिध्यत इत्यस्त्येवात्राप्यन्यापोहनिरूपणम्॥ ११५३॥ § 3933

नञश्चापि नञा युक्तावित्यत्राह—नञश्चापीत्यादि। § 3934

नञश्चापि नञा युक्तावपोहस्तादृशो भवेत्।
तच्चतुष्टयसद्भावे यादृशः संप्रतीयते॥ ११५४॥ § 3936

नञा योगे नञो ह्यर्थो गम्यते कस्यचिद्विधिः।
तृतीयेन नञा तस्य विरहः प्रतिपाद्यते॥
११५५॥ § 3938

निषेधायापरस्तस्य तुरीयो यः प्रयुज्यते।
तस्मिन्विवक्षिते तेन ज्ञाप्यतेऽन्यनिवर्त्तनम्॥
११५६॥§ 3940

तच्चतुष्टयसद्भाव इति। नञ्चतुष्टयसद्भावे। कीदृशोऽसौ प्रतीयत इत्याह—नञा योग इत्यादि। अर्थशब्दो विधिशब्देन सम्बन्धनीयः। तस्य विरह इति। तस्य विधेर्निषेधः। निषेधायापरस्तस्येति। तृतीयनञ्प्र- 354/k तिपादितस्य विधिरहितस्य निषेधायेत्यर्थः। तुरीय इति। चतुर्थः। चतुरस्थयतावाद्यक्षरलोपश्चेत्यनेन पूरणार्थे यत्प्रत्ययविधानात्। तस्मिन्विवक्षित इति। तस्मिंश्चतुर्थे नञि प्रयुक्ते इत्यर्थः।तेनेति। चतुर्थेन नञा। ज्ञाप्यतेऽन्यनिवर्त्तनमिति। तृतीयनञ्प्रतिपादितनिषेधविवेकेन विधिरूपस्यार्थप्रतिबिम्बकस्य प्रतिपादनात्॥ ११५४॥ ११५५॥ ११५६॥ § 3941

एतदेवोदाहरणेन स्फुटीकुर्वन्नाह—नासौ न पचतीत्यादि। § 3942

नासौ न पचनीत्युक्ते गम्यते पचतीति हि।
औदासीन्यादियोगश्च तृतीयेन हि गम्यते॥
११५७॥§ 3944

तुर्ये तु तद्विविक्तोऽसौ पचतीत्यवसीयते।
तेनात्र विधिवाक्येन सममन्यनिवर्त्तनम्॥
११५८॥§ 3946

तद्विविक्तोऽसाविति। औदासिन्यादिविविक्तः। विधिवाक्येन सममन्यनिवर्त्तनमिति। यथा पचतीत्यादौ विधिवाक्ये सामर्थ्यादौदासिन्यविनिवृत्तिरिष्यते तथा द्वितीयेऽपि नञीति सिद्धमत्राप्यस्य निवर्त्तनम्। स्पष्टार्थं तु नञ्चतुष्टयोदाहरणम्॥ ११५७॥ ११५८॥ § 3947

चादीनामपि नञ्योगो नैवास्तीत्यत्राह—समुच्चयादिरित्यादि। § 3948

समुच्चयादिर्यश्चार्थः कश्चिच्चादेरभीप्सितः।
तदन्यस्य विकल्पादेर्भवेत्तेन व्यपोहनम्॥
११५९॥§ 3950

आदिशब्देन वाशब्दस्य विकल्पोऽर्थः, अपिशब्दस्य पदार्थसम्भावनान्ववसर्गादयः, तुशब्दस्य विशेषणम्, एवकारस्यावधारणमित्यादेर्ग्रहणम्। तदन्यस्येति। तस्मात्समुच्चयादेरन्यस्य। तेन—चादिना॥ ११५९॥ § 3951

वाक्यार्थेऽन्यनिवृत्तिश्च व्यपदेष्टुं न शक्यत इत्यत्राह—वाक्यार्थ इत्यादि।
§ 3952

वाक्यार्थेऽन्यनिवृत्तिश्च सुज्ञातैव तथा ह्यसौ।
पदार्था एव सहिताः केचिद्वाक्यार्थ उच्यते॥
११६० ॥§ 3954

तेषां च ये विजातीयास्तेऽपोह्याः सुपरिस्फुटाः।
वाक्यार्थस्यापि ते चैव तेभ्योऽन्यो नैव सोऽस्ति हि॥
११६१ ॥§ 3956

सहिता इति। परस्परं कार्यकारणभावेन सम्बद्धा इत्यर्थः। तेषामिति।
पदार्थानाम्। ननु पदार्थोऽन्योऽन्यस्तुवाक्यार्थः, तत्कथमुच्यते य एव प-
355/k दार्थानाम पोह्या वाक्यार्थस्यापि त एवेत्यत आह—तेभ्योऽन्यो नैव
सोऽस्तीति। नहि पदार्थव्यतिरिक्तो निरवयवः शबलात्मा वा कल्माषवर्णप्र-
ख्यो वाक्यार्थोऽस्ति, उपलब्धिलक्षणप्राप्तस्य तादृशस्यानुपलब्धेरिति भावः॥
११६०॥ ११६१॥ § 3957

एतदेवोदाहरणेन स्फुटयन्नाह—चैत्रेत्यादि। § 3958

चैत्र गामानयेत्यादिवाक्यार्थेऽधिगते सति।
कर्तृकर्मान्तरादीनामपोहो गम्यतेऽर्थतः॥
११६२ ॥§ 3960

नह्यस्मिन्वाक्ये चैत्रादिपदार्थव्यतिरेकेण बुद्धावन्योऽर्थः प्रतिवर्त्तते। चैत्रे ह्यर्थगते च सामर्थ्यादचैत्रादिव्यवच्छेदो गम्यते। अन्यथा यद्यन्यकर्त्रादिव्यवच्छेदो नाभीष्टः स्यात्तदा चैत्रादीनामुपादानमनर्थकमेव स्यात्। ततश्च न किंचित्कश्चिद्व्याहरेदिति निरीहमेव जगत्स्यात्॥ ११६२॥ § 3961

अनन्यापोहशब्दादौ वाच्यं न च निरूप्यत इत्यत्राह—अनन्यापोहेत्यादि। § 3962

अनन्यापोहशब्दादौ न विधिर्व्यवसीयते।
परैरभिमतः पूर्वं जात्यादेः प्रतिषेधनात्॥
११६३ ॥§ 3964

नह्यत्र भवदभिमतो जात्यादिलक्षणो विधिरूपः शब्दार्थः परमार्थतोऽवसीयते, तस्य जात्यादेः पूर्वं—सामान्यपरीक्षादौ विस्तरेण निषिद्धत्वात्॥ ११६३॥ § 3965

किं तर्ह्यवसीयत इत्याह—किन्त्वित्यादि। § 3966

किन्तु विध्यवसाय्यस्माद्विकल्पो जायते ध्वनेः।
पश्चादपोहशब्दार्थनिषेधे जायते मतिः॥
११६४॥§ 3968

यद्यपोहशब्दार्थनिषेधे मतिर्जायत इतीष्यते, न तर्ह्यपोहशब्दार्थोऽभ्युपगन्तव्यः, तस्य निषिद्धत्वादित्यत आह—स त्वसंवादकस्तादृगिति। § 3969

स त्वसंवादकस्तादृग्वस्तुसम्बन्धहानितः।
न शाब्दाः प्रत्ययाः सर्वे भूतार्थाध्यवसायिनः॥
११६५॥§ 3971

स इति। अनन्यापोहशब्दादिः। असंवादक इति। न संवदतीत्यसंवादकः, न विद्यते वा संवादोऽस्येत्यसंवादकः। कस्मात्? वस्तुसम्बन्धहानितः तथाभूतवस्तुसम्बन्धाभावात्। पूर्वं हि जात्यादिलक्षणस्य शब्दार्थस्य वस्तुनो निषिद्धत्वात्। यद्येवं कथं तर्ह्यनन्यापोहशब्दादिभ्योऽपोहशब्दार्थनिषेधे मतिर्जायत इत्याह—न शाब्दा इति। वितथविकल्पाभ्यासवासनाप्रभवत- 356/k
या हि केचन शाब्दाः प्रत्यया असद्भूतार्थाभिनिवेशिनो जायन्त एवेति न तद्वशाद्वस्तूनां सदसत्ता सिद्ध्यति॥ ११६५॥ § 3972

यदुक्तं प्रमेयज्ञेयशब्दादेरित्यादि, तत्राह—प्रमेयेत्यादि। § 3973

प्रमेयज्ञेयशब्दादौ कस्यापोह्यं न विद्यते।
नह्यसौ केवलोऽकाण्डे प्रेक्षावद्भिः प्रयुज्यते॥
११६६॥§ 3975

कस्य प्रमेयादिशब्दस्यापोह्यं नास्तीत्यभिधीयते, यदि तावदवाक्यस्थं केवलं पदान्तरसम्बन्धरहितं प्रमेयादिशब्दमाश्रित्योच्यते, तदा सिद्धसाध्यता, केवलस्य प्रयोगाभावादेव निरर्थकत्वात्। तद्दर्शयति—नह्यसौ केवलोऽकाण्ड इति। केवल इति। अन्यशब्दरहितः। अकाण्ड इति। प्रस्तावमन्तरेण। यतः श्रोतृजनानुग्रहाय प्रेक्षावद्भिः शब्दः प्रयुज्यते, न व्यसनितया, नच केवलेन सता श्रोतुरेकस्मिन् सन्देहविपर्यासनिवृत्तिलक्षणोऽनुग्रहः कृतो भवेत्। तथाहि—यदि श्रोतुः क्वचिदर्थे समुत्पन्नौ संशयविपर्यासौ निवर्त्त्य निःसन्दिग्धं

प्रत्ययमुत्पादयेत्प्रतिपादकः, एवं तेनान्यानुग्रहः कृतो भवेत्। नच केवलेन प्रयुक्तेन तथाऽनुग्रहः शक्यते वक्तुम्॥ ११६६॥ § 3976

तस्मात्संशयादिनिवर्त्तने निश्चयोत्पादने च श्रोतुरनुग्रहात् शब्दप्रयोगसाफल्यमिति वाक्यस्थस्यैवास्य प्रयोग इति दर्शयति—किन्त्वित्यादि। § 3977

किन्त्वारेकविपर्याससंभवे सति कस्यचित्।
क्वचित्तद्विनिवृत्त्यर्थं धीमद्भिः स प्रयुज्यते॥
११६७॥§ 3979

निःसन्देहविपर्यासप्रत्ययोत्पादनादतः।
तेनैव तैः प्रयुक्तेन साफल्यमनुभूयते॥
११६८॥§ 3981

आरेकः—संशयः। कस्यचिदिति। श्रोतुः। क्वचिदिति—अर्थे। तद्विनिवृत्त्यर्थमिति। तयोरारेकविपर्यासयोर्विनिवृत्त्यर्थम्। तेनेति। ज्ञेयादिपदेन। तैरिति। प्रेक्षावद्भिः॥ ११६७॥ ११६८॥ § 3982

अथ वाक्यस्थमेव ज्ञेयादिशब्दमधिकृत्योच्यते, तदसिद्धमिति दर्शयति—यत्तत्रेति। § 3983

यत्तत्र जडचेतोभिराशङ्कास्पदमिष्यते।
तदेव क्षिप्यते तेन विफलोच्चारणाऽन्यथा॥
११६९॥§ 3985

किंचिद्व्यशङ्कमानोऽसौ किमर्थं परिपृच्छति।
अतत्संस्कारकं शब्दं ब्रुवन्वा स्वस्थधीः कथम्॥
११७०॥§ 3987

357/k

तत्र हि वाक्यस्थेन प्रमेयादिशब्देन यदेव जडचेतोभिः—मन्दमतिभिराशङ्क्यते तदेव निवर्त्यत इत्यतोऽसिद्धमेतत्प्रमेयादिशब्दानां निवर्त्त्यं नास्तीति। अन्यथेति। यदि जडधीभिराशङ्कितं न निवर्त्तयेदित्यर्थः। स्यादेतत्—न हि श्रोत्रा किंचिच्छङ्कितमित्याह—किंचिद्धीत्यादि। यदि हि श्रोता न क्वचिदर्थे संशेते तत्किमिति परस्मादुपदेशमपेक्षते निश्चयार्थं हि परं पृच्छति, अन्यथोन्मत्तः

स्यात्। स्यादेतत् यदि नाम श्रोतुराशङ्कास्थानमस्ति, तथापि तच्छब्देन न निवर्त्यतएवेत्याह—अतत्संस्कारकमित्यादि। तस्य श्रोतुरज्ञानादिनिवृत्तिलक्षणसंस्कारः—तत्संस्कारः —न विद्यते तत्संस्कारो यस्मिन्शब्द इति तदतत्संस्कारकं। शेषाद्विभाषेति कप्।ब्रुवन्निति। प्रतिपादकः। स्वस्थधीः कथमिति। उन्मत्तक एव स्यादित्यर्थः। श्रोतृसंस्कारायैव शब्दानां प्रयोगात्॥ ११६९॥ ११७०॥ § 3988

अत्र कस्मिन्वाक्ये किं तन्मूढमतेराशङ्कास्थानं यन्निवर्त्यत इत्याह—चक्षुर्ज्ञानादिविज्ञेयमित्यादि। § 3989

चक्षुर्ज्ञानादिविज्ञेयं रूपादीति यदुच्यते।
तेनारोपितमेतद्धि केनचित्प्रतिषिध्यते॥
११७१॥ § 3991

तेनेति। चक्षुर्ज्ञानादिविज्ञेयं रूपादीत्यनेन वाक्येन॥ ११७१॥ § 3992

किं तदारोपितमित्याह—न चक्षुराश्रितेनैवेत्यादि। § 3993

न चक्षुराश्रितेनैव रूपं नीलादि वेद्यते।
किन्तु श्रोत्राश्रितेनापि नित्येनैकेन चेतसा॥
११७२॥ § 3995

श्रोत्राश्रितेनापि नित्येन चेतसा नीलादिरूपं वेद्यत इत्येवं यन्मन्दधिया.... समारोपितं तच्चक्षुर्विज्ञानविज्ञेयं रूपमित्यनेन वाक्येन निषिध्यते। चक्षुराश्रितविज्ञानविज्ञेयमेव रूपं न श्रोत्रादिविज्ञानविज्ञेयमित्यर्थः॥ ११७२॥ § 3996

क्षणिकत्वादिरूपेण वि(किं ?)ज्ञेया इति विभ्रमे।
सर्वज्ञज्ञानविज्ञेया धर्माश्चेते भवन्ति किम्॥
११७३॥ § 3998

अभावा अपि किं ज्ञेया न ज्ञानं जनयन्ति ये।
इत्यादिविभ्रमोद्भूतौ विज्ञेयपदमुच्यते॥
११७४॥ § 4000

एवं सर्वधर्माः किं क्षणिकत्वादिरूपेण विज्ञेया ? आहोस्विन्न ?, किंवा सर्वज्ञचेतसा ग्राह्या ? उताहो न ?, अभावा हि सर्वोपाख्याविरहलक्षणा ये

358/k ज्ञानमपि न जन यन्ति ते किं विज्ञेया इति संशयोद्भूतौ सत्यामिदमुच्यते—क्षणिकत्वादिरूपेण ज्ञेयाःसर्वधर्माः, ते च सर्वज्ञज्ञानविज्ञेया, अभावा विज्ञेया इति। अत्र यदक्षणिकत्वादिना ज्ञेयत्वादिरूपमारोपितं धर्मेषु तन्निवर्त्त्यते॥ ११७३॥ ११७४॥ § 4001

कथं तद्वचनमात्रेण निवर्त्तयितुं शक्यत इत्येतदाह—तादृगित्यादि। § 4002

तादृग्ज्ञेयत्वमस्तेषां क्षणिकत्वादिसाधनात्।
ज्ञेयोऽभावोऽपि संवृत्त्या स्थापनादमुनाऽऽत्मना॥
११७५॥ § 4004

तादृगिति। क्षणिकत्वादिरूपेण तस्य प्रमाणसिद्धत्वात्। अथाभावस्य कथं ज्ञेयत्वं सिद्धमित्यत आह—ज्ञेय इत्यादि। अमुनाऽऽत्मनेति। अभावरूपेण। अवस्तूनामपि कथंचिद्बुद्ध्या व्यवस्थापनादस्ति ज्ञेयत्वम्, अन्यथा तत्र व्यवहार एव न स्यादिति भावः॥ ११७५॥ § 4005

ननु च किमनित्यत्वेन शब्दाः प्रमेया आहोस्विन्नेति प्रस्तावे प्रमेया इति प्रयोगे तत्र यः प्रकरणानभिज्ञस्तस्यापि प्रतिपत्तुः प्रमेया इति केवलशब्दश्रव-णात्प्लवमानरूपा शब्दादिषु बुद्धिरुपजायत एव, तद्यदि केवलस्य शब्दस्यार्थो नास्त्येव तत्कथमर्थप्रतिपत्तिर्भवतीत्यत आह—प्रमेयज्ञेयेत्यादि। § 4006

प्रमेयज्ञेयशब्दादेः प्रतियत्तिनिमित्तताम्।
इत्थं वाक्यस्थितस्यैव दृष्ट्वा कालान्तरेष्वपि॥
११७६॥ § 4008

केवलस्योपलम्भे या प्रतीतिरुपजायते।
प्लवमानार्थभेदेषु सा तद्वाक्यानुसारतः॥
११७७॥ § 4010

घटादिभ्योऽपि शब्देभ्यः साऽस्त्येव च तथाविधा।
तस्माद्घटादिशब्देन ज्ञेयादिध्वनयः समाः॥
११७८॥ § 4012

अयमत्र समुदायार्थः—नैव केवलशब्दश्रवणादर्थप्रतिपत्तिरस्ति, किंतु वाक्येषूपलब्धस्यार्थवतः शब्दस्य सादृश्येनापहृतबुद्धेः केवलशब्दश्रवणादर्थप्रतिपत्त्यभिमानः। तथाहि—येष्वेव वाक्येषु प्रमेयशब्दमुपलब्धवाञ्श्रोता तदर्थेष्वेव सा बुद्धिरप्रतिष्ठितार्था प्लवमानरूपा समुपजायते। तच्च घटादिशब्दानामपि तुल्यम्। तथाहि—किंघटेनोदकमानयान्युताञ्जलिनेति प्रस्तावे घटेनेति प्रयोगे प्रस्तावानभिज्ञस्य यावत्सु वाक्येषु घटेनेति प्रयोगो दृष्टस्तावतामर्थेष्वाकाङ्क्षावती पूर्ववाक्यानुसारादेव प्रतिपत्तिर्भवति (इति)। तस्माद्यथाऽर्थवादिशब्दा विशिष्टार्थवचनास्तथा प्रमेयादिशब्दा अपीति दर्शयति—तस्मादित्यादि॥ ११७६॥ ११७७॥ ११७८॥ § 4013

359/k

यदुक्तमपोह्यकल्पनायां चेत्यादि तत्राह—अपोह्येत्यादि। § 4014

अपोह्यकल्पनायां च वरं वस्त्वेव कल्पितम्।
इत्येतद्व्याहतं प्रोक्तं नियमेनान्यवर्जनात्॥
११७९॥§ 4016

वस्त्वेव कल्प्यते तत्र यदेव हि विवक्षितम्।
क्षेपो विवक्षितस्यातो न तु सर्वं विवक्षितम्॥
११८०॥§ 4018

वस्त्वेवेत्यादि। वस्त्वेव ह्यध्यवसायवशाच्छब्दार्थत्वेन कल्पितमस्माभिर्यदेव हि विवक्षितं, नावस्तु। तेन तत्प्रतीतौ सामर्थ्यादविवक्षितस्याक्षेपो व्यावृत्तिरवगम्यत एवेति नाव्यापिनी शब्दार्थव्यवस्था। यदेव च मूढमतेराशङ्कास्थानं तदेवाधिकृत्योक्तमाचार्येणअज्ञेयं कल्पितं कृत्वा तद्व्यवच्छेदेन ज्ञेयेऽनुमानमिति॥ ११७९॥ ११८०॥ § 4019

ज्ञानाकारनिषेधाच्चेत्यादावाह—ज्ञानाकारेत्यादि। § 4020

ज्ञानाकारनिषेधस्तु स्ववेद्यत्वान्न शक्यते।
विद्यते हि निरालम्बमारोपकमनेकधा॥
११८१॥§ 4022

ज्ञानस्यात्मगतः कश्चिन्नियतः प्रतिगोचरम्।

अवश्याभ्युपगन्तव्यः स्वभावश्च स एव च॥
११८२॥§ 4024

अस्माभिरुक्त आकारः प्रतिबिम्बं तदाभता।
उल्लेखः प्रतिभासश्च संज्ञाभेदस्वकारणम्॥
११८३॥§ 4026

न शक्यत इति। कर्तुमिति शेषः। कथं स्वसंवेद्यत्वं सिद्धं ज्ञानाकारस्येत्याह—विद्यते हीत्यादि। स्वप्नादिष्वर्थमन्तरेणापि निरालम्बनमागृहीतार्थाकारमारोपकं ज्ञानमागोपालमतिस्फुटमेव स्वसंवेदनप्रत्यक्षसिद्धम्। नच देशकालान्तरावस्थितोऽर्थस्तेन रूपेण संवेद्यत इति युक्तं वक्तुं, तस्य तद्रूपाभावात्। न चान्येन रूपेणान्यस्य संवेदनं युक्तमतिप्रसङ्गात्। किंचावश्यं तद्भवद्भिर्ज्ञानस्यात्मगतः कश्चिद्विशेषोऽर्थकृतोऽभ्युपगन्तव्यो येन बोधरूपतासाम्येऽपि प्रतिविषयं नीलस्यैव संवेदनं न पीतस्येति विभागेन विभज्यते ज्ञानम्। तदभ्युपगमे च सामर्थ्यात्साकारमेव ज्ञानमभ्युपगतंस्यात्। आकारव्यतिरेकेणान्यस्य स्वभावविशेषत्वेनावधारयितुमशक्यत्वात्। अतो भवता स्वभावविशेष इति स एव शब्दान्तरेणोक्तः, अस्माभिस्त्वाकार उल्लेख इत्यादिना शब्देनेति केवलं नाम्नि विवादः॥ ११८१॥ ११८२॥ ११८३॥ § 4027
360/k

एवमित्यादिशब्दानामित्यादावाह—एवमित्यादिशब्दानामित्यादि। § 4028

एवमित्यादिशब्दानां नैवमित्यादि विद्यते।
अपोह्यमिति विस्पष्टं प्रकारान्तरलक्षणम्॥
११८४॥§ 4030

एवमेतन्नैवमिति प्रकारान्तरमारोपितमेवमित्यादिशब्दैर्व्यवच्छिद्यमानं स्फुटतरनवसीयत एवेति नाव्यापिता शब्दार्थव्यवस्थायाः॥ ११८४॥ § 4031

एवं कुमारिलेनोक्तं दूषणं प्रतिविहितम्, इदानीमुद्योतकरोक्तं प्रतिविधीयते। तत्र यदुक्तं सर्वशब्दस्य कश्चार्थो व्यवच्छेद्यः प्रकल्प्यते इति। तत्राह—व्यवहारोपनीते चेत्यादि। § 4032

व्यवहारोपनीते च सर्वशब्देऽपि विद्यते।
व्युदास्यं तस्य चार्थोऽयमन्यापोहोऽभिधित्सितः॥
११८५॥§ 4034

अत्रापि ज्ञेयादिपदवत्केवलस्य सर्वशब्दस्याप्रयोगाद्वाक्यस्थस्यैव नित्यं प्रयोग इति यदेव मूढमतेराशङ्कास्थानं तदेव निवर्त्त्यमस्ति। अभिधित्सित इति। अभिधातुमिष्टः॥ ११८५॥ § 4035

कोऽसावर्थोऽभिधातुमिष्ट इत्याह—सर्वो धर्मा इत्यादि। § 4036

सर्वे धर्मा निरात्मानः सर्वे वा पुरुषा गताः।
सामस्त्यं गम्यते तत्र कश्चिदंशस्त्वपोह्यते॥
११८६॥§ 4038

कोऽसावंशोऽपोह्यत इत्याह—केचिदेवेति। § 4039

केचिदेव निरात्मानो बाह्या इष्टा घटादयः।
गमनं कस्यचिच्चैवं भ्रान्तिस्तद्विनिवर्त्तते॥
११८७॥§ 4041

एकाद्यसर्वमिति चेदित्यादावाह सर्वाङ्गप्रतिषेधश्चेत्यादि। § 4042

सर्वाङ्गप्रतिषेधश्च नैव तस्मिन्विवक्षितः।
स्वार्थापोहप्रसङ्गोऽयं तस्मादज्ञतयोच्यते॥
११८८॥§ 4044

यदि हि सर्वस्याङ्गस्य प्रतिषेधः तस्मिन्व्यवहारोपनीते वाक्यस्थे सर्वशब्दे विवक्षितः स्यात्तदा स्वार्थापोहः प्रसज्यते। यावता यदेव मूढधिया शङ्कितं तदेव निषिध्यत इति कुतः स्वार्थापवादित्वदोषप्रसङ्गः। एवं ह्यादिशब्देष्वपि वाच्यम् ११८८ § 4045

यच्चोक्तं किंभावोऽथवाऽभाव इत्यादि, तत्राह—न भाव इत्यादि। § 4046

न भावो नापि चाभावोऽपृथगेकत्वलक्षणः।
नाश्रितानाश्रितोऽपोहो नैकानेकश्च वस्तुतः॥
११८९॥§ 4048

361/k

कस्माद्भावो न भवतीत्याह—तथाऽसौ नास्तीत्यादि। § 4049

तथाऽसौ नास्ति तत्त्वेन यथाऽसौ व्यवसीयते।
तन्न भावो न चाभावो वस्तुत्वेनावसायतः॥
११९० ॥§ 4051

बाह्यरूपतयाऽसौ भ्रान्तैरवसीयते, न चासौ तथाऽवस्थित इत्यतो बाह्यरूपत्वाभावान्न भावः। अथाभावः कस्मान्न भवतीत्याह—न चाभावो वस्तुत्वेनावसायत इति। बाह्यरूपतया दर्शितत्वान्नैकान्तेनाभाव इत्यपि शक्यं वक्तुम्॥ ११९०॥ § 4052

अथ पृथक्त्वैकत्वादिलक्षणः कस्मान्न भवतीत्याह—भेदाभेदादय इत्यादि। § 4053

भेदाभेदादयः सर्वे वस्तुसत्परिनिष्ठिताः।
निःस्वभावश्च शब्दार्थस्तस्मादेते निरास्पदाः॥
११९१ ॥§ 4055

भेदाभेदादयः—व्यतिरेकाव्यतिरेकादयः। आदिशब्देनाश्रितत्वादयो गृह्यन्ते, नहि वस्तुगता एव धर्मास्तत्कथमपोहे कल्पनाशिल्पिघटितविग्रहे प्रतिष्ठां लभेरन्।यच्चोक्तं—क्रियारूपत्वादपोहस्य विषयो वक्तव्य इति, तदसिद्धम्, शब्दवाच्यस्यापोहस्य प्रतिबिम्बात्मकत्वात्। तच्च प्रतिबिम्बकमध्यवसितबाह्यवस्तुरूपत्वान्न प्रतिषेधमात्रम्। अतएव किं गोविषयोऽथागोविषय इत्यस्य विकल्पद्वयस्यानुपपत्तिः, गोविषयत्वेनैव तस्य विधिरूपतयाऽप्यवसीयमानत्वात्॥ ११९१॥ § 4056

यच्चोक्तं— केन ह्यगोत्वमासक्तं गोर्येनैतदपोह्यत इति, तत्राह—अन्यार्थविनिवृत्तिं चेत्यादि। § 4057

अन्यार्थविनिवृत्तिं च साक्षाच्छब्दः करोति नः।
कृते स्वार्थाभिधाने तु सामर्थ्यात्साऽवगम्यते॥
११९२ ॥§ 4059

न तदात्मा परात्मेति विस्तरेणोपपादितम्।
परपक्षानभिज्ञेन तस्मादेतदिहोच्यते॥ ११९३ ॥§ 4061

केन ह्यगोत्वमासक्तं गोर्येनैतदपोह्यते।

इति नैवाभिमुख्येन शब्देनैतदपोह्यते॥
११९४ ॥§ 4063

यदि हि प्रधानेनान्यनिवृत्तिमेवशब्दः प्रतिपादयेत्तदैतत्स्यात्, यावताऽर्थप्रतिबिम्बकमेव यथोक्तं प्रथमतरः शब्दः करोति, तद्गतौ च सामर्थ्यादेव निवर्त्तनं गम्यत इति सिद्धान्तानभिज्ञतया यत्किंचिदभिहितमेतदिति संक्षेपार्थः। शेषं सुबोधम् ॥ ११९२॥ ११९३॥ ११९४॥ § 4064
362/k

व्यतिरेकादिविकल्पः पूर्वमेव निरस्तः। यदुक्तं— किमयमपोहो वाच्य इत्यादि, तत्राह—कतमेनेत्यादि। § 4065

कतमेन च शब्देन वाच्यत्वं परिपृच्छ्यते।
अपोहस्य किमेतेन यदि वा किं घटादिना॥
११९५ ॥§ 4067

शब्दार्थः किमपोहो वा विधिर्वेति निरूपणे।
अपोह इति भात्येतद्यत्तदेवं प्रतीयते॥
११९६ ॥§ 4069

प्रतिबिम्बं हि शब्दार्थ इति साक्षादियं मतिः।
जात्यादिविधिहानिस्तु सामर्थ्यादवगम्यते॥
११९७ ॥§ 4071

घटवृक्षादिशब्दाश्च तदेव प्रतिबिम्बकम्।
ब्रुवन्ति जननात्साक्षादर्थादन्यत्क्षिपन्ति तु॥
११९८ ॥§ 4073

तस्मान्न विधिदोषोऽस्ति नानिष्टा च प्रसज्यते।
अवाच्यपक्षदोषस्तु तदनङ्गीकृतेर्न नः॥
११९९ ॥§ 4075

तत्रान्यापोहवाच्यत्वविकल्पो यद्यन्योपोहशब्दमधिकृत्याधिक्रियते तदा विधिरूपेणैवासौ तेन शब्देन वाच्य इत्यभ्युपगमान्नानिष्टापत्तिर्युक्ता। तथाहि किं विधिः शब्दार्थ आहोस्विदन्यापोह इति प्रस्तावेऽन्यापोहः शब्दार्थ इत्युक्ते प्रतिपत्तुर्यथोक्तंप्रतिबिम्बलक्षणान्यपोहाध्यवसायी प्रत्ययः समुपजायते। अर्थात्तु विधिरूपशब्दार्थनिषेधः। अथ घटादिशब्दमधिकृत्य तत्रापि यथोक्तप्रतिबिम्बलक्षणापोहः साक्षाद्घटादिशब्दैरुपजन्यमानत्वाद्विधिरूपेण च तैः प्रतिपाद्यते, सामर्थ्यात्त्वन्यनिवृत्तेरधिगम इति नानिष्टापत्तिः। न चाप्यव्यवस्थादोषः। सामर्थ्यादन्यनिवृत्तेर्गम्यमानत्वादनुवाच्यतयाऽवाच्यपक्षस्यानङ्गीकृतत्वादेव न तत्पक्षभाविदोषोदयावकाश इति दर्शयति—अवाच्यपक्षदोषस्त्विति॥ ११९५॥ ११९६॥ ११९७॥ ११९८॥ ॥ ११९९॥ § 4076

अपि चैकत्वनित्यत्वेत्यादावाह—एकत्वेत्यादि। § 4077

एकत्वनित्यतादिश्च कल्पितो न तु तात्त्विकः।
तदत्र हासकरणं महाविद्वत्त्वसूचकम्॥
१२०० ॥§ 4079

यदि हि पारमार्थिकमेकत्वाद्युपवर्णनं कृतं स्यात्तदा हास्यकारणमेव स्याद्भवतः, यदाहि भ्रान्तिप्रतिपत्त्यनुरोधेन काल्पनिकमेतदाचार्येणोपवर्णितं
363/k तदा कथमिव हा स्यकारणमवतरति विदुषः। किंतु भावानेव विवक्षितमर्थमविज्ञाय दूषयन्विदुषामतीवहास्यास्पदमुपजायते॥ १२००॥ § 4080

तस्माद्येष्वेव शब्देषु नञ्योग इत्यादावाह—अवधारणसामर्थ्यादित्यादि। § 4081

अवधारणसामर्थ्यादन्यापोहोऽपि गम्यते।
स्वात्मैव गम्यते यत्र विफलो नियमोऽन्यथा॥
१२०१ ॥§ 4083

न केवलं यत्र नञ्योगस्तत्रान्यनिवृत्त्यंशोऽवगम्यते, यत्रापि हि नञ्योगो नास्ति तत्रापि गम्यत एवेति स्ववाचैवैतद्भवता प्रतिपादितं स्वात्मैव गम्यत इत्यवधारणं कुर्वता। अन्यथा चावधारणवैयर्थ्यमेव स्यात्। यस्माद्यत्र स्वात्मैव गम्यते तत्रावधारणसामर्थ्यादन्यापोहोऽपि गम्यत इति स्फुटतरमेवावसीयते॥ १२०१॥ § 4084

यस्य तर्हीत्यादिना परोऽपोहशब्दार्थव्यवस्थाया अव्यापितामेवोद्भावयति। § 4085

यस्य तर्हि न बाह्योऽर्थोऽप्यन्यथावृत्त इष्यते।
वन्ध्यासुतादिशब्दस्य तेन क्वाऽपोह उच्यते॥
१२०२॥§ 4087

तथाहि यस्य वन्ध्यासुतादिशब्दस्य बाह्यसुतादिकं वस्त्वन्यव्यावृत्तमपोहाश्रयो नास्त्येव, तस्य किमधिष्ठानोऽपोहो वाच्य उच्यते, अवश्यं हि वस्तुनाधिष्ठानभूतेनापोहस्य भवितव्यम्, तस्यान्यापोढपदार्थाव्यतिरेकात्॥ १२०२॥ § 4088

रूपाभावादित्यादिना प्रतिविधत्ते। § 4089

रूपाभावादभावानां शब्दा जात्यादिवाचकाः।
नाशङ्क्या एव सिद्धास्ते निर्भासस्यैव सूचकाः॥
१२०३॥§ 4091

वन्ध्यासुतादीनामभावानां रूपस्य कस्यचित्स्वभावस्याभावान्न तद्विषयाः शब्दा जात्यादिवाचकत्वेनाशङ्क्याः, वस्तुवृत्तीनां हि शब्दानां किंरूपमभिधेयमाहोस्वित्प्रतिबिम्बकमिति शङ्का स्यात्, अभावश्च वस्तुविवेकलक्षण एवेति तद्वृत्तीनां शब्दानां कथमिव वस्तुविषयत्वाशङ्का भवेत्। अतो निर्विषयत्वं स्फुटतरमेव। तव(च ?) शब्दानां प्रतिबिम्बकमात्रोत्पादादवसीयत एवेत्यस्थानमाशङ्कायाः॥ १२०३॥ § 4092

एतदेव दर्शयति—अर्थेत्यादि। § 4093

अर्थशून्याभिजल्पोत्थवासनामात्रनिर्मितम्।
प्रतिबिम्बं यदाभाति तच्छब्दैः प्रतिपाद्यते॥
१२०४॥§ 4095

शब्दैरिति। वन्ध्यासुतादिशब्दैः॥ १२०४॥ § 4096
364/k

ये पुनर्वस्तुविषयाः शब्दास्तेषां प्रतिबिम्बकमात्रवाचकत्वसिद्धौ प्रमाणयन्नाह—तन्मात्रेत्यादि। § 4097

तन्मात्रद्योतकाश्चेमे साक्षाच्छब्दाः ससंशयाः।
सङ्केतसव्यपेक्षत्वात्कल्पितार्थाभिधानवत्॥
१२०५॥§ 4099

ये सङ्केतसव्यपेक्षास्तेऽर्थशून्याभिजल्पाहितवासनामात्रनिर्मितविकल्पप्रतिबिम्बकमात्रावद्योतकाः, यथा वन्ध्यापुत्रादिशब्दाः कल्पितार्थाभिधायिनः स-

ङ्केतसव्यपेक्षाश्च ससंशया विवादास्पदीभूता घटादयः शब्दा इति स्वभावहेतुः॥ १२०५॥ § 4100

एवं स्वपक्षं प्रसाध्य परपक्षनिषेधाय प्रमाणयन्नाह—परोपगतेत्यादि। § 4101

परोपगतभेदादिविधानप्रतिपादकाः।
न चैते ध्वनयस्तस्मात्तद्वदेवेति गम्यताम्॥
१२०६॥§ 4103

भेदः—स्वलक्षणम्, आदिशब्देन जात्यादिपरिग्रहः। तस्मादिति। सङ्केतसापेक्षत्वात्। तद्वदेवेति। कल्पितार्थाभिधानवत्॥ १२०६॥ § 4104

द्वयोरपि हेत्वोरनैकान्तिकतां परिहरन्नाह—सङ्केतासम्भव इत्यादि। § 4105

सङ्केतासम्भवो ह्यत्र भेदादौ साधितः पुरा।
वैफल्यं च न तद्धेत्वोः सन्दिग्धव्यतिरेकिता॥
१२०७॥§ 4107

अशक्यसमयत्वादनन्यभाक्त्वाच्चेति पूर्वं स्वलक्षणादौ सङ्केतासम्भवस्य सङ्केतवैफल्यस्य च प्रसाधितत्वात्। तत्—तस्मात्। हेत्वोर्द्वयोर्न सन्दिग्धविपक्षव्यतिरेकितेति॥ १२०७॥ § 4108

नन्वित्यादिना परः प्रथमे हेतावनैकान्तिकतामुद्भावयति। § 4109

ननु चापोहपक्षेऽपि कथं सङ्केतसम्भवः।
साफल्यं च कथं तस्य न द्वयोः स हि सिद्ध्यति॥
१२०८॥§ 4111

वक्तृश्रोत्रोर्न हि ज्ञानं वेद्यते तत्परस्परम्।
सङ्केते न च तद्दृष्टं व्यवहारे समीक्ष्यते॥
१२०९॥§ 4113

यथाहि स्वलक्षणादौ सङ्केतासम्भवो वैफल्यं च तथाऽपोहपक्षेऽपि समानम्, ततश्चाकृतसमयत्वात्तन्मात्रद्योतकत्वमपि शब्दानां न युक्तमित्यनैकान्तिकता हेतोः।साफल्यं च कथमिति। सम्भवतीति शेषः। तस्येति।

सङ्केतस्य। कथं पुनस्तत्रसङ्केतासम्भव इत्याह—न द्वयोः स हि सिद्ध्यतीति। हिशब्दो हेतौ। यस्मा त्प्रतिबिम्बात्मकोऽपोहः सङ्केतविषययोर्द्वयोर्व- 365/k
क्तृश्रोत्रोरेको न सिद्ध्यति। कस्मादित्याह —न हि ज्ञानमित्यादि। प्रत्यात्मसंवेदनीयमेवार्वाग्दर्शनानां ज्ञानम्। न ह्यन्यदीयज्ञानमपरोऽपरदर्शनः संवेदयते। ज्ञानादव्यतिरिक्तश्च परमार्थतः प्रतिबिम्बात्मकलक्षणापोहः। ततश्च वक्तृश्रोत्रोर्द्वयोरपि कस्यचिदेकस्य सङ्केतविषयस्यार्थस्यासिद्धेः कुत्र सङ्केतः क्रियते गृह्यते वा। न ह्यसिद्धे वस्तुनि वक्ता सङ्केतं कर्तुमीशानोऽपि श्रोता गृहीतुमतिप्रसङ्गात्। तथाहि—श्रोता यत्प्रतिपद्यते स्वविज्ञानारूढमर्थप्रतिबिम्बकं न तद्वक्त्रा संवेद्यते। यच्च वक्त्रा संवेद्यते न तच्छ्रोत्रा, स्वस्य स्वस्यैवावभासस्य वेदनात् आनर्थक्यं च प्रतिपादयन्नाह—सङ्केते न चेत्यादि। यत्सङ्केतकाले प्रतिबिम्बकमनुभूतं श्रोत्रा वक्त्रा वा न तद्व्यवहारकालेऽनुभूयते। तस्य क्षणक्षयित्वेन चिरनिरुद्धत्वात्। यच्च व्यवहारकालेऽनुभूयते न तत्सङ्केतकाले दृष्टम्। अन्यस्यैव तदानीमनुभूयमानत्वात्। नचान्यत्र सङ्केतादन्यत्र व्यवहारो युक्तोऽतिप्रसङ्गादिति ॥ १२०८॥ १२०९॥ § 4114

स्वस्य स्वस्येत्यादिना प्रतिविधत्ते। § 4115

स्वस्य स्वस्यावभासस्य वेदनेऽपि स वर्त्तते।
बाह्यार्थाध्यवसाये यद्द्वयोरपि समो यतः॥
१२१० ॥§ 4117

नहि परमार्थतो ज्ञानाकारोऽपि शब्दानां वाच्यतयाऽभीष्टो येन तत्र सङ्केतासम्भवश्चोद्यते, यतः सर्व एवायं शाब्दो व्यवहारः स्वप्रतिभासानुरोधेन तैमिरिकद्वयद्विचन्द्रदर्शनवद्भ्रान्त इष्यते, केवलमर्थशून्याभिजल्पवासनाप्रबोधाच्छब्देभ्योऽर्थावसायिविकल्पमात्रोत्पादात्। तत्प्रतिबिम्बकं शब्दानां वाच्यमित्यभिधीयते जननात्, नत्वभिधेयतया। तत्र यद्यपि स्वस्य स्वस्यैवावभासस्य वक्तृश्रोतृभ्यां परमार्थतः संवेदनं, तथापि तैमिरिकद्वयस्येव भ्रान्तिबीजस्य तुल्यत्वाद्द्वयोरपि वक्तृश्रोत्रोर्बाह्यार्थाध्यवसायस्तुल्य एव। तथापि वक्तुरयमभिमानो वर्त्तते—यमेवाहमर्थं प्रतिपद्ये तमेवायं प्रतिपद्यत इति। एवं श्रोतुरपि योज्यम्। एकार्थाध्यवसायित्वं कथमनयोर्वक्तृश्रोत्रोः परस्परं विदितमिति चेत्, यदि नाम परमार्थतो न विदितम्, तथापि भ्रान्तिबीजस्य तुल्यत्वादस्त्येव परमार्थतः स्वप्रतिभासानुरोधेन तैमिरिकद्वयवद्भ्रान्त एवायं व्यवहार इति निवेदितमेतत्। तेनैकार्थाध्यवसायवशात्सङ्केतकरणमुपपद्यत एव॥ १२१०॥ § 4118
366/k

अत्र दृष्टान्तमाह—तिमिरोपहताक्षो हीत्यादि। § 4119

तिमिरोपहताक्षो हि यथा प्राह शशिद्वयम्।
स्वसमाय तथा सर्वा शाब्दी व्यवहृतिर्मता॥
१२११॥§ 4121

स्वसमायेति। आत्मतुल्यायापरस्मै तैमिरिकायेत्यर्थः॥ १२११॥ § 4122
नचाप्यानर्थक्यं सङ्केतस्येति दर्शयति—व्यापकत्वं चेति। § 4123

व्यापकत्वं च तस्येदमिष्टमाध्यवसायिकम्।
मिथ्यावभासिनो ह्येते प्रत्ययाः शब्दनिर्मिताः॥
१२१२॥
इति शब्दार्थपरीक्षा।§ 4126

सङ्केतव्यवहाराप्तकालव्यापकत्वं च वक्तृश्रोतृभ्यामध्यवसितार्थप्रतिबिम्बकस्यावसायवशादेवेष्टं, न परमार्थतः, व्यवहारकालेऽपि वक्तृश्रोत्रोः पूर्वापरकालदृष्टयोरर्थयोरैक्याभिमानात्। अथ परमार्थतः कस्मान्नेष्टमित्याह—मिथ्यावभासिन इत्यादि ॥ १२१२॥ § 4127

इति शब्दार्थपरीक्षा।

०.१८ प्रत्यक्षलक्षणपरीक्षा।

तत्र प्रमाणे स्वरूपफलगोचरसङ्ख्यासु परेषां विप्रतिपत्तिश्चतुर्विधा। तन्निराकरणेन स्पष्टं प्रमाणलक्षणमादर्शयितुं स्पष्टलक्षणसंयुक्तप्रमाद्वितयनिश्चितमित्येतत्समर्थनार्थमाह—प्रत्यक्षमित्यादि। § 4129

प्रत्यक्षमनुमानं च यदुपाधिप्रसिद्धये।
परैरुक्तं न तत्सिद्धमेवंलक्षणकं हि तत्॥
१२१३॥§ 4131

उपाधिप्रसिद्धय इति। गुणद्रव्यक्रियाजातिसमवायाद्युपाधिप्रसिद्धये। परैरिति। वैशेषिकादिभिः। एवमिति। वक्ष्यमाणम्॥ १२१३॥ § 4132
तत्र सविकल्पकमज्ञानस्वभावं वा चक्षुरादिकं प्रत्यक्षं प्रमाणमिति प्रत्यक्षस्वरूपविप्रतिपत्तिः, तन्निराकरणेन तल्लक्षणमाह—प्रत्यक्षं कल्पनापोढमभ्रान्तमिति। § 4133

प्रत्यक्षं कल्पनापोढमभ्रान्तमभिलापिनी।
प्रतीतिः कल्पना क्लृप्तिहेतुत्वाद्यात्मिका न तु॥
१२१४॥§ 4135

तत्र ज्ञानस्य कल्पनापोढत्वमभ्रान्तत्वं चानूद्य प्रत्यक्षत्वं विधीयते, सर्वत्रैव लक्ष्यस्य विधीयमानत्वात्। यथा—यः कम्पते सोऽश्वत्थ इति। लक्ष्यमत्र प्रत्यक्षम्।तल्लक्षणस्यैव प्रस्तुतत्वात्। ननु कल्पनापोढाभ्रान्तलक्षणं प्रकृतं, येन तद्विधीयत इति स्यात्। कल्पनाप्रतिषेधाच्च ज्ञानस्य सामर्थ्यलब्धत्वात्, 367/k अवत्सा धेनुरानीयतामिति यथा वत्सप्रतिषेधेन गोधेनोः, इत्यतो ज्ञानमिति नोक्तम्। का पुनरत्र कल्पनाऽभिप्रेता ? यदपोढं ज्ञानं प्रत्यक्षमित्याह—अभिलापिनी प्रतीतिः कल्पनेति। अथ यस्यां क्लृप्तिहेतुत्वाद्यात्मिकायां शङ्करस्वामिप्रभृतयो विस्तरेण दोषमुक्तवन्तः सापि किं गृहीतव्या उत नेत्याह—क्लृप्तिहेतुत्वाद्यात्मिका नत्विति। गृह्यत इति शेषः। तेन तदाश्रयेण ये दोषाः परेणोक्तास्ते तत्पक्षानङ्गीकारादेव नावतरन्तीत्युक्तं भवति। क्लृप्तिर्व्यपदेशस्तद्धेतुत्वं जात्यादीनामिति बोद्धव्यम्, यतो जात्यादिविशेषमन्तरेण न व्यपदेशोऽस्ति। आदिशब्देन शब्दसंसर्गचित्तौदारिकसूक्ष्मताहेतू वितर्कविचारौ तथा ग्राह्यग्राहककल्पनेत्येवमादि ग्रहीतव्यम्। अभिलापो—वाचकः शब्दः, स च सामान्याकारः, स विद्यते यस्याः प्रतिभासतः सा तथोक्ता॥ १२१४॥
§ 4136

कुतः पुनरीदृशी प्रतीतिः सिद्धेत्याह—शब्दार्थेत्यादि। § 4137

शब्दार्थघटनायोग्या वृक्ष इत्यादिरूपतः।
या वाचामप्रयोगेऽपि साभिलापेव जायते॥
१२१५॥§ 4139

वृक्ष इत्यादिरूपतो या वाचामप्रयोगेऽपीति सम्बन्धः। यदि वा—पूर्वेण शब्दार्थघटनायोग्या वृक्ष इत्यादिरूपत इति सम्बन्धः। अनेन प्रत्यक्षत एव कल्पनायाः सिद्धिमादर्शयति सर्वप्राणभृतामनुसिद्धत्वाद्विकल्पस्य॥ १२१५॥
§ 4140

तथाह्याबालमसावितिकर्त्तव्यताहेतुतया सिद्धैवेति दर्शयति—अतीतेत्यादि।
§ 4141

अतीतभवनामार्थभावनावासनान्वयात्।
सद्योजातोऽपि यद्योगादितिकर्त्तव्यतापटुः॥
१२१६॥§ 4143

अतीतो भवः—अतीतं जन्म, तत्र नामार्थभावना—शब्दार्थाभ्यासः, तेनाहिता या वासना—सामर्थ्यं, तस्या अन्वयः—अनुगमो यतो बालस्याप्यस्ति, तेनाभिलापिनी प्रतीतिस्तस्यापि भवत्येव। यस्याः—कल्पनाया योगात् इतिकर्त्तव्यतायां स्मितरुदितस्तनपानप्रहर्षादिलक्षणायां, पटुः—चतुरो भवति। अतोऽनया कार्यभूतया यथोक्ता कल्पना बालस्याप्यनुमीयत एव। यथोक्तम्—इतिकर्त्तव्यता लोके सर्वशब्दव्यपाश्रया। यां पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यत इति। सा पुनः सन्मूर्च्छिताक्षराकारध्वनिविशिष्टमन्तर्मात्राविपरिवर्त्तिनमर्थं बहिरिवादर्शयन्ती तेषां समुपजायते, यया पश्चात्सङ्केतग्रहणकुशला भवन्ति॥ १२१६॥ § 4144

368/k

चिन्तेत्यादिना भूयः प्रत्यक्षतः कल्पनासिद्धिमाह। § 4145

चिन्तोत्प्रेक्षादिकाले च विस्पष्टं या प्रवेद्यते।
अनुविद्धेव सा शब्दैरपह्नोतुं न शक्यते॥
१२१७॥ § 4147

तस्याश्चेत्यादिना शाब्दव्यवहाराख्यकार्यलिङ्गतोऽपि सिद्धिमाह। § 4148

तस्याश्चाध्यवसायेन भ्रान्ता शब्दार्थयोः स्थितिः।
अन्यायोगादसत्त्वेऽस्याः सेदृश्यपि च सम्भवेत्॥
१२१८॥ § 4150

यतस्तात्त्विकी शब्दार्थव्यवस्था पूर्वैर्निषिद्धा, भ्रान्तेति च व्यवस्थापिता। यदि चास्याः कल्पनाया असत्त्वं स्यात्तदा सा—शब्दार्थव्यवस्था, ईदृश्यपि—भ्रान्तापि, न सम्भवेत्, तदभिप्रायवशात्तस्याव्यवस्थानात्। अन्येषां च स्वलक्षणादीनां बाह्यानां वाच्यत्वेनायोगस्य प्रतिपादितत्वात्॥ १२१८॥ § 4151

ननु चान्येऽपि न केवलमभिलापिनीं प्रतीतिं कल्पनां वर्णयन्ति, किन्तु जातिगुणक्रियादिसम्बन्धयोग्यामपि। सा कस्मान्न गृह्यत इत्याह—जात्यादीत्यादि। § 4152

जात्यादियोजनायोग्यामप्यन्ये कल्पनां विदुः।
सा जात्यादेरपास्तत्वाददृष्टेश्च न सङ्गता॥
१२१९॥ § 4154

अदृष्टेश्चेति। जात्यादेरिति सम्बन्धः। अयं चाभ्युपगम्य जात्यादीन्परिहार उक्तः॥ १२१९॥ § 4155

जात्यादीनामित्यादिना तदेवादृष्टत्वं समर्थयते। § 4156

जात्यादीनामदृष्टत्वात्तद्योगाप्रतिभासनात्।
क्षीरोदकादिवच्चार्थे घटना घटते कथम्॥
१२२० ॥§ 4158

क्षीरोदकादिवच्चेति। यथा क्षीरोदकादेर्मिश्रीभूतस्य विवेकेनाप्रतिभासनान्न घटना शक्यते कर्तुं तद्वज्जात्यादीनां सत्त्वेऽपि विवेकेनाश्रयादप्रतिभासनान्न शक्यते तदाश्रयेण सहेत्यर्थः॥ १२२०॥ § 4159

यदि तर्हि जात्यादियोजना कल्पना न युक्तैव, तत्कथं लक्षणकारेणोक्तं नाम जात्यादियोजना कल्पनेति, आह—हेयेत्यादि। § 4160

हेयोपादेयविषयकथनाय द्वयोक्तितः।
परापरप्रसिद्धेयं कल्पना द्विविधोदिता॥
१२२१ ॥§ 4162

तत्र हेया जात्यादियोजना परप्रसिद्धा कल्पना, उपादेया स्वप्रसिद्धा नामयोजनाकल्पना, इति दर्शनाय द्विप्रकाराऽपि कल्पना निर्दिष्टा। कथमवगम्यत इत्याह— द्वयोक्तितः—यस्मान्नाम च जात्यादयश्च नाम- 369/k
जात्यादयस्तेषां योजनेत्येवं वर्गद्वयमुक्तम्, अन्यथा नामादियोजना यदि वा जात्यादियोजनेत्येव वाच्यं स्यात्। नचेदं परिगणनम्, आदिशब्दवैफल्यप्रसङ्गात्॥ १२२१॥ § 4163

ननु च कल्पना ज्ञानधर्मः, तद्विरहप्रतिपादनमेव प्रकृतं, प्रत्यक्षाधिकारात्, नार्थधर्मविरहप्रतिपादनम्। नामजात्यादीनां च या योजना तद्वद्भिः साऽर्थगतो धर्मः, न ज्ञानस्य, ततश्चाप्रस्तुताभिधायित्वं लक्षणकारस्येति चोद्यमाशङ्क्याह—नामादियोजना चेयमिति। § 4164

नामादियोजना चेयं स्वनिमित्तमनन्तरम्।
आक्षिप्य वर्त्तते येन तेन नाप्रस्तुताभिधा॥
१२२२ ॥§ 4166

अनन्तरम्—अव्यवहितं निमित्तं, यत्तस्याः कारणम्। तत्पुनराविष्टाभिलापा प्रतीतिः। सा च वस्तुद्वयानुसन्धानाकारोत्पत्तितस्तथा योजनेति व्यपदिश्यते, नैव तु कश्चित्कंचिद्योजयति, निर्व्यापारत्वात्सर्वधर्माणाम्। तस्याक्षेपो द्वाभ्यां प्रकाराभ्याम्। ताभ्यां योजना यतो भवति सा तथोक्ता। गमकत्वाद्वैयधिकरण्येऽपि च बहुव्रीहिः। कारणे कार्योपचाराद्वा। उपचार-

स्य न प्रयोजनं तदन्यकारणेभ्यो विशिष्टकार्यकारिणः स्वभावख्यापनम्॥ १२२२॥ § 4167

अथवा—योज्यतेऽनयेति योजना, नामजात्यादीनां योजनेति समासं कृत्वाऽभिलापिन्येव कल्पना निर्दिष्टेत्यदोष इति दर्शयति—नामजात्यादय इत्यादि। § 4168

नामजात्यादयः सर्वे योज्यन्ते वाऽनयेति सा।
तथोक्ता कल्पना प्रोक्ता प्रतीतिरभिलापिनी॥
१२२३॥§ 4170

यद्वेत्यादिना परिहारान्तरमाह— § 4171

यद्वा स्वमतसिद्धैव केवला कल्पनोदिता।
सर्वत्र नाम्ना युक्तोऽर्थ उच्यत इति योजनात्॥
१२२४॥§ 4173

यद्येवं कथमयमाचार्यीयो वृत्तिग्रन्थो नीयते। तद्यथा—यदृच्छाशब्देषु नाम्ना विशिष्टोऽर्थ उच्यते डित्थ इति, जातिशब्देषु जात्या गौरिति, गुणशब्देषु गुणेनशुक्ल इति, क्रियाशब्देषु क्रियया पाचक इति, द्रव्यशब्देषु द्रव्येण दण्डी विषाणीति। अनेन हि ग्रन्थेन जात्यादिविशेषणयुक्तस्याप्यर्थस्योच्यमानत्वं पृथक्प्रकाशितमित्यत आह—सर्वत्रेत्यादि। सर्वत्रेति। जात्यादिशब्देष्वपि।
370/k एतदुक्तं भवति—यथा यदृच्छाशब्देषु प्रयुज्यमानेषु नाम्ना विशिष्टोऽर्थ उच्यते, एवं जात्यादिशब्देषु गौरित्यादिषु नाम्ना विशिष्टोऽर्थ उच्यते इत्येतत् सर्वत्र ग्रन्थे योजनीयमिति॥ १२२४॥ § 4174

कथं तर्हि जात्या गुणेन क्रियया द्रव्येण वेत्येतदपरं तृतीयान्तं योजनीयमित्याह —तैस्त्वित्यादि। § 4175

तैस्तु करणविभक्त्या साफल्यमनुभूयते।
नाम्नो जात्यादिभिः सेयमित्यर्थोऽध्यवतिष्ठते॥
१२२५॥§ 4177

जात्या करणभूतया नाम्ना विशिष्टोऽर्थ उच्यते गौरिति, तथा गुणादिभिः, इत्येवं तैर्जात्यादिभिः करणविभक्त्या सम्बन्धात्साफल्यमनुभूयते। यद्येवं, नामजात्यादियोजनेत्यत्र सूत्रे कथं सम्बन्धः कार्य इत्याह—नाम्नो जात्यादिभिरिति योजनेति शेषः। सेयमिति। अनेन समासार्थलभ्यां कल्पनामेव

निर्दिशति। जात्यादिभिर्योजना जात्यादियोजना, नाम्नो जात्यादियोजना सेयं नामजात्यादियोजनेत्ययंसमासार्थोऽध्यवतिष्ठत इति यावत्॥ १२२५॥
§ 4178

यद्येवं यदृच्छाशब्देषु जात्यादीनां प्रवृत्तिनिमित्तानामभावादव्यापिनी व्यवस्था भवेदित्याशङ्क्याह—यदृच्छाशब्दवाच्याया इति। § 4179

यदृच्छाशब्दवाच्याया जातेः सद्भावतो न च।
अव्याप्तिरस्य मन्तव्या प्रसिद्धेस्तु पृथक्श्रुतिः॥
१२२६॥§ 4181

एतदुक्तं भवति—येऽप्येते डित्थादयः शब्दा यदृच्छाशब्दत्वेन प्रतीतास्तेऽपि जन्मनः प्रभृत्यामरणक्षणादनुवर्त्तमानाः प्रतिक्षणभेदभिन्नमसाधारणभेदेन वस्तु गमयितुमशक्ताः कालप्रकर्षमर्यादावच्छिन्नवस्तुसमवेतां जातिमभिधेयत्वेनोपाददते। अन्यथा हि बालाद्यवस्थाभेदपरिच्छिन्नवस्तुभागविषयतया निरूढाः कथं वृद्धाद्यवस्थोपहितभेदमपि वस्तु प्रतिपादयेयुः। येषामपि न क्षणिको देहः—किं तर्हि ? कालान्तरावस्थायीति दर्शनम्, तेषामपि यथाकालमपचीयमानावयवसम्बन्धादवयवापचयाद्वाऽन्यदन्यद्रव्यमवस्थाभेदेष्विति सिद्धम्। परिणतिदर्शनेऽपि यदवस्थाभेदसम्बद्धं वस्तु तच्छब्दवाच्यतया प्रतिज्ञातं ततश्चावस्थान्तरं समाश्रयेत तदेव वस्तु तेन शब्देन नाभिधीयेत, यथा पयसि विनिश्चिताभिधानशक्तिः क्षीरशब्दो न दध्नि प्रवर्त्तते, तथा शरीरेऽपि नावस्थान्तरे प्रवर्त्तेतेति जातिरवश्याभ्युपगन्तव्या। अथवामा भूद्वस्तुभूता जातिस्तथाऽपि नाव्यापिनी व्यवस्था। तथाहि—त एव भेदा अवि वक्षितभेदाः सामान्यमिति सर्वत्र जातिशब्दैरुपादीयन्त इति य- 371/k
दृच्छाशब्दा जातिशब्देभ्यः पृथग्लक्षणकारेण निर्दिष्टा इत्याह—प्रसिद्धेस्त्विति। गवादयो हि शब्दालोके जातिशब्दतया प्रतीताः, चित्राङ्गदादयस्तु संज्ञाशब्दत्वेनेति पृथग्वचनम् १२२६ § 4182

नन्वित्यादिना परश्चोदयति। § 4183

नन्वन्यापोहवाच्यत्वाज्जातिशब्दस्तु केवलः।
विवक्षापरतन्त्रत्वाद्विवक्षाशब्द एव वा॥
१२२७॥§ 4185

सत्यमित्यादिना प्रतिविधत्ते। § 4186

सत्यं लोकानुवृत्त्येदमुक्तं न्यायविदेदृशम्।

इयानेव हि शब्दोऽस्मिन्व्यवहारपथं गतः॥
१२२८॥§ 4188

इयानेव हीति। पञ्चप्रकारः संज्ञाजातिगुणक्रियाद्रव्यशब्दभेदेन॥ १२२८॥ § 4189

ननु यदि स्वमतसिद्धैव कल्पनाऽभिप्रेता किमर्थं तर्हि अन्ये त्वर्थशून्यैः शब्दैरेव विशिष्टोऽर्थ उच्यते इत्यनेन ग्रन्थेन पृथक्स्वमतसिद्धा कल्पना पश्चादुपवर्णिताऽऽचार्येणेत्याह—ते तु जात्यादय इति। § 4190

ते तु जात्यादयो नेह लोकवद्व्यतिरेकिणः।
इत्येतत्प्रतिपत्त्यर्थमन्ये त्वित्यादिवर्णितम्॥
१२२९॥§ 4192

एतदुक्तं भवति—न सावलेयादिव्यक्तिव्यतिरिक्ता जात्यादयः पारमार्थिकाः सन्ति सांवृतास्त इत्यस्यार्थस्य प्रतिपादनार्थमुक्तमिदं लक्षणकारेण, नतु पृथगपरांकल्पनां दर्शयितुमिति। अन्य इति। बौद्धाः। अर्थशून्यैरिति। जात्यादिनिरपेक्षैरपोहमात्रगोचरैः शब्दैः। इत्याचार्यग्रन्थस्यार्थः॥ १२२९॥ § 4193

न केवलमस्माभिरियमभिलापिनी प्रतीतिः कल्पनाऽभ्युपगता, परैरप्यवश्याभ्युपगन्तव्या, अन्यथा जगदव्यवहार्यमेव स्यादिति दर्शयन्नाह—जात्यादियोजनांयेऽपीति। § 4194

जात्यादियोजनां येऽपि कल्पनां समुपाश्रिताः।
तैरभ्युपेया नियतं प्रतीतिरभिलापिनी॥
१२३०॥§ 4196

अन्यथा योजनाभावाद्युक्तयोरिव भावयोः।
स्वातन्त्र्येण परिच्छेदात्कल्पना नैव कल्प्यते॥
१२३१॥§ 4198

एवं वा व्यवहार्यं स्यात्सर्वं विश्वमिदं ततः।
जात्यादिरूपसंसृष्टं व्यवहार्यमिदं मतम्॥
१२३२॥§ 4200

372/k

जात्यादियोजना शब्दयोजनाऽव्यभिचारिणी।
एवं चोच्यत इत्येतत्फलवज्ज्ञायते वचः॥
१२३३॥§ 4202

जातिगुणक्रियाद्रव्ययोजनायामपि कल्पनायां परैरभ्युपगतायां नामयोजनैव कल्पना। तथाहि—तत्र जात्यादिव्यवच्छिन्नं वस्तु नाम्नैव विशिष्टं गृह्यते, अन्यथा हि स्वातन्त्र्येणानेकपदार्थग्रहणवद्योजनाभावात्कथं कल्पना भवेत्, ततश्च मूकमेव जगत्स्यात्। अतएव च दण्डयुक्तं पुरुषं पश्यन्नपि न तावद्दण्डीति योजयति यावन्ननामभेदं स्मरति। यत एव शब्दयोजनया सर्वा योजनाव्याप्ता, अतएव चाचार्यीयंजात्या विशिष्टोऽर्थ उच्यते गौरित्यादिषु यदुच्यत इति वचनं तत्सफलं भवेत्। अन्यथा विना नाम्ना कथमुच्यत इति स्यात्। अभिधानक्रियायाः शब्दधर्मत्वात् ॥ १२३०॥ १२३१॥ १२३२॥ १२३३॥ § 4203

तस्मादित्यादिना कल्पनासिद्धिमुपसंहरति। § 4204

तस्मात्समस्तसिद्धान्तसंस्थितानां प्रवादिनाम्।
अविवादादयत्नेन साध्येयं कल्पना मता॥
१२३४॥§ 4206

लक्षणकारस्य कल्पनां द्विरूपां निर्दिशतोऽभिप्रायमाह—एतदागूर्येति। § 4207

एतदागूर्य सकलं नामजात्यादिवर्णनम्।
मतयोः स्वान्ययोरित्थमुपादानमिहाकरोत्॥
१२३५॥§ 4209

तेभ्योऽस्माकभियानेव भेद इत्येवमब्रुवन्।
अन्ये त्वित्यादिकं वाक्यमनन्तरमदो जगौ॥
१२३६॥§ 4211

३ मता] Correction: ; मया (sic!)मता
४ द्विरूपां] Correction: ; सिद्धिरूपां (sic!)द्विरूपां

हेयोपादेयविषयकथनं जात्यादियोजनां विना नामयोजनां विना भाविनीत्यादि पूर्वोपवर्णितम्। नामजात्यादिवर्णनमिति। अकरोदिति सम्बन्धः। स्वान्ययोस्तु मतयोरुपादानं हेयोपादेयविषयकथनाय॥ १२३५॥ १२३६॥
§ 4212

न्यायमुखग्रन्थस्तर्हि कथं नेय इत्याह—एवमित्यादि। § 4213

एवं न्यायमुखग्रन्थो व्याख्यातव्यो दिशाऽनया।
ज्ञानमित्यभिसम्बन्धात्प्रतीतिस्तत्र चोदिता॥
१२३७॥§ 4215

तत्रायं न्यायमुखग्रन्थः— यत् ज्ञानमर्थरूपादौ विशेषणभिधायकाभेदोपचारेणाविकल्पकं तदक्षमक्षं प्रति वर्त्तत इति प्रत्यक्षम् विशेषणं जात्यादि, अभिधायकं नाम, तयोरभेदोपचारो जात्यादिमद्भिः संज्ञिना च। अभेदोप-
373/k चारग्रहणमुपलक्षणम् यत्रापि भेदेन ग्रहणमस्य गोत्वमस्येदं नामेति, तत्रापि कल्पनेष्यत एव। ननु चानुप्रतीतिः कल्पनेति नोक्तं, तत्कथं यथोक्तकल्पना लभ्यत इत्याह—ज्ञानमित्यभिसम्बन्धादिति। एतदुक्तं भवति—कल्पनावैपरीत्येन ज्ञानमेव प्रत्यक्षत्वेन दर्शयता ज्ञानधर्मत्वं कल्पनाया दर्शितम्। तथाचायमर्थो भवति—यज्ज्ञानं नामाद्यभेदोपचारेणाविकल्पकं तत्प्रत्यक्षं, यत्तु ज्ञानं तथाविकल्पकं तत्कल्पनात्मकत्वान्न प्रत्यक्षमिति सामर्थ्यादभिलापिनी प्रतीतिः कल्पनेति प्रत्यक्षवैपरीत्येन सिध्यति एवं परापरमतङ्ग्रहो दर्शित इति॥ १२३७॥ § 4216

यद्वा स्वमतोपवर्णनमेव केवलमाचार्येण कृतमित्यादर्शयति—यद्वेत्यादि।
§ 4217

यद्वा विशेषणं भेदो येनान्यापोहकृच्छ्रुतिः।
जात्यादीनां व्यवच्छेदमनेन च करोत्ययम्॥
१२३८॥§ 4219

भेदो विशेषणं व्यावृत्तिरित्यर्थः। तस्याभिधायकं, न जात्यादीनां, तस्याभेदोपचार इति विग्रहः॥ १२३८॥ § 4220

ननु च यदि प्रतीतिरभिलापिनी कल्पना, सा धर्मिणी, नच धर्म्यन्तरे धर्म्यन्तरस्य प्रसङ्गो येन तन्निषेधस्तद्धर्मतया क्रियत इत्यसम्बन्धाभिधानम्। तथा यदि प्रत्यक्षं कल्पनापोढम्, कत्वं (थं ?) तत्प्रत्यक्षशब्देनोच्यत इति, अनभिधेयार्थः किल कल्पनापोढार्थ इति मन्वानाः परे भर्गभारद्वाजप्रभृतयश्चोदयन्ति। एतच्च सर्वं परिहृतमेवेति योजयन्नाह—एवं प्रतीतिरूपा चेत्यादि।
§ 4221

एवं प्रतीतरूपा च यदेवं कल्पना मता।
तादात्म्यप्रतिषेधश्च प्रत्यक्षस्योपवर्ण्यते॥
१२३९॥§ 4223

तदाऽध्यक्षादिशब्देन वाच्यत्वेऽपि न बाध्यते।
कल्पनाविरहोऽध्यक्षे न हि सा शब्दवाच्यता॥
१२४०॥§ 4225

अन्यथा रूपगन्धादेः सविकल्पकता भवेत्।
अतो नास्पदमेवेदं यदाहुः कुधियः परे॥
१२४१॥§ 4227

यदि प्रत्यक्षशब्देन प्रत्यक्षमभिधीयते।
कथं तत्कल्पनापोढमयुक्तं गम्यते कथम्॥
१२४२॥§ 4229

तादात्म्यप्रतिषेध इति। यत्रैषा कल्पना नास्ति तत्प्रत्यक्षमित्यनेन ग्रन्थेनलक्षणकारस्तादात्म्यप्रतिषेधं करोति। एवंभूतं कल्पनात्मकं यज्ज्ञानं न भवतीत्यर्थः। नत्वाधेयनिषेधमिति प्रथमं तावदचोद्यम्। द्वितीयमप्यचोद्यमेव, 374/k
यतो नानभिधेयार्थः कल्पनापोढार्थो वर्णितः। किं तर्हि ? अविकल्पकार्थः। अविकल्पकमपि ज्ञानं यद्यप्यभिधीयते शब्देनाध्यवसायानुरोधात्। तथापि रूपादिवन्न विकल्पकतां यास्यतीति यत्किंचिदेतत्॥ १२३९॥ १२४०॥ १२४१॥ १२४२॥ § 4230

स्यादेतत्—भवत्वेवं यथोपवर्णिता कल्पना। कल्पनापोढं तु कथं सिद्धमित्याह —प्रत्यक्षमित्यादि। § 4231

प्रत्यक्षं कल्पनापोढं वेद्यतेऽतिपरिस्फुटम्।
अन्यत्रासक्तमनसाऽप्यक्षैर्नीलादिवेदनात्॥
१२४३॥§ 4233

अनेन स्वसंवित्त्या प्रत्यक्षतः कल्पनाविरहः सिद्ध इत्यादर्शयति॥ १२४३॥ § 4234

स्यादेतदसावेव विषयान्तरव्यासक्तो विकल्पः पुरस्थं नीलादि प्रतिपद्यत इत्याह —नासावेवेत्यादि। § 4235

नासावेव विकल्पो हि तमर्थं प्रतिपद्यते।
अतीताद्यभिधात्यागात्तन्नामघटनाप्तितः॥
१२४४॥§ 4237

यदि हि स एव विकल्पस्तमर्थं प्रतिपद्येत तदाऽतीताद्यर्थाभिधानत्यागेन तस्यैव नीलादेर्नाम योजयेत्। एकत्राभिलापद्वयसंसर्गाप्रतीतेरतीताद्यभिधात्यागादित्युक्तम्। तस्याभिमुखीभूतस्य नाम, तन्नाम, तस्य घटना—योजना, तस्या आप्तिः— प्राप्तिः। प्रसङ्ग इति यावत्॥ १२४४॥ § 4238

स्यान्मतम्—अन्य एव तर्हि विकल्पस्तदा तमर्थं प्रतिपद्यत इत्येवं कस्मान्न विज्ञायत इत्याह—तदा तन्नामेत्यादि। § 4239

तदा तन्नामसंसर्गी विकल्पोऽस्त्यपरो न च।
दृश्यस्याप्रतिसंवित्तेरनिष्टेश्च द्वयोः सकृत्॥
१२४५॥§ 4241

अनेन यथाक्रमं प्रत्यक्षविरोधम्, अभ्युपगमविरोधं च सकृद्विकल्पद्वयप्रतिज्ञायामाह—द्वयोरिति। विकल्पयोरिति शेषः॥ १२४५॥ § 4242

विकल्पेत्यादिनोपसंहरति। § 4243

विकल्पकमतो ज्ञानसहभाव्यनुभूयते।
तस्मादिन्द्रियविज्ञानमकल्पनमिदं स्फुटम्॥
१२४६॥§ 4245

विकल्पसहभावित्वमसिद्धमिति कदाचित्परो ब्रूयादतस्तदाशङ्कयन्नाह—क्रमेणेत्यादि। § 4246
375/k

क्रमेणैवोपजायन्ते विज्ञानानीति चेन्मतम्।
सकृद्भावाभिमानस्तु शीघ्रवृत्तेरलातवत्॥
१२४७॥§ 4248

यदि क्रमेणोपजायन्ते कथं युगपत्प्रवेद्यन्त इत्याह—सकृद्भावाभिमानस्त्विति। अलात इवालातवत्। यथाऽलाते शीघ्रभ्रमणात्सकृच्चक्राकारा प्रतीतिस्तद्दर्शनानां घटनादेवं ज्ञानानां शीघ्रोत्पत्तितः सकृद्भावाभिमान इति। अथवा—अलातशब्देन विषयिणि ज्ञाने विषयोपचारात्तद्विषयाणि ज्ञानान्युच्यन्ते। पूर्ववद्वृत्तिः॥ १२४७॥ § 4249

नेति पूर्वपक्षं प्रतिक्षिपति। § 4250

न तदाऽभिमुखीभूतभावनामानुषङ्गवान्।
विकल्पो विद्यते दृश्य इत्येवोक्तं न॰॰ना॥
१२४८॥§ 4252

एवं मन्यते—न सकृद्भावप्रसाधनमत्र प्रकृतम्, किं तर्हि ?। धियः कल्पनाविरहः। स चान्यत्र गतचित्तस्याप्यभिमुखीभूतपदार्थानुभवकाले तन्नामसंसर्गिणो विकल्पस्योपलब्धिलक्षणप्राप्तस्यानुपलब्ध्या सिध्यतीति नात्र किंचिद्दूषणमुक्तम्। तथाहि यदि नाम क्रमेण ज्ञाने संवेद्येते नतु विकल्पः संवेद्यत इति न प्रकृतस्य व्याघातः ॥ १२४८॥ § 4253

न चायं सकृद्भावाभिमानोऽपि भ्रान्त इत्यादर्शयन्नाह—भ्रान्तिरित्यादि। § 4254

भ्रान्तिस्तदभिमानश्च तद्व्यक्तं च निरन्तरम्।
तदेव चार्थविज्ञानयौगपद्यमतः स्फुटम्॥
१२४९॥§ 4256

भ्रान्तिर्नेति प्रकृतं संबन्धनीयम्। तदभिमान इति। तस्य—सकृद्भावस्याभिमान इति विग्रहः। बाधकप्रमाणवशाद्धि भ्रान्तिव्यवस्थानं, नचात्र बाधकमस्ति, येन भ्रान्तिः स्यात्। कथं नास्तीत्याह—तद्व्यक्तं च निरन्तरमिति। तदित्यभिमुखीभूतार्थसंवेदनं निरन्तरविषयान्तरासक्तचित्तसमकालं स्पष्टमनुभूयते। तदेव चेदृशमर्थविज्ञानं प्रत्यक्षमुच्यत इति कुतो भ्रान्तिः॥ १२४९॥ § 4257

न केवलं सकृद्भावस्य भ्रान्तत्वव्यवस्थां प्रति न किंचित्साधकमस्ति, प्रत्युत बाधकमस्तीति दर्शयन्नाह—नर्त्तकीत्यादि। § 4258

नर्त्तकीदृष्टयवस्थादावखिलं वेद्यते सकृत्।
बहुभिर्व्यवधानेऽपि भ्रान्तिःसा चा(श्चेदा ?)शुवृत्तितः
१२५०§ 4260

लतातालादिबुद्धीनामत्यर्थं लघुवर्त्तनम्।
सकृद्भवाभिमानोऽतः किमत्रापि न वर्त्तते॥
१२५१॥§ 4262

376/k

शुद्धे च मानसे कल्पे व्यवसीयेत न क्रमः।
अल्पा च सर्वबुद्धीनामाशुवृत्तिश्चिरास्थितेः॥
१२५२॥§ 4264

अतः सर्वत्र विषये न क्रमग्रहणं भवेत्।
सकृद्ग्रहणभासस्तु भवेच्छब्दादिबोधवत्॥
१२५३॥§ 4266

एकैका धीः पञ्चभिर्धीभिर्व्यवधीयमानाऽपि नर्त्तकीदर्शनाद्यवस्थायामव्यवहितेवप्रतिभाति। तथाहि—यदैव नर्त्तकीमुत्पश्यति तदैव गीतादिशब्दं शृणोति, कर्पूरादिरसमास्वादयति, नासिकापुटविन्यस्तकुसुमामोदं जिघ्रति, व्यजनानिलादिस्पर्शं च स्पृशति, वस्त्राभरणादिदानादि च चिन्तयति। ततश्च यदि बहुभिर्व्यवधानेऽपि बुद्धीनां सकृद्भावभ्रान्तिराशूत्पत्तिबलादुपजायते, तदा लता तालः सरो रस इत्येवमादावेकैकज्ञानव्यवधानाद्वर्णश्रुतीनामत्यर्थं लघुवर्त्तनमस्तीति सकृद्वर्णप्रतिभासः प्राप्नोति। ततश्च सरो रस इत्यादौ शब्दे श्रूयमाणे श्रुतिभेदोऽर्थप्रतीतिभेदश्च न स्यात्। किंच—बुद्धेर्विजातीयचक्षुरादिविज्ञानाव्यवहिते नानाविद्यार्थचिन्तारूपे विकल्पे समुत्पद्यमाने शीघ्रवृत्तिरस्तीति न क्रमव्यवसायः प्राप्नोति। सर्वासां च बुद्धीनां क्षणिकत्वेन चिरानवस्थानादाशुवृत्तिरस्तीति कस्यचिदर्थस्य न क्रमवती प्रतीतिः स्यात्। शब्दादिबोधवदिति। नर्त्तकीप्रेक्षावस्थायां शब्दादिसंवेदनवत्॥ १२५०॥ ॥ १२५१॥ १२५२॥ १२५३॥ § 4267

यश्चायमलातवदिति दृष्टान्तः स साध्यविकल इति दर्शयन्नाह—अलातेऽपीत्यादि। § 4268

अलातेऽपि सकृद्भ्रान्तिश्चक्राभासा प्रवर्त्तते।
न दृशां प्रतिसन्धानाद्विस्पष्टं प्रतिभासनात्॥
१२५४॥§ 4270

तथाहि प्रतिसन्धानं स्मृत्यैव क्रियते ननु।
दर्शनेन व्यतीतस्य विषयस्यानवग्रहात्॥
१२५५॥§ 4272

यश्चास्या विषयो नासौ विनष्टत्वात्परिस्फुटः।
ततः परिस्फुटो नायं चक्राभासः प्रसज्यते॥
१२५६॥§ 4274

यतो नेयं मानसी भ्रान्तिः क्रमवर्त्तिनी दर्शनानि घटयन्ती समुपजायते, किं तर्हि ?, सकृदेकैवेन्द्रियजा चक्राकारा भ्रान्तिः सामग्रीविशेषबलादुत्पद्यते, विस्पष्टप्रतिभासत्वात्। नहि विकल्पानुबद्धस्य स्पष्टप्रतिभासित्वं युक्तम्। तथाहि—घटना क्रियमाणा स्मृत्यैव क्रियते, नेन्द्रियज्ञानेन, तस्य वस्तुस- 377/k
न्निधानबलभाविनोऽतीतार्थग्रहणासामर्थ्यात्। यश्चास्याः स्मृतेर्विषयो नासौ परिस्फुटः, कस्मात् ? विनष्टत्वात्। तस्मादस्पष्टाभत्वप्रसङ्गान्नेयं मानसी भ्रान्तिः। किं तर्हि ?, इन्द्रियजा, इति साध्यविकलो दृष्टान्तः॥ १२५४॥ १२५५॥ १२५६॥ § 4275

एवं प्रत्यक्षतो धियः कल्पनाविरहं प्रतिपाद्य सांप्रतमनुमानतः प्रतिपादयति—यदि चेत्यादि। § 4276

यदिवा यस्य भावस्य यद्रूपस्थितिकारणम्।
न विद्यते न तत्त्वेन स व्यवस्थाप्यते बुधैः॥
१२५७॥§ 4278

अविद्यमानसास्नादिर्यथा कर्को गवात्मना।
विशेषणविशिष्टार्थ ग्रहणं न च विद्यते॥
१२५८॥§ 4280

सविकल्पकभावस्य स्थितेराक्षे निबन्धनम्।

३ यदिवा यस्य] Correction : ; यदि चाप्यस्य (sic !)यदिवा यस्य
६ विशिष्टार्थ] Correction : ; विशिष्टार्थं (sic !)विशिष्टार्थ

विपक्षः शाबलेयादिरन्यथाऽतिप्रसज्यते॥
१२५९ ॥§ 4282

नचाप्रसिद्धता हेतोर्जात्यादेः प्रतिषेधतः।
भेदेन चापरिच्छेदान्नचास्त्येवं विशेषणम्॥
१२६० ॥§ 4284

प्रयोगः—यस्य यद्रूप व्यवस्थितौ निमित्तं नास्ति न तत्तथा प्रेक्षावद्भिर्व्यवहर्तृभिर्व्यवस्थाप्यते, तद्यथा—अविद्यमानगोप्रज्ञप्तिनिमित्तभूतककुदादिसमुदायः कर्को गोत्वेन। नास्ति च प्रत्यक्षस्य नीलाद्यसाधारणविषयबलेनोत्पद्यमानस्य सविकल्पकभावव्यवस्थितौ विशेषणविशिष्टार्थग्रहणं निमित्तमिति कारणानुपलब्धिः। वैधर्म्येण शाबलेयबाहुलेयादयः। सर्वथा सर्वस्य व्यवस्थानप्रसङ्गो व्यवस्थापयितुश्चाप्रेक्षापूर्वकारिताप्रसङ्गो बाधकं प्रमाणमिति संक्षेपार्थः। कर्कः—शुक्लोऽश्वः। जात्यादेरिति। विशेषणस्येति शेषः। सन्तु नाम वस्तुभूता जात्यादयस्तथाऽपि नासिद्धतेति दर्शयन्नाह—भेदेन चापरिच्छेदादिति। विशेष्यत्वेनाभिमताद्रूपादेरित्यध्याहार्यम्। यदि नाम भेदेनापरिच्छेदो जातस्तथापि विशेषणं कस्मान्न भवतीत्याह—नचास्त्येवमिति। भेदेनापरिच्छिन्नम्। तस्माद्विशेषणविशिष्टार्थग्रहणं न विद्यत इत्यस्य हेतोर्नासिद्धता॥ १२५७॥ १२५८॥ १२५९॥ १२६०॥ § 4285

स्यादेतन्माभूज्ज्ञात्यादिकं विशेषणं, शब्दस्वरूपमेव तु विशेषणं भविष्यतीत्याह—नामापीत्यादि। § 4286
378/k

नामपि वाचकं नैव यच्छब्दस्य स्वलक्षणम्।
स्वलक्षणस्य वाच्यत्ववाचकत्वे हि दूषिते॥
१२६१ ॥§ 4288

अध्यारोपितमेवातो वाच्यवाचकमिष्यते।
अनारोपितमर्थं च प्रत्यक्षं प्रतिपद्यते॥
१२६२ ॥§ 4290

४ यद्रूप] Correction : ; यद्रूपं
(sic !)यद्रूप

स्वलक्षणस्य सद्भावे
सद्भावात्तदभावतः।व्यवधानादिभावे च तस्यापि
व्यतिरेकतः॥ १२६३॥§ 4291

नहि स्वलक्षणे सङ्केतः, नापि शब्दस्वलक्षणे, तयोर्व्यवहारकालेऽनन्वयात्। नच स्वलक्षणव्यतिरेकेणान्यच्छब्दस्वरूपमस्ति। नचासङ्केतितोऽर्थः शब्देन योज्यतेऽतिप्रसङ्गात्। नापि शब्दयोजनमन्तरेण विकल्पः। तस्मादध्यारोपित एव वाच्यवाचकभावो न पारमार्थिकः। स्यादेतदारोपितेमेवार्थं तर्हि प्रत्यक्षं प्रतिपद्यमानं सविकल्पकं भविष्यतीत्याह—अनारोपितमित्यादि। तदभावत इति। तस्यापि व्यतिरेकत इति सम्बन्धः। तस्य स्वलक्षणस्याभावात्तस्यापि प्रत्यक्षस्य व्यतिरेकतोऽभावादिति यावत्। कदा स्वलक्षणस्याभाव इत्याह—व्यवधानादीति। आदिशब्देनदेशकालविप्रकर्षादिः॥ १२६१॥ १२६२॥ १२६३॥ § 4292

अशक्यसमय इत्यादिना प्रमाणान्तरमप्याह— § 4293

अशक्यसमयो ह्यात्मा नीलादीनामनन्यभाक्।
तेषामतश्च संवित्तिर्नाभिजल्पानुषङ्गिणी॥
१२६४॥§ 4295

नीलादीनामात्मा—स्वभावः, अशक्यसमयः—अशक्यसङ्केतः। कथमिति प्रश्ने कारणमाह—अनन्यभागिति। अनन्यभाक्—असाधारणः। व्यवहारकालाप्रत्युपस्थायीति यावत्। व्यवहारार्थत्वात्समयस्येति नात्र शब्दसङ्केतः। किंच—विषयीकृते चायं समयो भवति नाविषयीकृते, न तावदनुत्पन्नं प्रत्यक्षं नीलाद्यात्मानंविषयीकरोति, उत्पन्नं चाभिलापमादाय योजयेत्। उत्पत्तिकालेऽभिलापग्रहणकाले च क्षणिकत्वान्न विषयेणापि प्रत्यक्षं विषयीति केन कुत्र योजनमित्यतोऽप्यशक्यसमयो नीलादीनामात्मा। तेषामिति। नीलादीनाम्। नाभिजल्पानुषङ्गिणीति। नाविष्टाभिलापा। तत्र प्रयोगः—यद्यत्रागृहीतसमयं न तत्तत्र सविकल्पकं भवति, तद्यथा—चक्षुर्विज्ञानं गन्धे, अगृहीतसमयं च प्रत्यक्षं नीलाद्यात्मनीति व्यापकविरुद्धोपलम्भः॥ १२६४॥
§ 4296

379/k

नन्वित्यादिना प्रथमे हेतौ सुमतेर्दिगम्बरस्य मतेनासिद्धतामाशङ्कते।
§ 4297

ननु नामादिकं माभूत्तस्य ग्राह्यं विशेषणम्।

तथाऽप्यसिद्धता हेतोर्नैव व्यावर्त्तते यतः॥
१२६५॥§ 4299

अर्थान्तरव्यवच्छिन्नरूपेणाग्रहणं यदि।
अर्थमात्रग्रहो वा स्यादग्रहो वा घटे यथा॥
१२६६॥§ 4301

घटान्तरव्यवच्छिन्नरूपेणाग्रहणं यदि।
घटमात्रग्रहो वा स्यादग्रहो वा घटस्य वै॥
१२६७॥§ 4303

स हि सामान्यविशेषात्मकत्वेनोभयरूपं सर्वं वस्तु वर्णयति। सामान्यं च द्विरूपम्। विशेषेणावच्छिन्नं यथा गोत्वादि, अनवच्छिन्नं यथा सत्तावस्तुत्वादि। तत्र यदनवच्छिन्नमेकरूपं तदालोचनामात्रस्य निर्विकल्पकप्रत्यक्षस्य गोचरः। इतरत्पुनः सविकल्पकस्येत्येषा तस्य प्रक्रिया। कुमारिलस्तु—आलोचनाज्ञानं निर्विकल्पकं व्यक्तिस्वलक्षणविषयं वर्णयति। सामान्यविषयं तु सविकल्पकं प्रत्यक्षम्। तत्र सुमतिःकुमारिलाद्यभिमतालोचनामात्रप्रत्यक्षविचारणार्थमाह। तद्वादीदं प्रष्टव्यः। किं तदिन्द्रियस्य पुरःस्थितमर्थमात्रं स्वेन रूपेणार्थान्तराऽसम्भविना विशिष्टं गृह्यते ? नेति। यद्यसौ ब्रूयान्नेति। अत्रोच्यते—अर्थान्तरव्यवच्छिन्नरूपेणाग्रहणं यदि—विवक्षितादर्थाद्यदर्थान्तरं, ततो व्यवच्छिन्नं—तत्राविद्यमानं विवक्षितार्थस्थं रूपं—स्वभावः, तेन विशिष्टस्य यदि तस्यार्थस्याग्रहणमिष्यते, तदा तदर्थमात्रग्रहो वा स्यात्—यत्तदर्थमात्रमर्थान्तरासम्भविस्वभावरहितं तस्यैव ग्रहणं स्यात्। अथ तदपि न गृह्यते, तदा, अग्रहो वा—अग्रहणमेव स्यात्। घटे यथेति निदर्शनमुक्तं तच्छ्लोकान्तरेण व्याचष्टे—घटान्तरेत्यादि। अवधीकृतघटासम्भविना रूपेण यदि तस्य घटस्याग्रहणं तदा घटमात्रग्रहो वा स्यात्—केनचिद्राजतताम्रादिना विशेषेणाविशिष्टस्य घटमात्रस्य ग्रहणं स्यात्। घटमात्रस्यापि ग्रहणं न भवति तदा कस्यचिदप्यभिमतस्यापि न ग्रहणं स्यादित्यग्रहो वा घटस्य वै। एवमत्रापि दार्ष्टान्तिके विशेषाग्रहणेऽर्थमात्रग्रहणं न ग्रहणं वा स्यादित्येकान्तः॥ १२६५॥ १२६६॥ १२६७॥ § 4304

अथ पूर्वकः पक्षः, अत्राह—ग्राह्यान्तरेत्यादि। § 4305

१७ सम्भवि] Correction : ; सम्भवि— (sic !)सम्भवि

ग्राह्यान्तरव्यवच्छिन्नं भावेन ग्राहि चेन्मतम्।
सविकल्पकविज्ञानं भवेद्वृक्षादिबोधवत्॥
१२६८॥§ 4307

380/k

यदि परत्रासम्भविना स्वरूपेण विशिष्टार्थग्राहीन्द्रियज्ञानमभिप्रेतं तदा सविकल्पकं प्राप्नोति, केनचिद्रूपेण विशिष्टार्थग्राहित्वात्, वृक्षोयमित्यादिबोधवत्॥ १२६८॥ § 4308

स्यान्मतम्—नार्थमात्रं नाम किंचिदस्ति यत्स्वरूपेण विशिष्य गृह्यते। किं तर्हि ? यत्तद्विशिष्टं रूपं तव मम विशेषाभिमतं तदेवास्ति गृह्यते चेति, अत आह—विशेषोऽस्पष्टसामान्यो नच कश्चन विद्यत इति। § 4309

विशेषोऽस्पृष्टसामान्यो न च कश्चन विद्यते।
ग्रहणे चेत्तदस्पष्टं विभावत्वान्न गृह्यते॥
१२६९॥§ 4311

अत्र मात्रं नाम सामान्यमुच्यते, यत्तत्सत्तेत्याख्यायते, तन्निरपेक्षो न कश्चिद्विशेषो विद्यते, यो गृह्येत तत्र। एतत्स्यात्—त्वन्मत्या यद्यपि तदस्ति सामान्यं,ग्रहणकाले तु तन्न स्पृश्यत इत्याह—ग्रहणे चेत्तदस्पष्टं विभावत्वान्न गृह्यत इति। ग्रहणकाले यदि तत्सामान्यं सत्ताख्यं इन्द्रियज्ञानेन न स्पृश्यते, विशेषमात्रमेव गृह्यते, तदा तद्विशेषमात्रं गृह्यमाणं भावरहितं सत्ताख्यस्वभावविकलं निःस्वभावं प्राप्तमिति नेन्द्रियज्ञानग्राह्यं स्यात्, विभावत्वात्—विगतभावत्वात्। वियत्पुष्पवदिति॥ १२६९॥ § 4312

विशिष्टविषयो बोधः कल्पना नेति साहसम्।
न विशेषणसम्बन्धादृते वैशिष्ट्यसम्भवः॥
१२७०॥§ 4314

तस्माद्विशिष्टविषयो बोधोऽथ न कल्पना नास्तीति साहसमेतद्भवतां प्रमाणबाधितमभ्युपगच्छतामित्युपसंहारः। अत्रैवोपपत्तिमाह—न विशेषणेत्यादि। नहि दण्डसम्बन्धमन्तरेण तद्वान्भवति, तद्वद्विशिष्टोऽपि विशेषसम्बन्धमन्तरेण न युक्तइति भावः। तस्माद्यद्विशेषणसम्बन्धग्रहणं तत्सविकल्पमिति। प्रयोगः—विनादास्पदीभूतं विशिष्टविषयं ज्ञानं सविकल्पकं, विशिष्टविषयत्वात्, पटोऽयमित्यादिज्ञानवदिति॥ १२७०॥ § 4315

सजातीयेत्यादिना प्रतिविधत्ते। § 4316

सजातीयविजातीयव्यावृत्तार्थग्रहान्मतः।
विशिष्टविषयो बोधो न विशेषणसङ्गतेः॥
१२७१॥§ 4318

यदत्र यदि व्यतिरिक्तविशेषणसम्बन्धात् (इति) विशिष्टविषयत्वादिति हेत्वर्थः, तदा न सिद्धो हेतुः, तथाहि—न बौद्धस्य विशेषणं नाम किंचिदस्ति। येन
381/k तत्स म्बन्धग्रहणाद्विशिष्टविषयो बोधः स्यात्, किं तर्हि सजातीयविजातीयेभ्यो व्यावृत्तस्यार्थमात्रस्य ग्रहात्—ग्रहणान्मतो विशिष्टविषयो बोधः॥ १२७१॥
§ 4319

कथं तर्हि विशिष्टत्वमस्य वैशिष्ट्यमस्येत्यादि व्यपदेशो व्यतिरेकीवेत्याह—भेद इत्यादि। § 4320

भेदो वैशिष्ट्यमुक्तं हि न विशेषणसङ्गितः।
भिन्नमित्यपि तद्वाचा नानुविद्धं प्रतीयते॥
१२७२॥§ 4322

भेदः सजातीयविजातीयेभ्यो व्यावृत्तिः। सा च नान्या व्यावृत्ताद्भावात्, भाव एव हि भेदान्तरप्रतिक्षेपेण तन्मात्रजिज्ञासायां तथोच्यते। स्यादेतत्—यदि विजातीयसजातीयेभ्यो भिन्नस्य वस्तुनो ग्रहणं नियमेन तर्हि सविकल्पकं ग्रहणं प्राप्तंभिन्नमेतदित्येवमाकारप्रवृत्तत्वात्। अन्यथा कथं तद्विषयं स्याद्यद्न्याकारप्रवृत्तं भवेत्, नह्यन्याकारप्रवृत्तं तद्विषयं युक्तमतिप्रसङ्गादित्याशङ्क्याह—भिन्नमित्यपि तदित्यादि॥ १२७२॥ § 4323

कथं तर्हि भिन्नमित्यभिधीयत इत्याह—स्वभावापरेत्यादि। § 4324

स्वभावापरनिःशेषपदार्थव्यतिरेकिणि।
गृहीते सति तस्मिंस्तु विकल्पो जायते तथा॥
१२७३॥§ 4326

स्वभावादपरे ये निःशेषाः पदार्थास्तेभ्यो व्यतिरेकिणि व्यावृत्ते गृहीते सत्यसाधारणनीलाद्याकारप्रतिभासनात्पश्चाद्भेदाध्यवसायी शब्दाकारानुस्मृतो भिन्नमित्यभिलपन्नुत्पद्यते विकल्पः। नचेदस्वभिलापस्वभावं तत्संसृष्टात्मतत्त्वं वा, येन भिन्नमित्यभिन्नमिति नाम्ना संयोज्यग्रहणे सति गृहीतं स्यात्। तस्मादसिद्ध एव हेतुः १२७३ § 4327

अथ व्यावृत्तिवशाद्विशिष्ट इति कृत्वा विशिष्टविषयत्वादिति हेत्वर्थः, नार्थान्तरविशेषणसम्बन्धात्। तदाऽपि स्वतो नैकान्तिको हेतुरिति दर्शयन्नाह—विशेषणेत्यादि। § 4328

विशेषणानवच्छिन्नं परैः सामान्यमिष्यते।
निर्विकल्पकविज्ञानग्राह्यं तत्राप्यतः समम्॥
१२७४॥§ 4330

द्विरूपं हि सामान्यं विशेषणावच्छिन्नरूपमनवच्छिन्नरूपं च। तत्र यदनवच्छिन्नरूपं तन्निर्विकल्पकविज्ञानग्राह्यमिष्टम्। तत्रापि—सामान्ये। अत एतद्विकल्पकविज्ञानग्राह्यत्वं तुल्यम्॥ १२७४॥ § 4331
382/k

कथमित्याह—विशेषाद्धीत्यादि। § 4332

विशेषाद्धि विशिष्टं तत्सामान्यमवगम्यते।
तद्ग्राहकमतः प्राप्तं विज्ञानं सविकल्पकम्॥
१२७५॥§ 4334

यद्यस्माद्विशेषाद्विशिष्टं—व्यावृत्तं, तत्सामान्यं प्रतीयते। अन्यथा सामान्यमेव न स्यात्ततो यदि न व्यावर्त्तेत। ततश्चास्यापि सामान्यस्य विशेषाद्व्यावृत्तस्य ग्राहकं विज्ञानं सविकल्पकं प्राप्नोति, विशिष्टविषयत्वात्। न च भवति त्वन्मतेन। तस्मात्त्वतोऽनैकान्त इति॥ १२७५॥ § 4335

अत्र किल तेनैन सुमतिना स्वयमाशङ्क्य सामान्येन हेतोरनैकान्तिकत्वं परिहृतं तदेवादर्शयति—निर्विशेषमित्यादि। § 4336

निर्विशेषं गृहीतश्चेद्भेदः सामान्यमुच्यते।
ततो विशेषात्सामान्यविशिष्टत्वं न युज्यते॥
१२७६॥§ 4338

नहि सामान्यं किंचिदस्ति विशेषेभ्यो व्यतिरिक्तस्वरूपं, यत्स्वरूपेण विशिष्टं गृह्यमाणं सविकल्पकविज्ञानगोचरः स्यात्, किन्तु निर्विशेषं गृहीता भेदा एव सामान्यमित्युच्यन्ते। प्रतिनियतस्वरूपनिरपेक्षाः प्रतीयमानाः सामान्यशब्दाभिधेया इति यावत्। ततश्च कुतस्तस्माद्विशेषात्सामान्यस्य विशिष्टत्वम्, येन तद्ग्राहकस्य सविकल्पना भवेत्॥ १२७६॥ § 4339

कथं तर्हि सामान्यविशेषयोरसङ्कीर्णा व्यवस्थेत्याह—वैषम्येत्यादि। § 4340

वैषम्यसमभावेन ज्ञायमाना इमे किल।

प्रकल्पयन्ति
सामान्यविशेषस्थितिमात्मनि ॥१२७७ ॥§ 4342

एत एव हि भेदाः समविषमतया संप्रज्ञायमाना यथाक्रमं सामान्यविशेषाभिधानाभिधेयतामनुभूय सामान्यविशेषव्यवहारयोर्विषयभेदं प्रकल्पयन्ति॥ १२७७॥ § 4343

वैषम्यसमभावोऽयमित्यादिना प्रतिविधत्ते। § 4344

वैषम्यसमभावोऽयं प्रविभक्तो यदीष्यते।
सामान्यस्य विशिष्टत्वं तदवस्थं विशेषतः॥
१२७८ ॥§ 4346

अथाविभक्त एवायमसङ्कीर्णा स्थितिः कथम्।
अन्योन्यापरिहारेण स्थितेर्गत्यन्तरं नच॥
१२७९ ॥§ 4348

प्रविभक्त इति। अमिश्रः। अन्यदेव सामान्यमन्य एव विशेष इति
383/k यावत्। सामान्यस्य विशेषतो विशिष्टत्वमित्युपलक्षणम्। तथा विशेषस्यापि सामान्यतो विशिष्टत्वमेव। द्वयोरपि परस्परस्वभावविवेकेन प्रविभक्तत्वात्। असङ्कीर्णा स्थितिरिति। अमिश्रीभूता। यथोक्तं तेनैव सुमतिना—सत्तादिसामान्यस्वभावानुविद्ध एव विशेषः साक्षात्क्रियते नान्यथा, ततो विशष्टविषयत्वमेव विशेष्यस्य युक्तं रूपम्, सामान्यं पुनरशेषविशेषनिरपेक्षं साक्षात्कर्तुं शक्यत इत्यविरुद्धमस्याविकल्पविषयत्व मिति। इयमसङ्कीर्णा स्थितिर्न स्यात्। न प्रविभक्तो नाप्रविभक्त इष्यत इति चेदाह—अन्योन्येत्यादि। अन्योन्यापरिहारस्थितिलक्षणानामेकस्वभावनिषेधस्यापरविधिनान्तरीयकत्वान्न राश्यन्तरमस्ति॥ १२७८॥ १२७९॥ § 4349

अपि च निर्विशेषं गृहीता भेदा इति परस्परव्याहतमिति दर्शयन्नाह—विशेषात्मातिरेकेणेत्यादि। § 4350

विशेषात्मातिरेकेण नापरं भेदलक्षणम्।
तद्रूपास्पर्शने तेषु ग्रहणं कथमुच्यते॥
१२८० ॥§ 4352

तद्रूपस्पर्शने चापि भेदान्तरविभेदिनः।
गृहीता इति विज्ञानं प्राप्तमेषु विकल्पकम्॥
१२८१॥§ 4354

भेदेभ्यो हि नान्यो विशेषः, तस्य च विशेषस्य सामान्यग्राहिणा ज्ञानेनासंस्पर्शे कथं भेदास्तेन गृहीता भवेयुः, अगृहीतस्वभावाव्यतिरेकात्तेप्य-गृहीता एवेति भावः। अथ गृहीता इति मतम्, तदा तद्रूपसंस्पर्शने—भेदरूपसंस्पर्शने ग्रहणे, गृहीताव्यतिरेकाद्गृहीतस्वभाववद्विशेषोऽपि गृहीत एवेति, एषु—भेदेषु, यत्सामान्यविषयत्वेनाभिमतं ज्ञानं तद्विकल्पकं प्राप्तम्॥ १२८०॥ १२८१॥ § 4355

किं च—माभून्नाम सामान्यस्य विशेषाव्यतिरेकात्ततो विशिष्टत्वं, तथापि शशविषाणादेर्निरूपाख्यात्तस्य विशिष्टत्वमस्त्येवेति विकल्पज्ञानग्राह्यं स्यात्, नच भवति, तस्मादनैकान्तिकत्वमेवेति दर्शयन्नाह—निरुपाख्याच्चेत्यादि। § 4356

निरुपाख्याच्च सामान्यं विशेषं संप्रतीयते।
अतो विकल्पकज्ञानग्राह्यं तदपि ते भवेत्॥
१२८२॥§ 4358

नासतस्तद्विशिष्टं चेत्किमिदानीं तदात्मकम्।
नो चेत्तथापि वैशिष्ट्यं तस्मादस्य न किं मतम्॥
१२८३॥§ 4360

स्यादेतत्—सामान्यस्याभावतो न विशेषः संभवति, नापि सादृश्यम्। त-थाहि— यन्न किंचित्सोऽभावः कल्प्यते, तच्च तादृशं सामान्यतो नैव विशिष्टं 384/k नापि समं, भावत्वप्रसङ्गात्। तथाहि—यदि तच्छून्यं सामान्यतो विशिष्टं स्यात्तदपि वस्त्वेव स्यात्। नह्यवस्तुनो विशेषाख्यस्वभावः सम्भवति, न च विशेषाख्यं स्वभावमन्तरेण विशिष्टं शक्यं वक्तुम्। नापि समं वस्तुत्वप्रस-ङ्गात्। नह्यवस्तुनः केनचित्समानं रूपं भवति, नच समानरूपमन्तरेण समं युक्तमतिप्रसङ्गात्। तस्मात्सामान्यस्य शून्यमवधिं कृत्वा न समत्वं विशिष्टत्वं वा युक्तम्। तथाहि—यो यमवधिं कृत्वा समो विशिष्टो वा भवति तेन सोऽप्यवधिः समो विषमश्च दृश्यते। यदि हि सोऽवधिस्तेन समो विषमो वा न दृश्येत, इतरोप्यवधिमान्समो विषमो वा न दृश्येत ॥ १२८२॥ १२८३॥ § 4361

किंच नाभावो नाम कश्चिद्भावव्यतिरिक्तोऽस्ति भाव एव तु भावान्तरं न भवतीत्यभाव आख्यायते, तत्कुतोऽस्य वैशिष्ट्यमित्येतत्सर्वं सुमतिनोक्त-मागूर्याह—अतदात्मकमेवेदमित्यादि। § 4362

अतदात्मकमेवेदं वैशिष्ट्यं वस्तुनोऽपि हि।
नासद्रूपं च सामान्यं तद्विशिष्टं न ते कथम्॥
१२८४॥§ 4364

तस्मात्स्वलक्षणे ज्ञानं यत्किंचित्संप्रवर्त्तते।
वाक्पथातीतविषयं सर्वं तन्निर्विकल्पकम्॥
१२८५॥§ 4366

वस्तुनोऽपि हि सकाशाद्यदवस्तुनो विशिष्टत्वं तत्खलु नान्यत् किंचित्। किं तर्हि तत्त्वनिषेधः, अतदात्मत्वमेव, लक्षणभेद इति यावत्। तच्चासतोऽपि शशविषाणादेःसकाशात्सामान्स्य तुल्यमेव। तथाहि—असच्छशविषाणादि सर्वार्थक्रियाविरहलक्षणं, सामान्यं तु न तथेष्टमिति विस्पष्टमस्य ततो वैशिष्ट्यम्। ततश्चासतोऽपिसकाशाद्वैशिष्ट्यं स्यान्नच वस्तुत्वप्रसङ्गोऽसत इति यत्किंचिदेतत्। यदुक्तं—नाभावो नामान्य एवेत्यादि, तत्र तेन स्वभाषितस्यैवार्थो न विवेचितः। तथाहि—भाव एव तु भावान्तरं न भवतीत्युक्ते भावान्तरात्तस्य विशेष उक्तो भवति, ततो व्यावृत्तिसङ्कीर्तनात्। तदेतद्धान्ध्यविजृम्भितमित्यलं प्रसङ्गेन। तस्मादित्यादिना प्रमाणफलोपसंहारः॥ १२८४॥ १२८५॥ § 4367

अस्ति ह्यालोचनाज्ञानमित्यादिना कौमारिलमतोपदर्शनेन यस्य यद्रूपव्यवस्थितौ निमित्तं नास्तीत्यादौ प्रयोगे हेतोः पक्षैकदेशासिद्धत्वमाशङ्कते।
§ 4368

385/k

अस्ति ह्यालोचनाज्ञानमाद्यं चेन्निर्विकल्पकम्।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्॥
१२८६॥§ 4370

न विशेषो न सामान्यं तदानीमनुभूयते।
तयोराधारभूता तु व्यक्तिरेवावसीयते॥
१२८७॥§ 4372

ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यया।
बुद्ध्याऽवसीयते सापि प्रत्यक्षत्वेन संमता॥
१२८८॥§ 4374

तथाहि—सर्वं प्रत्यक्षं पक्षीकृतं, तत्र च सर्वत्र प्रत्यक्षाख्ये धर्मिणि सविकल्पकव्यवस्थितौ नास्ति च विशेषणविशिष्टार्थग्रहणं निमित्तमित्यस्य हेतोरसिद्धिः, आलोचनाज्ञानव्यतिरेकेणान्यत्र प्रत्यक्षे सामान्यादिविशेषणविशिष्टार्थग्रहणस्य विद्यमानत्वात्। अथालोचनाज्ञानमेव पक्षीकृत्य हेतुरभिधीयते तदा सिद्धसाध्यतेति मन्यते, परः। बालमूकादिविज्ञानसदृशमिति। बालविज्ञानसदृशं मूकादिविज्ञानसदृशम्। आदिशब्देन संमूर्छितपरिग्रहः। अभिलापविशेषरहितत्वमात्रेण साम्यम्। शुद्धत्वं पुनर्वस्तुनः सामान्यद्वयविविक्तत्वात्। तदेव द्वितीयेन श्लोकेन स्पष्टयति—न विशेष इत्यादि। विशेष इति। अवान्तरसामान्यं गोत्वादि। सामान्यमिति। महासामान्यं वस्तुत्वादि। तयोराधारभूतेति। अनेन शुद्धं वस्तु दर्शितम्। ततः परमित्यादिना तामेव पक्षैकदेशासिद्धतां हेतोरभिव्यनक्ति—ततः परमिति। शुद्धवस्तुग्रहणोत्तरकालं यया बुद्ध्या वस्तु व्यवसीयते जात्यादिभिर्विशेषणैः सापि प्रत्यक्षत्वेन संमतेति योज्यम्। जात्यादिभिरित्यनेन विशेषणविशिष्टार्थग्रहणं दर्शयति। अनेन चानधिगतार्थाधिगन्तृत्वं हेतोश्चासिद्धतोक्ता भवति॥ १२८६॥ १२८७॥ ॥ १२८८॥ § 4375

पुनः पुनर्विकल्पेऽपि यावानधिगमो भवेत्।
तत्सम्बन्धानुसारेण सर्वं प्रत्यक्षमिष्यते॥
१२८९॥§ 4377

पुनः पुनरिति। तृतीयादौ क्षणे। यावानिति। अनधिगतार्थाधिगन्तेति शेषः।तत्सम्बन्धानुसारेणेति। तस्याक्षस्य सम्बन्धानुसारेण॥ १२८९॥ § 4378

स्यादेतत्—यदि प्रथमतोऽक्षव्यापारकाले सकलजात्यादिधर्मसमन्वितं वस्तु न भासते, तत्तर्ह्युत्तरकालमपि न भासेताविशेषादित्याह—न हि प्रविष्टमात्राणामित्यादि। § 4379

386/k

न हि प्रविष्टमात्राणामुष्णाद्गर्भगृहादिषु।
अर्था न प्रतिभान्तीति गम्यन्ते नेन्द्रियैः पुनः॥
१२९०॥§ 4381

उष्णादिति। प्रभास्वरात्। प्रविष्टमात्राणामिति योज्यम्। गम्यन्ते नेन्द्रियैरिति। अपि तु गम्यन्त एवेति काक्वा दर्शयति॥ १२९०॥ § 4382

एवं दृष्टान्तं प्रसाध्य दार्ष्टान्तिके उपसंहरन्नाह—यथेत्यादि। § 4383

यथा ह्याभासमात्रेण पूर्वं ज्ञात्वा स्वरूपतः।
पश्चात्तत्र विबुध्यन्ते तथा जात्यादिधर्मतः॥
१२९१॥§ 4385

यथा गर्भगृहे आभासमात्रं गृहीत्वा पश्चाद्विशेषतो नीलमित्यादिना जानाति, एवं स्वरूपतः पूर्वं ज्ञात्वा पश्चाज्ज्ञात्यादिधर्मतः प्रत्यक्षवान्भविष्यतीत्यदोषः॥ १२९१॥ § 4386

एवं तर्हि यद्यालोचनाज्ञानादूर्ध्वं पुनः पुनर्यावानधिगमस्तस्य प्रामाण्यं तदाऽऽलोचनाज्ञानेन यदि कश्चिदालोच्य पश्चादक्षिणी निमील्य जात्यादिधर्मतो विकल्पयति, तदाऽस्यापूर्वाधिगमोस्तीति तस्यापि प्रत्यक्षता स्यादित्याह—यदि त्वित्यादि। § 4387

यदि त्वालोच्य संमील्य नेत्रे कश्चिद्विकल्पयेत्।
न स्यात्प्रत्यक्षता तस्य सम्बन्धाननुसारतः॥
१२९२॥§ 4389

आलोच्येति। आलोचनाज्ञाने ज्ञात्वा। नेत्रे इति। संमील्येति सम्बन्धः।सम्बन्धाननुसारत इति। अक्षसम्बन्धद्वारेणानुत्पत्तेः। यथोक्तं तेनैव कुमारिलेन— एवं समानेऽपि मार्गे यत्राक्षसम्बन्धफलानुसारः। प्रत्यक्षता तस्य, तथा च लोके विनाप्यदो लक्षणतः प्रसिद्धमिति॥ १२९२॥ § 4390

तदित्यादिना प्रतिविधत्ते। § 4391

तदयुक्तं यदि ज्ञानं तत्प्रवृत्तं स्वलक्षणे।
अनाविष्टाभिलापं तज्ज्ञात्यादिग्रहणेऽपि हि॥
१२९३॥§ 4393

तथा(चा)वाच्यमेवेदं साधितं प्राक् स्वलक्षणम्।
तस्मिन्वृत्तं च विज्ञानं नियतं निर्विकल्पकम्॥
१२९४॥§ 4395

९ मार्गे] Correction : ; विकल्पमात्रे (sic !)मार्ग

जात्यादिग्रहणेऽपीत्यपिशब्दोऽभ्युपगमे। एकदा तावज्जात्यादीनां निरस्त-
त्वान्न सन्त्येव न इति कुतस्तद्ग्रहणे प्रामाण्यम्, सन्तु नाम, तथापि तद्ग्रहणे
आलोचनाज्ञानवदुत्तरकालभाविनां ज्ञानानां स्वलक्षणविषयत्वादविकल्पतैव,
जात्यादीनां स्वलक्षणादव्यतिरेकस्याभ्युपगतत्वादिति भावः। प्रयोगः—यत्स्व-
लक्षणग्रार्हि(?) तदविक ल्पकं, यथाऽऽलोचनाज्ञानम्, स्वलक्षणग्राहि चोत्त- 387/k
रप्रत्यक्षत्वेनाभिमतं ज्ञानमितिस्वभावहेतुः। प्रसङ्गसाधनं चेदं, नचानैकान्तिक-
ता हेतोः, यतोऽवाच्यमेवेदं स्वलक्षणमिति प्रागन्यापोहे प्रसाधितम्। नापि
विरुद्धता सपक्षे भावात्॥ १२९३॥ ॥ १२९४॥ § 4396

स्यादेतत्—जातिमात्रविषयत्वादसिद्धो हेतुरित्याह—जातिमात्रेत्यादि। § 4397

जातिमात्रग्रहे तु स्यादेकान्तेन विभिन्नता।
विशेषणस्य नैतच्च परैरिष्टं यथोदितम्॥
१२९५॥ § 4399

एकान्तेन विभिन्नता विशेषणस्येति। विशेष्यादिति शेषः। नैतच्च परैरिष्टमिति। एकान्तेन विशेषणविशेष्ययोर्विभिन्नत्वम्। कथं नेष्टमित्याह—यथोदितमिति। तेनैवेति शेषः॥ १२९५॥ § 4400

किं तदित्याह—यदीत्यादि। § 4401

यदि ह्येकान्ततो भिन्नं विशेष्यात्स्याद्विशेषणम्।
स्वानुरूपां तदा बुद्धिं विशेष्ये जनयेत्कथम्॥
१२९६॥ § 4403

पर्यायेण भेदस्याप्यभ्युपगतत्वादेकान्तत इत्याह। तथाहि—भिन्नाभिन्नस्वभावाज्जात्यादयस्तस्येष्टा नैकान्ततो भिन्ना नाप्यभिन्नाः। तथाचाह— बुद्धिभेदान्न चैकत्वं रूपादीनां प्रसज्यते। एकानेकत्वमिष्टं वा सत्तारूपादिभेदत इति। पुनश्चोक्तम्—स्थितं नैव हि जात्यादेः परत्वं व्यक्तितो हि न इति। परत्वमिति। अन्यत्वम्।स्वानुरूपामिति। विशेषणस्वरूपोपरक्ताम्। यतो विशेषणोपरक्तं विशेष्यं ग्राहयद्विशेषणमुच्यते, अन्यथा विशेषण(त्व)स्यानुपपन्नत्वादिति भावः। यथोक्तम्— स्वबुद्ध्या येन रज्येत विशेष्यं तद्विशेषणम् इति॥ १२९६॥ § 4404

अथापि स्यात्—स्वसामान्यलक्षणविषयत्वेनोभयविषयत्वात्केवलस्वलक्षणमात्रविषयत्वमसिद्धमेवोत्तरेषां ज्ञानानामित्याह—स्वसामान्यात्मनोरित्यादि। § 4405

स्वसामान्यात्मनोर्युक्तं ज्ञानं चैकं न वेदकम्।
सविकल्पान्यथाभावे प्राक्तनापरविन्न हि॥
१२९७॥§ 4407

स्वलक्षणसामान्यलक्षणयोर्नैकं ज्ञानं वेदकं युक्तम्। तथाहि—तदेकं ज्ञानं सविकल्पकं वा स्यादविकल्पकं वा, तत्र सविकल्पकभावे—सविकल्पकत्वे सति, प्राक्तनस्य—पूर्वोक्तस्य स्वलक्षणस्य, वित्—वेदनं, न प्राप्नोति। अन्यथाभाव इति।निर्विकल्पकपक्षे। अपरस्येति। सामान्यात्मनः, वित्—वित्तिर्न स्यात्॥ १२९७॥ § 4408

388/k

एवं तावत्स्वलक्षणविषयत्व इतरेषां ज्ञानानामविकल्पता प्राप्नोतीति साधितम्। इदानीं भवतु नाम सविकल्पत्वं तथापि गृहीतग्राहित्वान्न तेषां प्रामाण्यं युक्तमितिप्रतिपादयन्नाह—एकान्तेनेत्यादि। § 4409

एकान्तेनान्यताभावाज्ज्ञात्याद्याद्येन चेद्गतम्।
विज्ञातार्थाधिगन्तृत्वात्स्मार्त्तज्ञानसमं परम्॥
१२९८॥§ 4411

तथाहि—जात्यादेर्व्यक्तितो नैवान्यत्वमेकान्तेनेष्टम्। यथोक्तम्—स्थितं नैव हि जात्यादेः परत्वं व्यक्तितो हि न इति। ततश्चाद्येनैवालोचनाज्ञानेन जात्यादि गृहीतमिति स्मार्त्तज्ञानवदधिगतार्थाधिगन्तृत्वात्परं जात्यादिधर्मनिश्चयज्ञानमप्रमाणमेव युक्तमिति। प्रयोगः—यद्गृहीतग्राहि ज्ञानं न तत्प्रमाणं, यथा स्मृतिः, गृहीतग्राही च प्रत्यक्षपृष्ठभावी विकल्प इति व्यापकविरुद्धोपलब्धिः॥ १२९८॥ § 4412

तदत्र यदि समारोपविषयव्यवच्छेदन गृहीतमिति हेत्वर्थस्तदा हेतोरसिद्धता, अथ यथाकथंचिद्गृहीतत्वादिति हेत्वर्थस्तदाऽनुमानेनानेकान्त इत दर्शयन्नाह—संमुग्धेत्यादि। § 4413

संमुग्धानेकसामान्यरूपेणाधिगमे सति।
नैव चेन्निश्चितं वस्तु निश्चयस्तूत्तरोत्तरः॥
१२९९॥§ 4415

समारोपव्यवच्छेदविषयत्वाद्यथाऽनुमा।
समारोपव्यवच्छेदविषयो निश्चयस्तथा॥
१३००॥§ 4417

तथाहि—प्रथमं संमुग्धरूपेणालोचनाज्ञानेनाधिगतं, नहि निश्चितरूपेण, उत्तरोत्तरस्तु निश्चयः प्रमाणं, समारोपव्यवच्छेदविषयत्वादनुमानवत्। यथा प्रत्यक्षेण गृहीते शब्दादौ धर्मिणि कृतकत्वादिनाऽनित्यत्वनिश्चयो भवन्प्रमाणं भवति, तथा समारोपव्यवच्छेदविषयो निश्चयो भविष्यति। तथाहि भवतामत्राविवादः—समारोपव्यवच्छेदविषयो निश्चय इति। यथोक्तम्— निश्चयारोपमनसोर्बाध्यबाधकभावतः। समारोपविवेकेऽस्य प्रवृत्तिरिति गम्यते॥ इति॥ १२९९॥ १३००॥ § 4418

नेत्यादिना प्रतिविधत्ते। § 4419

न समारोपविच्छेदविषयत्वेन मानता।
अनुमायाः प्रमाणत्वप्रसङ्गेन स्मृतेरपि॥
१३०१॥§ 4421

प्रत्यक्षानन्तरोद्भूतसमारोपणवारणात्।
इष्टं तु लैङ्गिकं ज्ञानं प्रमाणं न तदस्ति ते॥
१३०२॥§ 4423

389/k

गौःशुक्लश्चलतीत्यादौ प्रत्यक्षानन्तरं न हि।
समारोपोऽत्र विज्ञाने वेद्यते यन्निषिध्यते॥
१३०३॥§ 4425

प्रवृत्तसमारोपव्यवच्छेदेनानुमानस्य प्रामाण्यं, न तु पुनः समारोपविषयव्यवच्छेदमात्रेण, स्मृतेरपि प्रामाण्यप्रसङ्गात्, नच तत्प्रत्यक्षसमनन्तरभाविनो गौः शुक्लश्चलतीत्यादेर्विकल्पस्य प्रवृत्तसमारोपनिवारणमस्ति, अन्तरा समारोपस्यानुत्पन्नत्वात्। कथमनुत्पन्नत्वमिति चेदाह—गौरित्यादि। नहि विकल्पोऽसंविदित उत्पद्यत इत्युपलब्धिलक्षणप्राप्तस्यानुपलब्ध्या सिद्धमनुत्पन्नत्वं समारोपस्य॥ १३०१॥ १३०२॥ ॥ १३०३॥ § 4426

एवं तावदेतत्सर्वं जात्यादिकमभ्युगम्योक्तम्, इदानीं जात्यादयः परमार्थतो न सन्त्येव कुतस्तद्विषयतया प्रत्यक्षस्य सविकल्पता भविष्यतीति दर्शयन्नाह—तत्त्वेत्यादि। § 4427

तत्त्वान्यत्वोभयात्मानः सन्ति जात्यादयो न च।

यद्विकल्पकविज्ञानं प्रत्यक्षत्वं प्रयास्यति॥
१३०४॥§ 4429

अन्वयासत्त्वतो भेदाद्भेदेनाप्रतिभासनात्।
अन्योन्यपरिहारेण स्थितेश्चान्यत्वतत्त्वयोः॥
१३०५॥§ 4431

व्यक्तिभ्यो हि जात्यादयः कदाचिदव्यतिरिक्ता व्यतिरिक्ता वा व्यतिरिक्ताव्यतिरिक्तत्वेनोभयात्मानो वा। न तावदाद्यः पक्षः—अन्वयासत्त्वतः—अन्वयाभावात्। अनेकवस्त्वनुगतं हि रूपं सामान्यमुच्यते, न चैवं व्यक्तयः परस्परमन्वाविशन्ति, येन ता एव सामान्यं भवेयुः। अन्वावेशे वा विश्वमेकमेव रूपं जातमितिसामान्यस्यैवाभावप्रसङ्गः, अनेकाधारत्वात्तस्य। नापि द्वितीयः पक्षः—भेदाद्भेदेनाप्रतिभासनात्—भेदादिति। व्यक्तेः। नचाप्रतिभासमानं प्रत्यक्षीभवति। यथोक्तम्— व्यक्तयो नानुयन्त्यन्यदनुयायि न भासते। ज्ञानादव्यतिरिक्तं च कथमर्थान्तरं व्रजेत्॥ इति। नापि तृतीयः पक्षः—अन्योन्यपरिहारेण स्थितेरन्यत्वतत्त्वयोः पक्षयोः। यौहि परस्परपरिहारेण स्थितलक्षणौ तयोर्य एकः प्रतिषेधः सोऽपरविधिनान्तरीयकः। परस्परपरिहारेण वाऽन्यत्वतत्त्वे व्यवस्थिते, अन्यतरस्वभावव्यवच्छेदेनान्यतरस्य परिच्छेदात्। तस्मान्नास्ति तृतीयराशिसम्बन्धः॥ १३०४॥ ॥ १३०५॥ § 4432

ननु च यद्यविकल्पं प्रत्यक्षं कथं तेन व्यवहारः, तथाहि—इदं सुख-
390/k साधनमिदं दुःखस्येति यदि निश्चिनोति तदा तयोः प्राप्तिपरिहाराय प्रवर्त्तते। किंच—अनुमानानुमेयव्यवहाराभावश्च प्राप्नोति। तथाहि—अनुमानकालेऽवश्यं धर्मी धर्मो वा प्रमाणान्तरेण निश्चितो गृहीतव्यः। स च न प्रत्यक्षेणानिश्चयात्मकेन निश्चितो गृहीतुं शक्यते। नाप्यनुमानेन, अनवस्थादोषात्। नचान्यत्प्रमाणान्तरमस्तीति सर्वव्यवहारोच्छेदः प्राप्नोति। तस्मादनुमानादिव्यवहारप्रवृत्तितो लिङ्गादनुमानबाधितेयमविकल्पकप्रतिज्ञेति यश्चोदयेत्तं प्रत्याह—अविकल्पमपीत्यादि। § 4433

अविकल्पमपि ज्ञानं विकल्पोत्पत्तिशक्तिमत्।
निःशेषव्यवहाराङ्गं तद्द्वारेण भवत्यतः॥ १३०६॥§ 4435

तद्द्वारेणेति। विकल्पद्वारेणाविकल्पकमपि निश्चयहेतुत्वेन सकलव्यवहाराङ्गं भवति। तथाहि—प्रत्यक्षं कल्पनापोढमपि सजातीयविजातीयव्यावृत्तमनलादिकमर्थं तदाकारनिर्भासोत्पत्तितः परिच्छिन्ददुत्पद्यते। तच्च नियतरूपव्यवस्थितवस्तुग्राहित्वाद्विजातीयव्यावृत्तवस्त्वाकारानुगतत्वाच्च तत्रैव वस्तुनि विधिप्रतिषेधावाविर्भावयति—अनलोऽयं नासौ कुसुमस्त-

बकादिः, इति। तयोश्च विकल्पयोः पारम्पर्येण वस्तुनि प्रतिबन्धादसंवादित्वेऽपि न प्रामाण्यमिष्टम्। दृश्यविकल्पयोरेकत्वाध्यवसायेन प्रवृत्तेरनधिगतवस्तुरूपाधिगमाभावात्। अतएव विकल्पद्वयहेतुत्वात्तृतीयप्रकाराभावसूचनायापि निमित्ततां प्रतिपद्यते। तथाहि—यद्यत्र क्वचित्प्रवृत्तं त(त्त)त्प्रतिभासित्वात्तत्परिच्छिनत्ति, तदन्यस्य तत्रानुपलम्भात्ततस्तद्व्यवच्छिनत्ति। सर्वभावानां च दृश्यतदन्यत्वेन द्वैराश्ये व्यवस्थापनात्प्रकारान्तराभावं च सूचयति। यद्येवं—प्रत्यक्षेणैव शब्दादौ धर्मिणि गृहीतत्वादनित्यत्वादेः तत्रानुमानविकल्पः प्रवर्त्तमानः प्रमाणं न प्राप्नोति। नैष दोषः। प्रत्यक्षमुत्पन्नमपि यत्रांशेऽवसायं जनयति स एवांशो व्यवहारयोग्यो गृहीत इत्यभिधीयते, यत्र तु भ्रान्तिनिमित्तवशात्समारोपप्रवृत्तेर्न व्यवसायं जनयितुमीशं स व्यवहारायोग्यत्वाद्गृहीतोऽप्यगृहीतप्रख्य इति तत्रानुमानस्य प्रवृत्तसमारोपव्यवच्छेदाय प्रवर्त्तमानस्य प्रामाण्यं भवति, न पुनःप्रत्यक्षानन्तरभाविविकल्पस्य, तस्य प्रवृत्तसमारोपव्यवच्छेदाभावात्। किं पुनः कारणं—सर्वतो भिन्ने वस्तुरूपे अनुभवोत्पत्तावपि तथैव न स्मार्त्तो निश्चयो भवति। उच्यते। कारणान्तरापेक्षत्वात्, न ह्यनुभूत इत्येव निश्चयो भवति। तस्याऽभ्यासार्थित्वापाटवादिकारणान्तरापेक्षत्वात्। यथा जनकाध्यापकाविशेषेऽपि पितरमायान्तं दृष्ट्वा पिता मे आगच्छति नोपाध्याय इति निश्चिनेति॥ १३०६॥ § 4436

391/k

अत्र भाविविक्तादयो विकल्पोत्पादद्वारेणापि व्यवहाराङ्गत्वं विघटयन्तो यत्प्रमाणयन्ति तद्दर्शयति—नाविकल्पमित्यादि। § 4437

नाविकल्पं विकल्पे चेच्छक्तं(च शक्तं ?)
विषयभेदतः। अकल्पत्वाच्च
रूपादिज्ञानवच्चक्षुरादिवत्॥ १३०७॥§ 4438

नेन्द्रियविज्ञानं सविकल्पकमनोविज्ञानकारणं भिन्नविषयत्वाद्रूपस्पर्शादिज्ञानवत्,निर्विकल्पकत्वाच्च, चक्षुरादिवदिति। विषयभेदक इत्यत्र हेतौ दृष्टान्तो रूपादिज्ञानवदिति, अकल्पत्वादित्यत्र तु चक्षुरादिवदिति॥ १३०७॥ § 4439

तदत्रेत्यादिना दूषणमाह— § 4440

तदत्र न विरोधोऽस्ति विकल्पेन सहानयोः।
नचापि विषयो भिन्नस्तदर्थाध्यवसायतः॥
१३०८॥§ 4442

उभयोरपि हेत्वोरनैकान्तिकता, साध्यविपर्ययेण सह हेत्वोर्विरोधानुपदर्शनात्।अनयोरिति। हेत्वोः। नचापि विषयो भिन्न इत्यनेन सत्यपि सविषयत्वे विकल्पस्य विषयभेदत इत्यस्य हेतोरसिद्धतामाह॥ १३०८॥ § 4443

परमार्थतस्तु निर्विषयो विकल्पस्तदापि सुतरामसिद्धतेति दर्शयन्नाह—वस्तुतस्त्वित्यादि। § 4444

वस्तुतस्तु निरालम्बो विकल्पः संप्रवर्त्तते।
तस्यास्ति विषयो नैव यो विभिद्येत कश्चन॥
१३०९॥§ 4446

रूपशब्दादीत्यादिना रूपादिज्ञानवदित्यस्य दृष्टान्तस्य साध्यविकलतामाह। § 4447

रूपशब्दादिबुद्धीनामस्त्येवान्योन्यहेतुता।
ततोऽप्रसिद्धसाध्योऽयं दृष्टान्तः समुदीरितः॥
१३१०॥§ 4449

रूपशब्दादिज्ञानानां परस्परसमनन्तरप्रत्ययभावेन कारणत्वस्य विद्यमानत्वात् ॥ १३१०॥ § 4450

पुनरपि विषयभेदत इत्यस्य हेतोर्विपक्षे सद्भावोपदर्शनेनानैकान्तिकतामाह—अग्निधूमादीत्यादि। § 4451

अग्निधूमादिबुद्धीनां कार्यकारणभावतः।
व्यभिचारोऽपि विस्पष्टमेतस्मिन्नुपलभ्यते॥
१३११॥§ 4453

एतस्मिन्निति। विषयभेदत इत्यत्र हेतौ। यथाग्न्यादिलिङ्गिबुद्धेर्धूमादिलिङ्गबुद्धिर्विषयभेदेऽपि कारणं तथात्रापि भविष्यतीति हेतोरनैकान्तिकत्वम्॥ १३११॥ § 4454

392/k

एवं कल्पनापोढत्वं प्रत्यक्षस्य प्रसाध्याभ्रान्तग्रहणे प्रयोजनमाह—केशोण्ड्रकेत्यादि। § 4455

केशोण्ड्रकादिविज्ञाननिवृत्त्यर्तमिदं कृतम्।

अभ्रान्तग्रहणं तद्धि भ्रान्तत्वान्नेष्यते प्रमा॥
१३१२॥§ 4457

अभ्रान्तमत्राविसंवादित्वेन द्रष्टव्यम्, नतु यथाऽवस्थितालम्बनाकारतया। अन्यथा हि योगाचारमतेनालम्बनासिद्धेरुभयनयसमाश्रयेणेष्टस्य प्रत्यक्षलण-स्याव्यापिता स्यात्। अविसंवादित्वं चाभिमतार्थक्रियासमर्थार्थप्रापणशक्तिक-त्वम्, नतु प्रापणमेव प्रतिबन्धादिसम्भवात्। यद्येवमभ्रान्तग्रहणमेवास्तु, किं कल्पनापोढग्रहणेनेति चेत्। न। अनुमानविकल्पस्यापि प्रत्यक्षत्वप्रसङ्गात्॥ १३१२॥ § 4458

मानसं तदपीत्येक इति। § 4459

मानसं तदपीत्येक नैतदिन्द्रियभावतः।
भावात्तद्विकृतावस्य विकृतेश्चोपलम्भतः॥
१३१३॥§ 4461

सर्पादिभ्रान्तिवच्चेदमनष्टेऽप्यक्षविप्लवे।
निवर्त्तेत मनोभ्रान्तेः स्पष्टं च प्रतिभासनात्॥
१३१४॥§ 4463

न तदर्थमभ्रान्तग्रहणं युक्तं कर्तुमिति तेषामभिप्रायः। ननु च भवतु नाम मानसम्, तथाप्यभ्रान्तग्रहणं कर्त्तव्यमेव, नह्यनेनेन्द्रियज्ञानस्यैव प्र-त्यक्षलक्षणं कर्तुमारब्धम्, किं तर्हि ? मानसस्यापि योगिज्ञानादेः, तत्र च स्वप्नान्तिकस्यापि निर्विकल्पकत्वमस्ति स्पष्टप्रतिभासित्वात्, नत्वभ्रान्तत्व-मिति तन्निवृत्त्यर्थमभ्रान्तग्रहणं युक्तमेव। सत्यमेतत्। किंत्विन्द्रियभ्रान्तिरपि सम्भवत्यतोऽयमयुक्तं एषां पक्ष इतीन्द्रियजत्वप्रतिपादनायाह—नैतदित्यादि। इन्द्रियभावे सति भावादिन्द्रियविकारे चोपघातलक्षणे विकारस्योपहतिलक्ष-णस्योपलम्भात्तदन्येन्द्रियबुद्धिवदिन्द्रियजेयं केशोण्ड्रकादिबुद्धिः। किंच—यदि मनोभ्रान्तिः स्यात्ततो मनोभ्रान्तेरेव कारणान्निवर्त्तेतानिवृत्तेऽप्यक्षविप्लवे। स-र्पादिभ्रान्तिवदिति दृष्टान्तः। स्पष्टप्रतिभासा च न प्राप्नोतीत्ययमपरः प्रसङ्गः। नहि विकल्पानुविद्धस्तु स्पष्टार्थप्रतिभासिता, सामान्योल्लेखेनैव तस्य प्रवृत्तेः॥ १३१३॥ १३१४॥ § 4464

तद्भावेत्यादिना परकीयं दूषणमाशङ्कते। § 4465

तद्भावभाविता साक्षादसिद्धा व्यभिचारिणी।

पारम्पर्येण सा तस्यां स्मृतिबुद्धौ समन्वयात्॥
१३१५॥§ 4467

393/k

तद्विकारविकारित्वं पारम्पर्योद्भवेष्वपि।
कार्येषु दृश्यते लोके व्यक्तं वेगसरादिषु॥
१३१६॥§ 4469

मानस्यो भ्रान्तयः सर्वा निवर्त्तन्ते विचारतः।
इत्यस्मिन्व्यभिचारित्वं भावसामान्यबुद्धिभिः॥
१३१७॥§ 4471

वस्तुस्वलक्षणे नैताः प्रवर्त्तन्ते स्वभावतः।
एवं तद्विनिवृत्तिश्चेत्तुल्यं चन्द्रद्वयादिषु॥
१३१८॥§ 4473

न सत्ताविनिवृत्तिश्चेत्समं सामान्यबुद्धिषु।
नचेश्वरादिभ्रान्तीनां तन्मताभिनिवेशिनाम्॥
१३१९॥§ 4475

युक्तिकोटिश्रवेऽप्यस्ति निवृत्तिः प्रत्युत स्वयम्।
नैता युक्तय इत्येवं ते वदन्ति जडाः पुनः॥
१३२०॥§ 4477

अत्र यदि साक्षात्तद्भावभावित्वं हेतुस्तदाऽन्यतरासिद्धता हेतोः, नहि परस्य साक्षादिन्द्रियादुत्पत्तिर्भ्रान्तेः सिद्धा, तस्या एव साध्यत्वात्। अथ सामान्येन तद्भावभावित्वं हेतुस्तदाऽनैकान्तिकता, स्मृतिबुद्धौ विपक्षभूतायामपि तद्भावभावित्वस्य समंधया(पारम्पर्या ?)द्विद्यमानत्वात्। यच्च तद्विकारविकारित्वं तदपि साक्षादसिद्धम्, पारम्पर्येणाप्युपादीयमानमनैकान्तिकमेव। यतोऽश्वायां गर्दभेन जातस्य वेगसरस्य कललाद्यवस्थाव्यवधानेऽपि गर्दभरूपानुकारेण

तद्विकारित्वस्य पश्चाद्दर्शनादतो नास्मात्साक्षादुत्पत्तिः सिध्यति। मानसी च भ्रान्तिर्विचारान्निवर्तत इत्यत्राप्यनैकान्तिकत्वं भावसामान्यबुद्धिभिः। नहि भवतां युक्त्या सामान्याभावमवगच्छतामपि भावेषु घटादिषु भाव इति वा सामान्यमिति वा सामान्याकारो विकल्पोनिवर्त्तते। अथ मन्यसे—निवर्त्तन्त एव युक्त्या विचारयतः सामान्यबुद्धयः स्वलक्षणे नैताः प्रवर्त्तन्त इत्यनेनाकारेणेति। तदैतदप्यनुत्तरम्। चन्द्रद्वयादिबुद्धयोऽपि युक्त्या विचारयतः स्वलक्षणे नैताः प्रवर्त्तन्त इत्यनेनाकारेण निवर्तन्त एव। नच तावता मानस्यो भवन्ति। सत्ता तासां न निवर्त्तत इति चेत्तत्तुल्यं सामान्यबुद्धिभिः। नहि तासामपि स्वभावो निवर्त्तते॥ १३१५॥ १३१६॥ १३१७॥ ॥ १३१८॥ १३१९॥ १३२०॥ § 4478

तद्भावभावितेत्यादिना प्रतिविधत्ते। § 4479

तद्भावभाविता साक्षान्न सिद्धाऽभ्रान्तचेतसा।
व्यवधानं न सिद्धं हि न हि तद्वेद्यतेऽन्तरा॥
१३२१॥§ 4481

394/k

अन्यार्थासक्तचित्तोऽपि द्विचन्द्रादि समीक्षते।
अविच्छिन्नमतो नास्ति पारम्पर्यसमुद्भवः॥
१३२२॥§ 4483

भावसामान्यबुद्धीनां प्रतिसंहारसम्भवे।
निवृत्तिः संभवत्येव स्वेच्छयेशमतेरपि॥
१३२३॥§ 4485

नासिद्धा, अपि तु सिद्धैव, कस्मात् ?, अभ्रान्तेनैकचन्द्रचेतसा व्यवधानासिद्धेः।तस्योपलभ्यस्यान्तरासेऽनुपलभ्यमानत्वात्। एतदेवान्यार्थेत्यादिना स्पष्टीकुरुते।अविच्छिन्नं द्विचन्द्रादीति सम्बन्धनीयम्। अत एव तद्विकारविकारित्वस्याप्यव्यभिचारः। नहि तदपि व्यवहितं, येन वेगसरादिभिर्व्यभिचारः स्यात्। भावसामान्यबुद्धीनामपि यदेच्छाया संहारं कुरुते तदा निवृत्तिरस्त्येव। नतु केशोण्ड्रकादिबुद्धीनामिच्छया संहारः संभवतीति नानैकान्तिकता। इन्द्रियज्ञानस्यापि चक्षुषीच्छया निमीलिते निवृत्तिरिच्छावशात्सम्भवतीति चेत्। नहि समनन्तरमिच्छानिवृत्तौ निवर्त्तते चक्षुर्विज्ञानम्।

किं तर्हि ?। चक्षुर्निमीलनं तावदिच्छावशाद्भवति, ततो निवृत्ते चक्षुषि तज्ज्ञानं निवर्त्तते, मानसी तु भ्रान्तिः साक्षादिच्छावशान्निवर्त्तत इति न समानम्। इत्थं चैतदवसेयं—यतः प्रणिहिते चक्षुषि द्रष्टुमनिष्यमाणोऽप्यर्थो दृश्यत एवातो नेच्छायाश्चक्षुरादिज्ञाने साक्षात्सामर्थ्यम्॥ १३२१॥ १३२२॥ १३२३॥ § 4486

पीतशङ्खादिबुद्धीनां विभ्रमेऽपि प्रमाणताम्।
अर्थक्रियाऽविसंवादादपरे संप्रचक्षते॥
१३२४॥§ 4488

केचित्तु स्वयूथ्या एवाभ्रान्तग्रहणं नेच्छन्ति। भ्रान्तस्यापि पीतशङ्खादिज्ञानस्य प्रत्यक्षत्वात्। तथाहि न तदनुमानमलिङ्गजत्वात्। प्रमाणं चाविसंवादित्वात्। अत एवाचार्यदिङ्ागेन लक्षणे न कृतमभ्रान्तग्रहणम्। भ्रान्ति(:) संवृत्ति(:)साज्ज्ञानमनुमानेत्यादिना प्रत्यक्षाभासनिर्देशादविसंवादिकल्पनापोढमित्येवंधमिष्टमाचार्यस्य लक्षणम्। सतैमिरमिति तु तिमिरशब्दोऽयमज्ञानपर्यायः। तिमिरघ्नं च मन्दानामिति यथा। तिमिरे भवं तैमिरं विसंवादकमित्यर्थः॥ १३२४॥ § 4489

तन्नेत्यादिना प्रतिविधत्ते। § 4490

तन्नाध्यवसिताकारप्रतिरूपा न विद्यते।
तत्राप्यर्थक्रियावाप्तिरन्यथाऽतिप्रसज्यते॥
१३२५॥§ 4492

केशादिप्रतिभासे च ज्ञाने संवादिभावतः।
आलोकादेरतस्तस्य दुर्निवारा प्रमाणताः॥
१३२६॥§ 4494

395/k

प्रामाण्यं हि भवद्वाभ्यामाकाराभ्यां भवति, यथाप्रतिभासमविसंवादाद्यथाध्यवसायं वा। तत्रेह न यथाप्रतिभासमविसंवादः पीतस्य प्रतिभासनात्तस्य यथाभूतस्याप्राप्तेः। नापि यथाध्यवसायमविसंवादः, पीतस्यैव विशिष्टार्थक्रियाकारित्वेनाध्यवसायात्, न च तद्रूपार्थक्रियाप्राप्तिरस्ति। न चानध्यवसितार्थाविसंवादेनापि प्रामाण्यमतिप्रसङ्गत्। केशादिज्ञानेऽपि ह्यनध्यवसिताऽऽलोकादिप्राप्तेः॥ १३२५॥ ॥ १३२६॥ § 4495

अथ मन्यसे—यद्यपि वर्णोऽध्यवसितो न प्राप्यते, संस्थानं तु प्राप्यत एवेत्यत आह—न वर्णेत्यादि। § 4496

न वर्णव्यतिरिक्तं च संस्थानमुपपद्यते।
भासमानस्य वर्णस्य न च संवाद इष्यते॥
१३२७॥§ 4498

सुबोधम्॥ १३२७॥ § 4499

यद्याकारमित्यादिनोपचयमाह— § 4500

यद्याकारमनादृत्य प्रामाण्यं च प्रकल्प्यते।
अर्थक्रियाऽविसंवादात्तद्रूपो ह्यर्थनिश्चयः॥
१३२८॥§ 4502

इत्यादिगदितं सर्वं कथं न व्याहतं भवेत्।
वासनापाकहेतूत्थस्तस्मात्संवादसम्भवः॥
१३२९॥§ 4504

नैव ह्यर्थक्रियाऽविसंवादित्वमात्रेणाकारमनपेक्ष्य प्रामाण्यं कल्पनीयम्, विषयाकारस्याप्रामाण्यप्रसङ्गात्। तद्रूप इति। ज्ञानस्थाभासरूपः। आदिशब्देन यथा यथा ह्यर्थस्याकारः शुभ्रादित्वेन सन्निविशते तद्रूपः स विषयः प्रमीयत इत्यादिकमाचार्यीयं वचनं विरुध्यत इति दर्शयति। अर्थक्रियासंवादस्तु पूर्वार्थानुभववासनापरिपाकादेव प्रमाणान्तराद्भवतीत्यवसेयम्। पीतशङ्खज्ञानस्य वासनापरिपाकहेतुः शुक्ल एव शङ्खस्तदाधिपत्येन तत्परिपाकात्। वासनापरिपाकहेतुतः समुत्थानं यस्याविसंवादस्य स तथोक्तः॥ १३२८॥ १३२९॥ § 4505

सुखादीनां कथं संवेदनप्रत्यक्षतेत्याह—मानसेत्यादि। § 4506

मानसेन्द्रियविज्ञाननिर्विकल्पत्वसाधने।
यो न्यायः स सुखादीनामविकल्पत्वसाधकः॥
१३३०॥§ 4508

यो न्याय इति। अशक्यसमयत्वादिः। मानसस्य यद्यपि नोक्तो न्यायस्तथापि य इन्द्रियज्ञाने न्यायोऽशक्यसमयत्वं स तस्यापि तुल्य एव। यद्वा 396/k

योगिज्ञानमिह मानसं, तच्च वक्ष्यमाणम्। सिद्धान्तप्रसिद्धत्वान्मानसस्यात्र न लक्षणं कृतं। प्रमाणेनाबाधितत्वमाचार्येणैव प्रतिपादितमिति न प्रतिपाद्यत इति भावः॥ १३३०॥ § 4509

अवेदका इत्यादिना वैशेषिकमतमाशङ्कते। § 4510

अवेदकाः परस्यापि स्वविद्भाजः कथं नु ते।
एकार्थाश्रितविज्ञानवेद्यास्त्वेते भवन्ति चेत्॥
१३३१॥§ 4512

न केवलं स्वसंवेदना न भवन्ति, बाह्यस्याप्यर्थस्यावेदकाः॥ न ज्ञानस्वभावा इति यावत्। एकस्मिन्नात्मनि समवेतेन तु ज्ञानेन वेद्यन्त इति तेषां सिद्धान्तः॥ १३३१॥ § 4513

नैरन्तर्येत्यादिना प्रतिविधत्ते। § 4514

नैरन्तर्यप्रवृत्ते हि बाह्यवस्तूपलम्भते।
सुखादि वेद्यते कस्मात्तस्मिन्काले निरन्तरम्॥
१३३२॥§ 4516

मानसेनैव यद्वेद्यमिष्यते चेतसा न च।
तत्काले तस्य सद्भावः क्रमजन्मोपवर्णनात॥
१३३३॥§ 4518

जन्मैव यौगपद्येन नेष्यते न पुनः स्थितिः।
इति चेन्न स्थितिस्तस्य क्षणभङ्गप्रसाधनात्॥
१३३४॥§ 4520

आशुवृत्तेः सकृद्भ्रान्तिरिति चेत्साऽप्यपाकृता।
विस्पष्टप्रतिभासो हि न स्यात्स्मरणगोचरे॥
१३३५॥§ 4522

सातासातादिरूपा च सा भ्रान्तिर्यदि कल्प्यते।
तदा प्राप्ता सुखादीनां सत्ता तन्मात्रलक्षणा॥
१३३६॥§ 4524

यदा च योगिनोऽन्येषामध्यक्षेण सुखादिकम्।
विदन्ति तुल्यानुभवात्तद्वत्तेऽपि स्युरातुराः॥
१३३७॥§ 4526

स्वस्मिन्नपि हि दुःखस्य सत्तैवानुभवो न ते।
किं तु तद्विषयं ज्ञानं तच्चास्ति परसन्ततौ॥
१३३८॥§ 4528

परदुःखानुमाने च तुल्यमेतत्तथाहि तत्।
(अनुमानं स)विषयं वर्ण्यते न त्वगोचरम्॥
१३३९॥§ 4530

अनेन प्रतिज्ञायाः प्रत्यक्षविरुद्धतामाह। यदा बाह्यवस्त्ववलम्बनज्ञान-
समकालंसुखादयोऽनुभूयन्ते, तदा कतमेनैकार्थाश्रयिणा ज्ञानेन वेद्येरन्,
न तावत्तेनैव बाह्या लम्बने न चक्षुरादिज्ञानेन, तस्य बाह्यालम्बनत्वात्, 397/k
अन्तःसंवेद्यमानत्वाच्च सुखादीनां मानसेनैव चेतसा वेद्यत्वेनेष्टत्वात्। नच त-
स्मिन्काले मानसस्य चेतसः संभवः, क्रमेणैव ज्ञानान्युत्पद्यन्त इत्यभ्युप-
गम्यते। अथापि स्याज्ज्ञन्मैव ज्ञानानां क्रमेणाभ्युपगतं न स्थितिरिति। एत-
च्चासम्यक्। सर्वजन्मिनां क्षणिकत्वस्य प्रसाधितत्वात्। आशु वृत्त्या स-
कृद्भ्रान्तिरपि या साऽपास्तैव पूर्वम्। किञ्च—आह्लादपरितापिरूपेण स्पष्टः
प्रतिभासो न प्राप्नोति, विकल्पविषयत्वे सति सुखादीनां मानसेनैव चेतसा
वेद्यत्वेनाभ्युपगपगमात्। तस्य च सविकल्पकत्वात्। न च विकल्पानुबद्ध-
स्य स्पष्टार्थप्रतिभासिता। अस्माभिस्तु स्वविषयानन्तरविषयसहकारिणोन्द्रिय-
ज्ञानेन जनितस्यैव प्रत्यक्षत्वेनाभ्युपेतत्वात्। अपि च ग्राह्यत्वे सति सुखादीनां
विच्छिन्नप्रतिभासिता स्यान्नीलादिवत्। न च ज्ञानाद्विच्छिन्नस्य शातादिरूप-
स्योपलब्धिः। ज्ञानाभेदेन शातादिरूपस्य ग्रहणं भ्रान्तिरिति चेत्। एवं तर्हि
सिद्धा सुखादीनां सत्ता स्वसंविद्रूपा। शातादिरूपमात्रलक्षणत्वात्सुखादीनाम्।

१ सातासाता] Correction : ;
शाताशाता (sic !)सातासाता

तद्रूपता चेज्ज्ञानस्य सिद्धा, सिद्धा ज्ञानस्वभावाः सुखादयः। व्यतिरिक्तानां त्वसिद्धत्वाद्भ्रान्त्यसिद्धेः।ज्ञातेत्यनुकूला, तद्विपरीता त्वज्ञाता, आदिशब्देनोपेक्षा गृह्यते। यदि च स्वसन्तानोत्पत्तिलक्षणैव सुखादीनां सत्ता स एव तेषामनुभव इति नाभ्युपगम्यते। किंतुतद्विषयज्ञानोत्पत्तिस्तदा योगिनां परकीयं सुखादि गृह्णतां तदनुभविनामिव तुल्यातुरावस्था स्यात्। भिन्नसन्तानवर्त्तित्वान्न तुल्यावस्थेति न वक्तव्यम्। नहि स्वसन्तानवर्त्तित्वं तेषामनुगमोऽभ्युपगतः। किं तर्हि ?। तद्विषयज्ञानोत्पत्तिः। साच परसन्तानग्राहिणामप्यस्तीति समानः प्रसङ्गः। अथोभयमनुभवे सुखादीनां कारणमङ्गीक्रियते तदा स्वसन्तानवर्त्तित्वेनानुभवे सिद्धं सुखादीनामात्मसंवेदनम्। एवं हि स्वसन्तानवर्त्तित्वं निमित्तं परसन्तानवर्त्तिभ्यश्च विशेषकं भवति। यदि स्वसंविद्रूपा भवन्ति येषां तर्हि न योगिनः सिद्धा मीमांसकादीनां तेषां कथं तैः प्रसङ्ग इत्याह —परेत्यादि। नहि बौद्धानामिव परेषां निर्विषयं परमार्थतोऽनुमानम्। ततश्च परदुःखानुमाने तुल्योऽनुभवोऽनुमातुरपि स्यात्॥ १३३२॥ १३३३॥ १३३४॥ ॥ १३३५॥ १३३६॥ १३३७॥ १३३८॥ १३३९॥ § 4531

सुखादीत्येव गम्यन्ते सुखदुःखादयो न तु।
ज्ञानमित्येव गम्यन्ते तन्न ज्ञानं घटादिवत्॥
१३४०॥§ 4533

398/k

शङ्करस्वाम्याह—न ज्ञानस्वभावाः सुखादयः, ज्ञानमित्यव्यपदेश्यत्वात्, घटादिवदिति॥ १३४०॥ § 4534

यद्येवमित्यादिना दूषणमाह— § 4535

यद्येवं समयान्यत्वे ज्ञानमित्यपि नो गतिः।
चेतस्यस्ति ततः प्राप्ता तत्राप्यज्ञानता तदा॥
१३४१॥§ 4537

यदि सङ्केतान्यत्वेन स्वभावान्यत्वं स्यात्, एवं सति यदा ज्ञानेऽपि कश्चिदज्ञानमिति समयं कुर्यात्तदा ज्ञानमित्यपि चेतसि व्यपदेशो नास्तीति प्राप्ता ज्ञानेऽप्यज्ञानता भवतः॥ १३४१॥ § 4538

व्यक्तं प्रकाशरूपत्वान्नो चेदेवं प्रसज्यते।
सुखदुःखादिके तुल्यं तच्च सर्वमिदं न किम्॥
१३४२॥§ 4540

भूतार्थभावनोद्भूतं कल्पनाभ्रान्तिवर्जितम्।
वक्ष्यामो योगिविज्ञानं साधनैर्विमलैरलम्॥
१३४३॥§ 4542

अथ प्रकाशात्मकं ज्ञानं स्पष्टमनुभूयत इति नाज्ञानता स्यादेव सति सुखादिष्वपि सर्वमेतत्समानम्। हेतुश्चानेनैव व्यभिचारी(ति)न किंचिदेतत्। वक्ष्याम इति। सर्वज्ञसिद्धौ॥ १३४२॥ १३४३॥ § 4543

प्रमाणफलविप्रतिपत्तिनिराकरणायाह—विषयेत्यादि। § 4544

विषयाधिगतिश्चात्र प्रमाणफलमिष्यते।
स्ववित्तिर्वा प्रमाणं तु सारूप्यं योग्यतापि वा॥
१३४४॥§ 4546

बाह्येऽर्थे प्रमेये विषयाधिगमः प्रमाणफलं, सारूप्यं तु प्रमाणम्। स्वसंवित्तावपि सत्यां यथाकारमस्य प्रथनात्। ज्ञानात्मनि तु प्रमेये स्वसंवित्तिः फलम्, योग्यता प्रमाणम्। सव्यापारप्रतीततामुपादाय ज्ञानस्यैव सा तादृशी योग्यता। येन तदेवात्मानं वेदयते न घटादय इति योग्यतया करणभूतयैवात्मप्रकाशकं लक्ष्यते ज्ञानमिति योग्यतायाः स्वसंवेदने प्रामाण्यम्। तदुक्तम्— तत्राप्यनुभयात्मत्वात्ते योग्याःस्वात्मसंविदः। इति सा योग्यता मानमात्मा मेयः फलं स्ववित्॥ इति॥ १३४४॥ § 4547

छेदन इत्यादिना कौमारिलचोद्यमाशङ्कते। § 4548

छेदने खदिरप्राप्ते पलाशे न छिदा यथा।
तथैव परशोर्लोके छिदया नैकतेति चेत्॥
१३४५॥§ 4550

399/k

भिन्नप्रमाणफलवादिनं प्रति बौद्धेनोक्तम्—यदि प्रमाणफलयोर्भेदोऽभ्युपगम्यते तदा भिन्नविषयत्वं स्यात्प्रमाणफलयोः। न चैतद्युक्तम्। नहि परश्वादिके छेदने खदिरप्राप्ते सति पलाशे छेदो भवति। तस्मात्प्रमाणफलयोरेकविषयत्वादभेद इति।अत्रोक्तं कुमारिलेन— विषयैकत्वमिच्छंस्तु यः प्रमाणं फलं वदते। साध्यसाधनयोर्भेदो लौकिकस्तेन बाधितः॥ छेदने खदिरप्राप्ते न पलाशे छिदा यथा। तथैव परशोर्लोके छिदया सह नैकता॥ इति। छेद्यतेऽनेनेति छेदनम्॥ १३४५॥ § 4551

नेत्यादिनोत्तरमाह। § 4552

न व्यवस्थाश्रयत्वेन साध्यसाधनसंस्थितिः।
निराकारे तु विज्ञाने सा संस्था न हि युज्यते॥
१३४६॥§ 4554

नीलास्पदं संवेदनं न पीतस्येति विषयावगतिव्यवस्थाया अर्थसारूप्यमेव निबन्धनं नान्यदिति व्यवस्थाप्यव्यवस्थापकभावेन साध्यसाधनव्यवस्था, नोत्पद्योत्पादकभावेन, यस्मान्न पारमार्थिकः कर्तृकरणादिभावोऽस्ति, क्षणिकत्वेन निर्व्यापारत्वात्सर्वधर्माणाम्। ज्ञानं हि विषयाकारमुत्पद्यमानं विषयं परिच्छिन्ददिव सव्यापारमिवाभाति। अयमेवार्थप्रापणव्यापारो ज्ञानस्य, न त्वविनाभावित्वमात्रम्। नहिबीजाद्यविनाभाविनोऽङ्कुरादयो न भवन्ति। ये(न) ज्ञानमेव प्रमाणं स्यात्। तस्मात्साकारमेव ज्ञानं प्रमाणं न निराकारमिति व्यवस्थया प्रामाण्येन प्रदर्श्यते। व्यवस्था च तत्पृष्टलब्धेन विकल्पेन वेदितव्या॥ १३४६॥ § 4555

अत उत्प्रेक्षित इत्यादिना लोकप्रसिद्धबाधामाह। § 4556

अत उत्प्रेक्षितो भेदो विद्यते धनुरादिवत्।
उत्पाद्योत्पादकत्वेन व्यवस्थेयं तु नेष्यते॥
१३४७॥§ 4558

धनुरादिवदिति। धनुर्विध्यति धनुषा विध्यति धनुषो निःसृत्य शरो विध्यतीति यच्चैकस्य धनुषः कर्तृत्वादयः कल्पिता न विरुध्यन्ते तथेहापीति॥ १३४७॥ § 4559

विश्लिष्यमाणसन्धौ च दर्वादौ परशुच्छिदा।
प्रविशन्नुच्यते तेन तत्रैकत्वमवस्थितम्॥
१३४८॥§ 4561

परशुना च वृक्षादेश्छिदा निरूप्यमाणा छेद्यद्रव्यानुप्रवेशलक्षणैवावतिष्ठते स चानुप्रवेशः परशोरात्मगत एव धर्म इति परमार्थतश्छिदया सहैकत्वमिति नास्ति विरोधः॥ १३४८॥ § 4562

400/k

व्यवस्थायामित्यादिनैतद्दर्शयति। § 4563

व्यवस्थायां तु जातायां कल्प्यतामन्यथापि हि।

उत्पाद्योत्पादकत्वेन संस्थानविधिरुच्यते॥
१३४९ ॥§ 4565

यथा कुमारिलेन परिच्छेदफलत्वेत्यादिना ग्रन्थेनोत्पाद्योत्पादकभावेन प्रमाणफलव्यवस्थाकृता, तथाऽस्माकमप्यविरोधिन्येव। यथोक्तमाचार्येण— तत्रापि हि प्रत्यक्षत्वोपचारोऽविरुद्धश्चक्षुरादिषु तत्कारणेष्विति। एतावत्तु ब्रूमः—अवश्यमादौ व्यवस्थाद्वारेणैव साध्यसाधनसंस्था कर्त्तव्या, न ह्यव्यवस्थाप्य संविद्भेदं विषयभेदेन नियमेन प्रवृत्तिर्युक्ता, संविद्भेदव्यवस्थायाश्च सारूप्यमेव निबन्धनमिति सामर्थ्यादेवायातं सारूप्यस्य साधकतमत्वं, सारूप्यादेव चे ज्ञानस्य प्रवर्त्तकत्वम्। प्रवर्त्तकस्य च प्रमाणत्वं प्रवृत्तिकामेन निरूप्यते, न व्यसनितया। यथोक्तम्— अर्थक्रियार्थं हि सर्वः प्रमाणमप्रमाणं चान्वेषते प्रेक्षावानिति। यतो येनैवांशेन प्रवर्त्तकत्वं ज्ञानस्य भवति स एव दर्शनीयः, न चोत्पाद्योत्पादकभावेन प्रमाणफलव्यवस्थायां प्रवर्त्तकांशः सारूप्यं गम्यते, ततश्च निष्फलमेवोत्पादद्वारेण प्रमाणव्यवस्थानं स्यात्।अतएवाचार्येणैतद्द्वारेण प्रमाणव्यवस्थानं न प्रवृत्त्यङ्गमिति मत्वेवोपचार आश्रितः। तस्माज्ज्ञातायां तु व्यवस्थायां साऽन्यथाऽप्युत्पाद्योत्पादकभावेन कल्प्यताम्। तथाऽप्यदोष एवेति॥ १३४९॥ § 4566

परिच्छेदेत्यादिना तदेव कौमारिलं फलव्यवस्थानं दर्शयति। § 4567

परिच्छेदफलत्वेन वृत्तस्यानन्तरस्य हि।
कारणत्वं मतं ज्ञाने प्रमाणे तु फलं परम्॥
१३५० ॥§ 4569

स्वसंवित्तिफलत्वं चेन्निषेधान्नैव युज्यते।
माने च विषयाकारे भिन्नार्थत्वं प्रसज्यते॥
१३५१ ॥§ 4571

वृत्तस्येति। प्रवृत्तस्य चक्षुरादेरित्यर्थः। फलं परमिति। हानोपादोनापेक्षाबुद्धिलक्षणम्। इदमपरमुक्तं कुमारिलेनैव—स्वसंवेदनस्य निषेधात्तस्य प्रमाणफलत्वमयुक्तम्। विषयाकारस्य च प्रामाण्ये सति प्रमाणफलयोर्भिन्नविषयत्वं प्रसज्यते। तथाहि—विषयाकारो बाह्यविषयः स्वसंवेदनं तु ज्ञानस्वरूपविषयमिति॥ १३५०॥ ॥ १३५१॥ § 4572

401/k

सर्वेत्यादिना प्रतिविधत्ते— § 4573

सर्वावित्तिप्रसङ्गेन सा निषेद्धुं न शक्यते।
भिन्नार्थत्वं न चेहास्ति स्वविदप्यर्थविन्मता॥
१३५२॥§ 4575

अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति इति सर्वार्थाप्रत्यक्षत्वप्रसङ्गान्न शक्यते स्वसंवित्तिर्निषेद्धुम्। नापि भिन्नविषयत्वप्रसङ्गो युक्तः, यतः स्वसंवित्तिरप्यर्थसंवित्तिरिष्टा, तत्कार्यत्वात्। नतु तन्मयत्वेन। स्वसंवित्तिस्तु ताद्रूप्यादिति न विरोधः॥ १३५२॥ § 4576

स्वातिरिक्तेत्यादिना शङ्करस्वामी प्रमाणयति। § 4577

स्वातिरिक्तक्रियाकारि प्रमाणं कारकत्वतः।
वास्यादिवच्चेद्वैफल्यमन्यद्ध्यपि फलं मतम्॥
१३५३॥§ 4579

उक्तन्यायेन वास्यादेरन्यदस्ति फलं न च।
कारकत्वं च नो सिद्धं जनकत्वविवक्षया॥
१३५४॥§ 4581

स्थापकत्वविवक्षायां न विरोधोऽस्ति कश्चन।
तेनानैकान्तिको हेतुर्विरोधाप्रतिपादनात्॥
१३५५॥§ 4583

आत्मव्यतिरिक्तक्रियाकारि प्रमाणं कारकत्वाद्वास्यादिवदिति। वैफल्यमित्यादिना दूषयति। विफलं, सिद्धसाध्यतादोषात्। यतोऽन्यदपि जन्यं फलं परिच्छेदेत्यादिना कथितम्। हिशब्दो हेतौ। वास्यादिवदिति च साध्यविकलो दृष्टान्तश्छिदया सहैकत्वस्य प्रतिपादितत्वात्। कारकत्वादिति च जन्यजनकत्वविवक्षायामसिद्धो हेतुः, स्थापकत्वेनैवेष्टत्वात्। साधनस्य स्थापकत्वविवक्षायामप्यनैकान्तिको विरोधाभावात्। सामान्यविवक्षायामनैकान्तिक एव, विरोधस्यानुपदर्शितत्वात्॥ १३५३॥ ॥ १३५४॥ १३५५॥ § 4584

ननु च यदि विषयाकारं ज्ञानं स्यात्तदा भवेद्विषयसारूप्यस्य प्रामाण्यम्, यावता ग्राह्यविषयसमानाकारं समानस्वभावं ज्ञानमुपपद्यते, नैव तथा, ग्राह्याज्ज्ञात्यन्तरत्वाद्रूपरसयोरिवेत्याह—ग्राह्येत्यादि। § 4585

ग्राह्यसाधारणाकारं तस्माज्ज्ञात्यन्तरत्ववतः।
रसरूपादिवज्ज्ञानं नैव चेदुपपद्यते॥ १३५६॥§ 4587

न्यायानुसरणे सर्वमस्माभिरुपवर्णितम्।
इदमन्यच्च विस्पष्टं ग्राह्यग्रहविवेचने॥ १३५७॥§ 4589

402/k

विज्ञानवादन्यायानुसारिभिरस्माभिरेतदिष्टमेवेति न किंचित्क्षीयते। तथाहि—यत्किंचिदिदमस्पष्टं भवता ग्राह्यदूषणमभिहितम्। इदं तु स्पष्टं ग्राह्यविवेचनाय साधनमभिधीयतेऽस्माभिः। ग्राह्ये ग्रहोऽभिनिवेशस्तस्य विवेचनमपनयनम्॥ १३५६॥ ॥ १३५७॥ § 4590

किं तत्स्पष्टं साधनमित्याह—सर्वेत्यादि। § 4591

सर्वात्मना हि सारूप्ये ज्ञानमज्ञानतां व्रजेत्।
साम्यं केनचिदंशने सर्वं स्यात्सर्ववेदकम्॥
१३५८॥§ 4593

यावद्भ्यो विजातीयेभ्यो व्यावृत्तस्तावद्भ्य एव ज्ञानमपीतीदं सर्वात्मना सारूप्यम्। कतिपयपदार्थव्यावृत्तिस्त्वंशेन सारूप्यम्॥ १३५८॥ § 4594

कथं तर्ह्यर्थसारूप्यस्य प्रामाण्यमुक्तमित्याह—किन्त्वित्यादि। § 4595

किन्तु बाह्यार्थसद्भाववादे सारूप्यसम्भवः।
ध्रुवमभ्युपगन्तव्य इत्यर्थं स प्रकाशितः॥
१३५९॥§ 4597

निर्भासिज्ञानपक्षे हि ग्राह्याद्भेदेऽपि चेतसः।
प्रतिबिम्बस्य ताद्रूप्याद्भाक्तं स्यादपि वेदनम्॥
१३६०॥§ 4599

येन त्विष्टं न विज्ञानमर्थासारूप्यभाजनम्।
तस्यायमपि नैवास्ति प्रकारो बाह्यवेदने॥ १३६१॥
इति प्रत्यक्षलक्षणपरीक्षा।§ 4602

स इति। सारूप्यसम्भव आकारो वा। निर्भासा—विषयसारूप्यं, तद्यस्यास्ति तन्निर्भासि। ग्राह्यादिति। बाह्यादर्थात्। प्रतिबिम्बस्येति। ज्ञानाकारस्य। ताद्रूप्यादिति। विषयसारूप्यात्। भाक्तमिति। उपचरितम्। वेदनमिति। अर्थस्येति शेषः। भाजनम्—आश्रयः। विषयविप्रतिपत्तिस्तु सामान्यस्य वस्तुभूतस्य निराकरणाद्वस्तुविषयत्वेनेष्टस्य प्रत्यक्षस्य नान्यः स्वलक्षणाद्विषयोऽस्तीति सामर्थ्यादुपदर्शितत्वान्न पृथङ्निराकृता। ये त्वाहुरयुक्तमेवेदं प्रत्यक्षलक्षणम्, लक्षणं हि प्रमाणस्य प्रणीयते, अपि नाम तेन रूपेणोपलक्ष्य प्रमाणं ततः परेषां प्रवृत्तिः स्यादिति, न तु व्यसनितया, न च कल्पनापोढत्वादिनोपलक्षितस्यापि प्रवर्त्तकत्वं निवर्त्तकत्वं वा समस्ति लोक इति। तदसम्यक्। नहि स्वेच्छया वस्तूनां स्वभावव्यवस्थानां कर्तुं लभ्यं, येनान्यथा प्रणीयेत लक्षणम्, अपि तु यथावस्थितमेव वस्तुस्वरूप-
403/k मनूद्य प्रसि द्धस्वभावविशेषप्रतिपिपादयिषया लक्षणं प्रणयन्ति तद्विदः। यथा पृथिव्याः खष्खटत्वं (खरत्वम् ?)। अन्यथा ह्यसम्भवितादोषेण दुष्टं स्यात्। नच प्रत्यक्षस्य कल्पनापोढाभ्रान्तत्वाभ्यामन्यल्लक्षणमुपलक्षकमस्ति। तथाहि—तदवश्यमभ्रान्तमङ्गीकर्त्तव्यं प्रमाणत्वात्। कल्पनापोढं च साक्षात्स्वलक्षणविषयत्वात्। स्वलक्षणस्य चाशक्यसमयत्वेन तत्संवित्तेरनभिजल्पत्वस्य प्रसाधितत्वात्। अतो न्यायानुयातमेव लक्षणमेव तदाचक्षते कुशलाः। न चाप्यतो लक्षणात्प्रेक्षावतां प्रवृत्तिनिवृत्ती न भवतः। तथाहि—घटोत्क्षेपणसामान्यसङ्ख्यादिज्ञानस्य प्रत्यभिज्ञाप्रत्ययस्य च तथा पीतशङ्खादिज्ञानस्य परैः प्रत्यक्षत्वेनोपकल्पितस्य यथायोगं सविकल्पकत्वेन भ्रान्तत्वेन वा प्रत्यक्षत्वमवधार्य तद्विषयत्वेनोपकल्पितस्य सङ्ख्यादेर्वस्तुत्वाभिनिवेशान्निवर्तन्ते। यच्च निर्देश्यं नीलादि स्वलक्षणं तदेव वस्त्वित्यवसाय तत्र प्रवर्त्तन्ते। यथाच निर्विकल्पस्यापि प्रत्यक्षस्य प्रवर्त्तकत्वं तथा प्रागुक्तमेव। यद्येवं कल्पनापोढत्वमेवैकं लक्षणं कर्तुं युक्तं नत्वभ्रान्तमिति। तथाहि—प्रवृत्तेः प्राग्यदेव सिद्धं रूपं तदेवप्रवृत्तिकामानां लक्षणत्वेन प्रणेतुं युक्तं नाप्रसिद्धमसत्तुल्यत्वात्तस्य। नचाभ्रान्तत्वनिश्चयोऽर्थक्रियासंवादात्प्रागस्ति, न ह्यर्वाग्दर्शनास्तत्कार्याधिगममन्तरेण यथार्थतां ज्ञानस्य ज्ञातुमीशते, तेषां नित्यं पदार्थशक्तेः कार्यानुमेयत्वात्। यथोपदर्शितार्थप्रापणसामर्थ्यलक्षणत्वाच्च यथार्थतायाः। न चोत्तरकालं यथार्थतावधारणेऽपि साफल्यमस्ति, ततः पुनरप्रवृत्तेः। तदेतदचोद्यम्। तथाहि—केशोण्ड्रकादिबुद्धीनामपिप्रामाण्यप्रसङ्गान्माभूदतिव्यापिता लक्षणदोष इत्यतोऽवश्यकरणीयमभ्रान्तग्रहणमित्युक्तम्। यश्चापि प्रवृत्तेः प्रागनिश्चयहेतुरर्वाग्दर्शित्वमुच्यते, सोऽप्यनैकान्त एव। को ह्यत्र प्रतिबन्धो यदर्वाग्दर्शिभिर्न क्वचित्सामर्थ्यं निश्चितव्यमिति। एवं हि नकिंचित्तैर्निश्चेयमिति प्राप्तम्। ततश्चाचेतनत्वमेव तेषामायातम्। यावता पशुशिशवोऽप्यभ्यासबलादुद्भूतभूतज्ञानवासनावृत्तयः सुखस्य साधनमेतदेतदसुखस्येति प्रवृत्तेः प्रागपि निश्चित्य प्रपातादि परिहरन्तः स्तनादि चोपाददानाः संदृश्यन्त एव। तथाह्यभूतमपि भावयतां कामशोकभयाद्युपप्लुतचेतसामनपेक्षितसाधर्म्यादिस्मृतेरभ्यासस्य

स्फुटप्रतिभासस्य ज्ञानोत्पादनसामर्थ्यमुपलभ्यत एव। यत्र तु पुनर्नाभ्यासस्तत्र तेषांकार्यानुमेयैव शक्तिर्न तु सर्वत्र। एतेन धूमादिलिङ्गनिश्चयोऽपि व्याख्यातः। यतस्तत्रापि तद(दे ?)तत्कार्यस्य धूमादेः प्रकृत्या परस्परमत्यन्तविविक्तस्वभावत्वात्, तद्विवेकनिश्चयस्य चाभ्यासादिहेतुत्वाल्लिङ्गनिश्चयसम्भवादतो नानुमानप्रतिक्षेपः। न न्वाद्यायां प्रवृत्तौ सत्यामभ्यासः सिध्यति, 404/k
यावता सैव कथं भवतीति वक्तव्यम्। उच्यते। संशयात्। संशयहेतोः प्रत्यक्षस्य कथं तत्र प्रामाण्यमिति चेत्। निश्चयहेतोरपि कथं प्रामाण्यम्। अवसायोत्पादनादर्थिनस्तत्र प्रवर्त्तनादिति चेत्। तदेतत्संशयहेतोरपि तुल्यम्। यद्यपि तत्र प्रतीयमानार्थितार्थाकारविपरीतो व्यवसायः, तथापि न तेनाकारेण तस्य प्रत्यक्षस्य प्रवर्त्तकत्वम्, तथाऽवसितस्यानर्थितत्वात्।नापि निवर्त्तकत्वं, प्रतीयमानप्रार्थितार्थाध्यवसायहेतुत्वेनार्थिनः प्रवर्त्तनात्। अन्यथा हि संशयहेतोः प्रत्यक्षादर्थी न प्रवर्त्तेत नापि निवर्त्तेतेति प्राप्तं, न चैवं भवति, अपि त्वर्थिनामसम्भावितानर्थोदयानामर्थितया प्रवृत्तेरेव बलीयस्त्वम्। अनेन चांशेन निश्चयहेतोः प्रत्यक्षादस्य न कश्चिद्विशेषः। यत्र त्वेकान्तेन प्रतीयमानार्थविपरीताकारावसायहेतुत्वमेव, अवसायानुत्पादकत्वं वा, तत्र तस्य सर्वथार्थिनोऽप्रवर्त्तनादप्रामाण्यमेवेति युक्तं वक्तुं, नान्यत्रेत्यलम्॥ १३५९॥ १३६०॥ १३६१॥ § 4603

इति प्रत्यक्षलक्षणपरीक्षा।

०.१९ अनुमानपरीक्षा।

अनुमानस्येदानीं लक्षणमाह—स्वपरेत्यादि। § 4605

स्वपरार्थविभागेन त्वनुमानं द्विधेष्यते।
स्वार्थं त्रिरूपतो लिङ्गादनुमेयार्थदर्शनम्॥
१३६२॥ § 4607

त्रिरूपलिङ्गवचनं परार्थं पुनरुच्यते।
एकैकद्विद्विरूपोऽर्थो लिङ्गाभासस्ततो मतः॥
१३६३॥ § 4609

अनुमानं स्वार्थपरार्थभेदेन द्विविधम्। तत्र स्वार्थं यत्रि(?)रूपाल्लिङ्गात्पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षाच्च सर्वतो व्यावृत्तिरित्येवंलक्षणादनुमेयार्थविषयं

ज्ञानं तदात्मकं बोद्धव्यम्। परार्थं तु यथोक्तत्रिरूपलिङ्गप्रकाशकवचनात्मकं द्रष्टव्यम्। अथानुमानाभासस्य किं लक्षणं नोक्तमित्याह—एकैकेत्यादि। नित्यः शब्दः कृतकत्वान्मूर्त्तत्वादप्रमेयत्वादित्येकैकरूपो यथाक्रमं पक्षधर्मत्वसपक्षसत्त्वविपक्षव्यावृत्तिमात्रस्य विद्यमानत्वात्। तत्र द्विद्विरूपो यथा—ध्वनिरनित्यश्चाक्षुषत्वाच्छ्रावणत्वादमूर्तत्वादिति यथाक्रमं पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्तिमात्राभावात्। तदुक्तम्— कृतकत्वाद्ध(?)निर्नित्यो मूर्त्तत्वादप्रमेयतः। अमूर्त्तश्रावणत्वाभ्यामनित्यश्चाक्षुषत्वतः॥ इति॥ ॥ १३६२॥ १३६३॥ § 4610
405/k

अन्यथेत्यादिना पात्रस्वामिमतमाशङ्कते— § 4611

अन्यथाऽनुपपन्नत्वे ननु दृष्टा सुहेतुता।
नासति त्र्यंशकस्यापि तस्मात्क्लीबास्त्रिलक्षणाः॥
१३६४॥§ 4613

स ह्याह। अन्यथाऽनुपपन्नत्वं एव शोभनो हेतुर्न तु पुनस्त्रिलक्षणः। तथाह्यसत्यन्यथानुपपन्नत्वे त्र्यंशकस्यापि तत्पुत्रत्वादेर्न दृष्टा सुहेतुता। तस्मात् क्लीबाः—असक्ताः, त्रिलक्षणा हेतव इति। अन्यथेति। साध्येन विनाऽनुपपन्नत्वं, हेतोः साध्य एव सत्त्वमित्यर्थः॥ १३६४॥ § 4614

अन्यथेत्यादिना सविस्तरमन्वयव्यतिरेकसंदर्शनेनान्यथानुपपन्नत्वैकलक्षणं हेतुं समर्थयते। § 4615

अन्यथाऽनुपपन्नत्वं यस्यासौ हेतुरिष्यते।
एकलक्षणकः सोऽर्थश्चतुर्लक्षणको न वा॥
१३६५॥§ 4617

एकं लक्षणमन्यथाऽनुपपन्नत्वं यस्यास्ति स एकलक्षणः। स एव लौकिकैः परीक्षकैर्वा हेतुरिष्यते, नान्यः। अर्थापत्त्या तु पक्षधर्मत्वादित्रयमनेनैवाक्षिप्यत इतिचतुर्लक्षणकोऽपि वा भवतु। न वा चतुर्लक्षणो यस्मात्क्वचिदेकलक्षणो द्विलक्षणस्त्रिलक्षणोऽपि वा न्याय्यः, यस्मादन्यथानुपपत्तिरेकं लक्षणं तेनैकलक्षण इति व्यपदिश्यते, अन्यथाऽनुपपत्तिसहितां सजातीयसिद्धतां विजातीयव्यावृत्तिं चाभिसमीक्ष्य द्विलक्षणः, अन्यथानुपपन्नत्वं सजातीयवृत्तिः साध्यविपक्षाच्च व्यावृत्तिरिति त्रिलक्षणः। न तु पक्षधर्मत्वादिलक्षणधर्मत्रययोगात्त्रि(?)लक्षणहेतुरिष्यते। तस्य सम्यग्ज्ञानं प्रति हेतुत्वानुपपत्तेः॥ १३६५॥ § 4618

अथवा प्राधान्यादन्यथाऽनुपपत्तिनामधेयेनैवैकलक्षणव्यपदेशो न तु पक्षधर्मत्वादिभिस्तेषामप्राधान्यादकिञ्चित्करत्वाद्वेत्येतद्दर्शयन्नाह—यथेत्यादि। § 4619

यथा लोके त्रिपुत्रः सन्नेकपुत्रक उच्यते।
तस्यैकस्य सुपुत्रत्वात्तथेहापि च दृश्यताम्॥
१३६६॥§ 4621

ननु चाविनाभावसम्बन्धात्रि(?)रूपस्यैव सुहेतुता युक्तेत्याह— अविनेत्यादि। § 4622

अविनाभावसम्बन्धस्त्रिरूपेषु न जातुचित्।
अन्यथाऽसम्भवैकाङ्गहेतुष्वेवोपलभ्यते॥
१३६७॥§ 4624

अन्यथासम्भव एकमङ्गं येषां ते तथोक्तास्ते च ते हेतवश्चेत्यन्यथासम्भवैकाङ्गहेतवः॥ १३६७॥ § 4625
406/k

अन्यथेत्यादिना यथोक्तमेवार्थं निगमयति। § 4626

अन्यथानुपपन्नत्वं यस्य तस्यैव हेतुता।
दृष्टान्तौ द्वावपि स्तां वा मा वा तौ हि न
कारणम्॥ १३६८॥§ 4628

नान्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम्।
अन्यथाऽनुपपन्नत्वं यत्र तत्र त्रयेण किम्॥
१३६९॥§ 4630

दृष्टान्ताविति। साधर्म्यवैधर्म्यलक्षणौ। न कारणमिति। साध्यप्रतिपत्तेः। अन्यथाऽनुपपन्नत्वं यत्रेत्यस्यानन्तरं नान्यथानुपपन्नेत्यस्यार्द्धस्य पाठः कर्त्तव्यः॥ ॥ १३६८॥ १३६९॥ § 4631

त्रिरूपेऽविनाभावसम्बन्धाभावं दर्शयन्नाह—स श्याम इत्यादि। § 4632

स श्यामस्तस्य पुत्रत्वाद्दृष्टा श्यामा यथेतरे।

३ सुहेतुता] Correction: ; सहेतुता (sic !)सुहेतुता

इति त्रिलक्षणो हेतुर्न निश्चित्यै प्रवर्त्तते॥
१३७० ॥§ 4634

तत्रैकेत्यादिनैकलक्षणस्यैव हेतोः सामर्थ्यं दर्शयत्युदाहरणप्रपञ्चेन—
§ 4635

तत्रैकलक्षणो हेतुर्दृष्टान्तद्वयवर्जितः।
कथञ्चिदुपलभ्यत्वाद्भावाभावौ सदात्मकौ॥
१३७१ ॥§ 4637

भावाभावौ कथंचित्सदात्मकौ कथंचिदुपलभ्यत्वात्। अत्र न साधर्म्यवैधर्म्यदृष्टान्तौ बहिर्भूतौ प्रयोगात्मकावर्थात्मकौ वा विद्येते। भावाभावात्मकस्य सर्वपदार्थराशेः पक्षीकृतत्वात्। तद्व्यतिरिक्तस्य चान्यस्याभावात्। पक्षधर्मस्यान्यथानुपपन्नत्वादव्यतिरेकाच्चैकलक्षण एवायम्। कथञ्चिदिति। ज्ञेयत्वादिना केनचित्पर्यायेणेत्यर्थः। सदात्मकाविति। अत्रापि कथञ्चिदिति सम्बन्धनीयम्। तेनायमर्थो भवति—कथञ्चिदुपलभ्यत्वात्कथञ्चित्सदात्मकाविति॥ १३७१॥ § 4638

इदानीं द्विलक्षणस्य हेतोरुदाहरणान्याह— § 4639

चन्द्रत्वेनापदिष्टत्वान्नाचन्द्रः शशलाञ्छनः।
इति द्विलक्षणो हेतुरयं चापर उच्यते॥
१३७२ ॥§ 4641

पतत्कीटकृतेयं मे वेदनेत्यवसीयते।
पतत्कीटकसंस्पर्शप्रतिलब्धोदयत्वतः॥
१३७३ ॥§ 4643

चक्षू रूपग्रहे कार्ये सदाऽतिशयशक्तिमत्।
तस्मिन्व्यापार्यमाणत्वाद्यदि वा तस्य दर्शनात्॥
१३७४ ॥§ 4645

407/k

कथञ्चिदसदात्मानो यदि वाऽत्मघटादयः।
कथञ्चिन्नोपलभ्यत्वात्खरसम्बन्धिशृङ्गवत्॥
१३७५॥ § 4647

कथञ्चन सदात्मानः शशशृङ्गादयोऽपि च।
कथञ्चिदुपलभ्यत्वाद्यथैवात्मघटादयः॥ १३७६॥ § 4649

त्वदीयो वापि तत्रास्ति वेश्मनीत्यवगम्यते।
भावत्कपितृशब्दस्य श्रवणादिह सद्मनि॥
१३७७॥ § 4651

अन्यथाऽनुपपत्त्यैव शब्ददीपादिवस्तुषु।
अपक्षधर्मभावेऽपि दृष्टा ज्ञापकताऽपि च॥
१३७८॥ § 4653

तेनैकलक्षणो हेतुः प्राधान्याद्गमकोऽस्तु नः।
पक्षधर्मादिभिस्त्वन्यैः किं व्यर्थैः परिकल्पितैः॥
१३७९॥ § 4655

नाचन्द्रः शशी चन्द्रः शशीति वा पक्षः, लोके सम्प्रदायप्रसिद्धचन्द्रव्यपदेशाच्चन्द्रत्वेनापदिष्टत्वादिति वा हेतुः, वैधर्म्येण लोष्टादि। अयं चापरो द्विलक्षण उच्यते —पतत्कीटककृतेयं मम वेदना पतत्कीटकसंस्पर्शप्रतिलब्धोदयत्वात्। पततः कीटकस्य पतङ्गस्य स्पर्शेन प्रतिलब्ध उदय उत्पादो ययेत्यर्थः। सामान्यविवक्षा चात्रान्यपदार्थे द्रष्टव्या, तेन टाप्न भवति। विद्यमानरूपग्रहणसाधकतमशक्तिकं चक्षुः, अनुपहतत्वे सति रूपदिदृक्षायां प्रेक्षापूर्वकारिणा करणत्वेन व्यापार्यमाणत्वात्, रूपपरिच्छेदनदर्शनाद्वा। वैधर्म्येण श्रोत्रादि। तस्येति। रूपस्य। अत्र त्रिष्वपि हेतुष्वसत्यान्येषु साधर्म्यदृष्टान्ताभावाद्विरूपत्वम्। आत्मघटादयः कथंचिदसदात्मानः कथंचिदनुपलभ्यमानत्वात्खरविषाणवत्। अत्र वैधर्म्यदृष्टान्तो न विद्यते। घटादिः सर्वोभावात्मको राशिः कथंचिदसदात्मकत्वेन प्रतिज्ञानः, अभावश्च साधर्म्य-

१८ त्यान्येषु] Correction: ; त्याषु (sic!)त्यान्येषु

दृष्टान्तत्वेनोपन्यस्तः। न च भावाभावव्यतिरिक्तं तृतीयमस्ति, यत्र साध्यव्यवच्छेदपूर्वकः साधनव्यवच्छेदो निर्दिश्येत। खरविषाणादयो वा कथञ्चित्सदात्मकाः कथञ्चिदुपलभ्यमानत्वादात्मघटादिवत्। अत्रापि पूर्वकयैव युक्त्या वैधर्म्यदृष्टान्ताभावो योजनीयः। प्रतिपद्यमानत्वदीयपितृकमिदं गृहं, श्रूयमाणत्वदीयपितृकस्वरत्वात्। अत्र किल साधर्म्यदृष्टान्तो नास्तीति द्विरूपता। तथा शब्ददीपादीनां धूमादिलिङ्गवज्ज्ञापकत्वं दृष्टमसत्यपि पक्षधर्मत्वे, न हि शब्ददीपादयो घटाद्यर्थगता धर्माः, अथच प्रतीयते शब्दादेः सकाशादर्थ
408/k इति विपक्षाभावोऽन्यथानुपपन्नत्वं चेति द्विरूपो हेतुः ॥ १३७२॥ १३७३॥ १३७४॥ १३७५॥ १३७६॥ १३७७॥ १३७८॥ ॥ १३७९॥ § 4656

तदित्यादिना प्रतिविधत्ते। § 4657

तदिदं लक्षणं हेतोः किं सामान्येन गम्यते।
जिज्ञासितविशेषे वा धर्मिण्यथ निदर्शने॥
१३८०॥ § 4659

तत्र साध्येनाविनाभावित्वं हेतोः सामान्येन वा स्याद्धर्मिविशेषपरिग्रहाद्विशेषेण वा स्यात्। धर्मिविशेषपरिग्रहाद्विशेषेऽपि जिज्ञासितविशेषसाध्यधर्मिणि वा स्याद्दृष्टान्तधर्मिणि वेतीयन्तः पक्षाः सम्भाव्यन्ते॥ १३८०॥ § 4660

तत्र प्रथमे पक्षे दोषमाह—सामान्येनेत्यादि। § 4661

सामान्येन गते तस्मिन्नेवं चेत्साध्यधर्मिणि।
हेतोः सत्त्वं प्रकाश्येत न विवक्षितसिद्धिभाक्॥
१३८१॥ § 4663

न ह्यविनाभावित्वमात्रेणैव विना पक्षधर्मत्वं शब्दे धर्मिणि चाक्षुषत्वमनित्यत्वस्य गमकं दृष्टमित्ययुक्तः प्रथमः पक्षः। न विवक्षितसिद्धिभागिति। साध्यधर्मिणि न विवक्षितां सिद्धिं भजेदित्यर्थः॥ १३८१॥ § 4664

कथमित्याह—तद्यथेति। § 4665

तद्यथा चाक्षुषत्वस्य नाशेनाव्यभिचारिता।
सामान्येन गता तच्च ध्वनौ तस्य न साधनम्॥
१३८२॥ § 4667

तस्य धर्मिणि सद्भावः ख्याप्यते चेत्तथा सति।
सैव त्रिरूपताऽऽयाता भवतामपि दर्शने॥
१३८३॥§ 4669

तच्चेति। चाक्षुषत्वम्। तस्येति। नाशस्य। साधनम्—गमकम्। अथ माभूद्यथोक्तदोष इति तस्य हेतोः साध्यधर्मिणि सद्भाव आश्रीयते। एवं सति तदेव त्रिरूपत्वं हेतुलक्षणमस्मदीय भवद्दर्शनेऽपि जातम्॥ १३८२॥ १३८३॥ § 4670

कथमित्याह—अन्यथेत्यादि। § 4671

अन्यथाऽनुपपत्त्या दि(हि ?) व्यतिरेकान्वयौ गतौ।
तस्य धर्मिणि सद्भावात्पक्षधर्मत्वसंश्रयः॥
१३८४॥§ 4673

अन्वयः—सपक्षे सत्त्वं, व्यतिरेकः—विपक्षासत्त्वम्, संश्रयणं संश्रयः, परिग्रह इति यावत्॥ १३८४॥ § 4674
409/k

आचार्यैरित्यनेन तन्मताविरोधं प्रतिपादयति। § 4675

आचार्यैरपि निर्दिष्टमीदृक्संक्षेपलक्षणम्।
ग्राह्यधर्मस्तदंशेन व्याप्तो हेतुरितीदृशम्॥
१३८५॥§ 4677

ग्राह्यधर्म इति। ग्राह्यस्य साध्यधर्मिणो धर्मः पक्षधर्म इति यावत॥ १३८५॥ § 4678

अथेति द्वितीयं पक्षमाह— § 4679

अथेदं लक्षणं हेतोर्धर्मिण्येवावगम्यते।
यतः प्रमाणान्नासिद्धिः साध्यस्यापि ततो न तु॥
१३८६॥§ 4681

साध्यस्याप्रतिपत्तौ हि हेतोरपि न निश्चयः।
अतो निरर्थको हेतुरन्यतः साध्यसिद्धितः॥
१३८७॥§ 4683

अन्योन्याश्रयदोषश्च हेतोः साध्यस्य निश्चये।
द्वयोरन्यरासिद्धावन्यस्याप्यविनिश्चये॥ १३८८॥§ 4685

अथ साध्यधर्मिण्येव साध्याविनाभावित्वं हेतोर्यत्तदेव हेतुलक्षणं यथाह— विना साध्याददृष्टस्य दृष्टान्ते हेतुतेष्यते। परैर्मया पुनर्धर्मिण्यसंभूष्णोर्विनाऽमुना॥ अर्थापत्तेश्च शाबर्या भेक्षवाश्चानुमानतः। अन्यदेवानुमानं नो नरसिंहवदिष्यते॥ धर्मिणीति। साध्यधर्मिणि। अमुना साध्यधर्मेण विना साध्यधर्मिण्यसम्भवनशीलस्येत्यर्थः। एवं तर्हि यत एव प्रमाणाद्धेतुः साध्याविनाभूतः साध्यधर्मिणि सिद्धस्तत एव साध्यमपि सिद्धमिति व्यर्थो हेतुः। अथ साध्यं न सिद्धं तदा हेतुरपि न सिद्ध एव, यस्मात्साध्यधर्मिणि साध्याविनाभाविता हेतुलक्षणम्, तच्चाविनाभावित्वं साध्यासिद्धौ न सिद्धमित्यसिद्धो हेतुः, उभयसिद्धिनान्तरीयकत्वादविनाभावित्वस्य। अन्यतः प्रमाणात्साध्यसिद्धौ हेतुः सिद्ध इति चेत्, किं तदानीं हेतुना, साध्यस्य सिद्धत्वात्। हेतोः सकाशात्साध्यस्य निश्चये कर्त्तव्येऽन्योन्याश्रयदोषश्च स्यात्। कथमित्याह—द्वयोरित्यादि। हेतुसिद्धिपूर्विका साध्यसिद्धिः, तदर्थत्वाद्धेतोः, हेतोश्च साध्याविनाभावलक्षणस्य साध्यसिद्धिपूर्विका सिद्धिरिति व्यक्तमितरेतराश्रयत्वम्॥ १३८६॥ १३८७॥ १३८८॥ § 4686

तृतीयपक्षमाह—निदर्शनेऽपीति। § 4687

निदर्शनेऽपि तत्सिद्धौ न स्याद्धर्मिणि साध्यधीः।
न हि सर्वोपसंहारात्तस्य व्याप्तिर्विनिश्चिता॥
१३८९॥§ 4689

410/k

निदर्शने—साध्यधर्मिव्यतिरिक्ते दृष्टान्तधर्मिणीत्यर्थः। तत्सिद्धाविति। हेतुसिद्धौ। एतदुक्तं भवति—यदि साध्यधर्मिव्यतिरेकेणान्यत्रैव दृष्टान्तधर्मिणि हेतोरविनाभावित्वमिष्यते, ननु सर्वोपसंहारेण सह साध्यधर्मिणा,तत्कथं साध्यधर्मिणि हेतोः सकाशात्साध्यप्रतिपत्तिः स्यात्। कथंच न स्यादित्याह—नहीत्यादि॥ १३८९॥ § 4690

योऽपीत्यादिना साम्प्रतमुदाहरणानि दूषयते। § 4691

योऽप्ययं हेतुरत्रोक्तः कथञ्चिदुपलम्भतः।
इति नास्त्येव विषयः सन्दिग्धोऽस्येति निष्फलः॥
१३९०॥§ 4693

योऽयं कथंचिदुपलम्भत इति हेतुरुक्तः, असौ निष्फलः, सन्दिग्धस्य विषयस्याभावात्। सिद्धसाध्यत्वादिति यावत्। न हि सिद्धो विषयो हेतोरिष्यते। किं तर्हि ?।संदिग्धः। तथाहि—संदिग्धे हेतुवचनात्। व्यस्तवत्सिद्धोऽपि हेतोरनाश्रय एव, सिद्धत्वात्साध्यस्येति॥ १३९०॥ § 4694

अथ स्यात्—संदिग्ध एव हेतोरत्रापि विषयोऽस्तीति, अत आह—भावस्येत्यादि। § 4695

भावस्य हि तदात्मत्वं सर्वैरेव विनिश्चितम्।
कथंचित्तस्य साध्यत्वं किमित्थमभिधीयते॥
१३९१॥§ 4697

कथंचित्सदात्मकत्वं भावस्य सर्वैर्यदा निश्चितमेव तदा भवता किमित्थमभिधीयते कथश्चित्सदात्मको भाव इति। तदात्मत्वमिति। सदात्मत्वम्। भावस्येत्युपलक्षणमभावस्यापि। कथंचित्—प्रमेयादिरूपेण सदात्मत्वं निश्चितमेवेति व्यर्थो हेतुः॥ १३९१॥ § 4698

अथ साङ्ख्यादीनामसिद्धमतः साध्यत इत्याह—सर्वेत्यादि। § 4699

सर्वभावैक्यवादेऽपि विकारात्मादिभेदतः।
केनचिद्विशदात्मत्वमात्मना संप्रकाश्यते॥
१३९२॥§ 4701

सर्वभावगतं येऽपि निःस्वभावत्वमाश्रिताः।
तेऽपि तत्त्वत इत्यादि विशेषणमुपाश्रिताः॥
१३९३॥§ 4703

सर्वभावानामैक्यवादः साङ्ख्यीयो यस्मिन्वादे स्थितस्तैरेव साङ्ख्यैः केनचिदात्मना स्वभावेन तदात्मत्वं संप्रकाश्यत एव। कथमित्याह—विकारात्मादिभेदत इति। विकारात्मा विकारस्वभावः। आदिशब्देन प्रकृतिरसङ्कीर्णा सुखदुःखादिस्वभावा पुरुषाश्च परस्परतः प्रकृतेश्च भिन्ना गृह्यन्ते। 411/k
येऽपीति। माध्यमिकाः। तेऽपि तत्त्वत इति सविशेषणं सर्वभावानां निस्स्वभावत्वमाश्रिताः, नतु सर्वथा। दर्शन(स)मुत्पादादीनामभ्युपगमाच्च। तत्त्वत इति। न्यायतः। आदिशब्दात्परमार्थत इत्यादेर्ग्रहणम्। अवश्यं चैतदभ्युपगन्तव्यं सर्वैरेव भावस्य कथंचित्सदात्मत्वं निश्चितमिति॥ १३९२॥ १३९३॥
§ 4704

कथंचिदुपलभ्यत्वमन्यथा नहि सिध्यति।
व्यवहारस्य साध्यत्वे प्रसिद्धं स्यान्निदर्शनम्॥
१३९४॥§ 4706

अन्यथैवमनिष्यमाणे कथंचिदुपलभ्यमानत्वादित्ययं हेतुरपि न सिध्यति। पूर्वं सिद्धसाध्यता हेतुदोष उक्तः। इदानीं त्वसिद्धतोक्ता। अथ व्यवहारः साध्यते, तदा यत्र पूर्वं व्यवहारः कृतस्तत्प्रसिद्धं निदर्शनं सम्भवतीति त्रिरूप एव स्यात्। अन्यथा निदर्शनाभावे सोपि व्यवहारो न सिद्ध्येत्॥ १३९४॥
§ 4707

द्वितीयप्रयोगे दूषणमाह—चन्द्रेत्यादि। § 4708

चन्द्रत्वेनापदिष्टत्वं सपक्षेऽप्यनुवर्त्तते।
क्वचिन्माणवके यद्वा कर्पूररजतादिके॥
१३९५॥§ 4710

माणवक इति। पुरुषे॥ १३९५॥ § 4711

ननु च यदि चन्द्रप्रसाधनाय त्रिरूपो हेतुः सम्भवति। कथं तर्हि योऽचन्द्रत्वं शशिनि प्रतिजानीते तं प्रति चन्द्रत्वसाधनाय लोकस्य ब्रुवतोऽनुमानाभाव आचार्येणोक्तो यत्राप्यसाधारणत्वादनुमानाभावे शाब्दप्रसिद्धेन विरुद्धेनार्थेनापोह्यते यथाऽचन्द्रः शशी सत्त्वादिति नासौ पक्षइत्येतेन ग्रन्थेनेत्याशङ्क्याह—चन्द्रत्वसाधन इति। § 4712

चन्द्रत्वसाधने हेतावसाधारणता भवेत्।
प्रसिद्धिव्यतिरेके च वस्तुरूपसमाश्रये॥
१३९६॥§ 4714

वस्तुरूपसमाश्रय इति। वस्तुसदसत्तानुरोधिनि साधने। अत्रासाधारणोक्ता, नतु प्रसिद्धिलक्षणे हेतौ। तस्येच्छानुरोधित्वादस्त्येवान्वयः। यस्मादसौ विप्रतिपन्नः सर्वप्रतीत्यपलापी न शक्यते प्रसिद्धिलक्षणेन चंद्रत्वं प्रतिपादयितुम्। न चान्यल्लिङ्गमस्ति वस्तुबलप्रवृत्तं, येन चंद्रत्वं शशिनि प्रतिपाद्येत, चन्द्रादिव्यपदेशस्येच्छामात्रानुरोधित्वेनावस्तुधर्मत्वादिति तं प्रत्य-
412/k दृष्टान्तकमनुमानमुक्तम्। यथोक्तम् चन्द्रतां शशिनोऽनिच्छन्कां प्रतीतिं स वाञ्छति। इति तं प्रत्यदृष्टान्तं तदसाधारणं मतम् इति। अचन्द्रसाधन इति क्वचित्पाठः। तत्रैवमिति सम्बन्धः। पूर्वपक्षवादिना य उक्तोऽचन्द्रः शशी सत्त्वादिति हेतुस्तस्मिन्नचंद्रसाधनहेतौ पूर्वपक्षवादिना प्रोक्ते सति चन्द्रत्व-

साधनाय तं प्रति प्रवृत्तस्योत्तरपक्षवादिनोऽसाधारणताऽनुमानाभावे कारणमाचार्येणोदितं यत्राप्यसाधारणत्वादनुमानाभाव इत्यादिना प्रसिद्धिव्यतिरिक्तं वस्तुबलप्रवृत्तं लिङ्गमाश्रित्येति॥ १३९६॥ § 4715

तृतीयेऽपि हेतावाह—पतदित्यादि। § 4716

पतत्कीटकृतत्वस्य न विशेषः समीक्ष्यते।
पतत्कीटकसंस्पर्शप्रतिलब्धोदयस्य च॥
१३९७॥ § 4718

न विशेषः समीक्ष्यत इति। हेतुप्रतिज्ञयोः। प्रतिज्ञार्थैकदेशो हेतुरिति यावत्। तथाहि—अत्र विशिष्टकीटहेतुत्वं वेदनायाः साध्यत्वेनेष्टम्, तदेव च शब्दान्तरेण हेतुनोक्तमिति न विशेषो हेतुप्रतिज्ञयोः॥ १३९७॥ § 4719

अथ मतम्—यदा पतत इत्येतद्विशेषणं नोपादीयते प्रतिलब्धोदयत्वादित्येव तु सामान्यं हेतुरुच्यते तदा न प्रतिज्ञार्थैकदेशतेत्याह—पतत इत्यादि। § 4720

पततोऽस्येति कार्यं हि ध्रुवं हेतोर्विशेषणम्।
अन्यथा व्यभिचारित्वं दुर्निवारं प्रसज्यते॥
१३९८॥ § 4722

कीटान्तरकृतया वेदनया व्यभिचारो मा भूदिति विशेषणं कार्यम्॥ १३९८॥ § 4723

कार्यताव्यवहारस्तु तस्य विस्मरणे सति।
यदि साध्यस्त्रिरूपः स्यात्पूर्वसिद्धनिदर्शनात्॥
१३९९॥ § 4725

अथ कार्यकारणव्यवहारो विस्मृतं प्रति साध्यते, तथासति त्रिरूपो हेतुः स्यादग्निधूमादेः प्रसिद्धकार्यकारणस्य दृष्टान्तत्वेन विद्यमानत्वात्॥ १३९९॥ § 4726

चक्षूरूपेत्यादावाह—चक्षुष इत्यादि। § 4727

चक्षुषो धर्मिरूपस्य सत्ता तावदनिश्चिता।
तस्याश्च साधनं युक्तं नासिद्ध्यादिप्रसङ्गतः॥
१४००॥ § 4729

तस्याश्च साधनं युक्तं नेति छेदः। असिद्धादीत्यादिशब्देन व्यभिचारविरोधयोर्ग्रहणम्। सत्तायां साध्यायां सर्वो हेतुर्दोषत्रयं नातिवर्त्तते। तथाहि— भावे धर्मे हेतावसिद्धता, उभयधर्मेऽनैकान्तिकता, अभावधर्मे विरुद्धता। य-
413/k थोक्तम्— नासिद्धे र्भावधर्मोऽस्ति व्यभिचार्युभयाश्रयः। धर्मो विरुद्धो भावश्च सा सत्ता साध्यते कथम्॥ इति। अथ चक्षुषि धर्मिणि चक्षुर्विज्ञानोत्पादनशक्तिः साध्यते, तदापि शक्तिः सत्तेत्यादेः पर्यायत्वात्तत्साधने सत्तासाधनप्रसङ्गः। व्यतिरेकेऽपि तस्या अतीन्द्रियत्वेनासिद्धत्वादाश्रयासिद्धो हेतुः स्यात्। एवं रूपग्रहणादित्ययमप्यपक्षधर्मत्वादसिद्धो द्रष्टव्यः॥ १४००॥ § 4730

कथं तर्हि भवतामपि चक्षुरादीन्द्रियसिद्धिरित्याह—किन्त्वित्यादि। § 4731

किन्तु रूपादिभावेऽपि चक्षुर्ज्ञानं न जायते।
कदाचित्तेन तन्मात्रं न हेतुरिति गम्यते॥
१४०१ ॥§ 4733

कदाचिदिति। निमीलितलोचनावस्थायाम्। न ह्यस्माभिराहत्य चक्षुरादीदन्तया साध्यते, अपितु ज्ञानं केषुचिद्रूपादिषु सत्स्वन्वयव्यतिरेकावनुभवदृश्यते, तस्य कारणान्तरापेक्षिता तन्मात्रासम्भविता च साध्यत इति तदेव ज्ञानं धर्मीति नासिद्ध्यादिदोषः। यत्तत्कारणान्तरं तच्चक्षुरिति व्यवह्रि(?)यते। सिद्धान्ताश्रयस्तु भेदव्यवहारः॥ १४०१॥ § 4734

स्यादेतत्—भवतु यथोक्तया नीत्या विज्ञानस्य धर्मित्वम्, तथापि द्विरूप एव हेतुरित्याह—स्वहेत्विति। § 4735

स्वहेतुनियतोद्भूतिरङ्कुरादिश्च विद्यते।
तस्मिन्दृष्टान्त एवं च वैलक्षण्यमतिस्फुटम्॥
१४०२ ॥§ 4737

स्वहेतुनियता—हेतुप्रतिबद्धा,उद्भूतिर्यस्यासौ स तथोक्तः। एवंभूताः स्वकारणायत्तजन्मानोऽङ्कुरादयः कादाचित्का दृष्टान्तत्वेन सम्भवन्तीति यावत्। एवं च प्रयोगः कार्यः। ये यत्सन्निधाने कादाचित्कास्ते न तन्मात्रसम्भविनः, कारणान्तरसव्यपेक्षकाश्च, तद्यथा—सत्स्वपि क्षित्यादिषु बीजसन्निधानासन्निधानाभ्यामंन्वयव्यतिरेकिणोऽङ्कुरादयः, सत्स्वपि रूपादिषु कादाचित्कं चक्षुर्ज्ञानं निमीलितानिमीलितावस्थायामिति व्यापकविरुद्धोपलब्धिः प्रतिषेधे। विधौ तु स्वभावहेतुः॥ १४०२॥ § 4738

कथंचिदित्यादावाह—कथंचिदिति। § 4739

कथंचिदसदात्मत्वसाधने च घटादिषु।
पूर्ववद्धेतुवैफल्यमप्रसिद्धिश्च दृश्यते॥ १४०३॥§ 4741

अत्रापि सिद्धसाध्यता, केनचित्प्रकारेण घटादीनामसत्त्वस्य सिद्धत्वात्। अथ न सिद्धम्, अनुपलभ्यमानत्वादित्ययं हेतुरपि न सिध्यतीत्यसिद्धो 414/k
हेतुरिति पूर्ववद्वाच्यं दूषणं यथा सदात्मत्वसाधने हेतावुक्तम्॥ १४०३॥
§ 4742

यदुक्तं विपक्षाभावाद्वैधर्म्यदृष्टान्तो नास्तीत्यत्राह—अस्ति चेत्यादि।
§ 4743

अस्ति चात्रापि विस्पष्टं वैधर्म्येण निदर्शनम्।
तदेव तेषां स्वं रूपं प्रयाति हि विपक्षताम्॥
१४०४॥§ 4745

कथंचन सदात्मत्वसाधनेपि निरात्मसु।
इष्टसिद्धिरसिद्धिश्च वैधर्माप्तिस्तथैव च॥
१४०५॥§ 4747

येन रूपेणोपलभ्यन्ते घटादयस्तेन रूपेण सदात्मत्वं तेषामिष्टमेव यदा तदा स एव स्वभावस्तेषां वैधर्म्यदृष्टान्तो भवेदेव। तस्मिन्स्वभावेऽनुपलभ्यमानत्वस्य हेतोर्निवृत्तत्वात्। एवं कथंचनेत्यत्रापि प्रयोगे तुल्या इष्टसिद्ध्यादयः। निरात्मस्विति।अभावेषु। वैधर्म्याप्तिरिति वैधर्म्यस्य साध्यनिवृत्तिलक्षणस्य साधनाभावेनाप्तिर्व्याप्तिः।तथैवेति। स्वभावस्य वैधर्म्यसम्भवेन॥ १४०४॥ १४०५॥ § 4748

त्वदीयेत्यादावाह—पितृशब्देत्यादि। § 4749

पितृशब्दश्रुतेर्याऽपि वेश्मनः प्रतिपाद्यते।
पितृसंबन्धिता तत्र व्यक्तो हेतुस्त्रिलक्षणः॥
१४०६॥§ 4751

क्वचिद्विप्रतिसंबद्धः स्वरः प्रागुपलक्षितः।

तस्यानन्नुभवे पूर्वं दुर्द्धरा हेत्वसिद्धता॥
१४०७॥§ 4753

तस्येति। पितृसम्बद्धस्यान्यत्र क्वचित्प्रदेशेऽननुभवे सत्यसिद्धो हेतुः स्यात्॥ १४०६॥ १४०७॥ § 4754

यस्मिन्नित्यादिना तदेव त्रैरूप्यमादर्शयति। § 4755

यस्मिन्प्रागुपलब्धश्च नोपलब्धश्च यत्र सः।
अन्वयो व्यतिरेको वा विस्पष्टं तत्र दृश्यते॥
१४०८॥§ 4757

शब्दस्तु ज्ञापयत्यर्थं नैव बाह्यं कथंचन।
अन्यथासम्भवाभावाद्विलक्षागमकस्त्वसौ॥
१४०९॥§ 4759

तस्यां च प्रतिपाद्यायां वैलक्षण्यमतिस्फुटम्।
विवक्षासंमुखीभावे न हि शब्दः प्रयुज्यते॥
१४१०॥§ 4761

दीपस्तु ज्ञापको नैव नीलादेर्लिङ्गभावतः।
ज्ञानोत्पादनयोग्यस्य जननात्तु तथोच्यते॥
१४११॥§ 4763

415/k

ज्ञापके लिङ्गरूपे च पक्षधर्मादि चिन्त्यते।
अन्यथा चक्षुरादीनां कस्मादेतन्न चोद्यते॥
१४१२॥§ 4765

अन्यथानुपपत्त्याऽपि चाक्षुषत्वं न साधकम्।

पक्षधर्मवियोगेन क्लीबास्तेनैकलक्षणाः॥
१४१३॥§ 4767

एकरूपतयोक्तानां द्वैरूप्यं चोपलक्षितम्।
द्विरूपत्वेन चोक्तानां त्रैरूप्यं पक्षधर्मतः॥
१४१४॥§ 4769

अन्यथाऽनुपपत्त्यैव चाक्षेपादिति चेन्न तत्।
शब्दादावन्यथापीष्टे चाक्षुषत्वेऽथ नास्त्यसौ॥
१४१५॥§ 4771

शब्दस्य बाह्यार्थापेक्षयाऽन्यथानुपपन्नत्वमसिद्धमिति तं प्रत्यलिङ्गत्वमिच्छामात्रवृत्तित्वात्तस्य, अथ बुद्धिपरिवर्त्तिनमर्थमपेक्ष्य,तदा त्रैलक्षण्यमस्त्येव धूमस्येव, यतो विवक्षाया असम्मुखीभावे शब्दस्याप्रयोगात्तत्कार्यत्वाद्धूमवज्ञातवेदसे गमक इष्ट एव, नतु वाचकरूपेण। प्रदीपस्तु लिङ्गद्वारेण धूमवन्न ज्ञापक इष्टः। किं तर्हि ?।विज्ञानजननयोग्यघटाद्युत्पादनेन ज्ञापको रूढो नतु लिङ्गत्वेनेति तस्य लिङ्गभूतस्य पक्षधर्मत्वादिचिन्ता न युक्तैव। अन्यथा चक्षुरादीनामपि पक्षधर्मत्वादि चोदनीयंस्यात्। अन्यथेत्यादि प्रकृतार्थोपसंहारः। यतश्चाक्षुषत्वमनित्यत्वाविनाभाव्यपि शब्देतदनित्यत्वं न साधयति, यतश्चावश्यं सर्वत्र पक्षधर्मत्वमाश्रयणीयम्, अतः पक्षधर्मत्वाश्रयणादेकरूपतयोक्तानां द्वैरूप्यमावश्यकं, द्विरूपतया चोक्तानां त्रैरूप्यं तत एव पक्षधर्मत इत्येकलक्षणा एव क्लीबा हेतवः। न चैतद्वक्तव्यमन्यथानुपपत्त्यैव पक्षधर्मादय आक्षिप्ता अतः पृथक् स्वातन्त्र्येण न तेषां लक्षणत्वमिति। यतः पक्षधर्मत्वमन्तरेणाप्यन्यथानुपपन्नत्वमस्तीति स्वयमेवोक्तम्— अन्यथानुपपत्त्यैव शब्ददीपादिवस्तुष्वपक्षधर्मभावेऽपि दृष्टा ज्ञापकतापि चेति। चाक्षुषत्वे चानित्यत्वान्यथानुपपन्नेऽप्यसौ पक्षधर्मो नास्तीत्यनेकान्त एव॥ १४०८॥ १४०९॥ १४१०॥ १४११॥ ॥ १४१२॥ १४१३॥ १४१४॥ १४१५॥ § 4772

यदुक्तं स श्यामस्तत्पुत्रत्वादित्येष त्रिलक्षणोऽपि न निश्चित्यै प्रवर्त्तत इत्यत्राह—तत्पुत्रेत्यादि। § 4773

तत्पुत्रत्वादिहेतूनां सन्दिग्धव्यतिरेकतः।

१८ शब्ददीपादि] Correction : ; शब्दादि (sic !)शब्ददीपादि
१ त्रिलक्षणो] Correction : ; त्रिलक्षणे (sic !)त्रिलक्षणो

न त्रैलक्षण्यसद्भावो विजातीयाविरोधतः॥
१४१६॥§ 4775

416/k

तत्पुत्रश्च भविष्यति नच श्याम इति नात्र कश्चिद्विरोध इति संदिग्धविपक्षव्यावृत्तिकत्वान्नायं त्रिलक्षण इत्यसिद्धो दृष्टान्तः॥ १४१६॥ § 4776

स्यादेतत—अस्त्येव विरोधः। कारणाभेदे सति यदि कार्यं भिद्येत निर्हेतुकं स्यादित्याह—कर्मेत्यादि। § 4777

कर्माहारादिहेतूनां सर्वथापि विशेषतः।
सम्भाव्यतेऽन्यथाभावस्तत्पुत्रत्वेऽपि तस्य हि॥
१४१७॥§ 4779

नायं स्वभावः कार्यं वा दृश्यस्यादृष्टिरेव वा।
नच तद्व्यतिरिक्तस्य भवत्यव्यभिचारिता॥
१४१८॥§ 4781

शुभादिकर्मविशेषादुष्णशीताद्याहारावस्थाभेदाच्चान्यथाभावो गौरादित्वं संभाव्यत इति कुतो विरोधः, कारणभेदस्य सिद्धत्वात्। अपिच तत्पुत्रत्वादिति नायं स्वभावहेतुर्यथा कृतकत्वं, नहि कृतकत्वस्यान्यत्तत्त्वमस्ति मुक्त्वाऽनित्यत्वम् नत्वेवं तत्पुत्रत्वस्यान्यः स्वभावो नास्ति, यतः पंचोपादानस्कंधात्मकस्य कंचिदपेक्ष्य तत्पुत्र इति व्यपदेशो नतु श्यामत्वस्य। नापि कार्यहेतुः। कार्यकारणभावासिद्धेः। नाप्यनुपलब्धिर्विधिविषयत्वात्। विरोधाभावाच्च न श्यामेतरवर्णाभावसिद्धिः। नचैतद्व्यतिरिक्तं लिङ्गमस्त्यन्यत्र प्रतिबन्धाभावात्। नच प्रतिबन्धमन्तरेण गमकत्वमतिप्रसङ्गात्तस्मान्नायं हेतुर्नापि त्रिलक्षण इति कुतोऽव्यभिचारः। दृश्यस्यादृष्टिरुपलब्धिलक्षणप्राप्तानुपलब्धिः॥ १४१७॥ १४१८॥
§ 4782

ननु चेत्यादिनाऽव्यापितां लक्षणदोषमाह— § 4783

ननु चाव्यभिचारित्वमन्येषामपि दृश्यते।
कुमुदानां विकासस्य वृद्धिश्च जलधेर्यथा॥
१४१९॥§ 4785

लिङ्गं चन्द्रोदयो दृष्ट आतपस्य च भावतः।
छायायाः परभागेषु सद्भावः संप्रतीयते॥
१४२०॥ § 4787

तमस्युल्मुकदृष्टौ च धूम आरात्प्रतीयते।
कृत्तिकोदयतश्चापि रोहिण्यासत्तिकल्पना॥
१४२१॥ § 4789

यथा चन्द्रोदयात्कुमुदविकाससमुद्रवृद्ध्योरनुमानम्। आदिग्रहणात्सूर्योदयात्पद्मविकाशस्य, आतपसद्भावात्पर्वतादिषु परभागे च्छायानुमितिः, एवं दूरात्तमस्युल्मुकमर्द्धदग्धकाष्ठखण्डकं दृष्ट्वा धूमप्रतीतिः, तथा कृत्तिकानक्षत्रोदयाद्रोहिणीनक्षत्रस्यासन्नत्वं प्रतीयते यतोऽश्विनीमारभ्य यथापाठं क्रमेणैव 417/k नक्षत्राणामुदय इति प्रसिद्धम्। न चास्य सर्वस्य हेतुत्रयान्तर्भावोऽस्तीति तत्किमुच्यते न तद्व्यतिरिक्तस्य भवत्यव्यभिचारितेति॥ १४१९॥ १४२०॥ १४२१॥ § 4790

अत्रोत्तरमाह—तदत्रेत्यादि। § 4791

तदत्र हेतुधर्मस्य तादृशोऽनुमितैर्मताः।
जातास्तदेककालास्ते सर्वे बोधादयोऽपरे॥
१४२२॥ § 4793

कार्यात्कारणसंसिद्धिरियमेवंविधानतः।
सम्बन्धानुपपत्तौ च सर्वस्यापि गतिर्भवेत्॥
१४२३॥ § 4795

यस्मात्कारणात्ते बोधादयः—कुमुदविकाशादयो जाताः—उत्पन्नाः। किंविशिष्टाः ?। तदेककालाः—तैश्चन्द्रोदयातपोल्मुकैरेककालास्तादृशस्य हेतुधर्मस्य—हेतुविशेषस्यानुमितैर्मताः। एतदुक्तं भवति—यदेव कारणं चन्द्रोदयादीनां कुमुदबोधादिसमानकालोत्पन्नानां तदेव कुमुदबोधादिषु सहकारिकारणतां प्रतिपद्यत इति ते चन्द्रोदयादयस्तथाभूतं स्वकारणमनुमापयन्तोऽर्थान् समानकालभावीन्यपि कुमुदबोधादीन्यनुमापयन्ति, नतु साक्षादित्येवंविधं कार्यहेतावेवान्तर्भवतीति। अवश्यं चैतद्बोद्धव्यम्—यदि पुनरप्रतिबन्धादेव गमयन्ति तदा यत्किंचिद्गमयेयुरप्रतिबद्धत्वेनाविशिष्टत्वात्। तस्मादत्रापि

प्रतिबन्धो वाच्यः। स च यथोक्तकार्यकारणभावलक्षण एव भवति॥ १४२२॥ १४२३॥ § 4796

रोहिण्यासत्त्या तर्हि कृत्तिकोदयस्य कः प्रतिबन्ध इत्याह—प्रभञ्ज-नेत्यादि। § 4797

प्रभञ्जनविशेषश्च कृत्तिकोदयकारणम्।
यः स एव हि सन्तत्या रोहिण्यासत्तिकारणम्॥
१४२४॥§ 4799

हेतुधर्मप्रतीतिश्च तत्प्रतीतिरतो मता।
तत्प्रतीतिः स्वतन्त्राऽस्ति न तु काचिदिहापरा॥
१४२५॥§ 4801

प्रभञ्जनो वायुः। अत्राप्येकसामग्र्यधीनत्वाद्धेतुधर्मानुमानमिति। यथोक्त-म्—एकसामग्र्यधीनत्वं स्वरूपादेस्सतो गतिः। हेतुधर्मानुमानेन धूमेन्धन-विकारवत्॥ इति॥ १४२४॥ १४२५॥ § 4802

अथ प्रतिबिम्बाद्बिम्बस्य या गतिस्तस्या न क्वचिदन्तर्भावोऽस्त्यवस्तुत्वात्प्र-तिबिम्बस्य। तस्मादव्यापि लक्षणमित्याशङ्क्याह—लिङ्गाच्चेत्यादि। § 4803
418/k

लिङ्गाच्च प्रतिबिम्बाख्यादनुमानं प्रवर्त्तते।
यद्बिम्बविषयं युक्तं तत्रान्यत्कार्यलिङ्गजात्॥
१४२६॥§ 4805

सहेकत्रेत्यादिना चोदकाभिप्रायमाशङ्कते। § 4806

सहैकत्र द्वयासत्त्वान्न वस्तुप्रतिबिम्बकम्।
तत्कथं कार्यता तस्य युक्ता चेत्पारमार्थिकी॥
१४२७॥§ 4808

अवस्तुत्वे हेतुः सहैकत्र द्वयासत्त्वादिति। यत्रैव प्रदेशे आदर्शरूपं दृश्यते प्रतिबिम्बकं च तत्रैव, न चैकत्र प्रदेशे रूपद्वयस्यास्ति सहभावः, सप्र-तिघत्वात्, अतः सहैकत्र द्वयो रूपयोः सत्त्वं न प्राप्नोति। तस्माद्भ्रान्तिरिय-म्। अथवा—सहैकत्र द्वयासत्त्वादिति। कतमस्य द्वयस्य ?। आदर्शतलस्य

चन्द्रप्रतिबिम्बस्य च। अन्यत्रैव देशे आदर्शतलं भवति, अन्यत्रैवान्तर्गतं चन्द्रप्रतिबिम्बकं दृश्यते कूप इवोदकम्। अन्यत्र चोत्पद्यमानं किमित्यन्यत्रोपलभ्यते। अतो नास्त्येव किंचिद्वस्तुभूतं प्रतिबिम्बकं नाम। सामग्र्यास्तु तस्यास्तादृशः प्रभावोऽयं तथा तद्दर्शनम्। अचिन्त्या हि धर्माणां शक्तिप्रभेदा इति॥ १४२७॥ § 4809

मूर्त्तेत्यादिना परिहरति। § 4810

मूर्त्तस्य प्रतिबिम्बस्य यद्यप्यस्य न वस्तुता।
तदाभासं तु विज्ञानं केनावस्तु भविष्यति॥
१४२८॥ § 4812

तस्यैव चात्र लिङ्गत्वं कार्यं चेष्टं तदेव हि।
बिम्बाधिपत्यादेतद्धि निरालम्बं प्रवर्त्तते॥
१४२९॥ § 4814

ज्ञानमेवात्र तथाभूतं कार्यं लिङ्गमभिप्रेतं, नतु बाह्यं प्रतिबिम्बाख्यं वस्तु॥ १४२८॥ ॥ १४२९॥ § 4815

कथमुक्तं त्रिरूपलिङ्गवचनं परार्थं पुनरुच्यत इति,यावता पक्षनिगमोपनयवचनमप्यन्यैः परार्थमनुमानं कीर्त्तितम्। एतदेव दर्शयन्नाह—प्रतिज्ञेत्यादि। § 4816

प्रतिज्ञादिवचोऽप्यन्यैः परार्थमिति वर्ण्यते।
असाधनाङ्गभूतत्वात्प्रतिज्ञाऽनुपयोगिनी॥
१४३०॥ § 4818

असाधनेत्यादिना प्रतिविधत्ते। सिद्धिः साधनं, प्रमेयाधिगतिरिति यावत्, तस्याङ्गभूतम्—कारणम्, तस्य प्रतिषेधोऽसाधनाङ्गभूतत्वम्। तस्मादसाधनाङ्गभूतत्वादनुपयोगिनी न प्रयोक्तव्येत्यर्थः। अनुपयोगिनी—अकारणभूतेतिव्याख्यानेप्रतिज्ञार्थैकदेशः स्यात्॥ १४३०॥ § 4819

419/k

कथमसाधनाङ्गमित्याह—असम्बन्धादित्यादि। § 4820

असम्बन्धान्न साक्षाद्धि सा युक्तार्थोपपादिका।

असक्तसूचनान्नापि पारम्पर्येण युज्यते॥
१४३१ ॥§ 4822

साध्यसाधनधर्मस्य विषयस्योपदर्शनात्।
दृष्टान्तपदवत्त्वेष साधनाङ्गं यदीष्यते॥ १४३२ ॥§ 4824

अभ्यनुज्ञादिवाक्येन नन्वत्र व्यभिचारिता।
निष्फलं च तदा यत्र विषयस्योपदर्शनम्॥
१४३३ ॥§ 4826

असक्तसंसूचकत्वं तु साध्यस्यैवाभिधानात्। एतदुक्तं भवति—शब्दानामर्थेन सह सम्बन्धाभावान्न तावत्साक्षादुपयुज्यते, नापि हेतुवचनवत्पारम्पर्येण, सक्तासंसूचकत्वादिति। यथोक्तम्— तत्पक्षवचनं वक्तुरभिप्रायनिवेदने। प्रापणं संशयोत्पत्तेस्ततः साक्षान्न साधनम्॥ साध्यस्यैवाभिधानेन पारम्पर्येण नाप्यलम्॥ इति। केचिन्मन्यन्ते—साध्यसाधनधर्मयोर्विषयोपदर्शनार्थमनवयवभूताऽपि सती दृष्टान्तपदवत्प्रतिज्ञा प्रयोक्तव्येति। यतो रूपद्वयं शेषं दृष्टान्तेन प्रदर्श्यते इति वचनात्। दृष्टान्तपदं पृथगनवयवभूतमपि पक्षधर्मव्यतिरिक्तरूपद्वयप्रदर्शनार्थमेव प्रयुज्यत इति। तान्प्रत्याह—दृष्टान्तेत्यादि। अभ्यनुज्ञावाक्यम्—एवं कुरु शब्दमनित्यं साधयेति। आदिशब्देनाज्ञाभ्यर्थनावाक्यं गृह्यते। एवम्भूतस्यापि वाक्यस्य प्रयोगनिर्देशार्थं निर्देशः स्यात्, नह्येभिरपि विनाऽकाण्ड एव साधनस्य प्रवृत्तिः सम्भवतीति। निष्फलमिति। विनापि तेन साध्यप्रतीतेः। तथाहि—यत्कृतकं तत्सर्वमनित्यं कृतकश्च शब्द इत्येतावन्मात्रे प्रोक्तेऽनित्यः शब्द इति प्रतीतिर्भवत्यन्तरेणापि प्रतिज्ञावचनम् ॥ १४३१॥ १४३२॥ १४३३॥ § 4827

सपक्षादिव्यवस्था चेत्कथं पक्षाप्रयोगतः।
नातस्त्रैरूप्यमप्यस्ति तदपेक्षानिबन्धनम्॥
१४३४ ॥§ 4829

सपक्षादिव्यवस्था तर्हि कथम्। तथाहि—साध्यधर्मसामान्येन समानोऽर्थः सपक्ष इत्युच्यते। तदभावः प्रसाधितश्चासपक्ष इति। असति हि प्रतिज्ञानिर्देशे तदपेक्षानिबन्धनं सपक्षाश्रयनिबन्धनं त्रैरूप्यमपि नास्तीति सर्वमालूनविस्ती(की ?)र्णं स्यादिति॥ १४३४॥ § 4830

१२ दृष्टान्ते] Correction : ; दृष्टं ते (sic !)दृष्टान्ते

नेत्यादिना प्रतिविधत्ते। § 4831
420/k

न साधनाभिधानेस्ति सपक्षादिविकल्पना।
शास्त्रे तु प्रविभज्यन्ते व्यवहाराय ते तथा॥
१४३५॥§ 4833

तथाह्यव्युत्पन्नसपक्षादिव्यवहारो भटादिरपि यत्र धूमस्तत्र वह्निर्धूमश्चात्रेत्येतावन्मात्रमुक्तोऽवधारितान्वयव्यतिरेकः सपक्षादिव्यवहारमन्तरेणैव वह्निं प्रतिपद्यत एव, तस्मान्न साधनकाले सपक्षादिव्यवस्थाऽस्ति। कुत्र तर्हि सपक्षादिव्यवहार इत्याह—शास्त्रे त्विति॥ १४३५॥ § 4834

यदि वा साधनाभिधानकालेऽपि तद्व्यवस्था क्रियमाणा न विरोधिनीति प्रतिपादयति—प्रकृतेत्यादि। § 4835

प्रकृतार्थाश्रया साऽपि यदि वा न विरुध्यते।
न वाद्यकाण्ड एवाह परस्यापि हि साधनम्॥
१४३६॥§ 4837

यद्यपि साधनाभिधानकाले प्रतिज्ञाप्रयोगो नास्ति, तथापि प्रकृतमर्थं साध्यधर्मिणं समाश्रित्य सा व्यवस्था क्रियमाणा न विरुध्यत एव। नचैतद्वक्तव्यं साधनकाले प्रकृत एवार्थो नास्तीति, यतो न, अकाण्ड एव—अप्रस्ताव एव, परस्यापि— प्रतिज्ञाप्रयोगवादिनः, वादी साधनमाह॥ १४३६॥
§ 4838

भवतु नाम जिज्ञासितविशेषो धर्मी प्रकृतः, तथापि सा क्रियमाणा व्यवस्था प्रकृतं धर्मिणमाश्रित्य कथं कर्त्तव्येत्याह—जिज्ञासितेति। § 4839

जिज्ञासितविशेषे हि वर्त्तनात्पक्षधर्मता।
सपक्षस्तत्समानत्वाद्विपक्षस्तदभावतः॥
१४३७॥§ 4841

सुबोधम्॥ १४३७॥ § 4842

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनय इत्युपनयलक्षणम्। तत्रोपनयवचनं न साधनम्, उक्तहेत्वर्थप्रकाशत्वात्, द्वितीयहेतुवचनवदित्याचार्यदिग्नागपादैः प्रमाणिते, भाविविक्तादयो हेत्वसिद्ध्यर्थमाहुः—न खलु पक्षधर्मत्वं प्रतिज्ञानन्तरभाविना हेतुवचनेन प्रकाश्यते, कारणमात्राभिधानात्।

अनित्यः शब्दो भवति कृतकत्वात्, तत्पुनः कृतकत्वं किं शब्देऽस्ति नास्तीति चेति, तस्यास्तित्वमुपनयात्प्रतीयते। अथवा प्रतिबिम्बनार्थमुपनयनं, पूर्वं हि हेतुवचनेन निर्विशेषं कृतकत्वं शब्दे निर्दिष्टं, तेन दृष्टान्ते प्रदर्शितसाध्याविनाभावित्वस्य कृतकत्वस्योपनयेनप्रतिबिम्बनमुषनसा (मुपनयात् ?) दर्श्यते—तथाच कृतकः शब्द इति। तस्माद्विशेषद्योतनान्न पुनरुक्ततेति। अत्राह—प्रतिज्ञेत्यादि। § 4843
421/k

प्रतिज्ञानभिधाने च कारणानभिधानतः।
कर्त्तव्योपनयस्योक्तिर्न सद्भावप्रसिद्धये॥
१४३८॥§ 4845

प्रागुक्ते भावमात्रे च पश्चाद्व्याप्तेः प्रकाशनात्।
विवक्षितार्थसंसिद्धेर्विफलं प्रतिबिम्बकम्॥
१४३९॥§ 4847

सद्भावप्रसिद्धय इति। हेतोर्धर्मिणीति शेषः। अयमत्रार्थः—प्रतिज्ञाप्रयोगस्य यथोक्तया नीत्या निषिद्धत्वात्तत्समनन्तरभाविकृतकत्वादिकारणाभिधानं नास्त्येव। ततश्च कारणाभिधानपूर्वस्योपनयस्योक्तिर्न कर्त्तव्यैव। अथोपनयस्योक्तिः पक्षधर्मत्वप्रसाधनाय क्रियते, तदा कारणाभिधानस्य फलमन्यद्वक्तव्यम्। तत्रैतत्स्यात्कारणत्वप्रतिपादनमेव फलमिति। तन्न। तेनैव तावत्प्रतिपादितेन कोऽर्थो यतोऽन्यथाऽपि साध्यसिद्धिर्भवत्येवेति दर्शितमेव। तस्मात्पक्षधर्मत्वप्रतिपादनं मुक्त्वा नान्यत्फलं शक्यते हेतुवचनस्य वक्तुम्। तदा प्रथमतस्तेनैव हेतुवचनेन पक्षधर्मत्वे प्रतिपादिते तत्प्रतिपादनायोपनयनमुपादीयमानं स्फुटतरमेव पुनरुक्ततां प्रकाशयतीति कुतोऽसिद्धता हेतोः। प्रतिबिम्बनमपि व्यर्थमेव, यतस्तस्मिन्पक्षधर्ममात्रे हेतुवचनेन प्रागुक्ते सति साध्यधर्मेण च तस्य व्याप्तौ कथितायां विवक्षितार्थसंसिद्धेरुच्यमानं स्फुटतरमेव पुनरुक्ततामावहतीति कुतोऽत्राप्यसिद्धता हेतोः॥ १४३८॥ १४३९॥
§ 4848

तत्र हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनमिति निगमनलक्षणम्। तस्मादनित्य इत्यादौ तस्मादित्यनेन हेतोः सामर्थ्यमुदाहरणप्रसिद्धमपदिश्य यत्प्रतिज्ञार्थं पुनर्वचनं क्रियते तन्निगमनम्। निगम्यन्तेऽनेन प्रतिज्ञाहेतूदाहरणोपनया एकार्थतया समर्थ्यन्ते सम्बध्यन्त इति निगमनम्। तत्र प्रतिज्ञाप्रयोग एव तावन्नास्ति, कुतस्तदनुवादात्मकस्य निगमनस्येत्यतो निगमनं न साधनावयवः। तत्राचार्यदिङ्नागपादैरुक्तम्—निगमनं पुनरुक्तत्वादेव न साध-

नमिति। अत्रोद्योतकरादयः प्राहुः—न पौनरुक्त्यमत्र, यस्मात्साध्यनिर्देशः प्रतिज्ञा, निगमनं तु सिद्धनिर्देशः,। न च निगमनेन विना सिद्धिरस्ति। तथाहि—तेन विना तदन्यावयवोक्तावपि शङ्का न निवर्त्तते किमनित्यः शब्द इति, अतस्तदाशङ्कानिवृत्त्यर्थं वाच्यं, निगमनं पृथगिति। तदत्राह—त्रिरूपेत्यादि। § 4849

त्रिरूपहेतुनिर्देशसामर्थ्यादेव सिद्धितः।
न विपर्ययशङ्कास्ति व्यर्थं निगमनं ततः॥
१४४० ॥§ 4851

422/k

अनित्यत्वेन प्रदर्शिताविनाभावि कृतकत्वं यदा शब्दे धर्मिणि निश्चितं, कुतस्तत्र विपर्ययस्य नित्यत्वस्य शङ्का, नहि ज्वलज्ज्वलनज्वालाकलापपरिगते परिनिश्चितात्मनि भूतत्वे शैत्याशङ्का कर्तुं युक्ता स्वस्थचेतसः। नापि निगमनाद्वचनमात्रान्निर्युक्तिकात्तु सा विनिवर्त्तते॥ १४४०॥ § 4852

अविद्धकर्णस्त्वाह— विप्रकीर्णैश्च वचनैर्नैकार्थः प्रतिपाद्यते। तेन सम्बन्धसिध्यर्थं वाच्यं निगमनं पृथक्। इति अत्राह—सम्बद्धैरिति। § 4853

सम्बद्धैरेव वचनैरेकोऽर्थः प्रतिपाद्यते।
नातः सम्बन्धसिद्ध्यर्थं वाच्यं निगमनं पृथक्॥
१४४१ ॥§ 4855

हेतोः साध्येन तादात्म्यतदुत्पत्तिलक्षणे सम्बन्धे प्रतिपादितेऽर्थद्वारेण सम्बद्धैरेव पक्षधर्मान्वयव्यतिरेकवचनैरेकोऽर्थः सामर्थ्याद्यथासमीहितः प्रतिपाद्यत इति। यद्यपि विप्रकीर्णानि वचनानि, तथापि सम्बद्धान्येवैकार्थोपसंहारेणेति न तत्सम्बन्धसिद्धये पृथङ्निगमनं वाच्यम्॥ १४४१॥ § 4856

द्वैविध्यमनुमानस्य केचिदेवं प्रचक्षते।
विशेषदृष्टसामान्यपरिदृष्टत्वभेदतः॥ १४४२ ॥§ 4858

केचिदिति। कुमारिलादयः। ते हि—द्विविधमनुमानं विशेषतोदृष्टं सामान्यतोदृष्टं चेति वर्णयन्ति॥ १४४२॥ § 4859

तत्र विशेषतोदृष्टं कतरदित्याह—प्रत्यक्षेत्यादि। § 4860

प्रत्यक्षदृष्टसम्बन्धं ययोरेव विशेषयोः।

गोमयेन्धनतद्देशविशेषादिमतिः कृता॥ १४४३ ॥§ 4862

तद्देशस्थेन तेनैव गत्वा कालान्तरेऽपि तम्।
यदाऽग्निं बुध्यते तस्य पूर्वबोधात्पुनः पुनः॥
१४४४ ॥§ 4864

सन्दिह्यमानसद्भाववस्तुबोधात्प्रमाणता।
विशेषदृष्टमेतच्च लिखितं विन्ध्यवासिना॥
१४४५ ॥§ 4866

अग्निधूमान्तरत्वे तु वाच्ये सामान्यतोमितौ।
सामान्यदृष्टमेकान्ताद्भन्तेत्यादित्य उच्यते॥
१४४६ ॥§ 4868

अयमर्थः—पूर्वं कश्चित्क्वचित्प्रदेशविशेषे वह्निधूमविशेषौ प्रत्यक्षेण गृहीत्वा कालान्तरेण दूरं गतो वा यदा पुनःपुनस्तमेव धूमविशेषं दृष्ट्वा तमेव वह्निं पूर्वं 423/k परि गृहीतमनुमिमीते तद्विशेषतोदृष्टमनुमानम्, पूर्वप्रत्यक्षगृहीतविशेषविषयत्वात्। नचगृहीतग्राहित्वादप्रमाणम्, यतः किं वह्निरास्ते परिनिवृत्तो वेति सन्देहविनिवृत्तेरधिकाया विद्यमानत्वात्। इति पिण्डार्थः। अवयवार्थस्तूच्यते—प्रत्यक्षदृष्टसम्बन्धमिति। कः सम्बन्धः। अत्रोच्यते। शबरस्वामिनाऽनुमानलक्षणमुक्तम्—अनुमानं ज्ञातसम्ब(?)न्धस्यैकदेशदर्शनादेकदेशान्तरेऽसन्निकृष्टे बुद्धिः। तद्द्विविधं प्रत्यं(?)क्षदृष्टसम्बन्धं सामान्यतोदृष्टसम्बन्धं च। प्रत्यक्षदृष्टसम्बन्धो यथा—धूमाकृतिदर्शनादग्न्याकृतेर्विज्ञानम्। सामान्यतोदृष्टं यथा—देवदत्तस्य गतिपूर्विकां देशान्तरप्राप्तिमुपलभ्यादित्यस्य गतिस्मरणमिति। तत्र कुमारिल एतत्प्रत्यक्षतोदृष्टसम्बन्धमनुमानं व्याचिख्यासुराह—प्रत्यक्षेत्यादि। प्रत्यक्षे दृष्टसम्बन्धमनुमानमेवं प्रचक्षत इति सम्बन्धः। यतः पूर्वस्मिन्ननन्तरश्लोके एवं प्रचक्षत इति प्रकृतम्। ययोरिति। ययोरेवाग्निधूमविशेषयोर्विषयभूतयोर्गोमयेन्धनविशेषबुद्धिः कृता—उत्पादिता पुरुषेण—गोमयेन्धनप्रभवावेतावग्निधूमाविति, तथा पर्वतादिदेशविशेषमतिः कृता—एतत्पर्वतादिदेशविशेषस्थाबेतावग्निधूमाविति। गोमयमिन्धनं ययोरग्निधूमयोस्तौ गोमयेन्धनौ, स देशो ययोस्तौ तद्देशौ गोमयेन्धनौ च तौ तद्देशौ चेति विग्रहः। तावेव विशेषौ तावादी येषां सर्जसरलसल्लकीवनप्रभृतीनां वह्न्यादिविशेषान्तराणां तानि गोमयेन्धनतद्देशविशेषादीनि। तेषु मतिरिति सप्तमी(ति)योग-

विभागात्समासः। सा—एवम्भूताप्रत्यक्षा मतिर्येन प्रमात्रा कृता—उत्पादिता, स तद्देशस्थेन तेनैव धूमादिना लिङ्गेन तमेवाग्निं कालान्तरेण यदा बुध्यते। पुनः पुनरिति सम्बन्धः। तदा तस्य बोधस्य पूर्वबोधात्प्रत्यक्षात्मकात्प्रमाणता—प्रमाणान्तरतेत्यर्थः। अथवा—पूर्वबोधात्कारणात्तमेव वह्निं बुध्यत इति सम्बन्धः। किमास्ते वह्निराहोस्विन्निवृत्त इत्येवं सन्दिह्यमानः सद्भावो यस्य वस्तुनस्तत्तथा, तच्च तद्वस्तु चेति तत्तथा, तस्य बोध इति विग्रहः। एतच्च यथोक्तं प्रत्यक्षदृष्टसम्बन्धमनुमानं विशेषतो दृष्टमनुमानमित्येवं विन्ध्यवासिना गदितम्। सामान्यतो दृष्टमाह—अग्निधूमेत्यादि। भाष्यकारेण हि सामान्यतोदृष्टानुमाने देशान्तरप्राप्त्याऽऽदित्यगतिस्मरणमुदाहृतम्। तत्रेदं चोद्यं भवति—ननु चाग्न्यन्तरे धूमान्तरे च सामान्यधर्मसमाश्रयेण यदाऽनुमितिः क्रियते तदा सामान्यतोदृष्टमनुमानमग्निधूमयोरस्त्येव, किमिति भाष्यकारेणाग्निधूमौ बुद्धौ विपरिवर्त्तमानत्वेन प्रत्यासन्नावृत्सृज्याऽऽदित्य एव सामान्यतोदृष्टावुदाहृत इत्येतच्चोद्यमाशङ्क्य कुमारिलो भाष्यकाराभिप्रायं वर्णयन्नाह—अग्निधूमान्तर इति। सामान्य 424/k
तोऽनुमितौ—सामान्यतोदृष्टानुमाने उदाहरणत्वेनाग्निधूमान्तरत्वे वाच्ये यद्भाष्यकारेणादित्योदाहरणं कृतं तत्सर्वकालमादित्यगतेरप्रत्यक्षत्वादेकान्तेनात्राऽऽदित्यगतौ सामान्यतोदृष्टमेवानुमानं सम्भवति न विशेषतोदृष्टमिति मन्यमानेनासङ्कीर्णविषयं दर्शयितुमादित्य एवोदाहरणत्वेनोच्यते, न पुनरग्निधूमयोः सामान्यतोदृष्टस्यैवानुमानस्याभावादिति॥ १४४३॥ १४४४॥ १४४५॥ १४४६॥ § 4869

तदत्रेत्यादिना दूषणमाह— § 4870

तदत्र क्षणभङ्गस्य व्यापिनः प्रतिपादनात्।
प्राक्तनस्यैव तेनैव नानुमानस्य सम्भवः॥
१४४७॥ § 4872

कल्पितं चेत्तदेकत्वं प्रबन्धैक्यविवक्षया।
न तस्यावस्थितिः काचिद्वस्तुत्वं नच भाविकम्॥
१४४८॥ § 4874

व्यापिन इति। अग्निधूमादिसकलपदार्थव्यापकस्य।सत्यपि क्षणिकत्वे प्रबन्धैकत्वादेकत्वमिति चेदाह—कल्पितमिति। तदा कल्पितमेकत्वं न पारमार्थिकं, परमार्थतस्तु न कस्यचिदवस्थितिः। ततश्च तद्देशस्थेन तेनैवेत्येतन्न

१६--१७ त्तेनात्र] Correction : ; त्तेन। अत्र (sic !)त्तेनात्र

युज्यते। नापिकल्पितस्य वस्तुत्वं, ततश्च सन्दिह्यमानसद्भाववस्तुबोधादित्यसम्बद्धं स्यात्॥ १४४७॥ ॥ १४४८॥ § 4875

अथापि स्यात्कल्पनासमारोपितमेवैक्यमाश्रित्य विशेषतो दृष्टमाख्यातम्, न भाविकमित्याह—नचेत्यादि। § 4876

नच निर्विषयं ज्ञानं युष्माभिरनुमन्यते।
विकल्पितार्थतायां च व्यक्तं निर्विषयं भवेत्॥
१४४९ ॥§ 4878

स्यादेतद्यद्यपि व्यक्तिर्विनाशिनी जातिस्त्वनपायिनी विद्यते,ततश्च भाविकमेकत्वं भविष्यति, नच निर्विषयत्वमित्याह—व्यक्तिरूपेत्यादि। § 4879

व्यक्तिरूपस्य नाशेऽपि तिष्ठत्येवाकृतिस्तयोः।
यदि न क्षणभङ्गाप्तेर्भावे तस्या अपि ध्रुवम्॥
१४५० ॥§ 4881

प्रत्यक्षदृष्टः सम्बन्धो ययोरेव विशेषयोः।
इत्ययं नियमश्चोक्तो युष्माभिः केन हेतुना॥
१४५१ ॥§ 4883

दृष्टैकदानुमानेन तस्यैव ह्यनुमा पुनः।
प्रमाणं नेष्यते कस्मात्को विशेषो हि पूर्वके॥
१४५२ ॥§ 4885

425/k

विज्ञातार्थाधिगन्तृत्वान्न प्रमाणमिदं यदि।
स्मार्त्तवत्प्राक्तनोऽप्येतत्समानं किं न वीक्ष्यते॥
१४५३ ॥§ 4887

अन्तरालप्रवृत्तस्य सन्देहस्य निवर्त्तनात्।
आधिक्यं तत्र चेदेतदत्रापि सदृशं न किम्॥
१४५४॥§ 4889

तस्मात्किमस्ति नास्तीति सन्देहविनिवृत्तिकृत्।
स एवेति निराकाङ्क्षमेतत्सामान्यदर्शनम्॥
१४५५॥§ 4891

आकृतिः—जातिः। यदीत्यभ्युपगमे। जातिव्यक्त्योः परेणैक्यस्येष्टत्वात्कुतो व्यक्तिविनाशे जातेरवस्थानं संभवति, अन्यथा भिन्नयोगक्षेमत्वादेकान्तेन तयोर्भेदोऽभ्युपगन्तव्यः स्यात्। भाव इति। अयमभ्युपगमवाद एव। एकदा तावज्जातिर्विस्तरेण निरस्तैवेति कुतस्तस्याः सत्त्वम्। भावेऽपि—सत्त्वेऽपि। तस्या अपि क्षणभङ्गः प्राप्नोति। व्यापिनः क्षणभङ्गस्य प्रसाधनात्। अपि च—यदाऽनुमानपरिच्छिन्नं पुनरपि तत एव लिङ्गात्तमेव वह्निं परिच्छिनत्ति, तदाऽपि विशेषतो दृष्टं किं न वर्णितम्, येन प्रत्यक्षतो दृष्ट इति विशेषणमिष्टम्। अधिगतार्थाधिगन्तृत्वादिति चेत्। न। प्रत्यक्षदृष्टेऽपि तत्तुल्यम्। अन्तरालवर्त्तिसन्देहनिवर्त्तनमधिकं प्रत्यक्षदृष्टेऽस्तीति चेन्न। अनुमानदृष्टेऽपि समानमाधिक्यम्। तस्मात्सर्वत्रैव सामान्यतो दृष्टमेव क्षणक्षयिषु भावेष्वनुमानं न विशेषतो दृष्टं नाम॥ १४५०॥ १४५१॥ ॥ १४५२॥ १४५३॥ १४५४॥ १४५५॥ § 4892

न प्रमाणमिति प्राहुरनुमानं तु केचन।
विवक्षामर्पयन्तोऽपि वाग्भिराभिः कुदृष्टयः॥
१४५६॥§ 4894

केचिदिति। बार्हस्पत्यादयः। आभिरिति। नानुमानं प्रमाणमित्येवंरूपाभिः। अनेन स्ववचनविरोधमाह। तथाहि—वचनाल्लिङ्गाद्विवक्षा प्रतीयत इति मन्यमानेन परस्मै स्वाभिप्रायनिवेदनाय व्याहरता दर्शितमनुमानस्य प्रामाण्यम्, नच तत्प्रमाणमिति ब्रुवता तदेव प्रतिषिद्धमितीतरेतरव्याघातः। एतच्च दूषणं पश्चाद्व्यक्तीकरिष्यते॥ १४५६॥ § 4895

त्रिरूपलिङ्गपूर्वत्वात्स्वार्थं मानं न युज्यते।
इष्टघातकृता जन्यं मिथ्याज्ञानं यथा किल॥
१४५७॥§ 4897

भावादननुमानेऽपि न चानुमितिकारणम्।
द्वैरूप्यमिव लिङ्गस्य त्रैरूप्यं नास्त्यतोऽनुमा॥
१४५८॥§ 4899

426/k

अनुमानविरोधस्य विरुद्धानां च साधने।
सर्वत्र सम्भवात्किञ्च विरुद्धाव्यभिचारिणः॥
१४५९॥§ 4901

तत्र तावच्चार्वाकाः प्रमाणयन्ति—स्वार्थानुमानं प्रमाणं न भवति, त्रिरूपलिङ्गपूर्वत्वान्मिथ्याज्ञानवत्। परार्थाश्चक्षुरादयः सङ्घातत्वाच्छयनासनाद्यङ्गवदित्येतस्येष्टविघातकृतः किल त्रिरूपत्वान्मिथ्याज्ञानमेतज्जन्यं त्रिरूपलिङ्गजमिति। नच त्रैरूप्यमनुमितिकारणम्, अननुमानेऽपि भावाद्द्वैरूप्यवत्। अपिच सर्वत्र साधनेऽनुमानविरोधः सम्भवति। तद्यथा—विवक्षितसाध्यधर्मो धर्मिविशेषणं न भवति एतत्समुदायैकदेशत्वाद्धर्मिस्वरूपवत्। अनेन हि सर्वमनुमानं निरनुमानीकृतम्। सर्वत्र चानुमाने कृते विशेषविरुद्धानां सम्भवस्तद्यथा—अनित्यः शब्दः कृतकत्वाद्घटवदिति कृते कश्चिद्विशेषविरुद्धमुद्भावयेत्। यथाऽयं हेतुरनित्यत्वं साधयति तथाऽऽकाशगुणत्वाभावमपीत्येवमादि। सर्वत्र च विरुद्धाव्यभिचारी सम्भवति। तद्यथा—अनित्यः शब्दः कृतकत्वाद्घटवदिति कृते कश्चिद्विरुद्धाव्यभिचारिणमाह—नित्यः शब्दः श्रावणत्वाच्छब्दत्ववदिति। एवमादिस्तत्त्वटीकायामुदाहरणप्रपञ्चो द्रष्टव्यः॥ १४५७॥ १४५८॥ ॥ १४५९॥ § 4902

तथा भर्तृहरिराह— § 4903

अवस्थादेशकालानां भेदाद्भिन्नासु शक्तिषु।
भावानामनुमानेन प्रसिद्धिरतिदुर्लभा॥
१४६०॥§ 4905

विज्ञातशक्तेरप्यस्य तां तामर्थक्रियां प्रति।
विशिष्टद्रव्यसम्बन्धे सा शक्तिः प्रतिबध्यते॥
१४६१॥§ 4907

यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते॥ १४६२॥§ 4909

अवस्थादेशकालभेदेन पदार्थानां शक्तयो भिन्नाः। अतो न शक्य-
तेऽनुमानात्तद्भावनिश्चयः कर्तुम्, न ह्येवं शक्यतेऽनुमानात्प्रत्येतुम्—देवदत्तो
भारोद्वहनसमर्थो न भवति, देवदत्तत्वाद्बालावस्थदेवदत्तवदिति। अत्र ह्य-
वस्थाभेदेन शक्तिभेदसम्भवाद्व्यभिचारः। तथा देशभेदेनामलकीखर्जूरादीनां
रसवीर्यविपाकभेदो दृश्यते, तत्र नैवं शक्यते कर्तुम्—सर्वाऽऽमलकी क-
षायफला, अनुभूयमानामलकीवदिति। तथा कालभेदेन कूपोदकादीनां
शीतोष्णादिभेदः सम्भवति, तत्र सर्वा आपः शीता इति न शक्यते निश्चयः 427/k
कर्तुम्। इत्येवमादि। अवस्थादेशकालानामिति भेदादित्येतदपेक्ष्य षष्ठी। भा-
वानामिति प्रसिद्ध्यपेक्षया। तथा तृणादिषु निश्चितदहनसामर्थ्यस्याग्नेरभ्रपटले
तत्सामर्थ्यं प्रतिहन्यते, न च तत्रैवमनुमातुं शक्यते—अभ्रपटलमग्निना दह्य-
ते पार्थिवत्वात्तृणादिवदिति। तथाऽन्येनान्यथा प्रतिपादितोऽर्थः पुनरभियुक्तत-
रेणान्येनान्यथा प्रतिपाद्यत इत्यनिष्टा॥ १४६०॥ १४६१॥ १४६२॥ § 4910

परार्थमनुमानं तु न मानं वक्त्रपेक्षया।
अनुवादान्न तेनासौ स्वयमर्थं प्रपद्यते॥
१४६३॥§ 4912

श्रोतृव्यपेक्षयाऽप्येतत्स्वार्थमेवोपपद्यते।
श्रोत्रदर्शनमूलायाः को विशेषो हि संविदः॥
१४६४॥§ 4914

न परार्थानुमानत्वं वचसः श्रोत्रपेक्षया।
श्रोतृसन्तानविज्ञानहेतुत्वज्ज्ञापकत्वतः॥ १४६५॥§ 4916

यथेन्द्रियस्य साक्षाच्च नानुमेयप्रकाशनम्।
तस्मादस्याविनाभावसम्बन्धज्ञानवन्न तत्॥
१४६६॥§ 4918

अथोच्यते परार्थत्वं परव्यावृत्त्यपेक्षया।
तदप्ययुक्तं स्वार्थेपि परार्थत्वप्रसङ्गतः॥
१४६७ ॥§ 4920

अन्यः पुनराह—परार्थमनुमानं वक्त्रपेक्षयाऽनुवादत्वान्न प्रमाणम्। श्रोत्रपेक्षया तु स्वार्थमेव, को हि विशेषः श्रोत्रद्वारेण तमर्थं प्रतिपद्यते दर्शनद्वारेण चेति। यथा दर्शनेन्द्रियस्य व्यापारे सति परार्थव्यपदेशो न भवति, एवं श्रोत्रेन्द्रियव्यापारोऽपि माभूदिति। दर्शनम्—चक्षुरिन्द्रियम्। दृश्यतेऽनेनेति कृत्वा। संविद इति। ज्ञानस्य। तथा न श्रोत्रपेक्षया वचनस्य परार्थानुमानत्वम्, श्रोतृसन्तानवर्त्तिज्ञानहेतुत्वात्, ज्ञापकत्वाद्वा, इन्द्रियवदिति। श्रोतृसन्तानविज्ञानहेतुत्वं च ज्ञापकत्वं चेतिद्वन्द्वेन हेतुद्वयनिर्देशः। यथेन्द्रियस्येति दृष्टान्तनिर्देशः। अयमपरः प्रयोगः—न परार्थानुमानत्वं वचनस्य श्रोत्रपेक्षया, साक्षादनुमेयाऽप्रकाशकत्वात्, अविनाभावसम्बन्धज्ञानवत्। तस्मादिति। साक्षादनुमेयाप्रकाशकत्वात्। यस्मात्साक्षादनुमेयाप्रकाशकत्वं तस्मान्न श्रोत्रपेक्षया वचसः प्रामाण्यमविनाभावसम्बन्धज्ञानवदितिवाक्यार्थः। अविनाभावः साध्येन साधनस्य, स एव सम्बन्धः साध्येन यस्य लिङ्गस्य तस्य ज्ञानमिति
428/k विग्रहः। अथ परव्यापारापेक्षया तदुच्यते परार्थ इति। तथा ऽप्ययुक्तं, स्वार्थेऽपि परार्थत्वप्रसङ्गात्, आपेक्षिकत्वात्परत्वस्य, पारावारवत्॥ १४६३॥ ॥ १४६४॥ १४६५॥ १४६६॥ १४६७॥ § 4921

त्रिरूपलिङ्गेत्यादिना प्रतिविधत्ते— § 4922

त्रिरूपलिङ्गपूर्वत्वं ननु संवादिलक्षणम्।
तल्लक्षणं च मानत्वं तत्किं तस्मान्निषिध्यते॥
१४६८ ॥§ 4924

तत्र प्रथमे प्रयोगे त्रिरूपलिङ्गपूर्वत्वादित्यस्य हेतोर्विरुद्धतामाह—संवादिलक्षणमिति। संवादित्वमनेन लक्ष्यत इति कृत्वा। यतस्त्रिरूपलिङ्गजं यज्ज्ञानं तत्पारम्पर्येण वस्तुनि प्रतिबद्धमतोऽविसंवादकं प्रत्यक्षवत्। यथाह—लिङ्गलिङ्गिधियोरेवं पारम्पर्येण वस्तुनि। प्रतिबन्धात्तदाभासशून्ययोरप्यवञ्चनम्॥ इति। तल्लक्षणं चेति। अविसंवादलक्षणम्। यथाह—प्रमाणमविसंवादिज्ञानमिति। नहि प्रत्यक्षेऽपि तत्प्रमाणवादिनाऽन्यत्प्रमाणव्यवस्थानिबन्धनं शक्यमादर्शयितुमन्यत्राविसंवादात्। स च त्रिरूपलिङ्गजन्येऽप्यस्तीति किमिति तस्मात्रि(?)रूपलिङ्गपूर्वत्वादविसंवादित्वहेतोः प्रामाण्यं निषिध्यते। एतेन साध्यसाधनयोरर्थतो विरोध उक्तः। तथाहि —यत्र त्रिरूपलिङ्गपूर्वत्वं तत्राविसंवादित्वं यत्राविसंवादित्वं तत्र प्रामाण्यं, प्रामाण्याप्रामाण्य-

योश्च परस्परपरिहारस्थितलक्षणो विरोध इति सामर्थ्याद्विरुद्धो हेतुर्निर्दिष्टः॥ १४६८॥ § 4925

मिथ्याज्ञानमित्यादिना दृष्टान्तस्य साध्यविकलतामाह। § 4926

मिथ्याज्ञानं समानं च पूर्वपक्षव्यपेक्षया।
इष्टघातकृता जन्यं ज्ञानमुक्तं न वस्तुतः॥
१४६९॥§ 4928

वस्तुस्थित्या हि तज्ज्ञानमविसंवादि निश्चितम्।
वादीष्टविपरीतस्य प्रमाणमत एव तत्॥
१४७०॥§ 4930

अतो विरुद्धता हेतोर्दृष्टान्ते चाप्यसाध्यता।
एतेनैव प्रकारेण द्वितीये हेत्वसिद्धता॥
१४७१॥§ 4932

यतो वादीष्टविपरीतसाधनात्तदपि प्रमाणमेव, अन्यथा हि साध्यान्तरमपेक्ष्य सर्वदैव सर्वस्य यद्यप्रामाण्यं व्यवस्थाप्येत, प्रत्यक्षेऽपि प्रसङ्गः स्यात्। पूर्वपक्षापेक्षया तु तन्मिथ्याज्ञानमुक्तम् न वस्तुस्थित्या। पूर्वस्य—प्रथमवादिनः पक्षः, पूर्वपक्षः— तस्य व्यपेक्षेति विग्रहः। यो ह्यनाधेयातिशयैकपरार्थत्वं चक्षुरादीनामिच्छति तदभिप्रायापेक्षया मिथ्याज्ञानमुच्यते। अनित्यानेक- 429/k
विज्ञानादिहेतुत्वेन चक्षुरादीनांसिद्धत्वात्। विरुद्धतेति। त्रिरूपलिङ्गपूर्वत्वस्याप्रमाणे क्वचिदप्यभावात्। प्रमाणे तु तत्रैवेष्टविघातकृता जन्ये ज्ञाने भावात्। ननु च लोकायतं प्रति विरुद्धसाधने कर्त्तव्येदृष्टान्तो न सिद्ध एव। नहीष्टविघातकृज्जन्यं ज्ञानं प्रमाणमिच्छति परः, नचान्यतरासिद्धो दृष्टान्तो भवति। य एव तूभयनिश्चितवाची स एव साधनदूषणमिति न्याय(यात् ?) उच्यते— यद्यपि परेणात्र प्रामाण्यं नेष्टं वाचा, तथाप्यसंवादित्वं त्वशक्यापह्नवत्वादिष्टमेव, तदिच्छतां सामर्थ्यात्प्रामाण्यमपि तेन वस्तुस्थित्याऽभ्युपगन्तव्यमिति वस्तुबलप्रकृत्या विरुद्ध उद्भाव्यते न पराभ्युपगमानुरोधेन। अथवा विरुद्धहेतुसंसूचनाद्विरुद्धः। तत्र विरुद्धो हेतु—यदविसंवादि तत्प्रमाणं यथा प्रत्यक्षं, संवादि च त्रिरूपलिङ्गजन्यं ज्ञानमिति स्वभावहेतुः। नचासिद्धो निःस्वभावत्वानिर्हेतुत्वप्रसङ्गात्, प्रत्यक्षाप्रामाण्यप्रसङ्गान्नैकान्तिकः। असाध्यतेति। ना-

११] Correction: ; (दा ?) (sic!)

त्र साध्यमस्तीत्यसाध्यस्तद्भावोऽसाध्यता। साध्यविकलतेति यावत्। द्वितीय इति। नच त्रैरूप्य इत्यादौ। हेत्वसिद्धतेति। अननुमाने क्वचिदप्यभावात्। एतेनैवेति।त्रिरूपलिङ्गेत्यादिना न्यायेन॥ १४६९॥ १४७०॥ १४७१॥ § 4933

अनुमानविरोधस्येत्यादौ परिहारमाह—यत्तादात्म्येत्यादि। § 4934

यत्तादात्म्यतदुत्पत्त्या सम्बन्धं परिनिश्चितम्।
तदेव साधनं प्राहुः सिद्धये न्यायवादिनः॥
१४७२॥§ 4936

अनुमानविरोधादिरीदृशेऽस्ति न साधने।
नैव तद्धात्महेतुभ्यां(?) विना सम्भवति क्वचित्॥
१४७३॥§ 4938

परस्परविरुद्धौ न धर्मौ नैकत्र वस्तुनि।
युज्येते सम्भवो नातो विरुद्धाव्यभिचारिणः॥
१४७४॥§ 4940

ईदृश इति। तादात्म्यतदुत्पत्तिप्रतिबद्धे। आत्महेतुभ्यामिति। स्वभावेन कारणेन च विना यथाक्रमं तल्लिङ्गं न भवति निःस्वभावत्वनिर्हेतुत्वप्रसङ्गात्। यदुक्तम्—विवक्षितः साध्यधर्मो न धर्मिविशेषणमिति, तत्र यदि साध्यधर्मो न धर्मिविशेषणं तदा समुदाय एव नास्तीति ततश्चैतत्समुदायैकदेशत्वादित्यसिद्धो हेतुःस्यात्। यच्चोक्तम्—सर्वत्रानुमाने विशेषविरुद्धानां सम्भव इति तदयुक्तम्। यतः साध्यविपर्ययसाधनाद्विरुद्ध इष्यते, नच विशेषः साधयितुमिष्टः।
430/k वस्तुबलप्रवृत्ता नुमाने विषये न विरुद्धाव्यभिचारी च सम्भवति। एकस्मिन्धर्मिणि परस्परविरुद्धधर्मद्वयप्रसङ्गात्॥ १४७२॥ १४७३॥ १४७४॥ § 4941

यदुक्तमवस्थादेशकालानामित्यादि, तत्राह—अभ्यस्तेत्यादि। § 4942

अभ्य(?)स्तलक्षणानां च सम्यग्लिङ्गविनिश्चये।
अनुमावृत्तिरन्या तु नानुमेत्यभिधीयते॥
१४७५॥§ 4944

अवस्थादेशकालानां भेदाद्भिन्नासु शक्तिषु।
भावानामनुमानेन नातः सिद्धिः सुदुर्लभा॥
१४७६॥§ 4946

यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः।
नान्यथा साध्यते सोऽन्यैरभियुक्ततरैरपि॥
१४७७॥§ 4948

सुपरिनिश्चितं लिङ्गं गमकमिष्यते न संदिग्धम्, नहि धूमो बाष्पादिरूपेण सन्दिह्यमानो वह्नेर्निश्चायको भवति। लिङ्गनिश्चय एव कथमिति चेत्। अभ्यासात्। यथा मणिरूपादिषु तद्विदाम्। तथाहि—विवेचयन्त्येव बाष्पादिभ्यो धूमादीनभ्यस्ततत्स्वलक्षणाः। अ(थ)विवेच्य प्रवृत्ताश्चैते प्राप्नुवन्त्येव वह्निम्। तस्माद्यतः सुविवेचितं लिङ्गं न व्यभिचरति, तेनावस्थादिभेदभिन्नानां सिद्धिर्न दुर्लभा। नापि सुविवेचिताल्लिङ्गात्परिनिश्चितोऽर्थोऽन्यथा शक्यते कर्तुम्। नहि धूमात्सुपरिनिश्चितादनुमितस्य वह्नेरन्यथाभावः शक्यते कर्तुम्, एकस्य विरुद्धस्वभावद्वयायोगात्। यच्चोक्तं —न देवदत्तो भारोद्वहनसमर्थ इत्यादि, यच्चाभ्रपटलं वह्निना दह्यत इति, तल्लिङ्गमेव न भवति त्रैरूप्याभावात्। नह्यदर्शनमात्रेण विपक्षाद्धेतोर्व्यावृत्तिः शक्यते कर्तुम्।यदाह— नचादर्शनमात्रेण विपक्षाद्व्यतिरेकिता इति। किं तर्हि। तादात्म्यतदुत्पत्तिसम्बन्धनियमादविनाभावनियमः। यदाह— कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्। अविनाभावनियमोऽदर्शनान्न न दर्शनात् इति॥ नचात्र तादात्म्यतदुत्पत्तिसम्बन्धोऽस्ति॥ १४७५॥ १४७६॥ १४७७॥ § 4949

स्यादेतत्—सुपरिनिश्चितं लिङ्गं न व्यभिचरतीत्येतदेव कुतो नह्यत्र युक्तिरस्तीत्याह—नहि स्वभाव इत्यादि। § 4950

नहि स्वभावः कार्यं वा स्वभावात्कारणादृते।
भेदानिमित्तताप्राप्तेस्ते विनाऽस्ति न चानुमा॥
१४७८॥§ 4952

द्विविधमेव हि लिङ्गं यदुत स्वभावः कार्यमिति। अनुपलब्धेस्तु स्वभावेऽन्त 431/k
र्भावः। नच स्वभावकारणाख्येन लिङ्गिना विना तयोर्लिङ्गयोः सम्भवोऽस्ति, येन व्यभिचारः स्यात्। कस्मान्न सम्भत्र इत्याह—भेदानिमित्तताप्राप्तेः—भेदश्चानिमित्तता च तयोः प्राप्तिः। स्वभावहेतोर्भेदोऽस्वभावता प्राप्नोति, कार्यहेतोरनिमित्तत्वं निर्हेतुकत्वं प्राप्नोति, नच स्वभावकार्यव्यतिरेकेणान्यल्लिङ्गमिष्ट-

मन्यत्राप्रतिबन्धादविनाभावायोगात्। ते विनेति। स्वभावकार्ये। द्विवचनान्तमेतत्॥ १४७८॥ § 4953

यदुक्तं परार्थनुमानं तु मानमिति तत्राह—त्रिरूपलिङ्गेत्यादि। § 4954

त्रिरूपलिङ्गवचसः सक्तसंसूचकत्वतः।
यत्परार्थानुमानत्वमुक्तं तच्छ्रो(?)त्रपेक्षया॥
१४७९ ॥§ 4956

गौणं साङ्केतिकं चैवमनुमानत्वमाश्रितम्।
सक्तसंसूचकत्वेन तेन नातिप्रसज्यते॥
१४८० ॥§ 4958

नानुमानं प्रमाणं चेद्विफला व्याहृतिस्तव।
न कश्चिदपि वादो हि विवक्षां प्रतिपद्यते॥
१४८१ ॥§ 4960

वचनस्य यत्परार्थानुमानत्वमुक्तं तच्छ्रो(?)त्रपेक्षा, तेन वक्र(?)पेक्षाभावी दोषो न भवति। श्रोत्रपेक्षयाऽपि त्रिरूपलिङ्गसूचनादुपचारेणानुमानकारणत्वात्समयाद्वाऽनुमानत्वमुक्तम्। सक्तसंसूचक एवानुमानसंज्ञानिवेशात्। तेनेन्द्रियस्याविनाभावित्वसम्बन्धज्ञानस्य च परार्थानुमानत्वप्रसङ्गादतिप्रसङ्गो न भवति, तयोः सक्तसंसूचकत्वाभावात्। अत एव दर्शनमूलायाः संविदः सकाशादस्या विशेषः। तथाहि —दर्शनज्ञानेन साक्षाद्धूमादेर्लिङ्गस्य प्रतीतिर्न तु श्रोत्रज्ञानेन, तेन हि शब्द एव साक्षाद्गृह्यते, नच शब्दो धूमवद्बाह्यस्यार्थस्य लिङ्गं विवक्षाप्रतिबद्धस्य बाह्येन सम्बन्धासिद्धेः। केवलं तस्य धूमादेर्लिङ्गस्य संसूचकत्वेन सङ्केतवशात्तथाध्यव(सा)यिविकल्पोत्पत्तेर्बाह्यार्थापेक्षया परार्थमिति वर्ण्यते। विवक्षायां तु गम्यायां श्रोत्रपेक्षया स्वार्थमेव भवति। तथाहि—तत्कार्यत्वाद्धूमवद्विवक्षायां गमक इष्यते। न वाचकत्वेन। ततो ज्ञानाप्रतीतेः। विफला व्याहृतिरिति। नानुमानं प्रमाणमित्येषा। तथाहि न कश्चित्प्रतिपाद्यस्तद्वचनाद्विवक्षां प्रतिपद्यते। अनेन स्ववचनविरोधमाह। एतच्च पूर्व वर्णितमेव॥ १४७९॥ १४८०॥ १४८१॥ § 4961

१२ मूलायाः] Correction : ; मूलयोः
(sic !)मूलायाः

पुरन्दरस्त्वाह—लोकप्रसिद्धमनुमानं चार्वाकैरपीष्यत एव, यत्तु कैश्चिल्लौकिकं मार्गमतिक्रम्यानुमानमुच्यते तन्निषिध्यत इति। एतदाशङ्क्य दूषयन्नाह—लौकिकमित्यादि। § 4962
432/k

लौकिकं लिङ्गमिष्टं चेन्न त्वन्यैः परिकल्पितम्।
ननु लोकोऽपि कार्यादेर्हेत्वादीनवगच्छति॥
१४८२॥§ 4964

तत्त्वतस्तु तदेवोक्तं न्यायवादिभिरप्यलम्।
तल्लौकिकाभ्यनुज्ञाते किं त्यक्तं भवति स्वयम्॥
१४८३॥§ 4966

ननु लोकोऽपीति। हेत्वादीनवगच्छतीति सम्बन्धः। कार्यादेरित्यादिशब्दात्स्वभावग्रहणम्। एवं हेत्वादीनित्यत्रापि स्वभावग्रहणमेव। बहुवचनं तु व्यक्तिभेदात्। यदेव लिङ्गं तादात्म्यतदुत्पत्तिप्रतिबद्धाल्लोकार्थं प्रतिपद्यते तदेवोक्तं लिङ्गमस्माभिः, तदभ्यनुज्ञाने किं त्यक्तं स्याद्यस्यानुमानत्वनिषेधो भवेत्॥ १४८२॥ १४८३॥ § 4967

अथापि स्यान्नैवास्माकं किंचिदनुमानमिष्टं, किंतु परेण तत्प्रमाणमिष्टं,तदभ्युपगमान्मम विफला व्याहृतिर्न भवतीति, अत्राह—अप्रमाणेनेत्यादि। § 4968

अप्रमाणेन चैतेन परः किं प्रतिपद्यते।
अप्रमाणकृतश्चासौ प्रत्ययः कीदृशो भवेत्॥
१४८४॥§ 4970

कुतश्चायं निश्चयो जातः परेण तत्प्रमाणमभ्युपगतमिति, नहि पराभ्युपगमः प्रत्यक्षः, न चान्यत्तव प्रमाणमस्ति, येन निश्चयः स्यात्। भवतु नाम निश्चयः, तथाऽपि तेनाप्रमाणेन पराभ्युपगतेन किमिति परः प्रतिपद्यते, न वै व्यसनमेतत्। अथापि स्याद्यथा रिपुहस्तादाच्छिद्य खड्गं तेनैव स एव रिपुर्निपात्यते, एवं परेणयत्प्रमाणत्वेनाभ्युपगतं तदेव गृहीत्वा परो निराक्रियत इत्याशङ्क्याह—अप्रमाणकृत इति। एतदुक्तं भवति—यदि मोहात्परेणाप्रमाणमेव प्रमाणमिति कृत्वा संगृहीतंकथं तेनाप्रमाणेन परस्य सम्यग्ज्ञानोत्पादनं शक्यते कर्तु, सम्यग्ज्ञानफलत्वात्प्रमाणस्य। नहि मोहात्खड्ग

इति कृत्वा गृहीतेन येनकेनचिच्छेदकेन परश्छेत्तुं शक्यत इति न समानो दृष्टान्तः॥ १४८४॥ § 4971

अविद्धकर्णस्तट्टीकायामाह—ननु वा प्रमाणेन किमिति परः प्रतिपाद्यते, उभयसिद्धं हि प्रतिपादकं भवतीति। तदेतदयुक्तम्। यस्माद्वचनात्मकमनुमानं नच वक्तुः प्रमाणम्, अथ च वक्ता तेन परं प्रचिपादयति,परप्रतिपादनार्थत्वात्प्रयासस्य। नावश्यमुभयसिद्धेन प्रयोजनमिति। तदाशङ्कते—अनुमानमित्यादिना। § 4972

अनुमानं प्रमाणं चेद्वक्तुर्न वचनात्मकम्।
प्रकाशयति तेनायं यथा तद्वदिदं भवेत्॥
१४८५॥§ 4974

433/k

अज्ञातार्थाप्रकाशत्वादप्रमाणं तदिष्यते।
नवक्तुःसूचकत्वेन तावकीनं तथा नतु॥ १४८६॥
इत्यनुमानपरीक्षा।§ 4977

अयमिति। वक्ता। तेनेति। वचनात्मकेन। अज्ञातेत्यादिना दूषणमाह—नहि वचनस्य वक्रपेक्षया संसूचनादप्रामाण्यमिष्टं, किं तर्हि ?। अज्ञातार्थाप्रकाशनात्। वक्तुःसूचकत्वमस्यास्त्येव। त्वदीयं त्वनुमानं न वक्तुःसंसूचकमित्यसमानमेतत्। अन्यथा ह्युभयसिद्धमेव भवेत्। तस्मान्न्यायादनपेतं प्रमाणं सर्वेषां युक्तं प्रत्यक्षवदिति न्याय्यम्॥ १४८५॥ १४८६॥ § 4978

इत्यनुमानपरीक्षा।

०.२० प्रमाणान्तरपरीक्षा।

०.२०.१ शाब्दविचारः।

इदानीं प्रमाणद्वितयनियमसाधनार्थं सङ्ख्याविप्रतिपत्तिकरणार्थमाह—नन्वित्यादि। § 4980

---

६ चेद्वक्तु] Correction : ; चेचक्रु (sic !)चेद्वक्तु
९ नवक्तुः] Correction : ; नाशक्त (sic !)नवक्तुः
९ नतु] Correction : ; ननु (sic !)नतु
१३ वक्तुः] Correction : ; सक्त (sic !)वक्तुः
१३ वक्तुः] Correction : ; सक्त (sic !)वक्तुः

ननु शब्दप्रमाणादिप्रमाणान्तरसम्भवात्।
निर्दिष्टं लक्षणं कस्माद्द्वयोरेव प्रमाणयोः॥
१४८७॥§ 4982

अनेनाव्यापितां प्रमाणलक्षणस्य दोषं प्रमाद्वितयनिश्चितमित्यत्र द्वितयावधारणवैफल्यं चाह॥ १४८७॥ § 4983

उच्यत इत्यादिना परिहरति। § 4984

उच्यते न द्वयादन्यत्प्रमाणमुपपद्यते।
प्रमाणलक्षणायोगाद्योगे चान्तर्गमादिह॥
१४८८॥§ 4986

अन्तर्गमादिहेति। अस्मिन्नेव प्रमाणद्वये। एतदुक्तं भवति—प्रमाणद्वयादन्यस्यप्रमाणलक्षणमविसंवादित्वं नास्त्येव, सति चात्रैवान्तर्भावात्पृथङ्ोच्यते प्रमाणान्तरमिति॥ १४८८॥ § 4987

तत्र कथमन्येषामप्रामाण्यं प्रामाण्ये वा कथमिहान्तर्भाव इत्येतद्द्वयं प्रतिपादयति। अत्र शाब्दोपमार्थापत्त्यभावयुक्त्यनुपलब्धिसम्भवैतिह्यप्रतिभाख्यानिप्रमाणान्तराणि परैरभ्युपगतानि। तत्र शाब्दमधिकृत्याह—शब्दज्ञानादित्यादि। § 4988

शब्दज्ञानात्परोक्षार्थज्ञानं शाब्दं परे जगुः।
तच्चाकर्तृकतो वाक्यात्तथा प्रत्ययिनोदितात्॥
१४८९॥§ 4990

इदं च किल नाध्यक्षं परोक्षविषयत्वतः।
नानुमानं च घटते तल्लक्षणवियोगतः॥
१४९०॥§ 4992

434/k

धर्मी धर्मविशिष्टो हि लिङ्गीत्येतत्सुनिश्चितम्।

३ ख्यानि] Correction : ; ख्याति (sic !)ख्यानि

न भवेदनुमानं च यावत्तद्विषयं न तत्॥
१४९१॥ § 4994

तत्र शबरस्वामी शाब्दलक्षणमाह—शब्दज्ञानादसन्निकृष्टेऽर्थज्ञानं शाब्दमिति। शब्दस्वलक्षणग्रहणादुत्तरकालं परोक्षेऽर्थे यदुत्पद्यते ज्ञानं तच्छब्दादागतमिति कृत्वा शाब्दप्रमाणम्। तच्च द्विविधम्। अपौरुषेयशब्दजनितं प्रत्ययितपुरुषवाक्यजं च।एतच्च प्रत्यक्षाद्भिन्नं परोक्षविषयत्वात्। नाप्यनुमानं त्रैरूप्याभावात्। तथाहि—साध्यधर्मविशिष्टो धर्मी अनुमेय इष्यते, न केवलो नापि धर्ममात्रम्, यावच्च तद्धर्मित्वेन धर्मिविषयं लिङ्गं नावधार्यते न तावदनुमानस्य प्रवृत्तिः सम्भवति। यावत्पक्षधर्मत्वावधारणा न भवति न तावदनुमानमिति यावत्॥ १४८९॥ १४९०॥ ॥ १४९१॥ § 4995

सैव पक्षधर्मत्वावधारणा किं न भवतीत्याह—यश्चेचि। § 4996

यश्चात्र कल्प्यते धर्मी प्रमेयोऽस्य स एव च।
नचानवधृते तस्मिंस्तद्धर्मत्वावधारणा॥ १४९२॥ § 4998

यश्चात्र शाब्दे कल्प्यते वृक्षादिधर्मी स एव प्रमेयस्तस्यैव प्रतिपाद्यत्वात्। धर्म्येवात्र प्रमेयो न धर्मविशिष्टो धर्मीति यावत्। तस्मिन्धर्मिणि अनवधृते—अनिश्चिते कथं तद्धर्मत्वं निश्चीयते॥ १४९२॥ § 4999

प्राक्स चेत्पक्षधर्मत्वाद्गृहीतः किं ततः परम्।
पक्षधर्मादिभिर्ज्ञातैर्येन स्यादनुमानता॥
१४९३॥ § 5001

किं च—यदि चासौ धर्मी पक्षधर्मत्वनिश्चयात्प्राग्ज्ञातस्तदा निष्फलः पक्षधर्मत्वदिनिश्चये प्रयत्नः,धर्मिप्रतिपत्त्यर्थो हि सर्वः प्रयासः, स चेत्प्रतिपन्नः किमिदानीं पक्षधर्मत्वादिनिरूपणप्रयासेन। अभ्युपगम्य चैतदभिहितम्। नच शब्दोवृक्षादेर्धर्मिणो धर्मः, वक्तृदेशेऽवधार्यमाणत्वात्॥ १४९३॥ § 5002

एवं तावत्पक्षधर्मत्वाभावः प्रतिपादितः, इदानीमन्वयाभावं प्रतिपादयन्नाह—अन्वयो नचेत्यादि। § 5003

अन्वयो नच शब्दस्य प्रमेयेण निरूप्यते।
व्यापारेण हि सर्वेषामन्वेतृत्वं प्रतीयते॥
१४९४॥ § 5005

निरूप्यत इति। निश्चीयते। व्यापारेणेति। सद्भावेन, सत्तयेति यावत्। एतदुक्तं भवति—विद्यमानस्यैवान्वेतृत्वं नाविद्यमानस्येति॥ १४९४॥ § 5006

435/k

एतदेव दर्शयन्नाह—यत्रेत्यादि। § 5007

यत्र धूमोऽस्ति तत्राग्नेरस्तित्वेनान्वयः स्फुटम्।
नत्वेवं यत्र शब्दोऽस्ति तत्रार्थोऽस्तीति निश्चितम्॥
१४९५॥§ 5009

यत्र धूमस्तत्रावश्यं यतो वह्निरित्यतोऽसौ वह्निरन्वेता भवति धूमस्य, नत्वेवं शब्दस्यार्थेनान्वयः॥ १४९५॥ § 5010

कथं नास्तीति प्रतिपादयन्नाह—न तावदिति। § 5011

न तावत्तत्र देशेऽसौ न तत्काले च गम्यते।
भवेन्नित्यविभुत्वाच्चेत्सर्वशब्देषु तत्समम्॥
१४९६॥§ 5013

तेन सर्वत्र दृष्टत्वाद्व्यतिरेकस्य चागतेः।
सर्वशब्दैरशेषार्थप्रतिपत्तिः प्रसज्यते॥ १४९७॥§ 5015

न तावत्तत्र शब्दाक्रान्ते देशेऽर्थस्य सद्भावः। तथाहि—पिण्डखर्जुरादिशब्दोऽन्यत्र पाटलिपुत्रादौ श्रूयते, नच तत्र देशे पिण्डखर्जूरादिरस्ति। तथा नापि शब्दकालेऽर्थोऽवश्यं सम्भवति, दिलीपमहासम्मतादिशब्दा वर्त्तमानास्तदर्थस्तु भूतो भविष्यंश्चेति कुतोऽर्थैः शब्दस्यान्वेतृत्वम्। अथ मतम्—नित्यत्वाच्छब्दानां सर्वकालमवस्थितेरर्थेन सह न भिन्नकालता, नापि भिन्नदेशता, व्यापित्वात्सर्वदेशेष्ववस्थितेः, अतो नित्यविभुत्वाद्भवेदन्वयः शब्दानामिति। तत्र सर्वशब्देषु तन्नित्यविभुत्वं तुल्यमिति कृत्वा प्रतिनियतेन शब्देन प्रतिनियतार्थाभिधानं न प्राप्नोति। किं तर्हि ?। येन केनचिच्छब्देन सर्वस्यैवार्थस्याभिधानं स्यात्, तेनार्थेन सह सर्वत्र देशे काले वा सर्वशब्दस्य दृष्टत्वात्। व्यतिरेकः—साध्याभावे साधनाभावः, तस्य।अगतेरिति। अनुपलम्भात्। नित्यविभुत्वादेव॥ १४९६॥ १४९७॥ § 5016

तस्मादननुमानत्वं शाब्दे प्रत्यक्षवद्भवेत्।
त्रैरूप्यरहितत्वेन तादृग्विषयवर्जनात्॥
१४९८॥§ 5018

तस्मादित्युपसंहृत्य प्रमाणं दर्शयति। अननुमानत्वं शाब्द इति साध्यनिर्देशः।त्रैरूप्यरहितत्वेनेति हेतुः। प्रत्यक्षवदिति दृष्टान्तः। तादृग्विषयवर्जनादिति हेतुसमर्थनम्। यादृशो धूमादिलिङ्गजस्यानुमानस्य विषयो धर्मविशिष्टो धर्मी तेन तादृशा विषयेण वर्जनात्—रहितत्वादिति यावत्॥ १४९८॥ § 5019

भवतु नाम त्रैरूप्यरहितत्वादनुमानादन्यत्वं, प्रामाण्यं त्वस्य शब्दस्य कथमित्याह —अग्निहोत्रेत्यादि। § 5020

436/k

अग्निहोत्रादिवचनादकम्पज्ञानजन्मतः।
तत्प्रमाणत्वमप्यस्य निराकर्तुं न पार्यते॥
१४९९ ॥§ 5022

संशयविपर्यासरहितत्वादकम्पं निश्चलम्। बाधकप्रमाणाभावात्प्रमाणं प्रत्यक्षादिवदिति यावत्। तथा चाह शबरस्वामी—न च स्वर्गकामो यजेतेत्यतो वचनात्सन्दिग्धमवगम्यते भवति स्वर्गो न वा भवतीति। न च निश्चितमवगम्यमानमिदं मिथ्या स्यात्, यो हि जनित्वा प्रध्वंसते नैतदेवमिति स मिथ्याप्रत्ययः, नचैष देशान्तरे कालान्तरे पुरुषान्तरे विपर्येति, तस्मादवितथः। यत्तु लैकिकं वचनं तच्चेत्प्रत्ययितात्पुरुषादिन्द्रियविषयं वा तदवितथमेव। अथाप्रत्ययितादतीन्द्रियविषयं वा तत्पुरुषबुद्धिप्रभवमप्रमाणम्, अशक्यं हि पुरुषमात्रेण ज्ञातुमिति॥ १४९९॥ § 5023

तत्रेत्यादिना—तच्चाकर्तृकतो वाक्यादित्येतस्मिन्प्रथमे शाब्दे लक्षणेऽसम्भवितां लक्षणदोषमाह। § 5024

तत्राकर्तृकवाक्यस्य सम्भवार्थावसङ्गतौ।
तस्मादसम्भवि प्रोक्तं प्रथमं शाब्दलक्षणम्॥
१५०० ॥§ 5026

अकर्तृकस्य हि वाक्यस्य सम्भवो नास्त्येव, व्यापिनः क्षणभङ्गस्य साधितत्वात्। वक्ष्यमाणयुक्त्या वा। सत्यपि वा सम्भवे न तस्यार्थवत्त्वं सम्भवति, अतोऽकर्तृकाद्वचनात्परोक्षोऽर्थोऽयं ज्ञात इत्यस्यासम्भवादसम्भवि प्रमाणलक्षणम्॥ १५००॥ § 5027

कथं पुनरकर्तृकं वाक्यं नास्तीत्याह—शक्तेत्यादि। § 5028

शक्ताशक्तस्वभावस्य सर्वदा ह्यनुवर्त्तनात्।

तदा तद्भाविविज्ञानं भवेन्नो वा कदाचन॥
१५०१ ॥§ 5030

तत्राकर्तृकं वाक्यं शक्तं वा स्यात्—ज्ञानजनने, कदाचिदशक्तं वेति पक्षद्वयम्। प्रथमे पक्षे तस्य शक्तस्य स्वभावस्यानुवर्त्तनान्नित्यं तद्भाविविज्ञानं प्राप्नोति। तत्र प्रयोगः—यदप्रतिबद्धसामर्थ्यं यस्मिन्कर्त्तव्ये, तत्करोत्येव, यथाऽन्त्या कारणसामग्री, अप्रतिबद्धसामर्थ्यं चाकर्तृकं वाक्यं ज्ञानजनने सर्वकालमिति स्वभावहेतुः। अथवा—यदविकलकारणं तद्भवत्येव, यथाऽविकलकारणोऽङ्कुरः, अविकलकारणं चापौरुषेयवाक्यभाविविज्ञानमिति स्वभावहेतुः। द्वितीयेऽपि पक्षे तस्याशक्तस्य स्वभावस्यसर्वकालमनुवर्त्तनाच्च न कदाचित्तद्भावे विज्ञानं स्यात्, यथा विकलकारणोऽङ्कुरः ॥ १५०१॥ § 5031

437/k

कथमर्थवत्त्वं न सङ्गच्छत इत्याह—द्वेषेत्यादि। § 5032

द्वेषमोहादयो दोषा यथा मिथ्यात्वहेतवः।
कृपाप्रज्ञादयोऽप्येवं ज्ञाताः सत्यत्वहेतवः॥
१५०२ ॥§ 5034

तदाश्रयनराभावे न तयोरपि सम्भवः।
आनर्थक्यमतः प्राप्तं वचस्यपुरुषाश्रये॥
१५०३ ॥§ 5036

द्वाभ्यां प्रकाराभ्यामर्थवत्ता भवति, (अविपरीतार्थत्वेन) विपरीतार्थत्वेन वा, तृतीयराश्यभावात्। तस्याश्च बुद्धेर्द्विप्रकाराया अप्यर्थवत्ताया गुणदोषौ कारणमित्यन्वयव्यतिरेकाभ्यां निश्चितम्। तथाहि—यथा रागादिदोषपरीतपुरुषो मृषावादी दृष्टस्तथाकृपादिगुणयुक्तः सत्यवाग्दृष्टः। तयोश्च गुणदोषयोः सम्यक्त्वमिथ्यात्वहेत्वोराश्रयः पुरुषः, ततश्च पुरुषनिवृत्तौ गुणदोषनिवृत्तिः, गुणदोषनिवृत्तौ सम्यक्त्वमिथ्यात्वयोरप्यभावः, तदभावे प्रकारान्तरासम्भवादानर्थक्यमपौरुषेये वचसि प्राप्तम्। कारणाभावात्। नहि कारणमन्तरेण कार्यस्य सम्भवो युक्तः, निर्हेतुत्वप्रसङ्गात्। ततश्चदेशकालद्रव्यादिनियमो न स्यात्। प्रसङ्गसाधनमेतद्द्रष्टव्यम्। अन्यथा हि स्वातन्त्र्येण साधने दृष्टविरोधः स्यात्। तथाहि— अग्निहोत्रं जुहुयात्स्वर्गकामः इत्यादिवाक्यादर्थप्रतीतिर्भवन्त्युपलभ्यत एव, नच दृष्टमपह्नोतुं शक्यते। नचाकर्तृकत्वमुभयसिद्धमित्यसिद्धश्च हेतुः स्यात्। प्रसङ्गसाधने तु द्वयमप्यदुष्टम्। तथाहि—यद्यपौरूषेयत्वमभ्युपगम्यते वेदस्य तदाऽऽनर्थक्यमभ्युपगन्तव्यम्। अर्थवत्त्वहेतोः पुरुः षस्याभावात्।

नचानर्थक्यम्, अतः स्यात्पौरुषेय एवेति प्रसङ्गेन प्रदर्श्यते॥ १५०२॥ ॥ १५०३॥ § 5037

एतदेव प्रसङ्गसाधनं समर्थयितुं दृष्टविरोधाभावं प्रतिपादयन्नाशङ्कापूर्वकमाह—अर्थेत्यादि। § 5038

अर्थप्रतीतितो नो चेदेषा व्याख्यानतो भवेत्।
स्वतन्त्रो हि पुमान्दृष्टो व्याचक्षाणोऽर्थमिच्छया॥
१५०४॥ § 5040

भूतार्थद्योतने शक्तिः प्रकृत्यैव स्थिताऽस्य चेत्।
अज्ञातसमयस्यापि भवेदर्थगतिस्ततः॥
१५०५॥ § 5042

प्रकृत्या दीपको दीपो न सङ्केतमपेक्षते।
समयान्तरभावे च तस्मादर्थान्तरे गतिः॥
१५०६॥ § 5044

438/k

नहि सङ्केतभावेऽपि दीपो गन्धरसादिकम्।
प्रकाशयति विज्ञातुं सा शक्तिर्नच शक्यते॥
१५०७॥ § 5046

नो चेदिति। आनर्थक्यमिति सम्बन्धः। ततश्च दृष्टविरोधः प्रतिज्ञाया इति भावः। सत्यं स्याद्दृष्टविरोधो यदि वेदादेवार्थप्रतीतिरुपदेशमन्तरेणोपजायते, यावतैषाऽर्थप्रतीतिर्व्याख्यातुः सकाशात्समवंशाद्भवेत्। न वेदात्केवलात्समयनिरपेक्षात्। तथाहि—वेदार्थं मीमांसकादिः स्वेच्छया व्याचक्षाणो दृष्टः, नच स्वाभाविकस्यार्थस्य पुरुषेच्छानुरोधित्वं युक्तम्। तत्रैतत्स्यात्—नहि पुरुषेणापूर्वोऽर्थः स्वेच्छया कथ्यते, किं तर्हि ?। य एव हि स्वाभाविको व्यवस्थितः स एव पुरुषेण प्रकाश्यते इति तेन भवत्येव दृष्टविरोध इति। एवं तर्हि यदि प्रकृत्याऽस्य वेदस्य भूतार्थद्योतने शक्तिः स्थिता तदा सङ्केतानभिज्ञस्यापि ततो वेदवाक्यादर्थप्रतीतिः प्राप्नोति। सङ्केतसापेक्षो वेदोऽर्थप्रतीतिहेतुर्न केवल इति चेत्। तन्न। नहि प्रकृत्याऽर्थप्रतीतिहेतवो दीपाद-

यः सङ्केतमपेक्षन्ते। अन्यथा सङ्केतस्यैवान्वयव्यतिरेकाभ्यामर्थप्रतीतौ सामर्थ्यं स्यात्, न स्वाभाविकस्य सम्बन्धस्य। किंच—भवतु नाम सङ्केतसहायादर्थप्रतीतिस्तथापि दोष इत्याह—समयेत्यादि। मीमांसकोपरचितात्समयान्निरुक्तकाराद्युपरचितः समयः समयान्तरं तस्य सद्भावे सति प्रकृतादर्थादर्थान्तरे ततः शब्दात्प्रतीतिर्न प्राप्नोति। नहि प्रदीपोऽप्रकाश्यं गन्धरसादिकं सङ्केतवशात्प्रकाशयितुमीशः। भवतु नामार्थान्तरे वृत्तिः समयवशात्तथाऽपि—प्रामाण्यं न सिध्यतीति प्रतिपादयति—विज्ञातुमिति। पुरुषेच्छावशाद्यद्यर्थान्तरेऽपि शब्दस्य प्रवृत्तिस्तदा साङ्कर्यात्सा भूतार्थद्योतनशक्तिर्निश्चेतुं न शक्यते इति कथं तत इष्टार्थप्रतिपत्तिर्भवेत्। अथवाऽन्यथा व्याख्यायते। यासौ प्रकृत्या भूतार्थद्योतनशक्तिः साकदाचिदेकार्थनियता वा स्यादनेकार्थनियता वेति पक्षद्वयम्। तत्रैकार्थनियमपक्षे दोषमाह—समयान्तरभाव इति। द्वितीयेऽप्याह—विज्ञातुं सा शक्तिर्नचशक्यत इति। साङ्कर्यादिति भावः। यथोक्तम्— गिरामेकार्थनियमे न स्यादर्थान्तरे गतिः। अनेकार्थाभिसम्बन्धे विरुद्धव्यक्तिसम्भवः॥ इति॥ १५०४॥ ॥ १५०५॥ १५०६॥ १५०७॥

§ 5047

एवं प्रथमं शाब्दलक्षणमसम्भवीति प्रतिपाद्याकम्पज्ञानजन्मत इत्यस्य हेतोरसिद्धताभुपसंहारेण दर्शयन्नाह—अत इत्यादि। § 5048

439/k

अतोऽर्थप्रत्ययायोगात्तस्य निःकम्पता कुतः।
स तु सामयिको युक्तः पुंवाग्भूतान्न भिद्यते॥
१५०८॥ § 5050

न्यायज्ञैर्न तयोः कश्चिद्विशेषः प्रतिपद्यते।
श्रोत्रियाणां त्वकम्पोऽयमज्ञातन्यायवर्त्मनाम्॥
१५०९॥ § 5052

अपौरुषेयत्वे सति यथोक्तनीत्याऽर्थप्रतीतिरेव न सम्भवति यदा, तदा कुतस्तस्या अकम्पत्वम्। यश्चायमर्थप्रत्ययो भवन्नुपलभ्यते वेदवाक्यात्स तु साङ्केतिक एवयुक्त इति पूर्वं प्रतिपादितम् एषा व्याख्यानतो भवेदित्यादिना। इतश्चायं साङ्केतिक एव युक्त इति। यस्माद्वैदिकं वाक्यं पुंवाग्भूतात्—पुंवाक्यप्राप्तात् न भिद्यते। पौरुषेयवचनान्न भिद्यते इति यावत्। एतदपि कुत इत्याह—न्यायज्ञैरित्यादि।तयोरिति। वैदिकपौरुषेययोः। सर्वप्रकारेण पुरुषैः शक्यकरणत्वान्न कश्चिद्विशेषोवैदिकस्य लौकिकात्। श्रोत्रियाणामित्युपहसति॥ १५०८॥ १५०९॥ § 5053

द्वितीयेऽपि यद्वा प्रत्ययितोदितादित्येतस्मिञ्शाब्दलक्षणेऽसम्भवितां लक्षणदोषमाह—आप्तेत्यादि। § 5054

आप्तानङ्गीकृतेरेव द्वितीयमपि न क्षमम्।
शाब्दलक्षणमिष्टौ वा सोऽयमित्यविनिश्चितः॥
१५१०॥§ 5056

मीमांसकैः क्षीणदोषपुरुषानभ्युपगमादाप्तो नाङ्गीकृत एवेति कुतस्तद्वचनस्य प्रामाण्यं स्यात्। न क्षममिति। न युक्तम्। असम्भवीति यावत्। अथाऽप्याप्त इष्यते, तदा तस्याप्तस्येष्टौ सत्यां श्रृङ्गग्राहिकयाऽयमसावित्याप्तो न निश्चित इत्यसत्प्रख्य एव। नह्यन्यगुणदोषनिश्चये प्रमाणमस्ति तेषामतीन्द्रियत्वात्। कायवाग्व्यवहाराश्चान्यथाऽपि बुद्धिपूर्वं क्रियन्त इति कुतस्तद्वचनस्य प्रामाण्यम्, असाङ्कर्येणार्वाग्दर्शिभिस्तेषामनवधारणात्॥ १५१०॥
§ 5057

प्रायः संप्रत्ययो दृष्टो यद्वाक्यात्तस्य गृह्यते।
परोक्षप्रतिपत्त्यर्थं वाक्यं प्रत्ययतः स चेत्॥
१५११॥§ 5059

नान्यत्र प्रत्ययाभावात्पूर्वमप्रत्ययोऽपि हि।
एकत्रास्खलिते तत्र सर्वत्र नियमो न हि॥
१५१२॥§ 5061

अथापि स्याद्यस्य पुरुषस्याक्षीणदोषस्यापि सतो वाक्याद्बाहुल्येन संप्रत्ययो दृष्टः सोऽस्माभिः प्रत्ययित इष्टो न क्षीणदोषः, तस्मात्तस्य प्रत्ययितस्य
440/k वाक्यं गृह्यते, शा ब्दलक्षणे तेनासम्भविता न सम्भवतीति। एतदप्यसम्यक्। नह्येकत्राविसंवादमात्रोपलम्भात्सर्वत्र तथाभावनियमो युक्तो व्यभिचारस्य सम्भाव्यमानत्वादन्यथा व्यभिचारिलक्षणं स्यात्॥ १५११॥ १५१२॥ § 5062

एवं तावद्द्विप्रकारमपि शाब्दलक्षणं विशेषेण दुष्टं प्रतिपाद्य सामान्यं दूषणमाह —वचसामित्यादि। § 5063

वचसां प्रतिबन्धो वा को बाह्येष्वपि वस्तुषु।
प्रतिपादयतां तानि येनैषां स्यात्प्रमाणता॥
१५१३॥§ 5065

भिन्नाक्षग्रहणादिभ्यो(?) नैकात्म्यं न तदुद्भवः।
व्यभिचारान्न चान्यस्य युज्यतेऽव्यभिचारिता॥
१५१४॥§ 5067

नहि वाच्यैर्वस्तुभिः सह कश्चित्तादात्म्यलक्षणस्तदुत्पत्तिलक्षणो वा प्रतिबन्धो वचसामस्ति, येन तानि वस्तूनि प्रतिपादयतामेषां वचसां प्रामाण्यं स्यात्। तत्र तावन्न तादात्म्यलक्षणः प्रतिबन्धोऽस्ति, भिन्नाक्षग्रहणादिभ्यो हेतुभ्यः। तत्र भिन्नाक्षग्रहणं भिन्नेन्द्रियेण ग्रहणम्। तथाहि—श्रोत्रेन्द्रियेण शब्दो गृह्यतेऽर्थस्तु चक्षुरादिना। आदिशब्देन कालदेशप्रतिभासकारणभेदो गृह्यते। कुमारिलस्त्वाह—भिन्नेन्द्रियग्राह्यात्वाद्भिन्नमित्यनैकान्तिकमेतत्तथाहि—एकं रूपं यदा बहवः पश्यन्ति तदा भिन्नेन्द्रियग्राह्यत्वाद्रूपस्य भेदः प्राप्नोति। अथापि स्याचक्षुरिन्द्रियजातेरभेदादेकेन्द्रियग्राह्यत्वमेवेति। एवं तर्हि सत्ताया अनेकेन्द्रियग्राह्यत्वेऽपीन्द्रियजातेरभेदादभिन्नेन्द्रियग्राह्यत्वमस्तीति सिद्धमेकत्वम्। तस्माद्बुद्धिभेदाभेदाभ्यां पदार्थभेदाभेदव्यवस्था नेन्द्रियभेदाभेदाभ्यामिति। आह च— न चानेकेन्द्रियग्राह्यं भिन्नतां प्रतिपद्यते। माभूद्भिन्नशरीरस्थग्राह्यत्वाद्रूपभिन्नता॥ जात्यभेदादभेदश्चेदिन्द्रियत्वेन तत्समम्। तुल्यबुद्धेरतो भिन्ना न सत्तेन्द्रियभेदतः॥ इति। एतच्चासम्यक्—बुद्धिभेदाद्भेदेऽपि साध्ये समानत्वात्। तथाह्यत्रापि शक्यत एवं वक्तुम्—बुद्धिभेदाद्वस्तुभेदइत्यनैकान्तिकमेतत्। तथाहि—यदा बहव एकं रूपं पश्यन्ति, तदा बुद्धिभेदोऽस्त्येवानेकचक्षुर्ज्ञानोत्पत्तेः। नच तदा रूपस्य भेदः। यदि चक्षुर्विज्ञानजातेरभेदादेकत्वं परिकल्प्यते, एवं तर्हि रूपरसादीनामप्येकत्वं प्राप्नोति। सत्यपि तद्बुद्धिभेदे विज्ञानजातेरभेदात्। ततश्च यदुक्तम्—बुद्धिभेदान्न चैकत्वं रूपादीनां प्रसज्यत इति तद्व्याहन्येत। तस्माज्ज्ञात्युत्तरमेतत्। अथ सत्यपि स्वलक्षणभेदे यादृशे लक्षण भेदे यादृशो लोके 441/k भेदाभेदव्यवहारः प्रसिद्धः, एकानेकप्रत्यवमर्शहेतुत्वेन तादृशौबुद्धिभेदाभेदावुपादीयेते। इन्द्रियेऽपि सर्वं समानमित्यलं प्रसङ्गेन। न तदुद्भव इति। नापि तदुत्पत्तिलक्षणसम्बन्धो व्यभिचारात्। अर्थाभावेऽपि विवक्षामात्राद्भावात्। नचान्यस्य तदुत्पत्तिरहितस्याव्यभिचारिताऽस्त्यतिप्रसङ्गात्। तस्मान्न वाच्येऽर्थे शब्दस्य प्रमाण्यम्॥ १५१३॥ १५१४॥ § 5068

यद्येवं कथमुक्तम्— न प्रमाणान्तरं शाब्दमनुमानात्तथाहि सः (तत् ?)। कृतकत्वादिवत्स्वार्थमन्यापोहेन भाषते इति। एतदाशङ्क्य यथानुमानेऽन्तर्भाव इष्टस्तथा प्रतिपादयन्नाह—वचोभ्य इत्यादि। § 5069

वचोभ्यो निखिलेभ्योऽपि विवक्षेषाऽनुमीयते।
प्रत्यक्षानुपलम्भाभ्यां तद्धेतुः सा हि निश्चिता॥
१५१५॥§ 5071

निखिलेभ्य इति। पौरुषेयत्वेनाप्यभिमतेभ्यः। सा च विवक्षा तत्कार्यत्वाद्वचनात्प्रतीयते। नतु वाच्यतया। यस्मादात्मसन्तानेऽन्वयव्यतिरेकाभ्यां वचसां हेतुः सा विवक्षा निश्चिता। यत्तूक्तमन्यापोहेन भाषत इति तत्र भाषणं द्योतनं ज्ञापनमिति यावत्। तथाचास्य विवरणम्—तत्कृतकत्वादिवदर्थान्तरसम्बद्धेन व्यवच्छेदेन द्योतयतीति। अवश्यं चैतद्विज्ञेयमन्यथा कृतकत्वादिवदिति साधनविकलो दृष्टान्तः स्यात्। नहि कृतकत्वादेर्भाषणं सम्भवति, तस्य शब्दधर्मत्वात्। ततश्चान्यापोहेनभाषणादिति हेतुरसाधारणः स्यात्॥ १५१५॥
§ 5072

ननु च विवक्षायामपि शब्दस्य नैव प्रामाण्यं युक्तम्। तथाहि—न तावद्विवक्षाविशेषे प्रामाण्यं व्यभिचारात्। भ्रान्तस्यान्यविवक्षायामन्यवाक्यदर्शनात्। नापि विवक्षासामान्ये, वैफल्यात्। नहि विवक्षामात्रविज्ञानं क्वचिद्व्यवहाराङ्गतां प्रतिपद्यते। ततोऽर्थविशेषानिश्चयात्। एतदाशङ्क्य भ्रान्तस्येत्यादिना, विवक्षाविशेषे तावत्प्रामाण्यमाह—भ्रान्ताभ्रान्तेत्यादि। § 5073

भ्रान्तस्यान्यविवक्षायां वाक्यं चेदन्यदीक्ष्यते।
तथा विवक्षमप्येतत्त(क्षासामान्येत?)स्मान्नैव प्रवर्त्तते
१५१६§ 5075

भ्रान्ताभ्रान्तप्रयुक्तानां वैलक्षण्यं परिस्फुटम्।
विदग्धाः प्रकृतादिभ्यो निश्चिन्वन्ति गिरामलम्॥
१५१७ ॥§ 5077

अवश्यं हि भ्रान्ताभ्रान्तप्रयुक्तानां वैलक्षण्यमङ्गीकर्त्तव्यम्, अन्यथा न
442/k कारण भेदो भेदकः स्यात्। तच्च वैलक्षण्यं कुशलाः पुरुषा निश्चिन्वन्त्येव प्रकृतादिभ्यः। प्रकृतम्—प्रकरणम्। आदिशब्देनाव्याकुलता मुखप्रसन्नतादि गृह्यते॥ १५१६॥ ॥ १५१७॥ § 5078

वैलक्षण्यमेव गिरां कथमित्याह—वैलक्षण्येन हेतूनामिति। § 5079

वैलक्ष्यण्येन हेतूनां विशेषं तासु ये न तु।
अवगच्छन्ति दोषोऽयं तेषां लिङ्गस्य नास्ति तु॥
१५१८ ॥§ 5081

सन्दिह्यमानवपुषो धूमस्याप्येकदाऽन्यथा।

भावान्निश्चयकालेऽपि न स्यात्तेजसि लिङ्गता॥
१५१९॥§ 5083

कारणभेदादिति यावत्। तस्मात्सुविवेचितं कार्यं न कारणं व्यभिचरतीति भवत्येव विवक्षाविशेषे प्रामाण्यम्। ये पुनस्तासु लिङ्गभूतासु गीर्षु विशेषं नावधारयन्ति तेषामयं दोषो नतु लिङ्गस्य। नहि लिङ्गं सत्तामात्रेण गमकमिष्यते, किं तर्हि ?, निश्चितम्। तस्मात्प्रतिपत्तुर्दोषोऽयम्। अन्यथा हि क्वचिद्बाष्पादिरूपेण सन्दिह्यमानस्य धूमस्यान्यत्वाभावादगमकत्वान्निश्चितस्यापि वह्नौ साध्ये न लिङ्गता प्राप्नोति। अपिच यदा सर्व एवायं शाब्दो व्यवहारस्तैमिरिकद्वयद्विचन्द्रदर्शनवत्स्वप्रतिभासानुरोधेन भ्रान्त एवेष्यते, तदा कथं विवक्षाविशेषे व्यभिचारोद्भावनादप्रामाण्यप्रसञ्जनं स्यात्, तत्र विवक्षाविशेषे पारमार्थिकस्य प्रामाण्यस्यानभ्युपगमात्। तथाचाह—सङ्केतापेक्षया तस्य हृदि कृत्वा प्रकाशनम्। अनुमानत्वमुद्दिष्टं नतु तत्त्वव्यपेक्षया॥ इति॥ १५१८॥ १५१९॥ § 5084

विवक्षासामान्येऽपि साध्ये प्रामाण्यं प्रतिपादयन्नाह—तेषामित्यादि। § 5085

तेषामपि विवक्षायाः केवलाया विरुध्यते।
नानुमैकान्तसद्भावात्प्राणितादिप्रसिद्धये॥
१५२०॥§ 5087

तेषामपि भ्रान्ताभ्रान्तप्रयुक्तानां सर्वेषां विवक्षासामान्ये नानुमानत्वविरोधः, एकान्तसद्भावात्—अव्यभिचारात्। नच—सान्निध्यतस्तस्य पुंसश्चिन्तामणेरिव। निस्सरन्ति यथाकामं कुड्यादिभ्योऽपि देशनाः॥ इत्यनेनाभ्युपगमेन व्यभिचार आशङ्कनीयः। यतस्तत्रापि विवक्षैवाद्या कारणम्। पूर्वप्रणिधानाहितसंस्कारबलेनैव तत्रवचनप्रवृत्तेः। तथाहि—अत्यभ्यस्तग्रन्थश्चाद्याया(स्याध्याया ?)दिकालेऽन्यद्विकल्पयतेऽ(तोऽ ?)पि वचनपादविहरणादिक्रियाप्रवृत्तेः। नहि पूर्वसमीहा न तेषां कारण मन्यथा हि गोपाल- 443/k घटिकादौ धूमोपलम्भाद्धूमादेरपि लिङ्गस्य व्यभिचारित्वं चोदनीयं स्यात्। तस्मात्सर्वत्रैव कार्यलिङ्गदेशकालाद्यपेक्षया न व्यभिचारः सम्भवीत्येकान्तसद्भाव एव। नच वैफल्यम्, प्राणितादिसिद्धये प्रवृत्तेः साफल्यसम्भवात्। आदिशब्देन कारणदोषादयो गृह्यन्ते॥ १५२०॥ § 5088

भवतु नाम विवक्षां प्रति शब्दस्य प्रामाण्यम्। तथापि कोऽत्र धर्मी किं साध्यं कथं वा सम्बन्धः सिद्धो येन त्रैरूप्यसद्भावेनानुमानेऽन्तर्भावान्न प्रमाणान्तरत्वं स्यादित्याह—विवक्षायामिति। § 5089

विवक्षायां च गम्यायां विस्पष्टैव त्रिरूपता।
पुंसि धर्मिणि सा साध्या कार्येण वचसा यतः॥
१५२१॥§ 5091

पादपार्थविवक्षावान्पुरुषोऽयं प्रतीयते।
वृक्षशब्दप्रयोक्तृत्वात्पूर्वावस्थास्वहं यथा॥
१५२२॥§ 5093

पुरुषो धर्मी यत्र वक्ता दृश्यते, सा—विवक्षा साध्या, स्वसन्ताने च सम्बन्धः पूर्वं सिद्धः। यत्र तु वक्ता न दृश्यते तत्र प्रदेशो धर्मी पुरुषविशिष्टः साध्यः। तथाहि—प्रदेशस्यापि शब्दकारणत्वमस्त्येव। पर्वतकुहरादावन्यादृश-शब्दश्रवणात् ॥ १५२१॥ १५२२॥ § 5094

अतो यत्र परैर्बाह्ये त्रैरूप्यादि निराकृतम्।
शब्दानामिष्यते तत्र नैवास्माभिः प्रमाणता॥
१५२३॥§ 5096

यत्र त्वेषामभीष्टेयं व्यक्तं तत्र त्रिरूपता।
विवक्षायां तु साध्यायां त्रैलक्षण्यं प्रकाशितम्॥
१५२४॥§ 5098

एवं स्थितेऽनुमानत्वं शब्दे धूमादिवद्भवेत्।
त्रैरूप्यसहितत्वेन तादृग्विषयसत्त्वतः॥ १५२५॥
इति शाब्दविचारः।§ 5101

अत इत्यादिना बाह्यापेक्षया शब्दस्यानुमानत्वे साध्ये त्रैरूप्यरहित-त्वेनेत्यस्य हेतोर्वैफल्यमाह सिद्धसाध्यतया। विवक्षापेक्षया त्वसिद्धतां यत्रेत्यादिना प्राह। तां प्रति शब्दस्य त्रैरूप्यस्य प्रकाशितत्वात्॥ १५२३॥ १५२४॥ १५२५॥ § 5102

इति शाब्दविचारः।

०.२०.२ उपमानविचारः।

444/k

उपमानमधिकृत्याह—कीदृगित्यादि। § 5104

कीदृग्गवय इत्येवं पृष्टो नागरिकैर्यदा।
ब्रवीत्यारण्यको वाक्यं यथा गौर्गवयस्तथा॥
१५२६॥§ 5106

एतस्मिन्नुपमानत्वं प्रसिद्धं शाबरे पुनः।
अस्यागमाबहिर्भावादन्यथैवोपवर्णितम्॥
१५२७॥§ 5108

कीदृशो गवय इत्येवं पृष्टस्य यद्वाक्यं यादृशो गौस्तादृशो गवय इति, अस्य वाक्यस्योपमानत्वं वृद्धनैयायिकानां प्रसिद्धम्। शाबरे तु भाष्ये शबरस्वामिना शाब्द एवास्यान्तर्भावान्न युक्तं पृथक्प्रमाणान्तरत्वमीदृशस्योपमानस्येति मत्वाऽन्यादृशमेवोपमानं वर्णितम्। उपमानमपि सादृश्यमसन्निकृष्टेऽर्थे बुद्धिमुत्पादयति। यथा गवयदर्शनं गोस्मरणस्येत्यमुना ग्रन्थेन॥ १५२६॥ १५२७॥ § 5109

एनमेव व्याचिख्यासुराह—गां दृष्ट्वेत्यादि। § 5110

गां दृष्ट्वाऽयमरण्यान्यां गवयं वीक्षते यदा।
भूयोऽवयवसामान्यभाजं वर्तुलकण्ठकम्॥
१५२८॥§ 5112

तदाऽस्य गवयज्ञानं रूपमात्रावबोधकम्।
प्रत्यक्षमेव यच्चापि विशेषेण विकल्पकम्॥
१५२९॥§ 5114

गवा सदृशरूपोऽयं पशुरित्येतदीदृशम्।

अक्षव्यापारसद्भावे जातेः प्रत्यक्षमिष्यते॥
१५३० ॥§ 5116

पूर्वं गां दृष्ट्वा पश्चादरण्यं गतो यदा गवयं पश्यति, किंविशिष्टम्, भूयोऽवयवसामान्यभाजम्—भूयांस्यवयवसामान्यानि भजत इति कृत्वा, वर्तुलकण्ठकम्— सास्नारहितम्, तदा यत्प्रथमं गवयस्वरूपमात्रग्राहि निर्विकल्पकमालोचनाज्ञानमुत्पद्यते तत्तावत्प्रत्यक्षम्। यच्चापि गवा सदृशोऽयं पशुरित्येवमाकारं विशेषेण विकल्पयदुत्पद्यते तदपि प्रत्यक्षमेव, अक्षव्यापारेणोत्पत्तेः॥ १५२८॥ १५२९॥ १५३०॥ § 5117

स्यादेतत्स्मरणबलादसदेव सादृश्यं विकल्पयदुत्पद्यते नाक्षव्यापारेणेत्याशङ्क्याह—तत्र यद्यपीत्यादि। § 5118

तत्र यद्यपि गां स्मृत्वा तज्ज्ञानमुपजायते।
सन्निधेर्गवयस्थत्वाद्भवेदिन्द्रियगोचरम्॥
१५३१ ॥§ 5120

यद्यपि स्मृतिपूर्वकं तत्सादृश्यग्राहि ज्ञानं, तथापि गवयस्थत्वेन स-
445/k न्निहितत्वा त्सादृश्यमिन्द्रियगोचरः। सन्निधिः—सन्निहितत्वम्। गवयस्थत्वादिति सन्निहितत्वे हेतुः। यस्माद्गवयस्थं सादृश्यं तस्मादस्य सन्निधिः॥ १५३१॥ § 5121

ननु च द्विष्ठत्वात्सादृश्यस्य कथमेकत्र गवयेऽस्य ग्रहणं युक्तमित्याह—सामान्यवद्धीत्यादि। § 5122

सामान्यवद्धि सादृश्यं प्रत्येकं च समाप्यते।
प्रतियोगिन्यदृष्टेऽपि यस्मात्तदुपलभ्यते॥
१५३२ ॥§ 5124

सामान्येन तुल्यं वर्त्तत इति सामान्यवत्। यद्यपि सादृश्यं द्विष्ठं तथाऽपि सामान्यवत्प्रत्येकं समाप्तमिति कृत्वा प्रतियोगिनि गवादावदृष्टेऽपि सन्निहितत्वादेकत्राप्युपलभ्यत एव॥ १५३२॥ § 5125

स्यादेतत्—यदि सादृश्यं वस्तु भवेत्तदोपलभ्येत यावता तदेवास्य वस्तुत्वं न सिद्धमित्याह—सादृश्यस्येत्यादि। § 5126

सादृश्यस्य च वस्तुत्वं न शक्यमपबाधितुम्।
भूयोऽवयवसामान्ययोगो जात्यन्तरस्य तत्॥
१५३३ ॥§ 5128

भूयसां गवादिशृङ्गाद्यवयवसामान्यानां गवयादिजात्यन्तरेणैकव्यक्तिसमवायलक्षणः सम्बन्धः सादृश्यम्। सम्बन्धश्च सम्बन्धिभ्यो नात्यन्तं भिन्नः, सम्बन्धादिप्रत्ययाभावप्रसङ्गात्। सजातीयस्य सर्वावयवसामान्यसद्भावात्सादृश्यं नास्तीति ज्ञापनार्थं जात्यन्तरग्रहणम्॥ १५३३॥ § 5129

साम्प्रतमुपमायाः स्वरूपं दर्शयन्नाह—तस्यामिति। § 5130

तस्यामेव व्यवस्थायां यद्विज्ञानं प्रवर्त्तते।
पशुनैतेन तुल्योऽसौ गोपिण्ड इति सोपमा॥
१५३४॥§ 5132

अनेन परिदृश्यमानेन पशुना सदृशो गौरित्येवमाकारं परोक्षगोविषयं यज्ज्ञानमुपजायते तदुपमानं प्रमाणम्॥ १५३४॥ § 5133

प्रमेयमस्य दर्शयन्नाह—तस्मादित्यादि। § 5134

तस्माद्यत्स्मर्यते तत्स्यात्सादृश्येन विशेषितम्।
प्रमेयमुपमानस्य सादृश्यं वा तदाश्रितम्॥
१५३५॥§ 5136

यस्माद्यथोक्तलक्षणयुक्तमुपमानं, तस्माद्यद्गवादि स्मर्यते गवयादिसादृश्यविशिष्टं, तदुपमानस्य प्रमेयम्। यद्वा सादृश्यमात्रं गवादिसमाश्रितम्॥ १५३५॥ § 5137

446/k

ननु च प्रत्यक्षेण सादृश्यमुपलब्धं, गौश्च स्मृत्या विषयीकृत एव, तत्किमन्यदधिकं प्रमेयमस्ति, यदधिगमादुपमानस्य प्रामाण्यं स्यादित्याह—प्रत्यक्षेणेति। § 5138

प्रत्यक्षेणावबुद्धे च सादृश्ये च गवि स्मृते।
विशिष्टस्यान्यतोऽसिद्धेरुपमायाः प्रमाणता॥
१५३६॥§ 5140

यद्यपि प्रत्यक्षेण सादृश्यं गृहीतं, गौश्च स्मृत्या विषयीकृतः, तथापि सादृश्यविशिष्टस्य गोपिण्डस्यान्यतः प्रत्यक्षात्स्मरणाच्चासिद्धत्वात्। उपमानस्य तदधिगमे प्रामाण्यम्॥ १५३६॥ § 5141

अत्रैव दृष्टान्तमाह—प्रत्यक्षेऽपीति। § 5142

प्रत्यक्षेऽपि यथा देशे स्मर्यमाणेऽपि पावके।
विशिष्टविषयत्वेन नानुमानाप्रमाणता॥
१५३७॥ § 5144

यथा प्रदेशादौ धर्मिणि प्रत्यक्षेऽपि स्मृत्या चाग्नौ गृहीतेऽपि वह्निविशिष्टप्रदेशादिविषयत्वान्नानुमानस्याप्रामाण्यमपि तु प्रामाण्यमेव, तद्वदुपमानस्यापीति॥ १५३७॥ § 5145

अथापि स्याद्भवतु प्रमाणमुपमानं, तत्कथं प्रत्यक्षादेः पृथक् प्रमाणमित्याह—नहीति। § 5146

नहि प्रत्यक्षतासिद्धं विज्ञानस्योपपद्यते।
इन्द्रियार्थाभिसम्बन्धव्यापारविरहात्तदा॥
१५३८॥ § 5148

त्रैरूप्यानुपपत्तेश्च नच तस्यानुमानता।
पक्षधर्मादि नैवात्र कथञ्चिदवकल्पते॥
१५३९॥ § 5150

(प्राग्गोगतं हि सादृश्यं न) धर्मत्वेन गृह्यते।
गवये गृह्यमाणं च न गवामनुमापकम्॥
१५४०॥ § 5152

न तावत्प्रत्यक्षं युक्तमिन्द्रियार्थाभिसम्बन्धेनानुत्पत्तेः। नाप्यनुमानं त्रैरूप्याभावात्। तथाहि—अत्र पक्षधर्मः सादृश्यं वा परिकल्प्यते, परिदृश्यमानो गवयादिर्वा, तच्च सादृश्यं लिङ्गत्वेन परिकल्प्यमानं गोगतं वा कल्प्येत गवयगतं वेतिपक्षद्वयम्। तत्र न तावद्गवादिप्रमेयस्थस्य सादृश्यस्य लिङ्गत्वं, गवयदर्शनात्प्राक्तस्यागृहीतत्वात्। नचागृहीतस्य लिङ्गत्वं युक्तमतिप्रसङ्गात्। गयवस्थं तर्हि सादृश्यं लिङ्गं भविष्यति, तत्र तस्य गृहीतत्वादित्यह—गवये गृह्यमाणं च न गवामनुमापकम्, व्यधिकरणत्वात्काकस्य कार्ष्ण्यादिवत्॥ १५३८॥ १५३९॥ १५४०॥ § 5153

447/k

गवयदर्शनादूर्ध्वं तर्हि गवि गृहीतत्वादेतत्स्थं लिङ्गं भविष्यतीत्याह—प्रतिज्ञेति। § 5154

प्रतिज्ञार्थैकदेशात्वाद्गोगतस्य न लिङ्गता।
गवयश्चाप्यसम्बन्धान्न गोलिङ्गत्वमृच्छति॥
१५४१ ॥§ 5156

साटृश्यस्य प्रमेयत्वान्न युक्तं तस्यैव लिङ्गत्वम्। गवयस्तर्हि लिङ्गं भविष्यतीत्याह —गवय इति। अत्रापि व्यधिकरणत्वान्न गवयस्य लिङ्गत्वम्॥ १५४१॥ § 5157

प्रामाण्यं तर्हि माभूदुपमानस्येत्याह—न चाप्रमाणमित्यादि। § 5158

न चाप्रमाणं तज्ज्ञानमज्ञातार्थप्रकाशनात्।
गवयादर्शनात्पूर्वं तत्सादृश्यानवग्रहात्॥
१५४२ ॥§ 5160

पूर्वं गवयसादृश्यविशिष्टस्य गोरग्रहणात्। अज्ञातस्य सादृश्योपाधेर्गोः प्रकाशनमस्तीति युक्तं प्रामाण्यम्॥ १५४२॥ § 5161

प्रमेयेत्यादिना प्रतिविधत्ते। § 5162

प्रमेयवस्त्वभावेन नाभिप्रेताऽस्य मानता।
भूयोऽवयवसामान्ययोगः सादृश्यमस्ति चेत्॥
१५४३ ॥§ 5164

सामान्यानि निरस्तानि भूयस्ता तेषु सा कुतः।
तैश्च योगः प्रमाणं चेदस्ति तत्प्रतिपादकम्॥
१५४४ ॥§ 5166

सामान्यस्य च वस्तुत्वं प्रत्यक्षग्राह्यताऽपि च।
अभावान्यप्रमेयत्वादसाधारणवस्तुवत्॥
१५४५ ॥§ 5168

प्रमेयाभावात् षड्प्रमाणव्यतिरिक्तप्रमाणवदतो नोपमानं प्रमाणम्। भूयोऽवयवसामान्ययोगात्मकं सादृश्यमस्ति प्रमेयमतो हेतुरसिद्ध इति चेत्। तन्न। सामान्यपरीक्षायां सामान्यानां निरस्तत्वान्न तेषां भूयस्त्वम्। नापि तैर्यो-

गोऽस्तीति नासिद्धता हेतोः। स्यादेतत्—अस्त्येव सामान्यप्रतिपादकं प्रमाणमतोऽसिद्ध एव हेतुः। तत्रेदं प्रमाणम्—सामान्यं वस्तु, तथा प्रत्यक्षग्राह्यम्, इति प्रतिज्ञाद्वयम्। अभावान्यप्रमेयत्वादिति हेतुः। अभावात्प्रमेयादन्यप्रमेयस्वभावत्वादित्यर्थः। असाधारणवस्तुवदिति दृष्टान्तः। असाधारणवस्तुत्वलक्षणम्॥ १५४३॥ १५४४॥ १५४५॥ § 5169

अभावेत्यादिना दूषणमाह— § 5170

अभावपक्षनिक्षिप्तसामान्यार्थप्रवादिनाम्।
असिद्धिराद्यसाध्ये च प्रतिज्ञार्थैकदेशता॥
१५४६॥§ 5172

448/k

सामान्यार्थेत्यत्रार्थशब्दः प्रमेयवचनः प्रतिज्ञाद्वयेऽपि बौद्धानामस्वभावसामान्यवादिनामभावादन्यत्वं सामान्यस्यासिद्धमिति हेतोरसिद्धिः। प्रतिज्ञार्थैकदेशभावश्चाद्ये साध्ये वस्तुलक्षणे। तथाहि—अभावादन्यद्वस्त्वेन भवति, अभावव्यवच्छेदलक्षणत्वाद्भावस्य, तदेव शब्दान्तरेण हेतुत्वेनोपात्तम्। तदेव च साध्यमिति प्रतिज्ञार्थैकदेशता॥ १५४६॥ § 5173

किं च—स्मृतिस्वभावत्वाद्वा न प्रमाणमुपमानं, स्मृत्यन्तरवत्। तत्र स्मृतिस्वभावत्वं प्रतिपादयन्नाह—एवमित्यादि। § 5174

एवं तु युज्यते तत्र गोरूपावयवैः सह।
गवयावयवाः केचित्तुल्यप्रत्ययहेतवः॥ १५४७॥§ 5176

तत्रास्य गवये दृष्टे स्मृतिः समुपजायते।
असकृत् दृष्टपूर्वेषु गोरूपावयवेष्वियम्॥
१५४८॥§ 5178

अतएव तुरङ्गादौ तत्सादृश्येन नो मतिः।
वर्त्तते गवये दृष्टे को विशेषोऽन्यथा पुनः॥
१५४९॥§ 5180

प्रकृत्यैवासत्यपि सादृश्याख्ये वस्तुनि केचिद्गवयावयवा गोगतैरवयवैः सह तुल्यप्रत्यवमर्शविकल्पहेतवः, न सादृश्यं नामार्थान्तरमन्यत्र तुल्यप्र-

त्यवमर्शहेतुभ्योऽवयवेभ्यः, तेभ्योऽर्थान्तरस्य बुद्धावप्रतिभासनात्। तस्माद्गवयदर्शनाद्गोगतावयवेष्वेव भूयोदर्शनबलात्स्मृतिरूपमेव जायते ज्ञानं, नतु सादृश्याख्यवस्तुग्राहि। अन्यथा हि तुरगादावपि भूयोऽवयवसामान्ययोगोऽस्तीति तत्रापि गवयदर्शनाद्गवीव मतिः किं न प्रवर्त्तेत। नह्यत्र कश्चिद्विशेषोऽस्ति, उभयत्रापि सादृश्यसद्भावात्।अन्यथेति। यद्यसकृन्न दृष्टाः स्युः। स्मृतित्वे तु नायं दोषो यदेवासकृद्दृष्टपूर्वं तत्रैव स्मृतिर्भवति। प्रतिनियतशक्तित्वाच्च स्मृतिप्रबोधहेतूनाम्॥ १५४७॥ १५४८॥ ॥ १५४९॥
§ 5181

स्यादेतत्—भवतु स्मृतिस्तथापि स्मृतिरेव कस्मादप्रमाणमित्याह—विज्ञातेत्यादि। § 5182

विज्ञातार्थप्रकाशत्वान्न प्रमाणमियं ततः।
प्रमाणान्तरभावस्तु कुत एव भविष्यति॥
१५५० ॥§ 5184

इयमिति। स्मृतिः॥ १५५०॥ § 5185

अभ्युपगम्य सादृश्यस्य वस्तुत्वं परमतेनैवोपमानाप्रामाण्यमाह—अस्तु वेत्यादि। § 5186
449/k

अस्तु वा वस्तु सादृश्यं तत्तु सामान्यवद्गवि।
प्रतियोगिन्यदृष्टेऽपि दृष्टमेव पुरःस्थितम्॥
१५५१ ॥§ 5188

तथाच स्मृतिरूपत्वं न कथञ्चिन्निवर्त्तते।
सत्तामात्रेण विज्ञातं सादृश्यं च गवात्मनि॥
१५५२ ॥§ 5190

गवयेन तु सादृश्यमित्येवं न विनिश्चितम्।
प्रमिणोत्युपमानं तु वैलक्षण्यं ततः स्मृतेः॥
१५५३ ॥§ 5192

भवतु सादृश्यं वस्तुगति च सामान्यमिव सर्वात्मना परिसमाप्तं, तथापि गवयदर्शनात्पूर्वं गवि पुरोऽवस्थिते प्रत्यक्षेण गृह्यमाणे ततोऽव्यतिरेकात्त-दपि पुरोऽवस्थितं सादृश्यं गृहीतमेव गोस्वरूपवत्। अन्यथा ह्यव्यतिरेको न सिद्ध्यति। ततश्च गृहीतग्रहणात्स्मृतिरूपत्वान्न प्रमाणम्। अथापि स्यात्स-त्तामात्रेण पूर्वं सादृश्यं गृहीतम्,एतद्गवयेनैतत्सादृश्यं गोरित्यनेन रूपेण न गृहीतं। उपमानं त्वनेनाकारेण प्रमिणोति, ततः स्मृतिरूपत्वमसिद्धमिति॥ १५५१॥ १५५२॥ १५५३॥ § 5193

तत्राह—यदि नामेत्यादिना। § 5194

यदि नाम गृहीतं नो नाम्ना तेनैव तत्पुरा।
गृहीतं तु स्वरूपेण यदस्यात्माभिधीयते॥
१५५४॥§ 5196

यदि नाम गवयेन सादृश्यमित्यनेन नाम्ना विशिष्टं गोद्रव्यं गवयदर्श-नात्पूर्वं न गृहीतं, स्वरूपेण तु गृहीतमेव। यस्तस्य स्वभावः स गृहीत इति यावत्। किं तत्स्वरूपमित्याह—यदस्यात्माभिधीयत इति। यत्स्वरूपं त-स्य गोपिण्डस्यात्मेत्यमिधीयते। तेन—स्वरूपेण स्वभावलक्षणेन तद्गृहीतमिति यावत्॥ १५५४॥ § 5197

यदि नाम गृहीतं ततः किमित्याह—न नाम रूपमित्यादि। § 5198

न नाम रूपं वस्तूनां यत्तस्याग्रहणे सति।
परिज्ञातात्मतत्त्वानामप्यविज्ञातता भवेत्॥
१५५५॥§ 5200

नहि वस्तूनां स्वरूपं नाम भवति, येन तस्य नाम्नः पूर्वमग्रहणे गृहीत-स्यापि वस्तुनो न ग्रहणं स्यात्। विशेषतश्च निश्चयात्मकप्रत्यक्षवादिनो न गृहीतमित्येवं न युक्तं वक्तुम्॥ १५५५॥ § 5201

एतावता च लेशेन प्रमाणत्वव्यवस्थितौ।
नेयत्ता स्यात्प्रमाणानामन्यथाऽपि प्रमाणतः॥
१५५६॥§ 5203

450/k

किञ्च—अनेन तुल्य इति ज्ञानादेतावता लेशेन प्रमाणान्तरकल्पनायाम-तिप्रसङ्गः स्यात्। प्रत्यक्षमनुमानं च शाब्दं चोपमया सह। अर्थापत्तिरभावश्च षडेते साध्यसाधकाः॥ इति नेयत्ता स्यात्प्रमाणानाम्॥ १५५६॥ § 5204

तमेवातिप्रसङ्गं दर्शयन्नाह—तरुपङ्क्त्यादीत्यादि। § 5205

तरुपङ्क्त्यादिसंदृष्टावेकपादपदर्शनात्।
द्वितीयशाखिविज्ञानादाद्योऽसाविति निश्चयः॥
१५५७॥§ 5207

प्रमाणान्तरमासक्तं सादृश्याद्यनपेक्षणात्।
गृहीतग्रहणान्नो चेत्समानमुपमास्वपि॥
१५५८॥§ 5209

आदिशब्देन पिपीलिकादिपङ्क्तिग्रहणम्। तरुपङ्क्त्यादिदर्शनकाले प्रथमवृक्षग्रहणादाद्योऽयं वृक्ष इति निश्चयो नोपजायते। द्वितीयवृक्षोपलब्धौ तु सत्यामाद्ये शाखिन्याद्योऽयं शाखीति योऽयं जायते निश्चयः स प्रमाणान्तरं स्यात्। कस्मात्।सादृश्याद्यनपेक्षणात्। सादृश्यं नापेक्षत इति नोपमानमिदम्। अक्षव्यापारानपेक्षणान्न प्रत्यक्षम्। लिङ्गानपेक्षणान्नानुमानम्। शब्दनिरपेक्षत्वान्न शाब्दम्। अन्यथाऽनुपपद्यमानदृष्टश्रुतार्थानपेक्षत्वान्नार्थापत्तिः। प्रमाणप्रमेयनिवृत्त्यनपेक्षणान्नाभावः।तथा—अस्मात्पूर्वमिदं पश्चाद्दीर्घं ह्र(?)स्वमिदं महत्। इत्येवमादिविज्ञाने प्रमाऽनिष्टा प्रसज्यते। इति वक्तव्यम्। स्मृतित्वाद्गृहीतग्रहणान्न प्रमाणान्तरमेतदिति चेत्।समानमुपमास्वपि। गृहीतग्राहित्वम्। उपमास्विति व्यक्तिभेदाद्बहुवचनम्॥ १५५७॥ ॥ १५५८॥ § 5210

गवयस्योपलम्भे च तुरङ्गादौ प्रवर्त्तते।
तद्वैसादृश्यविज्ञानं यत्तदन्या प्रमा न किम्॥
१५५९॥§ 5212

अभावान्तर्गतं नो चेन्नैवं भावावलम्बनात्।
अन्योन्याभावतायां वा समं सादृश्यबुद्धिषु॥
१५६०॥§ 5214

किञ्च—यथा गवयदर्शनाद्गवि साधर्म्यज्ञानं प्रमाणान्तरं व्यवस्थाप्यते, तथा गवयदर्शनात्तुरङ्गादौ वैसादृश्यस्य विज्ञानमपि कस्मान्न प्रमाणान्तरं व्यवस्थाप्येत। अभावप्रमाणान्तर्भावान्न प्रमाणान्तरमिति चेत्। नैतद्युक्तम्। कस्मात्। भावावलम्बनात्। अभावस्याभावविषयत्वात्। स्यादेतत्। वैसा-

दृश्यं हि सादृश्याभावः, तस्मादस्त्येवाभावान्तर्गतिरित्याह—अन्योन्येत्यादि।
451/k अन्योन्याभावतायां सत्यां यद्य भावरूपं प्रमेयं व्यवस्थाप्यते तदा, समं—
तुल्यमेतदीदृशं प्रमेयं, सादृश्यबुद्धिषु—उपमानत्वेनेष्टासु॥ १५५९॥ १५६०॥
§ 5215

कथमित्याह—सादृश्यस्येत्यादि। § 5216

सादृश्यस्य विवेसो हि यथा तत्र प्रमीयते।
सर्वावयवसामान्यविवेको गम्यते तथा॥
१५६१॥§ 5218

यथा तत्र वैधर्म्यज्ञाने सादृश्यविवेकः प्रतीयते तथा साधर्म्यज्ञानेऽपि सर्वावयवसामान्यवियोगो गम्यत इत्यभावान्तर्भावः स्याद्वैसादृश्यज्ञानवत्॥ १५६१॥ § 5219

अत्रैवोपपत्तिमाह—भूय इत्यादि। § 5220

भूयोऽवयवसामान्ययोगो येनाधिगम्यते।
सर्वावयवसामान्ययोगे तत्त्वं प्रसज्यते॥
१५६२॥§ 5222

येनेति कारणोपदेशः। येन—यस्मात्, साधर्म्यज्ञाने भूयोऽवयवासामान्ययोगोऽवगम्यते। नतु सर्वावयवसामान्ययोगस्तस्मादत्राप्यन्योन्याभावः। अन्यथा यदि सर्वावयवसामान्ययोगः स्यात्, तदा तत्त्वं—गोत्वं गवयस्य प्रसज्येत॥ १५६२॥ § 5223

श्रुतातिदेशवाक्यस्य समानार्थोपलम्भने।
संज्ञासम्बन्धविज्ञानमुपमा कैश्चिदिष्यते॥
१५६३॥§ 5225

कैश्चिदिति। नैयायिकैः। त एवमुपमानस्य लक्षणमाहुः— प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानमिति। प्रसिद्धं साधर्म्यं प्रसिद्धेन वा साधर्म्यं यस्य स प्रसिद्धसाधर्म्यो गवयः, तस्मात्—तमाश्रित्य, साध्यस्य—संज्ञासंज्ञिसम्बन्धस्य, साधनं— सिद्धिः, उपमानम्। तथाह्यागमाहितसंस्कारस्मृत्यपेक्षात्साधर्म्यज्ञानात्समाख्यासम्बन्धप्रतिपत्तिरुपमानमित्ययमेवार्थोऽन्यैरन्यथा निर्दिष्टः। गौरिव गवय इत्यतिदेशवाक्यमागमः, तेनाहितो यः संस्काराख्यो गुणः, ततो याऽतिदेशवाक्यार्थस्मृतिरुपजायतेऽरण्ये गवयदर्शनात्, तामपेक्षते यत्साधर्म्यज्ञानं तत्तथोक्तम्।

समाख्या—संज्ञा, शब्द इति यावत्। तेन सहार्थस्य यः सम्बन्धः तस्य प्रतिपत्तिरुपमानमिति तुल्य एवार्थः॥ १५६३॥ § 5226

तत्रापीत्यादिना दूषणमाह— § 5227

तत्रापि संज्ञासम्बन्धप्रतिपत्तिरनाकुला।
तस्यातिदेशवाक्यस्य तदैव श्रवणे यदि॥
१५६४॥ § 5229

452/k

तथा परिगृहीतार्थग्रहणान्न प्रमाणता।
स्मृतेरिवोपमानस्य करणार्थवियोगतः॥
१५६५॥ § 5231

तत्रातिदेशवाक्यश्रवणकाले संज्ञासंज्ञिसम्बन्धप्रतिपत्तेः पूर्वमेवोत्पन्नत्वात्पश्चादुत्पद्यमानायां गृहीतग्रहणान्न प्रमाणत्वं स्मृतिवत्। स्यादेतद्गृतीग्राहित्वं, भविष्यतिप्रामाण्यं चेति, कोऽत्र विरोध इत्याह—करणार्थवियोगत इति। करणार्थः—साधकतमत्वम्, अनिष्पादिते कर्मणि प्रवृत्त्या॥ १५६४॥ १५६५॥ § 5232

स्यादेतत्—पूर्वं संज्ञासम्बन्धप्रतिपत्तिर्न जातैव, ततो गृहीतग्रहणादित्यसिद्धोहेतुरित्याह—अथ सेति। § 5233

अथ सा नैव संजाता तथाऽपि प्रतिपद्यते।
सोऽयं यस्य मया संज्ञा संश्रुतेति कथं तदा॥
१५६६॥ § 5235

यदि पूर्वं न संजाता संज्ञासम्बन्धप्रतिपत्तिरभविष्यत्तदाऽयमसौ गवयो यस्म मया पूर्वं संज्ञा श्रुतेत्येवमाकाराप्रतिपत्तिर्नोदायिष्यत॥ १५६६॥ § 5236

अत्रैवोपपत्तिमाह—तथा हीति। § 5237

तथा ह्यश्रुततत्संज्ञो गवयस्योपलम्भने।
तन्नाम श्रुतमस्येति न ज्ञातुं कश्चन प्रभुः॥
१५६७॥ § 5239

अविद्धकर्णस्त्वाह—आगमात्सामान्येन प्रतिपद्यते विशेषप्रतिपत्तिस्तूपमानादिति।अतस्तन्मतमाशङ्कते—उपयुक्तोपमान इति। § 5240

उपयुक्तोपमानश्चेत्तुल्यत्वग्रहणे सति।
विशिष्टविषयत्वेन सम्बन्धमवगच्छति॥ १५६८॥§ 5242

उपयुक्तमुपमानमतिदेशवाक्यं यस्य स तथोक्तः॥ १५६८॥ § 5243

अस्यैवार्थं द्वितीयेन श्लोकेनाचष्टे—आगमाद्धीति। § 5244

आगमाद्धि स सम्बन्धं वेत्ति सामान्यगोचरम्।
विशिष्टविषयं तं तु विजानात्युपमाश्रयात्॥
१५६९॥§ 5246

विशिष्टो विषयो गवयः॥ १५६९॥ § 5247

नन्वित्यादिना प्रतिविधत्ते। § 5248

नन्वन्यत्र न संज्ञायाः सम्बन्धस्यावबोधने।
तस्या ह्यर्थान्तरे बोधो युज्यतेऽतिप्रसङ्गतः॥
१५७०॥§ 5250

453/k

नेत्यस्य युज्यत इत्यनेन सम्बन्धः। नह्यन्यत्र संज्ञासम्बन्धप्रतिपत्तौ सत्यां तस्याः संज्ञाया अर्थान्तरे प्रतिपत्तिर्युक्ताऽतिप्रसङ्गत्॥ १५७०॥ § 5251

तमेवातिप्रसङ्गं दर्शयन्नाह—नहीति। § 5252

नहि चित्राङ्गदे कश्चित्तन्नामग्रहणे सति।
कालान्तरेण तं शब्दं वेत्ति चारुकिरीटिनि॥
१५७१॥§ 5254

तस्मात्प्राग् यत्र तेनेदं विकल्पप्रतिबिम्बके।
ज्ञातं नाम बहिर्बुद्ध्या सामान्यमिति संज्ञिते॥
१५७२॥§ 5256

गवयस्योपलम्भेऽपि तत्रैव प्रतिपद्यते।
दृश्यकल्पाविभागज्ञो बाह्य इत्यभिमन्यते॥
१५७३॥§ 5258

अङ्गदः—कटकाख्यामाभरणम्। चित्रोऽङ्गदो यस्यासौ तथोक्तः। नहि चित्राङ्गदो यः स देवदत्त इत्युक्तः कश्चित्कालान्तरे तं चित्राङ्गदशब्दं चारुकिरीटिनि यज्ञदत्ते प्रतिपद्यते। किरिटं—मुकुटं, चारु च तत् किरिटं यस्यास्ति स तथोक्तः। तस्मान्माभूदतिप्रसङ्ग इति। यत्रैवार्थे विकल्पसमारोपिते बाह्यार्थव्यवसायिन्या बुद्ध्या गृहीतंनाम—संज्ञा, गवयोपलम्भेऽपि तत्रैव तन्नाम प्रतिपद्यते, नतु बाह्ये स्वलक्षणे गवयाख्ये। तदेव च विकल्पप्रतिबिम्बकं सामान्यमिति व्यवह्रि(?)यते। तत्परिकल्पितम्। तस्य निराकृतत्वात्। कथं तर्हि बाह्यस्वलक्षणाभिमान इत्याह—दृश्येत्यादि॥ १५७१॥ ॥ १५७२॥ १५७३॥ § 5259

अथ स्वलक्षणे शब्दादिप्रवृत्तौ को विरोध इत्याह—एवमित्यादि। § 5260

एवं च प्रतिपत्तव्यं यत्स्वलक्षणगोचराः।
विकल्पा ध्वनयश्चापि विस्तरेण निराकृताः॥
१५७४॥§ 5262

यतः शब्दार्थपरीक्षायां विस्तरेण स्वलक्षणगोचरत्वं शब्दानां विकल्पानां च निराकृतम्, तस्माद्विकल्पसमारोपित एव शब्दार्थः॥ १५७४॥ § 5263

तेषां तद्गोचरोत्वेऽपि भवत्येवानुमैव वा।
त्रिरूपलिङ्गजन्यत्वमस्य चैवं प्रतीयते॥
१५७५॥§ 5265

यो गवा सदृशोऽसौ हि गवयश्रुतिगोचरः।
सङ्केतग्रहणावस्थो बुद्धिस्थो गवयो यथा॥
१५७६॥§ 5267

भवतु वा तेषां विकल्पशब्दानां स्वलक्षणगोचरत्वम्। तथाऽप्यनुमान एवान्त र्भावान्नोपमानं प्रमाणान्तरम्। कथं त्रिरूपलिङ्गजत्वम- 454/k
न्तरेणास्यानुमानेऽन्तर्भाव इत्याशङ्क्य त्रिरूपलिङ्गजन्यत्वं प्रतिपादयन्नाह—त्रिरूपेत्यादि। गोसदृशत्वं हेतुः, गवयश्रुतिगोचरत्वं साध्यधर्मः, सङ्केतग्रह-

णकाले विकल्पबुद्धिप्रतिभासी बुद्धिस्थो गवयो दृष्टान्तः। दृश्यमानो गवयो धर्मी॥ १५७५॥ १५७६॥ § 5268

स्यादेतत्—गौरिव गवय इत्येतस्मिन्सङ्केतकाले गवयो बुद्धौ न समारूढ एव। ततश्चासिद्धो दृष्टान्त इत्याह—बुद्धिस्थोऽपीत्यादि। § 5269

बुद्धिस्थोऽपि न चेत्तस्यामवस्थायां भवेदसौ।
क्रियते समयः कस्मिन्नयं च सदृशो गवा॥
१५७७॥§ 5271

न केवलं न चक्षुर्गोचर इत्यपि शब्दार्थः। यदि बुद्धौ गोसारूप्यानुगतं न किंचित्प्रतिभासेत तदाऽयं सदृशो गवेति किमाश्रित्य सङ्केतः क्रियेत, क्रियते चसमयः, तस्माद्बुद्धिस्थो गोसारूप्यानुगत आकारः, कश्चित्समयकाले प्रतिभासते इत्यभ्युपगन्तव्यम्॥ १५७७॥ § 5272

एवं तावच्छब्दार्थयोः सम्बन्धं प्रमेयमुपमानस्याभ्युपगम्य गृहीतग्रहणादनुमानान्तर्भावाच्चाप्रामाण्यमस्य प्रतिपादितम्। साम्प्रतं सम्बन्धिव्यतिरिक्तः सम्बन्धोऽपरो नास्ति, तौ च सम्बन्धिनौ प्रमाणान्तरेणागृहीतौ, तथाहि—समयकाले श्रोत्रज्ञानेन शब्दो गृहीतः, पश्चाच्च गवयश्चक्षुषा पुरोवर्त्ती गृहीतस्तत्किमपरं प्रमेयमस्ति, येनोपमानस्य प्रामाण्यं स्यादिति। एतत्प्रतिपादयन्नाह—न सम्बन्धीत्यादि। § 5273

न सम्बन्ध्यतिरिक्तश्च सम्बन्धोऽस्तीति साधितम्।
प्रागेव समये शब्दो गृहीतः श्रोत्रचेतसा॥
१५७८॥§ 5275

चक्षुषा दृश्यते चासावग्रतोऽवस्थितः पशुः।
पृथग्विज्ञातयोरेषा युक्ता न घटना प्रमा॥
१५७९॥§ 5277

गृहीतप्रतिसन्धानात्सुगन्धिमधुरत्ववत्।
तन्नामयोगसंवित्तिः स्मार्त्ततां नातिवर्त्तते॥
१५८०॥§ 5279

अनेन गृहीतग्रहणादप्रामाण्यमाह—साधितमिति। गुणपदार्थपरीक्षायाम्। स्यादेतत्—यद्यपि पृथक्सम्बन्धिनौ गृहीतौ श्रोत्रादिचेतसा, तयोश्च घटनोपमया क्रियते, तस्माद्घटनया प्रामाण्यमुपमानस्य स्यादित्याह—पृथगित्यादि। सुगन्धिमधुरादिवदिति। सप्तम्यर्थे वतिः। यथा यदेतद्वस्त्वनुभूयमानं तन्मधुरं तत्सुगन्धी त्यादौ विषये गृहीतसंयोजनात्मकं ज्ञानं न प्रमाणं तथेदमुपि 455/k न भवितुमर्हतीत्यर्थः। तत्—तस्मात्, नामयोगसंवित्तिः—संज्ञासम्बन्धज्ञानं, स्मार्त्ततां नातिवर्त्तते—यथोक्तनीत्या॥ १५७८॥ १५७९॥ १५८०॥ § 5280

स्यादेतत्—नहि संज्ञासम्बन्धः साधर्म्यद्वारेण क्वचित्क्रियते, किं तर्हि ?, साक्षात्संज्ञिनमुपदर्श्यायं गौरित्येवं क्रियमाणो दृष्टः, नतु परोक्षविषय इत्याह—अनन्तेत्यादि। § 5281

अनन्तोपायजन्याश्च समाख्यायोगसंविदः।
साधर्म्यमनपेक्ष्यापि जायन्ते नरपादिषु॥
१५८१॥§ 5283

समाख्यायोगसंविद इति। संज्ञासम्बन्धज्ञानानि। नरपादिष्विति। राजादिषु॥ १५८१॥ § 5284

तदेवानन्तोपायजन्यत्वं प्रदर्शयितुमुदाहरणमाह—सितातपत्रेत्यादि। § 5285

सितातपत्रापिहितब्रघ्नपादो नराधिपः।
तेषां मध्य इति प्रोक्त उपदेशविशेषतः॥
१५८२॥§ 5287

कालान्तरेण तद्दृष्टौ तन्नामास्येति या मतिः।
सा तदाऽन्याप्रमा प्राप्ता साधर्म्याद्यनपेक्षणात्॥
१५८३॥§ 5289

यथाहि कश्चित्कंचिद्ब्रू(?)ते—गच्छ भ्रातरमुना कार्येण, पश्य नराधिपतिं बहुभिर्गजतुरगाधिरूढैः पुरुषैः सह गच्छन्तमिति। स प्रत्याह—कस्तेषां मध्ये नराधिपतिरिति। स कथयति—सितातपत्रेणापिहिता ब्रघ्नपादाः—आदित्यरश्मयो यस्य स, तेषां मध्ये नराधिपतिरिति। तस्य तमुपदेशं गृहीत्वा गतस्य दृष्ट्वा तं यथोक्तविशेषणविशिष्टं राजानमयमसौ नराधिपतिनामेति या बुद्धिरुत्पद्यते साऽपि भवन्मतेन प्रमाणान्तरमापतितम्। कस्मात् ?। सादृश्याद्यनपेक्षणात्। अनेन प्रमाणषटा्कनन्तर्भावं दर्शयति॥ १५८२॥ १५८३॥ § 5290

अविद्धकर्णस्तु—द्वे एव प्रमाणे, स्वलक्षणसामान्यलक्षणाभ्यां चान्यत्प्रमेयं नास्तीति, एतद्विघटनार्थं प्रमाणयति—प्रत्यक्षमनुमानव्यतिरिक्तप्रमाणान्तरसद्वितीयं प्रमाणत्वात्, अनुमानवत्। अनुमानं वा प्रत्यक्षव्यतिरिक्तप्रमाणान्तरसद्वितीयं प्रमाणत्वात्, प्रत्यक्षवत्। तथा स्वलक्षणं सामान्यलक्षणव्यतिरिक्तप्रमेयार्थान्तरसद्वितीयं प्रमेयत्वात्, सामान्यलक्षणवत्। सामान्यलक्षणं वा स्वलक्षणव्यतिरिक्तप्रमेयान्तरसद्वितीयं प्रमेयत्वात्, स्वलक्षणवदिति। एतदेवाह—अन्य इति। § 5291

456/k

अन्यः प्रमान्तरास्तित्वं साधयत्यनुमाबलात्।
प्रत्यक्षमनुमाभिन्नप्रमाणान्तरसङ्गतम्॥
१५८४॥§ 5293

अनुमावत्प्रमाणत्वादनुमाऽप्येवमेव च।
(नैव)मप्रतिबन्धोऽयं हेतुर्बाधाप्रकाशनात्॥
१५८५॥§ 5295

चतुष्टं च प्रमाणानां व्याहन्येतैवमेव ते।
यत्तत्र परिहारस्ते स एवात्र भविष्यति॥ १५८६॥
इति उपमानविचारः।§ 5298

सङ्गतं—सम्बद्धं, सद्वितीयमिति यावत्। उपलक्षणमेतत्प्रमेयान्तरसाधनस्यापिबोद्धव्यम्। साध्यविपक्षे हेतोर्बाधकस्याप्रकाशनान्न साध्यसाधनयोः प्रतिबन्ध उपदर्शित इत्यनैकान्तिकाः सर्व एव हेतवः, संदिग्धविपक्षव्यावृत्तिकत्वात्। किंच— प्रत्यक्षानुमानोपमानशाब्दानि चत्वारि प्रमाणानीति सङ्ख्यानियमो व्याहन्येन, अनेनैवे प्रकारेण प्रमाणान्तरसद्भावात्। तथाहि शक्यमिदमभिधातुम्—प्रत्यक्षमनुमानोपमानशाब्दव्यतिरिक्तप्रमाणान्तरसद्वितीयं प्रमाणत्वादनुमानवदिति। यच्चापिप्रमेयत्रैविध्यमिष्टं—सामान्यं विशेषः सामान्यविशेषवानिति, तदपि व्याहन्येत, तेनैव प्रकारेण प्रमेयान्तरसाधनसम्भवात्। योऽत्र भवतः परिहारः सोऽस्माकमपि भविष्यतीत्यलं बहुना॥ १५८४॥ १५८५॥ १५८६॥ § 5299

इत्युपमानविचारः।

०.२०.३ अर्थापत्तिपरीक्षा।

अर्थापत्तिमधिकृत्याह—प्रमाणषट्केत्यादि। § 5301

प्रमाणषट्कविज्ञातो यत्रार्थो नान्यथा भवन्।
अदृष्टं कल्पयत्यन्यं साऽर्थापत्तिरुदाहृता॥
१५८७॥§ 5303

यत्र देशकालादौ प्रत्यक्षानुमानोपमानशाब्दार्थापत्त्यभावलक्षणैः षड्भिः प्रमाणैः परिच्छिन्नोऽर्थोऽन्यथा नोपपद्यते यद्येवंभूतोऽर्थो न भवेदित्येवं या परोक्षार्थविषया कल्पना साऽर्थापत्तिः प्रमाणम्। उदाहृतेति। शबरस्वामिना। यथोक्तम्— दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यत इत्यदृष्टकल्पना। तद्यथा— जीवति देवदत्ते गृहादर्शनेन बहिर्भावकल्पनेति॥ दृष्टः—शाब्दव्यतिरिक्तप्रमाणपञ्चकाधिगतः, श्रुतः—शाब्दप्रमाणावगतः॥ १५८७॥ § 5304

तत्र षड्प्रमाणपूर्विकाया अर्थापत्तेर्यथाक्रममुदाहरणान्याह—तत्रेत्यादि। § 5305

457/k

तत्र प्रत्यक्षतो ज्ञाताद्दाहाद्दहनशक्तिता।
वह्नेरनुमितात्सूर्ये यानात्तच्छक्तियोगिता॥
१५८८॥§ 5307

शक्तयः सर्वभावानां कार्यार्थापत्तिसाधनाः।
अपूर्वास्ताश्च गम्यन्ते सम्बन्धग्रहणादृते॥
१५८९॥§ 5309

तत्र प्रत्यक्षपूर्विकाऽर्थापत्तिर्यथा—प्रत्यक्षेण दाहमनुभूय वह्नेर्दाहशक्तिकल्पना। अनुमानपूर्विका यथा—देशान्तरप्राप्त्याऽनुमिताद्गमनात्सूर्यस्य गमनशक्तियोगकल्पना। शक्तयश्च सर्वदा सर्वपदार्थानां कार्यार्थापत्तिसाधना इति। इयमप्यर्थापत्तिः कदाचित्प्रत्यक्षपूर्विकैव, यदा प्रत्यक्षेण कार्यमुपलभ्य कारणस्य शक्तिरवगम्यते। यदा त्वनुमानादिना कार्यमवगम्य कारणशक्तिरवगम्यते तदाऽनुमानादिपूर्विका भवति कार्यार्थापत्तिः। कार्यस्यान्यथाऽनुपपत्तिः साधनं प्रमाणं यासां तास्तथोक्ताः। नच कारणशक्तिः पूर्वमेव गृहीतेति शक्यं वक्तुम्, यस्मादपूर्वास्ताश्च शक्तयो गम्यन्ते सर्वदैव। तेनाधिगतार्थाधिगन्तृत्वं नास्तीति भवत्येव प्रामाण्यम्। तत्रैतत्स्यात्कार्येणलिङ्गेनानुमेयाः, शक्तयो

नार्थापत्तिप्रमाणगम्या इत्याह—सम्बन्धग्रहणादृत इति।यस्मात्सम्बन्धग्रहणमन्तरेण गम्यन्ते तस्मान्नानुमेयाः॥ १५८८॥ १५८९॥ § 5310

तमेव सम्बन्धग्रहणाभावं प्रतिपादयन्नाह—नचेति। § 5311

न चासां पूर्वसम्बन्धो न वाऽन्यो गृह्यतेऽधुना।
कार्यैः सह यतः स्यातां पक्षधर्मान्वयाविह॥
१५९०॥§ 5313

न चासां शक्तीनामनुमानकालात्पूर्वं कार्यैः सह सम्बन्धो गृहीतो यथा वह्निधूमयोर्महानसादौ, तासामतीन्द्रियत्वात्। अनेनान्वयाभाव उक्तः। नाप्यधुनाऽनुमानकाले गृह्यते सम्बन्धोऽतीन्द्रियत्वादेव। अनेन पक्षधर्माभाव उक्तः। नहि कारणाधारशक्तीनां कार्यं धर्मोऽयुक्तेः॥ १५९०॥ § 5314

श्रोत्रादिशक्तिपक्षे वा यावान् हेतुः प्रयुज्यते।
सर्वोऽसावाश्रयासिद्धो धर्म्यसिद्धेः प्रसज्यते॥
१५९१॥§ 5316

किंच यदा श्रोत्रादिगताः शक्तयः पक्षीक्रियन्ते तदा श्रोत्रादिशक्तिपक्षे यावान्हेतुः प्रयुज्यते शक्तिसाधनाय सर्वोऽसौ हेतुराश्रयासिद्धः स्यात्, आश्रयभूतानां शक्तीनामसिद्धत्वात्। तस्मात्कार्यार्थापत्तिसाधनाः सर्वाः शक्तयो नानुमेयाः॥ १५९१॥ § 5317

पीनो दिवा न भुङ्क्ते चेत्येवमादिवचःश्रुतौ।
रात्रिभोजनविज्ञानं श्रुतार्थापत्तिरुच्यते॥
१५९२॥§ 5319

458/k

तत्र शाब्दप्रमाणपूर्विकार्थापत्तिर्यथा—पीनो देवदत्तोऽकृतरसायतो दिवा न भुङ्क्तेइत्येवमादिवचनश्रवणादर्वाग्रात्रौ भुङ्क्ते इत्येवमाद्यर्थकल्पना॥ १५९२॥ § 5320

स्यान्मतम्—पीनो देवदत्तो दिवा न भुङ्क्ते इत्यस्यैव वाक्यस्यायमर्थः प्रतीयते रात्रौ भुङ्क्ते इत्यत आह—न रात्र्यादिपदार्थश्चेति। § 5321

न रात्र्यादिपदार्थश्च दिवावाक्ये च गम्यते।

न दिवादिपदार्थानां संसर्गो रात्रिभोजने॥
१५९३ ॥§ 5323

न भेदो येन तद्वाक्यं तस्य स्यात्प्रतिपादकम्।
अन्यार्थव्यापृतत्वाच्च न द्वितीयार्थकल्पना॥
१५९४ ॥§ 5325

तस्माद्वाक्यान्तरेणायं बुद्धिस्थेन प्रतीयते।
तेनानागामिकत्वेऽपि यत्तद्वाक्यं प्रतीयते॥
१५९५ ॥§ 5327

प्रमाणं तस्य वक्तव्यं प्रत्यक्षादिषु यद्भवेत्।
नत्वनुच्चरिते वाक्ये प्रत्यक्षं तावदिष्यते॥
१५९६ ॥§ 5329

नानुमानं नहीदं हि दृष्टं तेन सह क्वचित्।
यदि त्वनुपलब्धेपि सम्बन्धे लिङ्गतेष्यते॥
१५९७ ॥§ 5331

तदुच्चारणमात्रेण सर्ववाक्यगतिर्भवेत्।
सम्बन्धरहितत्वेन नान्यतस्तद्विशिष्यते॥
१५९८ ॥§ 5333

द्विविधो हि वाक्यार्थो भवेत्, यदुत संसर्गो भेदश्च। तत्र संसर्गः परस्परं पदार्थानामभेदः क्षीरोदकवत्। भेदश्च व्यवच्छेद्यव्यवच्छेदकभावेनावस्थानम्। यद्वानियतसाध्यसाधनसम्बन्धः संसर्गः। भेदो विजातीयव्यावृत्तिः। सोऽयं द्विप्रकारोऽपि वाक्यार्थो न सम्भवति। तथाहि—दिवादीनां पदानां येऽर्था दिवादयस्तेषां न संसर्गरूपो रात्रिभोजनार्थः, अत्यन्तविलक्षण-

८ दृष्टं तेन] Correction : ; दृष्टान्तेन (sic !)दृष्टं तेन

त्वात्। नापि भेदरूपो दिवादिपदानामरात्र्यादिव्यवच्छेदेनाप्रवृत्तेः। अथ मतम्—रात्रौ भुङ्क्ते इत्ययमपरो द्वितीयोऽर्थोदिवादिवाक्यस्यैवेत्याह—अन्यार्थेति। दिवादिभोजनप्रतिषेध एवोपक्षीणत्वान्नशक्तो(?)त्यपरं तदेव रात्र्यादिभोजनप्रतिपादनं कर्तुमिति न द्वितीयार्थकल्पना। तस्माद्वाक्यान्तरस्यायमर्थो रात्रौ भुङ्क्ते इति। बुद्धिस्थेनेति। अशाब्दत्वं दर्शयति—अनागमिकत्वेपीति। अशाब्दत्वेऽपि। यथोक्तनीत्या शाब्दत्वाभावस्य प्रतिपादितत्वात्। यत्तद्रात्रौ भु-
459/k ङ्क्ते इत्येतद्वाक्यं प्रतीयते तस्य वाक्यस्य ग्राहकं प्रमाणं वक्तव्यम्। यत्प्रमाणं प्रत्यक्षादीनामन्यतमद्भवेत्। नच भवति। तस्मात्प्रमाणान्तरमेवेदमिति भावः। तदेव प्रत्यक्षादीनामन्यतमत्वमस्य निराकुर्वन्नाह—नत्वित्यादि। तत्रानुच्चारितस्य रात्रिभोजनवाक्यस्य न युक्तं प्रत्यक्षत्वमश्रूयमाणत्वात्। नाप्यनुमानत्वं सम्बन्धाभावात्। तथाहि—नेदं रात्रिभोजनवाक्यं तेन दिवावाक्येन सह क्वचिद्दृष्टं, येन सम्बन्धो भवेत्। नाप्यन्यल्लिङ्गमस्ति। अथापि स्यादनुपलब्धेऽपि सम्बन्धे लिङ्गत्वमस्य भविष्यतीत्याह—यदीति। यदि ह्यसिद्धसम्बन्धस्य लिङ्गत्वं भवेत्तदादिवावाक्योच्चारणादशेषवाक्यप्रतिपत्तिर्भवेत्, न रात्रिभोजनवाक्यस्यैव। कस्मात ?। यतः सम्बन्धरहितत्वे सत्यन्यतो वाक्याद्रात्रिभोजनवाक्यं न विशिष्यते। सम्बन्धाभावात्सर्वमेव वाक्यमविशिष्टमिति यावत्॥ १५९३॥ १५९४॥ १५९५॥ ॥ १५९६॥ १५९७॥ १५९८॥ § 5334

उपमानपूर्विकामाह—गवयेत्यादि। § 5335

गवयोपमिता या गौस्तज्ज्ञानग्राह्यशक्तता।
उपमाबलसम्भूतसामर्थ्येन प्रतीयते॥ १५९९॥ § 5337

गवयेनोपमितस्य गोपिण्डस्य येयमुपमानज्ञानेन ग्राह्यशक्तता सा उपमानबलेन यत्सम्भूतं सामर्थ्यमर्थापत्तिस्तेन मीयते॥ १५९९॥ § 5338

अर्थापत्तिपूर्विकामाह—अभिधेत्यादि। § 5339

अभिधा नान्यथा सिद्ध्येदिति वाचकशक्तताम्।
अर्थापत्त्याऽवगम्यैव तदनन्यगतेः पुनः॥
१६००॥ § 5341

अर्थापत्त्यन्तरेणैव शब्दनित्यत्वनिश्चयः।
अनित्यो हि न सङ्केतव्यवहारानुवृत्तिमान्॥
१६०१॥ § 5343

अभिधानमभिधा। अर्थप्रतिपादनमिति यावत्। सा शब्दस्य अन्यथा—वाचकशक्त्या विना, न सिद्ध्येदित्येवं बोधकशक्ताम्, अवगम्य—बुद्ध्वा, तदनन्यगतेः—तस्याबोधकशक्तेरन्या गतिर्नास्ति शब्दनित्यत्वमन्तरेणेति, पुनरर्थापत्त्यन्तरेणैव शब्दस्य नित्यत्वनिश्चयः। कथं पुनर्नित्यत्वमन्तरेणाभिधा न सिद्ध्यतीत्याह—अनित्यो हीत्यादि। तथाहि—सङ्केतकाले दृष्टस्य यदि व्यवहारकालेऽनुवृत्तिर्न भवेत्। तदा सङ्केतकरणमनर्थकमेव स्यात्। व्यवहारार्थत्वात्तस्य। यश्चानुवर्त्तते व्यवहारकाले शब्दस्तेन सह पूर्वं सम्बन्धस्यागृहीतत्वात्। अथवा—तदनन्यगतेरिति। तस्य —व्यवहारकाल- [460/k] भाविनः शब्दस्य, सङ्केतकालदृष्टाच्छाब्दादनन्यगतेरव्यतिरेकनिश्चयात्। कथमव्यतिरेकनिश्चय इत्याह—अनित्यो हीत्यादि॥ १६००॥ १६०१॥ § 5344

अभावपूर्विकामर्थापत्तिमाह—प्रमाणेत्यादि। § 5345

प्रमाणाभावनिर्णीतचैत्राभावविशेषितात्।
गेहाच्चैत्रबहिर्भावसिद्धिर्या त्विह वर्णिता॥
१६०२॥ § 5347

तामभावोत्थितामन्यामर्थापत्तिमुदाहरेत्।
पक्षधर्माद्यनङ्गत्वाद्भिन्नैषाऽप्यनुमानतः॥
१६०३॥ § 5349

बहिर्देशविशिष्टेऽर्थे देशे वा तद्विशेषिते।
प्रमेये यो ग्रहाभावः पक्षधर्मस्त्वसौ कथम्॥
१६०४॥ § 5351

जीवतश्च गृहाभावः पक्षधर्मोऽत्र कल्प्यते।
तत्संवित्तिर्बहिर्भावं न चाबुद्धोपजायते॥
१६०५॥ § 5353

गेहाभावस्तु यः शुद्धो विद्यमानत्ववर्जितः।

स मृतेष्वपि दृष्टत्वाद्बहिर्वृत्तेर्न साधकः॥
१६०६॥§ 5355

प्रत्यक्षादेः प्रमाणस्याभावेन निवृत्त्या निर्णीतो निश्चितो यश्चैत्राभावस्तेन विशेषिताद्देहात्, इह गेहे चैत्रो नास्तीत्यतः, चैत्रस्य जीवने सति, या बहिर्भावसिद्धिः— बहिश्चैत्रो विद्यत इत्येवंनिश्चयरूपा, इह—भाष्ये, वर्णिता—शबरस्वामिना, तदन्यासामर्थापत्तीनामुपलक्षणार्थमुदाहृतेति यावत्। यथा—जीवति देवदत्ते, गृहेऽदर्शनेन बहिर्भावस्यादृष्टस्य कल्पनेति। इदमभावपूर्विकाया अर्थापत्तेरुदाहरणम्।प्रायेणास्यास्तार्किकैरनुमानत्वमिष्टमिति तन्निराकरणमाह—पक्षेत्यादि। यतः पक्षधर्मादयोऽस्या नाङ्गं न कारणम्, अतो भिन्नैवैषाऽनुमानात्, प्रत्यक्षवत्। तथाहि— बहिर्देशेन विशिष्टोऽर्थश्चैत्रादिः, चैत्रादिना वा विशिष्टो बहिर्देशः, तस्मिन् द्विविधेऽपि प्रमेये सति, गृहे चैत्रादेरर्थस्याभावो यः कथं व्यधिकरणः सन्पक्षधर्मो भवेत्। नैव भवेदित्यभिप्रायः। अपि च गृहाभावः पक्षधर्मत्वेन कल्प्यमानः कदाचिज्जीवतोदेवदत्तस्य यो गृहाभावः स कल्प्यते, सामान्येन वेति पक्षद्वयम्। तत्र प्रथमे पक्षे दोषमाह—जीवत इत्यादि। तत्संवित्तिरिति। तस्य—जीवतो देवदत्तस्य संवित्तिः— निश्चयः, सा देवदत्तस्य बहिर्भावमबुद्ध्वा न जायते। अनेन हेतोरसिद्धतां सिद्धौ वा सिद्धसाध्यतामाह। द्वितीयेऽपि पक्षे
461/k हेतोरनैकान्तिकत्वं, मृतेष्वपि देवदत्तादिषु तेषां गृहाभावस्य दृष्टत्वादिति दर्शयन्नाह—गेहाभावस्त्विति। विद्यमानत्वेति। जीवत्ता॥ १६०२॥ १६०३॥ १६०४॥ १६०५॥ १६०६॥ § 5356

एवं षट्प्रकाराऽर्थापत्तिः। तत्र चतसृभिः शक्तिः प्रमेया, एकया शब्दनित्यता, अपरया बहिर्व्यवस्थितं द्रव्यम्। तत्रेत्यादिना दूषणमाह—अत्र लक्षणं तावदयुक्तम्। तथाहि—तेनादृष्टेन विना दृष्टश्रुतादिकोऽर्थो नोपपद्यत इत्यदृष्टकल्पना। तत्रेदं निरूप्यते। किं तेनादृष्टेन सह क्वचिद्दृष्टश्रुतस्यार्थस्य सम्बन्धो दृष्टो अथ न ?। यदि तु दृष्टः, अनुमानत्वप्रसङ्गः, सम्बन्धदर्शनोपायत्वात्। अथ न संसिद्धः, एवं तर्हि वह्नेर्दाहकत्ववददाहकत्वमपि कल्पनीयम्, अदृष्टसम्बन्धत्वेनाविशेषात्। अथ मतमदाहकत्वेन सह वह्नेरदृष्टत्वान्नादाहकत्वं कल्प्यत इति। एवं तर्हि दाहकत्वमपि न कल्पनीयम्, तेनापि सह क्वचिददृष्टत्वात्। तस्मात्सम्बन्धे सिद्धे सति सम्बन्धिनमविनाभाविनं दृष्ट्वा द्वितीयस्य सम्बन्धिनः कल्पना युक्ता। एवं च कल्प्यमाने सम्बन्धदर्शनोपायत्वादनुमान एवान्तर्भावः स्यात्। उदाहरणान्यप्ययुक्तानि। तत्र तावत्प्रत्यक्षादिप्रसिद्धस्यार्थस्य चतसृभिरर्थापत्तिभिः शक्तिः प्रतीयत इत्यत्र साधारणं दूषणमाह—तत्र शक्तातिरेकेणेत्यादि। § 5357

तत्र शक्तातिरेकेण न शक्तिर्नाम काचन।

याऽर्थापत्त्याऽवगम्येत शक्तश्चाध्यक्ष एव हि॥
१६०७॥§ 5359

यतः शक्तिरन्या न वस्तुनः सकाशात्, स च शक्तः पदार्थः प्रत्यक्ष एवेति गृहीतग्रहणादेव न प्रमाणम्। अध्यक्षग्रहणमुपलक्षणम्॥ १६०७॥
§ 5360

दाहादीनामित्यादिना प्रत्यक्षपूर्विकाया अर्थापत्तेरुदाहरणस्य विशेषेण दूषणमाह— § 5361

दाहादीनां तु यो हेतुः पावकादिः समीक्ष्यते।
असंशयाविपर्यासं शक्तिः काऽन्या भवेत्ततः॥
१६०८॥§ 5363

व्यतिरिक्ते तु कार्येषु तस्या एवोपयोगतः।
भावोऽकारक एव स्यादुपयोगे न भेदिनी॥
१६०९॥§ 5365

अर्थक्रियासमर्थं हि स्वरूपं शक्तिलक्षणम्।
एवमात्मा च भावोऽयं प्रत्यक्षाद्व्यवसीयते॥
१६१०॥§ 5367

असंशयाविपर्यासमिति क्रियाविशेषणमेतत्। अथ व्यतिरिक्ता शक्तिरभ्युपगम्यते—तदा कार्येषु शक्तेरेवोपयोगाद्भावस्याकारकत्वं प्राप्नोति ततश्चावस्तुत्व प्रसङ्गः। अर्थक्रियाकारित्वलक्षणत्वाद्वस्तुत्वस्य। अथ माभूदवस्तुत्वप्रसङ्ग 462/k
इत्युपयोगोऽङ्गीक्रियते तदा तस्मिन्नुपयोगेऽङ्गीक्रियमाणे न तर्हि सा शक्तिर्भेदिनी—भिन्ना। कस्मात् ?। येनार्थक्रियासमर्थं यद्रूपं—स्वभावः, सैव शक्तिर्नान्यदपरं शक्तिलक्षणम्। यस्तु भावस्य शक्तिरिति व्यतिरेकिवद्व्यपदेशः स भेदान्तरप्रतिक्षेपेण तन्मात्रजिज्ञासायां भाव एव तथोच्यते॥ १६०८॥ १६०९॥ १६१०॥ § 5368

स्यादेतन्नार्थक्रियाकारित्वं शक्तेर्लक्षणं, किं तर्हि ?। अन्यदेवेत्याह— अन्येत्यादि § 5369

अन्यलक्षणसंसिद्धौ प्रमाणं नच किञ्चन।

ज्ञातेनापि न तेनार्थो रूपात्तत्कार्यसिद्धितः॥
१६११॥§ 5371

अन्यस्य शक्तिलक्षणस्य संसिद्धौ न किंचित्प्रमाणमस्ति यत्प्रमाणमभावात्सर्वसामर्थ्यविरहलक्षणादेनां शक्तिं विशेषयेत्। नच तेन तथाभूतेनार्थक्रियार्थिनां ज्ञातेनकिञ्चित्प्रयोजनमस्ति। रूपात्—उपयोगिनो भावस्य स्वभावादेव, अर्थक्रियासिद्धेः।यथोक्तम्—अर्थक्रियासमर्थस्य विचारैः किं तदर्थनाम्। शण्ढस्य रूपवैरूप्ये कामिन्याः किं परीक्षयेति॥ १६११॥ § 5372

कार्यार्थापत्तिगम्यं चेदपरं शक्तिलक्षणम्।
न कार्यस्यान्यथाभावाद्भवत्येतद्धि भावतः॥
१६१२॥§ 5374

स्यादेतत्—अस्त्येवान्यच्छक्तेर्लक्षणम्—यदुत नित्यं कार्यान्यथानुपपत्त्या यद्गम्यं रूपं सा शक्तिरिति, कार्यानुमेयत्वं शक्तेर्लक्षणम्। नैतद्युक्तं शक्तिलक्षणम्। कस्मात् ?। कार्यस्यान्यथाभावात्। अन्यथापि—व्यतिरिक्तशक्तिमन्तरेण, कार्यस्योपपत्तेः। कथमित्याह—भवत्येतद्धि भावत इति। एतत्कार्यं यस्मात् भावात्—पदार्थात्,भवति—उत्पद्यते, तस्मादन्यथाऽपि कार्यस्यास्तित्वसम्भव इति किं व्यतिरिक्तया शक्त्या कल्पितया॥ १६१२॥ § 5375

जलादिव्यतिरिक्तो हि प्रत्यक्षः पावकः क्षमः।
दाहादौ तत्किमन्येन सामर्थ्येन प्रयोजनम्॥
१६१३॥§ 5377

एतदेवार्थं स्पष्टीकुर्वन्नाह—जलादीत्यादि॥ १६१३॥ § 5378

नैकान्तेन विभिन्ना चेच्छक्तिः साऽप्युभयात्मिका।
न विरोधाद्भवेत्सा च प्रत्यक्षाऽनन्यताऽपि यत्॥
१६१४॥§ 5380

स्यादेतत्—भवत्येष दोषो यद्यस्माभिरेकान्तेन पदार्थाच्छक्तिर्भिन्नाऽभ्युपगम्यते। [463/k] किं तर्हि ?। भिन्नाभिन्नत्वेनोभयात्मिकेत्येतच्च न युक्तम्। कस्मादित्याह—विरोधात्। यदि व्यतिरिक्ता, कथमव्यतिरिक्ता तदैव, अथाव्यतिरिक्ता, कथं व्यतिरिक्तेति,व्याहतमेतद्यदन्योन्यपरिहारस्थितलक्षणयोर्धर्मयोरेकस्मिन्धर्मिणि युगपदुपलयनम्। इदमेव खल्वन्यत्वं यत्तन्न भवत्यात्मान्तरवदित्यावेदितमेतत्। भवतु नामोभयात्मत्वं शक्तेः, तथाऽपि सा शक्तिरुभ-

यात्मिका प्रत्यक्षैव, यस्मादनन्यताऽपि शक्तेः पदार्थाद्दृष्टा, नैकान्तेनान्यत्वमेव, येनाप्रत्यक्षता भवेत्। ततश्च नित्यं कार्यगम्यत्वं शक्तेरित्येतद्व्याहन्येत॥ १६१४॥ § 5381

प्रत्यक्षत्वे स्थिते चास्यामनुमेयत्ववारणम्।
क्षतये नैव येनास्मिन्विषये नानुमेष्यते॥
१६१५॥§ 5383

अपिच— शक्तयः सर्वभावानां कार्यार्थापत्तिसाधना इत्यादि यदेतदनुमेयत्ववारणं शक्तेः कृतम्, तत्र क्षतयेऽस्माकम्। कस्मात् ? येन—यस्मात् अस्मिन्प्रत्यक्षविषये नानुमानमिष्यतेऽस्माभिः, परोक्षार्थप्रतिपत्तिरूपत्वादनुमानस्य। अनेनसिद्धसाध्यतामाह॥ १६१५॥ § 5384

यदुक्तं— श्रोत्रादिशक्तिपक्षे चेति, अत्राह—ये त्वित्यादि। § 5385

ये तु श्रोत्रादयो भावाः प्रत्यक्षस्य न गोचराः।
तेषां सत्तैव लिङ्गेन गम्यते शक्तिलक्षणा॥
१६१६॥§ 5387

ननु च सत्ता तु साध्यत एवेति पूर्वं प्रतिपादितम्, तत्कथं सत्ता गम्यत इत्युच्यत इत्याह—कारणान्तरेत्यादि। § 5388

कारणान्तरसापेक्षं तद्धि शब्दादिवेदनम्।
भावेऽप्यन्यस्य तद्धेतोरभावादङ्कुरादिवत्॥
१६१७॥§ 5390

नह्याहत्य सत्ता साध्यते किं तर्हि ? कारणान्तरसापेक्षत्वं श्रोत्रादिज्ञानस्य धर्मिणः साध्यते, अन्यस्य मनस्कारादेस्तद्धेतोः श्रोत्रादिज्ञानहेतोर्भावेऽप्यभावाच्छ्रोत्रादिज्ञानस्य। प्रयोगः—यद्यस्मिन्सत्यपि कदाचिद्भवति, तत्कारणान्तरसापेक्षं, यथा क्षित्यादौ सत्यपि कदाचिदङ्कुरः। सत्यपि मनस्कारादौ कदाचिद्भवति श्रोत्रज्ञानमिति स्वभावहेतुः। तस्मिन् कारणान्तरसापेक्षत्वे साधिते यत्कारणान्तरं तत् श्रोत्रादि प्रसिद्धमित्यनेन प्रकारेण सत्ता गम्यत इत्युच्यते, न त्वाहत्येत्यदोषः॥ १६१७॥ § 5391

यदुक्तम्— अनुमितात्सूर्ये यानादिति, अत्राह—उपादानेत्यादि। § 5392
464/k

उपादानासमाने च देशे जातिर्निरन्तरम्।
रवेर्देशान्तरव्याप्त्या ज्वालादेरिव गम्यते॥
१६१८॥§ 5394

स्थिरात्मनो विशेषत्वान्नान्यथेयं प्रसज्यते।
तस्य देशान्तरप्राप्तिः शक्तिस्त्वन्या निराकृता॥
१६१९॥§ 5396

अनेनानुमानान्तर्भावमाह। तथाहि—यस्य यस्य देशान्तरप्राप्तिरुपलभ्यते, तस्य स्वोपादानकारणदेशपरिहारेण जातिः, यथा ज्वालादेर्देशान्तरं प्राप्नुवतः, देशान्तरप्राप्तिश्च रवेरिति स्वभावहेतुः। न चायमनैकान्तिकः, यतः स्थिरात्मन एकरूपस्य भावस्य नेयं देशान्तरप्राप्तिर्युक्ता, पूर्वदेशाप्रतिनियतस्वभावापरित्यागात्। त्यागे वाऽपूर्वोत्पत्तिरेवेति। इदमेव बाधकं प्रमाणम्। स्यादेतच्छक्तौ साध्यायामियमर्थापत्तिरुदाहृता, नोत्पत्तौ, तत्कथमस्या अर्थापत्तेरनुमानान्तर्भाव उच्यत इत्याह—शक्तिस्त्वन्या निराकृतेति॥ १६१८॥ १६१९॥ § 5397

पीनो दिवाभोजी(?) श्रुतार्थापत्त्युदाहरणे प्राह—पीन इत्यादि। § 5398

पीनो दिवा न भुङ्क्ते चेत्यस्मिन्नर्थे न निश्चयः।
द्वेषमोहादिभिर्योगादन्यथाऽपि वदेत्पुमान्॥
१६२०॥§ 5400

अनेन शाब्दप्रमाणपूर्वकत्वस्यासिद्धतामाह॥ १६२०॥ § 5401

स्यादेतन्नहि वाक्येनार्थगतिमपेक्ष्य वाक्यान्तराक्षेपः क्रियते। किं तर्हि ?। केवलेनैव। तच्च प्रत्यक्षतः सिद्धमेवेत्याह—अर्थगत्यनपेक्षेणेति। § 5402

अर्थगत्यनपेक्षेण यदि वाक्यान्तरं पुनः।
सार्थमाक्षिप्यते तेन स्यादाक्षेपो वचोन्तरे॥
१६२१॥§ 5404

अर्थगतिर्नापेक्ष्यत इत्यर्थगत्यनपेक्षं वाक्यं, तेन केवलेन वाक्यमात्रेण यदि सार्थकंवाक्यान्तरमाक्षिप्यते, तदा स्यादाक्षेपो वचोऽन्तरे—रात्रिभोजनवाक्यादन्यस्यापिवाक्यान्तरस्याक्षेपः प्राप्नोति। सम्बन्धरहितत्वेनाविशेषात्। अथ वस्तुप्रतिबन्धादर्थमाक्षिपतीत्यर्थगत्यपेक्षणे तद्दोषः॥ १६२१॥ § 5405

अथेत्यादिना—पाराभिप्रायमाशङ्कते। § 5406

अथोपगमरूपेण तत्रार्थगतिरिष्यते।
प्रमाणान्तरतो यद्वा भवत्वर्थगतिस्ततः॥
१६२२॥§ 5408

अथ माभूदतिप्रसङ्ग इति न्यायादर्थगतिमपेक्ष्य परोपगमनरूपेणार्थगतिरिष्यते, परस्य वक्तुराप्तत्वेनाभ्युपगतत्वात्। यद्वा—प्रमाणान्तरतः प्रत्य- 465/k
क्षादेर्ज्ञानं पीनो देवदत्तो दिवा न भुङ्क्त इति। अत्र प्रतिविधत्ते—भवत्वित्यादि। भवत्वर्थस्य रात्रिभोजनस्य गतिस्ततः—दिवाभोजनवैकल्येन विशेषितात्पीनत्वात्। नतु वाक्यान्तरस्यबुद्धिस्थस्य गमकत्वम्, एवं सत्यनुमान एवान्तर्भावान्न प्रमाणान्तरत्वं स्यादित्यभिप्रायः॥ १६२२॥ § 5409

तमेवान्तर्भावं दर्शयन्नाह—क्षपेत्यादि। § 5410

क्षपाभोजनसम्बन्धी पुमानिष्टः प्रतीयते।
दिवाभोजनवैकल्यपीनत्वेन तदन्यवत्॥
१६२३॥§ 5412

इष्टः—विवक्षितः पुरुषविशेषो रात्रिभोजनविशिष्टः। भोजनवैकल्ये सति पीनत्वादिति हेतुः। तदन्यपुरुषवदिति दृष्टान्तः। कार्यहेतुश्चायम्॥ १६२३॥ § 5413

कथमत्र कार्यकारणभावः सिद्ध इत्याह—भोजने इत्यादि। § 5414

भोजने सति पीनत्वमन्वयव्यतिरेकतः।
निश्चितं तेन सम्बद्धाद्वस्तुनो वस्तुतो गतिः॥
१६२४॥§ 5416

अग्निधूमयोरिवान्वयव्यतिरेकाभ्यां पीनत्वभोजनयोः कार्यकारणभावो निश्चितो यतस्तस्माद्वस्तुनः पीनत्वात्कार्यत्वेन सम्बन्धाद्वस्तुतो भोजनस्य गतिर्युक्ता। नतु वाक्यादप्रतिबद्धाद्वाक्यान्तरस्य प्रतीतिर्युक्ताऽतिप्रसङ्गात्॥ १६२४॥ § 5417

तमेवातिप्रसङ्गं दर्शयितुमाह—सर्वसम्बन्धेत्यादि। § 5418

सर्वसम्बन्धशून्यं हि कथं वाक्यं प्रतीयते।

एकस्माद्वाक्यतः सर्वं प्रतीयेतान्यथा पुनः॥
१६२५ ॥§ 5420

सर्वेण सम्बन्धेन तादात्म्यतदुत्पत्तिलक्षणेन शून्यं रहितं वाक्यं कथं प्रतीयेत। नैव। अन्यथा यदि सर्वसम्बन्धशून्यमपि प्रतीयेत तदा यतःकुतश्चिदेकस्माद्वस्तुनो घटादेः सर्वं घटादि प्रतीयेत। नचैवम्। तस्मात्प्रतिबन्धात्प्रतिपत्तिरभ्युपगन्तव्या ॥ १६२५॥ § 5421

तथाहीत्यतिप्रसङ्गमेव समर्थयते। § 5422

तथाह्यसति सम्बन्धे सति चानवधारिते।
गम्यमानमिदं वाक्यं प्रसज्येताप्रमाणकम्॥
१६२६ ॥§ 5424

सति सम्बन्ध इत्यभ्युपगमः। एकदा तावन्नास्त्येव वाक्यस्य वाक्यान्तरेण
466/k स म्बन्धः, सन्नप्यनवधारितः सम्बन्धोऽसत्प्रख्य एव। ततश्चानवधारिते सम्बन्धे प्रतीयमानमप्रमाणकं स्यात्—निर्निबन्धनप्रतीतिकं (स्यात्) निर्निबन्धना चेत्प्रतीतिः सर्वं सर्वस्मात्प्रतीयेतेत्यतिप्रसङ्गोऽनिवार्य एव॥ १६२६॥ § 5425

सम्बद्धस्येत्यादिना परवचनावकाशमाशङ्कते। § 5426

सम्बद्धस्य प्रमाणत्वं स्थितं नो चेन्नृपाज्ञया।
प्रत्यक्षस्य प्रमाणत्वं कथं वा सङ्गतिं विना॥
१६२७ ॥§ 5428

तत्र परो ब्रूते सम्बद्धस्य प्रामाण्यमिति यदि, परं नृपाज्ञेवेयम्, नत्वत्र काचिद्युक्तिः। तथाहि—सम्बद्धस्य प्रमाणत्वमिति यदि नृपाज्ञा न भवेत्, कथं तर्हि प्रत्यक्षस्य प्रामाण्यं सङ्गतिं विना—सम्बन्धमन्तरेणेति वक्तव्यम्॥ १६२७॥ § 5429

अत्रोत्तरमाह—नन्विति। § 5430

नन्वसम्बद्धगम्यत्वे किमन्यस्यापि नो गतिः।
नहि सम्बन्धशून्यत्वे विशेषः कश्चनेक्ष्यते॥
१६२८ ॥§ 5432

सम्बन्धादेव मानत्वमध्यक्षेऽपि व्यवस्थितम्।

संवादो हि प्रमाणत्वं स चार्थादात्मलाभतः॥
१६२९ ॥§ 5434

नन्वसम्बद्धं यदि गम्येत तदाऽतिप्रसङ्गः स्यादविशेषादित्यत्र भवता न किञ्चिदुत्तरं दत्तम्। यच्चोक्तं कथं प्रत्यक्षस्य विना सम्बन्धेन प्रामाण्यमिति, तदप्यसङ्गतमेव। तथाहि—सम्बन्धं विना न केनचित्प्रत्यक्षप्रामाण्यमभ्युपगतम्। किं तर्हि ?। सम्बन्धादेव मानत्वमध्यक्षेपि—प्रत्यक्षेपि व्यवस्थितम्। अत्रोपपत्तिमाह—संवादोहीत्यादि। अर्थप्रापणशक्तिः संवादः प्रामाण्यम्। स च संवादो नियमेन प्रत्यक्षस्य कथं युक्तो यदि ततोऽर्थात्तस्यात्मलाभो न भवेत्॥ १६२८॥ १६२९॥ § 5435

अन्यथा को दोष इत्याह—अतद्धेतोरिति। § 5436

अतद्धेतोरहेतोश्च तत्संवादो न युज्यते।
नियमेन समस्तानां संवादो वाऽन्यथा भवेत्॥
१६३० ॥§ 5438

सोऽर्थो हेतुर्यस्य स तथा, न तद्धेतुरतद्धेतुः। अन्यहेतुक इति यावत्। तस्मादतद्धेतोः प्रत्यक्षादहेतोर्वा सर्वहेतुवैकल्येन तत्संवादः—अर्थसंवादः, न नियमेन स्यात्। किं तर्हि ?। समस्तानां—सर्वेषामर्थानां, संवादः स्यादित्यत्रापि समानः प्रसङ्गः॥ १६३०॥ § 5439
467/k

अथवा—पीनो देवदत्तो दिवा न भुङ्क्ते इत्येतदन्वयवाक्यं कार्यलिङ्गमात्मीयं कारणं विवक्षां विशिष्टामनुमापयन्हेतुधर्मानुमानेन धूमे वन(धूमेनेन्धन ?)विकारवत्सामर्थ्याद्रात्रौ भुङ्क्ते इत्येतद्व्यतिरेकवाक्यमपि गमयति, नतु साक्षादिति प्रतिपादयन्नाह—द्वितीयेत्यादि। § 5440

द्वितीयवाक्यनिर्भासा विवक्षा वाऽनुमीयते।
एतेनान्वयवाक्याच्च व्यतिरेकगतिर्मता॥
१६३१ ॥§ 5442

एतेनेति। हेतुधर्मानुमानेन नतु साक्षात्। यस्मादन्वयवाक्यात्तादृशी विवक्षा गम्यते, यस्यां व्यतिरेकवाक्यमपि निर्भासते। अन्यथा यदि रात्रिभोजनं विवक्षायां नारूढं स्यात्, भोजनप्रतिषेधमात्रं केवलं प्रतिपादयितुमिष्टं तदा देवदत्तो न भुङ्क्ते इत्येवोक्तं स्यात्। नतु दिवा, पीन इति। व्यतिरेकगतिरिति। व्यतिरेकवाक्यगतिः॥ १६३१॥ § 5443

गवयोपमिता या गौरित्यत्राह—उपमाया इति। § 5444

उपमायाः प्रमाणत्वे विस्तरेण निराकृते।
अर्थापत्तेस्तदुत्थाया वारितैव प्रमाणता॥
१६३२॥§ 5446

भवतु चोपमायाः प्रामाण्यम्, तथाप्युपमानपूर्विकाया अर्थापत्तेर्गृहीतग्रहणान्न युक्तं पृथक्प्रामाण्यं, व्यतिरिक्तस्य शक्तिलक्षणस्य प्रमेयस्याभावादिति प्रतिपादयन्नाह—उपमानेत्यादि। § 5447

उपमानप्रमाणस्य गोत्वालम्बनमिष्यते।
त्वसत्तयैव चालम्ब्यं त्वज्ञानजनकं मतम्॥
१६३३॥§ 5449

तत्किमत्रान्यया शक्त्या यद्वत्यर्थमपेक्ष्यते।
अर्थापत्तेः प्रमाणत्वमुपमानसमाश्रयम्॥
१६३४॥§ 5451

यद्वत्यर्थमिति। शक्तिप्रतीत्यर्थम्। शेषं सुबोधम्॥ १६३३॥ १६३४॥
§ 5452

अभिधानान्यथेत्यादावर्थापत्तिपूर्विकाया अर्थापत्तेरुदाहरणस्यानैकान्तिकत्वमाह—अनन्यत्वेत्यादि। § 5453

अनन्यत्ववियोगेऽपि शब्दानां न विरुध्यते।
अर्थप्रत्यायनं यद्वत्पाणिकम्पादिकारणम्॥
१६३५॥§ 5455

यथाह्यनित्यानामपि पाणिकम्पाक्षिनिकोचादीनामर्थप्रत्यायनं न विरुद्धं
468/k तथा श ब्दानामनन्यत्ववियोगेऽपि न विरुध्यत एवेत्यनैकान्तिकमेवैतदुदाहरणम्। तत्रान्यत्वमनित्यत्वं, नान्यत्वमनन्यत्वं—नित्यत्वमिति यावत्॥ १६३५॥
§ 5456

ननु चोक्तम्—अनित्यो हि न सङ्केतव्यवहारानुवृत्तिभागिति, अत्राह—तुल्येत्यादि। § 5457

तुल्यप्रत्यवमर्शस्य हेतुत्वात्कम्पनं यथा।

प्रत्यायकत्वं शब्दानां तथैव न विरुध्यते॥
१६३६॥§ 5459

यद्यपि स्वलक्षणानां क्षणिकत्वादन्वयो नास्ति, तथाऽपि कानिचित्स्वलक्षणानि प्रकृत्या पारम्पर्येणाभेदाकारस्य भ्रान्तस्य प्रत्यवमर्शज्ञानस्य कारणानि भवन्ति सन्त्येकत्वेन गृह्यमाणानि प्रत्यायकानि भवन्ति सङ्केतवशात्। यथाकम्पनम्। प्रत्यायकमिति शेषः॥ १६३६॥ § 5460

यथा कम्पनमित्यस्य दृष्टान्तस्य परः साध्यविकलतामुद्भावयन्नाह—प्रत्यक्षेत्यादि। § 5461

प्रत्यक्षद्रव्यवर्त्तिन्यो दृश्यन्ते ननु याः क्रियाः।
तासां वर्णवदेवेष्टं नित्यत्वं प्रत्यभिज्ञया॥
१६३७॥§ 5463

यथा वर्णानां प्रत्यभिज्ञया नित्यत्वमिष्टमस्माभिः। तथा पाण्यादिकर्मणामपीत्यनित्यत्वेन साध्येन विकलो दृष्टान्त इत्यव्यभिचार एव॥ १६३७॥ § 5464

यद्येवं नित्यत्वे सति पाण्यादिकर्मणां किमिति नित्यमुपलब्धिर्न जायत इत्यत्राह —व्यञ्जकेत्यादि। § 5465

व्यञ्जकाभावतश्चासां सन्ततानुपलम्भता।
यदेवोत्पादकं वः स्यात्तदेव व्यञ्जकं मतम्॥
१६३८॥§ 5467

आसामिति। क्रियाणाम्। सन्ततानुपलम्भता। यथा भवतामुत्पादकाभावान्नित्योपलब्धिर्न भवति, तथाऽस्माकं व्यञ्जकाभावादिति समानः परिहार इति परस्याभिप्रायः॥ १६३८॥ § 5468

नैवमित्यादिना प्रतिविधत्ते। § 5469

नैवमप्रतिबद्धे हि सामर्थ्ये सन्ततं भवेत्।
तज्ज्ञानं तद्वियोगे तु नैव स्यात्तत्कदाचन॥
१६३९॥§ 5471

ततश्च व्यञ्जकास्तासां सङ्गच्छन्ते न हेतवः।

प्रत्यभिज्ञा तु नित्यत्वे पूर्वमेव निराकृता॥
१६४०॥§ 5473

469/k

अत्र द्वयी कल्पना, यास्ताः क्रिया अभिव्यङ्ग्या इष्टस्ताः प्रकृत्या ज्ञानोत्पादनसमर्था वा स्युर्नवा। तत्र सामर्थ्ये सति, सन्ततं—नित्यं, तद्भावि ज्ञानं प्राप्नोति। तासां समर्थस्य स्वभावस्य नित्यत्वेन केनचिदप्रतिबद्धत्वात्। अनाधेयातिशयस्य विशेषमनाधाय प्रतिबद्धुमशक्यत्वात्। अथासामर्थ्यं, तदा तद्वियोगे—सामर्थ्यवियोगे, नैव तद्भावि ज्ञानं स्यादिति किं व्यञ्जकस्य सामर्थ्यम्। तस्मात्तासां क्रियाणां नित्यत्वेनेष्टानां न कथंचित्सङ्गच्छन्ते व्यञ्जकत्वेन कल्पिता हेतवः। अनित्यानां त्वपूर्वस्वभावोत्पत्तिर्व्यञ्जकादिति न्याय्यास्तान् प्रति व्यञ्जकाः। यच्चोक्तम्— तासां वर्णवदेवेष्टं नित्यत्वं प्रत्यभिज्ञयेत्यत्राह— प्रत्यभिज्ञेति। नित्यत्वे साध्ये हेतुत्वेन प्रत्यभिज्ञोपन्यस्ता सा पूर्वं स्थिरभावपरीक्षायां निराकृता॥ १६३९॥ १६४०॥ § 5474

यदुक्तम्— प्रमाणाभावनिर्णीतचैत्राभावविशेषितात् इत्यत्राह—गेहेत्यादि।
§ 5475

गेहाभावात्तु चैत्रस्य बहिर्भावो न युज्यते।
मरणाशङ्कया यस्मादन्यथाऽप्युपपद्यते॥
१६४१॥§ 5477

जीवतश्चेद्गृहाभावो बहिर्भावप्रसिद्धये।
अर्थापत्त्यावहो ह्येतन्नैव तत्राप्यनिश्चयात्॥
१६४२॥§ 5479

वेश्मन्यपश्यतश्चैत्रं न ह्यर्वाग्दर्शितः प्रमा।
तस्य जीवनसम्बन्धे कथंचिदपि वर्त्तते॥
१६४३॥§ 5481

अन्यथाऽपीति। बहिर्भावमन्तरेणोपपद्यते गेहे चैत्राभावः। अनेनानैकान्तिकत्वमाह। अथ जीवतो देवदत्तस्य यो गृहाभावः स इहार्थापत्त्युदाहरणे हेतुत्वेनोच्यते नाभावमात्रम्। नैवं युक्तम्। कस्मात् ?। तत्रापि देवदत्तजीवने संशयात्संदिग्धासिद्धता हेतोः स्यात्। अनिश्चये कारणमाह—वेश्मनीति। तस्य चैत्रस्य जीवने निश्चायकप्रमाणाभावादर्वाग्दर्शिनः संशय एव॥ १६४१॥ १६४२॥ १६४३॥ § 5482

अथापि स्यात्—यदि नामार्वाग्दर्शिनः प्रत्यक्षप्रमाणं चैत्रस्य जीवनविषये नास्ति, अनुमानादि तु विद्यत एवेत्याह—अथेत्यादि। § 5483

अथ शब्दादिना तस्य जीवत्तानिश्चये सति।
सद्मन्यभावेऽभावाच्च निश्चितेऽस्याः प्रमाणता॥
१६४४॥§ 5485

शब्दादिनेति। तदुच्चारितशब्दः श्रूयते, प्रत्ययितो वा तस्मिन्काले कुड्याद्यन्तरितस्तपस्यन्कथयति जीवति चैत्र इति। अभावाच्च—प्रमाणात्प्रत्यक्षादिनिवृत्तिरू पात्(?), सद्मनि—गृहे, चैत्राभावनिश्चये सति, सिद्धो 470/k
जीवनविशिष्टश्चैत्राभाव इति,भवेदेवास्या अभावोत्थाया अर्थापत्तेः प्रमाणता॥ १६४४॥ § 5486

तदाऽपीत्यादिना प्रतिविधत्ते। § 5487

तदाऽपि गेहायुक्तत्वं दृष्टाऽदृष्टेर्विनिश्चितम्।
अतस्तत्र बहिर्भावो लिङ्गादेवावसीयते॥
१६४५॥§ 5489

सद्मना यो ह्यसंसृष्टो नियतं बहिरस्त्यसौ।
गेहाङ्गणस्थितो दृष्टः पुमान् द्वारि स्थितैरिव॥
१६४६॥§ 5491

विपक्षोऽपि भवत्यत्र सदनान्तर्गतो नरः।
अर्थापत्तिरियं तस्मादनुमानान्न भिद्यते॥ १६४७॥
इत्यर्थापत्तिपरीक्षा।§ 5494

अनेनानुमानान्तर्भावमाह। तथाहि—चैत्रोऽत्र धर्मी, तस्य बहिर्भावः साध्यः, जीवने सति गृहासङ्गो हेतुः कार्यः। गृहाङ्गणस्थितः पुमान् साधर्म्यदृष्टान्तः। गृहान्तर्गतस्तु वैधर्म्यदृष्टान्तः। सदनं—गृहम्। व्याप्तिर्दृष्टान्ताभ्यामेव निश्चिता। नचासिद्धो हेतुः। यतो गेहायुक्तत्वं तावद्दृश्यानुपलब्ध्या निश्चितम्, जीवनं तु पराभ्युपगमात्सिद्धम्। परमार्थतस्तु संदिग्धो हेतुः। नहि जीवत्तानिश्चायकं किंचित्प्रमाणमस्ति। ननु च शब्दादिरस्तीत्युक्तम्। एवं तर्हि यत एव शब्दादेः प्रमाणाज्जीवनं निश्चितं तत एव बहिर्भावः सिद्ध

इति किमर्थापत्त्या कर्त्तव्यम्। तस्मात्—पराभ्युपगमात्। सिद्धं हेतुमभ्युपगम्यानुमानेऽन्तर्भावः प्रतिपादित अर्थापत्तेः ॥ १६४५॥ १६४६॥ १६४७॥
§ 5495

इत्यर्थापत्तिपरीक्षा।

०.२०.४ अभावविचारः।

अभावमधिकृत्याह—प्रमाणेत्यादि। § 5497

प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता॥
१६४८॥§ 5499

तत्र मीमांसकानां सदसल्लक्षणयोर्भावाभावयोर्वस्तुत्वं, सर्वस्य च पदार्थस्य सदसद्रूपेण द्व्यात्मकत्वमित्यभ्युपगमः। तत्र सदसद्रूपेणोभयात्मके वस्तुनि व्यवस्थिते,यस्मिन्वस्तुरूपे—वस्त्वंशेऽसद्रूपाख्ये, प्रमाणपञ्चकमर्थापत्तिपर्यन्तं न जायते। किमर्थम् ?। वस्तुसत्ताऽवबोधार्थम्—वस्तुनः स-
471/k त्तांशावबोधार्थम्। तत्र—अभावांशे प्रमेये, अभावस्य प्रमाणता। अनेन विषयोऽस्य केवलो निर्दिष्टो नतु स्वरूपम् ॥ १६४८॥ § 5500

स्वरूपमस्य तर्हि कीदृशमित्याह—प्रत्यक्षादेरित्यादि। § 5501

प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव इष्यते।
साऽऽत्मनोऽपरिणामो वा विज्ञानं वाऽन्यवस्तुनि॥
१६४९॥§ 5503

प्रत्यक्षादेरर्थापत्तिपर्यन्तस्यानुत्पत्तिः प्रमाणाभाव इष्यते। प्रमाणाभाव इति षष्ठीतत्पुरुषः कर्मधारयो वा। क्वचित्पाठः प्रमाणेऽभाव इति। तत्र निर्धारणे सप्तमी, जातावेकवचनम्। प्रमाणानां मध्येऽभावः प्रमाणमित्यर्थः। यथोक्तं शबरस्वामिना—अभावोऽपि प्रमाणाभावो नास्तीत्यर्थस्यासन्निकृष्टस्येति। अथ केयमनुत्पत्तिरित्याह—साऽऽत्मनोऽपरिणामो वा विज्ञानं वाऽन्यवस्तुनीति। सा—प्रत्यक्षादेरनुत्पत्तिः, निषेध्याभिमतघटादिपदार्थज्ञानरूपेणापरिणतं साम्यावस्थमात्मद्रव्यमुच्यते।घटादिविविक्तभूतलज्ञानं वा॥ १६४९॥ § 5504

ननु चाभाव इति वस्तुविरह उच्यते। तत्कथं वस्तुत्वमस्य, नहि वस्तु विरहो भवतीत्याशङ्क्य वस्तुत्वमभावस्य प्रतिपादयन्नाह—प्रमाभावादिति।
§ 5505

प्रमाभावाच्च वस्तूनामभावः संप्रतीयते।
चतुर्धा च विभिन्नोऽसौ प्रागभावादिभेदतः॥
१६५० ॥§ 5507

यदि प्रमाणाभावो वस्तु न भवेत्ततश्च सर्वसामर्थ्यशून्यत्वादस्येति ततो नाभावप्रतीतिः स्यात्, प्रागभावादिभेदेन चतुर्धा च भेदोऽभावस्य न स्यात्, नचैवम्,तस्मादभावप्रतीत्यन्यथानुपपत्त्या चतुर्धा भेदेन लोकस्य व्यवहारान्यथानुपपत्त्या चाभावस्य वस्तुत्वम्। एतच्चार्थापत्त्याख्यं प्रमाणद्वयमित्येके। अन्ये तु चतुर्धा च विभिन्नोऽसावित्येतदनुमानमिति वर्णयन्ति। एवं च प्रमाणयन्ति—अभावो वस्तु,भिद्यमानत्वात्, घटादिवदिति॥ १६५०॥
§ 5508

कथं पुनरस्य चतुर्धा भेद इति प्रतिपादयन्नाह—क्षीरे दधीत्यादि। § 5509

क्षीरे दध्यादि यन्नास्ति प्रागभावः स कल्प्यते।
नास्तिता पयसो दध्नि प्रध्वंसाभावलक्षणम्॥
१६५१ ॥§ 5511

गवि योऽश्वाद्यभावश्च सोऽन्योन्याभाव उच्यते।
पररूपं न तस्यास्ति नास्तिताऽस्यात्मना ततः॥
१६५२ ॥§ 5513

472/k

शिरसोऽवयवा निम्ना वृद्धिकाठिन्यवर्जिताः।
शशशृङ्गादिरूपेण सोऽत्यन्ताभाव इष्यते॥
१६५३ ॥§ 5515

न च स्याद्व्यवहारोऽयं कारणादिविभागशः।
प्रागभावादिभेदेन नाभावो विद्यते यदि॥
१६५४ ॥§ 5517

क्षीरमृदादौ कारणे दधिघटादिलक्षणं कार्यं नास्तीत्येवं यत्प्रतीयते लोके स प्रागभाव उच्यते। यदि तु प्रागभावो न भवेत्, क्षीरादौ दध्यादिकार्यं

भवेदेव। एवंदध्नि क्षीराख्यस्य यन्नास्तित्वमयं प्रध्वंसाभावः। अन्यथा दध्नि क्षीरं भवेदेव। गवादौ वस्त्वादेरभावोऽन्योन्याभाव उच्यते। यस्मात्तस्य गवादेः पररूपमश्वादिस्वभावो नास्ति, तस्मात्तयोरन्योन्याभाव उच्यते। अन्यथा गवादौ भवेदेवाश्वादि यद्यन्योन्याभावो न भवेत्। शशशिरसोऽवयवा निम्ना वृद्धिकाठिन्याभ्यां रहिता विषाणादिरूपेणात्यन्तमसन्तोऽत्यन्ताभाव उच्यते। यद्यपि चात्र वस्तुवृत्तेरन्योन्याभावस्तथाऽपि लोकप्रसिद्ध्योक्तमत्यन्ताभाव इति। प्रायेण हि लोके सामानाधिकरण्येनैवेतरेतराभावव्यवहारः, यथा—गौरयं नाश्व इति। नतु शशीयं न विषाणमित्येवम्। यदि त्वत्यन्ताभावो न भवेत्, शशे शृङ्गं भवेदेव। तथाचाह कुमारिलः— क्षीरे दधि भवेदेव दध्नि क्षीरं घटे पटः। शशे शृङ्गं पृथिव्यादौ चैतन्यं मूर्त्तिरात्मनि॥ अप्सु गन्धो रसश्चाग्नौ वायौ रूपेण तौ सह। व्योम्नि सस्पर्शकास्ते च न चेदस्य प्रमाणता॥ इति। तत्र—चैतन्यम्—आत्मा। मूर्त्तिः—काठिन्यम्। रूपेण तौ सहेति। तौ—गन्धरसौ, रूपसहितौ वायौ स्याताम्। सस्पर्शकास्त इति। ते—रूपरसगन्धाः सह स्पर्शेन व्योम्नि—आकाशे स्युः। किंच—नच स्यात्कारणादिविभागेन लोकव्यवहारो यद्यभावस्य प्रागभावादिभेदेन भेदो न स्यात्। यथा—यो दध्यर्थी स क्षीरोपादानं करोति, नतु क्षीरार्थी दध्युपादानम्, तथा गवार्थी नाश्वमुपादत्ते, नाप्यश्वार्थी गाम्। इत्येवमादिकारणादिविभागेन व्यवहारः॥ १६५१॥ ॥ १६५२॥ १६५३॥ १६५४॥ § 5518

अथापि स्याद्यदि नाम चतुर्द्धा भेदोऽस्य जातस्तथापि वस्तुत्वेन भवितव्यमेतत्कुत इत्याह—न चावस्तुन इत्यादि। § 5519

न चावस्तुन एते स्युर्भेदास्तेनास्य वस्तुता।
कार्यादीनामभावः स यो भावः कारणादिना॥
१६५५॥§ 5521

473/k

न ह्यवस्तुनो भेदो युक्तो वस्त्वधिष्ठानत्वात्तस्य। तस्मादभावो वस्तु। कीदृशं पुनरस्य वस्तुत्वमित्याह—कार्यादीनामिति। क्षीरादेः कारणस्य यो भावः स एव दध्यादेः कार्यस्याभावः, कार्यस्य दध्यादेर्यो भावः स एव क्षीरादेः कारणस्याभावइत्येतदभाववस्तुत्वम्॥ १६५५॥ § 5522

पुनरप्यनुमानेन वस्तुत्वमस्य प्रतिपादयन्नाह—यद्वेत्यादि। § 5523

यद्वाऽनुवृत्तिव्यावृत्तिबुद्ध्योर्ग्राह्यो यतः स्वयम्।
तस्माद्गवादिवद्वस्तु प्रमेयत्वाच्च गम्यताम्॥
१६५६॥§ 5525

अभावो वस्त्विति पक्षः, अनुवृत्तिव्यावृत्तिबुद्धिग्राह्यत्वात्प्रमेयत्वाच्चेति हेतुद्वयं, गवादिवदिति दृष्टान्तः॥ १६५६॥ § 5526

तत्रानुवृत्तिबुद्धिश्चतुर्ष्वप्यभावोऽभाव इत्येकाकारः प्रत्ययः। व्यावृत्तिबुद्धिः प्रागभावोऽयं न प्रध्वंसाभाव इत्यादिभेदाकारः प्रत्ययः। तत्र कुमारिलेन त्रिविधोऽभावो वर्णितः। आत्मनोऽपरिणाम एकः, पदार्थान्तरविशेषज्ञानं द्वितीयः, साऽऽत्मनोऽपरिणामो वा विज्ञानं वाऽन्यवस्तुनीति वचनात्, प्रमाणनिवृत्तिमात्रात्मकस्तृतीयः,त्रिलक्षणेन या बुद्धिर्जन्यते साऽनुमेष्यते। नचानुत्पत्तिरूपस्य कारणाधीनता क्वचिदिति वचनात्। तत्रैतस्मिंस्तृतीयेऽभावे चोद्यमाशङ्क्य परिहरन्नाह—मानं कथमभावश्चेदिति। § 5527

मानं कथमभावश्चेत्प्रमेयं चात्र कीदृशम्।
मेयो यद्वदभावो हि मानमप्येवमिष्यताम्॥
१६५७ ॥§ 5529

अथोच्यते कथं प्रत्यक्षानुत्पत्तिलक्षणोऽभावः प्रमाणमिति। अत्रोच्यते—प्रमेयंचात्र कीदृशमिति। अभावरूपं प्रमेयमिति चेत्। एवं तर्हि यथाभूतं प्रमेयं तथाभूतमेव प्रमाणमितीष्यताम्। तत्किमुच्यते—मानं कथमभाव इति। नहि लक्षणं प्रमाणं (न) युक्तम्॥ १६५७॥ § 5530

भवत्वभावस्य प्रामाण्यं प्रत्यक्षादिभ्यस्तु भेदोऽस्य कथंमित्याह—अभावेत्यादि। § 5531

अभावशब्दवाच्यत्वात्प्रत्यक्षादेश्च भिद्यते।
प्रमाणानामभावो हि प्रमेयाणामभाववत्॥
१६५८ ॥§ 5533

अभावो वा प्रमाणेन स्वानुरूपेण मीयते।
प्रमेयत्वाद्यथा भावस्तस्माद्भावात्मकात्पृथक्॥
१६५९ ॥§ 5535

474/k

प्रत्यक्षादीनां प्रमाणानामभावः प्रमाणं प्रत्यक्षादिभ्यो भिन्नम्, अभावशब्दवाच्यत्वात्, प्रमेयाभाववत्। अथवा—अभावाख्यप्रमेयो धर्मी, तस्य स्वानुरूपप्रमाणप्रमेयत्वं साध्यं, प्रमेयत्वादिति हेतुः, भावाख्यप्रमेयो दृष्टान्तः। यच्च स्वानुरूपं प्रमाणं तद्भावात्मकात्प्रत्यक्षादेरन्यदिति सिद्धम्॥ १६५८॥ १६५९॥ § 5536

तदत्रेत्यादिना प्रतिविधत्ते। § 5537

तदत्र नित्यसत्त्वस्य परिणामो निराकृतः।
तद्विपर्ययसद्भावः कादाचित्को न युज्यते॥
१६६० ॥§ 5539

अनेनात्मनोऽपरिणामो वेति प्रथमस्याभावलक्षणस्यासम्भवितामाह। तथाहि— पर्युदासवृत्त्या परिणामविपरीतोऽपरिणामः कादाचित्कोऽभिप्रेतो लक्षणत्वेन। अन्यथा हि यदि कादाचित्को नाभिप्रेतः पर्युदासवृत्त्या स्यात्, तदा सर्वदैव वस्तुनोऽस्तित्वप्रतीतिः स्यात्। स चापरिणामो यथोक्तो न सम्भवत्यात्मनः, यस्मान्नित्यसत्त्वस्य परिणामो निराकृतस्तस्मात्कुतस्तस्य विपरीतस्यापरिणामस्य पर्युदासवृत्त्या संश्रयणं भवेत्। तत्र—सत्त्व आत्मा, नित्यश्चासौ सत्त्वश्चेति नित्यसत्त्वः। यद्वा— नित्यं सत्त्वं—सत्ता यस्य स तथोक्तः। नित्य इति यावत्। तद्विपर्ययसद्भाव इति। तस्य परिणामस्य विपर्ययोऽपरिणामः स कादाचित्को न युक्तः। किं तर्हि सर्वदा भवेन्नित्यैकरूपत्वादात्मैकः॥ १६६० ॥ § 5540

अथ मतम्—अपरिणामो न परिणामविपरीतवस्त्वात्मकः। किं तर्हि?। परिणामप्रतिषेधमात्रात्मकः। तेन नासम्भवि लक्षणं भवतीति, अत्राह—तत्प्रतिक्षेपेत्यादि। § 5541

तत्प्रतिक्षेपमात्रात्मा स चेदत्र विवक्षितः।
सर्वदा वस्तुताऽस्तित्वे गम्येतास्यानिवर्त्तनात्॥
१६६१ ॥§ 5543

तस्य परिणामस्य प्रतिक्षेपः प्रतिषेधः, स एव तन्मात्रं, तदेवात्मा स्वभावो यस्याऽपरिणामस्य स तथोक्तः। अस्येति। प्रतिक्षेपात्मनोऽपरिणामस्य नित्यैकरूपत्वादात्मनः परिणामाभावात्॥ १६६१ ॥ § 5544

अस्तु वेत्यभ्युपगम्यापरिणाममतिव्यापितां लक्षणदोषमाह। § 5545

अस्तु वाऽपरिणामोऽस्य तथापि व्यभिचारिता।
स्वापमूर्च्छाद्यवस्थासु तद्भावेऽप्यर्थसम्भवात्॥
१६६२ ॥§ 5547

प्रत्ययान्तरसद्भावे तद्विविक्तान्यदर्शनात्।
घटज्ञानादिरूपेण तस्यासाविष्यते यदि॥
१६६३ ॥§ 5549

475/k

द्वितीयादस्य कः पक्षाद्विशेषोऽभिहितस्तदा।
यद्विकल्पेन निर्दिष्टं पक्षद्वयमिदं त्वया॥
१६६४ ॥§ 5551

व्यभिचारितेति। अतिव्यापिता। मूर्च्छादीत्यादिशब्देन व्यवधानपराङ्मुखाद्यवस्था गृह्यन्ते। तद्भावेऽपीति। घटादिज्ञानरूपेणापरिणतात्मद्रव्यसद्भावेऽपि। अर्थालम्बनप्रत्ययव्यतिरिक्तप्रत्ययान्तरसद्भावे सति घटादिविविक्तप्रदेशज्ञानमेवापरिणामइष्यते। घटादिज्ञानरूपेणापरिणतत्वात्। तस्येति। आत्मनः। असाविति। अपरिणामः। एवं सति विज्ञानं वाऽन्यवस्तुनीत्येतस्माद्द्वितीयात्पक्षादस्य विशेषो नोक्तः स्यात्। ततश्च पक्षद्वयनिर्देशोऽनर्थकः स्यात्॥ १६६२॥ १६६३॥ १६६४॥ § 5552

अन्यवस्तुनीत्यादिना द्वितीयेऽभावलक्षणे व्यभिचारितामाह। § 5553

अन्यवस्तुनि विज्ञाने वृत्ते सर्वस्य नास्तिता।
अदृश्यस्यापि गम्येत द्वितीयाभावसंश्रये॥
१६६५ ॥§ 5555

अदृश्यस्यापीति। देशकालस्वभावविप्रकृष्टस्य। द्वितीयाभाव इति। विज्ञानं वाऽन्यवस्तुनीत्येतस्मिन्॥ १६६५॥ § 5556

तत्तुल्ययोग्यरूपस्य कारणान्तरसन्निधौ।
तद्विविक्तान्यविज्ञाने नास्तिता चेत्प्रतीयते॥
१६६६ ॥§ 5558

अथापि स्यान्न सर्वस्यादृष्टस्याभावः साध्य इष्टः। किं तर्हि ?। तत्तुल्ययोग्यरूपस्य—तेनोपलभ्येन घटादिविविक्तप्रदेशेन तुल्यं रूपं योग्यता यस्य स तथोक्तः। उपलब्धिलक्षणप्राप्तस्येति यावत्। तद्विविक्तान्यविज्ञान इति घटादिविविक्तप्रदेशज्ञाने॥ १६६६॥ § 5559

शक्येत्यादिना प्रतिविधत्ते। § 5560

शक्यदर्शनवस्त्वाभप्रत्यक्षस्यैव नास्तिता।
एवं सति समाख्येयो नान्येषां व्यभिचारिणी॥
१६६७ ॥§ 5562

अन्यवस्तुनि विज्ञानं जातं वा ज्ञायते कथम्।
अप्रत्यक्षा मता बुद्धिर्येनार्थापत्तितो यदि॥
१६६८ ॥§ 5564

सापि ज्ञानात्मिकैवेति तस्या अपि कुतो गतिः।
अर्थापत्त्यन्तरप्रोक्तावनवस्था प्रसज्यते॥
१६६९ ॥§ 5566

यदि वस्तु प्रमाभावो मेयाभावस्तथैव च।
प्रत्यक्षेऽन्तर्गतो भावस्तथासति कथं न ते॥
१६७० ॥§ 5568

476/k

शक्यदर्शनस्य—उपलब्धिलक्षणप्राप्तस्य वस्तुनः, आभा-आकारो यस्य तत्तथा, शक्यदर्शनवस्त्वाभं च तत्प्रत्यक्षं चेति कर्मधारयः। नान्येषामिति। अनुमानादीनाम्। यतस्तेषां परोक्ष एवार्थो विषयः। नच तेषां निवृत्तौ परोक्षस्य देशकालस्वभावविप्रकृष्टस्य निवृत्तिरस्तीति। अतो व्यभिचारिणी तेषां निवृत्तिः। ततश्च प्रत्यक्षादेरनुत्पत्तिरित्यत्रादिग्रहणमनर्थकं स्यात्। अपिच तदन्यवस्तुनि विज्ञानं यदि निश्चितं भवेदेवं प्रतियोगिनोऽभावं साधयतीत्येवमवश्याभ्युपगन्तव्यम्। अन्यथा हि सत्तामात्रेण ततोऽभावसिद्धौ सत्यां सर्वस्य पुंसस्तस्मादेकपुरुषोत्पन्नादपि ज्ञानादभावसिद्धिप्रसङ्गः स्यात्। तत्र येन मीमांसकेनाप्रत्यक्षा बुद्धिरभ्युपगता तेन तदेव तदन्यवस्तुनि जातं विज्ञानं कथं ज्ञायेत। नैव। अर्थापत्तितो यदीति। ज्ञायत इति प्रकृतेन सम्बन्धः। यथोक्तम्—अज्ञातेऽर्थे बुद्धेरसिद्धेरर्थज्ञानाल्लिङ्गात्तद्बुद्धिरनुमीयत इति। अत्र हि लिङ्गवचनमन्यथाऽनुपपत्तिवाचकम्। अर्थज्ञानादन्यथाऽनुपपन्नादित्यर्थः। अनुमीयते—प्रमीयत इति यावत्। एवं तर्हि साऽप्यर्थापत्तिर्ज्ञानात्मिकेति तस्या अपि कुतो गतिरिति वक्तव्यम्। अन्यस्या अर्थापत्तेरिति चेदेवं सत्यनवस्था स्यात्। किंच—यदि वस्तुत्वमभावस्याभ्युपगम्यते तदा यथा प्र-

माणाभावो वस्तु तथा प्रमेयाभावोऽपीति, ततश्चाभावो वस्तुत्वात्प्रत्यक्ष एव किमिति नाभ्युपगम्यते। येन तदधिगतयेऽन्यत्प्रमाणान्तरमभावाख्यं परिकल्प्येत॥ १६६७॥ १६६८॥ ॥ १६६९॥ १६७०॥ § 5569

कार्यादीनामित्यादिना प्रत्यक्षान्तर्गतत्वमेव समर्थयते। § 5570

कार्यादीनामभावो हि भावो यः कारणादिना।
स चापरविविक्तात्मा प्रत्यक्षेणैव गम्यते॥
१६७१॥§ 5572

तथाचोक्तम्—कार्यादीनामभावो हि भावो यः करणादिनेति, स च कारणादेर्भावोऽपरविविक्तात्मा—कार्यादिविविक्तस्वभावः, प्रत्यक्ष एवेति किमभावस्यापरं प्रमेयमस्ति येन प्रमाणान्तरं स्यात्। प्रयोगः—यस्य यतो व्यतिरिक्तं प्रमेयं नास्ति तत्ततो न प्रमाणान्तरं, यथा सप्तमं प्रमाणं, नास्ति च प्रमेयं प्रत्यक्षप्रमेयाद्व्यतिरिक्तमभावस्येति व्यापकानुपलब्धिः॥ १६७१॥ § 5573

अत्र परो हेत्वसिद्धिमुद्भावयन्नाह—स्वरूपेत्यादि। § 5574

स्वरूपपररूपाभ्यां नित्यं सदसदात्मके।
वस्तुनि ज्ञायते किंचिद्रूपं कैं(?)श्चित्कदाचन॥
१६७२॥§ 5576

477/k

प्रत्यक्षाद्यवतारश्च भावांशो गृह्यते यदा।
व्यापारस्तदनुत्पत्तेरभावांशे जिघृक्षिते॥
१६७३॥§ 5578

स्यात्प्रमेयाभावो यद्येकात्मकमेव वस्तु स्यात्, यावता स्वरूपपररूपाभ्यां यथाक्रमं सदसदात्मत्वेनोभयात्मकं वस्तु, तस्मिन्नुभयात्मके वस्तुनि स्थिते, किंचिद्रूपं— स्वभावः, कैश्चित्प्रमाणैर्ज्ञायते, न सर्वं सर्वैः। एतदेव दर्शयति—प्रत्यक्षेत्यादि।भावांशो यदा गृह्यते तदा प्रत्यक्षादीनां पञ्चानां व्यापारो नाभावस्य, अभावांशे ग्रहीतुमिष्टे, तदनुत्पत्तेर्व्यापारः—तेषां प्रत्यक्षादीनामनुत्पत्तेरभावस्येति यावत्॥ १६७२॥ ॥ १६७३॥ § 5579

स्यादसिद्धता हेतोर्यद्येकस्योभयात्मकत्वं स्यात्, यावता विरुद्धमेकस्योभयात्मत्वमिति प्रतिपादयन्नाह—स्वरूपमेवेत्यादि। § 5580

स्वरूपमेव वस्तूनां ननु व्यावृत्तमिष्यते।
तेनात्मना सदेतच्च प्रत्यक्षममुनाऽत्मना॥
१६७४॥§ 5582

नहि पररूपेण वस्तु वस्त्वन्तराद्व्यावृत्तं, किं तर्हि ?, स्वरूपेण, अतश्च स्वरूपमेव —स्वभाव एव वस्तूनां वस्त्वन्तराद्व्यावृत्तमुपलभ्यते। स्वस्वभावावस्थानात्। येन चात्मना व्यावृत्तं तेन तद्वस्तु सदेव नासत्। एतच्च वस्तु प्रत्यक्षममुनाऽन्यव्यावृत्तेनात्मनेति न द्वितीयरूपोपलब्धिः॥ १६७४॥ § 5583

एवं तावत्प्रत्यक्षविरुद्धमुभयात्मकत्वप्रतिज्ञानमुद्भावितम्, इदानीमनुमानविरुद्धं प्रतिपादयन्नाह—अर्थक्रियेति। § 5584

अर्थक्रियासमर्थं च सदन्यदसदुच्यते।
समावेशो न चैकत्र तयोर्युक्तो विरोधतः॥
१६७५॥§ 5586

स्वसाध्यायां समर्थं चेदन्यस्यामक्षमं ननु।
तदेतद्धि द्विरूपत्वं नैवैकत्रास्ति वस्तुनि॥
१६७६॥§ 5588

अन्यदेवासमर्थं तु यद्यन्यस्याभितीष्यते।
द्वे तदा वस्तुनी प्राप्ते तन्नैकस्य द्विरूपता॥
१६७७॥§ 5590

यदर्थक्रियाकारि तत्सत्, यथा सत्त्वेनाभिमतं रूपं, अ(न)र्थक्रियाकारि चासत्त्वेनाभिमतं रूपमिति स्वभावहेतुः। यौ च परस्परविरुद्धौ न तयोरेकस्मिन्वस्तुनियुगपदुपलयनं, यथा छायातपयोः शीतोष्णयोर्वा, परस्परविरुद्धे 478/k च सदसद्रूपे, इति व्यापकविरुद्धोपलब्धिः। स्वसाध्यायामित्यादिना परो हेतोरसिद्धिमुद्भावयति। तथाहि—तदेवैकं वस्तु स्वसाध्यायामर्थक्रियायां समर्थम्, अन्यसाध्यायां त्वसमर्थं, ततश्चार्थक्रियाकारित्वलक्षणो हेतुरसिद्धः। नहि परसाध्यामर्थक्रियामपेक्ष्यार्थक्रियाकारित्वं वस्तुनः सिद्धम्। नच सदसद्रूपयोः परस्परविरोधः, अपेक्षाभेदात्। तथाहि—स्वसाध्यामर्थक्रियामपेक्ष्य सदुच्यते, अन्यसाध्यां त्वपेक्ष्यासदिति, यदि तु स्वसाध्यामेवापेक्ष्यासदुच्येत स्यात्परस्परविरोधः। अत्र परिहारमाह—ननु तदेवेति। यदेव स्वसाध्यायां

समर्थं वस्तुस्वरूपं तदेव परसाध्यायामसमर्थं नान्यत्। नह्यपेक्षाभेदेन शब्दभेदाद्वस्तु भिद्यते। निरंशत्वात्तस्य। तदिति। तस्मादर्थे तत्। तस्मात् नैकत्र द्विरूपत्वमस्ति। अथान्यदेव रूपमन्यसाध्यायामर्थक्रियायामसमर्थं नतु तदेवेत्याह—अन्यदेवेति। एवं तर्हि यदर्थक्रियासमर्थं तदेकं वस्तु, यच्चासमर्थं तद्द्वितीयमिति वस्तुद्वयमेव केवलं भवता प्रतिपादितम्, नत्वेकस्योभयात्मत्वम्॥ १६७५॥ ॥ १६७६॥ १६७७॥ § 5591

प्रमाणनिवृत्तिमात्रात्मके तृतीयेऽभावलक्षणे दूषणमाह—अभावस्येत्यादि। § 5592

अभावस्य च वस्तुत्वे पूर्वमङ्गीकृते सति।
नीरूपता पुनस्तस्य किमर्थमुपवर्ण्यते॥
१६७८॥§ 5594

पूर्वमङ्गीकृत इति। साऽत्मनोऽपरिणामो वा विज्ञानं वाऽन्यवस्तुनीति वचनात्। नीरूपता पुनस्तस्येति। मानमप्येवमिष्यतामिति वचनाद्विषयाधिगमलक्षणत्वात्प्रमाणस्य न युक्तं नीरूपस्य प्रामाण्यमिति वक्ष्यमाणोऽभिप्रायः॥ १६७८॥ § 5595

तमेवाभिप्रायं दर्शयन्नाह—नीरूपस्येत्यादि। § 5596

नीरूपस्य हि विज्ञानरूपहानौ प्रमाणता।
न युज्यते प्रमेयस्य सा हि संवित्तिलक्षणा॥
१६७९॥|§ 5598

सेति। प्रमाणता। यत्प्रमेयाधिगतिरूपं न भवति न तत्प्रमाणं, यथा घटादि, प्रमेयाधिगतिशून्यश्चाभाव इति व्यापकानुपलब्धिः॥ १६७९॥ § 5599

स्यादेतच्चक्षुरादयो न प्रमेयाधिगतिरूपाः, अथ च प्रमेयाधिगतिहेतुत्वात्प्रमाणमुच्यन्ते, तद्वदभावोपीत्यनैकान्तिको हेतुरित्याह—तद्धेतुत्वादित्यादि। § 5600

तद्धेतुत्वात्प्रमाणं चेच्चक्षुरादिवदुच्यते।
न नीरूपस्य हेतुत्वसम्भवोऽस्ति कदाचन॥
१६८०॥§ 5602

479/k

ज्ञानरूपविविक्तश्च सोऽभावो गम्यते कथम्।
तद्गोचरप्रमाभावादेवं तर्ह्यनवस्थितिः॥ १६८१॥§ 5604

वस्त्वभावात्प्रमाणस्य प्रमाभावाच्च वस्तुनः।
नास्तिता यदि गम्येत भवेदन्योन्यसंश्रयः॥
१६८२॥§ 5606

तस्मादेकस्य या दृष्टिः सैवान्यादृष्टिरुच्यते।
सा च स्वतन्त्रसंसिद्धिः स्वरूपेणाजडत्वतः॥
१६८३॥§ 5608

नच प्रमाणहेतुत्वादुपचारेण कल्पना युक्ता, यतो नीरूपस्य सर्वसामर्थ्यविरहलक्षणत्वान्न हेतुत्वसम्भवो युक्तः। सम्भवे वा नीरूपताहानिप्रसङ्गात्। तस्याविशेषात्तद्भावे विज्ञानानुपरमप्रसङ्गाच्च। किंच—नासिद्धस्य गमकत्वं युक्तमतिप्रसङ्गादिति पूर्वमुक्तम्, सा च तस्याभावस्य सिद्धिः कथमिति वक्तव्यम्, न तावत्स्वत एव तस्य सिद्धिः, प्रमेयाभावस्यापि स्वत एव सिद्धिप्रसङ्गात्। ततश्चाभावकल्पना व्यर्थास्यात्, प्रमेयाभावसिद्ध्यर्थत्वात्तस्याः, तस्य च प्रमेयाभावस्य प्रमाणाभाववत्स्वत एव सिद्धत्वात्। नापि स्वसंवित्त्या तस्य सिद्धिः, यतो ज्ञानरूपविविक्तोऽसौ कथं स्वसंवित्त्या गम्येत। ज्ञानात्मन एव तयाधिगमात्। अथान्यस्मात्तद्विषयप्रमाणाभावात्तत्सिद्धिः, तस्यापि तद्विषयस्य प्रमाणाभावस्य कथं सिद्धिः ?, तस्याप्यन्यतः सिद्धावनवस्था स्यात्। यथोक्तम्—अन्यथार्थस्य नास्तित्वं गम्यतेऽनुपलम्भतः। उपलम्भस्य नास्तित्वमन्येनेत्यनवस्थितिरिति। अथ माभूदनवस्थितिः, प्रमेयाभावात्तस्य सिद्धिरभ्युपगम्यते। एवं सतीतरेतराश्रयत्वं प्राप्नोति। तथाहि—वस्तुनः प्रमेयस्याभावात्प्रमाणाभावसिद्धिः तस्य सिद्धौ च प्रमेयाभावसिद्धिरिति स्फुटतरमेवात्रावतरतीतरेतराश्रयदोषः। तदयं गड्डुप्रवेशेऽक्षताराविनिर्गमः। तस्मादेकोपलब्धिरेवान्यस्यानुपलब्धिरिति नाभावो नाम पृथक्प्रमाणं प्रत्यक्षात्। स्यादेतत्साऽप्येकोपलब्धिः कथं सिद्धा, तत्राप्यभाववत्समानप्रसङ्ग इत्याह—सा चेत्यादि। सा चैकस्य दृष्टिः स्वयमेव स्वतन्त्रा सिद्धा नान्यत इति नानवस्थाप्रसङ्गः। कस्मात् ?। स्वरूपेण—प्रकृत्यैव, अजडरूपत्वात्—प्रकाशस्वभावत्वात्। नच सत्तामात्रेण संवित्तावतिप्रसङ्गोऽन्येषामतद्रूपत्वात्॥ १६८०॥ १६८१॥ १६८२॥ १६८३॥ § 5609

अथ परतो बुद्धिसंसिद्धौ कः प्रद्वेष इत्याह—बुद्धेरित्यादि। § 5610

बुद्धेरपरतः सिद्धिर्लिङ्गाद्बुद्ध्यन्तरादपि।
अन्यथाऽनुपपत्तेर्वा सर्वथाऽपि न सम्भवः॥
१६८४॥§ 5612

480/k

त्रयपर्यनुयोगस्य प्रत्येकं सति सम्भवे।
अनवस्थितयो बह्व्यो विसर्पिण्यः स्युरत्र ते॥
१६८५॥§ 5614

तुल्ययोग्यात्मनस्तस्मादेकस्यैवोपलम्भनात्।
असन्निश्चययोग्यत्वमन्येषां संप्रतीयते॥
१६८६॥§ 5616

एकस्य कस्य संवित्तावचन्द्रं गम्यते नभः।
सर्वशब्दविवेकश्च क्वचिन्निश्चीयते कथम्॥
१६८७॥§ 5618

केचिल्लिङ्गसमधिगम्यां बुद्धिमिच्छन्ति, तच्च लिङ्गमर्थज्ञानं वा क्रियारूपं इन्द्रियार्थो वा व्यक्तो वा विषय इत्यादिकम्। केचिद्बुद्ध्यन्तरप्रत्यक्षां बुद्धिमिच्छन्ति, न स्वसंविद्रूपां, स्वात्मनि कारित्व(कर्मत्व ?)विरोधात्। केचिज्ज्ञातार्थान्यथानुपपत्त्या, ज्ञातोऽर्थो न सिद्ध्यति यदि बुद्धिर्न भवेत्, तस्य स्वयं जडरूपत्वात्। अतः पक्षत्रयमुक्तम्। तस्य लिङ्गादित्रयस्य यः प्रत्येकं पर्यनुयोगः, तस्यापि लिङ्गादेः कुतः सिद्धिरिति, तस्य सम्भवे सति बह्व्योऽनवस्थितयः प्रसर्पन्ति। तथाहि—तदपि लिङ्गादित्रयं बुद्धेरसिद्धावसिद्धमिति तस्यापि परतः सिद्धिरन्वेष्टव्या, तत्राप्यपरलिङ्गादिसमाश्रयणे सर्वत्र पर्यनुयोगे चानवस्थाप्रसङ्गः। तस्मादेकस्योपलम्भादन्येषामसत्त्वं प्रतीयते, तद्देशकालस्य निषेधे कर्त्तव्ये तुल्ययोग्यात्मनामेव निषेधः कार्यः। अन्येषां तत्र निषेद्धुमशक्यत्वात्। तादात्म्यनिषेधे तु सर्वस्यैव निषेधः कार्यो दृष्टः, तदन्यत्वेन सर्वस्य व्यवस्थापनात्। तदात्मा न परात्मेति कृत्वा। ननु चाकाशे चन्द्राभावंयदाऽध्यवस्यति तदा नैकस्य तत्रोपलम्भः येनोच्यते एकोपलाम्भादन्याभावसिद्धिरिति, न ह्याकाशं नाम किंचित्परमार्थतोऽस्ति, यच्चन्द्रविविक्तं दृश्येत। यदपि परैर्वस्तु सत्कल्पितं, तदप्यतीन्द्रियं, यश्च क्वचित्प्रदेशे शब्दाभावनिश्चयः, स कस्योपलम्भात्। न तावद्भूभागोपलम्भादिति वक्तव्यम्,

तस्य शब्देनातुल्ययोग्यावस्थत्वात्। तथाहि—भूभागश्चाक्षुषः, शब्दस्तु श्रावणः, तुल्ययोग्यावस्थयोश्च परस्परापेक्षमन्यत्वमिष्टम्, एकज्ञानसंसर्गिणोऽपरस्परापेक्षमन्यत्वमिति वचनात्। नापि कालस्योपलम्भादिति वाच्यम्, नहि परा(दा ?)र्थव्यतिरिक्तः कालोऽस्ति यस्योपलम्भः स्यात्। योऽपि परैरिष्टांश(स्सोऽ)प्यतीन्द्रियः॥ १६८४॥ १६८५॥ १६८६॥ १६८७॥ § 5619

प्रकाशेत्यादिना प्रतिविधत्ते। § 5620

प्रकाशतमसो राशेस्तमेव व्योम मन्यते।
प्रतिपत्ता यतोऽन्यस्य न सत्त्वं न च दर्शनम्॥
१६८८॥ § 5622

481/k

सर्वशब्दविवेकोऽपि कार्यादृष्टेः प्रतीयते।
सा च सिद्धाऽन्ततोऽन्येषां विज्ञानानां स्ववेदनात्॥
१६८९॥ § 5624

राशेरिति। संवित्ताविति सम्बन्धः। यस्मात्तमेव प्रकाशतमसो राशिमाकाशमिति प्रतिपत्ता प्रतिपद्यते, नान्यत्। तथाहि—दिवा निशि वेदमिन्द्रनीलसङ्काशमिदं जलधरनिकाशमिति वा प्रतिपद्यते। न चाकाशस्य परिकल्पितस्य वर्णसंस्थानादिरस्ति।ततोऽन्यस्येति। प्रकाशतमोराशिव्यतिरेकेण परपरिकल्पितस्याकाशस्यासत्त्वात्।सत्त्वेवाऽतीन्द्रियत्वात्। सर्वशब्दविवेकोऽपि श्रोत्रज्ञानस्य कार्यस्यानुपलब्ध्या गम्यते। सा चानुपलब्धिरन्येषां चक्षुरादिज्ञानानां संवेदनात्सिद्धेत्यस्त्येवात्राप्येकोपलम्भोऽन्यविज्ञानसंवेदनलक्षणः। ननु नहि कार्यसत्तया कारणसत्ता व्याप्ता, येन सा कार्यसत्ता निवर्त्तमाना तामपि निवर्त्तयेत्। यतो नावश्यं कारणानि वर्द्धति (अर्थवन्ति ?) भवन्ति। न ब्रूमः सर्वा कारणसत्ता कार्यसत्तया व्याप्तेति, किं तर्हि ?, विशिष्टैवाऽप्रतिबद्धसामर्थ्यलक्षणा, तस्या एवात्र निषेधः क्रियते, न सर्वस्याः। तथाहि—यत्रापि केवलप्रदेशोपलम्भाद्धटाभावसिद्धिः, सापि घटोपलम्भाख्यकार्यानुपलब्धिरेव। यत उपलब्धिलक्षणप्राप्तस्यैव घटस्याभावः साध्यते, न सर्वस्य। कश्चोपलब्धिलक्षणप्राप्तः ?। य एवाप्रतिबद्धसामर्थ्यः। यत उपलब्धिलक्षणं स्वभावविशेषो वर्णितः—यः स्वभावः स प्रत्यक्ष एव भवतीति। अन्यथा ह्यत्रापि घटोपलब्ध्या घटसत्ता न व्याप्ता स्यात्ततश्चाव्यापकस्य निवृत्तौ नाव्याप्तस्य निवृत्तिरिति ततो घटाभावो न सिद्ध्येत्।तस्मात्सर्वैव स्वभावानुपलब्धिरसद्व्यवहारहेतुः। परमार्थतः कार्यानुपलब्धिरेव द्रष्टव्या॥ १६८८॥ १६८९॥ § 5625

इत्थमित्यादिनाऽभावशब्दवाच्यत्वादित्यस्य हेतोरनैकान्तिकत्वमाह— § 5626

इत्थं च वस्तुरूपत्वे स्थितेऽभावप्रमात्मनः।
अभावशब्दवाच्यत्वमन्तर्भावेऽप्यबाधितम्॥
१६९० ॥§ 5628

इत्थमिति। एकस्य या दृष्टिः सैवान्या दृष्टिरुच्यत इत्यादिना। अन्तर्भावेऽप्यबाधितमिति। अभावस्य प्रत्यक्षान्तर्भावेऽप्यभावशब्दवाच्यत्वमविरुद्धमित्यर्थः। एतेन हेतोर्विपक्षादव्यावृत्तिमाह॥ १६९०॥ § 5629

अभावो वा प्रमाणेन स्वानुरूपेण मीयते।
इत्यत्र सिद्धसाध्यत्वं तादृश्यस्त्यनुरूपता॥ १६९१॥
इत्यभावविचारः।§ 5632

482/k

तादृश्यस्त्यनुरूपतेति। अन्योपलब्धिलक्षणानुपलब्धिरभावः (इति)। यद्याप्येके चोदयन्ति—ननु वस्त्वभावमात्रालम्बनस्य प्रत्ययस्य प्रत्यक्षादौ न क्वचिदन्तर्भावोऽस्ति, वस्तुविरहमात्रालम्बनत्वादस्य, प्रत्यक्षादेश्च वस्तुविषयत्वात्। नचास्याप्रामाण्यमविसंवादित्वात्, नहि भवद्भिर्वस्तूनां निरन्वयं विनाशमिच्छद्भिर्वस्तुविरहो नेष्यत इति। तदप्यनेन प्रत्युक्तम्। नही तेन विकल्पे(न) तद्देशकालादिविशेषणरहितमभावमात्रमालम्ब्यते। किं तर्हि। क्वचिद्देशादौ घटादि नास्तीत्यनेन रूपेण सविशेषणमेव। तच्च केवलस्यैव देशादेर्ग्रहणसामर्थ्यादेवं भवतीति न पृथगस्य प्रामाण्यम्, प्रत्यक्षगृहीतस्यैव केवलस्य देशादेस्तथा विकल्पनात्। सत्यपि वा निर्विशेषणस्याभावस्य ग्रहणे न तद्ग्राहिणो ज्ञानस्य प्रामाण्यं युक्तमवस्तुविषयत्वात्। अर्थक्रियार्थिनां च प्रमाणचिन्ताया वस्त्वधिष्ठानत्वादिति यत्किंचिदेतत्॥ १६९१॥ § 5633

इत्यभावविचारः।

०.२०.५ युक्त्यनुपलब्धिविचारः।

युक्त्यनुपलब्धी अधिकृत्याह—अस्मिन्सतीत्यादि। § 5635

अस्मिन्सति भवत्येव न भवत्यसतीति च।

तस्मादतो भवत्येव युक्तिरेषाऽभिधीयते॥
१६९२॥§ 5637

प्रमाणान्तरमेवेयमित्याह चरको मुनिः।
नानुमानमियं यस्माद्दृष्टान्तोऽत्र न लभ्यते॥
१६९३॥§ 5639

उपलब्ध्या यया योऽर्थो ज्ञायते तदभावतः।
नास्तित्वं गम्यते तस्यानुपलब्धिरियं मता॥
१६९४॥§ 5641

प्रमाणान्तरमेषाऽपि दृष्टान्ताद्यनपेक्षणात्।
दृष्टान्तेऽपि हि नास्तित्वमनयैव प्रसिद्ध्यति॥
१६९५॥§ 5643

तद्भावभावित्वेन यत्कार्यताप्रतिपत्तिरियं युक्तिः, इयं च सविकल्पकत्वान्न प्रत्यक्षं, नाप्यनुमानं, दृष्टान्ताभावात्, तथाहि—दृष्टान्तोऽपि—अत एव तद्भावभावित्वात्तत्कार्यताप्रतिपत्तिः, तत्रापि दृष्टान्तोऽन्वेषणीयस्तत्राप्यपर इत्यनवस्था स्यात्, तस्मात्प्रमाणान्तरमेवेयमित्याह चरको—वैद्यः। तथा या चोपलब्धिनिवृत्त्या नास्तित्वप्रतीतिरियमनुपलब्धिः। अस्या अपि प्रमाणान्तरत्वे युक्तिवदेव न्यायोऽन्वेषणीयः ॥ १६९२॥ १६९३॥ १६९४॥ १६९५॥
§ 5644

483/k

कार्येत्यादिना प्रतिविधत्ते। § 5645

कार्यकारणताभावप्रतिपत्तिर्न संयता।
तदत्रास्यां न भेदोऽस्ति साध्यसाधनयोर्यतः॥
१६९६॥§ 5647

कार्यकारणभावोऽभावश्चेति कार्यकारणताभावौ, तयोः प्रतिपत्तिरिति विगृह्य समासः, तत्र कार्यकारणताप्रतिपत्तिर्युक्त्या, अभावप्रतिपत्तिरनुपलब्ध्येति यथाक्रमं सन्बन्धः। अस्यामिति। युक्तावनुपलब्धौ च प्रमाद्वयेऽपि न साध्यसाधनयोर्भेदः ॥ १६९६॥ § 5648

कथमित्याह—तद्भावेत्यादि। § 5649

तद्भावभावितां मुक्त्वा न हेतुफलताऽपरा।
दृश्यादृष्टिं विहायान्या नास्तिता न प्रतीयते॥
१६९७॥§ 5651

युक्तौ तावन्न साध्यसाधनयोर्भेदः, तथाहि—तद्भावभाविता हेतुः, कार्यकारणता साध्या, न चानयोर्भेद उपलभ्यते, पर्यायत्वात्तरुपादपवत्। अनुपलब्धावपि च न भेदः, तथाहि—यद्युपलम्भनिवृत्तिमात्रं विवक्षितं तदा तस्यासिद्धत्वात्पूर्ववदनवस्थादिदोषो वाच्यः। अथान्योपलब्धिरेवानुपलब्धिस्तदा दृश्यानुपलब्धावेवान्तर्भावः। अनया च नाभावः साध्यते, तस्य प्रत्यक्षेणैव सिद्धत्वात्। अत एवाह—दृश्यादृष्टिं विहायेत्यादि॥ १६९७॥ § 5652

अथ मतं नाभ्यां कार्यकारणताऽभावौ साध्येते, किं तर्हि, व्यवहार इति, तत्राह —तद्भावव्यवहार इत्यादि। § 5653

तद्भावव्यवहारे तु योग्यतायाः प्रसाधने।
सङ्केतकाले विज्ञातो विद्यतेऽर्थो निदर्शनम्॥
१६९८॥

इति युक्त्यनुपलब्धिविचारः।§ 5656

तयोर्हेतुफलताभावयोर्भावस्तद्भावस्तत्र व्यवहारो यः स तद्भावव्यवहारः। ज्ञानाभिधानप्रवृत्तिलक्षणमनुष्ठानं तस्मिन्योग्यता साध्यते। प्रयोगश्च—ये यद्व्यापारानन्तरनियतोपलभ्यस्वभावास्ते तत्कार्यव्यवहारयोग्याः, तद्यथा सङ्केतकालानुभूताःकुलालादिव्यापारानन्तरोपलभ्यस्वभावा घटादयः, तथाच ताल्वादिव्यापारानन्तरनियतोपलभ्यस्वभावाः शब्दा इति स्वभावहेतुः। तथानुपलब्धावपि व्यवहारेसाध्ये प्रयोगः—येषामुपलब्धिलक्षणप्राप्ताभिमतानां येष्वनुपलब्धिस्ते तदभावव्यवहारयोग्याः, तद्यथा विषाणाभावव्यवहारयोग्याः शशशमस्तकादयः, उपलब्धिलक्ष णप्राप्ताभिमतानां पराभिमतसामान्यादिप- 484/k
दार्थानामनुपलब्धिश्च तदाश्रयत्वेनेष्टेषु सावलेयादिष्विति स्वभावानुपलब्धिः। तद्विविक्तानां सावलेयादीनामुपलम्भान्नासिद्धिः, नाप्यनैकान्तिकता हेतोरभिव्यक्तेर्निराकरिष्यमाणत्वात्, एतावन्मात्रनिबन्धनत्वाद्याभावव्यवहृतेः, नापि विरुद्धता सपक्षे भावादिति॥ १६९८॥ § 5657

इति युक्त्यनुपलब्धिविचारः।

०.२०.६ सम्भवविचारः।

तत्र सम्भवश्च लक्षणया समुदायः। सम्भवप्रतिपत्तौ समुदायिप्रतिपत्तिः। यथा— सहस्रसद्भावे ज्ञाते शतादिसत्ताप्रतिपत्तिः। इदं च किल दृष्टान्ताभावान्नानुमानम्। § 5659

अत्र दूषणमाह—समुदायेत्यादि। § 5660

समुदायव्यवस्थाया हेतवः समुदायिनः।
शतादिसम्भवज्ञानं सहस्रात्कार्यलिङ्गजम्॥ १६९९॥
इति सम्भवविचारः।§ 5663

यस्मात्समुदायिभ्योऽन्यस्य समुदायस्याभावात्समुदायव्यवस्थायाः समुदायिन एव कारणं तस्मात्सहस्राच्छतादिसंभवप्रतीतिः कार्यलिङ्गजैव॥ १६९९॥ § 5664

इति सम्भवविचारः।

०.२०.७ ऐतिह्यादिविचारः।

अन्ये त्वैतिह्यादि च प्रमाणान्तरमिच्छन्ति, तत्रानिर्दिष्टवक्तृकं प्रवादपारम्पर्यमैतिह्यम्। यथा—इह वटे यक्षः प्रतिवसतीति। अनियतदेशकालमाकस्मिकं सदसत्सूचकं ज्ञानं प्रतिभा। यथा—कुमार्या ए भवति, अद्य मे भ्राता आगमिष्यतीति। तच्च किल तथैव भवतीति प्रमाणम्। अत्र दूषणमाह—ऐतिह्येत्यादि। § 5666

ऐतिह्यप्रतिभादीनां भूयसा व्यभिचारिता।
नैवेदृशां प्रमाणत्वं घटतेऽतिप्रसङ्गतः॥ १७००॥
इत्यैतिह्यादिविचारः।§ 5669

आदिशब्देन प्रत्यभिज्ञादीनां ग्रहणम्। तेषामपि परैः कैश्चित्प्रमाणत्वेन गृहीतत्वात्। अतिप्रसङ्गत इति। स्वप्नान्तिकस्यापि कदाचित्सत्यतादर्शनात्प्रमाणान्तरत्वंस्यात्॥ १७००॥ § 5670

इत्यैतिह्यादिविचारः।

485/k

एवं विस्तरेण प्रमाणान्तरं निराकृत्य सङ्क्षेपेण निराकुर्वन्नाह—अथवेत्यादि। § 5672

अथवाऽस्थान एवायमायासः क्रियते यतः।
प्रत्यक्षश्च परोक्षश्च द्विधैवार्थो व्यवस्थितः॥
१७०१॥§ 5674

द्विविध एव ह्यर्थः प्रत्यक्षः परोक्षश्च॥ १७०१॥ § 5675

ननु चापरोऽप्यस्ति प्रत्यक्षाप्रत्यक्षः, नैव प्रत्यक्षो नाप्यप्रत्यक्ष इत्याह—उभयेत्यादि। § 5676

उभयानुभयात्मा हि नैवासौ युज्यते परः।
एकस्यैकत्र विज्ञाने व्याहते हि क्रियाक्रिये॥
१७०२॥§ 5678

साक्षाद्धि ज्ञानजनकः प्रत्यक्षो ह्यर्थ उच्यते।
यथोक्तविपरीतस्तु परोक्षः कृतिभिर्मतः॥
१७०३॥§ 5680

आद्यार्थविषयं तावन्नेदं शाब्दोपमादिकम्।
प्रत्यक्षेऽन्तर्गतिप्राप्तेर्वैफल्यं वा स्मृतेरिव॥
१७०४॥§ 5682

परोक्षविषयत्वेऽपि सर्वेषां विषयः कथम्।
यदि साक्षात्परोक्षोऽयं न स्यात्प्रत्यक्षवस्तुवत्॥
१७०५॥§ 5684

परव्यपाश्रयेणापि प्रतिपत्तौ किमस्य सा।
सम्बद्धेतरतो नो वा भेदाभासा न वा तथा॥
१७०६॥§ 5686

असम्बद्धात्तदुद्भूतावव्यवस्था प्रसज्यते।
न च संगच्छते व्याप्तिर्भेदाभासा भवेद्यदि॥
१७०७॥§ 5688

परोक्षविषया यावत्सम्बद्धार्थसमाश्रया।
अपरामृष्टतद्भेदा प्रतीतिरनुमा स्फुटा॥ १७०८॥
इति प्रमाणान्तरपरीक्षा।§ 5691

न ह्येकस्यान्योन्यप्रत्यनीकानेकधर्मसम्पातो युक्तः, एकत्वहानिप्रसङ्गात्, तथाहि—विशिष्टस्याव्यवधानेन यथागृहीतार्थावसायकारणस्य ज्ञानस्य साक्षाल्लिङ्गादिव्यवधानं विना जनकोऽर्थः प्रत्यक्ष उच्यते। एवं च कृत्वा क्षणिकः शब्द इत्यादिज्ञानमप्रत्यक्षार्थमिति सिद्धम्। नचैकस्य पदार्थस्यैकत्र क्रियाक्रिये युक्ते, येन विज्ञानजनकत्वाजनकत्वाभ्यां प्रत्यक्षाप्रत्यक्षस्वभावो भवेत्। नाप्यनुभयस्वभावो युक्तः, एकस्वभावनिषेधस्यापरस्वभावविधिनान्त-
486/k रीयकत्वाद्वस्तुनः। अनेकस्य तु नैकत्र क्रिया क्रियाविरोधः, यथा रूपरसयोश्चक्षुर्विज्ञाने, तथैकस्यानेकस्मिन्, यथा रूपस्य चक्षुःश्रोत्रविज्ञानयोः, तदर्थमेकस्यैकत्रेति चाह। तस्माद्विविध एवार्थः। तत्र शब्दादीनां प्रामाण्यं भवत्प्रत्यक्षे वार्थे भवेत्परोक्षे वेति पक्षद्वयम्। न तावदाद्येऽर्थे, कस्मात्प्रत्यक्षेन्तर्गतिप्राप्तेः, शाब्दादीनामभिन्नार्थविषयत्वात्। अथ प्रत्यक्षेणाधिगते सत्युत्तरकालं तैः पुनरधिगमः क्रियते, अत आह—वैफल्यं वा। गृहीतग्रहणात्स्मृतिवदप्रामाण्यप्रसङ्गात्। द्वितीयेऽपि पक्षे स परोक्षोऽर्थो विषयो भवन्साक्षाद्वा स्याद्व्यवधानाद्वापराश्रयेण, तत्र तावन्न साक्षात्तस्यापरेक्षत्वप्रसङ्गात्प्रत्यक्षार्थवत्। यस्मादत एवासौ परोक्ष उच्यते यतः साक्षान्न ज्ञानं जनयति, साक्षात्स चेज्ज्ञानं जनयेत्कथमसौ परोक्ष इति वचनीयमेतत्। पराश्रयेणापि परोक्षार्थप्रतिपत्तिः सम्बद्धाद्वा स्यादसम्बद्धाद्वा, भेदाभासा वा स्यादभेदाभासा वेति चत्वारः पक्षाः सम्भवन्ति। भेदाभासायथा—धूमसामान्यात्तार्णपार्णादिवह्निविशेषप्रतीतिः। अभेदाभासा यथा—धूमाद्विजातीयपरावृत्तवह्निमात्राध्यवसायिनी। तत्रासम्बन्धात्प्रतिपत्तावव्यवस्था स्यात्,यतः कुतश्चित्सर्वः प्रतीयेत। अथ भेदाभासा, तदा व्याप्तिः साध्येन हेतोर्न सङ्गच्छेत, विशेषेणान्वयायोगात्। ततश्चानैकान्तिकं स्यात्। अथाभेदाभासा तदाऽनुमान एवान्तर्भाव इति प्रतिपादयन्नाह—परोक्षविषयेत्यादि। अपरामृष्टतद्भेदेति। भेदप्रतिभासशून्या विजातीयपरावृत्तार्थमात्राध्यवसायिनी। यथा धूमाद्वह्निमात्रप्रतीतिः। एवम्भूता चेत्स्पष्टमेवानुमानं, सम्बन्धदर्शनोपायत्वात्, धूमाद्वह्निप्रतीतिवत् ॥ १७०२॥ १७०३॥ १७०४॥ १७०५॥ १७०६॥ १७०७॥ १७०८॥ § 5692

इति प्रमाणान्तरपरीक्षा।

०.२१ स्याद्वादपरीक्षा।

अणीयसापि नांशेन मिश्रीभूतापरात्मकमित्येतत्समर्थनार्थं चोद्योपक्रमपूर्वकमाह—नन्वित्यादि। § 5694

नन्वनेकात्मकं वस्तु यथा मेचकरत्नवत्।
प्रकृत्यैव सदादीनां को विरोधस्तथा सति॥
१७०९॥§ 5696

यदुक्तम्— अर्थक्रियासमर्थं च सदन्यदसदुच्यते। समावेशो न चैकत्र तयोर्युक्तो विरोधतः॥ इति। तदत्राह्री(?)कादयश्चोदयन्ति। सर्वमेव वस्तु सामान्यविशेषात्मकत्वेनानेकात्मकं, यथा शबलाभासं रत्नं, तत्कथं सदादीनां विरोधः, येनोच्यतेसमावेशो न चैकत्रे ति। आदिशब्देन क्रियाक्रियैकत्वादयो गृह्यन्ते। यद्यपि चेदं चोद्यं ननु तदेवेत्यादिना परिहृतं, तथापि विस्तरेण 487/k
प्रतिपादनाय वादान्तरं वा दर्शयितुं पुनरुच्यते॥ १७०९॥ § 5697

तत्र सामान्यविशेषात्मकत्वसाधनाय यथाक्रममह्री(?)कः प्रयोगद्वयमाह—भाव इति। § 5698

भावो भावान्तरातुल्यः खपुष्पान्न विशिष्यते।
अतुल्यत्वविहीनश्चेत्तेभ्यो भिन्नो न सिद्ध्यति॥
१७१०॥§ 5700

किंचिद्विवक्षितं वस्तु घटादि, स यदि घटादिर्भावः पटादिना भावान्तरेणातुल्यः स्यात्—ततो यदि व्यावृत्तः स्यात्, तदा खपुष्पान्न तस्य विशेषः स्यात्, सर्वथा वस्त्व(?)न्तराद्व्यावृत्तत्वात्, नच वस्त्वन्तराद्व्यावृत्तस्यान्या गतिः सम्भवति खपुष्पतां मुक्त्वा। तस्मात्तस्य वस्तुनः खपुष्पातुल्यत्वमभ्युपगच्छता भावान्तरतुल्यत्वं वस्तुत्वं नाम सामान्यमभ्युपगन्तव्यमिति सिद्धं सामान्यात्मकत्वम्। विशेषात्मकत्वं तर्हि कथमिति चेदत्रोच्यते—अतुल्यत्वविहीनश्चेत्तेभ्यो भिन्नो न सिद्ध्यति—स एव घटादिर्भावो यदि पटादिना भावेन यदतुल्यत्वं तेन विहीनः स्यात्, तेन घटादिना यद्यतुल्यो न भवेदिति यावत्। तदाऽयं घटोऽयं च पट इति पदादिभ्यो घटादिर्भिन्नो न सिद्ध्येत्, स्वस्वरूपवत्। भिद्यते च। तस्माद्विशेषात्मकत्वमपि सिद्धम् ॥ १७१०॥ § 5701

सर्वथाऽपीत्यादिनाऽस्यैव प्रयोगद्वयस्यार्थं विस्तरेण समर्थयते। § 5702

सर्वथाऽपि ह्यतुल्यत्वे ह्यभिप्रेतेऽस्य वस्तुनः।

वस्त्वन्तरेण नियतं वस्तुत्वमवहीयते॥ १७११॥§ 5704

वस्तुनो हि निवृत्तस्य क्वान्या सम्भविनी गतिः।
लक्ष्यते नास्तितां मुक्त्वा तारापथसरोजवत्॥
१७१२॥§ 5706

तस्मात्खपुष्पातुल्यत्वमिच्छता तस्य वस्तुनः।
वस्तुत्वं नाम सामान्यमेष्टव्यं तत्समानता॥
१७१३॥§ 5708

अन्यथा हि न सा बुद्धिरित्यादिना सामान्यात्मकत्वसाधनायोपपत्त्यन्तरमाह। § 5709

अन्यथा हि न सा बुद्धिर्बलिभुग्दशनादिषु।
वर्त्तेत नियता त्वेषा भावेष्वेवेति किं कृतम्॥
१७१४॥§ 5711

सारूप्यान्नियमोऽयं चेत्सामान्यं च तदेव नः।
स्वभावानुगता शक्तिरनेनैवोपवर्णिता॥
१७१५॥§ 5713

488/k

अत्यन्तभिन्नता तस्माद्घटते नैव कस्यचित्।
सर्वं हि वस्तुरूपेण भिद्यते न परस्परम्॥
१७१६॥§ 5715

अन्यथेति। यदि च भावो भावान्तरातुल्यः स्यात्तदा किमिति घटादिष्वेव भावो भाव इत्यभिन्ना बुद्धिर्भवति नतु काकदन्तादिष्विति तत्र कारणं वक्तव्यम्, सारूप्यं कारणमिति चेत्तदेव तर्हि सामान्यमिति सिद्धं, सामान्यपर्यायत्वात्सारूप्यस्य। अनुयायिनी शक्तिरस्ति घटादिष्वेव, न काकदन्तादिषु, अतः स्वभावानुगता शक्तिः कारणमिति चेत्। साऽप्यनेनैव सारूप्येणोपव-

र्णिता—व्याख्याता। सारूप्यवदत्रापि समानमुत्तरमिति यावत्। तस्या एव सामान्यरूपत्वप्रसङ्गात्। तस्माद्वस्तुरूपेण सर्वं घटादि परस्परमभिन्नमिति सिद्धम्॥ १७१४॥ १७१५॥ १७१६॥ § 5716

भेदसमर्थनार्थमाह—अवधीकृत इत्यादि। § 5717

अवधीकृतवस्तुभ्यो वैरूप्यरहितं यदि।
तद्वस्तु न भवेद्भिन्नं तेभ्योऽभेदस्तदात्मवत्॥
१७१७॥ § 5719

तेभ्यः स्वरूपं भिन्नं हि वैरूप्यमभिधीयते।
वैरूप्यं न च भिन्नं चेत्येतदन्योन्यबाधितम्॥
१७१८॥ § 5721

तस्माद्भिन्नत्वमर्थानां कथंचिदुपगच्छता।
वैरूप्यमुपगन्तव्यं विशेषात्मकताऽप्यतः॥
१७१९॥ § 5723

अवधीकृतेभ्य इति। पटादिभ्योऽर्थान्तरेभ्यो यदि घटादि वैरूप्येण रहितं भवेत्तदाऽभेदात्तेभ्यः पटादिभ्यस्तद्घटादि भिन्नं न भवेदात्मस्वरूपवदभिन्नत्वप्रसङ्गात्। तथाहि—तेभ्यः पटादिभ्यो यद्विभिन्नं स्वरूपं घटादीनां तदेव खलु वैरूप्यमुच्यते नान्यत्। ततश्च सत्यपि वैरूप्ये पटादीनां नच घटादिभ्यो भेदोऽस्तीति स्ववचनव्याहतिः, भेदवैरूप्ययोः पर्यायत्वात्॥ १७१७॥ १७१८॥ १७१९॥ § 5724

एवं सामान्यविशेषात्मकं प्रसाध्य तयोः सामान्यविशेषयोरसाङ्कर्येण व्यवहारहेतुत्वं प्रतिपादयन्नाह—वस्त्वेकात्मकमेवेदमिति। § 5725

वस्त्वेकात्मकमेवेदमनेकाकारमिष्यते।
ते चानुवृत्तिव्यावृत्तिबुद्धिग्राह्यतया स्थिताः॥
१७२०॥ § 5727

आद्या एतेऽनुवृत्तत्वात्सामान्यमिति कीर्त्तिताः।

विशेषास्त्वभिधीयन्ते व्यावृत्तत्वात्ततोऽपरे॥
१७२१॥§ 5729

489/k

अयमत्र परमार्थः—मेचकरत्नवदेकमेव वस्त्वनेकाकारम्, ते चाकाराः केचिदनुवृत्तिबुद्धिग्राह्याः केचिद्व्यावृत्तिबुद्धिग्राह्याः। तत्र येऽनुवृत्तिबुद्धिग्राह्यास्तेऽनुवृत्ततयासामान्यमिति कीर्त्यन्ते, ये तु ततोऽपरे व्यावृत्तिबुद्धिग्राह्यास्ते व्यावृत्तत्वाद्विशेषा इति कल्प्यन्ते, तत्रानुवृत्तिबुद्धिर्भावो भाव इत्याद्यभेदाकारा, व्यावृत्तिबुद्धिर्घटोऽयं न पट इत्येवमादिभेदाकारा॥ १७२०॥ १७२१॥ १७२२ ॥ § 5730

तदत्र प्रतिविधत्ते परस्परस्वभावत्व इत्यादि। § 5731

परस्परस्वभावत्वे स्यात्सामान्यविशेषयोः।
साङ्कर्यं तत्त्वतो नेदं द्वैरूप्यमुपपद्यते॥
१७२२॥§ 5733

परस्परास्वभावत्वेऽप्यनयोरनुषज्यते।
नानात्वमेवम्भावेऽपि द्वैरूप्यं नोपपद्यते॥
१७२३॥§ 5735

अत्र पक्षद्वयम्, किं यदेव सामान्यं स एव विशेषः, आहोस्विदन्यत्सामान्यमन्यो विशेष इति। तत्र प्रथमे पक्षे सामान्यविशेषयोः परस्परस्वभावत्वे साङ्कर्यंस्यात्। ततश्चेदं सामान्यमयं विशेष इति विभागाभावात्परमार्थत एकस्य वस्तुनो द्वैरूप्यं नोपपद्यते। अथ माभूत्साङ्कर्यमिति द्वितीयः पक्षः समाश्रीयते। तत्र परस्परास्वभावत्वेऽप्यङ्गीक्रियमाणे नानात्वं—स्वभावभेदः सामान्यविशेषयोः संप्रसज्यते। एवं ह्यनयोरसांकर्यं भवेद्यद्यनयोर्नानात्वं स्यात्, ततश्चैवम्भावेऽपि—नानात्वेऽपि वस्तुद्वयमेव केवलं जातमिति नैकस्य वस्तुनो द्वैरूप्यं युक्तम्। अथापि स्यात्—यदि नाम सामान्यविशेषयोः परस्परं स्वभावविवेको जातस्तथापि सामान्यविशेषात्मकं वस्त्वभिन्नमेवेति। तदेतत्तु परस्परविरुद्धम्। तथाहि—एकस्माद्वस्तुनः सामान्यविशेषयोरभेदेऽङ्गीक्रियमाणे कथमनयोः परस्परं स्वभावविवेकः सिद्ध्येत्, एकस्मादभेदेतयोरप्यभेदप्रसङ्गादेकवस्तुस्वभाववत्। सामान्यविशेषयोश्च परस्परं स्वभावविवेकेऽङ्गीक्रियमाणे ताभ्यामभिन्नमेकं वस्तु न सिद्ध्येत्, ताभ्यामभिन्नत्वात्तस्याप्येकत्वेनाभिमतस्य द्वित्वप्रसङ्गात्सामान्यविशेषस्वरूपवत्। तस्मादेकमुभयात्मकमिति परस्परव्याहतमेतत्॥ १७२२॥ १७२३॥ § 5736

सत्यपीत्यादिना सुमतेर्मतमाशङ्कते। § 5737

सत्यप्येकस्वभावत्वे धर्मभेदोऽत्र सिद्ध्यति।
भेदसंस्था(ऽ)विरोधश्च यथा कारकशक्तिषु॥
१७२४॥§ 5739

490/k

न दृष्टेऽनुपपन्नं च यत्सामान्यविशेषयोः।
ऐकात्म्येऽपीक्ष्यते भेदलोकयात्रानुवर्त्तनम्॥
१७२५॥§ 5741

स हि चोद्योपक्रमे परिहारं किलात्राह—तत्सामान्यविशेषयोः परस्परस्वभावविरहानभ्युपगमे सङ्कीर्णता प्राप्नोति। नैष दोषः। तयोरेकस्वभावतया सत्यामपि सङ्कीर्णतायां धर्मभेदः प्रसिद्ध्यति कारकशक्तिवत्। तथाहि—बलाहको विद्योतते, बलाहकाद्विद्योतत, इत्यादिकार्यभेदाद्भिद्यमानात्मानः कारणशक्तयः समुपलभ्यन्ते द्रव्यस्वभावाव्यतिरिक्ततया सङ्कीर्णतायामपि सत्याम्। तदनभ्युपगमे लोकशास्त्रविरोधोऽवश्यम्भावी। अपिच। न हि दृष्टेऽनुपपन्नं नाम। तथाहि—सामान्यविशेषयोरेकवस्तुस्वभावत्वेऽप्यसङ्कीर्णताया भेदेऽपि लोकयात्रानुवर्त्तनमुपलभ्यत एव। भेदेन लोकयात्रा भेदलोकयात्रा, साऽनुवर्त्त्यते येनैकात्म्येन तत्तथोक्तम्। प्रयोगः— एकस्य वस्तुनो यो भेदव्यवहारः स धर्मभेदनिबन्धनः, यथा कारकशक्तिषु, भेदव्यवहारश्चायमेकस्मिन्वस्तुनि सामान्यविशेषलक्षण इति स्वभावहेतुः॥ १७२४॥ १७२५॥ § 5742

नन्वित्यादिना प्रतिविधत्ते। § 5743

ननु सत्येकरूपत्वे धर्मभेदो न सिद्ध्यति।
अकल्पितो विभेदो हि नानात्वमभिधीयते॥
१७२६॥§ 5745

अनेन हेतोर्विरुद्धतामाह। इष्टविपरीतसाधनात्। तथाहि—पारमार्थिको धर्मभेदो वादिनः साधयितुमिष्टः, स चाकल्पितो धर्मभेदो न सिद्ध्यति, वस्तुन एकत्वाभ्युपगमात्, तस्य चैकस्य वस्तुनो भेदविरोधात्, यतो भेद इति नानात्वमभिधीयते, यच्च नाना तत्कथमेकं स्यात्॥ १७२६॥ § 5746

दृष्टान्ते न केवलं साध्यशून्यता, अपि तु साध्यविपर्ययेण हेतुर्व्याप्त इति दर्शयन्नाह—नानात्मत्वमित्यादि। § 5747

नानात्मत्वं च शक्तीनां विवक्षामात्रनिर्मितम्।
एकतत्त्वात्मकत्वे हि न भेदोऽत्रापि युक्तिमान्॥
१७२७॥§ 5749

स्यादेतत्—यद्यपि भेद इति नानात्वमभिधीयते, तदेव नानात्वमेकस्य वस्तुनो भाविकं कथं विरुद्धं, येन तद्विपरीतं साधयद्विरुद्धं भवेदित्याह—एकमित्यादि। § 5750

एकमित्युच्यते तद्धि यत्तदेवेति गीयते।
नानात्मकं तु तन्नाम न तद्भवति यत्पुनः॥
१७२८॥§ 5752

491/k

तद्भावश्चाप्यतद्भावः परस्परविरोधतः।
एकवस्तुनि नैवायं कथञ्चिदवकल्प्यते॥
१७२९॥§ 5754

यत्तदेतदिति तत्त्वेन विधीयते तदेकमित्युच्यते, यथा चैतन्यपुरुषयोः। वस्तुनः सतस्तत्त्वनिषेधे नानात्वं, यथा भूतचैतन्ययोः। ततश्च विधिप्रतिषेधयोरेकत्रायोगात्तद्भावलक्षणातद्भावलक्षणयोरेकत्वनानात्वयोः परस्परविरोध इति कल्पित एवैकस्य धर्मभेदः॥ १७२८॥ १७२९॥ § 5755

कथं तद्भावातद्भावयोर्विरोध इत्याह—विधानेत्यादि। § 5756

विधानप्रतिषेधौ हि परस्परविरोधिनौ।
शक्यावेकत्र नो कर्तुं केनचित्स्वस्थचेतसा॥
१७३०॥§ 5758

स्यादेतत्—धर्मभेदकल्पनायाः किं निबन्धनम्, अवश्यं चास्या भिन्नेन निबन्धनेन भाव्यम्, अन्यथा वस्तुसाङ्कर्यं स्यात्। ततश्च यत्तद्भिन्नं निबन्धनं स एव च पारमार्थिको धर्मभेदोऽस्माकमित्याह—सजातीयेत्यादि। § 5759

सजातीयविजातीयानेकव्यावृत्तवस्तुनः।

७ लक्षणात] Correction : ; लक्षणात्त (sic !)लक्षणात

ततस्ततः परावृत्तेर्धर्मभेदस्तु कथ्यते॥
१७३१॥§ 5761

एकस्यापि ततो युक्ता कल्पितासङ्ख्यरूपता।
वास्तवं नैकभावस्य द्वैरूप्यमपि सङ्गतम्॥
१७३२॥§ 5763

सजातीयविजातीयं च तदनेकं चेति कर्मधारयः, तस्माद्व्यावृत्तं च तद्वस्तु चेति विग्रहः। तस्यैकस्य वस्तुनः, ततस्ततः—सजातीयाद्विजातीयाच्च, या परावृत्तिः, साधर्मभेदव्यवस्थाया निबन्धनम्। तस्माद्यतः कल्पिताऽप्यनेकता सम्भवति, तस्माद्वास्तवं द्वैरूप्यमेकस्य न सङ्गतम्। अपिशब्देन सामान्येन धर्मभेदपूर्वकत्वमात्रे साध्ये सिद्धसाध्यतामपि सूचयति॥ १७३१॥ १७३२॥
§ 5764

स्यादेतत्—नरसिंहादिभिरनेकान्तः, तथाहि नरसिंहादय एकस्वभावा अपि भाविकेन द्वैरूप्येणाविरुद्धाः समुपलभ्यन्त इत्याह—नरसिंहादय इति।
§ 5765

नरसिंहादयो ये हि द्वैरूप्येणोपवर्णिताः।
तेषामपि द्विरूपत्वं भाविकं नैव विद्यते॥
१७३३॥§ 5767

स ह्यनेकाणुसन्दोहस्वभावो नैकरूपवान्।
यच्चित्रं न तदेकं हि नानाजातीयरत्नवत्॥
१७३४॥§ 5769

492/k

ऐक्ये स्यान्न द्विरूपत्वान्नानाकारावभासनम्।
मक्षिकापदमात्रेऽपि पिहितेऽनावृतिश्च न॥
१७३५॥§ 5771

आदिशब्देन मेचकरत्नादिपरिग्रहः। स हीति। नरसिंहः। सन्दोहः—समूहः। रूपमस्यास्तीति रूपवान्। एकेन रूपवानिति विग्रहः। अनेन दृष्टान्तस्य प्रतिवाद्यसिद्धतामाह। नहि बौद्धं प्रति नरसिंह एकोऽवयवी सिद्धः,

अनेकाणुसमूहत्वात्। तत्रैकत्वनिराकरणे प्रमाणमाह—यच्चित्रं न तदेकं, यथा नानाजातीयरत्नसमूहः, चित्रश्च नरसिंह इति, स्वभावविरुद्धोपलम्भो व्यापकविरुद्धस्य वा। ऐक्ये सति द्विरूपत्वनिमित्तनानाकारावभासानुपपत्तिर्बाधकं प्रमाणम्, प्रतिभासभेदनिबन्धनत्वाद्भेदव्यवस्थायाः। एकदेशावरणे सर्वावरणप्रसङ्गश्च बाधकं प्रमाणम्, न ह्येकस्यावृतत्वमनावृतत्वं चेति युगपद्विरुद्धधर्मसंसर्गो युक्तः॥ १७३३॥ १७३४॥ १७३५॥ § 5772

यद्यनेकाणुसमूहमात्रं नरसिंहः कथं तर्हि द्विरूपानुगतैक(व)त्वध्यवसायी प्रत्यय इत्याह—नृसिंहेत्यादि। § 5773

नृसिंहभागानुस्यूतप्रत्यभिज्ञानहेतवः।
ते चाणवः प्रकृत्यैव विशिष्टप्रत्ययोद्भवात्॥
१७३६॥§ 5775

एतेनैव प्रकारेण चित्ररत्नादयो गताः।
नानात्मना हि वैचित्र्यमेकत्वेन विरुध्यते॥
१७३७॥§ 5777

नृसिंहयोर्ये भागास्तैरनुस्यूतं निर्भासीकृतं यत्प्रत्यभिज्ञानं तत्तथोक्तम्, एवम्भूतस्य प्रत्यभिज्ञानस्य यदा प्रकृत्यैव त एवाणवो हेतवो भवन्ति, तदा किमपरमवयविना कल्पितेन। सा च तादृशी प्रकृतिः कुतस्तेषामिति चेदाह—विशिष्टप्रत्ययोद्भवात् —विशिष्टात्कारणादुत्पत्तेः। तत्र विशिष्टः प्रत्ययो गतिविशेषसंवर्त्तनीयं कर्म, स्वजातिसमुद्भूतः कललादिश्च। अनेनैव नरसिंहविचारेण मेचकरत्नादयो गताः—व्याख्याताः, इति न तेषां पृथक् दूषणं वक्तव्यम्॥ १७३६॥ १७३७॥ § 5778

यदुक्तम्— सर्वं च वस्तुरूपेण भिद्यते न परस्परमित्यत्राह— § 5779

अर्थक्रियासमर्थत्वं वस्तुत्वमभिधीयते।
यदि तस्यानुगामित्वं सर्वं स्यात्सर्वकार्यकृत्॥
१७३८॥§ 5781

एकोऽर्थजनकस्तस्य भावः सामर्थ्ययोगतः।

तच्चाविशिष्टमन्यस्मिन्नित्यनुत्पादकः कथम्॥
१७३९॥§ 5783

493/k

नीलाद्येव च वस्तुत्वमनुगामि यदीष्यते।
सितपीताद्यपि प्राप्तं नील(सं)साध्यकार्यकृत्॥
१७४०॥§ 5785

एकमेव ततो जातं द्वितीयात्मविवर्जितम्।
सर्वं विश्वमतो नैकमनेकाकारमस्ति नः॥
१७४१॥§ 5787

तदेव चेन्न वस्तुत्वं कणाशिमतसत्त्ववत्।
नैकस्यानेकरूपत्वमेव वः स्याद्विभेदतः॥
१७४२॥§ 5789

विरुद्धधर्मसङ्गश्च वस्तूनां भेदलक्षणम्।
कथञ्चिदन्यथेष्टोपि न भेदो नीलपीतयोः॥
१७४३॥§ 5791

अनुगाम्यन्यथाभावात्स च सामान्यभेदयोः।
विद्यते तत्कथं नास्ति तयोर्भेदः परिस्फुटम्॥
१७४४॥§ 5793

अर्थक्रियाकारि यद्रूपं तद्वस्तुत्वमुच्यते नान्यत्, तच्चेत्सर्वत्रानुगामि सर्वं सर्वार्थक्रियाकारि प्राप्नोति तेनैव हि रूपेण सर्वे जनका इष्यन्ते। तस्य च सर्वत्राविशिष्टत्वादिति यत्किंचिद्यतः कुतश्चिदुत्पद्येत। किंच यदेतन्नीलपीतादि, तदेव किं वस्तुत्वमाहोस्विदन्यत्। यदि तदेव तदा तस्यानुगामित्वात्सित-पीताद्यपि नीलसाध्यवस्त्वरञ्जनाद्यर्थक्रियाकारि प्राप्नोति। अपिच द्वितीयस्य स्वभावस्याभावात्सर्वं जगदेकमेव वस्तुजातमिति, एकमनेकाकारमिति प्र-

तिज्ञानार्थहानिः स्यात्। अथान्यदेव वस्तुत्वं नीलादिभ्यः, कणादाभिमतसत्त्ववत्। यथा कणाशिनः—कणादस्य, अभिमतं सत्ताख्यं व्यतिरिक्तं वस्तुत्वं नामेति। एवमपि सुतरामेकस्यानेकत्वमयुक्तम्, एकान्तेनैव भेदात्। किंच—यौ विरुद्धधर्मसंसर्गिणौ तौ भिन्नौ यथा शीतोष्णौ, विरुद्धधर्मसंसर्गश्च सामान्यविशेषयोर्विद्यतेऽनुगाम्यन्यथाभावादिति स्पष्ट एव तयोर्भेदः। अन्यथाभावः—अननुगामित्वम्। यदि च विरुद्धधर्मसंसर्गेऽपि भेदो नेष्यते, तदानीलपीतयोर्योऽप्ययं कथंचिदविशेषरूपेण भेद इष्टः स न स्यात् बुद्धिभेदान्न चैकत्वं रूपादीनां प्रसज्यत इति वचनात् कुमारिलेन नीलादीनां भेदस्योपवर्णितत्वात् ॥ १७३८॥ १७३९॥ १७४०॥ १७४१॥ १७४२॥ १७४३॥ १७४४॥ § 5794

यथेत्यादिना कौमारिलमतेन पुनरप्यनैकान्तिकत्वमुद्भावयति। § 5795

यथा कल्माषवर्णस्य यथेष्टं वर्णनिग्रहः।
चित्रत्वाद्वस्तुनोऽप्येवं भेदाभेदावधारणे॥
१७४५॥§ 5797

494/k

यदा तु शबलं वस्तु युगपत्प्रतिपद्यते।
तदाऽन्यानन्यभेदादि सर्वमेव प्रलीयते॥
१७४६॥§ 5799

कल्माषवर्णः—शबलो वर्णः। तस्य यथा नीलमिति वा पीतमिति वा लोहितमिति वेत्यादिना यथेष्टं वर्णनिग्रहो—रूपावधारणं, तथा चित्रस्य—अनेकरूपस्यवस्तुनः स्वपररूपाभ्यां सदसदात्मनः सामान्यविशेषरूपाभ्यां द्व्यात्मन इच्छावशाद्भेदाभेदावधारणे। यदा भेदमवधारयितुमिच्छति तदा तमवधारयति, यदा तु युगपत्सामान्यविशेषात्मकं वस्तु कु(झ?) गिति प्रतिपद्यते तदाऽन्यानन्यभेदादिचोद्यं प्रलीयते।नावतरतीत्यर्थः। प्रत्यक्षेण शबलस्य वस्तुनः प्रतीयमानत्वात्। तत्रेदमन्यानन्यादिचोद्यम्—भिन्नेभ्योऽश्वादिपिण्डेभ्योऽनन्यत्वात्सामान्यस्यापि पिण्डवत्स्वरूपभेदप्रसङ्गः, सामान्याद्वाप्यभिन्नत्वादभेदो भेदानां सामान्यस्येव प्रसज्यते। तथा भेदाभेदौ परस्परं सामान्यविशेषयोः कथं विरुद्धौ स्याताम्। आदिशब्देनैकत्वानेकत्वे परस्परविरुद्धे, तथा तदेव सामान्यं स एव विशेष, इत्येवमादि ग्रहीतव्यम्॥ १७४५॥ ॥ १७४६॥ § 5800

यद्येवं सर्वत्रैव शबलस्य प्रतीतिः स्यान्नतु क्रमयौगपद्याभ्यामित्याशङ्क्याह—वस्तुन इत्यादि। § 5801

वस्तुनोऽनेकरूपस्य रूपमिष्टं विवक्षया।
युगपत्क्रमवृत्तिभ्यां नान्योस्ति वचसां विधिः॥
१७४७॥§ 5803

युगपत् क्रमेण वा यदस्य सामान्यविशेषादिरूपं व्यवस्थाप्यते, तद्विवक्षावशात्। यदा यौगपद्येन सदसद्रूपे विवक्षति सामान्यविशेषरूपं वा तदा तस्य रूपं व्यवस्थाप्यते। अथ क्रमेण विवक्षति सद्रूपमसद्रूपं सामान्यविशेषं वा तदाऽस्य तद्व्यवस्थाप्यते। सर्वमेव हि तस्य स्वरूपं क्रमाक्रमाभ्यां व्यपदिश्यते, विचित्ररत्नकोश इवमरकतपद्मरागादिरिति। अथ क्रमाक्रमौ मुक्त्वाऽन्येन प्रकारेण कस्मान्न निर्दिश्यत इत्याह—नान्योऽस्ति वचसां विधिरिति। युगपत्क्रमवृत्तिभ्यामित्यपेक्षणीयम्।विधिः—प्रकारः॥ १७४७॥
§ 5804

नैवमित्यादिना प्रतिविधत्ते। § 5805

नैवं चित्रत्वमेकत्वं प्रतिषिद्धं ह्यनन्तरम्।
अनेकरूपं वैचित्र्यमेकत्वेनासहस्थितम्॥
१७४८॥§ 5807

495/k

ते हि यावन्त आकारास्तस्मिन्वस्तुनि भाविकाः।
तावन्त्येवा(थ) जातानि
वस्तुनीत्येकनास्ति १७४९॥§ 5809

एकं चित्रमिति परस्परविरुद्धमेतदिति यच्चित्रं न तदेकमित्यादिना प्रतिपादितम्। यतो विचित्रमित्यनेकत्वमुच्यते। एकत्वानेकत्वयोश्च परस्परपरिहारस्थितिलक्षणो विरोधः। तस्मान्नैकस्मिन्भाविका बहव आकाराः सम्भवन्ति। अथापि स्युस्तथाप्येकस्यानेकत्वं न प्रतिपादितमेव तथाहि तावन्त्येवापराणि वस्तूनि जातानीति। यदि परं भाविकत्वेन प्रतिपादितं स्यात्। न त्वेकस्यानेकत्वं, परस्परविरोधात्॥ १७४८॥ १७४९॥ § 5810

यदुक्तं— वस्तुनो हि निवृत्तस्य काऽन्या सम्भाविनी गतिरित्यत्राह— एकस्मादित्यादि। § 5811

५] Correction: ; (ता स्थि?)ता (sic!)

एकस्माद्वस्तुनोऽन्यत्वे तादात्म्यविकलं भवेत्।
नाकाशपुष्पसङ्काशं तद्ध्यप्यर्थक्रियाक्षमम्॥
१७५० ॥§ 5813

यदि हि वस्तुमात्रात्परावृत्तिर्हेतुत्वेन क्रियते खपुष्पाविशेषत्वे साध्ये तदा हेतुरसिद्धः, नहि घटस्य वस्तुमात्राद्व्यावृत्तिः सिद्धा, किं तर्हि ?, स्वस्वभावं मुक्त्वाऽन्यस्माद्वस्तुविशेषात्। अथ वस्तुविशेषाद्व्यावृत्तिर्हेतुत्वेनोपादीयते तदाऽनैकान्तिको हेतुः। तथाहि—एकस्माद्घटादेर्वस्तुनो व्यावृत्तं घटादिकं वस्तु परतादात्म्यविकलंसिद्ध्येन्नतु सर्वथा निःस्वभावं तस्याप्यर्थक्रियाकारित्वात्॥ १७५० ॥ § 5814

शक्तमित्यादिनैतदेवानैकान्तिकत्वं समर्थयते। § 5815

शक्तं रूपं न चैकस्य वस्तुष्वन्येषु वर्त्तते।
कार्योपलम्भनिर्भासभेदादेरिति वर्णितम्॥
१७५१ ॥§ 5817

अतद्वस्त्वात्मकत्वं तु तदश्लेषेण युज्यते।
नाविशेषमवस्तुत्वं वस्तुलक्षणभावतः॥ १७५२ ॥§ 5819

यदि ह्यर्थक्रियासामर्थ्यलक्षणं वस्तुत्वं नामानुयायि स्यात्ततो व्यावृत्तस्य
निःस्वभावता स्यादर्थक्रियासामर्थ्यलक्षणत्वाद्वस्तुनः, यावता शक्तं रूपं य-
देकस्य नीलादेस्तदन्येषु सितादिषु न वर्त्तत इति पूर्वमुक्तम्, नीलाद्येव
च वस्तुत्वमनुगामि यदीष्यत इत्यादिना। कस्मात् ?। कार्यभेदादुपलम्भ-
निर्भासभेदाच्च। उपलम्भो ज्ञानंतस्य निर्भास आकारः। आदिशब्देनोत्पाद-
496/k स्थितिनिरोधादयो गृह्यन्ते। तस्मात्तदश्ले षेण हेतुनाऽतद्वस्त्वात्मकमित्येव
साधयितुं युज्यते, नाविशेषं—निर्विशेषणम्, अवस्तुत्वं साधयितुं युक्तम्।
कुतः ?। तत्राप्यर्थक्रियाकारित्वस्य वस्तुलक्षणस्य भावात् ॥ १७५१॥
१७५२॥ § 5820

ननु चात्यन्तभेदे सति कथमनुगामी वस्तुवस्त्विति प्रत्ययो भवेत्। कथं च खपुष्पाद्भेदो वस्तुनः सिध्यति। यदि सादृश्यं न भवेदित्याह—तदपीत्यादि। § 5821

तदप्यर्थक्रियायोग्यमिति वस्त्विति कल्पने।

असमर्थपरावृत्तिः सादृश्यं तद्विकल्पितम्॥
१७५३॥§ 5823

ततश्चात्यन्तभेदेऽपि तुल्यताऽस्ति विकल्पिता।
भावो भावान्तरैस्तुल्यः खपुष्पात्तद्विशिष्यते॥
१७५४॥§ 5825

असमर्थपरावृत्तिरिति। असमर्थाः—वन्ध्यासुतादयः, तेभ्यः परावृत्तिरतदात्मता। यतश्च सादृश्यं कल्पितमस्ति, तस्माद्यदुक्तं भावो भावान्तरातुल्य इति तदसिद्धम्॥ १७५३॥ १७५४॥ § 5826

नन्वित्यादिना सुमतेश्चोद्यमाशङ्कते। § 5827

ननु येनात्मना वस्तु समानापरवस्तुनः।
व्यावृत्तं तत्सजातीयैस्तेनैव सदृशं यदि॥
१७५५॥§ 5829

विज्ञायेत विजातीयैरपि तुल्यतया तदा।
तस्यात्मनोऽविशिष्टत्वान्न च तज्ज्ञायते तथा॥
१७५६॥§ 5831

सजातीयासमानोऽपि तस्माद्येन भवत्ययम्।
आत्मना तत्समानश्च तयोर्भेदः स्वभावयोः॥
१७५७॥§ 5833

स आह—येनात्मना सजातीयविजातीयाभ्यां व्यावृत्तं वस्तु तेनैवात्मना तद्वस्तु यदि सजातीयैः सदृशं भवेत्तदा विजातीयैरपि तुल्यतया विज्ञायेत, तस्यात्मनोऽविशिष्टत्वात्। नच ज्ञायते। तस्माद्येन स्वभावेन सजातीयासमानोपि भवति, येन च स्वभावेन तत्सदृशो भवति तयोः स्वभावयोर्भेदोऽभिवाञ्छितव्यः। ननु स यदिसजातीयः कथं तेनासमानो भवति, अथ तेनासमानो भवति कथं सजातीय, इति परस्परव्याहतमेतत्। नैष दोषः। यतः परेण सर्वमेव वस्तु सामान्यविशेषात्मकमिष्टम्, तस्माद्वस्तुत्वादिना सामान्येन सर्वमेव सजातीयमित्युच्यते, विशेषरूपेण तदेव विजातीयमिष्टमिति, तदपेक्षया पुनरसमान इत्यभिधीयत इत्यदोषः। स-

497/k माना- परवस्तुन इति। समानं च तदपरं चेति समानापरवस्तु। अपरमित्यसमानं शे षं सुगमत्वान्न विभक्तम्॥ १७५५॥ १७५६॥ १७५७॥
§ 5834

तेनैवेत्यादिना प्रतिविधत्ते— § 5835

तेनैवासौ स्वभावेन समान इति गम्यते।
एकप्रत्यवमर्शस्य हेतुत्वेनान्यभेदतः॥ १७५८॥§ 5837

तेनैव स्वभावेन समान इत्युच्यते। एकप्रत्यवमर्शप्रत्ययकारणत्वात्। एतदुक्तं भवति—ये ह्येकप्रत्यवमर्शं प्रति कारणभावं न प्रतिपद्यन्ते त एवासमाना इति व्यवह्रि(?)यन्ते, ये तु प्रतिपद्यन्ते ते समाना इति॥ १७५८॥
§ 5838

अथ तस्यैवैकप्रत्यवमर्शस्य हेतवः किमिति सर्वे न भवन्ति, भेदस्याविशिष्टत्वादित्याशङ्क्याह—एकेत्यादि। § 5839

एकप्रत्यवमर्शस्य हेतवः केचिदेव हि।
समर्थरूपनियमाद्भेदेऽप्यक्षामृतादिवत्॥
१७५९॥§ 5841

नहि स्वभावाः पर्यनुयोगमर्हन्ति कस्मादग्निर्दहत्युष्णो वा नोदकमिति। एवं तु युक्तं वक्तुं कुतोऽस्यायं स्वभाव इति, निर्हेतुकत्वे त्वनपेक्षस्य नियमायोगेनातिप्रसङ्गात्। तस्मात्स्वहेतोरिति वक्तव्यं, तस्यापि कुत इत्यनादिहेतुपरम्परा। अक्षमिन्द्रियम्। अमृतं गुडूची। आदिशब्दः प्रत्येकमभिसम्बध्यते। यथा गुडूच्यादीनामेवज्वरादिशमने शक्तिर्नान्येषाम्, इन्द्रियविषयालोकमनस्कारादीनां च विशिष्टज्ञानोत्पादने, तथैकप्रत्यवमर्शेऽपि केषांचिदेव शक्तिनियम इति। यद्वाऽक्षशब्देन विभीतकस्याभिधानम्, आदिशब्दः समुदायेन सम्बध्यते॥ १७५९॥ § 5842

ननु नीलादीत्यादिना दृष्टान्तासिद्धिमाशङ्कते। § 5843

ननु नीलादिविज्ञानजननं लोचनं कथम्।
व्यावृत्तरूपभागेव नीलादिभ्यो यदीष्यते॥
१७६०॥§ 5845

नीलादिज्ञानजनकान्नीलादेर्भेदवद्यथा।

श्रोत्रं न तस्य जनकं तथा चक्षुरपीष्यताम्॥
१७६१॥§ 5847

जनकाद्धि परावृत्तः कोऽपरो जनको भवेत्।
भावस्तस्मात्पदार्थानामन्वयोऽपीति निश्चयः॥
१७६२॥§ 5849

यदि नीलादिभ्यो व्यावृत्तिरूपभागेव लोचनमिष्यते, नानुवृत्तिभागित्यवधारणे नाह। तदा नीलादिविज्ञानजनकं लोचनं न प्राप्नोति, तज्जनकस्व- 498/k भावात्परावृत्तत्वात्। यो हि यज्जनकस्वभावात्परावृत्तः स तज्जनको न भवति, यथा नीलादिज्ञानजनकान्नीलादेर्व्यावृत्तं श्रोत्रं न तस्य नीलादिज्ञानस्य जनकम्। नीलादिज्ञानजनकाच्च नीलादेर्व्यावृत्तं चक्षुरिति व्यापकविरुद्धोपलब्धिप्रसङ्गः। नचैवं भवति। तस्माद्विपर्ययः। यो हि यज्जनकः स तज्जनकस्वभावापरावृत्तः। यथा नीलज्ञानजनकं नीलं स्वस्मात्स्वभावात्। नीलज्ञानजनकं च चक्षुरिति स्वभावहेतुः। एवं नीलादयोऽपि पक्षत्वेन वाच्याः। तस्मादस्ति भावानामन्वय इति प्रसङ्गविपर्ययेण दृष्टान्तासिद्धिमाह॥ १७६०॥ १७६१॥ १७६२॥ § 5850

अथापि स्यात्—ततो व्यावृत्तं च भविष्यति तज्जनकं चेत्यनैकान्तिकं प्रसङ्गसाधनमित्याह—अन्यथेत्यादि। § 5851

अन्यथा निर्विशिष्टत्वाद्भेदेन श्रवणाद्यपि।
जनकं तस्य किं नेष्टं चक्षू रूपादिभेदवत्॥
१७६३॥§ 5853

श्रोत्रादीनामपि नीलादिज्ञानजनकत्वप्रसङ्गो विपर्यये बाधकं प्रमाणं भेदेनाविशिष्टत्वात्। नीलादिभ्यो यो भेदश्चक्षुषस्तेन भेदेन श्रोत्रादीनां चक्षुरादिना तुल्यत्वात्। यथा चक्षुर्नीलादेर्व्यावृत्तं तथा श्रोत्रमपीति यावत्॥ १७६३॥ § 5854

व्यावृत्तिरित्यादिना प्रतिविधत्ते। § 5855

व्यावृत्तिश्चक्षुरादीनां न सिद्धा जनकादियम्।
अविशेषेण यत्तेषामाधा(त्मा?)पि जनको मतः॥
१७६४॥§ 5857

स्वभावान्नच भावानां व्यावृत्तिरुपपद्यते।
स्वभावाद्धि परावृत्तौ नैःस्वाभाव्यं प्रसज्यते॥
१७६५॥§ 5859

अन्यस्माज्जनकात्तेषां व्यावृत्तिरुपवर्ण्यते।
अतज्जनकरूपत्वं वाच्यं तच्चेष्टमेव नः॥
१७६६॥§ 5861

न ह्यप्युत्पादकं तस्य स्वरूपेणैव वर्ण्यते।
नियतास्तत्र ते सर्वे स्वहेतुभ्यः समुत्थिताः॥
१७६७॥§ 5863

एकात्मानुगतत्वात्तु यद्येकजनका इमे।
आत्मैकत्रापि सोस्तीति किमन्यैः सहकारिभिः॥
१७६८॥§ 5865

विशेषान्तरवैकल्यादेके न जनकं यदि।
ननु भेदादशक्तास्तेऽभेदे वा विकलाः कथम्॥
१७६९॥§ 5867

499/k

यथा त्वयं विशेषेपि न सर्वं सर्वकारणम्।
नानात्वस्याविशेषेपि तथैव नियमो भवेत्॥
१७७०॥§ 5869

भेदेऽपि जनकः कश्चित्स्वभावनियमाद्भवेत्।
अन्वये त्वेक एकस्य जनकोऽजनकश्च किम्॥
१७७१॥§ 5871

भेदोऽप्यत्रास्ति चेदस्तु स किं तस्यैव वस्तुनः।
नहि तस्यान्वयादन्यो ननु भेदो न कारकः॥
१७७२॥§ 5873

स एव भाविकश्चार्थो यो नामार्थक्रियाक्षमः।
स च नान्वेति योऽन्वेति कार्यं तस्मान्न जायते॥
१७७३॥§ 5875

यं चात्मानमभिप्रेत्य पुमानेष प्रवर्तते।
विद्येते तद्गतावेव भेदाभेदावकल्पितौ॥
१७७४॥§ 5877

अन्यथा ह्यात्मना भेदो व्यावृत्त्या च समानता।
अस्त्येव वस्तु नान्वेति प्रवृत्त्यादिप्रसङ्गतः॥
१७७५॥§ 5879

अविशेषेण तज्जनकस्वभावात्परावृत्तिमात्रं यदि हेतुत्वेन वर्ण्यते तदा न सिद्धो हेतुः। नहि चक्षुरादीनां नीलादिज्ञानजनकात्स्वभावादविशेषेण व्यावृत्तिः सिद्धा। यतस्तेषामपि चक्षुरादीनां यः स्वभावः सोऽपि जनक इष्टः। को ह्यत्र नियमस्तेनैव तत्कार्यं कर्त्तव्यं नान्येनेति, अन्योऽपि कुर्यात्सोपीति न विरोधं पश्यामः। यदि तु पुनरविशेषेण व्यावृत्तिः स्यात्तदा स्वस्वभावादपि स्यात्ततश्च निःस्वभावताप्रसङ्गःस्यात्। तस्मान्न स्वभावाद्भावानां व्यावृत्तिर्युक्ता। अथ स्वस्वभावं मुक्त्वाऽन्यस्माज्जनकाद्वा व्यावृत्तिश्चक्षुरादीनां सा हेतुत्वेनाभिमता, तदाऽनैकान्तिकता हेतोः, तदाह्यन्यस्मात्स्वभावाद्व्यावृत्तस्तत्स्वभावो माभूत्, न तु तदजनकः। यतः सर्व एव स्वरूपेणैव जनको न पररूपेण, येन चात्मीयेन स्वभावेनासौ जनक इष्यते तस्माच्च न व्यावृत्त इति कथमजनकः स्यादित्यनैकान्तिकता हेतोः। अथातत्स्वभावता पर्युदासवृत्त्या साध्यते, तदा सिद्धसाध्यता, परस्परं भावानां स्वभावविवेकस्येष्टत्वात्।अतज्जनकरूपत्वमिति। स चासौ जनकश्च तज्जनको रूपादिः, तस्य रूपं स्वभावः, स यस्य नास्ति सोऽतज्जनकरूपस्तद्भावस्तत्त्वम्। तस्य—अन्यस्य यज्जनकरूपं तेन रहितत्वमिति यावत्। अथवा—तच्च तज्जनकं चेति तज्जनकं, तज्जनकं च तद्रूपं चेति कर्मधारयं कृत्वा नञा(?) बहुव्रीहिः कार्यः। त्रिपदो वा बहुव्रीहिः।

500/k अथ कस्मिन्कार्ये कर्त्तव्ये स एव तेषां चक्षुरादीनां परस्परासङ्कीर्णो जनकः स्वभावः कुत आयातो येन त एव तु कार्ये नियताः स्युरित्याशङ्क्याह—**नियता** इति। यदुक्तं भेदेन निर्विशिष्टत्वाच्छ्रवणाद्यपि जनकं तस्य किं नेष्टमिति, तदनेन परिहृतम्। तस्मात्स्वभावनियमाद्भेदेऽपि कश्चिज्जनको भवेन्नापर इति न किंचिद्विरुद्धम्। यदि तुपुनरेकस्वभावानुगतत्वेन भिन्ना अपि चक्षुरादयो जनकाः स्युस्तदैकस्तेषां स्वभावो जनक एकस्मिन्नपि कारणेऽस्तीति तत एवैकस्मात्कार्योत्पत्तिः स्यात्। ततश्च शेषसहकारिकारणवैयर्थ्यप्रसङ्गः स्यात्। अथ विशेषान्तरवैकल्यान्नैकस्मात्कार्योत्पत्तिरिति चेत्, ये ते विशेषा विकला इष्यन्ते तेषामशक्तत्वात्, कस्मात् ?, भेदात्—समर्थाभिमतादनुयायिनः स्वभावादन्यत्वादिति यावत्, नचाशक्तस्य वैकल्ये कार्यानुत्पत्तिर्युक्ता, कस्यचिदनुत्पत्तिप्रसङ्गात्। अथापि स्यात्—नह्यस्माभिः सामान्यविशेषाणांपरस्परमत्यन्तभेद इष्टः, ततश्च भेदादित्यसिद्धो हेतुरित्याह—**अभेदे वा विकलाः कथ**मिति। सामान्याद्विशेषाणामभेदेऽङ्गीक्रियमाणे न तर्हि वक्तव्यं विशेषान्तरवैकल्यादेकं न जनकमिति। अतस्तस्मिन्सामान्ये तिष्ठत्यविकले सति तदव्यतिरेकिणां विशेषाणामपि वैकल्यासिद्धिः। नहि यो यदेकयोगक्षेमो न भवति स तत्स्वभावो युक्तः। अपिच समान एवायं प्रसङ्गो भवतामपि, अन्वयस्याविशिष्टत्वात्किमिति सर्वः सर्वं न जनयेत्। यथा भवतामन्वयस्याविशेषेऽपि सर्वं सर्वस्य जनकं न भवति तथाऽस्माकमपीति यत्किञ्चिदेतत्। किंच—भेदाविशेषेऽपि कश्चिज्जनयति नापर इति जनकस्वभावप्रतिनियमादेवं भवेत्, एकस्य यः स्वभावो नासौ परस्येति कृत्वा, नचैवं सति किंचिद्विरुध्यते। यदा त्वनुगतस्यैकात्मनो जनकत्वं तदेकस्यैकस्मिन्कार्ये जनकत्वमजनकत्वं चेति कथं विधिप्रतिषेधौ युक्तावेकाधारौ। भिन्नाधिकरणौ तु न विरुद्धावित्यत **एकस्ये**त्याह। अथापि स्यान्नास्माभिरेकान्तेनान्वय एवेष्टो येनैकस्यैकत्र जनकत्वाजनकत्वविरोधः स्यात्। किं तर्हि ?। भेदोऽप्यत्रास्ति।तेनाजनकत्वं न विरुद्धमिति। अस्तु भेदः, स किं जनकस्वभावाद्भेदस्तस्यैवानुगतस्यजनकात्मनोऽभीष्टः, आहोस्विदन्यस्येति वक्तव्यम्। न तावत्तस्यैव, नहि स्वभावाद्भावस्य परावृत्तिर्युक्त, निःस्वभावत्वप्रसङ्गात्। नाप्यन्यस्य, भेदे तस्य जनकस्वभावस्याविकलस्याजनकत्वं युक्तमतिप्रसङ्गात्। भवतु वा तस्यैव स्वस्वभावाद्भेदस्तथाऽप्येकस्य जनकत्वाजनकत्वविरोधो न परिहृत एव। तथाहि—भेदादपि तस्यैकस्याकारको भवेत्। ननु नान्योऽन्वयात्, किं
501/k तर्हि ?, स एवान्वयस्ततश्च स एवैकस्य जनकत्वाजनकत्वविरोधस्तदवस्थ एव। अन्वेतीत्यन्वयो जनक एव स्वभाव उच्यते। नन्वित्यभिमुखीकरणम्। अपि च—अन्वयव्यतिरेकाभ्यां विशेषेभ्य एव कार्यसिद्धेस्त एव स्वलक्षणयुक्ताः, न सामान्यार्थम्, क्रियाकारिलक्षणत्वाद्वस्तुत्वस्य, ततश्च किं सामान्यं स्वलक्षणाद्भिन्नामाहोस्विदभिन्नमिति किमर्थक्रियार्थिनस्तत्र भेदाभेदचिन्तया, यस्माद्यमेव स्वभावमर्थक्रियायोग्यमभिसन्धायैष पुमानर्थक्रियार्थी प्रवर्त्तते, तद्गतावेव भेदाभेदौ चिन्त्येतेऽर्थक्रियार्थिभिर्न व्यसनितया। अन्यथा हि

यद्यकल्पितौ भेदाभेदौ नेष्येते, तदा तस्यार्थक्रियायोग्यस्यात्मना—स्वेन रूपेण भेदः पारमार्थिकोऽस्त्येव, व्यावृत्त्या च विकल्पबुद्धिप्रतिभासाऽनुरोधिन्या कृतव्यवस्था सामान्यताऽध्यवसिततद्भावाऽस्त्येवेत्यविवाद एव। इयतैवार्थक्रियार्थिनो भेदसामान्यचिन्ता समाप्तेति किमनर्थक्रियाकारिणः सामान्यस्य भेदाभेदचिन्तया। अथापि स्याद्वस्त्वेव सामान्यमस्तु, किं परिकल्पितया व्यावृत्त्येत्याह—वस्त्वित्यादि। यदि पटादिरूपं घटादिरन्वियात्, तदा मधूदकाद्याहरणार्थी पटादावपि प्रवर्त्तेतेति प्रवृत्त्यादेः प्रसङ्गः स्यात्। आदिशब्दात्तुल्योत्पत्तिनिरोधादिप्रसङ्ग॥ १७६४॥ १७६५॥ ॥ १७६६॥ १७६७॥ १७६८॥ १७६९॥ १७७०॥ १७७१॥ १७७२॥ ॥ १७७३॥ १७७४॥ १७७५॥ § 5880

अथ सौगतैरिव परैरपीदमिष्यते—तस्माद्यतो यतोऽर्थो नाव्यावृत्तस्तन्निबन्धना जातिभेदाः प्रकल्पन्ते तद्विशेषावगाहिन इति, अत्राह—कल्पनारचितस्येत्यादि। § 5881

कल्पनारचितस्यैव वैचित्र्यस्योपवर्णने।
को नामातिशयः प्रोक्तो विप्रनिर्ग्रन्थकापिलैः॥
१७७६॥§ 5883

वैचित्र्यस्येति। भेदस्य॥ १७७६॥ § 5884

वर्द्धमानकभङ्गेनेत्यादिना कुमारिलमतमाशङ्कते। § 5885

वर्द्धमानकभङ्गेन रुचकः क्रियते यदा।
तदा पूर्वार्थिनः शोकः प्रीतिश्चाप्युत्तरार्थिनः॥
१७७७॥§ 5887

हेमार्थिनस्तु माध्यस्थ्यं तस्माद्वस्तु त्रयात्मकम्।
नोत्पादस्थितिभङ्गानामभावे स्यान्मतित्रयम्॥
१७७८॥§ 5889

स ह्याह—उत्पादस्थितिनाशस्वभावत्वात्सर्वमेव वस्तु त्र्यात्मकम्। एकस्मादपि प्रीत्यादिकार्यत्रयदर्शनात्, तथाहि—यदा वर्द्धमानकं भङ्क्त्वा रुचकः क्रियते, तदा वर्द्धमानकार्थिनः शोक उत्पद्यते, रुचकार्थिनः प्रीतिः 502/k
सुवर्णार्थिनस्तु माध्यस्थ्यम्। यदि च वस्त्वेकरूपमेव स्यात्, तदेकाकारैव बुद्धिः स्यात्, न त्रिप्रकारा। वर्द्धमानकरुचकौ—भाजनविशेषौ॥ १७७७॥ १७७८॥ § 5890

स्यादेतत्—यदि नाम त्र्यात्मकं वस्त्विति सिद्ध्यति, तथाऽपि नाशादिरूपेण त्र्यात्मकमित्येतत्कुत इत्याह—न नाशेन विनेत्यादि। § 5891

न नाशेन विना शोको नोत्पादेन विना सुखम्।
स्थित्या विना न माध्यस्थ्यं तेन सामान्यनित्यता॥
१७७९ ॥§ 5893

तेन सामान्यनित्यतेति। यस्मात् स्थित्यादिना न माध्यस्थ्यं, तेन—माध्यस्थ्यस्य स्थित्यविनाभावित्वेन, सामान्यस्यापि—सवर्णत्वस्य, नित्यता प्रतीयते १७७९॥ § 5894

इत्येतदित्यादिना प्रतिविधत्ते। § 5895

इत्येतदपि नो युक्तमसामान्याश्रयत्वतः।
उत्पादस्थितिभङ्गानामेकार्थाश्रयता न हि॥
१७८० ॥§ 5897

समानकालताप्राप्तेः परस्परविरोधिनाम्।
इदं तु क्षणभङ्गित्वे सति सर्वमनाकुलम्॥
१७८१ ॥§ 5899

वर्द्धमानकभावस्य कलधौतात्मनः कथम्।
अनन्वये विनाशे हि कस्यचिच्छोकसम्भवः॥
१७८२ ॥§ 5901

सर्वथा पूर्वरूपस्य रुचकस्य तदात्मनः।
जन्मन्युत्पद्यते प्रीतिर्नावस्थानं तु कस्यचित्॥
१७८३ ॥§ 5903

असामान्याश्रयत्वत इत्येतद्ग्रहणकवाक्यम्। अस्य व्याख्यानमुत्पादस्थितीत्यादि। यदि हि वस्त्वेकमप्युत्पादादिस्वभावेन त्र्यात्मकं स्यात्तदा युगपत्परस्परविरोधिन उत्पादस्थितिविनाशाः प्राप्नुवन्ति, नच विरोधिनामेकत्र

युगपद्भावो युक्तः, अन्यथा हि विरोधित्वमेव न स्यात्। कथं तर्हि मतित्रयस्योत्पत्तिर्युक्तेति चेत्, यथा युक्तातथा श्रूयतामिति दर्शयन्नाह—इदं त्विति। वर्द्धमानात्मको भावो वर्द्धमानकभावः, स किंविशिष्टः, कलधौतात्मा—कलधौतं सुवर्णं स एवात्मा स्वभावो यस्येति विग्रहः, तस्य स्वतः—स्वरसेन, विनाशे सति कस्यचित्तदर्थिनः शोक उत्पद्यते। अपूर्वस्य तुरुचकाख्यभावस्य तदात्मनो—हेमात्मनः, जन्मनि—उत्पादे सति, कस्यचिद्रुचकाध्यवसितस्य प्रीतिरुत्पद्यते। नतु कस्यचित्सुवर्णात्मनोऽवस्थानमस्ति निरन्वयत्वादुत्पादविनाशयोः॥ १७८०॥ १७८१॥ १७८२॥ १७८३॥ § 5904

503/k

यद्येवं कथं तर्हि माध्यस्थ्यबुद्धिरित्याहि—शातकुम्भेत्यदि। § 5905

शातकुम्भात्मकौ भावौ यदा पश्यति मूढधीः।
समानापरभावेन स्थिरत्वं मन्यते तदा॥
१७८४॥ § 5907

हेम्नोऽवस्थितरूपत्वे तद्रूपं रुचकाद्यपि।
पूर्वोत्तराद्यवस्थासु दृश्येतानेकताऽन्यथा॥ १७८५॥
इति स्याद्वादपरीक्षा। § 5910

शातकुम्भात्मकौ सुवर्णस्वभावौ वर्द्धमानरुचकाख्यौ भावौ क्रमेण यदा पश्यति मूढमतिः, पश्यन्नपि स्वभावविवेकं सदृशापरोत्पत्तिविप्रलब्धो विवेचयितुमशक्तत्वादतएव समानापरभावेन भ्रान्तिनिमित्तेन विप्रलब्धोऽवस्थाद्वयेऽपि हेम्नः स्थिरत्वं मन्यते। समानापरभावेनेति। अहेमव्यावृत्तिमात्रसाधर्म्येण समानस्यापरस्य भाव उत्पादः समानापरभावः। कथं पुनरवसीयते समानापरभावेन विप्रलब्धः स्थिरत्वं मन्यते, न तु पुनर्वस्तुन एव तथाभावादित्याह—हेम्न इत्यादि। यदि हेम्नः स्थिरत्वं स्यात्तदा तदव्यतिरिक्तं रुचकाद्यपि वर्द्धमानावस्थासु दृश्येत, उपलब्धिलक्षणप्राप्तत्वात्। अन्यथा—यदि रुचकस्य वर्द्धमानावस्थायां न दृष्टिर्वर्द्धमानस्य रुचकावस्थायामुपलब्धिलक्षणप्राप्तस्य, तदानीं तयोः परस्परतो भेदः, ततश्च ताभ्यामव्यतिरेकाच्च तत्स्वभाववद्धेम्नोऽपि भेदः सिद्धः स्यादित्यालोच्याह—अनेकताऽन्यथेति। यच्चावधीकृतवस्तुभ्य इत्यादि भेदसाधनमुक्तं तत्र सिद्धसाध्यतैवेति दूषणमुच्यते॥ १७८४॥ १७८५॥ § 5911

इति स्याद्वादपरीक्षा।

०.२२ त्रैकाल्यपरीक्षा।

असङ्क्रान्तिमित्यस्य समर्थनार्थमाह—हेमेत्यादि। § 5913

हेम्नोऽनुगमसाम्येन स्थिरत्वं मन्यते तदा।
अवस्थाभेदवान्भावः कैश्चिद्बौद्धैरपीष्यते॥
१७८६॥§ 5915

नाऽवस्थानं तु कस्यचिदित्यत्रेदं चोद्यम्। ननु कथमिदमुच्यते नावस्थानं तु कस्यचिदिति, यावता कैश्चिद्धर्मत्रातप्रभृतिभिर्बौद्धैरपि कालत्रयावस्थितो भाव इष्टोऽवस्थाभेदात्, हेमानुगमसाधर्म्येण॥ १७८६॥ § 5916

एतदेव द्वितीयेन श्लोकेन दर्शयति। § 5917

अवस्थाभेदभावेऽपि यथा वर्ण्यं जहाति न।
हेमाध्वसु तथाभावो द्रव्यत्वं त्यजत्ययम्॥
१७८७॥§ 5919

504/k

अतीताजातयोर्ज्ञानमन्यथाऽविषयं भवेत्।
द्वयाश्रयं च विज्ञानं तायिना कथितं कथम्॥
१७८८॥§ 5921

कर्मातीतं च निःसत्त्वं कथं फलदमिष्यते।
अतीतानागते ज्ञानं विभक्तं योगिनां च किम्॥
१७८९॥§ 5923

न द्रव्यापोहविषया अतीतानागतास्ततः।
अध्वसङ्ग्रहरूपादिभावादेर्वर्त्तमानवत्॥
१७९०॥§ 5925

१ रूपादि] Correction : ; रूपाद्वि (sic !)रूपादि

तत्र भावान्यथावादी भदन्तधर्मत्रातः, स किलाह—धर्मस्याध्वसु वर्त्तमानस्य भावान्यथात्वमेव केवलं नतु द्रव्यस्येति। यथा सुवर्णद्रव्यस्य कटककेयूरकुण्डलाद्यभिधाननिमित्तस्य गुणस्यान्यथात्वं न सुवर्णस्य, तथा धर्मस्यानागतादिभावादन्यथात्वम्। तथा हि—अनागतभावपरित्यागेन वर्त्तमानभावं प्रतिपद्यते धर्मो, वर्त्तमानभावपरित्यागेन चातीतभावम्, नतु द्रव्यान्यथात्वं, सर्वत्र द्रव्यस्याव्यभिचारात्। अन्यथाऽन्य एवानागतेऽन्यो वर्त्तमानोऽन्योऽतीत इति प्रसज्यते। कः पुनर्भावस्तेनेष्टः ?। गुणविशेषः, यतोऽतीताद्यभिधानज्ञानप्रवृत्तिः। लक्षणान्यथावादी भदन्तघोषकः। स किलाह। धर्मोऽध्वसु वर्त्तमानोऽतीतोऽतीतलक्षणयुक्तोऽनागतप्रत्युत्पन्नाभ्यां लक्षणाभ्यामवियुक्तः, यथा पुरुष एकस्यां स्त्रियां रक्तः शेषास्वविरक्त एवमनागतप्रत्युत्पन्नावपि वाच्ये। अस्य ह्यतीतादिलक्षणवृत्तिलाभापेक्षो व्यवहार इति पूर्वकाद्भेदः। अवस्थान्यथावादी भदन्तवसुमित्रः। स किलाह—धर्मोऽध्वसु वर्त्तमानोऽवस्थामवस्थां प्राप्यान्योऽन्यो निर्दिश्यतेऽवस्थान्तरतो, न द्रव्यतः, द्रव्यस्य त्रिष्वपि कालेष्वभिन्नत्वात्। यथा मृद्गुडिका एकाङ्के प्रक्षिप्ता एकमित्युच्यते, शताङ्के शतं, सहस्राङ्के सहस्रं, तथा कारित्रेऽवस्थितो भावो वर्त्तमानस्ततः प्रच्युतोऽतीतस्तदप्राप्तोऽनागत इति। अस्य व्यवस्थापेक्षया व्यवहारो यथा मृद्गुडिकायां, नहितस्याः स्वभावान्यथात्वं भवति, किं तर्हि ?, स्थानविशेषसम्बन्धात्सङ्ख्याभिद्योतकंसंज्ञान्तरमुत्पद्यते। अन्यथान्यथिको बुद्धदेवः, स किलाह—धर्मोऽध्वसु वर्त्तमानः पूर्वापरमपेक्ष्यान्योन्य उच्यत इति। यथैका स्त्री माता चोच्यते दुहिता चेति। अस्य पूर्वापरापेक्षो व्यवहारः, यस्य पूर्वमेवास्ति नापरः सोऽनागतः, यस्य पूर्वमस्ति अपरं च स वर्त्तमानः, यस्यापरमेव न पूर्वं सोऽतीत, इत्येते चत्वारः सर्वेऽस्तिवादा भावलक्षणाऽवस्थान्यथान्यथिकसंज्ञिताः। तत्र प्रथमः परिणामवादित्वात्साङ्ख्यमतान्न भि द्य- 505/k
ते। यस्तस्य प्रतिषेधः सोऽस्यापि द्रष्टव्यः। तथाहि—पूर्वस्वभावापरित्यागेन वा परिणामो भवेत्, परित्यागेन वा। यद्यपरित्यागेन तदाऽध्वसङ्करप्रसङ्गः। अथ परित्यागेन, तदा सदाऽस्तित्वविरोधः। द्वितीयस्यापि वादिनोऽयं सङ्कर एव, सर्वस्य सर्वलक्षणयोगात्। पुरुषस्त्वर्थान्तरभूतरागसमुदाचाराद्रक्त उच्यतेऽविरक्तश्च समन्वागममात्रेण, नतु धर्मस्य लक्षणसमुदाचारो लक्षणसमन्वागमो वा प्राप्तिलक्षणोऽस्ति, अन्यत्वप्रसङ्गाल्लक्षणस्य प्राप्तिवदिति न साम्यं दृष्टान्तस्य दार्ष्टान्तिकेन तृतीयस्य कारित्रेणाध्वव्यवस्थेति तस्य विस्तरेण दूषणं वक्ष्यते। चतुर्थस्याप्येकस्मिन्नेवाध्वनि त्रयोऽध्वानः प्राप्नुवति। तथाहि। अतीतेऽध्वनि पूर्वपश्चिमौ क्षणावतीतानागतौ मध्यमः क्षणः प्रत्युत्पन्न इति। एषा दूषणदिगेषां स्पष्टा। तृतीयमेवारभ्यभूयस्त्रैकाल्यपरीक्षाऽऽरभ्यते। हेमदृष्टान्तेन तु सिद्धान्तोपक्षेपमात्रं कृतम्, नतु धर्मत्रातदर्शनमेवाभिमतम्। तथाच वक्ष्यति कारित्रेण विभागोऽयमध्वनां यत्प्रकल्प्यत इति। नच धर्मत्रातस्य कारित्रेणाध्वव्यवस्था, किं तर्हि ?, वसुमित्रस्य। तत्र यद्यतीतानागतं न स्यात्, अभून्महासम्मतो भविष्यति शङ्खश्चक्रवर्त्तीत्यतीताजातयोर्विज्ञानं

निरालम्बनमेव स्यात्। ततश्च विज्ञानमेव न स्यादालम्बनाभावादिति भावः। तथाहि—प्रतिवस्तु विज्ञप्त्यात्मकं विज्ञानम्, असति च ज्ञेये न किञ्चिदनेन ज्ञेयमित्यविज्ञानमेव स्यात्। किञ्चि—द्वयं प्रतीत्य विज्ञानमुत्पद्यत इति भगवतोक्तम् कतमद्द्वयम्, चक्षूरूपाणि यावन्मनोधर्मा इति। असति चातीतानागते तदालम्बनं विज्ञानं द्वयं प्रतीत्य न स्यादित्यागमविरोधः। अपि- चातीतं कर्म फलदं न स्याद्यदि तन्निःसत्त्वं सत्ताशून्यं भवेत्, फलोत्पत्तिकाले विपाकहेतोरभावात्। नचासतः कार्योत्पादनशक्तिरस्ति, सर्वसामर्थ्यविरहलक्षणत्वादसत्त्वस्य। किंच—आसीन्मान्धानो ब्रह्मदत्तो, भविष्यति शङ्खश्चक्रवर्त्ती मैत्रेयस्तथागत, इत्यादिना विभागेन योगिनामतीतादिविषयं विभक्तं विज्ञानं न स्यात्। न ह्यसतां विभागोऽस्ति।तस्मादतीतानागता भावाः श्रीहर्षादयो न द्रव्यप्रतिषेधरूपाः, अध्वसंगृहीतरूपादित्वेनोपादिष्टत्वाद्वर्त्तमानवत्। उक्तं हि भगवता— अतीतं चेद्भिक्षवो रूपं नाभविष्यन्नश्रुतवानार्यश्रावकोऽतीतरूपेऽनपेक्षोऽभविष्यत्। यस्मात्तर्ह्यस्त्यतीतं रूपं तस्माच्छ्रुतवानार्यश्रावकोऽतीतरूपेऽनपेक्षो भवतीति विस्तरः तथा यत्किंचिद्रूपमतीतमनागतादि तत्सर्वमभिसंक्षिप्य रूपस्कन्ध इति सङ्ख्यां गच्छतीत्यादि। अध्वना सङ्ग्रहो येषां तेऽध्वसङ्ग्रहा रूपादयः। आदिशब्देन वेदनादिपरिग्रहः। तेषां
506/k भावो रूपादित्वम्। अत्राप्यादिशब्देन दुःखसमुदयानित्यानात्मादित्वेनोपदिष्टत्वादिति गृह्यते॥ १७८७॥ १७८८॥ १७८९॥ १७९०॥ § 5926

अथापि स्यात्—आकाशवत्सदावस्थितत्वादतीतादिव्यवस्था तर्हि कथमित्याह—नचैवमित्यादि। § 5927

नचैवमिह मन्तव्यमध्वभेदः कुतो न्वयम्।
कारित्रेण विभागोऽयमध्वनां यत्प्रकल्प्यते॥
१७९१॥§ 5929

कारित्रे वर्त्तते यो हि वर्त्तमानः स उच्यते।
कारित्रात्प्रच्युतोऽतीतस्तदप्राप्तस्त्वनागतः॥
१७९२॥§ 5931

फलाक्षेपश्च कारित्रं धर्माणां जनकं न तु।
न वाक्षेपोस्त्यतीतानां नातः कारित्रसम्भवः॥
१७९३॥§ 5933

यतः संप्राप्तकारित्रो वर्त्तमान उच्यते, उपरतकारित्रोऽतीतः, अप्राप्तकारित्रोऽनागत इत्यध्वानः कारित्रेण व्यवस्थिताः। किं पुनरत्र कारित्रममिप्रेतम्, यदि दर्शनादिलक्षणो व्यापारः, यथा पञ्चानां चक्षुरादीनां दर्शनादिकम्—यतश्चक्षुः पश्यति श्रोत्रं शृणोति घ्राणं जिघ्रति जिह्वा स्वादयतीत्यादिविज्ञानस्यापि विज्ञातृत्वं, विजानातीति कृत्वा रूपादीनामिन्द्रियगोचरत्वम्। एवं सति प्रत्युत्पन्नस्य तत्सभागस्य चक्षुषो निद्राद्यवस्थायां कारित्राभावाद्वर्त्तमानता न स्यात्। अथ फलदानग्रहणलक्षणं कारित्रम्—यथा चक्षुषा सहभवा धर्मा जात्यादयः पुरुषकारफलम्, अनन्तरोत्पन्नं चक्षुरिन्द्रियं पुरुषकारफलमधिपतिफलं निष्यन्दफलं च, एतत्फलं जननात्प्रयच्छद्धेतुभावावस्थानाद्गृह्णच्चक्षुर्वर्त्तमानमुच्यत इति। एवं तर्ह्यतीतानामपि सभागसर्वत्रगविपाकहेतूनां फलदानाभ्युपगमाद्वर्त्तमानत्वप्रसङ्गः। अथ समस्तमेव फलदानग्रहणलक्षणं कारित्रमिष्यते। एवमतीतस्य सभागहेत्वादेरर्द्धवर्त्तमानत्वप्रसङ्गइत्येतद्दोषभयादाचार्यसहन्तभद्र आह—धर्माणां कारित्रमुच्यते फलाक्षेपशक्तिः, नतु फलजननं, नचातीतानां सभागहेत्वादीनां फलाक्षेपोऽस्ति, वर्त्तमानावस्थायामेवाक्षिप्तत्वात्। नचाक्षिप्तस्याक्षेपो युक्तोऽनवस्थाप्रसङ्गात्। तस्मादतीतानां न कारित्रसम्भव इति नास्ति लक्षणसङ्कर इति॥ १७९१॥ १७९२॥ १७९३॥ § 5934

तैरित्यादिना प्रतिविधत्ते। § 5935

तैः कारित्रमिदं धर्मादन्यत्तद्रूपमेव वा।
अभ्युपेयं यदन्याऽस्ति गतिः काचिन्न वास्तवी॥
१७९४॥§ 5937

507/k

अन्यत्वे वर्त्तमानानां प्रागूर्ध्वं वाऽस्वभावता।
हेतुत्वसंस्कृतत्वादेः कारित्रस्येव गम्यताम्॥
१७९५॥§ 5939

अन्यथा नित्यतापत्तिः स्वभावावस्थितेः सदा।
नैतद्रूपातिरिक्तं हि विद्यते नित्यलक्षणम्॥
१७९६॥§ 5941

८ पुरुष] Correction: ; पुरुषा
(sic !)पुरुष

तत्कारित्रं धर्मादन्यद्वा स्यादनन्यद्वेति तैरभ्युपगन्तव्यम्, अन्यानन्ययोरन्योन्यपरिहारस्थितलक्षणत्वात्। एकनिषेधस्यापरविधिनान्तरीयकत्वात्। नान्या वस्तुनो गतिरस्ति। तत्र यद्यन्यत्तदा वर्त्तमानानां प्रागूर्ध्वावस्थयोः निःस्वभावता प्राप्नोति।हेतुत्वसंस्कृतत्वाद्धेतोः कारित्रवत्। आदिशब्देन वस्तुत्वादयो गृह्यन्ते। अन्यथा यदि प्रागूर्ध्वं च निःस्वभावता न स्यात्तदा सर्वस्य संस्कृतस्य नित्यता प्राप्नोति, स्वभावस्य सर्वदा व्यवस्थितत्वात्। नच सदासत्त्वव्यतिरेकेण नित्यत्वलक्षणमस्ति यदाह— नित्यं तमाहुर्विद्वांसो यः स्वभावो न नश्यतीति॥ १७९४॥ १७९५॥ ॥ १७९६॥ § 5942

स्यादेतत्—यदि नाम नित्यता शक्तिः। हेतुत्वसंस्कृतत्वादेस्तु हेतोः कथं साध्यविपक्षेण विरोध इत्याह—नित्यस्येत्यादि। § 5943

नित्यस्य हेतुता पूर्वं क्रमाक्रमविरोधतः।
निषिद्धा संस्कृतत्वं हि व्यक्तं नित्ये निरास्पदम्॥
१७९७॥§ 5945

स्कन्धादिव्यतिरिक्तस्य कारित्रस्योपवर्णने।
स्वसिद्धान्तविरोधश्च दुर्निवारः प्रसज्यते॥
१७९८॥§ 5947

पूर्वमिति। स्थिरभावपरीक्षायाम्। सर्वस्य च संस्कृतस्यानित्यत्वाभ्युपगमात्संस्कृतत्वं नित्ये न सम्भवतीति स्पष्टमेवावसीयते। किंच—स्कन्धायतनव्यतिरिक्तस्य कारित्रस्योपवर्णने सिद्धान्तविरोधः, तथाहि भगवतोक्तम् सर्वं सर्वमिति ब्राह्मण यदुत पञ्चस्कन्धा द्वादशायतनानि, अष्टादशधातव इति॥ १७९७॥ ॥ १७९८॥ § 5948

अनन्यत्वेऽपि कारित्रं धर्मादव्यतिरेकतः।
स्वरूपमिव धर्मस्य प्रसक्तं सार्वकालिकम्॥
१७९९॥§ 5950

ततश्चाध्वविभागोऽयं तद्वशान्न प्रकल्प्यते।

१० धात] Correction: ; चा(श्चा ?)भ (sic !)धात

न हि तस्य च्युतिः प्राप्तिरप्राप्तिर्वा विभागतः॥
१८०० ॥§ 5952

508/k

अथानन्यत्कारित्रमभ्युपगम्यते तदा धर्मस्वरूपवत्तदव्यतिरेकात्तदपि सार्वकालिकं प्राप्नोति। ततश्च कारित्रात्प्रच्युतोऽतीतस्तत्प्राप्तो वर्त्तमानस्तदप्राप्तोऽनागत इति कारित्रवशादयमध्वविभागो न स्यात्। यतोऽस्य कारित्रस्य यदि विभागेन यदि प्राप्त्यप्राप्तयः स्युस्तदा स्यादयमध्वविभागः, ग च तानि विभागेन सम्भवन्ति, सदावस्थितैकरूपस्य विभागाभावात्॥ १७९९॥ १८००॥ § 5953

कारित्राव्यतिरेकाद्वा धर्मः कारित्रवद्भवेत्।
पूर्वापरव्यवच्छिन्नमध्यमात्रकसर्ववान्॥
१८०१ ॥§ 5955

किञ्च—कारित्रादव्यतिरिक्तत्वाद्धर्मोऽपि पूर्वापरकोटिशून्यसत्तायोगी प्राप्नोति कारित्रवत्। पूर्वापरव्यवच्छिन्नं—पूर्वापरकोटिशून्यं, मध्यमात्रकं च तत्सर्वं चेति विग्रहः। तदस्यास्तीति तद्वान्॥ १८०१॥ § 5956

कारित्रमित्यादिना परस्परविरुद्धाभ्युपगमोद्भावनेनोपहसति। § 5957

कारित्रं सर्वदा नास्ति सदा धर्मश्च वर्ण्यते।
धर्मान्नान्यच्च कारित्रं व्यक्तं देवविचेष्टितम्॥
१८०२ ॥§ 5959

कारित्रान्तरसापेक्षा तत्राप्यध्वस्थितिर्यदि।
तुल्यः पर्यनुयोगोऽयं ननु सर्वत्र धावति॥
१८०३ ॥§ 5961

एवं तर्हि रूपादिधर्मो न सदास्तीति प्रसक्तं कारित्रादव्यतिरिक्तत्वादित्याह—सदा धर्मश्चेति। एवमपि धर्मादन्यत्कारित्रं प्रसज्यत इत्याह—धर्मान्नान्यच्चकारित्रम्। देवाः—ईश्वरादयः, ते हि युक्तायुक्तमनालोच्य स्वातन्त्र्येणैव वर्त्तन्त इति, तेषां यथाचेष्टितं युक्तिनिरपेक्षं स्वातन्त्र्येण प्रवृत्तिस्तद्वदेतदिति यावत्। किंच —यदि कारित्रस्य कारित्रमन्तरेणानागतादित्वमिष्यते, न तर्हि वक्तव्यमध्वानः कारित्रेण व्यवस्थिता इति, व्यभिचारात्। यथा कारित्रस्य स्वरूपसत्तापेक्षयाऽनागतादित्वं व्यवस्थाप्यते, एवं भावानामप्य-

नागतादित्वं भविष्यतीति किं कारित्रकल्पनया। अथ माभूद्व्यभिचारदोष इति कारित्रस्यापि कारित्रमभ्युपगम्यते, तदा तत्रापि व्यतिरेकादिचिन्तया तुल्यः पर्यनुयोगः। अनवस्थादोषश्च॥ १८०२॥ १८०३॥ § 5962

यदुक्तमनन्यत्वेऽपि कारित्रं सार्वकालिकं प्राप्नोति धर्मस्वरूपवदविशेषादिति। अत्र भदन्तसहन्तभद्र आह— § 5963

स्वरूपाद्व्यतिरिक्तोऽपि दृष्टः सप्रतिघत्ववत्।
विशेषश्चेदिदं नैव प्रकृतस्योपकारकम्॥
१८०४ ॥§ 5965

509/k

नहि सप्रतिघत्वादिः पदार्थस्यानुगामिनः।
कादाचित्को मतः कश्चिद्भावस्यैव तथोद्भवात्॥
१८०५ ॥§ 5967

स्वरूपाद्व्यतिरिक्तोपि विशेषको धर्मो दृष्टो यथा सप्रतिघत्वादिः पृथिव्यादीनाम्, ते हि पदार्थत्वेनाविशिष्टा अपि सप्रतिघा अप्रतिघाः सनिदर्शना अनिदर्शना इतिस्वरूपाद्व्यतिरिक्तैर्धर्मैर्विशिष्टाः प्रतीयन्ते तद्वत्कारित्रेणापि धर्म इति। तदेतत्प्रकृतानुपकारकम्। तथाहि—इदमत्र प्रकृतम्, पदार्थात्कारित्रस्याभेदेऽभ्युपगम्यमाने सत्येकस्यैव पदार्थस्यात्मभूतकारित्रस्याविशेषात्तद्वशादयमध्वविभागो नावकल्पत इति। पृथिव्यादयस्तु परस्परमन्योन्यलक्षणभेदासङ्गाभिन्ना इति युक्तं यत्केचित्सप्रतिघा भवन्ति केचिदप्रतिघा एव यथा वेदनादयः। नतु य एवाप्रतिघास्त एव सप्रतिघा इति, यतो न कश्चिदेकोऽनुगामी पदार्थात्मास्ति, पृथिव्यादीनां यत्सप्रतिघत्वादिधर्मः कादाचित्को भवेत्। किं तर्हि ?, भावस्य निरवयवस्य तथा सजातीयविजातीयव्यावृत्तस्योद्भव इति न स्वरूपाव्यतिरिक्तो धर्म एकस्य भेदको युक्तः॥ १८०४॥ १८०५॥ § 5968

कथं रूपस्य सप्रतिघत्वमिति व्यतिरेकीव व्यपदेशो यदि स्वरूपाव्यतिरिक्तो धर्मो भेदको न भवेदित्याह—अनाक्षिप्तेत्यादि। § 5969

अनाक्षिप्तान्यभेदेन भाव एव तथोच्यते।
तद्रूपस्येति शब्देन चेतसो वासनापि च॥
१८०६ ॥§ 5971

अनाक्षिप्तान्यभेदेनेति। भेदान्तरप्रतिक्षेपेणेत्यर्थः। तथोच्यत इति। व्यतिरेकीव। तदिति। सप्रतिघत्वम्। शब्देनेति। रूपस्य (स)प्रतिघत्वमित्यनेन। अत्र दृष्टान्तमाह—चेतसो वासनापिचेति। अपिचेति समुदायो निपात इवार्थे दृष्टव्यः ॥ १८०६॥ § 5972

पुनः स एवाह—न कारित्रं धर्मादन्यत्, तद्व्यतिरेकेण स्वभावानुपलब्धेः, नापि धर्ममात्रम्, स्वभावास्तित्वेपि कदाचिदभावात्। न च न विशेषः, कारित्रस्यप्रागभावात्, सन्तानवत्। यथा धर्मनैरन्तर्योत्पत्तिः सन्तान इत्युच्यते, न चासौ धर्मव्यतिरिक्तस्तदविभागेन गृह्यमाणत्वात्, नच धर्ममात्रम्, एकक्षणस्यापि सन्तानत्वप्रसङ्गात्, नच नास्ति, तत्कार्यसद्भावादिति। आह च—सन्ततिकार्यं चेष्टं, न विद्यते सापि सन्ततिः काचित्। तद्वदवगच्छ युक्त्या कारित्रेणाऽध्वसंसिद्धिमिति, अत्राह—तत्त्वान्यत्वेत्यादि। § 5973
510/k

तत्त्वान्यत्वप्रकाराभ्यामवाच्यमथ वर्ण्यते।
सन्तानादीव कारित्रं स्यादेवं सांवृतं ननु॥
१८०७ ॥§ 5975

अतश्च कल्पितत्वेन तत्क्वचिन्नोपयुज्यते।
कार्ये सन्ततिवद्यस्माद्वस्त्वेवार्थक्रियाक्षमम्॥
१८०८ ॥§ 5977

सन्निधानं च तस्येदं भाविकं नेति तत्कृतम्।
अध्वत्रयव्यवस्थानं तात्त्विकं नोपपद्यते॥
१८०९ ॥§ 5979

सन्तानादीवेति। आदिशब्देन समूहादिपरिग्रहः। यथा सन्तानिभ्यस्तत्त्वान्यत्वेनावाच्यत्वात्पुद्गलवत्सन्तानो निःस्वभावः (तथा कारित्रं निस्स्वभावं) स्यात्, स्वभावे हि सति तत्त्वमन्यत्वं वाऽवश्यम्भावि, ततश्च तत्कारित्रं कल्पितत्वान्न क्वचित्कार्ये सन्ततिवदुपयुज्येत। नहि कल्पितस्य सन्तानस्य क्वचित्कार्येऽस्त्युपयोगस्तस्यनिःस्वभावत्वात्। स्वभावप्रतिबद्धत्वात्कार्योदयस्य। तस्माद्वस्त्वेव सन्तानिस्वभावमर्थक्रियाक्षमम्। न सन्तानः कल्पितः। ततश्च कारित्रस्य प्रज्ञप्तिसत्त्वात्प्रागनु पश्चादपि न परमार्थतः सन्निधानमस्तीति तद्वशादध्वत्रयव्यवस्थानमपि कल्पितमेव स्यान्नभाविकम्॥ १८०७॥ १८०८॥ १८०९॥ § 5980

तथापि स्याद्भवतु कारित्रं प्रज्ञप्तिसत्, तत्कृतं चाप्यध्वव्यवस्थानं प्रज्ञप्तिसत्, ततश्च को दोष इत्याह—कारित्राख्येति। § 5981

कारित्राख्या फलाक्षेपशक्तिर्या शब्दगोचरा।
शक्तेरेव च वस्तुत्वात्सा प्रज्ञप्तिसती कथम्॥
१८१० ॥§ 5983

यच्चेदमिष्यते रूपं दाहपाकादिकार्यकृत्।
अतीतानागतावस्थं किं तदेवाभ्युपेयते॥
१८११ ॥§ 5985

तदेव चेत्कथं नाम तस्यैवैकात्मनः सतः।
अक्रिया च क्रिया चापि क्रियाविरतिरित्यपि॥
१८१२ ॥§ 5987

एकस्मिन्निर्विशिष्टेस्मिन्परस्परपराहताः।
प्रकाराः कथमेते हि युज्यन्ते नाम वस्तुनि॥
१८१३ ॥§ 5989

एकावस्थापरित्यागे परावस्थापरिग्रहात्।
नैवैतन्निर्विशिष्टं चेद्भस्त्वध्वस्थिति कल्प्यते॥
१८१४ ॥§ 5991

किं वै भावाद्विभिद्यन्तेऽवस्था नाकर्तृताप्तितः।
तासामेव हि सद्भावात्कार्यसत्तोपलभ्यते॥
१८१५ ॥§ 5993

511/k

फलाक्षेपशक्तिर्हि धर्माणां कारित्रमिति भवता वर्णितम्। साच फलाक्षेपशक्तिः प्रज्ञप्तिसती (कथं) भवेत्। नैव भवेदिति यावत्। ततश्च तद्वशादध्वव्यवस्थानंतात्त्विकमेवेष्टं भवतीति भावः। किंच—यदेतद्दाहपाकाद्यर्थक्रियाकारि वह्न्यादिरूपमुपलभ्यते, किं तदेवातीतानागतावस्थमाहोस्विदन्यत्। यदि तदेव, कथमेकस्मिन्निर्विशिष्टेऽस्मिन्रूपादिके वस्तुन्यक्रियादयः परस्परविरुद्धा धर्मा युज्यन्ते। येन यथाक्रममनागतवर्त्तमानातीतव्यवस्था स्यात्। यदि हि विरुद्धधर्माध्यासेऽप्येकत्वं स्यात्, उत्सन्ना तर्हि भेदव्यवस्था, ततश्च सर्वमेव जगदेकमेव स्यात्। एकत्वे च सहोत्पत्त्यादिप्रसङ्गः। अथाप्यवस्थापरित्यागपरिग्रहभेदेन भिन्नत्वादध्वसु वस्तु न निर्विशिष्टमिति कल्पते, एवमपि किं ता अवस्था भावाद्भिन्ना आहोस्विदभिन्ना इति वक्तव्यम्। पर आह—नेति। भिद्यन्ते भावादिति सम्बन्धः। कस्मात् ?, भावस्याकर्त्तृताप्तितः—अकर्त्तृत्वप्रसङ्गात्। अन्वयव्यतिरेकाभ्यां तासामेवावस्थानां कार्यं प्रति सामर्थ्यसिद्धेः॥ १८१०॥ १८११॥ १८१२॥ १८१३॥ १८१४॥ १८१५॥ § 5994

अत्र दूषणमाह—अभेदमित्यादि। § 5995

अभेदमनुमन्यन्ते कथमध्वसु वस्तुनः।
ता अभूत्वा भवन्त्यश्च नश्यन्त्यश्च तदात्मिकाः॥
१८१६॥§ 5997

अवस्थायां च मध्यायां स्वरूपेणैव कारकम्।
तत्तदेव स्वरूपं च दशयोरन्ययोरपि॥
१८१७॥§ 5999

तदा क्रियाक्रियाभ्रंशौ कथमस्य तयोर्मतौ।
पररूपेण कर्तृत्वे प्राप्ताऽस्याकर्तृता पुनः॥
१८१८॥§ 6001

अतीतानागतावस्थमन्यच्चेदनलादिकम्।
तत्साङ्कर्यादिदोषोऽयमस्मिन्पक्षे निरास्पदः॥
१८१९॥§ 6003

तदिदानीमभूत्वैव कार्ययोग्यं प्रजायते।
न च तिष्ठति भूत्वेति सिद्धाऽस्यानन्वयात्मता॥
१८२०॥§ 6005

वस्तुनः सकाशादभेदं कथमवस्था (स्त्व)नुमन्यन्ते—प्रतिपद्यन्ते। नैव। यस्मादभूत्वा भवन्त्यवस्था भूत्वा च विनश्यन्ति। नच तथा वस्त्विष्टम्, सर्वदाऽस्तित्वाभ्युपगमात्। ततश्च कथं ता अभूत्वा भवन्त्यो विनश्यन्त्यश्च तदात्मिका युक्ताः। नैव। भिन्नयोगक्षेमत्वात्। अन्यथा हि तदात्म-
512/k त्वेनासामपि सदाऽस्तित्वप्रसङ्गो वस्तु स्वभाववत्, ततोऽव्यतिरेकाद्वस्तुनो वाऽभूत्वाभावादिप्रसङ्गोऽवस्थास्वरूपवत्। भवतु चावस्थाभेदपरकल्पना, तथापि विरुद्धधर्माध्यासो न परिहृत एव, तथाहि— वस्तु मध्यावस्थायां किं स्वरूपेण कारकमाहोस्वित्पररूपेण, यदि स्वरूपेण तदेव स्वरूपमन्ययोरपि दशयोरतीतानागतावस्थयोरस्तीति कथमस्य कारकस्वभावस्य क्रियाक्रियाभ्रंशौ स्याताम्। अथ पररूपेण, तदाऽस्याकर्तृता पुनः प्राप्तेत्यवस्तुत्वप्रसङ्गः। एवं तावत्तदेव वह्न्यादिरूपमतीतानागतावस्थायां न युक्तम्। अथान्यत्, अस्मिन्पक्षे न भवत्येकत्र क्रियाक्रियादिपरस्परपराहतधर्मसाङ्कर्यादिदोषः, भिन्नत्वाद्वस्तुनः। किं तु यत्तद्दाहपाकादिकार्ययोग्यमनलादिकं वस्तु तदभूत्वा जायते, भूत्वा च विगच्छतीति सदाऽस्तित्वाभ्युपगमविरोधः स्यात्, अन्वयाभावात्॥ १८१६॥ १८१७॥ ॥ १८१८॥ १८१९॥ १८२०॥ § 6006

स्यादेतत्—यद्यपि कार्ययोग्यमभूत्वा जायते, भूत्वा च विगच्छतीति, तथाप्यतीतानागतावस्थायामकार्ययोग्यं वस्तु विद्यत एव, ततश्च न सदाऽस्तित्वाभ्युपगमविरोध इत्याह—स एवेति। § 6007

स एव भाविको भावो य एवायं क्रियाक्षमः।
स च नास्ति तयोर्योस्ति न तस्मात्कार्यसम्भवः॥
१८२१॥§ 6009

स एवेति। अर्थक्रियाक्षमः। तयोरिति। अतीतानागतावस्थयोः। योस्तीति। अकार्ययोग्यः॥ १८२१॥ § 6010

अथापि स्यात्—अतीतस्य सभागहेत्वादेः कार्ययोग्यत्वमिष्यत एव, ततश्चासिद्धमेतन्न तस्मात्कार्यसम्भव इत्याह—अतीतश्चेति। § 6011

अतीतश्च पदार्थोऽयमभूत्वा भवनात्स्फुटम्।
वर्त्तमानोऽन्यवत्प्राप्तः कादाचित्कतयापि च॥
१८२२॥§ 6013

सदा सत्त्वमसत्त्वं वाऽहेतुत्वेऽन्यानपेक्षणात्।
हेतोर्नियतसत्त्वश्च वर्त्तमानोऽर्थ उच्यते॥
१८२३॥§ 6015

प्रतिसङ्ख्यानिरोधादिवैलक्षण्यं परैर्मतम्।
संस्कृतत्वं च रूपादेर्जातिस्थित्यादियोगतः॥
१८२४॥§ 6017

तत्र जातिर्विशेषं कं जनयन्त्यभिधीयते।
जनिकाऽस्येति तद्रूपादजातादपरं परम्॥
१८२५॥§ 6019

513/k

अशक्योत्पादनस्तावदनन्योऽतिशयस्ततः।
सत्त्वात्प्रागपि निष्पत्तेर्निष्पत्त्युत्तरकालवत्॥
१८२६॥§ 6021

अन्यस्त्वतिशयो नास्ति व्यतिरेकादसङ्गतेः।
असत्कार्यप्रसङ्गश्च तस्य पूर्वमसत्त्वतः॥
१८२७॥§ 6023

अन्यथात्वे स्थितौ नाशे चान्यानन्यविकल्पयोः।
जरादिविषया दोषा एत एवानुषङ्गिणः॥
१८२८॥§ 6025

अन्यवदिति। अविवादास्पदीभूतवर्त्तमानवत्। कादाचित्कतयाऽपि चेति।वर्त्तमानोऽन्यवत्प्राप्त इति सम्बन्धः। न चायं हेतुरनन्वयः, तथाहि— हेतुप्रत्ययजनितो योऽर्थः स वर्त्तमान उच्यते, यश्च कादाचित्कः सोऽवश्यं

हेतुप्रत्ययनिमित्तः, यस्मादहेतुकस्य द्वे एव गती, यदुत सदा सत्त्वमसत्त्वं वा, अन्यानपेक्षणात्, तस्माद्यः कादाचित्कः सोऽवश्यं हेतुप्रत्ययनिर्मितसत्त्वः, यश्च हेतुप्रत्ययनिर्मितसत्त्वः सोऽवश्यं वर्त्तमान एवेति सिद्धम्। वर्त्तमानत्वेन कादाचित्कत्वस्य व्याप्तिः। किंच—यद्यतीतानागतं द्रव्यतोऽस्ति तदा सर्वसंस्काराणां शाश्वतत्वप्रसङ्गः। ततश्च प्रतिसङ्ख्यानिरोधादिभ्यो रूपादीनां विशेषो न प्राप्नोति। अथ रूपादेः संस्कृतलक्षणयोगात्संस्कृतत्वं नाकाशादीनां, तेन भवति प्रतिसङ्ख्यानिरोधादेर्वैलक्षण्यं रूपादेरिति परैर्मतं, तदेतदसम्यक्, तथाहि—जातिर्जरास्थितिरनित्यता चेति चत्वारीमानि संस्कृतलक्षणानि। तत्र जातिर्जनयति, स्थितिः स्थापयति, जरा जरयति, अनित्यता विनाशयतीत्येवं जननादिरेषां व्यापार इष्टः। तत्र जातिस्तावत्कं विशेषं जनयन्ती सत्यस्य रूपादेर्जनिकेत्यभिधीयते, किं तस्माद्रूपादेः परं—व्यतिरिक्तमाहोस्विदपरम्—अव्यतिरिक्तं विशेषं जनयन्तीति पक्षद्वयम्। तत्र न तावदव्यतिरिक्तं, यस्मादसौ विशेषो जातिव्यापारात्प्रागपि निष्पन्नत्वादशक्यक्रियः, निष्पत्त्युत्तरकालवत्। नहि निष्पन्नस्य क्रियायुक्ताऽनवस्थाप्रसङ्गात्। नापि व्यतिरिक्तोऽतिशयः क्रियते, व्यतिरेके ह्यस्य रूपादेरयमतिशय इति सम्बन्धासिद्धेः। तथाहि—न तादात्म्यलक्षणः सम्बन्धो व्यतिरेकाभ्युपगमात्। अनभ्युपगमे वा पूर्वोक्तदोषप्रसङ्गात्। नापि तदुत्पत्तिलक्षणो जातेरेव तदुत्पत्तेः। न चान्यः सम्बन्धोऽस्ति, आधाराधेयत्वादीनां तदुत्पत्त्यन्तर्गतत्वात्। अथ तदुत्पत्तिरभ्युपगम्यते, तन्मात्रभाविनो विशेषस्य 514/k नित्योत्पत्तिप्रसङ्गाज्जातिः किङ्करी स्यात्। जातिमपेक्ष्योत्पादयतीति चेत्, न ह्यनुपकारिण्यां जातावपेक्षायुक्ताऽतिप्रसङ्गात्। उपकारे वा तस्योपकारस्यातिशयवत्त्वान्यत्वचिन्तायामनवस्थाप्रसङ्गात्। तस्माद्व्यतिरेके सति सम्बन्धो सिद्ध्यति। किंच —तस्यातिशयस्य पूर्वमसत्त्वादसत्कार्यमभ्युपगतं भवेत्। एवं जरयान्यथात्वे क्रियमाणे स्थित्याऽवस्थितेरनित्यतया च नाशे क्रियमाणे, एषामन्यथात्वादीनामन्याऽनन्यविकल्पे सति ये दोषास्ते जातिवज्जरादिष्वपि वाच्याः॥ १८२२॥ १८२३॥ ॥ १८२४॥ १८२५॥ १८२६॥ १८२७॥ १८२८॥
§ 6026

स्वकार्यारम्भिण इमे सामर्थ्यनियमात्मना।
जात्यादयश्च तद्रूपं प्राक्पश्चादपि विद्यते॥
१८२९॥§ 6028

समर्थरूपभावाच्च प्रारभन्ते न किं तदा।
स्वानुरूपां क्रियां तस्याः प्रारम्भे चामिताध्वता॥
१८३०॥§ 6030

किंच—जात्यादीनां स्वकार्यारम्भित्वं यत्तत्समर्थस्वभावनियमादिष्टं, स च समर्थः स्वभावस्तेषां सर्वदाऽस्तीति सदैव स्वकार्यारम्भित्वप्रसङ्गः। न-च हेतुप्रत्ययवैकल्यं तेषामपि सदावस्थितत्वात्। ततश्चातीतानागतावस्थ-योर्जात्यादिभिर्जननादिस्वकार्यकरणादेकस्मिन्नेवाध्वन्यपरिमिताध्वप्रसङ्गः॥ १८२९॥ १८३०॥ § 6031

किंचातीतादयो भावाः क्षणिकाः स्युर्न वा यदि।
आद्याः पुनस्तयोः प्राप्ता सैवापरिमिताध्वता॥
१८३१॥§ 6033

यः क्षणो जायते तत्र वर्त्तमानो भवत्यसौ।
उत्पद्य यो विनष्टश्च सोऽतीतो भाव्यनागतः॥
१८३२॥§ 6035

अपिच—अतीतानागताः क्षणिका वा स्युर्न वा क्षणिका इति पक्षद्वयम्। तत्र यद्याद्याः—क्षणिका इति यावत्, तदा सैवामिताध्वता प्राप्ता। यः क्षण इति तामेव दर्शयति॥ १८३१॥ १८३२॥ § 6036

अथाप्यक्षणिकास्ते स्युः कृतान्तस्ते विरुध्यते।
क्षणिकाः सर्वसंस्काराः सिद्धान्ते हि प्रकाशिताः॥
१८३३॥§ 6038

अथाक्षणिका इति पक्षः, एवं सति कृतान्तविरोधः—कृतान्तः सिद्धान्त उच्यते। तथाहि क्षणिकाः सर्वसंस्कारा इति सिद्धान्तः॥ १८३३॥ § 6039

युक्तिबाधाऽपि सन्तश्चेन्नियमात्क्षणभङ्गिनः।
वर्त्तमाना इव प्राक्तु प्रतिबन्धोऽत्र साधितः॥
१८३४॥§ 6041

515/k

किंच—न केवलं सिद्धान्तविरोधो मानविरोधोऽपि प्रतिज्ञायाः। तथाहि—यत्सत्तत्सर्वं क्षणिकं यथा वर्त्तमानं, सन्तश्चातीतानागता इति नियमात्क्ष-णभङ्गिनः प्राप्ताः। प्राक्तु—क्षणभङ्गाधिकारे, प्रतिबन्धोऽस्य हेतोः प्रसाधित इति नानैकान्तिकत्वम्। तथाहि—अर्थक्रियाकारित्वं सत्त्वलक्षणम्, अक्षणिक-

स्य च क्रमयौगपद्याभ्यामर्थक्रियाविरोधादर्थक्रियानिवृत्तौ तल्लक्षणस्य सत्त्वस्य निवृत्तिरिति साध्यविपक्षान्निवृत्तं सत्त्वम्॥ १८३४॥ § 6042

अर्थक्रियासमर्थाः स्युरतीतानागता इमे।
न वा सामर्थ्यसद्भावे वर्त्तमानास्तदन्यवत्॥
१८३५ ॥§ 6044

अवर्त्तमानतायां तु सर्वशक्तिवियोगिनः।
नष्टाजाताः प्रसज्यन्ते व्योमतामरसादिवत्॥
१८३६ ॥§ 6046

तुल्यपर्यनुयोगाश्च सर्वे व्योमादयोऽकृताः।
अनैकान्तिकताक्लृप्तेर्न तेपि विनिबन्धनम्॥
१८३७ ॥§ 6048

नियमार्थक्रियाशक्तिर्भावानां प्रत्ययोद्भवा।
अहेतुत्वे समं सर्वमुपयुज्येत सर्वतः॥
१८३८ ॥§ 6050

नियतार्थक्रियाशक्तिजन्म प्रत्ययनिर्मितम्।
वर्त्तमानस्य भावस्य लक्षणं नान्यदस्ति च॥
१८३९ ॥§ 6052

अतीतानागतानां च तदखण्डं समस्ति वः।
तत्किं न वर्त्तमानत्वममीषामनुषज्यते॥
१८४० ॥§ 6054

किंच—इमेऽतीतानागता अर्थक्रियासमर्था वा स्युर्न वा समर्था इति पक्षौ। यदि समर्थास्तदा सामर्थ्यसद्भावे वर्त्तमानाः प्राप्नुवन्ति,

अविवादास्पदीभूतवर्त्तमानवत्। प्रयोगः—ये येऽर्थक्रियासमर्थास्ते वर्त्तमानाः, यथाऽविवादास्पदीभूता वर्त्तमानाः, अर्थक्रियासमर्थाश्चातीतादय इति स्वभावहेतुप्रसङ्गः। न चायमनैकान्तिकः, यतो वर्त्तमानत्वनिवृत्तौ नष्टाजातानां सर्वसामर्थ्यवियोगित्वं प्रसज्येत, आकाशाम्भोरुहवत्। प्रयोगः—ये वर्त्तमाना न भवन्ति ते क्वचित्समर्था अपि न भवन्ति, यथा व्योमाम्भोरुहं, न भवन्ति चातीतादयो वर्त्तमाना इति व्यापकानुपलब्धिः। नचाकाशप्रतिसङ्ख्यानिरोधाप्रतिसङ्ख्यानिरोधैरसंस्कृतैरनेकान्तस्तेषामपि पक्षीकरणात्। अतोऽनैकान्तिकत्वकल्पनाया नातिनिबन्धनम्। तथाहि—येयं प्रतिनियतार्थक्रिया शक्तिर्भावानां सा प्रत्ययोद्भवेत्यङ्गीकर्त्तव्यम्, अन्यथा यदि निर्हेतुका 516/k
स्यात्तदा नियमहेतोरभावात्प्रतिनियता शक्तिर्भावानां न स्यात्। ततश्च सर्वं सर्वस्मिन्कार्ये उपयुज्येत। तस्मात्कृ(तस्मादकृ ?) ताकाशादीनां सामर्थ्यनियमो न युक्त इति न तैरनैकान्तिकत्वकल्पनाया निबन्धनम्। नच प्रथमे हेतौ संदिग्धविपक्षवृत्तिकता, यस्मान्नियतायामर्थक्रियायां या शक्तिस्तस्या यदेतज्जन्म हेतुप्रत्ययनिर्मितं तदेव वर्त्तमानस्य लक्षणम्, एतच्च वर्त्तमानत्वलक्षणमविकलमतीतादिष्वप्यस्तीति निमित्तान्तराभावात्किमिति वर्त्तमानता (न) प्रसज्यते॥ १८३५॥ १८३६॥ १८३७॥ १८३८॥ ॥ १८३९॥ १८४०॥ § 6055

स्वर्गापवर्गसंसर्गयत्नोऽयमफलस्ततः।
ईहासाध्यं न किञ्चिद्धि फलमत्रोपलक्ष्यते॥
१८४१॥§ 6057

किंच—यस्यातीतानागतं द्रव्यतोऽस्ति तस्य फलमपि नित्यमस्तीति स्वर्गापवर्गप्राप्त्यर्थो यत्नो विफलः स्यात्, ईहासाध्यस्य कस्यचित्फलस्याभावात्। किं तत्र व्रतनियमादिलक्षणाया ईहायाः सामर्थ्यं स्यात्। उत्पादने सामर्थ्यमिति चेत्। उत्पादनंतर्ह्यभूत्वा भवतीति सिद्धम्। अथ तदप्यस्ति, कस्येदानीं क्व सामर्थ्यम्। वर्त्तमानीकरणसामर्थ्यमिति चेत्। किमिदं वर्त्तमानीकरणं नाम। देशान्तराकर्षणं चेत्।नित्यं तर्हि वस्तु प्रसक्तं, सर्वदाऽवस्थितत्वात्। अरूपाणां वेदनादीनां निष्क्रियत्वात्कथमाकर्षणं भवेत्। यच्च तदाकर्षणं तदभूत्वा भवतीति सिद्धम्। स्वर्गः सुमेरुपृष्ठादिः अपवर्गो मोक्षः, तयोः प्राप्तिः संसर्गः तत्र यत्नो व्रतनियतादिः॥ १८४१॥ § 6058

अथ नार्थक्रियाशक्तिस्तेषामभ्युपगम्यते।
यद्येवमत एवैषामसत्त्वं व्योमपुष्पवत्॥
१८४२॥§ 6060

अथ नार्थक्रियासमर्था इति द्वितीयपक्ष आश्रीयते। एवं तर्ह्यत एवार्थक्रियाशून्यत्वादसत्त्वं प्राप्नोति खपुष्पवत्। सर्वसामर्थ्यविवेकलक्षणत्वादसत्त्वस्य॥ १८४२॥ § 6061

एवं तावदतीतानागतानामसत्तासाधकं प्रमाणमभिधाय सत्तासाधकं प्रमाणमपाकर्तुमाह—हेतव इत्यादि। § 6062

हेतवो भावधर्मास्तु नासिद्धे सिद्धिभागिनः।
वर्त्तमानत्वसिद्धेर्वा विरुद्धा धर्मिबाधनात्॥
१८४३॥ § 6064

हेतवो हि पूर्वोक्ता अध्वसंगृहीतत्वादित्यादय आश्रयासिद्धाः, अतीतादेर्ध-
517/k र्मिणोऽसिद्धत्वात्। यथाह—नासिद्धे भावधर्मोऽस्तीति। अथापि सिद्धाः स्युः, तथापिवर्त्तमानत्वसिद्धेर्धर्मस्वरूपविपरीतसाधनाद्विरुद्धा हेतवः॥ १८४३॥ § 6065

कथमिदानीमध्वसंगृहीतत्वमतीतानागतानां रूपादीनां निर्दिष्टम्, नहि शशविषाणमत्यन्तासदतीतमनागतं वा व्यवस्थाप्यत इत्याह—भूत्वेत्यादि। § 6066

भूत्वा यद्विगतं रूपं तदतीतं प्रकाशितम्।
सति प्रत्ययसाकल्ये भावि यत्तदनागतम्॥
१८४४॥ § 6068

सत्त्वे तु वर्त्तमानत्वमासज्येतेति साधितम्।
विद्यमानत्वमात्रं हि वर्त्तमानस्य लक्षणम्॥
१८४५॥ § 6070

सुबोधम्॥ १८४४॥ १८४५॥ § 6071

रूपवेदनादिभावस्तर्हि कथं निर्दिष्ट इत्याह—रूपादित्वमित्यादि। § 6072

रूपादित्वमतीतादेर्भूतां तां भाविनीं तथा।
अध्यारोप्य दशामस्य कथ्यते न तु भावतः॥
१८४६॥ § 6074

तां दशामिति। तामवस्थाम्॥ १८४६॥ § 6075

द्ध्याश्रयं तर्हि कथं विज्ञानमुक्तमित्याह—द्वयं प्रतीत्येति। § 6076

द्वयं प्रतीत्यविज्ञानं यदुक्तं तत्त्वदर्शिना।
सेष्टा सविषयं चित्तमभिसन्धाय देशना॥
१८४७॥ § 6078

द्विविधं हि विज्ञानं सालम्बनमनालम्बनं च, यत्सालम्बनं तदभिसन्धाय द्ध्याश्रयविज्ञानदेशना भगवतः॥ १८४७॥ § 6079

अथ निरालम्बनमपि ज्ञानमस्तीति कथमवसितमित्याह—नित्येश्वरादीत्यादि। § 6080

नित्येश्वरादिबुद्धीनां नैवालम्बनमस्ति हि।
शब्दनामादिधर्माणां तदाकारवियुक्तितः॥
१८४८॥ § 6082

आदिशब्देन प्रधानकालादयः परिकल्पिता गृह्यन्ते। न चैतन्मन्तव्यं शब्दाद्यालम्बना इमा बुद्धय इति कथयति—शब्दनामादीत्यादि। तस्येश्वरादेराकारो नित्यत्वसकलहेतुत्वादिः, यस्तया बुद्ध्याऽध्यवसीयते, तेनाकारेण वियोगः शब्दस्य नाम्नो वा विप्रयुक्तसंस्कारविशेषस्य। आदिशब्देन निमित्तादेः परोपगतस्यार्थप्रतिबिम्बकादिस्वभावस्य॥ १८४८॥ § 6083

यदि तर्हि निर्विषयमपि विज्ञानमस्ति तत्कथं ज्ञानमिति व्यपदिश्यते, तथाहि विजानातीति विज्ञानमिति गीयते, असति च विज्ञेये किं विज्ञानं 518/k
स्यादित्याह—बोधानुगतिमात्रेणेति। § 6084

बोधानुगतिमात्रेण विज्ञानमिति चोच्यते।
सा चास्याजडरूपत्वं प्राकाश्यात्परिकल्पितम्॥
१८४९॥ § 6086

बोधानुगमोऽपि विना बोधेन (न) सम्भवतीति चेदाह—सा चेति। साबोधानुगतिः। अस्य-विज्ञानस्य। किमुच्यते ?, यत्तदजडरूपत्वम्, प्रकाश्यवस्त्वन्तराभावात्प्रकाशान्तरविरहाच्च नभोवर्त्यालोकवत्प्रकाशरूपत्वादभिधीयते बोधरूपतेति॥ १८४९॥ § 6087

कर्मातीतं च कथं फलदमित्यत्राह—विपाकहेतुरित्यादि। § 6088

विपाकहेतुः फलदो नातीतोऽभ्युपगम्यते।

सद्वासितात्तु विज्ञानप्रबन्धात्फलमिष्यते॥
१८५० ॥§ 6090

वासितं परम्परया फलोत्पादनसमर्थमुत्पादितम्॥ १८५०॥ § 6091

यद्येवं कथमुक्तं भगवता, अस्ति तत्कर्म यत्क्षीणं निरुद्धं विपरिणतमित्याह—तामेवेति। § 6092

तामेव वासनां चेतःसन्ततावधिकृत्य तत्।
अस्ति कर्मेति निर्दिष्टं भक्त्या मूलविनाशवत्॥
१८५१ ॥§ 6094

भक्त्येति। उपचारेण। यथा मूलद्रव्यप्रसूतस्य हिरण्यादेः फलप्रबन्धस्य स(म)भावे विनष्टमपि मूलद्रव्यमविनष्टमित्युच्यते तद्वत्कर्मापि॥ १८५१॥ § 6095

उपचारेण देशनायाः किं प्रयोजनमित्याह—उच्छेददृष्टीति। § 6096

उच्छेददृष्टिनाशाय चैवं शास्त्रा प्रकाशितम्।
अन्यथा शून्यतासूत्रे देशना नीयते कथम्॥
१८५२ ॥§ 6098

नास्त्यतीतं कर्मेत्युक्ते पारम्पर्येण यत्फलोत्पादनसामर्थ्यमाहितमतीतेन कर्मणा तस्याप्यभावं प्रतिपद्येरन्नित्युच्छेददृष्टिमापन्नाः स्युर्विनेया इत्यस्ति कर्मेत्युक्तं भगवता। अन्यथा हि यद्यतीतं स्वरूपेण स्यात्तदा परमार्थशून्यतासूत्रे देशना कथं नीयते। चक्षुरुत्पद्यमानं न कुतश्चिदागच्छति निरुध्यमानं न क्वचित्सन्निचयं गच्छतीति हिचक्षुरभूत्वा भवति भूत्वा च प्रतिविगच्छतीति। वर्त्तमानेऽध्वन्यभूत्वा भवतीति चेन्न। अध्वनो भावानर्थान्तरत्वात्त
519/k एवाध्वानस्तथाऽवस्थितिवचनात्। अथ स्वात्म न्यभूत्वा भवति, तथा सिद्धमनागतं चक्षुर्नास्तीति। अपिच सदाऽवस्थितत्वे संस्काराणां हेतुफलयोरभावात् दुःसमुदयसत्याभावः, तदभावान्निरोधमार्गयोरपि, ततश्च सत्यचतुष्टयाभावात्परिज्ञाप्रहाणसाक्षात्क्रियाभावना न युज्यन्ते, तदभावाच्च फलस्थानां प्रतिपन्नकानां च पुद्गलानामभाव इति सकलमेव प्रवचनं निरुध्यत इति नातीतादिवस्तुजातकल्पना साध्वी॥ १८५२॥ § 6099

अतीतानागतज्ञानं विभक्तं योगिनां कथमित्यत्राह—पारम्पर्येणेत्यादि। § 6100

पारम्पर्येण साक्षाद्वा कार्यकारणतां गतम्।

यद्रूपं वर्त्तमानस्य तद्विजानन्ति योगिनः॥
१८५३॥§ 6102

अनुगच्छन्ति पश्चाच्च विकल्पानुगतात्मभिः।
शुद्धलौकिकविज्ञानैस्तत्त्वतोऽविषयैरपि॥
१८५४॥§ 6104

तद्धेतुफलयोर्भूतां भाविनीं चैव सन्ततिं।
तामाश्रित्य प्रवर्त्तन्तेऽतीतानागतदेशनाः॥
१८५५॥§ 6106

समस्तकल्पनाजालरहितज्ञानसन्ततेः।
तथागतस्य वर्त्तन्तेऽनाभोगेनैव देशनाः॥ १८५६॥
इति त्रैकाल्यपरीक्षा।§ 6109

अतीतार्थापेक्षया कार्यतां गतम्, अनागतापेक्षया कारणताम्। विकल्पानुगतात्मभिरिति। सविकल्पैरित्यर्थः। तत्त्वतोऽविषयैरिति। आविष्टाभिलापैर्ज्ञानैः स्वलक्षणस्याविषयीकरणात्। तत्—तस्मात्। हेतुफलयोः सन्ततिं भूतां भाविनींचाश्रिता अतीतादिदेशना योगिनामपरिशुद्धानां प्रवर्त्तन्ते। भगवतस्तु तथागतस्य शुद्धलौकिकमपि ज्ञानं नास्ति, नित्यसमाहितत्वात्सर्वाविद्याप्रहाणेन। विकल्पस्य चाविद्यास्वभावत्वात्। यदाह— विकल्पः स्वयमेवायमविद्यारूपतां गतः। स्वाकारंबाह्यरूपेण यस्मादारोप्य वर्त्तते॥ इति तस्य पूर्वप्रणिधानपुण्यज्ञानसम्भारसामर्थ्यादवाप्तचिन्तामणिसदृशात्मभावस्यानाभोगेनैव देशनाः प्रवर्त्तन्ते॥ १८५३॥ ॥ १८५४॥ १८५५॥ १८५६॥ § 6110

इति त्रैकाल्यपरीक्षा।

०.२३ लोकायतपरीक्षा।

अनाद्यन्तमित्येतत्समर्थनार्थं चोद्योपक्रमपूर्वकमाह—यदीत्यादि। § 6112

४ सन्ततिं] Correction: ; सन्नतिं (sic !)सन्ततिं

यदि नानुगतोभावः कश्चिदप्यत्र विद्यते।
परलोकस्तदा न स्यादभावात्परलोकिनः॥
१८५७ ॥§ 6114

520/k

काश्चिदिति। आत्मादिः। तत्रात्मनः पूर्वं प्रतिषिद्धत्वादभावादेव नानुगामित्वं, विज्ञानादीनां च क्षणिकत्वात्रैकाल्यपरीक्षायां चान्वयस्य निषिद्धत्वान्नान्वयः॥ १८५७॥ § 6115

ननु देहादयः परलोकिनो भविष्यन्तीत्याह—देहेत्यादि। § 6116

देहबुद्धीन्द्रियादीनां प्रतिक्षणविनाशने।
न युक्तं परलोकित्वं नान्यश्चाभ्युपगम्यते॥
१८५८ ॥§ 6118

तस्माद्भूतविशेषेभ्यो यथा शुक्तसुरादिकम्।
तेभ्य एव तथा ज्ञानं जायते व्यज्यतेऽथवा॥
१८५९ ॥§ 6120

आदिशब्देन वेदनासंज्ञासंस्काराणां ग्रहणम्। नान्यश्चाभ्युपगम्यत इति। आत्मा। तल्लोकायतपक्षानुलोमनमेव ज्ञा(जा?)तम्। तथाहि तस्यैतत्सूत्रं—परलोकिनोऽभावात्परलोकाभाव इति। तथाहि—पृथिव्यापस्तेजोवायुरिति चत्वारितत्त्वानि तेभ्यश्चैतन्यमिति। तत्र केचिद्वृत्तिकारा व्याचक्षते-उत्पद्यते तेभ्यश्चैतन्यम्, अन्येऽभिव्यज्यत इत्याहुः, अतः पक्षद्वयमाह—जायते व्यज्यतेऽथवेति। शुक्तमाम्लत्वम्। सुरेति। मदजननशक्तिः। आदिशब्देन मूर्छादिजननसामर्थ्यपरिग्रहः ॥ १८५८॥ १८५९॥ § 6121

ननु चक्षुरादीनि विषयांश्च रूपादीन्प्रतीत्य विज्ञानमुत्पद्यत इत्यतिप्रतीतमेतत्,तत्कथमुच्यते तेभ्य एव विज्ञानमित्याह—सन्निवेशविशेष इति। § 6122

सन्निवेशविशेषे च क्षित्यादीनां निवेश्यते।
देहेन्द्रियादिसंज्ञेयं तत्त्वं नान्यद्धि विद्यते॥
१८६० ॥§ 6124

तथा च तेषां सूत्रम्—तत्समुदाये विषयेन्द्रियसंज्ञेति। नहि महाभूतव्यतिरेकेणेन्द्रियादीनि सन्ति, तत्संस्थानविशेष एव तत्प्रज्ञप्तेः। नच संस्थानं नामान्यत्संस्थानिभ्यः। इदं च महाभूतचतुष्टयं प्रत्यक्षसंसिद्धम्। न चैतद्व्यतिरेकेणान्यत्तत्वमस्ति प्रत्यक्षसिद्धम्। नच प्रत्यक्षादन्यत्प्रमाणमस्ति, येनान्यस्य परलोकादेः संसिद्धिः स्यात्॥ १८६०॥ § 6125

कार्यकारणता नास्ति विवादपदचेतसोः।
विभिन्नदेहवृत्तित्वाद्गवाश्वज्ञानयोरिव॥ १८६१॥ § 6127

न विवक्षितविज्ञानजन्या वा मतयो मताः।
ज्ञानत्वादन्यसन्तानसम्बद्धा इव बुद्धयः॥
१८६२॥ § 6129

521/k

अपिच—यद्यतीतदेहवर्त्तिनश्चेतसः प्रथमजन्मचित्तं प्रति कारणभावः स्यात्, मरणचित्तस्य चागामिचित्तं प्रति, तदा चित्तप्रतिबन्धानुपरमात्परलोककल्पना स्यात्,यावता प्रथमयोस्तावद्विवादास्पदीभूतयोश्चेतसोर्न कार्यकारणताऽस्ति भिन्नदेहवर्त्तित्वात्, गवाश्ववर्त्तिनोरिव ज्ञानयोः। अथवा—जन्मबुद्धयो धर्मिण्यः, तासामतीतदेहवर्त्तिचरमविज्ञानजन्यत्वप्रतिषेधः साध्यः, ज्ञानत्वादिति सामान्यं हेतुः, अन्यसन्तानवर्त्तिन्यो बुद्धयो निदर्शनम्। प्रयोगस्त्वेवम्—यदि ज्ञानं, न तद्विवक्षितातीतदेहवर्त्तिचरमज्ञानजन्यम्, ज्ञानत्वात्, यथाऽन्यसन्तानवर्त्ति ज्ञानम्। ज्ञानरूपाश्चेमा विवक्षितदेहवर्त्तिन्यो जन्मबुद्धय इति विरुद्धव्याप्तोपलब्धिः विवक्षितविज्ञानजन्य(त्व)विरुद्धेन ज्ञानत्वस्य व्याप्तत्वात्॥ १८६१॥ १८६२॥ § 6130

एवं तावदतीतजन्मनिषेधः कृतः। साम्प्रतमनागतजन्मनिषेधायाह—सरागस्येत्यादि। § 6131

सरागमरणं चित्तं न चित्तान्तरसन्धिकृत्।
मरणज्ञानभावेन वीतक्लेशस्य तद्यथा॥
१८६३॥ § 6133

सरागस्य मरणचित्तं चित्तान्तरं न प्रतिसन्धत्ते, मरणचित्तत्वादर्हच्चरमचित्तवदिति व्यापकविरुद्धोपलब्धिः। वीतक्लेशस्य तद्यथेति। मरणज्ञानम्॥ १८६३॥ § 6134

कुतस्तर्हि चित्तस्योत्पत्तिरित्याह—कायादेवेत्यादि। § 6135

कायादेव ततो ज्ञानं प्राणापानाद्यधिष्ठितात्।
युक्तं जायत इत्येतत्कम्बलाश्वतरोदितम्॥
१८६४॥§ 6137

तथाच सूत्रम्—कायादेवेति। कम्बलाश्वतरोदितमिति॥ १८६४॥ § 6138

ननु च कायानिष्पत्तावपि कललाद्यवस्थायां विज्ञानमस्त्येव मूर्छितम्, तद्यातीतदेहविज्ञानजन्यतया सिद्धम्, कथं कायादेवेति नियम इत्याह—कललादिष्वित्यादि। § 6139

कललादिषु विज्ञानमस्तीत्येतच्च साहसम्।
असञ्जातेन्द्रियत्वाद्धि न तत्रार्थोऽवगम्यते॥
१८६५॥§ 6141

न चार्थावगतेरन्यद्रूपं ज्ञानस्य युज्यते।
मूर्च्छादावपि तेनास्य सद्भावो नोपपद्यते॥
१८६६॥§ 6143

नचापि शक्तिरूपेण तदा धीरवतिष्ठते।
निराश्रयत्वाच्छक्तीनां स्थितिर्न ह्यवकल्पते॥
१८६७॥§ 6145

522/k

ज्ञानाधारात्मनोऽसत्त्वे देह एव तदाश्रयः।
अन्ते देहनिवृत्तौ च ज्ञानवृत्तिः किमाश्रया॥
१८६८॥§ 6147

इन्द्रियार्थौ हि विज्ञानोत्पत्तेः कारणम्, अर्थाधिगमरूपत्वाज्ज्ञानस्य, कललाद्यवस्थायां चेन्द्रियार्थयोरभावात्कथं तत्कार्यं विज्ञानं स्यादिति कारणानुपलब्ध्या मूर्च्छाद्यवस्थायां विज्ञानाभावः सिद्ध इति समुदायार्थः। नच शक्तिरूपेण तदा विज्ञानमस्तीति कल्पयितुं युक्तं, ज्ञानाश्रयस्यात्मनो

२ देह] Correction : ; भेद (sic !)देह

नैयायिकादिप्रकल्पितस्य विज्ञानप्रबन्धस्य वा तदानीमभावात्। नच निराश्रया शक्तिर्युक्ता। तस्मात्सामर्थ्यादिह एवतदानीमाश्रयः। अन्यस्य ज्ञानाधारात्मनः—ज्ञानाधारस्त्व भावस्य विज्ञानप्रबन्धस्यात्मनो वा तदानीमसत्त्वात्। ततश्चान्ते मरणावस्थायां देहस्याश्रयस्य निवृत्तौ निराश्रयं कथं ज्ञानमवतिष्ठेतेति सिद्धोऽनागतजन्माभावः॥ १८६५॥ १८६६॥ १८६७॥ ॥ १८६८॥ § 6148

तदनन्तरसम्भूतदेहान्तरसमाश्रयः।
यदि देहोऽपरो दृष्टः कथमस्तीति गम्यते॥
१८६९॥§ 6150

भिन्नदेहप्रवृत्तं च गजवाज्यादिचित्तवत्।
एकसन्ततिसम्बद्धं तद्विज्ञानं कथं भवेत्॥
१८७०॥§ 6152

एको ज्ञानाश्रयस्तस्मादनादिनिधनो नरः।
संसारी कश्चिदेष्टव्यो यद्वा नास्तिकता परा॥
१८७१॥§ 6154

अथापि स्यान्मरणसमनन्तरसमुद्भूतमन्तराभविकं देहमाश्रित्य चित्तवृत्तिर्भविष्यतीति, तदेतदसम्यक्। नहि मरणानन्तरमपरो देह उत्पद्यमानो दृष्टः। नचादृष्टस्यास्तित्वनिश्चयो युक्तः। तस्यासद्व्यवहारविषयत्वात्। नचैकसन्तानवर्त्तिनश्चेतसो देहान्तरसमाश्रयणं युक्तम्, गजवाज्यादिचित्तवदेकसन्तानसम्बन्धित्वहानिप्रसङ्गात्। प्रयोगः—यद्भिन्नदेहप्रवृत्तं विज्ञानं न तदेकसन्तानसम्बद्धं, यथा गजवाजिनोश्चित्तं,भिन्नदेहवृत्तं चान्तराभावमरणभवयोश्चित्तमिति व्यापकविरुद्धोपलम्भप्रसङ्गः। नचैवं, तस्माद्विपर्ययः। यदेकसन्तानसम्बद्धं तद्भिन्नदेहप्रवृत्तं न भवति, यथा गजचित्तमश्वदेहानाश्रितम्, एकसन्तानसम्बद्धं च प्राणिनश्चित्तमिति विरुद्धव्याप्तोपलब्धिः। भिन्नदेहप्रवृत्तत्वविरुद्धेनाभिन्नदेहप्रवृत्तत्वेनैकसन्तानसंबद्धत्वस्य व्याप्तत्वात्। एक इत्याद्युपसंहारः। आदिरुत्पादो निधनं नाशः, न विद्येते आदिनिधने यस्यासा वनादिनिधनः। नर इत्यात्मा। यद्वा नास्तिकता परेत्यनेन पर- 523/k
लोकिनोऽभावात्परलोकाभाव इत्येतत्सूत्रं सूचयति॥ १८६९॥ १८७०॥ १८७१॥ § 6155

३ ज्ञानाधारस्त्व] Correction: ; ज्ञानाधारश्च (sic!)ज्ञानाधारस्त्व

तदत्रेत्यादिना प्रतिविधत्ते। § 6156

तदत्र परलोकोऽयं नान्यः कश्चन विद्यते।
उपादानतदादेयभूतज्ञानादिसन्ततेः॥ १८७२॥§ 6158

काचिन्नियतमर्यादाऽवस्थैव परिकीर्त्यते।
तस्याश्चानाद्यनन्तायाः परः पूर्व इहेति च॥
१८७३॥§ 6160

दृष्टमात्रसुखासक्तैर्यथैतावति कल्प्यते।
परलोकोऽन्यदेशादिस्तथाऽत्रास्माभिरुच्यते॥
१८७४॥§ 6162

यदि तद्व्यतिरिक्तस्तु परलोको निषिध्यते।
तदा साधनवैफल्यं तदसत्त्वे विवादतः॥
१८७५॥§ 6164

सन्ततेर्नन्ववस्तुत्वान्नावस्थान्तरसम्भवः।
तत्रावस्थापितो लोकः परो वा तात्त्विकः कथम्॥
१८७६॥§ 6166

नैव सन्ततिशब्देन क्षणाः सन्तानिनो हि ते।
सामस्त्येन प्रकाश्यन्ते लाघवाय वनादिवत्॥
१८७७॥§ 6168

तत्र कोऽयं परलोको नाम यस्य भवता निषेधः क्रियते, किं विज्ञानादिस्कन्धचतुष्टयादुपादानोपादेयत्वेन कार्यकारणभूतादन्य आहोस्वित्त-देव। न तावदाद्यः पक्षः,तस्यानभ्युपेतत्वात्। नह्युपादानोपादेयभूताया विज्ञानादिसन्ततेरन्यः परलोकोऽत्रास्ति, यस्याभ्युपगमः स्यात्। किं तर्हि ?।

तस्या ज्ञानादिसन्ततेरनाद्यनन्तायाः काचिदेव वर्षशंताद्यवधिरूपमर्यादाव्यव-
स्थैव परलोकः पूर्व इहेति वा व्यवस्थाप्यते। यथा भवद्भिर्दृष्टमात्रसुखाभिष-
ङ्गादेतावतीन्द्रियगोचर एवान्यदेशादिः परलोकादित्वेन कल्पते। यथोक्तम्—
एतावानेव पुरुषो यावानिन्द्रियगोचरः, तथा पुनरुक्तंदेशान्तरं कालान्तरम-
वस्थान्तरं वा परलोक इति। यदि तु कार्यकारणभूतविज्ञानादिसन्तानव्य-
तिरिक्तस्य परलोकस्य निषेधः क्रियते तदा सिद्धसाध्यत्वात्साधनवैफल्यं,
तथाभूतस्य परलोकस्यानभ्युपगतत्वात्। ननु च सन्ततेरवस्तुत्वात्तस्यामव-
स्थाविशेषो योव्यवस्थापितः सोप्यवस्त्वेव, ततश्च तत्र तस्यां सन्ततावव-
स्थाविशेषेऽवस्थापितोऽयं परलोकोऽपि न पारमार्थिकः स्यात्। नैष दोषः।
सन्ततिशब्देन क्षणा एव वस्तु भूताः सन्तानिनो व्यवहारलाघवाय सामस्त्येन 524/k
युगपत्प्रकाश्यन्ते, वनादिशब्देनेवधवादयः॥ १८७२॥ १८७३॥ १८७४॥
१८७५॥ १८७६॥ १८७७॥ § 6169

कथं तर्हि सन्ततेरवस्तुत्वं पूर्वमुक्तं सन्तानादीव कारित्रमित्यत्र प्रस्ताव इत्याह—एकत्वेनेत्यादि। § 6170

एकत्वेनावक्लृप्तत्वान्निःस्वभावतया मता।
तत्त्वान्यत्वाद्यनिर्देश्या वियत्कमलपङ्क्तिवत्॥
१८७८॥§ 6172

सा चानादिरनन्ता च न सिद्धिं कथमृच्छति।
यद्यहेतुकमेतत्स्याच्चित्तमाद्यतया मतम्॥
१८७९॥§ 6174

नित्यहेतुसमुद्भूतं नित्यं सत्त्वत एव वा।
भूतमात्रोद्भवं वाऽपि यद्वाऽन्यज्ञानमात्रजम्॥
१८८०॥§ 6176

गर्भादावादिविज्ञानं तद्याहेतु न युज्यते।

४ पुनरुक्तं] Correction: ; पुनरुक्त (sic!)पुनरुक्तं
९ तद्याहेतु] Correction: ; तत्राहेतु (sic!)तद्याहेतु

कादाचित्कतया सत्त्वं सर्वथाऽस्यान्यथा भवेत्॥
१८८१ ॥§ 6178

नापि नित्यमनःकालदिगीशात्मादिभिः कृतम्।
तत एव सदा सत्त्वप्रसङ्गात्तदभावतः॥
१८८२ ॥§ 6180

एकं नित्यस्वभावं च विज्ञानमिति साहसम्।
रूपशब्दादिचित्तानां व्यक्तं भेदोपलक्षणात्॥
१८८३ ॥§ 6182

क्षोणीतेजोजलादिभ्यो भूतेभ्यो भूतिरस्य न।
व्यक्तिर्वा सर्वचित्तानां यौगपद्यप्रसङ्गतः॥
१८८४ ॥§ 6184

स्थिररूपं परैरिष्टं तद्धि भूतचतुष्टयम्।
सहकारिव्यपेक्षाऽपि स्थिरे पूर्वमपाकृता॥
१८८५ ॥§ 6186

या त्वेकत्वेन कल्पिता सन्ततिः सा तत्त्वान्यत्वाभ्यामवाच्यत्वादवस्तुत्वेनाभिमता—आकाशाम्भोरुहपङ्क्तिवदिति, न तस्या अवस्थाविशेषे परलोकव्यवस्थाऽस्माभिः क्रियते। अथास्या एव विज्ञानादिसन्ततेः परलोकसंज्ञितायाः प्रतिषेधः क्रियते, तदा तस्यास्तावत्स्वरूपनिषेधद्वारेण परलोकनिषेधो न शक्यते कर्तुं, दृष्टस्यापह्नोतुमशक्यत्वात्। किं तर्हि ?। अनाद्यनन्तत्वधर्मनिषेधद्वारेण। सा चेयमनाद्यनन्ता कथं न सिध्यति। यदि यत्तज्जन्मचित्तमाद्यतया मतं निर्हेतुकं वा स्यात्, नित्यविज्ञानेश्वरादिहेतुसमुद्भूतं वा, यद्वा
525/k स्वत एव नित्यं, भूतमात्रादुत्पन्नं वा, अन्यसन्ता नवर्त्तिज्ञानहतुकं वेति पञ्च पक्षाः। यदि हि स्वसन्तानवर्त्तिपूर्वपूर्वज्ञानहेतुकं पूर्वमेव चित्तं स्यात्तदा स्यादनादिता चित्तसन्ततेर्नान्यथेत्यभिप्रायेणैषां पक्षाणामुपन्यासः। तत्र न तावदाद्यः पक्षो नित्यसत्त्वादिप्रसङ्गात्। अपेक्षया हि भावाःकादाचित्का भवन्ति, यश्च निर्हेतुकः स न किंचिदपेक्ष्यत इति किमिति विरमेत। नापि द्वितीयपक्षोऽत एव नित्यसत्त्वप्रसङ्गात्। कारणवैकल्याद्धि कार्याणामसत्त्वं, यच्चाविकलकार-

णं तत्किमिति न भवेदिति वक्तव्यम्। नापि तृतीयः पक्षः, कस्मात् ?, तदभावतः—सदा सत्त्वाभावतः। एकमित्यादिना तमेव तदभावं दर्शयति। अनेन प्रतिज्ञायाः प्रत्यक्षे विरोधमाह। क्षोणीत्यादिना चतुर्थं पक्षं निराकरोति। क्षोणी —पृथिवी। नित्येश्वरादिहेतुसमुद्भवपक्षवदत्रापि तुल्यो दोषः, यतो महाभूतचतुष्टयं परैर्नित्यमिष्टम्। नच सहकारिकारणापेक्षणानुक्रमेण नित्यादुत्पत्तिरिति युक्तं वक्तुम्, नित्यस्यानुपकारिणि सहकारिणि नापेक्षेति निर्लोठितप्रायत्वात्॥ १८७८॥ ॥ १८७९॥ १८८०॥ १८८१॥ १८८२॥ १८८३॥ १८८४॥ १८८५॥ § 6187

अथ क्षणिकमेवेदं परैरप्यभिधीयते।
कथं स्वोपगमस्तेषामेवं सति न बाध्यते॥
१८८६॥§ 6189

बाध्यतां काममेतत्तु न्याय्यमित्युपगम्यते।
क्षणिकं सर्वयुक्तिभ्यः सर्वभावविनिश्चितम्॥
१८८७॥§ 6191

अथेदं महाभूतचतुष्टयं परैश्चार्वाकैः क्षणिकमभ्युपगम्यते यथोक्तदोषभयात् तदाऽपि दोष एवेत्यभिप्रायः। तथाहि—न तावद्बुद्धिदेहयोः कार्यकारणभावसिद्धौकिंचित्प्रमाणमस्ति, परस्य येन तद्व्यवहारः सिद्ध्येत्। प्रयोगः—यत्र यद्भावसिद्धौ न किंचित्प्रमाणमस्ति न तत्र तद्व्यवहारः प्रेक्षावता कार्यः, यथा वह्नौ शीतव्यवहारः। नास्ति च बुद्धिदेहयोः कार्यकारणभावसिद्धौ किंचित्प्रमाणमिति व्यापकानुपलब्धिः। नचासिद्धता हेतोः, तथाहि—प्रत्यक्षानुपलम्भसाधनः कार्यकारणभावः स चान्वयाद्व्यतिरेकाद्वा विशिष्टादेव निश्चीयते, न दर्शनादर्शनमात्रेण। तत्रान्वयात्कार्यनिश्चये कर्त्तव्ये येषामुपलम्भे सत्युपलब्धिलक्षणप्राप्तं पूर्वमनुपलब्धं सदुपलभ्यत इत्येवमाश्रयणीयम्, अन्यथा हि यद्युपलब्धिलक्षणप्राप्तमनुपलब्धमित्येवं नापेक्षेत, तदा तत्र कार्यस्य प्रागपि सत्त्वमन्यतो वा देशेऽपगमनं (सम्भाव्येत)। येनकारणात्प्रागवस्थिताः कुट्यादयस्तेषां कारणता न निषिद्धा स्यात्। उपलब्धिलक्षण प्राप्तानुपलम्भोपदर्शने तु सा निषिद्धा भवति। तत्र तस्या व्य- 526/k
भिचारात्। एवं तावदन्वयात्कार्यनिश्चयः। व्यतिरेकादपि कार्यनिश्चये सत्सु तदन्येषु समर्थेषु तद्धेतुषु यस्यैकस्याभावे न भवतीत्येवमाश्रयणीयम्, अन्यथा हि केवलं तदभावे न भवतीत्युपदर्शने सन्दिग्धमत्र तस्य सामर्थ्यं स्यात्, अन्यस्यापि तत्समर्थस्याभावात्, ततश्चैवमपि सम्भाव्येत—अन्यदेव तत्र समर्थमस्ति, तदभावात्तन्निवृत्तं, यत्पुनरेतन्निवृत्तौ सत्यामस्य निवृत्तिरुप-

लभ्यते सा यदृच्छासंवादः। मातृविवाहोचितदेशजन्मनः पिण्डखर्जूरस्यान्यत्र देशे मातृविवाहाभावे सत्यभाववत्। तस्मात्समर्थेष्वितिविशेषणीयम्। एवं हि तस्यैव कारणत्वं निश्चीयते, तद्व्यतिरेकस्यैवानुविधानात्। नह्यनुपकारिणो व्यतिरेकः केनचिदनुविधीयतेऽतिप्रसङ्गात्। एवमन्वयव्यतिरेकाभ्यामसंदिग्धं कार्यकारणत्वं प्रतीयते नान्यथा। न चेदृशोऽन्वयो व्यतिरेको वाकायचित्तयोर्निश्चितोऽस्ति। तथाहि—न तावत् स्वदेहबुद्ध्योरन्वयनिश्चयः शक्यते कर्तुं गर्भादौ प्राक्कि(?)त्तोत्पत्तेः केवलकायोपलम्भाभावात्, नहि चित्तमन्तरेणोपलम्भो भवति। परशरीरेऽपि चेतसोऽनुपलब्धिलक्षणप्राप्तत्वान्न पौर्वापर्यग्रहणमस्ति। ततो नान्वयनिश्चयः। नापि व्यतिरेकनिश्चयः। तत्रापि हि न तावदात्मदेहव्यतिरेकेण स्वबुद्धिव्यतिरेको ज्ञातुं शक्यः, सर्वथा स्वयमभावात्। नापि परदेहव्यतिरेकेण तत्सम्बन्धिन्या बुद्धेर्व्यतिरेको निश्चेतुं पार्यते। तद्बुद्धेरनुपलब्धिलक्षणप्राप्तत्वेन देहनिवृत्तावपि बुद्धिव्यतिरेके संशयात्। अतएव कुट्यादौ देहाभावेऽपि न बुद्धिव्यतिरेकनिश्चयः। तत्रापि तत्सत्तायामनुपलब्धिलक्षणप्राप्तत्वेन संशयात्। परिस्पन्दादिकार्य(र्या ?)दर्शनादप्यभावनिश्चयो न युक्तः, नावश्यं (हि) कारणानां कार्यवत्त्वात् (त्वम् ?) अपिच देहविशेषपरिग्रहहेतोस्तृष्णाविपर्यासलक्षणस्य स्वकारणस्याभावात्किं तत्र कुट्यादौ बुद्धेरभाव आहोस्विद्देहव्यतिरेकादिति संशयः। तस्मान्नासिद्धो हेतुः। नापि विरुद्धः सपक्षे भावात्। नाप्यनैकान्तिकोऽतिप्रसङ्गात्, प्रेक्षावत्त्वहानिप्रसङ्गाच्च। तव तर्हि बुद्धेर्न देहः कारणमित्यत्र किं बाधकं प्रमाणमिति चेन्न, समस्त्येव प्रमाणम्। तथा च मनोमतेर्न देहः कारणमित्यत्र स्वतन्त्रा मानसी बुद्धिरित्यादिना प्रमाणमुपदर्शयिष्यति। तस्या एव देहान्तरप्रतिसन्धानं प्रत्याधिपत्याद्देहानाश्रितत्वे सिद्धे परलोकसिद्धेः। किंच—मनोमतेर्देहः कारणं भवतु, एकोऽवयविरूपो वा भवेदनेको वा परमाणुसंचयात्मकः, यद्वा—सेन्द्रियोऽनिन्द्रियो वा, किमुपादानकारणमाहोस्वित्सहकारिकारणमिति विकल्प्यते तत्र न ताव-
527/k देकोऽवयवी युक्तः, तस्य पूर्वनिषिद्धत्वात्। चतुर्महाभूतात्मकत्वहानिप्रसङ्गाच्च न ह्येकस्य स्वभावचतुष्टयं युक्तमनेकव्यवहारोच्छेदप्रसङ्गात्। न(च) स्यादनेकपरमाणुसंचयात्मकोऽङ्गीकर्त्तव्यः। ते च परमाणवः प्रत्येकं वा हेतवः स्युः समुदिता वा। न तावत्प्रत्येकं, प्रतिबीजाङ्कुरोत्पादवत्प्रतिपरमाणुविकल्पोत्पत्तिप्रसङ्गात्। नापि समुदिताः, नासिकाद्येकाङ्गवैकल्येऽपि मानसानुत्पादापत्तेः, क्षित्यादीनामन्यतरापायेऽङ्कुरानुत्पत्तिवत्। नहि सामग्रीप्रतिबद्धं कार्यमन्यतराभावे भवति, तत्प्रतिबद्धस्वभावत्वहानिप्रसङ्गात्। अथ यथा सन्निधानं सर्वेऽपि चैतन्यस्य हेतवः। एवं तर्हि विकलाविकलाङ्गदेहजनितयोर्विशेषेण भवितव्यं कारणभेदात्। अन्यथा कार्यस्य भेदो निर्हेतुकः स्यात्। नवाऽविकलाङ्गस्य सतः पश्चाद्विकलाङ्गतायामुपजातायां कश्चिन्मनोमतेर्विशेषोऽस्ति। श्रुतादिसंस्कारस्य तदानीमप्यविकलस्यैवानुवृत्तेः। गजादिदेहवर्त्तिनी च मनोमतिरतिशयवती प्राप्नोति, न मनुष्यधीः। ये बाल्यशरीरमनुजन्मानस्ते मन्दधियः, महाशरीरास्तु पटुधियः। कारणस्य निर्ह्रा(?)सातिशयाभ्यां कार्य-

स्य निर्ह्रा(?)सातिशययोगदर्शनात्। नहि यद्भेदाद्यस्य भेदो न भवति, तत्त-
स्य कार्यं युक्तमतिप्रसङ्गात्। कार्यभेदस्य च निर्हेतुकत्वप्रसङ्गाच्च। नापि
सेन्द्रिय इति पक्षः। तथाहीन्द्रियात्प्रत्येकंवा मनोमतिः स्यात्समस्ताद्वा।
न तावत्प्रत्येकम्, एकैकेन्द्रियापायेऽपि मनोमतेरविकलत्वात्। तथाहि—प्र-
सुप्तिकादिरोगादिना कार्येन्द्रियादीनामुपघातेऽपि मनोधीरविकृतैकाऽविकलां
स्वसत्तामनुभवति। नच यस्य विकारेऽपि यन्न विक्रियते तत्तत्कार्यं युक्त-
मतिप्रसङ्गात्। किंच—चक्षुरादिविज्ञानवत्प्रतिनियतार्थग्राहिता निर्विकल्पक-
त्वमर्थसन्निधानसापेक्षप्रवृत्तिकता च प्राप्नोति, अभिन्नकारणत्वात्। युगपद-
नेकविकल्पोत्पत्तिप्रसङ्गाच्च। नापि समस्तादिति पक्षः—एकेन्द्रियाभावेऽप्य-
भावप्रसङ्गात्। एकसहकार्यपायेऽङ्कुराद्यपायवत्। नाप्यनिन्द्रिय इति पक्षः,
कलेवरच्युतस्यापि पाण्यादेस्तद्धेतुत्वप्रसङ्गात्। विशिष्टस्य हेतुत्वे सेन्द्रिय एवे-
ष्टः स्यात्। नहि सेन्द्रियादन्यो विशिष्टः शक्यते दर्शयितुम्। नाप्युपादन-
कारणमिति पक्षः। तथाहि —यः कार्यगताशेषविशेषानुयायिनः स्वभावस्य
सदा चात्मसत्ताप्रत्युपस्थानतस्तदुपकारी यस्य विकारापादनमन्तरेण कार्य-
मशक्यविकारं स एव कारणविशेष उपादानत्वेन प्रसिद्धः। यथा पूर्व-
पूर्वो मृदात्मा कलाप उत्तरोत्तरस्य घटसंज्ञितस्य कार्यकलापस्योपादानम्।
अत एव यो यद्विकारयितुमिच्छति स तदुपादानविकारेणैव तद्विकारयति
नान्यथा। न ह्युपादाने पूर्वस्मिन्नप्रतिबद्धसामर्थ्ये सति कार्यस्योत्तरस्योत्पि 528/k
त्सुनः केनचित्प्रतिघातः शक्येत कर्तुम्। यथा घटादेरुत्तरस्योत्पत्स्यमान-
स्य कार्यस्य पूर्वकं मृदात्मानमप्रतिबध्य (द्धा ?) समर्थक्षणोत्पादनतः
शक्यते न विकारापादानं(?) कर्तुम्। सर्वत्रैव च विकारोत्पादनेऽयमेव
क्रमो यदुतासमर्थान्तरोपादानक्षणोत्पादनम्(?)। अन्यथा न किंचित्साक्षा-
द्विरुद्धं सम्भवति। यदि हि सम्भवेत् कार्यस्यापि कारणविकारापादनव-
त्साक्षाद्विकारापादनं स्यात्, नोपादानविकारापादनद्वारेणैव। यत्पुनः प्रदीप-
मधिकृत्यैव देशान्तरवर्त्तिन्यास्तत्प्रभाया अन्तरावरणेनविकारापादनं क्रियते,
तन्न तस्याः साक्षात्प्रदीप उपादांनकारणम्। किं तर्हि ?। पूर्वपूर्वः प्रभाक्षणः।
तथैवासमर्थक्षणान्तरोत्पादनलक्षणविकारापादनात्। आवरणेन प्रभा प्रतिह-
न्यते। यत्पुनर्वस्त्वधिकृत्यैव यद्विकार्यते न तत्तदुपादानं, यथा गवयमधिकृत्य
गौर्विकार्यमाणः। अविकृत्य च शरीरं मनोमतेरनिष्टाचरणादिना दुर्मन-
स्कृतादिलक्षणस्य विकारस्योपादानं क्रियत इति व्यापकविरुद्धोपलब्धिः।
ननु चाहारश्चापा(पाका ?)दिना देहस्य पुष्ट्यादिविकारे सति रागादिलक्षणा
मनोमतेर्विकारापत्तिर्दृश्यत एव। यदि नाम दृश्यते ततः किम्। नह्येताव-
ता हेतोरसिद्धत्वम्। तथाहि—यदविकारेऽपि यस्य विकारापादनं संभव-
ति न तत्तदुपादानमित्येतावन्मात्रमिह विवक्षितम्। संभवन्ति च कस्यचिद-
वस्थायामनिष्टाचरणादिना देहविकारापादनमन्तरेणैव बुद्धेर्विकारापादनमिति
कुतोऽसिद्धत्वं हेतोः। नचाप्येवम्भूतात्कादाचित्कात्तदीयविकारानुविधानात्त-
दुपादनत्वं युक्तमतिप्रसङ्गात्। एवं हि विषयस्याप्युपादानत्वं स्यात्। त-

थाहि—शार्दूलशोणितादिबीभत्सविषयदर्शनादिबलेनापि कस्यचित्कातरमनसः संजायत एव मोहादिलक्षणो मनसो विकारः, न चैतावता सा मनोमतिस्तदाश्रिता भवति। कामशोकादिवितर्केण च मनस्युपहते देहविकारदर्शनाद्देहस्यापि तदुपादानताप्रसङ्गात् किन्तु नियमेन साक्षाच्च यस्यैव यो विकारमनुविधत्ते स तदुपादानो युक्तः। नच रागादिलक्षणो विकारो नियमेन शरीरपोषादितो भवति। कस्यचित्परिपुष्टशरीरस्यापि प्रतिसङ्ख्यानवतोऽसम्भवात्। तथा परिक्षीणवपुषोऽप्ययोनिसौमनस्कारबहुलस्य पुंसस्तिर्यग्गतस्य च कस्यचिदपचितपरिमाणस्याप्यतीव रागादिदर्शनात्। नच यदभावेऽपि यद्भवति तत्तस्य कार्यं युक्तमतिप्रसङ्गात्। नापि साक्षाद्देहाद्रागादिः संभवति, अयोनिसौमनस्कादिव्यवहितत्वात्। तथाहि—देहपुष्टौ सत्यामन्तश्लेष्टव्यलक्षणविषयोपजनितसुखाद्यनुभवः। तत्रात्मदेहवतस्तस्मिन्सुखादौ तत्साधने च नित्यादिविपर्यासपरिगतमनसो ममेदम-
529/k नुग्रा हकमुपघातकं चेत्यात्मोपकारकप्रतिकृत्यादिविकल्पस्ततस्तत्परितोषदौर्मनस्यादिसम्भवस्तस्माच्च सुखादिविषयाध्यवसायादिप्रसूतय इत्येतच्चान्वयव्यतिरेकाभ्यां प्रतीतमेव।सौमनस्यादिसम्भव एव रागादिदर्शनात्, सत्यपि पुष्ट्यादौ तदसम्भवे चादर्शनात्। अतो न पुष्ट्यादि साक्षान्मनोमतेर्विकारकम्। अत एव च साक्षादनुपकारित्वात्सहकारिकारणमपि न देहस्तस्या इति सिद्धम्। साक्षादेवोपकारिणामङ्कुरादिषु क्षित्यादीनां सहकारित्वप्रसिद्धेः, अन्यथाऽतिप्रसङ्गः स्यात्। तस्मात्सजातीयपूर्वबीजप्रबोधप्रवृत्तय एव रागादयः। देहपुष्टियौवनकालादयस्तु केषांचित्प्रतिसङ्ख्यानाभ्यासविकलानां तद्वासनाप्रबोधहेतवो भवन्ति। भवतु वा साक्षादुपकारी देहो मनोमतेःस्वोपादानप्रवृत्तायाः कदाचित्। तथाऽपि न देहनिवृत्तावपि तस्या निवृत्तिः सिद्ध्यति। यथा वह्निनिवृत्तावपि न घटादिविनिवृत्तिः स्वोपादानप्रवृत्तत्वादिति नानिष्टापत्तिः। नाप्यनैकान्तिकता हेतोरतिप्रसङ्गात्। नापि विरुद्धता सपक्षे भावात्। अतो नोपादानकारणं देहः। नापि सहकारिकारणमिति सिद्धं मनोमतेः पूर्वपूर्वबुद्धिप्रभवत्वमेव। स्यादेतत्—ययोः सहस्थितिनियमस्तावुपादानोपादेयभूतौ यथा प्रदीपप्रभे। अस्ति च सहस्थितिनियमः शरीरमनोविज्ञानयोरिति स्वभावहेतुः। तदयमन्यतरासिद्धो हेतुः। विरूपे धातौ शरीरमन्तरेणापि मनोमतेरवस्थानाभ्युपगमात्।नापीष्टसिद्धिर्मनोमतेरपि देहं प्रत्युपादानत्वप्रसङ्गात्। अनैकान्तिकता च। हेतुभेदादपि सहावस्थानसम्भवात्। यथाऽग्नितामद्रवत्तयोः। तथाहि—वह्निसहकारिताम्रं द्रवत्तामारभते, न केवलम्, एवमिहापि देहस्योपादानं कललादि मनोविज्ञानसहकारि देहमुत्तरमारभते, इत्यतस्तयोः सह स्थानं नोपादानोपादेयभावादित्यतोऽनेकान्त एव। अथापि स्यात्—यद्यप्युत्तरकालं मनोधीः पूर्वपूर्वबुद्धिप्रभवा भवति, तथापि या प्रथमकालभाविनी तस्या देहोपादानत्वादतो नाऽनादित्वसिद्धिरिति। तदेतदसम्यक्। न ह्यस्याः कल्पनायाः किंचित्साधकं प्रमाणमस्तीति प्रतिपादितमेतत्। बाधकमपि नास्तीति चेन्न। विद्यत एव बाधकम्। तथाहि—यदि देहात्सकृदुत्प-

न्ना सती मनोधीः पश्चात्सजातिसमुद्भवा स्यात्तदोत्तरकालं सर्वदैव पूर्वपूर्व-
मनोविज्ञानसमुद्भवैव स्यात्, न विजातीयचक्षुरादिविज्ञानसमुद्भवा, न हि
धूमोऽग्नेः सकृदुद्भूय पश्चादन्यतो विजातीयादुद्भवति। नच मनोमतिरुत्तर-
कालं मनोविज्ञानसमुद्भवैवानुभूयते। किं तर्हि। अनियतसमनन्तरप्रत्ययप्र-
सवा। नच यद्यतः प्रथमतरमुदयमासादयत्समुपलब्धं तत्ततोऽन्यतो भवितुम-
र्हति, अहेतुकत्वप्रसङ्गात्। प्रथमतरं वा नियतचक्षुरादिविज्ञानसमनन्तरमुद- 530/k
यमासादयन्ती मनोधीरनुभूयत इति। अतोऽप्रतिनियतविज्ञानमात्रभाविनीति
सिद्धम्। किंच—यदि प्रथमकाल एव मनोमतेरुपादानकारणं देहो नोत्त-
रकालं तदा देहनिरपेक्षा सा किं न प्रवर्त्तेत,नह्यनुपकारिणि देहे तस्याः
काचिदपेक्षा युक्ता। यस्यापि तद(व ?)बुद्ध्यन्तरपूर्विका बुद्धिस्तस्यापि केवला
किं न प्रवर्त्तत इति चेन्न। प्रवर्त्तत एव। यथा विरूपे धातौ। याऽनुरूपे
स्पृहावती सा तत्सापेक्षा वर्त्तत इत्यनुपालम्भ एव। अथोत्तरकालं देह-
स्याप्युपकारित्वमङ्गीक्रियते तदाऽनेकविज्ञानप्रबन्धप्रसवप्रसङ्गः। शरीरस्याप-
रविज्ञानोपादानभूतस्याविकलस्य तज्जनकत्वेनावस्थितत्वात्। तथाहि—यद्य-
देवोत्पद्यते देहाद्विज्ञानं तत्तदपरं पृथक्पृथग्विज्ञानं सन्तनोतीत्येकस्य प्रा-
णिनः प्रतिक्षणमप्रमेयविज्ञानसन्तानाः प्रसूयेरन्। नचैवमनुभवोऽस्ति। अथापि
स्यादुत्तरकालं देहस्य नोपादानकारणत्वेन पृथगुपकारित्वमिष्टम्। किं तर्हि
?। प्रबन्धेन स्वोपादानतः प्रवर्त्तमानाया मनोधिय उत्तरोत्तरकार्यप्रसवं प्र-
ति सहकारित्वादुपकारी देह इत्यतो न देहनिरपेक्षा सा प्रवर्त्तत इति।
एतदपि मिथ्या। नहि यो यस्य यथा जनकत्वेन प्रसिद्धः स तं जनयन्न-
न्यथा जनयति विशेषाभावात्। तथाह्यालोकादिरनुपहतचक्षुर्विज्ञानं प्रत्याल-
म्बनभावेन जनकत्वमनुभूय न पुनस्तस्यान्यथा जनको भवति। यदाह—
ग्राह्यताया न खल्वन्यज्जननं ग्राह्यलक्षणम्। साक्षान्न ह्यन्यथा बुद्धे रूपादिरुप-
कारक इति। अन्यथा कार्यस्य कारणकृतस्वभावभेदाभेदस्य व्यवस्थानं न
स्यात्, तद्गतोपकाराननुविधानात्। ततश्चाहेतुकत्वप्रसङ्गः। नच प्रथमकालं
देहस्य विज्ञानं प्रति साक्षाज्जनकत्वव्यतिरेकेणान्यदुपादानत्वं त्वया गृहीतम्।
किं तर्हि ?। साक्षादुपकारित्वमेव। तच्चोत्तरकालमप्यस्तीति किं नोपादान-
कारणं स्यात्। अथान्यत्पूर्वमपि माभूत्पश्चाद्वदविशेषात्। नचोत्तरकालमपि
पूर्वविज्ञानसहकारी देह एवोत्तरोत्तरबुद्धेरुपादानं भविष्यतीति शक्यं वक्तुम्,
पूर्वं विस्तरेणोपादानत्वस्यनिषिद्धत्वात्। प्रथमजन्मबुद्धेरपि बुद्ध्यन्तरपूर्वकत्व-
प्रसङ्गात्। अतएवानित्यभूतपक्षेप्येतदाचार्यीयं दूषणं सुतरां श्लिष्यति। य-
दाह— देहात्सकृदुत्पन्ना धीर्यदि स्वजात्या नियम्यते।(?) परतश्चेत्समर्थस्य
देहस्य विरतिः कुत इति। तस्मात्सिद्धा मनोबुद्धेरनादिता। अथवा सर्वैव
बुद्धिरविशेषेणानादिः सिद्धा। तथाहि—आदिबुद्धिर्भवन्ती, अक्षबुद्धिर्वा भवेत्,
मनोबुद्धिर्वा। न तावदाद्यः पक्षः, सुप्तमूर्च्छान्यचित्तानां सत्यप्यक्षेऽनुगुणम-
नस्काराभावादक्षबुद्धेरनुत्पत्तेः। अतो न केवलमिन्द्रियमक्षबुद्धेः कार णम्। 531/k
अपि तु मनस्कारविशेषसापेक्षमिति निश्चीयते। अन्वयव्यतिरेकसमधिग-

म्यत्वात्कार्यकारणभावस्य। न चापि यतो यत्प्रथमतरमुत्पद्यमानं निश्चितं तत्ततोऽन्यस्मात्प्रथमतरमुदयमासादत्यहेतुकत्वप्रसङ्गात्। धूम इवानग्नेः। प्रथमतरं चाक्षबुद्धिरुत्पद्यमानाऽनुगुणमनस्कारसापेक्षैवोत्पद्यत इति। तस्मान्न केवलमिन्द्रियमस्याः कदाचित्कारणमिति सिद्धम्। अन्यथा निर्हेतुकत्वप्रसङ्गो बाधकं प्रमाणम्। नापि मनोबुद्धिरिति पक्षः। नहि साऽक्षैरनुपलब्धेऽर्थे स्वातन्त्र्येण प्रवर्त्तते, अन्धबधिराद्यभावप्रसङ्गात्। प्रवर्त्ततां वा, किं सा सविकल्पिका, आहोस्विदविकल्पिकेति वक्तव्यम्। तत्र न तावदाद्यः पक्षः। तथाहि—विकल्पः प्रवर्त्तमानः सर्व एव बोधकशब्दाकारानुस्यूत एव वर्त्तते, अन्तर्जल्पाकारतया नित्यमनुभूयमानत्वात्। सा चवाचकशब्दाकारता विकल्पस्य सङ्केतग्रहणवशाद्वा भवेत्, यद्वा वाचकात्मनः शब्दरूपस्य ज्ञानात्मधर्मरूपत्वाद्बोधरूपवच्छब्दार्थग्रहणाद्वेति विकल्पात्। तत्र न तावत्सङ्केतग्रहणादिति पक्षः, पूर्वं सङ्केतस्यागृहीतत्वात्। नापि द्वितीयः पक्षः। तथाहि —द्विविधः शब्दात्मा स्वलक्षणरूपः सामान्यलक्षणरूपश्च, तत्र यस्तावत्स्वलक्षणरूपस्तस्यावाचकत्वानुभवाकारतया ज्ञानस्य सविकल्पकत्वं नाप्यसौ ज्ञानस्यात्मगतो धर्मो नीलादिवद्बहीरूपेण भासनात्। अन्यथा हि नीलादीनामपि ज्ञानधर्मत्वं स्यात्। अविशेषात्। ततश्च विज्ञानमात्रमेव विश्वं स्यात् न भूतपरिणामरूपम्। ननु साकारज्ञानपक्षे नीलादिप्रकारो ज्ञानस्यात्मगत एव धर्मो बहीरूपेण भासते तत्किमुच्यते बहीरूपेण भासनाज्ज्ञानात्मधर्मो न भवतीति। सत्यमेतत्। किंतु बाह्यार्थोपरागितया ज्ञानस्य तथा प्रतिभासनान्नात्मगतोऽसौ ज्ञानस्येति व्यवस्थाप्यते। किं तर्हि ?। बाह्यस्यैवेति। तत्रैव तस्य निजत्वात्। ज्ञाने तु तस्यार्थोपधानकृतत्वेनागन्तुकत्वात्।तस्मान्न स्वलक्षणरूपः शब्दात्मा वाचको नाप्यसौ ज्ञानात्मधर्मः। सामान्यलक्षणरूपस्तु यद्यपि वाचकस्तथाप्यसौ ज्ञानात्मधर्मो न भवति। बाह्यपरशब्दस्वलक्षणश्रोत्रावसेये तस्य योज्यमानत्वात्, न ज्ञानात्मनि। न ह्यन्यगतं सामान्यमन्यत्र योज्यते, ज्ञानेऽतिप्रसङ्गात्। एवं हि गोत्वमश्वादावपि योज्येत। नचागृहीतशब्दस्वलक्षणे धर्मिणि तद्धर्मो वाचकात्मा योजयितुं शक्यते। धर्माणां धर्मिपरतन्त्रतया स्वातन्त्र्येणाग्रहणात्। नापि विकल्पेन स्वलक्षणात्मा धर्मी ग्रहीतुं शक्यते। तस्य सामान्यलक्षणविषयत्वात्। तस्मादनादिस्वलक्षणानुभवाहितवासनाप्रबोधजन्मानो विकल्पा इति 532/k सिद्धम्। नापि शब्दार्थग्रहणादिति पक्षः, न ह्यर्थे शब्दाः सन्ति तदात्मानो वा, अव्युत्पन्नस्यापि प्रतीतिप्रसङ्गात्। यथेष्टमर्थेषु नियोगाभावप्रसङ्गाच्च। किंच— अनित्यादिरूपेणार्थस्याविशेषेऽपि न विकल्पः सर्वानाकारान्युगपद्विकल्पयति। आकारान्तरव्यवच्छेदेन प्रतिनियतैकाकारोपग्रहेणैव विकल्पस्योत्पत्तेः। अतश्चैकाकारविकल्पेन कारणं वक्तव्यम्। न चाभ्यासात्तदन्यद्वक्तुं शक्यम्, यथा कुणपादिविकल्पानाम्। ततश्च पूर्वाभ्यासवशेन विकल्पकस्य प्रवृत्तेरनादिर्विकल्पकबुद्धिरिति सिद्धम्।अथाविकल्पिकेति पक्षस्तदा न कदाचिद्विकल्पिका बुद्धिरुत्पद्यते। प्रोक्तनीत्या सङ्केतवशादुत्तरकालमुत्पद्यत इति चेन्न। निर्विकल्पकज्ञाने स्थितस्य भ्रंशः (पुंसः ?) सङ्केतस्य क-

र्तुमशक्यत्वात्। तथाहि न यावच्छब्दसामान्यमर्थसामान्यं वा बुद्धाववभासते न तावत्सङ्केतः शक्यते कर्तुम्। नच विकल्पे विज्ञाने सामान्यं प्रत्यवभासते। यच्च प्रत्यवभासते स्वलक्षणं न तत्र तेन वा सङ्केतः क्रियते। व्यवहारार्थत्वात्तस्य। न च सङ्केतकालदृष्टस्य स्वलक्षणस्य व्यवहारकालेऽस्ति संभव इति न स्वलक्षणे सङ्केतकरणात्पूर्वं विकल्पोऽवश्याभ्युपगन्तव्यः। स चाभ्यासमन्तरेण न सिद्ध्यतीति सिद्धाऽनादिता। अपि च— यदि पूर्वजन्माभ्यासाहितवासनान्वयात्प्रथमजन्मभाविनी नेष्यते बुद्धिस्तदा सद्योजातस्य सतः शिशोस्तिर्यग्गतस्यापीदं सुखस्य साधनमिदं दुःखस्येति व्यवसायः कथं भवेत्। येन सुखसाधनं स्तनादिकमन्विच्छति। तच्चालभमानो रोदनमारभते, प्राप्य च सहसा व्यपगतरुदितोऽभ्यवहारादिक्रियां कुरुते। न ह्यनेन कदाचित्स्तनादेः क्षुत्पीडाद्युपशमनादिहेतुत्वमनुभूतम्। नचापिप्रपातपतनादेरुपहतिकारणता। येन सद्यो जातोऽपि वानरादिशिशुरवपातपतनप्रभवदुःखान्मरणभीतो मातुरतीव क्रोडमाश्लिष्यति, प्रपातादिस्थानं च परिहरति। नह्यननुभूतेष्टानिष्टसाधनफलानि नियमेन जिहासन्त्युपादित्सन्तेवाऽतिप्रसङ्गात्। अयसोऽयस्कान्तापसर्पणदृष्टान्तोऽप्ययुक्त एव, नहि तन्निर्हेतुकं, सर्वदा सत्त्वादिप्रसङ्गात्। सहेतुकत्वे वा यथा तस्य हेतुरयस्कान्तो निर्दिश्यतेऽन्वयव्यतिरेकसिद्धस्तथाऽस्यापि हानोपादानानुष्ठानस्य हेतुर्भाव्यः। नचासौ निर्देष्टुं शक्यते, अन्यत्राभ्यासात्। तस्मात्पूर्वाभ्यासकृत एवायं बालानामिष्टानिष्टोपादानपरित्यागलक्षणो व्यवहार इति सिद्धा बुद्धेरनादितेत्यभिप्रायः। तथाच स्वतन्त्रा मानसीत्यादिना, अपिच स्तनपानादावित्यादिना च साधारणं दूषणं वक्ष्यतीत्यलं बहुना। किंच—तेषां—चार्वाकाणां क्षणिकत्वमभ्युपगच्छताम्, स्वोपगमः—स्वसिद्धान्तो बाध्यते—भूतानां नित्यत्वाभ्युपगमो बा(ध्यते।)॥ १८८६॥ १८८७॥ § 6192

533/k

यदि न्यायानुरागाद्वः स्वपक्षेऽप्यनपेक्षता।
भूतान्येव न सन्तीति न्यायोऽयं पर इष्यताम्॥
१८८८॥§ 6194

अथ युक्त्युपेतत्वात्क्षणिकत्वमभ्युपगम्यते तदा विज्ञप्तिमात्रतानयस्तर्हि पर उत्कृष्टोऽभ्युपगम्यतां, तत्रापि युक्त्युपेतत्वस्याभ्युपगमकारणस्य तुल्यत्वात्॥ १८८८॥ § 6195

कथमित्याह—नावयव्यात्मतेत्यादि। § 6196

८ मिदं] Correction: ; मिव (sic!)मिदं

नावयव्यात्मता तेषां नापि युक्ताऽणुरूपता।
अयोगात्परमाणूनामित्येतदभिधास्यते॥
१८८९॥§ 6198

तेषामिति। महाभूतानाम्। अभिधास्यत इति। समनन्तरमेव बहिरर्थपरीक्षायाम्॥ १८८९॥ § 6199

यदि न सन्त्येव भूतानि कथं तर्हि प्रतिभासन्त इत्याह—अबहिस्तत्त्वरूपाणीत्यादिना। § 6200

अबहिस्तत्त्वरूपाणि वासनापरिपाकतः।
विज्ञाने प्रतिभासन्ते स्वप्नादाविव नान्यतः॥
१८९०॥§ 6202

अन्यत इति। विज्ञानादन्यत्र बाह्य इति यावत्॥ १८९०॥ § 6203

कथं तर्हि पृथिवीत्यादिव्यवहारो लोकशास्त्रयोरित्याह—विज्ञानस्यैवेत्यादि। § 6204

विज्ञानस्यैव निर्भासं समाश्रित्य प्रकल्प्यते।
स्वप्नमायोपमं नेदं महाभूतचतुष्टयम्॥
१८९१॥§ 6206

यदि भूतानि न सन्ति कस्तर्हि ज्ञानहेतुरित्याह—तदन्यस्येत्यादि। § 6207

तदन्यस्य तदाभासे हेतुत्वं नोपपद्यते।
प्राग्भूतं भूतनिर्भासं ज्ञानं तु जनयेत्परम॥
१८९२॥§ 6209

तदन्यस्येति। तस्माद्विज्ञानादन्यस्य भूतचतुष्टयस्य॥ १८९२॥ § 6210

एवं भूतमात्रोद्भवं तावदाद्यं चित्तं न भवतीति प्रतिपादितम्, इदानीं च अन्यविज्ञानमात्रजमित्येतत्पक्षनिराकरणायाह—सन्तानान्तरेत्यादि। § 6211

सन्तानान्तरविज्ञानं तस्य कारणमिष्यते।

१ भासे] Correction: ; भावे (sic!)भासे
२ अन्य] Correction: ; जन्य (sic!)अन्य

यदि तत्किमुपादानं सहकार्यथवाऽस्य किम्॥
१८९३॥§ 6213

उपादानमभीष्टं चेत्तनयज्ञानसन्ततौ।
पित्रोः श्रुतादिसंस्कारविशेषानुगमो भवेत्॥
१८९४॥§ 6215

534/k

उपादानतदादेयधर्मोऽयं यद्व्यवस्थितः।
अन्वयव्यतिरेकाभ्यां निश्चितश्च स्वसन्ततौ॥
१८९५॥§ 6217

स्वोपादानबलोद्भूते सहकारित्वकल्पने।
सन्तानान्तरचित्तस्य न काचिद्व्याहतिर्भवेत्॥
१८९६॥§ 6219

तत्—सन्तानान्तरचित्तं मात्रादिसंबन्धि, उपादानकारणं वा स्यात्सहकारिकारणं वा, न तावदुपादानकारणं, पुत्रज्ञानसन्तानेऽपि मातापितृश्रुतादिसंस्कारादिविशेषानुत्प(वृ ?)त्तिप्रसङ्गात्, यथा पित्रोरेव स्वोत्तरबुद्धिषु। यस्मादुत्तरेषु क्षणेषु यत्पूर्वक्षणसंस्कारानुवर्त्तनम्। एवमुपादानोपादेयधर्मो व्यवस्थितः। स्वसन्तानेऽन्वयव्यतिरेकाभ्यां निश्चितत्वात्। अथ मतम्—यथैकस्मात्प्रदीपाद्दीपान्तरोत्पत्तौ न पूर्वदीपसंस्कारेण स्थौल्यादिलक्षणेन विशिष्टस्योत्तरस्य दीपस्य संभवः, किं तर्हि ?, निःसंस्कारस्य प्रदीपमात्रस्योत्पत्तिः, अन्यतस्तु तस्य दीपान्तरस्य स्वेत्व(न्ध ?)नादेः सकाशाद्विशेषः, तद्वस्तु तद्बुद्धेरिति। तन्न। यस्मात्प्रदीपादिसंस्कारः स्वाश्रयेऽपि तावत्सन्तानमवबध्नाति। अस्थिरत्वात्तस्य। तथाहीन्धनाय(प ?)चये तस्यैव दीपस्य त(अस ?)त्त्वंदृश्यते। नत्वेवमस्थिरः श्रुतादिसंस्कारः, तस्य चिरकालमवस्थानात्। अतो न दीपादिवन्निःसंस्कारस्य बुद्धिमात्रस्य सम्भवो युक्तः। किंच—प्रदीपादौ बहुतराल्पतरमाणुसंचयोत्पादानुकल्पितौ विशेषाविशेषौ, न त्वेकस्य वस्तुलक्षणस्य तत्र विशेषोऽस्त्यविशेषो वा। इह त्वेकस्मिन्नेव वस्तुलक्षणे श्रुतादिसंस्कारेण विशेषो मातृबुद्धिवर्त्तिनि, अविशेषस्तु सुतबुद्धिवर्त्तिनीति किं केन शास्यम्। किंच—उपादानकारणत्वेऽयं प्रसङ्ग उच्यते, न च दीपान्तरं दीपान्तरस्योपादानकारणं, भिन्नसन्तानत्वादिति यत्किंचिदेतत्। अपिच येषां

संस्वेदजातीनां मातैव नास्ति तेषां कथमन्यविज्ञानजा बुद्धिरित्यलं प्रसङ्गेन। अथ सहकारिकारणमिति पक्षस्तदा सिद्धसाध्यता॥ १८९३॥ ॥ १८९४॥ १८९५॥ १८९६॥ § 6220

तस्मादित्यनादित्वसाधने प्रमाणयति। § 6221

तस्मात्तत्रादिविज्ञानं स्वोपादानबलोद्भवम्।
विज्ञानत्वादिहेतुभ्य इदानीन्तनचित्तवत्॥
१८९७॥ § 6223

प्रयोगः—यद्विज्ञानवेदनासंज्ञासंस्कारस्कन्धचतुष्टयस्वभावं वस्तु तत्स्वोपादानबलोद्भूतं विज्ञानादित्वात्, यथा यौवनाद्यवस्थासु तदेव स्कन्धचतुष्ट-
535/k यम्, विज्ञानादि स्वभावश्च प्रथमजन्मचित्तादिकलाप इति स्वभावहेतुः। तत्रादिविज्ञानमिति विज्ञानग्रहणमुपलक्षणं। वेदनादयोऽपि गृहीतव्याः॥ १८९७॥ § 6224

साध्यविपर्यये हेतोर्बाधकं प्रमाणमाह—अन्यहेत्वित्यादि। § 6225

अन्यहेतुप्रतिक्षेपादहेतुत्वे च संस्थिते।
अन्यथा नियतो धर्मो नायं तस्य प्रसज्यते॥
१८९८॥ § 6227

अन्येषां नित्यमनःकालदिगीश्वरादीनां पूर्वं प्रतिक्षेपात्स्वोपादानस्य चानभ्युपगमेऽहेतुकत्वं स्यात्, ततश्चायं विज्ञानादित्वलक्षणो नियतो धर्मो न स्यात्। आकस्मिकस्य स्वभावस्य नियामकाभावेन प्रतिनियमायोगात्। अतो निर्हेतुकत्वे नियतविज्ञानादिधर्मानुपपत्तिर्बाधकं प्रमाणं कादाचित्कत्वानुपपत्तिश्च॥ १८९८॥ § 6228

एवमतीतं जन्म प्रसाध्यानागतमपि प्रसाधयितुं प्रमाणयन्नाह—मरणेत्यादि। § 6229

मरणक्षणविज्ञानं स्वोपादेयोदयक्षमम्।
रागिणो हीनसङ्गत्वात्पूर्वविज्ञानवत्तथा॥
१८९९॥ § 6231

यत्सरागं चित्तं तत्स्वोपादेयचित्तान्तरोदयसमर्थं सरागत्वात्पूर्वावस्थाचित्तवत्, सरागं च मरणचित्तमिति स्वभावहेतुः। नचासिद्धो हेतुः, यतो यद्रोगादिप्रतिपक्षनैरात्म्यदर्शनवियुक्तं चित्तं तत्सर्वं सरागमेव प्रतिपक्षवियुक्त-

त्वात्, सुरताभोगचित्तवदिति। नाप्यनैकान्तिक एतावन्मात्रहेतुकत्वाच्चिन्तरोदयस्येत्यविकलकारणानुपपत्तिर्बाधकं प्रमाणम्॥ १८९९॥ § 6232

एतदेव दर्शयति—येन रूपेणेत्यादि। § 6233

येन रूपेण विज्ञानं जनयत्परिनिश्चितम्।
प्राक्पश्चादपि तद्भिन्नदखण्डं किं न कारकम्॥
१९००॥§ 6235

तद्भिन्नदिति। स्वरूपम्—स्वभावमिति यावत्॥ १९००॥ § 6236

परपक्ष इत्यादिना प्रयोगद्वयेऽपि दृष्टान्तयोः साध्यविकलतां चोदयति। § 6237

परपक्षे च तज्ज्ञानं कायादेवेति संस्थितिः।
दृष्टान्तौ तत्कथं सिद्धौ साध्यधर्मसमन्वितौ॥
१९०१॥§ 6239

ननु कायस्य हेतुत्वं प्रागेव विनिवारितम्।
चेतसो युगपत्प्राप्तेरभावाच्चातिरेकिणः॥
१९०२॥§ 6241

आभोगशुभचित्तादिभावित्वेन विनिश्चितम्।
स्मृतिरागादिविज्ञानं तन्निषेद्धुं न पार्यते॥
१९०३॥§ 6243

536/k

निर्ह्रासातिशयौ दृष्टौ बुद्धीनां पू(र्वभाविनः।)
(श्रुतशिल्पादिकाभ्यासविशेषह्रासवृद्धितः)॥
१९०४॥§ 6245

(मनस्कारे तु)विगुणे ज्ञातव्यार्थान्तराग्रहात्।
ज्ञानस्य ज्ञानहेतुत्वं न याति वचनीयताम्॥
१९०५॥§ 6247

वि(भिन्नदेहवृत्तित्वादिति हेतोरसिद्धता।)
(अमूर्तचेतसो)वृत्तिः का वा कायेष्वपातिनः
१९०६॥§ 6249

तथाहि—स्वोपादानोद्भवत्वं स्वोपादेयोदयक्षमत्वं च साध्यधर्मः। यस्य च नित्यं कायादेव विज्ञानमुत्पद्यत इति दर्शनं तस्य न क्वचिद्यथोक्तसाध्यधर्मत्वसमन्वितोदृष्टान्तः सिद्ध इति कथमिदानीन्तनचित्तवत्पूर्वविज्ञानवदित्येतयोर्दृष्टान्तयोरुपन्यास इति। नैष दोषः। पूर्वमेव कायस्य हेतुत्वं निषिद्धं चेतसो यौगपद्यप्रसङ्ग इत्यनेन। अपेक्षणीयस्य सहकारिकारणस्यातिरेकिणोऽभावात्, नित्यस्यापेक्षानुपपत्तेः। अनित्यपक्षे तु पूर्वोक्तं वर्त्तमानं च दूषणम्। न चाभ्युपगममात्रेण प्रमाणसिद्धस्याप्यसिद्धत्वं युक्तमतिप्रसङ्गात्, तथाच न किंचित्कस्यचित्साधनं स्यात्। यथाऽऽह—नानिष्टेर्दूषणं सर्व मिति। किंच—यदाऽऽभोगचित्तसमनन्तरं स्मरणमुत्पद्यमानं सुपरिनिश्चितं तदा शुभादिचित्ताद्रागः। तथाहि—सा सुन्दरीति तरुणीति तनूदरीति सुमुखीति चेत्यादि शुभं चिन्तयतां रागिणां राग उत्पद्यते, तथा ममानेनापकृतमथकरिष्यत्ययमपकरोतीत्यादि चिन्तयतश्च द्वेष उत्पद्यमानो निश्चितः स कथमपह्नोतुं शक्यते विशेषतः प्रत्यक्षमात्रवादिना। तथा पूर्वभाविनः श्रुतशिल्पाद्यभ्यासविशेषस्योत्कर्षापकर्षाभ्यामुत्तरबुद्धीनां समुत्कर्षापकर्षौ दृष्टौ, तथाऽर्थान्तरव्यासङ्गेन मनस्कारवैगुण्यादर्थान्तराग्रहणं दृष्टमिति ज्ञानस्य ज्ञानहेतुत्वं युक्तियुक्तत्वादवचनीयम्। न तु भूतानां, युक्तिविरोधात्। अत एव ज्ञानस्य ज्ञानहेतुत्वप्रतिपादनात्। कार्यकारणतेत्यादौ प्रथमे प्रसङ्गे विभिन्नदेहवृत्तित्वादित्यस्य हेतोरसिद्धता, तथाहि—यदि तावदाधाराधेयलक्षणा वृत्तिरभिप्रेता सा सुतरां चित्तस्यापतनधर्मणः कायेष्वसिद्धा, सत्यपि कार्यकारणभावे चित्तस्यामूर्त्तत्वेनापतनधर्मकत्वात्। न चापतनधर्मकस्याधारो युक्तोऽकिंचित्करत्वात्॥ १९००॥ १९०१॥ १९०२॥ १९०३॥ १९०४॥ ॥ १९०५॥ १९०६॥ § 6250

जलादीनां तर्हि किं कुर्वन्नाधारः, स्यादित्याह—स्यादित्यादि। § 6251
537/k

स्यादाश्रयो जलादीनां पतनप्रतिषेधतः।

चेतसामगतीनां च किमाधारैः प्रयोजनम्॥
१९०७॥§ 6253

तादात्म्येन स्थितिर्वृत्तिरिह चेत्परिकल्प्यते।
साऽप्ययुक्ता न हि ज्ञानं युक्तं कायात्मकं तव॥
१९०८॥§ 6255

प्रकृ(क्षि ?)त्यादिमूर्त्तस्य स्वोपादानदेशपरिहारेणोत्पद्यमानस्योपादानदेशोत्पादहेतुत्वादाधारो गमनप्रतिबन्धाद्यवस्थाप्यते। न त्वमूर्त्तस्य शक्यं तथा व्यवस्थापयितुम्। अथ तादात्म्यलक्षणा वृत्तिरभिप्रेता, साऽपि न सिद्धा। नहि तव बहिरर्थाभिनिवेशिनो वक्तुं युक्तं कायात्मकं विज्ञानमिति। मम तु युक्तं विज्ञानमात्रवादिन आलयविज्ञानस्वभावत्वात्कायस्येत्यभिप्रायः॥ १९०७॥ १९०८॥ § 6256

कस्मान्न युक्तमित्याह—तादात्म्ये इत्यादि। § 6257

तादात्म्ये हि यथा कायो विस्पष्टं वेद्यते परैः।
रागद्वेषादिचेतोऽपि तथा किं न प्रवेद्यते॥
१९०९॥§ 6259

स्वेनैव वेद्यते चेतो देहस्तु स्वपरैरपि।
यौ चैवं तौ विभिद्येते कुक्षिमूलनटाविव॥
१९१०॥§ 6261

तथाहि देहे गृह्यमाणे परै रागादीनामपि ग्रहणं प्राप्नोत्यव्यतिरेकात्। नच विप्रशक्त्याऽनेकान्तः, तस्यास्तदानीमप्रत्यक्षत्वात्। नतु चैतन्यस्याप्रत्यक्षत्वं, आत्मनाप्यग्रहणप्रसङ्गात्। किंच—यावुभयनिश्चितैकनिश्चितौ तौ भिन्नौ यथा कुक्षिमूलानुभवनटौ, उभयनिश्चितैकनिश्चिते च देहचैतन्ये इति स्वभावहेतुः। स्वेनैवेति। आत्मनैव ॥ १९०९॥ १९१०॥ § 6262

अद्वयज्ञानपक्षे तु नायं हेतुः प्रसिध्यति।
स्वस्य स्वस्यावभासस्य वेदनात्तिमिरादिवत्॥
१९११॥§ 6264

उदयानन्तरध्वंसि नैरन्तर्येण लक्ष्यते।
चेतोदेहस्य ताद्रूप्ये क्षणिकत्वं न किं मतम्॥
१९१२॥§ 6266

यद्येवं विज्ञानमात्रवादप्रतिक्षेपोऽनेनैव हेतुना क्रियमाणो दुर्वारः स्यादित्यत आह —नायं हेतुः प्रसिद्ध्यतीति। असिद्धता हेतुदोषो भवतीति। तथाहि—उभयनिश्चितत्वं विज्ञानवादिनो न सिद्धं स्वप्रतिभासस्यैव सर्वदा वेदनात्। तैमिरिकद्वयद्विचन्द्रदर्शनवत्। अपिच विलक्षणार्थवित्तिकाले निर-
538/k न्तरमुत्पादसमनन्तरविनाशि चित्तं स्पष्टं लक्ष्यते। ततश्च देहस्य ताद्रूप्येऽभ्युपगम्यमाने क्षणिकत्वप्रसङ्गः॥ १९११॥ १९१२॥ § 6267

एवं तावत्तादात्म्यलक्षणवृत्तिर्न सिद्धा, अथ तदुत्पत्तिलक्षणा वृत्तिः, सा च तदुत्पत्तिस्तदाश्रयद्वारेण वा स्यान्मनोविज्ञानस्य, यथा चक्षुरादिविज्ञानस्य चक्षुराद्याश्रयेण। तदव्यभिचाराद्वा, यथा धूमस्याग्न्यव्यभिचारिणः। तदत्र द्विविधाऽपि वृत्तिरसिद्धा। तथाहि—मनोधीर्नेन्द्रियबुद्धिवत्कायाश्रिता, नियमेन साक्षात्तद्विकाराविधानात्। नापि तदविनाभाविनी, विरूपे धातौ कायमन्तरेणापि भावाभ्युपगमात्। तथाऽप्यभ्युपगम्य सिद्धतां हेतोरनैकान्तिकतामाह—तदाश्रयेण संभूतेस्तेन वाऽव्यभिचारत इति। § 6268

तदाश्रयेण संभूतेस्तेन वाऽव्यभिचारतः।
तत्र वृत्तिर्यदीष्येत तथाऽपि व्यभिचारिता॥
१९१३॥§ 6270

प्रागवस्थमपि ज्ञानं प्रतिक्षणविनश्वरे।
देहवृत्तं करोत्येव प्रतिसन्धिं निरन्तरम्॥
१९१४॥§ 6272

एकसन्तानभावेन न चेत्तत्र विभिन्नता।
अन्यन्नाऽप्येकसन्तानभावान्माभूद्विभिन्नता॥
१९१५॥§ 6274

तथाहि—चित्तान्तरप्रतिसन्धानस्य चित्तदेहवृत्तेश्च विरोधाभावात्, यथा मरणक्षणात्प्रागवस्थं जीवदवस्थाभाविविज्ञानं प्रतिसन्धि करोत्येव भिन्नदेहवृत्तमपि, देहस्यक्षणिकत्वादित्यनैकान्तिको हेतुः। अथैकसन्तानत्वेन देह-

स्याभेदादभिन्नदेहवृत्तित्वं कल्प्यते तदाऽन्तराभाविकदेहेऽपि समानम्। तथाहि—पञ्चायतनलक्षणो देहसन्तानस्यावस्थाभेद एवायमामुत्रिको देहः, बालवृद्धावस्थाभेदवत्। द्वितीयेऽपि प्रयोगेज्ञानत्वादित्यस्य हेतोः साध्यविपक्षे बाधकप्रमाणानुपदर्शनादनैकान्तिकत्वं स्पष्टमेवेति नोक्तम्॥ १९१३॥ १९१४॥ १९१५॥ § 6275

सरागमरणज्ञानमित्यादिकं तृतीयं प्रयोगमधिकृत्याह—क्षीणास्रवस्येत्यादि। § 6276

क्षीणास्रवस्य विज्ञानमसन्धानं कुतो मतम्।
परकीयकृतान्ताच्चेन्न प्रामाण्यापरिग्रहात्॥
१९१६॥ § 6278

न विद्यते चित्तान्तरसन्धानं यस्य तदसन्धानम्। अनेन दृष्टान्तस्यान्यतराप्रसिद्धसाध्यधर्मतामाह। तथाहि—चार्वाकस्य कुतः प्रसिद्धमर्हतां न चित्तान्तरं प्रतिस न्धत्ते मरणचित्तमिति। अथापि स्यात्परकीये बौद्धे सिद्धान्ते 539/k
पठ्यते क्षीणा मे जातिरुषितं ब्रह्मचर्यं कृतं करणीयं नापरमस्माद्भवं प्रजानामीति, अतः सिद्धमसन्धानमिति। तदेतदयुक्तम्—परकीयस्य सिद्धान्तस्य प्रामाण्येनापरिग्रहाल्लोकायतस्यकथं तथाऽप्रामाण्येन परिगृहीतान्निश्चयः, परलोकस्यापि निश्चयप्रसङ्गात्। अथान्यत एव प्रमाणान्तरात्तदवगतं तदेव तर्हि किं न साधनमुक्तम्, किमगमकेन जाड्यसंसूचकेनोपन्यस्तेन, न ह्यन्यस्य तदसाधनं येन तन्नाभिधीयते॥ १९१६॥ § 6279

सिद्धान्ताश्रयणेनापि कांश्चिद्बौद्धान्प्रति साध्यधर्मसमन्वितो न सिद्धो दृष्टान्त इति दर्शयन्नाह—ये चेह सुधिय इत्यादि। § 6280

ये चेह सुधियः केचिदप्रतिष्ठितनिर्वृतीन्।
जिनांस्तद्यानिनिष्ठत्वं यानयोश्च प्रचक्षते॥
१९१७॥ § 6282

तान्प्रत्ययमसिद्धश्च साध्यधर्मसमन्वितः।
दृष्टान्तः प्रतिवादीष्टसिद्धान्ताश्रयणेऽपि ते॥
१९१८॥ § 6284

इहेति। सौगते प्रवचने। सुधियो महायानिकाः। केचिदिति माध्यमिकाः। ते हि बुद्धानामप्रतिष्ठितत्वं निर्वाणमाहुः। संसारनिर्वाणयोरप्र-

तिष्ठानात्। श्रावकप्रत्येकबुद्धयानयोश्च बुद्धैकयाननिष्ठत्वमाहुः। एकमेवेदं यानं यदुत महायानमिति वचनात्॥ १९१७॥ १९१८॥ § 6285

एवं दृष्टान्तदोषमुक्त्वाऽनैकान्तिकत्वं साधनदोषमाह—बाधकानभिधानाच्चेति। § 6286

बाधकानभिधानाच्च सन्दिग्धव्यतिरेकिता।
शङ्क्यमानविजातीयसद्भावाद्व्यभिचारिता॥
१९१९ ॥§ 6288

बाधकानभिधानादिति सन्दिग्धव्यतिरेकित्वस्य हेतुः। शङ्क्यमानेत्यादि तु व्यभिचारितायाः। विजातीये सद्भावो विजातीयसद्भावः। कस्य ?। हेतोरिति गम्यते। शङ्क्यमानश्चासौ विजातीयसद्भावश्चेति विग्रहः। न वा मरणत्वप्रसङ्गो बाधकं प्रमाणम्, परमार्थतः कस्यचिदात्मादिकस्य म्रियमाणस्याभावात्। केवलं तु विसदृशसन्तानोत्पत्तौ विशिष्टनिकायसमाख्यावस्थाविशेषोपरमाल्लोके शास्त्रे च तथा व्यवहारः ॥ १९१९॥ § 6289

यदुक्तं कललादिषु विज्ञानमस्तीत्येतच्च साहसमित्यत्राह—कललादिष्वित्यादि। § 6290

कललादिषु विज्ञानमस्तीत्येतन्न साहसम्।
असञ्जातेन्द्रियत्वेऽपि ज्ञानं तत्र न किं भवेत्॥
१९२० ॥§ 6292

540/k

इन्द्रियार्थबलोद्भूतं सर्वं विज्ञानमित्यदः।
साहसं वेद्यते यस्मात्स्वप्नादावन्यथाऽपि तत्॥
१९२१ ॥§ 6294

रूपमर्थगतेरन्यदप्यस्य व्यवसीयते।
मूर्छादावपि तेनास्य सद्भाव उपपद्यते॥
१९२२ ॥§ 6296

१ यानं] Correction : ; ज्ञानं (sic !)यानं

यदि सर्वमेव ज्ञानमिन्द्रियार्थबलेनैव ज्ञायते तदा साहसं भवेत्, यावता स्वप्नाद्यवस्थायां नीलादिप्रतिभासं मनोविज्ञानमसत्यपि चक्षुरादीन्द्रिये विनाऽपि रूपादिनार्थेन संवेद्यते। नचापि तस्य तदानीं कायेन्द्रियमाश्रय इति शक्यं वक्तुम्, नीलादिप्रतिभासत्वात्। कायविज्ञानस्य च स्प्रष्टव्यविषयत्वात्। तस्मादर्थावगतिरूपं सर्वं विज्ञानमित्ययुक्तम्। तेन मूर्छादावपि विज्ञानसद्भावो न विरुध्यते॥ १९२०॥ ॥ १९२१॥ १९२२॥ § 6297

अथापि स्याच्छक्तिरूपेणावस्थानं विज्ञानस्याविरुद्धं स्वरूपेण तु विरुद्धमित्याह—न चापीति। § 6298

न चापि शक्तिरूपेण तथा धीरवतिष्ठते।
स्वरूपेणैव बुद्धीनां व्यवस्थानं तदा मतम्॥
१९२३॥§ 6300

सुप्तमूर्च्छाद्यवस्थासु चेतो नेति च ते कुतः।
निश्चयो वेदनाभावादिति चेत्स कुतो गतः॥
१९२४॥§ 6302

यदीत्थं भवतस्तासु निश्चयः संप्रवर्त्तते।
न वेद्मि चित्तमित्येवं सति सिद्धा सचित्तता॥
१९२५॥§ 6304

स्यान्मतं यदि विज्ञानं दशास्वास्वस्ति तत्कथम्।
न स्मृतिः प्रतिबुद्धादेः तदाकारा भवेदिति॥
१९२६॥§ 6306

तदकारणमत्यर्थं पाटवादेरसम्भवात्।
स्मरणं न प्रवर्त्तेत सद्योजातादिचित्तवत्॥
१९२७॥§ 6308

यदि हि सुप्तमूर्च्छाद्यवस्थायां चित्तं नास्तीति निश्चायकं किंचित्प्रमाणं भवेद्भवेद्विरोधः। स्ववेदनानुपलम्भोऽस्ति निश्चायकं प्रमाणमिति चेन्न। स्वसंवेद-

नानुपलम्भःकुतः सिद्धः। नहि तस्यामवस्थायां संवेदनाभावनिश्चयोऽस्ति। यदि च तासु मूर्च्छावस्थासु न वेद्म्यहं चित्तमित्येवं निश्चयः प्रवर्त्तते भव-तस्तदा तेनैव तथा प्रवृत्तेन निश्चयेन सचित्तता सिद्धा। अथाऽपि स्याद्यदि
541/k स्वापाद्यवस्थासु चित्तं स्यात्किमिति प्रतिबुद्धादेः पुरुषस्य स्मरणं न भवेत्। आदिशब्देन विगतमूर्च्छस्य विगतमदस्येति परिग्रहः। तदेतदस्मरणमकारण-मनुभूताभावसिद्धये। यदि ह्यनुभूत इत्येतावन्मात्रेणैव स्मरणं स्यात्स्यादेतत्, यावता सत्यप्यनुभवे पाटवाभ्यासार्थित्वादिवैकल्यात्स्मरणं न भवति। यथा सद्योजाताद्यवस्थायामनुभूतस्यापि चित्तस्य॥ १९२३॥ ॥ १९२४॥ १९२५॥ १९२६॥ १९२७॥ § 6309

अस्तित्वेऽपि भवतां तर्हि किं प्रमाणं यदि स्मरणाप्रवृत्तावपि सन्देह इति प्रतिचोदयन्नाह—यद्येवमित्यादि। § 6310

यद्येवं कथमस्तित्वमस्यासु व्यवसीयते।
पूर्वोपवर्णितादेव हेतोरित्यवगम्यते॥ १९२८॥§ 6312

स्वप्नमूर्छाद्यवस्थासु चित्तं च यदि नेष्यते।
मृतिः स्यात्तत्र चोत्पत्तौ मरणाभाव एव वा॥
१९२९॥§ 6314

स्वतन्त्रा मानसी बुद्धिश्चक्षुराद्यनपेक्षणात्।
स्वोपादानबलेनैव स्वप्नादाविव वर्त्तते॥
१९३०॥§ 6316

अस्येति। विज्ञानस्य। आस्विति। स्वापाद्यवस्थासु। तत्र पूर्वोप-वर्णितो हेतुः—प्रबुद्धादेः पुरुषस्यादिविज्ञानं स्वोपादानबलोद्भवं विज्ञान-त्वादाभोगाद्यनन्तरभाविस्मार्त्तादिविज्ञानवत्। नचायमनैकान्तिको हेतुः, पूर्वं कारणान्तरनिषेधेन प्रतिबन्धस्य साधितत्वात्। किंच—यदि स्वापाद्यव-स्थायां चित्तं न भवेत्तदा मरणमेव स्यात्। अथ तत्र तथाभूते निर्मूल-मपगतविज्ञाने देहे पुनरुत्पत्तिरिष्यते विज्ञानस्य तदा तत्रोत्पत्ताविष्य-माणायां मरणाभावः प्राप्नोति, मृतस्यापि पुनर्विज्ञानोत्पत्तिप्रसङ्गात्सुप्तप्र-बुद्धवत्। मनोबुद्धेरेव जन्मान्तरप्रतिसन्धाने सामर्थ्यात्। तथाचोक्तम्—छेदसन्धानवैराग्यहानिम्....पत्तयः। मनोविज्ञान एवेष्टा इति। अतो म-नोबुद्धिः पूर्वबुद्धिमात्राश्रयेति प्रतिपादयन्नाह—स्वतन्त्रेत्यादि। स्वातन्त्र्येऽनपेक्ष्य-

त्वं हेतुः। सर्वदैवेयं मनोबुद्धिः स्वोपादानकारणमात्रभाविनी, स्वोपादानव्यतिरिक्तचक्षुरादिकारणान्तपरानपेक्षणात्, स्वप्नावस्थावत्॥ १९२८॥ १९२९॥ १९३०॥ § 6317

तथाहीत्यनेन हेतोरसिद्धतां परिहरति। § 6318

तथाहि न विकल्पानामिन्द्रियार्थव्यपेक्षिता।
तदव्यापारभावेऽपि भावाद्व्योमोत्पलादिषु॥
१९३१॥§ 6320

542/k

तदव्यापारभावेऽपीति। तयोरिन्द्रियार्थयोरव्यापारेऽपीति यावत्। नहि यदव्यापारेऽपि यस्य भावस्तत्तस्य कारणं युक्तमतिप्रसङ्गात्॥ १९३१॥ § 6321

स्यादेतद्भवतु व्योमोत्पलादिविकल्प इन्द्रियार्थानपेक्षस्तदभावेऽपि भावात्। यस्तु चक्षुषि प्रणिहिते नीलादौ पुरोवर्त्तिनि विषये नीलमेतदिति विकल्पः प्रवर्त्तते। स कथमिन्द्रियार्थानपेक्षो येन पक्षैकदेशेऽसिद्धो हेतुर्न भवेदित्याह—तयोरित्यादि। § 6322

तयोर्भावेप्यतीतादिविकल्पो यः प्रवर्त्तते।
असदर्थोपरागेण तुल्य एवावसीयते॥
१९३२॥§ 6324

शब्दार्थप्रतिभासित्वाद्वस्तुरूपं न भासते।
विकल्पेष्विति सर्वं हि विस्तरेणोपपादितम्॥
१९३३॥§ 6326

तयोरिति। इन्द्रियार्थयोः। असदर्थः शून्य उपरागो निर्भासो यस्योत्प्रेक्षितार्थादिविकल्पस्य सोऽसदर्थोपरागो—व्योमादिविकल्पः। तेन तुल्योऽयमपि निर्विषय इत्यर्थः। कथम्?। सर्वो हि विकल्पः शब्दोल्लेखेन प्रवृत्तेः शब्दार्थावभासी, यश्च शब्दार्थावभासी न तत्र वस्तुरूपं भासते वस्तुरूपे शब्दस्याप्रवृत्तेः, तत्र तस्यासङ्केतितत्वादिति विस्तरेण शब्दार्थपरीक्षायां प्रतिपादितम्। सपक्षे सद्भावान्न विरुद्धो हेतुः, नाप्यनैकान्तिकः, स्वोपादानानुद्भवत्वे निर्हेतुकत्वप्रसङ्गात्॥ १९३२॥ ॥ १९३३॥ § 6327

कायाश्रितत्वान्न निर्हेतुकत्वमिति चेदित्याशङ्क्याह—प्रसुप्तिकेत्यादि। § 6328

प्रसुप्तिकाद्यवस्थासु शरीरविकृतावपि।
नान्यथात्वं मनोबुद्धेस्तस्मान्नेयं तदाश्रिता॥
१९३४॥§ 6330

प्रसुप्तिकादिरोगोपघातेन हि देहविकारोऽपि मनोमतेरविकारादियं मनोमतिर्न देहाश्रिता, यद्विकारेण नियमात्साक्षाद्यन्न विक्रियते न तत्तदाश्रितं, यथा गोविकारेणाविक्रियमाणोऽश्वो न च देहस्य विकारेण नियमात्साक्षाद्विक्रियते मनोबुद्धिः प्रसुप्तिकावस्थायामिति व्यापकानुपलब्धिः॥ १९३४॥ § 6331

स्वल्पीयसीत्यादिना तदाश्रितत्वं साक्षात्तद्विकारविकारित्वेन व्याप्तमिति दर्शयति। § 6332

स्वल्पीयस्यपि नेत्रादेर्विकारे तिमिरादिके।
चक्षुराद्याश्रिता बुद्धिर्विकृतैव हि जायते॥
१९३५॥§ 6334

तद्देहस्य विनाशेपि मनोधीरतदाश्रया।
स्वोपादानबलेनैव वर्त्तमानाऽविरोधिनी॥
१९३६॥§ 6336

543/k

तस्य चात्र व्यापकस्याभाव इति सिद्धा देहानाश्रिता बुद्धिः। तत्तस्माद्देहनिवृत्तावपि न निवर्त्तयिष्यत इत्यविरोधः। यो हि यदाश्रितो न भवति तन्निवृत्तौ न नियमेन तस्य निवृत्तिः। तद्यथा गोनिवृत्तौ गवयस्य न नियमेन निवृत्तिः। नच देहो मनोमतेराश्रय इति व्यापकानुपलब्धिः॥ १९३५॥ १९३६॥ § 6337

यदुक्तं मरणानन्तरोद्भूतदेहान्तरेत्यादिना श्लोकद्वयेन तत्राह—केवलापीत्यादि। § 6338

केवलाऽपि मनोबुद्धिर्यदैवमविरोधिनी।
नातोऽन्यदेहसद्भावसिद्धये यत्निनो वयम्॥
१९३७॥§ 6340

१ मरणानन्त] Correction : ; मरणान्त (sic !)मरणानन्त

नच शक्यनिषेधोऽसावदृष्टावपि संश्रयात्।
स्यादेषा मन्दनेत्रस्य स्वच्छ(ल्प ?)धूमाद्यदृष्टिवत्॥
१९३८॥§ 6342

अयमत्राभिप्रायः—परलोकोऽत्र साधयितुमिष्टः, स च कथं न सिद्ध्यति, यदि बुद्धिरनाद्यनन्ता सिद्ध्येत्। अस्या एवावस्थाविशेषः परलोकप्रज्ञप्तौ। न तु देहे, आरु(रू ?)प्यधातौ देहाभावेऽपि परलोकाभ्युपगमात्। सा चेच्चित्तसन्ततिरनाद्यनन्ता सिद्धा सिद्धो नः परलोक इति नान्यदेहसिद्धये यत्नः क्रियतेऽस्माभिर्निष्फलत्वात्। नच तस्यादृष्टिमात्रेण निषेधः शक्यते कर्तुम्। तथा ह्येषाऽदृष्टिर्जातिविशेषे भावनादिवैकल्यान्मन्दनेत्रस्य भवतः सत्यपि तस्मिन्देहे स्यादपि, ननु ब्रूमोऽ(तनुधूमा ?)दर्शनवदिति नानुपलब्धिमात्रेण प्रतिषेधः सिद्ध्यति। तथाहि सजातिशुद्धदिव्याक्षदृश्योत्तराभवो वर्ण्यते। अत एव साङ्ख्यपरिकल्पितातिवाहिकशरीरस्याप्यप्रतिक्षेपः। पूर्वकालभवस्यापि देशविप्रकर्षान्नोपलम्भः स्यात्, दूरतरदेशोत्पत्तेः, स्वभावविप्रकर्षाद्वा, पिशाचादिदेहवत्। अविप्रकर्षेऽप्यर्वाग्दर्शिना सोऽयं प्राणी पतङ्गाद्यात्मतां गत इति निश्चेतुमशक्यत्वात्। अचिन्त्यशक्तिभैषज्योपयोगेन परावृत्तदेहवत् ॥ १९३७॥ १९३८॥ § 6343

कथं तर्हि भिन्नाश्रयाश्रयाणि ज्ञानान्येकसन्तानसम्बद्धान्युच्यन्त इत्याह—भिन्नदेहाश्रितत्वेऽपीति। § 6344

भिन्नदेहश्रितत्वेऽपि तद्विशेषानुकारतः।
एकसन्ततिसम्बद्धं प्राच्यज्ञानं प्रबन्धवत्॥
१९३९॥§ 6346

अपि च स्तनपानादावभिलाषे प्रवर्त्तते।
उद्वेग उपघाते च सद्योजन्मभृतामपि॥
१९४०॥§ 6348

544/k

३ कथं न सि] Correction: ; कथं सि (sic!)कथं न सि
५ देहे,] Correction: ; देहे (sic!)देहे,
५ धातौ] Correction: ; धातौ, (sic!)धातौ

रुदितस्तनपानादिकार्येणासौ च गम्यते।
स च सर्वो विकल्पात्मा स च नामानुषङ्गवान्॥
१९४१॥§ 6350

तद्विशेषानुकारत इति। तस्य जन्मान्तरवर्तिनो ज्ञानस्य यो विशेषस्तमनुकुर्वन्त्यैहिकानि ज्ञानानि। तथा चोक्तम्— अभ्यासयोगेन शुभाशुभानि कर्माणिसात्म्येन भवन्ति पुंसाम्। यदप्रयत्नेन विनोपदेशाज्जन्मान्तरे स्वप्न इवाचरन्ति॥ तत्र यदुक्तं चार्वाकेण—इहलोकपरलोकशरीरयोर्भिन्नत्वात्तद्गतयोरपि चित्तयोर्नैकः सन्तान इत्यादि। गर्भादौ प्रथमं विज्ञानं विवादगोचरापन्नैकसन्तानिकं न भवतिभिन्नशरीरत्वान्महिषवराहादिविज्ञानवदिति। तदनेन प्रतिक्षिप्तं भवति। अपिच— इतोऽपि परलोकः सिद्धः। तथाहि— यो यो विकल्पः स शब्दानुभवाभ्यासपूर्वकः, विकल्पत्वात्, यौवनाद्यवस्थाभाविविकल्पवत्। विकल्पश्चायं सद्योजातानां*-*-*-*-*स्तनपानाद्यभिलाषादिविकल्प इति स्वभावहेतुः। नताश्रयासिद्धो हेतुः। यतो रुदितस्तनपानादिकार्येणासौ सद्योजातानां स्तनपानाद्यभिलाषादिर्धर्मो सिद्धः। नहि श(र ?)क्तिविद्वेषादिरूपेणाविकल्पयतो रुदितस्तनपानादिसम्भवो युक्तः। नापि स्वरूपासिद्ध इति प्रतिपादयति—स च सर्वो विकल्पात्मेति। सः— स्तनपानाभिलाषादिः। सर्वो विकल्पात्मा—विकल्पस्वभावः। प्रार्थनाद्यकारतयाऽनुभूयमानत्वात्। नाप्यनैकान्तिक इति दर्शयन्नाह—स च नामानुषङ्गवानिति। स इति। विकल्पः। यस्मात्सर्वो विकल्पः शब्दोल्लेखेन प्रवृत्तेर्नामानुषक्तः। स च नामानुषङ्गो विकल्पस्य सङ्केताभ्यासमन्तरेण न सम्भवतीति पूर्वं विस्तरेण प्रतिपादितम्स्माभिः॥ १९३९॥ १९४०॥ १९४१॥
§ 6351

अथापि स्याद्भवतु नाम नामानुषङ्गोऽभ्यासपूर्वकस्तथाऽप्यसौ नेष्टसाधनः। किं तर्हि ?। ऐहलौकिकाभ्यासपूर्वत्वमेव विपरीतं साधयतीत्याह—न नामरूपमित्यादि। § 6352

न नामरूपमक्ष्यस्तमस्मिञ्जन्मनि विद्यते।तेषां
चान्यभवाभावे तदुच्छेदः प्रसज्यते॥
१९४२॥§ 6353

एतदुक्तं भवति। ऐहिलौकिकाभ्यासः सद्योजातानां प्रमाणप्रतीतिबाधितः। नच बाध्यमानप्रतिज्ञार्थस्य हेतोर्विरुद्धत्वं युक्तम्, विरुद्धोऽसति बाधन इति न्यायात्।नामरूपमिति। नाम्नो रूपम्—बाध (वाच ?)कः स्वभावो, बुद्धिपरिवर्त्यपि बाह्येषु शब्देष्वध्यस्तः। तेषां चेति। सद्योजातानां। तदुच्छेद इति। तेषामभिलाषादीनामुच्छेदस्तदुच्छेदः॥ १९४२॥ § 6354

१४ विद्वेषा] Correction: ; र्विद्वेषा (sic!)विद्वेषा

545/k

तन्नामेत्यादिना यथोक्तं प्रमाणार्थमुपसंहरति— § 6355

तन्नामसंस्तवाभ्यासवासनाबलभाव्यसौ।
तेषां विकल्परूपत्वाद्विकल्प इव सम्प्रति॥
१९४३॥§ 6357

तदिति। तस्मादित्यर्थः॥ १९४३॥ § 6358
यन्नामेत्यादिना प्रमाणफलं दर्शयति— § 6359

यन्नामसंस्तवाभ्यासवासनापरिपाकजः।
विकल्पो वर्त्तते तेषां तत्प्रसिद्धं भवान्तरम्॥
१९४४॥§ 6361

नान्नः(?)—शब्दस्य, संस्तवः—परिचयोऽनुभव इति यावत्, तस्याभ्यासः— पुनरुत्पादः। यस्मिन्भवे नामसंभवाभ्यासो यन्नामसंभवाभ्यास इति, सप्तमीति योगविभागात्समासः। तेनाहिता या वासना तस्याः परिपाकः स्वानुरूपः कार्योत्पादने वृत्तिलाभः, ततो जात इति व्युत्पत्तिक्रमः। तेषामिति। सद्योजातानाम् ॥ १९४४॥ § 6362

नामाभ्यासेत्यादिना परकीयं प्रसङ्गसाधनमाशङ्कते— § 6363

नामाभ्यासबलादेव यदि तेषां प्रवर्त्तते।
तत्किं न विस्फुटा वाचः स्मृतिर्वा वाग्मिनामिव॥
१९४५॥§ 6365

यदि पूर्वसङ्केताभ्यासाद्विकल्पस्य प्रवृत्तिस्तदा बालदारकस्य पूर्वसङ्केतानुस्मरणप्रसङ्गः। नह्यभ्यासानुवृत्तिः स्मरणमन्तरेण युक्ता। वाग्मिनामिव विस्पष्टवाक्प्रवृत्तिप्रसङ्गश्च। ततश्च सङ्केतकरणानर्थक्यं स्यात्। न चैवं भवति। तस्मात्स्मरणाभावात्, विस्पष्टवाचोऽप्रवृत्तेश्च, पूर्वाभ्यासपूर्वत्वं विरुद्धमिति प्रसङ्गविपर्ययेण धर्मस्वरूपनिराकरणमुखेन प्रतिज्ञादोषमाह॥ १९४५॥ § 6366

पटीयसेत्यादिना प्रसङ्गविपर्यये च हेतोरनैकान्तिकत्वमाह— § 6367

पटीयसोपघातेन परिपाकाकुलत्वतः।
न स्यादासामियं वृत्तिः सन्निपातदशास्विव॥
१९४६॥§ 6369

नहि पूर्वाभ्यासः सर्वदा स्मरणादिना व्याप्तो येन स्मरणादिकं प्रवर्त्तयेत्। तन्निवृत्तौ वा निवर्त्तेत। यावता पूर्वाभ्यासानुवृत्तिश्च भवेन्न च स्मरणम्, यथासन्निपातावस्थायाम्। तथा स्वप्नेऽपि पूर्वाभ्यासानुवृत्तिर्भवेन्न च स्मरणम्। सन्निपातग्रहणमुपलक्षणम्। पटीयसेति। गर्भपरिवासात्। प-
546/k रिपाकाकुलत्वत इति। वासनापरिपाकस्याकुलत्वम्। यथानुभूतप्रतिनियतदेशकालस्वभावादिभेदरूपेणाप्रवृत्तिः। तत्र यदुक्तं चार्वाकेण जातिस्मरणमसिद्धम्। एकग्रामागतानां सर्वेषां स्मरणादिति। तदनेन प्रतिक्षिप्तं भवति। तथाहि—एकग्रामागता अपि सर्वे न स्मरन्ति। सततस्तत्र केचन तेषां मध्ये ये मन्दमतयस्ते मुषितस्मृतयो भवन्त्येव।आसामिति। वाचाम्॥ १९४६॥
§ 6370

स्वल्पीयानपीत्यादिना प्रसङ्गविपर्यये हेतोः पक्षैकदेशासिद्धतामाह—
§ 6371

स्वल्पीयानपि येषां तु नोपघातो महात्मनाम्।
श्रूयन्ते विस्फुटा वाचस्तेषां सा च स्मृतिः स्फुटा॥
१९४७॥§ 6373

महात्मनामिति। पुण्यवताम्॥ १९४७॥ § 6374
पुनरपि परलोकसिद्धावुपपत्त्यन्तरमाह—रागद्वेषादयश्चेत्यादि। § 6375

रागद्वेषादयश्चामी पटवोऽभ्यासयोगतः।
अन्वयव्यतिरेकाभ्यां भवन्तः परिनिश्चिताः॥
१९४८॥§ 6377

इहत्याभ्यासरहितास्ते ये प्रथमभाविनः।
को हेतुर्जन्मनस्तेषां यदि न स्याद्भवान्तरम्॥
१९४९॥§ 6379

न ह्यालम्बनसान्निध्यात्तेषां जन्मोपपद्यते।
प्रतिसङ्ख्यानसद्भावे तद्भावेऽप्यतदुद्भवात्॥
१९५०॥§ 6381

प्रतिसङ्ख्यानिवृत्तौ च तेषां प्राबल्यदर्शनात्।
नष्टाजातेपि विषये विपर्यासाभिवृद्धितः(नः ?)॥
१९५१॥§ 6383

शुभात्मीयस्थिरादींश्च समारोप्याङ्गनादिषु।
रागादयः प्रवर्त्तन्ते तद्रूपा विषया नच॥
१९५२॥§ 6385

तदनालम्बना एव सदृशाभ्यासशक्तितः।
इहत्या अपि वर्त्तन्ते रागादित्वाद्यथोत्तरे॥
१९५३॥§ 6387

प्रयोगः—रागद्वेषेर्ष्यामदमानादीनां तथा प्रज्ञाकरुणामैत्र्यादीनां च यत्पाटवं तदभ्यासपूर्वकम्, यथैहैव जन्मनि पटुमन्दयथोक्तगुणस्य पुरुषस्याभ्यासवशाद्दृष्टम्। अस्ति देहादावत्र जन्मनि तेषु तेष्वदृष्टैहलौकिकाभ्यासस्यापि कस्यचित्पुरुषस्य तत्पाटवमिति कार्यहेतुः। अन्वयव्यतिरेकाभ्यां कार्यकारणभावस्य निश्चितत्वादिति नासिद्धो हेतुः। अतएवाह—अन्वयव्यतिरेकाभ्यां भवन्तः परिनिश्चिता इति। अपरलौकिकाभ्यासपूर्वत्वसाध- 547/k
नाद्विरुद्धो हेतुरिति चेन्न। इहत्याभ्यासरहितास्ते ये प्रथमभाविनः पटवो रागादय इत्ययुक्तमपरलौकिकाभ्यासपूर्वत्वसाधनम्। न चाहेतुकं युक्तम्, नित्यं सत्त्वादिप्रसङ्गात्। तस्माद्यदि जन्मान्तरं (न) भवेत्तेषाम्—रागादीनां पटूनां, जन्मनः—उत्पत्तेः, को हेतुः स्यात्। तस्माज्जन्मान्तरीय एवाभ्यासो हेतुरिति सिद्धः परलोकः। नचालम्बनं कारणम्, आलम्बनस्य भावेऽपि रागादीनांकदाचिदशुभादिप्रतिसङ्ख्यानसद्भावे सत्यनुत्पत्तेः। अशुभाद्यालम्बना रागादिप्रतिपक्षभूता प्रज्ञा प्रतिसङ्ख्यानम्। असत्यप्यालम्बने रागादीनामुत्पत्तिदर्शनान्न युक्त आलम्बनवशात्तद्भावः। तथाहि—अतीतानागतेऽपि विषये सङ्कल्पवशादभिवृद्धसुखादिविपर्यासस्य पुंसः प्रतिसङ्ख्याननिवृत्तौ तेषां रागादीनां प्रबलत्वं दृश्यते। नहि यद्भावाभावयोर्यस्य भावाभावाविपर्ययस्तत्तस्य कारणं युक्तमतिप्रसङ्गात्। इतोऽपिनालम्बनवशाद्भावादीनां प्रवृत्तिः। तथाहि—यदि यथालम्बनमेव प्रवर्त्तेरन्नेवमालम्बनवशात्प्रवृत्ताः स्युर्यथा नीलादिज्ञानं न चैवं प्रवर्त्तन्ते। किं तर्हि—आत्मीयनित्यसुखाद्याकारानननुभूतानेवारोपयन्तोऽङ्गनादिषु प्रवर्त्तन्ते। न च शुभादिरूपा विषयाः। न च यद्यदाकारशून्यं तत्तस्यालम्बनं युक्तमतिप्रसङ्गात्। तत्—तस्मादारोपितविष-

यत्नेन निरालम्बना रागादयः। ततश्च सिद्धमाद्याः प्रथमभाविनोऽपीह जन्मनि ये रागादयस्ते सजातीयाभ्यासवशात्प्रवर्त्तन्त इति॥ १९४८॥ १९४९॥ ॥ १९५०॥ १९५१॥ १९५२॥ १९५३॥ § 6388

यदि तर्हि विषया न कारणं कथं विषयोपनिपाते रागादय उत्पद्यमाना दृश्यन्त इत्याह—विषयोपनिपात इत्यादि। § 6389

विषयोपनिपाते तु सुखदुःखादिसम्भवाः।
तस्मात्समानजातीयवासनापरिपाकजाः॥
१९५४॥§ 6391

रागद्वेषादयः क्लेशाः प्रतिसङ्ख्यानविद्विषाम्।
अयोनिशोनम(सौमनः ?)स्कारविधेयानां यथाबलम्
१९५५॥§ 6393

साक्षात्तु विषया नैव रागद्वेषादिहेतवः।
एकः क्लेशो हि तत्र स्यात्सर्वेषां तस्य बोधवत्॥
१९५६॥§ 6395

एष हि क्रमः—विषयोपनिपाते सतीन्द्रियजं सुखमुत्पद्यते। तस्माच्च सुखात्प्रतिसङ्ख्यानवैकल्ये सत्यात्मादिविपर्यासलक्षणायोऽनिशो(सौ ?)मन-
548/k स्कारे स्थितानां पूर्वरागाद्याहितवासनापरिपाको भवति ततो रागादयः क्लेशाः प्रवर्त्तन्त इति न साक्षाद्विषयाः कारणम्। स्यादेतत्—स्वराद्धान्तोपवर्णनमात्रमेव केवलम्, नत्वत्र काचिद्युक्तिरित्याह—एक इत्यादि। एक इति। एकाकारः। तत्रेति। विषये। तस्येति। विषयस्य। बोधवदिति। नीलादिग्राहकाकारवत्। नचैकाकारस्तत्र क्लेशः प्रवर्त्तते। तथाहि—एकस्मिन्स्त्रीरूपे कस्यचिद्रागः कस्यचिद्द्वेषः कस्यचिदीर्ष्येत्यनेकाकारस्यप्रवृत्तिर्दृश्यते॥ १९५४॥ १९५५॥ १९५६॥ § 6396

स्यादेतन्न पूर्वाभ्यासादिह जन्मन्याद्यरागादयः। किं तर्हि ?। अन्येषां मैथुनादिसमाचारदर्शनात्परोपदेशाद्वेत्याह—अन्यवृत्त्युपलम्भेनेत्यादि। § 6397

अन्यवृत्त्युपलम्भेन परेभ्यः श्रवणेन वा।
न च तेषामियं वृत्तिर्व्यभिचारोपलम्भनात्॥
१९५७॥§ 6399

अन्येषां वृत्तिश्चरितमिति यावत्॥ १९५७॥ § 6400
अदृष्टेत्यादिना तमेव व्यभिचारं दर्शयति। § 6401

अदृष्टाश्रुतवृत्तान्ता वराहहरिणादयः।
सभागगतिसंपर्के प्रयान्त्येव हि विक्रियाम्॥
१९५८॥§ 6403

वृत्तान्तो मैथुनादिसमुदाचारः। सभागा सदृशी गतिर्यासां वराहीप्रभृतीनां तास्तथोच्यन्ते। ताभिः सह संपर्कः समवधानम्। विक्रियेति। विप्लुतिः। मैथुनसमुदाचार इति यावत्॥ १९५८॥ § 6404

संसारानुचिता धर्माः प्रज्ञाशीलकृपादयः।
स्वरसेनैव वर्त्तन्ते तथैव न मदादिवत्॥
१९५९॥§ 6406

अवश्यं चैतदवसेयमभ्यासबलादेव रागादीनां स्वरसप्रवृत्तिरिति। तथाहि—ये प्रज्ञाशीलादयः संसारानुचिताः संसारे नाभ्यस्ताः ते स्वरसेनायत्नेन न वर्त्तन्ते।मदादिवदिति वैधर्म्यदृष्टान्तः। मदो—दर्पः। अन्यथा मदादिवत्प्रज्ञादीनामपि स्वरसेन प्रवृत्तिः स्यात्॥ १९५९॥ § 6407

केचिदाहुः—श्लेष्मणः सकाशाद्रागः पित्ताद्द्वेषो वातान्मोह इति। तत्राह—बलासादीत्यादि। § 6408

बलासादिप्रभावेण नच तेषां समुद्भवः।
पूर्ववद्व्यभिचारस्य सर्वथाऽप्युपलम्भतः॥
१९६०॥§ 6410

549/k

तस्मादेते यदभ्यासपूर्वका आद्यभाविनः।
स एवान्यभवः सिद्ध इति नास्तिवता हता॥
१९६१॥§ 6412

तत्र बलासः—श्लेष्मा। पूर्ववदिति। यथा विषयेषु व्यभिचार उक्तः प्रतिसङ्ख्यानसद्भावे तद्भावेऽप्यतदुद्भवादित्यादिना। किंच—श्लेष्माद्युपचयापचयाभ्यां नरागादीनामुपचयापचयौ भवतः। नच यद्भेदाद्यस्य भेदो न भवति

तत्तस्य कार्यं युक्तमतिप्रसङ्गात्। तथा श्लेष्मणोऽपि तीव्रद्वेषो दृष्टो नतु तीव्ररागः, पित्तप्रकृतिरपि तीव्ररागो दृष्टो न तीव्रद्वेषादिरिति साङ्कर्यं दृश्यते। न च यमन्तरेण यस्य भावः स तस्य हेतुर्युक्तः। यदवस्थो रागी दृष्टस्तदवस्थोऽपि द्वेषीत्यतोऽपि व्यभिचारान्न श्लेष्मादिधर्मा रागादयः। तस्मादित्युपसंहारः। यदभ्यासपूर्वका इति। यस्मिन्नभ्यासो यदभ्यासः, स पूर्वकं कारणं येषामिति विग्रहः॥ १९६०॥ १९६१॥ § 6413

इहत्येत्यादिना परकीयं चोद्यमाशङ्कते। § 6414

इहत्याभ्यासपूर्वत्वे साध्ये दृष्टेष्टबाधनम्।
भवान्तरीयहेतुत्वे साध्यशून्यं निदर्शनम्॥
१९६२॥ § 6416

अविशेषेण साध्ये तु हेतोरस्य विरुद्धता।
तथैवान्यभवाभ्यासहेतुत्वविनिवर्त्तनात्॥
१९६३॥ § 6418

तत्रेदं चोद्यम्—ऐहलौकिकाभ्यासपूर्वत्वं वाऽऽद्यभाविनां साध्यं, पारलौकिकाभ्यासपूर्वत्वं वा, अविशेषेण वाऽभ्यासपूर्वत्वमात्रम्, तस्मिन्सिद्धे सामर्थ्यात्पारलौकिकाभ्यासपूर्वत्वमिष्टं सिद्धं भवतीति, पक्षत्रयम्। तत्र प्रथमे पक्षे दृष्टेष्टबाधनं नह्याद्यभाविनां रागादीनामिहत्याभ्यासपूर्वत्वं दृष्टं, नापि चेष्टं परलोकवादिनेति दृष्टेष्टयोर्बाधनम्। द्वितीयेऽपि पक्षे साध्यविकलो दृष्टान्तः, नहि क्वचिल्लोकायतस्य पारलौकिकाभ्यासपूर्वत्वसमन्वितो दृष्टान्तोऽस्ति। तृतीयेऽपि पक्षे विरुद्धता हेतोः, तथैव—दृष्टान्तवदेव, अन्यभवाभ्यासपूर्वत्वस्येष्टस्याभावसाधनात्॥ १९६२॥ ॥ १९६३॥ § 6419

सामान्येनैवेत्यादिना प्रतिविधत्ते। § 6420

सामान्येनैव साध्यत्वं नच हेतोर्विरुद्धता।
नहि तेन विरोधोऽस्य येन तद्विनिवर्त्तयेत्॥ १९६४॥
इति लोकायतपरीक्षा।§ 6423

550/k

तृतीय एवात्र पक्षोऽभिप्रेतः, न च हेतोर्विरुद्धता कस्मात् ?। नहि तेनान्यभवाभ्यासपूर्वत्वेनास्य रागादित्वस्य कश्चिद्विरोधोऽस्ति। येन तत्पारलौकिकाभ्यासपूर्वत्वं निवर्त्तयेत्। अपिच—अयं लोकः परलोक इत्य-

वस्थाभेदकृतव्यवस्थामात्रमेतत्।बालयौवनादिभेदवत्। अनादित्वं त्वनेन प्रकारेण साध्यत इति नात्राभिनिवेष्टव्यम्। (?)॥ १९६४॥ § 6424

इति लोकायतपरीक्षा।

०.२४ बहिरर्थपरीक्षा।

प्रतिबिम्बादिसन्निभमित्येतत्प्रतीत्यसमुत्पादविशेषणसमर्थनार्थमिदानीं विज्ञानवादीदमुपक्षिपति। तत्र विज्ञप्तिमात्रमेवेदं त्रैधातुकं, तच्च विज्ञानं प्रतिसत्वसन्तानभेदादनन्तमविशुद्धं चानधिगततत्त्वानां विशुद्धं च प्रहीणाचरणानां प्रतिक्षणविसरारु च सर्वप्राणभृतामोजायते, नत्वेकमेवाविकारि यथोपनिषद्वादिनामिति विज्ञानवादिनां बौद्धानां मतम्। तत्राभ्यां प्रकाराभ्यां विज्ञप्तिमात्रताभीष्टा, बाह्यस्य पृथिव्यादिस्वभावस्य ग्राह्यस्याभावे ग्राहकत्वस्याप्यभावात्। सत्यपि वा सन्तानान्तरे ग्राह्यग्राहकलक्षणवैधुर्यात्। तत्र प्रयोगः—यद्यज्ज्ञानं तत्तत् ग्राह्यग्राहकत्वद्वयरहितं ज्ञानत्वात्, प्रतिबिम्बज्ञानवत्, ज्ञानं चेदं स्वस्थनेत्रादिज्ञानं विवादास्पदीभूतमिति स्वभावहेतुः। नचाव्याप्तिरस्य हेतोर्मन्तव्या। तथाहि—न तावत्पृथिव्यादिबाह्योऽर्थोऽस्य ग्राह्यो विद्यते, तस्यैकानेकस्वभावशून्यत्वात्। प्रयोगः—यदेकानेकस्वभावं न भवति न तत्सत्त्वेन ग्राह्यं प्रेक्षावता, यथा व्योमोत्पलम्, एकानेकस्वभावरहिताश्च पराभिमताः पृथिव्यादय इति व्यापकानुपलब्धिः। तृतीयराश्यन्तराभावेनैकत्वानेकत्वाभ्यां सत्वस्य व्याप्तत्वाद्व्याप्यव्यापकभावानुपपत्तिर्विपर्यये बाधकं प्रमाणमिति नानैकान्तिकताऽनन्तरस्य हेतोः। नापि विरुद्धता, सपक्षे भावात्। अत्रास्य हेतोरसिद्धतामुद्भावयन्, यद्योक्तम् भूतान्येव न सन्तीति न्यायोऽयं पर इष्यतामिति —अस्याश्च प्रतिज्ञायाः प्रत्यक्षादिविरोधमादर्शयन्, प्रथमस्य हेतोरव्याप्तिमेव प्रतिपादयितुं पर आह—यदि ज्ञानातिरेकेणेत्यादि। § 6426

यदि ज्ञानातिरेकेण नास्ति भूतचतुष्टयम्।
तत्किमेतन्नु विच्छिन्नं विस्पष्टमवभासते॥
१९६५॥ § 6428

२] Correction : ; (प्रतिवादिसन्निभमित्येतत्) (sic !)
१ प्रतिबिम्बादि] Correction : ; प्रतिविवादि (sic !)प्रतिबिम्बादि
१ मित्येतत्प्र] Correction : ; मित्येतत्। प्र (sic !)मित्येतत्प्र
१६ यद्योक्तम्] Correction : ; यथोक्तम् (sic !)यद्योक्तम्

तस्यैवं प्रतिभासेऽपि नास्तितोपगमे सति।
चित्तस्यापि किमस्तित्वे प्रमाणं भवतां भवेत्॥
१९६६॥§ 6430

551/k

विच्छिन्नमित्यनेन ज्ञानाद्व्यतिरिक्तस्य ग्राह्यस्य सिद्धिमादर्शयति, विस्पष्टमित्यनेन तु प्रत्यक्षताम्। एतदेव प्रसङ्गेन द्रढयन्नाह—तस्यैवमित्यादिना॥ १९६५॥ ॥ १९६६॥ § 6431

भासमान इत्यादिना प्रतिविधत्ते। § 6432

भासमानः किमात्माऽयं बाह्योऽर्थः प्रतिभासते।
परमाणुस्वभावः किं किं वाऽवयविलक्षणः॥
१९६७॥§ 6434

न तावत्परमाणूनामाकारः प्रतिवेद्यते।
निरंशानेकमूर्त्ताभ(नां?) प्रत्ययाप्रतिवेदनात्॥
१९६८॥§ 6436

व्यपेतभागभेदा हि भासेरन्परमाणवः।
नान्यथाऽध्यक्षता तेषामात्माकारासमर्पणात्॥
१९६९॥§ 6438

तत्र प्रत्यक्षसिद्धोऽर्थो बाह्यो भवन्ननेको वा परमाणुतोऽभिन्नो भवेत्, एको वा तैरारब्धोऽवयवी, स्थूलोऽनारब्धो वेति पक्षाः। तत्र न तावदाद्यः, निरंशानामनेकेषामणूनां मूर्त्तानां ग्राहकस्य प्रत्ययस्याप्रतिवेदनात्। नित्यं स्थूलाकारस्यैव ज्ञानस्यानुभूयमानत्वात्। प्रत्यये तेषामप्रतिवेदनादिति सप्तम्यन्तस्य पाठोऽसमस्तः। प्रयोगः— यः प्रत्यक्षाभिमते प्रत्यये न प्रतिभासते स्वेनाकारेण, न स प्रत्यक्षत्वेन ग्रहीतव्यः, यथा गगननलिनम्, न प्रतिभासते च प्रत्यक्षाभिमते प्रत्यये स्थूलाकारोपग्राहिणि परमाणुरनेको मूर्त्त इति व्यापकानुपलब्धिः। आत्माकारप्रतिभासित्वेन प्रत्यक्षस्य व्याप्तत्वात्। तामेव व्याप्तिं प्रतिपादयन्नाह—व्यपेतेत्यादि॥ १९६७॥ ११६८॥ ॥ १९६९॥ § 6439

अथापि स्यात्समुदिता एवोत्पद्यन्ते विनश्यन्ति चेति सिद्धान्तान्नैकैकपरमाणुप्रतिभास इति, यथोक्तं भदन्तशुभगुप्तेन—प्रत्येकपरमाणूनां स्वातन्त्र्ये

२--१ स्वातन्त्र्ये ना] Correction : ; स्वातन्त्र्येणा (sic !)स्वातन्त्र्ये ना

नास्ति सम्भवः। अतोऽपि परमाणूनामेकैकाप्रतिभासनम्॥ इति। तदेतदनुत्तरमिति दर्शयन्नाह—साहित्येनापीति। § 6440

साहित्येनापि जातास्ते स्वरूपेणैव भासिनः।
त्यजन्त्यनंशरूपत्वं न चेत्ता(नच ता ?)
सुदशास्वमी॥ १९७०॥§ 6442

लब्धापचयपर्यन्तं रूपं नैषां समस्ति चेत्।
कथं नाम न तेऽमूर्त्ता भवेयुर्वेदनादिवत्॥
१९७१॥§ 6444

तासु दशास्विति। सहितावस्थासु। किंच—यदि निरंशाः परमाणवो न तर्हि मूर्त्ता इत्यभ्युपगन्तव्यमिति स्ववचनविरोधं प्रतिज्ञायामाह—लब्धाप- 552/k
चयेत्यादि। लब्धोऽपचयपर्यन्तो येन रूपेण स्वभावेन, तत्तथोक्तम्। एतदुक्तं भवति—यद्यपचीयमानावयवविभागेनापचीयमानस्वभावा न भवन्ति, यदि निरंशा इति यावत्, तदा न मूर्त्ता वेदनादिवत्सिद्ध्यन्ति, विशेषाभावात्॥ १९७०॥ १९७१॥ § 6445

तुल्येत्यादिना भदन्तशुभगुप्तस्य परिहारमाशङ्कते। § 6446

तुल्यापरक्षणोत्पादाद्यथा नित्यत्वविभ्रमः।
अविच्छिन्नसजातीयग्रहे चेत्स्थूलविभ्रमः॥
१९७२॥§ 6448

स ह्याह—यथा सदृशापरापरक्षणोत्पादाद्विप्रलब्धस्य गृहीतेऽपि प्रत्यक्षेण शब्दादौ नित्यत्वविभ्रमस्तथा परमाणूनामविच्छिन्नदेशानां सजातीयानां युगपद्ग्रहणे स्थूल इति मानसो विभ्रमो भवति। ततश्च निरंशानेकमूर्त्तानां प्रत्ययाप्रतिवेदनादित्यसिद्धो हेतुरिति॥ १९७२॥ § 6449

स्वव्यापारेत्यादिना दूषणमाह—स्वव्यापारबलेनैवेति। § 6450

स्वव्यापारबलेनैव प्रत्यक्षं जनयेद्यदि।

---

७ नैषां] Correction: ; तेषां (sic !)नैषां

८ तेऽमूर्त्ता] Correction: ; ते मूर्त्ता (sic !)तेऽमूर्त्ता

न परामर्शविज्ञानं कथं तेऽध्यक्षगोचराः॥
१९७३॥§ 6452

क्षणिका इति भावाश्च निश्चीयन्ते प्रमाणतः।
अणवस्त्विति गम्यन्ते कथं पीतसितादयः॥
१९७४॥§ 6454

सूक्ष्मप्रचयरूपं हि स्थूलत्वादाद्यचाक्षुषम्।
पर्वतादिवदत्रापि समस्त्येषाऽनुमेति चेत्॥
१९७५॥§ 6456

स्थूलत्वं वस्तुधर्मो हि सिद्धं धर्मिद्वयेऽपि न।
न ह्यस्त्यवयवी स्थूलो नाणवश्च तथाविधाः॥
१९७६॥§ 6458

अथ देशवितानेन स्थितरूपं तथोदितम्।
तथाऽपि भ्रान्तविज्ञानभासिरूपेण संशयः॥
१९७७॥§ 6460

वैतथ्यात्स तथा नो चेद्व्यतिरेकेऽप्रसाधिते।
तस्मादतिशयः कोऽस्य कार्यसंवादनं यदि॥
१९७८॥§ 6462

कार्यावभासिविज्ञानसंवादेऽपि ननूच्यते।
सामर्थ्यनियमाद्धेतोः स च सम्भाव्यतेऽन्यथा॥
१९७९॥§ 6464

५ समस्त्ये] Correction : ; समस्त्वे (sic !)समस्त्ये

553/k

लिङ्गागमव्यापारानपेक्षमित्यवधार(णे)न दर्शयति। तथाहि—प्रत्यक्षमविशेषेणोत्पन्नमपि यद्यत्रैवांशे यथा परिगृहीताकारपरामर्शं जनयति स एव प्रत्यक्ष इष्यते व्यवहारयोग्यतया, यत्र तु न जनयति तद्गृहीतमप्यगृहीतप्रख्यम्। ततश्च नासिद्धोहेतुः। यतः प्रत्ययाप्रतिवेदनादित्यत्र प्रत्यक्षाभिमते प्रत्यये परामर्शहेतावप्रतिभासनादित्ययमर्थोऽभिप्रेतः। यच्चोक्तं—स्थूल इति मानस एष विभ्रम इति, तदप्यसम्यक्। तथाहि—प्रमाणेनाणौ सिद्धे सति स्याद्विभ्रमव्यवस्था। यथा क्षणिकत्वस्य प्रमाणेन सिद्धत्वान्नित्यत्वग्रहो भ्रान्तो व्यवस्थाप्यते। नच तथा प्रमाणेन परमाणवः सिद्धास्तेषामेव विचार्यमाणत्वात्। नचेयं स्थूलभ्रान्तिर्मानसी, स्पष्टप्रतिभासनात्। नच विकल्पानुबद्धस्य स्पष्टाकारो युक्तः, सामान्याकारस्यास्पष्टत्वात्। नच सामान्याकारमन्तरेण विकल्पो युक्तः। स्यादेतत्। अनित्यतादिवदणवोऽपि सिद्धा एव प्रमाणतः। तथाहि—यद्यत्स्थूलं तत्तत्सूक्ष्मप्रचयात्मकम्, यथा पर्वतादयः, स्थूलं चाद्यचाक्षुषमवयविद्रव्यमिति स्वभावहेतुः। चाक्षुषग्रहणमचाक्षुषस्य द्व्यणुकादेर्व्यवच्छेदाय। तत्र यदि स्थूलत्वादिति पारमार्थिकं स्थूलत्वं च वस्तुधर्ममाश्रित्योच्यते हेतुस्तदा साध्यधर्मिणि दृष्टान्तधर्मिणि च धर्मिद्वयेऽपि प्रतिवादिनो न सिद्धं स्थूलत्वमिति तदा हेतुरसिद्धो दृष्टान्तश्च साधनविकलः। अथ यदेतद्देशवितानेन प्रतिभासमानमविचाररमणीयमागोपालादि प्रसिद्धं रूपं स्थूलत्वादित्युच्यते तदा भ्रान्तेऽपि स्वप्नादिज्ञाने परमाणुप्रचयमन्तरेणापि तथा प्रतिभासि रूपमस्तीति हेतोरनैकान्तिकता। अथाभ्रान्तत्वे सतीति विशेषणमुपादीयते तदा विज्ञानवादिनं प्रति स्वस्थनेत्रादिज्ञानाकारस्य यावत्स्वप्नादिज्ञानाकाराद्व्यतिरेको विशेषो न प्रसाध्यते तावन्न क्वचिदभ्रान्तत्वं सिद्धमिति विशेषणमप्यसिद्धम्। स्यादेतदस्त्येव स्वस्थनेत्रादिज्ञानस्यस्वप्नादिज्ञानादर्थक्रियासंवादेन विशेष इति। तत्र कोऽयमर्थक्रियासंवादो नाम। यदि बाह्यार्थप्राप्तिः सा न सिद्धा बाह्यार्थासिद्धेस्तस्यैव साध्यत्वेन प्रस्तुतत्वात्।अथाभिमतार्थक्रियावभासिज्ञानमेवार्थक्रियासंवादस्तदाऽयमन्यथाऽपि बाह्यार्थालम्बनमन्तरेणापि सम्भाव्यत इति तथा हेतोरनैकान्तिकतैव। कथमन्यथाऽपि संभाव्यतइत्याह—सामर्थ्यनियमाद्धेतोरिति। हेतोः समनन्तरप्रत्ययस्य सामर्थ्यभेदनियमात्। कश्चिदेव हि समनन्तरप्रत्ययः किंचिद्विज्ञानं जनयितुं समर्थो न सर्वः सर्वम्। यथा भवता बाह्योऽर्थ इति तत एव नियमः सिद्धः॥ १९७३॥ १९७४॥ ॥ १९७५॥ १९७६॥ १९७७॥ १९७८॥ १९७९॥ § 6465

554/k

तुल्यमित्यादिना सुमतेर्दिगम्बरस्य मतेनाप्रतिवेदनादित्यस्य हेतोरसिद्धतामुद्भावयति। § 6466

तुल्यं रूपं यदा ग्राह्यमतुल्यं नैव गृह्यते।
अणूनां द्वयरूपत्वे तदा किं नोपपद्यते॥
१९८० ॥§ 6468

तत्सामान्यविशेषात्मरूपत्वात्सर्ववस्तुनः।
तुल्यातुल्यस्वरूपत्वाद्विरूपा अणवः स्मृताः॥
१९८१ ॥§ 6470

समानं तत्र यद्रूपं तदक्षज्ञानगोचरम्।
एकाकारमतो ज्ञानमणुष्वेवोपपद्यते॥ १९८२ ॥§ 6472

असमानं तु यद्रूपं योगिप्रत्यक्षमिष्यते।
इति दुर्मतयः केचित्कल्पयन्ति समाकुलम्॥
१९८३ ॥§ 6474

स ह्येवमाह—सामान्यविशेषात्मत्वात्सर्वपदार्थानां तुल्यातुल्यरूपेण द्विरूपाः परमाणवः। तत्र समानं यद्रूपं तदिन्द्रियैर्गृह्यते नासमानम्। ततश्चैकाकारं विज्ञानमणुष्वविरुद्धमिति प्रत्यक्षसिद्धाः परमाणव इति। समाकुलमिति। अप्रतिष्ठम्। एकस्यापि रूपस्य प्रतिनिश्चितस्याभावात्॥ १९८०॥ १९८१॥ १९८२॥ १९८३॥ § 6475

ननु च द्विरूपं वस्त्विति निश्चितरूपमुक्तमेव, सत्यमुक्तमयुक्तं तूक्तमिति दर्शयन्नाह। § 6476

द्वे हि रूपे कथं नाम युक्ते एकस्य वस्तुनः।
द्वे तदा वस्तुनी प्राप्ते अपरस्पररूपतः॥
१९८४ ॥§ 6478

परस्परात्मतायां तु तद्वैरूप्यं विरुध्यते।
विशेषश्चोपलभ्येत चक्षुरादिभिरिन्द्रियैः॥
१९८५ ॥§ 6480

तथाहि—द्वाभ्यां रूपाभ्यां वस्तुनोऽन्यान्यत्वाद्वे एव वस्तुनी प्राप्ते। रूपद्वयस्यैव केवलस्यापरापरस्य (स्यापरस्परस्त्व ?)भावात्ततश्च नैकस्य द्विरूपत्वमुक्तम्। एकस्माद्वा वस्तुनो रूपद्वयस्याव्यतिरेकादेकवस्तुस्वरूपवद्रूपद्वयस्य परस्परात्मकतैवेति कथमेकं द्विरूपं स्यात्। किञ्च—सामान्यरूपाव्यतिरेकाद्विशेषरूपस्योपलम्भप्रसङ्गः। ततश्चेयमसङ्कीर्णा व्यवस्था न प्राप्नोति—समानं रूपमक्षज्ञानगोचरोऽसमानं तु योगिप्रत्यक्षमिष्यत इति॥ १९८४॥ १९८५॥ § 6481

किञ्च—एकं द्विरूपमिति न केवलमेतत्परस्परव्याहतं इदं तु व्याहततरं यत्परस्परविरुद्धरूपद्वयात्मकमेकमिति दर्शयति—परस्परेत्यादि। § 6482

555/k

...1986ab परस्परविरुद्धात्मनैकरूपं कथं भवेत्।§ 6483

तथाहि—तुल्यातुल्ये रूपे परस्परपरिहारस्थितलक्षणे तत्कथं तदात्मकमेकं भवेत्।संवित्तेश्चेत्यादिना कुमारिलमतमाशङ्कते। § 6484

...1986cd संवित्तेश्च विरुद्धानामेकस्मिन्नाप्यसम्भवः॥
१९८६॥§ 6485

एकाकारं न चे(भवे ?)देकमिति नेश्वरभाषितम्।
तथाहि तदुपेतव्यं यद्यथैवोपलभ्यते॥ १९८७॥§ 6487

स ह्याह—एकस्मिन्वस्तुनि परस्परविरुद्धानामाकाराणामसम्भव इत्येतन्नास्ति। कस्मात् ?। संवित्तेः कारणात्। तथाहि—एकाकारेणैवैकेन वस्तुना भवितव्यमितिनेयमाज्ञा राज्ञाम्, किं तु यद्यथोपलभ्यते तत्तथैवाभ्युपगन्तव्यम्। प्रतीतिनिबन्धनत्वाद्वस्तुव्यवस्थायाः। एकानेकाकारा च सत्तारूपादिभेदतः प्रतीतिर्भवन्तीसमुपलभ्यते। तस्मात्तथैव व्यवस्थाप्यत इति॥ १९८६॥ १९८७॥ § 6488

तन्नेत्यादिना प्रतिविधत्ते। § 6489

तन्नासतोऽपि संवित्तेः कम्बुपीतादिरूपवत्।
विरुद्धधर्मसङ्गात्तु नान्यद्भेदस्य लक्षणम्॥
१९८८॥§ 6491

एवं सति न किचिद्विज्ञानं भ्रान्तं स्याद्भेदव्यवहारोच्छेदप्रसङ्गश्च। अथ बाध्यमानत्वात्कस्यचिद्भ्रान्तत्वं स्यात्। तदेकस्मिन्ननेकविज्ञानं बाध्यमानं कथमभ्रान्तं भवेत्। एवं तावदणूनां (न) प्रत्यक्षतो नाप्यनुमान(तः)सिद्धिरिति न बाह्यार्थापह्नवे प्रत्यक्षविरोधः प्रतिज्ञायाः। नापि हेतोरसिद्धता॥ १९८८॥
§ 6492

इदानीं पर एकानेकस्वभावरहितत्वादित्यस्य हेतोः सन्दिग्धासिद्धतामुद्भावयन्नाह —माभूदित्यादि। § 6493

माभूत्प्रमाणतः सिद्धिरणूनामस्तु संशयः।
अभाव(निश्चय)स्त्वेषां कथं प्रेक्षावतां भवेत्॥
१९८९ ॥§ 6495

संयुक्तमित्यादिना प्रतिविधत्ते। § 6496

संयुक्तं दूरदेशस्थं नैरन्तर्यव्यवस्थितम्।
एकाण्वभिमुखं रूपं यदणोर्मध्यवर्त्तिनः॥
१९९० ॥§ 6498

अण्वन्तराभिमुख्येन तदेव यदि कल्प्यते।
प्रचयो भूधरादीनामेवं सति न युज्यते॥
१९९१ ॥§ 6500

556/k

अण्वन्तराभिमुख्येन रूपं चेदन्यदिष्यते ।
कथं नाम भवेदेकः परमाणुस्तथासति ॥ १९९२
॥§ 6502

प्रयोगः—यदेकानेकस्वभावरहितं तदसद्व्यवहारयोग्यम्, यथा वियदब्जम्, एकानेकस्वभावरहिताश्च पराभिमताः परमाणव इति स्वभावहेतुः । न चासिद्धो हेतुरिति मन्तव्यम् । तथाह्येकत्वं तावदणूनामसिद्धं, भूधरादिप्रचितरूपाणां दिग्भागभेदस्य विद्यमानत्वात् । तमेव दिग्भागभेदं भूधराद्युपचयान्यथानुपपत्त्या परमाणूनां प्रसंजयन्नेकत्वनिषेधं तावदाह—संयुक्तं दूरदेशस्थमित्यादि । तत्र केचिदाहुः परस्परं संयुज्यन्ते परमाणव इति, सान्तरा एव नित्यं

न स्पृशन्तीत्यपरे, निरन्तरत्वे तु स्पृष्टसंज्ञेत्यन्ये, तत्रैतस्मिन्पक्षत्रयेऽपि मध्यवर्त्तिनः परमाणोर्बहुभिः परिवारितस्य यदि दिग्भागभेदो न स्यात्तदा चित्तचैत्तादिकलापस्येव प्रचयो न स्यादनंशत्वात् । तथाहि—येनैकरूपेणैकाण्वभिमुखो मध्यवर्त्ती परमाणुस्तेनैवापरपरमाण्वभिमुखो यदि स्यात्तदा परिवारकाणामणूनामेकदेशत्वप्रसङ्गात्प्रचयो न स्यात् । प्रयोगः—यदेकरूपपरमाण्वभिमुखस्वरूपं भवेत्तदेकदेशम्, यथा तस्यैव पूर्वदेशस्थितः परमाणुः, एकप्रासादाभिमुखपूर्वप्रासादवच्च, एकरूपपरमाण्वभिमुखस्वभावाश्च सर्वे परिवार्यावस्थिताः परमाणव इति स्वभावहेतुः । अतः प्रचयो न स्यात् । अथान्येन रूपेणाभिमुखस्तदा दिग्भागभेदस्य विद्यमानत्वाद्घटादिवदेकत्वं न प्राप्नोति । भन्दतशुभगुप्तस्तु प्राह—यथैकस्वभावस्यासदद्रव्यादिव्यावृत्तस्याऽनेकं सामान्यं न तत्त्वेन कल्प्यते, एवमिहापि परमाणूनामनेकवर्त्तित्वादनेकत्वं कल्प्यते, न भूतार्थेन । तथाहि —न दिक्पदार्थो नामास्ति कणादादिकल्पितः, तस्यैकस्वरूपत्वादनेकरूपः पूर्वादिप्रत्ययो न स्यात् । केवलमणव एव पौर्वापर्येणावस्थिता दिक्शब्दवाच्यास्ततश्च दिग्भागभेदवत्त्वादिति केवलं बहुभिः परिवारणमेवोक्तं स्यान्न सावयवत्वमिति । तदेतदसम्यक् । तथाहि—निरवयवत्वाच्चित्तस्येवाणूनां परमार्थतो नोर्द्धाधोभागाः सन्तीति बहुभिः परिवारणमेव न स्यात्, चित्तचैत्तादिवत् । ततश्च परिवारकाणामणूनां परमार्थेनाभावात्कथं तद्द्वारेणानेकमध्यवर्त्तित्वं येनानेकत्वं देशकृतं कल्प्येत । अथासत्यपि परमार्थत ऊर्द्धाधोभागवत्त्वे बहुभिः परिवारणं स्यात्तर्हि चित्तचैत्तानामपि स्यात् । ततश्च परमाणुवच्चित्तादीनामपि देशस्थत्वं स्यात् । नो चेत्परमाणूनामपि न स्यात् । ततश्च प्रचयो न स्याच्चित्तादिवदित्येकान्तः । स्यादेतत्—यथा वर्त्तमान चित्तक्षणस्यातीतानागताभ्यां चित्तलक्षणाभ्यां कालकृतनैरन्तर्यमस्ति, 557/k अथ च वर्त्तमानचित्तक्षणस्य (न्)कलामुहूर्त्तादिवत्सावयवत्वम्, एवमणूनां सत्यपि बहुभिः परिवारणे न देशकृतं सावयवत्वं भविष्यति । तदेतदसम्यक् । नहि वर्त्तमानचित्तलक्षणस्य पूर्वोत्तराभ्यां नैरन्तर्यं परमार्थतोऽस्ति, तदानीं तयोरसत्त्वात् । न चासता सह पौर्वापर्यं भाविकं युक्तं केवलं सहभूतयोर्न कार्यकारणभावोऽस्तीति तद्द्वारेण परिकल्प्य समुत्थापितं पूर्वापरयोः क्षणयोः सत्त्वं प्राक् पश्चादभाववत् । नचैवमणूनां देशकृतं पौर्वापर्यं परिकल्पितं प्रचयाभावप्रसङ्गात् । किं च—न तावदहेतुकत्वं भावानां युक्तिमत्, नित्यं सत्त्वादिप्रसङ्गादिति । योऽपि सांवृतत्वं भावानां प्रतिपन्नस्तेनाप्यवश्यं सर्वभावानां सहेतुकत्वमेष्टव्यम् । सति च सहेतुकत्वे न तावत्समकाले कार्यकारणे युक्ते । नापि प्राक्कार्योत्पत्तेः, कारणस्यासत्त्वेनासामर्थ्यात् । पश्चादपि कार्ये समुत्पन्ने हेतोरनुपयोगात् । अतः प्राग्भावः सर्वहेतूनामवश्यमङ्गीकर्त्तव्यः । यथोक्तम्—असतः प्रागसामर्थ्यात्पश्चाच्चानुपयोगतः । प्राग्भावः सर्वहेतूनां नातोऽर्थः स्वधिया सहेति । तदेवं निरंशत्वेऽपि सर्वभावानां न्यायतोऽवस्थितं कालकृतं पौर्वापर्यं देशकृतं तु कथं स्याद्यदि सावयवत्वं न स्यादिति चोद्यते

। अथासत्यपि सावयवत्वे देशकृतं पौर्वापर्यं यदि स्यात्, चित्तचैत्त्यानामपि स्यादविशेषादित्युक्तम् । मूर्त्तत्वकृतोऽस्ति विशेष इति चेन्न । तदेवासिद्धमसति सावयवत्वे । केवलं पर्यायेण सावयवत्वमेवोक्तं स्यात्, नान्यो विशेष इति यत्किंचिदेतत् । तस्मात्सर्वभावानां न्याय्ये कालकृते पौर्वापर्ये सति यदेतदपरमधिकं कस्यचिद्देशकृतं पौर्वापर्यं तत्सावयवत्वमन्तरेण न सम्भवतीति युक्तमुक्तम् । दिग्भागभेदो यस्यास्ति तस्यैकत्वं न युज्यते इत्यलं विस्तरेण ॥ १९९० ॥ १९९१ ॥ १९९२ ॥ § 6503

अत्र केचिदाहुः—एवं तर्ह्यणीयांसः प्रदेशाः सन्तु परमाणवस्तत्राप्यवयवकल्पनायां पुनरपि प्रदेशानामेवाणुत्वं भविष्यति, यदि परमनवस्थैव, नतु पुनः सावयवत्वप्रसङ्गेन शक्यतेऽणूनां प्रज्ञप्तिसत्त्वमापादयितुम् । अथापि प्रज्ञप्तिसत्वम्, एवमपि नियमेनैव प्रज्ञप्त्युपादानमङ्गीकर्त्तव्यम् । यत्तत्प्रज्ञप्त्युपादानं तस्यैव परमाणुत्वं भविष्यति । अथासत्त्वमेवाणूनां साध्यते, एवमपि दिग्भागभेदादित्यसिद्धत्वं हेतोः । नहि खरविषाणादयोत्यन्तासन्तः पूर्वादिदिग्भागभेदवन्तो भवन्ति । नापीदं प्रसङ्गसाधनं दिग्भागभेदस्यानभ्युपगतत्वादिति । अत्र प्रतिविधानमाह—अपेतेत्यादि । § 6504

558/k

अपेतभागभेदश्च यः परैरणुरिष्यते।
तत्रैवेयं कृताचिन्ता नानिष्टासम्भवस्ततः॥
१९९३ ॥§ 6506

भागानां परमाणुत्व मङ्गीकुर्वन्ति ते यदा।
स्वप्रतिज्ञाच्युतिस्तेषां तदाऽवश्यं प्रसज्यते॥
१९९४ ॥§ 6508

प्रसङ्गसाधनत्वेन नाश्रयासिद्धतेह च।
पराभ्युपेतयोगादिबलादैक्यं ह्यपोह्यते॥
१९९५ ॥§ 6510

तदेवं सर्वपक्षेषु नैवैकात्मा स युज्यते।

१ पर्यं यदि स्यात्] Correction : ; पर्यं स्यात् (sic !)पर्यं यदि स्यात्

एकानिष्पत्तितोऽनेकस्वभावोऽपि न सम्भवी॥
१९९६॥§ 6512

असन्निश्चययोग्योऽतः परमाणुर्विपश्चिताम्।
एकानेकस्वभावेन शून्यत्वाद्वियदब्जवत्॥
१९९७॥§ 6514

अवश्यं हि परिनिष्ठितरूपं किंचिद्वस्तु परमाणुत्वेन तद्वादिनाऽङ्गीकर्त्तव्यम्। अन्यथा ह्यनवस्थायामनवधारितरूपत्वादनुपाख्यत्वमेव स्वयं प्रतिपादितं स्यात्। ततश्चेष्टसिद्धिरेव परस्य कृता स्यात्। तस्माद्यदेव परिनिष्ठितं त्वया व्यवस्थापितमणुत्वेन तत्रैवानपाश्रितानवस्थाविकल्पे यदा चिन्ता क्रियते तदा कथमनवस्था, स्याद्यदि परमनवस्थया स्वाभ्युपगमविरोधः कृतः स्यात्। नतु परस्य किंचिदनिष्टमापादितम्।एतावतैव परस्येष्टसिद्धेः प्रसङ्गसाधनमेवेदम्। नचासिद्धता हेतोः। तथाहि परेण परमाणूनां संयुक्तत्वं नैरन्तर्यं तथा बहुभिः सान्तरैः परिवारणं चेत्यभ्युपगतमन्यथा कथं च प्रत्ययो भवेत्, ततश्च यद्यपि दिग्भागभेदो वाचा नाभ्युपगतस्तथापि संयुक्तत्वादिधर्माभ्युपगमबलादेवापतति। नह्यसत्यूर्द्धाधोभागादिभेदे संयुक्तत्वादिपक्षत्रयं युक्तं चित्तादिवदित्युक्तम्। यच्चोक्तमणुप्रज्ञप्तेरवश्यमुपादानमङ्गीकर्त्तव्यम्, यत्तदुपादानं स एव परमाणुर्भविष्यतीति। तदत्रास्त्येव मिथ्याशास्त्रश्रवणचिन्तनाहितवासनापरिपाको वातायनादिरेणुप्रतिभासा बुद्धिरणुभ्रान्तेर्निबन्धनम्। नहि य(त)त्प्रज्ञप्त्यां च तदेव कारणं युक्तमप्रज्ञप्तिसत्त्वप्रसङ्गादन्यथाऽऽत्मप्रज्ञप्तेरात्मैव कारणं स्यात्, न स्कन्धाः। ततश्चाणुवदात्मप्रतिषेधोऽपि न स्यात्। एवं तावदेकत्वं परमाणूनामसिद्धम्। तत्सन्देहात्मकत्वात्तस्येति नासिद्धोऽणूनामभावव्यवहारे साधनो हेतुः ॥ १९९३॥१९९४॥ १९९५॥ १९९६॥ १९९७॥ § 6515

एवं तावद्बाह्यार्थस्यानेकस्वभावरहितत्वं प्रसाध्येदानीमेकस्वभावरहितत्वं प्रसाधयन्नाह—परमाणोरयोगाच्चेत्यादि। § 6516
559/k

परमाणोरयोगाच्च न सन्नवयवी यतः।
परमाणुभिरारब्धः स परैरुपगम्यते॥ १९९८॥§ 6518

यैरप्यनारब्धः परमाणुभिस्स्थूल इष्टस्तेषां सोऽपि परमाणुवद्दिग्भागभिन्नत्वादेको न युक्तः, पाण्यादिकम्पादौ सर्वकम्पादिप्रसङ्गात्। स्पष्टत्वाद्बहुशश्चर्वितत्वान्न पृथक्तस्य दूषणमुक्तम्। तदेवं बाह्यार्थाव्यवहारसाधने यदेकानेकस्वभावं न भवतीत्यादौ प्रयोगे नासिद्धो हेतुरिति सिद्धो बाह्यस्य

पृथिव्यादेर्ग्राह्यस्यासद्व्यवहारस्तदसिद्धौग्राहकत्वमपि ज्ञानस्य तदपेक्षं कल्पितं नास्तीति सिद्धा विज्ञप्तिमात्रता॥ १९९८॥ § 6519

तदेवमर्थायोगाद्विज्ञप्तिमात्रतां प्रतिपाद्य सम्प्रति ग्राह्यग्राहकलक्षण-वैधुर्यात्प्रतिपादयन्नाह—अनिर्भासमित्यादि। § 6520

अनिर्भासं सनिर्भासमन्यनिर्भासमेव च।
विजानाति नच ज्ञानं बाह्यमर्थं कथञ्चन॥
१९९९॥ § 6522

न निराकारेण नापि साकारेण नापि विषयाकारादन्याकारेण बाह्यस्य ग्रहणं युक्तम्, अन्यश्च प्रकारो नास्ति, तस्मादात्मसंवेदनमेव सदैव ज्ञानं सत्यपि बाह्येसन्तानान्तर इति सिद्ध्यति विज्ञप्तिमात्रता। केश्चिदन्याकारम-पि ज्ञानमन्याकारस्यार्थस्य संवेदकमिष्टम् यथा किल पीताकारमपि ज्ञानं शुक्लशङ्खग्राहीति। यथाह कुमारिलः— सर्वत्रालम्बनं बाह्यं देशकालान्य-थात्मकम्। जन्मन्येकत्र भिन्ने वा सदा कालान्तरेऽपि च॥ इति अतस्तृतीयं पक्षान्तरमाशङ्कितम्॥ १९९९॥ § 6523

ननु चात्मसंवेदनेऽप्येतेऽनिर्भासादयो विकल्पाः कस्मान्नावतर-न्तीत्याह—विज्ञानमित्यादि। § 6524

विज्ञानं जडरूपेभ्यो व्यावृत्तमुपजायते।
इयमेवात्मसंवित्तिरस्य याऽजडरूपता॥
२०००॥ § 6526

नहि ग्राहकभावेनात्मसंवेदनमभिप्रेतम्, किं तर्हि ? स्वयम्—प्रकृत्या प्रकाशात्मतया, नभस्तलवर्त्यालोकवत्॥ २०००॥ § 6527

अथ कस्माद्ग्राह्यग्राहकभावेन नेष्यत इत्याह—क्रियाकारक-भावेनेत्यादि। § 6528

क्रियाकारकभावेन न स्वसंवित्तिरस्य तु।
एकस्यानंशरूपस्य त्रैरूप्यानुपपत्तितः॥
२००१॥ § 6530

तदस्य बोधरूपत्वाद्युक्तं तावत्स्ववेदनम्।

परस्य त्वर्थरूपस्य तेन संवेदनं कथम्॥
२००२॥§ 6532

560/k

त्रैरूप्यम्—वेद्यवेदकवित्तिभेदेन॥ २००१॥ २००२॥ § 6533

अथापि स्याद्बाह्यस्याप्यात्मसंवित्तिवद्भिनैव ग्राह्यग्राहकभावेन संवित्तिर्भविष्यतीत्याह—नहि तद्रूपमित्यादि। § 6534

नहि तद्रूपमन्यस्य येन तद्वेदने परम्।
संवेद्येत विभिन्नत्वाद्भावानां परमार्थतः॥
२००३॥§ 6536

यद्यप्यसदादिव्यावृत्त्या सदादिरूपमेकं भावेषु कल्प्यते तथाऽपि तस्य प्रतिपादनार्थम्, परमार्थतो भेदादेकत्वं नास्त्येवेत्याह—परमार्थत इति॥ २००३॥ § 6537

स्यादेतद्यदि नाम भिन्नो बाह्योर्थो ज्ञानात्, तथापि वेद्यो भविष्यति ज्ञानवदित्याह—बोधरूपतयेत्यादि। § 6538

बोधरूपतयोत्पत्तेर्ज्ञानं वेद्यं हि युज्यते।
न त्वर्थो बोध उत्पन्नस्तदसौ वेद्यते कथम्॥
२००४॥§ 6540

एवं स्वसंदवेनं प्रसाध्य, बाह्यस्येदानीं यथा निराकारेण ज्ञानेन वेदनमयुक्तं तथा प्रतिपादयन्नाह—निर्भासीत्यादि। § 6541

निर्भासिज्ञानपक्षे तु तयोर्भेदेऽपि तत्त्वतः।
प्रतिबिम्बस्य तादृप्याद्भाक्तं स्यादपि वेदनम्॥
२००५॥§ 6543

येन त्विष्टं न विज्ञानमर्थाकारोपरागवत्।
तस्यायमपि नैवास्ति प्रकारो बाह्यवेदने॥
२००६॥§ 6545

प्रतिबिम्बस्येति। ज्ञानाकारस्य। तादृप्यादिति। सारूप्यात्। भाक्तमिति। अमुख्यम्। अयमपीति। अमुख्यस्तादृप्यादुपकल्पितः॥ २००५॥ २००६॥
§ 6546

अथापि स्याद्यथा खड्गो हस्त्यादिकं छिनत्ति, यथा वा वह्निर्दाह्यं दहति, न चैते खड्गादयो हस्त्यादिरूपाः, तथा ज्ञानमप्रतिपन्नविषयाकारमपि विषयं परिच्छेत्स्यतीति, एतत् स्यान्मतिरित्यादिना शङ्कते। § 6547

स्यान्मतिर्दन्तिदाह्यादेर्यथाऽसिज्वलनादयः।
अताद्रूप्येऽपि कुर्वन्ति छेददाहाद्यदस्तथा॥
२००७॥§ 6549

छेददाहादीत्येतदपेक्ष्य दन्तिदाह्यादेरिति षष्ठी। अद इति। एतज्ज्ञानम्। आदिशब्देन प्रदीपादयो नीलादीनां यथाप्रकाशका इत्यादि गृह्यते॥ २००७॥ § 6550

तदिदमित्यादिनोत्तरमाह। § 6551
561/k

तदिदं विषमं यस्मात्ते तथोत्पत्तिहेतवः।
सन्तस्तथाविधाः सिद्धा न ज्ञानं जनकं तथा॥
२००८॥§ 6553

खड्गादयो हि हस्त्यादीनामुत्पादका एव सन्तो छेदकादित्वेन प्रसिद्धास्तथाहि —खड्गादिधाराभिघाते विश्लिष्टसन्धयो गजास्समुपजायन्ते तथा वह्निसम्पर्कादिन्धनमङ्गारादिरूपम्, एवं घटादयोऽप्यालोकवशाज्ज्ञानजननयोग्या भवन्ति, नत्वेवं ज्ञानेन विषयस्य कश्चिदुपकारः क्रियते, किन्तु विषयेणैव विज्ञानं विस्पष्टमुपजन्यत इति कथमकिंचित्करं तस्य वेदकं भवेत्। नच तत्कार्यत्वमेव तद्वेदकत्वं विज्ञानस्येति युक्तं कल्पयितुं माभूच्चक्षुरादिवेदकत्वमप्यस्येति॥ २००८॥ § 6554

भदन्तशुभगुप्तस्त्वाह—विज्ञानमनापन्नविषयाकारमपि विषयं प्रतिपद्यते तत्परिच्छेदरूपत्वात्, तस्मान्नाशङ्का कर्त्तव्या कथं परिच्छिनत्ति किंवत्परिच्छिनत्तीति। आह च— कथञ्चिद्वाहकं तच्चेत्तत्परिच्छेदलक्षणम्। विज्ञानं तेन नाशङ्क कथं तत्किंवदित्यपीति। तदत्राह—तत्परिच्छेदेत्यादि। § 6555

तत्परिच्छेदरूपत्वं विज्ञानस्योपपद्यते।
ज्ञानरूपः परिच्छेदो यदि ग्राह्यस्य संभवेत्॥
२००९॥§ 6557

४ छेदका] Correction: ; दाहका (sic!)छेदका
३ कथञ्चिद्वा] Correction: ; कथं तद्वा (sic!)कथञ्चिद्वा

अन्यथा तु परिच्छेदरूपं ज्ञानमिति स्फुटम्।
वक्तव्यं नच निर्दिष्टमित्थमर्थस्य वेदनम्॥
२०१० ॥§ 6559

सिद्धे हि व्यतिरिक्तार्थपरिच्छेदात्मकत्वे सति सर्वमेतत्स्यात्तदेव तु न सिद्धम्। तथाहि—न ज्ञानं सत्तामात्रेण परिच्छिनत्ति सर्वपरिच्छेदप्रसङ्गात्। नापि तत्कार्यतया, चक्षुरादेरपि परिच्छेदापत्तेः। नच साकारतेष्टा, येन ताद्रूप्यादविभक्तं भवेत्तत्संवेदकम्। तस्माद्ग्राह्यस्य यः परिच्छेदः स यदि ज्ञानरूपो भवेत्, एवं ज्ञानस्यार्थपरिच्छेदरूपत्वं भवेत्। अन्यथा कथमर्थपरिच्छेदरूपत्वं ज्ञानस्येति स्पष्टमभिधीयते। ततश्चार्थस्य परिच्छेदाद्व्यतिरेकात्तु ज्ञानात्मतैव जातेति सिद्धा विज्ञप्तिमात्रता। स्यादेतत्—कोऽप्यस्य विशेषोऽस्ति येनार्थमेव परिच्छिनत्ति न(स ?)चेदन्तया निर्देष्टुं न शक्यत इत्याह—नच निर्दिष्टमित्थमर्थस्य वेदनमिति। भवतीति शेषः। यद्यप्यसाधारणं वस्तु सर्वमेव निर्देष्टुं न शक्यते, तथाप्युद्भावनासंवृत्त्या कथ्यत एव। अन्यथा हि रूपादीनामपि विशेषो न वक्तव्यः स्यात्। नचेत्थमनवधारितेन रूपेणार्थस्य संवेदनं ज्ञानमिति विस्पष्टमसंशयं निर्दिष्टं भवति। तस्मादनि 562/k
रूपितेन रूपेण भावव्यवस्थाने सुव्यवस्थिता भावा इति यत्किंचिदेतत्॥ २००९॥ ॥ २०१०॥ § 6560

स्यादेतत्परिच्छेद्यार्थाभावे कस्यासौ परिच्छेदो भवेदित्याह—परिच्छेदः स कस्येत्यादि। § 6561

परिच्छेदः स कस्येति नच पर्यनुयोगभाक्।
परिच्छेदः स तस्यात्मा सुखादेः साततादिवत्॥
२०११ ॥§ 6563

आत्मैव हि स तस्य प्रकाशात्मतया परिच्छेद इत्युच्यते। यथा सुखादेः साततेति, नहि सुखस्येति व्यतिरेकनिर्देशमात्रेण ततोऽन्या सातता भवेत्। तस्माद्यद्यपि नीलस्य परिच्छेदः पीतस्येति वा व्यतिरेकीव व्यपदेशस्तथापि स्वभाव एव स तथा नीलादिरूपेण प्रकाशमानत्वा(त्त)थोच्यते स्वसंवेदनरूपत्वाज्ज्ञानस्य॥ २०११॥ § 6564

अथ कोऽयं स्वसंविदर्थो यद्बलात्तथोच्यत इत्याह—स्वरूपेत्यादि। § 6565

११ शेषः] Correction: ; विशेषः (sic !)शेषः

६ सातता] Correction: ; सा तथा (sic !)सातता

स्वरूपवेदनायान्यद्वेदकं न व्यपेक्षते।
नचाविदितमस्तीदमित्यर्थोऽयं स्वसंविदः॥
२०१२॥§ 6567

व्यापृतमित्यादिना स्वरूपवेदनायान्यन्न व्यपेक्षत इत्यत्र कुमारिलश्चोद्यमाशङ्कते। § 6568

व्यापृतं ह्यर्थवित्तौ च नात्मानं ज्ञानमृच्छति।
ततः प्रकाशकत्वेऽपि बोधायान्यत्प्रतीक्षते॥
२०१३॥§ 6570

स ह्याह—यद्यपि ज्ञानं प्रकाशात्मकं, तथाप्यात्मप्रकाशनाय परमपेक्षते। नतु स्वयमात्मानमृच्छति—प्रतिपद्यते, तस्यार्थप्रकाशन एव व्यापृतत्वात्। नह्येकत्रव्यापृतस्य तदपरित्यागेनान्यत्र तदैव व्यापारणं युक्तम्॥ २०१३॥ § 6571

अत्र प्रदीपेन व्यभिचरितामाशङ्क्य पक्षान्तरमाह—ईदृशमित्यादि। § 6572

ईदृशं वा प्रकाशत्वं तस्यार्थानुभवात्मकम्।
नचात्मानुभवोऽस्त्यस्येत्यात्मनो न प्रकाशकम्॥
२०१४॥§ 6574

नतु चासत्यात्मप्रकाशात्मकत्वे बाह्यप्रकाशकत्वमप्यस्य कथं व्यवस्थाप्यत इत्याह —सतीत्यादि। § 6575

सति प्रकाशकत्वे च व्यवस्था दृश्यते यथा।
रूपादौ चक्षुरादीनां तथाऽत्रापि भविष्यति॥
२०१५॥§ 6577

यथा चक्षुरादीनां रूपादौ विषये प्रकाशकत्वव्यवस्थानमसत्यप्यात्मप्रकाशकत्वे,तथाऽत्रापि ज्ञाने भविष्यति॥ २०१५॥ § 6578
563/k

स्यादेतत्किमित्यात्मानमन्तरङ्गं परित्यज्य बाह्यमेव प्रकाशयतीत्याह—प्रकाशकत्वमित्यादि। § 6579

प्रकाशकत्वं बाह्योऽर्थे शक्त्यभावात्तु नात्मनि।

शक्तिश्च सर्वभावानां नैवं पर्यनुयुज्यते॥
२०१६॥§ 6581

किमित्यात्मप्रकाशने शक्तिर्नास्तीत्याह—शक्तिश्च सर्वभावानामित्यादि। यथाह —अग्निर्दहति नाकाशं कोऽत्र पर्यनुयुज्यताम् इति॥ २०१६॥ § 6582

ननु चेत्यादिना प्रतिविधत्ते। § 6583

ननु चार्थस्य संवित्तिर्ज्ञानमेवाभिधीयते।
तस्यां तदात्मभूतायां को व्यापारोऽपरो भवेत्॥
२०१७॥§ 6585

यदुक्तं व्यापृतं ह्यर्थवित्ताविति तदसंगतम्, नह्यर्थवित्तिरन्या ज्ञानात्। तथाहिवित्तिरुपलब्धिरर्थप्रतीतिर्विज्ञप्तिरिति ज्ञानमेवैतैः पर्यायैरभिधीयते। तस्यां चार्थवित्तौ तदात्मभूतायां—ज्ञानात्मभूतायां कीदृशोऽपरो ज्ञानस्यार्थसंवेदनात्मको व्यापारो भवेदात्म्यव्यतिरिक्तो येनार्थवित्तौ व्यापृतमिति भवेत्। न चात्मन्येव व्यापृतिर्युक्ता॥ २०१७॥ § 6586

स्यादेतज्ज्ञानात्मत्वमेवार्थवित्तेः कथं सिद्धं, येन पर्यायता ज्ञानार्थसंवित्त्योरित्याह —अर्थस्यानुभवो रूपमित्यादि। § 6587

अर्थस्यानुभवो रूपं (तच्च ज्ञा)नात्मकं यदि।
तदर्थानुभवात्मत्वं ज्ञाने युक्तं नचास्ति तत्॥
२०१८॥§ 6589

उपेतार्थपरित्यागप्रसङ्गात्तस्य तु स्वतः।
जातेऽप्यनुभवात्मत्वे नार्थवित्तिः प्रसिध्यति॥
२०१९॥§ 6591

अर्थस्यानुभवोऽवश्यं रूपं स्वभावोऽङ्गीकर्त्तव्यः। अन्यथा कथं तत्र ज्ञानं व्याप्रियेत। नह्यसति शशविषाणादौ कस्यचिद्व्यापारणं युक्तम्। ततश्च तदर्थानुभवात्मकं रूपं स्वभावो यदि ज्ञानादव्यतिरिक्तं भवेत्तदा ज्ञानेऽर्थानुभवात्मकत्वं यत्तदुक्तम्— ईदृशं वा प्रकाशत्वं तस्यार्थानुभवात्मकमिति, तद्युक्तं स्यात्। कदाचिन्निर्बध्यमानोऽर्थानुभवादव्यतिरिक्तं ज्ञानमभ्युपगच्छेदपि पर इत्याह—नचास्ति तदिति। तत्— ज्ञानादव्यतिरिक्तत्वमनुभवस्य। उपेतोऽर्थः—अभ्युपगतो ज्ञानस्यात्मसंवेदनविरहलक्षणः, तस्य परित्यागप्रसङ्गः। ज्ञानस्यार्थानुभवाव्यतिरेकाभ्युपगमे स्वसंवित्तिप्र सङ्गात्। स्यादेत- 564/k

न्नार्थानुभवात्मत्वाज्ज्ञानस्य प्रकाशकत्वमिष्टम्, किं तर्हि ?, अनुभवात्मत्वादेव केवलादित्याह—तस्य तु स्वत इत्यादि। तस्य—ज्ञानस्य। यद्यप्यनुभवात्मकत्वमेव केवलं जातं नार्थानुभवात्मत्वं तथा (च) नीलस्येयं संवित्तिर्न पीतस्येत्यादिभेदेनार्थसंवित्तिर्न सिद्ध्येत्॥ २०१८॥ २०१९॥ § 6592

किमिति न सिद्ध्येदित्याह—नहि तत्रेत्यादि। § 6593

नहि तत्र परस्यास्ति प्रत्यासत्तिर्निबन्धनम्।
यथा साकारविज्ञानपक्षेऽर्थप्रतिबिम्बकम्॥
२०२० ॥§ 6595

परस्येति। अनाकारज्ञानवादिनः। यस्येदं दर्शनमाकारवान्बाह्योऽर्थो निराकारा बुद्धिरिति॥ २०२०॥ § 6596

ईदृशं वा प्रकाशत्वं तस्यार्थानुभवात्मकमित्यत्राह—प्रकृत्येत्यादि। § 6597

प्रकृत्या जडरूपत्वान्नास्यात्मानुभवो यदि।
ज्ञानसंवेदनाभावात्परार्थानुभवस्तदा(था ?)॥
२०२१ ॥§ 6599

यदि विज्ञानं जडरूपतयाऽऽत्मानं न संवेदयते तदा तस्य स्वतोऽप्रत्यक्षत्वेऽर्थानुभवोऽप्यप्रत्यक्षतया न(इ ?)ष्टः स्यात्॥ २०२१॥ § 6600

स्यादेतद्यदि नाम ज्ञानमप्रत्यक्षम्, अर्थानुभवोऽपि किमित्यप्रत्यक्षो भवेत्। नहि रूपस्याप्रत्यक्षत्वे शब्दस्याप्यप्रत्यक्षता स्यादित्याह—अर्थस्यानुभवो नामेत्यादि। § 6601

अर्थस्यानुभवो नाम ज्ञानमेवाभिधीयते।
तस्याप्रसिद्धिरूपत्वे प्रसिद्धिस्तस्य का परा॥
२०२२ ॥§ 6603

न हि ज्ञानस्यान्यद्रूपं निर्द्धारयामोऽन्यत्रार्थानुभवात्। अनिर्द्धारयन्तः स्ववाचमन्यत्वं (स्वभावमन्यं तं ?) निश्चयं व्यवहरन्तः स्वपरानु(न् ?)विप्रलभेमहि। तस्य ज्ञानस्याप्रसिद्धरूपत्वे सति प्रसिद्धिस्तस्यार्थानुभवस्य का परा भवेत्, नैव काचित् ॥ २०२२॥ § 6604

अथापि स्याज्ज्ञानान्तरेण तस्य सिद्धिर्भविष्यतीत्याह—ज्ञानान्तरेणेत्यादि। § 6605

ज्ञानान्तरेणानुभवे सोऽर्थः स्वानुभवे सति।
प्र(अ ?)सिद्धः सिद्ध्यसंसिद्धेः कदा सिद्धो भवेत्पुनः
२०२३§ 6607

तज्ज्ञानज्ञानजातौ चेदसिद्धः स्वात्मसंविदि।
परसंविदि सिद्धस्तु स इत्येतत्सुभाषितम्॥
२०२४॥§ 6609

565/k

सिद्धेः—ज्ञानस्य, असिद्धेः। प्र(अ ?)सिद्धव्यक्तिकं व्यक्तमिति (न) युज्यते। तथाहि—न तावदर्थस्य स्वानुभवकालेऽपि सिद्धिस्तदभिव्यक्तिस्वभावस्यानुभवस्यतदानीमसिद्धत्वात्कदा तस्य सिद्धिर्भविष्यतीति वक्तव्यम्। तज्ज्ञानज्ञानजातौ—अर्थज्ञानज्ञानोत्पत्तिकाले, सिद्धिर्भविष्यतीति चेत्। एतदतिसुभाषितम्। यो हि नाम स्वानुभवकाले न सिद्धः स कथमस्वा(न्या ?)नुभवकाले सेत्स्यतीति॥ २०२३॥ ॥ २०२४॥ § 6610

सिद्ध्यतु नाम यद्यनवस्था न भवेत्सा तु दुर्वारेति दर्शयन्नाह—तस्याप्यनुभव इत्यादि। § 6611

तस्याप्यनुभवे(ऽसिद्धे ?)प्रथमस्याप्यसिद्धता।
तत्रान्यसंविदुत्पत्तावनवस्था प्रसज्यते॥
२०२५॥§ 6613

तस्येति। द्वितीयस्यार्थज्ञानज्ञानस्य। प्रथमस्येति। अर्थानुभवस्य। (अ)सिद्धतेति। नास्य सिद्धिरस्तीत्यसिद्धस्तद्भावोऽसिद्धता॥ २०२५॥ § 6614

किंच यदि ज्ञानान्तरेणानुभवोऽङ्गीक्रियते तदा तत्रापि ज्ञानान्तरे स्मृतिरुत्पद्यत एव ज्ञानज्ञानं ममोत्पन्नमिति, तस्याप्यपरेणानुभवो वक्तव्यः, नह्यननुभूते स्मृतिर्युक्ता, ततश्चेमा ज्ञानमालाः कोऽनन्यकर्मा जनयतीति वक्तव्यम्। न तावदर्थस्तस्य मूलज्ञानविषयत्वात्। नापीन्द्रियालोकौ तयोश्चक्षुर्ज्ञान एवोपयोगात्। नापि निर्निमित्ता, सदा सत्त्वादिप्रसङ्गात्। सैव पूर्वधीरुत्तरोत्तरां बुद्धिं जनयतीति चेदाह—गोचरान्तरेत्यादि। § 6615

गोचरान्तरसंचारस्तथा न स्यात्स चेक्ष्यते।

गोचरान्तरसंचारे यदन्त्यं तत्स्वतोऽन्यनः॥
२०२६॥§ 6617

न सि(द्धेत्तस्य चा)सिद्धौ सर्वेषामप्यसिद्धता।
अतश्चान्ध्यमशेषस्य जगतः संप्रसज्यते॥
२०२७॥§ 6619

अन्त्यस्य तु स्वतःसिद्धावन्येषामपि सा ध्रुवम्।
ज्ञानत्वादन्यथा नैषां ज्ञानत्वं स्याद्घटादिवत्॥
२०२८॥§ 6621

एवं हि विषयान्तरसंचारो न प्राप्नोति, तथाहि—पूर्वपूर्वा बुद्धिरुत्तरोत्तरस्य ज्ञानस्य विषयभावेनावस्थिता प्रत्यासन्ना चोपादानकारणतया तां तादृशीमन्तरङ्गिकां त्यक्त्वा कथं च बहिरङ्गमर्थं गृह्णीयात्। नचाप्यर्थः सन्निहितोऽपि 566/k तां प्रतिरोद्धुं समर्थस्तस्य बहिरङ्गत्वात्। अथ बहिरङ्गोऽपि सन् प्रतिवध्नीयात्तदा न कदाचित् कश्चिद्बु(द्धु ?)द्धिमनुभवेत्। तथाहि—न काचिदवस्थाऽस्ति यस्यामर्थो न सन्निहित इति। स्मृतिरप्युच्छिन्ना स्यादनुभवाभावात्। किंच—येऽतीतादिविकल्पा विषयसन्निधानमन्तरेण भवन्ति तेषां संचारकारणाभावाद्विकल्पपरंपरायामासंसारमवस्थानान्न कस्यचिदर्थचिन्ता स्यात्। भवतु नामार्थान्तरसंचारोऽनुपपद्यमानोऽपि। तथाऽपि यत्तदन्यज्ज्ञानं तत्केनानुभूयेतेति वक्तव्यम्। अथ स्यात्—सैवोत्तरा बुद्धिरर्थान्तरग्राहिणी पूर्वां धियमर्थं चोभयमपि गृह्णातीति, तदेतदसम्यक्। तथाहि— यदा शब्दज्ञानादनन्तरं रूपग्राहि ज्ञानं भवति तदा तस्मिन्रूपग्राहिणि ज्ञाने शब्दज्ञानस्य प्रतिभासात्तदा रूढस्यापि शब्दस्य प्रतिभासः प्राप्नोति। यस्यापि निराकारज्ञानं तस्यापि न शब्दग्रहणमन्तरेण तद्ग्राहकस्य ग्रहणं युक्तम्, नहि दण्डग्रहणमन्तरेण तद्ग्राहकस्य दण्डिनो ग्रहणं न्याय्यमिति रूपग्राहिणि चक्षुर्ज्ञाने शब्दस्यापि प्रतिभासः स्यात्। तथा चिन्ताज्ञानेप्यकारादिविषयिणि यथोक्तनीत्याऽभिलापद्वयमेकस्मिन्नु(त्त)क्रमेण स्यात्। तथाहि—यदेकारचिन्तासमनन्तरमकारं चिन्तयति तदा तदकारंचिन्ताज्ञानमिकारग्राहकमपि चिन्तयतीति स्वज्ञानसमारूढस्येकाराभिलापस्याकाराभिलापिनि ज्ञाने प्रतिभासः प्राप्नोति। किंच—सर्वमेव वस्तु वारद्वयं प्रतिभासेत, स्वज्ञानकालेऽवभासनात्। न चैवं प्रतिभासोऽस्तीत्ययुक्तमुत्तरया बुद्ध्या द्वयोर्ग्रहणम्। अथापि स्यादेकमन्त्यं ज्ञानमननुभूतमस्मृतं चास्तां को दोषः स्यादित्याह—गोचरान्तरसंचार इति। स्वसंवित्तेरनभ्युपगमान्न स्वतः सिद्धता,(ना)पि परतः, अनवस्थादोषात्, तस्यान्तस्यासिद्धौ सत्यां पूर्वकस्याप्यसिद्धिः, अप्रत्यक्षोपलम्भकत्वात्,ततश्चार्थ-

स्याप्यसिद्धिरिति न कदाचित्किंचिदुपलभ्येत। ततश्चान्ध्यमायातमशेषस्य जगतः। अथान्तस्य यथोक्तदोषभयात्स्वसंवित्त्या स्वत एव सिद्धिरभ्युपगम्यते तदा तद्वदेव सर्वस्य ज्ञानत्वाविशेषात्स्वसंविदस्तु। प्रयोगः—यज्ज्ञानं तदात्मबोधं प्रत्यनपेक्षितान्यव्यापारं ज्ञानत्वात्, अन्त्यज्ञानवत्, ज्ञानं च विवादास्पदीभूतं ज्ञानमिति स्वभावहेतुः। अन्यथा हि यत्स्वतो न सिद्धस्तस्य घटादिवज्जडरूपतया ज्ञानत्वमेव हीयेतेति बाधकं प्रमाणम्॥ २०२६॥ २०२७॥ २०२८॥

§ 6622

सति प्रकाशकत्वे व्यवस्था दृश्यते यथेत्याह—विज्ञानं जनयदित्यादि।

§ 6623

विज्ञानं जनयद्रूपे चक्षुस्तस्य प्रकाशकम्।
मतु तस्यावबोधत्वात्तज्ज्ञानेनास्य कोपमा॥
२०२९ ॥§ 6625

567/k

रूपविषयं विज्ञानं जनयच्चक्षू रूपस्य प्रकाशकमुच्यते। विज्ञानं तु न किंचिद्रूपे करोति विरुपस्यैव ज्ञानकत्वात्। नचाकुर्वत्किंचित्प्रकाशकं युज्यतेऽतिप्रसङ्गात्। तस्मात्। उपमा—सादृश्यम्॥ २०२९॥ § 6626

यत्संवेदनमित्यादिना नीलाद्याकारतद्धियोरभेदसाधनाय निराकारज्ञानवादिनं प्रति प्रमाणयति। § 6627

यत्संवेदनमेव स्याद्यस्य संवेदनं ध्रुवम्।
तस्मादव्यतिरिक्तं तत्ततो वा न विभिद्यते॥
२०३० ॥§ 6629

यथा नीलधियः स्वात्मा द्वितीयो वा यथोडुपः।
नीलधीवेदनं चेदं नीलाकारस्य वेदनात्॥
२०३१ ॥§ 6631

यस्य संवेदनं यत्संवेदनम्, तदेव यस्य संवेदनं नियमेन, नान्यत्, तस्मात्—प्रथमयच्छब्दवाच्यात्। अभिन्नं कृतमेकान्तेन। तत्—द्वितीयं यच्छब्दवाच्यम्। यद्वा विपर्ययेणाभेदः साध्यः। एतदुक्तं भवति। (यत्) यस्मादपृथक्संवेदनमेव तत्तस्मादभिन्नं, यथा नीलधीः स्वस्वभावात्। यथा वा तैमिरिकज्ञानप्रतिभाभासी द्वितीय उडुपः—चन्द्रमाः। नीलधीवेदनं चेदमिति पक्षधर्मोपसंहारः। धर्म्यत्र नीलाकारतद्धियौ। तयोरभिन्नत्वं साध्य-

धर्मः। यथोक्तः सहोपलम्भनियमो हेतुः। ईदृश एवाचार्यीये सहोपलम्भनियमादित्यादौ प्रयोगे हेत्वर्थोऽभिप्रेतः। तत्र भदन्तशुभगुप्तस्त्वाह—विरुद्धोऽयं हेतुर्यस्मात्— सहशब्दश्च लोकेऽन्यो(स्या ?)न्नैवाने(न्ये ?)न विना क्वचित्। विरुद्धोऽयं ततो हेतुर्यद्यस्ति सहवेदनम्॥ इति। तदेतसम्यक्। यस्य विपक्ष एव भावः स विरुद्धो हेतुः। नचास्य विपक्ष एव, सपक्षेऽपि भावात्। तथाहि—चन्द्रद्वयस्य सहोपलम्भाभिमानोऽस्ति लोके, नच तयोर्भेदोऽस्ति परमार्थतः। अथच सह शशिद्वयोपलम्भात्सहेति वक्तारो भवन्ति। एवमिहापि ज्ञानादव्यतिरिक्तमपि बहिरिव भासमानमाकारं द्वितीयं कृत्वा कल्पितभेदनिबन्धनः सहशब्दः प्रयुक्तः। नहि सर्वः शाब्दो व्यवहारो यथावस्तुनिवेशी, येन सहशब्दप्रयोगमात्रेण वस्तुप्रतिबद्धस्य लिङ्गस्यान्यत्वं स्यात्, यतो विरूद्धो हेतुर्भवेत्। पुनः स एवाह—यदि सहशब्द एकार्थस्तदा हेतुरसिद्धः—तथाहिनटचन्द्रमल्लप्रेक्षासु नह्येकेनैवोपलम्भो नीलादेः। नापि नीलतदुपलम्भयोरेकेनैवोपलम्भः। तथाहि—नीलोपलम्भेऽपि
568/k तदुपलम्भानामन्यसन्तानगतानामनुपलम्भात्। यदा च सत्त्वं प्राणभृतां सर्वे चित्तक्षणाः सर्वज्ञेनावसीयन्ते तदा कथमेकेनैवोपलम्भः सिद्धः स्यात्। किं चान्योपलम्भनिषेधे सत्येकोपलम्भनियमः सिद्ध्यति। नचान्योपलम्भप्रतिषेधसम्भवः, स्वभावविप्रकृष्टस्य विधिप्रतिषेधायोगात्। अथसहशब्द एककालविवक्षया तदा बुद्धविज्ञेयचित्तेन चित्तचैत्तैश्च सर्वथाऽनैकान्तिकताहेतोः। यथा किल बुद्धस्य भगवतो यद्विज्ञेयं सन्तान्तरचित्तं तस्य बुद्धज्ञानस्य च सहोपलम्भनियमेऽ(प्य)स्त्येव च नानात्वम्, तथा चित्तचैत्तानां सत्यपि सहोपलम्भे नैकत्वमित्यतोऽनैकान्तिको हेतुरिति। तदेतत्सर्वमसम्यक्। न ह्यत्रैकेनैवोपलम्भ एकोपलम्भ इत्ययमर्थोऽभिप्रेतः। किं तर्हि ?। ज्ञानज्ञेययोः परस्परमेक एवोपलम्भो न पृथगिति। य एव हि ज्ञानोपलम्भः स एव ज्ञेयस्य य एव ज्ञेयस्य स एव ज्ञानस्येति यावत्। नच नटचन्द्रमल्लप्रेक्षासु कश्चिज्ज्ञानोपलम्भोऽस्ति यो न ज्ञेयोपलम्भकः ज्ञेयोपलम्भो वा न ज्ञानोपलम्भक इति कुतोऽसिद्धता। नापि संदिग्धासिद्धता। तथाहि—यदेवात्मसंवेदनं ज्ञानस्य तदेवार्थस्येति परेणापि बाह्यार्थवादिनाऽङ्गीकृतम्। एतेनैकस्यैवोपलम्भ एकोपलम्भ इत्येवं विकल्प्य योऽसिद्धतादोष उक्तः स तत्पक्षानङ्गीकृतेरेवापास्तो द्रष्टव्यः। नच बुद्धस्य भगवतश्चित्तेन परसन्तानवर्त्तिनश्चित्तक्षणा अवसीयते। तस्य भगवतः सर्वावरणविगमेन ग्राह्यग्राहककलङ्करहितत्वात्। यथोक्तम्— ग्राह्यं न तस्य ग्रहणं न तेन ज्ञानान्तरग्राह्यतयापि शून्य इ(मि ?)ति। अक्षुण्णविधानं त्वाधिपत्यमात्रेण। यथोक्तम्—पूर्वप्रणिधानाहितसततानाभोगवाहि परकार्यमिति सर्वार्थकारित्वात्सर्वज्ञ इष्यत इति वक्ष्यति। तस्मान्नासिद्धता हेतोरिति। ननु चाचार्यधर्मकीर्त्तिना विषयस्य ज्ञानहेतुतयोपनिधिः प्रागुपलम्भः पश्चात्संवेदनस्येति चेदित्येवं पूर्वपक्षमादर्शयता—एककालार्थः सहशब्दोऽत्र दर्शितो नत्वभेदार्थः, एककाले हि विवक्षिते कालभेदोपदर्शनं परस्य युक्तं नत्वभेदे सतीति चेन्न। कालभेदस्य वस्तुभेदेन

व्याप्तत्वात्काल(भेदोप)दर्शनमुपलम्भेनानात्वप्रतिपादनार्थमेव सुतरां युक्तम्, व्याप्यस्य व्यापकाव्यभिचारात्। नापि बुद्धविज्ञेयचित्तेनानैकान्तिको हेतुः, नहि तत्रैकोपलम्भ(नियमोऽ)स्ति, पृथक् पृथक्सर्वैरेव तस्य चित्तस्य संवेदनात्। अतएव चित्तविपर्ययविचारस्तेषामपि प्रत्येकमात्मन एव संवेदनात्। अथवा भवतु भगवच्चित्तेन परचित्तस्य संवेदनं तथापिनानैकान्तिकता। नियमेन व्यावर्त्तितत्वात्। ययोर्हि परस्परमुपलम्भनानात्वमपि सम्भवति तन्नियमेन व्यावर्त्तितं नतु पुनरूपलम्भानां सन्तानकाले भेदेन स्वलक्षणा (नां)नानात्वम्। 569/k तेनायमर्थो भवति—यदुपलम्भ एव यस्योपलम्भो नान्योऽपीति। नच भगवज्ज्ञानोपलम्भ एवान्यसन्तानगतचित्तोपलम्भो नाप्यन्यसन्तानगतचित्तोपलम्भ एव भगवज्ज्ञानोपलम्भः, अपि त्वन्योऽपि, पृथक्त्वस्य स्वस्यापि चित्तस्य संवेदनात्। अतएव न रूपालोकैर्व्यभिचारः। केवलस्याप्यालोकदर्शनात्। रूपस्याप्यालोकरहितस्य कैश्चित्प्राणिविशेषैरुपलम्भात्तस्माद्विपक्षे भावासम्भवान्नानैकान्तिको हेतुः॥ २०३०॥ २०३१॥ § 6632

स्यादेतत्—यद्यपि विपक्षे सत्त्वं न निश्चितं, संदिग्धं तु, ततश्चानैकान्तो हेतुः संदिग्धविपक्षव्यावृत्तिकत्वत्। तथाहि—विषयविषयिभावेन नियतत्वादन्यथापि सहोपलम्भनियमः सम्भवत्येव, यतो ज्ञानस्य ग्राहक एव स्वभावो विषयग्रहणधर्मकत्वात्तस्य, विषयस्यापि तद्ग्राह्य एव स्वभावः, तयोश्चैकसामग्र्यधीनत्वान्नित्यं सह भाविता। नच सहोत्पादाविशेषेऽपि चक्षुरादीनां विषयत्वप्रसङ्गस्तथाविधस्वभावाभावात्। तथाहि—सामग्र्या नीलादिविषयाध्यवसायरूपमेव ज्ञानं जन्यते न चक्षुराद्यध्यवसायरूपम्। नीलादिरपि तु तदध्यवसीयमानरूपो जनितो न चक्षुरादिरिति। आह च— नान्योऽस्ति ग्राहको ज्ञानाच्चाक्षुषैर्विषयैर्विना। अतश्च सहसंवित्तिर्नाभेदान्नीलतद्धियोः॥ पूर्विकैव तु सामग्री प्रज्ञानं विषयक्षणम्। सा (आ ?) लोकरूपवत्कुर्याद्येन स्यात्सहवेदनम्॥ इति। अत्राह—न ज्ञानात्मेत्यादि। § 6633

न ज्ञानात्मा परात्मेति नीलधीवेदने कथम्।
नीलाकारस्य संवित्तिस्तयोर्नो चेदभिन्नता॥
२०३२॥ § 6635

नहि व्यतिरिक्तस्य प्रतिबन्धमन्तरेण सहोपलम्भनियमो युक्तोऽतिप्रसङ्गात्। नचात्र व्यतिरिक्तस्य संवेदने कश्चित्प्रतिबन्धोऽस्ति। तथाहि—प्रतिबन्धोभवन्भवेत्तादात्म्यं तदुत्पत्तिर्वा। न तावत्तादात्म्यमत्र परेणेष्टम्, तस्यैव साध्यत्वात्। नापि तदुत्पत्तेः सहवेदनम्, सह भूतयोः कार्यकारणभावाभावात्। चक्षुरादीनामप्युपलब्धिप्रसङ्गाच्च। नापि पूर्वसामग्रीवशाद्यौगपद्यमात्रेण विषयविषयिभावः, चित्तचैत्यानां चक्षुरादीनां च परस्परं विषयविषयित्वप्रसङ्गात्। नापि सामग्र्या प्रतिनियतविषयविषयिरूपेण जनितत्वान्नातिप्रसङ्ग इति युक्तं वक्तुम्, विषयविषयित्वस्यैव विचार्यमाणत्वेनासिद्धत्वात्। सिद्धे

हि प्रतिबन्धे विषयविषयिभावो युक्तो यावता स एवविषयविषयिभावव्य-
570/k वस्थायां प्रतिबन्धो विचार्यते। नच तादात्म्यतदुत्पत्तिव्यतिरे केणापरः प्रतिबन्धोऽस्ति, यतो विषयविषयिभावः सिध्येत्। नापि तादात्म्यतदुत्पत्तिभ्यां विषयविषयिभावो युक्त इति विचारितमतो न व्यतिरिक्तस्य कथंचित्सहोपलम्भोऽस्तीति कुतः संदिग्धविपक्षव्यावृत्तिकता हेतोः॥ २०३२॥ § 6636

द्वितीयमपि साकारतासिद्धे साधनमाह—संवेदनमिदमित्यादि। § 6637

संवेदनमिदं सर्वं न चार्थान्तरगोचरम्।
संवेदनं च (नीलस्य) स्वात्मसंवेदनं यथा॥
२०३३ ॥§ 6639

यद्यत्संवेदनं तत्तज्ज्ञानान्नार्थान्तरविषयं यथाऽऽत्मसंवेदनं, संवेदनं चेदं नीलाद्याकारस्येति विरुद्धव्याप्तोपलब्धिः। अर्थान्तरगोचरत्वविरुद्धेनानर्थान्तरगोचरत्वेन संवेदनस्य व्याप्तत्वात्॥ २०३३॥ § 6640

तामेव व्याप्तिं साधयन्नाह—मुख्यतोऽर्थमित्यादि। § 6641

मुख्यतोऽर्थं न गृह्णाति स्वस्वभावव्यवस्थितेः।
अर्थाकारोपरागेण वियोगाच्च न भक्तितः॥
२०३४ ॥§ 6643

शुद्धस्फटिकसंकाशमर्थाकारैरनङ्कितम्।
यैरिष्टं वेदनं कैश्चिदिदं तान्प्रति साधनम्॥
२०३५ ॥§ 6645

निर्व्यापारत्वात्सर्वधर्माणां न परमार्थतः कस्यचित्केनचिद्ग(?)हणं, केवलं प्रकाशरूपतया तथा प्रथमानं विज्ञानमात्मनो ग्राहकमुच्यते। नचैव मुख्यतोऽर्थस्य ग्राहकं ज्ञानं युक्तम्, सर्वभावानां स्वस्वभावव्यवस्थितेः, न हि तदात्मा यः सोऽपरस्यापि। स्यादेतत्—नहि मुख्यतो यादृशं ज्ञानस्यात्मसंवेदनं तादृगेवार्थस्येष्टम्, किं तर्हि ?,स्वाभासज्ञानजनकत्वमेवार्थस्य संवेद्यत्वम्, ततश्च यदि मुख्यं संवेदनं हेतुत्वेनोपादीयते तदा हेतोरसिद्धता, अथापि यथाकथंचित्संवेदनशब्दवाच्यतासाम्यात्। तथाऽपि न तथाविधादिष्टसिद्धिः, नहि गोशब्दसाम्याद्गवयादीनां विषाणित्वसिद्धिः। अथ ज्ञानारूढं नीलाद्याकारं धर्मिणमाश्रित्य साकारज्ञानपक्षे द्विविधोऽपि हेतुरभिप्रेतस्तदा सिद्धसाध्यता। यथोक्तम्—साकारज्ञानपक्षे च तन्निर्भासस्य वेद्यता। तस्याभेदे च संसाध्ये सिद्धसाधनता भवेत्॥ इत्येतत्सर्वं भदन्त-

शुभगुप्तस्य चोद्यमाशङ्क्याह—अर्थाकारोपरागेणेत्यादि। अर्थाकारोऽर्थसदृश-श्चासावुपरागो निर्भासश्चेत्यर्थाकारोपरागः। इदमिति। द्विविधमपि साधनं निराकारवादिनं प्रतियतस्तेन न सिद्धसाध्यता, नाप्युपचारेणान्यस्य संवेदनमस्ति, उपचारनिबन्धनाभावात्॥ २०३४॥ २०३५॥ § 6646

571/k

एवं तावदनिर्भासं ज्ञानं न बाह्यमर्थं विजानातीति प्रतिपादितम्। नापि सनिर्भासमिति द्वितीयं पक्षमाश्रित्य प्रतिपादयन्नाह—अस्तु तर्हीत्यादि। § 6647

अस्तु तर्हि ससारूप्यं विज्ञानं बाह्यवेदकम्।
तस्यापि सर्वथाऽयोगान्न युक्ता वेदकस्थितिः॥
२०३६॥ § 6649

नहि भाविका आकारो युक्तो यतस्तद्वशादर्थव्यवस्थानं स्यात्। नचालीकेन साकारेणार्थः संविदितो भवेत्, भ्रान्तेऽपि ज्ञाने तथाविधस्य भावात्॥ २०३६॥ § 6650

कथमलीकत्वं साकाराणामिति चेदाह—ज्ञानादित्यादि। § 6651

ज्ञानादव्यतिरिक्तत्वान्नाकारबहुता भवेत्।
ततश्च तद्बलेनास्ति नार्थसंवेदनस्थितिः॥
२०३७॥ § 6653

आकाराव्यतिरिक्तत्वात् ज्ञाने वाऽनेकता भवेत्।
अन्यथा कथमेकत्वमनयोः परिकल्प्यते॥
२०३८॥ § 6655

चित्रास्तरणदर्शने एकस्माज्ज्ञानादव्यतिरिक्तत्वाज्ज्ञानस्वरूपवदाकाराणां बहुता न प्राप्नोति। एवमाकाराव्यतिरिक्तत्वाज्ज्ञानस्याप्यनेकता प्राप्नोति। ये तु मन्यन्ते समानजातीयान्यपि ज्ञानान्याकारसङ्ख्यान्येव बहूनि चित्रास्तरणादिषु युगपत्समुद्भवन्त्येव विजातीयरूपशब्दादिज्ञानवदिति। ततश्च प्रसङ्गे सिद्धसाध्यतेति। तेषां चित्रास्तरणे यथा नीलादयो बहव आकाराः संवेद्यन्ते। एवमेकाकारेऽपि सितादाववर्वाग्मध्यपरभागरूपा बहव आकारा इति तदात्मकं तत्रापि ज्ञानमनेकात्मकं प्राप्नोति। इष्यत एवेति चेत्। किमिदानीमेकं ज्ञानं भवतीति वक्तव्यम्। यदनवयवाणुविषयमिति चेत्। तदेतदनुभवविरुद्धम्। नहि क्वचिदनवयवमणुरूपं भासमानमालक्ष्यते ज्ञाने। नावाऽप्यमूर्त्तानां पौर्वापर्यावस्थानं देशकृतं युक्तम्। येन तस्य सत्यताप्रसिद्धयेऽनेकज्ञानक-

ल्पना साध्वी स्यात्। देशवितानप्रतिभासस्यालीकत्वे कथमाकाराणां सत्यता स्यान्नाहि देशवितानावस्थितनीलादिप्रतिभासव्यतिरेकेणान्यो नीलादिज्ञानाकारः संवेद्यते। अतोऽनेकज्ञानकल्पनावैयर्थ्यमेव॥ २०३७॥ २०३८॥
§ 6656

दूषणान्तरमाह—सर्वात्मनेत्यादि। § 6657

सर्वात्मना च सारूप्ये ज्ञानेऽज्ञानादिता भवेत्।
साम्ये केनचिदंशेन सर्वं स्यात्सर्ववेदकम्॥
२०३९ ॥§ 6659

अज्ञानता—जडरूपत्वम्। आदिशब्देन नसरागता नसद्वेषतेत्यादि गृह्यते॥ २०३९॥ § 6660

572/k

अन्यनिर्भासमित्येतत्तृतीयं पक्षान्तरमाश्रित्याह—अन्याकारमपीत्यादि।
§ 6661

अन्याकारमपि ज्ञानं कथमन्यस्य वेदकम्।
सर्वः स्यात्सर्वसंवेद्यो न हेतुश्च नियामकः॥
२०४० ॥§ 6663

अथापि स्यात्-यज्ज्ञानं येन जनितं तत्तस्यैव संवेदकं भवेत्, तेन न सर्वः सर्वसंवेद्यो भविष्यतीत्याह—न हेतुश्च नियामक इति। चक्षुरादीनामपि संवेद्यत्वप्रसङ्गादिति भावः॥ २०४०॥ § 6664

यथाहीत्यादिना भदन्तशुभगुप्तस्य परिहारमाशङ्कते। § 6665

यथाहि भवतां ज्ञानं निराकारं च तत्त्वतः।
वेत्ति चाभूतमाकारं भूतं संर्वं तथैव चेत्॥
२०४१ ॥§ 6667

स ह्याह—यथैव भवतां विज्ञानवादिनां विज्ञानं परमार्थतो निराकारम् अधातुकनकाकाशशुद्धिवद्बुद्धिरिष्यत इति वचनात्, अथ च तमाकारं वेत्ति, तथा बाह्यमपीति॥ २०४१॥ § 6668

अत्राह—असाधारणमित्यादि। § 6669

असाधारणमेवेदं स्वरूपं चित्तचैत्तयोः।

संवेदनं ततोऽन्येषां न मुख्यं तत्कथञ्चन॥
२०४२॥§ 6671

एकसामग्र्यधीनत्वं कार्यकारणतादि च।
समाश्रित्य भवेन्नाम भाक्तं भूतस्य वेदनम्॥
२०४३॥§ 6673

नीरूप्यस्य तु भावस्य नैकसामग्र्यधीनता।
नचान्यत्तेन नैवास्ति गौणमप्यस्य वेदनम्॥
२०४४॥§ 6675

नह्यभूतस्य मुख्यसंवेदनमस्ति। तथाहि-यदेव प्रकाशात्मकमसाधारणम-हङ्कारास्पदं सातादिरूपेण प्रथते रूपमात्मा चित्तचैत्तानां तदेव तेषां संवेदनं मुख्यम्। ततोज्ञानात्मनोऽन्येषामभूताकाराणां न तन्मुख्यं संवेदनं युक्तम्। तेषामभूतत्वादेव। नापि गौणमुपचारनिमित्ताभावात्। तथाहि-एकसामग्र्य-धीनत्वं, कार्यकारणभावः,आदिशब्देन सारूप्यम्, एतदुपचारनिबन्धनं भवेत्। न चाभूतस्यैतत्सर्वमस्ति। न चान्यदस्त्युपचारनिमित्तम्। केवलमविद्याव-शादविषयमेवाभूताकारोपदर्शकं ज्ञानंभ्रान्तं जायते॥ २०४२॥ २०४३॥ २०४४॥ § 6676

स एव तर्हि विभ्रमोऽसत्याकारसंवेदने उपचारनिमित्तं भविष्यतीति चेत्, अत्राह—अथवेत्यादि। § 6677
573/k

अथवाऽभूतमाकारं वेत्तीति व्यपदिश्यते।
विभ्रमान्न हि तत्त्वेन वेत्ति निर्विषयं हि तत्॥
२०४५॥§ 6679

त्वयाऽपि यदि विज्ञानमेवंभूतस्य वेदकम्।
विभ्रमादुच्यते व्याप्तं व्यक्तं निर्विषयं तव॥
२०४६॥§ 6681

तदिति। अभूताकाराविषयत्वेनोक्तं ज्ञानं। तथाहि—परमार्थतो नाभूताकारोऽस्ति वेद्यः, तस्य हि विधिना वेद्यत्वोपगमे भूतत्वप्रसङ्गात्॥ २०४५॥ २०४६॥ § 6682

पुनः स एवाह— साकारं तन्निराकारं तुल्यकालमतुल्यजम्। इति बौद्धेऽपि विज्ञाने किं न चिन्ता प्रवर्त्तते॥ इति। यथा साकारादिविज्ञानेन नार्थस्य ग्रहणं युक्तमिति चिन्ता क्रियते तथा भगवतोऽपि ज्ञानेनार्थस्य ग्रहणं प्रति किं न क्रियतइत्यत्राह—साकारमित्यादि। § 6683

साकारं तन्निराकारं युक्तं नान्यस्य वेदकम्।
इति बौद्धेऽपि विज्ञाने न तु चिन्ता प्रवर्त्तते॥
२०४७॥ § 6685

नहि भगवतो ज्ञानं तस्य ग्राहकमिष्यते येनात्रापि चिन्ता क्रियेत। यावता तस्य सर्वावरणविगमान्न ग्राह्यग्राहकविकल्पोऽस्तीतीष्टम्॥ २०४७॥ § 6686

ननु च यद्यपि बाह्योऽर्थो नास्ति ग्राह्यस्तथापि चित्तान्तरमस्त्येव सन्तानान्तरवर्त्ति, तद्भगवज्ज्ञानस्य किमिति ग्राह्यं न भवेत्, अत्राह—अन्यरागादीति। § 6687

अन्यरागादिसंवित्तौ तत्सारूप्यसमुद्भवात्।
प्राप्नोत्यावृतिसद्भाव औपलम्भिकदर्शने॥
२०४८॥ § 6689

अन्यसन्तानवर्त्ति रागादिसंवेदनं हि यदि, परं सारूप्यादेव युक्तम्, नान्यथा, अतिप्रसङ्गात्। ततश्च यदि सर्वात्मना सारूप्यं तदा भगवतोऽपि ज्ञानं रक्तं स्यात्। एवं सति क्लेशावरणमप्रहीणं स्यादित्यावृतिसद्भावः प्राप्नोति। उपलम्भेन चरन्तीत्यौपलम्भिकास्तेषां दर्शने—मते। यद्वा—औपलम्भिके भगवतो दर्शने ज्ञानेऽभ्युपगम्यमाने सतीत्ययमर्थः। अथैकदेशेन सारूप्यं तथापि व्याकारस्याप्रहीणत्वाज्ज्ञेयावरणसद्भावः प्राप्नोति, ग्राह्याकारकलङ्कितत्वात्, तथाह्येकस्य द्वैरूप्यं भाविकमयुक्तमिति तदवश्यं भ्रान्तं व्यवस्थापनीयम्। ततश्च भ्रान्तिबीजस्यादोषस्याल्पस्याप्रहाणादप्रहीणावरण एव भगवान्स्यात्॥ २०४८॥ § 6690

यदि न किंचिज्जानाति कथं तर्हि सर्वज्ञः स्यादित्याह—कल्पपादपवदित्यादि। § 6691

574/k

कल्पपादपवत्सर्वसङ्कल्पपवनैर्मुनिः।
अकम्पोऽपि करोत्येव लोकानामर्थसम्पदम्॥
२०४९॥§ 6693

तेनादर्शनमप्याहुः सर्वे सर्वविदं जिनम्।
अनाभोगेन निःशेषसर्ववित्कार्यसम्भवात्॥
२०५०॥§ 6695

अदर्शनमिति। नास्य दर्शनमुपलम्भोऽस्तीत्यदर्शनः। पूर्वप्रणिधानबलादनाभोगेन कल्पतभ(रू ?)वद्यथाभव्यमशेषजगदर्थसंपादनात्सर्वज्ञमाहुर्नोपलम्भबलात्। स्वभावान्तरस्य सर्वथाऽप्युपलम्भायोगात्॥ २०४९॥ २०५०॥
§ 6696

एवं बाह्यार्थनिषेधकं प्रमाणमभिधाय तत्साधकं परप्रणीतमुपाकर्तुमाह—धिय इत्यादि। § 6697

धियोऽसितादिरूपत्वे सा तस्यानुभवः कथम्।
धियः सितादिरूपत्वे बाह्योऽर्थः किंप्रमाणकः॥
२०५१॥§ 6699

तथाहि—प्रत्यक्षतो बाह्यार्थसिद्धिः स्यादनुमानतो वा, अन्यस्य प्रमाणस्य सतोऽत्रैवान्तर्भावात्। तत्र न तावत्प्रत्यक्षतः, तथाहि—प्रत्यक्षाभिमतेन ज्ञानेन निराकारेण वार्थस्य ग्रहणं स्यात्साकारेण वा। न तावन्निराकारेण, प्रत्यासत्तिनिबन्धनाभावात्।धियोऽसितादिरूपत्वे सति सा धीस्तस्यार्थस्यानुभवः कथं भवेत्, नैव भवेदिति प्रागुक्तम्। अथ साकारेण तथा, नीलाद्याकारस्यैवैकस्य ज्ञानगतस्योपलम्भाद्बाह्योऽर्थः परोक्ष एव भवेन्न प्रत्यक्षः। नहि द्वे नीले कदाचित्संवेद्येते, एकं ज्ञानप्रतिबिम्बकमपरं तदर्पकमित्येवं तावन्न प्रत्यक्षतः सिद्धिः॥ २०५१॥ § 6700

अनुमानतस्तर्हि सिद्धिरस्त्विति चेत्। अत्र भदन्तशुभगुप्तः प्रमाणयति। यो ज्ञानाकारः स संवादित्वे सति, तथाविधापरपदार्थजनितस्तद्यथा ग्राहक आकारोज्ञानाकारश्चायमविप्लुतेन्द्रियस्य नीलादिप्रतिभासविशेषः संवादीति स्वभावहेतुः। तदिदमाशङ्कते—नीलादीत्यादि। § 6701

नीलादिप्रतिभासस्य संवादित्वेन साध्यते।

ज्ञानाकारतया तुल्यजातीयाज्जन्म बोधवत्॥
२०५२॥§ 6703

संवादित्वेनेति। इत्थंभूतलक्षणे तृतीया। संवादित्वेनोपलक्षिता या ज्ञानाकारता तया हेतुभूतया ज्ञानाकारस्य तुल्यजातीयाज्जन्म साध्यते। बोधवत्—ग्राहकाकारवदित्यर्थः॥ २०५२॥ § 6704

575/k

बाह्यार्थेत्यादिना दूषणमाह। § 6705

बाह्यार्थप्रापणं यद्वा तत्सामर्थ्यं यदीष्यते।
संवादित्वमसिद्धं तद्बहिरर्थापलापिनः॥
२०५३॥§ 6707

अर्थक्रियावसाये चेत्पत्यये हेतुतेष्यते।
संवादित्वं तथाऽप्येतन्निरालम्बेऽपि शक्यते॥
२०५४॥§ 6709

तत्र यदि बाह्यार्थप्रापणं तत्प्रमाणशक्तिर्वा संवादित्वं हेतुविशेषणमभिप्रेतं तदा बहिरर्थापलापिनो विज्ञप्तिमात्रतावादिनस्तदसिद्धमित्यन्यतरासिद्धो हेतुः। अथाभिमतार्थक्रियावभासिप्रत्ययहेतुत्वं संवादित्वमिष्टं तदा विपर्यये बाधकप्रमाणानुपदर्शनात्संदिग्धविपक्षव्यावृत्तिकतेत्यनैकान्तिको हेतुः। निरालम्बेऽपि ज्ञाने तथाविधसंवादित्वाविरोधात्॥ २०५३॥ २०५४॥ § 6710

अविरोधमेव समर्थयितुमाह—यथा बाह्यजलादीनामिति। § 6711

यथा बाह्यजलादीनां सामर्थ्यं नियमो मतः।
ज्ञानेष्वपि तथैवेते संविदोऽव्यतिरेकता(नः ?)॥
२०५५॥§ 6713

अनुमाप्रतिभासेन स्पष्टः साधारणोऽप्ययम्।
स्पष्टं हुताशनादीनां रूपं तेन समं नहि॥
२०५६॥§ 6715

किं चानुमानज्ञानप्रतिभासस्य सत्यपि निरालम्बत्वे संवादित्वमस्तीति निश्चितविपक्षसद्भावात्प्रमेयत्वादिवत्स्पष्टा साधारणानैकान्तिक-

ता हेतोः। स्यादेतत्—असिद्धानिरालम्बनताऽनुमानविकल्पस्येत्याह—स्पष्टं हुताशनादीनामित्यादि। प्रयोगः—यद्यदाकारशून्यं न तत्तद्विषयम्, यथा रूपज्ञानं न शब्दविषयम्, बाह्याकारशून्यं चानुमानमानमिति व्यापकविरुद्धोपलब्धिः। नचासिद्धो हेतुः। तथाहि—स्पष्टं हुताशनादीनां यत्तद्रूपं न तत्तेन—अनुमानज्ञानाकारेण समम्—तुल्यम्, तस्यास्पष्टत्वात्। अन्यथा हि यथा प्रतिष्ठितेन तार्णपार्णादिभेदतो रूपेण प्रत्यक्षे ज्ञाने प्रत्यवभासते, तथैवानुमानज्ञानेऽपि भासेत, यावता प्रतिष्ठितं रूपमुत्सृज्य गमकानुगसामान्यरूपेणैव भासते परोक्षो बाह्यादिरनुमाने। न चैकस्याकारद्वयं सामान्यविशेषात्मकं परस्परविरुद्धं युक्तमिति प्राक्प्रतिपादितम्। नापि विरुद्धो हेतुः सपक्षे भावात्।नाप्यनैकान्तिकोऽतिप्रसङ्गात्॥ २०५५॥ २०५६॥ § 6716

प्रमेयत्वादिहेतुभ्य इत्यादिनोद्योतकरस्य प्रमाणान्याशङ्कते। § 6717
576/k

प्रमेयत्वादिहेतुभ्यः सन्तानान्तरचित्तवित्।
आन्तरानुभवाद्भिन्नं देशविच्छेदभासि चेत्॥
२०५७ ॥§ 6719

सह्याह—यदेतद्देशविच्छेदप्रतिभासि नीलादिकं तदान्तरानुभवाद्भिन्नं प्रमेयत्वात्, अनित्यत्वात्, कार्यत्वात्, प्रत्ययत्वात्, हेतुमत्त्वात्, यथा सन्तानान्तरचित्तमिति ॥ २०५७॥ § 6720

अत्रापि व्यभिचारित्वं न रूपेणास्य चेतसः।
तथापी(हि ?)तद्द्विचन्द्राद्यैरस्वस्थनयनेक्षितैः॥
२०५८ ॥§ 6722

अत्रापीति। सर्वेष्वेव हेतुषु। व्यभिचारित्वम्—अनैकान्तिकत्वम्। आन्तरानुभवेऽपि प्रमेयत्वादीनां सद्भावात्, यथा—तैमिरिकादिज्ञाने प्रतिभासिभिर्द्विचन्द्राद्यैरनैकान्तिकता। प्रमेयत्वं तु द्विचन्द्रादीनां द्विचन्द्रादीति विकल्पकज्ञानविषयतया द्रष्टव्यम्। नच यस्मिन्विज्ञाने ते भासन्ते तदपेक्षया तेषामर्थाधि(ग)मो(ऽ)क्षाभावात्।यदाह—केशादिना योऽन(नायना ?)र्थाधि(ग)मो(ऽ)क्षत इति॥ २०५८॥ § 6723

अन्यथेत्यादिना कुमारिलस्य मतेन व्यभिचारविषयस्यासिद्धिमाशङ्कते। § 6724

अन्यथा बाह्य एवा(?)र्थः संवेद्यश्चेदिहोच्यते।

आकारो भासमानोऽसौ न तदर्थात्मको ननु॥
२०५९ ॥§ 6726

स चैवम्भासमान त्वाद्विज्ञानेन प्रवेद्यते।
बाह्यस्य तु निजं रूपं नैवं तत्रावभासते॥
२०६० ॥§ 6728

अभासमानो वेद्यश्च कथं नामोपपद्यते।
तं च वेत्त्यन्यथा चेति परस्परविरोधि च॥
२०६१ ॥§ 6730

अतएव स्ववेद्यत्वं दुःसाध्यं नैव चेतसाम्।
आत्मभूतावभासस्य तथा संवित्तिदर्शनात्॥
२०६२ ॥§ 6732

तस्माद्बुद्धिरियं भ्रान्ता कल्पयन्त्यर्थमेव न।
कल्पयत्यन्यथासन्तं तेनात्मानमवश्यति (वेक्षते ?)
२०६३ ॥§ 6734

स ह्याह—इह पीतद्विचन्द्रादिज्ञाने व्यभिचारविषयत्वेनोपन्यस्तो बाह्य
एव शङ्खादिरर्थः पीतादिरूपेणालम्ब्यते। ततो व्यभिचारो न सिद्ध इति।
अत्राह—आकार इत्यादि। अयमत्र सङ्क्षेपार्थः—य एवाकारो यस्मिन् ज्ञाने
प्रत्यवभासते स एव तेन संवेद्यत इति युक्तम्, अन्यथा हि सर्वं ज्ञानं
577/k सर्वविषयं स्यात्। प्रतिभासमानत्वेन संवेद्यत्वं व्याप्तम्। नच पीताकारे
ज्ञाने शुक्लाकारः प्रतिभासते, दृश्याभिमतस्यानुपलब्धेरिति व्यापकस्य प्र-
तिभासमानत्वस्य निवृत्तौ व्याप्यस्य संवेद्य(त्वस्य)निवृत्तिरिति। प्रयोगः—यो
यस्मिन्नाकारो न प्रतिभासते न स संवेद्यः, यथा शब्दज्ञाने न रूपम्,
न प्रतिभासते च पीताकारे ज्ञाने शुक्लशङ्खरूपमिति व्यापकानुपलब्धिः। तं
च वेत्तीत्यनेन स्ववचनविरोधमाह। अत एवेति प्रसङ्गेन स्वसंवित्तिं साध-
यति। तेन यज्जैमिनीयैरिष्टम्—अप्रत्यक्षा नो बुद्धिर्निराकारा चेति तदपास्तं
भवति। तस्मादित्यादिनोपसंहारः। कल्पयन्ती सती, अर्थमेवान्यथा सन्तं

कल्पयतीत्येवं नेति संबन्धः। अनेन च कुमारिलोक्तं प्रतिषेधति॥ २०५९॥ २०६०॥ २०६१॥ ॥ २०६२॥ २०६३॥ § 6735

अथेत्यादिना कुमारिलस्यैव प्रमाणमालामाह। § 6736

अथ यद्ग्राहकं रूपं तद्ग्राह्यात्तस्य भिन्नता।
तत्संवित्तावसंवित्ते रसादिग्राहकं यथा॥
२०६४॥§ 6738

ग्राह्यं तद्ग्राहकाच्चैवं तत्परामृशता यतः।
न परामृश्यतेऽवश्यं रसादिग्राहकादिवत्॥
२०६५॥§ 6740

द्वयं परस्परेणैव भिन्नं साध्यं रसादिवत्।
ऐक्यरूपेण वाऽज्ञानात्सन्तानान्तरबुद्धिवत्॥
२०६६॥§ 6742

ज्ञानं स्वांशं न गृह्णाति ज्ञानोत्पत्तेः स्वशक्तिवत्।
ग्राह्यत्वप्रतिषेधश्च द्वयहीना हि वासना॥
२०६७॥§ 6744

चैत्राज्ञानं तदुद्भूतज्ञानांशग्राह्यबोधकम्।
ज्ञानत्वान्न भवेद्यद्वत्तस्य देहान्तरोद्भवम्॥
२०६८॥§ 6746

यदेतद्रूपे ग्राहकं ज्ञानं तत्तस्मात्तद्ग्राह्याद्रूपाद्भिन्नं तस्य रूपस्य संवित्तौ सत्यां तस्यासंवित्तेः, यथा रसादिग्राहकम्। यद्वा—ग्राह्यं रूपादि स्वग्राहकाद्भिन्नं तद्ग्राहकं परामृशता यतो यस्मान्न परामृश्यते, यथा रसादिग्राहकात्। अथवा—द्वयम्—रूपादि तद्ग्राहकं च परस्परविभिन्नम्, एकतरपरामर्शे सत्य (परस्या)परामर्शनात्, रसरूपादिवत्। एकत्वेनापरिज्ञानाद्वा, सन्तानान्तरचित्तवत्। अथवा—न स्वांशग्राहकंज्ञानं ज्ञानादुत्पन्नत्वात्। वास-

नाख्ये(ख्या ?) च ज्ञानशक्तिः। एवं ज्ञानस्य ग्राह्यत्वप्रतिषेधोऽपि कर्त्तव्यस्त-
578/k द्यथा—ज्ञानांशो न ज्ञानग्राह्यो ज्ञानादुत्पन्नत्वात्। कथम स्मिन्ननन्तरे प्रयोग-
द्वयेऽपि साध्यधर्मान्वितो दृष्टान्तः सिद्ध इत्याह—द्वयहीना हि वासनेति। द्व-
येन ग्राह्यग्राहकत्वेन। अथवाऽपरः प्रयोगः—नचैतज्ज्ञानं चैत्रज्ञानोद्भूतज्ञानांश-
स्य बोधकं ज्ञानत्वात्। यद्वत्तस्य चैत्रज्ञानोद्भूतज्ञानांशस्य मैत्रादिदेहान्तरोद्भवं
ज्ञानम्॥ २०६४॥ २०६५॥ २०६६॥ २०६७॥ २०६८॥ § 6747

अपृथग्वेदनादित्यादिना दूषणमाह। § 6748

अपृथग्वेदनात्पूर्वं तदत्र प्रतिपादितात्।
ऐकरूप्यापरिज्ञानपर्यन्तेषु न सिद्धता॥
२०६९ ॥§ 6750

अपृथग्वेदनादिति। नीलतद्धियोः सहोपलम्भनियमात्। अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यतीत्यतः स्वसंवित्प्रसाधनेन प्रतिपादितात्, अभेदस्य नीलतद्धियोः प्रसाधितत्वात्, ऐकरूप्यापरिज्ञानपर्यन्ता हेतवो न सिद्धाः॥ २०६९॥ § 6751

सबहिरित्यादिना परः सिद्धिमुद्भावयति। § 6752

सबहिर्देशसम्बद्ध इत्यनेन ननूच्यते।
ग्राह्याकारस्य संवित्तिर्ग्राहकानुभवादृते॥
२०७० ॥§ 6754

आकारवान्बाह्योऽर्थः स बहिर्देशसम्बद्धः प्रत्यक्षमुपलभ्यत इत्यनेन ग्रन्थेन भाष्यकृता शबरेण ग्राह्यसंवित्तिर्ग्राहकानुभवाद्विनापीति प्रतिपादितम्। ततश्च संवित्तावसंवित्तेरित्येतत्सिद्धम्॥ २०७०॥ § 6755

द्वितीयादयोऽपि हेतवः कथं सिद्धा इत्यत आह—न स्मरामीत्यादि। § 6756

न स्मरामि मया कोऽपि गृहीतोऽर्थस्तदेति च।
स्मरन्ति ग्राहकोत्पादं ग्राह्यरूपविवर्जितम्॥
२०७१ ॥§ 6758

तस्मादभिन्नतायां च ग्राह्येऽपि स्मरणं भवेत्।

ग्राहकस्मृतिसद्भावे तत्र त्वेवैष गृह्यते॥
२०७२॥§ 6760

अन्वयव्यतिरेकाभ्यां सिद्धैवं भिन्नता तयोः।
एवं च हेतवोऽप्येते प्रसिद्धाः साध्यधर्मिणि॥
२०७३॥§ 6762

ग्राह्यास्मरणेऽपि ग्राहकस्मृतिर्दृष्टा, यदि च तस्माद्ग्राहकादेकान्तेन ग्राह्यस्याभिन्नता स्यात्तदा ग्राह्येऽपि स्मरणं भवेत्, ग्राहकवत्, नच भवति, तस्माद्भिन्नयोगक्षेमत्वाद्भिन्नौ ग्राह्यग्राहकौ। स्यादेतद्भवत्येव ग्राह्येऽपि स्मरणमित्याह—ग्राहकस्मृतिसद्भाव इत्यादि।तत्रेति। ग्राहकस्मृतिसद्भावकाले। एष एव—ग्राहक एव गृह्यते, न ग्राह्यमित्येवकारो भिन्नक्रमः। अन्वयव्य- 579/k
तिरेकाभ्यामिति। ग्राह्यग्राहकस्मरणयोर्भावाभावाभ्याम्।तथाहि—ग्राहकस्मरणभावेऽपि ग्राह्यस्मृतेरभावः॥ २०७१॥ २०७२॥ २०७३॥ § 6763

अप्रसिद्धोपलम्भस्येत्यादिना प्रतिविधत्ते। § 6764

अप्रसिद्धोपलम्भस्य नार्थवित्तिः प्रसिध्यति।
तन्न ग्राह्यस्य संवित्तिर्ग्राहकानुभवादृते॥
२०७४॥§ 6766

स बहिर्देशसम्बन्धः प्रत्यक्षमुपलभ्यत इत्यस्यानैकान्तिकतामाह—अस्वस्थेत्यादि। § 6767

अस्वस्थलोचनैर्दृष्टं तथा पीताद्यवेक्ष्यते।
निष्कृष्टं ग्राहकांशाच्च संवेद्यं न तथा परम्॥
२०७५॥§ 6769

निष्कृष्टमित्यत्र छेदः। तथेति। यथा सत्याभिमतं पीतादि बहिर्देशसम्बद्धं विस्पष्टमुपलभ्यते, तथा कामलाद्युपहतनयनोपलब्धमपि समीक्ष्येत। यदि नाम समीक्ष्यते ततः किमित्याह—ग्राहकांशाच्च संवेद्यं नेति छेदः। ग्राहकांशादिति। निष्कृष्टमित्यध्याहार्यम्। संवेद्यं नेति भवतीति शेषः। तेनायमर्थो भवति—तच्च पीतादि तैमिरिकाद्युपलब्धं ग्राहकांशान्निष्कृष्टं पृथक्संवेद्यं न भवति, अथ च बहिर्देशसम्बद्धमुपलभ्यते, तस्मादनैकान्तिकमेतत्। तथा परमिति। सत्याभिमतमपि पीतादि। अनेन विच्छिन्नस्पष्टप्रतिभासमात्रेण द्वयोरपि साम्यं योजयति॥ २०७५॥ § 6770

न स्मरामि मया कोऽपीत्यत्राह—अलक्षितेत्यादि। § 6771

अलक्षितविशेषा च बाह्यरूपे च सा स्मृतिः।
सर्वतो भिन्नरूपे तु न साऽभ्यासाद्यसम्भवात्॥
२०७६॥§ 6773

अनेन ग्राहकस्मरणे ग्राह्यास्मरणस्यासिद्धिमाह। स्यादेतत्—यदि ग्राह्ये सा स्मृतिः किमित्यलक्षितविशेषा भवति। यावता यथैव तद्ग्राह्यं सर्वतः सजातीयविजातीयाद्भिन्नं तथैव तत्स्मरेत्। एवं हि तद्विषयता तस्याः स्यात्, अन्यथा कथमगृह्णती तद्भेदं तद्विषया भवेत्, अतिप्रसङ्गादित्याह—सर्वत इत्यादि। एतदुक्तं भवति। न तावद्विकल्पस्य यथाऽवस्थितवस्तुग्रहणसामर्थ्यं, तस्यावस्तुविषयत्वात्। केवलं तथाभूतपदार्थानुभवबलाद्यत्रैवार्थित्वादयो निश्चयहेतवः सन्ति तत्र तदाकाराध्यवसायी स्मार्त्तः प्रत्ययो निर्विषय एव। परमार्थतः स्वप्रतिभासेऽनर्थेऽर्थाध्यवसायेन प्रवृत्तेर्भ्रान्त एव सर्वो जायते। तस्य त्वध्यवसायवशेन विषयव्यवस्था, न परमार्थतः। नच
580/k ग्राह्याध्यवसायः स्मृतेरपि विद्यते, केवलं तथाविधाभ्यासपाटवादेरप्रत्यासत्तितारतम्यादिकारणाभावादलक्षितविशेषा भवति, येन स्मरणान्तराद्विशिष्यते॥ २०७६॥ § 6774

स्यादेतत्कथमवसीयते ग्राह्याध्यवसायोऽत्रास्ति स्मृतेरित्याह—गृहीत इत्यादि। § 6775

गृहीत इति कोऽप्येवं नान्यथा स्मरणं भवेत्।
शुद्धस्फटिकसंकाशं वेद्यते स्मरणं नच॥
२०७७॥§ 6777

कम्बुपीतादिविज्ञानैर्हेतोः पश्चिमयोरपि।
अनैकान्तिकता व्यक्तं दिगेषाऽन्यत्र साधने॥
२०७८॥§ 6779

यदि ह्यनुपलक्षितविशेषं ग्राह्यमपि सा स्मृतिर्नाध्यवस्येत्, तदा कोऽपि गृहीत इत्येवमपि सामान्याकारेण ग्राह्यप्रत्यवमर्शने न प्रवर्त्तेत। नचापि केवलो ग्राह्याकारानङ्कितमूर्त्तितया ग्राहकः शुद्धस्फटिकसंकाशः स्मर्यते। येनोच्यते— स्मरन्तिग्राहकोत्पादं ग्राह्यरूपविवर्जितम् इति। तस्मात्तत्स्मरणे तदस्मरणमसिद्धम्॥ यौ चज्ज्ञानोत्पत्तेर्ज्ञानत्वादितीमौ पश्चिमौ हेतू तयोः पीतशङ्खादिज्ञानं ज्ञानोत्पन्नमपि सत्स्वांशं पीताद्याकारं गृह्णाति, यथा च ज्ञानमपि सत् ज्ञानांशस्य पीतादेर्ग्राह्यस्य बोधकं भवति, तथाऽन्यदपीति व्यभिचारिता हेत्वोः। साधितं च पीतशङ्खादिज्ञानस्य निरालम्ब-

नत्वम्, अतएवात्मगतस्य पीताद्याकारस्य वेदनात्स्वसंवेदनं सिद्धमित्येतदपि प्रतिपादितम्। एषा दिगिति। अन्यत्रापि—बहिरर्थसाधने परोपन्यस्ते, एषा—दूषणदिक्। यदुक्तं परेण—कथमद्वयं साध्यत्वेनेष्टम्, किं भासमानस्य नीलाद्याकारस्य ज्ञानरूपस्य च अनुभवसिद्धस्याभावात्कथमिदं नाम योज्यते तथासति सर्वाभावप्रसङ्गः स्यात्। अत्र वक्तव्यम्। न सर्वाभावो यस्मात्स्वव्यतिरिक्तस्य ग्राह्यस्य पृथिव्यादेः स्वलक्षणतोऽसत्वात्। सन्तानान्तरस्य तु ग्राह्यरूपेणाभावात् ग्राह्याकारशून्यं तदपेक्ष्य प्रकल्पितं तु यद्विज्ञानस्य कर्तृत्वं विजानातीति विज्ञानमिति कृत्वा तस्याभावाद्ग्राहककाकारशून्यं, न तु विज्ञानस्वलक्षणस्यापि, सर्वस्य सर्वेणाभावात्।तथाचोक्तम्—नीलपीतादि यज्ज्ञाने बहिर्वदवभासते। तत्र सत्यमतो नास्ति विज्ञेयं तत्त्वतो बहिः॥ तदपेक्षा च संवित्तेर्मता या कर्तृरूपता। सा न सत्यमतः संविदद्वयेति विभाव्यत इति। एवं च कृत्वा, अयमपि प्रज्ञापारमितापाठः सुनीतो भवति— विज्ञानं विज्ञानस्वभावेन शून्यं लक्षणशून्यतामुपादायेति॥ २०७७॥ ॥ २०७८॥
§ 6780

एवं—यद्यत् ज्ञानमित्यादौ मौले प्रयोगे हेतोः साध्येन व्याप्तिं प्रसाध्योपसंहरति—विवादास्पदमित्यादि। § 6781

581/k

विवादास्पदमारूढं विज्ञानत्वादतो मनः।
अद्वयं वेद्यकर्तृत्ववियोगात्प्रतिबिम्बवत्॥
२०७९॥§ 6783

विवादास्पदविशेषणेनैतदाह—स्वस्थनेत्रादिविज्ञानमत्र विशेषः साध्यधर्मी, न सर्वः, सामान्यं तु विज्ञानत्वादिति हेतुः, तेन न प्रतिज्ञार्थैकदेशता हेतोरिति। वेद्यकर्तृत्ववियोगादित्यद्वयत्वविशेषणम्। वेद्यकर्तृत्वद्वयविरहेणाद्वयमिष्टम्, न तु सर्वथाऽभावादित्यर्थः। प्रतिबिम्बवदिति। विषयिणि विषयोपचारात्प्रतिबिम्बज्ञानं प्रतिबिम्बशब्देनोक्तम्। यद्वा—सप्तम्यन्ताद्वतिः कर्तव्यः—तेन ज्ञानमेव सामर्थ्यादाधेयतया लभ्यते। न चासिद्धो हेतुर्भेदान्तरप्रतिक्षेपेण स्वभावस्यैव तथा निर्देशान्न ज्ञातृत्वस्य। नापि विरुद्धः सपक्षे भावात्॥ २०७९॥ § 6784

ननु चेत्यादिनाऽपरो दृष्टान्तस्य साध्यविकलतामुद्भावयति। § 6785

ननु च प्रतिबिम्बेऽपि ज्ञानं सालम्बनं मतम्।

११ द्वयेति] Correction: ; द्वयेऽपि (sic!)द्वयेति

१ यद्यत् ज्ञा] Correction: ; यद्यज्ञा (sic!)यद्यत् ज्ञा

चक्षूरश्मिनिवृत्तौ हि स्वमुखादेस्तथेक्षणात्॥
२०८० ॥§ 6787

यस्मान्नायना रश्मयो दर्पणादितलप्रतिहता निवर्त्तमानाः स्वमुखादिना सम्बध्यन्ते ततस्ते तथा मुखादिप्रतीतिहेतवो भवन्ति। अतः स्वमुखादेरेव तथा दर्पणाद्यन्तर्गतादिरूपेणेक्षणं भवति। ततश्च न प्रतिबिम्बज्ञानं ग्राह्यग्राहकद्वयरहितं सिद्धम्॥ २०८०॥ § 6788

नाभिमुख्येनेत्यादिना प्रतिविधत्ते। § 6789

नाभिमुख्येन तद्दृष्टेः स्वमुखादेस्तथेक्षणम्।
प्रमाणदेशभेदादिदृष्टेश्चान्यपदार्थवत्॥ २०८१ ॥§ 6791

न स्वमुखादेस्तथेक्षणमाभिमुख्येन तस्य स्वसुखादेर्दर्शनात्। तद्देशप्रमाणवर्णादिभेदेन दृष्टेश्च न स्वमुखादेस्तथेक्षणमिति सम्बन्धः। अन्यपदार्थवदिति। शब्दादिपदार्थवत्। एतदुक्तं भवति—(यदि) मुखादिग्राहकं तज्ज्ञानं स्यात्तदा यथैव तन्मुखादि व्यवस्थितं तथैव गृह्णीयात्, नह्यन्याकारस्य ज्ञानस्यान्यद्ग्राह्यं युक्तमतिप्रसङ्गात्। यावता दक्षिणाभिमुखस्थितो दर्पणतलं निभालयन्नुत्तराभिमुखं स्वमुखं पश्यति। तथाऽल्पीयसि दर्पणतले महतोऽपि स्वमुखस्याल्पप्रतिबिम्बकमुपलभ्यते तथादर्पणतलसम्बद्धं दूराधःप्रविष्टमिवेक्ष्यते। नच तावद्बहलं तथाऽऽदर्शतलं नापि मुखादि तत्सम्बद्धम्। तथा विमलसलिले सरसि तटान्तस्थितशाखिशिखरिणां प्रतिबिम्बान्यधोगतशाखादिशिखरशेखराण्युपलभ्यन्ते, नच ते तथास्थिताः। तस्मात्प्रतिबिम्बज्ञानं न स्वमुखादिग्राहकं तद्विलक्षणप्रतिभासित्वात् शब्दज्ञानवत्॥ २०८१॥ § 6792
582/k

भदन्तशुभगुप्तस्त्वाह— धीमात्रत्वेन संसाध्ये यज्ज्ञानत्वादिसाधनम्। विजातीयाविरुद्धत्वात्सर्वं शेषवदुच्यते॥ इति, तं प्रत्याह—विज्ञानत्वमित्यादि।
§ 6793

विज्ञानत्वं प्रकाशत्वं तच्च ग्राह्ये निरास्पदम्।
अनिर्भासाद्ययोगेन व्याप्तिस्तेनास्य निश्चिता॥
२०८२ ॥§ 6795

शक्तावनन्तरे ज्ञाने ग्राह्यांशे विषयस्थितिः।

१३ बिम्बज्ञानं न स्व] Correction : ; बिम्बज्ञानं स्व (sic !)बिम्बज्ञानं न स्व

तात्विकी नेष्यतेऽस्माभिस्तेन मानं समर्थ्यते॥
२०८३॥§ 6797

विज्ञप्तिमात्रतासिद्धिर्धीमद्भिर्विमलीकृता।
अस्माभिस्तद्दिशा यातं परमार्थविनिश्चये॥ २०८४॥
इति बहिरर्थपरीक्षा।§ 6800

पूर्वमेव हि—अनिर्भासं सनिर्भासमित्यादिना व्याप्तेः प्रसाधितत्वात् नानैकान्तिको हेतुः। आचार्यदिग्नागपादैरालम्बनप्रत्ययव्यवस्थार्थमुक्तम्— यदन्तर्ज्ञेयरूपं तु बहिर्वदवभासते। सोऽर्थो (वि) ज्ञानरूपत्वात्तत्प्रत्ययतयाऽपि च॥ इति। अनेन हि ग्राह्यांशे विषयव्यवस्था प्रतिपादिता। पुनरप्युक्तम्— अथवा शक्त्यर्पणात्क्रमेणापि सोऽर्थावभासः स्वानुरूपकार्योत्पत्तये शक्तिं विज्ञानाधारां करोतीत्यविरोध इति। अनेनानन्तरज्ञाने स्वानुरूपकार्योत्पत्तिनिमित्तशक्तिसमर्पणात्कारणत्वं च तस्य प्रतिभासस्य समर्थितम्॥ अत्र तेनैव भदन्तेन दूषणमुक्तम्—यद्यपीन्द्रियविज्ञप्तेर्ग्राह्यांशः करणं भवेत्। अतदाभतया तस्या नाक्षवद्विषयः स तु॥ इत्यादिना। अत्राह—शक्तावित्यादि। शक्तावनन्तरे ज्ञान इति व्यधिकरणसप्तम्यौ। अनन्तरे ज्ञान इति। समनन्तरप्रत्यये आलयाख्ये, या शक्तिस्तथाविधार्थप्रतिभासप्रत्ययसमर्थिता। तात्विकी नेष्यत इति। यतः परमाण्वादेर्व्यतिरिक्तस्यालम्बनत्वं न युज्यत इति विस्तरेण (प्रतिपादितम्) प्रतिपाद्या(दितं चा ?)चार्येण— माभूत्सर्वथाऽऽलम्बनप्रतिषेधे प्रतितिबाधा, तथा—आलम्बनाधिपतिसमनन्तरहेतुप्रत्ययत्व(स्व ?)लक्षणाश्चतस्रः प्रत्ययिता इति सूत्रे वचनादभ्युपेतबाधापीति, अविरोधप्रतिपादनाय यथाविध आलम्बनप्रत्ययोऽभिप्रेतः सूत्रे लोके च तथा प्रतिपादितं संवृत्त्या। न परमार्थतः। परमार्थतस्तु निरालम्बनाः सर्व एव प्रत्यया इति॥ २०८२॥ ॥ २०८३॥ २०८४॥ § 6801

इति बहिरर्थपरीक्षा।

583/k

९--१० विज्ञानाधारां] Correction : ; विज्ञानाचारां (sic !)विज्ञानाधारां

Part III

तत्त्वसंग्रहस्य द्वितीयो भागः।

०.२५ श्रुतिपरीक्षा।

स्वतन्त्रश्रुतिनिःसङ्ग इत्येतत्समर्थनार्थमाह—अन्य इत्यादि। § 6803

अन्ये पुनरिहाज्ञानमलीमसधियो जगुः।
चित्तमात्रतया नायं युज्यते श्रुतिबाधनात्॥
२०८५॥§ 6805

अन्य इति। जैमिनीयाः। त एवमाहुः—चोदनैव धर्माधर्मादिव्यवस्थानिबन्धनमालोकभूता सर्वप्राणभृतां साधारणं चक्षुरिव व्यवस्थिता। अवश्यं सैव धर्मार्थिभिः पुरुषैः प्रेक्षावद्भिः प्रमाणत्वेनाश्रयणीया नान्यत्पुरुषप्रणीतवचनादिकम्। तथाहि—पुरुषस्य रागादिभिरविद्यया च परीतचेतसो वचनं नालमतीन्द्रियमर्थमविपरीतमवगमयितुम्। अतस्तद्वचनसमधिगम्यो न धर्मादिः। नाप्यर्वाग्दर्शिनः प्रत्यक्षसमधिगम्यः, तस्यातीनिद्रियत्वेनात्यन्तपरोक्षत्वात्। तथाहि—इष्टानिष्टार्थसाधनयोग्यतालक्षणौ धर्माधर्मौ। यथोक्तं शाबरे भाष्ये— य एव श्रेयस्करः स एव धर्मशब्देनोच्यते। कथमवगम्यते ?। यो यागमनुतिष्ठति तं जना धार्मिक इति समाचक्षते। यश्च यस्य कर्त्ता स तेनाख्यायते, यथा पाचको लावक इति। तेन यःपुरुषं निःश्रेयसेन संयुनक्ति स एव धर्मशब्देनोच्यत इति। तदनेन द्रव्यादीनामिष्टार्थसाधनयोग्यता धर्म इति प्रतिपादितं भवति। तथाहि—यागशब्देन द्रव्यगुणकर्माणि श्रेयसः साधनानि विशिष्टान्युच्यन्ते। तत्र च धर्मशब्दप्रवृत्तिर्दर्शिता। यद्यपि तानि द्रव्यादीनि प्रत्यक्षाणि स्वरूपतो, नच श्रेयःसाधनत्वेन, ताद्रूप्येण च तेषां धर्मत्वमिष्यते न स्वरूपमात्रेण। यथोक्तम्— श्रेयो हि पुरुषप्रीतिः सा द्रव्यगुणकर्मभिः। चोदनालक्षणैः साध्या तस्मादेष्वेव धर्मता॥ एषामैन्द्रियकत्वेऽपि न ताद्रूप्येण धर्मता। श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयते॥ ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः॥ इति। ताद्रूप्येण चेति। श्रेयःसाधनरूपेण। तस्माद्योग्यता धर्म इति स्थितम्। धर्मवैपरीत्येनाधर्मोऽपि सामर्थ्यादनिष्टार्थसाधनयोग्यतेति स्पष्टमवसीयते। नच योग्यतामर्वाग्दर्शनः प्रत्यक्षीकर्तुमीशः। तस्याः सदैव कार्यानुमेयत्वात्। यदाह—शक्तयः सर्वभावानां कार्यार्थापत्तिसाधना इति। अन्यथा ह्यर्वाग्दर्शनत्वमेव हीयते। नापि योगिप्रत्यक्षमतीन्द्रियविषयं प्रत्यक्षत्वादितरप्रत्यक्षवत्। नाप्यनुमानं धर्माधर्माधिगमाय युक्तम्, प्रतीतसम्बन्धस्यैव वस्तुनस्तेन परिच्छेदात्। धर्मस्य चातथाभतत्वात्। नाप्युपमानं समर्थं धर्मप्रत्यायने, तथा ह्युपमानं सादृश्य मसन्निकृष्टे बुद्धिमुत्पादयति। 584/k
यथा गवयदर्शनं गोस्मरणस्य, नच धर्मेण सदृशः कश्चित्प्रतीतः सम्भवति। यत्सादृश्यात्तस्यावकल्पना भवेत्। नाप्यर्थापत्तिः क्षमा धर्माधर्मावबोधने। तथाहि—दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यत इत्यदृष्टार्थकल्पनाऽर्थापत्तिः। नच धर्मेण विना कश्चिदर्थो नोपपद्यते, यतोऽस्य कल्पना भविष्यति।

अभावोऽपि प्रमाणाभावो नास्तीत्यस्यार्थस्य प्रसिद्धये प्रभवति, न विधौ। तस्मादभाववत्कस्थौ धर्माधर्मौ यदि चोदना न शक्नुयादुद्धर्त्तुं तेनैव ग्रस्तौ स्यातामिति चोदनालक्षणोऽर्थो धर्मादिर्नेन्द्रियादिलक्षणः। चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं शक्तोऽभ्यवगमयितुं नान्यत्किंचनेन्द्रियम्। अतोऽवश्यं चोदना प्रमाणयितव्या। चोदनेति च क्रियायाः प्रवर्त्तकं निवर्त्तकं च वाक्यमाहुः। तथा—स्वर्गकामोऽग्निष्टोमेन यजेतेति प्रवर्त्तकम्, न हिंस्याद्भूतानीति निवर्त्तकम्। तस्याश्च प्रामाण्योपायं भवतां विज्ञप्तिमात्रं त्रैधातुकमिति प्रतिज्ञार्थः। स न युज्यते। कुतः ?। श्रुतिबाधनात्। श्रुत्या वेदेन बाधनात्। चित्तव्यतिरिक्ताग्निहोत्रादिप्रकाशनात्। स्वयं च चित्तव्यतिरेकेणावस्थानात्। चित्तमात्रतयेत्युपलक्षणम्। तथा क्षणिकत्वनैरात्म्यसर्वज्ञवैराग्यादिप्रतिज्ञाऽपि बाध्यत एव। तद्विरुद्धार्थपरिदीपनेनावस्थानात्॥ २०८५॥ § 6806

स्यादेतत्—बाध्येत सर्वमेतत्, यदि तस्यां प्रामाण्यं सिद्धं भवतीत्याह—सा हिप्रमाणमिति। § 6807

सा हि प्रमाणं सर्वेषां नराकृततया स्थिता।
वैतथ्यं प्रतिपद्यन्ते पौरुषेय्यो गिरो यतः॥
२०८६॥ § 6809

अवितथं ज्ञानं प्रमाणं तद्धेतुत्वात्सापि प्रमाणमुच्यते। कथमित्याह—नराकृततयेति। अपौरुषेयत्वात्। अनेनावितथज्ञानहेतुत्वं वैतथ्यकारणरागादिदोषगणाभावेन प्रतिपादयति। प्रयोगः—यन्मिथ्यात्वहेतुदोषसंसर्गरहितं तदवितथज्ञानकारणं, यथा तिमिरादिदोषानुपप्लुतं चक्षुः, मिथ्यात्वहेतुरागादिदोषसंसर्गरहितश्चापौरुषेयत्वाद्वेद इति स्वभावहेतुः। वैधर्म्यदृष्टान्तेनानैकान्तिकतां परिहरन्नाह—वैतथ्यमिति। अनेन हि साधनाभावेन साध्याभावस्य व्याप्तिमादर्शयति। तथाहि—दोषा मिथ्यात्वहेतवः यत्रैव सन्निदधति तत्रैव स्वकार्यमिथ्यात्वमुपस्थापयन्ति, नान्यत्र। कारणमन्तरेण कार्यस्यासम्भवात्। सम्भवे वाऽहेतुकत्वप्रसङ्गात्। नापि तमन्तरेण भवतस्तत्कार्य-
585/k त्वं युक्तमतिप्रसङ्गादित्यतो मिथ्यात्वदोषयोः कार्यकारणभावानुपपत्तिरहेतुकत्वप्रसङ्गश्च मिथ्यात्वस्येति विपर्यये बाधकं प्रमाणमिति नानैकान्तिकता। प्रयोगः —यत्र हि यत्कारणं नास्ति तत्तत्र न भवति, यथा(प)यस्यविद्यमानकारणो धूमः। नास्ति च वैतथ्यहेतुमोहादिदोषगणः श्रुताविति कारणानुपलब्धिः॥ २०८६॥ § 6810

नाप्यसिद्धतेति प्रतिपादयन्नाह दोषाः सन्तीत्यादि। § 6811

दोषाः सन्ति न सन्तीति पुंवाच्येषु हि शङ्क्यते।
श्रुतौ कर्तुरभावान्न दोषाशङ्कैव नास्ति नः॥
२०८७॥§ 6813

दोषा हि पुरुषाश्रितास्तद्धर्मत्वात्, तत्कथं ते स्वाश्रयमन्तरेण भवेयुः, संभवे वाऽनाश्रितत्वप्रसङ्गात्। एष ह्याश्रितधर्मो यदाश्रयानुविधायित्वम्। दोषाश्रयश्च पुरुषः कर्त्ता, स च निवृत्तो वेद इति कुतो दोषाशङ्का। ये नष्टाः (एतेन नष्टा ?) संदिग्धासिद्धतापि॥ २०८७॥ § 6814

स्यादेतत्—दोषाश्रयस्य कर्तुरभावोऽपि कथं सिद्ध इत्यतस्तदभावस्तद्ग्राहकप्रमाणपञ्चकनिवृत्त्या प्रतिपादयति—कर्त्ता तावदित्यादि। § 6815

कर्त्ता तावददृष्टः स कदाऽऽप्यासीदितीष्यते।
अदृष्टपूर्वसम्बन्धः संप्रत्यज्ञानहेतुकः॥ २०८८॥§ 6817

अनुमानविहीनोऽपि सोऽस्तीति परिकल्प्यते।
आगमोऽपि न तत्सिद्धौ इतरोऽकृतकोऽस्ति न॥
२०८९॥§ 6819

स्वयमेवाप्रमाणत्वात्कृतकोऽस्य न बोधकः।
मन्वादिवचनस्यापि तत्कृतैव हि सत्यता॥
२०९०॥§ 6821

असम्बद्धस्तु विद्विष्टः सत्यवादी कथं भवेत्।
अतोऽन्यकर्तृकोऽप्यस्ति वेदकारागमो न नः॥
२०९१॥§ 6823

वेदकारसदृक्कश्चिद्यदि दृश्येत सम्प्रति।
ततस्तेनोपमानेन कर्तुरप्युपमा भवेत्॥
२०९२॥§ 6825

६ इतरोऽकृत] Correction: ;
कृतकाकृत (sic!)इतरोऽकृत

वेदकारादृते किंचिन्न सिध्येत्प्रमितं यदि।
अर्थापत्त्या प्रतीयेत वेदकारस्ततो ध्रुवम्॥
२०९३॥§ 6827

ननु तेन विना किंचिद्वेदे यन्नोपपद्यते।
अस्मिन्सति हि बह्वेव प्रामाण्यादि न सिध्यति॥
२०९४॥§ 6829

स पञ्चभिरगम्यत्वादभावेनैव गम्यते।
तेन दुर्लभभावोऽसौ प्रमाणाभावबाधनात्॥
२०९५॥§ 6831

586/k

न तावत्प्रत्यक्षतः कर्त्ता वेदस्य सिद्धः—तथाहि—अयमसाविति न शक्यते शृङ्गग्राहिकया प्रतिपादयितुमिदानीमनुपलभ्यमानत्वात्। आसीत्कर्त्तेत्येवं तु कल्पनीयं, स चादृष्टः सन् कदाप्यासीदितीष्यते, यत्तदप्रमाणकमिति शेषः। नाप्यनुमानतः सिद्ध इत्याह—अदृष्टपूर्वेत्यादि। अदृष्टपूर्वेण कर्त्रा सम्बन्धो जन्यजनकभावलक्षणो यः क्रियते संप्रति वेदस्य वेदनिन्दकैः सोऽज्ञानहेतुकः, ज्ञापकप्रमाणाभावात्। न ह्यदृष्टेन वह्निना सह कश्चिद्धूमस्य सम्बन्धं ग्रहीतुं प्रभुः। तस्मादनुमानविहीनोऽपि स कर्त्ता कल्प्यते। अपिशब्दान्न केवलं प्रत्यक्षविहीनः। शाब्दप्रमाणनिवृत्तिमाह—आगमोऽपीत्यादि। वेदस्य व्यतिरेकेणाकृतकस्याभावान्न तावदकृतकः। नापि कृतकस्तस्य स्वयमेवाप्रमाणत्वात्। तथाहि—कृतको भवन्नागमो वेदसम्बद्धमनुप्रभृतिपुरुषकर्तृको भवेत्। तदसम्बद्धसाध्यमुनिप्रभृतिप्रणीतो वा, प्रथमपक्षमधिकृत्याह—मन्वादिवचनस्येत्यादि। तत्कृतैवेति। वेदकृतैव। अनेन स्वतः प्रामाण्याभावमाह। द्वितीये पक्षे दोषमाह—असम्बद्धस्त्विति। असम्बद्धो वेदेन, तत्रानधिकृतत्वात्। अन्यकर्तृक इति। असम्बद्धपुरुषकर्तृकः। वेदकारागमो—वेदकारप्रतिपादकः। उपमानाभावमाह—वेदकारसदृगित्यादि। अर्थापत्तेरभावमाह—वेदकारादृत इति। प्रमितमिति। प्रमितिप्रमाणषट्कपरिच्छिन्नं। तेन विनेति। कर्त्रा।किंचिदिति। प्रमितम्। अस्मिन्निति। कर्त्तरि। प्रामाण्यादीत्यादिशब्देन धर्मादिव्यवस्था। अभावेनैवेति। अभावेन प्रमाणेन नास्तीत्येवं गम्यते। तस्य प्रतिषेधविषयत्वात्। अथवा अभावेन रूपेण नास्तीत्येवं गम्यत इति यावत्। प्रमाणाभावात्।प्रमाणाभावबाधनादिति। प्र-

माणानामभावो निवृत्तिः। अभावप्रमाणमिति यावत्। तेन बाधनात्। नास्ति वेदस्य कर्त्तेति सिद्धम्॥ २०८८॥ २०८९॥ २०९०॥॥ २०९१॥ २०९२॥ २०९३॥ २०९४॥ २०९५॥ § 6832

स्यादेतत्—यदि वेदस्यापौरुषेयत्वमेवं प्रसाध्य प्रामाण्यं प्रसाध्यते, हन्त तर्हि परतः प्रामाण्यं प्रयुक्तं वेदस्य, तथाहि न तावद्वेदस्य प्रामाण्यं प्रतीयते यावदपौरुषेयता न साध्यत इत्याशङ्क्याह—अप्रामाण्येत्यादि। § 6833

अप्रामाण्यनिवृत्त्यर्था वेदस्यापौरुषेयता।
येष्टा साऽपि त्ववस्तुत्वात्साधनीया न साधनैः॥
२०९६॥ § 6835

अनेनैतदाह—न ह्यस्माभिरसिद्धं प्रामाण्यं विधिरूपेण प्रसाध्यते। किं
तर्हि ?। परेण यदप्रामाण्यमासक्तं तन्निवृत्तिः क्रियते। अपवादे च निर- 587/k
स्ते स्वयमेवोत्सर्गोऽनपोदितः सिद्धोऽवतिष्ठते। नाप्यपौरुषेयत्वं प्रसाध्यते,
यतस्तत्साधनद्वारेण सामर्थ्यात्परतः प्रामाण्यप्रसङ्गः स्यात्। किं तर्हि ?।
तस्यापौरुषेयतानिवृत्तिमात्रलक्षणत्वेनावस्तुत्वात्॥ २०९६॥ § 6836

यदि न साध्यते कथं तर्हि स्वयं सिध्यतीत्याह—यन्नामेत्यादि। § 6837

यन्नाम तार्किको ब्रूयात्पौरुषेयत्वसाधनम्।
तन्निराकरणात्सिद्धा वेदस्यापौरुषेयता॥
२०९७॥ § 6839

ननु निराकृतेऽपि परपक्षे स्वपक्षमसाधयतः प्रमाणेन कथं तत्सिद्धिर्येन कृतार्था वेदवादिनो भवन्तीत्याह—वस्तुभूतावित्यादि। § 6840

वस्तुभूतौ हि यौ पक्षौ प्रधानपरमाणुवत्।
तयोरन्यतरासिद्धा नेतरः सिद्ध्यति स्वयम्॥
२०९८॥ § 6842

प्रधानपरमाणुदित्येतद्व्याचष्टे—प्रधानकारणत्वस्येत्यादि। § 6843

प्रधानकारणत्वस्य निराकृत्यापि साधनम्।
साध्यं हेत्वन्तरेणैव परमाणुकृतं जगत्॥
२०९९॥ § 6845

वैशेषिकेण यद्यपि साङ्ख्योपन्यस्तप्रधानकारणजगत्साधनं निराकृतम्, तथाऽपि हेत्वन्तरेणैव परमाणुकृतं जगत्साधनीयम्, इहाऽप्येवं भविष्यतीति॥ २०९९॥ § 6846

अत्राह—भावपक्षेत्यादि। § 6847

भावपक्षप्रसिद्ध्यर्थमुच्यते यत्तु साधनम्।
तस्मिन्निराकृते सम्यगभावः सिद्ध्यति स्वयम्॥
२१०० ॥§ 6849

यत्पूर्वापरयोः कोट्योः परैः साधनमुच्यते।
तन्निराकरणं कृत्वा कृतार्था वेदवादिनः॥
२१०१ ॥§ 6851

भावपक्षः पौरुषेयता, तन्निवृत्तिरभावपक्षः। अन्योन्यपरिहारस्थितलक्षणयोश्चैकप्रतिषेधस्यापरविधिनान्तरीयकत्वादित्यभावः स्वयं सिद्ध्यतीति भावः। तथाहि —वेदस्य पूर्वापरयोः कोट्योरुत्पादविनाशलक्षणयोः सिद्धये यद्बौद्धैः साधनमुच्यते तन्निराकरणमात्रेणैव वेदापौरुषेयत्वस्य कोटिद्वयशून्यतालक्षणस्य सिद्धाविष्टसिद्ध्याकृतार्था वेदवादिनः॥ २१००॥ २१०१॥ § 6852

ननु निराकृतेऽपि तत्साधने वेदस्य नित्यत्वं विधिरूपं यत्नान्तरेण साध-
588/k नीयम्, तत्कथमसाधयन्तो वेदस्य नित्यत्वं कृतार्था भवेयुर्वेदविद इत्याह—नित्यत्वं वस्तुरूपमित्यादि। § 6853

नित्यत्वं वस्तुरूपं यत्तदसाधयतामपि।
स्वयं भवति तत्सिद्धिः पूर्वपक्षद्वये हते॥
२१०२ ॥§ 6855

पूर्वपक्षद्वयम्—पूर्वापरयोः कोट्योः साधनम्॥ २१०२॥ § 6856

यथा पूर्वपक्षद्वये हते नित्यत्वस्य स्वयं सिद्धिर्भवति तद्दर्शयति—पूर्वा वेदस्येत्यादि। § 6857

पूर्वा वेदस्य या कोटिः पौरुषेयत्वलक्षणा।
परा विनाशरूपा च तदभावो हि नित्यता॥
२१०३ ॥§ 6859

पूर्वापरकोटिद्वयपरिहारस्थितलक्षणत्वान्नित्यत्वस्य, परस्परपरिहारस्थितलक्षणयोश्चैकनिराकरणस्यापरसद्भावनान्तरीयकत्वादित्युक्तम्॥ २१०३॥ § 6860

यद्येवं, यदि तदभावो नित्यता, न तर्हि वस्तुधर्मो नित्यता प्राप्नोतीत्याह—यन्नादौ क्रियत इति। § 6861

यन्नादौ क्रियते वेदः पश्चान्नैव विनश्यति।
तदेव तस्य नित्यत्वं ज्ञेयं तदपि चेन्मतम्॥
२१०४॥§ 6863

अकृतत्वाविनाशाभ्यां नित्यत्वं हि विवक्षितम्।
तौ चाभावात्मकत्वेन नापेक्षेते स्वसाधनम्॥
२१०५॥§ 6865

अनेन वस्तुभूतस्य वेदस्यात्मगत एवासौ धर्म इति प्रतिपादयति। यद्येवं वस्तुभूतत्वात्साध्यं तर्हि नित्यत्वं प्राप्तमिति परवचनावकाशमाशङ्कते—ज्ञेयमित्यादि। ज्ञेयम्—प्रमाणेन ज्ञातव्यम्, साध्यमिति यावत्। तौ चेति। अकृतत्वाविनाशौ। स्वरूपस्य साधनं स्वसाधनम्। अभावस्यापि वस्तुत्वाविरोधात्सत्यप्यकृताविनाशित्वलक्षणत्वे नित्यत्वस्य नावस्तुत्वमिति भावः॥ २१०४॥ २१०५॥ § 6866

एवं तावत्प्रमाणपञ्चकनिवृत्त्या वेदे कर्तुरभावसिद्धा यन्मिथ्यात्वहेतुदोषसंसर्गरहितमित्यस्य हेतोर्नासिद्धिः, नापि विरुद्धता सपक्षे भावात्, विपक्षे चाभावान्नाप्यनैकान्तिकत्वमिति सिद्धं वेदस्य प्रामाण्यम्॥ साम्प्रतं परप्रयुक्तस्य वेदाप्रामाण्यसाधनद्वयस्य विस्तरेण दूषणमारभते। तत्रेदं साधनद्वयं यदैन्द्रियकं प्रयत्नानन्तरीयकं च, तदनित्यं, यथा घटः, तथा च शब्दः, इति स्वभावहेतुसामान्येन शब्दस्यानित्यत्वे सिद्धे वेदस्याप्यनित्यत्वसिद्धा सामर्थ्यादस्याः पुरुषवाक्यवन्मिथ्यात्वं सेत्स्य तीति परस्य बौद्धादेरभिप्रायः। अत्र 589/k
शाब्दादिप्रमाणैः प्रतिज्ञाबाधां विस्तरेण प्रतिपादयति। तत्र शाब्दप्रमाणबाधां तावदाह—वेदवाक्यार्थमित्यादि। § 6867

वेदवाक्यार्थमिथ्यात्वं यो वदत्यनुमानतः।
तस्य वैदिकविज्ञानबलात्पक्षो निवर्त्तते॥
२१०६॥§ 6869

वेदादागतं वैदिकम्—अग्निहोत्रात्स्वर्गो भवतीत्यादि। तद्बलात्पक्षो निवर्त्तते, तेन बाध्यमानत्वात्। यथोक्तम्— न चास्य चोदना स्याद्वा नवेति

संशयितं प्रत्ययमुत्पादयति, नच मिथ्यैतदिति कालान्तरे पुरुषान्तरे देशान्तरेऽवस्थान्तरे वा पुनरव्यपदेश्यप्रत्ययो भवति। योऽप्यन्यप्रत्ययविपर्यासं दृष्ट्वाऽत्रापि विपर्ययः सिद्ध्यतीत्यानुमानिकः प्रत्यय उत्पद्यते, सोऽप्यनेन प्रत्यक्षेण विरुध्यमानो बाध्येतेति॥ २१०६॥ § 6870

ननु च तुल्यबलयोः कथमेकेनेतरस्य बाधा। अथ तुल्यबलत्वेऽपि बाधा, अनुमानेन तर्हि तस्य किं न बाधा स्यादित्याह—तच्च प्रत्यक्षतुल्यत्वादिति। § 6871

तच्च प्रत्यक्षतुल्यत्वाद्वैदिकं बलवत्तरम्।
न शक्यमनुमानेन कथंचिदपि बाधितुम्॥
२१०७॥§ 6873

अनुमानं कथं तर्हि तेन बाध्यत इत्याह—प्रत्यक्षेत्यादि। § 6874

प्रत्यक्षपक्षनिक्षिप्तं शास्त्रमेव यतः स्थितम्।
बलवत्तरमित्येतदनुमानस्य बाधकम्॥
२१०८॥§ 6876

यथोक्तम्— प्रत्यक्षस्तु वेदवचनप्रत्ययः, न चानुमानं प्रत्यक्षविरोधि प्रमाणं भवतीति॥ २१०८॥ § 6877

कथमनुमानादागमस्य बलीयस्त्वं येन प्रत्यक्षतुल्यत्वं तस्येत्याह—दृष्टान्तनिरपेक्षत्वादिति। § 6878

दृष्टान्तनिरपेक्षत्वाद्दोषाभावाच्च लाघवम्।
आगमस्य प्रमाणत्वे नानुमानस्य तादृशम्॥
२१०९॥§ 6880

तेनागमानुमानाभ्यां यत्रार्थे संशयो भवेत्।
तत्रागमबलीयस्त्वात्कार्यस्तेनैव निर्णयः॥
२११०॥§ 6882

प्रमाणत्व इति। लाघवापेक्षा विषयसप्तमी। नानुमानस्य तादृशमिति। तस्य दृष्टान्तापेक्षत्वाद्दोषसद्भावाच्च। दोषस्तु प्रत्यक्षतुल्येन वैदिकेन ज्ञानेन बाध्यमानत्वात् ॥ २१०९॥ २११०॥ § 6883

590/k

ननु च यदेवोभयसिद्धं तदेव दूषणं भवति, नच बौद्धस्यागमः प्रमाणम्, द्वे एव प्रमाणे इत्यवधारणात्, तत्कथमसिद्धेनागमप्रामाण्येन बाधा क्रियते बौद्धं प्रतीत्याशङ्क्याह—ममाप्रमाणमित्यादि। § 6884

ममाप्रमाणमित्येवं वेदोऽर्थं बोधयन्नपि।
वक्तुं न द्वेषमात्रेण शक्यते सत्यवादिना॥
२१११॥§ 6886

द्वेषादसम्मतत्वाद्वा नच स्यादप्रमाणता।
नच प्रीत्यभ्यनुज्ञाभ्यां प्रमाणमवकल्प्यते॥
२११२॥§ 6888

द्विषन्तोऽपि च वेदस्य नैवाप्रामाण्यकारणम्।
किंचिज्जल्पन्ति ये नैते भवेयुः सत्यवादिनः॥
२११३॥§ 6890

धारणाध्ययनव्याख्याकर्मनित्याभियोगिभिः।
मिथ्यात्वहेतुरज्ञातो दूरस्थैर्ज्ञायते कथम्॥
२११४॥§ 6892

अभियुक्ता हि ये यत्र तन्निबद्धप्रयोजनाः।
तत्रत्यगुणदोषाणां ज्ञाने तेऽधिकृता यतः॥
२११५॥§ 6894

ये तु ब्रह्मद्विषं पापा वेदाद्दूरं बहिष्कृताः।

---

२ ते सत्य] Correction : ; तेऽसत्य (sic !)ते सत्य

ते वेदगुणदोषोक्तीः कथं जल्पन्त्यलज्जिताः॥
२११६॥§ 6896

एवं मन्यते—नहीच्छामात्रेण वस्तुनः सिद्ध्यसिद्धी भवतः, येनाभ्युपगममात्रेण न सिद्धमागमप्रामाण्यं भवेत्, किं तर्हि ?, प्रमाणबलेन यत्सिद्धं तद्द्वयोरपि सिद्धम्, दृढतरश्चाग्निहोत्रादिवाक्यात्प्रत्यय इति प्रतिपादितम्, तत्कथमप्रमाणमिति शक्यं वक्तुम्। केवलं वाङ्मात्रमेतद्भवताम्, निर्युक्तिकमिति सङ्क्षेपार्थः। असम्मतत्वादिति।लोकस्याभ्यनुज्ञा—लोकसम्मतत्वम्। दूरस्था इति। शाक्यादयो वेदात्। तद्धारणादिकर्मबहिष्कृतत्वात्। तन्निबद्धप्रयोजना इति। तत्र—वेदे, निबद्धम्—उक्तम्,प्रयोजनम्—पुरुषार्थो यागादिलक्षणो येषां ते। ब्रह्मद्विष इति। वेदद्विषः। तदुद्भूतं वा ज्ञानं ब्रह्म॥ २१११॥ २११२॥ २११३॥ २११४॥ २११५॥ २११६॥ § 6897

अथवा—माभूदागमतो बाधा, तथाऽपि दुष्ट एव प्रतिज्ञार्थः, प्रत्यक्षादिभिर्मानैर्बाध्यमानत्वादिति प्रतिपादयन्नाह—किंचेत्यादि। § 6898

किंच शब्दस्य नित्यत्वं श्रोत्रजप्रत्यभिज्ञया।
विभुत्वं च स्थितं तस्य कोऽध्यवस्येद्विपर्ययम्॥
२११७॥§ 6900

591/k

अनेन प्रत्यक्षतो बाधामाह। तथाहि—सर्वकालं स एवायमिति प्रत्यक्षाभिज्ञायमानत्वान्नित्यत्वं प्रत्यभिज्ञाख्यात्प्रत्यक्षसिद्धम्। सर्वत्र देशे प्रत्यभिज्ञानाद्विभुत्वं च सिद्धमिति को विपर्ययं नित्यविभुत्वयोरध्यवस्येत्, नैव कश्चित्। नित्यत्वव्यापित्वविपर्ययोऽनित्यत्वमविभुत्वं च॥ २११७॥ § 6901

तस्मादित्युपसंहरति— § 6902

तस्माद्वा सर्वकालेषु सर्वदेशेषु चैकता।
प्रत्यक्षप्रत्यभिज्ञानप्रसिद्धा साऽस्य बाधिका॥
२११८॥§ 6904

सर्वकालेष्विति। अतीतानागतवर्त्तमानेषु। अस्येति। विपर्ययस्य॥ २११८॥ § 6905

ज्वालादेरित्यादिना प्रत्यभिज्ञाया व्यभिचारमाशङ्कते। § 6906

ज्वालादेः क्षणिकत्वेऽपि प्रत्यभिज्ञेति चेन्न तत्।

तत्र हि प्रत्यभिज्ञेयं सामान्यं नित्यमेव नः॥
२११९॥§ 6908

भेदबुद्धिस्तु यत्रांशे स्यात्केनचिदुपाधिना।
न तत्र प्रत्यभिज्ञानं भेदबुद्ध्याऽवधारितम्॥
२१२०॥§ 6910

आदिशब्देन लूनपुनर्जातानां केशनखतृणादीनां निर्झरादीनां ग्रहणम्, यतस्तत्रापि प्रत्यभिज्ञाऽस्ति, त एवामी केशास्तान्येव तृणानि सैव निर्झरधारा तदेव सरितो जलमिति। नैतदस्ति। तत्र हि सामान्यं तेजस्त्वादि प्रत्यभिज्ञायते। तच्च नित्यमिष्टमेवेति कुतो व्यभिचारः। यदपि व्यक्तिरूपमनित्यं तत्तु नैव प्रत्यभिज्ञायत इति कुतो व्यभिचारः। यत्रांश इति। मन्दतरतमादौ। केनचिदुपाधिनेति। मन्दत्वोर्द्धगमनादिना। कथमवगतमित्याह—भेदबुद्ध्याऽवधारितमिति। भिन्नबुद्धेरेतदवगतमित्यर्थः॥ २११९॥ २१२०॥ § 6911

अनुमानैर्बाधामाह—देशकालादीत्यादि। § 6912

देशकालादिभिन्नाश्च गोशब्दव्यक्तिबुद्धयः।
समानविषयाः सर्वा नवा नानार्थगोचराः॥
२१२१॥§ 6914

गौरित्युत्पद्यमानत्वात्सम्प्रत्युत्पन्नबुद्धिवत्।
गोशब्दबुद्ध्या ह्यस्तन्या गोशब्दोऽयं प्रकाशितः॥
२१२२॥§ 6916

गोशब्दविषयत्वेन यथैवाद्य प्रसूतया।
इयं वा तं विजानाति तद्धेतोः पूर्वबुद्धिवत्॥
२१२३॥§ 6918

592/k

उभे वाऽप्येकविषये भवेतामेकबुद्धिवत्।

देशकालादिभिन्ना वा समस्ता गोत्वबुद्धयः॥
२१२४॥§ 6920

एकगोशब्दजन्याः स्युर्गोधीत्वादेकबुद्धिवत्।
ह्यस्तनोच्चारणो वाऽपि गोशब्दोऽद्यापि विद्यते॥
२१२५॥§ 6922

गोशब्दज्ञानगम्यत्वादद्योच्चारितशब्दवत्।
गौरिति श्रूयमाणोऽद्य ह्योऽपि शब्दो मया श्रुतः॥
२१२६॥§ 6924

हेतोः पूर्वोदितादेव ह्य उच्चारितशब्दवत्।
शब्दो वा वाचको यावान्स्थिरोऽसौ दीर्घकालभाक्
२१२७॥§ 6926

सम्बन्धानुभवापेक्षज्ञेयज्ञानप्रवर्त्तनात्।
य ईदृक्स स्थिरो दृष्टो धूमसामान्यभागवत्॥
२१२८॥§ 6928

अस्थिरस्तु न सम्बन्धज्ञानापेक्षोऽवबोधकः।
तादात्विकनिमित्तत्वाद्दीपविद्युत्प्रकाशवत्॥
२१२९॥§ 6930

शब्दानित्यत्वपक्षोऽतः सर्वैरेभिर्विरुध्यते।
अनुमानैर्दृढैः सिद्धैर्नित्याः शब्दास्ततः स्थिताः॥
२१३०॥§ 6932

गोशब्दव्यक्तिषु या बुद्धयो देशकालद्रुतमध्यविलम्बितादिप्रतिभेदभासभिन्नास्ता एकार्थविषयाः, नानार्थविषया नवा भवन्ति, गौरित्याकारोपग्र-

हणोत्पद्यमानत्वात्।सम्प्रत्युत्पन्नगोबुद्धिवत्। अथवा—या या गोशब्दविषया बुद्धिः साऽद्यतनगोशब्दविषया, गोशब्दविषयत्वात्। अद्य प्रसूतगोशब्दबुद्धिवत्। गोशब्दविषया चह्यस्तनी गोशब्दबुद्धिरिति स्वभावहेतुः। अथवा—अह्यस्तनी गोशब्दबुद्धिर्धर्मिणी,ह्यस्तनगोशब्दविषयत्वं साध्यधर्मः, गोशब्दविषयत्वादिति हेतुः, ह्यस्तनी गोशब्दबुद्धिर्दृष्टान्तः। एतदेवाह—इयमित्यादि। इयमित्यद्यतनी। तमिति। ह्यस्तनगोशब्दज्ञानोपलब्धं गोशब्दम्। तद्धेतोरिति। गोशब्दविषयत्वात्। अथवा—उभे ह्यस्तन्यद्यतन्यौ बुद्धी एकविषये गोशब्दविषयत्वादेकगोशब्दबुद्धिवत्। उभे चेत्येतदेव दर्शयति। हेतुः प्रकृतत्वात्सुज्ञात इति नोक्तः। अथवा—समस्ता गोत्वबुद्धयो देशा दिभेदभिन्ना एकगोशब्दजन्या गोधीत्वादेकगोबुद्धिवत्। पूर्वं गोशब्दविषया बुद्धयो धर्मिण्यः, एकविषयत्वं च साध्यम्, इदानीं च गोत्वजातिविषया बुद्धयो धर्मिण्यः, एकगोशब्दजन्यत्वं साध्यमिति विशेषः। ह्यस्तनमुच्चारणमस्येति ह्यस्तनोच्चारणः। अयं 593/k च धर्मिनिर्देशः। अद्यापि वर्त्तनं साध्यधर्मः शेषं सुबोधम्। गौरिति श्रूयमाणोऽद्येति धर्मिनिर्देशः। तस्य ह्योऽपि श्रवणं साध्यधर्मः। पूर्वोदितादिति। गोशब्दज्ञानगम्यत्वात्। अथवा—यावान्वाचकशब्द इत्ययं धर्मिनिर्देशः। तस्य दीर्घकालभाक्त्वं साध्यधर्मः। सम्बन्धानुभवापेक्षज्ञेयज्ञानप्रवर्त्तनादिति हेतुः। सम्बन्धानुभवमपेक्षत इति सम्बन्धानुभवापेक्षं तच्च तत् ज्ञेयज्ञानप्रवर्त्तनं चेति तथोक्तम्।तस्मात्स्थिरो ज्ञेयः स्थिरस्यैव विशेषणं दीर्घकालभागिति। कालस्थैर्येण स्थिरत्वमत्राभिप्रेतं नतु देशस्थैर्येण पर्वतादेरिवेति विशेषणेन दर्शयति। धूमसामान्यभागवदिति दृष्टान्तः। स्वलक्षणस्यानन्वयान्न लिङ्गत्वमिति सामान्यभाग एव दृष्टान्तः।अस्थिरस्त्वित्यादि व्यतिरेककथनम्। तादात्विकनिमित्तत्वादिति। तादात्विकम् —तावत्कालिकं व्यवहारकालानुयायि निमित्तं सम्बन्धो यस्य स तथोक्तः तद्भावस्तत्त्वम्॥ २१२१॥ २१२२॥ २१२३॥ २१२४॥ २१२५॥ २१२६॥ ॥ २१२७॥ २१२८॥ २१२९॥ २१३०॥

§ 6933

ननु चानया दिशा घटादीनामप्येकत्वं शक्यते वक्तुम्। तथाहि—सर्वा देशकालादिभिन्ना घटादिव्यक्तिबुद्धयः समानविषया नवा नानार्थगोचराः। घट इत्युत्पद्यमानत्वात्सम्प्रत्युत्पन्नघटबुद्धिवदित्येवमादि। नचैकत्वं घटादीनामिष्टं दृष्टं वा। तस्मादेते सर्व एव हेतवो व्यभिचारिण इत्याशङ्क्याह—घटादेरित्यादि। § 6934

घटादेरेकतापत्तौ जात्येष्टं सिद्धसाधनम्।
व्यक्तीनामेकतापत्तिं कुर्याच्चेदनया दिशा॥
२१३१॥§ 6936

तथा दृष्टविरुद्धत्वं वाच्यं सर्वप्रमाणकम्।
यतोऽध्यक्षादिभिर्मानैर्व्यक्तिभेदः सुनिश्चितः॥
२१३२॥§ 6938

यदि जात्या—जातिरूपेण, घटादीनामेकत्वं साध्यते प्रसङ्गेन तदा सिद्ध-साधनम्। तदुक्तम्— अंशो ह्येतस्य जात्याख्यो नित्यो ध्वंसीतरो मत इति। अथ— व्यक्तिरूपाणामेकत्वं प्रसङ्गेन साध्यते, तदापि न व्यभिचारः। प्रत्यक्षादिभिर्बाधितत्वादस्याः प्रतिज्ञायाः। यस्मादबाधितविषयत्वेन सतीति सर्वे हेतवः सविशेषणा इहाभिप्रेताः। तत्कुतो व्यभिचार इत्यभिप्रायः। दृष्टविरुद्धत्वमिति। प्रतिज्ञाया इति शेषः। शेषं सुगमम्॥ २१३१॥ २१३२॥ § 6939

पुनरपि शब्दानित्यत्वप्रतिज्ञाया अनुमानार्थापत्तिभ्यां बाधामाह—त-
594/k त्रेदमनुमा नम्—ययोरकृत्रिमः सम्बन्धस्तावकृत्रिमौ, यथाऽऽकाशपरमाणू, अकृत्रिमश्च सम्बन्धः शब्दस्य जातिसंज्ञकेनार्थेन वाच्यवाचकभावलक्षण इति स्वभावहेतुः। असिद्धिं परिहरन्नाह—कृत्रिमत्वे चेत्यादि। § 6940

कृत्रिमत्वे च सम्बन्धस्तत्प्रयोगापवर्जनात्।
तदेकव्यक्तिनिष्ठत्वान्नैव सार्वत्रिको भवेत्॥
२१३३॥§ 6942

पार्थिवद्रव्यसत्त्वादिलाङ्गूलत्वादिसङ्करात्।
विना प्रयोगभूयस्त्वं न स्याद्गोत्वावधारणा॥
२१३४॥§ 6944

तस्मादकृत्रिमः शब्दो न कदाचिद्विनश्यति।
नित्येन नित्यसम्बन्धादाकाशपरमाणुवत्॥
२१३५॥§ 6946

कृत्रिमत्वे च सम्बन्धस्येत्यपेक्षणीयम्। यदि सम्बन्धः कृत्रिमो भवेत्तदा तत्प्रयोगापवर्जनात—शब्दप्रयोगविनाशात्, शब्दस्यापि विनाश इति सार्वत्रिकः—सर्वप्रयोगानुयायी, न स्यात्। कुतः ?, तदेकव्यक्तिनिष्ठत्वात्—एकगोव्यक्तिनिष्ठत्वात्। तत्रार्थापत्तिः—येयं संमुखेऽनेकस्मिन्नेकस्यामपि गोव्यक्तौ सामान्यस्थिते सति गोशब्दान्निष्कृष्टस्य गोत्वस्यैव प्रतिपत्तिः, सा शब्दम-

१ सर्व] Correction : ; शब्द (sic !)सर्व (sic !)अंशो
४ अंशो] Correction : ; अंशा

न्तरेणानुपपन्ना। कथमित्याह—पार्थिवेत्यादि। शाब्दप्रमाणपूर्वकेयमर्थापत्तिः। तस्मादकृत्रिमः शब्द इत्यनुमानमुपसंहरति। नित्येनेति। जातिसंज्ञाकेनार्थेन। नित्यं सर्वकालं सम्बन्धात्। यथा परमाणूनां नित्येनाकाशेनेति॥ २१३३॥ २१३४॥ २१३५॥ § 6947

अर्थापत्तेरनैकान्तिकत्वं परिहरन्नाह—संमुखानेकसामान्येत्यादि। § 6948

संमुखानेकसामान्यविषयश्च सकृच्छ्रुतः।
निष्कृष्टं स्वार्थवाचित्वं गोशब्दो न प्रपद्यते॥
२१३६॥§ 6950

बहुभिः श्रवणैरेष प्राणित्वादीनि वर्जयन्।
शुक्लादिगमनादीनि सास्नालाङ्गूलतादि च॥
२१३७॥§ 6952

शावलेयादिखण्डादिव्यक्तीः स्वस्वनिबन्धनाः।
निष्कृष्टगोत्ववाचित्वं चिरेण प्रतिपद्यते॥
२१३८॥§ 6954

यथोक्तं भाष्ये— नित्ये तु खलु वै शब्दे बहुकृत्व उच्चारितः श्रुतपूर्वस्त्वन्यान्यासु गोष्वन्वयव्यतिरेकाभ्यामाकृतिवचनत्वमवगमयति तस्मादपि नित्य इति।व्यक्तीः स्वस्वनिबन्धना इति। यथास्वं भेदभिन्ना इत्यर्थः। भिन्नत्वं हि तासां भेद प्रतिपत्तिनिबन्धनम्। तेन स्वं भिन्नत्वं भेदप्रतिपत्तिनिबन्धनं यासां 595/k
ताः स्वनिबन्धनाः। वर्जयन्निति सम्बन्धः॥ २१३६॥ २१३७॥ २१३८॥ § 6955

स्यादेतत्—यदि नाम चिरेण प्रतिपद्यते, तथापि कथं सर्वकालभावित्वं सिध्यति शब्दस्येत्याह—तावत्कालमित्यादि। § 6956

तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति।
सम्भाव्यतेऽस्य नाशित्वं न भूयोऽन्येन हेतुना॥
२१३९॥§ 6958

यथा शस्त्रादिभिश्छेदाज्जरया वा घटादयः।
नङ्क्ष्यन्तीत्यवगम्यन्ते नैवं शब्देऽस्ति कारणम्॥
२१४०॥§ 6960

तावत्कालम्—निष्कृष्टस्वार्थप्रतिपादनकालम्। ननु यथा घटादीनां तावत्कालं स्थिराणामपि मुद्गरादिभ्यः पश्चाद्विनाशस्तथा शब्दस्यापि भविष्यतीत्याह—सम्भाव्यतेऽस्येत्यादि। भूय इति। पुनः। यथा शस्त्रादिभिश्छेदाद्विनाशं प्रतिपद्यन्ते घटादयो जरया वा, नैवं शब्देऽस्ति कारणम्। कथम् ?, अमूर्त्तत्वात्, घटादीनां च मूर्त्तत्वादिति भावः॥ २१३९॥ २१४०॥ § 6961

यदुक्तम्— घटादेरेकतापत्तौ जात्येष्टं सिद्धसाधनम्। व्यक्तीनामेकतापत्तिं कुर्याच्चेदनया दिशा॥ तदा दृष्टविरुद्धत्वं वाच्यं सर्वप्रमाणकम्॥ इति तदिहापि समानम्—गादीनामेकतापत्तौ जात्येष्टं सिद्धसाधनमिति सर्वं वाच्यम्। तथाहि—देशकालप्रयोक्तृभेदाद्गवादिव्यक्तिवद्गादिवर्णव्यक्तयो बह्व्यः, तदाधारं च गोत्वादि, त(द्व)द्गत्वाद्यपि सामान्यमिष्टमिति सर्वं समानमित्याशङ्क्याह—देशकालप्रयोक्तृणामित्यादि। § 6962

देशकालप्रयोक्तृणां भेदेऽपि च न भेदवान्।
गादिवर्णो यतस्तत्र प्रत्यभिज्ञा परिस्फुटा॥
२१४१॥§ 6964

प्रत्यभिज्ञाख्यात्तु प्रत्यक्षाद्व्यक्तीनामेकत्वं सिद्धम्, नानुमानं प्रत्यक्षविरोधे प्रमाणीभवति, प्रत्यक्षस्य सर्वप्रमाणज्येष्ठत्वादित्यभिप्रायः॥ २१४१॥ § 6965

ननु द्रुतमध्यविलम्बितादिप्रतीतिभेदाद्भेदः सिद्ध एव व्यक्तीनाम्, तत्कथमुच्यते प्रत्यभिज्ञा परिस्फुटेत्याह—नहि द्रुतादिभेदेऽपीति। § 6966

न हि द्रुतादिभेदेऽपि निष्पन्ना सम्प्रतीयते।
गव्यक्त्यन्तरविच्छिन्ना गव्यक्तिरपरा स्फुटा॥
२१४२॥§ 6968

निष्पन्नेति। अकल्पिता। विच्छिन्नेति। भिन्ना। गव्यक्तिर्गकारव्यक्तिः। प्रत्यभिज्ञयैकीकृतत्वान्न गव्यक्तिरपराऽस्तीति भावः॥ २१४२॥ § 6969
596/k

ननु च गत्वादिजातिरेवात्र प्रत्यभिज्ञायते न व्यक्तिस्तत्कथं व्यक्तेः प्रत्यभिज्ञेत्याह—गकार इत्यादि। § 6970

गकारोऽत्यन्तनिष्कृष्टगत्वाधारो न विद्यते।
गान्यबुद्ध्यनिरूप्यत्वात्परकल्पितगत्ववत्॥
२१४३॥§ 6972

गान्यबुद्ध्यनिरूप्यत्वादिति। गकारादन्यो गान्यः, तस्मिन्बुद्धिस्तयाऽनिरूप्यत्वादग्राह्यत्वात्। परकल्पितगत्ववदिति। निःसामान्यानि सामान्यानीति परेषां सिद्धान्तात्॥ २१४३॥ § 6973

वर्णत्वाच्चापि साध्योऽयमिति। § 6974

वर्णत्वाच्चापि साध्योऽयं खकारादिवदेव च।
व्यतिरेकस्य चादृष्टेर्नात्र दृष्टं निवर्त्तकम्॥
२१४४॥§ 6976

गत्वनिषेध इति शेषः। तत्र प्रयोगः—यो गवर्णस्सोऽत्यन्तनिष्कृष्टगत्वाधारो न भवति, यथा खकारादिवर्णः, वर्णश्चायं गकार इति विरुद्धव्याप्तोपलब्धिः। गत्वाधारत्वविरुद्धेन किल वर्णत्वस्य व्याप्तत्वात्। न चात्र प्रतिज्ञाया दृष्टविरोधइत्याह—व्यतिरेकस्येत्यादि। व्यतिरेको—भेदः। दृष्टम—प्रत्यक्षम्॥ २१४४॥ § 6977

स्यादेतत्—बौद्धं प्रति सिद्धसाध्यता, तथाहि—एकत्वबुद्धिरन्यापोहनिबन्धनैवेष्टा नव्यतिरिक्तगत्वनिबन्धना, ततश्च प्रतिषिद्धेऽपि व्यतिरिक्ते गत्वे नैकत्वबुद्धिवशादेकत्वं वर्णस्य सिध्यति, अन्यापोहनिबन्धनत्वात्तस्येत्याशङ्क्याह—द्वयसिद्धस्त्विति। § 6978

द्वयसिद्धस्तु वर्णात्मा नित्यत्वादि यथैव च।
कल्पितस्येष्यते तद्वत्सिद्धस्यैवाभ्युपेयताम्॥
२१४५॥§ 6980

तेनैकत्वेन वर्णस्य बुद्धिरेकोपजायते।
विशेषबुद्धिसद्भावो भवेद्व्यञ्जकभेदतः॥ २१४६॥§ 6982

किमित्युभयसिद्धं वर्णात्मानं परित्यज्य कल्पितस्यैवान्यापोहस्य नित्यत्वानेकत्वव्यापित्वादयो वर्ण्यन्ते, जातिधर्मव्यवस्थितेरिति वचनात्। युक्तं यदेवोभयसिद्धं तस्यैव कल्पयितुम्, अन्यथा ह्यदृष्टकल्पनाप्रसङ्गः स्यात्। तस्मादेकत्वादेव वर्णस्यैकाप्रत्यभिज्ञाबुद्धिरुपजायते। यद्येवं द्रुतमध्यविलम्बितादिविशेषबुद्धिः कथं भवेदित्याह —विशेषबुद्धीत्यादि। व्यञ्जका वायवीयाः संयोगविभागाः॥ २१४५॥ २१४६॥ § 6983

ननु वायोरश्रोत्रविषयत्वात्तदीया अपि संयोगविभागा अश्रौत्रा एव। त-
597/k त्कथमगृहीते व्यञ्जके व्यङ्ग्यस्य ग्रहणं भवति नह्यालोकाग्रहणे तद्व्यङ्ग्यस्य घटादेर्ग्रहणं युक्तमिति मन्यमानश्चोदयति—नन्वित्यादि। § 6984

ननु यस्य द्वयं श्रौत्रं तस्य बुद्धिद्वयं भवेत्।
भवतोऽतीन्द्रियत्वात्तु कथं नादैर्विशेषधीः॥
२१४७॥§ 6986

यस्येति। यस्य—वैयाकरणादेर्घोषात्मको ध्वनिर्व्यञ्जको नतु वायवीयसंयोगविभागात्मकः, तस्य द्वयम्—व्यङ्ग्यं व्यञ्जकं च श्रोत्रग्राह्यमिति बुद्धिद्वयम्—एकबुद्धिर्विशेषबुद्धिश्च भवति। भवतस्तु मीमांसकस्य कथं नादैर्वायवीयसंयोगविभागात्मकैर्विशेषधीर्भवेत्, कुतः ?, अतीन्द्रियत्वात्। नादानामिति शेषः॥ २१४७॥ § 6987

नादेनेत्यादिना प्रतिविधत्ते। § 6988

नादेन संस्कृताच्छ्रोत्राद्यदा शब्दः प्रतीयते।
तदुपश्लेषतस्तस्य बोधं केचित्प्रचक्षते॥
२१४८॥§ 6990

तदुपश्लेषत इति। शब्दोपश्लेषतः। तस्य—नादस्य। बोधं—ग्रहणम्। केचित्प्रचक्षते—यद्यपि केवलस्य नादस्य श्रोत्रेणाग्रहणम्, तथापि शब्दोपश्लिष्टस्य तु ग्रहणमस्त्येवेति बुद्धिद्वयं भवेदेवेति तेषां भावः॥ २१४८॥ § 6991

नैव वेत्यनेनाग्रहणपक्षेऽपि बुद्धिद्वयं समर्थयते। § 6992

नैव वा ग्रहणे तेषां शब्दे बुद्धिस्तु तद्वशात्।
संस्कारानुकृतेश्चाऽपि महत्त्वाद्यवबुध्यते॥
२१४९॥§ 6994

तेषामिति। नादानां। वायवीयसंयोगविभागात्मनाम्। कथमगृहीतव्यञ्जके व्यङ्ग्ये बुद्धिर्भवेदित्याह—शब्दे बुद्धिस्तु तद्वशादिति। नादवशात्। तत्सत्तामात्रेणैवेति यावत्। भवतु नाम स्वरूपमात्रग्रहणं महत्त्वादिविशेषग्रहणं तु कथं भवतीत्याह—संस्कारानुकृतेरित्यादि। यदा महद्भिर्नादैर्महान्संस्कार आधीयते श्रोत्रे, तदा महत्त्वं प्रतीयते शब्दे। यदा त्वल्पैरल्पत्वमित्येवं संस्कारानुकारात्तरतमभेदोऽपि योज्यः॥ २१४९॥ § 6995

ननु च यदेतन्महत्त्वादि गृह्यते तद्व्यञ्जकस्थमेव भवन्मते न व्यङ्ग्यस्थम्, तच्च व्यञ्जकाग्रहणादगृहीतमेवेति तत्कथमगृहीत्वा व्यञ्जकस्थं महत्त्वादि शब्दे

समारोपयेत्। न ह्यविषयीकृतस्य जलादेर्मरीचिकादावारोपो भवेदित्याह—मधुरं तिक्तरूपेणेत्यादि। § 6996
598/k

मधुरं तिक्तरूपेण श्वेतं पीततया यथा।
गृह्णन्ति पित्तदोषेण विषयं भ्रान्तचेतसः॥
२१५० ॥§ 6998

यथा वेगेन धावन्तो नावारूढाश्च गच्छतः।
पर्वतादीन्प्रजानन्ति भ्रमेण भ्रमतश्च तान्॥
२१५१ ॥§ 7000

मण्डूकवसयाऽक्ताक्षा वंशानुरगबुद्धिभिः।
व्यक्त्यल्पत्वमहत्त्वाभ्यां सामान्यं च तदाश्रयम्॥
२१५२ ॥§ 7002

गृह्णन्ति यद्वदेतानि निमित्तग्रहणाद्विना।
व्यञ्जकस्थमबुद्धैवं व्यङ्ग्ये भ्रान्तिर्भविष्यति॥
२१५३ ॥§ 7004

यथा पित्तदोषेण मधुरादिकं विषयं तिक्तादिरूपेण गृह्णन्त्यगृहीत्वैव पित्तस्वरूपम्।यथावाऽऽशुगमननौयानभ्रमणैराहितविभ्रमाः पर्वतादीन्गच्छतो भ्रमतश्च पश्यन्ति। यथाच मण्डूकवसयाऽक्तचक्षुषो वंशानुरगरूपेण वीक्षन्ते। यथा च व्यक्तेरल्पत्वमहत्त्वाभ्यां सामान्यं तदाश्रयम्—अल्पत्वाद्याश्रयम्, प्रतिपद्यन्ते, सत्ताख्यं महासामान्यमल्पं तु गोत्वादीति। अन्यथा हि नित्यसर्वगतत्वेन सर्वस्य तुल्यत्वात्किंकृतं सामान्यस्याल्पत्वं महत्त्वं स्यात्। तस्माद्यद्वदेतानि मधुरादीनि तिक्तादिरूपेण गृह्णन्ति निमित्तस्य पित्तादेर्ग्रहणमन्तरेण, तथा व्यञ्जकस्थं महत्त्वादिकमगृहीत्वैव शब्दे महत्त्वादिभ्रान्तिर्भविष्यति। अबुद्धेति। भ्रान्तिक्रियापेक्षया समानकर्तृत्वम्, अन्यथा त्वाप्रत्ययो न स्यात्॥ २१५०॥ २१५१॥ २१५२॥ २१५३॥ § 7005

अथ कथमवगतं येयं ह्र(?)स्वमहत्त्वादिधीः शब्दे भवति सा परोपाधिका, नतु स्वत एव महत्त्वादिभेदसद्भावादित्याह—स्वतो ह्र(?)स्वादिभेद इत्यादि।
§ 7006

स्वतो ह्व(?)स्वादिभेदस्तु नित्यत्वादेर्विरुध्यते।
सर्वदा यस्य सद्भावः स कथं मात्रिकः स्वयम्॥
२१५४॥§ 7008

तस्मादुच्चारणं तस्य मात्राकालं प्रतीयताम्।
द्विमात्रं वा त्रिमात्रं वा न वर्णो मात्रिकः स्वयम्॥
२१५५॥§ 7010

आदिशब्देन दीर्घप्लुतोदात्तानुदात्तस्वरितषडाज्ञदिभेदपरिग्रहः। नित्यत्वादेर्विरुध्यत इति। प्रत्यभिज्ञया नित्यत्वस्य सिद्धत्वादिति भावः॥ २१५४॥ २१५५॥ § 7011

नन्वित्यादिना परमतेनाभिव्यक्तेरसिद्धिमाशङ्कते। § 7012

ननु नादैरभिव्यक्तिर्न शब्दस्योपपद्यते।
सा हि स्याच्छब्दसंस्कारादिन्द्रियस्योभयस्य वा॥
२१५६॥§ 7014

599/k

तत्र सर्वैः प्रतीयेत शब्दः संस्क्रियते यदि।
निर्भागस्य विभोर्न स्यादेकदेशे हि संस्क्रिया॥
२१५७॥§ 7016

साऽभिव्यक्तिः शब्दस्य भवन्ती वायवीयैः संयोगविभागैः शब्दसंस्काराद्वा भवेत्, इन्द्रियसंस्काराद्वा, उभयस्य वा—शब्दस्येन्द्रियस्य च संस्कारात्। तत्र यदि शब्दः संस्क्रियते तदा पाटलिपुत्रादावेकत्र देशे संस्कृतः सर्वदेशस्थैर्गृह्येत, युगपत्तस्य सर्वगतत्वात्। अथापि स्यादेकांशस्तस्य संस्कृतो नतु सर्व इत्याह—निर्भागस्येति। निरवयवो हि शब्दोऽमूर्त्तत्वात्, कथं विभुत्वेऽपि निरवयवस्यैकदेशेन संस्कारः स्यात् ॥ २१५६॥ २१५७॥ § 7017

अथापि स्यादाधारभेदान्निरवयवस्यापि सतो भेदेन संस्कारो भविष्यतीत्याह—नचापीति। § 7018

४ तत्र] Correction: ; ततः (sic!)तत्र

नचाप्याधारभेदेन संस्कारनियमो भवेत्।
यतः शब्दो निराधारो व्योमात्मादिवदेव च॥
२१५८॥§ 7020

विभुत्वादाकाशात्मादिवन्निराधारः शब्दः॥ २१५८॥ § 7021

नन्वाकाशगुणत्वाच्छब्दस्य गुणाश्च गुणिनमाश्रिता इत्याकाशमाधारोऽस्ति शब्दस्येत्याह—अथाप्याकाशमित्यादि। § 7022

अथाप्याकाशमाधारस्तत्रानवयवे सति।
न स्यात्प्रदेशसंस्कारः कृत्स्नशब्दगतेरपि॥
२१५९॥§ 7024

तस्याप्याकाशस्यानवयवत्वान्नाधारप्रदेशभेदेन संस्कारभेदोऽस्ति। ननु च यद्यप्याकाशमनवयवं तथाऽपि संयोगिभेदात् घटाकाशादिवत्कर्णशष्कुलीपर्यन्तपरिच्छिन्नमाकाशं भिन्नं भविष्यतीत्याह—कृत्स्नशब्दगतेरपीति। न स्यात्प्रदेशसंस्कार इति सम्बन्धः। अखण्ड एव हि शब्दः प्रतीयते सा च प्रतीतिर्व्योमैकदेशसंस्कृतौ न स्यात् ॥ २१५९॥ § 7025

कथमित्येतदेव निगमयन्नाह—नहीत्यादि। § 7026

नहि सामस्त्यरूपेण यावद्व्योम व्यवस्थितः।
शक्यते सकलो बोद्धुमेकदेशेन संस्कृतः॥
२१६०॥§ 7028

नह्याकाशं व्याप्य व्यवस्थितः शब्दस्तदेकदेशेन संस्कृतः शक्यते सकलो ज्ञातुम् ॥ २१६०॥ § 7029
600/k

इन्द्रियसंस्कारपक्षे दूषणमाह—आकाशश्रोत्रपक्ष इत्यादि। § 7030

आकाशश्रोत्रपक्षे च विभुत्वात्प्राप्तितुल्यता।
दूरभावेऽपि शब्दानामिह ज्ञानं प्रसज्यते॥
२१६१॥§ 7032

श्रोत्रस्य चैवमेकत्वं सर्वप्राणभृतां भवेत्।

तेनैकश्रुतिवेलायां शृणुयुः सर्व एव ते॥
२१६२॥§ 7034

येषां खं श्रोत्रमिति पक्षस्तेषामेकत्वाद्विभुत्वाच्च नभसः सर्वशब्दैस्तुल्या प्राप्तिरिति दूरस्थस्यापि शब्दस्य ग्रहणं प्राप्नोति। श्रोत्रस्य च सर्वप्राणभृतामेकत्वं स्यात्। ततश्चैको यदा शृणोति तदैव सर्वैरपि श्रूयेत, अभिन्नत्वाच्छ्रोत्रस्य। एकाश्रवणे सर्वेषामश्रवणदोषश्च वक्तव्यः॥ २१६१॥ २१६२॥ § 7035

स्यादेतत्—धर्माधर्माभिसंस्कृतया कर्णशष्कुल्या परिच्छिन्नमाकाशं श्रोत्रम्, अतः कर्णशष्कुलिमत्याकाशदेशे श्रोत्रव्यवस्थितेर्दोषद्वयमपीदमनास्पदं यद्विभुत्वात्प्राप्तितुल्यता श्रोत्रस्य चैकत्वं सर्वप्राणभृतां भवेदिति। अत्राह—तस्यानवयवत्वादिति। § 7036

तस्यानवयवत्वाच्च न धर्माधर्मसंस्कृतः।
नभोदेशो भवेच्छ्रोत्रं व्यवस्थाद्वयसिद्धये॥
२१६३॥§ 7038

नह्यनवयवस्य परमार्थतः एकदेशाः सन्ति। येन कश्चिदेव नभोदेशः श्रोत्रं भवेत्। व्यवस्थाद्वयम्—प्राप्तेरतुल्यत्वव्यवस्था, श्रोत्रानेकत्वव्यवस्था च। यद्वा—शब्दस्यग्रहणाग्रहणे व्यवस्थाद्वयम्॥ २१६३॥ § 7039

सकृच्च संस्कृतं श्रोत्रं सर्वशब्दान्प्रबोधयेत्।
घटायोन्मीलितं चक्षुः पटं नहि न बुध्यते॥
२१६४॥§ 7041

एतदेव प्रसक्तव्यं विषयस्यापि संस्मृतौ।
समानदेशवृत्तित्वात्संस्कारस्याविशेषतः॥
२१६५॥§ 7043

किंच—सकृत्—एकवारं संस्कृतं श्रोत्रं सर्वशब्दान्प्रबोधयेत्—ग्राहयेत्। तस्य सर्वशब्दसाधारणत्वात्। तेषां च शब्दानां विभुत्वेनाभिन्नयोग्यदेशत्वात्। स्यादेतत्प्रतिपत्त्यर्थमेव वक्त्रा श्रोतुः श्रोत्रमभिसंस्कृतं तमेव शब्दं तच्छ्रोत्रं ग्राहयेन्नान्यमित्याह—घटायेत्यादि। नहि न बुध्यते, अपि तु बुध्यत एव, तुल्यत्वाद्देशयोग्यताया इति भावः। सर्वशब्दग्रहणं कथमित्याह—समानदेशवृत्तित्वात्संस्कारस्याविशेषत इति। सर्वेऽपि हि शब्दा विभुत्वेन समानाकाशदेशवृत्तयः,
601/k ततश्चैषां संस्कारोऽ— प्यविशिष्ट एवेति सर्वग्रहणप्रसङ्गः। क्व-

चित्पाठः—संस्कारो ह्यविशेषतः इति, तत्र हिशब्दो हेतौ। अविशेषत इति। आद्यादित्वात्तृतीयान्तात्तसिः। ततश्चायमर्थो भवति—अविशेषेण यस्माच्छब्दानां संस्कारः कृतः, समानदेशवृत्तित्वात्, ततःसर्वशब्दग्रहः प्राप्नोतीति॥ २१६४॥ २१६५॥ § 7044

स्यादेतत्—यद्यप्यविशेषेण संस्कारः, तथापि य एव जिघृक्षितः श्रोत्रा शब्दः स एव गृह्यते नान्य इति, अत्राह—स्थिरवाय्वित्यादि। § 7045

स्थिरवाय्वंपनीत्या च संस्कारोऽस्य भवन् भवेत्।
दृष्टमावरणापाये तद्देशेऽस्यो(शस्थो ?)पलम्भनम्॥
२१६६॥§ 7047

द्विविधो हि वायुः स्थिरोऽस्थिरश्च, तत्र यः स्थिरः सद्यनाव(घनान्ध ?) कारवत् शब्दमावृत्यास्ते। तस्य च वक्तृप्रयत्नसमुत्थेन वायुना संयोगविभागा उत्पद्यन्ते। तैश्च संयोगविभागैस्तस्य स्थिरस्य वायोरपनयः क्रियते स एव च शब्दस्य संस्कारो नान्यः स्वलक्षणपुष्टादिः, तस्य नित्यत्वेनैकरूपत्वात्। ततः किमित्याह—दृष्टमित्यादि। दृष्टमिति। लोकशास्त्रयोः। यथा घटादेरन्धकारापगमे सति पुरोऽवस्थितस्यानभीष्टस्याप्युपलब्धिर्भवत्येव योग्यदेशावस्थानात्॥ २१६६॥ § 7048

यदुक्तम्— तत्र सर्वैः प्रतीयेत शब्दः संस्क्रियते यदि॥ इति, तत्र न दोषो यस्मादेकोऽपि शब्दः कंचित्पुरुषं प्रत्यसंस्कृतः कंचित्प्रति संस्कृतः। यथा एका स्त्री व्यपेक्षाभेदान्माता च दुहिता चेत्याह—संस्कृतासंस्कृतत्वे इति। § 7049

संस्कृतासंस्कृतत्वे न शब्दैकत्वेन सिध्यतः।
एकावस्थाभ्युपेतौ च सर्वैर्ज्ञायेत वा नवा॥
२१६७॥§ 7051

शब्दस्यैकत्वे सति संस्कृतासंस्कृतत्वे द्वे अवस्थे निष्पर्यायेण न प्राप्नुतः,अवस्थाया अवस्थातुरभेदात् अवस्थातृस्वरूपवदवस्थयोरप्येकत्वमेव प्राप्नोति। यत्पुनरेका स्त्री माता चोच्यते दुहिता चेति। तत्र शब्द एव केवलं भिन्नो न वस्तु। इह तु न व्यपदेशमात्रं भिन्नम्, शब्दस्य सर्वपुरुषग्रहणयोग्यत्वाविशेषेणावस्थानात्। ततश्च ग्रहणाग्रहणे न स्याताम्। नहि व्यपदेशान्यथात्वमात्रेणार्थक्रियानियतस्वभावहानिर्युक्ता। अथ प्रतिनियतपुरुषग्राह्य एव तस्य स्वभावस्तेन ग्रहणाग्रहणे पुरुषशक्तिभेदादविरुद्धे इति चेन्न। येन ह्येकदा न गृहीतः पुरुषेण, तेन न कदाचिदपि गृह्यते। न चैवम्। त-

३ वाय्वं] Correction: ; वायू (sic !)वाय्वं

स्मान्माभूदेकत्वहानिरिति। एकैवाऽवस्था संस्कृतासंस्कृतयोरन्यतराऽभ्युपगन्तव्या शब्दस्य, ततः किमित्याह—एकावस्थाभ्युपेतावित्यादि॥ २१६७॥
§ 7052

602/k

उभयसंस्कारपक्षे दोषमाह—प्रत्येकमित्यादि। § 7053

प्रत्येकाभिहिता दोषाः स्युर्द्वयोरपि संस्कृतौ।
अतो न व्यञ्जकः शब्दे कथञ्चिदपि युज्यते॥
२१६८॥§ 7055

प्रत्येकं शब्दस्येन्द्रियस्य च संस्कारे येऽभिहिता दोषास्ते द्वयोरपि संस्कारे भवेयुः। अत इत्युपसंहरति॥ २१६८॥ § 7056

उत्तरमित्यादिना प्रतिविधत्ते। § 7057

उत्तरं श्रोत्रसंस्काराद्भाष्यकारेण वर्णितम्।
तद्भेदाच्छ्रुतिभेदश्च प्रतिश्रोतृव्यवस्थितः॥
२१६९॥§ 7059

भाष्यकारेणेति। यथोक्तम्— यस्याप्यभिव्यञ्जन्ति तस्याप्येष न दोषो दूरे सत्याः कर्णशष्कुल्या अनुपकारकाः संयोगविभागास्तेन दूरे यच्छ्रोत्रं तेन नोपलभ्यन्त इति। तद्भेदादिति—कर्णशष्कुलीश्रोत्रभेदात्। श्रुतिभेदः—प्रतीतिभेदः ॥ २१६९॥ § 7060

ननु च कथमन्यस्य संस्कारेऽन्यस्याभिव्यक्तिर्भवतीत्याह—यथा घटादेरित्यादि। § 7061

यथा घटादेर्दीपादिरभिव्यञ्जक इष्यते।
चक्षुषोऽनुग्रहादेव ध्वनिः स्याच्छ्रोत्रसंस्कृतेः॥
२१७०॥§ 7063

यथा हि दीपादिश्चक्षुषोऽनुग्रहेण घटादेरभिव्यञ्जको भवति, तथा ध्वनिरपि श्रोत्रसंस्कृतेः—श्रोत्रसंस्करणात्, शब्दस्याभिव्यञ्जको भविष्यति॥ २१७०॥ § 7064

ननु च वक्तव्यमेतत्केन प्रकारेण ध्वनिना श्रोत्रस्य संस्कारः क्रियते निष्पन्नस्येत्यत आह—नच पर्यनुयोगोऽत्रेति। § 7065

नच पर्यनुयोगोऽत्र केनाकारेण संस्कृतिः।
उत्पत्तावपि तुल्यत्वाच्छक्तिस्तत्राप्यतीन्द्रिया॥
२१७१॥§ 7067

उत्पत्तावपि तुल्यत्वात्—पर्यनुयोगस्येति शेषः। उत्पत्तावपि हि शब्दस्य कारणेभ्यः सत्यां तुल्यः पर्यनुयोगस्तत्रापि शक्यत एवैतद्वक्तुम्—केनाकारेण ध्वनिनावायवीयसंयोगदविभागात्मकेनाऽन्येन वा कारणेन कथं शब्दः क्रियत इति। यतः शक्तिस्तत्राप्यतीन्द्रिया। तत्रापि—शब्दानामुत्पत्तौ क्रियमाणायां—शब्दकारणानां यथोत्पादकशक्तिरतीन्द्रिया तथाऽभिव्यक्तावपीति तुल्यः पर्यनुयोगः॥ २१७१॥ § 7068

यद्यतीन्द्रिया शक्तिः सा कथमनुमन्तव्येत्याह—नित्यमित्यादि। § 7069
603/k

नित्यं कार्यानुमेया च शक्तिः किमनुयुज्यते।
तद्भावभावितामात्रं प्रमाणं तत्र गम्यते॥
२१७२॥§ 7071

उत्पादकशक्तिर्वाऽभिसंस्कारकशक्तिर्वा भवतु, सर्वथा यावती काचिच्छक्तिः सा सर्वा सदैव कार्यानुमेया। तस्मात्सा नानुयोगमर्हति। किं तत्कार्यं यतः सा गम्यतइत्याह—तद्भावेत्यादि। तद्भावे—ध्वनिभावे सति, तद्भाविता—शब्दग्रहणस्य भाविता या, तदेव तत्र शब्दस्य(ञकश)क्तौ प्रमाणम्। शब्दग्रहणकार्येण शक्तिर्गम्यत इति यावत्। (मात्र)ग्रहणेनोत्पत्तेर्निरासः॥ २१७२॥ § 7072

अत इत्युपसंहरति। § 7073

अतोऽतीन्द्रिययैवैते शक्त्या शक्तिमतीन्द्रियाम्।
इन्द्रियस्यादधाना हि स्फुरन्ति व्यक्तिहेतवः॥
२१७३॥§ 7075

तस्मादेते ध्वनयोऽतीन्द्रियया शक्त्या श्रोत्रेन्द्रियस्य शक्तिमतीन्द्रियामुत्पादयन्तः स्फुरन्ति व्यक्तिहेतवः। शब्दानामित्यपेक्षणीयम्॥ २१७३॥ § 7076

अथोत्पत्तिहेतव एव कस्माद्ध्वनयो न विज्ञायन्त इत्याह—येषामित्यादि। § 7077

येषां त्वप्राप्तजातोऽयं शब्दः श्रोत्रेण गृह्यते।

तेषामप्राप्तितुल्यत्वाद्दूरव्यवहितादिषु॥ २१७४॥§ 7079

तत्र दूरसमीपस्थग्रहणाग्रहणे समे।
स्यातां नच क्रमो नापि तीव्रमन्दादिसम्भवः॥
२१७५॥§ 7081

येषां बौद्धानां शब्दोऽप्राप्तजातो गृह्यते श्रोत्रेण। अप्राप्तश्चासौ जातश्चेत्यप्राप्तजातः।चक्षुःश्रोत्रमनोऽप्राप्तविषयम्, उपात्तानुपात्तमहाभूतहेतुः शब्द इति सिद्धान्तात्। तेषां मतेन शब्दानां दूरव्यवहितसमीपस्थानां श्रोत्रेणाप्राप्तेस्तुल्यत्वाद्दूरसमीपस्थैः पुरुषैर्ग्रहणाग्रहणे तुल्ये स्याताम्, समीपस्थस्य यादृशं ग्रहणं तादृशं दूरस्थस्यापिस्यादविशेषात्। क्रमेण च ग्रहणं न स्यात्, यत्पूर्वं समीपस्थैर्ग्रहणं पश्चाद्दूरस्थैरिति। नापि तीव्रमन्दतरतमादिश्रुतिभेदः स्यात्, यत्समीपस्थैस्तीव्रः श्रूयते मन्दो दूरस्थैरिति। एवं तरतमभेदोऽपि योज्यः॥ २१७४॥ २१७५॥ § 7082

ननु यस्यापि मीमांसकस्य प्राप्ताजातः शब्दो गृह्यते श्रोत्रेण तस्यापि कस्मादेष सर्वप्रसङ्गो न भवतीत्यतः प्रतिपादयितुं विशेषमुपक्रमते—तस्मादित्यादि। § 7083

तस्माच्छ्रोत्रियदृष्टाऽपि कल्पनेयं निरीक्ष्यताम्।
प्रयत्नाभिहतो वायुः कोष्ठ्यो यातीत्यसंशयं (?)॥
२१७६॥§ 7085

604/k

स संयोगविभागौ च ताल्वादेरनुरुध्यते।
वेगवत्त्वाच्च सोऽवश्यं यावद्वेगं प्रतिष्ठते॥
२१७७॥§ 7087

तस्यात्मावयवानां च स्तिमितेन च वायुना।
संयोगा विप्रयोगाश्च जायन्ते गमनाद्ध्रुवम्॥
२१७८॥§ 7089

५ यातीत्यसंशयं] Correction : ;
जातीत्यसंशयः (sic !)यातीत्यसंशयं

कर्णव्योमनि संप्राप्तः शक्तिं श्रोत्रे नियच्छति।
तद्भावे शब्दबोधाच्च संस्कारोऽदृष्ट इष्यते॥
२१७९॥§ 7091

उत्पत्तिशक्तिवत्सोऽपीत्यधिकं नो न किञ्चन।
तथैव तद्विशेषोपि विशेषग्रहणाद्भवेत्॥
२१८०॥§ 7093

श्रोत्रियग्रहणमतार्किकत्वप्रतिपादनपरम्। अनेन च स्वपक्षोत्कर्षं वक्रोक्त्या कथयति। काऽसौ कल्पनेत्याह—प्रयत्नाभिहत इत्यादि। प्रयत्नस्ताल्वादिकरणव्यापारस्तेनाभिहतः प्रेरितः कोष्ठभवो वायुर्नाभिप्रदेशादुत्थित उरसि विस्तीर्णः कण्ठे वर्त्तितो मूर्द्धानमाहत्य वक्त्रे सञ्चरन्निर्गच्छति। एतदेव दर्शयति(° ° °)स इत्यादि। स वायुर्निष्क्रामंस्ताल्वादेः संयोगविभागावनुभवति। गच्छंश्च न स यावदाकाशमभिगच्छति। किं तर्हि ?। यावद्वेगम्—यावांस्तस्य वेगस्तदनुरूपमेव गच्छतीति यावत्। कुतः— वेगवत्त्वात्। तस्य च वायोर्गच्छत आत्मीयावयवानां स्तिमितेन स्थिरेण वायुना संयोगविभागाः समुपजायन्ते। अवश्यं सच कर्णरन्ध्रं प्राप्य श्रोत्रे शक्तिमाधत्ते।तद्भावे—वायवीयसंयोगविभागसद्भावे सति, शब्दस्यावगमाददृष्टः संस्कारः श्रोत्रस्येष्यते। यथा शब्दस्य शब्दान्तरैर्ध्वनिभिर्वोत्पत्तिर्द(त्तेरद?)ष्टाऽपीष्यते भवद्भि(श्चक्ति)स्तथा संस्कारोऽपीति। यथोक्तं भाष्ये—अभिघातेन प्रेरितावयवः स्तिमितानि वाय्वन्तराणि प्रबाधमानाः सर्वतोदिक्कान् संयोगविभागानुत्पादयन्तो यावद्वेगमभिप्रतिष्ठन्ते, ते च वायोरप्रत्यक्षत्वात्संयोगविभागा नोपलभ्यन्ते। अनुपरतेष्वेव च तेषु शब्द उपलभ्यते नोपरतेष्विति। यद्येवं न तर्हि संस्कारपक्षस्योत्पत्तिपक्षाद्विशेषः कथितोभवतीत्याह—तथैवेत्यादि। तद्विशेषः—संस्कारविशेषः, शब्दग्रहणविशेषादुपपद्यते। तेन दूरसमीपस्थानां ग्रहणाग्रहणे न समे भवतः, पुरुषभेदेन संस्कारस्य भिन्नत्वात्॥ २१७६॥ २१७७॥ २१७८॥ २१७९॥ २१८०॥ § 7094

कुड्याद्यावरणे कथमग्रहणं शब्दस्येत्याह—कुड्यादीत्यादि। § 7095

कुड्यादिप्रतिबन्धोऽपि युज्यते मातरिश्वनः।

१ शक्तिं] Correction : ; शाक्तिं (sic !)शक्तिं
१७ वाय्व] Correction : ; वस्त्व (sic !)वाय्व
१७ दिक्कान्] Correction : ; दिक्काः (sic !)दिक्कान्

श्रोत्रदेशाभिघातोऽपि तेन तीव्रप्रवृत्तिना॥
२१८१॥§ 7097

605/k

तस्य च क्रमवृत्तित्वात्क्षयिवेगित्वसम्पदः।
संस्कारक्रमतीव्रत्वमन्दतादिनिमित्तता॥
२१८२॥§ 7099

यद्यपि शब्दो न प्रतिघाती तथापि मातरिश्वनो वायोः कुड्यस्य च मूर्त्तत्वे प्रतिघातित्वान्न कर्णदेशागमनमिति श्रोत्रसंस्कारो न जायते,तेनावृतस्याश्रवणं भवति। येषां त्वप्राप्तस्य ग्रहणं तेषामेष दोष एव। तीव्रतरतमश्रुतिभेदस्तर्हि कथं भवतीत्याह —श्रोत्रदेशाभिघातोऽपीति। युज्यत इति प्रकृतं सर्वत्र योजनीयम्। क्षयिवेगित्वसम्पद इति। क्षयित्वसम्पदो वेगित्वसम्पदो युज्यन्त इति विभक्तिविपरिणामेन सम्बन्धः। अथवा—क्षयिण्यश्च ता वेगित्वसम्पदश्चेति विग्रहः। यद्वा—क्षयिणीवेगित्वसम्पद्यस्य वायोरिति बहुव्रीहिः। ततश्च संस्कारक्रमतीव्रमन्दतानिमित्तता युज्यत इति सम्बन्धः। संस्कारक्रमो युज्यते तस्य वायोः क्रमवृत्तित्वात्। तीव्रता च युज्यते वेगित्वसम्पदा युक्तत्वात्। मन्दताऽपि च क्षयित्वात्। आदिशब्देन तरतमादिभेदो योज्यः॥ २१८१॥ २१८२॥ § 7100

ननु चाकाशश्रोत्रपक्षे—विभुत्वात्प्राप्तितुल्यतेत्यादिना श्रोत्रसंस्कारे दोषा बहवः पूर्वमुक्तास्तत्कथमुत्तरं श्रोत्रसंस्काराद्भाष्यकारेण वर्णितमित्याह— नावश्यं श्रोत्रमाकाशमित्यादि। § 7101

नावश्यं श्रोत्रमाकाशमस्माभिश्चाभ्युपेयते।
नचानवयवं व्योम जैनसाङ्ख्यनिषेधतः॥
२१८३॥§ 7103

तेनाकाशैकदेशो वा यद्वा वस्त्वन्तरं भवेत्।
कार्यार्थापत्तिगम्यं तच्छ्रोत्रं प्रतिनरं स्थितम्॥
२१८४॥§ 7105

तेन तत्पक्षभाविनो दोषास्तदनङ्गीकारादेव नापतन्तीत्युक्तम्। नचानवयवं व्योमेति। अभ्युपेयत इति सम्बन्धः। कुतः ?। जैनसाङ्ख्यनिषेधतः—जैनैरार्हतैः साङ्ख्यैश्च निरवयवस्य व्योम्नो निषिद्धत्वात्। नहि मीमांस-

कैः परसिद्धान्तप्रसिद्धैर्नव्यवह्रि(?)यते। यदेव हि युक्त्या समापतति तदेव तैरङ्गीक्रियते, अन्यथा मीमांसकत्वमेव हीयेत। ततश्च जैनासाङ्ख्यप्रसिद्ध-व्योमात्मकश्रोत्राङ्गीकरणान्न दोषः। यद्वा वस्त्वन्तरमिति। कर्णशष्कुलीसंज्ञ-कम्। कार्यार्थापत्तिगम्यमिति। शब्दग्रहणान्यथानुपपत्तिगम्यम्॥ २१८३॥ २१८४॥ § 7106

अथवा—अनवयवाकाशश्रोत्रपक्षेऽपि न दोष इति प्रतिपादयन्नाह—यद्यपीत्यादि। § 7107

606/k

यद्यपि व्यापि चैकं च तथापि ध्वनिसंस्कृतिः।
अधिष्ठाने तु सा यस्य स शब्दं प्रतिपद्यते॥
२१८५॥ § 7109

यद्यपि व्यापि चैकं चेति। श्रोत्रमिति शेषः। तथापि सा ध्वनिभिः संस्कृतिर्यस्य पुरुषस्याधिष्ठाने—कर्णशष्कुल्यां भवति, स एव शब्दं प्रतिपद्यते नान्यः। अनेनाधिष्ठानसंस्कार एवोक्तो न श्रोत्रस्य। तस्य चाधिष्ठानस्य प्रतिपुरुषं भिन्नत्वान्नयथोक्तदोषप्रसङ्ग इति भावः॥ २१८५॥ § 7110

श्रोत्रसंस्कारेऽपि न दोष इति प्रतिपादयति—अथापीति। § 7111

अथापीन्द्रियसंस्कारः सोऽप्यधिष्ठानदेशतः।
शब्दं न श्रोष्यति श्रोत्रं तेनासंस्कृतशष्कुलि॥
२१८६॥ § 7113

अधिष्ठानम्—कर्णशष्कुली। तत्संस्कारद्वारेण श्रोत्रस्य संस्कारो न केवलस्य। तेनासंस्कृताधिष्ठानत्वाच्च विदूरस्थान्यचित्तसुप्तमूर्छितानां श्रोत्रं न शृणोति। असंस्कृता कर्णशष्कुली यस्य तत्तथोक्तम्। अधिष्ठानदेशत इति सप्तम्यर्थे तसिः॥ २१८६॥ § 7114

ननु यदि ध्वनयोऽधिष्ठानं तद्देशं वेन्द्रियं संस्कुर्वन्ति, कस्माद्यत्र क्वचनोपलब्धसद्भावाः सकलप्राणिजातेन्द्रियाधिष्ठानसंस्कारकारिणो न भवन्तीत्याह—अप्राप्तकर्णदेशत्वादित्यादि। § 7115

अप्राप्तकर्णदेशत्वाद्ध्वनेर्न श्रोत्रसंस्क्रिया।
अतोऽधिष्ठानभेदेन संस्कारनियमः स्थितः॥
२१८७॥ § 7117

यद्यप्यधिष्ठानसंस्कारकारिणो नादास्तद्देशेन्द्रियसंस्कारका वा। तथापि प्राप्ता एव सन्तः संस्कारभाजि पदार्थे संस्कारं कुर्वन्ति, नाप्राप्ता इत्यतो न सर्वपुरुषाधिष्ठानादिसंस्कारः। श्रोत्रग्रहणमुपलक्षणम्। अधिष्ठानसंस्कारोऽपि न भवत्येव। क्वचित्— अप्राप्तकर्णदेशाद्वेति पाठः। तत्र पूर्वमधिष्ठानसंस्कारमुखेन श्रोत्रसंस्कारमाश्रित्य परिहार उक्तः। साम्प्रतं माभूदधिष्ठानसंस्कारद्वारेण श्रोत्रसंस्कारस्तथाऽप्यदोषो यतः प्राप्तकर्णशष्कुलीमूला एव वायवः श्रोत्रसंस्कारायालम्, नाप्राप्ता इत्यतः पक्षान्तरमुक्तम्। अत इत्युपसंहारः॥ २१८७॥ § 7118

नन्वित्यादिना पक्षत्रयेऽप्यनन्तरोदिते परस्य चोद्यमाशङ्कते। § 7119

नन्वेकस्मिन्नधिष्ठाने लब्धसंस्कारमिन्द्रियम्।
बोधकं सर्वदेहेषु स्यादेकेन्द्रियवादिनः॥
२१८८॥ § 7121

607/k

एकस्य श्रोत्रस्य संस्कृतासंस्कृतपरस्परविरुद्धधर्मद्वयायोगादेकत्र संस्कारात्सर्वदेहेष्वभिन्नत्वात्संस्कृतमेवेति बधिरादेरपि बोधकं प्राप्नोति श्रोत्रमेकेन्द्रियवादिनः। ततश्च बाधिर्यादिव्यवस्थानं न स्यात्॥ २१८८॥ § 7122

पुंसामित्यादिना प्रतिविधत्ते। § 7123

पुंसां देहप्रदेशेषु विज्ञानोत्पत्तिरिष्यते।
तेन प्रधानवैदेश्याद्विगुणा श्रोत्रसंस्कृतिः॥
२१८९॥ § 7125

पुंसामात्मनां सर्वगतत्वेऽपि शरीरेष्वेव धर्माधर्मपरिगृहीतेषु विज्ञानोत्पत्तिर्मीमांसकादिभिरिष्यते। तेन प्रधानस्य देहस्य वैदेश्यात्—भिन्नदेशत्वात्। श्रोत्रस्यैवं सर्वगतस्यापि संस्कृतिर्विगुणा तेन यथोक्तदोषानवसरः। क्वचित्— सात्र संस्कृतिरिति पाठः। तत्र सा संस्कृतिः श्रोत्रस्येति सम्बन्धः॥ २१८९॥ § 7126

ननु च सर्वगतत्वादात्मनः सर्वत्र ग्रहणप्रसङ्गः शब्दस्यानिवारित एवेत्याह—निष्प्रदेशोऽपि चेति। § 7127

निष्प्रदेशोऽपि चात्मा नः कार्त्स्न्येन च विदन्नपि।
शरीर एव गृह्णातीत्येवमुक्तिर्न दुष्यति॥
२१९०॥ § 7129

बाधिर्यादिव्यवस्थानमेतेनैव च हेतुना।
तदेवाभोग्यमन्यस्य धर्माधर्मावशीकृतम्॥
२१९१॥§ 7131

यथा तत्र भवन्नेव स्वामित्वादवरोपितः।
न भोगं लभते तद्वद्बधिरोऽन्यत्र शृण्वति॥
२१९२॥§ 7133

एतदुक्तं भवति। यद्यप्येवम्, तथापि धर्मादिवशीकृतशरीरावधिकमेवात्मनः शाब्दग्रहणमतो न दोषः। कथं पुनरभिन्नस्यात्मनः श्रोत्रस्य ग्रहणाग्रहणसंस्कारासंस्कारविभाग इति चेत्। न। यथाऽऽकाशस्यानवयवस्यापि संयोगिपदार्थभेदाद्घटाकाशं पिठराकाशमिति भेदो भवति तथेहापि भविष्यति। अत एव च व्यापिनिर वयवस्य श्रोत्रस्य संसर्गिभेदाद्बाधिर्यादिव्यवस्थितिरिति दर्शयति। (बाधिर्यादीति)।एतेनेति। संयोगिभेदेन हेतुना। यदि नाम संयोगिनो भिन्नास्तथापि किमिति क श्चिदेव बधिरो भवतीत्याह—तदेवाभोग्यमिति। तदेव श्रोत्रमन्यस्य पुरुषस्य न भोग्यं भवति, कुतः ?, धर्माधर्माभ्यामवशीकृतत्वात्। एतदेव दृष्टान्ते स्फुटयन्नाह —यथा तत्रेत्यादि। यथा कश्चिद्ग्रामादेः स्वामी तत्र ग्रामादौ भवन्नेव विद्यमान एव 608/k
राज्ञा स्वामित्वादवरोपितस्तस्मिन्नेव ग्रामे भोगं न लभते, तद्वद्बधिरोऽन्यत्रान्यस्मिन्पुरुषे शृण्वत्यपि सति न शृणोति॥ २१९०॥ २१९१॥ २१९२॥
§ 7134

ननु च—श्रोत्रशब्दाकाशानां त्रयाणामपि निरवयवत्वाद्विभुत्वाच्च (न) प्रदेशवृत्तिरस्ति। तत्कथमेकदेशवृत्तित्वनियतग्रहणाग्रहणादिविभागो लभ्यत इत्याह—श्रोत्रशब्दाश्रयाणामित्यादि। § 7135

श्रोत्रशब्दाश्रयाणां च न नामावयवाः स्वयम्।
नचैकदेशवृत्तित्वं तथाऽप्येतन्न दुष्यति॥
२१९३॥§ 7137

श्रोत्रं च शब्दश्चाश्रयश्च—शब्दस्याकाशमिति, श्रोत्रशब्दाश्रयाः। न नामावयवाः स्वयमिति। संयोगिभेदादुपचारितास्तु विद्यन्त एवेति स्वयमित्याह—तथाऽप्येतदिति। प्रदेशवृत्तित्वनियतग्रहणादिकम्॥ २१९३॥ § 7138

कथमित्याह—व्यञ्जकानामित्यादि। § 7139

व्यञ्जकानां हि वायूनां भिन्नावयवदेशता।
जातिभेदश्च तेनैव संस्कारो व्यवतिष्ठते॥
२१९४॥§ 7141

भिन्नाः—अवयवदेशाः—कर्णशष्कुल्यधिष्ठानसंज्ञिता येषां ते तथोक्ताः। तद्भावो —भिन्नावयवदेशता। जातिभेदश्चेति। भिन्नताल्वादिकारणसामग्रीभेदात्॥ २१९४॥ § 7142

ननु चोक्तं सकृच्च संस्कृतं श्रोत्रं सर्वशब्दान्प्रबोधयेदित्यत्रोत्तरमाह—अन्यार्थं प्रेरित इत्यादि। § 7143

अन्यार्थं प्रेरितो वायुर्यथा नान्यं करोति सः।
तथाऽन्यवर्णसंस्कारशक्तो नान्यं करिष्यति॥
२१९५॥§ 7145

अन्यार्थमिति। अन्यवर्णनिष्पत्त्यर्थम्। अन्यवर्णसंस्कारशक्त इति। अन्यवर्णप्रतीत्यर्थः संस्कारो यः श्रोत्रस्य सोऽन्यवर्णसंकारशब्देनोक्तः। नतु वर्णसंस्कार एव, श्रोत्रसंस्कारस्य प्रकृतत्वात्। नान्यं करिष्यतीति। नान्यं वर्णं श्रोत्रसंस्कारद्वारेण संस्करिष्यतीत्यर्थः॥ २१९५॥ § 7146

अथ वायूनामेव कस्मादेष प्रतिनियम इत्याह—अन्यैरित्यादि। § 7147

अन्यैस्ताल्वादिसंयोगैर्वर्णो नान्यो यथैव च।
तथा ध्वन्यन्तरक्षेपो न ध्वन्यन्तरसारिभिः॥
२१९६॥§ 7149

ताल्वादिसंयोगभेदाद्व्यञ्जका वायवो ध्वनयो भिन्ना इत्यभिप्रायः। वर्णो
609/k नान्य इति। क्रियते इत्यध्याहारः। ध्वन्यन्तराणां क्षेपः—प्रेरणम्। ध्वन्यन्तरसारिभिस्ताल्वादिसंयोगैरिति सामानाधिकरण्यम्॥ २१९६॥ § 7150

तस्मादित्युपसंहरति। § 7151

तस्मादुत्पत्त्यभिव्यक्त्योः कार्यार्थापत्तितः समः।
सामर्थ्यभेदः सर्वत्र स्यात्प्रयत्नविवक्षयोः॥
२१९७॥§ 7153

उत्पत्त्यभिव्यक्त्योरिति सप्तम्यन्तम्। शब्दस्योत्पत्तावभिव्यक्तौ च प्रयत्नस्य विवक्षायाश्च तुल्यः सामर्थ्यभेदः। कुतः?। कार्यान्यथानुपपत्तिगम्यत्वात्। उभयत्रापि कार्यार्थापत्तेर्व्याप्रियमाणत्वादिति यावत्॥ २१९७॥ § 7154

एवं तावत्सिद्धान्तान्तरप्रतीतं लोकप्रतीतं च यथाक्रममाकाशकर्णशष्कुलीलक्षणंश्रोत्रमभ्युपगम्य तत्संस्कारद्वारेण शब्दाभिव्यक्तौ न दोष इति प्रतिचोदितम्। साम्प्रतं वेदप्रसिद्धं दिग्लक्षणं श्रोत्रमाश्रित्य तत्संस्कारभेदाच्छब्दाभिव्यक्तावदोषं प्रतिपादयन्नाह—यद्वेत्यादि। § 7155

यद्वा वेदानुसारेण कार्या दिक्श्रोत्रतामतिः।
नाकाशाद्यात्मकं ह्युक्तं वेदे श्रोत्रं कथञ्चन॥
२१९८॥§ 7157

दिशः श्रोत्रमिति ह्येतत्प्रलयेष्वभिधीयते।
तच्च प्रकृतिगामित्ववचनं चक्षुरादिवत्॥
२१९९॥§ 7159

दिक्श्रोत्रतामतिरिति। दिगेव श्रोत्रमित्येवं दिशः श्रोत्रत्वनिश्चयः कार्य इत्यर्थः। कथमित्याह—नाकाशात्मकमिति। यद्येवं दिक्श्रोत्रमित्येवमपि वेदे नोक्तम्, तत्कथं लभ्यत इत्याह—दिशः श्रोत्रमित्यादि। प्रकृतिषु स्वभावेषु लयाः प्रलयाः। नाशकाले प्राणिनां चक्षुरादयः स्वस्यां स्वस्यां प्रकृतौ लीयन्ते। तत्र च प्रलये पशुमधिकृत्योक्तं वेदे— सूर्यमस्य चक्षुर्गमयतात्, दिशः श्रोत्रमिति। अत्रापि गमयतादिति सम्बन्धः। गमयतादिति। यद्यत आगतं तत्तत्र गच्छत्वित्यर्थः। तेन यद्यपि वेदे दिक् श्रोत्रमित्याहत्य नोक्तम्। तथापि दिशः श्रोत्रं गमयतादित्यनेन वाक्येन सामर्थ्यादुक्तमेव। कथमित्याह—तच्चेत्यादि। तच्च दिशः श्रोत्रमिति वचनं श्रोत्रस्य प्रकृतिगामित्वप्रतिपादनपरम्। श्रोत्रं कर्तृ दिशो गच्छतु प्रकृतिभूता इत्यर्थः। कथमिवेत्याह—चक्षुरादिवदिति॥ २१९८॥ २१९९॥ § 7160

610/k

एतदेव विवृणोति—सूर्यमस्येत्यादि। § 7161

सूर्यमस्य यथा चक्षुर्भ(रु ?) त्कं गमयतादिति।
तेजःप्रकृतिविज्ञानं तथा श्रोत्रं दिगात्मकम्॥
२२००॥§ 7163

यथा सूर्यमस्य चक्षुर्गमयतादिति वाक्येन तेजःप्रकृतिविज्ञानमुक्तम्, चक्षुषइत्यध्याहारः, तथा श्रोत्रं दिगात्मकमुक्तं दिशः श्रोत्रमित्यनेन वाक्येनेत्येवं पदानां सम्बन्धः कार्यः। तेजःप्रकृतिविज्ञानं तेजोमयत्वमित्यर्थः॥ २२००॥ § 7164

अथ कीदृशी सा दिगित्याह—दिक्के(?)त्यादि। § 7165

दिक्क(?) सर्वगतैकैव यावद्व्योम व्यवस्थिता।
कर्णरन्ध्रपरिच्छिन्ना श्रोत्रमाकाशदेशवत्॥
२२०१॥§ 7167

सर्वगतस्यैव विवरणम्—यावद्व्योम व्यवस्थितेति। यद्येवं बधिरादिव्यवस्था न प्राप्नोति, एकत्वाद्दिश इत्याह—कर्णरन्ध्रेत्यादि। न सर्वात्मना दिक् श्रोतम्, किं तर्हि ?, कर्णशष्कुलीपर्यन्तपरिच्छिन्ना॥ २२०१॥ § 7168

ननु निरवयवत्वात्तस्य कथमवयवविभागो लभ्यत इत्याह—यावानिति। § 7169

यावांश्च कणभुङ्घायो नभोभागत्वकल्पने।
दिग्भागेऽपि समश्चासावागमात्तु विशिष्यते॥
२२०२॥§ 7171

यथाऽऽकाशस्य संयोगिभेदेनावयवकल्पना तथा दिशोऽपि भविष्यति। कस्तर्ह्याकाशश्रोत्रपक्षादस्य विशेष इत्याह—आगमादिति॥ २२०२॥ § 7172

तस्मादित्युपसंहारेण बधिरादिव्यवस्थानं सूचयति। § 7173

तस्माद्दिग्द्रव्यभागो यः पुण्यापुण्यवशीकृतः।
कर्णरन्ध्रपरिच्छिन्नः श्रोत्रं संस्क्रियते च सः॥
२२०३॥§ 7175

विषयसंस्कारपक्षेऽपि न दोष इति प्रतिपादयन्नाह—विषयस्यापीति। § 7176

विषयस्यापि संस्कारे तेनैकस्यैव संस्कृतिः।
नरैः सामर्थ्यभेदाच्च न सर्वैरवगम्यते॥
२२०४॥§ 7178

यदुक्तम्— तत्र सर्वैः प्रतीयेत शब्दः संस्क्रियते यदीति, तत्र न दोषः। कुतः ?, नराणां सामर्थ्यभेदात्—वायोः श्रोत्रसंस्कारकस्य सन्निधानासन्निधानाभ्यां श्रोत्रसंस्कारस्य भिन्नत्वात्सामर्थ्यभेदः॥ २२०४॥ § 7179

३ कणभुङ्घा] Correction : ; कश्चन न्या (sic !)कणभुङ्घा

ननु च नित्यसर्वगतत्वेन सर्वान्पुरुषान्प्रत्यविशिष्टत्वाच्छब्दस्य कथं ग्रहणाग्रहणे स्यातामित्याह—यथैवेत्यादि। § 7180
611/k

यथैवोत्पद्यमानोऽयं न सर्वैरवगम्यते।
दिग्देशादिविभागेन सर्वान्प्रति भवन्नपि॥
२२०५॥§ 7182

तथैव यत्समीपस्थैर्नादैः स्याद्यस्य संस्कृतिः।
तेनैव श्रूयते शब्दो न दूरस्थैः कथञ्चन॥
२२०६॥§ 7184

अथ कथमिदमवसीयते वायुभ्यो विषयस्य संस्कारो भवति। ननु विषय एवेत्याह—शब्दोत्पत्तेरित्यादि। § 7185

शब्दोत्पत्तेर्निषिद्धत्वादन्यथाऽनुपपत्तितः।
विशिष्टसंस्कृतेर्जन्म ध्वनिभ्यो(?)ऽध्यवसीयते॥
२२०७॥§ 7187

प्रत्यभिज्ञया शब्दस्य विभुत्वैकत्वयोः सिद्धत्वान्न शब्दोत्पत्तिः। तस्मात्सामर्थ्यात्संस्कारोत्पत्तिर्ध्वनिभ्यो भवति न शब्दस्येति गम्यते॥ २२०७॥ § 7188

ननु च बीजाङ्कुरादाविव तद्भावभावितया ध्वनिकार्यत्वं शब्दानां सिद्धम्। यथाहिबीजादिभावेऽङ्कुरादीनामुपलम्भात्तत्कार्यत्वं तेषाम्। एवं ध्वनिभावे शब्दानामुपलम्भोऽस्ति, किमिति तत्कार्यत्वं न भवेत्, एतावन्मात्रनिबन्धनात्वात्कार्यव्यवहारस्येत्याह—तद्भावभावितेत्यादि। § 7189

तद्भावभाविता चात्र शक्त्यस्तित्वावबोधिनी।
श्रोत्रशक्तिवदेवेष्टा बुद्धिस्तत्र हि संहृता॥
२२०८॥§ 7191

यथाहि श्रोत्रभावे शब्दोपलम्भोऽस्ति, न च ततस्तद्भावभावित्वाच्छ्रोत्रस्य शब्दं प्रति जननशक्तिरनुमीयते, किं तर्हि ?, ग्रहणशक्तिः, एवमिहापि ध्वनीनां शक्तिसद्भावमात्रावबोधिनी भवेत्तद्भावभाविता, नतूत्पाद-

कशक्त्यवबोधिनी, शक्तिमात्रे तस्याः प्रतिबन्धो नतु शक्तिविशेष इति यावत्। अतः शक्तिविशेषे साध्ये व्यभिचारित्वमस्या इति प्रतिपादितं भवति। कथमिदानीं संस्कारशक्तिविशेषावगतिरित्याह—बुद्धिस्तत्र हि संहृतेति। प्रत्यभिज्ञया नित्यत्वस्य सिद्धत्वात्। अन्यथानुपपत्त्या तत्रसंस्कारविशेषे तु बुद्धिरुपसंहृता भाष्यकारेण नतु तद्भावभाविताामात्रतः संस्कारशक्तिरनुमीयत इत्यर्थः॥ २२०८॥ § 7192

उभयसंस्कारपक्षे यदुक्तम्—प्रत्येकाभिहिता दोषाः स्युर्द्वयोरपि संस्कृताविति, अत्राह—संस्कारद्वयपक्षे तु वृथा दोषद्वयं हि तदिति। § 7193

संस्कारद्वयपक्षे तु वृथा दोषद्वयं हि तत्।
येनान्यतरवैकल्यात्सर्वैः शब्दो न गम्यते॥
२२०९ ॥§ 7195

612/k

दोषद्वयमुभयोरपि पक्षयोर्यत्प्रागुक्तं तत्तु वृथा—अनर्थकम्। कथमित्याह—येनेत्यादि। येनेति। यस्मात्। अन्यतरस्य—श्रोत्रसंस्कारस्य (अर्थसंस्कारस्य) वा वैकल्यात्। न शब्दो गम्यते। तथाहि—सत्यपि शब्दसंस्कारे बधिरस्य श्रोत्रसंस्कारवैकल्यान्न शब्दग्रहणम्। अबधिरस्याप्यनभिव्यक्तेःशब्द(स्या)ग्रहणम्। क्वचित्पाठो मृषा दोषद्वये वच इति। स च सुबोधः॥ २२०९॥ § 7196

ननु च यदि सर्वगतः शब्दः कथमस्य घटादेरिव देशविच्छेदे नानात्वमुपलभ्यते। यावता सर्वत्र सद्भावादविच्छिन्नरूपेण सर्वत्रावगतिर्युक्ता। नच सर्वगतस्य दूरासन्नादिभेदा युक्तः। नाप्यागमः कुतश्चिद्देशात्,तस्य सर्वत्र स्थितत्वात्। नापि नित्यस्य दीर्घहर(?)स्वमन्दतरतमादिस्वभावभेदो युक्तः। कालभेदश्च न युक्तः। तस्माद्देशकालस्वभावभेदेन वेद्यमानत्वाद्घटादिवद्भिन्नोऽनित्यश्च सिद्धः शब्द इति तत्कथमुच्यते—शब्दोत्पत्तेर्निषिद्धत्वादन्यथाऽनुपपत्तितः। विशिष्टसंस्कृतेर्जन्म ध्वनिभ्योऽध्यवसीयते॥ इति। अत्राह—जलादिष्वित्यादि। § 7197

जलादिषु यथैकोऽपि नानात्मा सवितेक्ष्यते।
युगपन्नच भेदोऽस्य तथा शब्दोऽपि गम्यताम्॥
२२१० ॥§ 7199

अनेन देशभेदेन वेद्यमानत्वस्यानैकान्तिकत्वमह॥ २२१०॥ § 7200

ननु जलाद्याधारभेदः सवितर्यनेकत्वव्यामोहकारणमस्ति, इह तु न किञ्चिद्भ्रान्तिकारणं विद्यते, यतः सविशेषणो हेतुरसति भ्रान्तिकारणे

इत्यत्राभिप्रेतः, तत्कथंव्यभिचारिता हेतोरित्याह—व्यञ्जकध्वन्यधीनत्वादिति।
§ 7201

व्यञ्जकध्वन्यधीनत्वात्तद्देशे हि स गृह्यते।
नच ध्वनीनां सामर्थ्यं व्याप्तुं व्योम निरन्तरम्॥
२२११॥§ 7203

तेना विच्छिन्नरूपेण नासौ सर्वत्र गम्यते।
ध्वनीनां भिन्नदेशत्वाच्छ्रु(?)तिस्तत्रानु(व?)रुध्यते॥
२२१२॥§ 7205

अपूरितान्तरालत्वाद्विच्छेदश्चावसीयते।
तेषां चाल्पकदेशत्वाच्छब्देऽप्यविभुतामतिः॥
२२१३॥§ 7207

गतिमद्वेगवत्त्वाभ्यां ते चायान्ति यतो यतः।
श्रोता ततस्ततः शब्दमायान्तमिव मन्यते॥
२२१४॥§ 7209

अत्रापि व्यञ्जकध्वनिभेदो भ्रान्तिनिमित्तमस्तीति समानम्। व्यञ्जकध्वन्यधी नत्वादिति। शब्दग्रहणस्येति शेषः। तद्देश इति। ध्वनिदेशः। स इति। 613/k शब्दः।यथा च व्यञ्जको ध्वनिः शब्दस्य विच्छिन्नादिविभ्रमकारणं भवति तथा योजयन्नाह—न चेत्यादि। असाविति। शब्दः। श्रुतिः—शब्दस्येति शेषः। तत्रेति— आकाशदेशे। अपूरितान्तरालत्वम्—ध्वनिभिरित्यपेक्षणीयम्। तेषां चेति। ध्वनीनाम्। तेचायान्तीति। ध्वनयः॥ २२११॥ २२१२॥ २२१३॥ २२१४॥ § 7210

ननु चादित्यस्याप्येकस्य सतो देशविच्छेदेन ग्रहणमसिद्धम्। तथाहि— चक्षुषा प्रतिपात्रं पृथक्पृथग्भिन्नान्येव सूर्यादिप्रतिबिम्बानि परिच्छिद्यन्ते। न पुनरादित्यः। भवतस्तु प्रतिबिम्बमर्थान्तरमनिच्छतोऽनेकप्रतिबिम्बग्रहणे न किञ्चित्कारणमुत्पश्याम इत्येवं मन्यमानस्य परस्य प्रत्यवस्थानमाशङ्कमान आह। आहेत्यादि। § 7211

५ तेना] Correction: ; तेन (sic!)तेना

आह केन निमित्तेन प्रतिपात्रं पृथक्पृथक्।
भिन्नानि प्रतिबिम्बानि गृह्यन्ते युगपत्तया॥
२२१५॥§ 7213

आहेति। परः। यगुपत्तयेति। यौगपद्येन॥ २२१५॥ § 7214
अत्रोत्तरमाह—अत्र ब्रूम इत्यादि। § 7215

अत्र ब्रूमो यदा तावज्जले सौरेण तेजसा।
स्फुरता चाक्षुषं तेजः प्रतिस्रोतः प्रवर्त्तितम्॥
२२१६॥§ 7217

स्वदेशमेव गृह्णाति सवितारमनेकधा।
भिन्नमूर्त्तिर्यथापात्रं तदाऽस्यानेकता कुतः॥
२२१७॥§ 7219

जलदेशस्थेन भानवीयेन तेजसा प्रस्यन्दनधर्मणा चाक्षुषं तेजः प्रतिस्रोतः प्रवर्त्तितम्—प्रत्यग्नीतं सत्सवितारमादित्यं स्वदेशस्थमेव गृह्णाति। यथापात्रम्—यावत्पात्रम्। अतो भिन्नमूर्त्तिः प्रतिभातीति तदाऽस्यानेकता कुतः, नैव, भिन्नत्वाच्चक्षुर्वृत्तेरिति भावः॥ २२१६॥ २२१७॥ § 7220

चक्षुर्वृत्तिवशादेवाभिन्नोऽपि भिन्न इव गृह्यत इति दर्शयन्नाह। ईषदित्यादि। § 7221

ईषत्संमीलितेऽङ्गुल्या यथा चक्षुषि गृह्यते।
पृथगेकोऽपि भिन्नत्वाच्चक्षुर्वृत्तेस्तथैव नः॥
२२१८॥§ 7223

ईषत्—मनाक्। अङ्गुल्या चक्षुषि निमीलिते—अवष्टब्धे सति यथैकोऽपि पदार्थः पृथक्—नाना दृश्यते। कुतः ?, चक्षुर्वृत्तेर्भिन्नत्वात्। तथैव नोऽस्माकमेकोऽपि शब्दो भिन्नो गृहीष्यत इत्यदोषः॥ २२१८॥ § 7224

614/k

अन्ये त्विति। § 7225

अन्ये तु चोदयन्त्यत्र प्रतिबिम्बोदयैषिणः।
स एवचेत्प्रतीयेत कस्मान्नोपरि दृश्यते॥
२२१९ ॥§ 7227

कूपादिषु कुतोऽधस्तात्प्रतिबिम्बाद्विनेक्षणम्।
प्राङ्मुखो दर्पणं पश्यन् स्याच्च प्रत्यङ्मुखः कथम्॥
२२२० ॥§ 7229

जलादिषु यथैकोऽपि नानात्मा सवितेक्ष्यते—इत्यस्य हेतुव्यभिचारविषयत्वेनोक्तस्यासिद्धिं मन्यमानाः प्रतिबिम्बमर्थान्तरमिच्छन्तश्चोदयन्ति। यदि स एवादित्यो दृश्यते न प्रतिबिम्बं, तत्किमित्युपरिष्टादस्य न दर्शनं भवति। एवं हि तस्य दर्शनं भवेत्, यदि देशावस्थितस्वरूपं गृह्णीयात्। नान्यथा। अन्यथा ह्यतिप्रसङ्गः स्यात्। किञ्च—कूपादिषु च दूराधः संविष्टस्यार्कादेः कथं ग्रहणं भवेत्। यदि तत्र प्रतिबिम्बं नोत्पन्नं स्यात्। नहि तत्र तथाऽर्कादिर्व्यवस्थितः। अपि च प्राङ्मुखो दर्पणमवलोकयन्कथमिव प्रत्यङ्मुखो भवति। नहि तस्य तदा पृष्ठाभिमुखं मुखमुपजातं दृश्यते। ॥ २२१९॥ २२२०॥ § 7230

अप्सूर्येत्यादिना प्रतिविधत्ते। § 7231

अप्सूर्यदर्शिनां नित्यं द्वेधा चक्षुः प्रवर्त्तते।
एकमूर्ध्वमधस्ताच्च तत्रोर्ध्वांशुप्रकाशितम्॥
२२२१ ॥§ 7233

अधिष्ठानानृजुस्थत्वान्नात्मा सूर्यं प्रपद्यते।
पारम्पर्यार्पितं सन्तमवाग्वृत्त्याऽवबुध्यते॥
२२२२ ॥§ 7235

ऊर्ध्ववृत्तिं तदेकत्वादवागिव च मन्यते।
अधस्तादेव तेनार्कः सान्तरालः प्रतीयते॥
२२२३ ॥§ 7237

६ ऊर्ध्व] Correction: ; उर्ध्व (sic !)ऊर्ध्व

एवं मन्यते—यदि बहिर्निर्गतमिन्द्रियमादित्यं बोधयेत्तत एतत्स्यादुपरिस्थितमेव पश्येन्नाधस्तादिति। यावता धर्माधर्मवशीकृते शरीरे एव तदिन्द्रियं ग्राहकमिष्यते, नोपरिस्थम्। यथोक्तम्— तत्रैव बोधयेदर्थं बहिर्यातं यदीन्द्रियम्। तत एतद्भवेदेवं शरीरे तत्व(च्च ?)बोधकम्॥ इति तथा ह्ययं क्रमः। ये हि जलपात्रे जलं सूर्यं च पश्यन्ति तेषामप्सूर्यदर्शिनामेकमेव चक्षुरूर्ध्वमधश्च द्विधा भागशः प्रवर्त्तते। तत्रोर्ध्वभागप्रकाशितमादित्यमात्मा पुरुषो न गृह्णाति, कुतः ?, अधिष्ठानानृजुत्वात्—चक्षुरिन्द्रियाधिष्ठान-
615/k स्यार्जवेन तदाऽवस्थितत्वात्। पारम्पर्येण तु सौरेण तेजसा वृत्तेरर्पितमादित्यमवाग्वृत्त्या कारणभूतया बुध्यते। तथाहि किल सौरं तेजस्तेजस्विनंवृत्तेरर्पयति,वृत्तिश्चक्षुषश्चक्षुरात्मन इत्येतत्पारम्पर्यार्पणं सूर्यस्य तेजस्विन इत्यादित्यमूर्ध्ववृत्तिम—उपरिस्थं तमादित्यमवागिव—अधःस्थितमिव मन्यते। कः ?। आत्मा। न पुनरधस्थादन्य एवादित्यः, कुतः ?, तदेकत्वात्—तस्यादित्यस्याभिन्नत्वात्। चक्षुष इत्यपरे। तस्मादनन्तरोदितेनैव चक्षुषो वृत्तिवशेन सान्तरालोऽधस्तात्कूपादिषु सूर्यो दृश्यते। जलादि पात्रभेदाच्च। अन्यथा कथमभेदेन ग्रहणं स्यात्॥ २२२१॥ ॥ २२२२॥ २२२३॥ § 7238

यदुक्तं प्राङ्मुखो दर्पणं पश्यन्नित्यादि। तत्राह—एवमित्यादि। § 7239

एवं प्राग्गतया वृत्त्या प्रत्यग्वृत्तिसमर्पितम्।
बुध्यमानो मुखं भ्रान्त्या प्रत्यगित्यवगच्छति॥
२२२४॥§ 7241

प्रथमं किल चक्षुरश्मयो मुखमादाय निर्गच्छन्ति यावदादर्शादिदेशम्, सा प्राङ्गावृत्तिरुच्यते। तेच तत्रादर्शादौ प्रतिहता निवर्त्तनावाः स्वमुखमेव यथावस्थितमागच्छन्ति। सा च प्रत्यग्वृत्तिः। तत्र प्राङ्गा वृत्तिर्मुखं प्रत्यग्वृत्तेरर्पयति, प्रत्यग्वृत्तिश्चात्मनः, तत आत्मा प्रत्यग्वृत्तिसमर्पितमवगच्छन्मुखं भ्रान्त्या प्रत्यङ्मुखं यास्यामीति मन्यते। चक्षुर्वृत्तेर्वैचित्र्यमेव भ्रान्तेर्बीजमिति भावः॥ २२२४॥ § 7242

अभ्युपगम्य प्रतिबिम्बोदयं परिहारमाह—अनेकदेशवृत्तौ चेत्यादि। § 7243

अनेकदेशवृत्तौ वा सत्यपि प्रतिबिम्बके।
समानबुद्धिगम्यत्वान्नानात्वं नैव विद्यते॥
२२२५॥§ 7245

सत्यपि प्रतिबिम्बेऽर्थान्तरभूते नैव तेषां प्रतिबिम्बनां नानात्वमस्ति। कुतः ?।समानबुद्धिगम्यत्वात्—एकबुद्धिपरिछेद्यत्वात्। तथा शब्दस्याप्येकबुद्धिगम्यत्वादेकत्वं सिद्धम्॥ २२२५॥ § 7246

ननु कुतो देशभेदेन वेद्यमानस्यापि नानात्वं न भविष्यति। ननु यद्देशभेदेन वेद्यमानत्वाद्भिन्नत्वं सिद्धं तत्कथमेकबुध्या बाध्यत इत्याह—देशभेदेनेत्यादि। § 7247

देशभेदेन भिन्नत्वमित्येतच्चानुमानिकम्।
प्रत्यक्षस्तु स एवेति प्रत्ययस्तेन बाधकः॥
२२२६॥§ 7249

बाधक इति। प्रत्यक्षस्य सर्वप्रमाणज्येष्ठत्वादिति भावः॥ २२२६॥ § 7250

देशकालभेदेन वेद्यमानत्वस्य व्यभिचारित्वादप्रामाण्यमेवेति प्रतिपादयन्नाह—पर्यायेणेत्यादि। § 7251
616/k

पर्यायेण यथाचैको भिन्नदेशान्व्रजन्नपि।
देवदत्तो न भिद्येत तथा शब्दो न भिद्यते॥
२२२७॥§ 7253

तथा शब्दो न भिद्यत इति। देशतः कालतश्चेत्यपेक्षणीयम्॥ २२२७॥ § 7254

एवं देशव्यभिचारमुखेनोभयोरपि व्यभिचार उक्तः। इदानीं कालभेदव्यभिचारद्वारेण चोभयोरपि देशकालभेदेनोपलम्भयोर्व्यभिचारमाह। ज्ञातैकत्व इत्यादि § 7255

ज्ञातैकत्वो यथाचैको दृश्यमानः पुनः पुनः।
न भिन्नःकालभेदेन तथा शब्दो न देशतः॥
२२२८॥§ 7257

ज्ञातमेकत्वं प्रत्यभिज्ञानाद्यस्य स तथा। न देशत इत्युपलक्षणम्, तथा कालतोऽपि न भिन्नः। अविरोधादेकव्यभिचारमुखेनान्यत्रापि व्यभिचारोद्भावनम् ॥ २२२८॥ § 7258

पर्यायेत्यादिना दृष्टान्तस्य वैषम्यमाशङ्कते। § 7259

---

१ न भविष्यति] Correction: ; भविष्यति (sic!)न भविष्यति
५ न भिन्नः] Correction: ; न भिन्न (sic!)न भिन्नः

पर्यायादविरोधश्चेद्व्यापित्वादपि दृश्यताम्।
दृष्टसिद्ध्यै हि यो धर्मः सर्वेषां सोऽभ्युपेयते॥
२२२९॥§ 7261

तथाहि—देवदत्तस्य यद्देशकालभेदेनोपलम्भेऽपि न भेदस्तत्र पर्यायोऽस्त्यविरोधकारणम्, शब्दे तु न किञ्चिदपीत्यतो वैषम्यं दृष्टान्तदार्ष्टान्तिकयोः। अत्राप्यविरोधकारणमाह—व्यापित्वादपि दृश्यतामिति। अविरोध इति सम्बन्धः। ध्वनीनां चापूरितान्तरालत्वादित्येतपिशब्देन पूर्वोक्तं च निर्दिशति। कस्माद्व्यापित्वमङ्गीक्रियत इत्याह—दृष्टसिद्ध्यै हीति। भिन्नेषु दिग्देशेष्वभिन्नस्य शब्दस्य ग्रहणसिद्ध्यर्थं यो धर्मो युज्यते स एवान्यथानुपपत्त्याऽङ्गीक्रियते। अत्र च शब्दस्य नित्यव्यापित्वमन्तरेण सर्वस्मिन्काले देशे च न ग्रहणं सिद्ध्यतीत्यतो नित्यविभुत्वे शब्दस्यान्यथानुपपत्त्या सिद्धे॥ २२२९॥
§ 7262

स्वभावभेदेन वेद्यमानत्वस्यापि व्यभिचारितां प्रतिपादयन्नाह—यथा महत्यामित्यादि। § 7263

यथा महत्यां स्नातायां मृदि व्योम्नि महत्त्वधीः।
अल्पायां वाऽल्पधीरेवमत्यन्ताकृतके मतिः॥
२२३०॥§ 7265

तेनात्रैव परोपाधिशब्दवृत्तौ मतिभ्रमः।
नच स्थूलत्वसूक्ष्मत्वे लक्ष्येते शब्दवर्तिनी॥
२२३१॥§ 7267

617/k

बुद्धितीव्रत्वमन्दत्वे महत्त्वाल्पत्वकल्पना।
सा चे पटीव भवत्येव महातेजःप्रकाशिते॥
२२३२॥§ 7269

मन्दप्रकाशिते मन्दा घटादावपि सर्वदा।
एवं दीर्घादयः सर्वे ध्वनिधर्मा इति स्थितम्॥
२२३३॥§ 7271

अत्रायमभिप्रायः—यदि शब्दगतास्तीव्रमन्दादयो भेदा हेतुत्वेनोपादीयन्ते तदा न सिद्धो हेतुः। यो हि नित्यं शब्दमिच्छति स कथमपरोपाधिकांस्तस्ये स्वभावभेदान् ब्रूयात्। अथ तीव्रमन्दाद्याकारे तद्विषया बुद्धिर्हेतुत्वेनोच्यते, सा हि न स्वभावे भेदमन्तरेण सम्भवतीति। तदाऽनैकान्तिकता हेतोः। यथाहि महत्यां मृदि पृथिव्यां स्नातायां सत्यां व्योम्नि—आकाशे तदाश्रयं महत्त्वादिज्ञानमुत्पद्यते स्वतो महत्त्वादेरभावेऽपि, तथा शब्देऽप्यत्यन्ताकृत्रिमेऽयं व्यञ्जकध्वनिभेदाद्बुद्धिभेदो भविष्यति तथाविधस्वभावभेदमन्तरेणापि। तदेवाह—तेनात्रैवमित्यादि। अथ परोपाधिरयम्, नतु स्वत एवेति कथमवगतमिति चेदाह—नचेत्यादि। अनेनैतदाह—बुद्धिगते एव तीव्रमन्दत्वे शब्दे समारोप्य भ्राम्यति, नतु पुनः शब्दस्य स्वतः स्थूलादिसम्भवः, तस्य प्रत्यभिज्ञयैकत्वस्य सिद्धत्वात्। अथापि स्याद्यदि विषयस्य तथास्वभावभेदो न भवेद्बुद्धेरपि कुतो भवेदित्याह—सा च पट्वीत्यादि। यथैव हि घटादावसत्यपि स्वभावभेदे प्रकाशभेदाद्बुद्धेः पटुमन्दतादिभेदो भवति, तथा शब्देऽपि दीर्घादिभेदो व्यञ्जकध्वनिभेदाद्भविष्यति, असत्यपि स्वतः स्वभावभेद इत्यदोषः॥ २२३०॥ २२३१॥ २२३२॥ २२३३॥ § 7272

पुनरपि शब्दानित्यत्वप्रतिज्ञाया बाधां शब्दस्य वाचकसामर्थ्यान्यथानुपपत्त्याप्रतिपादयन्नाह—नचादृष्टार्थसम्बन्ध इत्यादि। § 7273

नचादृष्टार्थसम्बन्धः शब्दो भवति वाचकः।
तथाचेत्स्यादपूर्वोऽपि सर्वः स्वार्थं प्रबोधयेत्॥
२२३४॥ § 7275

अर्थापत्तिपूर्विकेयमर्थापत्तिस्तथाहि—शब्दस्य वाचकसामर्थ्यं शाब्दज्ञानान्यथानुपपत्त्या सिद्धम्, तदपि सामर्थ्यं शब्दनित्यत्वमन्तरेणानुपपन्नमित्यर्थापत्तिपूर्विकेयमर्थापत्तिः। तामेव विस्तरेण प्रतिपादयति—नहि तावदगृहीतसम्बन्धः शब्दः सत्तामात्रेण वाचको भवति। तथाचेत्स्यादिति। यद्यदृष्टार्थसम्बन्धोऽपि वाचको भवेत्तदाऽपूर्वोऽपि प्रथममश्रुतोऽपि नालिकेरद्वीपनिवासिनां गवादिशब्दः स्वार्थं प्रकाशयेत्॥ २२३४॥ § 7276

618/k

ननु चात्र सर्वेषामविवादात्सिद्धसाध्यता, नहि कश्चिदज्ञातसम्बन्धं शब्दं वाचकमिच्छति। नित्यस्तु स कथमनेन ज्ञातसम्बन्धेन प्रतिपादितो भवतीत्याह—सम्बन्धदर्शनमित्यादि। § 7277

सम्बन्धदर्शनं चास्य नानित्यस्योपपद्यते।
सम्बन्धज्ञानसिद्धिश्चेद्ध्रु(?)वं कालान्तरस्थितिः॥
२२३५॥ § 7279

शब्दमर्थं च पुरोऽवस्थाप्य तयोः सम्बन्धः क्रियते, कृतश्चोत्तरकालं ज्ञायेत। उच्चरितप्रध्वंसित्वात्तु शब्दस्यैतदयुक्तम्। तदाह—नानित्यस्योपपद्यत इति। अथ तावत्कालमवतिष्ठेम्, हन्त तर्हि कालान्तरमप्यवस्थानमनिवार्यमेवाविरोधात्। यथोक्तम्— तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यतीति॥ २२३५॥ § 7280

अथापि स्यात्सम्बन्धकालं यावदवतिष्ठेत्, पश्चात्स्वयमेव नश्यतीत्याह—अन्यस्मिन्नित्यादि। § 7281

अन्यस्मिन् ज्ञातसम्बन्धे नचान्यो बोधको भवेत्।
गोशब्दे ज्ञातसम्बन्धे नाश्वशब्दो हि वाचकः॥
२२३६॥§ 7283

अन्यस्मिन्—सङ्केतकालभाविनि। शेषं सुबोधम्॥ २२३६॥ § 7284

अथेति पराभिप्रायमाशङ्कते। § 7285

अथान्योऽपि स्वभावेन कश्चिदेवावबोधकः।
तत्रानिबन्धने न स्यात्कोसाविविति विनिश्चयः॥
२२३७॥§ 7287

अथान्योऽपीति। प्रयोगकालभावी प्रकृत्यैव सङ्केतकालभाविशब्दवद्वाचकः स्यादिति चेत्तदसम्यक्। निबन्धनमन्तरेणासौ शब्दोऽस्यार्थस्य वाचक इति निश्चयाभावात्॥ २२३७॥ § 7288

ननु च कथमुच्यते निश्चयो नास्तीति,यावता यतोऽर्थप्रत्ययो भवति स एव स्वभावतोऽर्थस्य बोधक इति स्पष्टमेव निश्चीयत इत्याह—यत इत्यादि। § 7289

यतः प्रत्यय इत्येव व्यवहारे प्रकल्पिते।
श्रोतृणां स्यादपीत्थं तु वक्तृ(?)णां नावकल्पते॥
२२३८॥§ 7291

सत्यं श्रोतृणां सम्भवेदयं निश्चयोऽयमर्थस्य प्रत्यायक इति। तेषां ततोऽर्थप्रत्ययोत्पत्तेः। प्रयोक्तृणां त्वयं दुर्लभः, नहि ते ततः शब्दादर्थं प्रतिपद्यन्ते, परप्रत्यायनार्थमेव शब्दं ते प्रयुञ्जते। तत्कुतो वक्तृणामवकल्पते निश्चयः॥ २२३८॥ § 7292

619/k

एतदेव दर्शयति—अज्ञात्वेत्यादि। § 7293

अज्ञात्वा कमसौ शब्दमादावेव विवक्षतु।
जानाति चेदवश्यं स पूर्वमेवावधारितः॥
२२३९॥§ 7295

तदेवमज्ञानपक्षेऽयं दोषः, ज्ञानपक्षेऽपि नियतमसौ प्राक्तेन ज्ञान इति स्थिरत्वमस्य बलादापततीति दर्शयन्नाह—जानाति चेदित्यादि॥ २२३९॥ § 7296

ननु यथा दीपादितेजोऽभिनवमपि प्रकाशयत्यर्थं तथा शब्दोऽपि प्रतिपादयिष्यतीत्याह—तेजः प्रत्यक्षशेषत्वादिति। § 7297

तेजः प्रत्यक्षशेषत्वान्नवत्वेऽपि प्रकाशकम्।
सदृशत्वाप्रतीतेश्च तद्द्वारेणाप्यवाचकः॥
२२४०॥§ 7299

प्रत्यक्षशेषत्वम्—(प्रत्यक्षे) अङ्गभावः। तद्विषयसंस्कारादिन्द्रियसंस्काराद्वाप्रत्यक्ष ज्ञानेऽङ्गतामुपगच्छदभिनवमपि प्रकाशकं भवति। शब्दस्य साक्षादतीन्द्रियार्थप्रतिपादकत्वान्न प्रत्यक्षाङ्गमतो वैषम्यम्। अथवा—यत्प्रत्यक्षाङ्गं तत्सम्बन्धपरिज्ञाननिरपेक्षमपि प्रकाशयति। यथा चक्षुस्तेजश्च प्रत्यक्षाङ्गम्। तस्मादभिनवमपि प्रकाशयति। शब्दस्तु परोक्षविषयत्वान्न प्रत्यक्षाङ्गमिति वैषम्यम्। ननु चाभिनवमपि शब्दान्तरं पूर्वसादृश्यानुसारेण वाचकं भविष्यतीत्याह—सदृशत्वाप्रतीतेरित्यादि। न ह्यप्रतीते सादृश्ये तद्द्वारेण वाचकत्वं युक्तमतिप्रसङ्गात्॥ २२४०॥ § 7300

किञ्च—आस्तां तावत्सादृश्यप्रतीतिः, सादृश्यमेव न सम्भवतीति प्रतिपादयन्नाह—कस्य चैकस्येत्यादि। § 7301

कस्य चैकस्य सादृश्यात्कल्प्यतां वाचकोऽपरः।
अदृष्टसङ्गतित्वेन पूर्वेषां तुल्यता यदा॥
२२४१॥§ 7303

अर्थवान्पूर्वदृष्टश्चेत्तस्यैतावान् क्षणः कुतः।
द्विस्त्रिर्वाऽनुपलब्धो हि नार्थवान्संप्रतीयते॥
२२४२॥§ 7305

एकस्मिन् हि वाचके सिद्धे तत्सादृश्यादितरस्तथैवेति कल्प्येत तच्च न सम्भवति, सर्वेषामेव शब्दानामर्थसम्बन्धित्वेन प्रतीतत्वात्। अथापि स्याद्यः प्राक् सङ्केतकाले दृष्टः सोऽर्थवानेव, सादृश्यमितरेषां भविष्यतीत्याह—तस्यैतावान् क्षणः कुत इति। तस्य—पूर्वदृष्टस्य शब्दस्य—एतावतः क्षणान्कुतोऽवस्थानमुच्चरितप्रध्वंसित्वात्तस्य। यदि नामोच्चरितप्रध्वंसी, तथाऽप्यर्थवान्किं न भवतीति चेदाह—द्विस्त्रिर्वेत्यादि। भूयोदर्शनभावि हि शब्दार्थसम्बन्धज्ञानम्॥ २२४१॥ २२४२॥ § 7306

620/k

अथ सजातीयान्यग्रहणे सति स एव सार्थको भवतीत्युच्यते, तदयुक्तमित्याह—अप्रतीतान्यशब्दानामित्यादि। § 7307

अप्रतीतान्यशब्दानां तत्कालेऽसावनर्थकः।
स एवान्यश्रुतीनां स्यादर्थवानिति विस्मयः॥
२२४३ ॥§ 7309

येषां हि प्रतिपत्तृणां शब्दान्तरमप्रतीतं तेषां हि श्रवणकाले नासावर्थस्य प्रत्यायकः। भेदाधिष्ठानस्य सादृश्यस्य तदानीमभावात्। पुनः स एव तेषामेव प्रतिपत्तृणां प्रतीतशब्दान्तराणामर्थप्रत्यायक इत्यलौकिकम्। कथं हि नामैकस्य क्रियाक्रिये परस्परविरुद्धे स्याताम्। अन्यश्रुतीनामिति। अन्या—सजातीयशब्दविषया श्रुतिर्येषां प्रतिपत्तृणां ते तथा॥ २२४३॥ § 7310

एवं तावद्वाचकत्वान्यथानुपपत्त्या शब्दनित्यत्वं प्रतिपाद्य, इदानीं सम्बन्धकरणान्यथानुपपत्त्या प्रतिपादयन्नाह—शब्दं तावदित्यादि। § 7311

शब्दं तावदनुच्चार्य सम्बन्धकरणं नच।
नचोच्चारितनष्टस्य सम्बन्धेन प्रयोजनम्॥
२२४४ ॥§ 7313

तेनासम्बन्धनष्टत्वात्पूर्वस्तावदनर्थकः।
उत्तरोऽकृतसम्बन्धो विज्ञायेतार्थवान्कथम्॥
२२४५ ॥§ 7315

पूर्वमुच्चारणं ततः सम्बन्धकरणं ततो व्यवहार इत्ययं क्रमेण व्यवहार उच्चारितप्रध्वंसिनोऽक्रमस्य कथं स्यात्। न केवलं नष्टस्य सम्बन्धोऽशक्यक्रियः, नापि तेनप्रयोजनम्, व्यवहाराकालाननुयायित्वात्। व्यवहारार्थत्वाच्च

सङ्केतस्य। तेनेत्यादिना निगमयति। अविद्यमानाः सम्बन्धो यस्यासावसम्बन्धः, तत्त्वान्नष्टत्वाच्च पूर्वस्तावत्सङ्केतकालभावी शब्दोऽनर्थकः। व्यवहारकालभावी तर्हि सार्थको भविष्यतीत्याह—उत्तर इत्यादि॥ २२४४॥ २२४५॥
§ 7316

यदि तर्ह्यक्रमस्य क्रमेणोच्चारणादयोऽनुपपन्ना युगपत्तर्हि भवन्त्वित्याह—शब्दोच्चारणेत्यादि। § 7317

शब्दोच्चारणसम्बन्धकरणव्यावहारिकीः।
क्रियाः क्रमस्वभावत्वात्कः कुर्याद्युगपत्क्वचित्॥
२२४६॥§ 7319

शब्दोच्चारणं सम्बन्धकरणं लोकव्यवहारश्चेत्येतास्तिस्रः क्रियाः स्वभाव एव क्रमवत्यः, ता युगपत्कर्तुमशक्याः। असति च यौगपद्ये सम्बन्धकरणानुपपत्तिः। क्रमप्रतीक्षायां कालान्तरस्थायी शब्दोऽभ्युपगतः स्यात्॥ २२४६॥
§ 7320

621/k

देशकालादिभिन्नानामिति निगमनम्। § 7321

देशकालादिभिन्नानां पुंसां शब्दान्तराश्रुतेः।
पूर्वं कृत्रिमसम्बन्धोऽप्येकः शब्दो न सिद्ध्यति॥
२२४७॥§ 7323

सम्बन्धकथनेऽप्यस्य स्यादेषैव प्रतिक्रिया।
नष्टासद्वर्त्तमानेषु नाख्यानस्य हि सम्भवः॥
२२४८॥§ 7325

आदिशब्देन बालकुमाराद्यवस्थापरिग्रहः। पूर्वमिति। शब्दान्तरश्रुतेरिति सम्बन्धनीयम्। नष्टेत्यादि। नष्टः—अतीतः, असन्—अनागतः, तयोरसत्त्वादेव न सम्बन्धाख्यानसम्भवः। वर्त्तमानोऽप्युच्चार्यमाणस्तस्य समनन्तरध्वंसित्वेन कुतस्तावान्कालः॥ २२४७॥ २२४८॥ § 7326

एतदेव दर्शयति—अर्थवानित्यादि। § 7327

अर्थवान्क(तरः) शब्दः श्रोतुर्वक्त्रा च कथ्यताम्।

यदा पूर्वश्रुतः शब्दो नासौ शक्नोति भाषितुम्॥
२२४९॥§ 7329

न तावदर्थवन्तं स ब्रवीति सदृशं वदेत्।
नार्थवत्सदृशः शब्दः श्रोतुस्तत्रोपपद्यते॥
२२५०॥§ 7331

अर्थवद्ग्रहणाभावान्न चासावर्थवान्स्वयम्।
वक्तुः श्रोतृत्ववेलायामेतदेव प्रसज्येत॥
२२५१॥§ 7333

न हि वक्ता पूर्वश्रुतं शब्दं श्रोतुः कथयितुं शक्तः, तस्य पूर्वनिरूद्धत्वात्। यमपि प्रतिपादयति न तमर्थवन्तं शक्नुयात्प्रतिपादयितुम्। तस्य पूर्वमकृतसम्बन्धत्वात्। एतावत्सम्भाव्यते—सदृशं ब्रूयादिति। तदपि न सम्भवतीत्याह—नार्थवत्सदृश इत्यादि। नह्यत्र केनचित्सादृश्यमिष्टम्, किं तर्हि ?, अर्थवता, तच्चानुपपन्नम्। यदि हि श्रोत्रा कश्चिच्छब्दोऽर्थवानुपलब्धः स्यात्तदाऽनेन सादृश्यमुपपद्येत, यावता पूर्वसङ्केतकालेऽर्थवतो ग्रहणाभावान्न युक्तमेतत्। कथ्यमानो यः सोऽर्थवांस्तर्हि भविष्यतीत्याह—न चासावित्यादि। न चासावुच्चार्यमाणोऽर्थवान्, तस्य पूर्वमकृतसम्बन्धत्वादित्युक्तम्। वक्तुरित्यादिना यथा वक्ताऽपि पर्यायेण श्रोता भवति तदा तस्याप्येतदेव सर्वं दोषजातं—न तावदर्थवन्तं स ब्रवीतीत्यादिकमापततीति दर्शयति। तदनेन सर्वेषामेव वक्तॄणां न कश्चिदर्थवान् शब्दः सम्भवतीत्युक्तं भवति॥ २२४९॥ ॥ २२५०॥ २२५१॥ § 7334

622/k

तस्मादित्युपसंहरति। § 7335

तस्माच्छब्दार्थसम्बन्धो नित्य एवाभ्युपेयताम्।
नतु सामयिको युक्तः सर्वथा तदसम्भवात्॥
२२५२॥§ 7337

स्वत इत्यादिना परस्य पूर्वपक्षमाशङ्कते। § 7338

स्वतो नैवास्ति शक्तत्वं वाच्यवाचकयोर्मिथः।

प्रतीतिः समयात्पुंसां स्याच्चेदक्षिनिकोचवत्॥
२२५३॥§ 7340

वाच्यवाचकयोः परस्परं नैव स्वभाविकी यथाक्रमं वाच्यवाचकशक्तिः। कथं तर्हि प्रतीतिः शब्दादुदेतीत्याह—प्रतीतिः समयादित्यादि। यस्य यत्र सङ्केतापेक्षः कारणभावो न स तस्य स्वाभाविकः, यथाऽक्षिनिकोचस्य प्रतिपत्तौ, सङ्केतसापेक्षश्च प्रतिपत्तौ कारणभावः शब्दस्येति व्यापकविरुद्धोपलब्धिः। अनेन चानित्यत्वप्रतिज्ञाबाधां विस्तरेणोक्तां विघटयति॥ २२५३॥
§ 7341

समय इत्यादिना प्रतिविधत्ते। § 7342

समयः प्रतिमर्त्यं वा प्रत्युच्चारणमेव वा।
क्रियते जगदादौ वा सकृदेकेन केनचित्॥
२२५४॥§ 7344

प्रत्येकं वाऽपि सम्बन्धो भिद्येतैकोऽथवा भवेत्।
एकत्वे कृतको न स्याद्भिन्नश्चेद्भेदधीर्भवेत्॥
२२५५॥§ 7346

इयमस्य संज्ञेति समयः सा प्रतिपत्त्यर्थं प्रतिपुरुषं वा क्रियेत, प्रतिपुरुषमेव प्रत्युच्चारणं प्रतिप्रयोगं वा। अथवा—जगदादौ—जगतः सृष्टिकाले केनचित्—ईश्वरादिना धात्रा, सकृत्—एकयैव हेलया, क्रियेतेति त्रयो विकल्पाः। प्रत्येकं वाऽपीति। सम्बन्धोऽपि शब्दार्थयोः क्रियमाणः कदाचित्प्रतिसत्त्वं भिद्येत्, यद्वैक एवेति द्वितीयकल्पना। एकत्वपक्षे जातिवद्देशकालभेदानुयायित्वात्कृतको न स्यात्। नित्य एव स्यादिति यावत्। अथ प्रतिसत्त्वं भिन्नस्वभावस्तदा प्रतिसत्त्वं भेदबुद्धिः प्राप्नोति, ज्ञेयभेदनिबन्धनत्वाज्ज्ञानभेदस्य। न च गवादिशब्दानां शतकृत्वोऽपि प्रयोगे व्यवहर्तॄणां भेदबुद्धिर्भवत्यभेदाध्यवसायेनैव व्यवहारात्॥ २२५४॥ ॥ २२५५॥ § 7347

किंच—यदि प्रतिसत्त्वं भिन्नः सम्बन्धस्तदाऽवश्यं भेदधिया भाव्यम्, ततश्च व्यवहारोच्छेदः प्राप्नोतीति दर्शयन्नाह—वक्तृश्रोतृधियोरिति। § 7348
623/k

वक्तृश्रोतृधियोर्भेदाद्व्यवहारश्च दुष्यति।
वक्तुरन्यो हि सम्बन्धो बुद्धौ श्रोतुस्तथाऽपरः॥
२२५६॥§ 7350

भेदादिति। विषयस्येत्यहार्यम्। तेनायमर्थो भवति—वक्तृश्रोतृधियोर्योऽर्थो विषयस्तस्य भेदादेकार्थाध्यवसायेन व्यवहारो न स्यात्। कथमित्याह—वक्तुरन्यो हीति ॥ २२५६॥ § 7351

यदुक्तं समयः प्रतिमर्त्यं वेति। अत्र दूषणमाह—श्रोतुः कर्तुं चेत्यादि।
§ 7352

श्रोतुः कर्तुं च सम्बन्धं वक्ता कं प्रतिपद्यताम्।
पूर्वं दृष्टो हि यस्तेन तं श्रोतुर्न करोत्यसौ॥
२२५७ ॥§ 7354

यं करोति नवं सोऽपि न दृष्टप्रतिपादकः।
घटादावपि तुल्यं चेन्न सामान्यप्रसिद्धितः॥
२२५८ ॥§ 7356

यद्यपि ज्ञातसामर्थ्या व्यक्तिः कर्तुं न शक्यते।
क्रियते या न तस्याश्च शक्तिः कार्येऽवधारिता॥
२२५९ ॥§ 7358

तथाऽप्याकृतितः सिद्धा शक्तिरुच्चारणादिषु।
तस्या न चादिमत्ताऽस्ति सम्बन्धस्त्वादिमांस्ततः॥
२२६० ॥§ 7360

यदि तस्यापि सामान्यं नित्यमभ्युपगम्यते।
तथाऽप्यस्मन्मतं सिद्धं ननु ह्याकारसम्भवः॥
२२६१ ॥§ 7362

शक्तिरेव हि सम्बन्धो भेदश्चास्या न दृश्यते।

सा हि कार्यानुमेयत्वात्तद्भेदमनुवर्तते॥
२२६२॥§ 7364

अन्यथाऽनुपपत्त्या च शक्तिसद्भावकल्पनम्।
नचैकयैव सिद्धेऽर्थे बह्वीनां कल्पनेष्यते॥
२२६३॥§ 7366

तं श्रोतुर्न करोतीति। तस्य नष्टत्वात्। न दृष्टप्रतिपादक इति। तस्य पूर्वमदृष्टत्वात्। घटादावपीति। अतिप्रसङ्गोद्भावनया दूषणस्यानैकान्तिकत्व-माशङ्कते। घटादावपि तुल्यः प्रसङ्गः, तथाहि—यो घटोऽर्थक्रियासमर्थो दृष्टो नासौ कर्तुं शक्यः, तस्य निष्पन्नविनष्टत्वात्। यश्चाधुना क्रियते नासावर्थ-क्रियासमर्थो दृष्टस्तस्यानिष्पन्नत्वात्। उत्तरमाह—न सामान्यप्रसिद्धित इति। नेति पूर्वपक्षप्रतिक्षेपः। कुतः ?। सामान्यस्य प्रसाधितत्वात्। तद्द्वारेण साम-र्थ्यसिद्धेरिति भावः। एतदेवस्पष्टयन्नाह—यद्यपीत्यादि। यद्यप्युदकाहरणादिषु दृष्टसामर्थ्या घटव्यक्तिः कर्तुं न पार्यते, निष्पन्नविनष्टत्वात्। याऽप्यधुनातनी 624/k न तस्या अर्थक्रियासामर्थ्यमवधारितम्। तथाप्याकृतिद्वारेणैवार्थक्रियासाम-र्थ्यं सर्वस्यां व्यक्तौ सिद्ध्यति। कथमित्याह —तस्या इत्यादि। तस्या इति। आकृतेः। क्वचित्—नच तस्यादिमत्तेति पाठः। तस्यायमर्थः—नच तस्योद-काहरणादिसामर्थ्यस्यादिमत्तास्ति, आकृतेर्नित्यत्वात्। तस्याश्चाश्रयतोऽत्यन्त-मभिन्नत्वात्। यथोक्तम्— स्थितं नैव च जात्यादेः परत्वंव्यक्तितो हि नः इति। सम्बन्धोऽपि तर्ह्याकृतिद्वारेणानादिर्भवत्विति चेत्तदेतदयुक्तमित्याह—सम्बन्धस्त्वित्यादि। किञ्च—यदि भवता तस्यापि शब्दार्थसम्बन्धस्य नित्यं सामान्यमभ्युपगम्यते तथाऽपि नित्यं नाम वस्त्वस्तीत्यस्मन्मतं सिद्धम्। शब्दस्तु प्रकृत एव न सिद्ध्यतीति चेदाह—(?) न तु द्व्याकारसम्भव इति। द्वावाकारौ—सम्बन्धस्तत्सामान्यं च। एकस्यैवाकारस्य सम्भवो न-तु सामान्यस्य,तस्यानेकव्यक्तिनिष्ठत्वात्। सम्बन्धस्य चैकत्वात्। कथमेकत्वं सम्बन्धस्येत्याह—शक्तिरेव हीत्यादि। नहि शक्तिव्यतिरिक्तः सम्बन्धोऽस्ति। यदि नामैवं ततः किमित्याह—भेदश्चेत्यादि। भेदो—नैकत्वम्। किमिति न दृश्यत इत्यत्र कारणमाह—सा हीति। सा हि नित्यं कार्यानुमेया। यथोक्त-म्—शक्तयः सर्वभावानां कार्यार्थापत्तिसाधना इति। ततोऽसौ कार्यभेदम-नुधत्ते—अनुधावति,आत्मगतभेदप्रत्यायने। कार्यभेददर्शनं विना न शक्यः शक्तिभेदो ज्ञातुमिति यावत्। नचात्र कार्यभेदोऽस्ति। तथाहि—कार्यं तस्याः प्रतीतिरेव, सा च शब्दालम्बना वास्यादर्थावलम्बना वा। न तावदाद्याया भेदः, शब्दस्य नित्यं प्रत्यभिज्ञायमानत्वात्। नाप्यर्थावलम्बनायाः, नहि श-

१६ हि नः] Correction : ; हित(त्) (sic !)हि नः

तकृत्वोऽप्युच्चार्यमाणो(णे ?) गोशब्दादेरन्यादृशी प्रतीतिरुपजायते। उपचयमाह—अन्यथेत्यादि। अर्थप्रतीत्यनुपपत्त्या हि वाच्यवाचकशक्तिः कल्प्यते। एकयैव च शक्त्या विवक्षितार्थस्य सिद्धत्वादपार्थकमनेकशक्तिपरिकल्पनम्। न चान्यथानुपपत्त्या शक्तिभेदोऽनुमातुं शक्यः। शक्तिमात्र एव तस्याः सामर्थ्यात्॥ २२५७॥ २२५८॥ २२५९॥ २२६०॥ ॥ २२६१॥ २२६२॥ २२६३॥ § 7367

इतश्च सम्बन्धस्य करणमयुक्तमतो नित्य एव सम्बन्ध इति प्रतिपादयन्नाह—सम्बन्धाख्यानेत्यादि। § 7368

सम्बन्धाख्यानकाले च गोशब्दादावुदीरिते।
केचित्सम्बन्धबुद्ध्याऽर्थं बुद्ध्यन्ते नापरे तथा॥
२२६४॥§ 7370

625/k

तत्र सम्बन्धनास्तित्वे सर्वोऽर्थं नावधारयेत्।
अस्तित्वे सर्वबोधश्चेन्न केश्चिदनुपग्रहात्॥
२२६५॥§ 7372

तथा ह्येष गौः पदा न स्प्रष्टव्य इत्युक्ते केचित्पुरुषा वाच्यवाचकसम्बन्धमवधार्यसम्बन्धपुरःसरमेवार्थमवबुध्यन्ते। अन्ये त्वज्ञातसम्बन्धाः स्वरूपमेवावयन्ति नार्थम्। तत्र यदि वस्तुभूतः सम्बन्धो न स्यात्तदा सर्व एव पुरुषो व्युत्पन्नव्यवहारो नार्थमवधारयेत्। नह्येकस्य सदसत्त्वे परस्परविरुद्धे युक्ते। तस्मान्नित्यावस्थित एव सम्बन्ध इति। ननु यदि नित्यावस्थितः सम्बन्धः किमिति सर्वदा सर्वेषामर्थप्रतिपत्तिर्न भवेदित्येतच्चोद्यमाशङ्क्य विस्तरेण परिहरन्नाह—अस्तित्व इत्यादि। नेति प्रसङ्गं निवर्त्तयति। कुतः ?। केश्चित्तस्याग्रहणात्॥ २२६४॥ २२६५॥ § 7373

यदि नाम न गृहीतस्तथाऽपि किमिति स्वकार्यं न जनयेत्। नहि खलबिलाद्यन्तर्गतत्वादात्मकार्यं बीजादयो विजहतीत्याह—ज्ञापकत्वाद्धीत्यादि। § 7374

ज्ञापकत्वाद्धि सम्बन्धः स्वात्मज्ञानमपेक्षते।
तेनासौ विद्यमानोऽपि नागृहीतः प्रकाशकः॥
२२६६॥§ 7376

अन्यो हि ज्ञापकधर्मोऽन्यश्चोत्पादकस्य, शब्दस्तु धूमवदर्थस्य ज्ञापको न तु बीजादिवदुत्पादक इत्यदोषः॥ २२६६॥ § 7377

ननु चैकस्य सदसत्त्वे परस्परविरुद्धत्वादयुक्ते, तथा ग्रहणाग्रहणे अपि। अथानयोरविरोधः, क इदानीं प्रद्वेषः सदसत्त्वयोरित्याह—विद्यमानस्येत्यादि।
§ 7378

विद्यमानस्य चार्थस्य दृष्टं न ग्रहणं क्वचित्।
न त्वत्यन्तासतोऽस्तित्वं कांश्चित्प्रत्युपपद्यते॥
२२६७॥§ 7380

विरुद्धौ सदसद्भावौ न स्यातामेकवस्तुनि।
नच तुल्यं विरोधित्वं ज्ञाताज्ञातत्वयोरपि॥
२२६८॥§ 7382

ज्ञानं हि पुरुषाधारं तद्भेदान्न विरुध्यते।
पुरुषान्तरसंस्थं च न (ना ?) ज्ञानं तेन वार्यते॥
२२६९॥§ 7384

एकत्र हि धर्मिणि परस्परविरुद्धधर्माध्यासो विरुद्धः, नतु धर्म्यन्तरे, ग्रहणाग्रहणे च पुरुषभेदेन भिन्नधर्म्याधारत्वादविरुद्धे, न तु सदसत्त्वे, तयोरेकधर्म्याधारत्वेनेष्टत्वादिति समासार्थः॥ २२६७॥ २२६८॥ २२६९॥
§ 7385

ननु च ग्रहणाग्रहणपक्षेऽपि सामर्थ्यादेकाधिकरणे सदसत्त्वे परस्पर-
विरुद्धे तथा (त्रा ?)पि समापतत एव। तथाहि—पदार्थसदसत्त्वाभ्यां ग्र- 626/k
हणाग्रहणे व्याप्ते तन्निबन्धनत्वात्तयोः। अन्यथा तुल्ययोग्यदेशयोः पुरुषयोरेक
एव पश्येन्नापर इत्यत्र कारणं वक्तव्यमित्याशङ्क्याह—अन्धानन्धेत्यादि। § 7386

अन्धानन्धसमीपस्थः शुक्लोन्धैर्नावगम्यते।
गम्यते चेतरैस्तस्य सदसत्त्वे न तान्प्रति॥
२२७०॥§ 7388

यथा ह्यन्धेतरयोः समीपस्थं रूपमविकलचक्षुष एवोपलभन्ते, नेतरे, न च तान्प्रति तस्य शुक्लरूपस्य सदसत्त्वे स्तः, तद्वत्सम्बन्धेऽपीति॥ २२७०॥
§ 7389

किमत्र कारणमित्यपेक्षानिवृत्त्यर्थमुपपत्तिमाह—शक्त्यशक्त्योरित्यादि। § 7390

शक्त्यशक्त्योर्नराणां तु भेदात्तत्राविरोधिता।
न ह्यन्यो दर्शनस्यास्ति सम्बन्धाद्धेतुरत्र हि॥
२२७१॥§ 7392

एतदाचष्टे—नह्यर्थसत्तैवोपलम्भकारणम्, किं तर्हि ?, पुरुषगता च शक्तिः, तेन सत्यप्यर्थे कस्यचित्पुरुषस्य शक्त्यभावादग्रहणमविरुद्धमिति नाग्रहणमर्थासत्त्वेन व्याप्तम्। यद्येवमसत्यपि सम्बन्धे पुरुषाणां शक्त्यशक्तिभेदादर्थस्य ग्रहणाग्रहणे भविष्यत इति सर्वं समानमित्याह—न ह्यन्य इत्यादि। सम्बन्धग्रहणपुरस्सरत्वादर्थप्रत्ययस्येति भावः। अन्य इति हेतुः सम्बन्ध्यते। दर्शनस्येति। शब्दार्थप्रतीतेः। हेतुरित्येतदपेक्षा चेयं षष्ठी। सम्बन्धादित्यन्यापेक्षा पञ्चमी। अत्रेति। शब्दार्थव्यवहारे। अन्ये तु—शक्त्यशक्त्योर्नराणां तु भेदात्तत्राविरोधितेत्यत्रैवोपपत्तिरूपेण वर्णयन्तो व्याचक्षते—सम्बन्धादिति। पुरुषशक्तेरित्यर्थः। अत्रेति शुक्ले॥ २२७१॥ § 7393

दार्ष्टान्तिकमुपसंहरन्नाह—एवमेवेत्यादि। § 7394

एवमेवेन्द्रियैस्तुल्यं व्यवहारोपलम्भनम्।
येषां स्यात्तेऽवबुध्यन्ते ततोऽर्थं नेतरेऽन्धवत्॥
२२७२॥§ 7396

व्यवह्रि(?)यते अस्मादिति व्यवहारः शब्दार्थसम्बन्धः। तस्योपलम्भनम्—परिज्ञानम्। तदिन्द्रियैस्तुल्यम्। तथाहि। येषामेवेन्द्रियमस्ति, तेऽर्थमुपलभन्ते। येषां तु नास्ति, ते सत्यप्यर्थे नोपलभन्ते। एवं येषां सम्बन्धपरिज्ञानमस्ति, ते शब्दादर्थमवबुध्यन्ते। येषां तु नास्ति, ते सत्यपि सम्बन्धे नोपलभन्त इति सर्वं समानं किल॥ २२७२॥ § 7397

योऽयं प्रथमं सम्बन्धस्य कर्त्ता केन तस्मै सम्बन्धः प्रतिपादित इति
627/k वक्तव्यम्, स्वयमेवेति चेन्न, तथैवाऽन्येषामपि प्रसङ्गात्। अथान्यतस्तस्याप्यन्यत इति चेत्, एवं तर्ह्यनादित्वान्न केनचित्क्रियत इति दर्शयति—सर्वेषामित्यादि। § 7398

सर्वेषामनभिज्ञानां पूर्वपूर्वप्रसिद्धितः।
सिद्धः सम्बन्ध इत्येवं सम्बन्धादिर्न विद्यते॥
२२७३॥§ 7400

(यः) शब्दार्थसम्बन्धः स वृद्धव्यवहारपूर्वकः, सम्बन्धत्वादिदानीन्तनसम्बन्धवत्। सम्बन्धश्च विवादास्पदीभूतः सम्बन्ध इति स्वभावहेतुः॥ २२७३॥
§ 7401

एवं तावत्प्रतिमर्त्त्यं न समयः सम्भवतीति प्रतिपादितम्, अधुना प्रत्युच्चारणमेवेति यदुक्तं तत्प्रत्युद्धरन्नाह—प्रत्युच्चारणेत्यादि। § 7402

प्रत्युच्चारणनिर्वृत्तिर्न युक्ता व्यवहारतः।
सर्गादौ न क्रिया नास्ति तादृक्कालो हि नेष्यते॥
२२७४॥§ 7404

इष्यते हि जगत्सर्वं न कदाचिदनीदृशम्।
न महाप्रलयो नाम ज्ञायते पारमार्थिकः॥
२२७५॥§ 7406

रात्रिर्वा प्रलयो नाम लीनत्वात्सर्वकर्मणाम्।
दिवसः सृष्टिसंज्ञश्च सर्वचेष्टाऽतिसर्जनात्॥
२२७६॥§ 7408

देशोत्सादकुलोत्सादरूपो वा प्रलयो भवेत्।
प्रलये तु प्रमाणं नः सर्वोच्छेदात्मके नहि॥
२२७७॥§ 7410

व्यवहारत इति। व्यवहारप्रवृत्तेः। अन्यथा हि पूर्वमकृतसम्बन्धाद्व्यवहारप्रवृत्तिर्न स्यादिति यावत्। साम्प्रतं जगदादौ चेति यदुक्तं तस्य प्रतिविधानमाह—सर्गादौ चेति। तादृगिति। शब्दार्थसम्बन्धशून्यः सृष्टिसंहारात्मकः। अनीदृशमिति। सर्वोच्छेदात्मकम्। तत्र प्रमाणाभावात्। कथं तर्हि लोके प्रलयादिव्यवहारप्रसिद्धिरित्याह—न महाप्रलय इत्यादि। ज्ञायत इति। लोकेन। पारमार्थिक इति। सर्वोच्छेदात्मकः परिकल्पितस्तु न वार्यत इत्यभिप्रायः। तमेव दर्शयति—रात्रिर्वेत्यादि। अथ पारमार्थिकः कस्मान्नेष्यत इत्याह—प्रलये त्वित्यादि॥ ॥ २२७४॥ २२७५॥ २२७६॥ २२७७॥ § 7411

६ प्रलयो] Correction : ; प्रलये (sic !)प्रलयो

भवतु नाम पारमार्थिकः प्रलयः, तथापि तदानीमभ्रष्टस्मृतिप्रज्ञादिसंस्कारकस्यकस्यचिदीश्वरादेः कर्तुरभावान्न सम्बन्धकरणं युक्तमिति दर्शयन्नाह—नचालुप्तेत्यादि। § 7412

नचालुप्तस्मृतिः कश्चित्सृष्टिसंहारकारकः।
ईश्वरादिः स्थिरो युक्तो यः सम्बन्धं प्रकल्पयेत्॥
२२७८॥§ 7414

628/k

न युक्त इति। तस्य विस्तरेण प्रतिषिद्धत्वात्॥ २२७८॥ § 7415
नन्वित्यादिना परस्य प्रत्यवस्थानमाशङ्कते। § 7416

नन्वानुपूर्व्यनित्यत्वादनित्यो वाचको भवेत्।
पदं वाचकमिष्टं हि क्रमाधीना च तन्मतिः॥
२२७९॥§ 7418

वर्णानुपूर्वी हि पदमिष्टं न स्फोटस्तस्याश्च पुरुषेच्छाधीनत्वादनित्यत्वमतो वर्णानामप्यनित्यत्वं प्राप्नोति। वर्णेभ्योऽनर्थान्तरत्वादानुपूर्व्याः। कथमित्याह—पदमित्यादि। तथाहि—वर्णात्मकं पदमेव वाचकमिष्यते, यतो वर्णक्रमकृता पदबुद्धिर्नस्फोटकृता, स च क्रमः पौरुषेयः॥ २२७९॥ § 7419
एतदेव विवृणोति—वर्णाः सर्वगतत्वाद्व इति। § 7420

वर्णाः सर्वगतत्वाद्वो न स्वतः क्रमवृत्तयः।
अनित्यध्वनिकार्यत्वात्क्रमस्यातो विनाशिता॥
२२८०॥§ 7422

पुरुषाधीनता चास्य तद्विवक्षावशाद्भवेत्।
वर्णानां नित्यता तेन भवतां निष्फला भवेत्॥
२२८१॥§ 7424

वो युष्माकं मीमांसकानां वर्णानां सर्वगतत्वान्न देशकृतः क्रमः, नापि कालकृतो नित्यत्वात्तेषाम्, तस्मादभिव्यञ्जकध्वनिकृतः। तस्य चानित्यत्वात्तत्कृतस्याप्यनित्यत्वमिति भावः। प्रयोगः—यदनित्यकृतं तदनित्यं यथा घटादि, अनित्यकृतश्च वर्णक्रम इति स्वभावहेतुः। यत्पुरुषविवक्षावशाद्भव-

ति तत्पौरुषेयत्वेन प्रेक्षावता व्यवहर्त्तव्यम्, यथा पाणिकम्पाक्षिनिकोचादयः, पुरुषेच्छावशाच्च वर्णानां भवति क्रम इति स्वभावहेतुः॥ २२८०॥ २२८१॥
§ 7425

अथापि स्याद्विनैव क्रमेण वर्णा एव श्रोत्रपरिच्छिन्ना अर्थप्रत्यायका भविष्यन्तीत्यत आह—नचेत्यादि। § 7426

नच क्रमाद्विना वर्णा निर्ज्ञाताः प्रतिपादकाः।
क्रमस्यैवं पदत्वं च तस्मादेवं प्रसज्यते॥
२२८२॥§ 7428

पदं वर्णातिरिक्तं तु येषां स्यात्क्रमवर्जितम्।
तेषामेवार्थवत्येषा शब्दनित्यत्वकल्पना॥
२२८३॥§ 7430

नहि क्रमं विना वर्णा एवार्थप्रतिपत्तिहेतवो दृष्टास्तस्मादेषामवश्यं क्रमोऽभ्युपगन्तव्यः। एवं सति क्रमस्यैव पदत्वं वाचकत्वं भवतां मीमांसकानां प्रसज्यते, नतु केवलानां वर्णानाम्। तस्य च क्रमस्यानित्यत्वाद्वाचकस्याप्य- 629/k
नित्यत्वं स्यात्। ततश्च व्यर्था शब्दनित्यत्वकल्पना। तथाहि—वाचकस्य शब्दस्य नित्यत्वं साधयितुमिष्टं नान्यस्य, ततश्च यत्केवलवर्णनित्यसाधनं भवतां तत्प्रस्तुतानुपयोगि। तस्यावाचकत्वात्। यच्च बाध(वाच ?)कं क्रमरूपं न तन्नित्यमभ्युपगतमिति सर्वो विफल एव प्रयासः। येषां पुनस्त्व(वै ?)याकरणानां वर्णव्यतिरिक्तं स्फोटाख्यमनवयवं पदं वाचकमितीष्टं तेषामर्थवत्येषा शब्दनित्यत्वकल्पना। तस्य स्फोटाख्यस्य वस्तुनो नित्यत्वात् ॥ २२८२॥ २२८३॥ § 7431

अत्र परिहारमाह—न तावदित्यादि। § 7432

न तावदानुपूर्वस्य पदत्वं नः प्रसज्यते।
नहि वस्त्वन्तराधारमेतद्दृष्टं प्रकाशकम्॥
२२८४॥§ 7434

अनुपूर्वस्वभाव आनुपूर्वं, तस्यानुपूर्वमात्रस्य नास्माकं वाचकत्वं प्रसज्यते व्यभिचारित्वादिति भावः। तदेव दर्शयन्नाह—नहीत्यादि। वस्त्वन्तराधारमिति। मणिमुक्ताद्याधारम्॥ २२८४॥ § 7435

नापि वर्णाधारमानपूर्वमेव केवलं वाचकमिष्टम्, कथमित्याह—धर्ममात्रमिदमिति। § 7436

धर्ममात्रमिदं तेषां न वस्त्वन्तरमिष्यते।
इत्थं प्रतीयमानाः स्युर्वर्णाश्चैवावबोधकाः॥
२२८५॥§ 7438

न वस्त्वन्तरमिति। स्वतन्त्रवाचकत्वेनेत्यभिप्रायः। अन्यथा हि पारमार्थिको धर्मधर्मिणोर्भेदः स्यात्। स च नाभीष्टः। किं तर्हि वाचकमित्याह—इत्थमित्यादि। इत्थम्—विशिष्टेन क्रमेण। एतदुक्तं भवति—न क्रममात्रं वाचकं, नापि वर्णाधारं, नापि वर्णमात्रं, किं तर्हि ?, वर्णा एव क्रमोपसृष्टा वाचका इति। तेन न क्रमस्य वाचकत्वं प्रति प्राधान्यं तस्य तद्वत्तया प्रतीयमानस्य गुणीभूतत्वात्। किं तर्हि ? वर्णानां तेषां धर्मितया प्रतीतेरिति दर्शितं भवति॥ २२८५॥ § 7439

यदुक्तमनित्यध्वनिकार्यत्वादिति हेतुद्वयं तस्यासिद्धतामाह—नच क्रमस्येत्यादि। § 7440

नच क्रमस्य कार्यत्वं पूर्वसिद्धपरिग्रहात्।
वक्ता नहि क्रमं कश्चित्स्वातन्त्र्येण प्रपद्यते॥
२२८६॥§ 7442

यथैवास्य परैरुक्तस्तथैवेनं विवक्षति।
परोऽप्येवमतश्चास्य सम्बन्धवदनादिता॥
२२८७॥§ 7444

630/k

पूर्वसिद्धपरिग्रहादिति। व्यवस्थितस्यैव क्रमस्योपादानात्। एतदेव स्पष्टयति —वक्ता नहीत्यादि। सम्बन्धवदेव हि क्रमोऽप्यनादिः॥ २२८६॥ २२८७॥तेनेत्यादिनोपसंहरति। § 7445

तेनेयं व्यवहारात्स्यादकौटस्थ्येपि नित्यता।
यत्वतः (यत्क्रमे ?) प्रतिषेध्या नः पुरुषाणां
स्वतन्त्रता २२८८॥§ 7447

न इति कृत्यप्रयोगे कर्त्तरि षष्ठी। कृत्वा न सा दोषो (यत् क्रमेस्वतन्त्रताप्रतिषेधो ?) विहितः। तस्मादसत्यपि पर्वतादिवदस्य क्रमस्य कूटस्थत्वे

वृद्धव्यवहारादेव नित्यत्वमवसेयम्। तदनेन व्यवहारनित्यता कथिता भवति क्रमस्य, न कूटस्थनित्यता यथापर्वतादीनामिति॥ २२८८॥ § 7448

यद्येवं वर्णानामपि क्रमस्येव व्यवहारनित्यत्वं कस्मान्नेष्यत इत्याह—वर्णानामपीति। § 7449

वर्णानामपि न त्वेवमकौटस्थ्येऽपि सेत्स्यति।
नित्येषु सत्सु वर्णेषु व्यवहारात्क्रमोदयः॥
२२८९॥§ 7451

घटादिरचना यद्वन्नित्येषु परमाणुषु।
तदभावे हि निर्मूला रचना नावधार्यते॥
२२९०॥§ 7453

नहि वर्णानां क्रमवदकौटस्थ्यनित्यत्वेऽपि व्यवहारनित्यतयाऽर्थप्रतिपत्तिव्यवहारःसिद्ध्यति। कथं न सिद्ध्यतीत्याह—नित्येष्वित्यादि। यदि हि कूटस्थनित्यतया वर्णा नित्या भवेयुरेवं सति पुरुषपरम्परया व्यवहारसंभवात्क्रमोदयः—क्रमस्यात्मलाभो भवेत्, यथा घटादिरचना परमाणुमूलात्। क्वचित्क्रमादय इति पाठः। तत्रादिशब्देन सम्बन्धप्रत्यभिज्ञानादयो गृह्यन्ते। अथोभयोरपि वर्णपरमाण्वोर्नित्यत्वमन्तरेण कस्माद्रचना न सम्भवतीत्याह—तदभाव इत्यादि। तदभाव इति। वर्णपरमाण्वोर्द्वयोरपि कूटस्थनित्य(भावा)भावे। ननु च घटाद्यारम्भका इव परमाणवो वर्णानामपि सूक्ष्मभागाः सन्ति, यथाहुः— वर्णानामपि वर्णतुरीया भागा इति। तत्कथं वर्णानां कूटस्थनित्यता वर्ण्यते। नैष दोषः। स्फोटदूषणेन प्रतिपादितमेतत्, यथा न वर्णभागाः सन्तीति॥ २२८९॥ २२९०॥ § 7454

किंच—यदि कूटस्थनित्यतया वर्णा नित्या न भवेयुस्तदा सर्वेषां प्रयोक्तृणां परप्रयुक्तानेव शब्दान्ब्रूमह इत्येषा विवक्षा न स्यात्, अथ च भवति, तस्मात्सा वर्णनित्यत्वमन्तरेण न युक्तेति दर्शयन्नाह—परेणोक्तानित्यादि। § 7455

631/k

परेणोक्तान्ब्रवीमीति विवक्षा चेदृशी ध्रुवम्।

१ क्रमस्येव] Correction : ; क्रमस्यैव (sic !)क्रमस्येव

तथा च नित्यतापत्तिर्नचान्यच्चिह्नमस्ति वः॥
२२९१॥§ 7457

ननु च यदि गकारादिक्रमः परमार्थतो न नित्यः, नापि व्यञ्जका ध्वनयो नापि तेषां प्रेरकास्ताल्वादिसंयोगविभागाः, ध्वनीनां प्रेरकांस्तान्न शक्नोति कर्तुम्, यांश्चाभिनवान्करोति न ते दृष्टाः प्रेरकाः, ततश्च कथं वर्णाः क्रमेणाभिव्यक्ता अर्थभेदप्रतीतिहेतवो भवन्तीति सर्वमेतदाशङ्क्य परिहरन्नाह— जात्या यथेत्यादि। § 7458

जात्या यथा घटादीनां व्यवहारोपलक्षणम्।
तथैव चानुपूर्व्यादेर्जातिद्वारेण सेत्स्यति॥
२२९२॥§ 7460

यथा घटादेः सत्यप्यनित्यत्वे जात्याश्रयेण व्यवहारः सिद्ध्यति तथा आनुपूर्व्यादेरनित्यत्वेऽपि सेत्स्यति॥ २२९२॥ § 7461

व्यवहारोपलक्षणं कथमित्याह—ताल्वादिजातय इत्यादि। § 7462

ताल्वादिजातयस्तावत्सर्वपुंसु व्यवस्थिताः।
वक्ता तांश्च ध्वनींस्ताभिरुपलक्ष्य निरस्यति॥
२२९३॥§ 7464

तेषां च जातयो भिन्नाः शब्दाभिव्यक्तिहेतवः।
यावद्वर्णं प्रवर्तन्ते व्यक्तयो वा तदन्विताः॥
२२९४॥§ 7466

तथाहि—ताल्वादिस्थानजातयः सर्वपुरुषसमवायिताल्वादिसमवायात्सर्वपुरुषेषु व्यवस्थिताः। प्रयोक्ता च ताभिरेव ताल्वादिजातिभिस्ताल्वादीन्युपलक्ष्यावधार्यपश्चाद्ध्वनीन्व्यञ्जकान्वायून्निरस्यति—प्रेरयति। नागृहीतविशेषणा विशेषे बुद्धिरिति न्यायात्। तेषां ध्वनीनां यद्यप्यनित्यत्वम्, तथापि गवाश्वादिजातिवद्यावद्वर्णं यावन्तो वर्णास्तावत्यो जातयः सन्ति, ता एव व्यक्तिसहायिन्यः शब्दाभिव्यक्तिहेतवो भवन्ति। यद्वा—ध्वनिव्यक्तय एव जातिसहायिन्यो वर्णानुरूपेण व्यञ्जनाय प्रवर्त्तत इति पक्षान्तरम्॥ २२९३॥ २२९४॥ § 7467

ननु च यद्यपि ध्वनीनां जातयो भिन्नाः सन्ति, तथापि ते ध्वनयो जात्युपलक्षिता अपि न क्रममन्तरेण वर्णाभिव्यक्तिक्रमं सम्पादयितुमल-

म्। तथाहि—तेषां जातिभेदेन भिन्नानामपि न स्वतः क्रमोऽस्ति, निरवयवत्वात्। तत्कथं व्यञ्जकक्रमकृतो वर्णानां क्रमावसाय इत्याशङ्क्याह—तत्रेत्यादि। § 7468

तत्र ताल्वादिसंयोगविभागक्रमपूर्वकम्।
ध्वनीनामानुपूर्व्यं स्याज्जात्या चोभयनित्यता॥
२२९५॥§ 7470

632/k

यद्यपि ध्वनीनामानुपूर्व्यं न स्वतः, तथापि तेषां ताल्वादिसंयोगविभागा एवानुपूर्व्यं सम्पादयन्ति। उभयत्य च ताल्वादिसंयोगादिक्रमस्य ध्वनिक्रमस्य च स्वाश्रयसमवेतजातिद्वारेण नित्यतेति सर्वमनाकुलम्॥ २२९५॥ § 7471

कथं पुनर्जात्या क्रमस्यानित्यस्यापि सतो नित्यत्वं लक्षयितुं शक्यम्। येन तथोपलक्षितो व्यवहाराङ्गतां यास्यतीत्याह—यथैवेत्यादि। § 7472

यथैव भ्रमणादीनां भागा जात्यादिलक्षिताः।
क्रमानुवृत्तिरेवं स्यात्ताल्वादिध्वनिवर्णभाक्॥
२२९६॥§ 7474

यथा भ्रमणरेचनादीनां क्रियाविशेषाणाम्—आदिशब्दात्पिपीलिकादीनां ग्रहणम्, तेषां क्रमानुवृत्तिर्यथा भावा(व ?)जात्यादिना लक्षिता व्यवहाराङ्गम्। अत्राप्यादिशब्देन पिपीलिकादिजातिपरिग्रहः। तथा ताल्वादिध्वनिवर्णभाक्क्रमानुवृत्तिस्ताल्वादिजातिभिर्लक्षिता व्यवहाराय सम्पद्यत इति सम्बन्धः। ताल्वादिध्वनिवर्णभागिति। ताल्वादयश्च ध्वनयश्च वर्णाश्चेति विगृह्य समासः, तान्भजत इति तथोक्ता। अनेन ताल्वादिसंयोगादिक्रमः स्वजात्युपलक्षितो ध्वनिनिरासहेतुः, ध्वनिक्रमोऽपि ताल्वादिसंयोगविभागक्रमपूर्वकः स्वजात्युपलक्षितो वर्णाभिव्यक्तिक्रमः निबन्धनम्, सोऽप्यर्थप्रतीतेरित्युक्तं भवति। क्वचिद्भागा इति पाठः। तत्रैवं सम्बन्धः। यथा भ्रमणादीनां कर्मणां भागा अंशाः क्रमवन्तो जात्या तदन्येन वा केनचिद्धर्मेणोपलक्षिता व्यवहारहेतवो भवन्ति। यथा ताल्वादिभाक्क्रमानुवृत्तिर्व्यवहाराङ्गमिति। केचित्—क्रमानुस्मृतिरेवं स्यादिति पठन्ति। तत्रैवं योजना—यथा (भ्रमण) रेचनादीनां भागा जात्यादिलक्षिताः स्मर्यन्ते। एवं ताल्वादिध्वनिवर्णभाक्ताल्वादिविषया ताल्वादिजात्युपलक्षिताः क्रमानुस्मृतिर्भविष्यति॥ २२९६॥ § 7475

अथवा न ध्वनीनां ताल्वादिसंयोगविभागक्रमकृतमानुपूर्व्यम्, अपि तु स्वत एव, सावयवत्वादिति दर्शयन्नाह—व्यक्तीनामिति। § 7476

व्यक्तीनामेव वा सौक्ष्म्याज्ञातिधर्मावधारणम्।
तद्वशेन च वर्णानां व्यापित्वेऽपि क्रमग्रहः॥
२२९७॥§ 7478

ध्वनीनाम्। तेषां हि ये भागा आरम्भकाः क्रमवन्तस्ते सूक्ष्मा न तैर्व्यवहारसिद्धिः। अतस्तेषु जातिस्वभावा धर्मा नित्यत्वादयः प्रतिनियतशब्दाभिव्यक्तिहेतवोनिरूप्यन्ते। निश्चीयन्त इति यावत्। ततः किं सिद्धं स्यादित्याह—तद्वशेनेत्यादि। सत्यपि हि व्यापित्वे वर्णाः क्रमवद्ध्वनिवशात्क्रमवन्त इव भासन्ते॥ २२९७॥ § 7479

633/k

एवमित्यादिना प्रकृतमुपसंहरति। § 7480

एवं ध्वनिगुणात्सर्वान्नित्यत्वेन व्यवस्थितान्।
वर्णा अनुपतन्तः स्युरर्थभेदावबोधिनः॥
२२९८॥§ 7482

ध्वनिगुणाः—क्रमतीव्र(त्व)मन्दत्वप्रदेशवृत्तित्वादयः। नित्यत्वेन व्यवस्थितानिति। जातिद्वारेण। अनुपतन्तः—अनुवर्त्तमानाः॥ २२९८॥ § 7483

एवं यदि नाम नित्यत्वसर्वगतत्वाभ्यां वर्णानां स्वतःक्रमादयो न सम्भवन्ति, तथापि व्यञ्जकध्वनिगता एते वर्णेष्वर्थप्रतिपत्त्यङ्गमिति विस्तरेण प्रतिपादितम्। साम्प्रतम्—यद्वा कालगता एवैते ध्वन्युपाधिकाः प्रविभागा वर्णेषु गृह्यमाणाः प्रतिपत्त्यङ्गमिति पक्षान्तरं दर्शयन्नाह—आनुपूर्वीत्यादि। § 7484

आनुपूर्वी च वर्णानां ह्र(?)स्वदीर्घप्लुताश्च ये।
कालस्य प्रविभागास्ते ज्ञायन्ते ध्वन्युपाधयः॥
२२९९॥§ 7486

ध्वनयो व्यञ्जका वायव उपाधयो विशेषणभूता येषां कालविभागानां ते तथोक्ताः॥ २२९९॥ § 7487

ननु च काल एको व्यापी नित्यश्चेतीष्टं कालवादिनाम्। यथोक्तम्—व्यापारव्यतिरेकेण परिमाणक्रियावताम्। नित्यमेकं विभुद्रव्यं कालमेके प्रचक्षते॥ इति, तत्कथं तस्य प्रविभागो युज्यत इत्याह—कालश्चैक इत्यादि। § 7488

कालश्चैको विभुर्नित्यः प्रविभक्तोऽपि गम्यते।
वर्णवत्सर्वभावेषु व्यज्यते केनचित्क्वचित्॥
२३०० ॥§ 7490

वर्णेषु व्यज्यमानस्य तस्य प्रत्यायनाङ्गता।
अन्यत्रापि तु सद्भावात्तत्स्वरूपस्य नित्यता॥
२३०१ ॥§ 7492

प्रविभक्तोऽपीत्यपिशब्द एकोऽपि नित्योऽपि विभुरपीति सम्बन्धनीयो भिन्नक्रमत्वात्। कथं प्रविभक्त इत्याह—वर्णवत्सर्वभावेष्विति। एतदुक्तं भवति—यथैकोऽपि नित्यो गकारादिवर्णो यदा केनचिद्ध्वनिविशेषेण क्वचित्प्रदेशे वा व्यज्यते, तदा देशादिविभागेन प्रविभक्तो गम्यते, तथा कालोऽपि। यद्यपि चासौ सर्वपदार्थव्यापी, तथापि यदा केनचित्क्रियाविशेषेण क्वचित्पदार्थे व्यज्यते, तदा प्रविभक्तो गृह्यते, यदा तु वर्णेषु व्यज्यते तदाऽर्थप्रत्ययाङ्गं भवति। यदि तर्हि प्रविभक्तो नित्यविभुत्वं कथं तस्यावगतमित्याह—अन्यत्रापीत्यादि। अन्यत्रापि लताकिसलयादौ सद्भावात्सत्तावत्तस्य नित्यत्वं विभुत्वं 634/k
च सिद्धम्। नित्यताग्रहणमुपलक्षम्॥ २३००॥ ॥ २३०१॥ § 7493

तस्मान्न पदधर्मोऽस्ति विनाशी कश्चिदीदृशः।
तेन नित्यं पदं सिद्धं वर्णनित्यत्ववादिनाम्॥
२३०२ ॥§ 7495

तस्मादित्यादिना स्वपक्षसिद्धेरुपसंहारः। कश्चिदीदृश इति। क्रमादिरूपः
२३०२ § 7496

यदि तर्हि कालधर्मो व्यञ्जकध्वनिधर्मो वा क्रमः, ननु परमार्थतो वर्णधर्मस्तत्कथमस्य प्रत्यायनाङ्गत्वम्। न ह्यन्यधर्मोऽन्यस्य भवतीत्याह—परधर्मेऽपीत्यादि। § 7497

परधर्मेऽपि चाङ्गत्वमुक्तमश्वजवादिवत्।
नित्यतायां च सर्वेषामर्थापत्तिप्रमाणता॥
२३०३ ॥§ 7499

उक्तमिति। नावारूढाश्च गच्छन्त इत्यादिना। नावारूढवचनं हि सकलयानारूढोपलक्षणम्। अश्वजवादिवदिति। यथा—अश्वादिगतो जवस्तदारूढानां पुंसां देशान्तरप्राप्तेर्वृक्षादेश्च गमनप्रतिपत्तेरङ्गं भवति, तथा ध्वनिग-

तोऽपि क्रमो वर्णस्यार्थप्रत्यायनाङ्गमिति। एवं विस्तरेण शब्दानित्यत्वप्रतिज्ञाया अर्थापत्तिप्रमाणबाधितत्वं समर्थ्य, उपसंहरन्नाह—नित्यतायामित्यादि। तस्मादित्युपसंहारोऽत्र द्रष्टव्यः।सर्वेषामिति। न केवलं वर्णस्यार्थप्रतीत्यन्यथानुपपत्त्या नित्यत्वं सिद्धम्, किं तर्हि ?, ताल्वादीनां ध्वनीनां च। यथोक्तं भाष्ये— उच्चरितमात्रे हि विनष्टे शब्दे नचान्योऽन्यानर्थं प्रत्याययितुं शक्नुयादतो न परार्थमुच्चार्येत। अथ न विनष्टस्ततो बहुश उपलब्धत्वादर्थावगम इति युक्तमिति॥ २३०३॥ § 7500

स्ववचनाभ्युपेतागमप्रतीतिबाधामपि प्रतिज्ञायाः प्रतिपादयन्नाह—स्ववाक्यादीत्यादि। § 7501

स्ववाक्यादिविरोधश्च शब्दानित्यत्वसाधने।
प्रतिज्ञोच्चार्यते सर्वा साध्यार्थप्रतिपत्तये॥
२३०४॥§ 7503

नचानित्या ब्रवीत्येषा स्वार्थमित्युपपादितम्।
तेनार्थप्रत्ययापन्नान्नित्यत्वान्नाशबाधनम्॥
२३०५॥§ 7505

आदिशब्देनाभ्युपेतादिविरोधग्रहणम्। उपपादितमिति। नचादृष्टार्थसम्बन्धः शब्दो भवति वाचक इत्यादिना। तेनार्थप्रत्ययापन्नादिति। अर्थप्रत्ययात्—अर्थप्रतीतेः, आपन्नं—सिद्धम्, अर्थप्रत्ययापन्नम्। अर्थप्रतीत्यन्यथानुपपत्तिसिद्धान्नित्यत्वादिति यावत्॥ २३०४॥ २३०५॥ § 7506
635/k

अभ्युपेतबाधामाह—(अर्थाभिधानेति) § 7507

अर्थाभिधानसामर्थ्यमभ्युपेत्य च साधयन्।
पूर्वाभ्युपगतेनापि नाशित्वं बाधते परः॥
२३०६॥§ 7509

अर्थप्रतीतिसामर्थ्यैः प्रतिशास्त्रमुपाश्रितैः।

६ परार्थ] Correction: ; परमार्थ (sic!)परार्थ

२ परः] Correction: ; नरः (sic!)परः

आगमेनापि नाशित्वं बाध्यते सर्ववादिनाम्॥
२३०७॥§ 7511

(आगमबाधामाह—) अर्थप्रतीतिसामर्थ्यैरित्यादि। अर्थप्रतीतौ सामर्थ्यानि यानि शब्दानां तैः। प्रतिज्ञार्थस्य बाधनादित्युपस्कारः॥ २३०६॥ २३०७॥ § 7512

प्रतीतिबाधामाह—सर्वलोकेत्यादि। § 7513

सर्वलोकप्रसिद्ध्या च बाधः पूर्वोक्तया दिशा।
अनुमानविरोधोऽपि प्रागुक्तेनैव हेतुना॥
२३०८॥§ 7515

श्रोत्रजप्रत्यभिज्ञानाच्छब्दाभेदावसायतः।
प्रत्यक्षेण विरुद्धत्वं प्रागेव प्रतिपादितम्॥
२३०९॥§ 7517

पूर्वोक्ता दिक्—समनन्तरश्लोकोक्ता। एवं तु पठितव्यम्। — अर्थप्रतीतिसामर्थ्यैः सर्वलोकावधारितैः। लोकप्रसिद्ध्या नाशित्वं बाधते सर्ववादिनाम्॥ इति। पूर्वोक्तमनुमानादिविरोधं स्मारयन्नाह—अनुमानविरोधोऽपीत्यादि। प्रागुक्तोहेतुर्नानाप्रकारः— देशकालादिभिन्नाश्च गोशब्दव्यक्तिबुद्धयः। समानविषयाः सर्वा नवा नानार्थगोचराः॥ गौरित्युत्पद्यमानत्वात्सम्प्रत्पन्नबुद्धिवदित्यादिना। प्रागेवेति। किंच शब्दस्य नित्यत्वं श्रोत्रजप्रत्यभिज्ञया। विभुत्वं च स्थितं तस्य कोऽध्यवस्येद्विपर्ययम्॥ इत्यनेन॥ २३०८॥ २३०९॥ § 7518

शिष्टानपि पक्षदोषान्हेतुदोषांश्च कांश्चित्प्रतिपिपादयिषुराह—वक्तव्यमित्यादि। § 7519

वक्तव्यं चैष कः शब्दो विनाशित्वेन साध्यते।
त्रिगुणः पौद्गलो वाऽयमाकाशस्याथवा गुणः॥
२३१०॥§ 7521

वर्णादन्योऽथ नादात्मा वायुरूपमवाचतम्।

पदवाक्यात्मकः स्फोटः सारूप्यान्यनिवर्त्तने॥
२३११॥§ 7523

एतेषामस्त्वनित्यत्वं नास्माकं तेषु नित्यता।
अप्रसिद्धविशेषत्वमाश्रयासिद्धहेतुता॥ २३१२॥§ 7525

सिद्धान्तभेदेन शब्दगतान्विकल्पानाह। तत्र सत्त्वरजस्तमःस्वभाव-
636/k त्वात्रि(?)गुणः साङ्ख्यैरिष्टः शब्दः। पौद्गलो दिगम्बरैः। पुद्गलाः परमाणव उच्यन्ते। तेषामयं पौद्गलः। तदात्मक इति यावत्। आकाशगुणः काणादैरिष्टः। वर्णव्यतिरिक्तो नादात्मा लैकिकैः। यथोक्तं पातञ्जले भाष्ये—अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इति। वायुरूपमवाचकं शिक्षाकारैः। यथाहुः—वायुरापद्य(ते) शब्दमा(वा ?)निति। पदस्फोटात्मको वाक्यस्फोटात्मकश्च वैयाकरणैरिष्टः। तद्यथाहुः—नादैराहितबीजायामन्त्येन ध्वनिना सह। आवृत्तिपरिपाकायां बुद्धौ शब्दोऽवधार्यते॥ इति। सारूप्यं—सादृश्यं विन्ध्यवासीष्टम्। बौद्धैरन्यनिवर्त्तनमन्यापोहो वाचकत्वेन य इष्टः। तत्र यद्येवं साङ्ख्यादीष्टानामनित्यत्वं साध्यते तदा सिद्धसाध्यता पक्षदोषः। स्वरूपेणैव निर्दिश्यत इत्यनेन सिद्धरूपस्य निरस्तत्वात्। नच मीमांसकैरीदृशे शब्दे नित्यत्वं साधयितुमिष्टम्। किञ्चास्मान्प्रति त्रिगुणाद्यात्मकस्य शब्दस्य धर्मिणो विशेषस्यासिद्धत्वादप्रसिद्धविशेषत्वं पक्षदोषः। हेतोश्चाश्रयासिद्धतादोषः। तथाविधस्य धर्मिणोऽसिद्धत्वात्॥ २३१०॥ २३११॥ २३१२॥ § 7526

अथेति। § 7527

अथास्मदिष्टः पक्षः स्यात्त्वयमेतद्द्वयं तव।
शब्दमात्रमथोच्येत शब्दत्वं वस्तथासति॥
२३१३॥§ 7529

अनित्यं तच्च सर्वेषां नित्यमिष्टं विरुध्यते।
यत्किञ्चिदिह सामान्यं नित्यं सर्वेण कल्प्यते॥
२३१४॥§ 7531

अथास्माभिर्मीमांसकैर्योऽभिमतो वर्णा एव गकारादयः शब्दो न व्यतिरिक्तः इत्येष पक्षः स्यात्। तथासति बौद्धादेरेतद्द्वयम्—अप्रसिद्धविशेषत्वं प्रतिज्ञादोष आश्रयासिद्धता च हेतुदोष आपद्यते। शब्दमात्रमथोच्येत, साध्यधर्मित्वेनेति शेषः। ततश्च शब्दत्वसामान्यं वो युष्माकम-

नित्यम्, प्राप्नोतीत्यध्याहार्यम्। तथाहि—मात्रशब्देन सर्वविशेषत्यागे कृते किमपरमन्यत्सामान्याच्छब्दमात्रं भवेत्। तस्मात्सामर्थ्याद्भवद्भिः शब्दत्वमेवानित्यं प्रतिज्ञानं स्यात्। भवत्वेवमिति चेत्, नेत्याह—तच्च सर्वेषां नित्यमिष्टमित्यादि। तथाहि बौद्धैरप्यन्यापोहवादिभिरुक्तम्— जातिधर्मव्यवस्थितेरिति। अनेनाभ्युपेतबाधादोष उक्तः। तदेव दर्शयति—यत्किञ्चिदिहेत्यादि। यत्किञ्चित्स्वसिद्धान्तानुसारेण सामान्यं व्यवस्थापितं तत्सर्वं सर्ववादिभिर्नित्यमिष्यते। अन्यथा व्यक्तिवदपरापरोत्पत्तेर्व्यक्तयन्तर्गत्यापना (पाता ?) त्तस्य सामान्यरूपतैव हीयते॥ २३१३॥ २३१४॥ § 7532
637/k

एवं तावत्साध्यधर्मिविकल्पेन पक्षदोषमुद्भाव्येदानीं साध्यधर्मविकल्पेनोद्भिभावयिषुराह—अनित्यत्वं चेत्यादि। § 7533

अनित्यत्वं च नाशित्वं यद्यात्यन्तिकमुच्यते।
ततोऽस्मान्प्रति पक्षः स्यादप्रसिद्धविशेषणः॥
२३१५॥ § 7535

यथाकथंचिदिष्टा चेदनित्यव्यपदेश्यता।
अनभिव्यक्त्यवस्थातः साऽभि व्यक्त्यात्मतेष्यते॥
२३१६॥ § 7537

यद्यात्यन्तिकं निरन्वयप्रध्वंसलक्षणं नाशित्वं यत्तदनित्यत्वमिष्टं साध्यत्वेन तदाअस्मात्—मीमांसकान्प्रत्यप्रसिद्धविशेषणः पक्षदोषः। तथाहि मीमांसकानां कापिलानामिव निरन्वयविनाशित्वविशेषणमसिद्धम्। तिरोभावेऽपि घटादीनां शक्तिरूपेणावस्थानात्। प्रदीपादावपि लघवो ह्यवयवास्तदा देशान्तरं लघु लघु प्रयान्तीति मतत्वात्। अथ यथाकथञ्चिदनित्यव्यपदेशत्वं साधयितुमिष्टं तदा सिद्धसाध्यतादोषः। तथाहि—नित्येष्वप्यभिव्यक्त्यनभिव्यक्त्यवस्थाश्रयेणानित्यव्यपदेश इष्ट एव ॥ २३१५॥ २३१६॥ § 7538

एवं तावदनित्यः शब्द इत्येषा प्रतिज्ञा विस्तरेण दूषिता, इदानीमैन्द्रियकत्वादित्यस्य हेतोर्दोषमुद्भावयन्नाह—केवलैन्द्रियेत्यादि। § 7539

केवलैन्द्रियकत्वे च हेतावत्र प्रकल्पिते।
जात्या साधितयेदानीं व्यभिचारः प्रतीयते॥
२३१७॥ § 7541

४ साऽभि] Correction: ; सा हि (sic !)साऽभि

केवलमैन्द्रियकत्वम्—कार्यत्वे सतीत्यादि विशेषणरहितम्, तस्मिन्निर्विशेषणहेतौ सति, जात्या—सामान्येन, प्राक् प्रसाधितयाऽनैकान्तिको हेतुः। व्यतिरेकासिद्धेः॥ २३१७॥ § 7542

स्यादेतत्—यदि नाम प्रतिवादिनो जातेरभ्युपगमाद्व्यतिरेको न सिद्धस्तथापि बौद्धादेः स्ववादिनो जातेरनभ्युपगमात्सिद्ध एव तत्कथनमनैकान्किकतेत्याह—असिद्ध इत्यादि। § 7543

असिद्धे पक्षधर्मत्वे यथैव प्रतिवादिनः।
न हेतुर्लभ्यते तद्वदन्वयव्यतिरेकयोः॥ २३१८॥§ 7545

य एव तूभयनिश्चितवाची स एव साधनं दूषणं वेति न्यायात् यथा पक्षधर्मस्यान्यतरासिद्धौ हेतुर्दुष्टो भवति तथाऽन्वयव्यतिरेकयोरन्यतरासिद्धौ दुष्ट एव। अन्वयव्यतिरेकयोरसिद्धयोरिति वचनविपरिणामेन सम्बन्धः॥ २३१८॥ § 7546

638/k

यद्युभयसिद्धमेव साधनं दूषणं वा तत्कथं बौद्धं प्रत्यसिद्धया जात्या व्यभिचारोऽभ्यधायि भवतेत्याह—तत्रेत्यादि। § 7547

तत्र यद्यप्यसिद्धा स्याज्जातिः साधनवादिनः।
तावत्तथाऽप्यहेतुत्वं यावत्सा न निराकृता॥
२३१९॥§ 7549

यद्यपि बौद्धादेः साधनवादिनो न जातिर्विपक्षत्वेन सिद्धा, तथाप्याशङ्का न निवर्त्तते। तस्याः प्रतिषेद्धुमशक्यत्वात्। ततश्च संदिग्धविपक्षव्यावृत्तिकतेति भावः ॥ २३१९॥ § 7550

अपरमपि साध्यसाधनयोर्विकल्पान्तरेण दूषणमाह—कार्या चैन्द्रियकत्वादाविति। § 7551

कार्या चैन्द्रियकत्वादौ किंवस्त्विति निरूपणा।
व्यक्तिभ्योऽनन्यनानात्वभेदाभेदेषु च स्फुटा॥
२३२०॥§ 7553

तत्रासाधारणासिद्धसाध्यहीनसपक्षताः।

५ क्षताः] Correction : ; क्षता
(sic !)क्षताः

विकल्पितानुसारेण वक्तव्या वाद्यपेक्षया॥
२३२१॥§ 7555

आदिशब्देनानित्यत्वपरिग्रहः। तत्र किमात्मकमैन्द्रियकत्वादीति निरूपणा कार्या, किं व्यक्तिभ्योऽनन्यदाहोस्विद्व्यतिरिक्तम्, तथा व्यतिरेकपक्षे तदा भेदेषु च विचारणा कार्या, किं तद्व्यतिरिक्तं भिन्नभिन्नमाहोस्विदभिन्नमेकमेवेति यावत्। तत्राव्यतिरेकपक्षे ऐन्द्रियकत्वस्य हेतोरसाधारणता, व्यक्तेरव्यतिरेकात्, तत्स्वरूपवत्तस्यव्यक्त्यन्तरानुगमाभावात्। व्यतिरेकपक्षेऽपि मीमांसकस्य व्यतिरेकानिष्टेः प्रतिव्यक्तिभिन्नमभिन्नं वा असिद्धमित्यसिद्धता हेतोः। अतएव भेदाभेदपक्षे दोषो नोक्तः। सिद्धे हि व्यतिरेके तस्यावकाशात्। अनित्यत्वस्यापि व्यतिरेकपक्षे साध्यहीनसपक्षता। दृष्टान्तस्य साध्यविकलतेति यावत्। अव्यतिरेकपक्षेऽपि साध्यहीनतैव दृष्टान्तस्य, व्यक्तेर्व्यक्तयन्तरानुगमाभावात्॥ २३२०॥ २३२१॥ § 7556

इदानीं प्रयत्नानन्तरीयत्वादित्यस्य हेतोरनैकान्तिकत्वमाह—प्रयत्नानन्तरमित्यादि। § 7557

प्रयत्नानन्तरं ज्ञानं कृतकानित्यसाधनम्।
यत्तत्राप्यस्त्यनेकान्तः क्षणिकव्यतिरेकिणः(भिः ?)॥
२३२२॥§ 7559

प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधव्योमभिस्त्रिभिः।
बुद्धिपूर्वविनाशे हि प्रतिसङ्ख्यानिरोधधीः॥
२३२३॥§ 7561

639/k

अबुद्धिपूर्वकस्तेषां निरोधोऽप्रतिसङ्ख्यया।
तौ च द्वावप्यनाशित्वादिष्टावकृतकावपि॥
२३२४॥§ 7563

प्रयत्नानन्तरमुपलभ्यमानत्वं हि प्रयत्नानन्तरीयत्वमुच्यते। तच्च विपक्षेऽपि हेतोरनैकान्तिकत्वान्न कृतकानित्यत्वसाधनम्। तथाहि बौद्धैः प्रतिसङ्ख्यानिरोधोऽप्रतिसङ्ख्यानिरोध आकाशं चेति त्रिविधमसंस्कृतं वस्तु क्षणिकव्यतिरिक्तमक्षणिकं नित्यं चेष्टम्। तत्र चास्य हेतोर्वृत्तिरिति दर्शयन्नाह—

१ वाद्यपेक्षया] Correction: ; चाद्यपेक्षया (sic!)वाद्यपेक्षया

बुद्धिपूर्वेत्यादि। यो बुद्धिपूर्वो घटादीनां विनाशः स प्रतिसङ्ख्यानिरोधः, यत्त्वबुद्धिपूर्वः सोऽप्रतिसङ्ख्यानिरोध इत्येषा किल बौद्धप्रक्रिया। तेषामिति। घटादीनाम्। तौ चेति। प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधौ। अकृतकावपीति। अपिशब्दान्नित्यावपि॥ २३२२॥ २३२३॥ २३२४॥ § 7564

यथा चानयोरकृतकत्वनित्यत्वे। यथा न तत्र हेतौ वृत्तिस्तथा परमतेनैवोपपादयन्नाह—आहुरित्यादि। § 7565

आहुः स्वभावसिद्धं हि ते विनाशमहेतुकम्।
भवति ह्यग्निसम्बन्धात्काष्ठादङ्गारसन्ततिः॥
२३२५॥§ 7567

स्वाभाविको विनाशस्तु जातिमात्रप्रतिष्ठितः।
सूक्ष्मः सदृशसन्तानवृत्तेरनुपलक्षितः॥
२३२६॥§ 7569

यदा विलक्षणो हेतुः पतेत्सदृशसन्ततौ।
विलक्षणेन कार्येण स्थूलोऽभिव्यज्यते तदा॥
२३२७॥§ 7571

तेनासदृशसन्तानो हेतोः संजायते यतः।
तेनैवाक्रियमाणोऽपि(नाशोऽ)भिव्यज्यते स्फुटः॥
२३२८॥§ 7573

त इति बौद्धाः। ननु च (नाश्यते) अग्निना काष्ठं दण्डेन घट इति नाशहेतवो दृश्यन्ते, तत्कथमहेतुकत्वमस्येत्याह—भवति हीत्यादि। वह्न्यादयो हि तत्राङ्गारादिपदार्थान्तरहेतुत्वेनान्वयव्यतिरेकाभ्यां निश्चिता न विनाशस्य। तस्य निसर्गसिद्धत्वात्। यदि तर्हि स्वाभाविको नाशः किमिति वह्न्यादिसंपातात्प्रागपि नोपलक्ष्यत इत्याह—सूक्ष्म इत्यादि। सदृशापरापरोत्पत्तेर्विप्रलब्धा हि मन्दा नावस्यन्ति (सूक्ष्मं नाशम्)। सदृशसन्तानोत्पत्त्या तूत्प्रेक्षन्ते (अविनष्टमेव।) विलक्षणो हेतुर्मुद्गरादिः। विलक्षणं कार्यं कपालादि। अस्यां किलावस्थायां विनाशस्य स्थूलत्वं व्यक्तीभवति। तेनेत्यादिनोपसंहारः। असदृशस-
640/k न्तान इति। विलक्षणः। हेतो र्यत इति सामानाधिकरण्यम्। तेनैवेति।

हेतुना। यत इति यो निर्दिष्टः। तस्याभिव्यज्यत इति परेणाभिसम्बन्धः॥ २३२५॥ २३२६॥ २३२७॥ २३२८॥ § 7574

विपक्षवृत्तितां हेतोरुपदर्शयन्नाह—स मुद्गरेत्यादि। § 7575

स मुद्गरप्रहारादिप्रयत्नानन्तरीयकः।
यस्मादकृतको दृष्टो हेतुः स्याद्व्यभिचार्यतः॥
२३२९॥§ 7577

स इति। द्विविधोऽपि निरोधः, मुद्गरप्रहारादिप्रयत्नानन्तरज्ञानो मुद्गरप्रहारादिप्रयत्नानन्तरीयक उच्यते॥ २३२९॥ § 7578

त्रिभिरित्युक्तम्। तत्र द्वाभ्यां व्यभिचारमुपदर्श्य तृतीयेनाप्याकाशेन व्यभिचारमुपदर्शयन्नाह—आकाशमपीत्यादि। § 7579

आकाशमपि नित्यं सद्यदा भूमिजलावृतम्।
व्यज्यते तदपोहेन खननोत्सेच नादिभिः॥
२३३०॥§ 7581

प्रयत्नानन्तरं ज्ञानं यदा तत्रापि दृश्यते।
तेनानैकान्तिको हेतुर्यदुक्तं तत्र दर्शनम्॥
२३३१॥§ 7583

तदपोहेनेति। तस्य भूम्यादेः खननादिकरणभूतैरपनयेन। तत्रेति। शब्दे।दर्शनम्—प्रयत्नानन्तरज्ञानम्॥ २३३०॥ २३३१॥ § 7584

एवं हेतुदोषानभिधाय दृष्टान्तदोषान्वक्तुकाम आह—सपक्षोऽपीत्यादि। § 7585

सपक्षोऽपि विकल्पोऽत्र श्रुत्यर्थे साध्यहीनता।
व्यक्तिलक्षणपक्षेऽपि जात्यन्यानन्यकल्पना॥
२३३२॥§ 7587

अन्यत्वे धर्म्यसिद्धेर्नोऽनन्यत्वेपि परान्प्रति।

४] Correction: ; (च्छेद ?) (sic!)

अविशेषेऽपि नानित्यं न नित्यं वस्तु तन्मम॥
२३३३॥§ 7589

अंशो ह्येतस्य जात्याख्यो नित्यो ध्वंसीतरो मतः।
शबलाकारमेकं हि वस्तु प्राक्प्रतिपादितम्॥
२३३४॥§ 7591

सपक्षो दृष्टान्तः। स किं श्रुत्यऽर्थोऽभिप्रेतः आहोस्विद्व्यक्तिः। यदि श्रुत्यर्थस्तदा साध्यविकलता दृष्टान्तदोषः। तथाहि—श्रुतिः शब्दः। तस्यार्थोऽभिधेयः। स पुनः सामान्यं घटत्वादि, नच (तच्च ?) सर्ववादिनां नित्यमेवेष्टमिति न तत्रानित्यत्वस्य साध्यधर्मस्यानुगमः। क्वचिज्जात्यर्थ इति पाठः। तत्र कर्मधारयः समासःकार्यः। अर्थस्तुल्य एव। अथ द्वितीयः पक्षस्तदाऽपि
641/k तस्या व्यक्तेर्दृष्टान्तत्वेनेष्टाया जात्यन्यानन्यकल्पना कार्या। किं सा व्यक्तिर्जातिरन्या, आहोस्विदनन्या। य(दाऽन्या) तदा दृष्टान्तधर्मिणो मीमांसकं प्रत्यसिद्धिः। नहि मीमांसको वैशेषिकादिव(दे)कान्तेन व्यक्तेरन्यां जातिमिच्छति। यथोक्तम्— स्थितं नैव तु जात्यादेः परत्वं व्यक्तितो हि न इति। अथानन्यपक्षस्तदा परान् बौद्धादीन्प्रति दृष्टान्तधर्म(र्म्य?)सिद्धिः। नहि परे व्यक्तेरनन्यां जातिं मन्यन्ते। अथ भेदाभेदविकल्पमवधूय घटोनिदर्शनत्वेनोपादीयते, तदाऽप्यस्मान्प्रति साध्यविकलता दृष्टान्तस्ये(ति) निदर्शयन्नाह—अविशेषेऽपीत्यादि। तदिति। घटवस्तु। कथमित्याह—अंश इत्यादि। एतस्य हि घटवस्तुनो जातिसंज्ञको भागो नित्यः। इतरस्तु व्यक्तिसंज्ञको ध्वंसी— विनाशी। स्यादेतत्कथमेकस्य परस्परविरुद्धं स्वभावद्वयं युक्तमित्याह—शबलाकारमित्यादि॥ २३३२॥ २३३३॥ २३३४॥ § 7592

पुनरपि साध्यधर्मविकल्पमुखेन दृष्टान्तदोषान्वक्तुकाम आह—अनित्यतेत्यादि। § 7593

अनित्यता विकल्प्यैवं नाशश्चेत्साध्यहीनता।
ममान्यस्यां तु भवतामित्येषा दूषणोक्तिदिक्॥
२३३५॥§ 7595

यद्यनित्यता निरन्वयविनाशलक्षणा साध्यत्वेनेष्टा तदा मम मीमांसकस्य दृष्टान्ते साध्यविकलता। न ह्यस्माभिरत्यन्तसमुच्छेदो भावानामिष्टः, शक्तिरूपेणावस्थानात्। यद्यपि नाश इति सामान्यशब्दस्तथापि प्रकरणान्निरन्वयविनाशात्मकेऽर्थविशेषेऽस्यवृत्तिर्विज्ञायते। अन्यथा कथं साध्यविकलताप्रसङ्गो दृष्टान्तस्य योक्ष्यते। ननु चानित्यत्वं नाशित्वं यद्यात्यन्तिकमुच्येतेत्यादिना अनित्यता विकल्पितैव, तत्किमिति भूयोऽपि विकल्प्यते।

सत्यम्, सा हि पक्षस्य दोषोद्भावनार्थमिदानीं तु दृष्टान्तस्येति विशेषः। अथ न निरन्वयविनाशलक्षणाऽनित्यताऽभिप्रेता किं त्वन्यैवाविर्भा वतिरोभावलक्षणा, अत्राह—अन्यस्यामिति। अनित्यतायामिति सम्बन्धः। भवतामिति। साध्यहीनतेति योजनीयम्। तत्रापि दृष्टान्तस्येति शेषः। नहि भवद्भिर्बौद्धैः साङ्ख्यैरिव सान्वयो विनाश इष्यते। तस्मादृष्टान्तस्य साध्यविकलता भवत्पक्षे स्यादित्येष शब्दानित्यत्वसाधनदूषणमार्गो विदुषामाख्यातः, अन्यदपि प्राज्ञैः स्वयमभ्यूह्य कर्त्तव्यम्॥ २३३५॥ § 7596

पदार्थेत्यादिना परस्य चोद्यमाशङ्कते। § 7597

पदार्थपदसम्बन्धनित्यत्वे साधितेऽपि वा।
नैव वेद प्रमाणत्वं वाक्यार्थं प्रति सिध्यति॥
२३३६॥ § 7599

642/k

समयात्पुरुषाणां हि गुणवृद्ध्यादिवन्मतिः।
निष्कारणोऽपि सन्नर्थो याज्ञिकैः परिकल्पितः॥
२३३७॥ § 7601

अपिचास्य कथावत्तु सङ्घातात्पौरुषेयता।
नचाप्तः पुरुषो वास्ति तेन वेदाप्रमाणता॥
२३३८॥ § 7603

विशिष्टसाधनावच्छिन्नक्रियाविशेषविधिप्रतिषेधलक्षणो हि वाक्यार्थः। तत्रैव चोदनायाः प्रमाण्यं न पदार्थे। ततश्च वेदस्य प्रामाण्ये साध्ये यत्पदपदार्थतत्सम्बन्धानां त्रयाणामपि नित्यत्वप्रतिपादनं तत्प्रकृतानुपयोगि। किं च—या या वाक्यार्थप्रतिपत्तिः सा सङ्केतप्रभवा, यथा—आद्गुणइत्यादेर्वाक्यात् गुणवृद्ध्यादिमतिः,वाक्यार्थप्रतिपत्तिश्च चोदनावाक्यसमुद्भवेति स्वभावहेतुः। एतदेव दर्शयति—समयादित्यादि। गुणवृद्ध्यादिवदिति। सप्तम्यर्थे वतिः। अस्यैव समर्थनमाह—निष्कारणोऽपीत्यादि। निष्कारणोऽपि निर्निबन्धनोऽपि सन् स्वोत्प्रेक्षया निरङ्कुशया याज्ञिकैराजीविकार्थमेवाग्निहोत्रं जुहुयात्स्वर्गकाम इत्यादिवेदवाक्यार्थः परिकल्पित इति सम्भाव्यम्। किं च यत्सङ्घातरूपं तत्पौरुषेयं, यथा नाटकाख्यायिकादिकथा, पदसङ्घातश्च वेद इति स्वभाव-

३ वेद] Correction: ; चेह (sic!)वेद

हेतुः। ततश्च पौरुषेयत्वाद्रथ्यापुरुषवाक्यवदप्रमाणं वेदः स्यात्। आप्तप्रणीतत्वात्पौरुषेयोऽपि प्रमाणं भविष्यतीति चेदाह—न चाप्त इत्यादि॥ २३३६॥ २३३७॥ २३३८॥ § 7604

सम्बन्धेत्यादिना प्रतिविधत्ते। § 7605

सम्बन्धाकरणन्यायाद्वक्तव्या वाक्यनित्यता।
दृष्टार्थव्यवहारत्वाद्वृद्धादौ सम्भवेदपि॥
२३३९ ॥§ 7607

मतिः सामयिकी वेदे न त्वेषा युज्यते यतः।
स्वर्गयागादिसम्बन्धः केन दृष्टो ह्यतीन्द्रियः॥
२३४० ॥§ 7609

पदपदार्थयोः सम्बन्धाकरणे यो न्याय उक्तः— श्रोतुः कर्तुं च सम्बन्धं वक्ता कं प्रतिपद्यतामित्यादिना, तत एव वैदिकवाक्यस्यापि नित्यता वक्तव्या। समयात्पुरुषाणां हि गुणवृद्ध्यादिवन्मतिरित्यत्रानैकान्तिकतामाह—दृष्टार्थव्यवहारत्वादित्यादि। अदेङादौ दृष्टेऽर्थे गुणादिव्यवहारात्समयात्तत्र सम्भाव्यत एव प्रतीतिः, नतु वेदे, स्वर्गादेरतीन्द्रियत्वेन समयस्य कर्तुमशक्यत्वात्॥ २३३९॥ २३४०॥ § 7610

यद्येवमानर्थक्यं तर्हि प्राप्तमस्येत्याह—नचानर्थकता तस्येति। § 7611
643/k

नचानर्थकता तस्य तदर्थप्रत्ययोदयात्।
सङ्ग्गातत्वस्य वक्तव्यमीदृशं प्रतिसाधनम्॥
२३४१ ॥§ 7613

वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।
वेदाध्ययनवाच्यत्वादधुनाध्ययनं यथा॥
२३४२ ॥§ 7615

६ कर्तुं च] Correction : ; कर्तुश्च (sic !)कर्तुं च

तस्येति। वेदस्य। सङ्घातत्वादित्यत्रापि साधने प्रतिसाधनेनानैकान्तिकतामेव दर्शयन्नाह—सङ्घातत्वस्येत्यादि॥ २३४१॥ २३४२॥ § 7616

ननु च भारताध्ययनेऽपि शक्यमेवं वक्तुम्, यद्भारताध्ययनं तत्सर्वं गुर्वध्ययनपूर्वकं यथेदानीन्तनमिति। न चैवं शक्यते कर्त्तुम्। तस्मात्तद्वदनैकान्तिकता प्रतिसाधनस्येत्याशङ्क्याह—भारतेऽपीत्यादि। § 7617

भारतेऽपि भवेदेवं कर्तृस्मृत्या तु बाध्यते।
वेदे तु तत्स्मृतिर्यापि साऽर्थवादनिबन्धना॥
२३४३॥§ 7619

भारतेऽपि भवेदेवं प्रसञ्जनं, तत्र कर्त्ता व्यासः स्मर्यत इति तया कर्तृस्मृत्या प्रतिज्ञार्थस्य बाधितत्वादप्रसङ्गः। वेदे तु न स्मृतिः। कर्तुरिति शेषः। ननु च वेदेऽपि कर्त्ता स्मर्यत एव। यथा— अग्निरावश्चक्रुः सामानि सामगिरौ भगवति कपोतके अधर्वानाङ्गिरस इत्यत आह—यापि साऽर्थवादनिबन्धनेति। यापि वेदेकर्तुः स्मृतिः साऽर्थवादनिबन्धना—अर्थपरं वचनमर्थवादः, तन्निबन्धनं यस्याः सा तथोक्ता। तथाहि चक्रुरिति न करणार्थपरः करोतिः। किं तर्हि स्मरणार्थः।चक्रुः—स्मृतवन्म इत्यर्थः॥ २३४३॥ § 7620

कथमयमर्थोऽवसित इत्याह—अतीतानागतावित्यादि। § 7621

अतीतानागतौ कालौ वेदकारवियोगिनौ।
कालत्वात्तद्यथा लोके (कालो ?) वर्त्तमानः
समीक्ष्यते २३४४§ 7623

ब्रह्मादयो न विद्यानां कर्त्तार इति गम्यताम्।
पुरुषत्वादिहेतुभ्यस्तद्यथा प्राकृता नराः॥
२३४५॥§ 7625

प्रमाणद्वयं सुगमम्॥ २३४४॥ २३४५॥ § 7626

ततश्चेत्यादिना प्रकृतं सकलमुपसंहृत्य प्रमाणयति। § 7627

ततश्च गम्यतां व्यक्तममृषा वैदिकं वचः।

५ तत्स्मृति] Correction : ; न स्मृति (sic !)तत्स्मृति

५ प्राकृता] Correction : ; प्रकृता (sic !)प्राकृता

स्वार्थे वक्त्रनपेक्षत्वात्पदार्थे पदबुद्धिवत्॥
२३४६॥§ 7629

644/k

तत्कृतः प्रत्य(यः सम्यग्यदयं नित्यवाक्यजः।
वाक्यस्वरूपविषयप्रत्ययस्तद्भवो यथा॥
२३४७॥§ 7631

चोदनावाक्यजनितप्रत्ययस्य प्रमाणता।
आप्तवाक्यसमुद्भूतप्रत्ययस्येव सिद्ध्यति॥
२३४८॥§ 7633

यतोऽयं प्रत्ययस्तावदनाप्ताकृतवाक्यजः।
कालावस्थादिभेदेऽपि विसंवादोऽस्य नास्ति यत्)॥
२३४९॥§ 7635

प्रमाणेऽव स्थिते वेदे शिष्याचार्यपरम्परा।
(अनादिः कल्प्यमानाऽपि) निर्दोषत्वाय कल्पते॥
२३५०॥§ 7637

यद्यत्र कर्तृभूतवक्त्रनपेक्षं ज्ञानमुत्पादयति, तत्तत्र मृषा न भवति, यथा पदार्थे पदं, कर्तृभूतपुरुषवक्त्रनपेक्षं स्वार्थे प्रत्ययमुत्पादयति वेदवाक्यमिति व्यापकविरुद्धोपलब्धिः। कर्तृभूतपुरुषसापेक्षज्ञानोत्पादकत्वेन मृषात्वस्य व्याप्तत्वात्। तद्विरुद्धं च स्वार्थे वक्त्रनपेक्षत्वम्। पदबुद्धिवदिति। पदानामविसंवादिप्रत्ययनिमित्तत्वप्रदर्शनपरमेतत्। नतु पदबुद्धिर्दृष्टान्तत्वेनाभिप्रेता। किं तर्हि ?। पदान्येव। तथाह्यत्र शब्दात्मकः साध्यधर्मी, तस्य चाविसंवादिज्ञानोत्पत्तिनिमित्तत्वेनामृषात्वे साध्ये तथाभूत एव दृष्टान्तधर्मी न्याय्यः। अन्यथा साध्यविकलता दृष्टान्तस्य स्यात्। तथाऽपरः प्रयोगः—यो नित्यवाक्यजनितः प्रत्ययः स यथार्थत्वेन सम्यक्, यथा वाक्यस्वरूपविषयः, नित्यवाक्यजनितश्चाग्निहोत्रादेः स्वर्गादिसंसिद्धिनिश्च-

८ प्रमाणेऽव] Correction : ; प्रमाणे च (sic !)प्रमाणेऽव

य इति स्वभावहेतुः। पूर्वं विस्तरेण नित्यत्वस्य प्रतिपादितत्वान्नासिद्धो हेतुः। चोदनेत्यादि पूर्वमेव व्याख्यातम्। तथाऽपरो प्रयोगो—योऽनाप्ताप्रणीतवाक्यजनितः प्रत्ययो(य)श्चदेशकालनरावस्थाभेदादो विसंवादरहितः स प्रमाणम्, यथाऽऽप्तवाक्यजनितः प्रत्ययः, तथा चायं चोदनावाक्यजनितः प्रत्यय इति स्वभावहेतुः। प्रथमस्य हेतोर्नासिद्धिः। विस्तरेणापौरुषेयत्वस्य प्रसाधितत्वात्। नापि द्वितीयस्य। यथोक्तम्—नच स्वर्गकामो यजेतेत्यतो वचनात्संदिग्धमवगम्यते, भवति वा स्वर्गो न वा भवतीति। नचासंदिग्धमवगम्यमानमिदं मिथ्या स्यात्। यो हि जनित्वा प्रध्वंसतेनैतदेवमिति स मिथ्याप्रत्ययो न चैष कालान्तरे अवस्थान्तरे पुरुषान्तरे वा विपर्येति तस्मादवितथ इति। तस्मात्सिद्धमालोकवत्सर्वलोकसाधारणो धर्मादिव्यवस्थाहेतुः स्वत एव प्रमाणं वेद इति। ततश्च चित्तमात्रतादिनयो यो बौद्धादिभिर्वर्ण्यते सोऽयुक्त इति स्थितम्॥ २३४६॥ २३४७॥ २३४८॥ २३४९॥ २३५०॥ § 7638

645/k

ननु यदि स्वत एव प्रमाणमालोकवत्सर्वसाधारणो वेदः किमिति केचित्त्र बौद्धादयो विप्रतिपद्यन्ते। नहि तान्प्रति तस्याप्रामाण्यं युक्तमित्याशङ्क्याह—तस्मादित्यादि। § 7639

तस्मादालोकवद्वेदे सर्वलौकिकचक्षुषि।
उलूकवत्प्रतीघातः किलान्येषामधर्मजः॥
२३५१॥ § 7641

यथा किल पटुतरकिरणनिकरप्रोत्सारितसकलतिमिरप्रसरे सवितरि सकलजनसाधारणचक्षुषि च समन्ताद्भात्यपि स्वकर्मापरावा(धा?)नुरूपासंज्ञापटुतरलोचनस्योलूकादेर्न रूपमवतरति दर्शनपथम्, एवमधर्मतिमिरोपहतबुद्धिलोचनाः प्रतिहतिमेवासादयन्ति स्थितेऽपि सकललोकैकचक्षुषि वेदे शाक्यादय इति। किलशब्दोऽरुचिसूचकः॥ २३५१॥ § 7642

तामेवाभिव्यनक्ति—सर्वमेतदित्यादि। § 7643

सर्वमेतद्द्विजातीनां मिथ्यामानविजृम्भितम्।
घुणाक्षरवदापन्नं सूक्तं नैषां हि किञ्चन॥
२३५२॥ § 7645

घुणाक्षरवदिति। काकतालीयन्यायेनापीत्यर्थः॥ २३५२॥ § 7646

२ योऽनाप्ता] Correction: ; योऽनाप्त (sic!)योऽनाप्ता

तत्र यदुक्तं यन्मिथ्यात्वहेतुदोषसंसर्गरहितं तदवितथज्ञानकारणमित्यादि। तदत्रहेतोस्तावत्सिद्धत्वमभ्युपगम्यानैकान्तिकतामुद्भावयन्नाह—कर्तर्यसत्यपीत्यादि। § 7647

कर्तर्यसत्यपि ह्येषा नैव सत्यार्थतां व्रजेत्।
तद्धेतुगुणवैकल्याद्दोषाभावे मृषार्थवत्॥
२३५३॥§ 7649

एषेति।श्रुतिः। यथा रागादियुक्तो मृषावादी दृष्ट इत्यन्वयव्यतिरेकाभ्यां गिरा मिथ्यात्वहेतवो दोषा निश्चितास्तथा कृपादिगुणयुक्तः सत्यवाक् दृष्ट इति कृपादयो गुणाः सत्यत्वहेतव इति। ततश्च कारणनिवृत्त्या मिथ्यात्ववत्सत्यत्वमपि निवर्त्तेत।सत्यप्यपौरुषेयत्वे सत्यत्वं न सिद्ध्यत्य(तोऽ)नैकान्तिकता हेतोः॥ २३५३॥ § 7650

अथ गुणनिवृत्तिः कथं निश्चितेत्याह—गुणाः सन्तीत्यादि। § 7651

गुणाः सन्ति न सन्तीति पौरुषेयेषु शङ्क्यते।
आनर्थक्यमतः प्राप्तं गुणाशङ्कैव नास्ति नः॥
२३५४॥§ 7653

यदेव दोषाभावे कारणं भवताऽभ्यधायि तदेव सत्यत्वहेतुगुणाभावेऽपीति दर्शयति॥ २३५४॥ § 7654

646/k

अत इत्यादिनोपसंहृत्य, कारणानुपलब्ध्या सत्यत्वमिथ्यात्वयोरभावप्रसङ्गं दर्शयति। § 7655

अतः सत्यत्वमिथ्यात्वहेतूनां नच संश्रयात्।
प्रज्ञादयाऽकृपादीनामभावान्नास्ति तद्द्वयम्॥
२३५५॥§ 7657

तत्र प्रज्ञादयः सत्यत्वहेतवो मिथ्यात्वहेतवस्त्वकृपादय इति यथाक्रमं सम्बन्धः।द्वयमिति। सत्यत्वमिथ्यात्वे॥ २३५५॥ § 7658

द्वयाभावे सति यत्प्रसज्यते तद्दर्शयति—आनर्थक्यमित्यादि। § 7659

आनर्थ्यक्यमतः प्राप्तं षडपूपादिवाक्यवत्।

अर्थाश्चेत्सम्प्रतीयन्ते क्रियाकारकयोगिनः॥
२३५६॥§ 7661

एषा स्यात्पुरुषाख्यानादुर्वशीचरितादिवत्।
प्रतिपत्तिरतादर्थ्येऽप्यस्य प्रकृतितस्तव॥
२३५७॥§ 7663

षडपूपा दश दाडिमानीत्याद्युन्मत्तकवाक्यवदानर्थक्यं वेदस्य प्राप्तम्। ननु चानर्थक्यं वेदस्य साधयतो बौद्धस्य दृष्टबाधा प्रतिज्ञाया भवेत्। तथा ह्यग्निहोत्रात्स्वर्गो भवतीत्यतो वाक्यादर्थप्रतीतिः प्रत्यक्षमनुभूयते। सा कथमपोह्यत इत्याशङ्क्य परस्य वचनावकाशं परिहरति—एषेत्यादि। एवं मन्यते—यदि हि स्वातन्त्र्येणानर्थक्यं वेदस्य साध्येत तदा स्यात्प्रतिज्ञाबाधा, यावता प्रसङ्गापादनमेतत्क्रियते। न च तत्र प्रसङ्गेन प्रतिज्ञाबाधासम्भवः, तत्र प्रतिज्ञायमानस्याभावात्। केवलं परस्यैव व्यापकधर्मनिवृत्त्यापि व्याप्यनिवृत्तिमनिच्छतोऽनिष्टापत्त्या वचनव्याघातः प्रतिपाद्यते। नापि दृष्टबाधा। तथाहि—पुरुषव्याख्यानवशादेषा प्रतीतिर्भवेदनर्थकादपि वेदात्। यथा केनचिदग्निहोत्रात्स्वर्गो भवतीत्यादिवेदवाक्यस्य भरतोर्वश्यादिचरितमनेनाभिधीयत इत्यस्मिन्नर्थेऽनभिज्ञाय व्याख्याते पश्चात्तस्य ततो वाक्यात्तदर्थप्रतीतिर्भवत्येव। नच तत्तेनार्थेनार्थवत्। तद्वदियमर्थप्रतीतिः प्रकृत्या निरर्थकादपि वेदाद्भवेदिति कुतो दृष्टबाधा प्रतिज्ञायाः॥ २३५६॥ २३५७॥ § 7664

किञ्च—भवतु नाम मिथ्यात्वहेतोर्दोषस्यैव निवृत्तिर्न गुणस्य, तथापि हेतोरनैकान्तिकत्वमनिवार्यमेवेति दर्शयन्नाह—दोषाभावेऽपीत्यादि। § 7665

दोषाभावेऽपि सत्यत्वं न सिध्यत्यन्यभावतः।
आनर्थक्याख्यमप्यस्ति तस्माद्राश्यन्तरं परम्॥
२३५८॥§ 7667

647/k

यदि हि सत्यत्वमिथ्यात्वव्यतिरेकेण शब्दानां राश्यन्तरं न स्यात्, तदेकराश्यभावे द्वितीयराशिसद्भावो नान्तरीयकः स्यात्। यदा त्वानर्थक्यमपि तृतीयं राश्यन्तरमस्ति, तदा न मिथ्यात्वनिवृत्त्या सत्यत्वनिश्चयोऽपरस्यापि तृतीयस्यानर्थकस्याविनिवृत्तेः॥ २३५८॥ § 7668

अथ सत्यार्थविज्ञानजन्मशक्तः स्वतः स्थितः।

वेदो नरनिराशंसः सत्यार्थोयमतो मतः॥
२३५९ ॥§ 7670

यद्येवं सर्वदा ज्ञानं नैरन्तर्येण तद्भवेत्।
सदाऽवस्थितहेतुत्वात्तद्यथाभिमते क्षणे॥
२३६० ॥§ 7672

एकविज्ञानकाले वा तज्जन्यं सकलं भवेत्।
शक्तं हेतुतया यद्वत्तद्विज्ञानं विवक्षितम्॥
२३६१ ॥§ 7674

स्यादेतत्—यदि वेदे कृपादिगुणहेतुकं सत्यत्वमभ्युपगतं स्यात्तदा गुणानां पुरुषाश्रितत्वेन पुरुषनिवृत्त्या निवृत्तौ सत्यां मिथ्यात्ववत्सत्यत्वमपि निवर्त्तेत। यावता स्वतःप्रामाण्याद्वेदस्य प्रकृत्यैव सत्यार्थज्ञानहेतुत्वं नतु पुनर्गुणकृतं तेन नानैकान्तिकता हेतोः, नाप्यानर्थक्यप्रसङ्गो वेदस्येत्येतत्। परस्योत्तरमाशङ्क्य परिहरन्नाह—यद्येवमित्यादि। यथैव हि प्रकृत्याऽर्थवत्त्वमस्य वेदस्य तथा मिथ्यात्वमपि सम्भाव्यत इत्यनैकान्तिकतैव हेतोरित्यभिप्रायः। एतच्च पश्चादभिधास्यति। प्रकृत्या च ज्ञानहेतुत्वे सर्वदा युगपच्च तद्भाविज्ञानं प्राप्नोत्यविकलकारणत्वादिति कथमानर्थक्याप्रसङ्गः। प्रयोगः—यदा यदविकलकारणं तत्तदा भवत्येव, यथा—अभिमतक्षणावस्थायां अग्निहोत्रादिवाक्यसम्भूतं ज्ञानम्, अविकलकारणं च वेदवाक्यहेतुकं सर्वज्ञानं सर्वस्यामवस्थायामिति स्वभावहेतुः॥ २३५९॥ २३६०॥ २३६१॥ § 7675

युगपज्ज्ञानप्रसङ्गपक्षे च दोषान्तरमाह—ततः परमित्यादि। § 7676

ततः परमतो ज्ञानजन्मशक्तिपरिक्षयात्।
न नित्यः स्यादयं वेदः शक्तौ वा धीः पुनर्भवेत्॥
२३६२ ॥§ 7678

तथाहि—यदि युगपदशेषज्ञानान्युत्पाद्योत्तरकालं ततो ज्ञानोत्पादनशक्तेः परिहीयते वेदस्तदा शक्तेरात्मभूतायाः परिक्षयात् क्षयी प्राप्नोति। अथ न परिहीयतेतदोत्तरकालं पुनरपि ज्ञानोत्पत्तिप्रसङ्ग इति न कथञ्चिन्नित्यस्यार्थक्रियासामर्थ्यम् ॥ २३६२॥ § 7679

१ नरनि] Correction: ; नरः(वा ?)नि (sic !)नरनि

648/k

अथापीत्यादिना यदविकलकारणमित्यस्य हेतोरसिद्धतामाशङ्कते।
§ 7680

अथापि सहकारीणि व्याख्यादीनि व्यपेक्षते।
तेषां च क्रमसद्भावात्तद्विज्ञानं क्रमीष्यते॥
२३६३॥§ 7682

व्याख्यादीनीत्यादिशब्देन सङ्केतादिपरिग्रहः। तेषां चेति। व्याख्यादीनाम् ॥ २३६३॥ § 7683

नैवमित्यादिना परिहरति। § 7684

नैवं तस्य हि शक्तस्य व्यपेक्षा कीदृशी भवेत्।
तद्योगात्स समर्थश्चेन्नित्यताशेह का तव॥
२३६४॥§ 7686

असमर्थो हि परमपेक्षेत ततः समर्थस्वभावोत्पादलिप्सायाम्। यस्तु समर्थस्तस्य न किञ्चित्स्वभाववैकल्यमस्तीति कीदृशी तस्य व्यपेक्षा। अथ प्रागसमर्थः सहकारिकारणयोगात्पश्चात्समर्थो भवतीत्यभ्युपेयते, तदा जहतु भवन्तो वेदे नित्यताशाम् ॥ २३६४॥ § 7687

कथमित्याह—प्रागशक्त इत्यादि। § 7688

प्रागशक्तः समर्थश्च यदि तैः क्रियते पुनः।
प्रसक्तः पौरुषेयोऽयं ज्ञानाङ्गं हि नराश्रयात्॥
२३६५॥§ 7690

शक्तेरव्यतिरेकादिति भावः। व्यतिरेके तु सम्बन्धासिद्धेर्वेदस्याकारकत्वप्रसङ्गः,शक्तेरेव कार्योत्पत्तेरिति वाच्यम्। ज्ञानाङ्गमिति। ज्ञानस्याङ्गं यो भवति वेदः स नराश्रयाज्जातः, वेदस्वरूपं च नराश्रयाज्जातं, तच्च वेदाव्यतिरेकात्, सोऽपि जात एव॥ २३६५॥ § 7691

किञ्च—न केवलं परापेक्षायामनित्यत्वप्रसङ्गः, अपौरुषेयत्वकल्पना च व्यर्था प्राप्नोतीति दर्शयन्नाह—नहीत्यादि। § 7692

नहि तावत्स्थितोऽप्येष ज्ञानं वेदः करोति नः।

यावन्न पुरुषैरेव दीपभूतैः प्रकाशितः॥
२३६६ ॥§ 7694

ततश्चापौरुषेयत्वं भूतार्थज्ञानकारणम्।
न कल्प्यं ज्ञानमेतद्धि पुंव्याख्यानात्प्रवर्त्तते॥
२३६७ ॥§ 7696

सत्यप्येषा निरर्थाऽतो वेदस्यापौरुषेयता।
यदिष्टं फलमस्या हि ज्ञानं तत्पुरुषाश्रितम्॥
२३६८ ॥§ 7698

649/k

यथार्थज्ञानार्थमस्यापौरुषेयता कल्प्यते। सा च कल्पनाऽपि न पुरुषनिरपेक्षा तज्ज्ञानोत्पादने समर्थेति व्यर्था तत्कल्पना। पुरुषा एव प्रमाणभूताः प्रणेतारो यथार्थज्ञानकारणं सन्तु। किमिदानीमपौरुषेयतया सिद्धोपस्थायिन्या॥ २३६६॥ ॥ २३६७॥ २३६८॥ § 7699

अथ माभूदनित्यत्वप्रसङ्गोऽपौरुषेयत्वकल्पनायाश्च व्यर्थतेति सर्वदैव शक्तो वेदोऽभ्युपगम्यते तदा पूर्ववद्दोषप्रसङ्ग इति दर्शयति—शक्तश्चेदित्यादि। § 7700

शक्तश्चेत्सर्वदैवायं तत्किमन्यदपेक्षते।
शक्तैकहेतुभावे तु ज्ञानं स्यादेव तेन वः॥
२३६९ ॥§ 7702

स्यादेतत्—पुरुषापेक्षायां नापौरुषेयता व्यर्थायते। यथावस्थित एवार्थः पुरुषैः प्रकाश्यते नापूर्वः क्रियते। अपूर्वकरणे हि स्वातन्त्र्यमेषामभ्युपगतं स्यात्। ततश्च रागादिभिरुपप्लुता विपरीतार्थां श्रुतिमारचयन्तः केन प्रतिबध्येरन्। तदेतद्व्याख्यायामपि पुरुषैः क्रियमाणायां दोषजातं समानमिति दर्शयन्नाह—स्वतन्त्रा इत्यादि। § 7703

स्वतन्त्राः पुरुषाश्चेह वेदे व्याख्यां यथारुचि।
कुर्वाणाः प्रतिबद्धुं ते शक्यन्ते नैव केनचित्॥
२३७० ॥§ 7705

मोहमानादिभिर्दोषैरतोऽमी विप्लुताः श्रुतेः।
विपरीतामपि व्याख्यां कुर्युरित्यभिशङ्क्यते॥
२३७१॥§ 7707

अपि च न वेदार्थस्यातीन्द्रियार्थस्य कश्चित्स्वातन्त्र्येण परिज्ञाता नरोऽभ्युपगतो यो वेदार्थमाख्यास्यति। तथाहि वेदार्थपरिज्ञानद्वारेणातीन्द्रियार्थदर्शित्वमस्य न स्वातन्त्र्येण, वेदार्थपरिज्ञानं तनो(तु ना ?)तीन्द्रियार्थदर्शित्वमन्तरेणेति व्यक्तमवतरतिनितरामितरेतराश्रयत्वमिति दर्शयन्नाह—नचातीन्द्रियदृगित्यादि। § 7708

नचान्तीन्द्रियदृक्तेषामिष्ट एकोऽपि मानवः।
स्वर्गयागादिसम्बन्धज्ञानं नैव ह्यचोदनम्॥
२३७२॥§ 7710

यस्मादतीन्द्रियार्थानां द्रष्टा साक्षान्न चास्ति वः।
वचनेन हि नित्येन यः पश्यति स पश्यति॥
२३७३॥§ 7712

अविद्यमाना चोदना अस्येत्यचोदनं ज्ञानम्। चोदनानिरपेक्षमिति यावत्। अत्र कारणमाह—यस्मादिति। एतदपि कथमित्याह—वचनेनेत्यादि। तदुक्तम् तस्मा दतीन्द्रियार्थानां साक्षात् द्रष्टा न विद्यते। वचनेन तु नित्येन 650/k
यः पश्यति स पश्यतीति॥ २३७२॥ २३७३॥ § 7713

स्यादेतद्वेद एव स्वयं पुरुषव्यापारमनपेक्ष्यास्मै पुरुषाय स(स्व ?)मर्थमावेदयिष्यते। तेनेतरेतराश्रयत्वप्रसङ्गो नावतरतीत्याह—वेद इत्यादि। § 7714

वेदो नरं निराशंसो ब्रूतेऽर्थं न सदा स्वतः।
अन्धात्तयष्टितुल्यां तु पुंव्याख्यां समपेक्षते॥
२३७४॥§ 7716

नहि प्रथमश्रुतोऽसमयज्ञस्य स्वयं स(स्व ?)मर्थमावेदयते वेदः। किन्नाम कुरुत इत्याह—अन्धात्तेत्यादि। अन्धैरात्ता गृहीता (यष्टिः) तया तुल्येति विग्रहः ॥ २३७४॥ § 7717

अपेक्षतां को दोष इत्याह—स तयेत्यादि। § 7718

स तया कृष्यमाणश्च कुवर्त्मन्यपि सम्पतेत्।
ततो नालोकवद्वेदश्चक्षुर्भूतश्च युज्यते॥
२३७५॥§ 7720

स इति। वेदः। तयेति। पुंव्याख्यया। कुवर्त्मन्यपि सम्पतेदिति। विपरीतार्थप्रकाशनात्। ततश्च यदुक्तम्—तस्मादालोकवद्वेदे सर्वलोकैकचक्षुषि। नैव विप्रतिपत्तव्यमिति तदनुपपन्नम्॥ २३७५॥ § 7721

स्वतन्त्रस्येइत्यादिना प्रकृतमुपसंहरति। § 7722

स्वतन्त्रस्य च विज्ञानजनकत्वे सति स्फुटम्।
प्रामाण्यमपि नैवास्य सम्भाव्यं पुरुषेक्षणात्॥
२३७६॥§ 7724

शक्तस्य हि न पुरुषापेक्षया ज्ञानजनकत्वं युक्तमिति प्रतिपादितम्। भवतु नाम पुरुषापेक्षया शक्तस्यापि ज्ञानजनकत्वं तथापि—पुरुषापेक्षया ज्ञानजनकत्वेऽपि,प्रामाण्यमस्य स्फुटं न सम्भाव्यमिति पदार्थयोजना। अपिशब्दो भिन्नक्रमः ज्ञानजनकत्वेसतीत्यस्यानन्तरं द्रष्टव्यः॥ २३७६॥ § 7725

अस्यैवार्थं व्यक्तीकुर्वन्नाह—यथार्थबोधेत्यादि। § 7726

यथार्थबोधहेतुत्वात्प्रामाण्यं ह्यवकल्पते।
पुंव्याख्यापेक्षणे चास्य न साध्वी मानकल्पना॥
२३७७॥§ 7728

न साध्वी मानकल्पनेति। स तया कृष्यमाणश्च कुवर्त्मन्यपि सम्पतेदित्यनेन पूर्वमसाधुत्वस्य प्रतिपादितत्वात्॥ २३७७॥ § 7729

651/k

ततश्च, यदुक्तम्—प्रमाणेऽवस्थिते वेदे शिष्याचार्यपरम्परा। अनादिः कल्प्यमानापि निर्दोषत्वाय कल्पते इति तदयुक्तमिति दर्शयन्नाह—इत्थमित्यादि। § 7730

इत्थं मानेऽस्थिते वेदे शिष्याचार्यपरम्परा।
अनादिः कल्प्यमानाऽपि नादोषत्वाय युज्यते॥
२३७८॥§ 7732

अस्थित इत्यकारप्रश्लेषोऽनुद्रष्टव्यः॥ २३७८॥ § 7733

कथं न युज्यत इत्याह—यस्मादेकोऽपीत्। § 7734

यस्मादेकोऽपि तन्मध्ये नैवातीन्द्रियदृग्मतः।
अनादिः कल्पिताऽप्येषा तस्मादन्धपरम्परा॥
२३७९॥§ 7736

यदि नामान्धपरम्परा जाता, ततः किमित्याह—अन्धेनान्ध इत्यादि। § 7737

अन्धेनान्धः समाकृष्टः सम्यग्वर्त्म प्रपद्यते।
ध्रुवं नैव तथाऽप्यस्या विफलाऽनादिकल्पना॥
२३८०॥§ 7739

यथोक्तं शाबरे भाष्ये— नैवंजातीकेष्वर्थेषु पुरुषवचनं प्रामाण्यमुपैति, अन्धानामिव वचनं रूपविशेषेष्विति॥ २३८०॥ § 7740

एवमनादित्वं शिष्यपरम्परया सिद्धमभ्युपगम्य दोष उक्तस्तदपि न सिद्धमिति दर्शयन्नाह—परत इत्यादि। § 7741

परतो वेदतत्त्वज्ञा मनुव्यासादयोऽपि च।
तैरेवारचितो नायमर्थ इत्यत्र न प्रमा॥
२३८१॥§ 7743

न प्रमेति। अत्यन्तपरोक्षत्वात्॥ २३८१॥ § 7744

स्यादेतत्—नावितथज्ञानहेतुत्वादपौरुषेयत्वेन प्रामाण्यमिष्टम्, किं तर्हि ? सत्यार्थान्नित्याच्छब्दार्थसम्बन्धमात्रत्। नवा (स चा ?) पौरुषेयतायां सत्यां भवतीतितदत्राप्यनैकान्तिकमेव। को ह्यत्र नियमे हेतुर्यदपौरुषेयेण सत्यार्थेन भवितव्यमिति। भवंतु नाम तथाऽपि दोष एवेति दर्शयन्नाह— § 7745

सत्यार्थनित्यसम्बन्धमात्रात्प्रामाण्यमस्तु वा।
अतीन्द्रियं तु तं योगं नैव कश्चिद्व्यवस्यति॥
२३८२॥§ 7747

अतीन्द्रिया यतस्तेऽर्थास्तत्स्थो योगोऽप्यतीन्द्रियः।

अनत्यक्षदृशः सर्वे नराश्चैते स्वतस्सदा॥
२३८३ ॥§ 7749

सत्यार्थश्चासौ नित्यसम्बन्धश्चेति विग्रहः। कल्पितो हि नित्यः सम्बन्धः, 652/k यद्य सावर्थप्रतीतिहेतुर्न भवेत्तदा व्यर्था तत्कल्पना। नचान्यत्तस्य रूपमन्यत्रार्थप्रतीतिजनकत्वात्। इयानेव हि सम्बन्धस्य व्यापारो यदर्थप्रतीतिजननम्,तदकुर्वाणः कथं सम्बन्धः स्यात्। नाप्यसौ सत्तामात्रेणार्थप्रतीतिहेतुः किं तर्हि ?, ज्ञातः सन, अन्यथा ह्यगृहीतसमयस्यापि ततः प्रतीतिर्भवेत्, न चासौ ज्ञातुं केनचिच्छक्यते, सम्बन्धिनः स्वर्गादेरतीन्द्रियत्वेन तस्याप्यतीन्द्रियत्वात्। अतीन्द्रियार्थदर्शिनस्तर्हि तं ज्ञास्यन्तीति चेदित्याह—अनत्यक्षदृश इत्यादि। तदुक्तम्— तस्मादतीन्द्रियार्थानां साक्षाद्द्रष्टा न विद्यते। वचनेन तु नित्येन यः पश्यति स पश्यति॥ इतिअनत्यक्षदृशः—अतीन्द्रियार्थादर्शितः॥ २३८२॥ २३८३॥ § 7750

श्रुतिरेव स्वयमावेदयिष्यतीति चेदाह—अयं ममेत्यादि। § 7751

अयं ममार्थसम्बन्ध इत्याह च न सा श्रुतिः।
नरक्लृप्तोऽर्थयोगस्तु पौरुषेयान्न भिद्यते॥
२३८४ ॥§ 7753

न ह्येते भवन्तो ब्राह्मणा ममायमर्थो गृह्यतामित्याहूय प्रवृद्धतरकारुण्यः पुण्यैकप्रवणचेताः परहितनिरतः सन्वदान्य इव ब्राह्मणेभ्यः स्वयं स्वमर्थमर्पयति वेदपुरुषः।तर्हि स्वयमेवोत्प्रेक्षिष्यन्त इत्याह—नरक्लृप्त इत्यादि॥ २३८४॥
§ 7754

तमेवाभेदं दर्शयति—तद्यथेत्यादि। § 7755

तद्यथा पौरुषेयस्य शङ्क्यते विपरीतता।
नरैरुत्प्रेक्षितस्यापि सा शङ्कैव न किं भवेत्॥
२३८५ ॥§ 7757

अपि नाम सङ्कीर्णमर्थं जानीयामिति सङ्करहेतुः पुरुषोऽपाकीर्णे यथा पुरुषैः स्वयं प्रयुक्ताः शब्दाः सङ्कीर्यन्ते (?) तथा तैरुपकल्पितार्था अपीति कोऽत्र विशेषः।सेति। विपरीतता। शङ्क्येति। शङ्कनीया॥ २३८५॥ § 7758

पूर्वमप्रामाण्याद्वेदस्य शिष्याचार्यपरम्पराकल्पना व्यर्थेति प्रतिपादितम्, इदानीं भवतु नाम नित्यसम्बन्धद्वारेण प्रामाण्यम्, उभयथा शिष्याचार्यपरम्परोपकल्पनाव्यर्थेत्युपदर्शयति—माने स्थितेऽपीत्यादि। § 7759

माने स्थितेऽपि वेदेऽतः शिष्याचार्यपरम्परा।
अनादिः कल्पिताऽप्येषा संजाताऽन्धपरम्परा॥
२३८६॥§ 7761

यदुक्तम्—नैरुत्प्रेक्षितस्यापि सा शङ्कैव न किं भवेत् इति, अत्र परोऽसम्भवमाशङ्काया दर्शयति—नन्वित्यादि। § 7762
653/k

नन्वारेकादिनिर्मुक्ता स्वर्गादौ जायते मतिः।
अग्निहोत्रादिवचसो निष्कम्पाध्यक्षबुद्धिवत्॥
२३८७॥§ 7764

नावलम्बेत तां कुर्वन्कथं वेदः प्रमाणताम्।
न ह्यतो वचनादर्थं संदिग्धं वेत्ति कश्चन॥
२३८८॥§ 7766

आरेकः—संशयः। आदिशब्देन विपर्यासो गृह्यते। यथोक्तं भाष्ये शाबरे—न च स्वर्गकामो यजेतेत्यतो वचनात्संदिग्धमवगम्यन्ते—भवति वा स्वर्गो न वा भवतीति। न च विनिश्चितमवगम्यमानमिदं मिथ्या स्यात्। यो हि जनित्वा प्रध्वंसते नैतदेवमिति स मिथ्याप्रत्ययः। न चैष देशान्तरे कालान्तरे विपर्येति। तस्मादवितथ इति। अन्यथा हि प्रत्यक्षं स्फुटत्स्फुलिङ्गप्रकरप्रसरोपरुद्धान्तरालमकृशकृशानुराशिमनुभवतोऽपि भवतः किमिति संशयदोलाविलोलं मनो न भवेत्। ततश्च न किञ्चिदपि ते प्रमाणं स्यादिति परस्याभिप्रायः। प्रयोगः—यः संशयविपर्यासरहितः प्रत्ययः स प्रेक्षावतां प्रमाणव्यवहारविषयः, यथा—वह्नावभ्रान्तचेतसो दाहपाकाद्यर्थिनस्तन्निश्चयहेतुः प्रत्ययः, संशयविपर्यासरहितश्चाग्निहोत्रादिवाक्योद्भवः प्रत्यय इति स्वभावहेतुः। नावलम्बेतेति। प्रमाणतामित्यनेन सम्बन्धः।तां कुर्वन्निति। मतिम्॥ २३८७॥ २३८८॥ § 7767

नैवमित्यादिना प्रतिविधत्ते। § 7768

नैवं संशयसंजातेर्विपरीतान्यवाक्यवत्।
प्रेक्षावन्तो हि नैतेषां भेदं पश्यन्ति कञ्चन॥
२३८९॥§ 7770

नातीन्द्रिये हि युज्येते सदसत्ताविनिश्चयौ।
निश्चयो वेदवाक्याच्चेदन्यादृग्न किमन्यतः॥
२३९० ॥§ 7772

यदि तावत्प्रेक्षावतां संशयादिरहितः प्रत्ययो वेदवाक्याद्भवतीति हेत्वर्थस्तदा हेतोरसिद्धता। तथाहि प्रेक्षावतामग्निहोत्रात्स्वर्गो न भवतीत्यतो विपरीतान्यवाक्यादिवाग्निहोत्रात्स्वर्गो भवतीत्यतोऽपि संशयः समान एव, अतीन्द्रियेऽर्थे सदसत्तानिश्चयकारणाभावादर्थसंवादस्योभयत्राप्यनुपलम्भात्। विपरीतान्यवाक्यवदिति। सप्तम्यन्ताद्वतिः। अथापि स्याद्वेदवाक्यादेव निश्चयो भवति तत्किमन्येन कारणेन पर्येषितेनेत्यत आह—अन्यादृगित्यादि। वेदार्थविपरीतार्थाध्यवसायी निश्चयः। अन्यत इति। पौरुषेयात्। किं न भवति—भवत्येवेति यावत्। ततश्च साऽपि प्रमाणं स्यादुभयोरपि तदानीं बाधाऽनुपलम्भेनाविशेषात्॥ २३८९॥ २३९०॥ § 7773

654/k

अथ प्रेक्षावतां श्रोत्रियाणामकम्प्यो जायते प्रत्यय इत्यतो नासिद्धता हेतोरिति चेत्, जायतां तथापि यदि नामासिद्धता न भवेत्, अनैकान्तिकता तु दुर्वारेति दर्शयति—श्रोत्रियाणामित्यादि। § 7774

श्रोत्रियाणां तु निष्कम्पा बुद्धिरेषोपजायते।
श्रद्धाविवशबुद्धीनां साऽन्येषामन्यतः समा॥
२३९१ ॥§ 7776

तथाहि सौगतादीनां धीरकम्पोपजायते।
अपायादुःखसम्भूतिर्यागात्प्राणिवधान्वितात्॥
२३९२ ॥§ 7778

अस्याश्च न धियः काचिद्बाधा सम्प्रति दृश्यते।
क्वचित्कदाचिच्छङ्का चेद्वेदवाक्येऽपि सा समा॥
२३९३ ॥§ 7780

सेति। अकम्पा बुद्धिः। अन्येषामिति। बौद्धादीनाम्। अन्यत इति यागात्प्राणिवधाश्रितापायदुःखसम्भूतिरित्यतो वाक्यात्। एतदेव दर्शयति—तथा हीत्यादि। सुबोधम्॥ २३९१॥ २३९२॥ २३९३॥ § 7781

भूयोऽप्यनैकान्तिकतामपौरुषेयत्वस्य दर्शयति—नरेच्छेत्यादि। § 7782

नरेच्छाधीनसङ्केतनिरपेक्षो यदि स्वयम्।
वेदः प्रकाशयेत्स्वार्थं प्रमाणं युज्यते तदा॥
२३९४॥§ 7784

तदा हि मोहमानादिदोषोपप्लुतबुद्धिभिः।
अन्यथाऽऽख्यायमानो हि(पि?)निजमर्थं न
मुञ्चति॥ २३९५॥§ 7786

यस्मात्तद्विषयामेव धियमुत्पादयत्यरम्।
न त्विष्टं पुरुषैरर्थमपरं द्योतयत्ययम्॥
२३९६॥§ 7788

नरेच्छायास्त्वपेक्षायां पौरुषेयान्न भिद्यते।
द्योतनं हि तदायत्तं विपर्यस्ताऽपि सा भवेत्॥
२३९७॥§ 7790

इच्छायाः स्वातन्त्र्यात्तदधीनसङ्केतसापेक्षस्य वेदस्य स्वार्थप्रकाशने नेष्टार्थप्रकाशनं स्यान्नियमाभावात्, यदा तु तन्निरपेक्षो वेदोऽर्थं बोधयेत्तदा प्रमाणं युज्येत, पुरुषव्याख्यामनादृत्य क्षिप्रतरं स्वार्थप्रतीतिजननात्, अन्यथा व्याख्यायमानस्यापि चक्षुरादिवत्प्रकृत्यैव स्वार्थप्रकाशनापरित्यागादिति समुदायार्थः। आख्यायमान इति। व्याख्यायमानः। अरमिति। क्षिप्रम्। झगितीति यावत्। विपर्यस्ताऽपि सेति। नरेच्छा॥ २३९४॥ २३९५॥ २३९६॥ २३९७॥ § 7791

655/k

भवतु नाम स्वाभाविकोऽर्थसम्बन्धोऽपौरुषेयत्वेन वेदस्य, तथापि नेष्टसिद्धिरित्यनैकान्तिकतामेव समर्थायमान आह—अपि चेत्यादि। § 7792

अपिचापौरुषेयस्य यथा प्राकृतमिष्यते।

सत्यार्थत्वमसत्यत्वमेवमाशङ्क्यते न किम्॥
२३९८॥§ 7794

स्वतः सत्यार्थबोधस्य हेतुत्वात्सत्यताऽस्य हि।
एवं मिथ्यात्वबोधेऽपि हेतुत्वं शङ्क्यते स्वतः॥
२३९९॥§ 7796

प्रकृतौ भवं प्राकृतम्—स्वाभाविकमित्यर्थः॥ २३९८॥ २३९९॥ § 7797

प्रमाणभूतपुरुषकृतत्वमेव प्रामाण्यकारणमास्थीयतां वेदस्य किं जाड्यसंसूचकेनाकृतकत्वेनेति दर्शयन्नाह—किं चेत्यादि। § 7798

किंच वेदप्रमाणत्वे निर्बन्धो यदि वो ध्रुवम्।
निर्दोषकर्तृकत्वादौ तदा यत्नो विधीयताम्॥
२४००॥§ 7800

निर्दोषेण हि कर्त्राऽयं कृतोऽदोषैः प्रकाशकैः।
द्योतमानश्च लोकेऽस्मिन्भूतार्थज्ञानसाधनः॥
२४०१॥§ 7802

निर्दोषकर्तृकत्वादावित्यादिशब्देन व्याख्यातृत्वं गृह्यते॥ २४००॥ २४०१॥ § 7803

अथ निर्दोषैः कृतव्याख्यातस्यापि कथं प्रामाण्यं सिद्ध्यतीत्याह—प्रज्ञाकृपादियुक्तानामित्यादि। § 7804

प्रज्ञाकृपादियुक्तानां तथाहि सुविनिश्चिताः।
पौरुषेय्योऽपि सद्वाचो यथार्थज्ञानहेतवः॥
२४०२॥§ 7806

यथोक्तं शबरस्वामिना— यत्तु लौकिकं वचनं तच्चेत्प्रत्यायितात्पुरुषादिन्द्रियविषयं वाऽवितथमेव तदिति। सद्वाच इति। शोभनाः॥ २४०२॥ § 7807

पुनरप्यपौरुषेयत्वस्यानैकान्तिकतां प्रतिपादयन्नाह—न नराकृतमित्यादि। § 7808

न नराकृतमित्येव यथार्थज्ञानकारि तु।
दृष्टा हि दाववह्न्यादेर्मिथ्याज्ञानेऽपि हेतुता॥
२४०३॥§ 7810

नहि पुरुषदोषोपधानादेवार्थेषु ज्ञानविभ्रमस्तद्रहितानामपि दाववह्न्यादीनां नीलोत्पलादिषु वितथज्ञानजननात्। दावो वनगतो वह्निः। स पुनर्यः स्वयमेव वेण्वादीनां संघर्षसमुद्भूतः स इह व्यभिचारविषयत्वेन द्रष्टव्यः। यस्त्वरणिनिर्मथनादि पुरुषैर्निर्वृत्तं तत्रापौरुषेयत्वासम्भवात्ततो न हेतोर्व्यभिचार इति भावः। आदिशब्देन मरीच्यादिपरिग्रहः॥ २४०३॥ § 7811

656/k

तामेव मिथ्याज्ञानहेतुतां दर्शयति—रक्तमित्यादि। § 7812

रक्तं नीलसरोजं हि वह्न्या(?)लोके सतीष्यते।
वह्न्या(?)दिः कृतकत्वाच्चेन्न हेतुरुपपद्यते॥
२४०४॥§ 7814

अथापि स्यान्नापौरुषेयत्वमेव केवलमस्माभिर्हेतुत्वेन वर्णितम्। किं तर्हि ?। अकृतकत्वे सतीति विशेषणम्। यद्वा—पौरुषेयग्रहणमकृतकोपलक्षणमतो न दाववह्निना कृतकेन व्यभिचार इति मन्यमानस्य परस्योत्तरमाशङ्कयन्नाह—वह्न्या(?)देरित्यादि। तद्धेतुः—मिथ्याज्ञानहेतुः॥ २४०४॥ § 7815

किं वैकृतकतेत्यादिना परिहरति। § 7816

किं वैकृतकताऽर्थानां मिथ्याज्ञाननिबन्धनम्।
एवं हि नैव धूमोऽग्नेर्यथावद्द्योतकं भवेत्॥
२४०५॥§ 7818

तद्विशेषणं भवति यद्विपक्षाद्धेतुं व्यवच्छिनत्ति, अन्यथा हि येन केनचिद्विशेषणेन हेतौ यद्यैकान्तिकता लभ्येत तदा न कश्चिदनैकान्तिको हेतुः स्यात्, इच्छाप्रतिबद्धत्वेन सर्वत्र विशेषणस्य सौकर्यात्। नचाकृतकत्वं विशेषणं वेदस्य मिथ्याज्ञानहेतुतां निवर्त्तयति। तथाहि—यदि कृतकता मिथ्याज्ञानहेतुत्वेन सिद्धा स्यात्तदा सा निवर्त्तमाना तामपि निवर्त्तयेत्। कदाचित्परो ब्रूयात्सिद्धैवेति,आह—एवं हीत्यादि। यदि कृतकता मिथ्याज्ञाननिबन्धनं तदा सम्यग्ज्ञानस्याकृतकता हेतुरिति प्राप्तः। सम्यग् मिथ्याज्ञानयोः परस्परविरुद्धयोरेककारणानुपपत्तेः, नहि वह्नेरुष्णस्पर्शहेतोः शीतहेतुता युक्ता। ततश्च कृतकत्वाद्धूमो वह्नौ यथावत्प्रतीतिहेतुर्न स्यात् २४०५ § 7819

अथापि स्यान्नैवमधारितं मिथ्याज्ञानस्यैव कृतकता हेतुर्नान्यस्येति। किं तर्हि ?। मिथ्याज्ञाने कृतकतैव निबन्धनं नान्यदित्यन्यहेतुकताऽस्य निषिध्यते। न तु सम्यक् ज्ञानस्य कृतकहेतुकत्वनिषेधः। नच सर्वस्य कृतकस्याविशेषेण मिथ्याज्ञानहेतुत्वमिष्टम्। येन परस्परविरुद्धत्वात्सम्यङ्मिथ्याज्ञानयोः सामर्थ्यात्कृतकविपरीतस्य सम्यग्ज्ञानहेतुत्वं स्यात्। किन्तु कृतकस्य बहुभिन्नत्वात्किञ्चिदेव मिथ्याज्ञानकारणं यथाकामलादि, किञ्चित्सम्यग्ज्ञानकारणं यथाऽनुपहेतिन्द्रियादिकलापः। अन्यथा हि शीतस्पर्शं प्रति हिमादेः कृतकस्य कस्यचित्कारणत्वोपलम्भात्सामर्थ्याच्छीतविरुद्धोष्णस्पर्शं प्रत्यकृतको हेतुः कल्पनीयः स्यात्। नचैवम्। तस्मात्कृतकस्य सम्यग्ज्ञानं प्रति हेतुत्वानिषेधाद्भवत्येव धूमः सम्यग्ज्ञाननिबन्धनमित्येतदाशङ्क्याह—एवं चापौरुषेयोऽपीत्यादि।
§ 7820

657/k

एवंचापौरुषेयोऽपि (सम्यग्ज्ञाने)निबन्धनम्।
वेदः सन्तिष्ठते नैव तद्धथैवास्य कल्पना॥
२४०६॥§ 7822

यदि हि सम्यङ्मिथ्यात्वयोरुभयोरपि कृतकता निबन्धनं सा निवर्त्तमाना मिथ्यासम्यग्ज्ञाने निवर्त्ततीति न वेदस्याकृतकत्वेन सम्यग्ज्ञानहेतुत्वमवतिष्ठेत, तस्य तत्रानिबन्धनत्वात्, ततश्च व्यर्थं विशेषणमित्यनैकान्तिकतैव हेतोः। अथापि स्यान्नराकृततयेत्यनेन नान्वयिव्यतिरेकी यथोक्तो हेतुः संसूचितः, किं तर्हि ?, व्यतिरेकी प्रयोग एवायम्। यथाहि हेतुविपरीतेन कृतकत्वेन साध्यविपरीतं मिथ्यात्वं व्याप्तम्, पौरुषेयेष्वेव मिथ्यात्वस्य दर्शनात्, ततश्च यत्र मिथ्यात्वव्यापकविरुद्धमकृतकत्वं सन्निधीयते, तत्र विरोधेनाकृतकत्वस्य मिथ्यात्वव्यापकस्य निवृत्तौ व्याप्यस्यापि मिथ्यात्वस्य सामर्थ्यान्निवृत्तिसिद्धिरित्यकृतकं सत्यार्थमिति सामर्थ्याद्भवेद्विनाप्यन्वयेनेति व्यर्थमन्वयप्रदर्शनम्। सत्यमेवमेतत्। यदि विपर्ययस्य यो व्याप्यव्यापकभावः सिद्ध्येत्। स तु न सिद्धः। तथाहि साध्यविपक्षे हेतौ यदि बाधकं प्रमाणं स्यात्, तदा भवेद्विपक्षयोर्व्याप्तिः, तच्च नास्ति। नचानुपलम्भमात्रादभावसिद्धिर्व्यभिचारात्। स्यादेतदकृतकविरुद्धे कृतके मिथ्यात्वस्य दर्शनात्सामर्थ्यादकृतके तस्याभावः सिद्ध्यतीति। तदेतदसम्यक्। न ह्येकत्र दृष्टाऽन्यत्राभावनिश्चयः शक्यते कर्तुम्, एकस्यापि हि विरुद्धव्यापकदर्शनात्। तथाह्येकमनित्यत्वं विरुद्धौ प्रयत्नानन्तरीयकेतरौ व्याप्नुवद्दृश्यते। नह्यनीत्यत्वं प्रयत्नानन्तरीयके दृष्टमित्यप्रयत्नानन्तरीयके तस्याभावः स्यात्। किञ्च—तत्र दृष्टमित्येतावन्मात्रेण यदि मिथ्यात्वं कृतकत्वेन व्याप्येत सत्यत्वमपि पौरुषेये क्वचिद्दृष्टमिति तदपि तेन व्याप्येत, ततश्च कृतकत्वनिवृत्तौ मिथ्यात्ववत्सत्यत्वस्यापि निवृत्तेर्नापौरुषेयत्वात्सत्यार्थत्वं सिद्ध्येदित्यलम् ॥ २४०६॥ § 7823

एवं तावद्यन्मिथ्यात्वहेतुदोषसंसर्गरहितमित्यस्य हेतोर्नराकृततयेत्य-नेनाक्षिप्तस्याकृतकस्य वा तदुपलक्षितस्यापौरुषेयत्वस्य वा स्वशब्देनोपात्तस्य विस्तरेणानैकान्तिकतां प्रतिपाद्य प्र(अ?)सिद्धतां प्रतिपिपादयिषुरुपसंहर-न्नाह—ततश्चेत्यादि। § 7824

ततश्चापौरुषेयत्वव्यक्तिनित्यत्वसाधनम्।
नित्यशब्दार्थयोगश्च व्यर्थ ए(वोपवर्णि)तः॥
२४०७॥§ 7826

तस्मिन् सत्यपि नैवास्य यथार्थज्ञानहेतुता।
उपगम्यत इत्युक्तं व्यासतः समनन्तरम्॥
२४०८॥§ 7828

658/k

तेनैवैतत्प्रतिक्षेपे नास्माकं गुरु(रादरः)।
(अ)प्रस्तुतोपयोगस्य को हि कुर्यान्निषेधनम्॥
२४०९॥§ 7830

अपौरुषेयत्वं च व्यक्तिश्च नित्यत्वं चेत्यपौरुषेयत्वव्यक्तिनित्यत्वानि, तेषां साधनमिति समासः। साध्यतेऽनेनेति साधनं हेतुः। तच्च नानाविधं पूर्व-मुक्तम्। तस्मिन्निति। अपौरुषेयत्वादौ। अस्येति। वेदस्य। उपगम्यत इति। उपपद्यते।व्यासत इति। विस्तरेण। एतत्प्रतिक्षेप इति। अपौरुषेयत्वादिदूष-णे। सत्यपि तस्मिन्नाभिमतार्थासिद्धिरिति प्रतिपादितत्वात्क्रियमाणे तद्दूषणे प्र-कृतानुपयोगित्वं स्यात्॥ २४०७॥ २४०८॥ २४०९॥ § 7831

एतदेव दर्शयति—यथार्थेत्यादि। § 7832

यथार्थज्ञानहेतुत्वं श्रुतेः प्रकृतमत्र हि।
न नराकरणेऽप्येतत्सिद्ध्यतीति च साधितम्॥
२४१०॥§ 7834

आहोपुरुषिका येति। § 7835

आ(होपुरु)षिका याऽत्र संक्षिप्तं किंचिदुच्यते।
विसरन्ति यथाऽनेन गतयः सूक्ष्मधीदृशाम्॥
२४११॥ § 7837

अहोपुरुष इति यस्याभिमानोऽस्ति सोऽहोपुरुषस्तद्भाव आहोपुरुषिका। मनोज्ञादित्वाद्वुञ्। अभिमान एवोच्यते। धीरेव दृक्, साधर्म्याद्दृक्सा, सूक्ष्मा धीदृक् येषां ते तथोक्ताः॥ २४११॥ § 7838

यदुक्तं—च पञ्चभिरगम्यत्वादित्यादि, तत्राह—प्रमाणानामित्यादि। § 7839

प्रमाणानां निवृत्त्याऽपि न प्रमेयं निवर्त्तते।
यस्माद्व्यापकहेतुत्वं तेषां तत्र न विद्यते॥
२४१२॥ § 7841

अनेनासिद्धतां मौले हेतौ प्रतिपादयति। व्यापको हि स्वभावः कारणं वा निवर्त्तमानं व्याप्यं कार्यं वा निवर्त्तयति। तादात्म्यतदुत्पत्तिभ्यां तयोस्तत्र प्रतिबद्धत्वात्। तदभावेऽपि भवतः कार्यव्याप्यत्वानुपपत्तेः। नतु तेषां प्रमाणानां तत्र सर्वस्मिन्वस्तुनि व्यापकहेतुत्वे सम्भवतः। तथाहि—देशकालस्वभावा(त्) विप्रकृष्टस्य वस्तुनो विनापि प्रमाणेन सम्भवान्न तेन व्याप्तिः, नापि कारणं प्रमाणमत एव, प्रमाणस्यैव च प्रमेयकार्यत्वात्। नच कार्यं निवर्त्तमानं कारणमात्रं निवर्त्तयति व्यभिचारदर्शनात्। नचाहेत्वव्यापकयोर्निर्व(व?)र्तकत्वं युक्तमतिप्रसङ्गात्। तस्मात्प्रमाणमात्राभावो व्यभिचारी प्रमेयमात्राभावे साध्य इति स्थितम्॥ २४१२॥ § 7842
659/k

तामेव व्यभिचारितां विपक्षे सम्भवोपदर्शनेन व्यक्तीकुर्वन्नाह—तत्पञ्चभिरित्यादि। § 7843

तत्पञ्चभिरगम्योऽपि नाभावेनै(वोऽस्या?)व गम्यते।
कर्त्ता श्रुतेरविज्ञातकर्तृकाख्यायिकादिवत्॥
२४१३॥ § 7845

तदिति। तस्मात्। पञ्चभिरगम्योऽपीति कर्त्ता श्रुतेरिति व्यवहितेन सम्बन्धः। अविज्ञानः कर्त्ता येषामाख्यायिकादीनां ते तथोक्ताः। पश्चादाख्यायिकादिशब्देन कर्मधारयस्ततः षष्ठ्यन्ताद्वतिः कार्यः॥ २४१३॥ § 7846

अथापीत्यादिना हेतोर्व्यभिचारविषयासिद्धिमाशङ्कते। § 7847

अथापि सार्थकत्वेन विभक्तार्थतयाऽपि वा।
तेषां कर्त्ताऽनुमीयेत, श्रुतेरपि तथा न किम्॥
२४१४॥§ 7849

तेषामिति। आख्यायिकादीनाम्। श्रुतेरपि तथा न किमिति। वेदस्यापितथैव सार्थकत्वविभक्तार्थत्वाभ्यां किं न कर्त्ताऽनुमीयते विशेषाभावात्। ततश्च प्रमाणाभावोऽसिद्धः॥ २४१४॥ § 7850

किञ्च—सर्वसत्त्वप्रमाणनिवृत्ति(:स्वस्य प्रमाणनिवृत्ति)र्वेति पक्षद्वयम्। तत्राद्ये पक्षे सन्दिग्धासिद्धता हेतोः, द्वितीयेऽप्यनैकान्तिकतेति दर्शयन्नाह—सर्वसत्त्वेत्यादि। § 7851

सर्वसत्त्वैरगम्यत्वं संदिग्धं तु कदाचन।
केनचित्कोऽपि मानेन वेत्तीत्यपि हि शङ्क्यते॥
२४१५॥§ 7853

येन (यन्न ?) त्रिभुवनान्तस्थाः सर्वे प्राणभृतः
स्फुटम्।
सर्वात्मनाऽपरिच्छिन्नाः सुनिश्चेतुमिमं क्षमाः॥
२४१६॥§ 7855

स्वयं त्वगम्यमानत्वं व्यभिचारि तथाहि ते।
पुरुषान्तरसंकल्पैस्तदभावो न निश्चितः॥
२४१७॥§ 7857

इममिति। सर्वसत्त्वैर्न वेदस्य कर्ता ज्ञायत इत्येवम्। तथाहीत्यादिना पुरुषान्तरभाविमिश्छात्रादिसङ्कल्पैर्व्यभिचारितामेव समर्थयते॥ २४१५॥ २४१६॥ ॥ २४१७॥ § 7858

यदुक्तं कर्ता तावददृष्ट इति, अस्यासिद्धतां प्रतिपादयन्नाह—अध्येतारश्चेच्यादि। § 7859

अध्येतारश्च वेदानां कर्त्तारोऽध्यक्षतो मताः।
नहि ते व्यञ्जका युक्ता नित्यानां व्यक्त्यसम्भवात्॥
२४१८॥§ 7861

660/k

यदि यः कश्चित्कर्त्ता न दृष्ट इत्यभ्युपगम्यते तदाऽध्येतॄणां दृष्टत्वात्स्फुटतरमवतरत्यसिद्धता। अथादिकर्त्ता न दृष्ट इतीष्टं तदापि संदिग्धासिद्धतैव। कदाचित्केनचिद्दृष्टोऽभूदिति सम्भाव्यमानत्वात्। अथापि स्यादध्येतारो न कर्त्तारः सिद्धाः, किं तर्हि ?, व्यक्तार इत्याह—न हीत्यादि। त इति। अध्येतारः। यथा च नित्यानां व्यक्तेरसम्भवस्तथा पश्चात्प्रतिपादयिष्यति। अनित्यस्यापि घटादेः कथं व्यञ्जक इति चेत्। सत्यम्। तत्रापि न कश्चिद्व्यञ्जकः सम्भवति। कथं तर्हि दीपादयो व्यञ्जकत्वेने प्रतीता इति चेत्। न। तत्र हि विज्ञानजनने योग्यं घटं जनयन्प्रदीपादिर्जनक एव। विशिष्टजनकस्वभावख्यापनाय लोके व्यञ्जक इति प्रतीयते। नतु तथा वेदस्य कश्चिद्व्यञ्जकः सम्भवति, अव्यक्तानुत्पन्नपूर्वापरस्वभावत्वात्तस्य ॥ २४१८॥ § 7862

भवतु नाम नित्यस्य व्यञ्जकस्तथाप्यसौ कारकान्न विशिष्यत इति दर्शयन्नाह—उपलभ्येत्यादि। § 7863

उपलभ्यस्वभावानां तद्व्यापारे समुद्भवः।
तेषां प्रागपि सद्भावे उपलब्धिः प्रसज्यते॥
२४१९ ॥§ 7865

नह्यकिंचित्करो व्यञ्जको युक्तोऽतिप्रसङ्गात्। किंचित्करत्वे जनकत्वमेवास्याभ्युपगतं स्यात्। जन्यमानस्य विशेषस्य स्वभावान्तरोत्पत्तिलक्षणत्वात्। उपलभ्यस्वभावानामिति। वेदनाम्। अथापि स्यात्प्रागप्युपलभ्यस्वभावाः वेदाः स्थिता एव, तत्कथं तद्व्यापारेण सम्भवस्तेषामित्याह—तेषामित्यादि। तेषामिति। उपलभ्यस्वभावानां वेदानाम्॥ २४१९॥ § 7866

तत्कार्येत्यादिना प्रमाणयति। § 7867

तत्कार्यव्यवहारादियोग्यो वेदोऽवसीयते।
तद्व्यापारेऽस्य सद्भावाद्बीजादेरङ्कुरादिवत्॥
२४२० ॥§ 7869

प्रयोगः—यो यद्व्यापारे सति भवति स तत्कार्यव्यवहारादियोग्यः, यथा बीजादिव्यापारे सति भवन्नङ्कुरादिस्तत्कार्यः, अध्येतृव्यापारे सति भवत्युपलभ्यस्वभावो वेद इति स्वभावहेतुः। हानोपादानलक्षणमनुष्ठानं व्यवहारः। आदिशब्देन ज्ञानाभिधानपरिग्रहः। नासिद्धो हेतुः, प्रागप्युपलब्धिप्रसङ्गात्। नाप्यनैकान्तिकः,कार्यव्यवहारस्य निमित्तान्तराभावात्॥ २४२०॥ § 7870

661/k

यदुक्तमदृष्टपूर्वसम्बन्ध इत्यादि, तत्राह—व्यञ्जनेत्यादि। § 7871

व्यञ्जनक्रमरूपत्वान्नाटकाख्यायिकादिवत्।
वेदानां पौरुषेयत्वमनुमाऽप्यवगच्छति॥
२४२१॥§ 7873

प्रयोगः—यद्व्यञ्जनक्रमरूपं तत्पौरुषेयम्, यथा नाटकाख्यायिकादि, व्यञ्जनक्रमरूपश्च वेद इति स्वभावहेतुः। नासिद्धो हेतुः, क्रमेणैव वर्णानां प्रतिभासनात् ॥ २४२१॥ § 7874

नाप्यनैकान्तिक इति दर्शयन्नाह—अन्यथेत्यादि। § 7875

अन्यथा क्रमरूपत्वं नित्यत्वाद्व्याप्तितश्च न।
नाभिव्यक्तिक्रमश्चास्ति नित्यत्वे व्यक्त्ययोगतः॥
२४२२॥§ 7877

अन्यथेति। यदि पौरुषेयत्वं न स्यादपि तु नित्यत्वं विभूत्वं च वर्ण्येत तदा क्रमो न स्यात्। तथाहि—न तावद्बीजाङ्कुरलतादिवत्कालकृतः क्रमो युज्यते, नित्यत्वेन सर्वेषां समकालत्वात्। नापि पिपीलिकादिपङ्क्तिवद्देशकृतः, व्यापित्वेनसर्वेषामेकनभोदेशावस्थानात्। नाप्यभिव्यक्तिकृतः, अनाधेयातिशयत्वेन नित्यस्य व्यक्तेरयोगात्॥ २४२२॥ § 7878

यदुक्तमागमोऽपि न तत्सिद्धै कृतकाकृतकोऽस्तीत्यादि, अत्राह—आगमस्येत्यादि। § 7879

आगमस्योपमायाश्च सार्थापत्तेः प्रमाणता।
निषिद्धा प्राक्ततस्तासामुपन्यासो न युज्यते॥
२४२३॥§ 7881

निषिद्धेति। प्रमाणपरीक्षायाम्। तासामिति। आगमोपमानार्थापत्तीनाम् ॥ २४२३॥ § 7882

यदुक्तमप्रामाण्यनिवृत्त्यर्थेत्यादि। अत्राह—अप्रामाण्येत्यादि। § 7883

अप्रामाण्यनिवृत्त्यर्था वेदस्यापौरुषेयता।
येष्टा साऽपिच वस्तुत्वात्साधनीयैव साधनैः॥
२४२४॥§ 7885

कथं वस्तुत्वं तस्या इत्याह—श्रुतेरित्यादि। § 7886

श्रुतेः स्वतन्त्रतैषादि(तेष्टा हि ?) पुंव्यापारानपेक्षणात्।
सा च वस्तुगतो धर्मो वस्त्वात्मा वा तथाविधः॥
२४२५॥§ 7888

अपौरुषेयतेत्यनेन श्रुतेः स्वतन्त्रताऽभिधीयते। पुरुषव्यापारनिरपेक्षा त-
662/k त एव श्रुतिः प्रमाणमित्यभिसम्बन्धेन प्रयोगात्। अन्यथा हि कोऽतिशयः
पौरुषेयत्वनिवृत्तिमात्रे प्रतिपादिते प्रतिपादितः स्यात्। सा चापौरुषेयता व-
स्तुधर्मो येषां धर्मधर्मिभेदः पारमार्थिकः। परमार्थतस्तु स्वभाव एव वस्तुनो
भेदान्तरप्रतिक्षेपजिज्ञासायां तथोच्यत इति दर्शयति—वस्त्वात्मा वेति। त-
थाविध इति। स्वतन्त्रः॥ २४२५॥ § 7889

यदुक्तम्—भावपक्षप्रसिद्ध्यर्थमित्यादि, तत्राह—भावपक्षेत्यादि। § 7890

भावपक्षप्रसिद्ध्यर्थमुच्यते यच्च साधनम्।
निराकृतेऽपि ते तस्मिन्नाभावः सिद्ध्यति स्वयम्॥
२४२६॥§ 7892

तद्भावसाधनेऽप्यस्ते न स्यात्तद्भावनिश्चयः।
तद्भावविनिवृत्तेस्तु तन्मात्रान्नास्ति निश्चयः॥
२४२७॥§ 7894

निवृत्तावपि मानानामर्थाभावाप्रसिद्धितः।
तेनैतावद्भवेन्नास्ति पक्षसिद्धिर्द्वयोरपि॥
२४२८॥§ 7896

यस्य हि वस्तुनो निश्चयाय साधनमुपादीयते तस्मिन्निराकृते तत्र वस्तुनि ततो निश्चयो न भवतीत्येतावन्मात्रं स्यात्, न वस्तुनोऽपि निवृत्तिः, यतः प्रमाणनिवृत्तावपि प्रमेयस्य न निवृत्तिरिति प्रतिपादितम्। तस्य हेतुत्वव्यापकत्वविकल्पात्। अस्त इति। क्षिप्ते। एतावत्तु वक्तुं युक्तं द्वयोरपि पक्षसिद्धिर्नास्तीति। इतिशब्दोऽध्याहार्यः। स च नास्तीत्यस्यानन्तरं द्रष्टव्यः॥ २४२६॥ २४२७॥ २४२८॥ § 7897

एतदेवोदाहरणेन द्रढयन्नाह—नामूर्त्तत्वादिति। § 7898

नामूर्त्तत्वाद्यथा शब्दः सुखादौ व्यभिचारतः।
इत्युक्तेऽपि न शब्दस्य विनाशित्वं प्रसिध्यति॥
२४२९॥§ 7900

यथाहि नित्यवादिना शब्दस्य वस्तुभूतं नित्यत्वं सिसाधयिषता नित्यः शब्दो अमूर्त्तत्वादाकाशवदिति प्रयोगे कृते, प्रतिवादिना नामूर्त्तत्वान्नित्यः शब्दो युक्तःसुखादिभिरनैकान्तादित्येवं वस्तुभूतनित्यत्वे साधने निराकृतेऽपि नहि शब्दस्यानित्यत्वं सिध्यति, तथेदमपीति शेषः। यथेति भिन्नक्रमः। उक्तेऽपीत्यस्यानन्तरंद्रष्टव्यः। शब्द इत्यस्यानन्तरं नित्यः सिध्यतीत्येतदध्याहार्यम्। एकदेशप्रयोगो वा भीमादिवद्द्रष्टव्यः॥ २४२९॥ § 7901

यत्तु पूर्वापरयोरित्यादावाह—तत्पूर्वापरयोरित्यादि। § 7902

तत्पूर्वापरयोः कोट्योर्यदुक्तं साधनं परैः।
तन्निराकरणेऽप्येतेऽकृतार्था वेदवादिनः॥
२४३०॥§ 7904

663/k

तदिति। तस्मात्। अकृतार्था इति। स्वपक्षासिद्धेः॥ २४३०॥ § 7905

यदुक्तम्—अकृतत्वाविनाशाभ्यां नित्यत्वं हि विवक्षितमित्यादि। तत्राह—अकृतत्वेत्यादि। § 7906

अकृतत्वाविनाशाभ्यां नित्यत्वं चेद्विवक्षितम्।
निषेधमात्ररूपाभ्यां निरुपाख्येऽपि तत्समम्॥
२४३१॥§ 7908

अतो गगनराजीव नित्यताऽस्ति न वास्तवी।
यथा तथैव वेदेऽपि तत्प्रामाण्यं न सिध्यति॥
२४३२॥§ 7910

अत्र द्वयीकल्पना, किं प्रसज्यप्रतिषेधरूपाभ्यामकृतकत्वाविनाशाभ्यां नित्यत्वमिष्टम्, पर्युदासरूपाभ्यां वा। तत्राद्ये पक्षे गगनपद्मादिनाऽनैकान्ताद्वेदस्य न वस्तुभूतनित्यत्वसिद्धिः। तथाह्याकाशकुशेशयस्य कृतकत्वविनाशित्वनिषेधेऽपि न वस्तुभूतनित्यत्वसिद्धिः। तथा वेदेऽपीत्यनैकान्तिकता हेतोः। ततश्चाकाशकुसुमवदेव प्रामाण्यमपि न स्यात्॥ २४३१॥ २४३२॥ § 7911

असिद्धतामपि दर्शयन्नाह—कृतकत्वेत्यादि। § 7912

कृतकत्वविनाशित्वनिषेधोऽपि न सिध्यति।
साधनेऽस्त इति प्रोक्तं तन्नित्यत्वं न सिध्यति॥
२४३३॥§ 7914

अस्त इति दूषिते। तदिति तस्मात्॥ २४३३॥ § 7915

अथ द्वितीयः पक्षः, न तर्हि वक्तव्यमेतत्—तौ चाभावात्मकत्वेन नापेक्षेते स्वसाधनमिति। तद्दर्शयति—पर्युदासात्मकाभ्यामित्यादि। § 7916

पर्युदासात्मकाभ्यां चेन्नाभ्यां नित्यत्वमिष्यते।
तौ तद्भावात्मकत्वेन व्यपेक्षेते स्वसाधनम्॥
२४३४॥§ 7918

नित्यत्वं वस्तुरूपं यत्तदसाधयतां न तत्।
स्वयं भवति तत्सिद्धिः पूर्वपक्षद्वये हते॥
२४३५॥§ 7920

सुबोधम्॥ २४३४॥ २४३५॥ § 7921

यदुक्तं वेदवाक्यार्थमिथ्यात्वं यो वदत्यनुमानत इत्यादि। तत्राह—विनिश्चितत्रिरूपमित्यादि। § 7922

विनिश्चितत्रिरूपं च साधनं यत्प्रकाशितम्।
निषेधः शक्यते तस्य त्वत्पित्राऽपि न जातुचित्॥
२४३६॥§ 7924

664/k

प्रकाशितमिति। अनुमानपरीक्षायां स्वभावकार्यानुपलम्भलिङ्गजम्। तन्न शक्यते प्रतिषेद्धुम्, वस्तुप्रतिबद्धत्वादस्य। नच वस्तुनः स्वभावान्यथात्वं केनचित्क्रियेत, स्वभावान्तरोत्पत्तिलक्षणत्वात्तस्य। नच स्वभावान्तरकरणे तस्य किञ्चित्कृतं भवत्यतिप्रसङ्गात्। तस्माद्यत्प्रमाणसिद्धवस्तु न तस्य केनचिद्बाधा। अन्यथा हि प्रमाणलक्षणोपपन्नस्य बाधायां तल्लक्षणमेव दूषितं स्यादिति सर्वत्रानाश्वासान्न क्वचित्तत्प्रमाणं स्यात्॥ २४३६॥ § 7925

एतदेव दर्शयति—नहि शीर्यत इत्यादि। § 7926

न हि शीर्यत इत्युक्तो वेदे यः पुरुषोऽस्य च।
बाधाऽनुमानतः स्पष्टा नैरात्म्ये प्रतिपादिता॥
२४३७॥§ 7928

जात्याद्यन्यदपि प्रोक्तं बाधितं तत्र साधितम्।
ज्ञापितप्रतिबन्धा च साऽनुमा प्राक्प्रबाधिका॥
२४३८॥§ 7930

तथोक्तं वेदे स एवाय मात्मेति प्रकृत्यामनन्ति—अशीर्यो नहि शीर्यत इति। पुनश्चोक्तम्— अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मेति। न शीर्यत इत्यशीर्यो नित्य इत्यर्थः। अरे इत्यामन्त्रणपदम्। जात्यादीत्यादिशब्देन गुणद्रव्यकर्मादिपरिग्रहः। तच्च जात्यादि यथा प्रमाणबाधितं तच्च षड्दार्थपरीक्षायां साधितम्। या चात्मनो बाधिकाऽनुमा साऽपि ज्ञापितप्रतिबन्धा नैरात्म्याधिकारे ॥ २४३७॥ २४३८॥ § 7931

ननु च वेदे प्र(मी)यमाणं तत्कथमत्र(नु ?)मया बाध्यते, अथ प्रमाणमपि बाध्येत। अनुमाऽपि कस्मात्तेन न बाध्यत इत्याशङ्क्याह—तस्या इत्यादि। § 7932

तस्या वस्तुनिबद्धायाः को बाधां मंस्यते जडः।
शब्दमात्रेण तुच्छेन तद्भाविन्याऽथवा धिया॥
२४३९॥§ 7934

तस्या इति। अनुमायाः। शब्दस्येच्छामात्रनिबन्धनत्वान्न प्रमेये वस्तुनि प्रतिबन्धोऽस्तीति न स तत्र प्रमाणम्। अनुमा तु तादात्म्यतदुत्पत्तिप्रतिबद्धलिङ्गबलेनोत्पद्यमाना तत्र वस्तुनि प्रतिबद्धेति सैव प्रमाणमतो बाधिका। तद्भाविन्येति।शब्दभाविन्या॥ २४३९॥ § 7935

अथाप्रतिबद्धोऽपि वस्तुनि शब्दः प्रमाणं स्यात्तदाऽतिप्रसङ्गः स्यादित्यादर्शयति —पुंवाक्यादपीति। § 7936
665/k

पुंवाक्यादपि विज्ञानं यत्प्रवृत्तमतीन्द्रिये।
तस्याप्यध्यक्षतुल्यत्वं कस्मादभिमतं न वः॥
२४४०॥§ 7938

अग्निहोत्रात्स्वर्गो न भवतीत्यस्यापि वाक्यस्य किं न प्रामाण्यं स्यात्, उभयत्राप्रतिबद्धत्वेनाविशेषात्॥ २४४०॥ § 7939

तमेवाविशेषं दर्शयन्नाह—दृष्टान्तेत्यादि। § 7940

दृष्टान्तनिरपेक्षत्वाद्दोषाभावोऽप्यदृष्टितः।
तस्याप्यस्त्येव बाधा चेच्छङ्क्यतेऽस्य नराश्रयात्॥
२४४१॥§ 7942

यद्येवं वैदिकेऽप्येषा न शङ्का विनिवर्त्तते।
मिथ्यावबोधहेतुत्वं तस्य हि प्राकृतं भवेत्॥
२४४२॥§ 7944

अथापि स्यात्—यदि नाम तदानीं दोषो नोपलभ्येत तथापि पुरुषाश्रयत्वेन सम्भाव्यत इति, एतद्वेदेऽपि समानम्, यथा हि तस्य प्राकृतं सत्यार्थत्वं तथा मिथ्यार्थत्वमपि सम्भाव्येतेति न कश्चिद्विशेषः॥ २४४१॥ २४४२॥ § 7945

यदुक्तं ममाप्रमाणमित्यादि, तदेतत्पौरुषेयेऽप्यग्निहोत्रात्स्वर्गो न भवतीत्यादौ वाक्ये शक्यमेव वक्तुमित्यादर्शयति—ममाप्रमाणमित्यादि। § 7946

ममाप्रमाणमित्येवं शब्दोऽर्थं बोधयन्नपि।
नारोऽसौ द्वेषमात्रेण शक्यो वक्तुं न साधुना॥
२४४३॥§ 7948

अग्निहोत्रात्स्वर्गो न भवतीत्ययं नारः—पौरुषेयशब्दोऽर्थं बोधयन्नपि मम मीमांसकस्याप्रमाणमित्येवं न साधुना द्वेषमात्रेण शक्यं वक्तुमिति वाक्यार्थः। अनेन(पौरुषा) पौरुषेययोरत्यन्तपरोक्षेऽर्थे तुल्यं प्रतीतिनिबन्धनत्वमाह। ततश्च तुल्ये प्रतीतिनिबन्धनत्वे यदपौरुषेयस्यैव प्रामाण्यं तद(नेतर?)स्येति निर्युक्तिकमेतत्।नच दोषाणां पुरुषाश्रयत्वात्तत्र मिथ्यात्वं शङ्क्यते नापौरुषेयेष्विति शक्यं वक्तुम्। अपौरुषेयेष्वपि मिथ्यार्थप्रत्ययहेतुत्वस्य सम्भाव्यमानत्वात्॥ २४४३॥ § 7949

एनमेवार्थं दर्शयति—इत्यत्यक्षेष्विति। § 7950

इत्यत्यक्षेषु सर्वोऽपि शब्दस्तुल्यबलाबलः।
एकत्रैवानुरागोऽयं तद्वः केनेह हेतुना॥
२४४४॥§ 7952

सर्व इति। पौरुषेयः। एकत्रैवेति। अपौरुषेये॥ २४४४॥ § 7953
666/k

यदुक्तं द्विषतोऽपीत्यादि, तत्राह—अनन्तरोदितमित्यादि। § 7954

अनन्तरोदितं न्यायं वेदाप्रामाण्यकारणम्।
प्राज्ञा जल्पन्ति तेनामी भवेयुः सत्यवादिनः॥
२४४५॥§ 7956

अनन्तरोदितमिति। शब्दस्येच्छामात्रवृत्तित्वेन वस्तुनि प्रतिबन्धाभावादित्यादि।प्राज्ञा इति। सौगताः। यथो(द्यो?)क्तं भाष्यकारेण—प्रत्यक्षस्तु वेदवचने प्रत्ययो न चानुमानं प्रत्यक्षविरोधेन प्रमाणीभवतीति, यच्चेदमुक्तं—चोदना हि भूतंभवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोत्यवगमयितुंनान्यत्किञ्चिनेन्द्रियमित्येवमादि, तत्सर्वम(मे?)तेनैव प्रत्यक्षं (स्तं?) भवति। पौरुषेयेऽपि वाक्ये सर्वस्यैतस्य समानत्वात्॥ २४४५॥ § 7957

यदुक्तं धारणाध्ययनव्याख्येत्यादि, तत्राह—मिथ्यानुरागेत्यादि। § 7958

मिथ्यानुरागसंजातवेदाध्यानजडीकृतैः।
मिथ्यात्वहेतुरज्ञात इति चित्रं न किंचन॥
२४४६॥§ 7960

नहि मातृविवाहादौ दोषः कश्चिदपीक्ष्यते।
पारसीकादिभिर्धूर्तैस्तदाचारपरैः सदा॥
२४४७॥§ 7962

मिथ्यानुरागेण संजातं च तद्वेदाध्यानं चेति समस्य तेन जडीकृता इति पश्चात्तृतीयासमासः। आध्यानं चानुपूर्व्येण चिन्ता। मिथ्यानुरागेण हि विद्यमानस्यापि दोषस्यादर्शनात्। यथा पारसीकादिभिर्मातृविवाहादेरिति न किञ्चिदाश्चर्यम् ॥ २४४६॥ २४४७॥ § 7963

यदुक्तं किञ्च शब्दस्य नित्यत्वमित्यादि, तत्राह—प्रत्यक्षेत्यादि। § 7964

प्रत्यक्षप्रत्यभिज्ञा तु प्रागेव विनिवारिता।
भ्रान्तेः सकल्पनत्वाच्च नातो नित्यत्वनिश्चयः॥
२४४८॥§ 7966

कल्पनापोढमभ्रान्तमिति हि प्रत्यक्षलक्षणम्, नच प्रत्यभिज्ञानं कल्पनापोढम्, स एवायमिति शब्दाकारोल्लेखेन प्रवृत्तेः। नाप्यभ्रान्तं पूर्वदृष्टप्रत्युत्पन्नयोरैक्यानुसन्धानात्। नच यदेव पूर्वदृष्टं तदेव पश्चाद्दृश्यते, अक्रमिणः सकाशात् क्रमिज्ञानानुत्पत्तेः। कार्यं हि कुतश्चिद्भवनधर्मि, यत्कदाचिन्न भवति तत्तस्याविकलं चेत्कारणं किमिति कार्याणि परिलम्बन्ते। नचापि नित्यस्यानुपकार्यतया काचिदपेक्षा सम्भविनी। तस्मात्तद्भावीनि ज्ञानानि युगपद्भवेयुः। प्रयोगः—यद्यदाऽविकलकारणं तत्तदा भवत्येव, यथा समवहितसकलचक्षुरादिकारणकलापं चक्षुर्ज्ञानम्। अवि
667/k कलकारणानि च सर्वस्यामवस्थायां गवादिशब्दभावीनि विज्ञानानीति स्वभावहेतुः। तस्माद्भ्रान्तेः सविकल्पकत्वाच्च प्रत्यभिज्ञा न प्रत्यक्षत्वेन सिद्धेति प्रागेव स्थिरभावपरीक्षायां प्रतिपादितम्॥ २४४८॥ § 7967

नचापि स्वरूपतः सर्वत्र प्रत्यभिज्ञानं सिद्धमित्यादर्शयन्नाह—व्यावर्त्तमानेत्यादि। § 7968

व्यावर्त्तमानरूपश्च भूयसा प्रत्ययो ध्वनौ।
शुकस्य व्याहृतं चेदं शारिकाया इतीक्षणात्॥
२४४९ ॥§ 7970

सोऽयं व्यञ्जकभेदाच्चेद्वक्ष्यामो व्यक्त्यपाक्रियाम्।
अस्मादेव च ते न्यायात्सर्वमेकमिदं भवेत्॥
२४५० ॥§ 7972

ततो न व्यञ्जकं किंचिद्व्य(ङ्ग्यं किञ्चिन्न वा भवेत्)।
एकस्मिन्नविभक्ते हि व्याहता भेदकल्पना॥
२४५१ ॥§ 7974

पौरुषेया इमे शब्दा एते चानरकर्तृकाः।
व्यवस्थैषाऽपि वो न स्यात्प्रत्यभिज्ञोपजीविनी॥
२४५२ ॥§ 7976

यदाहि शुकसारिकादिभिर्व्याह्रियते शब्दस्तदा—इदं सारिकाया व्याहृतमिदं शुकस्येति परस्परंभिन्नविषयाध्यवसायाद्व्यावर्त्तमानः प्रत्ययो भवतीति न

सर्वत्र सिद्धा प्रत्यभिज्ञा। अथापि स्याद्व्यञ्जकभेदादयं शुकादिव्याहारे परस्परव्यावृत्तः प्रत्ययो जायत इति, एतदपि वार्त्तम्, व्यञ्जकस्य निराकरिष्यमाणत्वात्। एतदेवाह—सोऽयमित्यादि। सोऽयमिति। व्यावर्त्तमानरूपः प्रत्ययः। किञ्च—यदि सिद्धोऽपि भेदः शब्दानां व्यञ्जककृतो व्यवस्थाप्यते, न स्वतः, तदा सर्वत्रानाश्वास इत्यतिप्रसङ्गमापादयन्नाह—अस्मादेव चेत्यादि। सर्वमिति। विश्वम्। भवत्वेवमिति चेदाह—ततो नेत्यादि। इदं व्यञ्जकमयं व्यङ्ग्य इति भेदनिबन्धनो व्यवहारो न स्या(द)भेदात्। तथा—इमे पौरुषेया एते च शंनो देवीरित्यादयोऽपौरुषेया इति व्यवस्था प्रत्यभिज्ञानपरायणानां भवतां नैव भवेद्विशेषाभावात्॥ २४४९॥ २४५०॥ ॥ २४५१॥ २४५२॥
§ 7977

केचिदित्यादिना परो वैदिकलौकिकभेदव्यवस्थां दर्शयति। § 7978

(केचिदेक)क्रमा एव व्यञ्जकक्रमसंस्थितेः।
इष्टा अपौरुषेयास्ते नियतक्रमयोगिनः॥
२४५३॥ § 7980

व्यञ्जकक्रमस्य संस्थितेर्नियतत्वात्केचिच्छंनो देवीरित्यादयो नियतक्रमा एव प्रती यन्ते, अतस्ते नियतक्रमयोगिनोऽपौरुषेया इष्टाः, तद्विपरीताः 668/k सामर्थ्यात्पौरुषेया इति सिद्धम्॥ २४५३॥ § 7981

नन्वयमित्यादिना दूषयति। § 7982

नन्वयं पौरुषो धर्मस्ताल्वा(दिव्यञ्जकक्रमः)।
(तस्मात्कदाचित्तस्यापि सम्भाव्येत)विपर्ययः॥
२४५४॥ § 7984

नियतक्रमयोगित्वमसिद्धम्। तथाहि—व्यञ्जकक्रमनियमात्तदिष्टं, स च व्यञ्जकानां ताल्वादीनां क्रमः पुरुषेच्छायत्तवृत्तित्वादनियतः, पुरुषेच्छायाः स्वातन्त्र्यात्। यदाह—यत्र स्वातन्त्र्यमिच्छाया नियमो नाम तत्र क इति। ततश्च शंनो देवीरित्यादेः सर्वकालमयमेव क्रमोऽभूद्भविष्यतीत्यत्र नियामकप्रमाणाभावात्कदाचिदन्यथाऽपि सम्भाव्येत क्रमः॥ २४५४॥ § 7985

यदुक्तं ज्वालादेः क्षणिकत्वेऽपि प्रत्यभिज्ञेत्यादि, तत्राह—तेजस्त्वादीत्यादि। § 7986

तेजस्त्वादि च सामान्यं विस्तरेण निराकृतम्।

तत्रातः प्रत्यभिज्ञेयं सामान्यं नित्यमेव नः(न?)॥
२४५५॥§ 7988

सर्वमेतद्वर्णेष्वपि कल्पयितुं शक्यत इति दर्शयन्नाह—वर्णेष्वित्यादि।
§ 7989

वर्णेषु शक्यते (चेयं प्रत्यभिज्ञा) विनाशिषु।
सामान्यं प्रत्यभिज्ञेयं मत्वा(तं?) ये वा
(षां?)विशेषतः२४५६§ 7991

भेदबुद्धिस्तु यत्रांशे द्रुतमन्दादिके भवेत्।
तत्र न प्रत्यभिज्ञानं भवे(.........)॥ २४५७॥§ 7993

सामान्यमिति। अन्यव्यावृत्तिलक्षणम्॥ २४५६॥ २४५७॥ § 7994
देशकालादिभिन्नाश्च गोशब्दव्यक्तिबुद्धय इत्यादावाह—शब्दैकत्वेत्यादि।
§ 7995

(शब्दैकत्वप्रसिद्ध्यर्थं)प्रयुक्तेषु तु हेतुषु।
विजातीयाविरोधित्वात्प्रतिबन्धो न सिद्ध्यति॥
२४५८॥§ 7997

शब्दैकत्वप्रतिपादनाय ये अनुमानप्रयोगा उक्तास्तेषु सिद्धे विपर्यये हेतोर्बाधकप्रमाणानुपदर्शनात् सर्वथैवानैकान्तिकता॥ २४५८॥ § 7998

यदुक्तम्—य ईदृक् स स्थिरो दृष्टो धूमसामान्यभागवदित्यस्य दृष्टान्तस्य साध्यविकलतामादर्शयन्नाह—धूमसामान्येत्यादि। § 7999

धूमसामान्यभागोऽपि नैव(.........)।
(...............) सिद्धसाधनम्॥ २४५९॥§ 8001

669/k

वस्त्वेव विजातीयपरावृत्तं सामान्यं लिङ्गमुच्यते नान्यत्, तच्चानित्यमेवेति साध्यविकलता दृष्टान्तस्य॥ २४५९॥ § 8002

यदुक्तं घटादेरेकतापत्तावित्यादि, तदयं वर्णेष्वपि परिहारः समान इत्यादर्शयति —गादेरित्यादि। § 8003

गादेरप्येकतापत्तौ जात्येष्टं सिद्धसाधनम्।
अतद्रूपपरावृत्तिरभिन्ना कल्पितैव हि॥
२४६० ॥§ 8005

व्यक्तीना(मेकतापत्तावनैकान्तिकता भवेत्)।
(प्रति) प्रयोगमाक्षाद्यैर्वर्णभेदविनिश्चयात्॥
२४६१ ॥§ 8007

देशकालादिभिन्नाश्चेत्यादिना प्रयोगप्रपञ्चेन यद्यन्यापोहलक्षणस्य सामान्यस्यैकत्वं साध्यते तदा सिद्धसाध्यता, सर्वत्रातद्रूपव्यावृत्तिलक्षणस्य सामान्यस्यैकबुद्ध्यध्यवसायवशेनैकत्वस्येष्टत्वात्। अथ व्यक्तीनां स्वलक्षणानामेकत्वं साध्यते तदा प्रत्यक्षानुमानाभ्यां व्याप्तेर्बाधितत्वादनैकान्तिकता हेतूनाम्। आक्षाद्यैरिति। अक्षमिन्द्रियं तत्र भवमाक्षम्, प्रत्यक्षमिति यावत्। आदिशब्देनानुमानपरिग्रहः। बहुवचनं व्यक्तिभेदापेक्षया॥ २४६०॥ २४६१॥ § 8008

कथं प्रत्यक्षतो भेदोऽवगत इत्याह—यन्मनोज्ञेत्यादि। § 8009

यन्मनोज्ञामनोज्ञादिभेदः प्रत्यक्षतो गतः।
बुद्धीनां क्रमभावित्वाद्भेदः सिद्धः(कुमारिवत्)॥
२४६२ ॥§ 8011

(देशका)लादिभिन्ना हि गोशब्दव्यक्तिबुद्धयः।
नैकार्था भिन्ननिर्भासाद्रसरूपादिवृद्धिवत्॥
२४६३ ॥§ 8013

षड्जादिभेदनिर्भासः प्रत्यक्षेण हि निश्चितः।
नच व्यञ्जकव.........तदभिधास्यते॥ २४६४ ॥§ 8015

अनुकूलो मनोज्ञः। विपर्ययाद्विपर्ययः। अनुमानतोऽपि बाधामाह—बुद्धीनामित्यादि। अस्यार्थो ह्यस्तनाद्यतना इत्यादिना स्पष्टीकरिष्यते। प्रयोगः—या या भिन्नावभासा बुद्धयस्ताः सर्वा नैकविषयाः, यथा रसरूपादिविषयाः, भिन्ननिर्भासाश्च देशकालादिभिन्ना गोशब्दव्यक्तिबुद्धय

इति व्यापकविरुद्धोपलब्धिः। असिद्धतामस्य परिहरन्नाह—षड्जादीत्यादि॥ २४६२॥ २४६३॥ २४६४॥ § 8016

बुद्धीनां क्रमभावाच्च भेदः सिद्धः कुमारिवदित्यस्यार्थं प्रमाणयन्नाह—ह्यस्तना इत्यादि। § 8017

670/k

ह्यस्तनाद्यतनाः सर्वे गोशब्दप्रत्यया इमे।
नैकार्थाः क्रमसम्भूते रूपगन्धादिबुद्धिवत्॥
२४६५॥ § 8019

प्रयोगः—ये ये क्रमिणः प्रत्ययास्ते नैकविषयाः, तद्यथा रसरूपादिप्रत्ययाः क्रमिणः, क्रमभाविनश्चेमे ह्यस्तनाद्यतना गोशब्दविषयाः प्रत्यया इति व्यापकविरुद्धोपलब्धिः॥ २४६५॥ § 8020

अन्यथेत्यादिना द्वयोरपि हेत्वोरनैकान्तिकतां परिहरति। § 8021

अन्यथा सर्वबुद्धीनामेकालम्ब(नता भवे)त्।
क्रमभावविरोधश्च शक्तकारणसन्निधेः॥
२४६६॥ § 8023

सर्वबुद्धीनामिति। रसरूपादिबुद्धीनाम्। परस्परमभिन्नालम्बनत्वप्रसङ्गो भिन्ननिर्भासादित्येतस्य हेतोर्बाधकं प्रमाणम्। क्रमभावविरोधश्चेत्येतत्तु क्रमसंभूतेरित्येतस्य ॥ २४६६॥ § 8024

यदुक्तं कृत्रिमत्वे च सम्बन्ध इत्यादि, तत्राह—प्रकृत्यैवेत्यादि। § 8025

प्रकृत्यैव पदार्थानामेकप्रत्यवमर्शने।
भेदेऽपि शक्तिनियमः पुरस्तात्प्रतिपादितः॥
२४६७॥ § 8027

......प्रत्यवमर्षाच्च शब्दैकत्वादयोऽपि न।
लोकः प्रयोगभूयस्त्वं शब्दस्यैकस्य मन्यते॥
२४६८॥ § 8029

अनेकव्यक्तिनिष्ठत्वात्सम्बन्ध उपपद्यते।
तस्मात्सार्वत्रिको नाके(नैको?)व्यक्तीनां ह्येकतां
गतः२४६९§ 8031

सुबोधम्॥ २४६७॥ २४६८॥ २४६९॥ § 8032

अथ कस्माल्लोक इत्युच्यत इत्याह—वस्तुतस्त्वित्यादि। § 8033

वस्तुतस्तु न सम्बन्धः शब्दस्यार्थेन विद्यते।
भेदात्तस्मादनुत्पत्तेर्भ्रान्तेरारोपितस्ततः॥
२४७०॥§ 8035

तथाहि विस्तरेणैषा प्रागेव प्रतिपादिता।
शब्दार्थसंस्थितिः सर्वा विप्लुता व्याप्त्यसम्भवात्॥
२४७१॥§ 8037

भेदादित्यनेन तादात्म्यलक्षणं सम्बन्धं निषेधति। तस्मादनुत्पत्तेरित्यनेन तदुत्पत्तिलक्षणम्। नचाभ्यामन्यः सम्बन्धोऽस्ति, नच प्रतिबन्धमन्तरेण शब्दस्यार्थप्रतिपादकत्वनियमो युक्तोऽतिप्रसङ्गात्। तस्मादारोपितः शब्दार्थयोः सम्बन्ध इति प्रागेवान्यापोहचिन्तायां प्रतिपादितम्॥ २४७०॥ २४७१॥ § 8038

671/k

तस्मादकृत्रिमः शब्दः इत्यादिप्रयोगे हेतुदृष्टान्तयोरसिद्धत्वमुद्भावयन्नाह—गोत्वं नित्यमित्यादि। § 8039

गोत्वं नित्यमपास्तं च सम्बन्धोऽपि च कल्पितः।
अण्वाकाशाद्यपि च क्षिप्तं हेतूदाहरणे न तत्॥
२४७२॥§ 8041

गोत्वं नित्यमपास्तमित्यनेन नित्यस्यासिद्धतामाह। सम्बन्धोऽपि च कल्पित इत्यनेनापि सम्बन्धादित्यस्य, अण्वाकाशाद्यपि च क्षिप्तमित्यनेनाकाशपरिमाणुवन्नि(त्यमि)त्यस्यासिद्धतामाह—अपास्तमिति। प्रतिक्षिप्तं षद्पदार्थपरीक्षायाम्। नेति प्रतिषेधि। तदिति तस्मादर्थे॥ २४७२॥ § 8042

संमुखानेकसामान्येत्यादावाह—निष्कृष्टेत्यादि। § 8043

निष्कृष्टगोत्ववाचित्वं चिरेण प्रतिपद्यताम्।
एकरूपतया भ्रान्तैर्जनैरध्यवसायतः॥
२४७३ ॥§ 8045

भ्रान्तत्वमस्य कथं सिद्धमित्याह—भावत इत्यादि। § 8046

भावतः क्षणिकत्वात्तु तावत्कालमपि स्थिरः।
नैवायमिति किं तस्य स्थितिः पश्चादपीष्यते॥
२४७४ ॥§ 8048

यथा शस्त्रादिभिश्छेद इत्यादावाह—घटादावपीत्यादि। § 8049

घटादावपि नैवास्ति किंचिन्नाशस्य कारणम्।
इतीदमपि निर्दिष्टं तत्क्व शब्दे भविष्यति॥
२४७५ ॥§ 8051

इतीदमपि निर्दिष्टमिति। स्थिरभावपरीक्षायाम्। विनाशस्याहेतुत्वप्रतिपादनेन। यदा घटादावपि नैव नाशकारणमस्तीति क्व शब्दे भविष्यतीति। नाशकारणमिति व्यवहितेन सम्बन्धः। अनेन च सिद्धसाध्यता वैधर्म्यदृष्टान्तस्य चासिद्धतोक्ता भवति॥ २४७५॥ § 8052

देशकालप्रयोक्तृणा मित्यादावाह—विप्लव इत्यादि। § 8053

विप्लवे प्रत्यभिज्ञायाः पुरस्तादुपपादितः।
देशकालप्रयोक्तृणां भेदाद्धर्मो विभिद्यते॥
२४७६ ॥§ 8055

षड्जर्षभगान्धारपञ्चमादिप्रभेदतः।
प्रत्यक्षतो हि विज्ञाता गव्यक्तिरपरा स्फुटा॥
२४७७ ॥§ 8057

नच व्यञ्जकभेदेन युक्तैषा भेदसंस्थितिः।

व्यक्तिर्नित्येषु नास्तीति पुरस्तादभिधास्यते॥
२४७८॥§ 8059

672/k

सुगमम्॥ २४७६॥ २४७७॥ २४७८॥ § 8060

गकारोऽत्यन्तेत्यादिके प्रयोगे सिद्धसाध्यतादोषमाह—गकारव्यतिरिक्तं चे- त्यादि। § 8061

गकारव्यतिरिक्तं च सामान्यं गत्वमिष्यते।
वास्तवं न प्रयोगेऽतो दुर्वारा सिद्धसाध्यता॥
२४७९॥§ 8063

इष्यत इति। नेति वक्ष्यमाणेन सम्बन्धः॥ २४७९॥ § 8064

अन्यापोहात्मकस्यापि न गत्वस्य समाश्रयः।
इत्थमेवेति चेन्नैवमाश्रयासिद्धतापितः॥
२४८०॥§ 8066

अगकारपरावृत्तगवर्णाभावतो भवेत्।
गान्यबुद्ध्यनिरूप्यत्वं कस्य धर्मो हि धर्मिणः॥
२४८१॥§ 8068

अथापि स्यात्—अन्यापोहात्मकस्यापि गत्वस्याश्रयो न भवतीति, इत्यमनेन प्रकारेण साध्यते, तेन सिद्धसाध्यता न भवति, नह्यन्यापोहाधारो गकारादिर्भवतो नेष्ट इति पूर्वपक्षं प्रतिक्षिपति। एवं हि साध्यमाने हेतोरसिद्धिता प्राप्नोति। तथाहि —न ह्यन्यापोहो नामान्य एव कश्चिदन्यत्र व्यावृत्तात्पदार्थात्। किं तर्हि ?। तदेव गकारादिव्यक्तिरूपं विजातीयव्यावृत्तिभेदान्तरप्रतिक्षेपेण तन्मात्रजिज्ञासायामन्यव्यावृत्तिरन्यापोह इत्यादिभिः पर्यायैः कथ्यते। तस्य तु धर्मिस्वरूपस्याभावे साध्ये गान्यबुद्ध्यनिरूपणादित्ययं हेतुः कस्य धर्मिणो धर्मो भवेत्, नैव कस्यचित् ॥ २४८०॥ २४८१॥ § 8069

यश्च परकल्पितगत्ववदिति दृष्टान्तः सोऽपि धर्म्यसिद्ध इति दर्शयन्नाह— वास्तवीत्यादि। § 8070

वास्तवी चानुमा सर्वा द्वयसिद्धमपेक्षते।
दृष्टान्तादि ततस्तेन दृष्टान्तो धर्म्यसिद्धिभाक्॥
२४८२॥§ 8072

दृष्टान्तादीत्यादिशब्देन हेत्वादिपरिग्रहः॥ २४८२॥ § 8073

किञ्च—अनुक्तोऽपि वादिना य एवेच्छया विषयीकृतः स एवायं इष्यते। न चापि भवता गत्वमात्रं सिसाधयिषितम्। किं तर्हि ?। अनेनोपायेन गकारास्यैकत्वं प्रतिपादयितुमिष्टम्। अस्यां च प्रतिज्ञायां प्रत्यक्षादिबाधापूर्वमुक्तेति दर्शयन्नाह—सर्वश्चायमिति। § 8074
673/k

सर्वश्चायं प्रयत्नस्ते गकारैकत्वसिद्धये।
तत्र प्रत्यक्षबाधा च दुर्निवारोदिता तव॥
२४८३॥§ 8076

अयमिति व्यतिरिक्तगत्वाधारनिषेधः। प्रत्यक्षबाधा चेति। चशब्दादनुमानबाधापरिग्रहः। उदितेति। यन्मनोज्ञामनोज्ञेत्यादिनोक्ता॥ २४८३॥
§ 8077

यदुक्तं द्वयसिद्धस्त्वित्यादि, तत्राह—ह्यस्तनेत्यादि। § 8078

ह्यस्तनाद्यतनाद्याश्च गवर्णप्रत्यया इमे।
क्रमभावेन नैकार्था रसरूपादिबुद्धिवत्॥
२४८४॥§ 8080

अतो न द्वयसिद्धोऽयमेको वर्णः सदा स्थितः।
अदोषं(अपोह ?)कल्पितस्यैव नित्यत्वं त्वस्य
कल्पितम् २४८५§ 8082

उदिता इत्यत्रापि लिङ्गविभक्तिपरिणामेन सम्बन्ध्यते। ततः प्रत्यक्षानुमानाभ्यां शब्दभेदस्य प्रतिषिद्धत्वान्नैको द्वयसिद्धो वर्णात्माऽस्तीति कल्पितस्यैवान्यापोहस्य नित्यत्वं कल्पितम्, तुल्यप्रत्यवमर्शप्रत्ययेनैकत्वाध्यवसायात्॥ २४८४॥ २४८५॥ § 8083

यदुक्तं नादेन संस्कृतादित्यादि, तत्राह—शब्दोपलम्भवेलायामित्यादि।
§ 8084

शब्दोपलम्भवेलायां कर्णपर्यन्तवर्त्तिनः।
न वायवोऽवगम्यन्ते श्रोत्रसंस्कारकारिणः॥
२४८६॥§ 8086

नादेन संस्कृताच्छ्रोत्राद्यदा शब्दः प्रतीयते।
तदुपश्लेषतस्तस्य बोधोऽध्यक्षेण बाध्यते॥
२४८७॥§ 8088

यदि हि श्रोत्रसंस्कारकारिणो वायवः केनचित्प्रमाणेन सिद्धाः स्युः तदैवं स्याद्वक्तुं—नादेन श्रोत्रं संस्क्रियत इति। न चैते सिद्धास्तस्मात् तदुपश्लेषतः—शब्दोपश्लेषतः तस्य नादस्य बोधोऽध्यक्षमिति कल्पनास्पदमेतत्॥ २४८६॥ २४८७॥ § 8089

यदुक्तं मधुरं तिक्तरूपेणेत्यादि, तत्राह—तिक्तपीतादिरूपेणेत्यादि। § 8090

तिक्तपीतादिरूपेण प्रवृत्तं मधुरादिषु।
ज्ञानं निर्विषयं यद्वच्छब्दज्ञानं यथा भवेत्॥
२४८८॥§ 8092

एतेन—यदुक्तं शब्दे बुद्धिस्तु तद्वशादिति तदपास्तम्। नह्यनाकारस्य ज्ञानस्यान्यो विषयो युक्तोऽतिप्रसङ्गात्॥ २४८८॥ § 8093

अथापि स्यात्—यदि नाम शब्दो न तस्य ज्ञानस्य विषयः, निर्विषयत्वं तु तस्य कथमित्याह—द्रुतमध्यादीत्यादि। § 8094
674/k

द्रुतमध्यादिभेदाद्धि नान्यः शब्दोऽवभासते।
अतद्रूपे च ताद्रूप्यज्ञानं नाविषयं कथम्॥
२४८९॥§ 8096

द्रुतमध्यविलम्बिनाऽऽकारेण हि ज्ञानमुपजायते, न च शब्दस्य द्रुताकारः समस्ति, तस्य नित्यव्यापित्वेनैकरूपत्वात्। न चान्यो द्रुताकारवानर्थः संभवति यः प्रत्यवभासेत। तस्मादाकारान् (नु?)रूपस्यार्थस्याभावान्निर्विषयत्वमेवास्य॥ २४८९॥ § 8097

स्यादेतत्—स एव शब्दो द्रुतादिरूपेणान्यथा च भासमानस्तस्यालम्बनं भविष्यति। यथोक्तम्— सर्वत्रालम्बनं बाह्यं देशकालान्यथात्मकः इति, अत्राह—अन्यथा चेति। § 8098

अन्यथा च तमेवार्थं वेत्तीति व्याहतं वचः।
अन्याकारस्य संवित्तौ स ह्यर्थो विदितः कथम्॥
२४९० ॥§ 8100

निराकारे हि विज्ञाने बाह्याकारः स ते ध्रुवम्।
बाह्यश्च न तदात्मेति किमसौ विद्यते तथा॥
२४९१ ॥§ 8102

साकारज्ञानपक्षेऽपि बाह्याकारानुरूपतः।
ज्ञाने नर्भाससंभूतावर्थो विदित उच्यते॥
२४९२ ॥§ 8104

इह बाह्यानुरूपेण न तु ज्ञानं प्रवर्त्तते।
तस्मान्निर्विषयं सर्वं भ्रान्तं चित्तमिति स्थितम्॥
२४९३ ॥§ 8106

व्याहतमिति। तत्त्वान्यथाकारयोः परस्परपरिहारस्थितलक्षणत्वेनैकत्र धर्मिण्ययोगात्। किञ्च—सर्वमेव भ्रान्तं निराकारपक्षे साकारपक्षे च निर्विषयमेवेति प्रतिपादयन्नाह—निराकारे हीत्यादि। निराकारज्ञानवादिनां हि नीलाद्याकारोऽर्थगत एवानुभूयते। न च यथा भ्रान्तज्ञानप्रतिभासी पीतादिस्तथा शङ्खादिरर्थोऽवस्थित इति स्फुटतरमेवाविषयत्वमस्य। ननु च पीताद्याकारो यदि नार्थगतस्तदाऽवश्यं तेन ज्ञानगतेन भवितव्यमन्यथोभयत्राभावे कथमनुभूयेत। ततश्च ज्ञानगतत्वे कथं निराकारता विज्ञानस्येति वक्तव्यम्। सत्यमेतत्। किन्तु—अभ्युपगम्यनिराकारज्ञानवादिपक्षमेतद्विज्ञानस्य निर्विषयत्वमुच्यते। यस्तु निराकारं ज्ञानमिच्छति तेनैवात्र परिहारो वाच्यः। साकारज्ञानपक्षेऽप्यर्थसदृशात्माकारानुभवादर्थानुभवो व्यवस्थाप्यते। नच भ्रान्ते ज्ञानेऽर्थसदृशात्माकारानुभूतिरस्तीत्यविषयमेव।नच साकार-

निराकाराभ्यामन्यः प्रकारोऽस्ति विषयग्रहणं प्रतीति। तस्मात्सर्वमेव भ्रान्तं ज्ञानं निर्विषयमिति सिद्धम्॥ २४९०॥ २४९१॥ २४९२॥ २४९३॥ § 8107

675/k

नचाप्यत्र भ्रान्तिनिमित्तं सम्भवतीति दर्शयन्नाह—नच व्यञ्जकसद्भाव इत्यादि। § 8108

नच व्यञ्जकसद्भावो युक्तो नित्ये विशेषतः।
तत्संस्कारानुरूपेण नातो भिन्ना धियो ध्वनौ॥
२४९४॥§ 8110

व्यञ्जकभेदो हि ध्वनौ—शब्दे भेदविभ्रमनिमित्तमुपवर्ण्यते, नच नित्यस्य कस्यचिद्व्यञ्जकोऽस्ति, तस्य तत्राकिञ्चित्करत्वात, नचाकुर्वन् कश्चिद्विशेषं तस्य व्यञ्जको युक्तोऽतिप्रसङ्गात्। एवं हि यत्किञ्चिद्यस्य कस्यचिद्व्यञ्जकं स्यात्। तस्मान्न व्यञ्जकसंस्काराद्ध(?)नौ—शब्दे भिन्ना बुद्धयो युक्ताः॥ २४९४॥
§ 8111

यदुक्तं यथा घटादेर्दीपादिरभिव्यञ्जक इष्यत इत्यादि, तत्रेदं प्रथमं श्लोकार्थमुपक्षिप्यैकेन श्लोकेन द्वितीयादिश्लोकैर्दूषयन्नाह—घटादिग्रहणार्थं हीत्यादि। § 8112

घटादिग्रहणार्थं हि यथा शक्तिंनियच्छति।
नेत्रेदीपस्तथा श्रोत्रे ध्वनिः शब्दोपलब्धये॥
२४९५॥§ 8114

श्रोत्रोपलब्धौ योग्यश्चेच्छब्दः प्रकृतिसंस्थितः।
असंस्कृतेऽपि तच्छ्रोत्रे किमर्थं नोपलभ्यते॥
२४९६॥§ 8116

योग्यकारणसद्भावाद्भवेदेवोपलम्भनम्।
संस्कृतश्रोत्रसद्भाववेलायामिव तस्य तत्॥
२४९७॥§ 8118

४ शक्तिं] Correction: ; व्यक्तिं (sic!)शक्तिं
५ नेत्रे] Correction: ; न प्र (sic!)नेत्रे
६ पलब्धौ] Correction: ; पलब्धो (sic!)पलब्धौ

नोपलब्धौ स योग्यश्चेत्पश्चादपि कथं भवेत्।
भावे च योग्यतायोगी शब्दो जातोऽपरो भवेत्॥
२४९८॥§ 8120

अथ पश्चादपि ज्ञानं नैव तद्बलभावि तत्।
संस्कृतश्रवणादिभ्यस्तस्योत्पादस्तु वर्ण्यते॥
२४९९॥§ 8122

संस्कृतान्नाम श्रोत्रम्, इदं तु वक्तव्यम्, किन्नु प्रकृत्या शब्दः स्वविषयज्ञानोत्पत्तौ समर्थ आहोस्विदसमर्थ इति। आद्ये पक्षे श्रोत्रसंस्कारात्प्रागप्युपलब्धिप्रसङ्गः। एतदेवाह—असंस्कृतेऽपीत्यादि। तस्येति। शब्दस्य। तदिति। तस्मात्। प्रयोगस्तु यदि विकलकारणमित्यादिकः पूर्ववद्वाच्यः, श्रोत्रसंस्कारवैयर्थ्यप्रसङ्गश्च। अथ द्वितीयपक्षस्तदा श्रोत्रसंस्कारोऽपि शब्दोपलम्भो न प्राप्नोति, सर्वदैव शब्दस्यायोग्यत्वात्। ततश्चास्मिन्नपि पक्षे श्रोत्रसंस्कारवैयर्थ्यमेव। प्रयोगः— यो यदुत्पादनायोग्यावस्थातो न विशिष्यते न स त-
676/k त्करोति, यथा कोद्रवः शाल्य ङ्कुरम्, न विशिष्यते च संस्कृतेऽपि श्रोत्रे शब्दो ज्ञानोत्पादनायोग्यावस्थात इति व्यापकानुपलब्धिः। नचायमसिद्धो हेतुरित्यादर्शयति—भाव इति। योग्यतया सम्बन्धो यस्याऽस्ति स योग्यतायोगी॥ २४९५॥ २४९६॥ २४९७॥ ॥ २४९८॥ २४९९॥ § 8123

ननु च यदि हिशब्दो ज्ञानोत्पत्तौ कारणमिष्टः स्यात्तदा तत्र तस्य योग्यायोग्यविकल्पोऽवतारं लभेत, यावता श्रोत्रमेव संस्कृतं शब्दोपलब्धौ कारणमिष्यते नशब्दः, तेन न भवति यथोक्तदोषप्रसङ्ग इत्येतदाशूर्य परिहरन्नाह—शब्दस्येत्यादि। § 8124

शब्दस्याग्राह्यतैवं स्यात्तस्मिन्ननुपयोगतः।
तस्य नैवं रसादिभ्यो विशेषः कश्चनास्ति हि॥
२५००॥§ 8126

एवं हि रसादिवच्छब्दस्यानुपयोगात्तज्ज्ञानज्ञेयता न प्राप्नोति। प्रयोगः— यो यत्र ज्ञाने नोपयोगं प्रतिपद्यते न स तज्ज्ञानज्ञेयः, यथा रसादिः श्रोत्रज्ञाने, नोपयुज्यते च शब्दः श्रोत्रज्ञान इति व्यापकविरुद्धोपलब्धिः। नायमनैकान्तिकः, अनुपकारकस्य ज्ञेयत्वे सति नियमाभावाद्रसादेरपि श्रोत्रविज्ञानविज्ञेयत्वप्रसङ्गात् २५०० § 8127

ननु च स्वकारणस्य नियामकत्वान्नातिप्रसङ्गो भविष्यति, तथाहि— संस्कृतश्रोत्रसमनन्तरप्रत्ययादिभ्यः समुत्पद्यमानं शब्दबोधात्मकमेवोत्पद्य-

ते न रसादिबोधात्मकम्, कारणशक्तिप्रतिनियमात्। अवश्यं च शब्दस्य हेतुत्वाङ्गीकरणेऽपि कारणशक्तिप्रतिनियमोऽङ्गीकर्त्तव्यः, तथाहि—तुल्येऽपि सर्वेषां हेतुत्वे कस्माच्छब्दबोधात्मकमेव भवति शब्दज्ञानं न श्रोत्रादिबोधात्मकमिति चोद्ये हेतुशक्तिप्रतिनियमैरेवोत्तरं वाच्यमित्येतत्सर्वमालोच्यानैकान्तिकतां परिहरन्नाह—शब्दबोधस्वभावं वेत्यादि। § 8128

शब्दबोधस्वभावं वा जनितं नाम तैरिदम्।
ज्ञानं शब्दनिराशंसैः संस्कृतश्रवणादिभिः॥
२५०१ ॥§ 8130

नामेत्यभ्युपगमे। यथा चायं पक्षो न युज्यते तथा पश्चात्— को वा ज्ञानस्येत्यादिना प्रतिपादयिष्यति। संस्कृतश्रवणादिभिरिति। आदिशब्देन समनन्तरप्रत्ययादिपरिग्रहः॥ २५०१॥ § 8131

यदि नाम शब्दो न कारणं तथापि दोष एव, तथाहि—किमसौ शब्दः प्रकृत्या तज्ज्ञानज्ञेयस्वभाव उत नेति पक्षद्वयम्, प्रथमे पक्षे दोषमाह—तज्ज्ञानज्ञेयेत्यादि। § 8132
677/k

तज्ज्ञानज्ञेयरूपो यं ययाऽपि त्वनुवर्त्तते।
शब्द इत्यनुवृत्तिः स्याद्विज्ञानस्यापि तस्य ते॥
२५०२ ॥§ 8134

अन्यथा ह्यनुवृत्तं न ज्ञानं स त्वनुवर्त्तते।
तज्ज्ञेयः शब्द इत्येवं परा स्याद्व्याहतिस्तव॥
२५०३ ॥§ 8136

ज्ञानज्ञेयस्वभावौ तौ बद्धौ शृङ्खलयेव हि।
एकभावे द्वितीयस्य प्राप्तिरव्यभिचारतः॥
२५०४ ॥§ 8138

यदि तज्ज्ञानज्ञेयस्वभावः शब्दः स्यात्तदा सर्वकालं शब्दरूपवत्तद्विज्ञानस्यापि नित्यत्वं स्यात्, तद्विज्ञेयस्वभावानुवृत्तेः। नहि देवदत्तस्य दण्डसम्बन्धस्वभावानुवृत्तौ न दण्डस्यानुवृत्तिर्भवेत्। बद्धौ शृङ्खलयेव हीति। हिशब्दो

यस्मादर्थे। यस्माज्ज्ञेयज्ञानयोः स्वभावौ शृङ्खलयेव बद्धौ, तस्मादेकस्वभावसद्भावे द्वितीयस्य प्राप्तिसद्भावः प्राप्नोत्यव्यभिचारादिति सिद्धम्॥ २५०२॥ २५०३॥ २५०४॥ § 8139

भवत्वेवं को दोष इत्याह—संस्कृतेत्यादि। § 8140

संस्कृतश्रवणोत्पाद्यज्ञानसम्बद्ध एव हि।
श्रोत्रासंस्करणेऽपीति ज्ञानमाक्षिप्यते स्फुटम्॥
२५०५॥§ 8142

संस्कृतश्रवणोत्पाद्यज्ञानसम्बद्ध एव हीति। शब्दोऽनुवर्त्तत इत्यध्याहारः।यस्मात्संस्कृतश्रवणोत्पाद्येन ज्ञानेन सम्बद्धः शब्दः सर्वदाऽनुवर्त्तते तस्मादसंस्कृतश्रोत्रस्यापि तद्विज्ञानं प्राप्नोतीति व्यर्थं श्रोत्रसंस्करणम्॥ २५०५॥ § 8143

द्वितीयेऽपि पक्षे दोषमाह—तज्ज्ञेयेत्यादि। § 8144

तज्ज्ञेयात्मा न शब्दश्चेदतदात्मरसादिवत्।
न तद्बोधस्वभावं यच्छ्रोत्रज्ञानं तथासति॥
२५०६॥§ 8146

सुबोधम्॥ २५०६॥ § 8147

एतच्च सर्वं तदनुपकार्यस्यापि ज्ञानस्य तद्बोधस्वभावत्वमभ्युपगम्योक्तम्, इदानीं तद्बोधस्वभावत्वमेवासति सम्बन्धे ज्ञानस्यायुक्तमिति प्रतिपादयन्नाह—को वेति। § 8148

को वा ज्ञानस्य सम्बन्धः शब्देन यत इष्यते।
तच्छब्दबोधरूपं हि न तादात्म्यं विभेदतः॥
२५०७॥§ 8150

नच तस्य तदुत्पत्तिः शब्दस्याजनकत्व(तः)।
तदुत्पत्तौ तु नियमात्सा सदाभाविनी भवेत्॥
२५०८॥§ 8152

678/k

एवं तद्विषयं ज्ञानं सदोत्पद्येत वा नवा।
इत्येकान्ते स्थिते व्यर्था श्रोत्रसंस्कारकल्पना॥
२५०९॥§ 8154

द्विविध एव हि वस्तूनां प्रतिबन्धस्तादात्म्यं तदुत्पत्तिश्च अन्यत्रोपकाराभावात्। नचानुपकार्योपकारकयोः सम्बन्धो युक्तोऽतिप्रसङ्गात्। स च द्विविधोऽपि प्रतिबन्धो नास्ति शब्दज्ञानयोरिति कथं तद्बोधस्वभावज्ञानमसति प्रतिबन्धे भवेत्। अन्यथा ह्यतिप्रसङ्गः स्यात्। अथापि स्यात्तदाकारोत्पत्त्या तद्बोधस्वरूपं तज्ज्ञानं व्यवस्थाप्यते विनाऽपि प्रतिबन्धेनेति। तदेतदसम्यक्। निराकारज्ञानाभ्युपगमात्। नहि मीमांसकैः साकारं ज्ञानमभ्युपगम्यते। भवतु वा तथाप्ययुक्तं शब्दस्य परोक्षत्वप्रसङ्गात्, एवं हि शब्दपरोक्षत्वमेव स्यान्न प्रत्यक्षत्वं, ततश्च तत्साधकप्रमाणाभावात्, तदाकारं तद्विज्ञानमित्येतदेव न सिद्ध्येत्। नापि कार्यव्यतिरेकात्तत्सिद्धिः, तस्य जनकत्वानभ्युपगमात्। स्यादेतत्—यस्यापि साकारवादिनो जनक एव विषयस्तस्यापि सर्वदैवार्थस्य परोक्षत्वात्कथमर्थाकारत्वं ज्ञानस्यावगमिति। सत्यम्। किन्त्वयं तस्योपायो यत्तत्कार्यव्यतिरेकतः कारणान्तरं निश्चितं, तद्विज्ञानस्य नीलाद्याकारभेदकत्वेन निश्चितमन्वयव्यतिरेकाभ्याम्। तथाहि—चक्षुरालोकमनस्काराणां सर्वविज्ञानेषु तुल्यत्वान्न तत्कृतो ज्ञानस्य नीलादिभेद इति सामर्थ्याद्यत्तत्कारणान्तरंव्यतिरेकतोऽनुमितं तत्कृतोऽयं भेद इति निश्चीयते। तेन तत्कृतत्वात्तस्यासावाकारो ज्ञानेन गृहीत इति व्यवस्थाप्यते। न त्वयमपि भवतोऽस्त्युपायस्तस्य कारणत्वानभ्युपगमात्। स्यादेतत्—चक्षुरादीनामपि सर्वदा परोक्षत्वात्सर्वविज्ञानेष्वविशिष्टत्वंकथमवसितमिति। सत्यमेवमेतद्विज्ञानवादचिन्तायाम्। स हि विज्ञानवादी स्वप्नादाविव समनन्तरप्रत्ययकृतमेव विज्ञानस्य विशेषं वर्णयति। न बाह्यकृतम्। किन्तु सति बाह्येऽर्थे सर्वमेतदुच्यते। अन्यथा हीदमेव चोदनीयं कार्यव्यतिरेकतोऽपि कथं बाह्यसिद्धिः स्यादिति कारणमात्रास्तित्वं सिद्ध्येन्न तु बाह्यम्, तत्तु कारणं स्वप्नादाविवान्तरमपि सम्भाव्यमित्यलं प्रसङ्गेन। अथापि जनकत्वमभ्युपगम्यते शब्दस्य तथापि दोष इति दर्शयन्नाह—तदुत्पत्तावित्यादि। सेति। तदुत्पत्तिः।एवमित्यादिनोपसंहरति। नवेत्यजनकत्वपक्षे। इत्येकान्त इति। नित्यं ज्ञानस्यसदसत्तालक्षणे॥ २५०७॥ २५०८॥ २५०९॥ § 8155

एवं तावच्छ्रोत्रस्य संस्कारमभ्युपगम्य विषयस्य जनकाजनकस्वभावचिन्तया श्रोत्रसंस्कारवैयर्थ्यमुक्तम्, इदानीं श्रोत्रसंस्कार एव न सम्भवतीति 679/k
प्रतिपादयन्नाह —कादाचित्के हीत्यादि। § 8156

कादाचित्के हि संस्कारे सत्येव ज्ञानसम्भवः।

कादाचिदिति शोभेत संस्कारपरिकल्पना॥
२५१० ॥§ 8158

ज्ञानकार्यावसेयश्च संस्कारः शक्तिलक्षणः।
तच्च ज्ञानं सदाभावि यदि वा भावि सर्वदा॥
२५११ ॥§ 8160

कादाचित्कं कथं नाम संस्कारं तस्य सूचयेत्।
उत्तरं श्रोत्रसंस्कारान्नातः साधु प्रकाशितम्॥
२५१२ ॥§ 8162

एवं हि संस्कारकार्यं विज्ञानं कादाचित्कं युज्यते। यदि संस्कारः कादाचित्को भवेत्। अन्यथा कारणे नित्यमविकले स्थिते तत्कार्यं किमिति कदाचिद्भवेत्। न चसंस्कारः कादाचित्को नित्यस्य श्रोत्रस्य युज्यते इति दर्श-यन्नाह—ज्ञानकार्यावसेयश्चेत्यादि। तथाहि श्रोत्रादेः संस्कारो ज्ञानकार्येणाव-सीयमानः शक्त्यात्मक एव संस्कारो भवेत्, शक्तेरेव कार्यावसेयत्वात्, सा च शक्तिः श्रोत्रस्यात्मभूतैव न तद्व्यतिरेकिणी, ततः कार्योत्पत्तेः श्रोत्रस्या कारणत्वप्रसङ्गात्। सम्बन्धासिद्धेश्च शक्तिसद्भावे तद्भविज्ञानं सदा भवेत्। अथासद्भावस्तदा न कदाचित्तद्भाविज्ञानं भवेत्। ततश्च कादाचित्कत्वं ज्ञान-स्य न स्यात्, तस्मात्कादाचित्कं विज्ञानं कथं श्रोत्रस्य शक्तिलक्षणं संस्कारं सूचयेत्, नैव॥ २५१०॥ २५११॥ २५१२॥ § 8163

अथापि सयान्नैव स्वाभाविकी शक्तिर्ज्ञानकार्याऽनुमेया। किं तर्हि ? नादैः श्रोत्रस्यापूर्वैव कादाचित्की शक्तिराधीयते, सैव ज्ञानानुमेया, तेन कादाचित्कं विज्ञानं शक्तेः सूचकमुपपद्यत एवेत्याह—शक्तिराधीयत इत्यादि। § 8164

शक्तिराधीयते श्रोत्रे यदि वाऽव्यतिरेकिणी।
व्योम्नो दिशो वा नित्यत्वं ततो हीयेत जन्मतः॥
२५१३ ॥§ 8166

आत्मभूता वा शक्तिराधीयेत, व्यतिरिक्ता वा, व्यतिरिक्ताव्यतिरिक्ता वेति पक्षत्रयम्। प्रथमे पक्षे शक्तिस्वरूपवदनित्यत्वं श्रोत्रस्योभयात्मकस्यापि

११ श्रोत्रस्या] Correction : ; श्रोत्रस्य (sic !)श्रोत्रस्या
१२ तद्भवि] Correction : ; सद्भावि (sic !)तद्भवि

प्राप्नोति। कुतः ?, जन्मतः—उत्पत्तेः। अथापि स्यान्न श्रोत्रस्य शक्तितोऽनन्यत्वमभ्युपगतम्। किं तर्हि शक्तेरेव श्रोत्रादिति, तदेतत्पश्यत महतो ह्यान्ध्यस्य विलसितम्। कथं हि नामैकस्य स्वभावस्य संश्लेषे तदैवापरो दूरीभवेत्। परस्परस्वभावानुप्रवेशलक्षणत्वा दभेदस्य। नहि सलिलं पयसो दवीयसि 680/k गोचरे वर्त्तमानमनुभवति तत्संश्लेषमिति यत्किञ्चिदेतत्॥ २५१३॥ § 8167

भवतु चायं पक्षस्तथापि दोष एवेति दर्शयन्नाह—भावाच्चेत्यादि। § 8168

भावाच्चाव्यतिरिक्तत्वान्नित्यत्वं संस्कृतेरपि।
(प्राप्नोति, तेन वस्तूनां विज्ञानं सर्वदा भवेत्)॥
२५१४॥ § 8170

भावस्वरूपवत्संस्कारस्यापि नित्यत्वं प्राप्नोत्यव्यतिरेकात्। ततश्चायमपरो दोष इत्याह—तेनेत्यादि॥ २५१४॥ § 8171

द्वितीयेऽपि पक्षे दोषमाह—व्यतिरेके त्वित्यादि। § 8172

व्यतिरेके तु तस्येति सम्बन्धो नोपपद्यते।
श्रोत्रस्याकारकत्वं च शक्तेर्ज्ञानसमुद्भवात्॥
२५१५॥ § 8174

शक्तेर्भावाद्व्यतिरेकेऽभ्युपगम्यमाने तस्यासौ शक्तिरिति सम्बन्धो न स्यात्। अनुपकार्यस्य पारतन्त्र्यायोगात्। अथ (नच ?) श्रोत्रं शक्तिमुपकरोति, व्यञ्जकस्यैवनादादेरुपकारकत्वेनेष्टत्वात्। अथ श्रोत्रस्याप्युपकारकत्वं तदा शक्त्युपकारिण्या अपि शक्तेः श्रोत्राद्व्यतिरेक इत्यनवस्था स्यात्। ततश्च शक्तीनामेव परम्परया घटनाच्छक्तेरेव कार्योत्पत्तेः श्रोत्रस्याकारकत्वं स्यात्। ततश्चावस्तुत्वप्रसङ्गः। अथ शक्त्युपकारिण्याः शक्तेरव्यतिरेकोऽभ्युपगम्यते, क इदानीमाद्यायां शक्तावव्यतिरेके प्रद्वेषः। किञ्च—नित्यं शक्त्युत्पत्तिप्रसङ्गः, तद्धेतोः श्रोत्रस्य नित्यत्वात्, न चानुपकार्यस्य सहकार्यपेक्षा काचित्॥ २५१५॥ § 8175

तृतीयं पक्षमाह—भेदाभेदेत्यादि। § 8176

भेदाभेदविनिर्मुक्तं व्यस्तं पक्षान्तरं ततः।
उत्तरं श्रोत्रसंस्कारादसंस्कृततयोच्यते॥
२५१६॥ § 8178

एतेनैव निषेद्धव्या विषयोभयसंस्कृतिः।
तस्मान्नित्येष्वभिव्यक्तिः सर्वथाऽपि निरास्पदा॥
२५१७ ॥§ 8180

ततश्च व्यक्तिमाश्रित्य दीर्घह्र(?)स्वक्रमादयः।
ये केचित्प्रविभज्यन्ते तेऽपि सर्वे निरास्पदाः॥
२५१८ ॥§ 8182

व्यस्तमिति। पुद्गलादिपरीक्षायाम्। एकस्यैकदा विधिप्रतिषेधायोगात्।
681/k तथाहि भेदाभेदौ परस्परपरिहारस्थितलक्षणौ, तयोरेकस्वभावव्यवच्छेदेनैवापरस्य परिच्छेदात्, यस्य हि यदात्मव्यवच्छेदमन्तरेण न स्वभावः परिच्छिद्यते स तत्परिहारेण स्थितो यथा भावाभावयोरन्यतरः, यौ च परस्परपरिहारस्थितलक्षणौ तयोरेकस्वभावनिषेधोऽपरविधिनान्तरीयक इत्यन्यत्वनिषेधे सामर्थ्यात्तादात्म्यविधिरिति तदानीमेव तस्यापि प्रतिषेधो न युक्तः, अन्यत्वस्याप्यप्रतिषेधप्रसङ्गादित्येवमुभयपक्षे दोषो वाच्यः। एतेनैवेति। प्रकृत्या ज्ञानोत्पादनयोग्यायोग्यस्वभावविकल्पद्वारेण। तस्मादित्यादिनोपसंहरति। क्रमादय इत्यादिशब्देन प्लुतोदात्तादिपरिग्रहः॥ २५१६॥ ॥ २५१७॥ २५१८॥ § 8183

येषां त्वप्राप्तजातोऽयं शब्दः श्रोत्रेण गृह्यत इत्यादावाह—अप्राप्तिमात्रसाम्येऽपीत्यादि। § 8184

अप्राप्तिमात्रसाम्येऽपि न सर्वस्य ग्रहो यथा।
अयस्कान्तेन लोहस्य सामर्थ्यनियमस्थितेः॥
२५१९ ॥§ 8186

यद्यपि सर्वोऽप्राप्तस्तथाऽपि पदार्थानां शक्तिप्रतिनियमान्न पूर्वस्य विषयस्य ग्रहः —ग्रहणं प्राप्नोति। यथा—अयस्कान्तो नामोपलोऽप्राप्तमयः कर्षन्नापि न सर्वमप्राप्तं कर्षति॥ २५१९॥ § 8187

अयस्कान्तप्रभेत्यादिना—शङ्करस्वामिमतेन दृष्टान्तासिद्धिमाशङ्कते। § 8188

अयस्कान्तप्रभाप्राप्त्या तत्राप्याकर्षणं यदि।
ननु प्रभा न दृश्येयं कथमस्तीति गम्यते॥
२५२० ॥§ 8190

स हि प्राह। तत्राप्ययस्कान्तमणिप्रभावेधवशादेवाकर्षणमयसोऽन्यथा सर्वदेशावस्थितानामयसामाकर्षणं स्यात्। यद्यपि तस्य प्रभा प्रदीपप्रभावन्नोपलभ्यते,तथाऽप्यनुमेया,ध्यवधारे (अव्यवधान ?) दूरे चाकर्षणदर्शनादिति। नन्वित्यादिना प्रतिविधत्ते। न दृश्येयमित्यनुपलम्भेन सद्व्यवहारनिषेधं करोति॥ २५२०॥ § 8191

यदपि प्रसङ्गसाधनमुक्तं सर्वदेशावस्थितानामयसामाकर्षणप्रसङ्गादिति, तत्परिहरन्नाह—कस्मादाप्तमित्यादि। § 8192

कस्मादाप्तं न काष्ठादि सा समाकर्षति प्रभा।
तच्छक्तिनियतत्वाच्चेदप्राप्तावपि तत्समम्॥
२५२१॥ § 8194

प्राप्तिपक्षेऽपि तुल्यः प्रसङ्गः, कस्मात्साऽयस्कान्तप्रभा सर्वं प्राप्तं काष्ठादिकं नाकर्षतीति। पदार्थस्वभावप्रतिनियमान्नातिप्रसङ्ग इति चेदप्राप्तिपक्षेऽपि 682/k पदार्थस्वभावस्य नियामकत्वं केनापहृतम्, येन तत्र नेष्यते, तस्माददृष्टप्रभाकल्पनं व्यर्थमेव॥ २५२१॥ § 8195

यदुक्तम्—तत्र दूरसमीपस्थग्रहणाग्रहणे समे। स्यातां न च क्रम इति तत्राह —दूरेत्यादि। § 8196

दूरमध्यसमीपस्थैरक्रमेणैव गम्यते।
प्रयोगानन्तरं तत्र सर्वेषां ज्ञानजातितः॥
२५२२॥ § 8198

क्रमग्रहणमसिद्धं शब्दप्रयोगानन्तरं युगपद्विज्ञानोत्पत्तेः॥ २५२२॥ § 8199

यच्चोक्तम्—नापि तीव्रमन्दादिसम्भव इति, तत्राह—दूरासन्नादीत्यादि। § 8200

दूरासन्नादिभेदेन स्पष्टास्पष्टं यथेक्ष्यते।
रूपं तथैव शब्देऽपि तीव्रमन्दादिविद्भवेत्॥
२५२३॥ § 8202

यथा रूपमप्राप्य गृह्यमाणमध्या(व्या ?)पि च स्पष्टास्पष्टमीक्ष्यते तथा शब्देऽप्यध्या(व्या ?)पिन्यप्राप्य गृह्यमाणे च तीव्रमन्दादिवेदना भविष्यति। न-

३ अव्यवधान] Correction : ; व्यवधाने (sic !)अव्यवधान
३] Correction : ; (णा ?) (sic !)
५ स्पष्टास्पष्ट] Correction : ; स्पष्ट (sic !)स्पष्टास्पष्ट

नु च परस्य रूपस्याप्यप्राप्य ग्रहणमसिद्धं तत्कथं दृष्टान्तत्वेनोच्यत इति। नैष दोषः। यद्यपि परस्य वचनमात्रान्न सिद्धम्, तथापि यत्प्रमाणसिद्धं तदुभयोरपि सिद्धम्। किं पुनःरत्र प्रमाणम्, सन्निकृष्टविप्रकृष्टयोस्तुल्यकालग्रहणम्। यो हि गतिमान्स सन्निकृष्टमाशु प्राप्नोति, विप्रकृष्टं चिरेण, यथा देवदत्तो ग्रामाद्ग्रामान्तरं गच्छन्, शाखाचन्द्रमसोस्तु तुल्यकालमुन्मेषसमनन्तरमेव ग्रहणं दृष्टं, तस्मादप्राप्यकारि चक्षुरिति गम्यते। अत्रोद्योतकरः प्राह—ज्ञानानामाशूत्पत्तेः कालभेदस्याग्रहणान्मिथ्याप्रत्यय एष उत्पलपत्रशतवेधवदिति। तदेतदसम्यक्, एवं हि सरो रस इत्यादावपि क्रमव्यवसायो न स्यादाशूत्पत्तेस्तुल्यत्वात्, ततश्च प्रतीतिभेदो न स्यात्, सर्वासां च बुद्धीनामाशूत्पत्तिरस्तीति न कदाचित्क्रमग्रहणं स्यादिति प्राग् निर्लोडितमेतद्विस्तरेण। पुनः स एवाह—यद्यप्राप्यकारि चक्षुर्भवेत्तदा न कुट्यादेरावरणस्य सामर्थ्यमस्तीत्यावरणानुपपत्तिः। यच्च दूरीभूतस्याग्रहणं अन्तिके च ग्रहणं तत्र (न्न ?) स्यादविशेषात्। स्यादेतत्—य एव हि चक्षुषो विषयीभवत्यर्थः स उपलभ्यते यश्च न भवति नासावुपलभ्यत इति। तच्च नैवम्। सम्बन्धव्यतिरेकेण विषयीभावानुपपत्तेः। कोऽयं सम्बन्धव्यतिरेकेण विष-
683/k यीभावो नाम। केवलं मयोच्यते सम्बन्ध इति भवताऽभिधीयते विषयीभाव इति न कश्चिद्विशेष इति। तदेतदसम्यक्। कारणीभावो हि विषयीभाव उच्यतेऽस्माभिर्न सम्बन्धः। तथाहि—रूपादिर्विषयश्चक्षुषो विज्ञानोत्पत्तौ सहकारीतां प्रतिपद्यमानो विषयीभवतीत्युच्यते, नतु तेन सहाश्लिष्यन्। द्विविधश्च सहाकारार्थः। परस्प(म्प ?)रोपकारो वा, यथा— प्रभावश्च (प्रस ?)रादपवरकप्रतिष्ठस्य, एकार्थक्रिया वा, यथोन्मिषतमात्रेण रूपं गृह्णतः। उभयथापि विज्ञानस्य कारणविशेष एव विषय उच्यते, नतु सम्बन्धी॥ स एव कारणविशेषप्रतिनियमोऽसति सम्बन्धे न स्यादिति चेत्। न। स्वकारणशक्तितः प्रतिनियमसिद्धेस्तथाभूत एवासौ स्वकारणादुत्पद्यमान उत्प(पप ?)द्यते, येन कश्चिदेव ज्ञानजनको भवति नान्यः, कारणभेदेन भिन्नस्वभावत्वात्सर्वभावानाम्। यथा च भवतस्तुल्येऽपि सम्बन्धे किमिति चक्षु रूपमेवोपलभते न रसम्।तेनासम्बन्धान्नोपलभत इति चेत्, स एव हि सम्बन्धः किमिति न स्यात्, देशस्याभिन्नत्वात्। न ह्यत्र नियामकं किञ्चिदस्ति कारणम्, येनाभिन्नदेशत्वेऽपि रूपमेवानुसरति चक्षुर्न रसं तद्देशवर्त्तिनमपि, नाप्यतिदूरदेशवर्त्ति रूपमिति। स्वहेतुर्नियामक इति चेत्। तदेतदप्राप्तिपक्षेऽपि समानमित्यलं विस्तरेण॥ २५२३॥ § 8203

भिन्नाभानामित्यादिना परस्य चोद्यमाशङ्कते। § 8204

भिन्नाभानां मतीनां चेदेकालम्बनता कथम्।
तुल्यं रूपधियामेतच्चोद्यं बाह्यार्थवादिनाम्॥
२५२४॥§ 8206

कथं भिन्नाभानां मतीनामेको विषयो भवेत्, एवं हि रसरूपादिबुद्धीनामेकालम्बनता स्यादिति परस्याभिप्रायः। परिहारमाह—तुल्यमित्यादि। रूपधियां —रूपविषयाणामपि बुद्धीनाम, एतच्चोद्यं समानम्—कथमेकविषयता भवेद्दूरासन्नादिभेदेन स्पष्टादिप्रतिभासानामिति। एतच्च बाह्यार्थवादिनां चोद्यम्। ये विषयगतमेवाकारं वर्णयन्ति न विज्ञानगतम् ते पुनर्विज्ञानवादिनस्तेषां सर्वमेव विज्ञानंनिर्विषयमात्मसंवेदनं स्पष्टाद्याकारभेदवद्भिन्नमेवोपजायत इति न तेषां चोद्यम्। येषामपि बाह्यार्थावादिनां साकारं ज्ञानमिति पक्षस्तेषां सर्वात्मना विषयसारूप्यानभ्युपगमात्केनचिदंशेन सारूप्याद्भिन्नाभानामपि मतीनामेकविषयत्वमविरुद्धमेवेति न चोद्यम्॥ २५२४॥ § 8207

शब्दस्य तर्हि प्राप्तिग्रहणे किं बाधकं प्रमाणं अप्राप्तिग्रहणे च किं साधकमिति प्रश्ने सत्याह—प्राप्तीत्यादि। § 8208

684/k

प्राप्तिग्रहणपक्षे तु कर्णाभ्यन्तरपक्षवत्।
न विच्छिन्न इति ज्ञानं मेघशब्दादिके भवेत्॥
२५२५॥§ 8210

कर्णाभ्यन्तरपक्षवदिति वैधर्म्यदृष्टान्तः। षष्ठ्यन्ताद्वतिः। यथा कर्णकण्डूविनोदनकारिणः पतत्रिपक्षस्याविच्छिन्नं शब्दं उपलभ्यते, तथा मेघादिशब्दस्यापि कदम्बगोलकन्यायेन प्रविसर्पतः कर्णदेशमागतस्यैव ग्रहणात्तुल्यं ग्रहणं प्राप्नोति। न चस्वकारणसंयोगसमवायिदेशवशादयं विच्छेदविभ्रम इति शक्यं वक्तुम्। तेषां श्रोत्रेणाग्रहणात्। न ह्यविषयीभूतपदार्थाकारमारोपयदुत्पद्यते क्वचिद्विज्ञानम्। नहि चक्षुर्विज्ञानं रससारूप्यं समारोपयतीत॥ २५२५॥
§ 8211

तदेवं प्राप्तिग्रहणे बाधकं प्रमाणमभिधायाप्राप्तिग्रहणे साधकमाह—तद्विच्छिन्न इत्याद। § 8212

तद्विच्छिन्न इति ज्ञानजनकत्वाद्यथा मनः।
श्रोत्रमप्राप्यकारि स्यान्नान्यथैवं त्वगादिवत्॥
२५२६॥§ 8214

तदिति। तस्मात्। नान्यथैवं त्वगादिवदिति वैधर्म्यदृष्टान्तः। यथा त्वगादेरिन्द्रियस्य विच्छेदेन ग्रहणं न भवति तथाऽत्रापि स्यादिति यावत्॥ २५२६॥ § 8215

मनोपीत्यादिना दृष्टान्तस्य साध्यविकलतामाशङ्क्य परिहरति। § 8216

मनोऽपि प्राप्यकारीति ये प्राहुः क्षणमात्रतः।
विदूरतरदेशस्थं चेतस्तेषां न युज्यते॥
२५२७॥§ 8218

अत्रोद्योतकरकुमारिलादयः प्रमाणयन्ति—प्राप्यकारिणी चक्षुःश्रोत्रे बाह्येन्द्रियत्वात् घ्राणादिवत्। बाह्यग्रहणमन्तःकरणेन मनसा व्यभिचारपरिहारार्थम्। तथा करणत्वे सति व्यवहितार्थानुपलम्भकत्वात् घ्राणादिवत्। विषयनिवृत्त्यर्थं करणत्वे सतीति विशेषणम्। तथा रूपशब्दो प्राप्यकारिबाह्येन्द्रियग्राह्यौ बाह्येन्द्रियार्थत्वात्, गन्धरसवत्। तथा रूपशब्दविज्ञाने प्राप्यकारिबाह्येन्द्रियग्राह्यविषयालम्बने बाह्येन्द्रियार्थालम्बनत्वात, गन्धरसज्ञानवदिति। अत्र दूषणमाह—यत्त्वित्यादि। § 8219

यत्तु बाह्येन्द्रियत्वादि प्राप्यकारित्वसाधनम्।
अन्यधर्मविजातीयाद्विरोधाद्व्यभिचारि तत्॥
२५२८॥§ 8221

सुबोधम्॥ २५२८॥ § 8222
685/k

तस्माच्छ्रोत्रियदृष्टेयमित्यादावाह—व्यस्ता इत्यादि। § 8223

व्यस्ताः पूर्वं च संयोगविभागव्यतिरेकिणः।
वायोरक्षति(णि?)कत्वाच्च युक्ता नाव्यतिरेकिणः॥
२५२९॥§ 8225

अतएवाविशेषत्वाद्गतिर्नास्योपपद्यते।
वेगाभावादतो नासौ यावद्वेगं प्रतिष्ठते॥
२५३०॥§ 8227

पूर्वमिति। षट्पदार्थपरीक्षायाम्। अव्यतिरिक्तास्तर्हि भविष्यन्तीत्याह—वायोरित्यादि। वायव एव हि संयुक्ता वियुक्ताश्चोत्पद्यमाना अव्यतिरिक्ताः संयोगविभागा उच्यन्ते। नचाक्षणिकाः क्रमेणापि संयुक्तस्वभावा युज्यन्ते तेषामेकरूपत्वात्॥ २५२९॥ २५३०॥ § 8228

यदुक्तम्—कर्णव्योमनि संप्राप्त इत्यादि, तत्राह—कर्णेत्यादि। § 8229

कर्णव्योमनि संप्राप्तः शक्तिं श्रोत्रे करोति चेत्।
तत्कशाघातवत्कस्माच्छब्दवित्तौ न तद्गतिः॥
२५३१॥§ 8231

शब्दावधानमेतस्य प्रतिबध्नाति वेदनाम्।
इत्ययुक्तं कशाघातवातान्तरविदस्तथा॥
२५३२॥§ 8233

अत्र पक्षद्वयं कदाचिदसौ वायुरुपलभ्यस्वभावो वा भवेत्। अनुपलभ्यस्वभावो वा। प्रथमे पक्षे शब्दवित्तिकाले कशाघातस्येव वायोरपि गतेरुपलब्धिः प्राप्नोति। अथापि स्याद्युगपद्विज्ञानद्वयानुत्पत्तेः, शब्दावधानं—शब्दोपलम्भः, एतस्य वायोर्वेदनामुपलब्धिं प्रतिबध्नातीति। तदेतदयुक्तं शब्दोपलब्धिकाले कशाघातवातान्तरविदो वक्तुम्। यथाहि वातान्तरस्य व्यजनादिकृतस्य कशाघातस्य च शब्दोपलम्भवेलायामनुभवो भवेत्तथा कर्णदेशप्राप्तस्यापि वायोः स्पर्शवित्तिः स्यात्। एतेनयुगपद्विज्ञानानुत्पत्तिप्रतिज्ञायाः प्रत्यक्षविरोधमाह॥ २५३१॥ २५३२॥ § 8234

न चाशूत्पत्तिबलाद्युगपद्ग्रहणभ्रान्तिरतिप्रसङ्गादिति प्रतिपादितम्। भवतु नाम क्रमभागेऽपि लाघवकृतो यौगपद्यविभ्रमस्तथाप्येतदुत्तरमत्र प्रकृतानुपयोगित्वान्न किञ्चिदिति प्रतिपादयति—लाघवादित्यादि। § 8235

लाघवात्क्रमभावेऽपि युगपद्भ्रान्तिरित्यदः।
न किंचित्सर्वथाऽप्यस्मिन्वायोरनुपलम्भनात्॥
२५३३॥§ 8237

यदि नाम विज्ञानस्योत्पत्तिलाघवाद्यौगपद्यविभ्रमो भवतीति, स्यात्। नतु
पुन रुपलब्धिलक्षणप्राप्तस्य सर्वथाऽनुपलम्भ एव भवति। तथाह्यत्र सर्वथैव 686/k
क्रमेण यौगपद्येन वा वायोः कर्णदेशप्राप्तस्यानुपलम्भ एव तस्माल्लाघवकृतोऽयं विज्ञानो यौगपद्यविभ्रम इत्येतदुत्तरं न किञ्चित्। तुच्छमित्यर्थः॥ २५३३॥ § 8238

अथापीत्यादिना द्वितीयपक्षमाह। § 8239

६--७ गतेरु] Correction: ; गतिरू (sic!)गतेरु

अथाप्यतीन्द्रियो वायुः काणादैरिव वर्ण्यते।
युष्माभिरपि तद्द्रव्य(द्वाष्ये?)स्पृष्ठाप्तिस्तत्र किंकृता
२५३४§ 8241

काणादाः—वैशेषिकाः। तेषां शब्दलिङ्गो वायुः। भाष्यकृताऽपि शबरेणोक्तम् — वायवीयाः संयोगविभागा अप्रत्यक्षस्य वायोः कर्णशष्कुलीप्रदेशात्प्रादुर्भवन्तोनोपलभ्यन्त इति। अत्र दूषणमाह—स्पृष्ठाप्तिस्तस्य किंकृतेति। स्पृष्टिः स्पर्शः तस्याप्तिः प्राप्तिः प्रसङ्ग इति यावत्। एतदुक्तं भवति—तस्य वायोः स्पर्शप्रसङ्गो योऽयं भाष्यकारेण कृतः स कथम्, तथाहि—वायुरापद्यते शब्दतामित्येवंवादिनः शिक्षाकारन्प्रति भाष्यकृतोक्तम्—वायवीयश्च शब्दो भवेद्वायोः सन्निवेशविशेषः स्यात्। नच वायवीयानवयवाञ्शब्दे सतः प्रत्यभिजानीमः। यथा पटस्य तन्तुमयान्। न चैवं भवति। स्याच्चेदेवं स्पर्शनेनोपलभेमहि। नच वायवीयानवयवाञ्शब्दगतान्स्पृशाम इति॥ २५३४॥ § 8242

अभ्युपगम्याप्यतीन्द्रियत्वं दोषान्तरमाह—अस्तु वेत्यादि। § 8243

अस्तु वाऽतीन्द्रियो वायुस्तत्तद्योगिगतस्य तु।
उष्णशीतेतरस्य स्यात्स्प्रष्टव्यस्य विदन्यवत्॥
२५३५॥§ 8245

तेन तेन वायुना योगस्तत्तद्योगः, स यस्तास्ति जलतेजोजतीसंज्ञकस्य भूतत्रयस्य तत्तथोक्तम्। तद्गतं तत्प्राप्तं तदाश्रितमिति यावत्। द्वितीयाश्रितेत्यादिना द्वितीयासमासः। एतच्च स्प्रष्टव्यस्येत्यनेन समानाधिकरणम्। तस्य स्प्रष्टव्यस्य शीतोष्णेतरत्वभावस्य वित्—वेदना प्राप्नोति। अन्यवदिति। शब्दव्यञ्जकाभिमतकोष्ठवायुगतादन्यस्येव। षष्ठ्यन्ताद्वतिः। यथा शिशिरसमये हिमनिचयव्यासङ्गवाहिनः पवनस्य, यथा वा तरुणतरणिकरप्रसङ्गावरुद्धाशेषदिग्विभागे वहतो निदाघसमये समीरणस्य, तथा शीतेतरविरहितकालवर्त्तिनो मातरिश्विनः स्प्रष्टव्यस्य(?) शीतादेः संविद्भवति, तथेहापि स्यात्॥ २५३५॥ § 8246

687/k

अथापीत्यादिना परस्योत्तरमाशङ्कते। § 8247

अथापि कर्णशष्कुल्या तस्यायोगान्न चेन्मतिः।
कर्णव्योमनि संप्राप्त इत्येतन्नु कथं ग(म?)तम्॥
२५३६॥§ 8249

३ व्योमनि] Correction: ; व्योम न
(sic!)व्योमनि

तस्माच्छ्रोत्रियदृष्टेयं कल्पना निर्निबन्धना।
विदुषां प्रीतये नेति श्रोत्रियेष्वेव राजते॥
२५३७ ॥§ 8251

तस्येति। वायोः। अयोग इति। असंसर्गः। कर्णशुष्कुल्येति सम्बन्धः। शेषंसुबोधम्॥ २५३६॥ २५३७॥ § 8252

यदुक्तम—यद्वा वेदानुसारेणेत्यादि, तत्र समानत्वाद्दूषणस्येत्यत्रैवातिदेशं कुर्वन्नाह—ये निरंशमित्यादि। § 8253

ये निरंशं नभः प्राहुस्तान्प्रति प्रागुदीरिताः।
दोषो ज्ञेया निरंशैकदिक्छ्रोत्रऽत्वेपि ते समाः॥
२५३८ ॥§ 8255

निरंशाकाशात्मकश्रोत्रपक्षे ये प्रागुक्ता दोषाः संस्कारवैयर्थ्यं संस्कारानुपपत्तिश्चेत्यादयस्ते दिक्छ्रोत्रपक्षेऽपि समाना इति न पृथक् दूषणं वाच्यम्॥ २५३८॥ § 8256

यदुक्तम्—यद्यपि व्यापि चैकं चेत्यादि, तत्राह—एखव्यापिनभःपक्ष इत्यादि। § 8257

एकव्यापिनभःपक्षे विभागो न प्रकल्प्यते।
संस्कृताश्रयमन्यच्चेत्येकमेव हि तन्नभः॥
२५३९ ॥§ 8259

एकव्योमात्मकं श्रोत्रं नास्त्यसंस्कृतशष्कुलि।
अतोऽधिष्ठानभेदेन संस्कारनियमोऽस्थितः॥
२५४० ॥§ 8261

तेनैकस्मिन्नधिष्ठाने लब्धसंस्कारमिन्द्रियम्।
बोधकं सर्वदेशेषु
विज्ञानोत्पत्तिरिष्यताम्॥२५४१ ॥§ 8263

पुंसां देहप्रदेशेषु विज्ञानोत्पत्तिरिष्यताम्।
किन्तु प्रधानवैदेश्यमेकत्वान्नभसो न ते॥
२५४२॥§ 8265

निष्प्रदेशोऽपि चात्मा नः कार्त्स्न्येन च विदन्नपि।
शरीर एव गृह्णातीत्येवमुक्तेऽपि दुष्यति॥
२५४३॥§ 8267

बाधिर्याद्यव्यवस्थानमेतेनैव च हेतुना।
तदेवाभोग्यमन्यस्य नाविशेषाद्धि युज्यते॥
२५४४॥§ 8269

अन्यच्चेति। असंस्कृताश्रयम्। नह्यनवयवस्यायं विभागो युक्तः, साव-
688/k यवत्वप्र सङ्गात्। काल्पनिके तु विभागेऽर्थक्रियावृत्त्या(त्य?)वृत्तिविरोधः, नह्यारोपितार्थानुविधायिन्योऽर्थक्रिया भवन्ति, तासां वस्तुप्रतिबद्धत्वात्। ततश्चैकस्मिन्नधिष्ठाने यदि संस्कृतमिन्द्रियं तच्च बोधकस्वभावं तदाऽधिष्ठानान्तरे तदेव तत्परमार्थत इतिसर्वत्रैव तत्संस्कृतं बोधकं च प्राप्नोति। तेन यदुक्तं पुंसां देहप्रदेशेष्वित्यादि, तत्सर्वं प्रत्युक्तम, एकस्य पारमार्थिकविभागायोगादिति दर्शयन्नाह—पुंसामित्यादि।प्रधानवैदेश्यमिति। प्रधानस्य शरीरस्य वैदेश्यं भिन्नाकाशदेशवर्त्तित्वम्। एवमुक्तेऽपि दुष्यतीती। एकस्य विभागायोगात्। अव्यवस्थानमिति। व्यवस्थानाभावः॥ २५३९॥ २५४०॥ २५४१॥ २५४२॥ २५४३॥ २५४४॥ § 8270

अविशेषमेव दर्शयति—अत्यक्तपूर्वरूपं हीत्यादि। § 8271

अत्यक्तपूर्वरूपं हि विशेषानुदये सति।
कथं नाम भवेच्छ्रोत्रमभोग्यमपरस्य ते॥
२५४५॥§ 8273

अथापि स्याद्धर्माधर्माभ्यां वशीकृतत्वाद्विशेषोऽस्त्येवेत्याह—नित्यत्वादित्यादि। § 8274

नित्यत्वादनपेक्षत्वाद्धर्माधर्मावशीकृतम्।

सदैव च नभःश्रोत्रं सर्वाभोग्यं प्रसज्यते॥
२५४६॥§ 8276

नित्यत्वमनपेक्षत्वे हेतुः, तथाऽवशीकरणस्य॥ २५४६॥ § 8277

अथानपेक्षस्यापि वशीकरणं कस्मान्न भवतीत्याह—धर्माधर्मेत्यादि। § 8278

धर्माधर्मोपकार्यं हि नभो नैव कदाचन।
नित्यत्वात्कार्यताभावे चास्य केयं वशीक्रिया॥
२५४७॥§ 8280

अनपेक्षत्वेन ह्यकार्यत्वमुच्यते, यच्चाकार्य न तत्केनतिद्वशीक्रियते, यथा शशविषाणम्, अप्रतिसङ्ख्या निरोधादिर्वा, अकार्यं च श्रोत्रमिति व्यापकविरुद्धोपलब्धिः।नित्यत्वादित्यनेन हेतोरसिद्धतां परिहरति, कार्यताया अभावे केयं वशीक्रियेत्यनेनानैकान्तिकतमाम्॥ २५४७॥ § 8281

ननु चाकार्यस्यापि वशीक्रिया दृश्यते, यथा—प्रागभोग्यस्य श्रोत्रस्य पश्चान्मन्त्रौषधादिशक्त्या भोग्यत्वं भवति, ततश्च हेतोरनैकान्तिकतेति, तत्र परिहारमाह —मन्त्रौषधादीत्यादि। § 8282

मन्त्रौषधादिशक्त्या च पुनर्भोग्यं कथं भवेत्।
नित्यत्वान्नहि तत्तेभ्यो(?) विशेषं प्रतिपद्यते॥
२५४८॥§ 8284

689/k

आदिशब्देनोल्लेखनादिपरिग्रहः। कथं भवेदिति। यदि तत्रापि न कार्यता भवेदित्यध्याहारः। ननु चाकार्यस्यापि सतो विशेषोत्पत्तिमात्रेण वशीक्रिया भविष्यतीत्याह—नित्यत्वादित्यादि॥ २५४८॥ § 8285

एवं तर्ह्यधिष्ठानस्यानित्यत्वात्तत्संस्कारद्वारेण नित्यस्यापि श्रोत्रस्य वशीक्रिया भविष्यतीत्याह—अधिष्ठाने त्वित्यादि। § 8286

अधिष्ठाने त्वनित्येऽपि क्षणिकानित्यता न चेत्।
तदात्मातिशयायोगाद्बाधिर्यादि न युज्यते॥
२५४९॥§ 8288

अनित्येऽपीति। कालान्तरविनाशात्तस्यापि ह्य(ह्या?)विनाशमेकरूपत्वान्नित्यस्येव नातिशयोत्पत्तिः सम्भवतीति कुतः संस्कारः॥ २५४९॥ § 8289

अभ्युपगम्यातिशयं दोषमाह—अस्तु वेति। § 8290

अस्तु वाऽतिशयस्तस्मिन् व्योम्नि त्वेष न विद्यते।
नचाधिष्ठानसम्बन्धान्नित्यत्वादनपेक्षणात्॥
२५५० ॥§ 8292

अतस्तद्द्वारकोऽप्यत्र बाधिर्यादि न युज्यते।
नभसो भागवत्त्वेऽपि नित्यतायामिदं समम्॥
२५५१ ॥§ 8294

एष इति। अतिशयः। यद्यपि न विद्यते तथाप्यधिष्ठानसम्बन्धात्तस्यापि भविष्यतीत्याह—नचाधिष्ठानेत्यादि। यदुक्तम्—नचानवयवं व्योमेत्यादि, तत्रापिसावयवस्य नभसो यदि नित्यत्वमभ्युपगम्यते तदा यदनवयवनित्यनभःपक्षे दूषणं तत्सर्वं समानमित्यतिदिशति—नभस इत्यादि॥ २५५०॥ २५५१॥ § 8295

यदुक्तम्—यथा तत्र भवन्नेवेत्यादि, तत्राह—तत्रैव भवत इत्यादि। § 8296

तत्रैव भवतोऽप्येवं स्वामित्वादपकर्षणम्।
न युक्तं यदि तस्यापि क्षणिकत्वं समस्ति न॥
२५५२ ॥§ 8298

को हि तस्याः समुत्पन्नः पश्चादतिशयो यतः।
स्वामित्वादपकृष्टोऽसौ न भोगं पुनराप्नुयात्॥
२५५३ ॥§ 8300

सुबोधम्॥ २५५२॥ २५५३॥ § 8301

यदुक्तम्—व्यञ्जकानां हि वायूनामित्यादि, तत्राह—यदा चेत्यादि। § 8302

यदा च संस्कृतिर्नैवं श्रोत्रे शब्दे च युज्यते।

भेदाभेदविकल्पेन संस्कारानुपपत्तितः॥
२५५४ ॥§ 8304

690/k

व्यतिरेक हि संस्कारे श्रोत्रशब्दौ न संस्कृतौ।
स्यातां ताभ्यां च सम्बन्धः संस्कारस्य न कश्चन॥
२५५५ ॥§ 8306

विभिन्नस्य हि सम्बन्धः कार्यकारणता भवेत्।
तस्यां च सर्वदैवायं भवेद्धेतोः सदा स्थितेः॥
२५५६ ॥§ 8308

अनर्थान्तपक्षेऽपि तद्वन्नित्यो भवेदसौ।
तन्न शक्यक्रियस्तस्मान्नित्यं ज्ञानं प्रसज्यते॥
२५५७ ॥§ 8310

तन्न सामर्थ्यनियमो वाय्वादेरुपपद्यते।
कर्त्तव्यविषयायोगे सामर्थ्यस्याप्ययोगतः॥
२५५८ ॥§ 8312

यदेति। यतः कारणादित्यर्थः। एवम्—अनन्तरोक्तेन प्रकारेण। नित्यस्यातिशयाभावान्नैव संस्कृतिर्युज्यते। तन्न सामर्थ्यनियमो वाय्वादेरुपपद्यत इति वक्ष्यमाणेन सम्बन्धः। यथा चासौ संस्कृतिर्नोपपद्यते तथा तावद्विस्तरेणदर्शयन्नाह—भेदाभेदेत्यादि। संस्कृतिर्भवन्ती व्यतिरिक्ता वा भवेदव्यतिरिक्ता वेति पक्षद्वयं, वस्तुनः प्रकारान्तरासम्भवात्। प्रथमे पक्षे श्रोत्रशब्दयोः संस्कारासिद्धिप्रसङ्ग, अर्थान्तरकरणात्, नहि घटकरणे पटः संस्कृतो नाम। नापि तस्य संस्कारस्य ताभ्यां सह सम्बन्धः सिद्ध्यति, येन तत्सम्बन्धिसंस्कारकरणद्वारेण तौ संस्कृतौ स्याताम्। तथाहि—भेदाभ्युपगमान्न तादात्म्यलक्षणः सम्बन्धः। भिन्नस्य च सम्बन्धो भवन्कार्यकारणतालक्षण एव भवेदन्यत्रोपकाराभावात्। तस्यां च कार्यकारणतायां सत्यां सर्वदैवायं संस्कारो भवेत्, हेतोः श्रोत्रशब्दात्मकस्य सर्वदाऽवस्थितत्वात्। द्वितीयेऽपि पक्षे दोषमाह—अनर्थान्तरेत्यादि। तद्वदिति। श्रोत्रशब्दस्वरूपव-

त्। असाविति। संस्कारः। ततश्च नित्यत्वादसौ संस्कारो न केनचित्क्रियते। तस्माच्च संस्कारादिज्ञानोत्पत्ताविष्यमाणायां नित्यं ज्ञानं प्रसज्येतेति नित्यत्वे दोषः। तन्नेत्यादिनोपसंहरति॥ २५५४॥ २५५५॥ २५५६॥ ॥ २५५७॥ २५५८॥ § 8313

अत इत्यादिना शब्दानित्यत्वसाधने प्रमाणयति। § 8314

अतोऽभिव्यक्त्ययोगेन शब्दज्ञानमिदं फलम्।
ग्राह्योत्पादाविनाभाविघटादिव्यक्तिबुद्धिवत्॥
२५५९॥§ 8316

तस्मादुत्पत्त्यभिव्यक्त्योः कार्यार्थापत्तितः समः।
सामर्थ्यभेदः सर्वत्र स्यात्प्रयत्नविवक्षयोः॥
२५६०॥§ 8318

691/k

प्रयोगः—यत्कादाचित्कं तदुत्पत्तिमत्कारणजन्यम्, यथा घटव्यक्तिविषयं ज्ञानम्, कादाचित्कं च शब्दज्ञानमिति स्वभावहेतुः। नित्यं तज्ज्ञानासंवित्तेर्नासिद्धो हेतुः। अभिव्यक्तेरपास्तत्वान्नाप्यनैकान्तिकः। सपक्षे भावान्न विरुद्धः। इदम्फलमिति। इदं ग्राह्योत्पादाविनाभाविलक्षणं फलमस्येति विग्रहः। शेषं सुबोधम् ॥ २५५९॥ २५६०॥ § 8319

दिक्श्रोत्रपक्षे पूर्वमेव दूषणस्योक्तत्वान्न पुनरुच्यते। अतएव पूर्वोक्तं तदेव दूषणं स्मारयन्नाह—यावांश्चेत्यादि। § 8320

यावांश्च कणभुङ्ग न्यायो नभोभागत्वदूषणे।
दिग्भागेऽपि समस्तोऽसौ विज्ञेयो मतिशालिभिः॥
२५६१॥§ 8322

यदुक्तम्— विषयस्यापि संस्कारे तेनैकस्यैव संस्कृतिः। इत्यादि, तत्राह—विषयस्येत्यादि। § 8323

विषयस्यापि संस्कारे तेनैकस्यैव संस्कृतिः।

३ कणभुङ्ग] Correction: ; कश्चन (sic!)कणभुङ्ग

नास्तत्वाच्छक्तिनियतेर्नातो विषयसंस्कृतिः॥
२५६२ ॥§ 8325

नेति। विषयस्यापि संस्कारे तेनैकस्यैव संस्कृतिरित्येतन्न। कुतः, अस्तत्वात्—प्रतिक्षिप्तत्वात्। संस्कारस्येति शेषः। तथाहि व्यतिरिक्तोऽव्यतिरिक्तश्च संस्कारः पूर्वं निरस्तः, इतोऽपि न विषयस्य संस्कारः। कुतः, शक्तिनियतेर्वक्ष्यमाणायाः। शक्तिनियतेश्चेति चकारो लुप्तनिर्दिष्टो द्रष्टव्यः। तेनायमर्थो भवति। शक्तिनियमाच्चातो वक्ष्यमाणान्न विषयसंस्कारो युक्तः॥ २५६२॥
§ 8326

तमेव शक्तिनियमं दर्शयति—ज्ञानोत्पत्तावित्यादि। § 8327

ज्ञानोत्पत्तावयोग्यत्वे गम्येत न कदाचन।
सर्वैः सर्वत्र शब्दोऽयं तज्ज्ञानेऽनुपयोगतः॥
२५६३ ॥§ 8329

ज्ञानोत्पत्तौ तु सामर्थ्ये सर्वैः सर्वत्र सर्वदा।
अवगम्येत शब्दोऽयं ज्ञानहेतुतया स्थितेः॥
२५६४ ॥§ 8331

कदाचिदसौ शब्दः प्रकृत्या ज्ञानोत्पत्तावयोग्यो भवेन्नवेति पक्षद्वयम्। प्रथमे पक्षे न कदाचित्केनचिदवगम्येत। द्वितीयेऽपि सर्वैः सर्वदैवावगम्येत, एकरूपत्वात्। अतो न संस्कारस्य सामर्थ्यम्॥ २५६३॥ २५६४॥ § 8332

स्यादेतत्समर्थोऽपि विरोधिप्रत्ययबलात्कदाचिद्विज्ञानं नोत्पादयेत्। तथा असमर्थोऽपि सहकारिप्रत्ययाहितसामर्थ्यः सन्नुत्पादयिष्यतीति, तत्राह—तं हीत्यादि। § 8333

692/k

तं हि शक्तमशक्तं वा प्रकृत्यैवात्मनि स्थितम्।
विरोधी सहकारी वा कोऽर्थं क्षपयितुं क्षमः॥
२५६५ ॥§ 8335

नहि स्वभावमखण्डयन्ननुत्पादयन्वा विरोधी सहकारी वा युक्तोऽतिप्रसङ्गात्। खण्डनोत्पादनाभ्युपगमे नित्यत्वहानिप्रसङ्गः॥ २५६५॥ § 8336

यदुक्तम्—यथैवोत्पद्यमान इत्यादि। तत्राह—ज्ञानोत्पादनेत्यादि।
§ 8337

ज्ञानोत्पादनयोग्यश्च कांश्चित्प्रति भवत्ययम्।
तस्मादुत्पद्यमानोऽयं न सर्वैरवगम्यते॥
२५५६॥§ 8339

अथवा यत्समीपस्थैर्नादैः स्यादस्य संस्कृतिः।
तैरेव श्रूयते शब्दो न दूरस्थैस्तु किं पुनः॥
२५६७॥§ 8341

उत्पत्तिपक्षे नायं दोषः, यतः प्रतिनियतविज्ञानोत्पत्तिसमर्थं एव स्वहेतोरुपजायते, तेन न सर्वैः सर्वदा गम्यते। यस्य तु संस्क्रियते शब्दस्तस्यैवायं दोषो यदि नाम संस्कारः संभवतीति दर्शयन्नाह—अथवेत्यादि। न केवलं प्रकृत्या ज्ञानोत्पादनसामर्थ्याभ्युपगमे दूरस्थस्यापि ग्रहणं प्राप्नोतीति दोषः, संस्कारपक्षेऽपि दोष एवेत्यतः पक्षान्तरमुक्तम्। न दूरस्थैस्तु किं पुनरिति। श्रूयत इति सम्बन्धः। अपि तु श्रुत ए(श्रूयेतै ?)वेति साक्षाद्दर्शयति॥ २५६६॥ २५६७॥ § 8342

एतदेव व्यक्तीकरोति—सामीप्येइत्यादि। § 8343

सामीप्येऽपि हि संस्कारः कारणं परिकल्प्यते।
संस्कारः स समानश्च तेषु दूरस्थितेष्वपि॥
२५६८॥§ 8345

शब्दोत्पत्तौ निषिद्धत्वादित्यादावाह—विशिष्टसंस्कृतेरित्यादि। § 8346

विशिष्टसंस्कृतेर्जन्म ध्वनिभ्यो यदि गम्यते।
शब्दोत्पत्तिः प्रतिक्षेप्तुं न शक्या केनचित्तदा॥
२५६९॥§ 8348

विशिष्टसंस्कृतिः शब्दात्सा हि न व्यतिरेकिणी।
शब्दस्याज्ञेयताप्राप्तेस्ततः शब्दोऽपि जायते॥
२५७०॥§ 8350

यदि संस्कृतिरुत्पद्यते तदा शब्दस्याप्युत्तिप्रसङ्गः, तस्य संस्कृतेरव्यतिरेकात्। अथ व्यतिरेकस्तदा संस्कारादेव ज्ञानोत्पत्तेः शब्दस्याकारक-

त्वादज्ञेयत्वप्रसङ्गः। (ततः) शब्दोऽपि जायत इत्यङ्गीकर्त्तव्यम्॥ २५६९॥ २५७०॥ § 8351

अथापि स्याद्यथा प्रतिनियतज्ञानोत्पादनसमर्थः शब्द उत्पद्यते भवतां तथाऽ स्माकमपि संस्कारप्रतिनियमो भविष्यति, तेन दूरस्थैर्न गम्यत इति। 693/k
अत्राह—संस्कृतश्चेत्यादि। § 8352

संस्कृतश्चेकदा शब्दस्तमात्मानं न जातुचित्।
जहात्यनित्यतासङ्गादुपलभ्येत चेत्सदा॥
२५७१॥§ 8354

यदि नाम प्रतिनियतपुरुषसन्तानवर्त्तिज्ञानोत्पादनसमर्थः संस्क्रियते तथापि दोष एव। तथाहि—यदि ज्ञानोत्पादनयोग्यं संस्कृतस्वभावं न जहाति तदा सर्वदैव तज्ज्ञानोत्पत्तिप्रसङ्गः। अथ जहाति तदाऽनित्यत्वप्रसङ्गः। तस्मादुत्पद्यत एवेत्यङ्गीकर्त्तव्यम्॥ २५७१॥ § 8355

यदुक्तम्—संस्कारद्वयपक्षे त्वित्यादि तत्राह—द्वयेत्यादि। § 8356

द्वयसंस्कारपक्षेऽपि सत्यं दोषद्वये (व)चः।
यन्नान्यतरवैकल्यं प्राक्तनस्यानुवृत्तितः॥
२५७२॥§ 8358

येषामुत्पत्तिपक्षस्तेषां मतेनान्यतरवैकल्यं युज्यते। नतु संस्कारवादिनां पक्षे तेषां सदैव प्राक्तनस्य संस्कृतस्य स्वभावस्यानुवृत्तेः॥ २५७२॥ § 8359

तथा हीत्यादिना तामेवानुवृत्तिं दर्शयति। § 8360

तथाहि संस्कृताः श्रोत्रवर्णा यद्व्यञ्जकैः पुरा।
न नष्टास्ते च्युतिप्राप्तेः सर्वैः सर्वश्रुतिस्ततः॥
२५७३॥§ 8362

च्युतिप्राप्तेरिति। अनित्यत्वप्रसङ्गादित्यर्थः। अन्यथा प्रतिज्ञाविशिष्टः (सृष्टिः ?) स्यात्। सर्वश्रुतिरिति। सर्वस्मिन्काले श्रुतिः सर्वश्रुतिः। नतु सर्वस्य श्रुतिरिति विग्रहः। कर्मणि चेति समासप्रतिषेधात्॥ २५७३॥ § 8363

अथापि स्यात्प्रतिनियता(ना)मेव पुंसां श्रुतियोग्यौ संस्कृतौ श्रोत्रवर्णौ तेन सर्वैर्न श्रूयत इति। एवं तर्हि ये अन्येषां वर्णानां प्रतिपत्तारस्तेषां शब्दश्रवणं न प्राप्नोति। एतदेव दर्शयति—नियतेत्यादि। § 8364

नियतश्रुतियोग्यौ चेच्छ्रोत्रवर्णौ च संस्कृतौ।
नान्यवर्णप्रपत्तृ(?)णां पुनः स्याच्छ्रवणं तदा॥
२५७४॥§ 8366

नियतानां पुंसां श्रुतियोग्याविति समासः। अन्ये च ते वर्णप्रपत्तारोऽन्येषां वा वर्णानां प्रपत्तार इति विग्रहः॥ २५७४॥ § 8367

अथापि स्याद्ये तेऽन्यवर्णप्रतिपत्तारस्तज्ज्ञानोत्पत्तियोग्यं पुनरपि संस्कारान्तरं शब्दश्रोत्रयोर्भवेदित्येतदाशङ्क्य परिहरति—तद्वर्णेत्यादि। § 8368

694/k

तद्वर्णनरविज्ञानयोग्यौ चेत्संस्कृतौ पुनः।
तयोरेवानुवृत्तौ स्यात्तयोरपि ननु श्रुतिः॥
२५७५॥§ 8370

ते च ते वर्णनराश्चेति समासः। के पुनस्ते ? वर्णा येऽन्यैः प्रतिपत्तृभिर्गृह्यन्ते, नराश्च तेषामेव ये प्रपत्तारः, तेषां विज्ञानं तत्र योग्याविति समासः। तयोरेवेति। पूर्वसंस्कृतयोः श्रोत्रशब्दयोः। तयोरपीति। पूर्वकयोर्वर्णनरयोः। एतदुक्तं भवति। पश्चाद्यदाऽन्यैः श्रूयते ककारादिवर्णस्तदापि यैः पूर्वश्रुतस्तद्वत्तैरपि श्रूयेत। प्राक्तनस्वभावानुवृत्तेरिति॥ २५७५॥ § 8371

अथ नानुवृत्तिस्तदाऽनित्यत्वप्रसङ्ग इत्यादर्शयन्नाह—व्यावृत्तावित्यादि। § 8372

व्यावृत्तावन्य एवामी श्रोत्रवर्णाः कथं न ते।
प्राप्नुवन्ति ततस्तेषु नित्यताशाऽनिबन्धना॥
२५७६॥§ 8374

सुबोधम्॥ २५७६॥ § 8375

यदुक्तम्—जलादिषु यथैकोऽपीत्यादि, तत्राह—जलादिष्वित्यादि। § 8376

जलादिषु न चैकोऽयं नानात्मा सवितेक्ष्यते।
प्रतिबिम्बधियः सर्वा यन्निरालम्बनाः स्थिताः॥
२५७७॥§ 8378

सर्वमेव हि भ्रान्तं ज्ञानं निर्विषयमिति पूर्वमविशेषेण प्रतिपादितम्। तथापि पुनः प्रतिबिम्बधियां विशेषणा(षेण ?)द्वयोरपि साकारनिराकारपक्षयोः प्रतिपादयति। तत्र प्रथमं पक्षमधिकृत्याह—निराकारा इत्यादि। § 8379

निराकारा धियः सर्वास्त्वत्पक्षेऽपि व्यवस्थिताः।
आकारवान्पुनर्बाह्यः पदार्थोऽभ्युपगम्यते॥
२५७८॥§ 8381

जलाद्यन्तर्गतं चेदं प्रतिबिम्बं समीक्ष्यते।
नभस्तलादिवर्त्ती च सूर्यादिर्न तथा स्थितः॥
२५७९॥§ 8383

तत्कस्माद्भात्यसावेवं भ्रान्त्या चेदत एव तत्।
नतु स्पष्टमनालम्बं तद्रूपार्थवियोगतः॥
२५८०॥§ 8385

तस्यैव प्रतिपत्तिश्चेदन्यथेदं सुभाषितम्।
तच्चान्यथेति किंत्वेवं सर्वं स्यात्सर्ववेदकम्॥
२५८१॥§ 8387

तस्यैव प्रतिपत्तिः स्याद्यदीक्ष्येत तथास्थितम्।
अन्याकारोपलब्धौ तु तस्य दृष्टिः कथं भवेत्॥
२५८२॥§ 8389

695/k

साकारेऽपि हि विज्ञाने न ज्ञातार्थाविलक्षणे।
आकारे सति विज्ञानं ग्राहकं तस्य युज्यते॥
२५८३॥§ 8391

भवतो हि मीमांसकस्य निराकारं विज्ञानमाकारवान्बाह्योऽर्थस्ततश्च यत्तज्जलान्तर्गतं रूपं दृश्यते न तावदसौ ज्ञानाकारः, बाह्यस्यैवाकारवत्त्वाभ्युपगमात्। नापि तत्प्रतिबिम्बमर्थान्तरभूतमभ्युपगतं सूर्यस्याग्रहणप्रसङ्गात्। नापि सूर्यो जलान्तर्गतो येन तथा भासेत, तस्याकाशदेशवर्त्तित्वात्। भ्रान्त्या तथा भासत इति चेदेवं तर्हि न सूर्यालम्बनं ज्ञानं, तस्य सूर्यस्य जलान्तर्गतरूपाभावात्। ततश्च यद्रूपोऽर्थो यज्ज्ञानेनावभासते तद्रूपार्थवियुक्तत्वात्तद्विज्ञानमनालम्बनमिति सिद्धम्। प्रयोगः—यो यद्विज्ञानप्रतिभासिस्वरूपो न भवति न स तद्विज्ञानविषयः, यथा रूपं श्रोत्रज्ञानस्य, न भवति प्रतिबिम्बविज्ञानप्रतिभासिस्वभावश्च सूर्य इति व्यापकानुपलब्धिः। नासिद्धो हेतुः, सूर्यस्य जलान्तर्गतरूपाभावात्। नाप्यनैकान्तिकोऽतिप्रसङ्गात्। एवं हि यत्किञ्चिद्यस्य कस्यचिदालम्बनं प्राप्नोति। सपक्षे सद्भावात् न विरुद्धः। अथापि स्यात्स एव सूर्यो देशभेदेन केवलमन्यथा प्रतीयत इत्यतो हेतुरसिद्ध एवेति। तदेतद्भवतः प्रौढतार्किकादृते कोऽन्यो वक्तुमर्हति तदेव चान्यथेति। तथाहि तदेवेत्यनेन तत्स्वरूपं विधीयते, अन्यथेत्यनेन तन्निषेधः, तत्कथमेकत्रैकदा परस्परविरुद्धौ विधिप्रतिषेधौ युक्तौ। यदि पुनरन्यथा प्रतीयमानोऽपि स एव स्यात्तदा सर्वविश्वमेकं भवेत्। ततश्च सहोत्पत्तिनाशौ स्याताम्, सर्वं च विज्ञानमेकविषयं स्यात्। तस्माद्यथा देशकालादिभेदवानसावर्थस्तथैव यदि प्रतीयेत, एवं स एव प्रतीतः स्यादिति कुतोऽसिद्धता। द्वितीयेऽपि साकारपक्षे निरालम्बनतां प्रतिबिम्बधियां प्रतिपादयति—साकारेऽपीत्यादि। साकारविज्ञानपक्षे हि साकारसंवेदनेऽपि बाह्यार्थाविलक्षणाकारानुभवाद्बाह्यो विदित उच्यते, नतु विलक्षणानुभवात्। अन्यथाऽतिप्रसङ्गः स्यात्। नचात्र प्रतिबिम्बधियां सूर्याकाराविलक्षणाकारानुभवोऽस्ति, अन्यथा ह्यभ्रान्तसूर्यज्ञानाविशेषः प्रतिबिम्बधियां स्यात्॥ २५७८॥ २५७९॥ ॥ २५८०॥ २५८१॥ २५८२॥ २५८३॥ § 8392

यदुक्तमप्सूर्यदर्शिनामित्यादि, तत्राह—पारम्पर्येत्यादि। § 8393

पारम्पर्यार्पितं सन्तमवाग्वृत्त्यावबुध्यताम्।
किन्तूर्ध्ववृत्तिमेकत्वेऽप्यवागेवानुमन्यते॥
२५८४॥§ 8395

696/k

यथेवावस्थितो ह्यर्कस्तथैवेक्ष्येत यद्यसौ।

१ मप्सूर्य] Correction : ; मसूर्य (sic !)मप्सूर्य

अवबुद्धः प्रकल्प्येत नान्यथेत्युपपादितम्॥
२५८५॥§ 8397

अवबुद्ध्यतामिति। आत्मा। ऊर्द्ध(?)वृत्तिमिति। आदित्यम्—परिस्थितमित्यर्थः।मन्यत इति। आत्मा। एतदुक्तं भवति। यदि नामात्मा पारम्पर्यार्पितमुपरिस्थितमादित्यमवाग्वृत्त्याऽवबुध्यते, किमित्यवागेव मन्यते नोर्द्ध(?)म्। एवं हि स एवावबुद्धोभवति, यदि यथास्थितो गृह्येत। अन्यथाऽतिप्रसङ्गः स्यात्॥ २५८४॥ २५८५॥ § 8398

यदुक्तम्—एवं प्राङ्गया वृत्त्या प्रत्यग्वृत्तिसमर्पितमित्यादि, तत्राह—नैवंतद्ग(प्राग्ग?)तयेत्यादि। § 8399

नैवं तद्ग(प्राग्ग?)तया वृत्त्या प्रत्यग्वृत्ति समर्पितम्।
बुध्यमानो मुखं भ्रान्त्या प्रत्यगित्यवगच्छति॥
२५८६॥§ 8401

अत्र कारणमाह—प्रतिबिम्बकविज्ञानमित्यादि। § 8402

प्रतिबिम्बकविज्ञानं स्वास्याद्यालम्बनं न तत्।
तद्विलक्षणनिर्भासाद्रसशब्दादिवित्तिवत्॥
२५८७॥§ 8404

तद्विलक्षणनिर्भासादिति। भावलक्षणो निर्देशः। तद्विलक्षणनिर्भासत्वादित्यर्थः। बहुव्रीहिश्चायम्। प्रयोगः—यद्यद्विलक्षणनिर्भासं ज्ञानं न तत्तदालम्बनम्, यथा रसादिविज्ञानं न शब्दालम्बनं शब्दविज्ञानं वा रसालम्बनम्, मुखादिविलक्षणनिर्भासाश्च प्रतिबिम्बधिय इति व्यापकविरुद्धोपलब्धिः॥ २५८७॥ § 8405

(अ)सिद्धतामस्य परिहरन्नाह—अल्पीयसीत्यादि। § 8406

अल्पीयस्यास्यमल्पीयो दर्पणे प्रतिभाति हि।
विपर्यस्तश्च वृक्षादिर्जलमग्नः प्रतीयते॥
२५८८॥§ 8408

दर्पणाभिमुखं बिबं नैवं तु प्रतिबिम्बकम्।

जलाद्यन्तर्गतं चेदं बिम्बं त्वारादवस्थितम्॥
२५८९ ॥§ 8410

आश्रयानुविधानेन स्थूलसूक्ष्मादिभेदि च।
प्रतिबिम्बं न बिम्बं तु नातो हेतोरसिद्धता॥
२५९० ॥§ 8412

अल्पीयसि दर्पणे महदप्यास्यं—मुखम् अल्पीयः—अल्पतरं प्रतिभाति। अधोगतमु(शा?)खादिश्च जलमग्नो वृक्षादिः प्रतीयते, तथा प्रत्यङ्मुखं मुखमुपलभ्यते जलादिषु दूरप्रतिष्ठं च, न च तथा मुखादिविध(बिम्ब?)कमव-
697/k स्थितम्। तथा खङ्गा द्याश्रयभेदाद्दीर्घादिभेदाकारेण प्रतिबिम्बकमाभाति, न च तथा दीर्घादिभेदवद्बिम्बकमिति तद्विलक्षणनिर्भासित्वं ज्ञानस्य नासिद्धम्॥ २५८८॥ २५८९॥ २५९०॥ § 8413

अनैकान्तिकतां परिहरन्नाह—विलक्षणावभासेनेत्यादि। § 8414

विलक्षणावभासेनाप्यर्थसंवेदने सति।
रूपशब्दादिचित्तं स्यात्सर्वं सर्वार्थगोचरम्॥
२५९१ ॥§ 8416

ईषत्संमीलितेऽङ्गुल्या यच्च चक्षुषि दृश्यते।
पृथगेकोऽपि साऽप्येवं भ्रान्तिर्निर्विषया मता॥
२५९२ ॥§ 8418

सर्वस्य ज्ञानस्य सर्वविषयत्वप्रसङ्गो बाधकं प्रमाणम्। यदुक्तम्—ईषत्संमीलित इत्यादि, तदप्यनेनैव प्रत्युक्तम्, तस्यापि निर्विषयत्वात्॥ २५९१॥ २५९२॥ § 8419

यथोक्तमनेकदेशवृत्तौ चेत्यादि, तत्राह—प्रतिबिम्बोदय इत्यादि। § 8420

प्रतिबिम्बोदयस्त्वत्र प्रागेव विनिवारितः।
सहैकत्र द्वयायोगान्मूर्त्तानां प्रतिघाततः॥
२५९३ ॥§ 8422

प्रतिबिम्बस्य हि वस्तुत्वं पूर्वं निषिद्धं मूर्त्तस्याभिन्नदेशत्वानुपपत्तेरित्यादिना ॥ २५९३॥ § 8423

भवतु नाम प्रतिबिम्बं वस्तुसत्तथापि तस्य समानबुद्धिगम्यत्वमसिद्धमिति दर्शयन्नाह—अनेकदेशेत्यादि। § 8424

अनेकदेशवृत्तौ वा सत्यपि प्रतिबिम्बके।
स्थूलसूक्ष्मादिवद्भेदादेकत्वं नैव विद्यते॥
२५९४ ॥§ 8426

आदिशब्देन दीर्घत्वादिभेदपरिग्रहः। अथापि स्यात्सत्यपि स्थूलादिभेदे केनचिन्नीलादिसाधर्म्येण समानबुद्धिगम्यत्वमस्त्येवेति। एवमपि न पारमार्थिकमैक्यं सिद्ध्यति। कल्पितं तु स्यात्तत्र च सिद्धसाध्यता। अथापि पारमार्थिकमैक्यं स्याद्देशादिभेदेन वेद्यमानेऽपि तदा विप्रचाण्डालयोरपि मनुष्यत्वसाम्यादेकत्वमस्तु। तथा स्त्रीत्वसामान्येन मातुस्ते स्वभार्यायाः स्वमुखापानयोश्च पार्थिवत्वादेकत्वमापद्यते। सर्वस्य विश्वस्य वस्तुत्वादेकत्वे सहोत्पत्तिविनाशादिप्रसङ्गश्चानिवार्य एव ॥ २५९४॥ § 8427

यदपीदमुक्तं भाष्ये— अथापिस्यादेकस्य सतो नानादेशेषु युगपद्दर्शनमनुपपन्नमित्यादित्यं पश्यतु देवानांप्रियो य एकः सन्ननेकदेशावस्थ इव लक्ष्यते, ... दूरत्वादस्य देशो नावधार्यते, अतो व्यामोहः, एवं शब्देऽपि 698/k व्यामोहादनवधारणं देशस्येति। अत्राह—पुंसामित्यादि। § 8428

पुंसामध्यवसायश्च योऽयमेवं प्रवर्त्तते।
ममोपरि स्थितो भानुरिति भ्रान्तः स निश्चितः॥
२५९५ ॥§ 8430

सर्वे प्राणभृतो यस्मादेकमेव दिवाकरम्।
पश्यन्ति यौगपद्येन न द्वितीयं कदाचन॥
२५९६ ॥§ 8432

रावं न मण्डलं यस्माद्द्वितीयादीह विद्यते।
दृश्यादृष्टेरतश्चार्क एक एव विनिश्चितः॥
२५९७ ॥§ 8434

नत्वेवं निश्चितः शब्द एकत्वेन कथञ्चन।
क्रमेण युगपच्चापि तन्नानात्वोपलक्षणात्॥
२५९८॥§ 8436

यदाहि गादिवर्णं च वक्तारो बहवः सकृत्।
प्रयुञ्जते तदा भेदो विस्पष्टमुपलभ्यते॥
२५९९॥§ 8438

द्वितीयस्य रविमण्डलस्योपलब्धिलक्षणप्राप्तस्यानुपलम्भादभावनिश्चयादेकत्वसिद्धेर्ममोपरि स्थितो भानुरित्येष भ्रान्तः प्रत्ययोऽवधार्यते। नत्वेवं शब्दस्यैकत्वं सिद्धम्, येन देशादिभेदेन विद्यमानत्वं भ्रान्तं स्यात्। सिद्धे ह्येकत्वे तथाविद्यमानत्वं भ्रान्तं सिद्ध्येत्, तदेव तु न सिद्धमिति यत्किञ्चिदेतत्। रावमिति। रवेरिदमित्यणन्तमेतत्। ननु च प्रत्यभिज्ञाप्रत्ययेन शब्दस्याप्येकत्वं सिद्धमेवेत्याह—नत्वेवमित्यादि। प्रत्यभिज्ञायाः पूर्वमप्रामाण्यस्य प्रतिपादितत्वादिति भावः। यौगपद्येन नानात्वसिद्धिं प्रतिपादयति—यदा हीत्यादि। विस्पष्टमिति। द्रुतमध्यविलम्बितादिभेदेन प्रतिभासनात्॥ २५९५॥ २५९६॥ २५९७॥ २५९८॥ २५९९॥ § 8439

क्रमेणापि प्रतिपादयन्नाह—क्रमेण त्वित्यादि। § 8440

क्रमेण तु प्रयोगेऽस्य प्रत्यक्षेण न केवलम्।
भेदोऽवगम्यते किन्तु लिङ्गादपि धियां क्रमात्॥
२६००॥§ 8442

प्रत्यक्षेण न केवलमिति। तदाऽपि पञ्जा(षड्जा?)दिभेदेन स्पष्टप्रतिभासिभेदानुभवात्, नचायं व्यञ्जकभेदस्तस्य पूर्वं निरस्तत्वात्। लिङ्गादपीति। अनुमानतोऽपीत्यर्थः। प्रयोगः—यद्यदा न भवति न तदा तदविकलकारणं भवति यथारूपालोकमनस्कारादिप्रत्ययकलापेऽपि सति चक्षुर्विकल-
699/k स्याभवच्चक्षुर्विज्ञानम्, न भवन्ति चैकगकारादिविज्ञानोत्पत्तिकाले पश्चात्कालभावीनि तद्भावित्वेनाभिमतानि विज्ञानानीति व्यापकानुपलब्धिः। अविकलकारणत्वस्य भवनेन व्याप्तत्वात्तस्य चेहाभावः। ननु च सामान्येनाविकलकारणत्वमात्रस्य प्रतिषेधे साध्ये सिद्धसाध्यता। तथाहि नित्यस्य शब्दस्य कारणत्वेऽपि सहकारिकारणवैकल्यादनुत्पत्तिः पश्चात्कालभाविनां प्रत्ययानामिष्यत एव परेण। अथ विशिष्टेन शब्दाख्येन कारणेन यदविकलकारणत्वं तत्प्रतिषेधः साध्यते, तदाऽनैकान्तिकता हेतोः। दृष्टान्तश्च साध्यविकलः। नहि चक्षुर्विज्ञानं शब्दकारणवैकल्यान्न भवति। किं तर्हि ?। चक्षुर्वैकल्यात्। नैतदस्ति। सामान्येनैव साध्यम्, न च सिद्धसाध्यता, तथाहि—यदि नित्य-

स्य कारणान्तरापेक्षिता सम्भवेत्तदा सिद्धसाध्यता भवेत्। यावता सैव न सम्भवति तस्य तेनानुपकार्यत्वात्। उपकारी ह्यपेक्ष्यः स्यादन्यथाऽतिप्रसङ्गः। तस्मादनपेक्ष्यस्य शब्दस्य कारणत्वाभ्युपगमे सर्वमेव तद्भाविविज्ञानमविकलकारणमेवेति सदैव भवेत्। अभावे तु तदभवद्विज्ञानं तस्यैव शब्दस्य वैकल्यं सूचयेदिति कथं सिद्धसाध्यता। विशेषेणापि कारणवैकल्ये साध्ये नानैकान्तिकता, नापि दृष्टान्तस्य साध्यविकलता। तथाह्ययमत्रार्थो विवक्षितः—यस्मिन्सत्यपि यन्न भवति तत्कारणं भवतो न भवति, यथा चक्षुर्विज्ञानं शब्दे सत्यप्यभवत्, सत्यपि च गकारादिशब्दस्वरूपविशेषे तद्भावित्वेनाभिमतानि ज्ञानानि न भवन्तीति व्यापकानुपलम्भः। अत्रापि नित्यस्यापेक्षानुपपत्तिर्विपर्यये बाधकप्रमाणवृत्तिः। न च कुशूलस्थेन बीजादिना व्यभिचारस्तस्याङकुरं प्रति मुख्यकारणत्वानुपपत्तेरित्यलं प्रपञ्चेन ॥ २६०० ॥
§ 8443

यदुक्तं पूर्वम्—व्यञ्जकध्वन्यधीनत्वादित्यादिना, तद्वस्तुतो दूषितमपि पुनरपि निवर्त्त्य सत्यपि नित्यानां व्यञ्जके दुष्ट एवायं पक्ष इति विख्यापयिषया दूषयन्नाह—व्यञ्जकेत्यादि। § 8444

व्यञ्जकध्वन्यधीनं च भवत्वस्योपलम्भनम्।
यथाऽवस्थितरूपस्य किन्तु तस्य ग्रहो भवेत्॥
२६०१ ॥§ 8446

नान्यथा तद्ग्रहोऽयं स्यात्तद्रूपाप्रतिभासनात्।
व्याप्ताशेषनभोभागो नहि शब्दः प्रकाशते॥
२६०२ ॥§ 8448

तद्ध(?)नेर्भिन्नदेशत्वं श्रुतिः किमनुरुध्यते।
व्यक्तस्तु प्रतिभासेत स्वात्मनैव घटादिवत्॥
२६०३ ॥§ 8450

700/k

सर्वं च प्रक्रियामात्रमिदमुक्तं च कारणम्।

व्यञ्जकानामसामर्थ्यं व्यक्त्ययोगाच्च साधितम्॥
२६०४॥§ 8452

प्रत्यक्षस्तु स एवेति प्रत्ययः प्राग् निराकृतः।
देशभेदेन भिन्नत्वमित्येतत्तदबाधितम्॥ २६०५॥§ 8454

यदि हि शब्दस्य व्यञ्जकाधीनं ग्रहणं तत्किमिति यथाऽसौ यावद्व्योम स्थितस्तदा न गृह्येत। एवं तस्य तद्ग्रहणं भवेदन्यथाऽतिप्रसज्यत इत्यावेदितं पूर्वम्। न चयावद्व्योम शब्दो गृह्यते। तस्माद्ध(?)न्यनुरोधेन (न)शब्दश्रुते(ति?)र्युक्ता। किं तर्हि ?,यस्यासौ श्रुतिस्तमेव शब्दं तस्या अनुरोद्धुं युक्तम्। एवं (च) तस्यासौ सिद्ध्येन्नान्यथा, ततश्च घटादिवत्सर्वात्मनैव प्रतिभासेतेति सङ्क्षेपार्थः। तदिति। तस्मात् ॥ २६०१॥ २६०२॥ २६०३॥ २६०४॥ २६०५॥ § 8455

पर्यायेण यथा चैक इत्यादावाह—पर्यायेणेत्यादि। § 8456

पर्यायेण च यः
कश्चिद्भिन्नदेशाद्व(न्व?)जत्य(न्न?)सौ।
सिद्ध्यति क्षणभङ्गित्वान्नान्यथा(स्य गति)र्भवेत्॥
२६०६॥§ 8458

पूर्वदेशावियुक्तस्य स्वभावस्यानुवर्त्तनात्।
नहि देशान्तरप्राप्तिः स्थैर्ये तस्योपपद्यते॥
२६०७॥§ 8460

अनित्यस्य हि देशान्तरोत्पत्तिरेव गतिः, न तु नित्यस्य, एकदेशवर्त्तिस्वभावमविजहतो देशान्तरगमनायोगात्। त्यागे वा नित्यत्वहानिप्रसङ्गात्। एतदेव दर्शयति—पूर्वदेशावियुक्तस्येत्यादि॥ २६०६॥ २६०७॥ § 8461

यथा महत्यां स्वातायामित्यादावाह—नभस इत्यादि। § 8462

नभसो निरुपाख्यत्वान्नाभिव्यक्तिः प्रकल्पते।
अत्यक्षत्वाच्च खे नायमालोकः स तथेक्ष्यते॥
२६०८॥§ 8464

नभसो वस्तुत्वासिद्धेर्नाभिव्यक्तिर्युक्ता, स्प्रष्टव्याभावमात्र एव तत्प्रज्ञप्तेः, तथा ह्यन्धकारे प्रतिघातमविदन्त आकाशमेव नात्र किञ्चिदिति वक्तारो भवन्ति। येषामपि वस्तुसदाकाशं तेषां तदतीन्द्रियमेवेति कथं व्योम्नि धीर्भवेत्। अतएवाह—अत्यक्षत्वाच्चेति। यद्येवं मृदि खातायां किं तदुपलभ्यत इत्याह—आलोकः स तथेति॥ २६०८॥ § 8465

सत्यप्याकाशस्य वस्तुत्वेऽभिव्यक्तिर्नैव युज्यते इति दर्शयन्नाह—किञ्चेत्यादि। § 8466

701/k

किञ्च शब्दवदाकाशेऽप्यभिव्यक्तिर्न युज्यते।
ज्ञानं हि व्यक्तिरेषा च नित्यं स्याद्धेतुसन्निधेः॥
२६०९ ॥§ 8468

यथाच व्यञ्जकः शब्दे न कथञ्चित्प्रकल्पते।
तत्रात्रैवं परोपाधिः शब्दबुद्धौ सति भ्रमः॥
२६१० ॥§ 8470

नातो दीर्घादयः सर्वे ध्वनिधर्मा इति स्थितम्।
ध्वनीनां व्यञ्जकत्वे हि तत्स्यात्तच्च निराकृतम्॥
२६११ ॥§ 8472

तत्स्यादिति। दीर्घादीनां ध्वनिधर्मत्वम्। तच्चेति। ध्वनीनां व्यञ्जकत्वम् ॥ २६०९॥ २६१०॥ २६११॥ § 8473

यदुक्तम्—नचादृष्टार्थसम्बन्ध इत्यादि, तत्राह—अत्यन्तभेदिनोऽपीत्यादि। § 8474

अत्यन्तभेदिनोऽप्येते तुल्यप्रत्यवमर्शने।
शक्ताः शब्दास्तदर्थाश्चेत्यसकृच्चर्चितं पुरा॥
२६१२ ॥§ 8476

नातो दृष्टार्थसम्बन्धः शब्दो भवति वाचकः।

स्ववृत्त्या वस्तुतस्त्वेष वाचको नेति साधितम्॥
२६१३ ॥§ 8478

अथमत्र सङ्क्षेपार्थः। यदि पारमार्थिकस्यार्थशब्दयोर्वाच्यवाचकभावस्याभावप्रसङ्गः क्रियते भवता तदा सिद्धसाध्यता। तथाहि—विस्तरेण जातिस्वलक्षणादीनां वाच्यवाचकत्वं शब्दपरीक्षायां निराकृतम्। अथ सांवृतस्यापि तदाऽनैकान्तिकतातथाह्यत्यन्तभेदिनोऽपि केचिदर्थाः प्रकृत्यैकाकारप्रत्यवमर्शज्ञानस्य हेतुतां प्रतिपद्य, मानाः सांवृतं शब्दार्थयोर्वाच्यवाचकभावं सम्पादयिष्यन्तीति प्रागेवापोहचिन्तायां प्रतिपादितम्। तस्मादपोहशब्दार्थवादिनो बौद्धान्प्रति सर्वमिदमुच्यमानमत्यन्तपरिलघुतया परिप्लवत एव केवलमिति॥ २६१२॥ २६१३॥ § 8479

संवृत्त्या वाचकत्वस्योपपत्तिमाह—मिथ्याऽवभासिन इत्यादि। § 8480

मिथ्याऽवभासिनो ह्येते प्रत्ययाः शब्दनिर्मिताः।
जातिस्वलक्षणादीनां वाच्यनाचकतास्थितेः॥
२६१४ ॥§ 8482

तद्भ्रान्त्या व्यवहर्त्तारो वैलक्षण्येऽपि वस्तुतः।
गोशब्द एक एवेति मन्यन्ते समबुद्धयः॥
२६१५ ॥§ 8484

तस्माद्द्विजातिना प्रोक्तं बहुसम्बद्धभाषिणा।
शब्दभेदं पुरस्कृत्य यत्तत्सर्वमनास्पदम्॥
२६१६ ॥§ 8486

702/k

पररूपं हि स्वप्रतिभासेन यया संवृयते बुद्ध्या यथार्थमप्रकाशनात्साकल्पिका बुद्धिः संवृत्तिः, तया यद्व्यवस्थापितं रूपं तत्सांवृतमुच्यते। संवृत्तिसत्त्वं तदेव न पारमार्थिकं, तस्यासत्त्वात्। भ्रान्तस्य च ज्ञानस्य सर्वस्यैव निर्विषयत्वात्॥ २६१४॥ ॥ २६१५॥ २६१६॥ § 8487

अथापि स्याद्विना पारमार्थिकेनैकत्वेन कथं विधिप्रतिषेधलक्षणं व्यवहारमारोपवशेन शब्दाः सम्पादयन्तीत्याह—तथाहीत्यादि। § 8488

तथाहि हस्तकम्पादेर्नैकत्वं बुद्धिभेदतः।
शीघ्रमन्दादिभेदेन तद्यक्तिश्च निराकृता॥
२६१७॥§ 8490

सामान्यं नच तत्रैकमनुगाम्युपलक्ष्यते।
सङ्केतात्प्रतिषेधादिगत्यङ्गं च भवत्यसौ॥
२६१८॥§ 8492

हस्तकम्पादेरित्यादिशब्देनाक्षिनिकोचादिपरिग्रहः। शीघ्रमन्दादिभेदेनेति। बुद्धिभेदत इति सम्बन्धः। नचायं शीघ्रादिभेदो व्यञ्जककृतो व्यक्तेर्निषिद्धत्वात् —तद्यक्तिरिति। नित्यव्यक्तिः। नच सामान्यवशाद्यवहाराङ्गता, तस्याप्रसिद्धत्वात्। अप्रतीतस्य सामान्यस्य न युक्तं व्यवहाराङ्गत्वं, सर्वदा व्यवहारप्रसङ्गात्।प्रतिषेधादिगत्यङ्गमिति। आदिशब्देन विधानाभ्यनुज्ञानाभ्यर्थनादीनां ग्रहणम्। तेषां गतिः—प्रतीतिः, तस्या अङ्गं—कारणम्, असौ—हस्तकम्पादिर्भवति। तद्वच्छब्दोऽपि भविष्यतीति शेषः॥ २६१७॥ २६१८॥ § 8493

यदुक्तम्— तस्माच्छब्दार्थसम्बन्धो नित्य एवाभिधीयते, इति तत्राह—साक्षादित्यादि। § 8494

साक्षाच्छब्दा न बाह्यार्थप्रतिबन्धविवेकतः।
गमयन्तीति च प्रोक्तं विवक्षासूचकास्त्वमी॥
२६१९॥§ 8496

नहि कश्चिच्छब्दार्थयोर्वास्तवः सम्बन्धोऽस्ति। यस्य नित्यत्वमनित्यत्वं वा स्यात्। तथाहि—न बाह्यमर्थं शब्दाः प्रतिपादयन्ति तेन सह प्रतिबन्धाभावादिति पूर्वं शब्दपरीक्षायां निवेदितम्। प्रतिबन्धमन्तरेण च प्रतिपादयतामतिप्रसङ्गः स्यात्। यद्येवं किं तर्हि प्रतिपादयन्तीत्याह—विवक्षासूचकास्त्वमीति। विवक्षामपि न वाच्यतया प्रतिपादयन्ति, किं तर्हि ?, लिङ्गतया सूचयन्ति। अतएव सूचका इत्युक्तम्। तथाहि—शब्दादुच्चरितादर्थाध्यवसायी विकल्पो जायते, न विवक्षाध्यवसायी, यश्च न शब्देन ज्ञातेनाध्यवसीयते स कथं शब्दार्थः॥ २६१९॥ § 8497

703/k

यद्येवं विवक्षयाऽपि सह कस्तेषां सम्बन्धो येन तां लिङ्गत्वेन सूचयेदित्याह—तस्या इत्यादि। § 8498

तस्याः कार्यतया ते हि प्रत्यक्षानुपलम्भतः।

निश्चिता इति तेनात्र कार्यकारणता स्फुटा॥
२६२० ॥§ 8500

तस्या विवक्षायाः कार्यत्वेनात्मनि प्रत्यक्षानुपलम्भाभ्यां शब्दा निश्चिता इति कार्यकारणलक्षण एव सम्बन्धः॥ २६२०॥ § 8501

यद्येवं समयस्तर्हि व्यर्थः, प्रत्यक्षानुपलम्भाभ्यामेव कार्यकारणभावस्य निश्चितत्वादित्याह—कार्यकारणभावश्चेत्यादि। § 8502

कार्यकारणभावश्च समयाद्येन निश्चितः।
स विवक्षां प्रपद्येत शब्देभ्यो हस्तकम्पवत्॥
२६२१ ॥§ 8504

एवं मन्यते यद्यपि विवक्षामात्रेण सह कार्यकारणभावो निश्चितो विवक्षाविशेषेण तु परसन्ताने समयादृते न निश्चेतुं शक्यत इत्यतस्तन्निश्चयाय समयः क्रियते। ननु च समयादपि कथमसौ निश्चेतुं शक्यते। तथाहि—यदि समयकाले परविवक्षाविशेषः प्रतीत्युपायः सम्भवेत्तदाऽसौ समयस्तत्र कृतः पश्चाद्व्यवहारकालेविवक्षाविशेषप्रतीतिहेतुर्भवेत्। यावता स एवाभ्युपायो नास्ति। तथाहि—नानुच्चार्य शब्दं समयः क्रियते, ततश्च तत एव शब्दाद्विवक्षाविशेषप्रतिपत्ताावितरेतराश्रयदोषः स्यात्। तथाहि—समयवशाच्छब्दो विशेषद्योतकः समयश्च विशेषाविशेषप्रतिपत्तिमन्तरेण न शक्यत इति स्पष्टमितरेतराश्रयत्वम्। नैष दोषः। यदा सर्वएवायं शाब्दो व्यवहारः स्वप्रतिभासानुरोधेनैवेष्यते भ्रान्तत्वात्तैमिरिकद्वयद्विचन्द्रव्यवहारवत्तदा का रो(चो?) द्यचञ्चुता। नच सर्वत्र शब्द एव विवक्षाविशेषप्रतीतिहेतुरन्यथाऽपि कश्चिच्छृङ्गग्राहिकया प्रकरणादिना चार्थविशेषोपदर्शनेन च विवक्षाविशेषमावेद्य समयं कुर्यादिति नेतरेतराश्रयत्वम्। किञ्च—भवतो विधिवादिनस्तुल्यं चोद्यम्, परप्रतिपत्तेरप्रत्यक्षत्वात्कथं वक्तृश्रोत्रोरेकार्थप्रतिपत्तिनिश्चय इति। नचैकार्थप्रतिपत्तिनिश्चयमन्तरेण समयो युक्तस्तस्य योऽत्र भवतः परिहारः स ममापि भविष्यति। स्यादेतच्छब्दस्य विवक्षायामसमितत्वात्कथं तया सह सम्बन्धः समयान्निश्चीयते। नह्यत्र समयः कृतोऽन्यार्थद्योतको भवत्यतिप्रसङ्गात्। नैष दोषः। विवक्षाशब्देनातत्परिवर्त्ती अर्थाकारो
704/k वा स्वरूपतया व्यस्तो यः स इहाभिप्रेतः। परमार्थतस्तस्य विवक्षास्वभावत्वात्। स एवेह विवक्षाविशेषोऽभिप्रेतः। तत्रैव च समयो न स्वलक्षणे, स एव शब्देनाभिधीयते। ततस्तदाकारविकल्पोत्पत्तेः। केवला तु विवक्षा न शब्देनाभिधीयत इत्युक्तम्॥ २६२१॥ § 8505

यद्येवं यदि विवक्षापरिवर्त्तिनाऽर्थाकारेण कार्यकारणलक्षण एव सम्बन्धः शब्दस्य तत्कथं तत्रतत्राचार्याः सामयिकं समयं वा शब्दार्थसम्बन्धामाहुरित्याह—विवक्षावर्त्तिनेत्यादि। § 8506

विवक्षावर्त्तिनाऽर्थेन कार्यकारणतात्मकः।
शब्दानामेष सम्बन्धः समये सति जायते॥
२६२२॥§ 8508

तेन सामयिकः प्रोक्तस्तेन च द्योतनादतः।
समयोऽप्युच्यते तेषां सम्बन्धो नतु मुख्यतः॥
२६२३॥§ 8510

श्रोतृचेतसि समये सति जायते भवतीति सामयिकः अध्यात्मादित्वात् ठञ्। यद्यपि तत्र भवतिः सत्तावचनो गृहीतस्तथापि परमार्थतः सत्ताजन्मनोरभेदात्तदेव भावत्वेन विवक्ष्यते। वक्तृसन्ताने च समयो न(येन ?) द्योतनादुपचारात्समय उच्यते। तस्य प्रतिनियतकालवर्त्तित्वेन तत्कालासम्भवात्॥ २६२२॥ २६२३॥ § 8511

ननु यदि परमार्थतो वस्तुनः सम्बन्धो नास्तीत्युक्तम्, कार्यकारणतालक्षणस्तर्हि कथं भवतीत्याह—कार्यकारणभूताभ्यामित्यादि। ते एवेति। § 8512

कार्यकारणभूताभ्यां वस्तुभ्यामन्य एव न।
कार्यकारणतायोगस्ते एव तु तथोदिते॥
२६२४॥§ 8514

कार्यकारणभूते वस्तुनी। तथोदिते इति। कार्यकारणतेत्यादिना लाघवार्थम् ॥ २६२४॥ § 8515

यद्येवं प्रतिपुरुषप्रयोगं तयोर्भेदात्कथमभिन्नसम्बन्धप्रतीतिर्वक्तृश्रोत्रोर्भवति। तथाहि—वक्तुरेवं भवति, य एव समयकाले मया गृहीतोऽर्थः शब्दो वा तेनैव तमेवार्थं प्रतिपादयामीति, तथा श्रोतुरप्येवं भवति—तेनैव तमेवायमर्थं प्रतिपादयतीति। अन्यथा भिन्नारोधावस्थितयोः कथं व्यवहारः स्यादित्याह—ते चेत्यादि। § 8516

ते च प्रत्येकमेकात्मरूपत्वेन जडैर्गते।
सङ्केतव्यवहाराप्तकालव्याप्तिरतो मता॥
२६२५॥§ 8518

जडैरिति। भ्रान्तैः। गते इति। गृहीते। सङ्केतव्यवहाराभ्यामाप्तो व्याप्तश्चासौकालश्चेति तथोक्तः। तस्य व्याप्तिः। कार्यकारणाभ्यासैकरूपाभ्यामिति शेषः २६२५ § 8519

705/k

अथैक एव पारमार्थिकः सम्बन्धः कस्मान्नेष्यते, येन काल्पनिक एवेष्ट इत्याह —एकस्मित्यादि। § 8520

एकस्तु वास्तवो नैव सम्बन्ध इह युज्यते।
असङ्कीर्णतयाऽर्थानां भेदेऽसम्बन्धता भवेत्॥
२६२६॥§ 8522

सम्बन्धो भवन्भिन्नानां वा भवेदभिन्नानां वा। न तावद्भिन्नानाम्, सर्वेषां स्वात्मनि स्थितत्वेनासङ्करात्। अभेदेऽप्येकमेव तद्वस्त्विति कस्य केन सह श्लेषो भवेदतोऽसम्बन्धता भवेत्॥ २६२६॥ § 8523

यत्तु समयलक्षणसम्बन्धदूषणं समयः प्रतिमर्त्यं चेत्यादिना तत्र सिद्धसाध्यतां प्रतिपादयन्नाह—समय इत्यादि। § 8524

समयः प्रतिमर्त्यं च प्रत्युच्चारणमेव च।
इत्याद्यतः परेणोक्तं परनीतिमजानता॥
२६२७॥§ 8526

समयो हि न सम्बन्धो नरधर्मतया तयोः।
द्योतकः स तु तस्येति सम्बन्धः स्यान्न मुख्यतः॥
२६२८॥§ 8528

प्रत्युच्चारणमेनं च न परे प्रतिजानते।
ईशादेः प्रतिषिद्धत्वात्सर्गादौ नच तत्कृतम्॥
२६२९॥§ 8530

अनिष्टापत्तिर्हि दूषणमुच्यते, नच बौद्धेन समयः शब्दार्थयोर्मुख्यः सम्बन्ध इष्टस्तस्य पुरुषधर्मत्वात्। तस्य च दूषणे सति नेष्टक्षतिः काचित्। न चान्यधर्मोऽन्यस्य सम्बन्धो भवत्यतिप्रसङ्गात्। यच्चोक्तम्—प्रत्युच्चारणमेव वा क्रियते जगदादौवेति पक्षद्वयं तस्यानभ्युपगमादेवादूषणम्। तदाह—प्रत्युच्चारणमित्यादि।एनमिति। समयम्। पर इति। बौद्धाः। ईशादेरिति। ईश्वरब्रह्मादेः॥ २६२७॥ ॥ २६२८॥ २६२९॥ § 8531

यदुक्तं प्रत्येकं वापि सम्बन्ध इत्यादि, तत्राह—प्रत्येकमित्यादि। § 8532

प्रत्येकं यश्च सम्बन्धः सन्निभः (भिन्नः?) क्षणभङ्गतः।
तुल्यप्रत्यवमर्शश्च भेदेऽपि न विरुध्यते॥
२६३० ॥§ 8534

द्वितीय एवात्र पक्षः। न च भेदधीप्रसङ्गो भेदेऽपि तुल्यप्रत्यवमर्शहेतुत्वाविरोधात्। अतोऽनैकान्तिकमेतद्यदुक्तम्—भिन्नश्चेद्भेदधीर्भवेदिति॥ २६३०॥ § 8535

स्यादेतत्—क्षणभङ्गोऽयमस्माकमसिद्धस्तत्कथमुच्यते ? क्षणभङ्गतो भिन्न इत्याह —क्रमेणेत्यादि। § 8536
706/k

क्रमेण जायमानाश्च धियस्तद्विषयाः स्फुटम्।
तस्याप्याहुः क्रमं तासामक्रमो ह्यन्यथा भवेत्॥
२६३१ ॥§ 8538

तस्यापीति। सम्बन्धस्य क्रममाहुः—प्रतिपादयन्तीत्यर्थः। अक्रमो ह्यन्यथा भवेदिति। धियामिति सम्बन्धः। एतच्च विपर्यये बाधकं प्रमाणम्। प्रयोगश्च पूर्ववद्बोध्यः॥ २६३१॥ § 8539

वक्तृश्रोतृधियोर्भेदाद्व्यवहारश्च दुष्यतीत्यादावाह—सकृदेवेत्यादि। § 8540

सकृदेव बहूनां तु सङ्केतकरणे सति।
समयो नेष्यते भिन्नो नीलाद्येकक्षणो यथा॥
२६३२ ॥§ 8542

वक्तुरन्यो न सम्बन्धो बुद्धौ श्रोतुर्न चापरः।
एकरूपा च सा यस्य(स्मात् ?)
द्वयोरप्यनुवर्त्तनात्॥ २६३३ ॥§ 8544

श्रोतुः कर्तुं च सम्बन्धं वक्ता पूर्वं प्रपद्यते।
पूर्वोपलब्धो यस्तेन तमेव हि करोत्यसौ॥
२६३४ ॥§ 8546

एकाकारा यतस्तस्य वृत्ता प्रत्यवमर्शधीः।
तस्माद्भिन्नेऽपि शब्दादावेकत्वं सोऽध्यवस्यति॥
२६३५॥§ 8548

यथा नीलादिक्षणो बहुभिर्दृश्यमानोऽपि न भिद्यते, एवं बहूनां सङ्केतकरणेऽपि सति न सम्बन्धो भेत्स्यति, किं पुनर्द्वयोः। सर्वेषां तुल्यप्रत्यवमर्शस्थितत्वादिति भावः। अतो न वक्तृश्रोत्रोरन्यः सम्बन्धो भवति॥ २६३२॥ २६३३॥ ॥ २६३४॥ २६३५॥ § 8549

यदुक्तम्—घटादावपि तुल्यं चेन्न सामान्यप्रसिद्धितः इत्यादि, तत्राह—घटादावपीति। § 8550

घटादावपि सामान्यं प्रागेव विनिवारितम्।
नहि भूतगुणप्रख्या काचिदाकृतिरिष्यते॥
२६३६॥§ 8552

नचास्याकृतितः सिद्धा शक्तिरब्धारणादिषु।
तेषामपि हि नित्यत्वमाकृतेर्यद्यभेदिनः॥
२६३७॥§ 8554

भेदे सम्बन्धदोषस्तु तदुत्पत्तौ त्वनित्यता।
अतो नाकृतितो युक्ता शक्तिरब्धारणादिषु॥
२६३८॥§ 8556

घटादेर्व्यतिरेकेऽपि शक्तेर्दोषा इमे ध्रुवम्।
अब्धारणादि तत्कार्यं नित्यमेवं प्रसज्यते॥
२६३९॥§ 8558

707/k

प्रागेवेति। सामान्यपरीक्षायाम्। पुनरत्रैव सङ्क्षेपेण निराकरणमाह—नहीत्यादि। भूतानाम्—आदित्यजहादीनां (क्षितिजलादीनां ?) कण्ठे (काष्ण्यादि ?) गुण(वत्)व्यतिरिक्ता भवता मीमांसकेन जातिरिष्यते। नापि

दृश्यत्वेनेष्टा सती सा दृश्यते, अव्यतिरिक्ताऽपि न युज्यते, तेषामपि घटादीनामाकृतिस्वरूपवन्नित्यत्वप्रसङ्गात्। अथापि भिन्नाऽभ्युपगम्यते तदा सम्बन्धाभावदोषः, भिन्नानां हि तदुत्पत्तिलक्षण एव सम्बन्धो भवेत्, ततश्च तदुत्पत्तौ सत्यां जातेरनित्यता प्राप्नोति, उत्पत्तिधर्मकत्वाद् घटवत्। क्वचित्तु नित्यतेति पाठः। तत्रायमर्थः—यदि घटादीनां ततो जातेः सकाशादुत्पत्तिरङ्गीक्रियते तदा घटादीनां नित्यता प्राप्नोति, नित्यं कारणस्य सन्निधानान्नित्यमुत्पत्तिः प्राप्नोतीत्यर्थः। उभयस्वभावपक्षे उभयपक्षभावी दोषः, एकत्वहानिप्रसङ्गश्च। वस्तुनः स्वभावद्वयानुपपत्तेः। एवं हि द्वे एव ते वस्तुनी कथिते स्यातां नैकमुभयात्मकम्। अनुभयपक्षे वस्तुत्वहानिप्रसङ्गः। एकस्य विधिप्रतिषेधायोगश्चेति वाच्यम्। इमे दोषा इति। सम्बन्धासिद्धिनित्यतादिप्रसङ्गलक्षणाः। नित्यमब्धारणादिकार्यप्रसङ्गश्चाधिको दोषः॥ २६३६॥ ॥ २६३७॥ २६३८॥ २६३९॥ § 8559

यदुक्तम्—शक्तिरेव हि सम्बन्ध इत्यादि। तत्राह—शक्तिरेव चेत्यादि। § 8560

शक्तिरेव च सम्बन्धो भेदश्चास्या न चेन्मतः।
शब्दार्थानां भवेदेका शक्तिरव्यतिरेकतः॥
२६४० ॥§ 8562

व्यतिरेकेऽपि सम्बन्धस्तस्यास्ताभ्यां न कश्चन।
तदुत्पत्तौ न नित्यत्वं नचान्या वस्तुनो गतिः॥
२६४१ ॥§ 8564

नचान्येति। उभयानुभयस्वभावलक्षणे पूर्ववद्दोषप्रसङ्गात्॥ २६४०॥ २६४१॥ § 8565

यदुक्तम्—सम्बन्धाख्यानकाल इत्यादि, तत्राह—सम्बन्धेत्यादि। § 8566

सम्बन्धाख्यानकाले तु गोशब्दादावुदीरिते।
केचित्सम्बन्धबुद्ध्याऽर्थं बुध्यन्ते न परे तथा॥
२६४२ ॥§ 8568

यस्मात्सम्बन्धसद्भावाद्यादृशः स प्रकाशितः।

तावकीने तु सम्बन्धे सर्वोऽर्थमवधारयेत्॥
२६४३ ॥§ 8570

शक्तिरेव हि सम्बन्धो नित्या युष्माभिरिष्यते।
सा चार्थबोधजनने नियताऽनवधिर्न वा॥
२६४४ ॥§ 8572

708/k

नियतानवधौ सर्वः किमर्थं नावधारयेत्।
सावधावपि को हेतुः प्रकृतिश्चेत्स्वतस्तथा॥
२६४५ ॥§ 8574

सङ्केतग्रहणात्पूर्वं तस्य चास्मरणे पुनः।
एकस्यैव प्रवृत्तं किं विज्ञानं तत्र वृत्तिमत्॥
२६४६ ॥§ 8576

तज्ज्ञानजन्मनियता सा हि शक्तिरवस्थिता।
अथ ज्ञातैव सा शक्तिर्नियता परिकल्प्यते॥
२६४७ ॥§ 8578

ज्ञाताऽज्ञाता च भिन्ना चेन्नित्यत्वमवहीयते।
ऐक्ये तु किंनिमित्तोऽयं विभाग उपवर्ण्यते॥
२६४८ ॥§ 8580

यादृश एतत्कार्यकारणभावलक्षणस्तादृशो यस्मात्सम्बन्धोऽस्ति तस्मात्केचिद्बुध्यन्त इति युक्तं स्यात्, तस्य नियतज्ञानोत्पादकत्वेन स्थितत्वात्। भवदीये तु सम्बन्धे सर्वमयुक्तमिति दर्शयति—तावकीन इत्यादि। तथाहि—शक्तिलक्षणसम्बन्ध इष्यते, जनकं च रूपं शक्तिरुच्यते, सा च नित्यैकस्वभावत्वेनेष्टाऽर्थबोधजनने च नियता, ततश्चार्थबोधनियता सती किमनवधिरिष्टा—कतिपयपुरुषावधिरहिता, आहोस्विन्नेति पक्षद्वयम्। प्रथमे

पक्षे सर्वेषां युगपत्सर्वथा चार्थावधारणप्रसङ्गः। द्वितीयेऽपि पक्षे प्रतिनियतविज्ञानजनकस्वभावनियामको हेतुर्वाच्यः, कृतकानां हि भावानां प्रतिनियतकार्यजनकस्वभावस्य नियामकाः स्वहेतुप्रत्यया युक्ताः, न तु नित्यानामिति भावः। स्यादेतन्नित्यानामपि प्रकृतिरेव सा तादृशी, येन प्रतिनियतं कार्यं जनयन्ति, न सर्वं, नहि स्वभावाः पर्यनुयोगमर्हन्तीति, एवं हि यदि स्वत एव तस्यायं स्वभावः परनिरपेक्षस्तदा सङ्केतग्रहणात्पूर्वं तथा विस्मृतसङ्केतस्य तस्यैव प्रतिनियतस्य प्रतिपत्तुः सर्वदा ज्ञानप्रवृत्तिः प्राप्नोति, तज्ज्ञानजनने नियतायाः शक्तेः सदाऽवस्थितत्वात्। अथापि स्यात् ज्ञापकत्वात्सम्बन्धलक्षणा शक्तिर्ज्ञाता सती ज्ञानं जनयति, नाज्ञाता, तेन न भवति यथोक्तदोषप्रसङ्ग इति। तदसम्यक्। यदि हि ज्ञाताज्ञातावस्थयोः परस्परं भेद इष्यते तदा नित्यत्वहानिः। अथाभेदस्तदा ज्ञाताज्ञातस्वभावद्वयविभागानुपपत्तिः, नह्येकस्य वस्तुन एकपुरुषापेक्षया ज्ञातत्वमज्ञातत्वं च परस्परं विरुद्धं स्वभावद्वयं युज्यता इति॥ २६४२॥ २६४३॥ २६४४॥ ॥ २६४५॥ २६४६॥ २६४७॥ २६४८॥ § 8581

किञ्च—सति हि प्रतिपत्त्युपाये शक्तेर्ज्ञातत्वं स्याद्यावता स एव न सम्भवतीति मन्यमानः पृच्छति—किञ्चेत्यादि। § 8582

709/k

किञ्च केनाभ्युपायेन विज्ञाता शक्तिरिष्यते।
अर्थापत्त्येति चेद्यस्मादयं न्याय इह स्थितः॥
२६४९॥§ 8584

शब्दवृद्धाभिधेयानि प्रत्यक्षेणात्र पश्यति।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया॥ २६५०॥§ 8586

अन्यथानुपपत्त्या च वेत्ति शक्तिं द्वयाश्रिताम्।
अर्थापत्त्याऽवबुध्यन्ते सम्बन्धं त्रिप्रमाणकम्॥
२६५१॥§ 8588

अर्थापत्तेरित्यादिना परस्योत्तरं विस्तरेण तावदाशङ्कते। तथाहि—सम्बन्धप्रतिपत्तेरयं न्यायः कुमारिलेन वर्णितः—यस्मात्प्रथमं तावत्प्रत्यक्षेण शब्दं वृद्धं च शब्दस्याख्यातारमभिधेयं च वाच्यं वस्तु पश्यति, ततः पश्चादनुमानेन चेष्टालक्षणेन लिङ्गेन श्रोतुः प्रतिपन्नत्वं पश्यति—अवधारयतीत्यर्थः। करणं कारकं कृत्वा चेष्टाया अनुमानत्वमुक्तम्। ततश्च पश्चादर्थापत्त्या द्व-

याश्रिताम्—शब्दार्थाश्रितां शक्तिं वेत्ति। अर्थापत्त्या तु साक्षादवबुध्यन्त इत्यतोऽर्थापत्त्याऽवबुध्यन्त इत्युक्तम्।त्रिप्रमाणकमिति। प्रत्यक्षानुमार्थापत्तिलक्षणानि त्रीणी प्रमाणानि यस्याधिगमाय भवन्ति स तथोक्ताः॥ २६४९॥ २६५०॥ २६५१॥ § 8589

अन्यथैवेत्यादिना दूषणमाह। § 8590

अन्यथैवोपपन्नत्वाच्छक्तिर्बोद्धुं न शक्यते।
शब्दात्सामयिकाद्यस्मात्प्रतिपत्तिरनाकुला॥
२६५२॥§ 8592

अनेनार्थापत्तेरनैकान्तिकतामाह—विनापि नित्यसम्बन्धं प्रतिपत्तिसम्भवस्य प्रतिपादितत्वात्॥ २६५२॥ § 8593

न केवलसाधकप्रमाणाभावात्तत्कल्पना न युक्ता, प्रमाणबाधितत्वादपि न युक्तेति दर्शयन्नाह—शक्तिनित्यत्वेत्यादि। § 8594

शक्तिनित्यत्वपक्षे तु सङ्केतादि व्यपेक्षते।
न किञ्चिदिति शब्दार्थप्रतिपत्तिः सदा भवेत्॥
२६५३॥§ 8596

समर्थान्तरभावे च कालिमार्यादिशब्दवत्।
नान्यार्थबोधकत्वं स्याद्धनेर्नियतशक्तितः॥
२६५४॥§ 8598

नानार्थद्योतनायैव शक्तिरेका यदीष्यते।
भिन्ना वा शब्द एकस्मिन्सकृन्नानार्थविद्भवेत्॥
२६५५॥§ 8600

710/k

प्रयोगः—ये सङ्केतापेक्षार्थप्रकाशना न ते नित्यसम्बन्धयोगिनः, यथा गाव्यादिशब्दाः, सङ्केतापेक्षार्थप्रकाशनाश्च गवादयो लौकिकवैदिकाः शब्दा इति विरुद्धव्याप्तोपलब्धिः। सापेक्षत्वस्य नित्यसम्बन्धयोगित्वविरुद्धेनानित्यसम्बन्धयोगित्वेन व्याप्तत्वात्। एतच्च प्रमाणं पे(?)श्चात्करिष्यते। अत्र तु व्याप्तिमात्रमस्य प्रसाध्यते।तथाहि—शक्तिलक्षणेनार्थप्रतिपत्तिहेतुना सम्बन्धेन

नित्यसम्बन्धयोगिनः शब्दा इष्टाः। सा च शक्तिर्नित्यत्वादनुपकार्येति न किञ्चित्सङ्केतादि व्यपेक्षते। ततश्च तद्भाविनी शब्दार्थप्रतिपत्तिः सर्वदा भवेत्। किञ्च—सा शक्तिरेकार्थनियता वा भवेन्नानार्थनियता वा, तत्रापि नानार्थनियमपक्षे किमेकस्य शब्दस्य नानार्थद्योतिका शक्तिरेकैव, आहोस्विदनेकेति विकल्पाः। तत्राद्ये पक्षे यदेतद्देशकालादिभेदेन सङ्केतान्तरे क्रियमाणे सति ध्वनेः शब्दस्यापा(न्या ?)र्थबोधकत्वं दृष्टम्—यथा कलिमार्यादिशब्दानां द्रविडा(डा ?)र्यदेशयोर्यथाक्रममन्तकालवर्षोपसर्गाद्यभिधायिनां(?) तन्न प्राप्नोति, नियतशक्तिकत्वात्। चक्षुरादिवत्। नहि चक्षुः सङ्केतवशाद्रसाद्युपलम्भाय नियोगमर्हति। द्वितीयेऽपि पक्षे एकस्माच्छब्दाद्युगपत्सर्वेषां पुंसां शब्दार्थप्रतिपत्तिप्रसङ्गः। तद्दर्शयति—शब्द एकस्मिन्नित्यादि॥ २६५३॥ २६५४॥ ॥ २६५५॥ § 8601

अत्रैव दोषान्तरमाह—अर्थद्योतनशक्तेश्चेत्यादि। § 8602

अर्थद्योतनशक्तेश्च सर्वदैव व्यवस्थितेः।
तद्धेतुरर्थबोधोऽपि सर्वेषां सर्वदा भवेत्॥
२६५६॥ § 8604

तस्मिन्सङ्केतसापेक्षा शक्तिश्चेत्परिकल्प्यते।
ननूपकार्यपेक्ष्येत नोपकार्या च साऽचला॥
२६५७॥ § 8606

तस्मिन्निति। अर्थबोधे। सेति। शक्तिः। अचलेति। नित्या। अयं चानुपकार्यत्वे हेतुः॥ २६५६॥ २६५७॥ § 8607

अभ्युपगम्यापि सङ्केतसापेक्षत्वं दोषान्तरमाह—अर्थद्योतनहेतोश्चेत्यादि। § 8608

अर्थद्योतनहेतोश्च सङ्केतस्य नराश्रयात्।
शक्तावितरजन्यायामपि मिथ्यात्वसम्भवः॥
२६५८॥ § 8610

अपि नामासङ्कीर्णमर्थं जानीयामिति सङ्करहेतुः पुरुषोऽपाकीर्णो भवता, तत्र यथा क्वचित्तैः प्रयुक्ताः सङ्कीर्यन्ते शब्दास्तथा सर्वार्थसाधारणाः सन्तो वैदिकाः क्वचित्तैरिच्छावशात्संमिताः किं न सङ्कीर्येरन्। तेषां पुंसां 711/k तत्त्वापरिज्ञानात्। तथाहीच्छावशात्समयः सा च तेषामतत्त्वविदां स्वातन्त्र्येण

प्रवर्त्तमाना केन नियम्येत। ततश्च स्वतन्त्रेच्छाभावी समयोऽपि स्वैरी वैरी च किमिति विरुद्धमर्थं परिहरेत् ॥ २६५८॥ § 8611

नानार्थद्योतनशक्तिपक्षमभ्युपगम्य दोषान्तरमाह—नानार्थद्योतने शक्तिरित्यादि। § 8612

नानार्थद्योतने शक्तिर्भवत्वेकस्य हि ध्वनेः।
नाग्निहोत्रादयस्त्वर्थाः सर्वे सर्वोपयोगिनः॥
२६५९ ॥§ 8614

तदिष्टविपरीतार्थद्योतनस्यापि सम्भवात्।
नित्यशब्दार्थसम्बन्धकल्पना वो निरर्थका॥
२६६० ॥§ 8616

यद्यपि शब्दानां नानार्थप्रतिपादनसामर्थ्यमस्ति, नत्वर्थानां सर्वार्थक्रियाकारित्वं, प्रतिनियतत्वात्कार्यकारणभावस्य। अन्यथा हि न कश्चिद्विघाती स्यादविघाती वा। ततश्च प्रतिनियतार्थक्रियासाधनेऽर्थे प्रतिपिपादयिषिते सति सर्वार्थसाधारणस्य शब्दस्येष्टार्थविषयमेव समयं समयकृत्करोतीति कुत एतल्लभ्यम्। तस्मान्मिथ्यात्वसम्भवान्नित्यसम्बन्धकल्पना व्यर्थैव॥ २६५९॥ २६६०॥ § 8617

पुनरप्यानर्थक्यमस्य दर्शयन्नाह—सङ्केते चेत्यादि। § 8618

सङ्केते च व्यपेक्षायां नित्यसामर्थ्यलक्षणः।
किमकारण एवायं सम्बन्धः परिपोष्यते॥
२६६१ ॥§ 8620

सिद्धोपस्थायिनस्तस्य नहि कश्चित्समीक्ष्यते।
सङ्केतव्यतिरेकेण व्यापारोऽर्थावबोधने॥
२६६२ ॥§ 8622

यदि सत्तामात्रेण सम्बन्धोऽर्थप्रतीतिहेतुः स्यात्तदा सङ्केतानभिज्ञस्यापि स्यादित्यवश्यं समयापेक्षिता तस्येष्टव्या। ततश्च समयस्याप्यर्थप्रतीतिहेतुत्वेऽङ्गीक्रियमाणे स किमकारणं सिद्धोपस्थायी नित्यसम्बन्धोऽपरः पोष्यते। तथाहीयानेव सम्बन्धस्य व्यापारो यदर्थप्रतीतिजननं, तच्चेत्समयेन

क्रियते तदा किमपरनित्यसम्बन्धकल्पनया। नचापि तस्यानाधेयातिशयस्य काचिदपेक्षेति शतशश्चर्चितम्। अदृष्टसामर्थ्यस्य च हेतुत्वकल्पने हन्त हरीतकीं प्राप्य देवता विरेचयन्तीति किं न कल्प्येत ॥ २६६१॥ २६६२॥
§ 8623

712/k

तथाहीत्यादिना सम्बन्धस्य तामेव व्यापारासिद्धिं दर्शयति। § 8624

तथाहि व्यवहारोऽयं न दृष्टः समयं विना।
तस्मात्सम्बन्धसिद्धिश्चेत्यनर्थेयं परम्परा॥
२६६३ ॥§ 8626

तस्मादिति। सङ्केतात्। अनर्थेयं परम्परेति। अदृष्टसामर्थ्यस्य हेतुत्वकल्पनेऽनवस्थादोषात्। तथाहि—सम्बन्धेऽपि कल्पिते पुनरपि कस्मादपरमदृष्टसामर्थ्यं हेत्वन्तरं न कल्प्येत, अदृष्टसामर्थ्येनाविशेषात्, एवं पुनरपीति महत्यनर्थपरम्परा जायेत॥ २६६३॥ § 8627

एवं बाधकस्य प्रमाणस्य व्याप्तिं प्रसाध्य नरेच्छेत्यादिनाऽर्थापत्तेरनैकान्तिकत्वं पूर्वं प्रतिपादितमुपसंहरति। § 8628

नरेच्छामात्रसम्भूतसङ्केतादपि केवलात्।
युज्यते व्यवहारश्च ततो योगो न सिद्ध्यति॥
२६६४ ॥§ 8630

योगो न सिद्ध्यतीति। नित्य इति शेषः॥ २६६४॥ § 8631

एवं च कृत्वा यच्चेदमुक्तं—सर्वेषामनभिज्ञानां पूर्वपूर्वप्रसिद्धित, इत्यादि, तत्परस्परपराहतमुक्तमिति दर्शयति—अन्यथाऽनुपपत्तिरित्यादि। § 8632

अन्यथाऽनुपपत्तिस्तद्व्यवहारस्य शङ्क्यते।
अतीन्द्रियश्च योगोऽतो न नरैरवगम्यते॥
२६६५ ॥§ 8634

सर्वेषामनभिज्ञत्वात्पूर्वपूर्वाप्रसिद्धितः।
न सिद्धो योग इत्येवं किमसौ परिकल्प्यते॥
२६६६ ॥§ 8636

यदि हि सर्वेषामनभिज्ञत्वं कथं तर्हि पूर्वपूर्वतोऽनभिज्ञत्वात्सम्बन्धप्रसिद्धिर्भवेत्, नह्यन्धपरम्परा परेषां रूपविशेषोपदेशाय प्रभवति। यथोक्तं शाबरे भाष्ये—नैवञ्जातीयकेष्वर्थेषु पुरुषवचनं प्रामाण्यमुपैति, अन्धानामिव वचनं रूपविशेषेष्विति। स्यादेतदप्रत्यक्षदर्शित्वात्सर्वेऽनभिज्ञा उच्यन्ते, नतु सर्वथा परिज्ञानाभावात्, शाब्दव्यवहारान्यथानुपपत्त्या तु प्रमाणेन पूर्वपूर्वेषां वृद्धानामभिज्ञत्वमस्त्येवेति। नैतदेवंयतोऽन्यथाऽपि सङ्केताच्छाब्दो व्यवहारः प्रवर्तेत। एतन्न नाम दर्शि (निश्चि ?)तं, तथापि संदिग्धमेतत्—किमसौ नित्य आहोस्विदनित्य इति। अतएवाह—शङ्क्यात इत्यादि। तथाहि—अर्थापत्त्या सम्बन्धमात्रास्तित्वं प्रतिपाद्यते, नतु विशेषः, तेन सह प्रतिबन्धासिद्धेरित्य-
713/k भिप्रायः। अतएवानुमानान्नार्थापत्तेर्भेदः। स्यादेतत्—नानित्यस्यार्थप्रतिपादनहेतुत्वं दृष्टम्, न च युक्तमिति पूर्वं प्रतिपादितमतोऽसामर्थ्यान्नित्यं सिध्यतीति। तदेतन्नित्येऽपि समानमसिद्धं च। तथाहि। नित्यस्यापि सम्बन्धस्यार्थप्रतिपत्तिहेतुत्वं न दृष्टमिति समानम्, हस्तकम्पादीनामनित्यत्वेऽपि प्रतिपादकत्वं दृष्टमित्यदृष्टमसिद्धम्। अत एवायुक्तत्वमसिद्धम्। नित्यस्य च क्रमयौगपद्याभ्यामर्थक्रियाविरोधादिति, तस्यैवायुक्तत्वमिति यत्किञ्चिदिति (देतत् ?)॥ २६६५॥ २६६६॥ § 8637

एवमर्थापत्तेरनैकान्तिकत्वमुपसंहृत्य बाधकं प्रमाणमुपसंहरति—तद्गवाश्वादय इत्यादि। § 8638

तद्गवाश्वादयः शब्दा नित्यसम्बन्धयोगिनः।
सङ्केतसव्यपेक्षत्वान्नैव गाव्यादिशब्दवत्॥
२६६७ ॥§ 8640

तदिति। तस्मात्। नित्यसम्बन्धयोगिन इति। नेति सम्बन्धः। प्रयोगरचना तु पूर्वमेव दर्शिता॥ २६६७॥ § 8641

ननु च गाव्यादिशब्दानामसाधुत्वान्नैव वाचकत्वमिष्टं परेणेत्यसिद्धो दृष्टान्तः। तथाचोक्तं कुमारिलेन—गोशब्देऽवस्थितेऽस्माकं तदशक्तिजकारिता। गाव्यादेरपिगोबुद्धिर्मूलशब्दानुसारिणीति। अयमस्यार्थः-गोशब्दे साधौ वाचके सति या गाव्यादेरसाधोः प्रयोगात् गोबुद्धिर्भवतीत्युच्यते, न सा तत एव भवति, किंतर्हि मूलम् ?, प्रधानं साधु गोशब्दमनुसृत्य। तदशक्तिजकारितादिति। गाव्यादेरिति सामानाधिकरण्येन सम्बन्धः, तस्मिन् गोशब्दे साधौ पुरुषस्योच्चारयितुमशक्तिस्तदशक्तिस्ततो जातो यस्तात्वादिव्यापारः स तथोक्तस्तेन कारितो गाव्यादिशब्दः। तथा भर्तृहरिणोक्तम्— अम्बाम्बेति यथा बालः शिक्ष्यमाणः प्रभाषते। अव्यक्तं तद्विदां तेन व्यक्तेर्भवति निश्चयः॥

२ कारिता] Correction: ; कारितात् (sic!)कारिता
८ अम्बाम्बेति] Correction: ; अ(ग ?)वाश्वेति (sic!)अम्बाम्बेति

एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते। तेन साधुव्यवहितः कश्चिद-र्थोऽनुमीयते॥ इति। अत इदमाह—गोशब्देऽवेत्यादि। § 8642

गोशब्देऽवस्थिते योग्ये तदशक्तिजकारिता।
गाव्यादेरपि गोबुद्धिर्मूलशब्दानुसारिणी॥
२६६८ ॥§ 8644

तन्नैवमित्यादिना प्रतिविधत्ते। § 8645

तन्नैवं शनकादीनां(?) संस्कृतानवबोधनात्।
मूलशब्दानुसारेण कथमर्थगतिर्भवेत्॥
२६६९ ॥§ 8647

714/k

तस्माच्छब्दार्थसम्बन्धो नित्यो नाभ्युपगम्यते।
स तु सामयिको युक्तः सर्वथा तस्य सम्भवात्॥
२६७० ॥§ 8649

शनकादीनामिति। कैवर्त्तकादीनाम्। आदिशब्देन म्लेच्छादीनां ग्रहण-म्। तथाहि तेषां प्रत्युत संस्कृतेनैव शब्देनार्थे प्रतिपाद्यमाने व्यामोह एव भवत्यतो न मूलशब्दानुसारिणी युक्ताऽर्थगतिः॥ २६६९॥ २६७०॥ § 8650

यदुक्तम्—देशोत्सादकुलोत्सादरूपो वा प्रलयो भवेत्। इत्यादि त-त्राह—देशोत्सादेत्यादि। § 8651

देशोत्सादकुलोत्सादरूपो यः प्रलयो भवेत्।
यो वाऽव्याहतबौद्धेष्टो ब्रह्मादेरपि शङ्क्यते॥
२६७१ ॥§ 8653

तस्मिन्सम्भाव्यते वेदे ध्वस्तमूला मतिः परा।

३ कारिता] Correction : ; कारितात् (sic !)कारिता

मिथ्यामोहमदादिभ्यो विपरीता च कल्पना॥
२६७२॥§ 8655

अन्य एव भवेद्वेदः प्रतिकञ्चुकतां गतः।
इत्यप्याशङ्क्यते यावद्बाधकं न प्रकाश्यते॥
२६७३॥§ 8657

एवं मन्यते। नैवास्माभिरपि शब्दोच्छेदात्मकः प्रलयो वर्ण्यते। नाप्यनादिपुरुषः सृष्टिसंहारकारकः। किं तर्हि ? सर्वमेव जगदनादि। व्यवहारोऽप्यनादिवासनोद्भूतविकल्पपरिनिष्ठितः शाब्दः प्रवर्त्तत इति। किन्तु योऽयं भवता देशोत्सादादिरूपप्रलयो वर्णितो यश्च बौद्धैरग्न्यम्बुवायुसंवर्त्तनीयस्वभावः पर्यन्ततस्त्रिसाहस्रमहासाहस्रलोकधातुमर्यादोऽधस्ताद्वायुमण्डलावधिरुप(रि)ष्टाद्यथाक्रमं प्रथमद्वितीयतृतीयध्यानपर्यन्तः सोऽयं प्रमाणेनाबाधितत्वादव्याहतोऽशक्यनिषेधत्वाद्व(?)ह्मादेरपि शङ्क्यते, अतोऽस्मिन्द्विविधेऽपि प्रलये वेदस्य ध्वंसः सम्भाव्यते, विपरीतार्थकल्पनं च। तथा चान्य एवायं वेदः प्रतिकञ्चुकताम्—तत्प्रतिभासतां गतः, इत्याशङ्का न निवर्त्तते यावद्बाधकं प्रमाणं नोच्यते भवतेति॥ २६७१॥ २६७२॥ २६७३॥
§ 8658

स्यादेतदस्त्येव बाधकं प्रमाणम्। तथाहीदानीं तावत्सर्वत्र देशे पुरुषैर्न वेदस्य पाठादेरन्यथात्वं शक्यते कर्तुम्। अतः कालान्तरेऽपि तथाभूद्भविष्यति चेत्यध्यवस्याम इत्यत एतदाशङ्क्याह—अन्यथा करणेच्छायामित्यादि। § 8659

अन्यथा करणेच्छायामपि वर्त्तेत न ध्वनिः।
तथैव यदि वाञ्छा सा नृणां जायेत नान्यथा॥
२६७४॥§ 8661

715/k

शङ्क्येतायं तथा वेदो न ग्रन्थार्थान्यथात्मकः।
अन्यथेच्छाप्रवृत्तौ तु नाशङ्का विनिवर्त्तते॥
२६७५॥§ 8663

यदि हि सत्यामन्यथाकरणेच्छायां वेदध्वनिरन्यथा न प्रवर्त्तेत, अन्यथा करणेच्छा चोत्पादयितुं न शक्यते, तदा वेदपाठादेरन्यथात्वकरणाशक्तिः पुंसः सिद्ध्येत्। तत्रापि न सर्वपुंसां सिद्ध्यति, अदर्शनमात्रस्याप्रमाणत्वात्।

पुरुषाणामतिशयदर्शनाच्च। यावता शक्यते शं नो देवीरभिष्टय इत्यादेर्वेदवाक्यस्य पाठोऽन्यथापि कर्तुं, अर्थो वा व्याख्यातुम्। तथाहि मीमांसकनिरुक्तकारादयो बहुधा वेदार्थं विशंसन्तो दृश्यन्ते। तस्मान्न शङ्कानिवृत्तिः॥ २६७४॥ २६७५॥ § 8664

यदुक्तम्—न च क्रमस्य कार्यत्वमित्यादि परिहारोपवर्णनम्, तत्राह—नचसर्वैरित्यादि। § 8665

नच सर्वैः क्रमः पुंभिः सर्वसिद्धः प्रगृह्यते।
स्वातन्त्र्येणापि कुर्वन्ति पदवाक्याक्षरक्रमम्॥
२६७६॥ § 8667

अन्यथा कृतकः कश्चित्स्याद्ग्रन्थो वेदवन्न ते।
अनर्थग्रन्थमात्रेऽपि ध्वस्ता कृतिरतस्तथा॥
२६७७॥ § 8669

यथैवास्य परैरुक्तस्तथैवेनं विवक्षति।
इत्येषाऽनियतिस्तन्न सम्बन्धवदनादिता॥
२६७८॥ § 8671

पदानि च वाक्यानि चाक्षराणि चेति तथोक्तानि, तेषां क्रम इति विग्रहीतव्यम्। अनर्थग्रन्थमात्रेऽपीति। कृतिर्ध्वस्तेति सम्बन्धः, अविद्यमानोऽर्थो यस्य ग्रन्थस्यासौ, दश दाडिमादिवाक्यवदनर्थः, वेदविरुद्धार्थो वाऽनर्थो बौद्धादिसिद्धान्तवत्, अनर्थश्चासौ ग्रन्थश्चेति तथोक्तः। मात्रशब्देन व्याप्तिं दर्शयति। कृतिः —करणम्। तथेति। वेदवत्। अनियतिरिति। अनियमः। एष नियमो न स्यादिति यावत्। तदिति। तस्मात्॥ २६७६॥ २६७७॥ २६७८॥ § 8672

यदुक्तम्—परेणोक्तान्ब्रवीमीत्यादि तत्राह—परेणोक्तानित्यादि। § 8673

परेणोक्तान्ब्रवीमीति विवक्षा चेदृशी भवेत्।
तुल्यप्रत्यवमर्शाद्धि विभ्रमात्कर्मभेदवत्॥
२६७९॥ § 8675

कर्मभेदवदिति। सप्तम्यन्ताद्वतिः। अनेनैकप्रत्यवमर्शस्य विपक्षसम्भवोपदर्शनादनैकान्तिकतोक्ता भवति॥ २६७९॥ § 8676

716/k

स्यादेतद्विभ्रमत्वमस्य कथं सिद्धमित्याह—परेणोक्तास्त्वित्यादि। § 8677

परेणोक्तास्तु नोच्यन्ते वैलक्षण्यात्स्वरादिभिः।
नच व्यञ्जकधर्मोऽयं वर्णात्मत्वेन दर्शनात्॥
२६८० ॥§ 8679

ततः प्रतिनरं वर्णा भिन्ना दृष्टा घटादिवत्।
अतो भेदे सुविस्पष्टे तच्चिह्नं किं निषिध्यते॥
२६८१ ॥§ 8681

स्वरादिभिरिति। उदात्तादिभिः। आदिशब्देन द्रुतमध्यविलम्बितादिपरिग्रहः।न च व्यञ्जकधर्मोऽयमिति। स्वरादिः। कुतः ?। वर्णात्मत्वेन तस्य स्वरादेर्दर्शनात्। सिद्धत्वादित्यर्थः। तच्चिह्नमिति। तस्य वर्णभेदस्य चिह्नं तच्चिह्नम्, तत्किमिति निषिध्यते न चान्यच्चिह्नमस्ति चे त्यनेन॥ २६८०॥ २६८१॥ § 8682

जात्या यथा घटादीनामित्यादावाह—प्राक्केत्यादि। § 8683

प्राक्क जात्या घटादीनां व्यवहारोपलक्षणम्।
निषिद्धं तदसत्त्वेन व्यक्त्या च तदयोगतः॥
२६८२ ॥§ 8685

प्रागिति। सामान्यपरीक्षायाम्। तदसत्त्वेनेति। तस्या जातेरसत्त्वेन। सत्यपि सत्त्वे व्यक्त्या घटादिलक्षणायाः सह तस्या जातेरनुपकार्याया अयोगतोऽसम्बन्धादयुक्तं तया व्यवहारोपलक्षणम्॥ २६८२॥ § 8686

तेन जातिद्वारेण यदेतत्समुपकल्पितं तत्सर्वमसङ्गतमिति दर्शयति—ताल्वादिजातयस्तस्मादित्यादि। § 8687

ताल्वादिजातयस्तस्मात्सर्वपुंस्वव्यवस्थिताः।
नातो वक्ता ध्वनींस्ताभिरुप(ल)क्ष्य निरस्यति॥
२६८३ ॥§ 8689

यदुक्तम्— तेषां च जातयो भिन्नाः शब्दाभिव्यक्तिहेतवः इत्यादि, तत्राह—तन्नेत्यादि। § 8690

तन्न तज्जातयो भिन्नाः शब्दाभिव्यक्तिहेतवः।
यावद्वर्णं प्रवर्तन्ते व्यक्तयो वा तदन्विताः॥
२६८४ ॥§ 8692

तदिति। तस्मात्॥ २६८४॥ § 8693

यदप्युक्तं तत्र ताल्वादिसंयोगेत्यादि, तत्राह—तत्र ताल्वादीत्यादि। § 8694

तन्न ताल्वादिसंयोगविभागक्रमपूर्वकम्।
ध्वनीनामानुपूर्व्यं ते जात्या चोभयनित्यता॥
२६८५ ॥§ 8696

717/k

यदप्युक्तं यथैव भ्रमणादीनामित्यादि, तत्र यथा न भ्रमणादीनामित्यादिना दृष्टान्तासिद्धिमाह। § 8697

यथा न भ्रमणादीनां भागा जात्युपलक्षिताः।
क्रमानुवृत्तिरेवं नो ताल्वादिध्वनिवर्णभाक्॥
२६८६ ॥§ 8699

जातेर्निरस्तत्वादिति। (भावः)॥ २६८६॥ § 8700

यदुक्तम्—व्यक्तीनामेव वेत्यादि, तत्राह—व्यक्तिनामपीत्यादि। § 8701

व्यक्तीनामपि नो सौक्ष्म्याज्जातिधर्मावधारणम्।
तद्वशेन न वर्णानां व्यापित्वेऽपि क्रमग्रहः॥
२६८७ ॥§ 8703

यदुक्तम्—तद्वशेनेति। तत्राह—तद्वशेनेत्यादि॥ २६८७॥ § 8704

यदप्युक्तं ध्वनिगुणानित्यादि, तत्रोच्यते—तन्नेत्यादि। § 8705

तन्न ध्वनिगुणान्सर्वान्नित्यत्वेन व्यवस्थितान्।

वर्णा अनुपतन्तः स्युरर्थभेदावबोधिनः॥
२६८८॥§ 8707

यदुक्तम्— तेषां च जातयो भिन्नाः शब्दाभिव्यक्तिहेतवः इत्यादि, तत्राभ्युपगम्य जातिदूषणमाह—अन्यच्चेत्यादि। § 8708

अन्यच्च जातयो भिन्नाः शब्दाभिव्यक्तिहेतवः।
यावद्वर्णं प्रवर्तन्ते व्यक्तयो वा तदन्विताः॥
२६८९॥§ 8710

इति व्यञ्जकसद्भावान्नित्यं शब्दोपलम्भनम्।
अतो व्यक्तिक्रमात्माऽपि युक्तो वर्णक्रमो न ते॥
२६९०॥§ 8712

अयं च निपातसमुदायो वाक्योपन्यासे द्रष्टव्यः। इतिशब्दो हेतौ। तेनायमर्थो भवति, त(य ?)स्माज्जातयो....शब्दाभिव्यक्तिहेतवः स्थितास्तेन ....शब्दोपलम्भो ....नित्यं प्राप्नोति। व्यक्तेः क्रमाभावात्तदात्मा...न युक्तः........व्यक्तमेवा....इति ॥ २६८९॥ २६९०॥ § 8713

तत्र जातिव्यक्त्योः सम्बन्धमभ्युपगम्य दोषमाह—व्यक्तिसम्बन्धरूपाणामित्यादि। § 8714

718/k

व्यक्तिसम्बद्धरूपाणां जातीनां च व्यवस्थितौ।
व्यक्तीनामपि नित्यत्वं दुर्वारमनुषज्यते॥
२६९१॥§ 8716

जातिसम्बन्धरूपाणां व्यक्तीनां वा व्यवस्थितौ।
जातीनामप्यनित्यत्वमकामस्यापि ते भवेत्॥
२६९२॥§ 8718

६ स्थितास्तेन] इत आरभ्य २७०६ श्लोकव्याख्यानं यावत्, आदर्शपुस्तके तत्र तत्र बहूनि वाक्यान्यलाभान्नोल्लिखितानि। वाक्यपूरणावकाशमात्रं प्रदत्तमस्ति। आदर्शान्तरं च नोपलभामहे। येन पूरयेम। नाप्यवसरोऽत्र पौर्वापर्यपर्यालोचनया वाक्यपूरणाय। यत् पदे पदे वाक्यविभ्रंशः। तत्प्रज्ञाबलमात्रेण पूरणं दुर्घटमिति क्वचित्क्वचिद्यथाऽऽदर्शं प्रकाश्यते।

द्विष्ठत्वात्सम्बन्धस्य, जातीनां नित्यत्वाभ्युपगमाच्च तत्सम्बन्धस्वभावानां व्यक्तीनामपि नित्यत्वं प्राप्नोति। अन्यथा हि जातीनां तत्सम्बन्धस्वरूपता न स्यात्। तथा व्यक्तीनामनित्यत्वाभ्युपगमात्तत्सम्बन्धस्वरूपाणां जातीनामप्यनित्यत्वं प्राप्नोति। बहि....स्व च स्वरूपेणव्यक्तीनामनित्यतासेत्स्यति यदि तत्सम्बन्धादीनां जातीनामप्यनित्यता भवेत्। अन्यथा हि द्वितीयसम्बन्धिन्यविकले सति न युक्तमपरस्यवैकल्यं सम्बन्धस्वभावहानिप्रसङ्गात्॥ २६९१॥ २६९२॥ § 8719

दूषणान्तरं पूर्वोक्तं वारयन्नाह—अभिव्यक्तेरयोग इत्यादि। § 8720

अभिव्यक्तेरयोगे च पुरस्तादुपपादिते।
इत्थं प्रतायमानाः स्युर्वर्णास्ते नावबोधकाः॥
२६९३॥§ 8722

त इति व्यक्त्यंतस्य (?)॥ २६९३॥ § 8723

यदुक्तं कालश्चैको विभुर्नित्य इत्यादि, तत्राह—कालोऽपीत्यादि। § 8724

कालोऽप्येको विभुर्नित्यः पूर्वमेव निराकृतः।
वर्णवत्सर्वभावेषु व्यज्यते नच केनचित्॥
२६९४॥§ 8726

वर्णेषु व्यज्यमानस्य नास्य प्रत्यायनाङ्गता।
अन्याविशेषान्नान्यत्र सद्भावाच्चास्य नित्यता॥
२६९५॥§ 8728

तदानुपूर्वी वर्णानां ह्र(?)स्वदीर्घप्लुताश्च ये।
कालस्य प्रविभागास्ते न युक्ता ध्वन्युपाधयः॥
२६९६॥§ 8730

तस्मान्न पदधर्मोऽस्ति नित्यस्ते कश्चिदीदृशः।
तेनानित्यं पदं सिद्धं वर्णानित्यत्ववादिनाम्॥
२६९७॥§ 8732

परधर्मेऽपि चा(ना?)ङ्गत्वं भवेदश्वजवादिवत्।
यदि व्यक्तिः प्रकल्पेत व्यञ्जकैः प्रत्ययैरिह॥
२६९८॥§ 8734

पूर्वमेवेति। षड्पदार्थपरीक्षायाम्। व्यज्यते नच केनचिदिति। असत्त्वादेव,सत्त्वेऽपि नित्यस्य व्यक्तेर्नि(य)तत्वात्। अन्याविशेषादिति। अन्यस्माद विशेषो अन्याविशेषः। तथाहि—बीजाङ्कुरलतादिषु यो व्यज्यते काल-
719/k स्यात्माततस्तस्य वर्णेषु व्यज्यमानस्य कालात्मनो न कश्चिद्विषयोऽ(शेषोऽ?)स्ति। एकस्य ....अन्यत्र सद्भावात्तस्य नित्यात्....योगादिति....(त) दिति। तस्मात्।न युक्ता इति। कालस्यासत्त्वात्, सत्त्वेऽप्यभ्युपगतमविभागत्वमिति। परधर्मेऽपीत्यादावाह—परधर्मेऽपीत्यादि। शेषं सुबोधम्॥ २६९४॥ २६९५॥ ॥ २६९६॥ २६९७॥ २६९८॥ § 8735

नित्यतायां तु सर्वेषामर्थापत्तिरपाकृता।
अर्थप्रतीतिरूपत्वमनित्येषु हि साधितम्॥
२६९९॥§ 8737

यो यद्विवक्षासम्भूतविवक्षान्तरतस्थि(स्त ?)तः।
वर्ण उत्पद्यते तस्य श्रुतिस्तत्समनन्तरम्॥
२७००॥§ 8739

पूर्ववर्णविदुद्भूतसंविन्नातिद्रुतश्रुतिः।
सोऽपेक्ष्य तत्स्मृतिं पश्चात्कुरुते स्मृतिमात्मनि॥
२७०१॥§ 8741

तत्समुत्थापकग्राहिज्ञानानि प्रति जन्यता।
हेतुता वाऽनुपूर्वीयं वर्णेषु पुरुषाश्रया॥
२७०२॥§ 8743

अतः प्रतिपदं भिन्ना वर्णा इति परिस्फुटम्।
दमो मदो लता ताल इत्यादिक्रमभेदतः॥
२७०३॥§ 8745

ईदृशेन क्रमेणैते त्वर्थभेदोपपादकाः।
अतएव निरर्थेह स्फोटस्यापि प्रकल्पना॥
२७०४॥§ 8747

अर्थापत्तिरपाकृतेति। तथाहि हस्तकम्पादेरित्यादिना व्यभिचारस्य बाधकस्य च प्रमाणस्य वर्णनात्। अनित्येषु...........अत्यन्तत्वेऽपि न मन्यते तुल्यप्रत्ययश्च ....प्रतिपदं भिन्नत्वा(?)निमित्तमुपद्रोक (अनित्या) वर्णाः शब्दो (सरो ?) रस इत्यादौ प्रतीतिभेदनिबन्धनं युक्ताः। नतु दि (नि?)त्याः, तेषां सर्वत्रैकरूपत्वात्। न चानुपूर्वं तेभ्यो व्य(त्त्य)न्तरमित्येतत्सर्वं प्रतिपादयन्नाह—यो यद्विवक्षेत्यादि।अयमत्र तावत्समुदायार्थः। वक्तृसन्ताने प्रतिवर्णं तत्समुत्थापकानि ज्ञाता(ना?)निपूर्वपूर्वसमनन्तरप्रत्ययजन्या(नि विवक्षातो भवन्ति, ततश्च वर्णाः,) तेच श्रोतृसन्तानिपूर्वपूर्वग्राहिविज्ञानसहकारिणः स्वविषयाभिज्ञानानि क्रमवत्तति(र्तीनि?) जनयन्ति साक्षात्, ततश्च पश्चादावा(त्स्वस्व?)विषयां (स्मृतिं) क्रमभाविनीं जनयन्ति पारम्पर्येण। ततश्च वक्तृसन्तानभावीनि स्वसमुत्थापकानि ज्ञाना न (720/k न्य?) पेक्षया (क्ष्य ?) तेषां जन्यता, श्रोतृसन्तानभा (वीनि) वान्य (तान्य ?) (पेक्ष्य हेतुता, सैव तेषामानुपूर्वी, ता (ना ?)न्या। कारणकार्यभेदाच्च प्रतिपदं वर्णानां भिन्नस्वभावत्वात्सरो रस इत्यादौ प्रतीतिभेदो युज्यते, न तु नित्यानाम्, तेषां सर्वदा सर्वत्रैकरूपत्वात्। नाप्यानुपूर्वी तेभ्योऽर्थान्तरभूतेष्टा। अर्थान्तरत्वेऽपि सम्बन्धासिद्धेरित्यभिप्रायः। अवयवार्थस्तू (च्यते) वर्ण उत्प(द्य) त इति सम्बध्यते। सदा सम य (इ?) त्यादौ सकारादेः परोऽकारादिः, (सकारविवक्षा)सम्भूतवितथा (वक्षा ?)न्तरतस्ततः (उत्पद्यते।) यस्य सकारादेर्विवक्षा यद्विवक्षा, ततः सम्भूतं यद्विवक्षान्तरं तत्तथोक्तम्। एतदुक्तं भवति। वक्तृसन्ताने पूर्वपूर्ववर्णसमुत्थापकविवक्षासम्भूतं यदुत्तरोत्तरं विवक्षान्तरम्, तत उत्तरोत्तरो यो वर्ण उत्पद्यते स स्मृतिं कुरुत इति वक्ष्यमाणेन सम्बन्धः। एवं तावद्वक्तृसन्तानवर्त्तिव(र्णसमुत्थापक (विवक्षाव) गा(श्रा ?)द्वर्णानां (जन्यत्वं प्रतिपाद्य श्रोतृ) सन्तानवर्त्तिज्ञानं इ(प्र ?)ति कारणत्वं प्रतिपादयति—तस्ये(ति।) ग(य ?) इति यो निर्दिष्टः स सम्बध्यते। तस्य श्रुतिः—उत्पद्यत इति सम्बन्धः। समनन्तरमिति। अव्यवधानेन। एवं श्रोतृज्ञानहेतुत्वं प्रतिपाद्य साम्प्रतं स्मृतिहेतुत्वं प्रतिपादयति। पूर्वेति। पूर्ववर्णानां वित्—ज्ञानम्, तेन उद्भूता सन्तिरनुगम (संवित् —अनुभवो ?) यस्य स तथोक्तः। नातिद्रुत-

श्रुतिरिति। द्रुतश्रुतेः स्मृतिजनता समर्थत्वात्। स इति। उत्तरोत्तरो वर्णः। तु स्मृति(तत्स्मृतिम्—?) पूर्वपूर्वस्मृतिम्। (अपेक्ष्य—तत्सहकारेणेत्येत-त्, स्मृतिम्—स्वस्वविषयाम्) समुत्थापकानि चग्राहीणि चेति द्वन्द्वः। तेषां वर्णानां, तानि वा समुत्थापकग्राहीणि, तत्स(मुत्थापकग्राहीणि (इति) पश्चात् (तत्पुरुषः कर्मधारयो वा। समुत्थापकान्यंपेक्ष्यजन्यतेति।) ग्राहीण्यनुभवस्मृतिज्ञात्यन(रूपाण्य ?) पेक्ष्य हेतुतेति। एवमानुपूर्वीम-र्थान्तरभूतां निराकृत्य वैयाकरणाद्युपकल्पितं ध्वनिभ्योऽर्थान्तरभूतं वाचकं शब्दात्मानं स्फोटमन्येति(द्य नि ?)राचिकीर्षन्ना(ह)—अत एवेत्यादि॥ २६९९॥ ॥ २७००॥ २७०१॥ २७०२॥ २७०३॥ २७०४॥ § 8748

स ह्यर्थप्रतिपत्त्यर्थं शाब्दिकैः परिकल्पितः।
वर्णा एव च तच्छक्ता इत्यनर्थाऽस्य कल्पना॥
२७०५॥§ 8750

721/k

दृश्यस्यादृष्टितश्चास्य नास्तिताऽध्यवसीयते।
अदृश्यत्वे तु नैवायं लिङ्गवज्ज्ञापको भवेत्॥
२७०६॥§ 8752

(..) नित्यो यथा कश्चिद्वैभावि(षि?)कै..................इति दर्शयति—दृश्यस्येत्यादि। नहि व-र्णेभ्यो व्यतिरिक्तो(नित्यः)स(अ?)कलः शब्दात्मा श्रो(श्रौ ?)त्रे चे (त)सि प्रतिभासमानः समालक्ष्यते। यत उपलब्धिल...........भावी (भवेत् ?)। प्रत्युत तस्य नास्ति(ता) सिद्ध्येत्। अथ द्वितीयः पक्षस्तथापि भावधर्मो वा हेतुर्भवेदभावधर्मो वा उभयधर्मो वेति विकल्पाः। आद्ये पक्षे स्फोटाख्य-धर्मिधर्मो वा हेतुर्भवेत्, अन्यधर्मिधर्मो वा। तत्र तस्यैव स्फोटाख्यस्य धर्मिणोऽसिद्धत्वान्न..........तद्धर्मस्तावद्धेतुः। अन्यधर्मोऽपि न हेतु(र)प-क्षधर्मत्वात्। यथा बाहुपदं चय(घट?)स्यानित्यत्वादौ साध्ये। अभावधर्मोऽपि न भवति। तस्य विपरीतसाधकत्वात्।उभयधर्मोऽपि न भवति। तस्य व्य-भिचारित्वात्। स्वभावहेतोर्वा तस्य सिद्धिर्भवेत्कार्यहेतोर्वा। न तावदाद्यः पक्षः, तस्यातीन्द्रियत्वात्तत्स्वभावासिद्धेः। सिद्धौ वा व्यर्थो हेतुः पर्येषणे, यत्तत्स्व-भावस्य सिद्धत्वात्। तदर्थत्वाच्च प्रयासस्य। नापि द्वितीयः पक्षोऽतीन्द्रियेण सह कार्यकारणभावासिद्धेः। अथापि स्यात्—यथा श्रोत्रादिज्ञानस्य कादाचित्क-त्वेन कारणान्तरसापेक्षत्वसिद्धौ सामर्थ्याच्छ्रोत्रादेरिन्द्रियस्य सिद्धिर्भवति, त-थाऽत्राप्यर्थप्रतीतिं धर्मिणीं कृत्वा, वर्णाविशेषेऽपि सरो रस इत्यादावर्थप्र-

तीतिभेदात्स्फोटाख्यं कारणान्तरं कल्पयिष्याम इति। एतदप्यसम्यक्। वर्णाविशेषस्यासिद्धत्वात्। तथाहि साम्प्रतमेव प्रतिपादितम्—वर्णा एव प्रतिपदं भिन्नाः कार्यकारणभेदादर्थप्रतीतौ समर्था इत्यनर्थाकल्पनेति। एवमनुमेयत्वे दोषा वाच्या इत्यभिप्रायः। अथापि स्यान्नासावनुमेयः, किं तर्हि ?, अत्यन्तादृश्य इत्याह—अदृश्यत्वे तु नैवायमिति। यथा लिङ्गमज्ञातं ज्ञापकं न भवति तद्वदयमपि स्यादज्ञातत्वात्॥ २७०५॥ २७०६॥ § 8753

सत्तामात्रेण तज्ज्ञानं हेतुभावव्यवस्थितेः।
तस्य ज्ञापकतेष्टा चेन्नेत्रवत्सर्वदा भवेत्॥
२७०७ ॥§ 8755

स(ङ्केता)नवबोधेऽपि वर्णानामश्रुतावपि।
तद्भाव्यर्थेषु विज्ञानं शक्तकारणसन्निधेः॥
२७०८ ॥§ 8757

722/k

तथाहि नित्यसत्त्वोऽयं नचापेक्षाऽस्य काचन।
ध्वनिसंकेतवर्णैश्च तद्व्यक्तिर्नाप्यदर्शनात्॥
२७०९ ॥§ 8759

ज्ञानं हि व्यक्तिरित्याहुस्तज्ज्ञानं नच विद्यते।
ततो निरर्थकैवास्य व्यञ्जकस्यापि कल्पना॥
२७१० ॥§ 8761

अथ सत्तामात्रेण चक्षुरादीन्द्रियवदज्ञातोऽप्यर्थप्रतीतिहेतुर्भवेत्। एवं तर्हि तद्भावि ज्ञानं सर्वदा भवेत्। तथा सङ्केतग्रहणादिकमन्तरेण तद्भावि ज्ञानं स्यात्।एतदेव सङ्केतेत्यादिना प्रदर्शयति। तत्रोपपत्तिमाह—तथाहीति। अथापि स्यात् —सङ्केताभिव्यक्त एवासावर्थप्रतीतिहेतुरिष्टो न सत्तामात्रेण, तेन न भवति यथोक्तदोषप्रसङ्ग इत्याह—ध्वनिसङ्केतवर्णैरित्यादि। अदर्शनादिति। अनुपलब्धेः।अदृश्यत्वेनाभिमतत्वाच्च। एतदेव ज्ञानं हीत्यादिना दर्शयति॥ २७०७॥ २७०८॥ ॥ २७०९॥ २७१०॥ § 8762

स्यादेतत्—भासमानो न लक्ष्यत इत्येतदसिद्धम्। तथाहि पूर्वपूर्ववर्णाहितसंस्कारायामावृत्तसंस्कारपरिपाकायां बुद्धौ शब्दोऽकलः प्रतिभासत एवेत्याह—नादेनेत्यादि। § 8763

नादेनाहितबीजायामन्त्येन ध्वनिना सह।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवभासते॥
२७११॥§ 8765

इत्येतदपि तेनात्र निर्निमित्तं प्रकल्पितम्।
तस्यामपि न शब्दोऽन्यो भासमानो हि लक्ष्यते॥
२७१२॥§ 8767

आवृत्तः—सञ्जातः सर्वबुद्ध्याहितः संस्कारपरिपाको यस्यां बुद्धौ सा तथोक्ता।निर्निमित्तमिति। वर्णा एव हि यथानुभवं पश्चात्सङ्कलनाप्रत्ययेन स्मार्त्तेनावसीयन्त इत्यभिप्रायः। तथाहि—नैवान्त्यवर्णप्रतिपत्तेरूर्ध्वमन्यमकलं शब्दात्मानमुपलक्षयामो नापि स्वयमयं वक्ता विभावयति। केवलमेवं यदि स्यात्साधु मे स्यादिति कल्याणकामतामूढमतिरत्या(न्त्या ?)यां बुद्धौ समाप्तकालः शब्दो भातीति स्वप्नायते॥ २७११॥ २७१२॥ § 8768

एवं तावन्नित्यपक्षे दूषणमुक्तम्। इदानीं नित्यानित्यपक्षयोरपि साधारणं दूषणमनवयवपक्षे प्राह—जन्यतामित्यादि। § 8769

जन्यतां व्यज्यतां वाऽपि ध्वनिभिः क्रमभाविभिः।
येऽपि स्फोटस्य मन्यन्ते क्रमस्तेषां विरुध्यते॥
२७१३॥§ 8771

723/k

नहि क्रमेण युज्येते व्यक्तिजाती निरंशके।
एकरूपाबहिर्भावात्ते स्यातां सर्वथैव हि॥
२७१४॥§ 8773

वैभाषिका हि केचित्पदकार्याभिधानेन वाक्यस्फोटमनित्यत्वाज्जन्यं प्रतिपन्नाः।निरंशक इति। निरवयवे वस्तुनि। एकरूपाबहिर्भावादिति। एकस्माद्रूपाज्जाताद्व्यक्ताद्वाऽजाताव्यक्ताभिमतस्यापि रूपस्याबहिर्भावात्। ते—

जातिव्यक्ती सर्वस्यैव स्याताम्। ततश्च शेषवर्णादिप्रयोगवैयर्थ्यं स्यात्॥ २७१३॥ २७१४॥ § 8774

सावयवपक्षेऽपि दूषणमाह—सांशत्वेऽपीति। § 8775

सांशत्वेऽपि यथा वर्णाः क्रमेण प्रतिपादकाः।
स्फोटांशा अपि किं नैवं किमदृष्टाः प्रकल्पिताः॥
२७१५॥§ 8777

ते हि स्फोटांशाः प्रत्येकमनर्थका वा स्युः सार्थका वा। प्रथमे पक्षे क्रमभावित्वाद्वर्णात्स(त्म ?)वदप्रतिपादकत्वप्रसङ्गः। कल्पितं च वाचकत्वं स्यात्, अताद्रूप्ये ताद्रूप्यात्। तथाहि—अर्थवानेकात्मा वाक्यमुच्यते, वा(ना ?)वयवाः स्वयमनर्थकाः, तेषु स आत्मा कल्पनारोपितः स्यात्, माणवकादिषु सिंहतादिवत्। सति च कल्पिते वाचकत्वे वरं वर्णभागा एव सन्तु वाचकाः किमदृष्टाः स्फोटांशाः कल्प्यन्त इति। अथ सार्थकत्वं तदाऽनेककल्पना निरर्थिका, तथाहि—परिसमाप्तार्थं शब्दरूपं वाक्यमुच्यते, प्रत्येकं चेदर्थवन्तोऽवयवाः स्युस्तदा तावन्त्येव तानि वाक्यानि ज्ञा(जा?)तानीति नैका(कोऽ ?) ने(ने?)कावयवात्मा सिध्यति। एकावयवप्रतिपत्तौ च सत्यां वाक्यार्थप्रतिपत्तिप्रसङ्गः। यथोक्तम्— प्रत्येकं सार्थकत्वेऽपि मिथ्याऽनेकत्वकल्पना। एकावयवगत्या च वाक्यार्थप्रतिपद्भवेत्॥ इति॥ २७१५॥ § 8778

यदुक्तम्—नहि क्रमेण युज्येते जातिव्यक्ती निरंशकइति, अत्र परस्य परिहारमाशङ्कते—जातावित्यादि। § 8779

जातौ व्यक्तौ कृतायां चेदेकेन ध्वनिना सकृत्।
नितरां व्यक्तिसिद्ध्यर्थं वर्णानन्यान्प्रयुञ्जते॥
२७१६॥§ 8781

यतो दुरवधाराऽस्य प्रकृतिः सा तथा कृता।
समानव्यक्तिकैर्वर्णैर्भूयोऽपि व्यज्यते परैः॥
२७१७॥§ 8783

यद्यप्येकेन ध्वनिना जातिर्व्यक्तिर्वा सर्वात्मना स्फोटस्य कृता, तथापि नोत्तरध्वनिप्रयोगवैयर्थ्यं, तस्य स्पष्टव्यक्त्यर्थत्वात्, यथाहि श्लोक एव पुनः पुनराव र्त्यमानो व्यक्तीभवति, न च सकृदुच्चारणात्, नतु पुनः पुन- 724/k
रावृत्त्या तस्य विशेषान्तरमाधीयते, अथ च न पुनरावृत्तेर्वैयर्थ्यमेवमिहापि

नोत्तरध्वनिवैयर्थ्यं भविष्यति। एतदेव दर्शयति—यत इत्यादि। दुरवधारेति। अवधारयितुमशक्या ॥ २७१६॥ २७१७॥ § 8784

तस्यैवेत्यादिना प्रतिविधत्ते। § 8785

तस्यैवान्यस्य वैकस्य किं नावृत्तौ पुनः पुनः।
व्यक्तिरावर्त्तते तस्य नन्वेवमविशेषतः॥
२७१८॥§ 8787

नन्वित्यामन्त्रणे। तस्यैव—प्रथमोच्चरितस्य वर्णस्य, अन्यस्य वा—तदन्तर्गतस्य कस्यचिदेकस्य, पुनः पुनरावृत्त्या किं नाभिव्यक्ति क्रियते। नहि तेनापादिता सती व्यक्तिर्नापादिता भवेत्। तथाहि तद्व्यक्त्यावर्त्तनमात्रफलान्युत्तरोत्तरवर्णोच्चारणानि, समानशक्तिकत्वात्सर्वेषां, तच्चावर्त्तनमेकेनैव पुनः पुनरावर्त्त्यमानेन कर्तुं शक्यत इति शेषवर्णोच्चारणवैयर्थ्यम्। नाप्युत्तरोत्तरवर्णानां भिन्नशक्तिकत्वमभ्युपगन्तव्यम्। निरंशके विशेषान्तरस्याधातुमशक्यत्वाद्विशेषान्तरकरणासम्भवे न्न(च ?) भिन्नशक्तिकल्पनावैयर्थ्यप्रसङ्गात्॥ २७१८॥ § 8788

एतच्च सता(त्या ?)मभिव्यक्तौ सर्वं सम्भवेत्सैव तु न सम्भवतीति दर्शयन्नाह—विषयेन्द्रियेत्यादि। § 8789

विषयेन्द्रियसंस्काररूपा व्यक्तिश्च वर्णवत्।
अस्यापि प्रतिषेद्धव्या तदाभासेऽपि चेतसि॥
२७१९॥§ 8791

वर्णवदिति। यथा वर्णेषु विज्ञानजननयोग्यायोग्यस्वभावविकल्पेन विषयेन्द्रियसंस्काररूपाऽभिव्यक्तिर्दूषिता तथेहापि दूषणीयेत्यर्थः। तदाभासेऽपीति।स्फोटाभासेऽपि। अयं चाभ्युपगमवादः। एतदुक्तं भवति—यदि हि वर्णव्यतिरेकेणापरः स्फोटाख्यः शब्दात्माऽवभासेत ततोऽस्याभिव्यक्तिः सम्भवेद्व्यक्तेरुपलब्धिरूपत्वात्। यावता नावभासत इति पूर्वमावेदितम्—अवभासतां नाम, तथाऽपि प्रकृत्योपलभ्यानुपलभ्यस्वभावस्योभयथाऽप्यभिव्यक्तिर्न युक्तेति॥ २७१९॥ § 8792

तस्मादित्यादिनोपसंहृत्य विनाऽपि स्फोटेनार्थप्रतिपत्तेरुपपत्तिक्रमं दर्शयति। § 8793

तस्मात्प्रत्यक्षतः पूर्वं क्रमज्ञानेषु यत्पदम्।

समस्तवर्णविज्ञानं तदर्थज्ञानकारणम्॥
२७२०॥§ 8795

725/k

ननु च क्रमवर्त्तिनो हि वर्णाः क्रमेणैव चानुभूताः, यथाऽनुभवं च स्मरणं, तत्कथं समस्तवर्णनिर्भासि स्मार्त्तज्ञानमेकं युज्यते स्फोटमन्तरेण, न चाक्रमे ज्ञाते क्रमिणांवर्णानां प्रतिभासो युक्त इत्याशङ्क्याह—अन्त्यवर्णे हीत्यादि। § 8796

अन्त्यवर्णे हि विज्ञाते सर्वसंस्कारकारितम्।
स्मरणं यौगपद्येन सर्ववर्णेषु जायते॥
२७२१॥§ 8798

अनेनैव(न चै ?) तदाह—प्रथममनुभवस्ततस्तत्समनन्तरभावीनि स्मरणानि यथानुभवं क्रमेणैव जायन्ते, ततः स्मरणेभ्यः उत्तरकालं युगपत्समस्तवर्णाध्यवसायि समुच्चयज्ञानमपरं स्मार्त्तमुत्पद्यते, यथा परिदृष्टार्थाध्यवसादित्वात्॥ २७२१॥ § 8799

एतच्च सर्ववादिनां प्रसिद्धम्, न मयैव कल्पितमिति दर्शयति—सर्वेषु चेति। § 8800

सर्वेषु चैतदर्थेषु मानसं सर्ववादिनाम्।
इष्टं समुच्चयज्ञानं क्रमज्ञातेषु सत्स्वपि॥
२७२२॥§ 8802

एतदिदि। समुच्चयज्ञानम्॥ २७२२॥ § 8803

एतच्च युक्त्युपेतत्वादवश्याभ्युपेयमिति दर्शयति—नचेदित्यादि। § 8804

नचेत्तदभ्युपेयेत क्रमदृष्टेषु नैव हि।
शतादिरूपं जायेत तत्समुच्चयदर्शनम्॥
२७२३॥§ 8806

यदि हि सर्वमेव स्मरणं यथानुभवं क्रमेणैवं जायते, तदा क्रमानुभूतेषु शतादिषु युगपच्छतादिविकल्पोन स्यात्। शतकोटयादिविकल्पानां चोत्पत्तिकाले भेदो न भवेत्॥ २७२३॥ § 8807

तेनेत्युपसंहरति। § 8808

तेन श्रोत्रमनोभ्यां स्यात्क्रमाद्वर्णेषु यद्यपि।
पूर्वज्ञानं परस्तात्तु युगपत्स्मरणं भवेत्॥
२७२४॥§ 8810

यद्येवं समुच्चयज्ञानमेवार्थप्रतीतिहेतुः स्यात्, न ते वर्णाः, तेषां चिरनिरुद्धत्वात्, न चैतद्युक्तम्, यस्माच्छब्दादनन्तरमर्थप्रतीतिर्भवन्तीत्याकुमारमेतत्प्रतीतमित्याशङ्कयाह—तदारूढा इत्यादि। § 8811

तदारूढास्ततो वर्णा न दूरार्थावबोधनात्।
शब्दादथ मतिस्तेन लौकिकैरभिधीयते॥
२७२५॥§ 8813

726/k

तस्मिन्समुच्चयज्ञाने आरूढास्तदारूढाः। लौकिकैरिति। स्वार्थतद्धितविधानम्॥ २७२५॥ § 8814

नन्वेवमपि तेषां चिरनिरुद्धत्वादत्यन्तासत्त्वमेवेति कथं तदारोहणं भवेदित्याशङ्क्याह—आकारवतीत्यादि। § 8815

आकारवति विज्ञाने सर्वमेतच्च युज्यते।
अन्यथा हि विनष्टास्ते भासेरन्स्मरणे कथम्॥
२७२६॥§ 8817

निराकारे कस्मान्न युज्यत इत्याह—अन्यथा हीत्यादि। ततश्च यदेतत्— अन्त्यवर्णे हि विज्ञाते इत्यादिना कुमारिलेन स्फोटवादिनं प्रति समुच्चयज्ञानं वर्णितम्, तदस्मन्मत एव युज्यते न तु भवतां मीमांसकानां निराकारवादिनां मत इत्युक्तं भवति॥ २७२६॥ § 8818

ननु च मीमांसकानामपि युज्यत एव, नहि तेषां मतेन वर्णा विनष्टाः, येन न भासेरन्। किं तर्हि ?। तिरोभूताभिव्यक्तयः सन्त्येवेत्येतदथेत्यादिनाऽऽशङ्क्यनेत्यादिना परिहरति। § 8819

अथ वर्णास्तिरोभूतव्यक्तयो विदिताः पुरा।
स्मर्यन्तेऽवस्थिता एव न स्पष्टाभप्रसङ्गतः॥
२७२७॥§ 8821

यदि हि त एव वर्णाः पूर्वमनुभूताः सन्तः पश्चात्तिरोभूतव्यक्तयः समुच्चयज्ञानेन गृह्येरंस्तदाऽऽत्मानुभवज्ञानवत्तत्समुच्चयज्ञानं स्पष्टाभं प्राप्नोति। आकारस्य बाह्यगतत्वात्तस्य चैकरूपत्वात्। किञ्च—यदि तिरोभूतव्यक्तयः, कथं भासेरन्,व्यक्तेरुपलब्धिस्वभावत्वात्॥ २७२७॥ § 8822

अपिच—यद्यतीतस्यावस्थितिः सम्भवेत्तदैतत्स्याद्यावताऽतीतस्यावस्थित्यभावादेव न युक्तं तस्य प्रतिभासनमिति दर्शयति—अपास्ता चेत्यादि। § 8823

अपास्ता च स्थितिः पूर्वं तत्स्थितौ स्मरणं भवेत्।
वर्णानुभवविज्ञानकाल एवैकहेतुतः॥ २७२८॥§ 8825

पूर्वमिति। त्रैकाल्यपरीक्षायाम्। अत्रैव बाधकं प्रमाणमाह—तत्स्थितावित्यादि। वर्णानुभवज्ञानकाले स्मरणोत्पत्तिप्रसङ्गो बाधकं प्रमाणम्। एकहेतुत इति। अभिन्नकारणत्वात्॥ २७२८॥ § 8826

अत्र शाब्दिकाश्चोदयन्ति—यद्येको नास्ति स्फोटाख्यः शब्दात्मा तत्कथं गौरित्येकाकारा गोशब्दे बुद्धिर्भवतीति, अत आह—गौरित्यादि। § 8827
727/k

गौरित्येकमतित्वं तु नैवास्माभिर्निवार्यते।
तद्ग्राह्यैकार्थताभ्यां च शब्दे स्यादेकतामतिः॥
२७२९॥§ 8829

एका मतिरस्येत्येकमतिः, तद्भावस्तत्वम्। तद्ग्राह्यैकार्थताभ्यां चेति। तयाएकया बुद्ध्या, ग्राह्यस्तद्ग्राह्यः, एकोऽर्थः प्रयोजनं यस्य स तथोक्तः, तद्ग्राह्यश्चैकार्थश्चेति द्वन्द्वः, तयोर्भावौ तद्ग्राह्यैकार्थते, ताभ्याम्। एतदुक्तं भवति—एकबुद्धिग्राह्यत्वादेकसास्नादिमदर्थद्योतकत्वाच्चैको गोशब्द उच्यते इति॥ २७२९॥ § 8830

एकमतित्वं च न सर्वत्र सिद्धमिति दर्शयति—शैघ्र्यादित्यादि। § 8831

शैघ्र्यादल्पान्तरत्वाच्च गोशब्दे सा भवेदपि।
देवदत्तादिशब्देषु स्पष्टो भेदः प्रतीयते॥
२७३०॥§ 8833

शैघ्र्यात्—द्रुतोच्चारणात्। अल्पान्तरत्वम्—स्वल्पविच्छेदत्वम्। सेति। एका मतिः। देवदत्तादिपरे तु प्रतिवर्णं शाङ्कनया (ध्वनयः ?) स्फुटतरं विच्छेदेन प्रतीयन्त इति पक्षैकदेशासिद्धमेकमतित्वम्॥ २७३०॥ § 8834

वर्णोत्थेत्यादिना प्रमाणयति। § 8835

वर्णोत्था चार्थधीरेषा तज्ज्ञानानन्तरोद्भवात्।
येदृशी सा तदुत्था हि धूमादेरेव वह्निधीः॥
२७३१॥§ 8837

प्रयोगः—या बुद्धिर्यद्विज्ञानान्तरमुद्भाविता सा तत्समुत्थिता पारम्पर्येण, यथा धूमादिलिङ्गज्ञानाद्वह्न्यादिलिङ्गिधीः। वर्णविज्ञानानन्तरभाविनी चार्थधीरिति स्वभावहेतुः। कार्यताव्यवहारश्चात्र साध्यते। तेन साध्यसाधनयोर्भेदः॥ २७३१॥ § 8838

असिद्धत्वमस्य परिहरन्नाह—न वर्णेत्यादि। § 8839

न वर्णभिन्नशब्दाभज्ञानानन्तरभाविनी।
अर्थधीर्विद्यते तेन नान्यः शब्दोऽस्ति वाचकः॥
२७३२॥§ 8841

वर्णेभ्यो भिन्नो यः शब्दात्मा तदाभं यज्ज्ञानं तदनन्तरभाविनी न विद्यते, किं तर्हि ?, वर्णविज्ञानानन्तरभाविनी, अतो नासिद्धो हेतुः। अनेन चोपलब्धिलक्षणप्राप्तस्यानुपलम्भादभावव्यवहारोऽपि दर्शितः॥ २७३२॥ § 8842

नाप्यनैकान्तिक इति दर्शयन्नाह—कार्यतेत्यादि। § 8843

कार्यताव्यवहाराङ्गं सर्वत्रैव विनिश्चितौ।
अन्वयव्यतिरेकौ हि व्याप्तिस्तेनेह निश्चिता॥
२७३३॥§ 8845

728/k

कार्यताव्यवहारस्याङ्गम्—कारणम्, किं तत् ? अन्वयव्यतिरेकाविति। सामानाधिकरण्येन सम्बन्धः। तदन्वयव्यतिरेकानुविधायित्वमात्रमेव तत्कार्यताव्यवहृतेरङ्गं नान्यत्, अतः कार्यताव्यवहारस्य निमित्तान्तरासम्भवो बाधकं प्रमाणमिति सिद्धाव्याप्तिः॥ २७३३॥ § 8846

स्यादेतत्—माभूत्स्फोटस्य वाचकत्वं, वर्णा एव नित्याः सन्तो वाचका भविष्यन्ति, तेच नित्याः प्रत्यक्षादिप्रमाणतः सिद्धा इत्याह—अनित्येष्वित्यादि। § 8847

अनित्येष्वेव वर्णेषु वाचकत्वे प्रसाधिते।

प्रत्यभिज्ञानुमाने च निरस्ते नित्यसाधने॥
२७३४॥§ 8849

प्रत्यभिज्ञा चानुमानं चेति प्रत्यभिज्ञानुमाने। क्वचित्प्रत्यभिज्ञानानुमानमिति पाठः, तत्र समाहारद्वन्द्वोऽपि विधेयः। सहितशब्दलोपाद्विशेषणसमासो वा॥ २७३४॥ § 8850

स्ववाक्यादिविरोधश्चेत्यादावाह—स्ववाक्यादिविरोधानामित्यादि। § 8851

स्ववाक्यादिविरोधानामज्ञानाच्चोदना कृता।
नित्यपक्षे तु सर्वे ते भवन्ति भवतां यतः॥
२७३५॥§ 8853

नित्या सती न वाग्युक्ताद्योतिकेत्युपपादितम्।
आनुपूर्व्याद्ययोगेन नित्यं चानुपलम्भनात्॥
२७३६॥§ 8855

सर्वे त इति। स्ववाक्यादिविरोधाः। आनुपूर्व्यादीति। आदिशब्देन क्रमेण श्रुतिस्मृती गृह्येते। तथाहि नित्यत्वान्न कालकृतानुपूर्वी, नापि देशकृता व्यापित्वात्, नाप्यभिव्यक्तिकृता अभिव्यक्तेरपाकृतत्वात्। तथा ज्ञानजननेऽपि न नित्यानामुपयोगोऽस्तीति बहुधा निवेदितम्॥ २७३५॥ २७३६॥ § 8856

यदुक्तम्—वक्तव्यं कतरः (चैषकः ?) शब्दः इत्यादि। तत्राह—धर्मिभेदविकल्पेनेत्यादि। § 8857

धर्मिभेदविकल्पेन याऽऽश्रयासिद्धिरुच्यते।
सोऽनुमालक्षणाज्ञानाद्धर्मित्वं भासिनो यतः॥
२७३७॥§ 8859

अविचारप्रसिद्धोर्थो योयं ज्ञानेऽवभासते।
शनकादेरपि प्रोक्ता तावन्मात्रस्य धर्मिता॥
२७३८॥§ 8861

तत्रैव हि विवादोऽयं संप्रवृत्तः प्रवादिनाम्।

इच्छारचितभेदे तु न विवादोऽस्ति कस्यचित्॥
२७३९॥§ 8863

729/k

य एव वादिप्रतिवादिनोः प्रतिभासवशाद्धर्मी सिद्धः स एव विशेष-विवादाश्रयः, नतु स्वेच्छोपकल्पितः, तत्र विवादाभावात्, नहि स्वेच्छोप-रचितधर्मिणि धर्मविशेषंकल्पयन्कश्चिन्निवार्यत इति। भासिन इति। भास-मानस्य। एतदेव दर्शयतिअविचारप्रसिद्धोऽर्थ इत्यादि। सुगमम्॥ २७३७॥ २७३८॥ २७३९॥ § 8864

अविशेषेण धर्मिणि निर्दिष्टे यद्विशेषेण (वि)कल्पनं तदेतज्जात्युत्तरमिति दर्शयन्नाह—अत इत्यादि। § 8865

अतोऽविशेषनिर्दिष्टे विशेषेण विकल्पनम्।
सर्वस्यैवानुमानस्य प्रवृत्तिं प्रतिवाधते॥
२७४०॥§ 8867

चोदनाजनिता बुद्धिः प्रमाणं दोषवर्जितैः।
कारणैर्जन्यमानत्वादित्याद्यपि विकल्प्यते॥
२७४१॥§ 8869

नित्यनित्यार्थसम्बद्धचोदनाजनिता मतिः।
पक्षश्चेदाश्रयासिद्धिः परं प्रत्यनुषज्यते॥
२७४२॥§ 8871

नित्या चासौ स्वयं, नित्यमेवार्थेनाकृतिलक्षणेन सम्बद्धेति तथोक्ता, तया जनिता या बुद्धिः, सा यदि पक्षः, तदा परं—प्रति, असिद्धो हेतुः॥ २७४०॥ २७४१॥ ॥ २७४२॥ § 8872

यदुक्तम्—अनित्यत्वं (च) नाशित्वमित्यादि। तत्राह—तादवस्थ्य-मित्यादि। § 8873

तादवस्थ्यं च नित्यत्वं तदन्यत्वमनित्यता।
तादवस्थ्यनिवृत्तौ हि किमवस्थितमिष्यते॥
२७४३॥§ 8875

४ तादवस्थ्य] Correction: ; तादवस्थ्या (sic!)तादवस्थ्य

किमवस्थितमिष्यत इति। अवस्थाया अवस्थातुरव्यतिरेकात्, तन्निवृत्तौ सामर्थ्यात्तस्यापि निवृत्तिः। अन्यथा यदेकयोगक्षेमं न भवति तत्कथं तत्स्वभावं युक्त मिति भावः॥ २७४३॥ § 8876

यदुक्तम्—केवलैन्द्रियकत्वे चेत्यादि, तत्राह—केवलैन्द्रियकत्वे चेत्यादि। § 8877

केवलैन्द्रियकत्वे च हेतावत्र प्रकल्पिते।
जात्या बाधितया पूर्वं व्यभिचारो न गम्यते॥
२७४४॥§ 8879

पूर्वमिति। सामान्यपरीक्षायाम्॥ २७४४॥ § 8880

यदि नाम जात्या व्यभिचारो नास्ति, तथापि संदिग्धव्यतिरेकोऽप्यनैकान्तिक एवेत्याशङ्क्य हेतोरैन्द्रियकत्वस्य प्रतिबन्धमादर्शयन्नाह—स्वनिर्भासीत्यादि। § 8881

730/k

स्वनिर्भासीन्द्रियज्ञानहेतुरैन्द्रियको भवेत्।
नच नित्येऽस्ति हेतुत्वमिति तद्धि प्रसाधितम्॥
२७४५॥§ 8883

स्वनिर्भासिन इन्द्रियज्ञानस्य हेतुरर्थ ऐन्द्रियक उच्यते, नित्यस्य च क्रमयौगपद्याभ्यां नार्थक्रिया युक्तेति सिद्धः प्रतिबन्धः॥ २७४५॥ § 8884

कार्या चेन्द्रियकत्वादावित्यादावाह—सर्वेषामित्यादि। § 8885

सर्वेषां च प्रसिद्धेयमीदृगर्थस्य हेतुता।
धूमादावपि सर्वत्र विकल्पोऽयं समोऽन्यथा॥
२७४६॥§ 8887

ईदृक् चासावर्थश्चेति तथोक्तः, ईदृगिति। अविचाररमणीयः। अन्यथा धूमादावपि विकल्पः शक्यते कर्त्तुम्—किमैन्द्रियको धूमो लिङ्गत्वेनोपात्त, आहोस्विद्विज्ञानप्रकृतिकालादिपरिणामः, किंवाऽवयवी परमाणुभिरारब्धोऽनारब्धो वेत्यादि(:) विकल्पो(ल्पे?)ऽन्यतरसिद्धतादिदोषः स्यात्॥ २७४६॥ § 8888

प्रयत्नानन्तरज्ञानं कृतकानित्यसाधनमित्यत्राह—प्रयत्नेत्यादि। § 8889

प्रयत्नानन्तरज्ञानकार्यारम्भकता नच।
प्रतिसङ्ख्यानिरोधादेः प्रसिद्धा सांवृतत्वतः॥
२७४७॥§ 8891

प्रयत्नानन्तरज्ञानमेव कार्यं तस्यारम्भकता प्रतिसङ्ख्यादिनिरोधादेर्न सिद्धेति सम्बन्धः। यदि हि सौत्रान्तिकनयेन प्रतिसङ्ख्यानिरोधादिना व्यभिचार उद्भाव्यते।तदा न सिद्धो व्यभिचारस्तेषां मतेन प्रतिसङ्ख्यानिरोधादेः संवृतिसत्त्वात्। नच सांवृतं कस्यचित्कार्यस्यारम्भकं युक्तं तल्लक्षणहानिप्रसङ्गात्। तथाहि—यदर्थक्रियाकारितदेव परमार्थस्तदन्यत्तु संवृतिसदिति परमार्थसंवृतिसतोर्लक्षणम्॥ २७४७॥ § 8892

अथ वैभाषिकमतेन व्यभिचारः, तत्रापि यादृशो भवता नाशाद्यात्मको वर्णितः प्रतिसङ्ख्यानिरोधादिस्तादृग्वैभाषिकैर्नेष्ट इत्यादर्शयति—नचेत्यादि। § 8893

नच नाशात्मकाविष्टौ निरोधौ साश्रवैर्यतः।
प्रतिसङ्ख्यानिरोधो यो विसंयोगः पृथक् पृथक्॥
२७४८॥§ 8895

उत्पादात्यन्तविघ्नोऽन्यो निरोधोऽप्रतिसङ्ख्यया।
तस्मादज्ञातसिद्धान्ताः प्लवन्तेऽलीकमानिनः॥
२७४९॥§ 8897

निरोधाविति। प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधौ। कीदृशौ नामेष्टावित्याह—साश्रवैर्यत इति। सक्लेशैर्वस्तुभिर्यो विभागः स प्रतिसङ्ख्यया प्रज्ञया प्राप्य-
731/k त इति कृत्वा प्रतिसङ्ख्यानिरोध उच्यते, सच प्रतिसंयोगिद्रव्यं भिन्नः, अतएवाह—पृथक् पृथगिति। यावन्ति हि संयोगिद्रव्याणि तावन्ति विसंयोगद्रव्याणीति सिद्धान्तात्। अप्रतिसङ्ख्यानिरोधस्तु—अनागतानां धर्माणामुत्पादस्यात्यन्तविघ्नभूतो धर्मो विसंयोगादन्यो यः स उच्यते। स च न प्रतिसङ्ख्यया लभ्यते। किंतर्हि ?। प्रत्ययवैकल्यादतोऽप्रतिसङ्ख्यानिरोध उच्यते। यथोक्तम्— प्रतिसङ्ख्यानिरोधो यो विसंयोगः पृथक् पृथक्। उत्पादात्यन्तविघ्नोऽन्यो निरोधोऽप्रतिसङ्ख्यया॥ इति॥ २७४८॥ ॥ २७४९॥ § 8898

भवेन्नाम नाशस्वभावौ, तथापि न व्यभिचार इत्यादर्शयन्नाह—नास्वभावादित्यादि। § 8899

२ वृतत्वतः] Correction : ; वृतस्य नः (sic !)वृतत्वतः
३ ज्ञानमेव] Correction : ; ज्ञानभवं (sic !)ज्ञानमेव
१ नाशस्वभावौ] Correction : ; नास्वभावौ (sic !)नाशस्वभावौ

नास्वभावात्स्वनाशौ च प्रयत्नानन्तरीयकौ।
कपालालोकराश्यादि तथाज्ञाननिबन्धनम्॥
२७५० ॥§ 8901

प्रत्यत्नानन्तरीयकाविति। नेति सम्बन्धः। कुतः ?। अस्वभावात्। तथाहिवस्तुसत्ताप्रतिषेधमात्रं नाशः, आकाशं च स्प्रष्टव्याभावमात्रम्, ततश्चैतौ स्वनाशौ द्वावपि निःस्वभावौ, तत्कथमनयोः प्रयत्नानन्तरीयकता भवेत्, स्वभावस्यैवार्थक्रियाकारित्वात्। किमिदानीं तर्हि विनाशादिविज्ञाननिबन्धनमित्याह—कपालेत्यादि। आलोकराशिः—आलोकसङ्घातः। आदिशब्देन तमोराशिग्रहणम्॥ २७५० ॥ § 8902

यदुक्तम्—अविशेषेऽपि नानित्यं न नित्यं वस्तु तन्ममे त्यादि। तत्राह—एकस्येत्यादि § 8903

एकस्यार्थस्वभावस्य परिक्षिप्ताद्विरूपता।
अंशस्तस्मान्न जात्याख्यो नित्योऽत्र घटते घटे॥
२७५१ ॥§ 8905

अनित्यताविकल्प्यैवमित्यादावाह—तादवस्थ्येत्यादि। § 8906

तादवस्थ्यप्रतिक्षेपमात्रं चानित्यतेप्सिता।
साध्यत्वेन प्रदीपादिस्तत्रोदाहरणं स्फुटम्॥
२७५२ ॥§ 8908

तादवस्थ्यप्रतिषेधमात्रमेवानित्यता साध्यत्वेनेष्टा, तत्रापि प्रदीप उदाहरणं साध्यान्वितमस्त्येवेति कुतः साध्यहीनता दृष्टान्तस्य॥ २७५२॥ § 8909

ज्वालादेरित्यादिना परमतेन प्रदीपादेरपि दृष्टान्तस्य साध्यहीनतामाशङ्कते। § 8910

ज्वालादेरपि नाशित्वं नन्वसिद्धं प्रतिक्षणम्।
लघवोऽवयवास्तत्र यान्ति देशान्तरं लघु॥
२७५३ ॥§ 8912

732/k

३ नन्वसिद्धं] Correction : ; नत्वसिद्धं
(sic !)नन्वसिद्धं

प्रभूतं वर्त्तिदेशे हि तेजस्तिष्ठति पिण्डितम्।
तत्र यावद्व्रजत्पूर्वं(त्यूर्ध्वं?)तावज्ज्वालेति गम्यते॥
२७५४॥§ 8914

ततोऽपि यदपक्रम्य याति तत्स्यात्प्रभात्मकम्।
ततः परं तु यद्याति तत्सौक्ष्म्यान्नावधार्यते॥
२७५५॥§ 8916

तत्र हि ज्वालादेरवयवाः शीघ्रंशीघ्रं देशान्तरं व्रजन्ति न तु प्रतिक्षणविशरारवः (विशरणाः ?)॥ २७५३॥ २७५४॥ २७५५॥ § 8917

अथ युगपत्कस्मात्सर्वे न विसर्पन्तीत्याह—उत्तरावयवैरित्यादि। § 8918

उत्तरावयवै रुद्धे मार्गे पूर्वे न यान्ति च।
यथोत्तरे विमुञ्चन्ति पूर्वे यान्ति तथा तथा॥
२७५६॥§ 8920

ननु यदि प्रसर्पणधर्माणस्ते तत्समीपवर्त्ति तृणतूलादि किं न दहन्तीत्याह—संक्रान्तावपीत्यादि। § 8921

संक्रान्तावपि नैतेषां तृणादौ वृत्तिसम्भवः।
तदेतत्कल्पनामात्रं प्रमाणानभिधानतः॥
२७५७॥§ 8923

संहतावस्थायामेव लब्धवृत्तयो भवन्ति। नतु विप्रकीर्णावस्थायामिति भावः। तदेतदित्यादिना प्रतिविधत्ते। सत्यामपि चास्यां कल्पनायां न साध्यविकलता दृष्टान्तस्य। तथाहि तादवस्थ्यप्रतिषेधमात्रमनित्यतासाध्यत्वेनेष्टेत्युक्तम्। तच्च तादवस्थ्यं प्रदीपादौ नास्त्येवेति कुतः साध्यविकलता॥ २७५७॥ § 8924

तथाऽप्यभ्युपगम्य दोषमाह—किञ्चेत्यादि। § 8925

किञ्चाव्याहतशक्तीनां तृणतूलादिसङ्गतौ।
दाहवृत्तिप्रसङ्गोऽयं पूर्ववन्न निवर्त्तते॥ २७५८॥§ 8927

अव्याहतशक्तीनामिति। ज्वालाद्यवयवानाम्। पूर्ववदिति। संहताव- स्थादविशेषात्॥ २७५८॥ § 8928

अथ विशेषोऽभ्युपगम्यते तदा नित्यत्वहानिप्रसङ्गो दुर्निवार इति दर्शय- ति—अन्यथेत्यादि। § 8929

अन्यथा नित्यरूपा सा तेषु स्यात्कीदृशी तव।
शक्ताशक्तस्वभावस्य यदा भेदो व्यवस्थितः॥
२७५९ ॥§ 8931

सुबोधम्॥ २७५९॥ § 8932
733/k

यदुक्तम्— सम्बन्धाकरणन्यायाद्वक्तव्या वाक्यनित्यता इति, तत्राह— सम्बन्धस्य चेत्यादि। § 8933

सम्बन्धस्य च नित्यत्वं प्रतिषिद्धं पुरा ततः।
सम्बन्धाकरणन्यायान्न युक्ता वाक्यनित्यता॥
२७६० ॥§ 8935

भवन्मतेन वाक्यमेव न सम्भवति, यस्य त्वया नित्यत्वं प्रसाध्यत इति मन्यमानो वाक्यं विचारयन्नाह—कतमस्येत्यादि। § 8936

कतमस्य च वाक्यस्य नित्यत्वमुपगम्यते।
वर्णमात्रात्मनो वर्णक्रमस्याथ विभेदिनः॥
२७६१ ॥§ 8938

(किं)कदाचिद्वर्णमात्रमेवाविशिष्टं वाक्यं स्यात्। यद्वा—वर्णा एव विशिष्टाः क्रमवर्त्तिनो वाक्यम्। अथवा वर्णेभ्यो भेदिनः स्फोटाख्यस्य वाक्यत्वमिति पक्षत्रयम् ॥ २७६१॥ § 8939

तत्राद्ये पक्षे दोषमाह—वर्णानामित्यादि। § 8940

वर्णानां क्रमशून्यानां वाचकत्वं न विद्यते।
नातस्ते तादृशा वाक्यं क्रमोऽप्येषां न विद्यते॥
२७६२ ॥§ 8942

व्याप्तेर्नित्यतया चैषां देशकालक्रमो न हि।
लिपिवत्फलपुष्पादिभेदवद्योपपद्यते॥ २७६३॥§ 8944

स्वाभाविके क्रमे चैषां सर इत्येवसम्भवेत्।
नतु स्याद्रस इत्यादिः स्थितक्रमविरोधतः॥
२७६४॥§ 8946

स्थिता रेफादयश्चान्ये नैवान्यक्रमयोगिनः।
जायन्ते वायुतो वर्णा नित्यैकत्वेन वर्णिताः॥
२७६५॥§ 8948

अन्यथा प्रत्यभिज्ञानं नित्यत्वैकत्वसाधनम्।
व्यभिचारि त्वयैवोक्तं भवेद्भेदेऽपि वर्तनात्॥
२७६६॥§ 8950

द्वितीयेऽपि पक्षे प्राह—क्रमोऽप्येषां न विद्यत इति। तथाहि—द्विविध एव भावानां क्रमः, देशकृतो वा पिपीलिकालिप्यक्षरादिवत्, कालकृतो वा यथा बीजाङ्कुरकाण्डपुष्पफलादीनाम्, न तावदाद्यः क्रमो वर्णानां सम्भवति, व्याप्तेः, सर्वगतत्वाद्वर्णानाम्, नह्याकाशवत्सकलदेशावष्टम्भेनावस्थितस्य
734/k देशविच्छेदकृतः क्रमो युक्तः, सर्वेषामेकनभोदेशावस्थानात्। नापि कालकृतः, नित्यत्वेन सर्वेषां समकालत्वात्। किञ्च—पुरुषकृतो वा क्रमो भवेत् स्वाभाविको वा। न तावत्पुरुषकृत इष्टः, वेदस्य पौरुषेयत्वप्रसङ्गात्। अथ स्वाभाविकः, तदा सर इत्येव नित्यं भवेत्, न कदाचिद्रस इति। नचापि प्रतिपदं भिन्ना वर्णा इत्यभ्युपेयम्, प्रत्यभिज्ञया वर्णानां नित्यत्वस्य सिद्धत्वात्। तत्प्रतिषेधस्यैव च साधयितुमिष्टत्वात्, अन्यथा प्रत्यभिज्ञानं व्यभिचारि स्यात्॥ २७६२॥ २७६३॥ २७६४॥ २७६५॥ २७६६॥ § 8951

अथापि स्यादभिव्यक्तिक्रमस्तर्हि वाक्यं भविष्यतीत्याह—नचेत्यादि।
§ 8952

नच व्यक्तिक्रमो वाक्यं नित्ये व्यक्तिनिषेधनात्।

वाक्यतायोगतस्तस्मान्नित्यत्वं नोपपद्यते॥
२७६७॥§ 8954

चशब्दान्नापि वर्णेभ्यो भिन्नं स्फोटाख्यं वाक्यमिति सूचयति। तस्य मीमांसकैरेव निरस्तत्वादिति भावः। नित्ये व्यक्तिनिषेधनादिति। नित्यस्य व्यक्तेर्निषिद्धत्वादित्यर्थः॥ २७६७॥ § 8955

यदुक्तम्—दृष्टार्थव्यवहारत्वादित्यादि, तत्राह—यथा वृद्ध्यादय इत्यादि।
§ 8956

यथा वृद्ध्यादयः शब्दा इच्छाविरचितार्थकाः।
स्वर्गयागादयः शब्दाः संभाव्यन्ते तथैव च॥
२७६८॥§ 8958

नचोत्पाद्यकथारूपनाटकाख्यायिकादिषु।
नित्यः शब्दार्थसम्बन्धो वास्तवोऽस्ति विवक्षितः॥
२७६९॥§ 8960

इच्छया रचितोऽर्थो येषां ते तथोक्ताः। उत्पाद्या—स्वयमपूर्वैव पुरुषेण या कथा महाश्वेतादिका, सैव रूपं स्वभावो येषां नाटकाख्यायिकादीनां ते तथोक्ताः। नच तेषु नित्यः शब्दार्थसम्बन्धोऽस्ति विवक्षितः शक्तिलक्षणस्तद्वद्वेदेऽपि सम्भाव्यत इति भावः॥ २७६८॥ २७६९॥ § 8961

तत्रापीत्यादिना परमतेन दृष्टान्तासिद्धिमाशङ्कते। § 8962

तत्रापि शक्तिनित्यत्वं नियोगस्य त्वनित्यता।
तद्वशादेव नित्यायां शक्तौ भ्रान्तिः प्रवर्त्तते॥
२७७०॥§ 8964

तत्राप्युत्पाद्यकथादिषु नित्या शक्तिरेष्टैव, किन्त्वसत्येवार्थे यो नियोगः पुरुषैः क्रियते, सोऽनित्यस्तद्वशादेव नित्यायां शक्तौ प्रतीतिविभ्रमो भवति, तस्मादसिद्धो दृष्टान्त इति॥ २७७०॥ § 8965

नन्वित्यादिना प्रतिविधत्ते। § 8966
735/k

ननु बाह्यो न तत्रास्ति व्यक्तिः क्वार्थे प्रकल्प्यते।

विकल्पप्रतिबिम्बे चेत्तद्वद्वेदेऽपि शङ्क्यते॥
२७७१॥§ 8968

बाह्य इति। महाश्वेतादि(रि)त्यर्थः॥ २७७१॥ § 8969

यदुक्तम्— स्वर्गयागादिसम्बन्धः केन दृष्टो ह्यतीन्द्रियः इत्यादि, तत्राह—अतीन्द्रियार्थसम्बन्धामित्यादि। § 8970

अतीन्द्रियार्थसम्बन्धां को वा शक्तिं प्रपद्यते।
नातो वेदे नियोगोऽपि नरायत्तः प्रकल्प्यते॥
२७७२॥§ 8972

वृद्धेभ्यो नच तद्बोधस्तेऽपि ह्यज्ञाः स्वतः स्थिताः।
सम्भाव्या प्रतिपत्तिस्तु व्याख्यानात्पुरुषाश्रयात्॥
२७७३॥§ 8974

अनेनैतदाह—स्वयमेव भवता सामर्थ्याद्दर्शितम्, यथा योऽयं वेदार्थप्रत्ययो भवति स पुरुषाश्रयाद्व्याख्यानादेवेति। तथाहि—प्रकृत्यैव तावत्पूर्वा(दपूर्वे?)शक्तिरतीन्द्रियार्थाश्रिता, ततश्चातीन्द्रियायां शक्तौ न पुरुषकृतो नियोगः शब्दस्य सम्भवति, नापि वृद्धेभ्यस्तस्याः प्रतीतिः संभवति, तेषां सर्वेषामेवानभिज्ञत्वात्,अन्धानामिव वचनाद्रूपविशेषप्रतीतिः। तस्मात्सामर्थ्यादियमर्थप्रतीतिः पुरुषव्याख्यानादेवावतिष्ठते गत्यन्तराभावादिति॥ २७७२॥ २७७३॥ § 8975

नन्वित्यादिना परश्चोदयति। § 8976

ननु पर्यनुयोगोऽयं कृतकेप्यागमे समः।
न तत्र श्रद्धया वृत्तेरर्थसंशयतोऽपि वा॥
२७७४॥§ 8978

नन्वयं सामान्यः पौरुषेयेष्वप्यागमेषु प्रसङ्गः। तथाहि—किमिदानीन्तनाः परोक्षदेशिकानां बुद्धादिवचनानामर्थं यथाभिप्रायं प्रतियन्ति, आहोस्विद्विपर्ययमिति।न तत्रेत्यादिना प्रतिविधत्ते। तत्रेति। पुरुषो यदिष्टे(पौरुषेये, अदृष्टे,—)हेयादितत्वे सोपाये पुरुषार्थोपयोगिनि। तथाहि—तत्र न्यायमेवानुपालयन्तः सौगताः सुधियः प्रवर्त्तन्ते न प्रवादमात्रेण। श्रद्धयेति। अभिसंप्रत्ययेन युक्तिनिध्यानजेन निश्चयेनेति यावत्। प्रमाणसिद्धएवार्थेऽभिसंप्रत्ययस्य युज्यमानत्वात्। नान्यत्र। तत्र संशयानतिवृत्तेः। अर्थसंशयतोऽपि वेति।

अत्यन्तपरोक्षेऽर्थे स्वर्गदेवतापूर्वादौ। तथाहि—तत्र पौरुषेये वाक्ये पुरुषस्य स्वाभिप्रायकथनेनाविपरीतसम्प्रदायसंभवाच्छ्रोतृपरम्परया चाविच्छिन्नः सम्प्रदायः सम्यक् संभाव्यते। नत्वेवमपौरुषेये, तत्रोपदेष्टुरभावात्। किञ्चोपदेष्टा 736/k
क्रिय(कृप ?)या लोकप्रत्ययेनय(प्रत्यायनाय ?)कुर्वा(ब्रुवा ?)णो लोकसङ्केतमेवानुसृत्य कृ(ब्रू)त इति ततो लोकप्रसिद्धेरपि तदर्थसिद्धिः संभवेत्। नत्वपौरुषेयाणां तत्र कस्यचित्समीहाभावात्॥ २७७४॥ § 8979

यद्येवं येन केनचिदागमेन किं न भवान्प्रवर्त्तते। सन्देहस्य सर्वत्र तुल्यत्वादित्येतच्चोद्यनिराकरणायेदमाह—प्रत्यक्षेणेत्यादि। § 8980

प्रत्यक्षेणानुमानेन विशुद्धे विषये सति।
नह्येवं वैदिके शब्दे स स्वयम्प्रत्ययो यतः॥
२७७५॥§ 8982

यत्र प्रत्यक्षानुमानाभ्यामभिमतस्यार्थस्य तथाभावो न विरुध्यते, तेन प्रवर्त्तमानः शोभेत सत्यपि संशये, नतु यत्रान्यथाभावस्तत्र, दृष्टप्रमाणोपरोधितानर्थसंशयस्योद्भूतत्वात्। यद्येवं वेदेऽप्यनेनैव न्यायेन प्रवृत्तिर्भविष्यतीत्याह—नह्येवमित्यादि।स्वयम्प्रत्यय इति। स्वत एव प्रमाणभूत इत्यर्थः। अतो न प्रमाणेन परीक्ष्य ततः प्रवृत्तिर्युक्ता, परतः प्रामाण्यप्रसङ्गात्। नचापि तस्य विषयविशुद्धिः सम्भवति। तथाहि—अप्रच्युतानुत्पन्नपूर्वापररूपः पुमा(न)नुक्रमेण कर्त्ता कर्मफलानां च भोक्तावेदे पठ्यते। सचायुक्त इत्यावेदितमात्मपरीक्षायाम्। तथा नित्यत्वं केषांचिद्भावानां पठ्यते। तदपि स्थिरभावपरीक्षायामयुक्तमुपपादितम्। तथा सामान्यादिन्यप्रत्यक्षाण्यपि प्रत्यक्षत्वेनेष्टानि, तथा क्रमेण जन्मस्थितिनिवृत्तयोऽसम्भविन्योऽपि भावानांनिर्दिष्टाः। तथाऽनाधेयविशेषस्य प्रागकर्त्तुः परापेक्षया जनकत्वं, तथा निष्पन्नस्य पराश्रयेण स्थितिरकार्यस्याप्युपदिष्टा। तथा कारणाद्विनाश इत्यादिकं बहुविधं प्रमाणविरुद्धमुपलभ्यते। तत्कथं प्रेक्षावतस्तथाभूतेनागमेन प्रवृत्तिः स्यात्॥ २७७५॥ § 8983

यदप्यपरं कुमारिलेन सम्बन्धनित्यत्वसाधनाय साधनमुक्तम्। तस्योत्पाद्यकथारूपनाटकादिनाऽनैकान्तिकत्वमिति दर्शयति—उत्पाद्येत्यादि। § 8984

उत्पाद्यार्थकथाधर्ममनालोच्य समं श्रुतौ।
एवं चेदमसम्बद्धं परैरत्रोपवर्णितम्॥ २७७६॥§ 8986

उत्पाद्योऽर्थो यस्याः कथायाः सा तथोक्ता, उत्पाद्यार्था चासौ कथा चेति विग्रहः। तस्या धर्म इच्छाविरचितार्थत्वम्॥ २७७६॥ § 8987

किं तदुपवर्णितमित्याह—शब्दार्थानादितामित्यादि। § 8988

शब्दार्थानादितां मुक्ता सम्बन्धानादिकारणम्।
न स्यादन्यदतो वेदे सम्बन्धादि न विद्यते॥
२७७७॥§ 8990

737/k

उपायरहितत्वेन सम्बन्धाकरणानुमा।
अनाख्यानानुमानं तु दृष्टेनैव विरुध्यताम्॥
२७७८॥§ 8992

शब्दो वर्णस्वभावः, तस्यार्थः सामान्यं, तयोरनादित्वात्सम्बन्धोऽपि शक्तिलक्षणोऽनादिरेव, शक्तेर्भावाव्यतिरेकादिति भावः। तथा सम्बन्धकरणस्योपायाभावेन सम्बन्धाकरणमनुमीयते। प्रयोगः—यो यत्करणोपायरहितः स न तं करोति,यथाऽविद्यमानमृत्पिण्डदण्डचक्रसलिलसूत्रादिकारणकलापः कुलालो घटम्, सम्बन्धकरणोपायरहिताश्च सर्वपुरुषा इति व्यापकविरुद्धोपलब्धिः। नचासिद्धो हेतुः,श्रोतुःकर्त्तु च सम्बन्धं वक्ता कं प्रतिपद्यतामित्यादिना सर्वपुरुषाणामुपायरहितत्वस्यप्रतिपादितत्वात्। यद्येवं कारणवत्सम्बन्धाख्यानाभावानुमानप्रसङ्ग इत्याशङ्क्याह—अनाख्यानानुमानं त्वित्यादि। अनाख्यानानुमाने हेतोरुपायरहितत्वादित्यस्यासिद्धिः॥ २७७७॥ २७७८॥
§ 8993

वृद्धानामित्यादिना तामेवासिद्धिं दर्शयति। § 8994

वृद्धानां दृश्यमाना च प्रतिपत्तिः पुनः पुनः।
उपाय इति तद्धानिरसिद्धाऽवगमं प्रति॥
२७७९॥§ 8996

येयं वृद्धानां सम्बन्धप्रतीतिः पुनःपुनर्दृश्यते, स एव सम्बन्धकथनोपायः, नह्यप्रतिपद्य परस्मै कथयितुमीश(ते।) तद्धानिरिति। उपायहानिः। अवगमं प्रतीति। सम्बन्धावबोधं प्रति॥ २७७९॥ § 8997

इत्येतद्धीत्यादिना दूषणमाह। § 8998

इत्येतद्धि भवेत्सर्वं यदि वेदार्थनिश्चयः।

वृद्धेभ्योऽप्यविसंवादी सिद्धः स्यादन्यथा क्षतिः॥
२७८० ॥§ 9000

(यदुक्तम्—) शब्दार्थानादितामित्यादि, तत्र यदि नित्यत्वं शब्दार्थयोरनादित्वमभिप्रेतं तदसिद्धम्, व्यापिनः क्षणभङ्गस्य प्रतिपादितत्वात्। अथ कार्यकारणपरम्परायास्तदाऽनैकान्तिकत्वं विरुद्धत्वं च, सम्बन्धिभ्यः सम्बन्धस्याव्यतिरेकात्तद्वदनित्यत्वप्रसङ्गात्। यच्चोक्तमुपायरहितत्वेनेति, तदप्यसिद्धम्, यतो भेदेऽपि प्रकृत्या चक्षुरादिवदेकाकारप्रत्यवमर्शजनने समर्थाः केचिदर्था इति प्रतिपादितम्। ततश्च वक्तृश्रोत्रोरेकार्थाध्यवसायी प्रत्ययः स स्वकरणेऽभ्युपाय इत्यभिप्रायः। यदप्युच्यते वृद्धानां दृश्यमाना च प्रतिपत्तिरिति, तत्राप्युक्तम्— वृद्धेभ्यो न च तद्बोधस्तेऽपि ह्यज्ञाः स्वतःस्थिताः इति। अन्यथा क्षतिरिति। 738/k
यदि वृद्धाः स्वयमज्ञा अपि सन्तः सम्बन्धं प्रतिपद्यन्त इतीष्यते, तदा दृष्टविरोधोऽन्धस्येव रूपदर्शनप्रतिज्ञाया इत्यर्थः॥ २७८०॥ § 9001

यदुक्तम्— सङ्घातत्वस्य वक्तव्यमीदृशं प्रति साधनम् इत्यत्राह— सिद्धेत्यादि। § 9002

सिद्धसर्वोपसंहारव्याप्तिकत्वान्न सम्भवि।
सङ्घातत्वादिलिङ्गस्य किञ्चन प्रतिसाधनम्॥
२७८१ ॥§ 9004

सिद्धा सर्वोपसंहारव्याप्तिर्यस्य तत्तथोक्तम्, तद्भावस्तत्त्वम्, अनेन वस्तुबलप्रवृत्तत्वमस्य प्रतिपादयति—अन्यस्य सर्वोपसंहारेण व्याप्त्यसिद्धेः। न च वस्तुबलप्रवृत्तेऽनुमाने प्रतिसाधनसम्भवः, वस्तूनां स्वभावान्यथात्वस्य कर्तुमशक्यत्वात्। नापि परस्परविरुद्धस्वभावद्वयस्यैकत्र सम्भवः, एकत्वहानिप्रसङ्गात्॥ २७८१॥ § 9005

तामेव सर्वोपसंहारेण व्याप्तिसिद्धिं दर्शयन्नाह—सार्थका इत्यादि। § 9006

सार्थकाः प्रविभक्तार्था विशिष्टक्रमयोगिनः।
पदवाक्यसमूहाख्या वर्णा एव तथोदिताः॥
२७८२ ॥§ 9008

सार्थकप्रविभक्तार्थविशिष्टक्रमयोगिता।
निषिद्धा पौरुषेयत्वे व्याप्तिरव्याहता ततः॥
२७८३ ॥§ 9010

तथेति। संहतत्वेनोदिताः। अपौरुषेयत्वे तु वर्णानां सर्वमेतदनुपपन्नमिति पूर्वं प्रतिपादितमतो व्याप्तिसिद्धिः॥ २७८२॥ २७८३॥ § 9011

ननु च वेदाध्ययनवाच्यत्वादित्यस्यापि हेतोर्व्याप्तिः सर्वोपसंहारेण सिद्धैव, तथाहि वेदानां कर्त्ता न कदाचिदप्युपलभ्यत इत्याशङ्क्याह—वेदाध्ययनेत्यादि। § 9012

वेदाध्ययनवाच्यत्वे नत्वेवं व्याप्तिनिश्चयः।
संदिग्धव्यतिरेकित्वं व्यक्तं तेनात्र साधने॥
२७८४॥ § 9014

नत्वेवमिति। यथा सङ्घातत्वस्य। यतो न सङ्घातत्वस्य साध्यविपर्यये व्यतिरेकित्वं संदिग्धम्, अस्य तु संदिग्धम्॥ २७८४॥ § 9015

एतदेव प्रतिपादयति—तथाविध इत्यादि। § 9016

तथाविधे क्रमे कार्ये नराशक्तौ च निश्चये।
सिद्धे व्याप्तिरिहेयं च निश्चेतुं नैव शक्यते॥
२७८५॥ § 9018

समस्तनरधर्माणां प्रत्यक्षीकरणे सति।
स्यादेव निश्चयोऽयं च सर्वज्ञस्योपपद्यते॥
२७८६॥ § 9020

739/k

तथाविध इति। स्वर्गकामोऽग्निष्टोमेन यजेतेत्यादिके। एवंभूतं वर्णक्रमं यदि कर्तुं सर्वनराणामशक्तिर्निश्चिता भवेत्तदा व्याप्तिनिश्चयो भवेत्, यावता सैव निश्चेतुमसर्वविदा न शक्यत इति दर्शयति—समस्तनरधर्माणामित्यादि। अयं चेति। निश्चयः॥ २७८५॥ २७८६॥ § 9021

ननु च धर्माद्युपदेशदुर्भणत्वादीनां वेदधर्माणां पौरुषेयेषु वाक्येष्वदर्शनाद्वेदस्यपौरुषेयत्वमसम्भाव्यमेव, तत्कथं संदिग्धासिद्धता स्यादित्याशङ्क्याह—सम्भाव्यत इत्यादि। § 9022

सम्भाव्यते च वेदस्य विस्पष्टं पौरुषेयता।

कामिमिथ्याक्रियाप्राणिहिंसाऽसत्याभिधा तथा॥
२७८७॥§ 9024

दुर्भणत्वानुदात्तत्वक्लिष्टत्वाश्रव्यतादयः।
वेदधर्मा हि दृश्यन्ते नास्तिकादिवचस्स्वपि॥
२७८८॥§ 9026

विषापगमभूत्यादि यच्च किञ्चित्समीक्ष्यते।
सत्यं तद्वैनतेयादिमन्त्रवादेऽपि दृश्यते॥
२७८९॥§ 9028

एवं मन्यते—यदि नामादर्शनम्, तथाप्यदर्शनमात्रस्याप्रमाणत्वात्संदिग्धासिद्धतैव, कदाचित्क्वचित्पुरुषास्तथाविधानां वेदधर्माणां कर्त्तारो भवेयुरिति। नचादर्शनमात्रं सिद्धम्। काममिथ्याचाराद्युपदेशादेर्वेदधर्मस्य नास्तिकादिवचनेष्वपि दर्शनात्। काममिथ्याक्रिया—काममिथ्याचारः। मात्राद्यभिगमनमिति यावत्। तस्योपदेशो गोसवादौ। यथोक्तम्—उपहा उदकं चूषति तृणानि छिनत्ति उपैति मातरमुतस्वगोत्रामित्यादि। उपहेति यजमानः। अश्वमेधादौ प्राणिवधोपदेशः। यथोक्तम्—षड्शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि। अश्वमेधस्य वचनादूनानि पशुभिस्त्रिभिः(?)॥ इति। असत्यं मृषावादस्तदप्युपदिष्टम्। यथोक्तम्— न नर्मयुक्तं ह्यनृतं हिनस्ति न स्त्रीषु राजन् न विवाहकाले। प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि॥ इति। एषां काममिथ्याचारादीनां, अभिधा—अभिधानम्। वेदधर्मा नास्तिकादिवचस्स्वपि दृश्यन्त इति सम्बन्धः। तथेति समुच्चये। दुर्भणत्वं—दुरभिधानम्, अनुदात्तत्वं मनोज्ञत्वं, क्लिष्टं—व्यवहितम्। आमन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिरित्यादिवत्। अत्र हि—आ मन्द्रैरित्ययं (आङ्) याहीत्यनेन व्यवहितेन सम्बध्यते। आयाहीत्यर्थः। अश्रव्यता—श्रुतिदुर्भगता। आदिशब्देन पदविच्छेदप्लुतोदात्तादिपरिग्रहः। विषापगमभूत्यादीति। विषापगमे भूतिः—सामर्थ्यं, प्रभाव इति यावत्। अथवा—विषापगमश्च भूतिश्चेति 740/k
समासः। भूतिर्विभूतिरैश्वर्यमिति यावत्। आदिशब्देन भूतग्रहाद्यावेशवशीकरणाभिचारादयो गृह्यन्ते। सत्यमिति। अविसंवादि। वैनतेयादीत्यादिशब्देन बौद्धादिमन्त्रवादपरिग्रहः॥ २७८७॥ ॥ २७८८॥ २७८९॥ § 9029

भारतेऽपि भवेदेवमित्यादावाह—किंचामुनेत्यादि। § 9030

१२ षड्शतानि] Correction : ; बहूनानि (sic !)षड्शतानि (sic !)भिस्त्रिभिः

१३ भिस्त्रिभिः] Correction : ; भिस्तुभिः

किंचाऽमुना प्रकारेण पौरुषेयं न किञ्चन।
शक्यं सौगतमप्येवमनुमातुं वचो यतः॥
२७९० ॥§ 9032

एवमनुमातुमिति। सौगतप्रवचनाध्ययनं प्रथमाभिहि(म ?)तं सजातीयाध्ययनपूर्वकं, सौगताध्ययनवाच्यत्वात्, अधुनाध्ययनं यथेति॥ २७९०॥ § 9033

यद्येवं कथं तर्हि तत्सौगतं सेत्स्यतीत्याह—तदभिव्यक्तेत्यादि। § 9034

तदभिव्यक्तरूपत्वात्तदीयं च तदुच्यते।
कर्तृस्मृतिश्च तत्रापि भवत्वर्थनिबन्धना॥
२७९१ ॥§ 9036

परैरेवं न चेष्टं चेत्तुल्ये न्याये न किं मतम्।
माभूद्वैवं परस्येष्टिर्न्यायात्त्वाशंक्यते तथा॥
२७९२ ॥§ 9038

तेन सुगतेनाभिव्यक्तं रूपं स्वभावो यस्य तत्तथा। तद्भावस्तत्त्वम्। तत्रापि सौगतेया कर्तृस्मृतिस्त्वर्थवादनिबन्धना शक्यते व्याख्यातुम्। तथाह्यत्रापि करोतिः स्मरणार्थः किं न व्याख्यायते। स्यादेतत्—नहि बौद्धैरेवमिष्टम्, येनैवं साध्येतेत्याह—तुल्ये न्याये न किं मतमिति। यद्ययमर्थो युक्त्युपेतः स्यात्तदा किमिति बौद्धोनाभ्युपगच्छेत्, नहि न्यायोपपन्नेऽर्थे प्रेक्षावतोऽनभ्युपगमो युक्तः। माभूद्बौद्धस्य प्रेक्षावतोऽभ्युपगमस्तथाऽपि न्यायादेवमापाद्यते भवत इति ब्रूमहे॥ २७९१॥ २७९२॥ § 9039

एतदेव तद्वचनेन दृढीकुर्वन्नाह—सर्वदा चेत्यादि। § 9040

सर्वदा चैव पुरुषाः प्रायेणानृतवादिनः।
यथाऽद्यत्वे न विस्रम्भस्तथाऽतीतार्थकीर्त्तने॥
२७९३ ॥§ 9042

इत्येतेन त्वदुक्तेन न्यायेन च न सिद्ध्यति।

कर्त्ता कश्चित्क्वचिद्ग्रन्थे स्वां कृतिं कथयन्नपि॥
२७९४॥§ 9044

ततश्चापौरुषेयेषु सत्याशा त्यज्यतामियम्।
वेदार्थविपरीता हि तेष्वर्थाः प्रतिपादिताः॥
२७९५॥§ 9046

इत्येतेनेति। सर्वदा चेत्यादिनाऽनन्तरोक्तेन। स्यादेतद्भवतु सर्वेषामपौरुषेयते त्याह—ततश्चेत्यादि। ततश्चापौरुषेयत्वं सत्यार्थं न सिद्ध्येत्। सौग- 741/k
तादिवचनेनानैकान्तिकत्वादिति भावः। तथाहि—वेदार्थविपरीता नैरात्म्यादयो भवन्मतेनाप्रमाणोपपन्नास्तेषु सौगतादिषु वचनेषु निर्दिष्टाः, तथा वैदिका अपि सम्भाव्येरन्॥ २७९३॥ २७९४॥ २७९५॥ § 9047

एवं तावदनैकान्तिकत्वं प्रतिपादितम्, इदानीमिष्टविघातकादित्वाद्विरुद्धत्वमस्यप्रतिपादयन्नाह—अपिचेत्यादि। § 9048

अपिचानादिता सिद्ध्येदेवं नानरसंश्रयः।
तस्मादकृतकत्वे वा स्यादन्योऽप्यागमोऽकृतः॥
२७९६॥§ 9050

तथाह्यपौरुषेयत्वमस्य साधयितुमिष्टम्, तच्च न सिद्धम्, किं तर्हि ? अनादित्वमात्रमनिष्टमेव सिद्ध्यति। स्यादेतत्—अनादित्वे सिद्धे सामर्थ्यादकृतकत्वंसिद्ध्यत्येव, नहि कृतकस्यानादित्वं युज्यते तदित्यत्राह—तस्मादित्यादि। तस्मादनादित्वाद्यद्यत्कृतकत्वं स्यात्तदा पारसीकादिव्यवहारस्यापि स्यात्॥ २७९६॥ § 9051

एतदेव दर्शयति—तथाहीत्यादि। § 9052

तथाहि पारसीकादिव्यवहाराः पराश्रयाः।
नास्तिकानां च सिद्धान्तः परसंस्कारभाविकः॥
२७९७॥§ 9054

पराश्रया इति। परपुरुषसंस्कारेण प्रवृत्ता इत्यर्थः। परसंस्कारभाविक इति। परसंस्कारेण भावः स यस्यास्ति स तथोक्तः। परसंस्कारेण वा भवितुं शीलमस्येति परसंस्कारभावी, ततः स्वार्थे को विधेयः। तथाहि—येऽपि तावत्स्वप्रतिभारचितसङ्केताः सिद्धान्ताः, तेषामपि यथाश्रुतार्थविकल्पवशेनैव प्रवृत्तेः परसंस्कारबलेनैव प्रवृत्तिः प्रागे(स्यादे?)व प्रायेण, यथा दर्शनवृत्तीनां लोकव्यवहाराणाम्॥ २७९७॥ § 9055

भवतु सर्वेषामपौरुषेयत्वमिति चेदित्याह—ईदृशीत्यादि। § 9056

ईदृश्यकृतकत्वे च कः सिद्धेऽपि गुणस्तव।
अवैतथ्यनिमित्तं हि यत्नोऽयं भवतोऽखिलः॥
२७९८॥§ 9058

ईदृशि—सम्भवद्वितथार्थे॥ २७९८॥ § 9059

अतीतानागतौ कालावित्यादावाह—कालत्वेत्यादि। § 9060

कालत्वपुरुषत्वादौ संदिग्धव्यतिरेकिता।
पूर्ववत्करणाशक्तेर्नराणामप्रसाधनात्॥
२७९९॥§ 9062

742/k

व्यक्तेश्च प्रतिषिद्धत्वाद्वक्ता कर्त्तैव गम्यताम्।
तत्प्रयोगद्वयेऽप्युक्तं साध्यशून्यं निदर्शनम्॥
२८००॥§ 9064

सर्वेषां हि नराणां करणाशक्तिप्रसाधनं विपर्यते हेतोर्बाधकं प्रमाणम्, तस्य चानुपदर्शनात्सर्वहेतूनां साध्यविपर्यते व्यतिरेकः संदिग्ध इत्यनैकान्तिकता। पूर्ववदिति। वेदाध्ययनवाच्यत्वासाधनवत्। साध्यशून्यं निदर्शनमिति। वर्त्तमानकालवत्प्राकृतनरवदित्येतत्॥ २७९९॥ २८००॥ § 9065

ततश्च गम्यतामित्यादावाह—नरेत्यादि। § 9066

नरोपदेशापेक्षत्वात्कृतकस्य च साधनात्।
स्वार्थे वक्रनपेक्षत्वं धर्मिदृष्टान्तयोर्न च॥
२८०१॥§ 9068

धर्मिदृष्टान्तयोरिति। साध्यधर्मिणि दृष्टन्तधर्मिणि चेत्यर्थः॥ २८०१॥ § 9069

तत्कृतः प्रत्यय इत्यादावाह—नित्यत्वेऽस्त इत्यादि। § 9070

नित्यत्वेऽस्ते च वाक्यस्य धर्मिदृष्टान्तयोरपि।

नित्यवाक्योद्भवत्वस्य स्पष्टाऽसिद्धः प्रतीयते॥
२८०२॥§ 9072

इत्थं चापौरुषेयत्वे चोदनाया अनिश्चिते।
सन्दिग्धासिद्धता दोषः पश्चिमेष्वपि हेतुषु॥
२८०३॥§ 9074

अत्रापि हेतोरसिद्धता दृष्टान्तस्य च साध्यविकलता पूर्ववत्। धर्मिदृष्टान्तयोरिति सप्तमी नित्यवाक्योद्भवत्वस्येत्येतदपेक्षा। वाक्यस्येति नित्यत्व इत्येतदपेक्षा सम्बन्धषष्ठी। नित्यवाक्योद्भवत्वस्येत्यसिद्ध्यपेक्षा षष्ठी। पश्चिमेष्विति। दोषवर्जितैः कारणैर्जन्यमानत्वादित्यादिषु च॥ २८०२॥ २८०३॥ § 9075

अनाप्तप्रणीतोक्तिजन्यत्वाद्बाधवर्जनादित्यनयोस्तु हेत्वोर्निश्चितैवासिद्धतेति दर्शयन्नाह—बाध्यते चेत्यादि। § 9076

बाध्यते च श्रुतिः स्पष्टं क्षणभङ्गे प्रसाधिते।
नित्या तावत्स्वरूपेण तत्कृताऽतो मतिः कृतः॥
२८०४॥§ 9078

नहि शीर्यत इत्युक्तः पुरुषश्च श्रुतावलम्।
पुरस्तस्योदिता बाधा सुव्यक्ता तदसिद्धता॥
२८०५॥§ 9080

करामलकवद्यस्य देशकालनरान्तरम्।
प्रत्यक्षं तत्र तेनायं बाधाभावोऽवसीयते॥
२८०६॥§ 9082

नित्या तावत्स्वरूपेणेति बाध्यत इति सम्बन्धः। एतदुक्तं भवति। स्पष्टं हि हेतुबलप्रवृत्तानुमानतः सर्वपदार्थव्यापिनि क्षणभङ्गे प्रसाधिते सति येऽयं 743/k
नित्यत्वेनाभ्युपगता श्रुतिः सा तावद्बाध्यत इति स्वरूपग्रहणमभिधेयव्युदासार्थम्। तत्कृताऽतो मतिः कुत इति। नैवेत्यर्थः। एतेनानाप्तप्रणीतोक्तिजन्यत्वादित्येतस्याश्रयासिद्धतोक्ता। बाधवर्जनादित्येतस्य च स्वरूपतोऽसिद्धता निश्चितां दर्शयन्नाह—नहि शीर्यत इत्यादि। अशीर्योऽयं नहि शीर्यते अवि-

नाशी(वा)अरे अयमात्मेतिवेदे पठ्यते। तस्य—पुरुषस्य—आत्मनः पुरः—पूर्वं नैरात्म्यसिद्धौ, बाधोक्ता। अतो निश्चितमसिद्धत्वमस्य। ननु च—चोदनेति क्रियायाः प्रवर्त्तकं वचनमाहुरिति वचनाद्वैदिकैकदेशविशेष एव चोदनोच्यते, न तु सर्वो वेदः, चोदनाजनिता(तु)बुद्धिः पक्षीकृता। तस्मादन्यार्थस्य वेदस्य बाधायामपि न चोदनाया बाधेति हेतोः सिद्धिरेव। नैष दोषः—चोदनाग्रहणेन क्वचित्सर्वमेव वैदिकं वाक्यमुच्यते, नतु सर्वदा प्रवर्त्तकमेव। अन्यथा न हिंस्याद्भूतानीत्येतद्वाक्यं चोदना न स्यात्, अप्रवर्त्तकत्वात्। यच्चोक्तं भाष्ये—उभयमिह चोदनया लक्ष्यतेऽर्थोऽनर्थश्चइति, तदपि विरुध्येत, नहि चोदनाऽनर्थे प्रवर्त्तयति, येन तयाऽनर्थो लक्ष्यत इति स्यात्। किंच—यदेतदपरमुक्तं भाष्ये विप्लवते खल्वपि कश्चित्पुरुषकृताद्वचनात्प्रत्ययो नतु वेदवचनस्य मिथ्यावसाये किञ्चन प्रमाणमस्तीति। अस्य (नित्यस्य ?) तावद्बाधनाच्चोदनायामपि बाधा साम्भव्यमाना दुर्वारैव। तथाहि कुमारिलेनोक्तम्—अकर्तृकत्वसिद्ध्या च हेतुत्वं साधयिष्यते इति। यथाचाकर्तृकस्यापि नित्यपुरुषादिविषयस्य वेदवचसो बाधा परिस्फुटासमीक्ष्यते। तथाग्निहोत्रात्स्वर्गो भवतीत्यादावपि वा(सा ?)शङ्का दुर्वारैवेति स्फुटा तावत्सन्दिग्धासिद्धता पूर्वोक्तैव। अतएव पुनर्निर्वर्त्त्य सन्दिग्धासिद्धतामेव द्रढयन्नाह—करामलकवदित्यादि। तत्रेति। देशकालनरान्तरे। तत्र यदुक्तम्— नचैष देशान्तरे कालान्तरे पुरुषान्तरे वा वपर्येति तस्मादवितथ इति, तदनेन दूषितं भवति ॥ २८०४॥ २८०५॥ २८०६॥ § 9083

यदुक्तम्—तस्मादालोकवदित्यत्राह—नराविज्ञातरूपार्थ इत्यादि। § 9084

नराविज्ञातरूपार्थे तमोभूते ततः स्थिते।
वेदेऽनुरागो मन्दानां स्वाचारे पारसीकवत्॥
२८०७ ॥§ 9086

अविज्ञाततदर्थाश्च पापनिष्यन्दयोगतः।
तथैवामी प्रवर्त्तन्ते प्राणिहिंसादिकल्मषे॥
२८०८ ॥§ 9088

रूपम्—स्वरूपम्, अर्थः—अभिधेयः, नराविज्ञातौ रूपार्थावस्येति विग्र-
744/k हः। तत्र रूपमविज्ञातम्, किमयमेव वर्णोऽथान्यो विशेष एव वर्णक्रम उत नेति स्वतः परतश्च निश्चयायोगात्। एवमर्थेऽप्यनिश्चयो द्रष्टव्यः। ततश्च तमोभूते—निश्चयाभावेनानालोकभूतत्वात्। (पापं) पूर्वपापाभ्यासवासना, तन्निष्यन्दः। तथैवेति। पारसीकवत्॥ २८०७॥ २८०८॥ § 9089

यदुक्तमादौ—अवश्यं धर्माधर्मार्थिभिः पुरुषैः प्रेक्षावद्भिश्चोदनैव प्रमाणत्वेनाश्रयणीयेति, तत्राह—धर्मं प्रतीत्यादि। § 9090

धर्मं प्रति न सिद्धाऽतश्चोदनानां प्रमाणता।
स्वतोऽन्येभ्यश्च मन्देभ्यस्तदर्थानवधारणात्॥
२८०९॥§ 9092

धर्मग्रहणमुपलक्षणम्, अधर्मोऽपि ग्रहीतव्यः॥ २८०९॥ § 9093
यद्येवं कस्तर्हि धर्मादिव्यवस्थाश्रय इत्याह—ज्ञानेत्यादि। § 9094

ज्ञानालोकव्यपास्तान्तस्तमोराशिः पुमानतः।
श्रुत्यर्थानां विविक्तानामुपदेशकृदिष्यताम्॥ २८१०॥
इति श्रुतिपरीक्षा§ 9097

अन्तस्तमः—क्लिष्टाक्लिष्टमज्ञानम्, ज्ञानालोकेन व्यपास्तो ध्वस्तोऽन्तस्तमोराशिर्येन स तथोक्तः। विविक्तानामिति। अनवद्यानाम्—सुधीनाम्, (शुद्धानाम् ?)पशुवधकाममिथ्याचारादिकलङ्कानङ्कितानामित्यर्थः। उपदेशकृदिष्यतामिति। एवं हि तदपौरुषेयत्वं प्रकल्पितं सार्थकं भवतीति भावः। अन्यथा हि तस्मिन्नविज्ञातार्थे तदपार्थकमेव स्यात्। अनेनैतदुक्तं भवति-योऽयं स्वतःप्रामाण्याभ्युपगमो भवतां, स न विना सर्वज्ञेन युक्त इत्यतोऽवश्यं सोऽभ्युपगन्तव्यः, अन्यथा तत्र प्रामाण्यासिद्धिरिति प्रतिपादितत्वात्। ततश्च तदुक्तमेव परं वचनं धर्मादिसमाश्रयोऽस्तु, किमपरमप्रमाणोपपन्नापौरुषेयत्वकल्पनया। यच्चोक्तम्—योगिप्रत्यक्षसमाधिगम्योऽपिधर्मादिर्न भवतीति, तदपि शे(दो ?)षवत्, अनुमा(ने)न योगिनः पश्चात्साधयिष्यमाणत्वादिति भावः॥ २८१०॥ § 9098

इति श्रुतिपरीक्षा

०.२६ स्वतःप्रामाण्यपरीक्षा।

एवमित्यादिना—भूयः स्वतन्त्रश्रुतिनिःसङ्गत्वमेव प्रकारान्तरेण समर्थयते। § 9100

एवं च पौरुषेयत्वे वेदानामुपपादिते।

स्वतःप्रामाण्यमप्येषां प्रतिक्षिप्तमयत्नतः॥
२८११॥§ 9102

745/k

तथाहि श्रुतेः प्रामाण्यं यथा स्यादिति मन्यमानाः सामान्येन सर्वप्रमाणानां स्वतःप्रामाण्यमप्रामाण्यं तु परत इत्याहुर्जैमिनीयाः। परतः किल प्रामाण्येऽनवस्थादिदोषप्रसङ्गात्प्रमाणेतरव्यवस्थोच्छेदः स्यात्। तथाहि चत्वारः पक्षाः सम्भवन्ति—कदाचिदुभेऽपि प्रामाण्याप्रामाण्ये स्वत एवेति प्रथमः, कदाचिदपरतएवेति द्वितीयः, प्रामाण्यं परतोऽप्रामाण्यं तु स्वत एवेति तृतीयः, एतद्विपर्ययश्चतुर्थः। तत्र न तावदाद्यः पक्षः, तथाहि—एकव्यक्त्याधारं वा तदुभयं स्याद्व्यक्तिभेदेन वा। न तावदेकस्यां व्यक्तौ परस्परपरिहारस्थितलक्षणयोः प्रामाण्येतरधर्मयोः सम्भवः, विरोधात्। नापि व्यक्तिभेदेन, नियमकारणाभावान्निश्चयहेत्वसम्भवाच्चाऽसङ्कीर्णप्रमाणाप्रमाणव्यवस्थानाभावप्रसङ्गत्। तथाहि द्वयोरपि स्वातन्त्र्यादिदं प्रमाणमेवेति नियमो न स्यात्। बाधसामान्येन च द्वयोरपि तिरोहितभेदत्वादन्यस्य चावधारणकारणस्यानभ्युपगमाद्विभागेनापरिज्ञानादिदं प्रमाणमप्रमाणमिति व्यवस्था न स्यात्। नापि द्वितीयः पक्षः, प्रागुभयस्वभावरहितस्य ज्ञानस्य निःस्वभावत्वप्रसङ्गात्। नहि परस्परपरिहारस्थितलक्षणयोः प्रामाण्येतरयोरभावे रूपान्तरमस्य शक्यमवधारयितुमित्यसंशयमस्यानुपाख्यत्वमापद्यते। आह च— स्वतस्तावद्द्वयं नास्ति विरोधात्परतो नच। निःस्वभावत्वमेवं हि ज्ञानरूपे प्रसज्यते॥ विज्ञानव्यक्तिभेदेन भवेच्चेदविरुद्धता। तथाऽप्यन्यानपेक्षत्वे किं क्वेति न निरूप्यते॥ इति। नापि तृतीयः पक्षोऽनवस्थादोषात्। तथाहि—न तावत्परतोऽप्रमाणभूतात्प्रामाण्यमाशंसनीयम्, तस्यस्वयमेवाप्रमाणत्वात्। नापि प्रमाणभूतात्, तस्यापि तुल्यपर्यनुयोगेन परतःप्रामाण्याशंसायामनवस्थाप्रसङ्गात्। ततश्चैकप्रमाणव्यक्तिव्यवस्थापनाय प्रमाणपरम्परामनुसरतः सकलमेव पुरुषायुषमुपयुज्यते। तस्माद्गत्यन्तरासम्भवात्स्वतः सर्वप्रमाणानां प्रामाण्यम्, परतोऽप्रामाण्यमिति गृह्यताम्। तत्र प्रयोगः—ये यद्भावनियतास्ते तं प्रति न परमपेक्षन्ते, यथाऽऽकाशममूर्त्तत्वाय, प्रमाणभावनियताश्च विवादास्पदीभूता विज्ञानादय इति व्यापकविरुद्धोपलब्धिः। न चास्याऽनैकान्तिकत्वम्, स्वतोऽसम्भविनो धर्मस्य परेणाधातुमशक्यत्वादाकाशस्येव मूर्त्तत्वं यदाह— नहि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यत इति॥ २८११॥ § 9103

अत्र स्वत इत्यादिना तुच्छं प्रतिज्ञार्थं सम्भावयंस्तद्विचारद्वारेण दूषणमारभते। § 9104

स्वतःसर्वप्रमाणानां प्रामाण्यमिति गृह्यताम्।

१८ क्वेति न] Correction : ; क्क नेति (sic !)क्वेति न

इत्येतस्य च वाक्यस्य भवद्भिः कोऽर्थ इष्यते॥
२८१२॥§ 9106

746/k

कोऽर्थ इष्यत इति प्रश्ने पर आह—मेयबोधादिक इत्यादि। § 9107

मेयबोधादिके शक्तिस्तेषां स्वाभाविकी स्थिता।
नहि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते॥
२८१३॥§ 9109

यदि ज्ञानं प्रमाणं तदा तस्य मेयबोधे—प्रमेयपरिच्छेदे स्वाभाविकी शक्तिः, अर्थपरिच्छेदकत्वाज्ज्ञानस्य। अथ चक्षुरादीनि तदा तेषां यथार्थ-ज्ञानजनने, चोदनायाअतीन्द्रियार्थाधिइगमे स्वत एव शक्तिरित्येतदादिशब्देन संगृहीतम्। अत्रैव तावत्पर उपपत्तिमाह—नहीत्यादि॥ २८१३॥ § 9110

एतदेव दर्शयन्नाह—अनपेक्षत्वमेवैकमित्यादि। § 9111

अनपेक्षत्वमेवैकं प्रामाण्यस्य निबन्धनम्।
तदेव हि विनाश्येत सापेक्षत्वे समाश्रिते॥
२८१४॥§ 9113

प्रामाण्यस्येति। प्रामाण्यव्यवस्थानस्य। तदेव हीति। प्रामाण्यम्। व्याप-कनिवृत्तौ व्याप्यस्यानवस्थानात्॥ २८१४॥ § 9114

स्यादेत्—विनाश्यतां नाम को दोष इत्याह—को हीत्यादि। § 9115

को हि मूलहरं पक्षं न्यायवाद्यध्यवस्यति।
येन तत्सिध्द्युपायोऽपि स्वोक्त्यैवास्य विनश्यति॥
२८१५॥§ 9117

मूलम्—प्रामाण्यम्, तच्च सापेक्षत्वेनापह्नि(?)यते, तस्य तद्व्यापकविरुद्ध-त्वात्। तथाहि—निरपेक्षत्वेन प्रामाण्यं व्याप्तम्, तच्च कथं स्वव्यापकविरुद्धे सापेक्षत्वे सत्यवस्थां लभेत। येनेत्यादिना प्रामाण्यस्यानपेक्षत्वेन व्याप्तिं दर्श-यति—येनेति। यस्मादित्यर्थः॥ २८१५॥ § 9118

कथं विनश्यतीत्याह—सापेक्षं हीति। § 9119

सापेक्षं हि प्रमाणत्वं न व्यवस्थाप्यत क्वचित्।

२ व्यवस्थाप्यत] Correction : ; व्यस्थाप्यते (sic !)व्यवस्थाप्यत

अनवस्थितहेतुश्च कः साध्यं साधयिष्यति॥
२८१६॥§ 9121

न व्यवस्थाप्यत इति। अनवस्था स्यात्। भवत्वनवस्थादोष इत्याह—अनवस्थित इत्यादि। अनवस्थितोऽपरिनिश्चितो हेतुर्यस्य वादिनः स तथोक्तः। एतदुक्तं भवति—ज्ञातो हि ज्ञापको व्याप्यमर्थं ज्ञापयति, न सत्तामात्रेण, ततश्च वादी स्वयमेव तावदप्रतिपन्नः कथं परप्रतिपादनाय साधनमुपादास्यते॥ २८१६॥ § 9122

747/k

इत्येवमित्यादिना दूषणमारभते। § 9123

इत्येवमिष्यतेऽर्थश्चेन्ननु चाव्यतिरेकिणी।
शक्तिः सर्वपदार्थानां पुरस्तादुपपादिता॥
२८१७॥§ 9125

इष्टकार्यसमर्थं हि स्वरूपं शक्तिरुच्यते।
तस्य भावात्मताभावे भावो न स्यात्सकारकः॥
२८१८॥§ 9127

तत्र स्वाभाविकीति कोऽर्थोऽभिप्रेतः, किं नित्यत्वेन निर्हेतुकत्वात्स्वाभाविकी, आहोस्विदनित्याऽपि सती स्वहेतुभ्यो ज्ञानानां स्वभावनिष्पत्तिकाल एव भवति न तूत्तरकालं हेत्वन्तरेणाधीयत इति कृत्वा स्वाभाविकीति विकल्पद्वयम्। तत्र न तावदाद्यो विकल्पः, तथाहि—सा व्यतिरिक्ता वा भवेदव्यतिरिक्ता वा यद्वोभयानुभयस्वभावेति चत्वारः पक्षाः। तत्र न तावदाद्यः, सम्बन्धासिद्धेः पदार्थस्याकारकत्वप्रसङ्गाच्चेत्यादिना सर्वपदार्थानामव्यतिरिक्तैव शक्तिरिति बहुशः प्रतिपादितत्वात्। एतदेव सूचयन्नाह—इष्टेत्यादि। कार्यकरणसमर्थो हि स्वभावशक्तिस्तस्य च स्वभावस्य भावात्मताया अभावे सति स भावः कारको न स्यात्। ततश्चास्यावस्तुत्वप्रसङ्ग इति भावः॥ २८१७॥ २८१८॥ § 9128

अथाव्यतिरिक्तेति पक्षस्तदा स्वाभाविकी न स्यात्, अर्थस्य हेतुबलभावित्वेनानित्यत्वात्तदव्यतिरिक्ताया अपि शक्तेर्हेतुबलभावित्वेनानित्यताप्रसङ्गात्। अन्यथा हि भिन्नयोगक्षेमत्वादभेदो न स्यात्। एतदेवाह—सा चानित्येदृशीत्यादि। § 9129

सा चानित्येदृशी शक्तिः स्वहेतुबलभाविनी।

स्वाभाविकी प्रमाणानां युष्माभिः कथमिष्यते॥
२८१९॥§ 9131

किञ्च प्रमाणानां शक्त्यव्यतिरेकाच्छक्तिस्वरूपवन्नित्यत्वाहेतुत्वप्रसङ्ग इति दर्शयन्नाह—स्वाभाविक्यां हीत्यादि। § 9132

स्वाभाविक्यां हि शक्तौ स्यान्नित्यता हेतुताऽथवा।
प्रमाणानां च तादात्म्यान्नित्यताहेतुते ध्रुवम्॥
२८२०॥§ 9134

ततश्च को दोष इत्याह—सदाभाव इत्यादि। § 9135

सदाभावोऽथवाऽभावोऽहेतुत्वेऽप्यनपेक्षणात्।
अतः कार्यं तदायत्तं कादाचित्कं न युज्यते॥
२८२१॥§ 9137

दृश्यते च प्रमाणानां स्वरूपं कार्यमेव च।
कादाचित्कमतः शक्तिर्व्यक्ता स्वाभाविकी न वः॥
२८२२॥§ 9139

748/k

अहेतुत्वे सदाभावोऽभावो वा। नित्यत्वे तु सदाभावोऽनु(क्तोऽपि) सिद्ध एवेति नोक्तः। अपरमपि प्रसङ्गमाह—अत इत्यादि। तदायत्तमिति। प्रमाणायत्तम्। एतेन यथायोगं प्रत्यक्षानुमानविरोधौ प्रतिज्ञाया दर्शितौ। तथाहि प्रमाणानां स्वरूपं कादाचित्कं प्रत्यक्षत एव सिद्धम्। अनुमानतोऽपि कार्यक्रमतोऽनुमितम्, ततश्च तस्य नित्यत्वाभ्युपगमः स्फुटतरमेव प्रमाणाभ्यां बाध्यत इति॥ २८२१॥ २८२२॥ § 9140

प्रमाणानामित्यादिना परस्य यथोक्तप्रसङ्गद्वयसमर्थ(समाधा ?)नोपायमाशङ्कते। § 9141

प्रमाणानां स्वरूपं चेद्व्यञ्जकैर्व्यक्तिमश्नुते।
प्रत्ययान्तरसापेक्षं कार्यमारभते च तत्॥
२८२३॥§ 9143

यदा हि व्यञ्जकैः प्रमाणस्वरूपं व्यज्यते तदा तदुपलभ्यते नान्यदेति। तेन सत्यपि नित्यत्वे न सर्वदोपलब्धिप्रसङ्गः। नापि कार्यस्य सदा सद्भावप्रसङ्गः, कारणान्तरापेक्षस्य कार्यारम्भकत्वाभ्युपगमात्, न केवलमस्य। तेन कारणान्तरसन्निधानासन्निधानाभ्यां कार्यस्य कादाचित्कता भवतीति भावः॥ २८२३॥ § 9144

व्यक्तीत्यादिना प्रतिविधत्ते। § 9145

व्यक्तिहेत्वन्तरापेक्षे व्यस्ते नित्यस्य वस्तुनः।
तस्मात्तद्रूपकार्याणां नित्यां स्यादुपलम्भनम्॥
२८२४॥§ 9147

व्यक्तिश्च हेत्वन्तरापेक्षा चेति व्यक्तिहेत्वन्तरापेक्षे। पूर्वं हि श्रुतिपरीक्षायां विस्तरेण व्यक्तिर्नित्यस्य निरस्ता। हेत्वन्तरापेक्षा चानुपकार्यस्यायुक्तेति प्रतिपादितम्।तद्रूपकार्याणामिति। तेषाम्—प्रमाणानाम्। रूपकार्याणि—रूपं—स्वभावः। उभयपक्षस्तु विरोधाद्यथोक्तपक्षद्वयभाविदोषप्रसङ्गान्न युक्तः। नाप्यनुभयपक्षः, परस्परव्यवच्छेदरूपाणामेकनिषेधस्यापरविधिनान्तरीयकत्वान्न तदानीमेव विहितस्य निषेधो युक्तः, एकत्र विधिप्रतिषेधयोर्विरोधादिति भावः। स्फुटतरत्वाद्दूषणस्यैतन्नोक्तम्॥ २८२४॥ § 9148

इदानीमन्तिमं पक्षत्रयमभ्युपगम्य दूषणमाह—पृथक्त्वमित्यादि। § 9149

पृथक्त्वमुभयात्मत्वं वाऽस्तु शक्तेस्तथाऽपि तत्।
ज्ञानं नित्यं भवेदेव नित्यशक्त्या हि सङ्गतम्॥
२८२५॥§ 9151

पृथक्त्वं—व्यतिरेकपक्षः। उभयात्मकग्रहणमुपलक्षणम्। अनुभयात्मकपक्षाङ्गीकारोऽपि द्रष्टव्यः। यद्वा—तस्याप्युभयरूपप्रतिषेधस्वभावतयोभयात्मकत्वमस्त्येव। अस्मिन्पक्षत्रयेऽपि नित्यया शक्त्या ज्ञानस्य सम्बन्धान्नित्यत्वं स्यात्॥ २८२५॥ § 9152
749/k

कथमित्याह—अन्यथा हीत्यादि। § 9153

अन्यथा हि न नित्या स्यादेकरूपासमन्वयात्।
कदाचित्सा हि सम्बद्धा तज्ज्ञानेन नचान्यदा॥
२८२६॥§ 9155

अन्यथा हि यदि शक्तिसम्बद्धं ज्ञानमनित्यं भवेत्तदा शक्तेर्नित्यत्वं न प्राप्नोति। कुतः ?। एकरूपासमन्वयात्। एकस्वभावानुगमाभावादित्यर्थः। थमेवैकरूपासमन्वयं दर्शयति—कदाचिदित्यादि। अनित्ये हि विज्ञाने सति शक्तेस्तज्ज्ञानसम्बन्धासम्बद्धस्वभावद्वयं स्यात्, न चैकस्य परस्परविरुद्धस्वभावद्वयसम्भवो युक्तः, एकत्वहानिप्रसङ्गात्। भेदव्यवहारोच्छेदापत्तेश्च॥ २८२६॥
§ 9156

द्वितीयं विकल्पमधिकृत्याह—अथेत्यादि। § 9157

अथ शक्तिः स्वहेतुभ्यः प्रमाणानां प्रजायते।
जातानां तु स्वहेतुभ्यो नान्यैराधीयते पुनः॥
२८२७॥§ 9159

तदत्रेत्यादिना सिद्धसाध्यतां पक्षदोषमाह। § 9160

तदत्र न विवादो नः को ह्यनंशस्य वस्तुनः।
स्वहेतोरुपजातस्य शक्तिं पश्चात्प्रकल्पयेत्॥
२८२८॥§ 9162

यन्नामोत्तरकालं हि रूपमाधीयते परैः।
तद्भावान्तरमेवेति न तस्यात्मोपदिश्यते॥
२८२९॥§ 9164

तथाहि स्थिरास्थिरस्वभावभेदेन द्विप्रकारस्यापि पदार्थस्य निरंशत्वात्सर्वात्मनापरिनिष्पत्तेर्नोत्तरकालं प्रत्ययान्तरेणात्मभूता शक्तिराधातुं पार्यते, आधानेवाऽर्थान्तरकरणमेव स्यात्, न तु स्वभावभूतशक्त्याधानम्। भावस्वभावानभ्युपगमे वा शक्तेरकारकत्वप्रसङ्ग इत्युक्तम्॥ २८२८॥ २८२९॥
§ 9165

स्यादेतत्—माभूदनंशस्य वस्तुन उत्तरकालं शक्त्याधानम्, सांशस्य कस्मान्न भवतीत्याह—विरुद्धधर्मसङ्गो हीत्यादि। § 9166

विरुद्धधर्मसङ्गो हि वस्तूनां भिन्नतोदिता।
तन्निष्पत्तावनिष्पत्तेः शक्तावपि स विद्यते॥
२८३०॥§ 9168

स विद्यत इति। विरुद्धधर्मप्रसङ्ग॥ २८३०॥ § 9169
अस्थिरे तु भावे विशेषेण दूषणमाह—साधितेत्यादि। § 9170

साधितक्षणभङ्गश्च सर्वेऽर्था इति तेषु न।
प्रत्ययान्तरमाधातुं शक्तं किंचन शक्तिमत्॥
२८३१ ॥§ 9172

750/k

नहि तेषामवस्थानं परस्तादस्ति येन ते।
प्रत्ययान्तरतः शक्तिं लभेरन्कुत्रचित्फले॥
२८३२ ॥§ 9174

कुत्रचित्फल इति। अर्थनिश्चयादौ। शेषं सुबोधम्॥ २८३१॥ २८३२॥
§ 9175

स्यादेतत्—यदि भवतां न विवादः कथं तर्हि परतःप्रामाण्यमभ्युपगतमित्यत आह—एतावत्त्वित्यादि। § 9176

एतावत्तु वदन्त्यत्र सुधियः सौगता इमे।
ज्ञाने क्वचित्स्थिताऽप्येषा न बोद्धुं शक्यते स्वतः॥
२८३३ ॥§ 9178

बोद्धुमिति। निश्चेतुम्। स्वत इति। विज्ञानस्वरूपादनुभवमात्रादनपेक्षितोत्तरकालभाविकार्यसंवादात्॥ २८३३॥ § 9179
स्यादेतत्—विज्ञानाव्यतिरेकाच्छक्तेर्विज्ञानग्रहेणे साऽपि गृहीतैव। तत्कथं बोद्धुं न शक्यत इत्याह—यथाऽवस्थितेत्यादि। § 9180

यथाऽवस्थितविज्ञेयवस्तुबोधाप्तिशक्तताम्।
को नामानुभवात्मत्वान्निश्चेतुं केवलात्प्रभुः॥
२८३४ ॥§ 9182

बोधश्चाप्तिश्च बोधाप्ती, यथावस्थितस्य विज्ञेयस्य वस्तुनो ये बोधाप्ती, तत्र—तद्विषये, शक्ततेति विग्रहः। केवलादिति। सम्बन्धादिकारणगुणपरिज्ञानानपेक्षात्॥ २८३४॥ § 9183
कस्मान्न प्रभुरित्याह—अप्रमाणे इत्यादि। § 9184

अप्रमाणेऽपि येनैतत्केशपाशादिदर्शने।
विद्यतेऽनुभवात्मत्वं विस्पष्टाकारभासिनि॥
२८३५॥§ 9186

केशपाशादिदर्शन इति। केशोंड्रकादिदर्शने। अनेनैतदाह—यद्यप्यनुभूताशक्तिस्तथाप्यप्रमाणसारूप्याद्भ्रान्तेर्निश्चेतुं न शक्यते विषादिशक्तिवत्। नह्यनुभव एव केवलो निश्चयहेतुरन्यस्याप्यभ्यासादेरपेक्षणात्। यत्र ह्यंशे भ्रान्तिनिमित्तेन न गुणान्तरमारोप्यते तत्रैव निश्चयः॥ २८३५॥ § 9187

कुतस्तर्हि सा निश्चितव्येत्याह—तस्मादित्यादि। § 9188

तस्मादर्थक्रियाज्ञानमन्यद्वा समपेक्ष्यते।
निश्चयायैव न त्वस्या आधानाय विषादिवत्॥
२८३६॥§ 9190

अन्यद्वेति। हेतुशुद्धिज्ञानम्। न त्वस्या आधानायेति। अन्यदपेक्षत इतिसम्बन्धः। अस्या इति। शक्तेः। निश्चयस्य पुरुषाधारत्वात्तदुत्पत्तये युक्ता कारणा न्तरापेक्षा, नत्वाधानाय, तस्य शक्त्याधारत्वात्, शक्तेश्च सहभाव- 751/k निष्पत्तौ निष्पन्नत्वादिति भावः॥ २८३६॥ § 9191

यथाहीत्यादिना विषादिवदिति दृष्टान्तं व्याचष्टे। § 9192

यथाहि विषमद्यादेस्तदन्यसमतेक्षणात्।
फलानन्तरताभावाचैतदात्माविनिश्चये(यः?)॥
२८३७॥§ 9194

मूर्च्छास्वेदप्रलापादितत्फलोत्पत्तिनिश्चये।
तादात्म्यं गम्यतेऽप्येवं ज्ञाने तच्छक्तिनिश्चयः॥
२८३८॥§ 9196

तदन्यसमतेक्षणादिति। तस्माद्विषादेरन्यन्नागरपानकादि, तेन समता—सारूप्यम्, तस्या ईक्षणमिति विग्रहः। फलानन्तरताभावादिति। फलं मूर्च्छादि, तस्यानन्तरताया अभावादिति विग्रहः। अनन्तरं फलाभावादिति यावत्। एतदात्माविनिश्चय इति। विषादाद्याऽऽत्माविनिश्चये (यः ?)। तादात्म्यमिति। विषादिस्वभावत्वम्। तच्छक्तिनिश्चय इति। यथावस्थितज्ञेयवस्तुबोधाप्तिनिश्चयः ॥ २८३७॥ २८३८॥ § 9197

स्ववचनविरोधं प्रतिज्ञायाः प्रतिपादयन्नाह—किञ्चेत्यादि। § 9198

किञ्चाविवादमेवेदं प्रामाण्यं शक्तिलक्षणम्।
प्रमाणान्तरनिश्चेयमित्येवं हि त्वयोदितम्॥
२८३९॥§ 9200

शक्तयः सर्वभावानां कार्यार्थापत्तिसाधनाः।
इत्यर्थापत्तितः सिद्धं न सिद्धं परतः कथम्॥
२८४०॥§ 9202

न सिद्धं परतः कथमिति। सिद्धमेव। अर्थापत्तेः प्रमाणान्तरत्वादिति भावः ॥ २८३९॥ २८४०॥ § 9203

यदुक्तम्—तदेव हि विनाश्येतेति, तस्यानैकान्तिकत्वं प्रतिपादयन्नाह—निष्पन्नेत्यादि। § 9204

निष्पन्नानंशरूपस्य प्रामाण्यस्य स्वहेतुतः।
तदेवं न विनाशाप्तिर्निश्चयेऽन्यव्यपेक्षणात्॥
२८४१॥§ 9206

एतदेव स्पष्टयन्नाह—न तत्स्वभावेत्यादि। § 9207

न तत्स्वभावनिष्पत्त्यै प्रमान्तरमपेक्ष्यते।
तद्रूपनियार्थं तु प्रतिपत्तावपेक्ष्यते॥ २८४२॥§ 9209

752/k

स्यादेतत्—यदि भवतां ज्ञानापेक्षया परतःप्रामाण्यं साध्यते, तदाऽस्माकमपि सिद्धसाध्यता। तथाहि—ज्ञानमप्यर्थापत्तितस्तावत्सिद्धमिष्यते, किमङ्ग पुनः तच्छक्तिरूपं प्रामाण्यम्। अर्थनिश्चयलक्षणे स्वकार्ये तु कर्त्तव्ये ज्ञानं नापेक्षत इति स्वतस्तदुच्यत इति। तदेतदसम्यक्। प्रामाण्यनिश्चयमन्तरेण स्वार्थनिश्चयस्यैवासम्भवात्। संशयादिविषयीकृतस्य च कथं कार्ये निरपेक्षता, प्रमाणान्तरग्रहणापेक्षायां वा कथं स्वपक्षे अनवस्था न स्यादिति यत्किञ्चिदेतत्॥ २८४२॥ § 9210

किञ्चेत्यादिना हेतोस्तद्भावनियतत्वादित्येतस्यानैकान्तिकतामुद्भावयति। § 9211

किञ्चाप्रामाण्यमप्येवं स्वत एव प्रसज्यते।
नहि स्वतोऽसतस्तस्य कुतश्चिदपि सम्भवः॥
२८४३॥§ 9213

अनपेक्षत्वमेवैकमप्रामाण्यनिबन्धनम्।
इत्याद्यं वाऽप्यनिःशेषमभिधातुं हि शक्यते॥
२८४४॥§ 9215

विसंवादनसामर्थ्यं निश्चयं तु यथाऽन्यतः।
तथा संवादसामर्थ्यं सर्वथाऽतो द्वयं समम्॥
२८४५॥§ 9217

ततः कोऽतिशयो दृष्टः प्रामाण्यस्य विपर्ययात्।
येन स्वतस्तदेवेष्टं परतस्त्वप्रमाणता॥ २८४६॥§ 9219

तथा संवादसामर्थ्यम्—निश्चयमन्यत इति वर्त्तते। समं द्वयमिति। प्रमाणमप्रमाणं च। विपर्ययादिति। अप्रामाण्यात्। योऽपि मन्यते। न नित्यत्वाच्छक्तीनां स्वाभाविकत्वं नापि स्वहेतुभ्य एवोत्पत्तेरुत्तरकालं कारणान्तरानपेक्षणात्। किं तर्हि ?। स्वभावत एव भावानां प्रतिनियतरूपाः शक्तयः समुद्भवन्तीति स्वाभाविकत्वमासाम्। तथाहि—यदेव स्वात्मनि रूपमस्ति कारणानां तदेव तैः कार्ये समाधीयते, यथा कापालैरुपजन्यमाने घटे रूपादयः स्वगुणद्वारेणैव प्रारभ्यन्ते, उदकाद्याहरणशक्तिस्तु तैरात्मन्यविद्यमानत्वान्नाधीयते घटे, स्वत एव तु सा तस्य प्रादुर्भवति, तथा ज्ञानेऽपि तत्कारणैरिन्द्रियादिभिरर्थपरिच्छेदशक्तिरात्मन्यविद्यमानत्वान्नाधीयते, स्वत एव सा तस्य भवतीति। अतः स्वाभाविकी शक्तिरिति तस्याप्येतत्प्रलापमात्रम्। अनेन न्यायेनाप्रामाण्यस्यापि स्वत एव प्रसङ्गात्। तथाहि—तदपि विपरीतार्थपरिच्छेदादिशक्तिलक्षणम्, न च नयनादीनां तथाविधशक्तियोगोऽस्तीति। किञ्च—यद्यात्मन्यविद्यमानं रूपं कारणैर्नाधीयते कार्ये, तदा कथमिन्द्रियादयो ज्ञाने(न ?) रूपतामात्मन्यसतीमादधति विज्ञाने। त(य ?)थाऽविद्यमानापि सा तैराधीयते, (तथा) अर्थपरिच्छेदशक्तिं किं 753/k
नादधीरन्। नहि तदाधाने तेषां कश्चित्प्रतिरोद्धा। किञ्च—यदि तावदव्यतिरेकिण्यः शक्तयो भावादभ्युपगम्यन्ते,तदा भावस्वरूपवत्तासामपि हेतुप्र-

तिबद्धैरात्मस्थितिरिति कुतः स्वाभाविकत्वमासाम्। अथ व्यतिरेकिण्यस्तदा स्वयमेव भावान्न स्वाश्रयैस्तासां सम्बन्धः सिद्ध्यति, तेषां तदनुपकारकत्वात्। नचानुपकारक आश्रयो युक्तोऽतिप्रसङ्गात्। किञ्चानिमित्ताःस्वातन्त्र्येणैता भवन्त्यो न देशकालनियममपेक्षेरन्। तथाहि—यस्य यत्किञ्चित्कचिदायत्तमनायत्तं वा भूत्वोपलीयते। न वा यत्पुनरनायत्तं स्वातन्त्र्येण प्रवृत्तम्,तत्किमिति कदाचित्क्वचिद्विरमेत्। ततश्च प्रतिनियतशक्तियोगिता भावानां न स्यात्। अन्यथा सर्वस्य सर्वत्रोपयोगः स्यादिति। अन्ये तु मन्यन्ते—तत्कार्यदर्शनमाश्रित्येदमुच्यते—स्वतः सर्वप्रमाणानामित्यादि। यतः सर्व एव भावाः सन्तएव कारणैः क्रियन्ते कार्योत्पादनियमात्। नह्यसन्तो व्योमकुसुमादयः क्वचिदपि शक्यन्ते कर्तुम्, सिकतासु वा तैलम्। असत उत्पत्तौ सर्वस्यासत्त्वेऽतिशयाभावात् सर्वदा सर्वत्र चोत्पत्तिः स्यादिति। तदेतदयुक्तम्। कारणवैयर्थ्यप्रसङ्गात्। असत्तावद्भवन्मते न किञ्चित्क्रियते। सतोऽपि सर्वनिराशंसत्वान्न किञ्चित्कर्त्तव्यमस्तीति किं हि कुर्वंस्तस्य तत्कारकं भवेत्। अतः कार्यकारणत्वाभावप्रसङ्गः। अभिव्यक्तिः सतः क्रियत इति चेन्न। तस्या अपि सदसत्त्वेन करणविरोधात्। यतस्तत्रापीदं विकल्पद्वयमवतरति—किं सा सती क्रियते, आहोस्विदसतीति। प्रथमे पक्षेऽतिशयाभावात्करणानुपपत्तिरित्युक्तम्। तत्राप्यभिव्यक्त्याश्रयणेऽनवस्थाप्रसङ्गः। नापि द्वितीयः पक्षोऽसतः क्रियानभ्युपगमात्। अभ्युपगमे वा भावस्याप्यसतः करणप्रसङ्गात्। किञ्चार्थान्तरभूता वा भावादभिव्यक्तिः क्रियेत अनर्थान्तरभूता वा। यद्यर्थान्तरभूता क्रियेत तदा भावस्य न किञ्चित्कृतं स्यात्। नह्यन्यस्य करणेऽन्यत्कृतं नाम, अतिप्रसङ्गात्। तत्सम्बन्धिन्यभिव्यक्तिः क्रियत इति चेत्र। अनुपकार्यतया तत्सम्बन्धित्वासिद्धेः। उपकारे वाऽभ्युपगम्यमाने तस्याप्यर्थान्तरत्वेऽनवस्थाप्रसङ्गात्सम्बन्धासिद्धिः। अनर्थान्तरत्वेऽपि कारणानां वैयर्थ्यप्रसङ्गः। भावादेवाश्रयभूतादुपकारस्वभावाया अभिव्यक्तेरुत्पादान्नित्याभिव्यक्तिप्रसङ्गः, स्वभावस्याभिव्यक्तिकारणस्य सर्वदा विद्यमानत्वात्। नाप्यनुपकार्यस्य परापेक्षा युक्तेति प्रतिपादितं बहुधा। अथानर्थान्तरभूताऽभिव्यक्तिः क्रियत इति पक्षः,सोऽप्ययुक्तोऽतिशयाभावात्। तथाह्यनर्थान्तरभूता क्रियत इति भावस्वभावः क्रियत इत्युक्तं भवति। तस्य च सत्त्वेन सर्वनिराशंस-
754/k त्वात्करणम युक्तमित्येतदेव चिन्त्यते। किञ्च—अभिव्यक्तिवद्भावस्याप्यसतः करणं स्यादव्यतिरेकात्। भावस्वभाववद्वाऽभिव्यक्तेरपि सत्या एव करणप्रसङ्गः, न चैतदपि युक्तम्, अतिशयाभावात्। अनवस्थाप्रसङ्गादित्युक्तम्। सदर्थविषये च कारणव्यापार इष्यमाणे कारणानां कार्यक्रियानुपरमप्रसङ्गः। किं हि तदोपलभ्य कारणानि निवर्त्तेरन्। कार्यसत्तामिति चेन्न। भवन्मत्या तस्याः प्रागपि भावात्। तस्मादसदेवोत्पद्यते, यस्यकारणमस्ति। न व्योमकुसुमादि। तदुत्पादनसमर्थकारणाभावादिति। अतः कारणशक्तिप्रतिनियमात्कार्यकारणभावनियमो भविष्यति। नहि सर्वो भावः सर्वोत्पादनसमर्थोऽङ्गीक्रियते। अनादिस्वहेतुपरम्परया सर्वभावानां शक्तेर्नियमितत्वात्। यदि

चासत्प्रामाण्यमन्येन कर्तुं न शक्यत इति स्वतस्तदुच्यते, अप्रामाण्यमपि तर्ह्यनेनैव न्यायेन स्वत एव प्राप्नोतीति यत्किञ्चिदेतत्। योऽपि मन्यते प्रामाण्यं नाम विज्ञानस्यार्थपरिच्छेदोत्पादिका शक्तिः, शक्तिश्च क्षणिकविज्ञानाश्रितत्वात्स्वतोऽसती न शक्यते कर्तुम्। कालत्रयेऽपि तस्याः क्रियानुपपत्तेः। तथाहि न तावत्प्राग्विज्ञानोत्पत्तेः क्रियते, आश्रितत्वात्। नह्याश्रितस्याश्रयाभावे करणं युक्तम्, यथा कुड्याभावे चित्रस्य, अनाश्रितत्वप्रसङ्गात्। अतएव सहकरणमप्ययुक्तमाश्रितत्वात्। नहि कुड्यालेख्ययोराश्रयाश्रितयोर्युगपदारम्भः संभवति। नाप्युत्पन्नस्य सतो विज्ञानस्य पश्चात्क्रियते क्षणिकत्वात्। तावत्कालं स्थितेरभावात्। अतःसर्वप्रमाणानां स्वतःप्रामाण्यमुच्यते इति तदेतदसम्यक्—तथाहि—यत्तावदुक्तमर्थपरिच्छेदोत्पादिकाशक्तिः प्रामाण्यमिति तदसम्बद्धम्। अर्थपरिच्छेदस्य ज्ञानपर्यायत्वात्। न च तदेव ज्ञानमाश्रिता सती शक्तिस्तस्यैवोत्पादिका युज्यते, अनाश्रितत्वप्रसङ्गात्समानकालं च कार्यकारणभावादुपपत्तेः। यच्चोक्तमाश्रितत्वात्सह प्राक्च न क्रियत इति। तदप्ययुक्तम्, अव्यतिरेकादाश्रितत्वासिद्धेः। भावस्वभाव एव हि विशिष्टार्थक्रियाकारी तद्भावमात्रजिज्ञासायां शक्तिरिति व्यपदिश्यते। नार्थान्तरम्। अर्थान्तरत्वे भावस्याकारकत्वप्रसङ्गः सम्बन्धासिद्धिश्चेति निर्लोडितमेतद्बहुधा।तस्मात्स्वभावभूता विज्ञानस्य शक्तिरभिन्नयोगक्षेमत्वाद्विज्ञानस्वभाववत्प्राग्विज्ञानोत्पत्तेरसत्येव क्रियत इत्यविरुद्धम्। सहैव च विज्ञानेनोत्पद्यत इत्यपि युक्तमेव। स्वभावभूतस्य धर्मस्य भावेन सहैकयोगक्षेमत्वात्। भवतु नाम शक्तेर्व्यतिरेकः पदार्थात्, तथाऽपि सदसतोराश्रितत्वानुपपत्तेराश्रितत्वमसिद्धम्। तथाहि—सत्तावन्नाश्रयते तस्य सर्वात्मना निष्पत्तेर्निरपेक्षत्वात्। नापि सत आश्रयो युक्तस्तस्याकिञ्चित्करत्वात्। यथा विन्ध्यो हिमवतः। स्थितिस्तेन क्रियत इति 755/k
चेत्। न। स्थितेः स्थातुरव्यतिरेकात्। स्थातुरेव हि स्वभावस्तथा भेदान्तरप्रतिक्षेपेणोच्यते। नच तेनाश्रयेणावस्थातुरात्मा क्रियत इत्यकिञ्चित्कर एव। व्यतिरेकेऽपि स्थितेः स्थातुः स्थापकोऽकिञ्चित्कर एव। अर्थान्तरभूतायाः स्थितेः करणात्। न चान्यस्य करणेनान्यस्य किञ्चित्कृतमित्युभयथापि स्थापकस्याकिञ्चित्करत्वम्। तत्सम्बन्धिनीं स्थितिं करोतीति चेत्। न, स्थाप्यस्थापकयोरिव स्थितिमतः स्थित्या सह सम्बन्धासिद्धेः, अनवस्थाप्रसङ्गश्चेतिनिर्लोडितप्रायमेतत्। किञ्च—यदि पदार्थस्य स्थापिका स्थितिरर्थान्तरभूताऽङ्गीक्रियते, तदा न कस्यचित्पदार्थस्य विनाशः प्राप्नोति। स्थापिकायाः स्थितेर्विद्यमानत्वात्। नापि विनाशहेतुवशात्सत्यामपि स्थितौ विनाशो भविष्यतीति शक्यं वक्तुम्।तस्याप्यकिञ्चित्करत्वादयुक्तं विनाशकत्वम्। तथाहि तत्राप्ययं विकल्पोऽवतरत्येव— किं भावादर्थान्तरभूतं विनाशं नाशहेतुः करोत्याहोस्विद्भावमेव। न तावद्भावमेव करोति, तस्य निष्पन्नत्वात्। अन्यस्य च करणे भावस्य न किञ्चित्कृतमिति तदवस्थत्वात्। भावस्य विनाशाभावादकिञ्चित्करो विनाशहेतुरिति चर्चितमेतत्स्थिरभावपरीक्षायां विस्तरेण। किञ्च—प्रकृत्या भावोऽस्थिरस्वभावो वा स्यात्, स्थिरस्वभावो वा। तत्र यदिप्र-

कृत्यैवास्थिरात्मा भावः स्वहेतोरुत्पन्नः, तदा तेन स्वभावनिष्पत्तेरूर्ध्वं स्वयं न स्थातव्यमेवेति तस्याकिञ्चित्करौ द्वावपि स्थितिनाशहेतू। अथ प्रकृत्या स्थिरात्मा भावः, तथापि तस्य स्वभावान्यथात्वासम्भवान्न कश्चिद्विनाशकः, स्वयमेव स्थावरत्वान्नापि कश्चित्स्थापकः, इत्युभयथा स्थितिनाशहेतू अकिञ्चित्करौ। नाप्यसदाश्रयत इति पक्षः। तस्य सर्वस्वभावरहितत्वेनाधेयत्वव्यापारयोरसम्भवाच्छशविषाणवदित्यसिद्धमाश्रितत्वं शक्तेः। सिद्धौ वाऽनैकान्तिकत्वमाश्रितानामपि रूपादीनां घटे सहोत्पत्तिदर्शनात्। अप्रामाण्येऽपि प्रसङ्गाच्च। तथाह्यप्रामाण्यमपि विपरीतार्थपरिच्छेदोत्पादिका शक्तिः। शक्तेश्च विज्ञानाश्रितायाः कालत्रयेऽप्यकरणात्प्रामाण्यवदप्रामाण्यात्मिका शक्तिः स्वत एव प्रसज्येत। किञ्च— यदि कालत्रयेऽपि ज्ञानस्य शक्तिर्न प्रादुर्भवति, तदा सर्वसामर्थ्यशून्यं विज्ञानं प्राप्नोति। यस्य हि यो धर्मः कालत्रयेऽपि न संजायते, स कथं तस्य सम्भवेत्, यथाऽऽकाशस्य मूर्त्तत्वम्। कुतो वा शक्तिभिरिदमत्यद्भुतमिन्द्रजालं शिक्षितम्, येनैता विज्ञानस्य कालत्रयेप्यसमासादितसम्भवा अपि सत्यस्तेन सह सङ्गतिमनुभवन्तीति। किमप्येतन्महद्भुतं नित्यत्वादनुभवन्तीति चेत्। न। सर्वस्य शक्तियोगिताप्रसङ्गात्। 756/k नियामकाभावात्। नह्यनायत्तस्य प्रतिनियतपदार्थ योगितायां किञ्चित्कारणं नियामकं पश्यामो येनैता विज्ञानस्य भवेयुर्नान्यस्येति।ततश्च प्रत्यासन्ननिबन्धनाभावात्सर्वस्यैवैताः प्राप्नुवन्तीत्युक्तमेतत्। न चापि तासामकिञ्चित्करः कश्चिदाश्रयो युक्तो नित्यत्वेन कस्यचित्स्वभावविशेषस्य कर्त्तव्यस्याभावादित्यलं बहुना॥ २८४३॥ २८४४॥ २८४५॥ २८४६॥ § 9220

पुनरपि प्रकारान्तरेण प्रतिज्ञार्थं विकल्पयन्नाह—स्वत इत्यादि। § 9221

स्वतस्त्वस्य प्रमाणानां प्रामाण्यस्योपवर्णनात्।
स्वकार्ये वृत्तिर्जातानामथाप्यभिमता स्वतः॥
२८४७॥§ 9223

एतदुक्तं भवति। अथ—स्वतःप्रामाण्यमित्यनेनायमर्थोऽभिप्रेतः, जातानामुत्तरकालं स्वत एव कारणान्तरानपेक्षाणां (स्वकार्ये) वृत्तिः—हेतुभाव इति यावत्। तेन यथोक्तदोषानवसर इत्यभिप्रायः परस्य। तत्र प्रमाणानां स्वकार्यं स्वगतप्रामाण्यनिश्चयोऽर्थनिश्चयो वा। एतस्मिन्स्वकार्ये कर्त्तव्ये न हेतुमपेक्षन्ते॥ २८४७॥ § 9224

कुतस्तर्ह्येषां व्यपेक्षेत्याह—आत्मलाभे हीत्यादि। § 9225

आत्मलाभे हि भावानां कारणापेक्षितेष्यते।
लब्धात्मानः स्वकार्येषु वर्त्तन्ते स्वयमेव तु॥
२८४८॥§ 9227

सामान्येन भावानामात्मलाभं प्रति कारणान्तरापेक्षितां प्रतिपाद्य ज्ञानेऽपि योजयन्नाह—उत्पादमात्र इत्यादि। § 9228

उत्पादमात्र एवातो व्यपेक्षास्ति स्वहेतुषु।
ज्ञानानां स्वगुणेष्वेषा नतु निश्चयजन्मनि॥
२८४९॥§ 9230

स्वगुणेष्विति। निश्चयजन्मापेक्षयाऽऽधारसप्तमी। एतदुक्तं भवति—ज्ञानानां ये स्वगता गुणा अविपरीतबोधात्मकत्वं विशुद्धकारणजनितत्वमित्येवमादयस्तेषु निश्चयोत्पादे कर्त्तव्ये न त्वेषां हेतुषु व्यपेक्षाऽस्तीति॥ २८४९॥
§ 9231

यद्येवं कथं तर्हि तेषां तत्र हेतुभावो भवतीत्याह—जनने हीत्यादि।
§ 9232

जनने हि स्वतन्त्राणां प्रामाण्यार्थविनिश्चितेः।
स्वहेतुनिरपेक्षाणां तेषां वृत्तिर्घटादिवत्॥
२८५०॥§ 9234

प्रामाण्यं चार्थश्च—प्रमेय इति प्रामाण्यार्थौ अनयोर्विनिश्चितिः। तस्या जनन इति सम्बन्धः। अर्थनिश्चितिरालोचनापेक्षयोच्यते। अन्येषां स्वयमेव निश्चयात्मकत्वात्। वृत्तिरिति। हेतुभाव इत्यर्थः॥ २८५०॥ § 9235
757/k

मृत्पिण्ड इत्यादिना घटादिवदिति दृष्टान्तं व्याचष्टे। § 9236

मृत्पिण्डदण्डचक्रादि घटो जन्मन्यपेक्षते।
उदकाहरणे त्वस्य तदपेक्षा न विद्यते॥
२८५१॥§ 9238

एवं स्वतःप्रमाणत्वमन्ते चावश्यमेव तत्।
पराधीने प्रमाणत्वे ह्यनवस्था प्रसज्यते॥
२८५२॥§ 9240

एवं प्रतिज्ञार्थाविरोधं समर्थ्य हेतोस्तद्भावनियतत्वादित्यस्य व्याप्तिं प्रसाधयन्नाह—अन्ते चावश्यमेव तदित्यादि। अन्त इति। सर्वपश्चिमे ज्ञान

इत्यर्थः।तदिति। प्रामाण्यम्। कस्मादवश्यमन्तेऽङ्गीकर्त्तव्यमित्याह—पराधीन इत्यादि ॥ २८५१॥ २८५२॥ § 9241

एतदेव दर्शयति—मौलिके चेदित्यादि। § 9242

मौलिके चेत्प्रमाणत्वे प्रमाणान्तरसाध्यता।
तत्र तत्रैवमिच्छन्तो न व्यवस्थां लभेमहि॥
२८५३ ॥§ 9244

यथैव प्रथमं ज्ञानं तत्संवादमपेक्षते।
संवादेनापि संवादः पुनर्मृग्यस्तथैव हि॥
२८५४ ॥§ 9246

मूलम्—प्रथमं ज्ञानम्, तत्र भवं मौलिकम्। तत्समवायीति यावत्। तथाहि परतःप्रामाण्यं कदाचिदर्थक्रियासंवादज्ञानाद्वा भवेत्, कारणगुणपरिज्ञानाद्वा, तत्र न तावदाद्यः पक्ष इति दर्शयन्नाह—यथैवेत्यादि॥ २८५३॥ २८५४॥ § 9247

अथापि स्यादर्थक्रियासंवादिज्ञानस्य स्वत एव प्रामाण्यमिष्टं तेनानवस्था न भविष्यतीत्याह—कस्यचिदित्यादि। § 9248

कस्यचित्तु यदीष्येत स्वत एव प्रमाणता।
प्रथमस्य तथाभावे प्रद्वेषः केन हेतुना॥
२८५५ ॥§ 9250

द्वितीयेऽपि पक्षेऽनवस्थादोषं प्रतिपादयन्नाह—एवं यदि गुणाधीनेत्यादि। § 9251

एवं यदि गुणाधीना प्रत्यक्षादिप्रमाणता।
गुणाश्च न प्रमाणेन विना सन्ति कदाचन॥
२८५६ ॥§ 9253

ततो गुणपरिच्छेदिप्रमाणान्तरमिच्छतः।

३ तत्र] Correction: ; तव (sic!)तत्र

तस्याप्यन्यपरिच्छिन्नगुणायत्ता प्रमाणता॥
२८५७ ॥§ 9255

गुणाधीनेति। कारणगुणपरिज्ञानायत्ता। प्रमाणतेति। प्रमाणतानिश्चयः। न सन्तीति। सद्व्यवहारा(र ?)योग्या न सन्तीत्यर्थः। तस्यापीति। गुणपरिच्छेदिनः प्रमाणस्य। अन्यपरिच्छिन्नगुणायत्तेति। अन्येन प्रमाणेन परिच्छिन्नो 758/k यो गुणस्तन्निश्चयायत्तं प्रामाण्यमित्यर्थः॥ २८५६॥ २८५७॥ § 9256

अत्र दृष्टान्तमाह—यथाऽऽद्य इति। § 9257

यथाऽऽद्ये च तथाऽन्यत्रेत्यनवस्थैव पूर्ववत्।
तत्र तत्रैवमिच्छन्तो न व्यवस्थां लभेमहि॥
२८५८ ॥§ 9259

गुणज्ञानं गुणायत्तप्रामाण्यमथ नेष्यते।
आद्यमप्यर्थविज्ञानं नापेक्षेत गुणप्रमाम्॥
२८५९ ॥§ 9261

अतो दूरमपि ध्यात्वा प्रामाण्यं यत्स्वतः क्वचित्।
अवश्याभ्युपगन्तव्यं तत्रैवादौ वरं स्थितम्॥
२८६० ॥§ 9263

यथा प्रथमे ज्ञाने प्रमाणान्तरपरिच्छिन्नगुणायत्ता प्रमाणता तथाऽन्यत्रापीत्यर्थः।पूर्ववदिति। संवादतः प्रामाण्यनिश्चयवत्। तत्र तत्रेति। पूर्वपूर्वस्मिन्गुणज्ञाने। अथ गुणज्ञानस्य स्वत एव प्रामाण्यमनवस्थाभयादङ्गीक्रियते, तदाऽर्थविज्ञानेऽपि कः प्रद्वेषः, येन तस्य परतःप्रामाण्यमिष्यते न तु स्वत इति नहि किञ्चित्कारणमुत्पश्यामः। तस्मात्तीरादर्शने च शकुनिना सुदूरमपि गत्वा तत्रैव पुनरागन्तव्यमित्यलमप्रतिष्ठादि(ष्ठित ?)कुप्रतिपत्त्या। एतदेव दर्शयति—गुणज्ञानमित्यादि। गुणायत्तम्—गुणनिश्चयायत्तं प्रामाण्यं यस्य तत्तथोक्तम्॥ २८५८॥ २८५९॥ २८६०॥ § 9264

स्यादेतत्संवादगुणज्ञानयोर्मूलज्ञानाद्विशेषोऽस्ति, तेन तयोः स्वत एव प्रामाण्यं नाद्यस्येत्यत आह—संवादेत्यादि। § 9265

संवादगुणविज्ञाने केन वाऽभ्यधिकेमते।
आद्यस्य तदधीनत्वं यद्बलेन भविष्यति॥
२८६१॥§ 9267

तस्मात्स्वतःप्रमाणत्वं सर्वत्रौत्सर्गिकं स्थितम्।
बाधकारणदुष्टत्वज्ञानाभ्यां तदपोह्यते॥
२८६२॥§ 9269

परायत्तेऽपि चैतस्मिन्नानवस्था प्रसज्यते।
प्रामणाधीनमेतद्धि स्वतस्तच्च प्रतिष्ठितम्॥
२८६३॥§ 9271

ननु यदि विज्ञानं स्वतःप्रमाणमेवं सति सर्वज्ञानप्रामाण्यप्रसङ्ग इत्य-
त आह—तस्मादित्यादि। उत्सर्गः—सामान्येन विधानम्, तत्र भवमौत्स-
र्गिकम्। बाधाः— अर्थान्यथात्वावधारणं कारणदुष्टत्वज्ञानं चेति बाधकार-
णदुष्टत्वज्ञाने। ननु च (तथाच ?)प्रामाण्यमौत्सर्गिकं स्थितं सत्कथम(त्क्व-
759/k चिद?)पोह्यते (ननु च) यद्यप्रामाण्यं बाधकारणदुष्टत्वज्ञानाभ्यां प्रतिपाद्येत,
तच्च ताभ्यां प्रतिपाद्यमानं परतो भवेत्, तथेष्यत एवेति चेदेवं सति प्रामाण्य-
वदत्राप्यनवस्था भवेदित्यत आह—परायत्त इत्यादि। भवेदनवस्था, यद्य-
प्रामाण्यमप्रमाणतो भवेत्, यावताप्रमाणाद्विजातीयादप्रामाण्यमिष्यते। तच्च
स्वत एव प्रतिष्ठितमिति कुतोऽनवस्था॥ २८६१॥ ॥ २८६२॥ २८६३॥
§ 9272

एतदेव दर्शयति—प्रमाणं हीत्यादि। § 9273

प्रमाणं हि प्रमाणेन यथा नान्येन साध्यते।
न सिध्यत्यप्रमाणत्वमप्रमाणात्तथैव हि॥
२८६४॥§ 9275

तुल्यजाताश्रयत्वे हि प्रतिष्ठा नोपपद्यते।
विजातेस्त्वन्यहेतुत्वाद्दृढमूलप्रतिष्ठिता॥ २८६५॥§ 9277

१ मते] Correction: ; न ते (sic!)मते (sic!)प्रमाणा
१४ प्रमाणा] Correction: ; ऽप्रमाणा

विजातेरिति। अप्रमाणस्य। अस्य च दृढमूलप्रतिष्ठितेत्यनेन सम्बन्धः। अन्यहेतुत्वादिति हेतुनिर्देशः। अन्यो हेतुः प्रमाणलक्षणो यस्येति विग्रहः। दृढमूलप्रतिष्ठितेऽति। दृढा—अनवस्थादिदोषैरकम्प्या मूलप्रतिष्ठा यस्य स तथा, तद्भावस्तत्त्वम् ॥ २८६४॥ २८६५॥ § 9278

स्यादेतद्यद्यप्यनपेक्ष्यप्रामाण्यो बाधकः प्रत्ययः, तथाप्यबाध्यमानतया प्रतीत एवान्यस्याप्रामाण्यमाधातुं समर्थो नान्यथेत्यत आह—बाधकप्रत्ययस्तावदित्यादि। § 9279

बाधकप्रत्ययस्तावदर्थान्यत्वावधारणम्।
सोऽनपेक्षप्रमाणत्वात्पूर्वज्ञानमपोहते॥ २८६६॥ § 9281

अपोहत इति। प्रतिक्षिपति (अ) प्रमाणत्वेन निरस्यतीत्यर्थः॥ २८६६॥ § 9282

स्यादेतद्बाधकेऽपि प्रत्यये प्रथमज्ञानस्येव बाधकानन्तरं सम्भाव्यत एव, तत्कथं तत्र बाधकान्तरापेक्षा निवृत्ता, येनास्या बाध्यमानतानिश्चयो भवेदित्यत आह—तत्रापीत्यादि। § 9283

तत्रापि त्वपवादस्य स्यादपेक्षा पुनः क्वचित्।
जाताशङ्कस्य पूर्वेण साऽप्यल्पेन निवर्त्तते॥
२८६७॥ § 9285

तत्रापि क्वचिदिति। अर्थान्यत्वावधारणलक्षणे बाधके प्रत्यये। जाताशङ्कस्येति। पुंसः। पूर्वेणेति। प्रथमेन ज्ञानेन। साऽपीति। अपवादापेक्षा। अल्पेनेति। यत्नेनेति शेषः॥ २८६७॥ § 9286

760/k

कथं निवर्त्तत इत्याह—बाधकान्तरमित्यादि। § 9287

बाधकान्तरमुत्पन्नं यद्यस्यान्विष्यतोऽपरम्।
ततो मध्यमबाधेन पूर्वस्यैव प्रमाणता॥
२८६८॥ § 9289

अथानुरूपयत्नेन सम्यगन्वेषणे कृते।
मूलाभावान्न विज्ञातं भवेद्बाधकबाधकम्॥
२८६९॥ § 9291

ततो निरपवादत्वात्तेनैवाद्यं बलीयसा।
बाध्यते तेन तस्यैव प्रमाणत्वमपोह्यते॥
२८७०॥§ 9293

एवं परीक्षकज्ञानत्रितयं नातिवर्त्तते।
ततश्चाजातबाधेन नाशङ्क्यं बाधकं पुनः॥
२८७१॥§ 9295

यदि निरूपयतस्तस्यापि बाधकस्य बाधकान्तरमुत्पद्यते, तदा मध्यमस्य तृतीयेन बाधितत्वात्प्रथममेव प्रमाणं भवेत्। अथ नोत्पद्यते मूलस्य कारणस्याभावात्। तदा तेनैव द्वितीयेन बलीयसाद्यं बाध्यत इति कृत्वा तस्य तेन प्रामाण्यमपोहितं भवति। नातिवर्त्तत इति। नातिक्रामति। कोऽसौ?। पुमानिति शेषः। अथतृतीयेऽपि ज्ञाने द्वितीयज्ञानवद्बाधकापेक्षा कस्मान्न भवति येन परीक्षकज्ञानत्रयं नित्यं यतः स्यादित्यत आह—ततश्चेत्यादि। अजातोऽनुत्पन्नो बाधो यस्य प्रमातुः ॥ २८६८॥ २८६९॥ २८७०॥ २८७१॥ § 9296

कस्मान्नाशङ्क्यमित्याह—उत्प्रेक्षते हीत्यादि। § 9297

...__2872 उत्प्रेक्षते हि यो मोहादजातमपि बाधकम्।
स सर्वव्यवहारेषु संशयात्मा क्षयं व्रजेत्॥
२८७२॥§ 9299

क्षयम्—नाशम्। तत्त्वभ्रंशात्॥ २८७२॥ § 9300

तथाचेत्यादिना प्रवचनेनैतदेव समर्थयते। § 9301

तथाच वासुदेवेन निन्दिता संशयात्मता।
नायं लोकोऽस्ति कौन्तेय न परः संशयात्मनः॥
२८७३॥§ 9303

वासुदेवेनेति। विष्णुना। कुन्तेरपत्यं कौन्तेयोऽर्जुनः॥ २८७३॥ § 9304

यद्येवं प्रथमेऽपि ज्ञाने बाधाशङ्का न प्राप्नोति, ततश्च सर्वज्ञानेऽपि प्रामाण्यप्रसङ्ग इत्याशङ्क्याह—यावानेवेत्यादि। § 9305

यावानेवापवादोऽतो यत्र सम्भाव्यते मतौ।
अन्विष्टेऽनुपजाते च तावत्येव तदात्मनि॥
२८७४॥§ 9307

761/k

कदाचित्स्यादपीत्येवं न भूयस्तत्र वस्तुनि।
उत्प्रेक्षमाणैःस्थातव्यं नात्म(प्त?)कामैः प्रमातृभिः॥
२८७५॥§ 9309

यत्र—यस्यां मतौ यावानेवापवादः सम्भाव्यते, तावत्येवापवादेऽन्विष्टेऽनुपजाते च, तदात्मनि—तत्र मतौ, स नास्तीत्येव गम्यत इत्यध्याहार्यम्॥ २८७४॥ २८७५॥ § 9310

कुत्र कियानपवादः सम्भाव्यत इत्येतद्दर्शयन्नाह—देशेत्यादि। § 9311

देशकालनरावस्थाभेदाः संव्यवहारतः।
सिद्धा एव हि ये यस्मिंस्तेऽपेक्ष्या बाधकार्थिना॥
२८७६॥§ 9313

देशश्च कालश्च नरश्चावस्था चेति तथोक्ताः तासां भेदा इति समासः॥ २८७६॥ § 9314

एते च देशादिभेदाः कस्यचिदेव केचिद्बाधका नतु सर्वे सर्वस्य तेन न सर्वत्र सर्वेषामाशङ्का कार्येत्येतद्दर्शयन्नाह—दूरदेशेत्यादि। § 9315

दूरदेशव्यवस्थानादसम्यग्दर्शने भवेत्।
अन्याशङ्का क्वचित्तत्र समीपगतिमात्रकम्॥
२८७७॥§ 9317

अपवादावधिः कालनरावस्थान्तरे न तु।
व्यपेक्षा विद्यते तस्मिन्मृगतृष्णादिबुद्धिवत्॥
२८७८॥§ 9319

अन्याशङ्केति। अन्यस्य जलादेराशङ्का अन्याशङ्का। क्वचिदिति। मरीचिकादौ।समीपगतिमात्रकमिति। अपवादावधिरिति सम्बन्धः। एतदुक्तं भवति। यत्र दूरदेशत्वमेव भ्रान्तिनिमित्तं सम्भवति तत्र समीपगमनमात्र-

मेवापेक्षणीयं बाधकस्य भावाभावनिश्चयाय, नतु कालादौ व्यपेक्षा कार्या। तत्र तस्याभ्रान्तिनिमित्तत्वात्। अत्रोदाहरणमाह—मृगतृष्णादिबुद्धिवदिति। मृगतृष्णादिबुद्धिः—मरीचिकादौ जलादिभ्रान्तिः। आदिशब्देनाल्पीयसि महत्त्वबुद्धिः, य(त?)था दूरे महति चाल्पबुद्धिरित्येवमादि गृहीतव्यम्। नहि तत्र समीपगतानां कालाद्यपेक्षा सम्भवति। एवं कालादिष्वपि। यत्र यस्यैव भ्रान्तिनिमित्तत्वं सम्भवति तस्यैवापेक्षा कार्या नान्यस्येत्येतदुदाहरणेन दर्शयति॥ २८७७॥ २८७८॥ § 9320

तत्र कालविशेषमधिकृत्याह—एवं सन्तमस इत्यादि। § 9321

एवं सन्तमसे काले यो गवाश्वादिसंशयः।
भ्रान्तेर्वा निर्णयस्तत्र प्रकाशीभवनावधिः॥
२८७९॥§ 9323

सङ्गतं तमो यस्मिन्काले स तथोक्तः॥ २८७९॥ § 9324
762/k

नरविशेषमधिकृत्याह—तथेत्यादि। § 9325

तथाहि चन्द्रदिग्मोहवेदवर्णस्वरादिषु।
पुरुषान्तरसंप्रश्नादन्यथात्वावधारणम्॥ २८८०॥§ 9327

तैमिरिकादीनां द्विचन्द्रादिज्ञानेषु पुरुषान्तरपरिप्रश्नादेवान्यथात्वनिश्चयो भवति, न तत्र कालाद्यपेक्षा॥ २८८०॥ § 9328

अवस्थाभेदमधिकृत्याह—रागद्वेषेत्यादि। § 9329

रागद्वेषमदोन्मादक्षुत्तृष्णादिक्षतेन्द्रियैः।
दुर्ज्ञाने ज्ञायमानेऽर्थे तदभावाद्विपर्ययः॥
२८८१॥§ 9331

तदभावादिति। रागाद्यवस्थाया अभावात्॥ २८८१॥ § 9332

ऋणादीत्यादिना लोकव्यवहारेणापि परीक्षकज्ञाने तृतीयस्यैवापेक्षेति प्रतिपादयति— § 9333

ऋणादिव्यवहारेऽपि द्वयोर्विवदमानयोः।
एकं प्रत्यर्थिनो वाक्यं द्वे वाक्ये पूर्ववादिनः॥
२८८२॥§ 9335

अनवस्थाभयादेव न वाक्यं लिख्यतेऽधिकम्।
ततस्तु निर्णयं ब्रूयुः स्वामिसाक्षिसभासदः॥
२८८३॥§ 9337

एवं ज्ञानत्रयस्यैव सर्वत्र विक्रियेष्यते।
त्रिसत्यताऽपि देवानामत एवाभिधीयते॥
२८८४॥§ 9339

तेन स्वतःप्रमाणत्वे नानवस्थोभयोरपि।
प्रमाणत्वाप्रमाणत्वे यथायोगमतः स्थिते॥
२८८५॥§ 9341

किञ्च—यदि नाम प्रत्यक्षादेः परतःप्रामाण्यं सिध्यति—न तु शाब्दस्य, तथाऽप्यस्मत्पक्षसिद्धिरेव। तथा (हि) सर्वोऽयमारम्भश्चोदनायाः प्रामाण्यप्रतिपादनफलः,शाब्दस्य च प्रमाणस्य स्वतःप्रामाण्ये सिद्धे सिद्धमेव चोदनायाः प्रामाण्यमिति किमस्माकमन्येषां स्वतःप्रामाण्यप्रसिद्धये प्रयासेनेति मन्यमानः शाब्दस्य प्रमाणस्य स्वतःप्रामाण्यं प्रतिपादयन्नाह—नित्यमित्यादि। § 9342

नित्यमाप्तप्रणीतं वा वाक्यं यच्चावधार्यते।
श्रोत्रुच्चारयितृभ्यां तन्न मनागपि दूष्यते॥
२८८६॥§ 9344

ये विद्यागुरवस्तत्र सहाध्यायिन एव च।
विनाशं वारयन्तस्ते तादृशां पालनक्षमाः॥
२८८७॥§ 9346

763/k

अतो गुणनिषिद्धैर्वा दोषैर्वाक्यं न दूष्यते।

यद्वा कर्तुरभावे ते न स्युर्दोषा निराश्रयाः॥
२८८८॥§ 9348

द्विविधं हि शाब्दं ज्ञानं प्रमाणम्, नित्यवाक्यजनितं आप्तप्रणीतवाक्यहेतुकं च। तत्रैतस्मिन्द्विविधेऽपि कारणस्यादुष्टत्वं प्रतिपादयति। तथाहि—यत्तावन्नित्यं वाक्यं तस्य श्रोतृवक्तृकृतो न दोषः सम्भवति। नित्यं विद्यागुरुभिरध्यापकैरध्येतृभिश्च पाल्यमानत्वात्। यदप्याप्तोक्तम्, तत्र गुणैः कृपादिभिर्दोषाणां निषिद्धत्वात्। प्रकारान्तरेण नित्यस्य वाक्यस्यादुष्टत्वं प्रतिपादयन्नाह—यद्वेत्यादि। दोषा हि रागादयः पुरुषधर्मत्वात्कर्तारमेवाश्रिताः। ते कथमाश्रय(स्य)कर्तुर्निवृत्तावपौरुषेयेषुवाक्येष्ववतिष्ठेरन्। तदाऽनाश्रितत्वप्रसङ्गात्। एष ह्याश्रितधर्मो यदाश्रयानुविधायित्वम्॥ २८८६॥ २८८७॥ २८८८॥ § 9349

ननु चाप्तवाक्यस्य गुणैर्दोषाणां निराकरणात्प्रामाण्याभ्युपगमे गुणेभ्यः प्रामाण्यमभ्युपगतं स्यात्, ततश्चानवस्थादोषोऽत्रापि सम्भवेदित्याशङ्क्याह—तत्रेत्यादि। § 9350

तत्राप्तोक्तेर्द्वयं दृष्टं दोषाभावगुणात्मकम्।
गुणेभ्यश्च प्रमाणत्वं यथा नास्ति तथोदितम्॥
२८८९॥§ 9352

गुणवत्त्वादतो वक्तुर्न दोषास्तन्निराकृताः।
स्वतो वाक्यं प्रमाणं च दोषाभावोपलक्षितम्॥
२८९०॥§ 9354

दोषाभावगुणावात्मा स्वभावो यस्य द्वयस्य तत्तथोक्तम्। तथोदितमिति। एवं यदि गुणाधीना प्रत्यक्षादिप्रमाणतेत्यादिना। तन्निराकृता इति। गुणनिराकृताः।दोषाभावोपलक्षितमिति। दोषरहितगुणानां दोषनिषेधमात्र एव व्यापारो न प्रामाण्याधान इत्यभिप्रायः॥ २८८९॥ २८९०॥ § 9355

ननु च दोषाभावनिश्चयात्प्रामाण्येऽभ्युपगम्यमानेऽप्यनवस्थैवेति परमतमाशङ्कयन्नाह—दोषाभाव इत्यादि। § 9356

दोषाभावो गुणेभ्यश्चेदाप्तवाक्येषु गम्यते।
अनवस्था भवेत्सैव गुणवत्त्वानुगामिनः॥
२८९१॥§ 9358

२ ततश्चानवस्था] Correction : ;
ततश्चावस्था (sic !)ततश्चानवस्था

तथाहि—दोषाभावो गुणपरिज्ञानान्निश्चेयः, गुणपरिज्ञानस्य च पुनरपि दोषाभावात्प्रामाण्यमवसेयम्, तत्रापि दोषाभावो गुणेभ्यः परिज्ञेयः, पुनस्तत्राप्येवमित्येवं सैव सर्वव्यवस्थालोपिन्यनवस्था तदवस्था॥ २८९१॥ § 9359

764/k

नैष दोष इत्यादिना प्रतिविधत्ते। § 9360

नैष दोषो गुणज्ञानं तदा नैव ह्यपेक्ष्यते।
ज्ञायमानतया नैव गुणास्तत्रोपकारिणः॥
२८९२॥§ 9362

सत्तामात्रेण ते सर्वे दोषव्यावर्त्तनक्षमाः।
नृदोषविषयं ज्ञानं तेषु सत्सु न जायते॥
२८९३॥§ 9364

तेषु सत्स्विति। गुणेषु॥ २८९२॥ २८९३॥ § 9365
यदि नाम न जायते ततः किमित्यत आह—दोषैश्चेति। § 9366

दोषैश्चाज्ञायमानत्वान्न प्रामाण्यमपोद्यते।
अनपोदितसिद्धं च तदिहापि स्वतः स्थितम्॥
२८९४॥§ 9368

न प्रामाण्यमपोद्यत इति सम्बन्धः। कस्मात् ?। अज्ञायमानत्वात्—गुणनिषिद्धत्वाद्दोषाणामभावादेवाज्ञायमानत्वम्। अनपोदितसिद्धं चेति। अनपोदितत्वात्सिद्धम्, उत्सर्गस्यापवादविरहे निसर्गसिद्धत्वात्। इहापीति। आप्तवाक्ये न केवलमपौरुषेय इत्यपिशब्दः॥ २८९४॥ § 9369

ननु च यदि नाम क्वचित्पौरुषेये वाक्ये दोषा न ज्ञायन्ते तथापि सम्भाव्यन्त एव, तेषां तदाश्रितत्वात्। ततश्च यथा गुणाः सत्तामात्रेण दोषव्यावर्त्तनक्षमास्तथा दोषा अपि गुणव्यावर्त्तनसमर्था इति तत्किमुच्यते—दोषैश्चाज्ञायमानत्वान्न प्रामाण्यमपोद्यत इति, एतदाशङ्क्याह—दोषाः सन्तीत्यादि। § 9370

दोषाः सन्ति न सन्तीति पौरुषेये तु शङ्क्यते।

१ यदि नाम] Correction : ; दि नाम (sic !)यदि नाम

वेदे कर्तुरभावाच्च दोषाशङ्कैव नास्ति नः॥
२८९५॥§ 9372

अतो यदनपेक्षत्वाद्वेदे प्रामाण्यमुच्यते।
तदाप्तेन प्रणीतेऽपि सुतरां सिध्यति स्वतः॥
२८९६॥§ 9374

एवं मन्यते। न ह्यस्माभिरवश्यं पौरुषेयवचनस्य प्रामाण्यं समर्थनीयम्, किन्तु सर्व एवायमारम्भो वेदस्य प्रामाण्यसिद्ध्ये, तत्र यदि नाम पौरुषेयस्य वचनस्याप्रामाण्यं जातं तथापि न काचित्क्षतिर्वेदस्य, दोषाशङ्काया अभवादेव प्रामाण्यसिद्धेरित्यनपेक्षत्वादुच्यत इति। यथोक्तं भाष्ये—तस्मात्प्रमाणमनपेक्षत्वात्। नैवं सति प्रत्ययान्तरमपेक्षितव्यं पुरुषान्तरं वा स्वयम्प्रत्ययो ह्यसाविति॥ २८९५॥ २८९६॥ § 9375

अपिच—किं प्रमाणान्तरपरिच्छिन्नेऽर्थे प्रवृत्तिरिष्टा, आहोस्विन्नेति पक्ष-
765/k द्वयम्, तत्र यदि तावन्नेष्टेति द्वितीयः पक्षस्तदा वेदस्य स्वत एव प्रामाण्यं सिद्धमिति दर्शयति—वेदार्थ इत्यादि। § 9376

वेदार्थेऽन्यप्रमाणैर्या सर्वकालमसङ्गतिः।
तयैवास्य प्रमाणत्वमनुवादत्वमन्यथा॥ २८९७॥§ 9378

वेदार्थः—अग्निहोत्रात्स्वर्गो भवतीत्यादिः। अन्यप्रमाणैरिति। वेदादन्यैः प्रत्यक्षादिभिः सङ्गतिरेकविषयतया सम्बन्धः, तत्प्रतिषेधोऽसङ्गतिः। तयैवेति। असङ्गत्याअस्येति। वेदस्य। अथ प्रवृत्तिरिष्टेति पक्षस्तदा गृहीतग्राहित्वादुत्तरकालभाविनो ज्ञानस्य न प्रामाण्यं प्राप्नोतीति दर्शयन्नाह—अनुवादत्वमन्यथेति। अन्यथा—यद्यन्यैरपि प्रमाणैरवगतेऽर्थे प्रमाणस्य प्रवृत्तिरिष्यते तदा तस्यान्यप्रकाशितार्थप्रकाशकत्वादनुवादत्वमिति स्मृत्यादिवदप्रामाण्यप्रसङ्गः। तस्माद्यत्प्रमाणं न तत्प्रमाणान्तरसङ्गतिमपेक्षत इति सर्वस्यैव प्रमाणस्य स्वतःप्रमाण्यं प्रसिद्धमिति भावः॥ २८९७॥ § 9379

एतदेव दर्शयति—अन्यस्यापीत्यादि। § 9380

अन्यस्यापि प्रमाणत्वे सङ्गतिर्नैव कारणम्।
तुल्यार्थानां विकल्पेन ह्येकस्यैव प्रमाणता॥
२८९८॥§ 9382

वेदादन्यस्यापि प्रत्यक्षादेः। तुल्यार्थानामिति। एकविषयप्रवृत्तानाम्। एकस्यैवेति। प्रथमस्य। अन्येषामनुवादत्वात्। नच तेभ्य उत्तरकालभाविभ्यः

प्रत्ययेभ्यः प्रथमस्य प्रामाण्यं युक्तं तेषां गृहीतविषयत्वेन स्वयमेवाप्रमाणत्वात्॥ २८९८॥ § 9383

ननु च दृश्यत एव सन्तमसादिप्रदेशे प्रथमज्ञानगृहीतस्याप्यर्थस्योत्तरोत्तरतःप्रमाणात्परिच्छेदः स्पष्टालोकावस्थायामित्याशङ्क्याह—यत्रापीत्यादि। § 9384

यत्रापि स्यात्परिच्छेदः प्रमाणैरुत्तरैः पुनः।
नूनं तत्रापि पूर्वेण नार्थः सोऽवधृतः स्फुटम्॥
२८९९॥§ 9386

पूर्वस्य ज्ञानस्यानवधृतार्थत्वादप्रामाण्यमेवेति भावः॥ २८९९॥ § 9387

अपिच—यदि प्रमाणान्तरसङ्गत्या प्रामाण्यमेवं सति सकृज्ज्ञातविनष्टार्थविषयस्य ज्ञानस्य श्रोत्रधियश्च प्रामाण्यं न प्राप्नोति तद्विषये प्रमाणान्तराप्रवृत्तेरिति दर्शयतिसकृदित्यादि। § 9388

सकृज्ज्ञातविनष्टे च भवेन्नार्थे प्रमाणता।
श्रौत्रा धीश्चाप्रमाणं स्यान्नेत्रादिभिरसङ्गता॥
२९००॥§ 9390

766/k

नेत्रादिभिरसङ्गतेति। एकविषयत्वेनासम्बन्धात्। प्रयोगः—यत्प्रमाणान्तरसङ्गतिनिरपेक्षं तत्स्वत एव प्रमाणम्, यथा श्रोत्रज्ञानं सकृज्ज्ञातं विनष्टविषयं च विज्ञानम्, प्रमाणान्तरसङ्गतिनिरपेक्षं च वेदार्थविषयं ज्ञानमिति स्वभावहेतुः २९०० § 9391

श्रोत्रेत्यादिना दृष्टान्तस्य साधनविकलतामाशङ्कते। § 9392

श्रोत्रज्ञानान्तरेणास्याः सम्बन्धाच्चेत्प्रमाणता।
सिद्धा वेदेऽपि तज्जन्यविज्ञानान्तरसङ्गतेः॥
२९०१॥§ 9394

साधनान्तरजन्या तु बुद्धिर्नास्ति द्वयोरपि।
हेत्वन्तरकृतज्ञानसंवादोऽतो न वाञ्छ्यते॥
२९०२॥§ 9396

तथा ह्येकस्मिन्नपि शब्दे बहुभिः श्रूयमाणे श्रोत्रज्ञानान्तरप्रवृत्तेरस्याः श्रोत्रधियःप्रमाणान्तरसङ्गत्यपेक्षया सम्यक्त्वमवसीयते। सिद्धा वेदेऽपीत्यादिना प्रतिविधत्ते—तज्जन्यविज्ञानान्तरसङ्गतेरिति। वेदजन्यविज्ञानान्तरसम्बन्धात्।द्वयोरपीति। श्रोत्रबुद्धिवेदार्थबुद्ध्योः। एतदुक्तं भवति—प्रमाणान्तरसङ्गतिनिरपेक्षत्वादित्यत्र साधनान्तरजन्यं प्रमाणान्तरं विवक्षितम्, नत्वेकसाधनसाध्यम्, तेन हेतोः सविशेषणत्वान्न साधनविकलता दृष्टान्तस्येति भावः। हेत्वन्तरकृतज्ञानसंवाद इति। हेत्वन्तरेण कृतं च तत् ज्ञानं चेति तथोक्तम्—तस्य संवाद इति विग्रहः॥ २९०१॥ २९०२॥ § 9397

अथैकसाधनसाध्यप्रमाणान्तरप्रवृत्तिमात्रेणापि परतः प्रामाण्यमिष्टम्, तदा सिद्धसाध्यतेति मन्यमान आह—यथेत्यादि। § 9398

यथा त्वेकेन्द्रियाधीनविज्ञानान्तरसङ्गतिः।
प्रत्यक्षे कारणं क्लृप्ता तथा वेदेऽपि कथ्यताम्॥
२९०३॥§ 9400

कारणं क्लृप्तेति। श्रोत्रज्ञानान्तरेणास्याः सम्बन्धाच्चेत्प्रमाणतेति वचनात्॥ २९०३॥ § 9401

कथं वेदे कथनीयमित्यत आह—एकेनैव हीत्यादि। § 9402

एकेनैव हि वाक्येन देशकालन(लान्त?)रादिषु।
लभ्यमानेऽर्थसंवादे न मृग्यं कारणान्तरम्॥
२९०४॥§ 9404

तस्माद्दृढं यदुत्पन्नं विज्ञानं न विसंवदेत्।
देशान्तरादिविज्ञानैः प्रमाणं तदसंशयम्॥
२९०५॥§ 9406

767/k

दृढमिति। संशयविपर्यासरहितत्वात्। देशान्तरादिविज्ञानैरिति। आदिशब्देन नरान्तरादिविज्ञानपरिग्रहः॥ २९०४॥ २९०५॥ § 9407

नचासिद्धताऽस्य हेतोरिति दर्शयन्नाह—साध्येत्यादि। § 9408

साध्या न चानुमानेन शब्दादीनां प्रमाणता।

प्रत्यक्षस्यापि सा माभूत्तत्साध्यैवाविशेषतः॥
२९०६॥§ 9410

न तावत्प्रत्यक्षेण साध्या वेदार्थस्यातीन्द्रियत्वादिति भावः। नाप्यनुमानेनातिप्रसङ्गात्। शब्दानामिति। वैदिकानामिति शेषः। प्रकरणाद्वा विशेषगतिः २९०६ § 9411

स्यादेतदिष्यत एव प्रत्यक्षस्याप्यनुमानसाध्या प्रमाणतेत्याह—प्रमाणानामित्यादि। § 9412

प्रमाणानां प्रमाणत्वं येन चान्येन साध्यते।
तस्याप्यन्येन साध्यत्वादनवस्था प्रसज्यते॥
२९०७॥§ 9414

अन्येनासाधिता चेत्स्यात्साधकस्य प्रमाणता।
साध्यानामपि सा सिद्धा तद्वदेव भवेत्ततः॥
२९०८॥§ 9416

प्रत्यक्षवत्तस्याप्यनुमानस्यापरेणानुमानेन प्रमाणतायां साध्यायामनवस्था स्यात्। अथानुमानाख्यस्य साधनस्य प्रामाण्यं नान्येन साध्यते तदा साध्यस्यापि प्रत्यक्षादेःसा साध्या साभूदविशेषात्॥ २९०७॥ २९०८॥ § 9417

नन्वित्यादिना बौद्धो हेत्वसिद्धिमेव समर्थयते। § 9418

ननु प्रमाणमित्येवं प्रत्यक्षादि न गृह्यते।
नचेत्थमगृहीतेन व्यवहारोऽवकल्पते॥
२९०९॥§ 9420

यदि प्रमाणानां प्रमाणान्तरापेक्षा न स्यात्तदा प्रमाणमित्येषु प्रत्यक्षादिषु निश्चयो न स्यात्। ततश्च सर्वव्यवहारोच्छेदप्रसङ्गः॥ २९०९॥ § 9421

प्रमाणं ग्रहणादित्यादिना प्रतिविधत्ते। § 9422

प्रमाणं ग्रहणात्पूर्वं स्वरूपेण प्रतिष्ठितम्।
निरपेक्षं च तत्स्वार्थे प्रमिते मीयते परैः॥
२९१०॥§ 9424

एतदुक्तं भवति—यद्यपि प्रमाणं स्वरूपनिश्चयं प्रति प्रमाणान्तरमपेक्षते तथापि न व्यवहारोच्छेदः, अर्थपरिच्छेदं प्रति प्रमाणान्तरनिरपेक्षत्वात्, अर्थश्चेत्परिच्छिन्नस्तदा तावतैव सर्वव्यवहारपरिसमाप्तिरिति किं स्वरूपं प्रति निश्चयानिश्चयनिरूपणया, अर्थनिश्चयार्थत्वादस्या इति सङ्क्षेपार्थः। अवयवार्थ-
768/k स्तूच्यते—ग्रहणा त्पूर्वमिति। प्रमाणमेतदित्यतो निश्चयात्पूर्वमित्यर्थः। स्वरूपेणेति। अर्थपरिच्छेदात्मना। निरपेक्षमिति। स्वार्थपरिच्छेदं प्रति प्रमाणान्तरं नापेक्षत इत्यर्थः। तत्स्वार्थे प्रमिते—निश्चिते तूत्तरकालमनुमानादिभिः प्रमाणैः प्रमीयते। यथोक्तम्—नह्यज्ञातेऽर्थे कश्चिद्बुद्धिमुपलभते। ज्ञाते त्वनुमानादवगच्छतीति॥ २९९०॥ § 9425

स्यादेतत्—अविदितायां बुद्धौ स्वार्थपरिच्छेद एव न युक्तः, यथोक्तमप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यतीत्याशङ्क्याह—यथाचेत्यादि। § 9426

यथाचाविदितैरेव चक्षुरादिभिरिन्द्रियैः।
गृह्यन्ते विषयाः सर्वे प्रमाणैरपि ने तथा॥
२९९१॥ § 9428

तेनात्र ज्ञायमानत्वं प्रामाण्ये नोपयुज्यते।
विषयानुभवोऽप्यस्मादज्ञातादेव लभ्यते॥
२९९२॥ § 9430

सुगमम्॥ २९९१॥ २९९२॥ § 9431

यद्येवं(अ)प्रमाणमप्यनया नीत्या स्वत एव प्रसज्यत इत्याशङ्क्याह—अप्रमाणमित्यादि। § 9432

अप्रमाणं पुनः स्वार्थे प्रमाणमिव हि स्थितम्।
मिथ्यात्वं तस्य गृह्येत न प्रमाणान्तरादृते॥
२९९३॥ § 9434

अप्रमाणं हि प्रमाणवदाभातीति न तत्सत्तामात्रेण स्वार्थं परिच्छिनत्ति, तस्मान्मिथ्यात्वं—मिथ्यार्थपरिच्छेदित्वमस्य प्रमाणान्तरं विना ग्रहीतुं न शक्यत इति परतस्तद्व्यवस्थाप्यते॥ २९९३॥ § 9435

ननु च प्रमाणेऽपि तुल्यम्—तथाहि तदपि स्वार्थे क्वचिदप्रमाणमिवाभातीत्यत आह—न ह्यर्थस्येत्यादि। § 9436

न ह्यर्थस्यान्यथाभावः पूर्वेणात्तस्तथात्ववत्।
तदत्राप्यन्यथाभावे धीर्यद्वा दुष्टकारणे॥
२९१४ ॥§ 9438

तावता चैव मिथ्यात्वं गृह्यते नान्यहेतुकम्।
उत्पत्त्यवस्थमेवेदं प्रमाणमिति मीयते॥
२९१५ ॥§ 9440

पूर्वेणेति। अप्रमाणेन। आत्त इति। गृहीतः। तथात्ववदिति वैधर्म्यदृष्टान्तः। एतदुक्तं भवति—यथा प्रमाणेन तथात्वमात्तं न तथा मिथ्यात्व(म)प्रमाणेनेति न समानम्। तथाहि—उत्पत्त्यवस्थमेव प्रमाणं प्रमाणमिति मीयते, नत्वप्र माणमप्रमाणमिति, तस्य नित्यं प्रमाणवदवभासनादिति भावः। त- 769/k
दित्यादिना परतोऽप्रामाण्यमुपसंहरति। यद्वा दुष्टकारणे धीरिति संबन्धः। तावता चैवेति। अन्यथा भावधिया दुष्टकारणधिया च। स्यादेतत्। यद्येतयोर्धियोः सम्यक्त्वं गृहीतं भवेत्तदाऽऽभ्यां मिथ्यात्वं गृह्येत, तयोश्च सम्यक्त्वग्रहणाय प्रमाणान्तरापेक्षायामनवस्था स्यादित्यत आह—उत्पत्त्यवस्थमित्यादि। इदमिति। अर्थान्यथाज्ञानं दुष्टकारणज्ञानं च। तेन नानवस्थेति भावः॥ २९१४॥ २९१५॥ § 9441

यदुक्तं बौद्धादिना मिथ्यार्थं वैदिकं वचो वाक्यत्वादग्निः शीत इत्यादि पुरुषवाक्यवदित्यादि साधनं, तस्यानैकान्तिकतेति दर्शयन्नाह—अतो यत्रापीत्यादि। § 9442

अतो यत्रापि मिथ्यात्वं परेभ्यः प्रतिपाद्यते।
तत्राप्येतद्द्वयं वाच्यं नतु साधर्म्यमात्रकम्॥
२९१६ ॥§ 9444

यत्रापीति। चोदनादौ। एतद्द्वयमिति। अन्यथात्वज्ञानं दुष्टकारणज्ञानं च।साधर्म्यमात्रकमिति। असत्यार्थेन पुंवाक्येन वाक्यत्वादिना तुल्यत्वम्॥ २९१६॥ § 9445

कस्मान्न वाच्यमित्यत्रोपपत्तिमाह—तत्रेत्यादि। § 9446

तत्राप्रमाणसाधर्म्यमात्रं यत्किंचिदाश्रिताः।
सर्वं प्रमाणमिथ्यात्वं साधयन्त्यविपश्चितः॥
२९१७ ॥§ 9448

तेषामात्मवधायैव तादृक्साधनकल्पनम्।
उत्पद्यते परस्यापि प्रतिबिम्बेन तादृशम्॥
२९१८॥§ 9450

तेन च प्रतिषिद्धत्वादयथाभूतसाधनम्।
नौत्सर्गिकप्रमाणत्वाच्चोदना बाधितुं क्षमम्॥
२९१९॥§ 9452

यद्यप्रमाणसाधर्म्यमात्रेणाप्रमाणं स्यात्तदा सर्वत्र प्रमाणानामप्रामाण्यप्रसङ्गः, शक्यते हि सर्वत्र वस्तुत्वादिना साधर्म्यं वक्तुमिति सङ्क्षेपार्थः। कथमात्मवधाय भवतीत्याह—उत्पद्यत इत्यादि। परस्यापीति। मीमांसकस्य। प्रतिबिम्बेनेति। यथा बिम्बादनन्तरं प्रतिबिम्बमुत्पद्यते, तथा बौद्धोपन्यस्तसाधनान्तरं प्रतिसाधनं मीमांसकस्योदेतीत्यर्थः। तथाहि शक्यमिदमभिधातुम्—अमृषा वैदिकं वचः, वचनत्वादिभ्यः, अग्निरुष्णो भास्वर इत्यादिपुरुषवचनवदिति। तेनैवंविधेन प्रतिप्रमाणेन प्रतिषिद्धत्वात्—व्याहतत्वात्, अयथाभूता चोदनेत्यस्यार्थस्य यत्साधनमुपन्यस्तं बौद्धादिना तन्न चोदनां बाधितुं क्षमम्, कुतः ?, औत्सर्गिकप्रमाणत्वात्। औत्सर्गिकं प्रमाणं प्रामाण्यं यस्य तत्तथोक्तं तद्भावस्तत्वम्॥ २९१७॥ २९१८॥ २९१९॥ § 9453
770/k

अत्राभिधीयत इत्यादिना—आत्मलाभे च भावानामित्यारभ्य यथाक्रमं दूषणं वक्तुमारभते— § 9454

अत्राभिधीयते येषां जातानां स्थितिरिष्यते।
तेषामेव तु नन्वेषा व्यवस्था सनिबन्धना॥
२९२०॥§ 9456

सनिबन्धनेति। वस्त्वधिष्ठाना। असतो व्यापारायोगादिति भावः॥ २९२०॥ § 9457

का पुनरसौ व्यवस्थेत्याह—आत्मलाभ इत्यादि। § 9458

आत्मलाभे घटादीनां कारणापेक्षितेष्यते।
लब्धात्मनां स्वकार्येषु प्रवृत्तिः स्वयमेव तु॥
२९२१॥§ 9460

अथ ज्ञानेऽपि कस्मान्न युज्यत इत्याह—यत्त्वित्यादि। § 9461

यत्तु ज्ञानं त्वयाऽपीष्टं जन्मानन्तरमस्थिरम्।
लब्धात्मनोऽसतः पश्चाद्व्यापारस्तस्य कीदृशः॥
२९२२ ॥§ 9463

असतः कीदृशो व्यापार इति। नैव कश्चित्, सर्वसामर्थ्यशून्यत्वादसत्त्वस्येति भावः। सत्त्वेऽपि वा निरीहत्वात्सर्वभावानां नैव व्यापारः सिद्ध्येत्। न च ज्ञानस्य किञ्चित्कार्यमस्ति यत्र व्याप्रियेत। स्वार्थपरिच्छेदात्मकमस्तीति चेत्। न। ज्ञानपर्यायत्वादस्यात्मानमेव करोतीति सुव्याहृतमेतत्। प्रमाणमेतदिति निश्चयजननं स्वकार्यमिति चेन्न। क्वचिदनिश्चयाद्विपर्ययदर्शनाच्च। अनेनात्रापि प्रतिज्ञार्थे प्रत्यक्षादिविरोधः प्रतिपादितः। तथाह्युपलब्धिलक्षणप्राप्तस्यानुपलम्भेनान्योपलम्भात्मना प्रत्यक्षेणासतो व्यापाराभावो निश्चितः। नैरूप्याच्च वियदम्भोजवदनुमानतोऽपि सिद्धः। त्वयापीष्टमित्यनेन स्ववचनविरोधं चोद्भावयति॥ २९२२॥ § 9464

तमेव व्यापार इत्यादिना श्लोकद्वयेन दर्शयति। § 9465

व्यापारः कारणानां हि दृष्टो जन्मातिरेकतः।
प्रमाणेऽपि तथा माभूदिति जन्म विवक्ष्यते॥
२९२३ ॥§ 9467

नहि तत्क्षणमप्यास्ते जायते वाऽप्रमात्मकम्।
येनार्थग्रहणे पश्चाद्व्याप्रियेतेन्द्रियादिवत्॥
२९२४ ॥§ 9469

तथाहि— सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्ष मित्यत्र सूत्रेजन्मग्रहणस्य साफल्यं प्रतिपादयितुं व्यापार इत्याद्युक्तं कुमारिलेन। ज्ञा(जा?)यमानाया एव बुद्धेः प्रामाण्यं यथा स्यादिति प्रतिपादनार्थं जन्मग्रहणं कृतमिति।किं कारणमित्याह—नहीत्यादि। तदिति। ज्ञानम्॥ २९२३॥ २९२४॥ § 9470

771/k

अथापीत्यादिना परस्योत्तरमाशङ्कते। § 9471

अथाप्यक्षणिकं ज्ञानं नित्यं चाऽभ्युपगम्यते।
अभ्युपेतविरोधोऽयमेवं युक्त्यावबाधनम्॥
२९२५॥§ 9473

तथाचान्यत्र कुमारिलेन नित्यत्वमेकत्वं च बुद्धीनां वर्णितम्। यथोक्तम्— बुद्धीनामपि चैतन्यस्वाभाव्यात्पुरुषस्य नः नित्यत्वमेकता चेष्टा भेदस्तु विषयाश्रय इति। अत्रापि पक्षे प्रतिज्ञाया अभ्युपेतविरोधोऽनुमानविरोधोऽपि। तथा (हि) क्षणिकत्वं बुद्धीनामभ्युपगतम्। यथोक्तं भाष्ये— क्षणिका हि सा न बुद्ध्यन्तरकालमवस्थास्यत इति। तथा— न हि तत्क्षणमप्यास्ते इत्यादिवचनात्प्रवचनविरोधोऽपि॥ २९२५॥ § 9474

युक्तिबाधां दर्शयति—साधितेत्यादि। § 9475

साधितक्षणभङ्गं हि सर्वं वस्तु सविस्तरम्।
नित्यं च जन्यते नेति कारणापेक्षिताऽस्य का॥
२९२६॥§ 9477

नित्यत्वाभ्युपगमे कारणापेक्षिता न युक्तेति दर्शयति—नित्यं चेत्यादिना। जन्यस्य हि कारणान्तरापेक्षिता तत आत्मभावलिप्सया, यत्तु नित्यत्वादनुत्पाद्यं तस्य काऽपेक्षा॥ २९२६॥ § 9478

अतश्चेत्यादिना प्रयोगरचनयाऽनुमानबाधामेव दर्शयति। § 9479

अतश्च शक्यते वक्तुं स्वत एव न वर्त्तते।
पश्चात्प्रमा स्वकार्येषु नैरूप्याद्गगनाब्जवत्॥
२९२७॥§ 9481

अस्तु वेत्यादिनाऽभ्युपगम्याक्षणिकत्वं प्रत्यक्षादिबाधां दर्शयति। § 9482

अस्तुवाऽक्षणिकं ज्ञानं स्वत एव प्रवर्त्तते।
स्वप्रामाण्यविनिश्चित्यै चेत्तत्किं संशयादयः॥
२९२८॥§ 9484

यदि स्वत एव प्रमाणनिश्चयं जनयति तदा प्रमाणे संशयादयो न प्राप्नुवन्ति। आदिशब्देन विपर्यासस्तत्पूर्वको विरोधो विपरीता प्रवृत्तिः पर-

४ स्य नः] Correction: ; स्यातो (sic!)स्य नः
४ चेष्टा] Correction: ; चेष्टा। (sic!)चेष्टा
७ न हि तत्क्षण] Correction: ; न तत्क्षण (sic!)न हि तत्क्षण

स्वपराहतलक्षणप्रणयनं विसंवादश्च गृह्यते। ततश्च संशयादेः प्रमाणानन्तरं निश्चयविपरीताकारस्य संवेदनात् प्रत्यक्षत एव निश्चयाभावः सिद्धो घटाभाव इव तद्विविक्तप्रदेशोपलम्भात्। ततश्च तत्सद्भावप्रतिज्ञायाः प्रत्यक्षविरोधः॥ २९२८॥ § 9485

772/k

प्रामाण्येत्यादिना प्रत्यक्षे विरोधमेव समर्थयते। § 9486

प्रामाण्यनिश्चयो यस्मात्तत्र तन्मात्रभाविकः।
तस्मिन् जाते च सन्देहविपर्यासावनास्पदौ॥
२९२९ ॥§ 9488

तस्मिन्निति। प्रामाण्यनिश्चये॥ २९२९॥ § 9489

कस्मादनास्पदावित्याह—निश्चयेत्यादि। § 9490

निश्चयारोपमनसोर्बाध्यबाधकभावतः।
समारोपविवेके हि निश्चयो वर्त्ततेऽखिलः॥
२९३० ॥§ 9492

एतदेव कुत इत्याह—समारोपेत्यादि। निश्चयो हि समारोपविपरीताकारत्वात्तद्विषयमनिराकृत्य नात्मस्थितिमासादयति, उष्णस्पर्श इव शीतमिति कुतस्तेन विषयीकृते विषये समावेशो विपर्यासस्य॥ २९३०॥ § 9493

ततश्चेत्यादिना स्ववचनविरोधमपि दर्शयति। § 9494

ततश्च चोदनाजन्यमतिप्रामाण्यसिद्धये।
दोषवर्जितहेतूत्थभावाद्युक्तिरपार्थिका॥
२९३१ ॥§ 9496

हेतूत्थभावो—हेतूत्थत्वम्। आदिशब्देनानाप्तप्रणीतोक्तिजन्यत्वाद्बाधवर्जनादित्यादि गृह्यते। तथाहि— चोदनाजनिता बुद्धिः प्रमाणं दोषवर्जितैः। कारणैर्जन्यमानत्वाल्लिङ्गाप्तोक्त्यक्षबुद्धिवत्। तथाऽनाप्तप्रणीतोक्तिजन्यत्वाद्बाधवर्जनात् इति चोदनाजनिताया बुद्धेः प्रामाण्यसिद्धये साधनं ब्रुवता परतः साधनात्प्रामाण्यनिश्चय उक्तो भवति। स्वतः सर्वप्रमाणानां प्रामाण्यमिति च वदता तन्निषेधश्चेति परस्परवचनव्याघातः॥ २९३१॥ § 9497

सिद्ध इत्यादिना परस्योत्तरमाशङ्कते। § 9498

सिद्धे स्वतःप्रमाणत्वे साऽपवादनिवारिणी।
यदीष्यते तदप्येवं नाऽऽशङ्काया असम्भवात्॥
२९३२॥§ 9500

तावदेव हि साऽऽशङ्का यावन्नोदेति निश्चयः।
निश्चये तूद्गते तस्मिन्नप्रामाण्ये कुतोन्वियम्॥
२९३३॥§ 9502

येन तद्विनिवृत्त्यर्थं यत्नः सार्थकतां व्रजेत्।
स्थाणौ निश्चिततादात्म्यो नान्यथात्वं हि(शङ्कते)॥
२९३४॥§ 9504

अथापि स्यान्नास्माभिश्चोदनाजनितायाः धियः प्रामाण्यसिद्धये साधनमभिधीयते। किं तर्हि ?। यत्तत्र परेणाप्रामाण्यमासक्तं तन्निषेधायेत्येतदपि न
773/k युक्तम्। कुत आशङ्काया असम्भवात्। उक्तं हि—निश्चयारोपमनसोर्बाध्यबाधकभावतः इति तत्कुतो निश्चये समुत्पन्ने सतीयमप्रामाण्याशङ्का। येन तन्निवृत्तये भवतःसाधनप्रयोगप्रयासः सफलो भवेत्। अत्र दृष्टान्तमाह—स्थाणावित्यादि। निश्चितं तादात्म्यं स्थाणुत्वं येन प्रतिपन्ना स तथोक्तः। अन्यथात्वमिति। वृक्षत्वपुरुषत्वादि ॥ २९३२॥ २९३३॥ २९३४॥ § 9505

यद्येवं कथमप्रामाण्याशङ्का विना साधनप्रयोगं निर्वर्त्तयितुं शक्यत इत्याह—यद्रूपेत्यादि। § 9506

यद्रूपनिश्चयो यस्माज्जायते यत्र वस्तुनि।
तद्विपर्ययशङ्कायास्तत एव निवर्त्तनम्॥
२९३५॥§ 9508

यस्मिन्रूपे निश्चयो यद्रूपनिश्चयः। तद्विपर्ययशङ्काया इति। तद्रूपविपरीतस्वभावे शङ्काया इत्यर्थः। तत एवेति। तद्रूपनिश्चयात्॥ २९३५॥ § 9509

अत्रैव दृष्टान्तमाह—यथा धूमादीत्यादि। § 9510

यथा धूमादिलिङ्गेभ्यः पावकाद्यस्तितागतौ।
तन्नास्तित्वव्यवच्छेदस्तत एवोपपद्यते॥ २९३६॥§ 9512

तन्नास्तित्वव्यवच्छेद इति। पावकादिनास्तित्वव्यवच्छेदः॥ २९३६॥
§ 9513

अप्रमाणेत्यादिनोपसंहरति। § 9514

अप्रामाण्यव्यवच्छेदः स्वत एवैवमिष्यताम्।
अतो न साधनं युक्तमप्रामाण्यनिवृत्तये॥
२९३७॥§ 9516

अत्रैवोपचयहेतुमाह—अप्रमाणद्वयेत्यादि। § 9517

अप्रमाणद्वयाशङ्का यदि वर्त्तेत तत्र तु।
प्रामाण्यनिश्चयो न स्याद्भ्रान्त्या तद्विषयीकृतेः॥
२९३८॥§ 9519

अप्रमाणद्वयं संशयविपर्यासात्मकम्॥ २९३८॥ § 9520

य इत्यादिना विरुद्धव्याप्तोपलब्धिप्रसङ्गमादर्शयन्स्ववचनविरोधमेव समर्थयते। § 9521

यः सन्देहविपर्यासप्रत्ययैर्विषयीकृतः।
स्थाणुवन्नहि तत्रास्ति तदा तद्रूपनिश्चयः॥
२९३९॥§ 9523

निश्चयविरुद्धाभ्यां संशयविपर्यासाभ्यां तद्विषयीकृतस्य वस्तुनो व्याप्तत्वान्न तत्र निश्चयावकाशः॥ २९३९॥ § 9524
774/k

बलिभुगित्यादिना—अनुमानविरोधं दर्शयति स्वपक्षसिद्धिं च। § 9525

बलिभुग्धूमहेतूत्थदोषादिप्रत्ययैर्यथा।
स्थाणुतेजोऽप्रमाणादि परेभ्यो व्यवसीयते॥
२९४०॥§ 9527

प्रयोगः—ये सन्देहविपर्यासविषयीकृतात्मानस्ते परतोऽवसातव्यात्मतत्वाः, यथा स्थाण्वादयः, सन्देहविपर्यासविषयीकृतात्मकं च केषांचित्प्रामाण्यमिति स्वभावहेतुः। बलिभुक् च धूमश्च हेतूत्थदोषादयश्चेति तथोक्ताः। तेषु प्रत्यया इति समासः। एभिश्च यथाक्रमं स्थाण्वादीनां सम्बन्धः। एतेन च हेतोर्व्याप्तिर्दर्शिता ॥ २९४०॥ § 9528

साम्प्रतं पक्षधर्मोपदेशेनासिद्धिं परिहरन्नाह—यत्सन्देहेत्यादि। § 9529

यत्सन्देहविपर्यासविषयत्वं गतं तथा।
परतो निश्चयस्तस्य प्रमाणत्वस्य गम्यताम्॥
२९४१॥§ 9531

यदिति। यस्मात्। गतमिति। निश्चितम्। कस्य, प्रमाणस्येति शेषः। तथाहिचोदनाजनिताया बुद्धेः प्रतिपादितं सन्देहविपर्यासविषयत्वम्। तथेति। यथा स्थाण्वादेः परतो निश्चयः। तस्येत्यादिना प्रमाणफलोपदर्शनम्॥ २९४१॥
§ 9532

यदुक्तं सिद्धे स्वतःप्रमाणत्वे साऽपवादनिवारणीति तन्न युक्तमाशङ्काया असम्भवादिति प्रतिपादितम्, इदानीं भवतु नामाप्रामाण्याशङ्कानिवृत्तये साधनप्रयोगः, तथापि भवन्मतेन सोऽपि न युक्त इति दर्शयन्नाह—अयं चेत्यादि। § 9533

अयं च भवतां पक्षो यत्र वाक्ये नञः श्रुतिः।
तत्रैवान्यव्यवच्छेदः स्वात्मैवान्यत्र गम्यते॥
२९४२॥§ 9535

चोदनाजनिताबुद्धिः प्रमाणमिति नेह च।
प्रयोगोऽस्ति नञस्तेन नाप्रामाण्यनिवर्त्तनम्॥
२९४३॥§ 9537

भवतां विधिशब्दार्थवादिनामयं पक्षः—यत्रैव वाक्ये नञः प्रयोगस्तत्रैवान्यव्यवच्छेदः प्रतीयते, अन्यत्र तु विधिरेवेति। न चात्र चोदनाजनितेत्यादौ साधनवाक्ये नञः प्रयोगोऽस्ति। तत्कथमनेनाप्रामाण्यव्यवच्छेदः प्रतिपाद्यताम्॥ २९४२॥ ॥ २९४३॥ § 9538

यदुक्तम्—तत्कथं संशयादय इति, तत्रादिशब्दोपात्तमर्थं दर्शयति—किञ्चेत्यादि। § 9539

किंच सर्वप्रमाणानां प्रामाण्यं निश्चितं यदि।
स्वत एव तदा कस्मान्मतभेदः प्रवादिनाम्॥
२९४४॥§ 9541

775/k

यदि सर्वप्रमाणानां स्वत एव प्रामाण्यं भवेत्तदा वादिनां प्रामाण्यविषये मतभेदो न स्यात्॥ २९४४॥ § 9542

स एव कथं सिद्ध इत्याह—येनैकैरित्यादि। § 9543

येनैकैः स्वत एवेति प्रो(प्रा ?)च्यैर्नियम उच्यते।
किञ्चित्स्वतोऽन्यतः किञ्चित्परैश्चानियमो मतः॥
२९४५॥§ 9545

एकैरिति। मीमांसकैः। परैरिति। बौद्धैः। तैः किञ्चित्स्वतःप्रमाणमिष्टम्,यथा—स्वसंवेदनप्रत्यक्षं योगिज्ञानम्, अर्थक्रियाज्ञानम्, अनुमानमभ्यासवच्च प्रत्यक्षम्, तद्धि स्वत एव निश्चीयते। अभ्यासबलेनापहस्तितभ्रान्तिकारणत्वात्। किञ्चिदन्यतः, यथा—विवादास्पदीभूतं चोदनाजनितं ज्ञानम्, प्रत्यक्षं चानपगतभ्रान्तिनिमित्तम्। अभ्यासार्थक्रियाज्ञानयोरनवाप्तत्वात्। यद्येवम्—अनुमानादौ भवन्मतेन विवादो न प्राप्नोति तस्य स्वत एव प्रमाणत्वात्। तथाहि—केचित्त्रिरूपलिङ्गहेतुकमनुमानमिच्छन्ति, केचिद्द्विरूपलिङ्गजं, केचिदेकरूपलिङ्गसमुद्भवम्। लक्षणप्रणयनं चानर्थकम्। तथा लोकायतं प्रति तत्प्रामाण्यप्रतिपादनं न कर्त्तव्यम्, स्वत एव प्रामाण्यनिश्चयादिति समानम्। नैष दोषः। यतोऽनुमानस्य तादात्म्यतदुत्पत्तिप्रतिबद्धलिङ्गनिश्चयादुत्पत्तेरन्तरेणाप्यर्थक्रियासंवादं पारम्पर्येण तथाविधवस्तुप्रतिबद्धजन्मतया तदर्थाव्यभिचारित्वं निश्चितमिति स्वतःप्रामाण्यमुच्यते। तदुत्पत्तिहेतुलिङ्गस्वरूपापरिज्ञानाद्वादिनोऽत्रानुत्पन्न एवानुमाने परस्परं विप्रवदन्ते, नतूत्पन्ने, तत्स्वरूपादिनिश्चयात्। अतएवाचार्यास्तदुत्पत्तिहेतुलिङ्गस्वरूपव्युत्पादनमेव कुर्वन्ति लक्षणे। कथं हि नाम विपरीतलिङ्गस्वरूपावधारणादनुमानोत्पत्तिर्भविष्यतीति। यदपि लोकायतं प्रत्यनुमानस्य प्रामाण्यप्रतिपादनं न कर्त्तव्यमिति चोद्यते, तदप्ययुक्तम्। नह्यस्माभिरनुमानस्य प्रामाण्यं साध्यते। किं तर्हि ?। व्यवहारः। तथाहि—मिथ्याऽर्थशास्त्रश्रवणाद्व्यामूढो लोकायतः सिद्धेऽप्यनुमानस्य प्रामाण्ये साङ्ख्यवन्न तद्व्यवहारं प्रवर्त्तयति, तस्य विषयोपदर्शनेन विषयी व्यवहारः साध्यते—यद्यत उत्पन्नं तत्तत्प्रापणशक्तियुक्तं, यथा प्रत्यक्षं स्वार्थस्य, अनुमेयादुत्पन्नं चेदं तत्प्रतिबद्धलिङ्गदर्शनद्वारायातं लिङ्गिज्ञानमित्येवं सङ्केतविषयकथनेन समयेप्रवर्त्तनात्। तथाहि प्रत्यक्षेऽर्थाव्यभिचारनिबन्धन एवानेन प्रामाण्यव्यवहारः कृतः। अव्यभिचारश्चास्य कोऽन्यस्तदुत्पत्तेः। यथोक्तम्— अर्थस्यासम्भवेऽभावात् प्रत्यक्षे ऽपि प्रमाणता। प्रतिबद्धस्व- 776/k
भावस्य तद्धेतुत्वे समं द्वयमिति। तस्माद्यथा साङ्ख्यस्तृणाग्रे करिसत्ताभावं व्यवस्यन्नपि शास्त्रश्रवणव्यामोहादभावव्यवहारमप्रवर्त्तयन्प्रवर्त्तते। तथाऽयमपि लोकायतः। नच चोदनाजनिताया बुद्धेः प्रामाण्यं सिद्धम्,येनात्राप्यनुमान-

वत्प्रामाण्यव्यवहारः साध्यत इति स्यात्, तत्र प्रतिबन्धासिद्धेः प्रामाण्यस्यैव साध्यत्वादिति न समानम्॥ २९४५॥ § 9546

स्यादेतत्—भवतु नाम मतभेदः, स कस्मात्स्वतःप्रामाण्ये सति न युज्यत इत्याह—विवादो भ्रान्तित इत्यादि। § 9547

विवादो भ्रान्तितो यस्मात्सा च निश्चयबाधिता।
निश्चिन्वन्तस्ततस्तत्त्वं विवदेरन्न वादिनः॥
२९४६॥§ 9549

अनेन विवादस्य निश्चयविरुद्धभ्रान्तिकार्यस्योपलम्भान्निश्चयाभावसिद्धिमादर्शयन्ननुमानविरुद्धत्वं स्वतःप्रामाण्यप्रतिज्ञाया दर्शयति॥ २९४६॥ § 9550

अपरमपि निश्चयविरुद्धकार्योपलम्भमादर्शयति—स्वत इत्यादि। § 9551

स्वतः सर्वप्रमाणानां प्रामाण्यस्य विनिश्चये।
न विसंवादभाक्कश्चिद्भवेन्निश्चयवृत्तितः॥
२९४७॥§ 9553

अप्रमाणे प्रमाणत्वबुद्ध्या वृत्तो हि वञ्चते।
स्वतःप्रामाण्यबोधात्तु विपरीतो न कश्चन॥
२९४८॥§ 9555

विसंवादो हि निश्चयविरुद्धाया भ्रान्तेः कार्यत्वेन प्रतीतः, स च स्वतःप्रामाण्याभ्युपगमे सति न प्राप्नोति। निश्चयेन तत्कारणस्य भ्रान्तेरपनीतत्वात्। विपरीत इति। विसंवादभाक्॥ २९४७॥ २९४८॥ § 9556

नन्वित्यादिना परः प्रत्यवतिष्ठते। § 9557

नन्वप्रमाणतो वृत्तो विदं वा कं(विसंवादं
?)समश्नुते।
निश्चयः परतस्तस्य बाधकात्प्रत्ययान्मतः॥
२९४९॥§ 9559

प्रमाणतः प्रवृत्तस्तु न विसंवादमश्नुते।

अस्यैव चेष्यतेऽस्माभिः स्वतःप्रामाण्यनिश्चयः॥
२९५० ॥§ 9561

विसंवादो ह्यप्रमाणात्प्रवृत्तस्य भवति। तस्य चाप्रमाणस्य परतो निश्चयोऽभ्युपगत एव। यत्पुनः प्रमाणं न ततः प्रवृत्तस्य विसंवादोऽस्ति। तस्यैव च स्वतःप्रामाण्यमिष्टमिति कथं स्वतःप्रामाण्यप्रतिज्ञाया अनुमानबाधा॥ २९४९॥ २९५०॥ § 9562

777/k

नाभिप्रायेत्यादिना प्रतिविधत्ते। § 9563

नाभिप्रायापरिज्ञानादिदं ह्यत्र विवक्षितम्।
स्वतः सर्वप्रमाणानां प्रामाण्यस्य विनिश्चये॥
२९५१ ॥§ 9565

नियते(तो ?)यथ(त्र ?) नैवास्ति
स्वतःप्रामाण्यनिश्चयः।
परिशेषबलात्तस्मिन्नप्रामाण्यं प्रतीयते॥
२९५२ ॥§ 9567

अर्थान्यथात्वहेतूत्थदोषज्ञानानपेक्षया।
जन्मानन्तरमेवातस्तदप्रामाण्यनिश्चयात्॥
२९५३ ॥§ 9569

अप्रमाणे प्रमाणत्वविपर्यासो न सङ्गतः।
अतोऽसंवादिनो नैव कश्चिद्वर्त्तेत तद्गतः॥
२९५४ ॥§ 9571

इदमत्र विवक्षितम्—यदि भवता सर्वप्रमाणानां स्वतःप्रामाण्यमभ्युपगम्यते तदा प्रामाण्यनिश्चयोत्पादेन प्रमाणं व्याप्तमित्यभ्युपगतं स्यात्। ततश्च यत्रैव प्रमाणव्यापकः प्रामाण्यनिश्चयो नोदेति तत्र सामर्थ्यात्प्रा(दप्रा ?)माण्यमवतिष्ठते। प्रमाणाप्रमाणयोः परस्परव्यवच्छेदरूपत्वात्। ततश्चाप्रामाण्यमपि स्वत एव सामर्थ्यादापतितम्, विसंवादकारणदोषपरिज्ञानाद(न ?)पेक्षणात्, प्रामाण्यनिश्चयानुत्पत्तेरेवाप्रामाण्यस्य निश्चितत्वात्। ततश्च यदुक्तम्— निश्चयः

परतस्तस्य बाधकात्प्रत्ययान्मतः इति तन्नोपपद्यते। एवं च सति जन्मोत्तरमेव प्रामाण्यनिश्चयोत्पादानुत्पादाभ्यां प्रामाण्येतरयोर्निश्चितत्वादप्रमाणात्परिनिश्चिता नैव कस्यचित्प्रेक्षावतः प्रवृत्तिरेव सम्भवतीति कुतो विसंवादसम्भव इति। तद्गतेरिति। विसंवादित्वगतेर्निश्चयादित्यर्थः। एते च प्रतिज्ञादोषोद्भावनमुखेन हेतोरव्याप्तिप्रकाशनाद्धेतुदोषा एव द्रष्टव्याः, न तु प्रतिज्ञादोषाः। अन्यथा हि प्रतिज्ञाया असाधनाङ्गत्वात् तद्दोषोद्भावनं प्रतिवादिनो निग्रहस्थानं स्यात्॥ २९५१॥ २९५२॥ २९५३॥ २९५४॥ § 9572

घटादिवदिति दृष्टान्तस्यासिद्धिं प्रतिपादयन्नाह—जन्मातिरिक्तेत्यादि। § 9573

जन्मातिरिक्तकालश्च क्रियाकालो न विद्यते।
क्षणिकत्वाद्धटादीनामित्यसिद्धं निदर्शनम्॥
२९५५॥§ 9575

ननु च जन्मोत्तरकालं घटादयो दृश्यन्ते एव कुलालाद्यनपेक्षा मधूदकाद्यर्थक्रियाकारिणः, तत्कथं तेषां जन्मातिरिक्तः कालो न विद्यत इत्याह—तेषामित्यादि। § 9576

तेषामुत्तरकालं हि कुलालाद्यनपेक्षिणाम्।
स्वोपादानाद्यपेक्षत्वात्स्वतो नास्ति प्रवर्त्तनम्॥
२९५६॥§ 9578

778/k

स्वोपादानम्—पूर्वः पूर्वः सजातीयः क्षणः। आदिशब्देन तद्धारकपुरुषादिपरिग्रहः। एतदुक्तं भवति—उत्तरकालमन्य एव घटादिक्षणाः स्वोपादानाद्यपेक्षा वर्त्तमाना दृश्यन्ते न तु कस्यचिज्जन्मोत्तरकालमवस्थितिः सिद्धा क्षणिकत्वात्सर्वभावानामिति॥ २९५६॥ § 9579

यथैव प्रथमं ज्ञानमित्यादावाह—नचेत्यादिना। § 9580

नचानवस्थितिप्राप्तिरन्यतो मानसंश्रितौ।
तस्मादर्थक्रियाज्ञाने स्वतःप्रामाण्यनिश्चयः॥
२९५७॥§ 9582

परः प्रत्यवतिष्ठते—(नन्वित्यादिना)। § 9583

ननु कोऽतिशयस्तस्य प्राक्तनादस्ति येन तत्।
परतः पूर्वविज्ञानमिव नाभ्युपगम्यते॥
२९५८॥§ 9585

उच्यत इत्यादिना प्रतिविधत्ते। § 9586

उच्यते वस्तुसंवादः प्रामाण्यमभिधीयते।
तस्य चार्थक्रियाभ्यासज्ञानादन्यन्न लक्षणम्॥
२९५९॥§ 9588

अर्थक्रियावभासं च ज्ञानं संवेद्यते स्फुटम्।
निश्चीयते च तन्मात्रभाव्यामर्शनचेतसा॥
२९६०॥§ 9590

अतस्तस्य स्वतः सम्यक्प्रामाण्यस्य विनिश्चयात्।
नोत्तरार्थक्रियाप्राप्तिप्रत्ययः समपेक्ष्यते॥
२९६१॥§ 9592

ज्ञानप्रमाणभावे च तस्मिन् कार्यावभासिनि।
प्रत्यये प्रथमेऽप्यस्माद्धेतोः प्रामाण्यनिश्चयः॥
२९६२॥§ 9594

अयमत्र सङ्क्षेपार्थः—प्रमाणं हि नामाविसंवादि ज्ञानमुच्यते। प्रमाणमविसंवादि ज्ञानमिति वचनात्। न(स ?)चाविसंवादोऽर्थक्रियालक्षण एव, तदर्थत्वात्प्रमाणचिन्तायाः। यतोऽर्थक्रियार्थी प्रमाणमप्रमाणं वाऽन्वेषते प्रेक्षावान्न व्यसनितया। सा चार्थक्रिया दाहपाकादिनिर्भासज्ञानोदयलक्षणा, तदुत्पादादेवार्थक्रियार्थिनः प्रवृत्तस्याकाङ्क्षानिवृत्तेः। तच्चार्थक्रियाज्ञानमात्मसंवेदनप्रत्यक्षतया स्वयमेवाविर्भवति,स्पष्टानुभवत्वाच्चानन्तरं यथानुभवं परामर्शज्ञानोत्पत्त्या निश्चितमिति स्वत एव सिद्धम्। नच तत्साध्यं फलान्तरमाकाङ्क्षितं पुरुषेण, येनापरमर्थक्रियानिर्भासि प्रत्ययान्तरोदयमनुसरतोऽनवस्था स्यात्। तथाहि लोके सद्धि(वृद्धि ?)च्छेदादिकं फलमभिवाञ्छितम्, तच्चाह्लाद परितापादिरूपज्ञानाविर्भावादेवाभिनिर्वृत्तमित्येतावतैवाहितस- 779/k

न्तोषा निवर्त्तन्ते जना इति स्वत एव तस्य सिद्धिरुच्यते। यत्पुनः पूर्वकं तत्कारणभूतं ज्ञानं तस्य न (च?) तत्प्रापणशक्तिः प्रामाण्यमुच्यते। सा च शक्तिरनभ्यासादविदितकार्यैरवधारयितुं न शक्यत इत्युत्तरकार्यज्ञानप्रवृत्त्या निश्चीयत इति प्रथमस्य परतःप्रामाण्यमुच्यते ॥ २९५९॥ २९६०॥ २९६१॥ २९६२॥ § 9595

पुनरप्यनवस्थां प्रकारान्तरेण परिहरन्नाह—आद्य इत्यादि। § 9596

आद्ये ह्य वस्तुविषये वस्तुसंवादलक्षणम्।
द्वितीयं न प्रवर्त्तेत तस्य हेतोरसम्भवात्॥
२९६३॥§ 9598

अशोकस्तबकादौ हि पावकाध्यवसायिनः।
न दाहपाकनिर्भासि विज्ञानं जातु जायते॥
२९६४॥§ 9600

जातौ वा न विजातीयं ज्वलनात्तत्प्रसज्यते।
तत्कार्ययोग्यतामात्रलक्षणत्वाद्विभावसोः॥
२९६५॥§ 9602

यदि हि—आद्यं—प्रथमं ज्ञानमवस्तुनि प्रवृत्तमभविष्यत्तदा फलज्ञानमुत्तरकालभावि नोदपत्स्यत, कारणाभावात्, वस्तुप्रतिबद्धत्वादर्थक्रियाज्ञानस्य। न ह्यनग्निग्राहिणो ज्ञानादशोकस्तबकादावग्न्यध्यवसायेन प्रवृत्तस्य दाहपाकादिनिर्भासिनः प्रत्ययाः प्रसूयन्ते। प्रसवे वाऽग्निरेवासौ, कुतः ?, दाहपाकादिकार्योत्पत्तिहेतुत्वमात्रलक्षणत्वाद्विभावसोः। वह्नेरित्यर्थः॥ २९६३॥ २९६४॥ २९६५॥ § 9603

तस्मादित्यादिनोपसंहरति। § 9604

तस्मादर्थक्रियाभासं ज्ञानं यावन्न जायते।
तावदाद्येऽप्रमाशङ्का जायते भ्रान्तिहेतुतः॥
२९६६॥§ 9606

२ आद्ये ह्य] Correction : ; आद्ये हि
(sic !)आद्ये ह्य

ननु चार्थक्रियाज्ञानवदाद्यमपि ज्ञानं साक्षादग्न्यादिपदार्थजनितमेव, तत्किमिति तत्रैवाप्रामाण्याशङ्का, नोत्तरत्रेत्याशङ्क्याह—अनन्तरमित्यादि। § 9607

अनन्तरं फलादृष्टिः सादृश्यस्योपलम्भनम्।
मतेरपटुतेत्यादि भ्रान्तिकारणमत्र च॥
२९६७ ॥§ 9609

कार्यावभासिविज्ञाने जाते त्वेतन्न विद्यते।
साक्षाद्वस्तुनिबद्धायाः क्रियायाः प्रतिवेदनात्॥
२९६८ ॥§ 9611

आद्ये हि ज्ञाने भ्रान्तिकारणमस्ति, तथाहि तदनन्तरं दाहादिलक्षणस्य फलस्या नुत्पादो भ्रान्तज्ञानसाधर्म्यं बुद्धेरपाटवम्। आदिशब्देनानादरोऽन- 780/k भ्यास इत्यादि गृह्यते। फलज्ञाने तु न किञ्चिद्भ्रान्तिकारणं विद्यत इति तस्य स्वत एव निश्चयः ॥ २९६७॥ २९६८॥ § 9612

आद्येऽपि ज्ञाने यत्राभ्यासादिना प्रोत्सारितं भ्रान्तिनिमित्तं तस्य स्वत एव प्रामाण्यमिति दर्शयन्नाह—वृत्तावित्यादि। § 9613

वृत्तावभ्यासवत्यां तु वैलक्षण्यं प्रतीयते।
अतद्विषयतो ज्ञानादाद्ये(ऽ)प्राप्तेऽपि तत्फले॥
२९६९ ॥§ 9615

अभ्यासबलेन यथा योगिनां मणिरूप्यादिषु वा तद्विदां दूरीकृतभ्रान्तिनिमित्तमेव स्फुटप्रतिभासं प्रजायते विज्ञानमेवमन्यत्राप्यभ्यासबलात्स्फुटतरप्रतिभासतया निरस्तविभ्रमाशङ्कमुपजायमानमध्य(व्य ?)वधानेन सजातीयसाधारणाध्यवसायिनं न परा(सायितं परा ?)मर्शप्रत्ययं जनयद्विजातीयतोऽतद्विषयाद्व्यावृत्तमवसीयत इति स्वत एव तस्य प्रामाण्यमुच्यते। यस्तु मन्यते—अभ्यासवत्यामपि प्रवृत्तौताद्रूप्यलक्षणलिङ्गदर्शनादनुमानत एवार्थप्रापणशक्तिलक्षणप्रामाण्यनिश्चय इति सर्वत्र परतःप्रामाण्यावसायो न क्वचिदेव स्वत इति। तन्न बुध्यामहे। तथाहि—असङ्कीर्णताद्रूप्यलक्षणलिङ्गनिश्चय एव कुतो भवतीति वक्तव्यम्। अभ्यासादिति चेत्, एवं तर्हि यदभ्यासबलाद्विजातीयाकारव्यवच्छेदेन सजातीयसाधारणमसङ्कीर्णं सारूप्यमवसीयते भ्रान्तिकारणाभावात्कः प्रामाण्ये प्रद्वेषो येन तदनुभूतं (तौ ?) भ्रान्तिकारणविरहेऽपि नाध्यवसीयत इति स्यात्। अपि च कि-

मिदं सारूप्यं नाम, यदि बोधरूपता, सा मिथ्याज्ञानेऽप्यस्तीत्यनैकान्तिकता हेतोः। अथलोहिताकारनिर्भासिता, साऽशोकस्तबकादिग्राहिविज्ञाने विद्यत इति व्यभिचार एव। अथाग्न्यादिपदार्थकार्यता, सा कथं निश्चितेति वक्तव्यम्। तत्सिद्ध्यर्थमपरलिङ्गान्तरमनुसरतोऽनवस्था स्यात्। अथापि स्यादभ्यासबलादेव प्रत्यक्षतो लिङ्गानुसरणमन्तरेणापि स्वत एव सा सिद्धेति। एवं तर्हि यद्यभ्यासस्येदृशं सामर्थ्यमभ्युपगम्यते, तदा मु(श ?)क्तिनिश्चयोऽप्यभ्यासबलादेवान्तरेणापि लिङ्गानुसरणं भवतीति किं नाभ्युपगम्यते। किञ्च— यदि तत्कार्यता सिद्धा ज्ञानस्य तदा व्याप्त्यनुसरणमनर्थकम्, तत्कार्यतावसायादेव तदर्थप्रापणशक्तिसिद्धेरनुमानज्ञानवत्। यथाऽनुमानज्ञानस्य वस्तुप्रतिबद्धलिङ्गदर्शनबलेनोत्पत्तेः पारम्पर्येण वस्तुकार्यतावसायादेव स्वतःप्रामाण्यं
781/k न सारूप्यबलादन्यथा ह्यनवस्था स्यात्तथेहापि स्वत एव प्रामाण्यं स्यात्। तथाहि—यत्र पक्षधर्मत्वनिश्चयेऽपि साध्यार्थप्रतीतिर्न जायते तत्र दृष्टान्तधर्मिणि व्याप्तिमनुसरेत्प्रतिपत्ता, यथा कृतकत्वानित्यत्वयोः। इह तु ज्ञानस्य तत्कार्यस्यावसायादेव तदर्थाव्यभिचारितया तत्प्रापणशक्तिः सिद्धेति न ताद्रूप्यं लिङ्गम्। यद्येवं कथमुक्तमाचार्येण लोकायतमधिकृत्य— स खलु प्रत्यक्षं प्रमाणं नानुमानमिति ब्रुवाणः कासांचिद्व्यक्तीनां प्रवृत्तौ संवादं विसंवादं चोपलभ्य तल्लक्षणं व्याप्त्या कथयेद्यथोपदेशं प्रवर्त्तमानस्याविप्रलम्भार्थम्, तद्यथादृष्टसाधर्म्यात्तथा प्रसाधितमनुमेयतां नातिपततीति। नैष दोषः। स्वपरसन्तानवर्त्तिनीरननुभूतविषयाबुद्धीरधिकृत्यैतदुक्तम्। अन्यत्रानुभूतविषयाभ्य इति वचनात्। अन्यथा हि यदि सारूप्यात्सर्वत्र प्रामाण्यं निश्चीयते तदाऽन्यत्रानुभूतविषयाभ्य इति प्रतिषेधोऽनर्थकः स्यात्। तस्मादभ्यासबलात्प्रोत्सारितभ्रान्तिमित्तमुपजायते यत्तत्स्वत एव प्रमाणमिति स्थितम्॥ २९६९॥ § 9616

यदुक्तम्— यथैव प्रथमज्ञानं तत्संवादमपेक्षते इत्यादि, तत्राह—वैलक्षण्येत्यादि। § 9617

वैलक्षण्याप्रतीतौ तु विजातीयार्थशङ्कया।
कार्यावभासिविज्ञानादृते मानाविनिश्चयः॥
२९७०॥§ 9619

तस्मिन्सदपि मानत्वं विनिश्चेतुं न शक्यते।
उत्तराद्यक्रियाज्ञानात्केवलं तत्प्रतीयते॥
२९७१॥§ 9621

अतश्च प्रथमं ज्ञानं तत्संवादमपेक्षते।
संवादेनापि संवादः पुनर्मृग्यस्तथैव न॥
२९७२॥§ 9623

यत्र ह्यनुभूतमपि प्रामाण्यं भ्रान्तिकारणसद्भावाद्विनिश्चेतुं न शक्यते तत्र परतोऽर्थक्रियाज्ञानान्निश्चीयते, तावन्मात्रेणैव च पुरुषस्याभीष्टार्थसंसिद्धेराकाङ्क्षा विनिवृत्तेति न पुनः संवादेनाप्यपरः संवादस्तथैव—आद्यज्ञानवदपेक्षणीयः॥ २९७०॥ ॥ २९७१॥ २९७२॥ § 9624

कस्यचित्तु यदीष्येत इत्यादावाह—भ्रान्तिहेतोरित्यादि। § 9625

भ्रान्तिहेतोरसद्भावात्स्वतस्तस्य प्रमाणता।
प्रथमस्य तदाभावे प्रद्वेषो भ्रान्तिसंभवात्॥
२९७३॥§ 9627

ननु च यत्सन्दिग्धार्थाविनाभावित्वेनानिश्चितार्थप्रापणसामर्थ्यं ज्ञानं तदनुमानवन्न प्रमाणं प्रोप्नोति। तथाहि—अनुमानस्यार्थाविनाभावसंशये सति न प्रामाण्य मिष्टम्, एवं प्रत्यक्षेऽपि न प्राप्नोति। नैष दोषः। नह्यनुमानवदर्थ- [782/k] नान्तरीयकमात्मानमुपदर्शयत्प्रत्यक्षं प्रमाणमिष्टम्। किं तर्हि ?। प्रतिभासमानार्थावसायं कुर्वत्तु।तथाहि—अर्थक्रियार्थिनोऽभिमतमर्थं प्रापयत्प्रमाणमुच्यते। न चार्थदेशं पुरुषमुपसर्पयदर्थं वा पुरुषदेशमानयत्तत्प्रापकं भवति, अपि तु पुरुषं प्रवर्त्तयत्। तं च पुरुषं न हस्तेन गृहीत्वा प्रवर्त्तयति। किं तर्हि ?। प्रवृत्तिविषयमुपदर्शयत्। तच्चोपदर्शनं प्रतिभासमानार्थावसायान्नान्यम्। यत्र च संशयस्तत्रावश्यं प्रतिभासमानाकारावसायोऽस्ति। तदनवसाये तद्विमर्शायोगात्। ततश्चैतावता प्रत्यक्षव्यापारपरिसमाप्तेः पश्चादर्थाविनाभावसंशयो भवन्न प्रत्यक्षव्यापारमुपरुणद्धीति, सत्यपि संशयोदये भवत्येव प्रामाण्यं प्रत्यक्षस्य। यत्तु प्रतिभासमानपदार्थविरुद्धाकारावसायाक्रान्तमुदेति तन्न प्रमाणम्, यथा मरीचिकाग्राहिज्ञानं जलावसायक्रान्तम्। तत्र यथोक्तप्रमाणव्यापाराभावात्। यच्च शङ्खे पीतज्ञानं मणिप्रभायां मणिज्ञानं तदप्यप्रमाणमेव, तत्र यथार्थं प्रतिभासावसाययोरभावात्। प्रतिभासवशाद्धि प्रत्यक्षस्य ग्रहणाग्रहणे नत्वार्थविसंवादमात्रत्। न चात्र यथा स्वभावदेशकालावस्थितवस्तुप्रतिभासोऽस्ति, नरा(वा?)देशकालः स एव भवति, देशकालयोरपि वस्तुस्वभावभेदकत्वात्। अन्यथा हिभेदव्यवहारोच्छेदः स्यात्। अनुमानस्य तु विकल्पात्मकत्वेन सामान्यविषयत्वान्नप्रतिभासवशाद्वस्तुविषयत्वव्यवस्था, वस्तुनोऽप्रतिभासात्। किं तर्हि ?। निश्चयवशात्। यथोक्तम्— निश्चयैः। यन्न निश्चीयते रूपं तत्तेषां विषयः कथमिति। ततश्चानुमानस्य तदाभासशून्यस्यापि नान्तरीयकार्थदर्शनबलेनोत्पत्तेः पारम्पर्येणवस्तुनि प्रतिबन्धात्प्रामाण्य-

मित्यवश्यं तत्राविनाभावनिश्चयोऽपेक्षणीयः। अन्यथाऽनुमानस्योत्पत्त्यसम्भवादिति नानुमानतुल्यं प्रत्यक्षम्॥ २९७३॥ § 9628

नन्वित्यादिना परः परतःप्रामाण्ये सतीतरेतराश्रयत्वमुद्भावयति। § 9629

ननु तस्य प्रमाणत्वे विज्ञानस्याविनिश्चिते।
कथं तत्र प्रवर्त्तेत प्रेक्षावानीप्सितागतेः॥
२९७४॥§ 9631

तथाहि—प्रेक्षापूर्वकारिणः प्रामाण्यनिश्चये सति प्रवृत्त्या भवितव्यम्, प्रवृत्तौ च सत्यां प्रामाण्यनिश्चय इतीतरेतराश्रयात्कथं प्रेक्षावत ईप्सितार्थाविनिश्चये सति प्रवृत्तिः स्यात्॥ २९७४॥ § 9632

783/k

उच्यत इत्यादिना प्रतिविधत्ते। § 9633

उच्यते संशयेनैव वर्त्ततेऽसौ विचक्षणाः।
वैचक्षण्यक्षतिस्तस्य नचैवमनुषज्यते॥
२९७५॥§ 9635

द्विविधा हि प्रवृत्तिरर्थक्रियार्था प्रामाण्यनिश्चयार्था च, तत्राद्या प्रवृत्तिः सत्यपि संशये यथा भवति तथा प्रतिपादितम्, प्रतिभासमानार्थावसायमात्रेणैव प्रत्यक्षस्य प्रवर्त्तकत्वात्, तेन वैचक्षण्यक्षतिरेवं सति नानुषज्यते, अर्थसंशयेनापि कृषीवलादीनामिव प्रवृत्तिदर्शनादित्यभिप्रायः। नच कृषीवलादीनामुपायनिश्चयेन प्रवृत्तैर्युक्ता प्रेक्षापूर्वकारितेति युक्तं वक्तुम्, उपेयापेक्षत्वादुपायस्य। उपेयानिश्चये तन्निश्चयायोगात्॥ २९७५॥ § 9636

द्वितीयाऽपि प्रवृत्तिः सत्यपि प्रामाण्यसंशये सुतरां युक्तेवेति दर्शयन्नाह—संशयेनेत्यादि। § 9637

संशयेन यतो वृत्तेस्तत्प्रामाण्यविनिश्चये।
निश्चितोपायता तेन मानं (सा च ?) सत्यपि
संशये॥ २९७६॥§ 9639

यतो—यस्मात् प्रामाण्यनिश्चयं प्रति संशयेन प्रवृत्तेरेवोपायता तेन पुरुषेण निश्चिता, ततश्चोपायविषये संशयाभावात्प्रवृत्तिर्युक्तैव॥ २९७६॥ § 9640

कथं सा तेनोपायता निश्चितेत्याह—सन्देहेन प्रवृत्तावित्यादि। § 9641

संदेहेन प्रवृत्तौ मे फलप्राप्तिर्भवेद्यदि।
प्रामाण्यनिश्चयस्तत्र ज्ञात एव भविष्यति॥
२९७७ ॥§ 9643

नान्यथेति नचाप्येवमनुयोगोऽत्र युक्तिमान्।
उपाये वर्त्तते कस्मादिति नह्यन्यथागतिः॥
२९७८ ॥§ 9645

नह्युपायाद्विना कश्चिदुपेयं प्रतिपद्यते।
इति संदेहवृत्तोऽपि प्रेक्षावत्तां जहाति न॥
२९७९ ॥§ 9647

सन्देहवृत्तोऽपीति। प्रामाण्यसन्देहेन प्रवृत्तोऽपीत्यर्थः। शेषं सुबोधत्वान्न विभक्तम्॥ २९७७॥ २९७८॥ २९७९॥ § 9648

ननु चेत्यादिना परोऽर्थक्रियाज्ञानात्प्रामाण्यनिश्चयस्यानैकान्तिकतां दर्शयन्ननवस्थामेव समर्थयते। § 9649

ननु चार्थक्रियाभासि ज्ञानं स्वप्नेऽपि विद्यते।
नच तस्य प्रमाणत्वं तद्धेतोः प्रथमस्य च॥
२९८० ॥§ 9651

784/k

तद्धेतोः प्रथमस्येति। अर्थक्रियाज्ञानहेतोः। न प्रमाणत्वमिति सम्बन्धः २९८० § 9652

नैवमित्यादिना प्रतिविधत्ते। § 9653

नैवं भ्रान्ता हि साऽवस्था सर्वा बाह्यानिबन्धना।
न बाह्यवस्तुसंवास्तास्त्ववस्थासु विद्यते॥
२९८१ ॥§ 9655

२ न्ननवस्था] Correction : ; न्नवस्था
(sic !)न्ननवस्था

स्वसंविदितरूपाश्च चित्तचैत्ताविलक्षणाः।
अवस्याद्वयभेदोऽपि स्पष्टं तेन प्रतीयते॥
२९८२॥§ 9657

यदि तावद्बाह्यार्थ(वादिनं)बौद्धं प्रति चोद्यते तदाऽसिद्धमिति प्रथमेन श्लोकेन दर्शितम्। तथाहि तेन बाह्यार्थवादिनाऽर्थसंवादात्प्रामाण्यमिष्टं नार्थ-क्रियाज्ञानसंवादात्, नच स्वप्नेऽर्थसंवादोऽस्ति सर्वस्या एव स्वप्नावस्थाया भ्रान्तत्वेन सर्वेषामविसंवादात्, तत्र सर्वविज्ञानानामर्थमन्तरेणैवोत्पत्तेर्निर्विषयत्वम्, तेन जाग्रदवस्थायां भाविन एव ज्ञानस्य प्रामाण्यलक्षणावतारान्नानेन व्यभिचारो युक्त इति भावः। किञ्च—अप्रवृत्ति(त्त ?)मपूर्वकमस्थिरं व्याकुलं च स्वप्नेऽर्थक्रियाज्ञानम्, तद्विपरीतंजाग्रदवस्थायामिति तथाविधस्य प्रामाण्ये कुतः स्वप्नेनानैकान्तः। अथ योगाचारं प्रति चोद्यते, तत्रापीदं प्रकृतानुपयोगि। तथाहि—सांव्यवहारिकस्येदं प्रमाणस्य लक्षणं प्रमाणमविसंवादि ज्ञानमिति। तत्र चार्थक्रियानिर्भासिज्ञानसंवेदनमेवाविसंवादः, तदाविर्भावे लोकस्य तथा व्यवहारात्। तदर्थत्वाद्यार्थप्रवृत्तेः। तच्च सांव्यवहारिकं ज्ञानं जाग्रदवस्थाभाव्येव। तत्रैव लोके सर्वव्यवहाराणां पारमार्थिकत्वाभिनिवेशात्। नतु स्वप्नावस्थायाम्। ततश्च जाग्रत्प्रत्ययत्वे सतीति विशेषणस्याश्रवणान्नेतरेण व्यभिचारः॥ २९८१॥ २९८२॥ § 9658

स्यान्मतं परतस्तस्य प्रामाण्यस्य विनिश्चये।
प्रसज्यते प्रमेयत्वमिति नन्वविरोध्यदः॥
२९८३॥§ 9660

स्यादेतत्—तुल्ये सर्वाकारतः (सर्वस्य परतः ?) प्रतिभासे कथमयं भेदो निश्चीयते, तदा प्रमाणान्तरेण मीयमानत्वात्तत्प्रमेयं प्राप्नोति, न च प्रमाणमेव प्रमेयं युक्तं विरोधादिति चोद्यम्। नन्वविरोध्यद इति परिहारः। अद इति। एतत्।अपेक्षाभेदात्कार्यकारणपितृपुत्रव्यपदेशवदविरोधि॥ २९८३॥ § 9661

एतदेव दर्शयति—तद्ग्राह्येत्यादि। § 9662

तद्ग्राह्यवस्त्वपेक्षं हि प्रामाण्यं तस्य गीयते।
परतोऽवगतेस्तस्य प्रमेयत्वव्यवस्थितिः॥
२९८४॥§ 9664

785/k

अपेक्षाभेदतश्चैवं कार्यकारणतादिवत्।

प्रमाणत्वप्रमेयत्वव्यवस्था न विरुध्यते॥
२९८५ ॥§ 9666

तेन ज्ञानेन यद्ग्राह्यं वस्तु तदपेक्षता तत्प्रमाणमेव न प्रमेयमं, व्यवस्थापकप्रमाणान्तरापेक्षया तु प्रमेयमेव न प्रमाणमिति न साङ्कर्यदोषः। यथा कार्यं कारणमिति व्यपेक्षाभेदान्न सङ्कीर्यते॥ २९८४॥ २९८५॥ § 9667

एवमित्यादिनोपसंहरति— § 9668

एवमर्थक्रियाज्ञानात्प्रमाणत्वविनिश्चये।
नानवस्था पराकाङ्क्षाविनिवृत्तेरिति स्थितम्॥
२९८६ ॥§ 9670

पराकाङ्क्षाविनिवृत्तेरिति। परा—अन्या चासावाकाङ्क्षा चेति विग्रहः। परस्मिन्वा —संवादादन्यस्मिन् आकाङ्क्षा पराकाङ्क्षा, तस्या विनिवृत्तेरिति समासः। किञ्च—प्रमाणमविसंवादिज्ञानमित्यनेनार्थक्रियाधिगमलक्षणफलप्रापकहेतोर्ज्ञानस्येदं लक्षणमुच्यते। ततश्च फल(ला ?)ज्ञाने लक्षणानवतारात्, कथं तस्यापि प्रामाण्यमवसीयतइत्यस्य चोद्यस्यावकाशः कथं भवेत्। तथाह्यङ्कुरस्य हेतुर्बीजमिति लक्षणे सति अङ्कुरस्यापि कथं बीजत्वमिति किं विदुषां प्रश्नो जायते। यथा च बीजस्य तद्भावोऽङ्कुरदर्शनादवगम्यते तथा प्रमाणस्यपि तद्भावोऽर्थक्रियालक्षणफलदर्शनात्। न च तत्र फलमन्येन प्रमाणेनावगम्यते यतोऽनवस्था प्रसज्यते। ज्ञानात्मनः फलस्य स्वत एवसंवेदनात्सिद्धेः। न च स्वरूपे ज्ञानस्य भ्रान्तिः संभवति। तदनिश्चये स्वसंवेदनस्यैवाभावप्रसङ्गादिति यत्किञ्चिदेतत्॥ २९८६॥ § 9671

इदानीं कारणविशुद्धिद्वारेण प्रामाण्यनिश्चयेऽनवस्थादोषं समुत्पन्नेऽपीत्यादिना श्लोकेन पूर्वपक्षमुत्क्षिप्य अत्रापीत्यादिना परिहरति। § 9672

समुत्पन्नेऽपि विज्ञाने न तावदवधार्यते।
यावत्कारणशुद्धत्वं न प्रमाणान्तराद्गतम्॥
२९८७ ॥§ 9674

अत्रापि सुधियः प्राहुर्नानवस्थेति येन सा।
शुद्धिः संवादिनो ज्ञनादनपेक्षात्प्रतीयते॥
२९८८ ॥§ 9676

सन्निकृष्टे हि विषये कार्यसंवाददृष्टितः।
कारणानां विशुद्धत्वमयत्नेनैव गम्यते॥
२९८९॥§ 9678

विप्रकृष्टे हि विषये तदुद्भूता मतिः प्रमा।
तज्जन्यत्वाद्यथैवेयं सन्निकृष्टार्थगोचरम्॥
२९९०॥§ 9680

786/k

द्विविधं हि ज्ञानं सन्निकृष्टविषयं विप्रकृष्टविषयं च। तत्र यत्तावत्सन्निकृष्टविषयं तस्य न कारणगुणावधारणात्प्रामाण्यनिश्चयः। किं तर्हि ?। अर्थक्रियासंवादिविज्ञानात्। तथाहि न तत्र गुणावधारणं सम्भवति यावदर्थक्रियासंवादात्सम्यक्त्वं नावसीयते, ततश्चावस्थिते सम्यक्त्वे पश्चात्कालभाविकारणगुणावधारणमकिञ्चित्करमेव।यत्पुनर्विप्रकृष्टार्थविषयं ज्ञानं तस्य कारणगुणनिश्चयात्प्रामाण्यनिश्चय इति दर्शयन्नाह — विप्रकृष्टे हीत्यादि। यद्विप्रकृष्टविषयं सौवर्णशङ्खग्राहिज्ञानं तस्य तज्जन्यत्वात्— विशुद्धकारणजन्यत्वात्, सन्निकृष्टविषयशुक्लशङ्खग्राहिज्ञानवत्प्रामाण्यनिश्चयः। प्रयोगः —यद्विशुद्धकारणजनितं तत्प्रमाणं, यथा सन्निकृष्टार्थविषयं शुक्लशङ्खग्राहिविज्ञानं,विशुद्धकारणजनितं चेदं विप्रकृष्टार्थविषयं पीताकारशङ्खावभासि विज्ञानमिति स्वभावहेतुः॥ २९८७॥ २९८८॥ २९८९॥ २९९०॥ § 9681

ननु चासिद्धो हेतुः। तथाहि—कारणशुद्धिर्नार्थसंवादमन्तरेणावधारयितुं शक्यते, अतीन्द्रियत्वादिन्द्रियाणाम्। अर्थसंवादापेक्षायां च तदेव प्रामाण्यं निश्चितमिति कारणगुणावधारणमनर्थकमेव स्यात्। तस्य प्रामाण्यनिश्चयोत्तरकालभावित्वात्। अथापि स्यादेकदा सन्निकृष्टविषयाद्विज्ञानादर्थक्रियासंवादतो गुणवत्तां निश्चित्यान्यदा विप्रकृष्टविषयस्यापि ज्ञानस्य संवादमन्तरेणैव कालान्तरेण गुणवत्ताया निश्चितत्वात्ततः प्रामाण्यनिश्चयो भविष्यतीति। तदेतदसम्यक्। नहि क्षणक्षयिणां भावानामेकरूपैव प्रवृत्तिः सम्भवति। अपरापरप्रत्ययोपयोगेन प्रतिक्षणंभिन्नशक्तित्वादित्येतत्सर्वमाशङ्क्याह—सितसाध्यक्रियावास्त्येत्यादि। § 9682

सितसाध्यक्रियावास्त्या यथा शङ्खे पुरःस्थिते।
कामलाक्रान्तनेत्रोत्थविज्ञानं नेति गम्यते॥
२९९१॥§ 9684

इत्थं कारणसंशुद्धौ प्रणीतायां तदेव या।
शातकुम्भमये शङ्खे पीताकारमतिर्भवेत्॥
२९९२॥§ 9686

विशुद्धकारणोत्पादात्तस्याः प्रामाण्यनिश्चयः।
निष्पादितक्रिये कम्बौ सिताकारमतेरिव॥
२९९३॥§ 9688

अनेनैतदाह—नह्यस्माभिः कालान्तरभाविनो विप्रकृष्टविषयस्य ज्ञानस्य कारणपरिशुद्ध्या प्रामाण्यं निश्चीयते, येनासिद्धता हेतोर्भवेत्, प्रतिक्षणमपरापरप्रत्ययोपयोगेन भिन्नशक्तिसंभवादिति। किं तर्हि ?। यदेव सन्निकृष्टविषयस्य ज्ञानस्य शुक्लशङ्खग्राहिणः सितसाध्यार्थक्रियाप्राप्त्या कारणशुद्धिनिश्च- 787/k यस्तदेव या विप्रकृष्टेदेशवर्त्तिनि शातकुम्भमये शङ्खे पीताकारा धीरुपजायते तस्याः कारणपरिशुद्धितः प्रामाण्यमवसीयते। न वा तस्यामेवावस्थायां कारणान्यथात्वं सम्भवति—माभूत्सन्निकृष्टार्थविषयज्ञानस्यार्थक्रियाविसंवाद इति॥ २९९१॥ २९९२॥ २९९३॥ § 9689

एतच्च भवद्भिर्भीमांसकैरिष्टमेवेति दर्शयन्नाह—क्षुदाद्यनुपघातादीत्यादि। § 9690

क्षुदाद्यनुपघातादिवचनादिदमुक्तवान्।
भाष्यकारोऽप्यतो मोहादनवस्थेह चोद्यते॥
२९९४॥§ 9692

अनेन प्रतिज्ञायाः स्ववचनविरोधोऽपि प्रतिपादितः। तथाहि भाष्यकारेणोक्तम् — यदा क्षुदादिभिरुपहतं मनो भवतीन्द्रियं वा, सौक्ष्म्यादिभिर्वा बाह्यो विषयः, ततो मिथ्याज्ञानम्, अनुपहतेषु सम्यग्ज्ञानम्। इन्द्रियमनोऽर्थसन्निकर्षो हि ज्ञानस्य हेतुः, असति तस्मिन्नज्ञानात्तद्गतो हि दोषो मिथ्याज्ञानस्य हेतुः, दुष्टेषु हि ज्ञानं मिथ्या भवति, दोषापगमे संप्रतिपत्तिदर्शनात्। कथं दुष्टावगम इति चेत्प्रयत्नेनान्विच्छन्तो च चेद्दोषमवगच्छेम प्रमाणाभावाददुष्टमिति मन्येमहीति। अनेन हि ग्रन्थेन भाष्यकृता कारणशुद्धिज्ञानात्प्रामाण्यनिश्चयः स्पष्टमाख्यातः। अन्यथा (प्र)यत्नेनान्विच्छन्त इत्यनेन किं दर्शितं भवेत्। ततश्च स्वतःप्रामाण्यप्रतिज्ञाव्याघातः॥ २९९४॥ § 9693

१ तदेव या] Correction: ; तदेव या
(sic!)तदैव या

यदुक्तम्— संवादगुणविज्ञाने केन वाभ्यधिके मते इति। तत्र संवादं प्रति पूर्वमुक्तम्, गुणज्ञानं प्रत्याह—दुष्टेत्यादि। § 9694

दुष्टकारणजन्यत्वशङ्क्या नाधिगम्यते।
मानताऽऽद्यस्य तच्छुद्धिज्ञानमभ्यधिकं मतम्॥
२९९५॥§ 9696

मानतेति। प्रामाण्यम्। आद्यस्येति। अर्थज्ञानस्य। तद्धि कारणशुद्धिज्ञानात्प्रथमभावित्वादाद्यम्। तदिति। तस्मात्॥ २९९५॥ § 9697

एवमित्यादिना प्रवृत्तेरद(दु?)ष्टतां दर्शयति— § 9698

एवं चार्थक्रियाज्ञानाद्धेतुशुद्धिविनिश्चितौ।
अकृतार्थक्रिये वृत्तेरर्थ(रेषाऽ?)वाच्योपपद्यते॥
२९९६॥§ 9700

अकृतार्थक्रिय इति। अकृता अर्थक्रिया येन स तथोक्तः। अवाच्येति। अवचनीया अनिन्द्येत्यर्थः। प्रामाण्यनिश्चयपूर्वत्वादस्या इति मन्यते॥ २९९६॥ § 9701

788/k

तस्मात्स्वतःप्रमाणत्वं सर्वत्रौत्सर्गिकं स्थितमित्यादावाह—यदि स्वत इत्यादि। § 9702

यदि स्वतःप्रमाणत्वं सर्वत्रौत्सर्गिकं स्थितम्।
बाधकारणदुष्टत्वज्ञानाभ्यां तदपोद्यते॥
२९९७॥§ 9704

बाधकारणदुष्टत्वज्ञानाभावात्प्रमाणता।
प्रागेवं च परस्मात्ते भवेत्प्रामाण्यनिश्चयः॥
२९९८॥§ 9706

तथाहि तदभावोऽयमभावाख्यं प्रमान्तरम्।

त्वत्पक्षेऽनुपलम्भाख्यमनुमानं तु मन्मते॥
२९९९ ॥§ 9708

अत्र प्रथमेन श्लोकेन परपक्षानुवादः, द्वितीयादिना दूषणम्। यदि हि बाधकादिप्रत्ययेन प्रामाण्यमपोद्यते, एवं सति बाधकादिप्रत्ययाभावात्प्रामाण्यनिश्चयोऽभ्युपगतः स्यात्। ततश्च परत एव प्रामाण्यमुक्तं भवेत्। अभावस्यापि प्रमाणान्तरत्वेनेष्टत्वात्। अस्मत्पक्षे त्वनुपलब्धिसंज्ञकेऽनुमानेऽन्तर्भावान्न प्रमाणान्तरम् ॥ २९९७॥ २९९८॥ २९९९॥ § 9709

किञ्चोत्सर्गापवादयोः कल्पिते(न) शब्दार्थविषयत्वेनानवस्थितत्वाद्वस्तुचिन्तायामनधिकार एव, सर्ववस्तूनां स्वस्वभावव्यवस्थितत्वेन स्वभावान्तरानुगमाभावात्, केवलं तदुपन्यासो भवत उत्सर्गापवादविषयानभिज्ञतामेव प्रकटयति। तथाहि— त्वदुपवर्णितयैवोपपत्त्या विपरीतोऽप्युत्सर्गापवादः शक्यते कल्पयितुमिति दर्शयति —अनयैवेत्यादि। § 9710

अनयैवोपपत्त्या स्यादप्रामाण्यमपि स्वतः।
तत्रापि शक्यते वक्तुं यस्मान्न्यायोऽयमीदृशः॥
३००० ॥§ 9712

तस्मात्स्वतोऽप्रमाणत्वं सर्वत्रौत्सर्गिकं स्थितम्।
बाधकारणदुष्टत्वज्ञानाभावादपोद्यते॥ ३००१ ॥§ 9714

यदप्युक्तं कुमारिलेन— तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता। अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यते॥ इति, अनयापि हि दिशा शक्यमपि वक्तुमिति दर्शयन्नाह—तथा बोधात्मकत्वेनेत्यादि। § 9715

तथा बोधात्मकत्वेन बुद्धेः प्राप्ताऽप्रमाणता।
यथार्थज्ञानहेतूत्थगुणज्ञानादपोद्यते॥ ३००२ ॥§ 9717

अप्रामाण्ये परायत्ते भवत्येवानवस्थितिः।
प्रमाणाधीनमेतद्धि स्वतस्तच्चाप्रतिष्ठितम्॥
३००३ ॥§ 9719

११ हेतूत्थ] Correction : ; हेतूत्व (sic !)हेतूत्थ

789/k

अप्रमाणतेत्यकारप्रश्लेषः। यथार्थज्ञानं च—अर्थसंवादज्ञानं, हेतूत्थगुणज्ञानं च—कारणसमुत्थगुणज्ञानमिति समाहारद्वन्द्वः। परायत्तेऽपि तस्मिन्नित्यादावाह—अप्रामाण्य इत्यादि। एतद्धीति। अप्रामाण्यम्। तच्चेति। प्रमाणम्॥ ३००२॥ ॥३००३॥ § 9720

कथमप्रतिष्ठितमित्याह—तथाहीत्यादि। § 9721

तथाहि बाधकाभावात्प्रामाण्यं भवतोचयते।
बाधाभावोऽप्यभावाख्यं प्रमाणान्तरमिष्यते॥
३००४॥§ 9723

तस्यापि बाधकाभावात्प्रामाण्यमभिधीयते।
तत्र तत्रैवमिच्छायां व्यवस्था नोपलभ्यते॥
३००५॥§ 9725

यदुक्तम्—बाधकः प्रत्यय इत्यादि तत्राह—अनपेक्षप्रमाणत्वमित्यादि। § 9726

अनपेक्षप्रमाणत्वं बाधकप्रत्यये यतः।
न सिद्धं तेन नैवायं पूर्वज्ञानमपोहते॥
३००६॥§ 9728

अभावाख्यस्य प्रमाणस्यापेक्ष(त)त्वादनपेक्षप्रमाणत्वमस्यासिद्धम्॥ ३००६॥ § 9729

अथापीत्यादिना। अनवस्थामेव समर्थयते। § 9730

अथापि बाधकाभावं विना प्रामाण्यमिष्यते।
क्वचिदाद्ये तथाभावे प्रद्वेषः किंनिमित्तकः॥
३००७॥§ 9732

यद्यनवस्थाभयात्क्वचिद्विनैव बाधकाभावं प्रामाण्यमिष्यते तदा प्रथमेऽपि ज्ञाने बाधकाभावो नापेक्षणीयः स्यात्। ततश्च सर्वज्ञानानां प्रामाण्यप्रसङ्गः॥ ३००७॥ § 9733

यदुक्तम्—तत्रापि त्वपवादस्य स्यादपेक्षेत्यादि। तत्राह—बाधकः प्रत्ययश्चायमित्यादि। § 9734

बाधकः प्रत्ययश्चायं पूर्वज्ञानमपोहते।
अनपेक्षप्रमाणत्वाद्यदि शङ्काऽत्र किं भवेत्॥
३००८॥§ 9736

अनपेक्ष्यप्रमाणत्वं शङ्क्यते चात्र बाधकम्।
विरुद्धमेतदाशङ्का निश्चिते न हि जायते॥
३००९॥§ 9738

यदि बाधकः प्रत्ययोऽनपेक्ष्यप्रमाणभावस्तत्कथं तत्रापवादाशङ्का, येनोच्यते तत्रापि त्वपवादस्य स्यादपेक्षेति, ततश्च परस्परव्याहतमेतदुक्तम्—अनपेक्षप्रमाणत्वम्, तत्र चाशङ्क्यते बाधकमिति। तथाह्यनपेक्षमित्यनेन निश्चयेन विषयीकृतमु च्यते, यत्र च निश्चयस्तत्राशङ्काया असम्भवः, निश्च- 790/k यारोपमनसोर्बाध्यबाधकभावात्, आशङ्कायाश्चोभयांशावलम्बित्वेनारोपाकारप्रवृत्तत्वात्॥ ३००८॥ ३००९॥ § 9739

अथानुरूपयत्नेनेत्यादावाह—स्वतःप्रामाण्यपक्ष इत्यादि। § 9740

स्वतःप्रामाण्यपक्षेऽपि स्वरसेनैव निश्चयात्।
कस्माद्बाधकसद्भावसिद्धौ यत्नो विधीयते॥
३०१०॥§ 9742

तथाहि स्वरसेनैव न यस्मिन्मानिनिश्चयः।
निश्चीयतेऽत्र(प्य?)यत्नेन सामर्थ्यात्तत्र बाधकः॥
३०११॥§ 9744

अतः परीक्षकज्ञानत्रयमत्र किमुच्यते।
नैकस्याप्यवकाशोऽस्ति तस्मिन्निश्चयतः स्वतः॥
३०१२॥§ 9746

यदि चोत्पद्यते शङ्काऽनुपलम्भेऽपि संशयात्।

बाधाभावाविनाभूतं यमान्नानुपलम्भनम्॥
३०१३॥§ 9748

एवं सति त्रये कस्मात्परितोषस्त्वया कृतः।
अदृष्टावपि शङ्क्येत बाधा पूर्ववदत्र हि॥
३०१४॥§ 9750

यावन्न कार्यसंवादस्तावन्न विनिवर्त्तते।
बाधाशङ्का यतस्तस्मिन्नियमस्त्रितयेऽफलः॥
३०१५॥§ 9752

ततश्चाजातबाधेनाप्याशङ्क्यं बाधकं पुनः।
छलेन वस्तुनस्तत्त्वं नहि जात्ववतिष्ठते॥
३०१६॥§ 9754

आजीवितात्समुत्पन्नं बाधप्रत्ययवर्जितम्।
शङ्खे पीतनिभं ज्ञानं प्रमाणं नहि जायते॥
३०१७॥§ 9756

यदि स्वत एव प्रामाण्यनिश्चयस्तदा निश्चयेन प्रामाण्यस्य व्याप्तत्वाद्यत्रानिश्चयस्तत्र सामर्थ्यादप्रामाण्यस्यावस्थानाद्बाधकसद्भावो यत्नमन्तरेणैव निश्चित इति तद्भावसिद्ध्यर्थो व्यर्थो यत्नः, तत्र चैकस्यापि परीक्षकज्ञानस्यापेक्षावकाशो नैव संभवतीति, किं पुनस्त्रयाणामित्यत इदमप्यसङ्गतमुक्तम्—इदं च परीक्षकज्ञानत्रितयं नातीवर्त्तत इति दर्शयति—अत इत्यादि। स्यादेतत्—अनुपलम्भमात्रेण बाधकाभावो न शक्यते निश्चेतुम्, सतोऽपि कस्यचिद्दूरसूक्ष्मव्यवहितस्यानुपलब्धेर्बाधकाभावेनानुपलम्भस्याव्याप्तत्वात्, तेन बाधकाभावसिद्धये यत्नो विधीयत इति। यद्येवं परीक्षकज्ञान-
791/k त्रयनियमं जहीहि, प्रथमज्ञानवदन्यत्रापि बाधकस्याशङ्क्यमानत्वात्, यावद्वि(द्धि?) फलज्ञानं नोदेति तावद्बाधाशङ्का केन निवर्त्तताम्, येन त्रयनियमः स्यात्, न ह्याक्रोशमात्रेणैव विना प्रमाणं प्रेक्षावतामाशङ्कानिवृत्तिर्युक्ता। तथाहि वस्तुस्थित्या प्रमाणचिन्ता, नायं छलव्यवहारः प्रस्तुतो येन कतिपयप्रत्ययमात्रं निरूप्यते। यदि पुरर्ज्ञानत्रयोदयावधिमात्रेण प्रामाण्यमवतिष्ठते हन्त

तर्हि येषामाजीवितं कामलोपहतचक्षुषां पीतशङ्खाकारमेव ज्ञानमुपजायते तेषां तद्विज्ञानं प्रमाणं स्यात्॥ ३०१०॥ ३०११॥ ३०१२॥ ३०१३॥ ३०१४॥ ३०१५॥ ॥ ३०१६॥ ३०१७॥ § 9757

स्यादेतद्यद्यप्रमाणं तस्य किमिति ज्ञानत्रयपरीक्षाया ऊर्ध्वं बाधकं नोपजायते, अनुत्पत्तेर्नास्तीत्यवसीयत इत्याशङ्क्याह—विशुद्धीत्यादि। § 9758

विशुद्धिकारणाभावान्नोपजायेत बाधकम्।
अन्येन वा निमित्तेन नातः शङ्का निवर्त्तते॥
३०१८॥§ 9760

विशुद्धेः कारणं द्रोणकुसुमरसनिषेकादि। तस्याभावान्नोपजायते बाधकम्। अन्येन वा निमित्तेनेति। यथा मरुमरीचिकानिचये समुपजातसलिलविभ्रमस्य पुंसोऽनुपसर्पणात्सलिलस्वभावविविक्तमरुस्थलीनिर्भासि ज्ञानं नोपजायते॥ ३०१८॥ § 9761

उत्प्रेक्षेत हीत्यादावाह—सनिमित्तैवेत्यादि। § 9762

सनिमित्तैव तेनेयमाशङ्का यत्र मोहतः।
शुद्धिसंवाददृष्टौ तु नाशङ्का सुधियो भवेत्॥
३०१९॥§ 9764

स सर्वव्यवहारेषु संशयात्मा न जायते।
निःसंशया हि धीस्तस्य शुद्धिसंवाददर्शने॥
३०२०॥§ 9766

अत्रापि यः पुनः शङ्कां कश्चित्प्रकुरुते जडः।
संशयात्मकता ये(ऽजे?)न मन्ये तं प्रति निन्दिता॥
३०२१॥§ 9768

प्रतिपादितमेतद्यथा कारणशुद्धिसंवादज्ञानाभ्यां शङ्का निवर्त्तते। यत्पुनरुक्तं तथाच वासुदेवेनेत्यादि, तत्केवलमात्मनो भक्तिवादावलम्बनं प्रकटितं न वस्तुस्थितिः। नहि वचनमात्रान्निर्युक्तिकात्परस्य प्रेक्षावतो व्युत्थितचेतसस्तत्स्वभावनिर्णयो ज्ञायते। तथाहि वासुदेववचनमन्येनाभिसम्बन्धिना व्यवस्थितत्वादविरोधीति दर्शयन्नाह—अत्रापीत्यादि। अत्र—शुद्धिसंवाददर्शने, यो

भवद्विधः शङ्कां कुरुते संवादेनापि संवादः पुनर्मृग्यस्तथैव हीत्येवम्, तं प्रति, अजेन—विष्णुना, संशयात्मकता निन्दितेति संभाव्यते॥ ३०१९॥ ३०२०॥ ३०२१॥ § 9769

792/k

यावानेवापवादोऽतो यत्र सम्भाव्यते मतावित्यादावाह—देशेत्यादि। § 9770

देशकालानरावस्थाभेदापेक्षाप्रकल्पिते।
प्रामाण्यनिश्चयेऽन्यस्माद्व्यक्तं प्रामाण्यनिश्चितिः॥
३०२२॥ § 9772

तथाहि देशकालादौ बाधाभावात्सुनिश्चितौ।
प्रमाणान्तरतः प्राच्ये ज्ञाने प्रामाण्यनिश्चयः॥
३०२३॥ § 9774

अनेन स्ववचनविरोधं प्रतिपादयति। तथाहि—देशकालनरावस्थापेक्षया प्रामाण्यनिश्चये प्रकल्प्यमाने परत एवेति स्पष्टमुक्तं भवति। यतो देशकालादौ प्रमाणान्तरतो बाधाया अभावे निश्चिते सति प्राच्ये—प्रथमे ज्ञाने प्रामाण्यनिश्चयोऽभ्युपगम्यमानः कथं परतो नाभ्युपगतः स्यात्। अवश्यं हि प्रमाणान्तरतो बाधाया अभावो निश्च(श्चे?)यः, तथाहि—स्वतःप्रामाण्येऽभ्युपगम्यमाने सर्वज्ञानानां प्रामाण्यप्रसङ्गो माभूदित्यवश्यं त्वया वक्तव्यं यत्र बाधा नास्ति तस्यैव स्वतःप्रामाण्यं नान्यस्येति, स च बाधाया अभावोऽनुपलम्भमात्रान्न शक्यते निश्चेतुं व्यभिचारादिति सामर्थ्यानुपलब्धिलक्षणप्राप्तानुपलम्भतो निश्चेयः, तस्यैव बाधाभावेन व्याप्तत्वात्। स चोपलब्धिलक्षणप्राप्तानुपलम्भः संवादविज्ञानतो नान्यो युक्त इति प्रमाणान्तरत एव प्रामाण्यनिश्चयोऽभ्युपगतः स्यात्॥ ३०२२॥ ३०२३॥ § 9775

ऋणादीत्यादावाह—ऋणादीत्यादि। § 9776

ऋणादिव्यवहारस्तु यो वाक्यत्रययोग्यवान्।
स तादृशस्थलात्मैव नोदाहार्यः प्रमास्थितौ॥
३०२४॥ § 9778

---

४ प्राच्ये] Correction : ; प्राश्चे (sic !)प्राच्ये

अर्थिप्रत्यर्थिनो तत्र स्मृत्वा स्मृत्वा परिस्फुटम्।
नहि सूक्ष्मेक्षिकां कर्त्तुं लभेते तत्र वस्तुनि॥
३०२५॥§ 9780

वस्तुस्थित्या प्रमाणं तु व्यवस्थाप्यं छलान्ननु।
प्रकृताप्रतिरूपोऽतो व्यवहार उदाहृतः॥
३०२६॥§ 9782

वस्तुस्वभावप्रतिबद्धायां प्रमास्थितौ प्रकृतायां इच्छामात्रविरचितसङ्केतप्रतिबद्धस्य छलात्मनो यदृणादिव्यवहारस्योदाहरणं तत्केवलं भवतः प्रकृतानभिज्ञतां प्रकटयति ॥ ३०२४॥ ३०२५॥ ३०२६॥ § 9783

त्रिसत्यतापि देवानामित्यादावाह—त्रिसत्येत्यादि। § 9784

त्रिसत्यताऽपि देवानां नैव निश्चितिकारणम्।
आद्यान्निश्चित्य सद्भावे नैव स्यात्परतोऽप्यसौ॥
३०२७॥§ 9786

793/k

आद्यादिति। प्रथमाद्वचनान्निश्चितेरसद्भावे सति परतः—उत्तरकालभाविनो वचनद्वयात् असौ—निश्चितिर्नैव स्याद्विशेषाभावात्॥ ३०२७॥ § 9787

एतदेव दर्शयति—तदीयमित्यादि। § 9788

तदीयमेव येनेदं वचनद्वयमुत्तरम्।
तदाद्ये प्रत्ययाभावे को विशेषस्तदन्ययोः॥
३०२८॥§ 9790

उत्तरमिति। पश्चात्कालभावि। प्रत्ययाभाव इति। निश्चयाभावे। तदन्ययोरिति। तस्मादन्ययोरुत्तरकालभाविनोरित्यर्थः। यो ह्येकं वचनं द्वितीयं च मिथ्या वदेत् स तृतीयमपि किं न वदेत्, कस्तदानीं तस्य प्रतिरोद्धा, येन तृतीयात्संप्रत्ययो जायते॥ ३०२८॥ § 9791

तेन स्वतःप्रमाणत्व इत्यादावाह—अत इत्यादि। § 9792

अतः पूर्वोक्तया युक्त्या त्वत्पक्षेऽप्यनवस्थितिः।
प्रमाणत्वाप्रमाणत्वे यथायोगमतः स्थितेः॥
३०२९॥§ 9794

पूर्वोक्ता युक्तिः— तथाहि बाधकाभावात्प्रमाणं भवतोच्यते। बाधाभावोऽप्यभावाख्यं प्रमाणान्तरमिष्यत इत्यादिनोक्ता॥ ३०२९॥ § 9795

नित्यमाप्तप्रणीतं चेत्यादावाह—वाक्यमित्यादि। § 9796

वाक्यं नित्यं पुराऽस्माभिर्विस्तरेण निराकृतम्।
क्षीणनिःशेषदोषश्च नाप्तोस्ति भवतः स्मृतौ॥
३०३०॥§ 9798

अक्षीणावृत्तिराशिस्तु कीदृगाप्तो भविष्यति।
तस्य सम्भाव्यते दोषादन्यथाऽपि वचो यतः॥
३०३१॥§ 9800

पुरा—श्रुतिपरीक्षायाम् नित्यं वाक्यं विस्तरेण निरस्तमित्यसिद्धत्वात्कुतस्तस्य स्वतःप्रामाण्यचिन्तावतारो भवेत्। आप्तस्य स्वयमनभ्युपगमात्प्रणीतमपि वाक्यमसिद्धमेव। तथाहि—यस्यानृतहेतवो रागादयो दोषाः निःशेषं प्रहीणाः स एवाप्तोयुक्तः, अन्यथा रागादिभिर्दोषैरनृतहेतुभिः परीतचेतसः कथमाप्तत्वं सेत्स्यति। नच भवद्भिः प्रहीणाशेषक्लेशजालः कश्चिन्नरोऽभ्युपगम्यते, येनाप्तवचनं प्रमाणं भवेद्भवताम्॥ ३०३०॥ ३०३१॥ § 9801

किञ्च भवतु नामाप्तस्तथापि तस्य वचनमसिद्धमेवेति दर्शयति—जातेऽपीत्यादि। § 9802

जातेऽप्याप्ते तदीयोऽसौ गुणौघः केन शक्यते।
ज्ञातुमाप्तप्रणीते स्याद्यतो वाक्येऽवधारणम्॥
३०३२॥§ 9804

794/k

योऽप्यतीन्द्रियदृक्पश्येत्तदीयगुणसम्पदम्।
तस्याप्याप्तप्रणीतेन वचसा किं प्रयोजनम्॥
३०३३॥§ 9806

स हि वाक्यनिराशंसः स्वयमर्थं प्रपद्यते।
अन्योऽप्याप्तापरिज्ञानात्ततोऽर्थं नावगच्छति॥
३०३४॥§ 9808

नह्याप्तमनवधार्य तदीयमेतद्वचनमित्येवमवधारयितुं शक्यम्, न चाप्तावधारणं संभवति, तथाहि—यस्तावत्क्षीणनिःशेषदोषोऽतीन्द्रियार्थदर्शी स यद्यप्याप्तमवधारयति, तथाऽपि तद्वचनमकिञ्चित्करमेव, स्वयं सर्वार्थप्रत्यक्षदर्शित्वेन तद्वचनादप्रवृत्तेरतस्तस्य तदवधारणमनर्थकम्। यश्चान्योऽर्वाग्दर्शी स नैवाप्तावधारणपटुरिति नासौ स्वतस्तद्वचनादर्थमवगच्छति, अनिश्चितत्वात्॥ ३०३२॥ ३०३३॥ ३०३४॥ § 9809

ये विद्यागुरव इत्यादावाह—स्वतःप्रामाण्येत्यादि। § 9810

स्वतःप्रामाण्यवादे च स्वतो निश्चयजातितः।
विनाशसम्भवायोगात्किमर्थं विनिवारणम्॥
३०३५॥§ 9812

निश्चयजातितः—निश्चयोत्पत्तेः। अन्यथा यदि स्वतो निश्चयो नोत्पद्यते तदा स्वतःप्रामाण्यवादो हीयेत॥ ३०३५॥ § 9813

अतो गुणनिषिद्धैर्वेत्यादावाह—न नामेत्यादि। § 9814

न नाम दूष्यते वाक्यं दोषैर्गुणनिराकृतैः।
गुणानिश्चयतस्तत्तु विनिश्चेतुं न शक्यते॥
३०३६॥§ 9816

यदि नाम दोषौर्न दूष्यते गुणवद्वाक्यं गुणैर्दोषाणां निराकृतत्वात्, तथाऽपि परसन्तानवर्त्तिनां गुणानामतीन्द्रियत्वात्तदनिश्चये गुणवद्वाक्यं निश्चेतुं न शक्यते, नचापि (वि?) निश्चितं स्वतःप्रमाणं भवितुमर्हति॥ ३०३६॥ § 9817

यद्वा कर्तुरभावेन न स्युर्दोषा इत्यत्राह—वाक्यस्येत्यादि। § 9818

वाक्यस्याकर्तृकत्वं च प्रागेव विनिवारितम्।
नातः कर्तुरभावे ते(न?) न स्युर्दोषा निराश्रयाः॥
३०३७॥§ 9820

प्रागेवेति। श्रुतिपरीक्षायाम्॥ ३०३७॥ § 9821

तत्रोप्तोक्तेर्द्वयं दृष्टमित्यादावाह— § 9822

गुणेभ्य(?)श्च प्रमाणत्वं यथा युक्तं तथोदितम्।
गुणानां चापरिज्ञाने दोषाभावो न लक्ष्यते॥
३०३८॥§ 9824

795/k

स्वतो वाक्यं प्रमाणं तद्दोषाभावोपलक्षितम्।
न युक्तमपरिज्ञानाद्दोषाभावो ह्यलक्षणम्॥
३०३९॥§ 9826

तथोदितमिति। तत्रापि सुधियः प्राहुरित्यादिना। यच्चोक्तम्—स्वतो वाक्यं प्रमाणं च दोषाभावोपलक्षितमिति, तदप्ययुक्तम्, गुणानामतीन्द्रियत्वात्तदपरिज्ञाने दोषाभावस्य गुणभावात्मकस्य लक्षयितुमशक्यत्वात्। एतदेवाह—दोषाभावो ह्यलक्षणमिति। लक्ष्यतेऽनेनेति लक्षणम्, न लक्षणमलक्षणम्, उपलक्षणं न भवतीत्यर्थः। अपरिज्ञातत्वादिति भावः॥ ३०३८॥ ३०३९॥
§ 9827

नचापरिज्ञातं लक्षणं भवतीति दर्शयति—न हीत्यादि। § 9828

नहि दण्डापरिज्ञाने पुंसां दण्डीति लक्ष्यते।
तल्लक्षितं स्वतो मानमित्येतच्च पराहतम्॥
३०४०॥§ 9830

दोषाभावः प्रमाभावात्प्रमाणान्निश्चितात्मकः।
वाक्यस्य लक्षणं युक्तं परतोऽतः प्रमास्थितिः॥
३०४१॥§ 9832

किञ्च भवतु नाम दोषाभावो लक्षणं तथापि दोष एव, स्ववचनव्याघातप्रसङ्गात्। तथाहि—यदि दोषाभावेन प्रामाण्यमुपलक्ष्यते तदा स्पष्टमेव परतःप्रामाण्यमुक्तं स्यात्, ततश्च स्वतःप्रामाण्यमित्येतद्वचनं पराहतं स्यात्। एतदेव स्पष्टयति —दोषाभावो यद्यभावाख्येन प्रामाण्येन निश्चितो भवेत्तदाऽसौ लक्षणं भवेत्,अनिश्चितस्य लक्षणत्वायोगात्, अन्यस्य चाभावनिश्चायकस्य प्रमाणस्याभावात्, ततश्च परतोऽभावाख्यात्प्रामाण्यं स्फुटतरमेवोक्तं स्यात्॥ ३०४०॥ ३०४१॥ § 9833

यदुक्तम्—नृदोषविषयं ज्ञानं तेषु सत्सु न जायते। इति तत्राह—नृदेषेत्यादि। § 9834

नृदोषविषयं ज्ञानं तेषु सत्सूपजायते।
न नाम दोषाभावे तु गुणाज्ञाने कथं मतिः॥
३०४२॥§ 9836

यदि नाम गुणेषु सत्सु दोषविषयं ज्ञानं नोत्पद्यते, गुणानां परसन्तानवर्त्तिनामतीन्द्रियत्वात्तदपरिज्ञाने सति दोषाभावनिश्चयो न प्राप्नोति गुणभावात्मकत्वाद्दोषाभावस्य, नहि घटविविक्तप्रदेशापरिज्ञाने घटाभावो ज्ञातुं शक्यते॥ ३०४२॥ § 9837

एतदेव दर्शयति—द्वेषेत्यादि। § 9838

द्वेषमोहादयो दोषाः कृपाप्रज्ञादिबाधिताः।
दयाद्यनिश्चये तेषामसत्त्वं हि कथं गतम्॥
३०४३॥§ 9840

796/k

तेषामिति। दोषाणाम्॥ ३०४३॥ § 9841

अत्र कुमारिलेनोक्तम्— तदा न व्याप्रियन्ते तु ज्ञायमानतया गुणाः। दोषाभावे तु विज्ञेये सत्तामात्रोपकारिणः॥ इति, एतत्तदेत्यादिनाशङ्कते। § 9842

तदा न व्याप्रियन्ते तु ज्ञायमानतया गुणाः।
दोषाभावे तु विज्ञेये सत्तामात्रोपकारिणः
३०४४॥§ 9844

उपकारिण इति। दोषाभावनिश्चयं प्रत्युपकारिणः॥ ३०४४॥ § 9845

यद्येवमित्यादिना प्रतिविधत्ते। § 9846

यद्येवं संशयो न स्याद्विपर्यस्ता मतिस्तथा।
दोषाः सन्त्यस्य नो वेति सन्त्येवेत्याप्तसम्मते॥
३०४५॥§ 9848

तत्संदेहविपर्यासौ भवतश्चात्र कस्यचित्।
यावद्गुणगणाधार इत्यसौ नावगम्यते॥
३०४६॥§ 9850

यदि सत्तमात्रेण गुणा दोषाभावनिश्चयाय व्याप्रियेरंस्तदाऽऽप्तसम्मते पुंसि न कस्यचिद्दोषाभावं प्रति संशयविपर्यासौ प्राप्नुतः, निश्चयेन तयोर्बाधितत्वात्, नचैवंभवति, तत्तस्माद्यावद्गुणवत्तानिश्चयो न जायते तावद्दोषाभावविषयौ संशयविपर्यासौ भवत एवेति न सत्तामात्रेण व्याप्रियन्ते गुणाः॥ ३०४५॥ ३०४६॥ § 9851

दोषाभावेऽप्यथाज्ञाने स्वतःप्रामाण्यनिश्चयः।
तथाऽपि विमतिर्न स्यात्पूर्ववत्तत्र वक्तरि॥
३०४७॥§ 9853

अथापि स्यान्माभूद्गुणानां व्यापारो दोषाभावनिश्चयाय, तथाऽप्यनिश्चितादेव दोषाभावात्प्रामाण्यनिश्चयो भविष्यतीति, एतदप्ययुक्तम्, पूर्ववत्तत्राप्तसन्मते वक्तरिविमत्यभावप्रसङ्गात्। नहि तद्वाक्यस्य स्वतःप्रामाण्यनिश्चये सति तस्मिन्वक्तरि किमयं सत्यवादी न वा, नैव वेति मतिर्युक्ता। विमतिशब्देनात्र संशयविपर्यासौ विवक्षितौ। विपरीताकारा मतिर्विमतिरिति कृत्वा संशयस्योभयांशावलम्बित्वेन विपरीताकारसंभवात्॥ ३०४७॥ § 9854

यच्चापरमिदमुक्तं कुमारिलेन— तस्माद्गुणेभ्यो दोषाणामभावस्तदभावतः। अप्रमाणद्वयासत्त्वं तेनोत्सर्गोऽनपोदितः॥ इत्यादि, तदपि दोषाभावनिश्चये सत्ययुक्तमेवेति दर्शयति—दोषाभावस्येत्यादि। § 9855

दोषाभावस्य चाज्ञानादप्रमाद्वयनास्तिता।
कथं प्रतीयते येन भवेत्प्रामाण्यनिश्चयः॥
३०४८॥§ 9857

797/k

अथाप्रमाद्वयासत्ताऽप्रतीतावपि गम्यते।
प्रामाण्यं स्वत एवैवं विमतिः स्यान्न पूर्ववत्॥
३०४९॥§ 9859

१ मभावस्तद] Correction : ;
मभावात्तद (sic !)मभावस्तद

यदि हि संशयविपर्यासाभ्यामपवादभूताभ्यां रहितं ज्ञानं सिद्ध्येत्तदा तत्प्रमाणं भवेत्। अन्यथाऽपवादसमाक्रान्ते विषये कथमुत्सर्गो निविशेत। तयोश्च संशयविपर्यासयोर्दोषहेतुकत्वाद्दोषाभावानिश्चये तयोरभावनिश्चयो न युज्यते। अप्रमाद्वयनास्तितेति। संशयविपर्ययनास्तिता॥ ३०४८॥ ३०४९॥ § 9860

तामेव विमतिं दर्शयति—किमस्य वचनं मानमित्यादि। § 9861

किमस्य वचनं मानं किंवाऽमानमथाप्यदः।
अमानमेव सर्वेषां स्वतःप्रामाण्यनिश्चयात्॥
३०५० ॥§ 9863

एवं दोषाभावादीनां सत्तामात्रेण प्रामाण्यनिश्चयं प्रत्यङ्गभावो न युक्त इति प्रतिपादितम्, इदानीं तेषु निश्चयापेक्षणे परतःप्रामाण्यमनवस्था न प्रसज्यत इत्येतद्द्वयं विस्तरेण प्रतिपादयन्नाह—दोषाभावेत्यादि। § 9864

दोषाभावाप्रमाभावगुणभावेषु त्रिष्वपि।
अवश्याभ्युपगन्तव्या प्रतीतिर्नियमादतः॥
३०५१ ॥§ 9866

दोषाभावे अप्रमाणद्वयाभावे गुणेषु चावश्यं प्रतीतिः—निश्चयाख्याऽभ्युपगन्तव्या। अन्यथा प्रामाण्यनिश्चयायोगादिति प्रतिपादितत्वात्॥ ३०५१॥ § 9867

यदि नामाऽभ्युपगता ततः किमित्याह—सेत्यादि। § 9868

साऽप्रमाणं प्रमाणं वेत्येषामेवं विकल्प्यते।
यथार्थनिश्चयायाङ्गमप्रमाणं कथं भवेत्॥
३०५२ ॥§ 9870

सैषा त्रिष्वपि यथोक्तेषु प्रतीतिः प्रामाण्याङ्गत्वेनेष्टा किमप्रमाणमाहोस्वित्प्रमाणमिति कल्पनाद्वयम्। यद्याद्यः कल्पस्तदा प्रामाण्यनिश्चयाङ्गं न प्राप्नोति स्वयमप्रमाणत्वात्। नह्यप्रमाणत्वेन गृहीतः साक्षी व्यवहारे निश्चयाङ्गं भवति॥ ३०५२॥ § 9871

प्रामाण्ये परतः प्राप्ते तत्प्रामाण्यविनिश्चयः।
कथं वा गम्यते तस्याः प्रतीतेः सा प्रमात्मता॥
३०५३ ॥§ 9873

बाधकप्रत्ययाभावादिति चेत्सोऽपि किं प्रमा।
न वेति दोषः सर्वोऽपि पुनरत्रानुवर्त्तते॥
३०५४॥§ 9875

अथ द्वितीयः पक्षस्तदा परतस्तस्य विवक्षितस्य ज्ञानस्य प्रामाण्य-
798/k प्रसङ्गोऽनव स्यादोषश्च। तामेवानवस्थां प्रतिपिपादयिषुः सन्पृच्छति—कथं वेत्यादि। सोऽपीति। बाधकप्रत्ययाभावः॥ ३०५३॥ ३०५४॥ § 9876

कथमसौ दोषोऽत्राप्यनुवर्त्तत इत्याह—प्रामाण्य इत्यादि। § 9877

प्रामाण्ये परतःप्राप्ता प्रस्तुतस्य प्रमाणता।
यथार्थज्ञानहेतुत्वमप्रमाणस्य वा कुतः॥
३०५५॥§ 9879

अस्यापि गम्यते केन प्रामाण्यमिति चिन्त्यते।
बाधकप्रत्ययासत्त्वादित्यनिष्टा प्रसज्यते॥
३०५६॥§ 9881

सुबोधम्। अस्यापीति। बाधकप्रत्ययाभावस्य॥ ३०५५॥ ३०५६॥ § 9882

किञ्च—तस्माद्गुणेभ्यो दोषाणामभाव इत्यादिना प्रदर्शितेन न्यायेन यदि सर्वत्र प्रामाण्यं निश्चीयते तदा पूर्वमेव प्रमाणं परतोऽभ्युपगतं स्यादनवस्था च। तद्दर्शयति —तस्मादित्यादि। § 9883

तस्माद्गुणेभ्यो(?) दोषाणामभावस्तदभावतः।
अप्रमाणद्वयासत्त्वं तेनोत्सर्गोऽनपोदितः॥
३०५७॥§ 9885

सर्वत्रैवं प्रमाणत्वं निश्चितं चेदिहाप्यसौ।
पूर्वोदितो दोषगणः प्रसक्ता चानवस्थितिः॥
३०५८॥§ 9887

पूर्वोदित इति। गुणादीनां परसन्तानवर्त्तिनामर्वाग्दर्शनस्यातीन्द्रियत्वात्त-
दनिश्चये दोषाभावस्याप्यनिश्चयादप्रमाणद्वयासत्त्वमप्यनिश्चितमिति न गुणा-

दिभ्यः प्रामाण्यं सिद्ध्येत्, अथ ते सत्तामात्रेणोपकारकास्तदा विमतिर्न स्यादित्येवमादिर्दोषगणः सर्वत्र प्रसज्यते॥ ३०५७॥ ३०५८॥ § 9888

अपि च—तस्माद्गुणेभ्यो दोषाणामभाव इत्यादिना यत्प्रामाण्यं निश्चयाङ्गत्वेनोक्तमप्रमाणद्वयासत्त्वं दोषाभावश्चेत्येतद्द्वयं तत्किं प्रसज्यप्रतिषेधमात्रमिष्टमाहोस्वित्पर्युदासात्मकमिति कल्पनाद्वयम्। प्रथमपक्षे दोषमाह—दोषाभाव इत्यादि। § 9889

दोषाभावे प्रमासत्त्वमितीदं च निषेधनम्।
केवलं यदि कल्प्येत तत्सिद्धिर्नैव सम्भवेत्॥
३०५९ ॥§ 9891

अभावानु(दु?)पलम्भेन तत्सिद्धिर्नावकल्पते।
अनवस्थितिदोषाच्च न युक्तानुपलम्भतः॥
३०६० ॥§ 9893

यदि प्रसज्यप्रतिषेधमात्रमिष्टं तदा तस्य सिद्धिर्नैव संभवेत्। तथाहि—तस्य स्वतो वा सिद्धिर्भवेत्परतो वा। स्वतोऽपि सिद्धिर्भवन्ती स्वयं प्रकाशात्मत- 799/k
या वा भवेन्निश्चयजननाद्वा। परतोऽपि कदाचिदुपलम्भाद्वा भवेदनुपलम्भाद्वेति पक्षाः। न तावत्स्वतःप्रकाशात्मतया सिद्धिर्युक्ता, तस्याऽवस्तुत्वात्प्रकाशात्मतायाश्च वस्तुधर्मत्वात्। ज्ञानमेव हि प्रकाशात्मतया स्वसंवित्त्या सिद्ध्यति। नतु वस्तुस्वभावनिषेधमात्रलक्षणोऽभावः। नापि निश्चयजननात्स्वतस्तस्य सिद्धिः। सर्वसामर्थ्यविरहलक्षणत्वादभावस्य जनकत्वानुपपत्तेः। जनकत्वे वा वस्तुरूपत्वप्रसङ्गात्। तस्यानाधेयातिशयत्वेन सहकारिनिरपेक्षत्वात्तन्मात्रभाविनः कार्यस्याविरामप्रसङ्गाच्च। परतोऽप्युपलम्भात्तस्य सिद्धिर्नावकल्पते, कुतः, अभावात्—अभावात्मकत्वात्, उपलम्भस्य भावविषयत्वात्। नाप्यनुपलम्भतस्तस्य सिद्धिरनवस्थाप्रसङ्गात्। तथाह्यनुपलम्भोऽप्यभावात्मकत्वात्कथं सिद्ध इति तत्रापीयं स्वतः परत इति चिन्ताऽवतरत्येव। न तावत्स्वतो यथोक्तदोषप्रसङ्गात्। नापि परतोऽनवस्थादोषात्॥ ३०५९॥ ॥ ३०६०॥ § 9894

तामेवानवस्थां दर्शयति—दोषाप्रमाद्वयासत्तेत्यादि। § 9895

दोषाप्रमाद्वयासत्ता गम्यतेऽनुपलम्भतः।
उपलम्भस्य नास्तित्वमन्येनेत्यनवस्थितिः॥
३०६१ ॥§ 9897

दोषाश्च अप्रमाद्वयं च तयोरसत्तेति समासः॥ ३०६१॥ § 9898

द्वितीयेऽपि पर्युदासात्मके दोषमाह—पर्युदासात्मकं तच्चेदित्यादि।
§ 9899

पर्युदासात्मकं तच्चेत्तद्विविक्तान्यदर्शनात्।
दोषाभावापरिज्ञानं गुणज्ञानात्मकं भवेत्॥
३०६२ ॥§ 9901

विवक्षितप्रमाज्ञानस्वरूपं च प्रसज्यते।
अप्रमाणद्वयासत्त्वज्ञानं तद्व्यतिरेकि च॥
३०६३ ॥§ 9903

अप्रमाद्वितयासत्त्वे ज्ञाते स्वातन्त्र्यतोऽथवा।
परिशिष्टः प्रमात्मेति भवतो निश्चयः कुतः॥
३०६४ ॥§ 9905

अन्यथानुपपत्त्या चेन्नन्वर्थापत्तितो भवेत्।
अनुमातोऽन्यतो वापि स्यादेवं निश्चयोऽन्यतः॥
३०६५ ॥§ 9907

दोषाभावो हि पर्युदासवृत्त्या गुणात्मक एव भवेत्, ततश्च तत्परिज्ञानमपि गुणज्ञानात्मकं प्राप्नोति, तच्च नेष्टम्, तदा न व्याप्रियन्ते च ज्ञाय-
800/k मानतया गुणाः इति वचनात्। अप्रमाणद्वयासत्त्वमपि पर्युदासपक्षे प्रमाणात्मकमेवावतिष्ठते, ततश्चाप्रमाणद्वयासत्ताज्ञानमपि विवक्षितप्रमाज्ञानस्वरूपं प्रसज्यते, ततश्च अप्रमाणद्वयासत्त्वंतेनोत्सर्गोऽनपोदितः इति न युज्यते, दुःश्लिष्टत्वात्। तथाहि—तस्यैव प्रमाणत्वेन निश्चितत्वात्तस्य प्रमाणत्वं निश्चीयत इति हेतुहेतुमद्भावेन वाक्यार्थो दुःश्लिष्टःस्यादव्यतिरेकात्। किञ्च हेतुहेतुमतोर्भेदात्तद्व्यतिरेकि—प्रमाणपरिज्ञानव्यतिरेकि अप्रमाणद्वयासत्ताज्ञानं प्रसज्यते। नच पर्युदासात्मकस्य तद्वयतिरेकिता युक्ता। अप्रमाद्वितयासत्त्वे ज्ञात इत्यादिनाऽभ्युपगम्याप्रमाद्वयासत्तासिद्धिं परमतेनैव परतःप्रामाण्यं प्रतिपादयति—अन्यथानुपपत्त्येति। संशयविपर्यासाभ्यामन्यस्य ज्ञानस्य स्वतःप्रामाण्यं मुक्त्वा गत्यन्तरासम्भवात्॥ ३०६२॥ ३०६३॥ ३०६४॥ ३०६५॥ § 9908

तस्माद्गुणेभ्य इत्यादिनोक्तस्य न्यायस्यानैकान्तिकत्वं प्रतिपादयन्नाह—तस्मादेव चेत्यादि। § 9909

तस्मादेव च ते न्यायादप्रामाण्यमपि स्वतः।
प्रसक्तं शक्यते वक्तुं यस्मात्तत्राप्यदः स्फुटम्॥
३०६६॥§ 9911

तस्माद्दोषेभ्यो गुणानामभावस्तदभावतः।
प्रमाणरूपनास्तित्वं तेनोत्सर्गोऽनपोदितः॥
३०६७॥§ 9913

यस्मादुत्सर्गभावोऽयं विवक्षामात्रनिर्मितः।
शक्योऽभिधातुं विस्पष्टमप्रमाणेऽपि मानवत्॥
३०६८॥§ 9915

यतो बाधात्मकत्वेन बुद्धेः प्राप्ता प्रमाणता।
यथार्थज्ञानहेतूत्थगुणज्ञानादपोद्यते॥ ३०६९॥§ 9917

गुणैश्चाज्ञायमानत्वान्नाप्रामाण्यमपोद्यते।
अनपोदितसिद्धं च स्वतस्तदपि संस्थितम्॥
३०७०॥§ 9919

अद इति। एतत्। किं तच्छक्यते वक्तुमित्याह—तस्मादित्यादि। मानवदिति। सप्तम्यन्ताद्वतिः। तदपीति। अप्रामाण्यम्। शेषं सुबोधम्॥ ३०६६॥ ॥ ३०६७॥ ३०६८॥ ३०६९॥ ३०७०॥ § 9920

दोषाः सन्ति न सन्तीत्यादावाह—दोषा इत्यादि। § 9921

दोषाः सन्ति न सन्तीति पौरुषेयेषु शङ्क्यते।
कर्तुर्वेदेपि सिद्धत्वाद्दोषाशङ्का न नास्तिनः॥
३०७१॥§ 9923

801/k

श्रुतिपरीक्षायां वेदस्य कर्तुः प्रसाधितत्वात्कर्तुरभावादित्यसिद्धम्, तेन प्रेक्षावतामस्माकं वेदे दोषाशङ्का न नास्ति, अपित्वस्त्येव॥ ३०७१॥ § 9924

अतो यदनपेक्षत्वादित्यत्राह—अत इत्यादि। § 9925

अतो यदनपेक्षत्वाद्वेदे प्रामाण्यमुच्यते।
तदसिद्धं यतः सोऽपि कर्त्तारं समपेक्षते॥
३०७२॥§ 9927

सोऽपीति। वेदः॥ ३०७२॥ § 9928

वेदार्थे अन्यप्रमाणैरित्यादावाह—यदि संवादिविज्ञानमित्यादि— § 9929

यदि संवादिविज्ञानं न वा हेतुविशुद्धता।
निश्चिता संशयोत्पत्तेस्तदा वेदे न मानता॥
३०७३॥§ 9931

यद्यर्थक्रियासंवादिज्ञानं कारणविशुद्धिज्ञानं च द्वयमप्येतत्प्रामाण्यनिश्चयकारणं वेदे नाङ्गीक्रियते तदा निश्चयहेतुवैकल्याद्वेदे प्रामाण्यनिश्चयो न प्राप्नोति, कारणमन्तरेण कार्यस्यासम्भवात्॥ ३०७३॥ § 9932

अन्यस्यापि प्रमाणत्व इत्यत्राह—अन्यस्यापीत्यादि। § 9933

अन्यस्यापि प्रमाणत्वे एवम्भूतैव सङ्गतिः।
कारणं कल्प्यते यस्मान्निश्चयस्तन्निबन्धनः॥
३०७४॥§ 9935

एवम्भूतैवेति। संवादगुणपरिज्ञानलक्षणा। अत्र चानवस्थादोषः पूर्वमेव परिहृतः, तस्माद्यत्प्रमाणं न तत्प्रमाणान्तरसङ्गतिमपेक्षत इत्येतदनैकान्तिकम्, निश्चयार्थं प्रमाणान्तरस्यापेक्षणात्॥ ३०७४॥ § 9936

एतदेव दर्शयति—स्थिते हीत्यादि। § 9937

स्थिते हि तस्य मानत्वे निश्चयः क्रियतेऽनया।
न त्वपूर्वं प्रमाणत्वमनया तस्य जन्यते॥
३०७५॥§ 9939

एतेनैतदपि प्रत्युक्तं भवति—यत्रापि स्यात्परिच्छेदः प्रमाणैरुत्तरोत्तरैरित्यादि। नह्यन्यतो माननिश्चये तस्य पूर्वस्य ज्ञानस्यार्थप्रापणशक्तिलक्षणं मानत्वमपैति॥ ३०७५॥ § 9940

सकृज्ज्ञातविनष्टे च भवेन्नार्थे प्रमाणता इत्यत्राह—सकृदित्यादि। § 9941

सकृज्ज्ञातविनष्टे च स्यादेवार्थे प्रमाणता।
अनिश्चितेऽपि साऽस्त्येव निश्चयोऽप्युदितक्रमात्॥
३०७६॥§ 9943

सेति। मानता॥ ३०७६॥ § 9944
802/k

उदितमेव क्रमं दर्शयन्नाह—यदि कारणशुद्धत्वादीत्यादि। § 9945

यदि कारणशुद्धत्वादिज्ञानं निश्चयस्ततः।
यदि चार्थक्रिया प्राप्ता साक्षाद्वा(द्वा?)हादिलक्षणा॥
३०७७॥§ 9947

यद्वाऽभ्यासवती वृत्तिर्निरपेक्षा फलोदये।
सर्वोपायवियोगे तु न प्रमाणविनिश्चयः॥
३०७८॥§ 9949

अतः प्रमाणता तस्मिन्विद्यमानाऽप्यनिश्चिता।
अविद्यमानकल्पेति नैवास्तीत्यपदिश्यते॥
३०७९॥§ 9951

यदि चार्थक्रिया प्राप्तेति। तदा निश्चयस्तत इति प्रकृतेन सम्बन्धः। ननुचार्थक्रियाज्ञानस्यान्यविषयत्वात्पूर्वप्रत्ययप्रामाण्यस्य सिद्धिस्ततो न युक्ता। तथाहि —अवयविद्रव्यासम्भवाज्जलविषयं लोचनज्ञानं रूपमात्रग्राहि, स्त (स्ना?) नाद्यर्थक्रियाज्ञानं तु स्पर्शमात्रगोचरमिति कथमन्यालम्बनं ज्ञानमन्यविषयस्य ज्ञानस्य प्रामाण्यं शोधयेदतिप्रसङ्गात्। नैष दोषः। एकसन्तानवर्त्तिनो विषयद्वयस्याविनाभावादन्यालम्बनमपि ज्ञानमन्यविषयस्य ज्ञानस्य प्रामाण्यं साधयिष्यति। नहि तौ रूपस्पर्शौ विनिर्भागेन वर्त्तेते, एकसामग्र्यधीनत्वात्। तत्र पूर्वस्य ज्ञानस्यानर्थेऽप्यर्थरूपेण प्रवृत्तिदर्शनादुत्तरकाल-

भाविनस्तद्विषयाविनाभूतस्पर्शग्राहिणो ज्ञानान्न निश्चयोत्पत्तिरपेक्ष्यते। नन्वेवमपि क्षणिकत्वात्सर्वभावानां पूर्वज्ञानपरिगृहीतरूपाविनाभाविस्पर्शो नैवोत्तरज्ञानप्रवृत्त्या विषयीकृत इति कथं ततो विनिश्चयः। नैष दोषः। उत्तरेषां रूपादिक्षणानां पूर्वज्ञानगृहीतै रूपादिक्षणैरविशिष्टार्थक्रियावाञ्छायामभिन्नयोगक्षेमत्वादैक्यमेव व्यवह्नि(?)यते। नह्यर्वाग्दर्शनानां क्षणैर्व्यवहारः। अथवा पूर्वज्ञानपरिच्छिन्नरूपाद्यर्थाविनाभावादुत्तरज्ञानविषयस्य तत्कारणतया सत्यपि भेदव्यवहारे ततो निश्चयो न विरुध्यते॥ ३०७७॥ ३०७८॥ ३०७९॥
§ 9952

यदुक्तम्—श्रोत्रधीश्चाप्रमाणं स्यादित्यादि, तत्राह—श्रोत्रबुद्धेरित्यादि।
§ 9953

श्रोत्रबुद्धेरपि व्यक्ता नेत्रादिमति(तराभिर?)सङ्गतिः।
एकसामग्र्यधीनं हि रूपशब्दादि वर्त्तते॥
३०८० ॥§ 9955

परस्पराविनिर्भागात्संतत्याऽन्योन्यकारणम्।
तेषामस्त्येव सम्बन्धस्तदेवं सुपरिस्फुटम्॥
३०८१ ॥§ 9957

तद्धियामपि तद्द्वारा धूमेन्धनविकारवत्।
श्रोत्रधीस्तत्प्रमाणं स्यात्तदन्यमतिसङ्गतेः॥
३०८२ ॥§ 9959

803/k

इतराभिश्चक्षुरादिधीभिरसङ्गतिर्नैव सिद्धा। तथाहि—वीणादिशब्दस्य तत्सम्बन्धिनश्च रूपादेरेकसामग्र्यधीनत्वात्परस्पराभिर्विभागलक्षणो धूमेन्धनविकारयोरिव सम्बन्धोऽस्त्येव। प्रबन्धवृत्त्यपेक्षायां च पूर्वपूर्वः कलापोऽन्यस्योत्तरोत्तरस्य कारणंभवतीति साक्षाच्च कार्यकारणभावलक्षणोऽपि सम्बन्धोऽस्त्येव। ततश्च तद्ग्राहिणामपि ज्ञानानां तद्द्वारकपारम्पर्येण सम्बन्धोऽस्ति। तत्तस्माच्छ्रोत्रधीः प्रमाणं भवत्येव,तदन्याभिश्चक्षुरादिमतिभिर्यथोक्तसम्बन्धसद्भावात्। तथाहि दूराद्वीणादिशब्दश्रवणात्तदर्थिनो वेण्वादिशब्दसाधर्म्यादुपजातसंशयस्य पुंसः प्रवृत्तौ वीणारूपदर्शनाद्यः प्रागुपजातः संशयः किमय वीणाध्वनिरुत वेणुगीतादिशब्द इति स व्यावर्त्तते। यत्र च देशे मृद-

ङ्गादिप्रतिशब्दश्रवणात्प्रवृत्तस्य तदर्थाधिगतिर्न भवति तत्र विसंवादादप्रामाण्यं प्रत्येति॥ ३०८०॥ ३०८१॥ ३०८२॥ § 9960

साधनान्तरजन्या तु बुद्धिर्नास्ति द्वयोरपीत्यादावाह—साधनान्तरेत्यादि। § 9961

साधनान्तरजन्या तु बुद्धिरेषा विनिश्चिता।
हेत्वन्तरकृतज्ञानसंवादस्तेन वाञ्छ्यते॥
३०८३ ॥§ 9963

एषेति। वीणादिरूपग्राहिणी॥ ३०८३॥ § 9964
यथा त्वेतेन्द्रियाधीनविज्ञानान्तरसङ्गतिरित्यादावाह—एवमित्यादि। § 9965

एवं नानेन्द्रियाधीनविज्ञानान्तरसङ्गतिः।
प्रत्यक्षे कारणं क्लृप्ता वेदे त्वेषा न दृश्यते॥
३०८४ ॥§ 9967

एषा न दृश्यत इति। नानेन्द्रियाधीना विज्ञानान्तरसङ्गतिः॥ ३०८४॥ § 9968

कथमसौ प्रत्यक्षे कारणं क्लृप्तेत्याह—तथाहीत्यादि। § 9969

तथाहि सलिलज्ञानमाद्यमुत्पद्यतेऽक्षिजम्।
पानस्नानादिनिर्भासं जिह्वाकायाश्रितं परम्॥
३०८५ ॥§ 9971

अक्षिजमिति। रूपविषयं चक्षुर्विज्ञानमित्यर्थः। परमिति। उत्तरकालभावि ३०८५ § 9972
एकेनैव हि वाक्येनेत्यादावाह—एकेनापीत्यादि। § 9973

एकेनापि तु वाक्येन देशकालनरादिषु।
लभ्यते नार्थसंवादः सर्वस्मिन्संशयोदयात्॥
३०८६ ॥§ 9975

अग्निहोत्राद्भवेत्स्वर्ग इतीत्थं श्रूयते समम्।

निश्चयाङ्गवियुक्तं हि ग(श्र?)ब्ददर्दुरमात्रकम्॥
३०८७§ 9977

804/k

अनेनासिद्धतामर्थसंवादस्याह। तथाह्यग्निहोत्रात्स्वर्गो भवतीत्यतो वाक्यात्प्रेक्षावतो निश्चयकारणाभावात्संशयो जायत एवेति न देशकालादौ संवादसिद्धिः ॥ ३०८६॥ ३०८७॥ § 9978

नापि नरान्तरे सर्वत्र संवादो लभ्यत इति दर्शयन्नाह—स्वर्गादावित्यादि। § 9979

स्वर्गादौ मतभेदश्च विप्राणामपि दृश्यते।
लभ्यते नार्थसंवादस्तस्मादिह नरादिषु॥
३०८८॥§ 9981

तथाहि—मनुष्यातिशायिपुरुषविशेषनिकेतः सुमेरुगिरिशिखरादिदेशविशेषोऽधिमानुषसुखाधिष्ठानो नानोपकरणसमृद्धः स्वर्ग इति निरुक्तकारादयो वर्णयन्ति। प्रीतिविशेषो मनुष्याणामेव स्वर्ग इति मीमांसकाः। यागेऽपि विप्रतिपत्तिर्दृश्यते। श्रूयते हि पुराकाले पिष्टमयः पशुर्येनायजन्त यज्वान इति। अन्यैस्तु दुरात्मभिर्निष्कृपैः प्राणिविशेष एव पशुरिति वर्णितम्॥ ३०८८॥ § 9982

तस्माद्दृढं यदुत्पन्नमित्याह—चोदनाजनित इत्यादि। § 9983

चोदनाजनिते ज्ञाने दार्ढ्यं प्रागपहस्तितम्।
संदिग्धो हि तथाभावस्तद्ग्राह्यस्यान्यसाम्यतः॥
३०८९॥§ 9985

प्रागिति। श्रुतिपरीक्षायाम्। अन्यसाम्यत इति। अग्निहोत्रात्स्वर्गो न भवतीत्यादिपौरुषेयवचनसमुद्भूतप्रतीत्या तुल्यत्वात्॥ ३०८९॥ § 9986

किञ्च—वाङ्(मात्र)मेतद्भवताम्—यथा चोदनाजनिता बुद्धिर्देशादिषु न विसंवदतीति दर्शयति—असर्वदर्शिभिरित्यादि। § 9987

असर्वदर्शिभिर्विप्रैः कुत एतद्विनिश्चितम्।
चोदनाजनिता बुद्धिः सर्वसंवादिनीति च॥
३०९०॥§ 9989

साध्या न चानुमानेनेत्यादावाह—निश्चितेत्यादि। § 9990

निश्चितोक्तानुमानेन प्रत्यक्षस्यापि मानता।
शुद्धकारणजन्यत्वात्तत्प्रमाणं तदन्यवत्॥
३०९१ ॥§ 9992

अनिष्टापत्तिर्हि प्रसङ्ग उच्यते, न च प्रत्यक्षस्यानुमानतः प्रामाण्यसिद्धिर्नेष्टा, येन प्रसङ्गापादनं स्यात्। यथा चानुमानेन प्रत्यक्षस्य प्रामाण्यं साध्यते तथा पूर्वमुक्तम्। तदेव स्मारयति—शुद्धकारणजन्यत्वात्प्रमाणमिति। तदन्यवदिति। सन्निकृष्टविषयग्राहिप्रत्यक्षवत्॥ ३०९१॥ § 9993
805/k

प्रमाणानां प्रमाणत्वं येन चान्येन साध्यत इत्यादावाह—सर्वस्येत्यादि। § 9994

सर्वस्य च न साध्येयं प्रमाणान्तरतः प्रमा।
यस्मादर्थक्रियाज्ञाने भ्रान्तिर्नास्तीति साधितम्॥
३०९२ ॥§ 9996

यथा चार्थक्रियाज्ञाने भ्रान्तिर्नास्ति तथा पूर्वं उच्यते वस्तुसंवाद इत्यादिना प्रसाधितम्। तेनार्थक्रियाज्ञानसंवादात्प्रामाण्ये नानवस्था भवति॥ ३०९२॥ § 9997

अनुमानेनापि साध्ये न भवत्येवेति दर्शयति—आत्मेत्यादि। § 9998

आत्मकार्याख्यलिङ्गाच्च निश्चिताव्यभिचारतः।
जायमानेऽनुमानेऽपि भ्रान्तिरस्ति न काचन॥
३०९३ ॥§ 10000

आत्मा च स्वभावः कार्यं चेति तथोक्तम्, तदाख्या यस्य लिङ्गस्येति विग्रहः। निश्चितोऽव्यभिचारो यस्य लिङ्गस्य तत्तथोक्तम्। एतदुक्तं भवति—तादात्म्यतदुत्पत्तिसम्बन्धाभ्यां प्रतिबद्धस्वभावकार्याख्यलिङ्गनिश्चयबलेनोपजायमानमनुमानं विभ्रमकारणाभावात्स्वत एव प्रमाणमिति नानवस्था॥ ३०९३॥ § 10001

अन्येनासाधिता चेदित्यादावाह—क्वचिदित्यादि। § 10002

क्वचित्तु विविधभ्रान्तिनिमित्तबलभाविनी।

भ्रान्तिरुत्सार्यतेऽनेन यस्मात्तत्र न निश्चयः॥
३०९४॥§ 10004

अभ्यासादेर्निश्चयकारणस्याभावात् क्वचिदाद्ये प्रत्यक्षे भ्रान्तिरुत्पद्यत इति न तस्य सिद्ध्येत्स्वत एव प्रमाणता॥ ३०९४॥ § 10005

प्रमाणं ग्रहणात्पूर्वं स्वरूपेण प्रतिष्ठितम् इत्यादावाह—अव्यक्तेत्यादि। § 10006

अव्यक्तव्यक्तिकत्वेन व्यक्तोऽर्थो न प्रसिद्ध्यति।
परप्रत्यक्षवत्तस्माज्ज्ञानं ज्ञातमितीष्यताम्॥
३०९५॥§ 10008

अव्यक्ता व्यक्तिर्यस्यार्थस्य स तथोक्तः। अवश्यं हि ज्ञानं ज्ञातव्यम्। तदज्ञाने सर्वाज्ञानप्रसङ्गात्। तथाह्यर्थाभिव्यक्तिरेव ज्ञानमुच्यते नान्यत्, तस्याश्चाभिव्यक्तेः परोक्षत्वेऽर्थस्यापि परोक्षत्वप्रसङ्गः। यथा परसन्तानवर्त्तिप्रत्ययविषयस्यार्थस्याव्यक्तव्यक्तित्वात्। प्रयोगः—यद्यस्याव्यक्तव्यक्तिकं वस्तु तत्तस्य प्रत्यक्षं न भवति, यथा परसन्तानवर्त्तिनैव प्रत्यक्षेण विषयीकृतमन्यस्य, अव्यक्तव्यक्तिकं च विवादास्पदीभूतं विज्ञानं कस्यचिदिति व्यापकविरुद्धोपलब्धिः। नचानैकान्तिको हेतुः, तस्य वस्तुनो व्यक्त्युत्पादमन्तरेण प्रत्यक्षत्वे सर्वेषां प्रत्यक्षत्वप्रसङ्गात्। नचैवं भवति। तस्माद्विपर्ययः॥ ३०९५॥ § 10009
806/k

यथाचाविदितैरेवेत्यत्राह—स्वयमित्यादि। § 10010

स्वयं तु जडरूपत्वाच्चक्षुरादिभिरिन्द्रियैः।
गृह्यन्ते विषया नैवं तेषां ज्ञाने तु हेतुता॥
३०९६॥§ 10012

विषयवज्जडरूपत्वाच्चक्षुरादीनां न विषयग्रहणं मुख्यतोऽस्ति, केवलं विज्ञानं प्रति हेतुभावमात्रेण तेषां विषयग्रहणं कल्पितमित्यज्ञातैरेव तैर्विषयज्ञानोत्पादकतयाविषया गृह्यन्ते इति स्यात्, नत्वेवं विज्ञानेन विषयस्य किञ्चित्क्रियते, येनाज्ञातमपि चक्षुरादिवद्विषयं गृह्णातीति स्यात्। अभिव्यक्तिः क्रियत इति चेत्। न।ज्ञानपर्यायत्वात्। अभिव्यक्तिरुपलब्धिः परिच्छित्तिः संवेदनमित्येवमादयः पर्याया उच्यन्ते, नार्थान्तरम्। न च स्वात्मनः करणं युक्तम्। स्वात्मनि कारित्रविरोधात्। उत्पन्नानुत्पन्नावस्थयोः सदसत्त्वाच्च। तथाहि—उत्पन्नं वा ज्ञानमात्मानं कुर्यादनुत्पन्नं वा। न तावदुत्पन्नं, तदात्मनोऽप्येकयोगक्षेमतयोत्पन्नत्वात्। नच यो येन सहैकयोगक्षेमो न भवति स तत्स्वभावो युक्तोऽतिप्रसङ्गात्। नचोत्पन्नस्य स्वभावस्यकरणं युक्तमतिशय-

स्याभावात्। करणाविरामप्रसङ्गाच्च। नाप्यनुत्पन्नमिति पक्षोऽसत्त्वात्। नह्यसतो व्यापारो युक्तस्तस्य सर्वसामर्थ्योपाख्याविरहलक्षणत्वात्। व्यापारे सत्यसत्त्वहानिप्रसङ्गात्। इदमेव हि सत्त्वलक्षणं यदर्थक्रियाकारित्वम्। तस्मान्न साम्यं दृष्टान्तस्य दार्ष्टान्तिकेन॥ ३०९६॥ § 10013

तेनात्र ज्ञायमानत्वमित्यादावाह—तेनात्रेत्यादि। § 10014

तेनात्र ज्ञायमानत्वं प्रामाण्य उपयुज्यते।
विषयानुभवो यस्मादज्ञातो नैव लभ्यते॥
३०९७ ॥§ 10016

ननु च यदि ज्ञानं स्वसंविदा स्वत एव सिद्धम्, तर्हि स्वत एव ज्ञानं प्रमाणमित्याशङ्क्याह—एतावदित्यादि। § 10017

एतावत्तु भवेदत्र ग्रहणेऽपि स्वसंविदः।
भ्रान्तिकारणसद्भावात्तथात्वे न विनिश्चयः॥
३०९८ ॥§ 10019

तदा चार्थतया भावोऽप्यस्मान्नैवावसीयते।
सादृश्यादुपलम्भेन तदन्यारोपसम्भवात्॥
३०९९ ॥§ 10021

नह्यनुभूतमित्येव सर्वात्मना निश्चयो जायते कारणान्तरापेक्षत्वान्निश्चयोत्पत्तेरितिबहुधा प्रतिपादितं, तेन गृहीतमपि ज्ञानस्य स्वसंविदोऽर्थप्रमाणसामर्थ्यं भ्रान्तिकार णस्याप्रमाणसारूप्यानभ्यासादेः सद्भावान्निश्चयानुत्पत्तेरनिश्चित- 807/k मित्युच्यते। निश्चयानुभवयोर्भेदात्। ततश्च समारोपव्यवच्छेदेन परतःप्रामाण्यमिष्टमित्यदोषः।यथोक्तम्—स्वरूपस्य स्वतो गतिः प्रामाण्यं व्यवहारेणेति। तथा त्व इति। प्रामाण्ये॥ ३०९८॥ ३०९९॥ § 10022

अप्रमाणं पुनः स्वार्थे इत्यादावाह—आभ्यासिकमित्यादि। § 10023

आभ्यासिकं यथा ज्ञानं प्रमाणं गम्यते स्वतः।
मिथ्याज्ञानं तथा किंचिदप्रमाणं स्वतः स्थितम्॥
३१०० ॥§ 10025

अभ्यासे भवमाभ्यासिकम्। यथाऽभ्यासबलात्प्रामाण्यं क्वचित्स्वत एव निश्चीयते इत्युक्तम्, तथा मिथ्यात्वमपि कस्यचित्स्वत एवावसीयते। तथा च दृश्यन्त एव तैमिरिकादयः केचिदभ्यासबलात्केशोण्डुकादिविज्ञानमुत्पादसमनन्तरमेव मिथ्यात्वेन निश्चिन्वन्तः॥ ३१००॥ § 10026

तदत्राप्यन्यथाभावे धीर्यथा दुष्टकारण इत्यादावाह—बाधकारणेत्यादि। § 10027

बाधकारणदुष्टत्वज्ञानेऽप्युक्ताऽनवस्थितिः।
तावता तस्य मिथ्यात्वं ग्रहीतुं तन्न पार्यते॥
३१०१॥§ 10029

उक्तेति। तथाहि—बाधकाभावात्प्रमाणं भवतोच्यते। बाधाभावोऽप्यभावाख्यंप्रमाणान्तरमिष्यत इत्यादिना। तदिति। तस्मात्॥ ३१०१॥ § 10030

उत्पत्त्यवस्थमेवेदं प्रमाणमिति मीयत इत्यत्राह—उत्पत्त्यवस्थमित्यादि। § 10031

उत्पत्त्यवस्थमेवेदं प्रमाणमिति मीयते।
न तावदविकल्पत्वादनिष्टेश्चात्मसंविदः॥
३१०२॥§ 10033

नापि ज्ञानान्तरेणैव तत्कालेऽसन्निधानतः।
तस्याप्यव्यक्तभावत्वादनिष्टापत्तितोऽपि वा॥
३१०३॥§ 10035

उत्पत्त्यवस्थायां किमात्मनैव प्रमाणमिति निश्चीयते, आहोस्विद्विज्ञानान्तरेण सहकालभाविना, यद्वोत्तरकालभाविनेति पक्षाः। तत्र न तावदात्मनैव सर्वज्ञानानामात्मनि निर्विकल्पत्वात्प्रमाणमित्येव ग्रहणमनुपपन्नम्। नापि परेण संवेदनं ज्ञानस्येष्टम्, नित्यं बुद्धेः परोक्षत्वाभ्युपगमात्। नापि ज्ञानान्तरेण समानकालभाविना, युगपद्विज्ञानद्वयानुत्पत्तेः। नापि भिन्नकालभाविना, तस्यापि ज्ञानान्तरस्यासिद्धौ तद्ग्राह्यस्यासिद्धौ तद्ग्राह्यस्यापि ज्ञानस्याव्यक्तव्यक्तिकत्वेनासिद्धेस्तस्यापि ज्ञानान्तरेण सिद्धाविष्यमाणायामनवस्थाप्रसङ्गात्॥ ३१०२॥ ३१०३॥ § 10036

808/k

अतो यत्रापि मिथ्यात्वमित्यादावाह—वेदेऽपीत्यादि। § 10037

वेदेपि बाधकं मानमुक्तमेवानुमात्मकम्।
तदुक्तात्माद्यपोहेन तस्मान्मानं न युज्यते॥
३१०४ ॥§ 10039

पौरुषेयत्वसिद्धेश्च शङ्का दुष्टनिमित्तता।
वह्नेरिव स्वतः शक्तिर्मिथ्याज्ञानेषु वा भवेत्॥
३१०५ ॥§ 10041

चोदनाप्रभवं ज्ञानमतो दुष्टनिमित्तकम्।
शङ्क्यते दृष्टदोषाच्च शङ्कादोषं न भिद्यते॥
३१०६ ॥§ 10043

नहि साधर्म्यमात्रं बौद्धैर्वेदे बाधकं प्रमाणमुच्यते। किं तर्हि ?। तदुक्तस्यात्मसामान्यादेः पदार्थस्य प्रमाणबाधनात्। एतच्चात्मपरीक्षादौ प्रतिपादितम्। किञ्च —श्रुतिपरीक्षायां वेदानां पौरुषेयत्वस्य साधितत्वात्, सत्यपि वाऽपौरुषेयत्वे दाववन्ह्यादिवन्मिथ्यात्वकारणतासम्भवात्, अप्रामाण्यमस्य सम्भाव्यत इत्येवमुच्यते, न साधर्म्यमात्रम्। स्यादेतत्—यदि नाम सम्भाव्यते तथापि सम्भावनामात्रात्कथमप्रामाण्यमस्य सिद्ध्यतीत्याह—दृष्टदोषाच्च शङ्कादोषं न भिद्यत इति। शङ्का दोषा यस्मिन्वाक्ये तत्तथा। न भिद्यत इति। उभयस्यापि प्रामाण्यं (ण्य ?) सद्व्यवहारनिषेधयोग्यतया (योः ?) तुल्यत्वात्॥ ३१०४॥ ३१०५॥ ३१०६॥ § 10044

तस्मादित्यादिनोपसंहरति। § 10045

तस्मात्स्वतःप्रमाणत्वं वेदस्यापि न युज्यते।
तेन निश्चितनिर्दोषकृताख्यातत्वमिष्यताम्॥
३१०७ ॥§ 10047

कृतश्चासावाख्यातश्चेति तथोक्तः। आख्यातो व्याख्यातः, निर्दोषैः पुरुषैः कृताख्यात इति तृतीयासमासः, तद्भावस्तत्त्वं, निश्चितं च तन्निर्दोषकृताख्यातत्वं चेति विग्रहः। तदेतदिष्यताम्, वेदस्य प्रामाण्यसिद्धय इति सम्बन्धः। ततश्चैवमिष्यमाणे परतःप्रामाण्यं स्यादनिष्यमाणे त्वप्रामाण्यमेवेति भावः॥ ३१०७॥ § 10048

निश्चितनिर्दोषकृताख्यातत्वमिष्यतामित्यत्र कुमारिलस्योत्तरमाह—रागेत्यादि।
§ 10049

रागद्वेषादियुक्ता हि प्रवक्तारो यथा यथा।
तथा तथाहि रक्षन्ति स्वाध्यायं सुतरां ननु॥
३१०८॥§ 10051

कस्य किं दुर्बलं को वा कस्मात्पूर्वं प्रपाठकः।
कः स्वरक्षामतां कुर्यात्को भिन्द्यादपदे पदम्॥
३१०९॥§ 10053

809/k

इति यस्य हि संरब्धाः सन्ति रन्ध्रगवेषिणः।
कथं न नाम निर्दोषं स पठेद्वेदमादृतः॥
३११०॥§ 10055

शुद्धाश्चेदभ्युदासीनाः स्युर्वेदाध्यायिनो नराः।
आचक्षीरन्परैरेवं न ते वेदं विनाशितम्॥
३१११॥§ 10057

ततः कालेन महता तूपेक्षितविनाशितः।
अन्य एव भवेद्वेदः प्रतिकञ्चुकतां गतः॥
३११२॥§ 10059

रागद्वेषादियुक्तांश्च रुन्धद्भिर्वेदनाशिनः।
सर्वदा रक्षितो वेदः स्वरूपं न प्रहास्यति॥
३११३॥§ 10061

कस्याध्येतुः किं स्मृतिमेवाति (मेधादि?) दुर्बलम्, को वा कुतोऽधीतवान्, को वा स्वरस्योदात्तादेः क्षामतामन्यथात्वं कुर्वीत, अपदमेव वा कः पदत्वेन भित्त्वापठेदित्येवं यस्य वेदपाठकस्य रन्ध्रं निरूपयन्तो वेदाध्यायिनो नराः संरब्धाः समारब्धवीर्याः सन्ति, स कथं वेदपाठको वेदमादरान्न पठेत्। ततश्चास्य वेदस्याप्रामाण्याशङ्काया अभावात्किमिति निश्चितनिर्दोषकृताख्यातत्वमिष्यतामित्यभिप्रायः। तथाहि—यदि वेदाध्यायिनः शुद्धधियोऽपि परैर्विनाश्यमानान्वेदानौदासीन्यमालम्बमाना नाचक्षीरंस्तदा सम्भाव्यतेऽन्य एवायं वेदः प्रतिच्छायतां यात इति। यावता तैर्विशुद्धधीभिर्वेदविनाशिनो नरान्रागादिपरीतचेतसो रुन्धद्भिर्निवारयद्भिःसदैवायं संरक्षितो वेद इति स कथमात्मस्वरूपं जह्यात्॥ ३१०८॥ ३१०९॥ ॥ ३११०॥ ३१११॥ ३११२॥ ३११३॥ § 10062

स्यादेतद्यद्यपि सर्वदा रक्षितस्तैर्वेदस्तथापि महाप्रलये समुच्छिन्नस्यास्य पश्चादन्यथात्वमपि सम्भाव्यत इत्याशङ्क्याह—इष्यत इत्यादि। § 10063

इष्यते च जगत्सर्वं न कदाचिदनीदृशम्।
न महाप्रलयो नाम ज्ञायते पारमार्थिकः॥
३११४॥§ 10065

नैतदेवमित्यादिना प्रतिविधत्ते। § 10066

नैतदेवं भवेन्नाम ह्येवं पाठस्य तुल्यता।
तदर्थतत्त्वबोधस्तु न विनाऽत्यक्षदर्शनम्॥
३११५॥§ 10068

एवं हि किल केवलपाठमात्रस्य तुल्यत्वं प्रतिपादितम्। नत्वथवि(र्थाधि?)गमोपायः, ततश्च तदर्थमवश्यं निश्चितनिर्दोषकृताख्यातत्वमस्येष्टव्यमेव॥ ३११५॥ § 10069

810/k

नचापि पाठमात्रस्यादर्शनमात्रेणासर्वविदा सर्वदेशादौ तौल्यं निश्चेतुं शक्यत इति दर्शयति—सर्वे चेत्यादि। § 10070

सर्वे च यस्य पुरुषा देशकालौ तथाऽखिलौ।
करामलकवद्व्यक्तं वर्त्तन्तेऽध्यक्षचेतसि॥
३११६॥§ 10072

स पाठस्यापि तुल्यत्वं बोद्धुं शक्तोऽन्यथा पुनः।
देशकालनरावस्थाभेदेन विमतिः कथम्॥
३११७॥§ 10074

अत्रैवोपपत्तिमाह—अन्यथेत्यादि। यदि पाठस्य तुल्यत्वं भवेत्तदा क्व-चिद्देशादौ पाठं प्रति पुंसां विमतिः—संशयो न प्राप्नोति॥ ३११६॥ ३११७॥
§ 10075

इष्यते च जगत्सर्वमित्यादावाह—जगत्सदेदृशमित्यादि। § 10076

जगत्सदेदृशं चेति न प्रमाणमिहापि वः।
न युक्ताऽदृष्टिमात्रेण संवर्त्तस्यापि नास्तिता॥
३११८॥§ 10078

ईदृशमेव सर्वदा जगदित्यत्र न किंचित्साधकं प्रमाणमस्ति। यश्च बौद्धैः संवर्त्तकल्पो नर(नाश?)कासम्भवात्प्रतिभाजनक्षय इति वर्ण्यते। यच्च स्मृतिकारैरुच्यते—आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। अप्रतर्क्यमविज्ञेयं सुषुप्तमिव सर्वतः॥ इति तदेतदस्य द्विविधस्यापि संवर्त्तस्य न किंश्चिद्बाधकं प्रमाणमस्ति, येन सर्वदा जगदीदृशमेव सिद्ध्येत्। नचादर्शनमात्रेण वस्तूनां नास्तिता सिद्ध्यति, सत्यपि वस्तुनिक्वचिददर्शनात्, वस्त्वभावेन दर्शनमात्रस्य व्याप्त्यसिद्धेः॥ ३११८॥ § 10079

किंच—वेदस्य स्वतःप्रामाण्यान्नित्यं स्वार्थस्वरूपविषयनिश्चयोत्पत्तेः संमोहाभावात्, नित्यत्वाच्च स्वभावान्यथात्वस्य कर्तुमशक्यत्वात्, उभयथापि न विनाशः सम्भवति भवन्मतेनेत्यतो वेदाध्यायिभिरस्य निष्फलमेव रक्षा क्रियत इत्येतद्दर्शयति —स्वत इत्यादि। § 10080

स्वतःप्रामाण्यपक्षे तु निश्चयं कुरुते स्वतः।
वेदः स्वार्थस्वरूपे च तन्न मोहादिसम्भवः॥
३११९॥§ 10082

अतश्चाज्ञानसंदेहविपर्यासापदे स्थिते।
नोपदेशमपेक्षेत द्विजपोतोऽपि कश्चन॥
३१२०॥§ 10084

६ अप्रतर्क्य] Correction : ; अप्रवर्त्त्य (sic !)अप्रतर्क्य

यथाचाज्ञातमूलस्य न विनाशोऽपि सम्भवी।
को वा विनाशो नित्यस्य भवेद्व्यज्ञातिशायिनः॥
३१२१॥§ 10086

811/k

अभिव्यक्त्यन्यथात्वं चेन्नित्ये सा नन्वपाकृता।
अतो रक्षामपि प्राज्ञा निष्फलामस्य कुर्वते॥
३१२२॥§ 10088

द्विजपोतः—ब्राह्मणशिशुः। एवं तावत्स्वतःप्रामाण्याद्विनाशोऽस्य न सम्भवतीति प्रतिपादितम्। इदानीं नित्यत्वादपि न सम्भवतीत्येतद्दर्शयितुं पृच्छति—को वेत्यादि। अभिव्यक्त्यन्यथात्वं चेदिति। विनाश इति सम्बन्धः। सेति। अभिव्यक्तिः। अस्येति वेदस्य॥ ३११९॥ ३१२०॥ ३१२१॥ ३१२२॥
§ 10089

अतीन्द्रियेत्यादिनोपसंहरति। § 10090

अतीन्द्रियार्थदृक्तस्माद्विधूतान्तस्तमश्चयः।
वेदार्थप्रविभागज्ञः कर्त्ता चाभ्युपगम्यताम्॥ ३१२३॥
इति स्वतःप्रामाण्यवादपरीक्षा।§ 10093

अन्तस्तमः—क्लिष्टाक्लिष्टमज्ञानम्, तस्य चयः—संहतिः, स विधूतो येन स तथोक्तः। प्रविभागज्ञः—व्याख्याता। कर्त्तेति। वेदस्येति शेषः। तदेवं प्रतिज्ञातार्थस्य सर्वथा प्रमाणबाधितत्वम्, हेतोश्च तद्भावभावित्वादित्येतस्यानैकान्तिकत्वंसाधितम्। सपक्षसिद्ध्यर्थं च प्रमाणं यः संदेहविपर्यासविषयैरित्यादिना प्रदर्शितमिति क्षेपार्थः। § 10094

यत्तु पक्षचतुष्टयमुपन्यस्य पक्षत्रये दोषाभिधानं कृतम्, तत्रापि न काचिद्बौद्धस्य कृ(क्ष?)तिः, नहि बौद्धैरेषां चतुर्णामेकतमोऽपि पक्षोऽभीष्टोऽनियमपक्षस्येष्ट त्वात्। तथाहि—उभयमप्येतत्किञ्चित्स्वतः किञ्चित्परत इति पूर्वमुपवर्णितम्। अतएव पक्षचतुष्टयोपन्यासोऽप्ययुक्तः। पञ्चमस्याप्यनियमपक्षस्य सम्भवात्। § 10095

अपरे त्वन्यथा प्रतिज्ञार्थं वर्णयन्ति—बोधात्मकत्वं नाम प्रामाण्यम्, तच्च ज्ञानानां स्वाभाविकमेव, न गुणकृतं, गुणाभावेऽपि विपर्ययज्ञाने बोधात्मकत्वसम्भवात्। अतः स्वतःप्रामाण्यमित्युच्यते। गुणैस्तु दोषनिराकरणमेव क्रियत इत्यतस्तन्निर्घाताय प्रामाण्यं गुणानपेक्षते नात्मप्रतिलम्भायेति। तदेतदसम्य-

क्। यतो न बोधात्मकत्वमेव प्रामाण्यं युक्तम्। विपर्ययज्ञानेऽपि सम्भवात्। बोधविशेषः प्रामाण्यमिति चेत्, न तर्हि वक्तव्यम्—तच्च ज्ञानानां स्वाभाविकमेव न गुणकृतम्, गुणाभावेऽपि विपर्ययज्ञाने सद्भावादिति। तथाहि—यदि बोधविशेषः प्रामाण्यमिष्टं स्यात्तदा तस्यैव गुणकृतत्वे व्यभिचारोपदर्शनं युक्तं 812/k नान्यस्य। नच विप र्ययज्ञानेऽपि सद्भावादित्यनेन बोधविशेषस्य गुणकृतत्वे व्यभिचारो दर्शितः। किं तर्हि ?—बोधसामान्यस्य। नच परेण बोधसामान्यं गुणकृतमिष्यते। किं तर्हि ?।बोधविशेषः। नच तस्य गुणकृतत्वे व्यभिचारः शक्यते प्रतिपादयितुम्। नचाप्यस्माभिर्गुणकृतत्वेन परतःप्रामाण्यमिष्टम्, यतस्तन्निषेधेन भवद्भिः स्वतो व्यवस्थाप्यते। किं तर्हि ?। अनुभूतोऽप्यसौ बोधविशेषः क्वचिद्भ्रान्तिनिमित्तसद्भावाद्यथानुभवं न निश्चयमुत्पादयतीति। अतस्तन्निश्चयोत्पत्तेः परत इति व्यवस्थाप्यते। किं चाप्रामाण्येऽपि शक्यमेवं कल्पयितुम्। बोधात्मकत्वं नामाप्रामाण्यम्, तच्च ज्ञानानांस्वाभाविकं न दोषकृतम्, दोषाभावेऽपि सम्यग्ज्ञाने सम्भवादित्यतः स्वतोऽप्रामाण्यमुच्यते, दोषैस्तु गुणनिराकरणमेव क्रियत इत्यतस्तन्निराकरणायाप्रामाण्यं दोषानपेक्षते नात्मप्रतिलम्भायेति। तस्माद्यत्किंचिदेतत्। § 10096

उवेयकस्त्वाह (?)—न बोधात्मकत्वं नाम ज्ञानानां प्रामाण्यम्, किं तर्हि ?, अर्थाविसंवादित्वम्। तथाहि—सत्यपि बोधात्मकत्वे यत्रार्थाविसंवादित्वं नास्ति तत्राप्रामाण्यम्, यथा शुक्तिकायां रजतज्ञानस्य। विनापि बोध(बोधात्म?)कत्वं यत्रार्थाविसंवादित्वमस्ति तत्र प्रामाण्यं यथाग्नौ धूमस्य, तस्मादन्वयव्यतिरेकाभ्यामविसंवादित्वमेव प्रामाण्यं सिद्धम्। तच्च ज्ञानमात्मीयादेव हेतोरुपजायते। न सामग्र्यन्तरादित्यतः स्वतः सर्वप्रमाणानां प्रामाण्यमित्युच्यते। स्वशब्दस्यात्मीयवचनत्वात्।स्वतः—आत्मीयाद्धेतोरित्यर्थः। नहि स्वतोऽसती शक्तिरित्यादिना पश्चादर्द्धेन सामग्र्यन्तराद्भावनिषेधे हेतुरुक्तः। नहि स्वतोऽसती कर्तुमन्येन विज्ञानसामग्र्यन्तरातिरिक्तेन शक्यत इत्यर्थः। स्यादेतत्—विज्ञानहेतवोऽपि प्रमाणाप्रमाणसाधारणाः, तत्कथं विज्ञानहेतुमात्रप्रतिबद्धं प्रामाण्यं स्यात्, तस्मात्सामग्र्यन्तरजन्यमेव प्रामाण्यं नतु ज्ञानहेतुमात्रजन्यम्। तच्च सामग्र्यन्तरं गुणसहितमेव, इन्द्रियादिगुणाश्चास्य कारणमिति। शाब्दे चाप्तप्रणीतत्वमेव कारणगुणत्वेन व्यवहारान्निश्चितम्। वेदे च त(दस)द्भावादप्रामाण्यं प्रसक्तमिति। नैष दोषः। सामग्र्यन्तरजन्यत्वासिद्धत्वात्। नहि विधिमुखेन गुणानां प्रामाण्याख्यकार्योत्पत्तौ व्यापारः प्रतीतः संभवति। इन्द्रियादिस्वरूपमेव ह्यन्यनिरपेक्षमर्थाविसंवादिज्ञानोत्पादकम्। अञ्जनादीनां तु दोषापगमे व्यापारो न गुणाधाने। अथापि स्यादिन्द्रियादिस्वरूपमप्रामाण्येऽप्यस्तीतिसर्वत्र प्रामाण्योत्पत्तिप्रसङ्गोऽविकलकारणत्वात्। नैतदस्ति। दोषसमवधाने तुसामग्र्यन्तराद्विलक्षणकार्योत्पत्तिर्भविष्यति। स्यादेतत्—विपर्ययः क- 813/k स्मान्न विज्ञा यते—इन्द्रियादिस्वरूपमेवान्यनिरपेक्षं व्यभिचारिज्ञानोत्पादकं, गुणसमवधाने तुसामग्र्यन्तरमर्थाविसंवादिज्ञानोत्पादकमिति। सत्यमेवमेतत्,

अन्वयव्यतिरेकाभ्यां तु विज्ञानोत्पादकमेव त्रैरूप्यमनुमानादौ प्रामाण्योत्पादकं दृष्टमिति प्रत्यक्षेऽपि च सम्भवात्तदेवोत्पादकं कल्प्यते। विपर्ययज्ञानरूपं तु कार्यमिन्द्रियादिस्वरूपादनुत्पद्यमानं सामग्र्यन्तरं कल्पयतीत्यनवद्यमिति। तदेतत्सर्वं नानवद्यम्। तथाहि—यत्तावदुक्तमर्थाविसंवादित्वमेव ज्ञानस्य प्रामाण्यं तच्चात्मीयादेव हेतोस्तस्योपजायत इति, अत्र सिद्धसाध्यता, यत इष्यत एवास्माभिः प्रमाणमविसंवादिविज्ञानमितिवचनादर्थाविसंवादित्वं ज्ञानस्य प्रामाण्यम्, किन्तु ज्ञानमिति विशेषणोपादानाद्धूमादेरज्ञानस्वभावस्य मुख्यतः प्रामाण्यं नेष्टमित्यर्थाविसंवादित्वमात्रं प्रामाण्यमसिद्धम्। ज्ञानस्यैव हेयोपादेयवस्तुनि प्रवृत्तौ प्राधान्यात्। तथाहि—सत्यप्यविनाभाविनि धूमादौ न तावत्पुरुषस्यार्थे प्रवृत्तिर्भवति यावद्विज्ञानोत्पादो न भवति, तस्मात्प्रवृत्तौ ज्ञानस्याव्यवहितं कारकत्वमिति तदेव प्रमाणम्। यदाह— धीप्रमाणता। प्रवृत्तेस्तत्प्रधानत्वाद्धेयोपादेयवस्तुनि इति, यच्चाविसंवादित्वं ज्ञानस्यार्थप्रापणशक्तिलक्षणं तत्त्वर्थप्रापणमेव, प्रतिबन्धादिसंभवात्। शक्तिश्च पदार्थानामात्मभूतैवेति कस्तस्या अर्थान्तरादुत्पत्तिमिच्छेद्येन सा निषिध्येत। नहि तन्निष्पत्तावनिष्पन्नो धर्मस्तत्स्वभावो युक्तोऽतिप्रसङ्गात्। सा च प्रमाणस्यात्मभूताऽपि सती भ्रान्तिकारणसद्भावादनधिगततत्कार्यैरवमातुं न पार्यत इति परतोऽर्थक्रियाज्ञानाख्यात्कार्यं निश्चीयते। अतो निश्चयापेक्षया परतःप्रामाण्यमित्युच्यते नोत्पत्त्यपेक्षया। तेन कारणान्तरादुत्पादप्रतिषेधवैयर्थ्यं विवादाभावात्। निश्चयस्तु शक्तीनां परतो भवद्भिरपीष्यत एव। यथोक्तम्— शक्तयः सर्वभावानां कार्यार्थापत्तिसाधनाः इति। यश्च— नहि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यत इत्येष सामग्र्यन्तराद्भावनिषेधायहेतुरुपवर्ण्यतेऽसावप्रमाणेऽपि समान इति तदपि स्वत एव प्रसज्येत। नवा स हेतुर्व्यभिचारात्। यच्चोक्तम्। नहि विधिमुखेन गुणानामप्रामाण्योत्पत्तौ व्यापारः प्रतीतः सम्भवतीति, एतदप्यन्वयवचनमनुन्मीलितार्थं न ज्ञायते। कोऽयं विधिमुखेन व्यापारो नामेति। यदि तावदिदं चेदं करिष्यामीति कार्योत्पादाय बुद्धिपूर्वाप्रवृत्तिः, सा नेन्द्रियादिष्वपि संभवति। नहि भावानां प्रेक्षापूर्वकारिताऽस्ति, सर्वभावानां क्षणिकत्वेन समीहाव्यापारयोरसम्भवात्। ततश्चेन्द्रियादेरपि विधिमुखेन व्यापारासम्भवात्कारणत्वं न स्यात्। अथेन्द्रियादि विनापि क्रियाख्यव्यापारसमा वेशं सत्तामात्रेण कार्योत्पत्तौ व्याप्रियत 814/k
इति कारणमिष्यते, तदेतद्गुणेष्वपि समानम्। नहि सर्वकारणानां कार्योत्पत्तौ नियतः स्वसत्तासन्निधानव्यतिरेकेणान्यो व्यापारः प्रतीतः संभवति। अथ गुणसन्निधाने दोषनिवृत्तौ सत्यां प्रामाण्यमुपजायत इति दोषनिवृत्त्या व्यवहृतत्वात्साक्षाद्विधिमुखेन गुणानां व्यापारो न सम्भवतीत्युच्यते, तदेतद्दोषेष्वपि समानम्। तथाहि—दोषसन्निधानेऽपि गुणनिवृत्तौ सत्यामप्रामाण्यमुपजायत इति दोषाणामपि विधिमुखेनाप्रामाण्योत्पत्तौ व्यापारो न स्यात्। ततश्चाप्रामाण्यमपि स्वतः प्रसज्येत, अविशेषात्। नहि दोषा गुणान्निराकृत्य साक्षादप्रामाण्ये व्याप्रियमाणाः समालक्ष्यन्ते। तस्मात्तद्भावाभावानुविधानव्य-

तिरेकेण नान्यः कार्यकारणभावः सम्भवतीति दोषवद्गुणानामपि कारणत्वं समानम्। यच्चोक्तम्—इन्द्रियादिरूपमेवान्यनिरपेक्षमर्थाविसंवादिज्ञानोत्पादकमिति, तदप्ययुक्तम्। अविकलकारणत्वेन सर्वज्ञानानां प्रामाण्यप्रसङ्गात्। बोधरूपतावत्। यथा बोधरूपता ज्ञानानां समनन्तरप्रत्ययप्रतिबद्धा सती दोषादिसमवधानेऽप्यविकलकारणतया सर्वत्र ज्ञाने भवति तथाऽर्थाविसंवादित्वमपि स्यात्। स्यादेतत्—दोषैरप्रामाण्यस्योत्पादेसामान्यमविकलकारणमपि नोपजायते, प्रामाण्येतरयोरेकत्र ज्ञाने विरुद्धयोरयोगात्, बोधरूपता तु निष्प्रतिद्वन्द्वा सर्वत्र भवत्येवेति, यद्येवं न तर्हीन्द्रिय(त्व)रूपमेवान्यनिरपेक्षं कारणं सिद्ध्यति, सत्यपि तस्मिन्नविकले प्रामाण्याख्यकार्यानुत्पत्तेः। नह्यन्यनिरपेक्षस्य कदाचिदजनकत्वं युक्तम्। नापि यद्यस्मिन्सत्यपि न भवति तत्तन्मात्रकारणं युक्तमतिप्रसङ्गात्। किंचेदं तावच्च भवान्वक्तुमर्हति—यद्यविकलकारणं प्रामाण्यं किमिति दोषसन्निधानेऽपि नोत्पद्यत इति। स्वविरूद्धकारणस्य दोषस्य सन्निहितत्वादिति चेत्। अप्रामाण्येऽपि तुल्यम्। तस्यापि तदानींस्वविरुद्धकारणमिन्द्रियादिसन्निहितमित्युत्पत्तिर्माभूत्। किंच—यदि नाम विरुद्धकारणाद्दोषाद्बिभ्युतः प्रामाण्यस्यानुत्पत्तुमिच्छा स्यात्, स्वकारणं त्वप्रतिहतसामर्थ्यं सत्तदानीं किमिति तदुपेक्षेत। एवं हि तेनात्मनोऽप्रतिहतशक्तिता प्रकटिता स्याद्यदि स्वकार्यमुत्पत्तुमनिच्छदपि हठादुत्पादयेत्। दोषैरुपहतशक्तित्वादिन्द्रियं प्रामाण्यं न जनयेत्, विज्ञानमपि नैव जनयेदसामर्थ्यात्। अन्यथा विज्ञानहेतुमात्रजन्यं प्रामाण्यं न सिद्ध्येत्, तदुत्पत्तावप्यनुत्पत्तेः। यो हे यदुत्पत्तावपि नियमेन नोत्पद्यते नासौ तेन सहैककारणः, यथा कोद्रवाङ्कुरोत्पत्तावप्यनुत्पद्यमानः। 815/k शाल्यङ्कुरः। नोत्पद्यते च विज्ञानोत्पत्तावपि प्रामाण्यं नियमेनेति व्यापकानुपलम्भः। नापि तत्स्वभावमखण्डयन्नात्मभूतां शक्तिं कश्चिदुपहन्तुं शक्नुयात्। ततश्चैवमपि शक्यते पठितुम—स्वतःसर्वोपलब्धीनां प्रामाण्यमिति गृह्यताम्। नहि स्वतः सती शक्तिर्हन्तुमन्येन पार्यते॥ इति। स्यादेतत्—नेन्द्रियादिमात्रं प्रामाण्यकारणमिष्टम्। किं तर्हि ?। विशिष्टमेव यद्दोषरहितम्, तेन यथोक्तदोषाप्रसङ्ग इति। यद्येवम्,सामग्र्यन्तरमेव गुणसहितमिन्द्रियादिप्रामाण्यकारणमिति प्राप्तम्, गुणसहितस्यैव दोषरहितत्वसम्भवात्। ततश्च न वक्तव्यं सामग्र्यन्तरजन्यत्वासिद्धेरिति। दोषापगमे गुणानां व्यापारो न प्रामाण्योत्पत्ताविति चेत्। तन्न। अपगमस्यावस्तुत्वान्न तत्र कस्यचिद्व्यापारो युक्तः। नह्यवस्तुनि शशविषाणादावनुत्पाद्यस्वभावे कस्यचिद्व्यापारः सम्भवति। यच्चोक्तम्—विज्ञानोत्पादकमेव त्रैरूप्यमनुमानादौ प्रामाण्योत्पादकं दृष्टमिति, एतदप्यसिद्धम्। नहि त्रैरूप्यमेव केवलमनुमानस्योत्पादकम्, किं तर्हि ?, प्रतिपत्तिर्गता (प्रतिपत्तृगता ?) अप्यमूढस्मृतसंस्कारा गुणाः। तथाहि—सत्यपि त्रैरूप्ये प्रभ्रष्टसम्बन्धस्मृतिसंस्कारस्याप्रतीतसम्बन्धस्य च प्रतिपत्ति(त्तु ?)र्नोपजायतेऽअनुमानमित्यतोऽन्वयव्यतिरेकाभ्यां विज्ञानोत्पादकमेव प्रामाण्योत्पादकमित्येतदसिद्धम्। अतो विपर्ययो दुर्निवार एव व्यवस्थितः।

यच्चोक्तम्—विपर्ययज्ञानरूपं कार्यमिन्द्रियादिस्वरूपान्नोत्पद्यत इति, तदप्यतिसाहसम्। इन्द्रियानपेक्षस्यापि विपर्ययज्ञानस्योत्पत्तिप्रसङ्गात्। नहि यो यतः स्वभावान्नोत्पद्यते, तस्य तदपेक्षा युक्ताऽतिप्रसङ्गात्। नचेन्द्रियनिरपेक्षं तैमिरिकादिद्विचन्द्रादिज्ञानमुत्पद्यते। किंच—यद्यर्थाविसंवादित्वं प्रामाण्यमुपवर्ण्यते तदा चोदनाजानिताया बुद्धेः कथमर्थाविसंवादित्वमवगतम्। येन तत्र भवतामर्वाग्दर्शिनां प्रामाण्यव्यवहारः स्यात्। नह्यविदिततत्कार्यैस्तच्छक्तिरवधारयितुं शक्यते, अतिप्रसङ्गात्। ततश्च यस्यैव वेदस्य प्रामाण्यस्थिरीकरणप्रत्याशया सर्वमेतद्वाग्जालमुपरचितं तस्यैव तन्न प्रसिद्धमिति केवलं तन्दुलार्थिना तुषकण्डनमेतत्कृतमित्यलमतिप्रसङ्गेन। § 10097

इति स्वतःप्रामाण्यपरीक्षा।

०.२७ अतीन्द्रियदर्शिपुरुषपरीक्षा।

अनल्पकल्पासङ्ख्येयसात्मीभूतमहादयः। यः प्रतीत्यसमुत्पादं जगाद वदतां वरः। तं सर्वज्ञं प्रणम्यायं क्रियते तत्त्वसङ्ग्रहः॥ इत्यनेन यत्सर्वज्ञोपदिष्टत्वं प्रतीत्यसमुत्पादस्य विशेषणमुक्तं तत्समर्थनार्थं प्रस्तावमात्रं रचयन्नाह—एवमित्यादि। § 10099

एवं सर्वप्रमाणानां प्रमाणत्वे स्वतोऽस्थिते।
अतीन्द्रियार्थवित्सत्त्वसिद्धये न प्रयत्यते॥
३१२४॥§ 10101

816/k

एवमनन्तरोक्तेन न्यायेन यदा सर्वेषामेव प्रमाणानां न स्वत एव प्रामाण्यमिति स्थितम्। अतोऽयत्नेनैवातीन्द्रियार्थदर्शी पुरुषः सिद्ध इति न तत्सिद्धये पृथक्प्रयत्नान्तरमास्थीयते॥ ३१२४॥ § 10102

स्यादेतत्—कथं यत्नमन्तरेण सिद्ध्यतीत्याह—वेदस्यापीत्यादि। § 10103

वेदस्यापि प्रमाणत्वं यस्मात्पुरुषतः स्थितम्।
तस्य चातीन्द्रियज्ञत्वे ततस्तस्मिन्प्रमाणता॥
३१२५॥§ 10105

अन्यथाज्ञानसंदेहविपर्यासानुषङ्गिणि।
पुंसि कर्त्तरि नैवास्य प्रामाण्यं स्यात्तदन्यवत्॥
३१२६॥§ 10107

स्वर्गयागादिसम्बन्धो ज्ञात्वा तद्येन भाषितः।
विस्पष्टातीन्द्रियज्ञानः सोऽभ्युपेयः परैरपि॥
३१२७॥§ 10109

तस्य चेति। पुरुषस्य। तत इति। पुरुषात्कर्तुः। तस्मिन्निति। वेदे। प्रमाणतेत्येतदपेक्षाऽधिकरणसप्तमी। प्रमाणतेति। अविपरीतातीन्द्रियार्थप्रतिपादकत्वम्। एतच्च परमतापेक्षयाऽभिहितम्। एतदुक्तं भवति—यदि भवद्भिरवश्यं वेदस्य प्रामाण्यमभ्युपेयते तदाऽस्य पुरुषादेव कर्तुः प्रामाण्यं युक्तम्, न स्वत इति, एतच्च पूर्वं प्रतिपादितम्। स च वेदस्य कर्त्ता यद्यतीन्द्रियदृग्भवति तदाऽस्य ततः कर्तुरपिप्रमाणता युक्ता, अन्यथा हि विपरीतसंशयज्ञानादियुक्ते कर्त्तरि सत्युन्मत्तादिवाक्यवद्वेदोऽप्रमाणतामेवाश्नुवीत। तस्माद्योऽसौ वेदकर्त्ता पूर्वं श्रुतिपरीक्षायां प्रसाधितः, परैरपि मीमांसकैरतीन्द्रियार्थदर्शी सामर्थ्यादङ्गीकर्त्तव्य इति तत्प्रतिक्षेपो न कार्यः। तथाहि सर्वेषामेव पुंसां रागादिदोषतिमिरोपहतबुद्धिलोचनतया नातीन्द्रियार्थदर्शित्वमस्तीत्यवगम्य तत्प्रतीतेष्वागमेष्वप्रतिष्ठितप्रामाण्यप्रत्याशो धर्माधर्मावगमार्थी नरस्तीरादर्शीव शकुनिर्वेदमेव किल प्रमाणयिष्यतीति मन्यमानैर्यद्वा गुणद्रविणदारिद्र्योपहता (त?)विमोक्षतया जैमिनीयैरतीन्द्रियार्थदृक्प्रतिक्षिप्यते—सर्व एव हि पुरुषा रागादिभिरविद्यया च तदुपशमोपायवैकल्याद्विप्लुतास्तस्मान्नास्त्यतीन्द्रियार्थदर्शी कश्चिदिति चोदनालक्षण एवार्थो धर्मो नेन्द्रियादिलक्षणः, चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोत्यवगमयितुं नान्यत्किंचनेन्द्रियमति। प्रमाणयन्ति चात्र। यः प्रमाणपञ्चकविरहस्वभावाभावप्रमाणविषयीकृतविग्रहः
817/k स विदुषामभावव्यवहारगोचरतामेवावतरति, यथा गगननलिनम्, अभावप्रमाणविषयीकृतविग्रहश्च सर्वदर्शी पुरुष इति स्वभावहेतुः। व्यवहारयोग्यतायाः साध्यत्वात्। अभावस्वभावप्रमाणत एव सिद्धः॥ ३१२५॥ ३१२६॥ ३१२७॥ § 10110

ननु चैतावदेव सर्वं प्रमेयं वस्तु, यदुत पञ्चविषया रूपादयः, तांश्च जानन्तो नरा लोकेऽतिप्रतीता एवेति। ततश्च प्रतीतिबाधा प्रतिज्ञाया इत्येतदाशङ्क्याह—धर्मज्ञत्वनिषेध इत्यादि। § 10111

८ पुरुषादेव] Correction : ; पुरुषादिव
(sic !)पुरुषादेव

धर्मज्ञत्वनिषेधश्चेत्केवलोऽत्रोपयुज्यते।
सर्वमन्यद्विजानानः पुरुषः केन वार्यते॥
३१२८॥§ 10113

अत्र हि वेदप्रामाण्यसिद्धौ धर्मात्मविश्वपरिज्ञातृत्वनिषेधमात्रं विवक्षितम्, नतुसर्वशब्दाभिधेयमात्रपरिज्ञातृत्वनिषेधः, तेन धर्माधर्मव्यतिरिक्ताशेषपदार्थपरिज्ञानापेक्षया यः कस्मिंश्चित्पुंसि सर्वज्ञव्यवहारो लोकस्य सम्भवति न तस्य प्रतिषेधोऽस्माभिः क्रियते, अतो न प्रतीतिबाधा सम्भवतीति भावः॥ ३१२८॥ § 10114

किंच—यदि भवद्भिरपि बौद्धैर्धर्माधर्मज्ञव्यतिरेकेणान्यस्मिन्पुंसि सर्वज्ञत्वं प्रसज्यते तदा सिद्धसाध्यतेति दर्शयन्नाह—सर्वशब्दश्चेत्यादि। § 10115

सर्वशब्दश्च सर्वत्र प्रकृतापेक्ष इष्यते।
ततः प्रकृतसर्वज्ञे सति किं नोऽवहीयते॥
३१२९॥§ 10117

किंच तत्प्रकृतं(?) सर्वमित्युच्यत इति दर्शयति—अर्थे चेत्यादि। § 10118

अर्थे चासम्भवात्कार्यं किंचिच्छब्देऽपि कल्प्यते।
तत्र यः सर्वशब्दज्ञः स सर्वज्ञोऽस्तु नामतः॥
३१३०॥§ 10120

यथाहि—व्याकरणेऽग्निर्टगित्यादिना लक्षणेन प्रत्ययागमादि कार्यं विधीयमानमर्थे न सम्भवतीति सामर्थ्यादर्थवाचिनि शब्देऽवगम्यत इति वैयाकरणैर्वर्ण्यते तद्वद्यदि भवद्भिरपि सर्वस्य केनचित्परिज्ञातुमशक्यत्वादिति कृत्वा स (स्व ?)सिद्धान्तपरिपठितस्य सर्वज्ञशब्दस्य यत्सर्वपदं तस्य स्वरूपप्रधानतामाश्रित्य सर्वशब्दं यो वेत्ति स सर्वज्ञ इत्येवं वर्ण्यते, तदास्तु—भवतु, नामतः—संज्ञामात्रात्, नहि यथेष्टं नाम कुर्वाणस्य कस्यचित्क्वचित्प्रतिरोद्धा स्वतन्त्रेच्छामात्रप्रभवत्वान्नाम्न इति भावः॥ ३१३०॥ § 10121

अथापि प्रकृतं किञ्चित्तैलोदकघृतादिव (य ?)त्।
तेन सर्वेण सर्वज्ञस्तथाऽप्यस्तु न वार्यते॥
३१३१॥§ 10123

818/k

अथापि धर्माधर्माभ्यां यदन्यत्तैलोदकघृतादि सर्वत्वेन विवक्षितम्, तेन सर्वेण विषयीकृतेन सता सर्वज्ञ इतीष्यते तथापि सिद्धसाध्यता॥ ३१३१॥
§ 10124

किञ्च—सामान्याकारतः विश्वस्य जगतः सङ्क्षेपपरिज्ञानाद्वा सर्वज्ञ इष्टः, आहोस्विद्विशेषाकारेण विस्तरपरिज्ञानात्, तत्राद्ये पक्षे सिद्धसाध्यतेति दर्शयति—भावाभावेत्यादि। § 10125

भावाभावस्वरूपं वा जगत्सर्वं यदोच्यते।
तत्संक्षेपेण सर्वज्ञः पुरुषः केन नेष्यते॥
३१३२॥§ 10127

एवं ज्ञेयप्रमेयत्वसंक्षेपेणापि सर्वताम्।
आश्रित्य यदि सर्वज्ञः कस्तं वारयितुं क्षमः॥
३१३३॥§ 10129

सर्वमेव हि जगदितरेतराभावादिस्वभावत्वादभावस्वभावं, विधिरूपतया व्यवस्थितत्वात् भावस्वभावमिति यदेतदस्माभिर्भावाभावस्वभावत्वं सर्वजगद्व्यापी सामान्यधर्मो वर्णितः, तेन रूपेण सर्वजगत्परिज्ञानाद्यदि सर्वज्ञः प्रसाध्यते, तथापीष्टमेव, न ह्येतावता धर्मज्ञत्वं प्रसिध्यति कस्यचित्। तत्सङ्क्षेपेणेति। तदेव भावाभावरूपत्वं जगतः सङ्क्षेपः, सङ्क्षिप्यतेऽनेनेति कृत्वा। एवं प्रमेयत्वादिभिः सामान्यधर्मैः परिज्ञानेऽपि सिद्धसाध्यता॥ ३१३२॥ ३१३३॥
§ 10130

पदार्था यैश्च यावन्तः सर्वत्वेनावधारिताः।
तज्ज्ञत्वेनापि सर्वज्ञाः सर्वे तद्ग्रन्थवेदिनः॥
३१३४॥§ 10132

अथापि स्याद्यैः स्वस्मिन्स्वस्मिन् शास्त्रे यावन्तः पदार्थाः सर्वत्वेनावधार्य निर्दिष्टाः—यथा बौद्धैः पञ्च स्कन्धाः वैशेषिकैः षट् पदार्थाः, नैयायिकैः प्रमाणप्रमेयादयः षोडश, साङ्ख्यैः प्रकृतिमहदादयः पञ्चविंशतिरित्येवमादि, तत्परिज्ञानात्सर्ववित्प्रसाध्यत इति। एवं सत्यतिप्रसङ्गः, तद्ग्रन्थार्थवेदिनोऽन्ये येऽध्येतारः ते सर्वज्ञाः प्राप्नुवन्ति॥ ३१३४॥ § 10133

तथा षड्भिः प्रमाणैर्यः षट्प्रमेयविवेकवान्।
सोऽपि संक्षिप्तसर्वज्ञः कस्य नाम न संमतः॥
३१३५॥§ 10135

अथापि स्याद्यो हि प्रत्यक्षानुमानशब्दोपमानार्थापत्त्यभावाख्यैः षड्भिः प्रमाणैर्यथास्वमेषां विषयषटंक विवेकेन परिजानाति स सर्वज्ञ इति, अत्रापि सिद्धसाध्यता।तथाहि—प्रत्यक्षं रूपादिविषयपञ्चकनियतत्वान्न धर्माधर्मविषयम्। अनुमानमपि प्रत्य क्षगृहीतलिङ्गसम्बन्धलिङ्गिविषयत्वान्न तद्विषयम्, ध- 819/k
र्मादेरतीन्द्रियत्वेन केनचित्सम्बन्धस्य गृहीतुमशक्यत्वात्। शाब्दं यद्यपि सर्वं परोक्षार्थविषयं, तथापि न तेनज्ञानेनातीन्द्रियार्थदर्शी भवितुमर्हति, तस्य ज्ञानस्य परोक्षार्थविषयत्वेनाप्रत्यक्षत्वात्।नचाप्रत्यक्षज्ञानासङ्गी पुरुषः साक्षाद्दर्शी युज्यते। उपमानमपि सादृश्यतदुपाधिविषयत्वान्न धर्माधर्मादिविषयम्, यथोक्तम्— तस्माद्यत्स्मर्यते तत्स्यात्सादृश्येन विशेषितम्। प्रमेयमुपमानस्य सादृश्यं वा तदाश्रितम्॥ इति। अर्थापत्तिरपि दृष्टश्रुतार्थान्यथानुपपत्तिपरिकल्प्यार्थान्तरविषया, नासौ धर्मादिगोचरा, नहि कश्चिद्दृष्टः श्रुतो वार्थोऽस्ति यो धर्मादिना विना नोपपन्नः। भवतु वा धर्मादिविषयत्वमर्थापत्तेः, तथाऽपि तस्या अप्रत्यक्षस्वभावत्वान्न तत्सङ्गी धर्मादिसाक्षाद्दर्शी सिद्ध्यति। अभावस्य तु प्रमेयाभावविषयत्वादेवायुक्तं धर्मादिविषयत्वम्॥ ३१३५॥ § 10136

एवं तावत्सङ्क्षिप्तसर्वज्ञप्रसाधने सिद्धसाध्यतेति प्रतिपादितम्, इदानीं विस्तरेणाशेषजगत्परिज्ञानात्सर्वज्ञत्वसाधने दोषमाह—विशेषेणेत्यादि।
§ 10137

विशेषेण तु सर्वार्थसाक्षात्प्रत्यक्षदर्शिनम्।
यः कल्पयति तस्यासौ मुधा मिथ्या च कल्पना॥
३१३६॥§ 10139

मुधेति। निष्फला। पुरुषार्थसिद्धावनुपयोगात्। मिथ्येति। असम्भावनीयार्थविषयत्वाद्वितथा॥ ३१३६॥ § 10140

तदेवासम्भावनीयविषयत्वमस्या दर्शयति—एकस्यैवेत्यादि। § 10141

एकस्यैव शरीरस्य यावन्तः परमाणवः।
केशरोमाणि यावन्ति कस्तानि ज्ञातुमर्हति॥
३१३७॥§ 10143

८ परोक्षार्थवि] Correction : ; परोक्षावि (sic !)परोक्षार्थवि

९ ज्ञानासङ्गी] Correction : ; ज्ञानात्सङ्गी (sic !)ज्ञानासङ्गी

एकशरीरान्तर्गताशेषपरमाणुप्रविभागपरिज्ञानमेव तावत्खलु पुंसामसम्भाव्यम्, किमुताशेषजगद्गतसूक्ष्मादिविशेषपरिज्ञानं भविष्यति॥ ३१३७॥
§ 10144

मुधात्वं कल्पनाया दर्शयन्नाह—समस्तावयवेत्यादि। § 10145

समस्तावयवव्यक्तिविस्तरज्ञानसाधनम्।
काकदन्तपरीक्षावत्क्रियमाणमनर्थकम्॥
३१३८॥§ 10147

अवयवाश्च पाण्यादयः व्यक्तयश्च धवखदिरपलाशादय इत्यवयवव्यक्तयः, समस्ताश्च ता अवयवव्यक्तयश्चेति विग्रहः, तासामणुकेशपत्रादिलक्षणं विस्तरं जानातीति तथोक्तम्। कृत्यल्युदो बहुलमिति कर्त्तरि ल्युट्। तस्य साधनं
820/k प्रतिपादितम्। तदनर्थकम्—असम्भवित्वेन धर्माधर्माविषयत्वेन तु पुरुषार्थं प्रत्यनुपयोगित्वादिति भावः॥ ३१३८॥ § 10148

एतदेव दृष्टान्तेनोपपादयन्नाह—यथेत्यादि। § 10149

यथा च चक्षुषा सर्वान्भावान्वेत्तीति निष्फलम्।
सर्वप्रत्यक्षदर्शित्वप्रतिज्ञाऽप्यफला तथा॥
३१३९॥§ 10151

एतेन सिद्धसाध्यत्वं प्रतीतिबाधितत्वं च प्रतिज्ञाया यथायोगमुक्तं भवति ३१३९ § 10152

यत्र तु विवादो यत्साधने च पुरुषार्थोपयोगित्वं तद्दर्शयति—स्वधर्मेत्यादि। § 10153

स्वधर्माधर्ममात्रज्ञसाधनप्रतिषेधयोः।
तत्प्रणीतागमग्राह्यहेयत्वे हि प्रसिद्ध्यतः॥
३१४०॥§ 10155

तत्र सर्वजगत्सूक्ष्मभेदज्ञत्वप्रसाधने।
अस्थाने क्लिश्यते लोकः संरम्भाद्ग्रन्थवादयोः॥
३१४१॥§ 10157

स्वकीयश्चासौ धर्माधर्ममात्रज्ञश्चेति तथोक्तः तस्य साधनप्रतिषेधाविति विग्रहः। सप्तमीयम्। तत्प्रणीतस्यागमस्य ग्राह्यत्वहेयत्वे हि प्रसिद्ध्यत इति यथाक्रमं सम्बन्धः। एतदुक्तं भवति—यदि साधनवादी स्वकीयशास्तारं धर्माधर्मज्ञं साधयति तदा तस्य साधने कृते सति तत्प्रणीतागमस्य ग्राह्यता सिद्ध्यति। दूषणवादी च यदि पराभ्युपगतं स्वधर्माधर्ममात्रज्ञं प्रतिषेधति तदा तस्य निषेधे कृते सति दूषितधर्माधर्मज्ञप्रणीतस्यागमस्य हेयत्वं प्रसिद्ध्यति। यत्पुनर्धर्माधर्मविषया चित्रा(न्ता?)मपहाय स्वपरप्रसिद्धस्य सर्वज्ञस्य सकलजगद्गत सूक्ष्मादिभेदज्ञत्वाज्ञत्वसाधनायसाङ्ख्यबौद्धादिभिर्ग्रन्थरचनायां वादे वा संरम्भः क्रियते स केवलमेषां संक्लेशफल एव। सर्वजगत्सूक्ष्मभेदज्ञत्वप्रसाधन इति निमित्तसप्तमी। ग्रन्थवादयोरित्यत्र तु संरम्भापेक्षाऽऽधारसप्तमी॥ ३१४०॥ ३१४१॥ § 10158

स्यादेतद्यदि न कश्चिद्धर्मादिपरिज्ञाताऽस्ति नरस्तदा लोके कथं पुण्यापुण्यावगतिर्भव(ती)त्याशङ्कायामाह—सर्वप्रमातृसम्बद्धेत्यादि। § 10159

सर्वप्रमातृसम्बद्धप्रत्यक्षादिनिवारणात्।
केवलागमगम्यत्वं लप्स्यते पुण्यपापयोः॥
३१४२ ॥§ 10161

एतावतैव मीमांसापक्षे सिद्धेऽपि यत्पुनः।
सर्वज्ञवारणे यत्नस्तत्कृतं मृतमारणम्॥
३१४३ ॥§ 10163

821/k

येऽपि विच्छिन्नमूलत्वाद्धर्मज्ञत्वे हते सति।
सर्वज्ञान्पुरुषानाहुस्तैः कृतं तुषकण्डनम्॥
३१४४ ॥§ 10165

केवलागमगम्यत्वमिति। आगममात्रगम्यत्वमित्यर्थः। यद्यप्यागमशब्दः सामान्यवचनस्तथाप्यर्थादपौरुषेयागमनिष्ठ एव द्रष्टव्यः। एतावतैवेति। धर्मज्ञत्वनिषेधमात्रेण चोदनालक्षणोऽर्थो धर्म इत्यस्मिन्मीमांसापक्षे सिद्धेऽपि योऽस्माभिर्वक्ष्यमाणो भूयः सर्वज्ञपुरुषनिषेधाय यत्नः क्रियते सोऽभिमतफलसिद्धेर्जातत्वात्प्राप्तफलस्य मृतमारणवन्निष्फलः, यश्च बौद्धा-

८ जगद्गत] Correction : ; जगद्गतः (sic !)जगद्गत

दीनां धर्मज्ञेऽभावप्रमाणेन हते सति सर्वज्ञसाधनाय यत्नः सोऽपि समीहितफलाभावात्तुषकण्डनं तन्दुलार्थिनः केवलमायासमात्रफल एव। यथा तुषान्तर्गततन्दुलपरित्यागेन तन्दुलार्थिनः केवलं तुषकण्डनमेवं बौद्धादौ स्वतःप्रधानभूतधर्मज्ञपरित्यागेनानुपयुज्यमानाशेषजगद्गतसूक्ष्मादिभेदज्ञसाधनमित्येतत्तुषकण्डनसाधर्म्यम्। विच्छिन्नमूलत्वादिति। विच्छिन्नं मूलं प्रधानं धर्मात्मकवस्तुपरिज्ञानं येषां ते तथोक्ताः। तद्भावस्तत्त्वम्॥ ३१४२॥ ३१४३॥ ॥ ३१४४॥ § 10166

न केवलमेषां बौद्धादीनां सर्वज्ञं साधयतामभीष्टफलासिद्धिरपि त्वनिष्टापत्तिरपीति दर्शयति—साक्षादित्यादि। § 10167

साक्षात्प्रत्यक्षदर्शित्वादस्याशुचिरसादयः।
स्वसंवेद्याः प्रसज्यन्ते को नु तं कल्पयिष्यति॥
३१४५॥ § 10169

स्यादेतत्सुगतादीनां सकलपदार्थराशितत्त्वोपदेशादनुमितः सर्वज्ञभाव इत्यनुमानबाधितत्वं प्रतिज्ञाया हेतोश्चासिद्धत्वमित्याशङ्क्याह—नचेत्यादि। § 10170

नच वेदोपवेदाङ्गप्रत्यङ्गाद्यर्थबोधनम्।
बुद्धादेर्दृश्यते वाक्यं स सर्वज्ञः कथं मुधा॥
३१४६॥ § 10172

वेदाः—ऋग्यजुःसामसंज्ञकाः, उपवेदाः—आयुर्वेदधनुर्वेदादयः, अङ्गानि-वेदानां षट्, शिक्षा कल्पो व्याकरणं छन्दो निरुक्तं ज्योतिषमिति, प्रत्यङ्गानि—तदवयवा धात्वादयः, आदिशब्देन तत्परिकरस्य भाष्यादेः परिग्रहः। एषामर्थोऽभिधेयस्तस्य बोधनम्—प्रतिपादकं वचनं तत्तथाभूतं वाक्यं बुद्धादेर्न दृश्यते, यद्वेदाद्युपदिष्टमर्थं प्रतिपादयतीत्यर्थः। नहि कस्यचिदखिलपदार्थराशिप्रतिपादकशास्त्रप्रणयनंदृश्यते, सर्वशास्त्राणां भिन्नाभिधेयत्वदर्शनात्॥ ३१४६॥ § 10173

822/k

अथापि स्यात्कियन्मात्रपदार्थोपदेशदर्शनात् बुद्धादेरन्योऽपि स्वग्रन्थानुपदिष्टोऽर्थोविज्ञातत्वेनानुमीयते परिज्ञानशक्तिदर्शनात्, ततश्च तदवस्थ एव दोष इत्याह—स्वग्रन्थेष्वित्यादि। § 10174

स्वग्रन्थेष्वनिबद्धोऽपि स्वज्ञातोऽर्थो यदीष्यते।

सर्वज्ञाः कवयः सर्वे स्युः स्वकाव्यनिबन्धनात्॥
३१४७॥§ 10176

यदि ग्रन्थेषु अनिबद्धोऽपि—अनुपदिष्टोऽपि योऽर्थः स तैर्विज्ञात इष्यतेऽनुमानबलात्तदा स्वोत्प्रेक्षितकथाप्रबन्धकारिणोऽपि कवयः परिज्ञानशक्तिदर्शनात्सर्वज्ञाः कल्प्याः स्युः, अविशेषादित्यनैकान्तिकता हेतोः॥ ३१४७॥
§ 10177

स्यादेतद्बुद्धादीनामतीन्द्रियपदार्थोपदेशो दृश्यते न तु कवीनाम्, तेन तेषामेवाशेषातीन्द्रियार्थपरिज्ञानमनुमीयते नान्येषाम्, अन्यथा हि यस्याशेषातीन्द्रियार्थपदार्थपरिज्ञानसामर्थ्यं नास्ति, तस्य कियन्मात्रातीन्द्रियार्थपरिज्ञानमपि न स्यादविशेषात्। तेनातीन्द्रियार्थपरिज्ञातृत्वे सतीति सविशेषणत्वाद्धेतोर्न कविभिर्व्यभिचार इत्याशङ्क्याह—सर्वज्ञेष्वित्यादि। § 10178

सर्वज्ञेषु च भूयस्सु विरुद्धार्थोपदेशिषु।
तुल्यहेतुषु सर्वेषु को नामैकोऽवधार्यताम्॥
३१४८॥§ 10180

बहुतरेषु सुगतकपिलकणभक्षाक्षपादादिषु तद्भक्तैः सर्वज्ञत्वेनोपकल्पितेषु साध्येषु कतम एकोऽत्र सर्वज्ञत्वेनावधार्यतां निश्चीयताम्, सर्वेषामतीन्द्रियार्थोपदेष्टृत्वस्य सर्वज्ञनिश्चयहेतोस्तुल्यत्वात्। नच सर्व एव सर्वज्ञा इत्यवधारयितुं युक्तम्,सर्वेषां परस्परविरुद्धार्थोपदेष्टृत्वात्। नहि परस्परप्रतिहतोपदेष्टारः सर्व एव तत्त्वदर्शिनो युक्ता वस्तूनामेकरूपत्वेन परस्परविरुद्धानेकस्वभावसंसर्गाभावात्॥ ३१४८॥ § 10181

सुगत एकोऽवधार्यत इति चेदाह—सुगतो यदीत्यादि। § 10182

सुगतो यदि सर्वज्ञः कपिलो नेति का प्रमा।
अथोभावपि सर्वज्ञौ मतभेदस्तयोः कथम्॥
३१४९॥§ 10184

द्वावपि तर्हि सर्वज्ञौ भवेतामिति चेदाह—अथोभवापीत्यादि॥ ३१४९॥
§ 10185

अथापि स्यात्—यस्य वचनं सत्यार्थमुपलब्धमेकदा तस्यैवाविपरीताशेषपदार्थतत्त्वपरिज्ञानमनुमीयत इत्याह—गणितेत्यादि। § 10186

११--१२ प्रतिहतोप] Correction : ; हितोप (sic !)प्रतिहतोप

गणिताद्येकदेशे तु सर्वेषां सत्यवादिता।
जिनबुद्धादिसत्त्वानां विशेषो नावधार्यते॥
३१५० ॥§ 10188

823/k

सर्वेषां हि जिनबुद्धादीनां देहिनां गणिताद्येकदेशेषु क्वचिदविसंवादि वचो दृश्यत एव। नह्यनल्पं प्रलपताम् (प्रजल्पतां ?) न किंचित्सत्यार्थं भवेत्, यथोक्तम्—नह्येकं नास्ति सत्यार्थं पुरुषे बहुभाषिणि इति। ततश्च तुल्यहेतुतः सर्वेषामेवविशेषाऽनवधारणात्सर्वज्ञता प्राप्नोति, नचैतद्युक्तम्, परस्परविरुद्धार्थोपदेशादितिपूर्वमुक्तत्वात्॥ ३१५०॥ § 10189

अथापि स्याद्यस्य वचनं सर्वत्र प्रमाणैर्निवार्यमाणं व्याहन्तुं न पार्यते स एव सर्वज्ञो भविष्यतीत्याह—येनैवेत्यादि। § 10190

येनैव हेतुनैकस्य सर्वज्ञत्वं प्रसाध्यते।
स्वपक्षप्रीतिमात्रेण सोऽन्यस्याप्युपतिष्ठते॥
३१५१ ॥§ 10192

दूषणानि ससंरम्भाः सर्वज्ञजिनसाधने।
शाक्या यान्येव जल्पन्ति जैनास्तान्येव युञ्जते॥
३१५२ ॥§ 10194

तत्रानवस्थितैस्तेषां भिन्नैः साधनदूषणैः।
प्रतिबिम्बोदयग्रस्तैर्निर्णयः क्रियते कथम्॥
३१५३ ॥§ 10196

यो हि हेतुः सुगतसर्वज्ञ(ता)साधनायोपादीयते सुगतसुतैः। यथा साक्षाद्विदितसकलार्थतत्त्वः सुगतः, अश्रुताननुमिताविपरीतार्थोपदेष्टृत्वात्, यथा प्रत्यक्षावगतसलिलादिस्तदुपदेष्टेति। अयमेव दिगम्बराणां जिनसर्वज्ञ(ता)साधनाय हेतुरुपतिष्ठते। ततश्च तदवस्थ एव संदेहः। तथा जिनसर्वज्ञ(ता)साधनाय दिगम्बरैः साधने कृते यानि दूषणानि शाक्यैरुपादीयन्ते—तदुपदिष्टानां स्याद्वादादीनामयोगान्नासौ सर्वज्ञ इति, तानि शाक्यैः सुगतसर्वज्ञसाधने कृते जैना अप्युपाददते—नासौ सर्वज्ञस्तदुपदिष्टानां क्षणभ-

१ व्याहन्तुं] Correction : ; व्याहर्तुं (sic !)व्याहन्तुं

ज्ञादीनामयोगादिति। ततश्च यथा बिम्बसन्निधानानन्तरं प्रतिबिम्बोदय एवमेषां साधनदूषणानन्तरं परस्परप्रत्यनीकभूतानि साधनदूषणान्युपतिष्ठन्त इति तत्कथमेभिः साधनदूषणैरनवस्थितैः प्रतिबिम्बोदयेनैव ग्रस्तैर्निर्णयः क्रियते कस्यचित्सर्वज्ञत्वेन॥ ३१५१॥ ३१५२॥ ३१५३॥ § 10197

स्यादेतत्—यस्य न केनचित्परमार्थतो दूषणं शक्यते कर्तुम्, स एव सर्वज्ञत्वेन विज्ञास्यत इत्याह—एवमित्यादि। § 10198

एवं सर्वज्ञकल्पेषु निहतेषु परस्परम्।
अल्पशेषीकृतान्सर्वान्वेदवादी हनिष्यति॥
३१५४॥§ 10200

824/k

आत्मानमुत्कर्षयन्नाह—यथा नकुलेत्यादि। § 10201

यथा नकुलदन्ताग्रस्पृष्टा या काचिदोषधिः।
सर्वं सर्पविषं हन्ति क्रीडद्भिरपि योजिता॥
३१५५॥§ 10203

वेदवादिमुखस्थैवं युक्तिर्लौकिकवैदिकी।
या काचिदपि शाक्यादिसर्पज्ञानविषापहा॥
३१५६॥§ 10205

का पुनरसौ या काचिद्युक्तिरित्याह—यस्येत्यादि। § 10206

यस्य ज्ञेयप्रमेयत्ववस्तुसत्त्वादिलक्षणाः।
निहन्तुं हेतवः शक्ताः को नु तं कल्पयिष्यति॥
३१५७॥§ 10208

एकेनैव प्रमाणेन सर्वज्ञो येन कल्प्यते।
नूनं स चक्षुषा सर्वान् रसादीन्प्रतिपद्यते॥
३१५८॥§ 10210

यस्य हि ज्ञेयत्वादयः सपक्षविपक्षसाधारणत्वेनाप्रतीताः सन्तो बाधका भवन्ति, सोऽत्यन्तासम्भवीति न प्रेक्षावताऽभ्युपेयः। तथाहि—शक्यमिदं वक्तुं सुगतोऽसर्वज्ञो ज्ञेयत्वप्रमेयत्ववस्तुत्वसत्ववक्तृत्वपुरुषत्वादिभ्यो रथ्यापुरुषवदिति। नचाप्येतेऽनैकान्तिका भवन्ति। तथाहि—सर्वपदार्थज्ञानात्सर्वज्ञ इष्यते, तच्च सकलवस्तुपरिज्ञानं कदाचिदिन्द्रियज्ञानेन वा भवेत्, मनोज्ञानेन वा। न तावदिन्द्रियज्ञानेन, तस्य प्रतिनियतार्थविषयत्वादयुक्तमशेषार्थविषयत्वम्, तथाहि—चक्षुरादिज्ञानानि प्रतिनियतविषयग्रहणस्वभावान्येव स्वकारणैरिन्द्रियैर्नियामकैर्जनितानि, ततश्चानतिक्रान्तस्वविषयमर्यादानि लोकेऽतिप्रतीतानीति न युक्तमेतैरशेषार्थग्रहणम्। अन्यथा ह्यनेकेन्द्रियवैयर्थ्यप्रसङ्गः स्यात्। ततश्चैकेनैव ज्ञानेन सर्वधर्मान् भिन्नेन्द्रियग्राह्यानपि रसरूपादीन् जानातीत्येवं येन बौद्धेन कल्प्यते, एकेन सर्वं जानाति सर्वमेकेन पश्यतीति वचनान्नूनं स वादी बौद्धश्चक्षुषा करणभूतेन तद्द्वारप्रवृत्तेन ज्ञानेन सर्वधर्मान् रसादीनवगच्छतीति प्राप्तम्। न चैतच्छक्यते वक्तुम्। माभूदेकेन ज्ञानेन युगपदशेषार्थस्य ग्रहणम्, अनेकेन भविष्यतीति। यतो युगपदनेकविज्ञानासम्भवात्। सम्भवेऽपि न सर्वपदार्थग्रहणमस्ति, परचित्तस्येन्द्रियज्ञानाविषयत्वात्, अगोचरप्राप्तस्य च दूरसूक्ष्मव्यवहितादेरर्थस्य तेन ग्रहीतुमशक्यत्वात्॥ ३१५७॥ ॥ ३१५८॥ § 10211

स्यादेतत्—यदि नाम चक्षुरादिज्ञानानां विजातीयार्थग्रहणमिदानीं न
825/k दृश्यते। तथाऽपि कालान्तरे कदाचिद्विजातीयार्थग्रहणमभूत्कस्यचिदिति सम्भाव्यत इत्याह—यज्जातीयैरित्यादि। § 10212

यज्जातीयैः प्रमाणैस्तु यज्जातीयार्थदर्शनम्।
दृष्टं सम्प्रति लोकस्य तथा कालान्तरेऽप्यभूत्॥
३१५९॥ § 10214

हेतुप्रतिबद्धो हि भावानां स्वभावप्रतिनियमो नाकस्मिकः, अन्यथा सर्वस्य सर्वस्वभावत्वप्रसङ्गः, ततश्च तथाविधहेतुप्रतिबद्धात्मलाभस्य कथमन्यथात्वं कदाचिदपि सम्भाव्यम्, नहि धूमकेतुप्रतिबद्धात्मसंस्थितेरन्यतो धूमस्योद्भवः सम्भाव्यत इति भावः। नापि मनोज्ञानेनेति पक्षः। तथाहि—यद्यपि तत्सर्वार्थविषयम्, तथापि न तस्य स्वातन्त्र्येणार्थग्रहणव्यापारोऽस्ति, अन्धबधिराद्यभावप्रसङ्गात्। पारतन्त्र्ये चेन्द्रियज्ञानपरिगृहीतार्थविषयत्वाद्दूरसूक्ष्मव्यवहितपरचित्तादेरर्थस्येन्द्रियज्ञानं (ना?)विषयीकृतस्य तेन परिच्छेदो न प्राप्नोति॥ ३१५९॥ § 10215

स्यादेतत्—प्रज्ञादीनामभ्यासात्प्रतिपुरुषं तारतम्यभेददर्शनादत्यन्तप्रकर्षोऽपि सम्भाव्यत इत्यत्राह—येऽपीत्यादि। § 10216

येऽपि सातिशया दृष्टाः प्रज्ञामेधाबलैर्नराः।
स्तोकस्तोकान्तरत्वेन नत्वतीन्द्रियदर्शनात्॥
३१६० ॥§ 10218

प्राज्ञोऽपि हि नरः सूक्ष्मानर्थान्द्रष्टुं क्षमोऽपि सन्।
स्वजातीरनतिक्रामन्नतिशेते परान्नरान्॥
३१६१ ॥§ 10220

नहि कस्यचिदभ्यासेऽप्यतीन्द्रियार्थदर्शित्वमुपलब्धम्। तथाहि—नरोऽतिप्राज्ञोऽपि निपुणबुद्धिगम्यतया सूक्ष्मानर्थानुपलब्धुं समर्थोऽपि स्वजातीः—मनुष्यजातिभाविनीः प्रकृतीरदिव्यचक्षुष्ट्वादिलक्षणा अनतिवर्तमान एवान्यान् नरानतिशयानो दृश्यते नतु दिव्यचक्षुष्ट्वादिना युक्तः कश्चिद्दृश्यते इति यावत्। ततश्च—स पश्यति दिव्येन चक्षुषा सुविशुद्धेनातिक्रान्तमानुष्यकेन सत्वान्सुगतिमपि गच्छतो दुर्गतिमपि गच्छत इत्यादि यद्बौद्धैरुपघोष्यते तत्किल नोपपद्यत इति भावः॥ ३१६०॥ ॥ ३१६१॥ § 10221

भवतु नामाभ्यासादिभिरतिशयः सर्वासां बुद्धीनाम्, तथाऽप्येता अविलङ्घितस्वविषयसीमान एव सत्योऽतिशेरत इति विस्तरेण प्रतिपादयन्नाह—श्रोत्रगम्येष्वित्यादि। § 10222

826/k

श्रोत्रगम्येषु शब्देषु दूरसूक्ष्मोपलब्धिभिः।
पुरुषातिशयो दृष्टो न रूपाद्युपलम्भनात्॥
३१६२ ॥§ 10224

चक्षुषाऽपि च दूरस्थसूक्ष्मरूपप्रकाशनम्।
क्रियतेऽतिशयप्राप्त्या नतु शब्दादिदर्शनम्॥
३१६३ ॥§ 10226

दूरसूक्ष्मेषूपलब्धयो—ज्ञानानि, ताभिरितीत्थंभूतलक्षणे तृतीया, क्वचिद्दूरसूक्ष्मोपलब्धित इति पाठः, तदा हेतौ पञ्चमीं विधायाद्यादित्वात्तसिर्विधेयः।

---

८ एवान्यान्] Correction: ; एताभ्यां (sic!)एवान्यान्
९ इति पाठः] Correction: ; इति यावत् (sic!)इति पाठः
९ तदा] Correction: ; ततो (sic!)तदा

नतु शब्दादिदर्शनम्—चक्षुषा क्रियत इति सम्बन्धः॥ ३१६२॥ ३१६३॥
§ 10227

एतावतेन्द्रियधियां स्वविषयमर्यादानतिक्रमो दर्शितः, साम्प्रतं मनोविज्ञानस्याभ्यस्यमानविषयानतिक्रमेणैवातिशयो दृश्यते इति प्रतिपादयति—एवमित्यादि। § 10228

एवं शास्त्रविचारेषु दृश्यतेऽतिशयो महान्।
नतु शास्त्रान्तरज्ञानं तन्मात्रेणैव लभ्यते॥
३१६४॥ § 10230

एतदेव स्पष्टयन्नाह—ज्ञात्वेत्यादि। § 10231

ज्ञात्वा व्याकरणं दूरं बुद्धिः शब्दापशब्दयोः।
प्रकृष्यते न नक्षत्रतिथिग्रहणनिर्णये॥ ३१६५॥ § 10233

ज्योतिर्विच्च प्रकृष्टोऽपि चन्द्रार्कग्रहणादिकम् (वित् ?)
न भवत्यादिशब्दानां साधुत्वं ज्ञातुमर्हति॥
३१६६॥ § 10235

तथा वेदेतिहासादिज्ञानातिशयवानपि।
न स्वर्गदेवताऽपूर्वप्रत्यक्षीकरणक्षमः॥
३१६७॥ § 10237

ज्योतिर्वेत्तीति ज्योतिर्वित्। वेदेतिहासादिषु ज्ञानानि तेषामतिशयः स विद्यते यस्येति विग्रहः। अपूर्वशब्देन धर्माधर्मावुच्येते॥ ३१६५॥ ३१६६॥ ३१६७॥ § 10238

किंच—स्वविषयमर्यादातिक्रमेणाप्यतिशयो भवन्नात्यन्तप्रकर्षनिष्ठां गच्छति, अपि तु कियन्मात्रविशेषावधिरेव दृश्यत इत्येतद्दर्शयन्नाह—दशहस्तान्तरमित्यादि। § 10239

५] Correction : ; (स्मा) (sic !)

दशहस्तान्तरं व्योम्नो यो नामोत्प्लुत्य गच्छति।
न योजनमसौ गन्तुं शक्तोऽभ्यासशतैरपि॥
३१६८॥§ 10241

तथाहि यदि नाम केचिदुपचितश्लेष्मवपुषो हस्तमात्रव्योमोत्प्लवनासमर्थाः पश्चादभ्यासक्रमेण समासादितगात्रलाघवा दशहस्तान्तरगगनविलङ्घिनो जाताः, तथापि न ते योजनमेकमपि खंगपथमुत्पतितुं समर्थाः प्रयत्नशतेनापि भवन्ति॥ ३१६८॥ § 10242
827/k

तस्मादित्यादिनोपसंहरति— § 10243

तस्मादतिशयज्ञानैरतिदूरगतैरपि।
किञ्चिदेवाधिकं ज्ञातुं शक्यते न त्वतीन्द्रियम्॥
३१६९॥§ 10245

अतिशयेन प्रकर्षेण ज्ञानानि अतिशयज्ञानानि। तृतीयेपि(ति?) योगविभागात्समासः। तैरिति करणतृतीया॥ ३१६९॥ § 10246

एतदेव स्पष्टीकुर्वन्नाह—एकेत्यादि। § 10247

एकापवरकस्थस्य प्रत्यक्षं यत्प्रवर्त्तते।
शक्तिस्तत्रैव तस्य स्यान्नैवापवरकान्तरे॥
३१७०॥§ 10249

ये चार्था दूरविच्छिन्ना देशपर्वतसागरैः।
वर्षद्वीपान्तरैर्ये वा कस्तान्पश्येदिहैव सन्॥
३१७१॥§ 10251

वर्षम्—लोकविशेषः। यथा भारतलोको भारतवर्षमित्युच्यते॥ ३१७०॥ ३१७१॥ अन्यैरप्यत्रास्माकं स्वहस्तो दत्त इति दर्शयन्नाह—नलेत्यादि। § 10252

नलर्तुपर्णयोश्वासावश्वाक्षहृदयज्ञयोः।
संवाहे गच्छतोर्वाक्यमृतुपर्णेन भाषितम्॥
३१७२॥§ 10254

सर्वः सर्वं न जानाति सर्वज्ञो नोपपद्यते।
नैकत्र परिनिष्ठाऽस्ति ज्ञानस्य पुरुषे क्वचित्॥
३१७३॥§ 10256

संवाह इति। रथे। तथाहि किल श्रूयते—नलो नाम राजा बभूव। स किलाक्षहृदयानभिज्ञयता सकलमेव राज्यं द्यूतेन हारयाभास। तस्य च राज्ञी दमयन्ती नाम बभूव। सोऽपहृतसकलराज्यस्तया देव्या केवलया सार्द्धमरण्यमुपजगाम। तत्रागतस्यापि तत्र दैववशात्तया राज्ञा सह वियोगोऽभूत्। सोऽतीव समुपजातप्रियाविरहशोकाश्रुदुर्दिनवदनश्चिन्ताजलधिमवगाहमानोऽतिशयसञ्जातशरीरकृशिमा परिभ्रमन्नितस्ततः कथमपि सङ्क्षेपादृतुपर्णस्य राज्ञोऽनुजीविवृत्तिमास्थायाविदितस्थितोऽभूत्। साच तस्य राज्ञी कथं कथमपि पितृगृहमनुप्राप्ता बभूव। तस्याश्च पिता तत्स्वामिनस्तत्रागमनाय सर्वदेशेषु दमयन्त्याः स्वयंवरमुद्घोषयामास। श्रुतमृतुपर्णेन राज्ञा—यथा किल दमयन्तीस्वयंवरेति, स श्रुत्वा नलेन सारथिना तत्र गन्तुमभिप्रतस्थे। ऋतुपर्णश्चाक्षहृदयज्ञो नाश्वहृदयवेदी। नलस्त्वश्वहृदयज्ञो नाक्षहृदयाभिज्ञः। परिज्ञातमृतुपर्णेन यथाऽयमश्वहृदयज्ञ इति। स ज्ञात्वा तेनाभ्यधायि, भोः कथय मेऽश्वहृदयमिति। नलोऽप्यभिहितवान्—कथयामि यदि मम त्व-
828/k मप्यक्षहृदयं कथय सीति। तत इदमृतुपर्णेन कीर्त्तितम्—सर्वः सर्वं न जानातीत्यादि। ततो नलेनराज्ञाऽक्षहृदयमृतुपर्णतो विदित्वा पुनरपि तद्राज्यं जित्वा प्रत्यानीतमिति वार्त्ता॥ ३१७२॥ ३१७३॥ § 10257

किंच—सर्वज्ञेन सताऽवश्यमतीतानागतं वस्तु ज्ञातव्यम्, अन्यथा हि प्रत्युत्पन्नमात्रपरिज्ञाने प्रदेशज्ञः स्यान्न सर्वज्ञः, न चानागतादिपरिज्ञानं सम्भवतीति दर्शयन्नाह—अनागत इत्यादि। § 10258

अनागतेन दृष्टं च प्रत्यक्षस्य मनागपि।
सामर्थ्यं नानुमानादिजन्म लिङ्गादिभिर्विना॥
३१७४॥§ 10260

प्रत्यक्षस्य वस्तुसामर्थ्यबलेनोत्पत्तेरनागतस्य चावस्तुत्वान्न तत्र प्रत्यक्षव्यापारः। नाप्यनुमानस्य, लिङ्गाभावात्। नह्यनागतवस्तुसम्बद्धं क्वचिद्विदितं लिङ्गमस्ति, अनागतस्याभावात्। आदिशब्देन दृष्टान्तपरिग्रहः। अनागतग्रहणमुपलक्षणम्, अतीतस्यापि ग्रहणं द्रष्टव्यम्। यतस्तत्राप्यवस्तुतया न प्रत्यक्षव्यापारोऽस्ति। तस्मात्सिद्धा प्रमेयत्वादेर्हेतुगणस्य व्याप्तिः। अत एव पूर्वोक्तस्याभावप्रमाणविषयीकृतविग्रहत्वादित्येतस्य हेतोर्व्याप्तिरुक्ता भवति॥ ३१७४॥ § 10261

तदेवं हेतूनां व्याप्तिं प्रज्ञाव्यो(साध्यो?)पसंहरन्नाह—तस्मादित्यादि।
§ 10262

तस्मादतीन्द्रियार्थानां साक्षाद्द्रष्टा न विद्यते।
वचनेन तु नित्येन यः पश्यति स पश्यति॥
३१७५॥§ 10264

स्यादेतत्—न नित्येनैव वचनेन सर्वः पश्यति। तथाहि—कनककाश्यपमुनिप्रभृतिप्रणीताद्वाक्याच्छाक्यमुनिः पश्यति, ततोऽप्यन्य, इति। अत्राह—एतदित्यादि। § 10265

एतदक्षममाणो यः पौरुषेयागमान्तरात्।
अतीन्द्रियार्थविज्ञानं बुद्धादेरपि मन्यते॥
३१७६॥§ 10267

तस्य तेनैव तुल्यत्वात्तद्वाक्यस्याप्रमाणता।
पुरुषस्य च वक्तव्या पूर्वोक्तैरेव हेतुभिः॥
३१७७॥§ 10269

एतत्—अनन्तरोक्तम्—वचनेन तु नित्येन यः पश्यति स पश्यतीति, असहमानो य एवं मन्यते बौद्धादिर्न नित्येन वचनेन सर्वं पश्यति, किन्तु पुरुषान्तरकृतेन, तद्यथा कनककाश्यपादिप्रणीतेनागमेन शाक्यमुनिरिति, तस्यैवंवादिनस्त द्वाक्यस्याप्रमाणता वक्तव्या—तस्य पुरुषान्तरस्य वाक्यं त- 829/k
द्वाक्यम्, तेनैव दृष्टाभिमतपुरुषवाक्येन तुल्यत्वात्कारणात्। पुरुषस्य चागमकर्तुरप्रमाणता वक्तव्येति सम्बन्धः। कथं ?, पूर्वोक्तैर्ज्ञेयप्रमेयत्वादिभिर्हेतुभिः॥ ३१७६॥ ३१७७॥ § 10270

ननु चानादिर्बुद्धपरम्परा तत्प्रणीतोऽपि सिद्धान्तोऽनादिरेव। ततश्च वेदाभियुक्तपरम्परावद्वेदवद्यानयोरप्यनादित्वाददोषत्वमेवेत्यत्राह—कर्तृकृत्रिमवाक्यानामित्यादि।
§ 10271

कर्तृकृत्रिमवाक्यानामुच्यते या त्वनादिता।
अप्रमाणद्वयाधारा न सा प्रामाण्यसाधनी॥
३१७८॥§ 10273

एतदेव दर्शयन्नाह—न शौद्धोदनिवाक्यानामित्यादि। § 10274

न शौद्धोदनिवाक्यानां पारतन्त्र्यात्प्रमाणता।
अपश्यतः स्वयं धर्मं तथा शौद्धोदनेरपि॥
३१७९॥§ 10276

यथा शौद्धोदनेस्तद्वाक्यस्य चाप्रामाण्यं तथान्येषां कनककाश्यपादीनां तद्वचसां चेति॥ ३१७९॥ § 10277

ईदृशां पुद्गलानां च कल्प्यमानाऽप्यनादिता।
अप्रामाण्यपदस्थत्वान्न तस्मादतिरिच्यते॥
३१८०॥§ 10279

ततश्चेदृशां पुद्गलानां तद्वाक्यानां चानादिता कल्पिताऽपि सती (न) तस्मादप्रामाण्यादतिरिच्यते दूरीभवति। अप्रामाण्यपद एव स्थितत्वात्॥ ३१८०॥ § 10280

अतोऽनादित्वसामान्यं बुद्धानामभिधीयते।
मीमांसकायमानैस्तैर्यद्वेदाध्यायिनामिव॥
३१८१॥§ 10282

तदज्ञानविशेषत्वान्न तेषां याति तुल्यताम्।
प्रमाणत्वाप्रमाणत्वे स्यातामेवं ह्यनादिनी॥
३१८२॥§ 10284

तत्र यदि नामानादित्वमात्रेण बुद्धादेर्वेदाध्यायिभिः सह साम्यमुपवर्णितम्, तथाऽपि नानादित्वात्प्रामाण्यं सिद्ध्यति। प्रामाण्याप्रामाण्ययोरनादित्वाविरोधात्। केवलं वेदाध्यायिनां बुद्धादीनां च प्रमाणत्वाप्रमाणत्वे यथाक्रममनादिनी स्याताम्। नतु द्वयोरनादित्वात्प्रमाणत्वमेव वाऽप्रमाणत्वमेव वा सिद्ध्यतीति समुदायार्थः॥ ३१८१॥ ३१८२॥ § 10285

830/k

एतदेव दृष्टान्तेन स्पष्टीकुर्वन्नाह—य इत्यादि। § 10286

ये प्रमाणतदाभासगुणदोषा ह्यनादयः।
न तेऽनादित्वमात्रेण सर्वे गच्छन्ति तुल्यताम्॥
३१८३॥§ 10288

सुवर्णं व्यवहाराङ्गमनाद्यन्तं यथास्थितम्।
मायासुवर्णमप्येवमिति किं तेन तत्समम्॥
३१८४॥§ 10290

प्रमाणतदाभासयोर्गुणदोषा इति विग्रहः॥ ३१८३॥ ३१८४॥ § 10291

इदानीमभावप्रमाणविषयीकृतविग्रह(त्व)स्यासिद्धतापरिहारेण सर्वज्ञस्याभाव(वं?)प्रसाधयन्वेदस्य ततो विशेषमाह—सर्वज्ञत्वमित्यादि। § 10292

सर्वज्ञत्वं च बुद्धादेर्या च वेदस्य नित्यता।
तुल्ये जल्पन्ति ये तेभ्यो विशेषः कथ्यतेऽधुना॥
३१८५॥§ 10294

तुल्ये जल्पन्तीति। सम्यक्प्रतिपत्तिहेतुत्वेन द्वयोरपि साम्यान्नित्यवेदद्वारेणचातीन्द्रियार्थप्रतीतिः सर्वज्ञवचनद्वारेण चेति न कश्चिद्विशेष इति य एवं जल्पन्ति तेभ्य एवंवादिभ्यो वेदस्य विशेषः कथ्यते॥ ३१८५॥ § 10295

तथाहि—सर्वदर्शी प्रत्यक्षानुमानशाब्दोपमानार्थापत्तीनां मध्ये नैकेनापि प्रमाणेन सिद्धः। तत्कथमभावप्रमाणग्रासीकृतमूर्त्तेरसतस्तस्य प्रमाणभूतेनागोपालाङ्गनादिप्रतीतेन वेदेन साम्यं भविष्यतीति मन्यमानः सर्वज्ञ इत्यादिना प्रत्यक्षादिप्रमाणपञ्चकप्रसिद्धतामस्य निराकरोति। § 10296

सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः।
दृष्टो न चैकदेशोऽस्ति लिङ्गं वा योऽनुमापयेत्॥
३१८६॥§ 10298

न तावत्प्रत्यक्षेणास्मदादिभिरर्वाग्दर्शनैः सर्वज्ञो दृश्यते, तथाह्यर्वाग्दर्शिनः प्रत्यक्षं त्रिविधम्, इन्द्रियज्ञानं मानसं सर्वचित्तचैत्तानामात्मसंवेदनं चेति तदेतत्त्रिविधमपि न सर्वज्ञमवगमयितुमलम्, अतद्विषयत्वात्, इन्द्रियज्ञानं हि रूपादिविषयपञ्चकनियतमतो न तेन परसन्तानसमवायिनो बुद्धिधर्मा विषयीक्रियन्ते। नापि मानसेन, तस्य इन्द्रियज्ञानपरिगृहीतविषयानन्तरविषयग्राहित्वेनेन्द्रियज्ञानवत्प्रतिनियतरूपादिविषयत्वात्। नापि स्वसंवेदनेन, तस्य स्वसन्तानवर्त्तिवर्त्तमानचित्तचैत्तविषयत्वादतो न तेन परसन्तानवर्त्तिनः स्वस-

न्तानिकाश्चानागताश्चेतोधर्माः शक्यन्ते वेदयितुम्। योगिज्ञानस्यैव च साध्यत्वान्न तेन ग्रहणाग्रहणचिन्ताऽवतरति। नाप्यनुमानेन, तद्धि त्रिविधलिङ्ग-
831/k समाश्रयमिष्यते सौगतैः। तत्र विधिसाधनस्यात्राधि कारान्नानुपलब्धिस्तावदिहाधिक्रियते। नापि कार्यम्, प्रत्यक्षानुपलम्भ(प्रत्यक्षोपलम्भ ?)साधनत्वात्कार्यकारणभावस्य विप्रकर्षिणा सर्वज्ञेन सह कस्यचित्कार्यकारणभावासिद्धेः। स्वभावोऽपि हेतुर्न सर्वदर्शिनः सत्तां साधयति, तदप्रत्यक्षत्वे स्वभावस्य तदव्यतिरेकिणो ग्रहीतुमशक्यत्वात्तस्माद्दृष्टः प्रसिद्धो लिङ्गभूत एकदेशः पक्षधर्मः स न सम्भवति, निरूप्यमाणो यः सर्वज्ञमनुमापयेत्। किंच—सर्वज्ञसत्तासाधने सर्वो हेतुस्त्रयीं दोषजातिं नातिवर्त्तते, असिद्धिं विरुद्धत्वमनैकान्तिकत्वं च। तथाहि हेतुरुच्यमानो भावधर्मो वाऽभिधीयेत, अभावधर्मो वा, यद्वोभयधर्मः, इति पक्षत्रयम्। तत्र सर्वज्ञे धर्मिणि न भावधर्मः प्रतिवादिप्रसिद्धः सम्भवति, तस्यैव धर्मिणः साध्यत्वेन(ना ?)सिद्धत्वात्। सिद्धौ वा अविवादप्रसङ्गात्। योहि भावधर्मं तत्रेच्छति स कथं वादी तं वादं नेच्छेत्। निराश्रयस्य धर्ममात्रस्य ग्रहीतुमशक्यत्वात्। नाप्यभावधर्मो हेतुः सर्वज्ञसिद्धये युक्तः, तस्य भावविपरीतसाधकत्वेन विरुद्धत्वात्, नाप्युभयधर्मस्तस्यानैकान्तिकत्वात्। कथं हि नाम भावाभावधर्मोभावधर्मसिद्धावभावाख्यविपक्षवृत्तिव्यवच्छेदलभ्यं भावाद्य(व्य ?)भिचारित्वलक्षणं हेतुत्वमनुभवेत्। तस्मात्रि(?)प्रकारोऽप्येकदेशो लिङ्गभूतो नास्त्यनुमापक इति नानुमानतः सर्वज्ञस्य सिद्धिः॥ ३१८६॥ § 10299

शब्दादपि न सर्वज्ञावसायोऽस्तीति दर्शयति—नचागमविधिरित्यादि।
§ 10300

नचागमविधिः कश्चिन्नित्यसर्वज्ञबोधकः।
कृत्रिमेण त्व सत्येन स कथं प्रतिपाद्यते॥
३१८७॥ § 10302

शब्दादसन्निकृष्टेऽर्थे यज्ज्ञायते ज्ञानं तच्छाब्दम्, तच्च द्विविधं नित्यशब्दजनितं पौरुषेयध्वनिहेतुकं च। तत्र तथाविधस्य सर्वज्ञप्रतिपादकस्यागमस्य नित्यस्याभावान्न तावदाद्यं सम्भवति। यच्चोपनिषदादौ पठ्यते— यः सत्यवाक् सत्यसङ्कल्पः सत्यकामः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः इत्येवमादि, सोऽप्यर्थवादो द्रष्टव्यः। यच्च पौरुषेयं वचनमुच्यते—स भगवांस्तथागतोऽर्हन् सम्यक् सम्बुद्ध इति, तस्याप्रमाणत्वात्कथं तेनासत्येन स प्रत्याय्येत॥ ३१८७॥ § 10303

४ कृत्रिमेण त्व] Correction : ; कृत्रिमेण च (sic !)कृत्रिमेण त्व
९--१० गतोऽर्हन्] Correction : ; गतोर्हन (sic !)गतोऽर्हन्

स्यादेतन्न यतःकुतश्चिद्वचनात्सर्वज्ञोऽस्माभिः प्रतीयते। किं तर्हि ?। तेनैव भगवतोक्तेन। सर्वज्ञोऽहं सर्वदर्शी, नास्ति तथागतस्य किंचिदज्ञातमित्यादि। अतस्तद्वचनादेव प्रतीयत इत्याह—अथेत्यादि। § 10304
832/k

अथ तद्वचनेनैव सर्वज्ञोऽन्यैः प्रतीयते।
प्रकल्प्येत कथं सिद्धिरन्योन्याश्रययोस्तयोः॥
३१८८॥§ 10306

एवं सतीतरेतराश्रयदोषः प्राप्नोति॥ ३१८८॥ § 10307
कथमित्याह—सर्वज्ञोक्ततयेत्यादि। § 10308

सर्वज्ञोक्ततया वाक्यं सत्यं तेन तदस्तिता।
कथं तदुभयं सिद्ध्येत्सिद्धान्मूलान्तरादृते॥
३१८९॥§ 10310

तथाहि न तावत्तद्वचनस्य प्रामाण्यं निश्चीयते यावत्सर्वज्ञोक्तमेतदित्येवं नावगम्येत। तस्य च सर्वज्ञस्यावगतिस्तत एव वचनादिति व्यक्तमितरेतराश्रयत्वम्। सिद्धान्मूलान्तरादृत इति। निश्चितात्कारणान्तराद्विनेत्यर्थः॥ ३१८९॥
§ 10311

अथापि स्याच्छ्रावका(क ?)च्छारिपुत्रादेर्वचनात्सर्वज्ञोऽवसीयते, यतस्तेनोक्तम्— सर्वज्ञोऽयं शाक्यकुलनन्दन इति, अत्राह—असर्वज्ञप्रणीतात्त्वित्यादि। § 10312

असर्वज्ञप्रणीतात्तु वचनान्मूलवर्जितात्।
सर्वज्ञमवगच्छन्तः स्ववाक्यात्किं न जाय(न ?)ते॥
३१९०॥§ 10314

नह्यनासादितप्रमाणभावस्यान्यवाक्यस्य स्ववचनात्कश्चिद्विशेषोऽस्ति, येन बौद्धाः स्ववचनादेव सर्वज्ञं न प्रतिपद्यन्ते, अन्यवचनात्प्रतियन्तीति न किंचित्कारणमुत्पश्यामोऽन्यत्र जाड्यात्॥ ३१९०॥ § 10315
अथ मतमपरिमितास्तथागता अभूवन्, भविष्यन्तश्च, ततश्चैकस्य तदन्यवचनात्सर्वज्ञताऽवसीयते। अन्यस्याप्यन्यवचनादित्यत्राह—सर्वज्ञा बहव इत्यादि। § 10316

सर्वज्ञा बहवः कल्प्याश्चैकसर्वज्ञसिद्धये।
य एवैकोऽप्यसर्वज्ञः स सर्वज्ञं न बुध्यते॥
३१९१॥§ 10318

एकसर्वज्ञसिद्धये सर्वज्ञपरम्परामनुसरतः सकलपुरुषायुषसंक्षयेऽपि नार्वाग्दर्शनस्य सर्वज्ञनिश्चयोत्पत्तिसम्भव इति सर्वज्ञाः कल्प्याः प्रसज्येरन्॥ ३१९१॥ § 10319

अपि च—आस्तां तावदिदं यदिदानींतनाः सर्वज्ञमसन्निहितं बोद्धुमस(म)र्था इति, अपि तु तत्कालसन्निहिता अपि तं ज्ञातुं न शक्नुवन्त्येवासर्वविदइत्येतद्दर्शयन्नाह—सर्वज्ञोऽयमित्यादि। § 10320

सर्वज्ञोऽयमिति ह्येवं तत्कालेऽपि बोद्धृभिः।
तज्ज्ञानज्ञेयविज्ञानशून्यैर्ज्ञातुं न शक्यते॥
३१९२॥§ 10322

833/k

सर्वज्ञो नावबुद्धश्च येनैव स्यान्न तं प्रति।
तद्वाक्यानां प्रमाणत्वं मूलाज्ञानेऽन्यवाक्यवत्॥
३१९३॥§ 10324

तस्य सर्वज्ञ(स्य)ज्ञानं तज्ज्ञानम्, तदेव ज्ञेयं परिच्छेद्यं यस्य विज्ञानस्य तत्तथा, तच्च तद्विज्ञानं चेति तथोक्तम्, तेन शून्याः—रहिताः। अथवा तज्ज्ञानस्य यद्विज्ञेयं तस्य य द्विज्ञानं तेन शून्याः, असर्वज्ञा इत्यर्थः। नहि शरीरमात्रदर्शनात्सर्वज्ञ इत्येवमवसातुं पार्यते। विशिष्टज्ञानसम्बन्धग्रहणनान्तरीयकत्वादस्यावसायस्य। तच्च विशिष्टं ज्ञानं सकलपदार्थविषयं साधकम्। सकलपदार्थविषयता तस्य तद्ग्राह्यविषयग्रहणमन्तरेणावसातुं न शक्यते। नहि दण्डिप्रत्ययो दण्डग्रहणमन्तरेण भवति। प्रयोगः—यस्य यद्ग्रहणोपाधिरवग्रहस्तस्य तदुपाधिग्रहणाभावे ग्रहणं न भवति, तद्यथा दण्डग्रहणोपाधिदण्ड(ण्डि?) ग्रहणं न दण्डि(ण्ड?)रूपा(रूपोपाध्य ?)ग्रहे भवति, नास्ति च सर्वज्ञज्ञानग्रहणस्य ज्ञेयग्रहणोपाधेर्ज्ञेयरूपोपाधिग्रहणमर्वाग्दर्शिनामिति व्यापकानुपलब्धिः। उपाधिग्रहणेनोपाधिमद्ग्रहणस्य व्याप्तत्वात्। तस्य चेहाभावः। ततश्च तदानींसन्निहितेनाप्यसर्वविदा येनैव सर्वज्ञो नावधार्यते, तं प्रति सर्व-

---

१० ज्ञेयं तस्य य द्विज्ञानं तेन] Correction: ; ज्ञेयं तेन (sic !)ज्ञेयं तस्य य द्विज्ञानं तेन
११--१२ ग्रहणनान्त] Correction: ; ग्रहणानन्त (sic !)ग्रहणनान्त
१७ पाधेर्ज्ञेय] Correction: ; पाधिर्ज्ञेय (sic !)पाधेर्ज्ञेय

ज्ञवाक्यानामपि सतामनिश्चितत्वादप्रामाण्यमेव, मूलस्य प्रामाण्यनिश्चयकारणस्य सर्वज्ञज्ञाननिश्चयस्याभावात्। अन्यवाक्यवदिति। रथ्यापुरुषवाक्यस्येव॥ ३१९२॥ ३१९३॥ § 10325

अथ मतम्—अशेषशिष्यजनधर्मस्यानेकविधचित्तचरितादेःपरिज्ञानादादेशनादिप्रातिहार्येण विनेयजनमनांस्यावर्जयन्नसावात्मनः सर्वज्ञतामयत्नेन तेभ्यः प्रतिपादयतीत्यत्राह—सर्वशिष्यैरपीत्यादि। § 10326

सर्वशिष्यैरपि ज्ञातानर्थान्संवादयन्नपि।
न सर्वज्ञो भवेदन्यलोकज्ञातार्थवर्जनात्॥
३१९४॥§ 10328

नच सर्वनरज्ञातज्ञेयसंवादसम्भवः।
कालत्रयत्रिलोकस्थैर्नरैर्न च समागमः॥
३१९५॥§ 10330

यन्नाम तत्कालसन्निहितकियन्मात्रजनपरिज्ञातानर्थान्परिज्ञातवांस्तथाऽपि न सर्वज्ञो भवति, तत्कालासन्निहितान्यलोकपरिज्ञातस्यार्थस्यापरिज्ञानात्। नह्येकदेशपरिज्ञानेन सकलज्ञो भवत्यतिप्रसङ्गात्। नापि तत्कालसन्निहिताशेषजनपरिज्ञातार्थसंवादःसम्भवति। दूरस्थानामनर्थिनां च संवादाभावात्। स्यादेतत—यदा सर्व एव जनास्तथागतं युगपदुपेत्य यद्यत्प्रश्नयन्ति तदा स भगवांस्तदैव व्याकरोतीत्यतोऽस्त्येव सर्वनरज्ञातज्ञेयसंवाद इत्यत्राह— 834/k
कालत्रयत्रिलोकस्थैरिति। नह्यतीतानागतवर्त्तमानकालवर्त्तिनां नृणां समागमः क्वचिदपि सम्भवी, नापि स्वर्गपातालमर्त्यात्मकलोकत्रयस्थानाम्। यद्वा—लोकत्रयं कामरूपारूपधातुत्रयात्मकं बोद्धव्यम्॥ ३१९४॥ ॥ ३१९५॥ § 10331

स्यादेतत्—यदि समस्तलोकपरिज्ञातार्थपरिज्ञानसामर्थ्यं तस्य न स्यात्तदा कियन्मात्रपरिज्ञातार्थसंवादोऽपि कथं स्यात्, भवति च, तेन मन्यामहे—अस्त्येवास्यसकलपदार्थपरिज्ञानसामर्थ्यमिति, अत्राह—किंचिज्ज्ञोपीत्यादि। § 10332

किंचिज्ज्ञोपि हि शक्नोति स्तोकान्भ्रमयितुं नरान्।

१ चरितादेः] Correction : ; चरितादि (sic !)चरितादेः
१--२ दादेशना] Correction : ; ददेशना (sic !)दादेशना

सर्वज्ञं येन गृह्णीयुस्ते भक्तिभ्रान्तचेतसः॥
३१९६॥§ 10334

भुक्तचिन्तितमुष्टिस्थद्रव्यसंवादनक्षमाः।
केचित्कुहकविज्ञानैर्द्धर्मादिज्ञानवर्जिताः॥
३१९७॥§ 10336

तथा मायेन्द्रजालादिकुशलाः केचिदज्ञकम्।
भ्रामयन्ति जनं येन सर्वज्ञाः प्रतिभान्ति ते॥
३१९८॥§ 10338

नहि किंचिन्मात्रातीन्द्रियपदार्थपरिज्ञानमात्रेण धर्माधर्मादिपरिज्ञानं तस्य सिद्ध्यति, कुहकज्ञानिभिर्मायेन्द्रजालादिकुशलैश्चानेकान्तात्। तथाहि—मन्त्रौषधादिप्रयोगेण यथा भुक्तम्—अन्नव्यञ्जनादि, यथा चिन्तितं च मनसा वस्तु, मुष्टिस्थं च द्रव्यं संवादयन्त्येव। न चैतावता ते धर्मादिविदो भवन्ति। यथा केचिदिन्द्रजालकुशला विचित्रोद्यानविमानाप्सरोगणदेवपुत्रादिकमाकाशे दर्शयन्तीत्यनेकान्तः ॥ ३१९६॥ ३१९७॥ ३१९८॥ § 10339

ननु चेतिहासपुराणेषु ब्रह्मादिः सर्वज्ञः कीर्त्तितः, तथाहि ब्रह्मणो ज्ञानमप्रतिघं वैराग्यं चेति तत्र पठ्यते, तत्कथमागमात्सर्वज्ञो न सिद्ध इत्यत्राह—इतिहासेत्यादि। § 10340

इतिहासपुराणेषु ब्रह्मादिर्योऽपि सर्ववित्।
ज्ञानमप्रतिघं यस्य वैराग्यं चेति कीर्तितम्॥
३१९९॥§ 10342

गौणत्वेनैव वक्तव्यः सोऽपि मन्त्रार्थवादवत्।
यद्वा प्रकृतधर्मादिज्ञाना(प्रति)घतोच्यते॥
३२००॥§ 10344

धर्मार्थकाममोक्षेषु प्रकृतेषु चतुर्ष्वपि।

ज्ञानमप्रतिघं तस्य न तत्सर्वार्थगोचरम्॥
३२०१॥§ 10346

835/k

यथा मन्त्रेष्वर्थवादनिर्देशो भवति तथेतिहासादिष्वपि ब्रह्मादेः सर्वज्ञत्वमर्थवादाद्बोद्धव्यम्। अन्यार्थो हि शब्दोऽन्यमर्थं वदतीति कृत्वाऽर्थवाद उच्यते। अथवा प्रकृतेषु धर्मार्थकाममोक्षेषु ज्ञानस्याप्रतिघत्वादस्य ब्रह्मादेर्ज्ञानार्थाऽप्रतिघता निर्दिष्टा। नतु सर्वार्थेष्वप्रतिघातात्॥ ३१९९॥ ३२००॥ ३२०१॥
§ 10347

ननु च यदि तस्य धर्मादेरन्यत्र वस्तुविज्ञानं प्रतिहन्येत तत्कथमप्रतिघमित्युच्येतेत्यत्राह—न हीत्यादि। § 10348

न ह्यप्रतिघतामात्रात्सर्वगोचरतोच्यते।
स्वार्थेष्वप्यप्रतीघाताद्भवत्यप्रतिघं हि तत्॥
३२०२॥§ 10350

यद्येवं यदि स्वार्थाप्रतिघातादप्रतिघमुच्यते तदा सर्वेषामेव पुंसां ज्ञानं स्वार्थाप्रतिघातीति तत्को विशेषो ब्रह्मादेर्येन तस्यैवाप्रतिघं ज्ञानमुच्यते नान्येषामित्यत्राह—एतच्चेत्यादि। § 10351

एतच्च फलदज्ञानं यावद्धर्मा(दि)गोचरम्।
नतु वृक्षादिभिर्ज्ञातैः सर्वैः किंचित्प्रयोजनम्॥
३२०३॥§ 10353

यावदौपयिकज्ञानं नचैतत्प्रतिहन्यते।
तेनाप्रतिघविज्ञानव्यपदेशोऽस्य लभ्यते॥
३२०४॥§ 10355

एतदाचष्टे—पुरुषार्थोपयोगिषु धर्मादिषु तस्यैव ब्रह्मणो ज्ञानमप्रतिघं प्रवर्त्तते नान्येषामित्येतद्विशेषख्यापनाय ब्रह्मादेरेव स्वार्थाप्रतिघत्वादप्रतिघाति ज्ञानमुक्तं नान्येषाम्। औपयिकज्ञानमिति। औपयिके—पुरुषार्थोपयोगिनि धर्मादौ ज्ञानमौपयिकज्ञानम्। यावदिति। नि(र)विशेषम्। औपयिकज्ञानविशेषणं चैतत्॥ ३२०३॥ ॥ ३२०४॥ § 10356

यद्वेति पक्षान्तरमाह। § 10357

यद्वाऽऽत्मन्येव तज्ज्ञानं ध्यानाभ्यासप्रवर्तितम्।
तस्यैवाप्रतिघातेन ज्ञानाप्रतिघतोच्यते॥
३२०५॥§ 10359

आत्मनीति। पुरुषे। तस्यैवेति। आत्मविषयस्य ज्ञानस्य॥ ३२०५॥
§ 10360

ननु चेश्वरस्य ज्ञानादयो दशाव्यया गुणाः पठ्यन्ते, तत्कथमसावव्यय-ज्ञानयोगात्सर्वज्ञो न भवतीत्याह—ज्ञानमित्यादि। § 10361

ज्ञानं वैराग्यमैश्वर्यमिति योऽपि दशाव्ययः।
शंकरः श्रूयते सोऽपि ज्ञानवानात्मवित्तया॥
३२०६॥§ 10363

836/k

ज्ञानम्—तत्त्वावबोधः, वैराग्यम्—विषयवैमुख्यम्, ऐश्वर्यमष्टविधम्—अणिमा लघिमा महिमा प्राप्तिः प्राकाम्यमीशित्वं वशित्वं यत्रकामावसायिता चेति, एते दश ज्ञानादयोऽव्यया अनुयायिनो यस्यासौ दशाव्ययः। त-त्राणिमा—यदणुशरीरो भूत्वा सुखं लोकं सञ्चरति सर्वभूतैरदृश्यः। लघिमा—यो लघुत्वाद्वायुवद्विचरति।महिमा—यत्पूजितः सर्वलोकेषु वन्दितोऽर्चितश्च म-हद्भ्योऽपि महत्तमो भवति। प्राप्तिः—यद्यन्मनसा चिन्तयति तत्तत्प्राप्नोति। प्राकाम्यम्—यत्प्रचुरकामो भवति विषयान्भोक्तुं शक्नोतीत्यर्थः। ईशित्वम्—यत्त्रैलोक्यस्य प्रभुर्भवति। वशित्वम्— यद्भूतानि स्थावरजङ्गमानि वशं नयति, तस्येन्द्रश्च भवति। यत्रकामावसायिता—यत् ब्राह्मप्राजापत्यदैवगान्धर्वयाक्ष्य राक्षस्यपैत्रपैशाचेषु मानुष्येषु तैर्यग्योन्येषु च स्थानान्तरेषु यत्र यत्र कामयते तत्र तत्रावसति। आत्मवित्तयेति। आत्मवेदितया स ज्ञानवान्न तु निरवशेष-पदार्थपरिज्ञानवत्तयेत्यर्थः॥ ३२०६॥ § 10364

कस्मात्पुनरेकदेशपरिज्ञानेऽपि स एव शङ्करो ज्ञानवानुच्यते नान्य इत्याह—एतदेव हीत्यादि। § 10365

एतदेव हि तज्ज्ञानं यद्विशुद्धात्मदर्शनम्।
अशुद्धे तन्निमित्ते च यत्तदज्ञानमुच्यते॥
३२०७॥§ 10367

विशुद्धश्चासावात्मा चेति तथोक्तः, तस्य दर्शनमिति समासः। तन्निमित्त इति। तस्य शुद्धात्मदर्शनस्य निमित्तं तन्निमित्तम्, किं तत् ?, आत्मैव।

तस्मिन् शुद्धे तन्निमित्ते आत्मनि सति यदात्मदर्शनमविशुद्धं प्रवर्त्तते तदज्ञानमुच्यते, कुत्सितत्वात् ॥ ३२०७ ॥ § 10368

ननु यदि ध्यानाभ्यासाद्ब्रह्मादेर्विशुद्धज्ञानसम्भवोऽभ्युपगम्यते तदा कः प्रद्वेषो बुद्धादिषु, येन तेषामपि ज्ञानमप्रतिघं विशुद्धं च नेष्यते, इत्याशङ्क्य पक्षान्तरोपदर्शनेन ब्रह्मादीनां विशेषं दर्शयन्नाह—अथापीत्यादि। § 10369

अथापि वेददेहत्वाद्ब्रह्मविष्णुमहेश्वराः।
सर्वज्ञानमयाद्वेदात्सर्वज्ञा मानुषस्य किम्॥
३२०८ ॥§ 10371

क्व च बुद्धादयो मर्त्याः क्व च देवोत्तमत्रयम्।
येन तत्स्पर्द्धया तेऽपि सर्वज्ञा इति मोहदृक्॥
३२०९ ॥§ 10373

सात्मीभूतवेदत्वाद्वेददेहा उच्यन्ते। सर्वपदार्थज्ञानकारणत्वात्सर्वज्ञानमयो वेदः। एतदुक्तं भवति। नहि ब्रह्मादीनां स्वातन्त्र्येण धर्मादिषु ज्ञानमप्रतिघं 837/k प्रवर्त्तते। किं तर्हि ?। वेदद्वारेण। न चैवं बुद्धादीनां भवद्भिरिष्यते। तेषां स्वयं तु (स्वायत्त ?) ज्ञानत्वात्। किञ्च—ब्रह्मादीनां ध्यानाभ्यासाद्विशुद्धज्ञानसम्भवो युज्यत एव, तेषां देवत्वेन सर्वजनोत्कृष्टत्वात्। वेदे पठितत्वाच्च। मनुष्यस्य तु न कदाचिदीदृशं सामर्थ्यं सम्भाव्यं तस्य तद्विपरीतत्वात्। तस्मान्मनुष्या अपि सर्वज्ञा इति मोहदृक्। मोहदर्शनमेतद्भवताम्॥ ३२०८॥ ३२०९॥ § 10374

स्यादेतद्यदि ब्रह्मादयो वेदे पठ्यन्ते तदा कथमनित्याभिधेयसम्बन्धाद्वेदस्याप्यनित्यत्वं न प्रसज्येत। अथ वेदानां नित्यत्वमिष्यते तदा ब्रह्मादीनां नित्यवेदाभिधेयत्वं विरुध्यते तेषामनित्यत्वात्। अथ तदविरुद्धं तदा बुद्धादीनामपि तदभिधेयत्वाविरोध इत्येतदाशङ्क्याह—नित्येऽपीत्यादि। § 10375

नित्येऽपि चागमे वेदे ब्रह्मादित्रयकीर्त्तनम्।
तन्नित्यत्वाच्च वेदानां नित्यत्वं न विहन्यते॥
३२१० ॥§ 10377

तन्नित्यत्वादिति। तेषां ब्रह्मादीनां नित्यत्वात्॥ ३२१०॥ § 10378

ते हीत्यादिना—एतदेव स्पष्टीकरोति। § 10379

ते हि नित्यैर्गुणैर्नित्यं कर्मभिश्च समन्विताः।
नित्यवेदाभिधायित्वसम्भवान्न विरोधिनः॥
३२११॥§ 10381

अनित्यस्य तु बुद्धादेर्न नित्यागमगम्यता।
नित्यत्वे चागमस्येष्टे वृथा सर्वज्ञकल्पना॥
३२१२॥§ 10383

न नित्यागमगम्यतेति। शब्दार्थसम्बन्धस्यानित्यत्वप्रसङ्गात्। नित्यस्य चागमस्य परैरनभ्युपगमात्। अभ्युपगमे वा सर्वज्ञकल्पनाया वैयर्थ्यप्रसङ्गात्॥ ३२११॥ ॥ ३२१२॥ § 10384

एतदेव दर्शयति—सर्वज्ञज्ञापनात्तस्येति। § 10385

सर्वज्ञज्ञापनात्तस्य वरं धर्मावबोधनम्।
वेदबोधितसर्वज्ञज्ञानाद्धर्मात्तिरोहितात्॥
३२१३॥§ 10387

अतिरोहितधर्मादिज्ञानमेव विशेष्यते।
एवमागमगम्यत्वं न सर्वज्ञस्य लभ्यते॥
३२१४॥§ 10389

नित्यस्यागमस्य सर्वज्ञज्ञापनात्सकाशाद्वरं धर्मावबोधनमेवेष्टम्। कथं त-
838/k द्वरमित्याह —वेदबोधितेत्यादि। वेदाश्रयेण हि धर्मज्ञानं भवदतिरोहितं भवति आ(अन्यथा ?)लोकस्थितेरविशेषेण सर्वेषामेव सम्भवात्। तिरोहितस्तु वेदबोधितसर्वज्ञज्ञातो धर्मस्तस्य निर्वाणं(ग)तस्याप्रकटत्वात्। अनिर्वाणावस्थायामप्यनिच्छया तदुपदेशाभावात्। उपदेशेऽपि सर्वत्र सर्वदा सर्वेषां श्रवणाभावात्॥ ३२१३॥ ३२१४॥ § 10390

नाप्युपमानप्रमाणसमधिगम्यः सर्वज्ञ इति दर्शयति—सर्वज्ञसदृश इत्यादि। § 10391

सर्वज्ञसदृशः कश्चिद्यदि दृश्येत सम्प्रति।

तदा गम्येत सर्वज्ञसद्भाव उपमाबलात्॥
३२१५॥§ 10393

उपमानं हि सादृश्यतदुपाधिविषयत्वात्सदृशपदार्थग्रहणनान्तरीयकमसन्निकृष्टार्थगोचरम्, यथा—गवयग्रहणद्वारेण गोः स्मरणम्, नच सर्वज्ञसदृशः कश्चित्प्रतीतः सम्भवतीत्यतः सदृशपदार्थग्रहणाभावान्न प्रवर्त्तते। प्रयोगः—यस्य सदृशग्रहणं नास्ति, न स उपमानगम्यः, यथा वन्ध्यासुतः, नास्ति च सदृशग्रहणं सर्वज्ञस्येतिव्यापकानुपलब्धिः॥ ३२१५॥ § 10394

किंच—उपमानान्न केवलं सर्वज्ञाधिगमोऽसम्भवी, अपि तु सर्वेषामेव पुंसामुपमानादसर्वज्ञत्वमेव युक्तं प्रत्येतुमित्यादर्शयति—नरानित्यादि। § 10395

नरान्दृष्ट्वा त्वसर्वज्ञान्सर्वानेवाधुनातनान्।
सादृश्यस्योपमानेन शेषासर्वज्ञनिश्चयः॥
३२१६॥§ 10397

नचाप्यर्थापत्त्या सर्वज्ञः सिध्यतीत्येतत्प्रतिपिपादयिषुः परमतं तावदाशङ्कते—उपदेशो हीत्यादि। § 10398

उपदेशो हि बुद्धादेर्धर्माधर्मादिगोचरः।
अन्यथा नोपपद्येत सर्वज्ञो यदि नो भवेत्॥
३२१७॥§ 10400

प्रत्यक्षादौ निषिद्धेऽपि सर्वज्ञप्रतिपादके।
अर्थापत्त्यैव सर्वज्ञमित्थं यः प्रतिपद्यते॥
३२१८॥§ 10402

योऽयं बुद्धादेर्धर्माद्युपदेशः सोऽन्यथा नोपपद्यते, यदि धर्मादयस्तेन साक्षान्न विदिता भवेयुः, तस्माद्यद्यपि प्रत्यक्षादि सर्वज्ञप्रतिपादकं निषिद्धम्, तथाऽप्यर्थापत्त्या सर्वदर्शी पुमान्सिद्ध इत्येवं यः प्रतिपद्यते—सोऽयुक्तं प्रतिपद्यते, वक्ष्यमाणान्न्यायादिति भावः॥ ३२१७॥ ३२१८॥ § 10403

यद्वा—अनुमानमेवेदं नार्थापत्तिस्त्रैरूप्यसम्भवादिति दर्शयति यद्वेत्यादि। § 10404

839/k

२ ग्रहणनान्त] Correction : ;
ग्रहणानन्त (sic !)ग्रहणनान्त

यद्वा सामान्यतो दृष्टं प्रवृत्तमिह साधनम्।
सर्वज्ञस्योच्यतेऽन्यत्र ज्ञानपूर्वत्वदर्शनात्॥
३२१९॥§ 10406

यः कश्चिदुपदेशो हि स सर्वो ज्ञानपूर्वकः।
यथाऽभयादिशक्तीनामुपदेशस्तथाविधः॥
३२२०॥§ 10408

धर्माधर्मोपदेशोऽयमुपदेशश्च तत्कृतः।
तदीयज्ञानपूर्वत्वं तस्मादस्यानुमीयते॥
३२२१॥§ 10410

सामान्यतो दृष्टमित्यनेन विशेषतो दृष्टस्यासम्भवमाह। ययोरेव हि लिङ्गलिङ्गिनोः प्रत्यक्षेण सम्बन्धो दृष्टः स एव लिङ्गी तेनैव लिङ्गेन कालान्तरे संशयव्यवच्छेदाय यदाऽनुमीयते तदा विशेषतो दृष्टमनुमानमुच्यते। नच सर्वज्ञेन सह धर्माद्युपदेशस्य क्वचित्सम्बन्धो गृहीत इत्यतः सामान्यतो दृष्टमेवैतत्। तथाहि—सामान्येनोपदेशस्यान्यत्र स्वसन्ताने ज्ञानपूर्वकत्वं दृष्टम्, अतो यथा देवदत्तस्य गतिपूर्विकांदेशान्तरप्राप्तिमुपलभ्याऽऽदित्यस्य देशान्तरप्राप्त्या गतिरनुमीयते, एवं बुद्धादेरपि भगवतो धर्माद्युपदेशात्तज्ज्ञानमनुमास्यते। प्रयोगः—यः कश्चिदुपदेशः स वक्तृज्ञानपूर्वकः, यथा हरीतक्यादिशक्त्युपदेशः, उपदेशश्चायं बुद्धादीनां धर्माद्युपदेश इति स्वभावहेतुः॥ ३२१९॥ ३२२०॥ ३२२१॥ § 10411

अत्रोत्तरमाह—अन्यथाऽपीत्यादि। § 10412

अन्यथाऽप्युपपन्नत्वान्नार्थापत्तिरियं क्षमा।
अतएवानुमाऽप्येषा न साध्वी व्यवतिष्ठते॥
३२२२॥§ 10414

उपदेशो हि बुद्धादेरन्यथाऽप्युपपद्यते।
स्वप्नादिदृष्ट(ष्टं?)व्यामोहा(त्)वेदाद्वादि(द्यावि?)त-
थ(थं?)श्रुतात्§ 10416

अन्यथाऽपि हि व्यामोहादिनोपदेशस्य सम्भवादुभयोरप्यनुमानार्थापत्त्योरनैकान्तिकत्वम्। कथमन्यथापि सम्भवतीत्याह स्वप्नादीत्यादि। यथोक्तं शाबरे भाष्ये —उपदेशो हि व्यामोहादपि भवति, असति व्यामोहे वेदादपि भवतीति। तत्रव्यामोहाद्भवन्दृष्टो यथा स्वप्नोपलब्धस्यार्थस्य, वेदादृष्टो यथा मन्वादीनाम्॥ ३२२२॥ ॥ ३२२३॥ § 10417

ये तु सुगतादयो वेदानभिज्ञास्तेषां व्यामोहात्परवञ्चनार्थं वोपदेशः सम्भाव्यत इत्येतत्प्रतिपादयति—ये हीत्यादि। § 10418

840/k

ये हि तावदवेदज्ञास्तेषां वेदादसम्भवः।
उपदेशकृतो, यस्तैर्व्यामोहादेव केवलात्॥
३२२४॥§ 10420

शिष्यव्यामोहनार्थं वा व्यामोहाद्वाऽतदाश्रयात्।
लोके दुष्टोपदेष्ट्(?)णामुपदेशः प्रवर्त्तते॥
३२२५॥§ 10422

अतदाश्रयादिति। अवेदाश्रयात्॥ ३२२४॥ ३२२५॥ § 10423

कथमिदमवगतम्—न वेदाश्रयोऽसावुपदेश इत्याह—यद्यसावित्यादि। § 10424

यद्यसौ वेदमूलः स्याद्वेदवादिभ्य एव तु।
उपदेशं प्रयच्छेयुर्यथा मन्वादयस्तथा॥
३२२६॥§ 10426

यतस्तु मूर्खशूद्रेभ्यः कृतं तैरुपदेशनम्।
ज्ञायते तेन दुष्टं तत्सांवृतं कूटकर्मवत्॥
३२२७॥§ 10428

यदि हि बुद्धादीनां धर्माद्युपदेशो वेदमूलः स्यात्तदा ब्राह्मणेभ्य एव विद्वद्भ्यो मन्वादिवदुपदिशेयुः, नच तैर्ब्राह्मणेभ्य एवोपदिष्टम्, किन्तु वठरशूद्रेभ्य एव, अतोऽवगम्यते, सांवृतम्—अलीकम्, तत्—उपदेशनम्, यथा कूटदीनारादिकर्मेति ॥ ३२२६॥ ३२२७॥ § 10429

ये तु मन्वादयस्तेषां वेदज्ञत्वाद्वेदमूल एव धर्माद्युपदेशो नतु स्वातन्त्र्येणेति दर्शयति—ये त्वित्यादि। § 10430

ये तु मन्वादयः सिद्धाः प्राधान्येन त्रयीविदाम्।
त्रयीविदाश्रितग्रन्थास्ते वेदप्रभवोक्तयः॥
३२२८॥§ 10432

ऋग्यजुःसामाख्यास्त्रयो वेदास्त्रयी भण्यते, तां विदन्तीति त्रयीविदो ब्राह्मणा उच्यन्ते। त्रयीविद्भिराश्रितो धर्मशास्त्रादिग्रन्थो येषां ते तथोक्ताः। तद्ग्रन्थाश्रयणा(णे?)कारणमाह—ते वेदप्रभवोक्तय इति। वेदप्रभवा उक्तयो येषां ते तथोक्ताः ॥ ३२२८॥ § 10433

एतदपि कथमवसितमित्याह—नादृष्ट्वेत्यादि। § 10434

नादृष्ट्वा वेदवाक्यानि शिष्येभ्यश्चाप्रदर्श्य वा।
ग्रन्थप्रणयनं तेषामर्पणं चोपपद्यते॥ ३२२९॥§ 10436

अर्पणमिति बोधनम्। एवं पञ्चभिरपि प्रमाणैर्न सर्वज्ञः सिद्ध्यतीति पारिशेष्यादभावेनैव गम्यत इति सिद्धोऽभावप्रमाणविषयीकृतविग्रहत्वादित्ययं
841/k हेतुः। नाप्यनै कान्तिक इति पूर्वं प्रतिपादितम्, निमित्तान्तराभावाच्चाभावव्यवहारस्येति भावः ॥ ३२२९॥ § 10437

येऽपि मन्यन्ते—नास्माभिः शृङ्गग्राहिकया सर्वज्ञः प्रसाध्यते, किं तर्हि ?, सामान्येन सम्भवमात्रं प्रसाध्यते—अस्ति कोऽपि सर्वज्ञः, क्वचिद्वा सर्वज्ञत्वमस्ति, प्रज्ञादीनां प्रकर्षदर्शनादिति, तान्प्रतीदमाह—नर इत्यादि। § 10438

नरः कोऽप्यस्ति सर्वज्ञस्तत्सर्वज्ञत्वमित्यपि।
साधनं यत्प्रयुज्येत प्रतिज्ञान्यूनमेव तत्॥
३२३०॥§ 10440

सिसाधयिषितो योऽर्थः सोऽनया नाभिधीयते।
यत्तूच्यते न तत्सिद्धौ किञ्चिदस्ति प्रयोजनम्॥
३२३१॥§ 10442

हेतोस्तावत्पूर्वमनैकान्तिकत्वं प्रतिपादितमित्यतः पक्षदोषमेव तावत्प्रतिपादयति। अन्यस्मिन्साधयितुमिष्टे यदन्यत्प्रतिज्ञायते तत्प्रतिज्ञान्यूनं पक्ष-

दोषः। इह च स्वस्य शास्तुः सर्वज्ञत्वं साधयितुमिष्टं न सामान्येन। तथाहि—न व्यसनितया सर्वज्ञोऽन्विष्यते प्रेक्षावता, किं तर्हि ?, तद्वचनाद्धर्माधर्मौ ज्ञात्वा प्रवर्त्तिष्ये निवर्त्तिष्ये वेति प्रवृत्तिनिवृत्तिकामतया, नच सामान्येन सिद्धेनापि तेन प्रवृत्तिं प्रति पुरुषस्य कश्चिदुपयोगोऽस्ति, विशेषपरिज्ञानमन्तरेण तद्वचनानिश्चयात्, तस्मात्स एव विशेषः प्रवृत्तिकामेन साधनीय इति सामान्यप्रतिज्ञानं प्रतिज्ञान्यूनमेव। सिसाधयिषितो योऽर्थ इति। साधयितुमिष्टो योऽर्थः। स इति। विशेषः, स्वशास्ता। अनयेति। प्रतिज्ञया। यत्तूच्यत इति। विशेषासंस्पर्शेन कोऽप्यस्ति नरः सर्वज्ञः क्वचिद्वास्ति सर्वज्ञत्वमिति, तेन सिद्धेनापि न किञ्चित्प्रयोजनम्॥ ३२३०॥ ३२३१॥ § 10443

कथमित्याह—यदीयेत्यादि। § 10444

यदीयागमसत्यत्वसिद्धौ सर्वज्ञतोच्यते।
न सा सर्वज्ञसामान्यसिद्धिमात्रेण लभ्यते॥
३२३२॥§ 10446

स(स?)ति। य(त?)दीयागमसत्यत्वसिद्धिः॥ ३२३२॥ § 10447

कस्मान्न लभ्यत इत्यत्राह—यावदित्यादि। § 10448

यावद्बुद्धो न सर्वज्ञस्तावत्तद्वचनं मृषा।
यत्र क्वचन सर्वज्ञे सिद्धे तत्सत्यता कुतः॥
३२३३॥§ 10450

तथाहि यावद्बुद्धस्य सर्वज्ञत्वं न सिद्ध्यति तावत्तद्वचनस्यापि न सत्यत्वनिश्च योऽस्ति, न च सामान्येन सर्वज्ञसिद्धौ बुद्धवचनस्य सत्यत्वं सिद्ध्येत्, 842/k
प्रतिबन्धाभावात्॥ ३२३३॥ § 10451

एतदेव दर्शयति—अन्यस्मिन्नित्यादि। § 10452

अन्यस्मिन्नहि सर्वज्ञे वचसोऽन्यस्य सत्यता।
सामानाधिकरण्ये हि तयोरङ्गाङ्गिता भवेत्॥
३२३४॥§ 10454

कदा नाम तयोः प्रतिबन्धो न भवती(प्रतिबन्धो भवती?)त्याह—सामानाधिकरण्ये हीत्यादि। सामानाधिकरण्यम्—एकपुरुषाश्रितत्वम्। तयोरिति। सर्वज्ञत्व(सत्य)वचनयोः। अङ्गाङ्गिता। हेतुफलता। एतदुक्तं भवति—एकाश्रयत्वे सति सत्यस्य वचसः सर्वज्ञत्वं कारणं भवेत्, नान्यथाऽतिप्रसङ्गात्॥ ३२३४॥ § 10455

यदप्यम(प?)रैः सर्वज्ञसिद्धये साधनमुपरचितं तदप्येतेनैव प्रतिव्यूढमिति दर्शयितुमाह—यत्सर्वमित्यादि। § 10456

यत्सर्वं नाम लोकेऽस्मिन्प्रत्यक्षं तद्धि कस्यचित्।
प्रमेयज्ञेयवस्तुत्वैर्दधिरूपरसादिवत्॥ ३२३५॥§ 10458

ज्ञानमात्रेऽपि निर्दिष्टे पक्षन्यूनत्वमापतेत्।
सर्वज्ञ इति योऽभीष्टो नेत्थं स प्रतिपादितः॥
३२३६॥§ 10460

यदि बुद्धातिरिक्तोऽन्यः कश्चित्सर्वज्ञतां गतः।
बुद्धवाक्यप्रमाणत्वे तज्ज्ञानं क्वोपयुज्यते॥
३२३७॥§ 10462

यत्प्रमेयत्ववस्तुत्वादियोगि तत्कस्यचित्प्रत्यक्षं, यथा दधिरूपरसादिकं, सर्वं च पदार्थजातं प्रमेयादिस्वभावमिति स्वभावहेतुः। अत्रापि पूर्ववत्प्रतिज्ञान्यूनत्वं हेतोश्चानैकान्तिकत्वं वक्तव्यम्। तस्मान्न विशेषेण नापि सामान्येन सर्वज्ञत्वस्य सिद्धिः सम्भवति। अतो नास्ति सर्वज्ञ इति सिद्धम्। तदभावात्तद्वचनस्याभाव इति न तद्वचनात्प्रवृत्तिः सम्भवति कस्यचित्॥ ३२३५॥ ३२३६॥ ३२३७॥ § 10463

अथवा सम्भवतु नाम सर्वज्ञः पुरुषस्तथाऽपि सर्वज्ञप्रणीतं वचनं न सम्भवत्येव, यतः प्रवृत्तिर्भविष्यति भवतामित्येतत्प्रतिपादयन्नाह—दशभूमीत्यादि। § 10464

दशभूमिगतश्चासौ सर्वरागादिसंक्षये।
शुद्धस्फटिकतुल्येन सर्वं ज्ञानेन बुध्यते॥
३२३८॥§ 10466

ध्यानापन्नश्च सर्वार्थविषयां धारणां दधत्।
तथा व्याप्तश्च सर्वार्थैः शक्तो नैवोपदेशने॥
३२३९॥§ 10468

843/k

तथाहि किल दशभूमिप्रतिष्ठितोऽशेषरागादिमलकलङ्कापगमाच्छुद्धस्फटिकतुल्येन ज्ञानेन सकलं ज्ञेयमवच्छेद्यत इत्येवं भवद्भिर्वर्ण्यते। ततश्चास्यां तावदवस्थायां धारणां चित्तस्यैकाग्र्यतां दधदर्थबोध एव व्यापृतत्वान्नासौ शक्नोति धर्ममुपदेष्टुं न हीयतो व्यापारान्कश्चित्कर्तुं समर्थः॥ ३२३८॥ ३२३९॥ § 10469

व्युत्थाय देशयति चेदित्याह—यदा चेत्यादि। § 10470

यदा चोपदिशेदेकं किंचित्सामान्यवक्तृवत्।
एकदेशज्ञगीतं तन्न स्यात्सर्वज्ञभाषितम्॥
३२४० ॥§ 10472

नह्यवितर्का वचनप्रवृत्तिरस्तीति सविकल्पचेतोऽवस्थितेनैवानेन धर्मो देशनीयः, ततश्चास्यामवस्थायां बालपण्डितयोरविशेषादसर्वज्ञ एवासाविति तद्भाषितमसर्वज्ञभाषितमेव स्यात्॥ ३२४०॥ § 10473

स्यादेतत्—नैवासावुपदिशति किञ्चित्, सर्वदा निर्विकल्पसमाधिस्थितत्वात्, किन्तु तदाधिपत्येन विचित्रधर्मदेशनाप्रतिभासा विज्ञप्तयो भव्यानां भवन्ति। यथोक्तम्—यस्यां रात्रौ तथागतोऽभिसम्बुद्धो यस्यां च परिनिवृतः, अत्रान्तरे तथागतेन एकमप्यक्षरं नोदाहृतं न प्रव्याहृतम्, तत्कस्य हेतोः ?, सततसमाहितो हि तथागतः, अपि तु ये अक्षररुतदेशना वैनेयिकास्ते तथागतस्य मुखादुष्णीषादूर्णयाः शब्दं निःसरन्तं शृण्वन्तीत्यादि, तत्राह—तस्मिन् ध्यानसमापन्न इत्यादि। § 10474

तस्मिन्ध्यानसमापन्ने चिन्तारत्नवदास्थिते।
निश्चरन्ति यथाकामं कुट्यादिभ्योऽपि देशनाः॥
३२४१ ॥§ 10476

ताभिर्जिज्ञासितानर्थान्सर्वान् जानन्ति मानवाः।
हितानि च यथाभव्यं क्षिप्रमासादयन्ति ते॥
३२४२ ॥§ 10478

६ निःसरन्तं] Correction : ; निःसरतं (sic !)निःसरन्तं

इत्यादिकीर्त्त्यमानं तु श्रद्दधानेषु शोभते।
वयमश्रद्दधानास्तु ये युक्तीः प्रार्थयामहे॥
३२४३॥§ 10480

चिन्तारत्नम्—चिन्तामणिः। अयमत्र समुदायार्थः—ये श्रद्धालवस्तान्प्रतीदमप्रमाणकमुपवर्ण्यमानं शोभेत। ये तु पुनरस्मद्विधाः प्रमाणोपपन्नार्थग्राहितथा युक्तिमेव प्रार्थयन्ते ते कथमेतदुच्यमानमप्रमाणकं गृहीष्यन्ति॥ ३२४१॥ ३२४२॥ ३२४३॥ § 10481

किञ्च—भवतु नामैवं कल्पना, तथापि कुट्यादिनिर्गतासु देशनासु सर्वज्ञाधिपत्यप्रभवत्वं संदिग्धमेवेति न तत्र प्रमाणत्वेन प्रेक्षावतां विश्वासो युक्त इति दर्शयति—कुट्यादिनिःस्व(सृ?)तानामित्यादि। § 10482
844/k

कुट्यादिनिःस्व(सृ?)तानां चन स्यादाप्तोपदिष्टता।
विश्वासश्च न तासु स्यात्केनेमाःकीर्तिता इति॥
३२४४॥§ 10484

किंनु बुद्धप्रणीताः स्युः किंनु ब्राह्मणवञ्चकैः।
क्रीडद्भिरुपदिष्टाःस्युर्दूरस्थप्रतिशब्दकैः॥
३२४५॥§ 10486

किंवा क्षुद्रपिशाचाद्यैरदृष्टैरेव कीर्त्तिताः।
तस्मान्न तासु विश्वासः कर्त्तव्यः प्राज्ञमानिभिः॥
३२४६॥§ 10488

सर्वं सुबोधम्॥ ३२४४॥ ३२४५॥ ३२४६॥ § 10489

एतावत्कुमारिलेनोक्तं पूर्वपक्षीकृतम्, साम्प्रतं सामटयज्ञटयोर्मतेन पुनरपि सर्वज्ञदूषणमाह—इदं चेत्यादि। § 10490

एवं सर्वज्ञता पुंसां स्वातन्त्र्येण निरास्पदा।
इदं च चिन्त्यते भूयः सर्वदर्शी कथं मतः॥
३२४७॥§ 10492

युगपत्परिपाट्या वा सर्वं चैकस्वभावतः।
जानन्यथाप्रधानं वा शक्त्या वेष्येत सर्ववित्॥
३२४८॥§ 10494

युगपच्छुच्यशुच्यादिस्वभावानां विरोधिनाम्।
ज्ञानं नैकधिया दृष्टं भिन्ना वा गतयः क्वचित्॥
३२४९॥§ 10496

भूतं भवद्भविष्यच्च वस्त्वनन्तं क्रमेण कः।
प्रत्येकं शक्नुयाद्बोद्धुं वत्सराणां शतैरपि॥
३२५०॥§ 10498

स्वभावेनाविभक्तेन यः सर्वमवबुध्यते।
स्वलक्षणानि भावानां सर्वेषां न स बुध्यते॥
३२५१॥§ 10500

बोद्धा सामान्यरूपस्य सर्वज्ञेनापि तेन किम्।
अन्याकारेण बोधेन नैव वस्त्ववगम्यते॥
३२५२॥§ 10502

तदेकाकारविज्ञानं सम्यङ्मिथ्याऽपि वा भवेत्।
सम्यक्त्वे दृष्टबाधैवं प्रसक्तं सर्वमद्वयम्॥
३२५३॥§ 10504

ततश्च शिष्यसर्वज्ञधर्माधर्मतदुक्तयः।
न स्युर्वा भिन्नरूपत्वे स्वभावानवधारणात्॥
३२५४॥§ 10506

मृषात्वे त्वेकबोधस्य भ्रान्तः प्राप्नोति सर्ववित्।
न श्रद्धेयं वचस्तस्य तदोन्मत्तादिवाक्यवत्॥
३२५५॥§ 10508

845/k

सहेतु सकलं कर्म ज्ञानेनालौकिकेन यः।
समाधिजेन जानाति स सर्वज्ञो यदीष्यते॥
३२५६॥§ 10510

प्रत्यक्षमनुमानं वा शाब्दं वा तदतत्कृतम्।
प्रमाणमस्य सद्भावे नास्तीति नास्ति तादृशः॥
३२५७॥§ 10512

युगपत्परिपाट्या वा कथं कार्याद्विनाऽनुमा।
सामर्थ्यमपि नैवास्ति समर्थे सर्वमेव वा॥
३२५८॥§ 10514

सर्वे सर्वावबोधे च क्षेत्रज्ञाः प्रभविष्णवः।
उपायविफलत्वात्तु बुध्यन्ते निखिलं न ते॥
३२५९॥§ 10516

लब्धासाधारणोपायोऽशेषपुंसां विलक्षणः।
तत्रैकः सर्ववित्कश्चिदित्येवं निष्प्रमाणकम्॥
३२६०॥§ 10518

इत्थं यदा न सर्वज्ञः कश्चिदप्युपपद्यते।

न धर्माधिगमे हेतुः पौरुषेयं तदा वचः॥
३२६१॥§ 10520

इति मीमांसकाः प्राहुः स्वतन्त्रश्रुतिलालसाः।
विस्तरेण च वेदानां साधिता पौरुषेयता॥
३२६२॥§ 10522

किं युगपदशेषपदार्थपरिज्ञानात्सर्ववित्, आहोस्वित्परिपाट्या—क्रमेण, यद्वा सर्वस्य जगत एकेन—नित्यादिना रूपेण ज्ञानात्, यथा प्रधानावगमाद्वा—यदेव हि पुरुषार्थोपयोगि कर्मफलादि तस्यैव ज्ञानात्, यद्वा सर्वपदार्थपरिज्ञानसामर्थ्य— योगात् सर्वविदुच्यते—यथाग्निः सर्वं क्रमयौगपद्याभ्यामभुञ्जानोऽपि सर्वभुगिति। तत्र प्रथमे पक्षे कल्पनाद्वयम्, एकया वा धिया युगपदशेषं जानीयादनेकया वा। न तावदेकया, परस्परविरुद्धानां शुच्यशुच्यादीनामर्थानां युगपदेकज्ञानेन ग्रहणादर्शनात्। स्यादेतद्विरुद्धानेकपदार्थविषया बह्व्यो बुद्धयस्तस्य सकृद्वर्त्तन्त इत्याह—भिन्ना वा गतय इति। न दृष्टा इति विभक्तिविपरिणामेन सम्बन्धः। नहि युगपद्भिन्नगतयो दृष्टा एकविज्ञानसन्ततयः सत्वा इति सि .... वर्षशतैरपि ज्ञातुमशक्यत्वात्। वर्षशतग्रहणमुपलक्षणं कल्पैरपि न ....। अन्यथा स्वतन्त्रत्वं हीयेत 846/k
.... § 10523

तस्मादतीन्द्रियार्थनां साक्षाद्द्रष्टैव विद्यते।
नतु नित्येन वचसा कश्चित्पश्यत्यसम्भवात्॥
३२६३॥§ 10525

तेन साक्षादेवातीन्द्रियार्थानां द्रष्टा विद्यते, नतु नित्यवचनद्वारेण, तस्य नित्यस्य वचसोऽसम्भवात्। द्रष्टैवेत्यवधारणं भिन्नक्रमं साक्षादित्यस्यानन्तरं द्रष्टव्यम्॥ ३२६३॥ § 10526

भवतु नाम नित्यस्य वचसः सम्भवस्तथापि न तस्यातीन्द्रियार्थप्रतिपत्तिं प्रति कारणभावो युक्त इत्येतत्प्रतिपादयन्नाह—नित्यस्येत्यादि। § 10527

---

१४ सि] इत आरभ्य—३२६२ कारिकाव्याख्यानं यावत् ग्रन्थो भूयान् विगलितः। आदर्शपुस्तक एव च प्रच्युतिचिह्नमात्रं विरचितम्।

नित्यस्य वचसः शक्तिर्न स्वतो वापि नान्यतः।
स्वार्थज्ञाने समुत्पाद्ये क्रमाक्रमविरोधतः॥
३२६४॥§ 10529

तत्र स्वार्थः स्वकीयमभिधेयम्। यद्वा—स्वः—आत्मा, शब्दस्य स्वभावः, अर्थः —अभिधेयः, स्वश्चार्थश्च स्वार्थौ, तयोर्ज्ञानम्, तस्मिन्समुत्पाद्ये। तत्समुत्पादनाय नित्यस्य वचसः शक्तिः स्वतो वा भवेन्निसर्गसिद्धा, अन्यतो वा सहकारिकारणात्। तत्र न तावत्स्वतः, कुतः, क्रमाक्रमाभ्यां कार्योत्पादनं प्रति नित्यस्य विरोधात्। नहि क्रमयौगपद्याभ्यामन्यः प्रकारः सम्भवति, येनार्थक्रिया भवेत्। अन्योन्यव्यवच्छेदस्थितलक्षणत्वादनयोः। तेन क्रमयौगपद्याभ्यामेवार्थक्रिया व्याप्ता। नच नित्यस्य वचसः क्रमेण स्वार्थज्ञानोत्पादकत्वं युक्तम्। प्रथमकार्योत्पादावस्थायामुत्तरकालभाविज्ञानकार्योत्पादकस्वभावाप्रच्युतेस्तन्मात्रभावीनि कार्याणि युगपदेव स्युः। नापि क्रमेण युक्तम्, उत्तरकालमपि प्रथमकार्योत्पादावस्थावत्कार्यकरणसमर्थाविकलस्वभावानुवृत्तेरजनकत्वविरोधात्। प्रयोगः—यो यद्व्यापकधर्मरहितः स तद्व्याप्तधर्मविकलः, यथा वृक्षत्वधर्मशून्यो घटादिस्तद्व्याप्तशिंशपात्वधर्मविकलः, अर्थक्रियासामर्थ्यधर्मव्यापकक्रमाक्रमधर्मरहितं च नित्यं वेदाख्यं वचनमित्यर्थतो व्यापकानुपलब्धिः, अतो न स्वतो नित्यवचसः शक्तिसम्भवः। नाप्यन्यतः सहकारिकारणात्। तेन शक्तेस्तत्स्वभावाव्यतिरिक्तायास्तत्स्वभाववत्कर्तुमशक्यत्वात्। अर्थान्तरत्वेऽपि सम्बन्धासिद्धेरिति बहुधा चर्चितमेतत्। तस्मादतीन्द्रियार्थपरिज्ञानस्यनित्यवचनाश्रयत्वमनुमानबाधितत्वादयुक्तम्॥ ३२६४॥ § 10530

यच्चोक्तमभावप्रमाणविषयीकृतविग्रहत्वान्नास्ति धर्मज्ञ इति, तत्र धर्म-
847/k ज्ञाभावप्र तिज्ञाया अर्थापत्तिप्रमाणबाधितत्वं हेतोश्चासिद्धत्वं पराभ्युपगमेनैव प्रतिपादयन्नाह —स्वर्गयागादयस्तस्मादित्यादि। § 10531

स्वर्गयागादयस्तस्मात्स्वतो ज्ञात्वा प्रकाशिताः।
वेदकारस्तवाप्यस्ति तादृशोऽतीन्द्रियार्थदृक्॥
३२६५॥§ 10533

प्रधानपुरुषार्थज्ञः सर्वधर्मज्ञ एव वा।
तस्यानुपगमे न स्याद्वेदप्रामाण्यमन्यथा॥
३२६६॥§ 10535

तेनार्थापत्तिलब्धेन धर्मज्ञोपगमेन तु।
बाध्यते तन्निषेधोऽयं बिस्तरेण कृतस्त्वया॥
३२६७॥§ 10537

स्वत इति। स्वातन्त्र्येण। वेदानपेक्षेण ज्ञानेनेत्यर्थः। तादृश इति। यादृशो भवद्भिः प्रतिक्षिप्यते। अर्थापत्तिलब्धेनेति। वेदप्रामाण्याभ्युपगमसामर्थ्यलब्धेन। अतएवाभावप्रमाणविषयीकृतविग्रहत्वमप्यसिद्धम्, अर्थापत्त्या विषयीकृतत्वात्॥ ३२६५॥ ३२६६॥ ३२६७॥ § 10538

यच्च सर्वशब्दस्य प्रकृतार्थो(र्था?)पेक्षित्वं बहुधा विकल्प्य दूषणमुक्तम्, तन्नावतरत्येव। अस्य पक्षस्यानभ्युपगमात्। नह्यस्माभिर्धर्मादिव्यतिरिक्तविवक्षिताशेषार्थाभिज्ञतया सर्वज्ञोऽभ्युपगम्यते, येन तत्र दूषणमासज्येत। किं तर्हि ?। यस्य सकलक्लेशज्ञेयावरणमलव्यपगतेन चेतसा सकलमेव धर्मादिकं ज्ञेयमवभासते स सर्वज्ञोऽभीष्टः। तत्र च भवता न किञ्चिद्बाधकं प्रमाणमभ्यधायि। यच्चोक्तम्—एकस्यैव शरीरस्य यावन्तः परमाणवः इत्यादि, तत्केवलं प्रतिज्ञामात्रमप्रमाणकमुक्तम्। नच प्रतिज्ञामात्रादुपपत्तिशून्यादर्थसिद्धिः सम्भवति। सर्वस्य सर्वार्थसिद्धिप्रसङ्गादित्येतत्सर्वमागूर्याह—किञ्चेत्यादि। § 10539

किञ्चाकारणमेवेदमुक्तमाज्ञा (मज्ञ?)
प्रभावि(षि?)तम्।
केशरोमाणि यावन्ति कस्मानि ज्ञातुमर्हति॥
३२६८॥§ 10541

यस्मान्निर्मलनिष्कम्पज्ञानदीपेन कश्चन।
द्योतिताखिलवस्तुः स्यादित्यत्रोक्तं न बाधकम्॥
३२६९॥§ 10543

अकारणमिति। न विद्यते कारणमुपपत्तिस्त्रिरूपलिङ्गाख्यानं यस्य तत्तथोक्तम्। क्लेशज्ञेयावरणमलविविक्तत्वान्निर्मलं मारतीर्थिकपरिहाण(?)समीरणाकम्प्यत्वादकम्प्यं यदेव ज्ञानं तदेव दीपः। प्रकाशसाम्यात्। द्योतितं विषयीकृतमखिलं धर्मा दिकं वस्तु येन स तथोक्तः। सापेक्षत्वेऽपि गमक- 848/k
त्वात्समासः। अत्रोक्तं न बाधकमिति। प्रमाणमिति शेषः। न केवलं नोक्तम्, नाप्यत्र किञ्चिद्बाधकमस्तीति भावः। तथाहि—न तावत्प्रत्यक्षं बाधकम्, तस्यातद्विषयत्वात्। यदेव हि वस्तु प्रत्यक्षेण यथा विषयीक्रियते तत्र प्रत्यक्षप्रसिद्धे विपरीतो धर्मोऽभ्युपगम्यमानःप्रत्यक्षेण बाध्यते। यथा शब्दे धर्मिणि अश्रावणत्वं श्रावणत्वेन। न तु यत्र प्रत्यक्षस्याप्रवृत्तिः। नच परसन्तानवर्तीनि

चेतांसि सर्वाणि प्रत्यक्षतोऽसर्वज्ञेन विषयीक्रियन्ते केनचित्। येन तत्र सर्वज्ञत्वं प्रतिज्ञायमानं प्रत्यक्षेण बाध्येत। सर्वेषामेवार्वाग्दर्शित्वात्। विषयीकरणे वा स एव सर्वज्ञ इत्यप्रतिक्षेपः। § 10544

स्यादेतत्—न वयं प्रत्यक्षं प्रवर्त्तमानमभावं साधयतीति ब्रूमः। किं तर्हि ?। निवर्त्तमानम्। तथाहि—यत्र वस्तुनि प्रत्यक्षस्य निवृत्तिस्तस्याभावोऽवसीयते, यथा शशविषाणस्य। यत्र प्रवृत्तिस्तस्य भावः, यथा—(अ)स्यादेः। न च सर्वज्ञविषयंकदाचित्प्रत्यक्षं प्रवृत्तमित्यतस्तन्निवृत्तेस्तदभावोऽवसीयत इति। तदेतदसम्बद्धम्। नहि प्रवृत्त(प्रत्यक्ष ?)निवृत्तेर्यो भवति निश्चयः स प्रत्यक्षाद्भवति। अभावभावयोरेकत्रविरोधात्। नच प्रत्यक्षनिवृत्तिर्वस्तु(स्त्व ?)भावेन व्याप्ता, येनासौ वस्त्वभावस्ततो निश्चीयते। सत्यपि वस्तुनि व्यवहितादौ प्रत्यक्षस्य निवृत्तिदर्शनात्। स्यादेतत्—न प्रत्यक्षनिवृत्तेः सकाशात्स्यादभावनिश्चय इति ब्रूमः। किं तर्हि ?। निवृत्तं प्रत्यक्षमभावं साधयतीति। तदेतच्छब्दान्यत्वं केवलं भवतोच्यते। नत्वर्थभेदः। न च शब्दान्यत्वमात्रादर्थान्यत्वं युक्तमतिप्रसङ्गात्। तथाहि—निवृत्तिर्वस्तुसत्तानिषेध उच्यते। निवृत्तशब्देनापि परमार्थतः स एवाभिधीयते। केवलमेको भेदान्तरप्रतिक्षेपेण तन्मात्रजिज्ञासायां तमाह, अपरस्त्वप्रतिक्षेपेणेति विशेषः। परमार्थतस्तु द्वाभ्यामसत्त्वमेव वस्तुनः प्रतिपाद्यते। नवाऽसतो हेतुभावः सम्भवी, सर्वसामर्थ्यविरहलक्षणत्वात्तस्य। तस्माद्यस्य यदुत्पादकं प्रकाशकं वा तत्तस्योत्पादने प्रकाशने च सन्निहितसत्ताकमेव भवति, नतु निवृत्तस्वभावं, यथा बीजमङ्कुरस्य दीपो वा रूपस्य। नहि तौ निवृत्तावङ्कुरघटरूपाद्युत्पादनप्रकाशने समर्थौ भवतः। अपि च—

निवृत्तं प्रत्यक्षमभावं साधयतीति कोऽत्रार्थोऽभिमतः। यदि तावद्वर्त्तमानादध्वनो निवृत्तमित्यर्थस्तदा सामर्थ्यादतीतानागतावस्थमित्येवमुक्तं स्यात्। नचातीतानागतवस्तु विद्यत इति पूर्वं प्रतिपादितम्। तत्कथमसतो व्यापारः सिद्ध्येत्। अथ वर्त्तमानमपि सद्यद्यत्र विषये नोत्पद्यते तत्ततो निवृत्तमित्युच्य-
849/k ते। एवमपि नातो वस्त्वभावसिद्धिर्व्यभिचारात्। नहि चक्षुर्विज्ञानं गन्धरसादिविषये नोत्पद्यत इत्येतावता ततस्तदभावः सिद्ध्येत्। तस्मान्न प्रत्यक्षतः कस्यचिदभावसिद्धिः। यद्येवं कथमनुपलम्भाख्यात्प्रत्यक्षात् घटाद्यभावसिद्धिः प्रदेशान्तरे भवद्भिर्वर्ण्यते। नैतदस्ति। नहि तत्राभावविषयीकरणात्प्रत्यक्षमभावं साधयतीत्युच्यते। किं तर्हि ?, एकज्ञानसंसर्गयोग्ययोरर्थयोरन्यतरस्यैव या सिद्धिः साऽपरस्याभावसिद्धिरिति कृत्वा। यतस्तयोः सतोर्नैकरूपनियता प्रतिपत्तिः सम्भवति। योग्यताया अविशेषात्। न चैवं सर्वज्ञत्वस्यकेनचित्सार्द्धमेकज्ञानसंसर्गिता निश्चिता, यस्य केवलस्योपलम्भात्तदभावं व्यवस्यामः। तस्य सर्वदैवात्यन्तपरोक्षत्वात्। § 10545

एवं तावत्प्रत्यक्षं सर्वविदो(न)बाधकं सम्भवति। नाप्यनुमानं सर्वज्ञाभावं साधयति। तस्य विधिविषयत्वाभ्युपगमात्। यतोऽभावमेव प्रमाणमभावविषयमुपवर्ण्यते नान्यत्। अतएवार्थापत्त्यादीनां त्रयाणामपि बा(नसा ?)धकत्वम्। अथापि स्यात्—नास्माभिः प्रसज्यरूपेण सर्वज्ञाभावः प्रसाध्यते, किं तर्हि

?, सर्वनरान्पक्षीकृत्य पर्युदासवृत्त्या तेष्वसर्वज्ञत्वं साध्यते, तेनानुमानादीनां व्यापारो भवत्येवेति। भवत्वेवम्, तथाप्यनुमानं तावन्न सम्भवति, सर्वनरेष्वसर्वज्ञत्वाव्यभिचारिलिङ्गाप्रसिद्धेः। यदपि च प्रमेयत्ववक्तृत्वादिकमुक्तं तदपि व्यभिचारीति पश्चात्प्रतिपादयिष्यते। नाप्यर्थापत्तिरसर्वज्ञं साधयति। प्रत्यक्षानुमानव्यतिरेकेणान्येषां प्रमाणत्वासिद्धेः। सत्यपि वा प्रमाणान्तरत्वे नार्थापत्तिस्तावदसर्वज्ञसाधने पर्याप्ता, यतो दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यते इत्यदृष्टपरिकल्पनाऽर्थापत्तिः। नचासर्वज्ञत्वमन्तरेण सर्वनरेषु कश्चिदर्थो दृष्टादिर्नोपपद्यते, यतस्तदर्थापत्त्या कल्प्येत। नाप्युपमानं क्षमम्, तथाहि—स्मर्यमाणमेव वस्तु पुरोवर्त्तिपदार्थसादृश्योपाधि सादृश्यमात्रं वा पुरोवर्त्तिना स्मर्यमाणवस्तुगतमुपमानेन प्रतीयते। यथानुभूतगोदर्शनस्य पुंसोऽरण्यगतस्य गवयदर्शनात्पूर्वानुभूते गवि तत्साधर्म्यज्ञानम्। यथोक्तम्—तस्माद्यत्स्मर्यते तत्स्यात्सादृश्येन विशेषितम्। प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम्॥ इति। तस्मात्स्मर्यमाण एव धर्मी उपमानस्य विषयः, अनुभूतमेव च वस्तु स्मरणेन विषयीक्रियते, नान्यत्। नच सर्वनरसन्तानवर्त्तीनि चेतांसि केनचित् सर्वविदाऽनुभूतानि, यतः स्मरणेन विषयीक्रियेरन्। नचानुभूयमानस्य वस्तुनःसर्वनरैरसर्वज्ञत्वसाधारणधर्मनिश्चयोऽस्ति, यद्वशादसर्वज्ञत्वं सर्वनरेषूपमीयेत। यदपि सत्त्वादिकं क्वचिदसर्वज्ञे दृष्टं तदपि नासर्वज्ञत्वसाधारणं सिद्धम्। सर्वज्ञस्यापि सत्त्वाद्यविरोधात्। नहि गवये सत्त्वादिधर्मदर्शनाद्घटादीनामपि गवयसादृश्यमुपमीयते। भवतु नाम सर्वनराणां सत्त्वादिना साधर्म्यमसर्वज्ञत्वं तु न सिद्ध्यति। एतेनैव तत्प्रत्युक्तम्, यदुक्तं—नरान् दृष्ट्वेत्यादि। 850/k

§ 10546

नापि शब्दाख्यं प्रमाणं सर्वविदो बाधकमस्ति। यत्तावत्पौरुषेयं तदप्रमाणमेव स्वयं मीमांसकैरतीन्द्रियार्थविषयेऽभ्युपगम्यते, यच्चापौरुषेयं तदप्यप्रमाणमिति निवेदितम्। नचापि किंचिद्वैदिकं वचनं सर्वनरासर्वज्ञत्वप्रत्यायकमुपलभ्यते। नच तत्रानुपदेशादर्थान्तराभावः सिद्ध्यति, सर्ववस्तूनां शास्त्रोपदेशेऽनधिकृतत्वात्। अन्यथा हि भवन्मातृविवाहादीनामप्यभावप्रसङ्गः स्यात्, तत्रापाठात्। नचैकदेशे क्वचित्पाठादर्शनात्सर्वत्रापाठनिश्चयो युक्तः, अनेकशाखाशताऽन्तर्हितश्रवणादन्यत्रापि पाठस्य सम्भाव्यमानत्वात्। शाखान्तरे स्फुटतरमेव सर्वज्ञः पठ्यत इति पश्चात्प्रतिपादयिष्यामः। § 10547

नाप्यभावप्रमाणविषयीकृतत्वात्सर्वविदोऽसत्त्वसिद्धिः। तथाहि—यदि प्रमाणनिवृत्तिमात्रं प्रसज्यलक्षणमभावप्रमाणं वर्ण्यते तदा नासौ कस्यचित्प्रतिपत्तिर्नापिप्रतिपत्तिहेतुरिति न तेन विषयीकरणं युक्तमवस्तुत्वात्। अतो नासौ प्रमाणम्। अथ पर्युदासावृत्त्या प्रमाणाख्याद्भावादन्यो भाव एवाभिप्रेतः, एवमपि प्रमाणाद्व्यावृत्त्यात्मतया न प्रामाण्यं सिद्ध्येत्। नहि ब्राह्मणादन्यो ब्राह्मण एव युक्तः। स्यादेतत्—न सर्वप्रमाणव्यावृत्तोऽसौ वर्ण्यते। किं तर्हि ?। विवक्षितप्रमाणपञ्चकव्यतिरेकेणान्यः प्रत्ययविशेष एव। यद्येवं किमाकारोऽसाविति वाच्यम्। यस्मात्प्रमाणपञ्चकागोचरस्तस्मादसौ

सर्वज्ञो नास्तीत्येवमाकार इति चेत्। यद्येवमाकारो न तर्हि प्रमाणम्, व्यभिचारात्। नहि प्रमाणपञ्चकस्या(स्व?)स्वभावाकारणभूतस्यनिवृत्तावप्रतिबद्धं सर्वज्ञादिवस्तु निवर्त्तते, येनायं प्रत्ययः सत्यत्वमश्नवीत। तस्मान्न किञ्चिद्बाधकं प्रमाणं सर्व(ज्ञ)स्यास्तीति भावः॥ ३२६८॥ ३२६९॥ § 10548

स्यादेतत्—अनुपलम्भो यो युष्माभिरुपवर्णितोऽनुमानत्वेन स एव सर्वज्ञस्य बाधको भविष्यति, किमत्रास्माकमन्येन प्रमाणेनेति। सत्यमेतदनुपलम्भः प्रमाणम्। किंत्विदमिह सम्प्रधार्यम्। किं स्वोपलम्भनिवृत्तिस्त्वया सर्वज्ञाभावसिद्धयेऽनुपलम्भोऽभिप्रेतः ?, आहोस्वित्सर्वपुरुषोपलम्भनिवृत्तिर्वा ?, अनुपलम्भोऽपि किं निर्विशेषणोऽभीष्ट उपलब्धिलक्षणप्राप्तस्येत्येतस्य विशेष-
851/k णस्यानाश्रयणात् ?, आहोस्वित्सवि शेषण इति। तत्र न तावन्निर्विशेषणश्चा(स्वा?)नुपलम्भः प्रमाणं सर्वज्ञाभावसिद्धये युक्त इति दर्शयन्नाह—नचाप्यदृष्टिमात्रेणेत्यादि। § 10549

नचाप्यदृष्टिमात्रेण तदसत्ताविनिश्चयः।
हेतुव्यापकतायोगादुपलम्भस्य वस्तुषु॥
३२७०॥§ 10551

मात्रग्रहणमुपलब्धिलक्षणप्राप्तस्येत्येतद्विशेषणनिरासार्थम्। तदसत्ताविनिश्चय इति। सर्वज्ञासत्ताविनिश्चयः। कस्मात् ?, वस्तुषु—वस्तुविषये उपलम्भस्य हेतुत्वव्यापकत्वायोगात्। नह्यर्वाग्दर्शनस्योपलम्भो वस्तूनां व्यापको वृक्षत्वमिव शिंशपात्वस्य, सत्यपि वस्तुनि देशादिविप्रकर्षेणानुपलम्भसम्भवात्। नापि कारणमग्निरिव धूमस्य, वस्तूनामेवोपलम्भं प्रति कारणत्वाभावात्। नचाकारणाव्यापकभूतस्यान्यस्य निवृत्तावन्यस्य निवृत्तिर्युक्ता, अतिप्रसङ्गात्। या च कार्यानुपलब्धिसक्ता(त्ता?)न सा कारणमात्रस्याभावं गमयति। किं तर्हि ?। अप्रतिबद्धसामर्थ्यस्यैव। न चार्वाग्दर्शिनो(नः उ?)पलम्भं प्रति वस्तूनामप्रतिबद्धसामर्थ्यमस्ति। येन स निवर्त्तमानो वस्तूनामभावं साधयेत्॥ ३२७०॥ § 10552

कारणव्यापकयोर्निवृत्तावपि कथमन्यस्य निवृत्तिरिति चेदत्राह—कारणेत्यादि। § 10553

कारणव्यापकाभावे निवृत्तिश्चेह युज्यते।
हेतुमद्व्याप्तयोस्तस्मादुत्पत्तेरेकभावतः॥
३२७१॥§ 10555

कृशानुपादपाभावे धूमाम्रादिनिवृत्तिवत्।
अन्यथाऽहेतुतैव स्यान्नानात्वं च प्रसज्यते॥
३२७२॥§ 10557

हेतुर्विद्यते यस्य तद्धेतुमत्, कार्यमित्यर्थः। हेतुमच्च व्याप्तं चेति विग्रहः। तयोर्हेतुमद्व्याप्तयोर्निवृत्तिर्युज्यत इति पूर्वेण सम्बन्धः। अत्र कारणं तस्मादुत्पत्तेरेकभावत इति। हेतुनिवृत्तौ हि सत्यां हेतुमान्निवर्त्तते, ततो हेतोरुत्पत्तेरात्मभावप्रतिलम्भाद्धेतुमतः, यथा कृशानुनिवृत्तौ धूमस्य निवृत्तिः, तथा व्यापकनिवृत्तौ व्याप्यं निवर्त्तते, तेन व्यापकेन सह तस्यैकभावतः—एकस्वभावत्वात्। यथा वृक्षनिवृत्तौ आम्रखदिरादिनिवृत्तिः, वृक्षविशेषस्यैव आम्रादित्वेन प्रतीतेः। अन्यथा हि यदि कारणनिवृत्तावपि न निवर्त्तेत तत्कारणमेव न स्यात्। नहि यद्यस्मिन्स(न्नस ?)त्यपि भवति तत्तस्य कारणं युक्तमतिप्रसङ्गात्। नापि यन्निवृत्तौ यन्न निवर्त्तते स तस्य स्वभावो युक्तो गौरिव गवयस्य। तस्माद्व्यापक एव स्वभावो व्याप्यं कारणमेव च कार्यं 852/k निवर्त्तमानं निवर्त्तयेत्, नान्यदतिप्रसङ्गात्। यथोक्तम—तस्मात्तन्मात्रसम्बद्धः स्वभावो भावमेव तु। निवर्त्तयेत् कारणं वा कार्यमव्यभिचारतः। अन्यथैकनिवृत्त्याऽन्यविनिवृत्तिः कथं भवेत्। नास्त(श्व?)वानिति मर्त्येन न भाव्यं गोमताऽपि किमिति॥ ३२७१॥ ३२७२॥ § 10558

अथापि स्वोपलम्भस्य सर्वार्थान्प्रति हेतुत्वं व्यापकत्वं चाङ्गीक्रियते तदा स्ववचनविरोधः प्रतिज्ञायामापद्यत इति दर्शयन्नाह—स्वोपलम्भस्येत्यादि।
§ 10559

स्वोपलम्भस्य चार्थेषु निखिलेषु विनिश्चये।
कुतश्चिद्भवतो ज्ञानाद्धेतुत्वव्यापकत्वयोः॥
३२७३॥§ 10561

भवानेव तदा सिद्धः सर्वार्थज्ञोऽप्रयत्नतः।
ततश्च स्वात्मनि द्वेषः कस्ते सर्वविदि स्वतः॥
३२७४॥§ 10563

हेतुत्वव्यापकत्वयोरिति। निश्चयापेक्षया षष्ठी। उपलम्भस्य चार्थेष्वितिषष्ठीसप्तम्यौ हेतुत्वव्यापकत्वयोरित्येतदपेक्ष्य यथाक्रमं सम्बन्धे विषयभावे च योज्ये। एतदुक्तं भवति—यदि भवता कुतश्चित्प्रमाणात्स्वोपलम्भस्य सर्वार्थेषु हेतुत्वे व्यापकत्वं निश्चितं तदाऽऽत्मनि स्फुटतरमेव त्वया सर्वज्ञत्वं प्रतिज्ञातं भवति। नह्यसर्वविदो ज्ञानमशेषज्ञेयव्यापकं भवति। सर्वज्ञाभावसिद्धये च

साधनोपादानात्तदेव निषिध्यत इति स्ववचनव्याघातः॥ ३२७३॥ ३२७४॥
§ 10564

एवं तावन्निर्विशेषणः स्वानुपलम्भो न सर्वविदोऽसत्त्वप्रसिद्धये निर्देशनमर्हति, नाप्युपलब्धिलक्षणप्राप्तस्य सतोऽनुपलम्भादिति विशेषणात्सविशेषणः। तथाहि —स निर्दिश्यमानः स्वशब्देन वा निर्दिश्यते, यथा नास्ति क्वचित्प्रदेशविशेषे घट उपलब्धिलक्षणप्राप्तस्यानुपलम्भादिति निर्देशस्तथा सर्वज्ञाभावसिद्धयेऽपि स्यात्।य(अ?)थार्थान्तरस्य तत्कारणव्यापकात्मन उपलब्धिलक्षणप्राप्तस्याभावोपदर्शनादस्वशब्देन। यथा—नास्त्यत्र धूमो वह्न्यभावात्, नास्त्यत्र शिंशपा वृक्षाभावादिति।नह्यप्रतिबद्धस्याहेत्वव्यापकभूतस्यान्यस्य विनिवृत्तावपरस्य नियमेन निवृत्तिर्युक्तेति पूर्वमुक्तमतिप्रसङ्गापत्तेरिति। नाचाप(प्य?)निश्चितस्वहेतुव्यापकव्यतिरेकस्यार्थस्य कारणव्यापकयोर्व्यतिरेकाद्व्यतिरेकः सिद्ध्यतीति, अतस्तत्राप्युपलब्धिलक्षणप्राप्तस्येतिविशेषणमाश्रयणीयम्। एवं सर्वज्ञेऽपि स्यात्। यद्वा—अर्थान्तरस्य साक्षात्पारम्पर्येण वा विरुद्धस्यैव विधानात्तन्निषेधः, नाविरुद्धस्य, तस्य तत्सह-
853/k भावसम्भवात्। यथा—नास्त्यत्र शीतस्पर्शो वह्नेरिति साक्षाद्विरुद्धस्य वह्नेर्विधानाच्छीतस्पर्शनिषेधः,तद्वत्सर्वज्ञनिषेधेऽपि स्यात्। पारम्पर्येण तु विरुद्धस्य कदाचित्तद्व्यापकविरुद्धस्यैव वा विधानात्सर्वविदो निषेधः, यथा—तुषारस्पर्शव्यापकशीतविरुद्धवह्निविधानात्तुषारस्पर्शनिषेधः। तत्कारणविरुद्धविधानाद्वा, यथा—रोमहर्षादिकारणशीतविरुद्धदहनविशेषविधानाच्छीतकार्यरोमहर्षादिनिषेधः। तद्विरुद्धकार्यस्य वा विधानात्, यथा—क्वचित्प्रदेशविशेषे शीतादिविरुद्धवह्न्यादिकार्यस्य धूमादेर्विधानाच्छीतस्पर्शनिषेधः। तत्करणविरुद्धकार्योपलम्भाद्वा, यथा—रोमहर्षादिकारणशीतविरुद्धवह्निकार्यधूमोपदर्शनाद्रोमहर्षादिनिषेधः। रोमहर्षादिविशेषयुक्तपुरुषवान(न्ना?)यं प्रदेशो धूमादिति। तद्विरुद्धव्याप्तस्य वा विधानात्तन्निषेधः, यथा—ध्रुवभावित्वविरुद्धाध्रुवभावित्वव्याप्तस्य सापेक्ष(त्व)स्य विधानाद्ध्रु(?)वभावित्वनिषेध इति। त एते सर्व एवानुपलब्धिप्रयोगाः सर्वज्ञाभावसिद्धये न सम्भवन्ति, तस्य सर्वविदः सर्वदैवानुपलब्धिलक्षणप्राप्तत्वात्। एषां चोपलब्धिलक्षणप्राप्तानुपलम्भभेदत्वादित्येतद्दर्शयति—अत एवेत्यादि। § 10565

अत एव न दृश्योऽयं सर्वज्ञस्ते प्रसिद्ध्यति।
तद्दृश्यत्वे हि सार्वज्ञ्यं तवैव स्यादयत्नतः॥
३२७५॥§ 10567

२५ एषां चो] Correction: ; एषा चो (sic!)एषां चो

सर्वार्थविषयं ज्ञानं यस्य दृश्यः स ते कथम्।
सर्वार्थविषयं ज्ञानं तवापि यदि नो भवेत्॥
३२७६॥§ 10569

अत एव स्ववचनविरोधप्रसङ्गान्न भवता सर्वज्ञः स्वयमुपलब्धिलक्षणप्राप्तोऽङ्गीकर्त्तव्यः। अन्यथा हि स्वस्मिन्सर्वज्ञत्वमभ्युपेतं स्यात्। कथमित्याह—सर्वार्थविषयमित्यादि। यदि हि सर्वार्थगोचरं तत्रा(वा?)पि ज्ञानं भवेदेवं ते सर्वज्ञ उपलब्धिलक्षणप्राप्तो भवेन्नान्यथा, नह्यसर्वविदां सर्वविदुपलम्भगोचरो भवति॥ ३२७५॥ ॥ ३२७६॥ § 10570

स्यादेतत्—माभूदुपलब्धिलक्षणप्राप्तोऽस्माकं सर्वज्ञस्तथापि किमित्येतेऽनुपलब्धिप्रयोगास्तदभावसिद्धये न सम्भवन्तीत्याह—तेनेत्यादि। § 10571

तेनादृष्टिविशेषोत्थं कारणव्यापकात्मनाम्।
प्रकृत्या दृश्यरूपत्वात्सर्वज्ञस्य न सिध्यति॥
३२७७॥§ 10573

यस्मादुपलब्धिलक्षणप्राप्तस्तव न भवति सर्वज्ञस्तेन कारणेन सर्वज्ञकारणव्याप कस्वभावानामदृष्टिविशेष उपलब्धिलक्षणप्राप्तानुपलम्भो न सिद्ध्यति। 854/k
स्वभावकारणव्यापकानुपलब्धिप्रयोगा आद्यास्त्रयो न सिद्ध्यन्तीति यावत्॥ ३२७७॥ § 10574

यद्येवमन्ये तर्हि शेषाः सिद्ध्यन्तु, तथाऽपि सिद्ध एव सर्वज्ञाभाव, इति चेदाह —इयं चेत्यादि। § 10575

इयं च त्रिविधा दृष्टिर्विश्व(नव?)रूपा प्रवर्त्तते।
तत्तद्विरुद्धाद्यगतिगतिभेदप्रयोगतः॥ ३२७८॥§ 10577

मूलप्रभेदरूपाया अस्याः सर्वविदं प्रति।
साधिते शक्तिवैकल्ये व्यस्ता अन्या अयत्नतः॥
३२७९॥§ 10579

इयमेवानन्तरोक्ता स्वभावव्यापककारणानामदृष्टिस्त्रेधा प्रपञ्च्यमाना नवधा भिद्यते। कथमित्याह—तत्तद्विरुद्धाद्यगतीत्यादि। तच्छब्देन प्रक्रान्तं स्वभावव्यापककारणाख्यं त्रयमभिसम्बध्यते, तेन स्वभावादिना विरुद्धं तद्विरुद्धम्, तच्च त्रिविधमेव भवति, स्वभावव्यापककारणविरुद्धभेदात्। तद्विरुद्धमादिर्यस्य तत्तद्विरुद्धादि। आदिशब्देन विरुद्धकार्य—कारणविरुद्धकार्य—

विरुद्धव्याप्तास्त्रयो गृह्यन्ते। पुनर्द्वितीयेन तच्छब्देन तदेव स्वभावादित्रयं सम्बध्यते। तच्च तद्विरुद्धादि चेति तत्तद्विरुद्धादीति। यथाक्रमं तयोरगतिगती तद्विरुद्धाद्यगतिगती। तदगतिस्तद्विरुद्धादिवानि(गति ?)श्चेत्यर्थः। तयोर्भेदस्तेन प्रयोग इति समासः। तत्र तदगत्या साक्षात्रि(?)विधा स्वभावकारणव्यापकानुपलब्धिर्निर्दिष्टा। अस्या एव त्रिविधाया अदृष्टेः शेषानुपलब्धयः पारम्पर्येण सूचिका इत्यत इयं त्रिविधानुपलब्धिरासां मूलभेदरूपा भवति। तथाहि—तद्विरुद्धगत्या स्वभावविरुद्धोपलब्धिः व्यापकविरुद्धोपलब्धिः कारणविरुद्धोपलब्धिश्च निर्दिष्टा। आदिशब्देन विरुद्धकार्योपलब्धिः कारणविरुद्धकार्योपलब्धिर्विरुद्धव्याप्तोपलब्धिश्च संगृहीताः। एताभिश्च पारम्पर्येण यथायोगं स्वभावव्यापककारणानुपलब्धयः सूच्यन्त इत्यतस्त्रिविधाया मूलप्रभेदरूपायाः सर्वज्ञाभावसिद्धिंप्रत्यसामर्थ्यप्रतिपादनात्तच्छाखाभूतानां यत्नमन्तरेणैव प्रतिपादितं भवतीति नास्यां पृथगसामर्थ्यप्रतिपादनाय यत्नः कार्यः, नहि मूले छिन्ने शाखानामवस्थितिर्भवेत्।परमार्थतस्तु स्वभावानुपलब्धिरेव सर्वासां मूलभूता, अर्थान्तरभेदाश्रयणात्तु त्रिविधा मूलत्वेनोक्ता॥ ३२७८॥ ३२७९॥ § 10580

स्यादेतत्—यदि सर्वज्ञोऽनुपलब्धिलक्षणप्राप्तस्तदा माभूत्तदनुपलम्भ-
855/k विशेषसिद्धिः, तत्कारणव्यापकयोस्तूपलब्धिलक्षणप्राप्तत्वात्किमिति तददृष्टिविशेषो न सिद्ध्यति, तद्विरुद्धादीनां चोपलभ्यस्वभावत्वादुपलम्भः किमिति न सिद्ध्येदित्याह—कार्यकारणतेत्यादि। § 10581

कार्यकारणताव्याप्यव्यापकत्वविरोधिताः।
दृश्यत्वे सति सिद्ध्यन्ति यश्चात्मा सविशेषणः॥
३२८०॥§ 10583

सर्वज्ञो नच दृश्यस्ते तेन नैता अदृष्टयः।
तन्निराकरणे शक्ता निषेधाङ्गं नचापरम्॥
३२८१॥§ 10585

कार्यकारणभावो व्याप्यव्यापकत्वं विरोधिता चेति द्वन्द्वः। प्रत्यक्षानुपलम्भसाधनो हि कार्यकारणभावः, सर्वज्ञादेरदृश्यत्वान्न तेन सह कार्यकारणभावः सिद्ध्यति। नापि व्याप्यव्यापकभावस्तस्याप्युपलब्धिलक्षणप्राप्तस्यानुपलम्भपूर्वकत्वात्। तथाहि —यन्निवृत्तौ यन्नियमेन निवर्त्तते स तेन व्याप्तो व्यपदिश्यते, निवृत्तेश्च नानुपलब्धिलक्षणप्राप्तानुपलम्भमन्तरेण सिद्धिर्भवति। विरोधितापि दृश्ययोरेव वस्तुनोः सिद्ध्यति नादृश्ययोः। तथाहि—सहानवस्थानलक्षणस्तावद्विरोधोऽविकलकारणस्य भवतोऽन्यभावेऽभावाद्दृश्यते। भावाभावौ च नानुपलभ्यस्वभावयोर्वस्तुनोर्निश्चेतुं शक्यौ। परस्परपरिहारस्थितलक्षणोऽपि

विरोधो यद्य(द ?)वच्छेदनान्तरीयको यस्य परिच्छेदस्तयोर्व्यवस्थाप्यते, यथा क्रमाक्रमयोः। परिच्छेदश्च नादृश्ये सम्भवति। यद्येवं भावाभावादीनां कथं विरोधसिद्धिः, नहि तत्रोभयोर्दृश्यत्वमस्ति। नैष दोषः। नहि भावाभावौ पृथक्परिच्छिद्य पश्चात्तयोर्व्यवच्छेद्यव्यवच्छेदकभावाद्विरोधो व्यवस्थाप्यते। किं तर्हि ?, पृथक्परिच्छिन्नयोरेव। तथाह्येकस्मिन्धर्मिण्येककालं तयोर्विरोधो व्यवस्थाप्यते नतु धर्म्यन्तरे। नहि गोरभावे अश्वस्य भावविरोधः कश्चित्। नाप्येकत्रधर्मिणि भिन्नकालयोस्तयोर्विरोधः, नहि प्रागभूतस्य (भूतस्य) वा पश्चाद्भावाभावौ न संभवतः। एकस्मिंस्तु वस्तुनि तयोर्युगपदपरिच्छेदाद्विरोधः, नतु तत्रैव, परिच्छिद्य व्यवच्छेदात्। अपरिच्छिन्नस्य कथं व्यवच्छेद इति चेत्। अत एव, यत एव न परिच्छिद्यते तत्र धर्मिणि तत एव तस्य व्यवच्छेदः संभवेत्। अन्यथा तत्र परिच्छिन्नधर्मस्य कथं व्यवच्छेदः शक्यते कर्तुम्। अयमेव हि तदभावव्यवच्छेदो य एव तत्परिच्छेदः, स एवान्याभावस्य तत्र परिच्छेदो यएवान्यव्यतिरिक्तस्य तस्य परिच्छेदः। तस्माद्यस्य धर्मिणोऽभावो व्यवच्छिद्यते भावश्च परिच्छिद्यते सोऽवश्यं दृश्योऽभ्युपगन्तव्यो नह्यदृश्यस्य 856/k परिच्छेदो नापरिच्छिन्नस्य तद्विपरीतधर्मव्यवच्छेदः सम्भवति। न त्वेवं सर्वज्ञे सम्भवति, नहि सर्वे नरा धर्मिणो दृश्याः कस्यचित्, येन तेष्वसर्वज्ञत्वधर्मपरिच्छेदात्सर्वज्ञत्वव्यवच्छेदः सिद्ध्येत्। तस्यैव सर्वज्ञत्वप्रसङ्गात्। तस्मादनुपलभ्यधर्मिणि सर्वज्ञत्वासर्वज्ञत्वयोर्विरोधो न सिद्ध्यति। स्वसन्ताने तु सिद्ध्यति। तत्रापि नानागतावस्थायां तस्यास्तदानीमदृश्यत्वात्। तस्मात्स्थितमेतत् दृश्यस्यैव कार्यकारणादिभावः सिद्ध्यतीति। यश्चात्मा सविशेषण इति। स सिद्ध्यतीति सम्बन्धः। तत्र आत्मा स्वभावः, सह विशेषणेन वर्त्तत इति सविशेषणः। तत्र विशेषणं त्रिविधविप्रकर्षरहितत्वम्। एता अदृष्टय इति। कारणाद्यनुपलब्धयः सर्वज्ञस्य केनचित्सह कार्यकारणभावविरोधव्याप्यव्यापकाभावासिद्धेः। सत्स्वन्येषूपलम्भकारणेषु क्वचित्कदाचित्प्रत्यक्षत्वासिद्धेश्च। निषेधाङ्गं नचापरमस्त्यनुपलब्धिविशेषं त्यक्त्वा॥ ३२८०॥ ॥ ३२८१॥ § 10586

पुनरपि स्वानुपलम्भस्य निर्विशेषणस्य प्रयोगेऽतिप्रसङ्गापादनेनानैकान्तिकतामुद्भावयन्नाह—यदीत्यादि। § 10587

यदि त्वदृष्टिमात्रेण सर्ववित्प्रतिषिध्यते।
तदा मातृविवाहादिनिषेधोऽपि भवेत्तव॥
३२८२॥ § 10589

मातृविवाहादीत्यादिशब्देन स्वपित्रोः सुरतोपभोगादिपरिग्रहः। ततश्च जारजातत्वमापन्नं भवत इति भावः। यथोक्तम्—यद्यत्र भवतो मन्दच-

१ च्छेदना] Correction : ; च्छेद्याना(न ?) (sic !)च्छेदना

क्षुषोऽनुपलब्धिरर्थानपाकुर्यात् हन्त हतोऽसि, पितृव्यपदेशनिबन्धनस्याप्यप्रवृत्तिप्रसङ्गादिति॥ ३२८२॥ § 10590

अत्र परस्य परिहारमाशङ्कते—सुताख्येत्यादि। § 10591

सुताख्यकार्यदृष्ट्या चेद्धेतोस्तस्यास्तितागतिः।
तदभावेऽपि तत्कार्यं ननु कस्याश्चिदीक्षते॥
३२८३॥§ 10593

तस्य मातृविवाहादिकस्य हेतोः सुताख्यादिकार्यदर्शनादनुमानप्रमाणतः सिद्धत्वात्तदनुपलब्धिर्न सिद्धेति न तदभावप्रसङ्गः। तदभाव इत्यादिनाऽस्य कार्यहेतोर्व्यभिचारमादर्शयति—तदभाव इति। तस्य विवाहस्याभावे तथा विवाहितभर्त्रा(?) च सह सुरतोपभोगाभावेऽपि कस्याश्चिद्दुष्टयोषितः परपुरुषसङ्गत्या सुताख्यं कार्यमुपलभ्यते तद्वद्भवतु (तो ?) मातुरपि स्यादित्य-
857/k सिद्धमनुमानम्, ततश्च भवतो जार जातत्वप्रसङ्गो दुर्निवारः। आचार्यधर्मकीर्त्तिनाऽपि विशिष्टपितृव्यपदेशनिबन्धनाभावप्रसङ्गापादनस्य विवक्षितत्वाज्जारजातत्वप्रसङ्गापादनमेव कृतम्॥ ३२८३॥ § 10594

अन्योपलम्भत इत्यादिना परस्योत्तरमाशङ्कते। § 10595

अन्योपलम्भतस्तस्य नासत्ता गम्यते यदि।
ननु चान्योपलम्भस्ते सिद्धस्तद्विषयः कथम्॥
३२८४॥§ 10597

अन्येषां पुरुषाणामुपलम्भोऽन्योपलम्भः। तस्येति। मातृविवाहादेः। नासत्ता गम्यते, किं तर्हि ?, सत्तैव। अत्रान्योपलम्भासिद्धिः, तद्भावयन्नाह—ननु चेत्यादि॥ ३२८४॥ § 10598

कथमिति पृष्टः सन्पर आह—उपदेशादिति। § 10599

उपदेशान्न सर्वज्ञेऽप्ययं किं विद्यते तथा।
इदं च स्वोक्तमपरं किमत्र न समीक्ष्यते॥
३२८५॥§ 10601

सर्वदा चैव पुरुषाः प्रायेणानृतवादिनः।

यथाऽद्यत्वे न विस्रम्भस्तथाऽतीतार्थकीर्त्तने॥
३२८६॥§ 10603

सिद्ध इति प्रकृतेन संबन्धः। अतिप्रसङ्गापादनामु(दु?)पदेश-स्यानैकान्तिकतामादर्शयन्नाह—न सर्वज्ञेऽपीति। अयमिति। उपदेशः। स-र्वज्ञे किं न विद्यते, अपितु विद्यत एव, तत्र यदि मातृविवाहाद्युपदेशः प्रमाणीक्रियते, सर्वज्ञोऽस्तीत्ययमस्मदीयोऽप्युपदेशः किं न प्रमाणीक्रियेत, विशेषाभावात्। किञ्च—स्ववाचैवोपदेशस्याप्रामाण्यमुक्तं भवतेति दर्शयति—इदं चेत्यादि॥ ३२८५॥ ३२८६॥ § 10604

एवं तावन्न स्वोपलम्भनिवृत्तिः सर्वज्ञाभावसिद्धये प्रमाणं युक्ता, निर्विशेषणायाअनैकान्तिकत्वात्सविशेषणायाश्चासिद्धत्वादिति प्रतिपादितम्, इदानीं स-र्वपुरूषोपलम्भनिवृत्तेरसिद्धत्वान्न सर्वज्ञासत्त्वसाधने प्रामाण्यं युक्तमित्येतत्प्र-तिपादयन्नाह—मा वाभूदित्यादि। § 10605

मा वाभूदुपदेशोऽस्य प्रामाण्यं वा तथाऽपि वः।
कृतोऽयं निश्चयः सर्वैः सर्वविन्नोपलभ्यते॥
३२८७॥§ 10607

एवं हि निश्चयो हि स्यात्सर्वसत्त्वात्मदर्शने।
तद्दृष्टौ सर्वविद्भूतो भवानिति च वर्णितम्॥
३२८८॥§ 10609

उपदेश इति। सर्वविदोऽस्तित्वप्रतिपादक इति शेषः। अस्य—प्रामाण्यं वेत्युप देशस्य। सर्वसत्त्वात्मदर्शन इति। सर्वसत्त्वस्वभावदर्शने। अस्त्येवा- 858/k
स्माकं सर्वसत्त्वात्मदर्शनमिति चेदाह—तद्दृष्टावित्यादि। तद्दृष्टौ—सर्वसत्त्वात्म-दृष्टौ॥ ३२८७॥ ॥ ३२८८॥ § 10610

अन्यथा संशयो युक्तोऽनुपलम्भेऽपि सत्त्ववत्।
केचित्सर्वविदः सन्तो विदन्तीति हि सङ्क्यते॥
३२८९॥§ 10612

स्वयमेवात्मनाऽऽत्मानमात्मज्योतिः स पश्यति।

इत्यप्याशङ्क्यतेऽतश्च सर्वादृष्टिरनिश्चिता॥
३२९० ॥§ 10614

अन्यथेति। सर्वसत्त्वात्मदर्शनाभावे। सत्त्ववदिति। देशादिविप्रकृष्टस्य वस्तुनः सत्तायामिव सत्त्ववत्। एतदुक्तं भवति—यथा देशादिविप्रकृष्टस्य वस्तुनः सत्यप्यनुपलम्भे तत्सत्तायां संशयो भवति, सत्यपि वस्तुन्यनुपलम्भात्, एवमन्यपुरुषवर्त्तिनि सर्वज्ञविषयोपलम्भेऽपि संशयो युक्तः। अथवा—अयमर्थः—यथा सर्वज्ञसत्तायामनुपलम्भेऽपि संशयस्तथा सर्वज्ञत्वविषयोपलम्भेऽपि संशयः, द्वयोरपि स्वभावविप्रकर्षेणानुपलम्भसम्भवात्। ननु वस्तुसत्त्वे संशयो युक्तो यतः सत्यपि वस्तुनितदनुपलम्भस्य दर्शनात्कदाचित्स्यादिति सम्भाव्यमानत्वात्। नतु सर्वज्ञदर्शनं कस्यचिदर्वाग्दर्शनस्य सम्भाव्यते, नचासम्भाव्यमाने वस्तुनि प्रेक्षावतः संशयो युक्त इत्यत आह—केचिदित्यादि। स्वयमेवेति। परसिद्धान्ताभ्युपगमादुक्तम्। स्वयमेवेत्यस्यैव निर्देश आत्मनेति। आत्मेति पुरुषः। ज्योतिरिति। चिद्रूपत्वेन प्रकाशात्मकत्वादात्मनः॥ ३२८९॥ ३२९०॥ § 10615

तथाहीत्यादिना इदमेव समर्थयते। § 10616

तथाहि सर्वशब्देन सर्वे प्राणभृतो मताः।
स च सर्वाबहिर्भूत इत्यदृष्टिरनिश्चिता॥
३२९१ ॥§ 10618

स चेति। सर्वज्ञः॥ ३२९१॥ § 10619

स्यादेतदर्वाग्दर्शिन एव सर्वशब्देन विवक्षिता नतु सर्वज्ञः, तेन शङ्का न भविष्यतीत्याह—तदेकेत्यादि। § 10620

तदेकपरिहारेण प्रतिबन्धोऽत्र को भवेत्।
न ह्यन्यैरपरिज्ञानात्स्वरागादि निवर्त्तते॥
३२९२ ॥§ 10622

यदि हि तस्य सर्वज्ञस्य परिहारेणान्येषामर्वाग्दर्शिनामनुपलम्भो
859/k हेतुत्वेनोपादीयते तदाऽनैकान्तिकता, तस्य स्वानुपलम्भवत्सर्वज्ञाभावेन सहाविनाभावलक्षणस्य प्रतिबन्धस्याभावात्। नहीत्यादिना तमेव प्रतिबन्धाभावं समर्थयते॥ ३२९२॥ § 10623

एवमनुपलम्भाख्यस्य प्रमाणस्यानैकान्तिकत्वमसिद्धत्वं च प्रतिपादितम्, इदानीमभावप्रमाणविषयीकृतविग्रहत्वादित्यस्यापि हेतोः सन्दिग्धासिद्धतेति प्रतिपादयन्नाह —केचिदित्यादि। § 10624

केचिदर्वाग्दृशो वाऽपि प्रपश्यन्तेऽनुमानतः।
काश्चिदेव हि केषांचिन्निपुणा मतयः क्वचित्॥
३२९३॥§ 10626

तथाहि वेदभूम्यादेः क्षणिकत्वादिसाधनम्।
पुरः प्रोक्तं सुविस्पष्टमपि नो लक्षितं जडैः॥
३२९४॥§ 10628

तदेवं शङ्कया नास्य ज्ञानाभावोऽपि निश्चितः।
यतोऽसत्त्वं प्रपश्यन्ते निर्विशङ्का हि जातयः॥
३२९५॥§ 10630

केचिन्निपुणमतय अर्वाग्दर्शिनोऽपि सन्तः कदाचिदनुमितेः सर्वज्ञं प्रतिपद्यन्त इति संभाव्यमानत्वात्संदिग्धासिद्धत्वमभावप्रमाणविषयीकृतत्वादित्यस्य हेतोः। तथाहि—वेदध्वनिधरणिगिरितनुवज्रादीनां क्षणिकत्वानात्मत्वादि स्फुटतरमपि भवद्भिर्मीमांसकपशुभिरनुपलक्षितमपि सत्, अस्माभिर्दृढतरसाधनोपदर्शनेन प्रसाधितम्, तथा सर्वज्ञे यदि नाम साधनमिदानीं नोपलभ्यते तथाऽपि सम्भाव्यमानत्वात्सन्दिग्धमित्यतः प्रमाणपञ्चकविरहस्वभावाभावप्रमाणविषयीकृतविग्रहत्वमसिद्धम्। सन्दिह्यमानत्वात्। यत इति। मानाभावात्॥ ३२९३॥ ३२९४॥ ३२९५॥ § 10631

किञ्च—माभून्नामार्वाग्दर्शिनां सर्वेषामेव सर्वज्ञसिद्धावनुमानम्। तथाऽप्यनैकान्तिकता हेतोरिति दर्शयन्नाह—अभावेऽप्यनुमानस्येत्यादि। § 10632

अभावेऽप्यनुमानस्य नातोऽसत्ताविनिश्चयः।
असमारब्धधूमादिकार्यवह्न्यादिसत्त्ववत्॥
३२९६॥§ 10634

प्रतिपादितं हि पूर्वं यथा न प्रमाणं वस्तुनो हेतुर्नापि व्यापकं तत्कथमस्य निवृत्तावपि वस्तु निवर्तते। तथा ह्ययोगोलकवह्न्यादेरनारब्धधूमादिकार्यस्यापवरककुहरान्तर्गतस्य लिङ्गाभावान्नानुमानमुत्पद्यते। अथ च तस्य सत्त्वमनिवृत्तमिति नासत्तानिश्चयस्तद्वत्सर्वज्ञाभावसाधने अनुमानाभावे संशयः। अत इति। अनुमांनाभावात्। असमारब्धं धूमादिकार्यं येन व-

ह्यादिना स तथोक्तः, असमारब्धधूमादिकार्यश्चासौ वह्न्यादिश्चेति विग्रहः, तस्य सत्तायामिव सत्त्ववत्॥ ३२९६॥ § 10635

860/k

कदाचिदुपलब्धेऽर्थे इत्यादिना परः अयोगोलकवह्न्यादिदृष्टान्तसंशयकारणमुपलम्भं दर्शयत्, सर्वज्ञे च तदभावादयुक्तः संशय इति प्रतिपादयन् हेतोरनैकान्तिकतामेव समर्थयते। § 10636

कदाचिदुपलब्धेऽर्थे सन्देहो ननु युज्यते।
यथा स्थाणौ तथा ह्येष उभयांशावलम्बकः॥
३२९७॥§ 10638

यतः स्थाणुनरौ दृष्टौ कदाचिदिति तद्गतिः।
संशयो युज्यते तत्र दृष्टस्त्वेवं न सर्ववित्॥
३२९८॥§ 10640

यो ह्यर्थः कदाचिदुपलब्धपूर्वस्तत्रैव संशयो युज्यते, यथा स्थाणौ नान्यत्र, तथो(स्यो?)भयांशावलम्बित्वात्। अन्यथा हि यत्किंचिददृष्टं तत्सर्वमालम्बेत संशयः।ततश्चोभयांशावलम्बित्वनियमो न स्यात्। तेनायोगोलकवह्न्यादौ युक्तः संशयो नतुसर्वज्ञे, तस्य कदाचिदप्यनुपलम्भात्॥ ३२९७॥ ३२९८॥ § 10641

नन्वित्यादिना प्रतिविधत्ते। § 10642

ननु मातृविवाहादेरसत्त्वं मुक्तसंशयम्।
एतेनैव प्रकारेण तव धीमन्प्रसज्यते॥
३२९९॥§ 10644

यदि कदाचिदुपलब्धेऽर्थे संशयोऽन्यत्राभावनिश्चयस्तदाऽमुना न्यायेन भवतो मातृविवाहादेस्स(रस?)त्त्वमसंशयितं प्राप्नोति। नहि भवता कदाचिन्मातृविवाह उपलब्धपूर्वः। येनात्रापि नाभावनिश्चयो भवेद्भवतः। अत्र च शेषं चोद्यमुत्तरपूर्वव द्वाच्यम्। धीमन्नित्युपहासवचनम्॥ ३२९९॥ § 10645

यद्येवं निर्निबन्धन एव तर्हि संशयः प्राप्त इत्याह—अस्माभिरित्यादि। § 10646

अस्माभिः संशयस्त्वत्र प्रमाभावेऽपि वर्ण्यते।
भावेऽभावे च वस्तूनां प्रमाणविनिवृत्तितः॥
३३०० ॥§ 10648

प्रमाणाभावमात्रस्य हि वस्तुभावाभावयोरपि प्रदर्शनादव्यवस्थितत्वमतः सदसत्तानिश्चयानुत्पत्तेरेव संशयो वर्ण्यते। यथोक्तम्—उपलब्ध्यनुपलब्ध्यव्यवस्थातोविशेषापेक्षो विमर्शः संशय इति॥ ३३००॥ § 10649

स्यादेतन्नैव वस्तुसदसत्तयोरुभयत्रापि प्रमाणनिवृत्तिर्दृश्यत इत्याह—नेत्रादीनामित्यादि। § 10650

नेत्रादीनां हि वैकल्ये वस्तुसत्त्वेऽपि न प्रमा।
तेषामविकलत्वेऽपि वस्त्वभावाद्घटादिवत्॥
३३०१ ॥§ 10652

861/k

ततश्चानुपलम्भस्य केवलस्य द्विधेक्षणात्।
तत्प्रमाभावतोऽप्यस्तु सर्वज्ञे संशयो वरम्॥
३३०२ ॥§ 10654

तथाहि सत्यपि घटादिके वस्तुनि नेत्रविकलस्य न प्रमाणं प्रवर्त्तते। तेषां च मेत्रादीनामवैकल्येऽपि विषयाख्यस्य वस्तुनोऽसन्निहितत्वेनासत्त्वेऽपि न प्रवर्त्तत इति प्रकृतेन सह सम्बन्धः। यथा घटादौ योग्यदेशासन्निहिते। केवलस्येति। दृश्यताविशेषणरहितस्य। द्विधेक्षणादिति। भावेऽभावे च। तदिति। तस्मात्। वरमिति। कुशलमूलप्रतिसन्धानकारणात्। तथाहि—मिथ्यादृष्त्या समुच्छिन्नकुशलमूलानां कुशलमूलप्रतिसन्धानं(ने?)काङ्क्षाऽस्ति, दृष्टिभ्यां वर्ण्यते सन्धिः काङ्क्षाऽस्तिदृष्टिभ्यामिति वचनात् (?)। अत एव तत्र तत्राचार्याः संशयं विदधते—भावे किं प्रमाणमिति चेदत एव संशयोस्त्विति॥ ३३०१॥ ३३०२॥ § 10655

स्यादेतत्—यदि सर्वज्ञोऽस्ति किमिति कदाचित्केनचिन्नोपलभ्यते। यदि नामार्वाग्दर्शिनां नित्यानुपलभ्योऽसाविति स्यात्, तथाऽपि तत्कार्यं वा किं न केनचित् गृह्येत, नहि चक्षुरादीनामप्रत्यक्षत्वे तत्कार्यस्यापि ज्ञानस्याप्रत्यक्षत्वेन भवितव्यमित्यत आह—स हि सन्नपीत्यादि। § 10656

स हि सन्नपि नेक्ष्येत जडैरन्यविकल्पवत्।

साक्षादयोगुडाङ्गारा(र?)वह्निवन्न च कार्यकृत्॥
३३०३॥§ 10658

तत्कार्यं वा यदाऽदृश्यमन्यकल्पजरागवत्।
कार्ये दृश्येऽपि वा तेन नान्वयोऽस्य प्रतीयते॥
३३०४॥§ 10660

सर्वार्थज्ञो यतोऽदृश्यः सदैव जडधीदृशाम्।
नातोऽनुमानतस्तस्य सत्ता सिद्धिं प्रयास्यति॥
३३०५॥§ 10662

अहेतुत्वव्यापकं चोक्तं प्रमाणं वस्तुनोऽस्य च।
निवृत्तावस्य भावोऽपि दृष्टस्तेनापि संशयः॥
३३०६॥§ 10664

नेक्ष्येत साक्षादिति सम्बन्धनीयम्। नहि यावत् किञ्चित्सकृत्सर्वमुपलभ्यम्,येनोपलम्भाभावात्सर्वज्ञाभावः स्यात्, सतोऽप्यन्यपुरुषगतस्य विकल्पस्य परैरनुपलम्भात्। नाप्यवश्यं कारणानि सदैव समारब्धकार्याणि भवन्ति, येन सर्वज्ञस्यकार्यानुपलम्भादसत्त्वं स्यात्, अनारब्धधूमकार्यस्याप्ययोगोलकवह्न्यादेर्दर्शनात्। भवतु नाम सदैव कारणानां कार्यव-
862/k त्त्वं तथाऽपि न तत्कार्याभावनिश्चयः, नहि सर्वकार्यमुत्पन्नमपि दृश्यत्वेन व्याप्तम्, येन कार्यानुपलब्ध्या तदभावः सिद्ध्येत्।उत्पन्नस्यापि कार्यस्यादर्शनात्। अन्यकल्पजरागवत्—यथाऽन्यस्य पुरुषस्य कल्पादयोनिसौमनस्काराज्ञातोऽपि रागो नोपलभ्यते, न चास्याभावः। सत्यपि वा कार्यदर्शने तत्कारणस्यातीन्द्रियत्वादगृहीततदन्वयव्यतिरेकस्य पुंसस्तदनुमानानुत्पत्तिसम्भवात्, तथा—सत्यपि सर्वे(सर्वज्ञे?)नानुमानात्सिद्धिर्भवेदिति सम्भाव्यते। जडधीदृशामिति। धीरेव दृक्—धीदृग्, जडा धीदृग् येषां ते तथोक्ताः। अपिच पूर्वमुक्तम्—यथा न प्रमाणं वस्तुनो हेतुः, नापि व्यापकं, तत्कथमस्यानुमानस्याहेतु(त्व?)व्यापकभूतस्य निवृत्तावपि वस्तु निवर्त्तेतेति भावः। अहेतुश्च तदव्यापकं चेति तथोक्तम्—नचाप्येतच्छक्यं वक्तुम्, अकारणाव्यापकभूतस्याप्यनुमानाख्यस्यप्रमाणस्य निवृत्तौ वस्तु निवर्त्तमानं दृष्टमेव(मिति?)। नहि दृष्टेऽनुपपन्नं नामेत्याशङ्क्याह—निवृत्तावस्य भावोऽपि दृष्ट इति। अस्यानुमानस्य निवृत्तावपि सत्यामस्य वस्तुनो भावोऽपि दृष्टः,

यथा—अयोगोलकवह्न्यादेरिति पूर्वमुक्तम्॥ ३३०३॥॥ ३३०४॥ ३३०५॥ ३३०६॥ § 10665

एवं विस्तरेण सर्वज्ञाभावसिद्धये बाधकप्रमाणासम्भवं प्रतिपाद्योपसंहरति—तस्मादित्यादि। § 10666

तस्मात्सर्वज्ञसद्भावबाधकं नास्ति किञ्चन।
प्रमाणं साधकं त्वस्य विस्तरेणाभिधास्यते॥
३३०७॥§ 10668

स्यादेतत्—यथाऽस्माकं न किञ्चित्तद्बाधकं प्रमाणमस्ति, तथा भवतां (न) तत्साधकमपीत्यत्राह—साधकं त्वस्येति॥ ३३०७॥ § 10669

यदुक्तम—समस्तावयवव्यक्तिविस्तरज्ञानसाधनमित्यादि, अत्राह—निःशेषार्थेत्यादि। § 10670

निःशेषार्थपरिज्ञानसाधने विफलेऽपि च।
सुधियः सौगता यत्नं कुर्वन्त्यन्येन चेतसा॥
३३०८॥§ 10672

अने(न्ये?)न चेतसेति। अने(न्ये?)नाभिप्रायेण॥ ३३०८॥ § 10673

कः पुनरसावित्याह—स्वर्गेत्यादि। § 10674

स्वर्गापवर्गसम्प्राप्तिहेतुज्ञोस्तीति गम्यते।
साक्षान्न केवलं किन्तु सर्वज्ञोपि प्रतीयते॥
३३०९॥§ 10676

863/k

मुख्यं हि तावत्स्वर्गमोक्षसम्प्रापकहेतुज्ञत्वसाधनं भगवतोऽस्माभिः क्रियते, यत्पुनरशेषार्थपरिज्ञातृत्वसाधनमस्य तत्प्रासङ्गिकमन्यत्रापि भगवतो ज्ञानप्रवृत्तेर्बाधकप्रमाणाभावात्साक्षादशेषार्थपरिज्ञानात्सर्वज्ञो भवन् न केनचिद्बाध्यत इति, अतो न प्रेक्षावतां तत्प्रतिक्षेपो युक्तः। किंतु ये सर्वज्ञत्वाधिगमार्थिनस्तेषां तदर्थप्रवृत्तिर्युक्ता चेति दर्शितं भवति॥ ३३०९॥ § 10677

ततश्चैवं बाधकप्रमाणाभावे सति वक्ष्यमाणे च परिस्फुटे सर्वज्ञसाधने योऽयं भवतां निश्चयैकविषयस्य सर्वज्ञस्य प्रतिक्षेपः—सर्वे एव पुरुषा रागादिभिरविषयानोपप्लुता इति, स केवलं मोहादेवेति दर्शयति—ततश्चेत्यादि। § 10678

ततश्च बाधकाभावे साधने सति च स्फुटे।
कस्माद्विप्रतिपद्यन्ते सर्वज्ञे जडबुद्धयः॥
३३१० ॥§ 10680

स्यादेतत्—तथाभूतपुरुषसंसाधकं प्रमाणं तथाविधं नास्तीत्येवं मन्यमानैरस्माभिः प्रतिक्षिप्यते, नतु मोहादित्याह—माभूद्वेत्यादि। § 10681

माभूद्वा साधनं तत्र बाधके त्वविनिश्चिते।
संशयः स्यादयं त्वेषां निश्चयः किंनिबन्धनः॥
३३११ ॥§ 10683

एतच्चाभ्युपगम्योच्यते, साधनं तु वक्ष्यमाणमस्त्येव। अयं निश्चय इति। नास्ति सर्वज्ञ इत्येवं मीमांसकानाम्॥ ३३११॥ § 10684

यच्चोच्यते भवद्भिः—चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितमित्येवञ्जातीयकमर्थं शक्नोत्यवगमयितुं नान्यत्किञ्चनेन्द्रियमिति, एतदपि केवलं प्रतिज्ञामात्रमप्रमाणकमेवोद्घोष्यते भक्तिवादेनेति दर्शयति—भूतादीत्यादि। § 10685

भूतादिबोधने शक्ता चोदनैवापरं नतु। ५
इत्ययं नियमो युक्तो ह्यन्यासत्त्वे विनिश्चिते॥
३३१२ ॥§ 10687

अपरमिति। सर्वज्ञप्रत्यक्षादि। अन्यासत्त्व इति। अन्यस्य सर्वज्ञस्यासत्त्वे विनिश्चिते सत्येवं वक्तुं युक्तं नान्यथा, अवधारणस्य नैष्फल्यात्॥ ३३१२॥
§ 10688

तत्र सर्वं जगत्सूक्ष्मेत्यादावाह—प्रधानेत्यादि। § 10689

प्रधानपुरुषार्थज्ञसर्वार्थज्ञप्रसिद्धये।
तच्च मानं पुरः प्रोक्तं पश्चादन्यच्च वक्ष्यते॥
३३१३ ॥§ 10691

अतः सर्वजगत्सूक्ष्मभेदज्ञार्थप्रसाधने।

नास्थाने क्लिश्यते लोकः संरम्भाद्ग्रन्थवादयोः॥
३३१४॥§ 10693

864/k

नह्यस्माभिः सर्वज्ञविषयां चिन्तां मुक्त्वा सर्वज्ञसाधने प्रयत्नः क्रियते। किं तर्हि ? प्रधानभूतधर्मज्ञसाधन एव। तथा च पूर्वम्—तेनार्थापत्तिलभ्येन धर्मज्ञोपगमेनेत्यादिना धर्मज्ञसाधनेऽर्थापत्त्याख्यं भवन्मतेनैव प्रमाणमुक्तम्, पश्चाच्चानुमानाख्यं प्रमाणमभिधास्यते, तेन नास्थाने लोकः क्लिश्यते, किं तर्हि ?, स्थान एव ॥ ३३१३॥ ३३१४॥ § 10694

सर्वप्रमातृसम्बद्धेत्यादावाह—सर्वेत्यादि। § 10695

सर्वप्रमातृसम्बद्धप्रत्यक्षाद्यनिवारणात्।
केवलागमगम्यत्वं नाप्यते पुण्यपापयोः॥
३३१५॥§ 10697

धर्मादिविषयस्य सर्वप्रमातृसंबद्धस्य प्रत्यक्षादेर्दर्शन(रदर्शन ?)मात्रेण निवारयितुमशक्यत्वान्न धर्माधर्मयोरागममात्रगम्यत्वं लभ्यते॥ ३३१५॥ § 10698

यच्चोक्तमेतावता चेत्यादि, तत्राह—एतावतेत्यादि। § 10699

एतावता च मीमांसापक्षेऽसिद्धेऽपि यः पुनः।
सर्वज्ञवारणे यत्नः सोऽतिसौख्या(मौर्ख्या ?)त्परैः
कृतः ३३१६§ 10701

असिद्धेऽपीति। धर्मज्ञस्य सिद्धत्वात्। परैरिति। मीमांसकैः॥ ३३१६॥ § 10702

ये तु विच्छिन्नमूलत्वादित्यादावाह—ये त्वविच्छिन्नमूलत्वादित्यादि। § 10703

ये त्वविच्छिन्नमूलत्वाद्धर्मज्ञत्वेऽहते सति।
सर्वज्ञान्पुरुषानाहुर्धीमत्ता तैः प्रकाशिता॥
३३१७॥§ 10705

अहत इत्यकारप्रश्लेषो द्रष्टव्यः। तैरिति। बौद्धैः॥ ३३१७॥ § 10706

साक्षात्प्रत्यक्षदर्शित्वादित्यादावाह—रसनेत्यादि। § 10707

रसनेन्द्रियसम्बन्धान्मद्याशुचिरसादयः।
वेद्येरन्यदि तस्यैव तदानीं निन्द्यता भवेत्॥
३३१८॥§ 10709

भूतार्थभावनोद्भूतमानसेनैव चेतसा।
अप्राप्ता एव वेद्यन्ते निन्दिता अपि संवृतौ॥
३३१९॥§ 10711

यदि नाम साक्षान्मद्यरसादिसंवेदनमभूत्तस्य तथाऽपि न धर्मज्ञत्व-हानिर्भवेत्। निन्द्यत्वमापद्यत इति चेत्, यो रसनादीन्द्रियसंसर्गेण तान्त्र-सनादीन्संवेदयते सलोकसंवृत्त्या निन्द्यो भवेत्, नतु भगवांस्तथा संवेदयते, किं तर्हि ?, मनसा, तच्चाप्राप्तविषयमिति न लोके तत्कृतं निन्द्यत्वं प्रतीत-
865/k म्। नहि निन्द्यत्वं परमार्थतः कस्यचि दस्ति, अनवस्थितत्वात्तस्य। तथाहि—श्रोत्रियस्य यन्निन्द्यं न तज्ज्ञोद्विंग(जुङ्गित?)स्य, किंतु संवृत्या लोके मद्यादयो गर्हितास्तान्संवेदयतस्तथाऽपि भगवतो न निन्द्यत्वम्, मद्यस्य मनसैव वेद-नात्। स्यादेतत्—यथा रसनेन्द्रियसम्बन्धादन्येषां मद्यादिसंवित्तौ दुःखाद्य-नुभवस्तथा मनसाऽपि संवेदयतः प्राप्नोतीति। नैतदस्ति। रसनादीन्द्रिय-सम्बन्धेनानुभूयमाना रसादय इन्द्रियस्यानुग्रहोपघातं कुर्वन्तो दुःखादिहेतवो भवन्ति। ते चाकुशलादिकर्मानुरूपेण विपर्यस्तचेतसां केषाञ्चिदेव तथा दुःखा-दिहेतुत्वेन प्रख्यायन्ते, न सर्वेषाम्। यथाहि प्रेतानां पूयादिरूपेण सलिलादि। नचैवं (चेदं?) भगवतः सर्वमस्ति। तथाहि मनसैव संवेदनान्नेन्द्रियोप-घातादिसम्भवः, अनाश्रवपञ्चव्यवहारात्मकत्वाद्भगवतो नापि साश्रवकर्माधिप-त्यसम्भवः, अविपरीतानित्यादिरूपेण संवेदनान्नापि विपर्यस्तत्वम्, अत एव भगवतो मानसस्यापि दौर्मनस्यादिलक्षणस्य दुःखादेरसम्भवः, तस्य मोह-जत्वात्। एतच्च सर्वं बाह्यार्थसम्भवे सति चोद्यमवतरति। विज्ञानवादन-ये तु दूरीकृतावकाशमेतत्। तथाहि—परमार्थतो रूपस्कन्धासम्भवान्न स-न्त्येवाशुच्यादयस्तेषाम्, मा भूत्तत्परिकल्प्या वासना,(?)बोधमात्रसमुत्थित-त्वात्। अतो न (ते) सात्मीकृतपरमार्थदर्शनानां दूरीभूताशेषाशुच्यादिप्र-तिभासानां दर्शने प्रतिभासन्ते यथा तिमिरादिदोषापगमेऽनुपहतचक्षुषांद-र्शने न केशादयः। यथोक्तम्— नन्वज्ञानेन भासन्ते तस्याशुचिरसादयः। असंवेदास्ततः सिद्धा द्वितीयशशिबिम्बवत्॥ यस्य तु विप्रस्य व्यापितया सकलाशुचिदेशसम्बद्धा वेदध्वनयो वदनोदरादिवर्त्तिनः सदैव स कथमिह लोके न निन्द्यो भवेत्॥ ३३१८॥ ३३१९॥ § 10712

नच वेदोपवेदाङ्गेत्यादावाह—यत एवेत्यादि। § 10713

यत एव न वेदादिप्रोक्तार्थप्रतिपादकम्।
तायिनो दृश्यते वाक्यं तत एव स सर्ववित्॥
३३२० ॥§ 10715

सम्भाव्यते समस्तासत्तीर्थ्याऽसाधारणस्थितिः।
प्रमादाधीतमात्मादि वेदेऽलीकं ब्रवीति हि॥
३३२१ ॥§ 10717

यद्यथैवावस्थितं वस्तु सदादिरूपेण तस्य तथैव ज्ञानात्सर्वविद्भवति। नच यथा वेदे निर्दिष्टा आत्मादयोऽर्थास्ते तथैव सन्ति प्रमाणेन बाध्यमानत्वात्। तत्कथं तथैवतानुपदिशंस्तत्त्वदर्शी भवेत्। नचैतच्छक्यं वक्तुं मिथ्यात्वेनापि ते नैव ज्ञाता इति, यथा ज्ञाता एव। तथाहि—वेदादिविहिताः सर्व एव 866/k
प्राणिवधादयोऽकुशलाः कर्मपथ्या दुर्गतिहेतुत्वेन निर्दिष्टाः, तथा—नास्तीह सत्त्व आत्मा वा धर्मास्त्वेते सहेतुकाः इत्यादिनाऽऽत्मादयोऽप्यसत्त्वेनोक्ता इत्यसिद्धं वेदादिविहितपदार्थापरिज्ञानं भगवतः॥ ३३२०॥ ३३२१॥ § 10718

स्वग्रन्थेष्वनिबद्धोऽपीत्यादावाह—अद्वितीयमित्यादि। § 10719

अद्वितीयं शिवद्वारं कुदृष्टीनां भयङ्करम्।
विन(ने?)येभ्यो हितायोक्तं नैरात्म्यं तेन तु
स्फुटम्॥ ३३२२॥§ 10721

अन्यतीर्थ्यैरनधिगतत्वादद्वितीयम्, तेषां सर्वेषामेव वितथात्मदृष्ट्यभिनिविष्टत्वात्। एतच्च सर्वं नैरात्म्यविशेषणम्। शिवद्वारमिति। निर्वाणप्रवेशोपायभूतत्वात्। शिवमिति निर्वाणमुच्यते। कुदृष्टीनामिति। कुत्सिता आत्मादिदृष्टयो येषां ते तथोक्ताः।वितथदृष्ट्यभिनिविष्टबालजनत्रासकरमित्यर्थः। यथोक्तम्— नास्म्यहं न भविष्यामि न मेऽस्ति न भविष्यति। इति बालस्य संत्रासः पण्डितस्य भयक्षणः॥ इति। एतेन विपरीताभिनिवेशावस्थितैस्तदधि(ग)मो (व)क्तुमपि न शक्यते, किमुताधिगन्तुमिति दर्शितं भवति॥ ३३२२॥ § 10722

नचापि पृथग्जनभूमिस्थितेन केनचित्कदाचिदपि परिज्ञातपूर्वं तदिति दर्शयति —संसार्यनुचितमिति। § 10723

---

८ नास्म्यहं] Correction : ; नास्त्यहं (sic !)नास्म्यहं

संसार्यनुचितं ज्ञातं सर्वानर्थनिवर्त्तकम्।
तदभ्यासादियुक्तानां गुणरत्नाकरं परम्॥
३३२३॥§ 10725

ईदृक्क(?) परमं तत्त्वं जानन्ति कवयो यदि।
प्रधानपुरुषार्थज्ञान्सर्वज्ञान्को न मन्यते॥
३३२४॥§ 10727

संसारिभिः पृथग्जनैरनुचितमनभ्यस्तमित्यर्थः। कथं हिताय तत्प्रभवति येन तदर्थं देशितमित्याह—ज्ञातमित्यादि। ज्ञातं साक्षात्कृतं सत्क्लेशजन्मादिलक्षणस्याशेषानर्थराशेर्निवर्त्तकं भवति। उत्तरकालमपि तदभ्यस्यमानं रथ्यादि(?)वैशेषिकगुणाभिनिवर्त्तकमित्येव परमं पुरुषार्थोपयोगितत्त्वं यदि कवयोऽधिगच्छन्ति, तेऽपि सन्तु सर्वज्ञाः, न ह्यस्माभिरेकपुरुषावधिकमेव सर्वज्ञत्वमभ्युपेयते, किं तर्हि ?, य एवं यथोदिततत्त्ववेदी स एव सर्वविदिष्यते नान्यः, न चैवं कवीनामस्ति, तेनातिप्रसङ्गो न भवति॥ ३३२३॥ ३३२४॥ § 10728

867/k

एतेन—यदुक्तं सर्वज्ञेषु च भूयस्स्वित्यादि, तदपि प्रत्युक्तमिति दर्शयन्नाह—इदं चेत्यादि। § 10729

इदं च वर्द्धमानादेर्नैरात्म्यज्ञानमीदृशम्।
न समस्त्यात्मदृष्टौ हि विनष्टाः सर्वतीर्थिकाः॥
३३२५॥§ 10731

स्याद्वादाक्षणिकस्या(वा?)दि
प्रत्यक्षादिप्रबो(बा?)धितम्।
बह्वेवायुक्तमुक्तं यैः स्युः सर्वज्ञाः कथं नु ते॥
३३२६॥§ 10733

वाहीकादिप्रसिद्धेऽस्मिन्प्रत्यक्षेऽर्थे स्खलन्ति ये।
कथं सम्भाव्यते तेषामत्यक्षाधिगमः स्फुटः॥
३३२७॥§ 10735

असर्वज्ञत्वमेवं तु अ(प्र?)स्पष्टमवगम्यते।
मिथ्याज्ञानानुषङ्गित्वाद्विपरीतप्रकाशनात्॥
३३२८॥§ 10737

स्थाणौ नर इति भ्रान्तः प्रतिपत्त्या(त्ता?) यथा परः।
सर्वाभिश्च परीक्षाभिर्विज्ञेयो हेतुसिद्धितः॥
३३२९॥§ 10739

सम्यक् सर्वपदार्थानां तत्त्वज्ञानाच्च सर्ववित्।
हेतावतो न सम्बोध्या संदिग्धव्यतिरेकिता॥
३३३०॥§ 10741

यथोक्तं तत्त्वज्ञानं यदि वर्द्धमानकपिलादीनां सम्भवेत्तदा तेषामपि सर्वज्ञत्वं भवतु, यथा सर्व एवामी सर्वदोषप्रसवहेतुवितथात्मग्रहग्राहगृहीताः प्रत्यक्षादिप्रमाणबाधिताक्षणिकादिपदार्थानामुपदेष्टारः, तत्कथमाकुमारमतिप्रतीतिपथमुपगतेष्वपिपदार्थेषु प्रस्खलतामेषामतीन्द्रियार्थदर्शनं सम्भावनापथमवतरिष्यति, येनोच्यतेकपिलो नेति का प्रमेति। तथाहीयमत्र प्रमा स्फुटतरमभिधातुं शक्यते, ये मिथ्याज्ञानानुषङ्गिणस्ते सर्वविदो न भवन्ति, यथा स्थाणौ नर इति समुपजातविभ्रमः पुमान्, मिथ्याज्ञानानुषङ्गिणश्च वर्द्धमानादय इति विरुद्धव्याप्तोपलब्धिः। सर्वज्ञ(त्व)विरुद्धेनासर्वज्ञत्वेन मिथ्याज्ञानानुषङ्गित्वस्य व्याप्तत्वात्। न चासिद्धो हेतुः, यतो विपरीतार्थप्रकाशनमेषां सर्वाभिः परीक्षाभिः प्रतिपादितम्। नचापिसन्दिग्धविपक्षव्यावृत्तितयाऽनैकान्तिकता हेतोः, यतः सम्यगशेषपदार्थपरिज्ञातृत्वेन सर्वज्ञत्वमिष्यते। नच यत्र सम्यग् ज्ञानं तत्र तद्विरुद्धस्य मिथ्याज्ञानस्य सम्भवः॥ ३३२५॥ ३३२६॥ ३३२७॥ ३३२८॥ ३३२९॥ ३३३०॥ § 10742

स्यादेतत्—यदि नाम विपरीतार्थप्रकाशनमेषाम्, तथाऽपि मिथ्याज्ञानानुषङ्गि त्वमतोऽवसातुं न शक्यते, यतोऽन्यथाऽपि व्यवहाराः शक्यन्ते कर्त्तुं विचि- 868/k
त्राति(भि?)सन्धित्वात्पुरुषाणाम्, तेन हेतोः संदिग्धासिद्धतेत्येतदाशङ्क्याह—आभिप्रायिकमित्यादि। § 10743

आभिप्रायिकमेतेषां स्याद्वादादिवचो यदि।

तात्त्विकं सर्ववस्तूनां किमेभी रूपमिष्यते॥
३३३१॥§ 10745

यदि ह्यन्याभिप्रायेण तैरेतत्स्याद्वादादिप्रमाणविरुद्धमित्यु(मप्यु?)क्तमित्यभिधीयते। अभिधीयताम्, नह्यस्माभिः स्वातन्त्र्येण वर्द्धमानादीनामसर्वज्ञत्वं साधयितुमिष्टम्, किंतु भवता परस्परविरुद्धमतावस्थितेन कपिलादिषु यदि सुगतः सर्वज्ञस्तदा कपिलो नेति का प्रमेत्युक्तम्, अत्रास्माभिः प्रमाणं भवन्मत्या तेषां मतभेदमङ्गीकृत्याभिधीयते, तेन नासिद्धता हेतोः। तथाहि यद्येषामाभिप्रायिकं वचो वर्ण्यते तदा किमेषां पारमार्थिकं वस्तुरूपमिष्टमिति वक्तव्यम्॥ ३३३१। § 10746

परं (एवं?) पृष्टः सन्पर आह—अनात्मक्षणिकत्वादीति। § 10747

अनात्मक्षणिकत्वादि यद्येवं सर्वदर्शिनः।
साक्षात्समस्तवस्तूनां तत्त्वरूपस्य दर्शनात्॥
३३३२॥§ 10749

सन्तु तेपि समस्तानामैकमत्येन संस्थितेः।
परस्परविरुद्धार्थं नीतार्थं न हि ते जगुः॥
३३३३॥§ 10751

यदि सात्मादीनि ब्रूयात्तदा मतभेद एवोक्तः स्यादिति नासिद्धता भवेत्।यद्येवमित्यादिनोत्तरमाह—नह्यस्माभिः श्रृङ्गग्राहिकयाऽयमसौ सर्वज्ञ इत्येवं साधयितुमिष्टः, किंतु सामान्येन। यदि कपिलादीनामेवंविधतत्त्वपरिज्ञानमभ्युपगम्यतेन तर्हि भवता वक्तव्यम् मतभेदः कथं तयोरिति, सर्वेषामैकमत्येन स्थितत्वात्। यस्तु परस्परविरुद्धार्थोपदेशस्तेषां स नेयार्थतया व्यवतिष्ठते। नह्यैकमत्येन स्थिताः परस्परविरुद्धं नीतार्थं—तात्त्विकं रूपं गदन्तीति युक्तम्। तस्मान्मतभेदमिच्छताना(मा?)भिप्रायिकं वचो वाच्यम्, एषां मतभेदाभ्युपगमे च न वक्तव्यम्—को नामैको निरूप्यतामिति, यतः सुगत एव यथोक्तज्ञानयोगितया सर्वज्ञत्वेनावधार्यते नान्य इति निरूपितमेतत्॥ ३३३२॥ ३३३३॥ § 10752

किंच कपिलादीनां यथोक्तज्ञानाभ्युपगमे सुगतत्वमेवापद्यत इत्येतद्दर्शयन्नाह—प्रतिपादितरूपस्येत्यादि। § 10753
869/k

प्रतिपादितरूपस्य सर्ववस्तुगतस्य च।

साक्षात्तत्त्वस्य विज्ञानात्सुगताः सर्वदर्शिनः॥
३३३४॥§ 10755

तेषां चैवंविधे ज्ञाने सुगतत्वं न भिद्यते।
प्रशस्तज्ञानयोगित्वादेतावत्तस्य लक्षणम्॥
३३३५॥§ 10757

प्रतिपादितं प्रसाधितं प्रमाणतो रूपं स्वभावो यस्यानात्मादिलक्षणस्य तत्त्वस्य तत्तथोक्तम्। तेषामिति। वर्द्धमानादीनाम्। एतावदिति। प्रशस्तज्ञानयोगित्वम्।तस्येति। सुगतत्वस्य। यतो नैरात्म्यज्ञानात्प्रशस्तं समस्तज्ञेयाद्यावरणप्रहाणं गत इति सुगत उच्यते॥ ३३३४॥ ३३३५॥ § 10758

किञ्च—सामान्येनापि सर्वज्ञसम्भवे साध्यमाने भगवत्येवावतिष्ठते सामर्थ्यादिति दर्शयति—तत्सम्भव्यपीत्यादि। § 10759

तत्सम्भव्यपि सर्वज्ञः सामान्येन प्रसाधितः।
तल्लक्षणाविनाभावात्सुगतो व्यवतिष्ठते॥
३३३६॥§ 10761

तदिति। तस्मात्। लक्षणाविनाभावादिति। सर्वज्ञलक्षणाविनाभावात् ३३३६ ननु विशेषनिर्देशमन्तरेण कथमसौ लभ्यत इत्याह—अनिर्दिष्टविशेषोऽपीत्यादि। § 10762

अनिर्दिष्टविशेषोऽपि सर्वज्ञः कोऽपि सम्भवेत्।
यो यथावत् जगत्सर्वं वेत्त्यनात्मादिरूपतः॥
३३३७॥§ 10764

यो हि सर्वं जगदनात्मादिरूपेण यथावदवगच्छति स सर्वज्ञ इत्येवं सामान्येन कृतेऽपि सर्वज्ञलक्षणे यत्र तदुपलभ्यते स सामर्थ्याद्विशेषोऽवगम्यत एवेति विशेषोपादानमनर्थकम्, एतच्च सर्वज्ञलक्षणं भगवत्येवोपलभ्यते नान्यत्र, विचित्रैरुपायैरविकलचतुःसत्यलक्षणसाभ्युपायहेयोपादेयतत्त्वप्रकाशनादिति भावः। नह्यविदितं वस्तु तथाभावैस्तथावत्तदविपरीतमविकलमुपदेष्टुं शक्यते। यथोक्तम्— परोक्षोपेयतद्धेतोस्तदाख्यानं हि दुष्करम् इति॥ ३३३७॥ § 10765

स्यादेतद्यदि नामानात्मादिरूपतो जगद्विदितमस्य तथापि कथमसौ सर्वज्ञः सिद्ध्यतीत्याह—प्रत्यक्षीकृतनैरात्म्य इत्यादि। § 10766

प्रत्यक्षीकृतनैरात्म्ये न दोषो लभते स्थितिम्।
तद्विरुद्धतया दीप्रे प्रदीपे तिमिरं यथा॥
३३३८॥§ 10768

क्लेशज्ञेयावरणप्रहाणतो हि सर्वज्ञत्वम्, तत्र क्लेशा एव रागादयो य-
870/k थाभूतदर्शनप्रति बन्धा(न्ध?)भावात्क्लेशावरणमुच्यन्ते, दृष्टस्यापि हेयोपादेयत-
त्त्वस्य यत्सर्वाकारापरिज्ञानं प्रतिपादनासामर्थ्यं च ज्ञेयावरणम्। तत्र क्लेशाव-
रणस्य नैरात्म्यप्रत्यक्षीकरणात्प्रहाणिः। ज्ञेयावरणस्य तु तस्यैव नैरात्म्यदर्शन-
स्य सादरनिरन्तरदीर्घकालाभ्यासात्। तथाह्यमी रागादयः क्लेशा वितथात्मद-
र्शनमूलका अन्वयव्यतिरेकाभ्यां निश्चिताः, न बाह्यार्थबलभाविनः। यतः स-
त्यपि बाह्यार्थे नायोनिशोमनच्छा(स्का?)रमन्तरेणोत्पद्यन्ते। विनापि चार्थेना-
योनिशोविकल्पसंमुखीभावे समुत्पद्यन्ते। नच स(य?)त्सदसत्तानुविधायि
यन्न भवति तत्तत्कारणं युक्तमतिप्रसङ्गात्। नाप्येते परपरिकल्पितात्मसम-
वायिनः, तस्यात्मनो निरस्तत्वात्। सत्यपि वा तस्मिन्नित्यं रागादीनामुत्पत्त्यन-
पायप्रसङ्गात्। उत्पत्तिस्थितिकारणस्याविकलस्यात्मनः सर्वदा सन्निहितत्वात्।
परैरनाधेयातिशयस्य तदपेक्षानुपपत्तेश्चेति बहुधा चर्चितमेतत्। सदसतोश्चाश्र-
यणनिषेधादयुक्तमेषां क्वचित्समवायित्वमित्यतो न नित्यहेतुप्रतिबद्धात्मस्थित-
यः। नापि बाह्यार्थबलभाविनः। किंत्वभूतात्मदर्शनबलसमुद्भाविनः, तथाह्यह-
मित्यपश्यतो नात्मस्नेहो जायते, नापि ममेत्यगृह्णत आत्ममुखोत्पादानुकूल-
त्वेनागृहीते वस्तुन्यात्मीयत्वेनाभिष्वङ्गः समुद्भवति। द्वेषोऽपि नहि क्वचिदसक्त-
स्यात्मात्मीयप्रतिकूलत्वेनागृहीते वस्तुनि प्रादुर्भावमासादयति। आत्मीयानुप-
रोधिनि तदुपरोधप्रतिघातिनि च तस्यासम्भवात्। एवं नामादयोऽपि वा-
च्याः। तस्मादनादिकालीनं पूर्वपूर्वसजातीयाभ्यासजनितमात्मदर्शनमात्मीय-
ग्रहं प्रसूते, तौ चात्मीयस्नेहम्, सोऽपिद्वेषादिकमित्यन्वयव्यतिरेकाभ्यामात्म-
ग्रहादात्मात्मीयग्रहमूलत्वमेषां स्फुटतरमागोपालाङ्गनमवसितमेव। आत्मद-
र्शनविरुद्धं च नैरात्म्यदर्शनम्, तद्विपरीताकारालम्बनत्वात्। अनयोर्हि युग-
पदेकस्मिन् सन्ताने रज्जुसर्पतज्ज्ञानयोरिव सहावस्थानमैक्यं च विरुद्धम्। अतो
नैरात्म्यदर्शनस्यात्मदर्शनविरोधात्तन्मूलैरपि रागादिभिः सह विरोधो भवति,
दहनविशेषे(णे)व शीतकृतरोमहर्षादिविशेषस्य। तेन सर्वदोषविरोधिनैरात्म्य-
दर्शने प्रत्यक्षीकृते सति न तद्विरुद्धो रागादिदोषगणोऽवस्थानं लभते तिमिर-
वदालोकपरिगते देश इत्यतो नैरात्म्यदर्शनात्क्लेशावरणप्रहाणं भवति। प्रयोगः
—यत्र यद्विरुद्धवस्तुसमवधानं न तत्र तदपरमवस्थितिमासादयति, यथा
दीप्रप्रदीपप्रभाप्रसरसंसर्गिणि धरणितले तिमिरम्, अस्ति च दोषगणविरुद्ध-

३--४ यथाभूत] Correction: ; भूत (sic!)यथाभूत
९ नायोनिशो] Correction: ; नायोनिसो (sic!)नायोनिशो
९--१० नायोनिशो] Correction: ; नायोनिसो (sic!)नायोनिशो

नैरात्म्यदर्शनसमवधानं प्रत्यक्षीकृतनैरात्म्यदर्शने पुंसीति विरुद्धोपलब्धिः।

§ 10769

स्यादेतत्—यथा नैरात्म्यदर्शनसमाक्रान्ते चेतसि विरुद्धतयाऽऽत्मद-
र्शनस्योत्प त्तुमनवकाशस्तथा नैरात्म्यदर्शनस्याप्यात्मदर्शनसमाक्रान्ते मन- 871/k
सि, विरोधस्य तुल्यत्वात्, ततश्च कस्यचिन्नैरात्म्यदर्शनस्यासम्भवादसिद्धो
हेतुः। सम्भवतु वा न वा नैरात्म्यदर्शनम्, तथाऽप्यनयोर्विरोधे सत्यपि
नात्यन्तं बाध्यबाधकभावः सिद्ध्यति, यथा रागद्वेषयोः सुखदुःखयोर्वा। य-
तोऽत्यन्तप्रहाणमिह साधयितुमिष्टम्। नतु तावत्कालासमुदाचारमात्रमित्य-
तोऽनैकान्तिकता हेतोः। दृश्यन्तेऽपि सतामखण्डितमहिमानो रागादयः स-
मुदयमासादयन्त इत्यतोऽपि हेतोर्नैकान्तिकतेति। नैतदस्ति। यदि नैरात्म्य-
विकल्पस्योत्पादोऽप्रहाणक्लेशस्य सन्ताने न संभवत्तदा न सम्भवेन्नैरात्म्य-
दर्शनोदयावकाशः, यावताऽनुभवसिद्धस्तावन्नैरात्म्यविकल्पसंमुखीभावः स-
र्वेषामेव। स एव च भावनया कामिनीविकल्पवत्प्रकर्षगमनसम्भवादन्ते
स्फुटप्रतिभासतया प्रमाणप्रतीतार्थग्राहितया च प्रत्यक्षतामापद्यत इति कथं
नैरात्म्यदर्शनोदयासम्भवः। अपि च—यथाऽन्धकारपरिगते देशे कालान्त-
रेण प्रकाशोदयावकाशसम्भवस्तथेहापि किं न सम्भाव्यते। नचाप्येवं श-
क्यं वक्तुम्—सैव तादृशी भावना न कस्यचित्सम्भवति, या तथाभूतप्र-
त्यक्षज्ञानफला भवेदिति। यतोऽसम्भवे कारणं वचनीयम्। तथाहि—भाव-
नायामप्रयोगे सर्वेषामेवानर्थित्वं वा कारणं भवेत् ?,प्रेक्षावतः प्रवृत्तेरर्थित-
या व्याप्तत्वात्। सत्यप्यर्थित्वे प्रहेयस्वरूपापरिज्ञानाद्वा न प्रवर्त्तते प्रेक्षावान्
?, अनिर्ज्ञातस्वरूपस्य दोषस्य हातुमशक्यत्वात्। सत्यपि तत्स्वरूपज्ञाने
नित्यत्वं वा दोषाणां पश्यंस्तत्प्रहाणाय न यत्नमारभते ?, नित्यस्य प्र-
हाणासम्भवात्। असत्यपि वा नित्यत्वनिर्हेतुकत्वमेषामवगम्य निवर्त्तते ?,
स्वतन्त्रस्यासंभवदुच्छेदत्वात्। सत्यपि वा कारणवत्त्वे तत्कारणस्वरूपानिश्च-
यादपि नाद्रियते भावनायाम् ?, अपि(वि?)ज्ञातनिदानस्य व्याधिरिव प्र-
हातुमशक्यत्वात्। भवतु वा तत्कारणपरिज्ञानं किं तत्कारणं नित्यमवगम्य
नोत्सहते तत्प्रहाणाय प्रेक्षापूर्वकारी ?, अविकलकारणस्य प्रतिबद्धुमश-
क्तेः। अनित्यत्वेऽपि वा तत्कारणस्य दोषाणां प्राणिधर्मतामवेत्य न प्रयतते
?, स्वभावस्य हातुमशक्यत्वात्। अस्वभावत्वे वा दोषाणां क्षयोपायासम्भ-
वान्निवर्त्तते ?, नह्युपायविकलस्योपेयसंप्राप्तिरस्ति। सत्त्वेऽपि चोपायस्य तद-
परिज्ञानादसंभवत्तदनुष्ठानो भवेत् ?, अपरिज्ञातस्वरूपस्यानुष्ठानासम्भवात्।
परिज्ञानेऽपि वा लङ्घनादिव व्यवस्थितोत्कर्षतया जन्मान्तरासम्भवेन वा
भावनायाअत्यन्तप्रकर्षमसम्भावयन्नाभियोगवान्भवति ?। भवतु वाऽत्यन्तप्र-
कर्षगमनसम्भवात्प्रतिपक्षोदयेन दोषाणां क्षयः, तथापि ताम्रादिकाठिन्यव-
त्पुनरपि दोषादयं सम्भा वयन्नाभियोगमारभत इति ?। तत्र न तावदनर्थित्वं 872/k

९ दृश्यन्ते] Correction: ; दृश्यते (sic!)दृश्यन्ते

सिद्धम्। तथाहि—ये तावज्ज्ञात्यादिदुःखोत्पीडितमानसाः संसारादुन्न(?)स्तमनसस्तदुपशममात्मनः प्रार्थयन्ते, तेषां श्रावकादिबोधनियतानां संसाराद्भयमेव नैरात्म्यभावनार्थित्वनिमित्तम्। ये तु गोत्रविशेषात्प्रकृत्यैव परहितकरणैकाभिरामाः संस्कारादिदुःखत्रितयपरिपीडितं जगदवेक्ष्य कृपापरतन्त्रतया तद्दुःखदुःखिनः स्वात्मनि व्यपेक्षामपास्य सकलानेव संसारिण आत्मत्वेनाभ्युपगतास्तत्परित्राणाय प्रणिदधते तेषां करुणैव भावनाप्रवृत्तिनिमित्तम्, परोक्षोपेयतद्धेतोस्तदाख्यानस्य दुष्करत्वात्। परहितकरणेन प्रेक्षावतः किं प्रयोजनमिति चेन्न। तदेव प्रयोजनमिष्टलक्षणत्वात्तस्य। नचाप्रेक्षावत्त्वप्रसङ्गः।परिकल्पितात्मग्रहनिबन्धनत्वादात्महितकरणाभिनिवेशस्य, सकलसाधुजनसंमतत्वात् स्वफलानुबन्धित्वाच्च परहितकरणस्य। अपि च भावनाप्रवृत्तावर्थित्वासम्भवोऽत्र प्रतिपादयितुमारब्धः, तद्यदि नामाप्रेक्षावत्त्वं तस्य भवेत्किमियता प्रवृत्तावनर्थित्वं तस्य स्यात्। तस्मादिदमेव वक्तव्यम्—परहितकरणाय नैव कश्चित्प्रवर्त्तते प्रयोजनाभावादिति, तत्र चोक्तम्। अपि च—यथा केचिदुपलभ्यन्तेऽतितरामभ्यस्तनैर्घृण्या अकारणमेव परव्यसनाभिरामाः परदुःखसुखिनस्तथा केचिदभ्यस्तकारुण्याः परसुखाभिरामाः परदुःखदुःखिनः प्रयोजनान्तरमन्तरेणापि भवन्तीति किं न सम्भाव्यम्। नापि दोषस्वरूपापरिज्ञानम्, यतोऽभिष्वङ्गपरिघातात्मात्मीयोन्नत्याद्याकारेण रागद्वेषमोहमानमदेर्ष्यामात्सर्यादयः क्लेशोपक्लेशगणा विदितस्वरूपा एवोदयन्ते व्ययन्ते च। नापि च ते नित्याः, कादाचित्कतया संवेद्यमानत्वात्। अतएव नाहेतुकत्वमेषाम्, अहेतोरनपेक्षितत्वेन देशकालस्वभावनियमायोगात्। अतोऽपि नित्यहेतुत्वमेषां प्रतिक्षिप्तम्, तत्कारणस्यात्मादेः सदा सन्निहितत्वादनाधेयातिशयस्य परैः सहकारिनिरपेक्षत्वात्। तन्मात्रभाविनां सर्वदा युगपन्नो(द्यो?)त्पत्तिप्रसङ्गात्। अतःसामर्थ्यादनित्यहेतव एवैते। अनित्योऽपि हेतुरेषां विदितस्वरूप एव, आत्मात्मीयविपर्यासहेतुकत्वाद्रागादेर्दोषगणस्य तदन्वयव्यतिरेकानुविधानादिति पूर्वं प्रतिपादितत्वात्। नापि प्राणिधर्मत्वमेषां तस्यैव धर्मिणोऽसिद्धेः, न हि प्राणी नाम धर्मी विद्यते कश्चित्, यस्यामी रागादयो धर्मा भवेयुः। केवलमिदम्प्रत्ययतामात्रमिदं विकल्पसमारोपितत्वाद्धर्मधर्मिव्यवहारस्य। अथ चित्तस्वभावत्वेन तत्रोत्पत्त्या वा प्राणिधर्मत्वमेषाम्, तथाऽप्यसिद्धिरनैकान्तिकश्च। तथाहि—विषयविषयिभावमिच्छता चित्तं विषयग्रहणस्वभावमभ्युपेयम्, अन्यथा विषयज्ञानयोर्न विषयविषयिभावः। 873/k अर्थ ग्रहणस्वभावत्वेनाङ्गीक्रियमाणे यस्तस्य स्वभावस्तेनैवात्मनोंऽशोर्थस्तेन गृह्यत इतिवक्तव्यम्। अन्यथा कथमसौ गृहीतः स्यात्। यद्यसताऽऽकारेण गृह्येत ततश्च विषयविषयिभावो न स्यात्। तथाहि—यथा ज्ञानं विषयीकरोत्यर्थं न तथा सोऽर्थः, यथा सोऽर्थो न तथा तं विषयीकरोतीति

५ खि] Correction : ; स्वि (sic !)खि
९ निवेशस्य,] Correction : ; निवेशस्य (sic !)निवेशस्य,

१० संमतत्वात्] Correction : ; संमतत्वात्, (sic !)संमतत्वात्

निर्विषयान्येव ज्ञानानि स्युः। ततश्च सर्वपदार्थासिद्धिप्रसङ्गः। तस्माद्भूतविषयाकारग्राहिताऽस्य स्वभावो निज इतिस्थितम्। भूतश्च स्वभावो विषयस्य क्षणिकानात्मादिरूप इति प्रतिपादितमेतत्। तेन नैरात्म्यग्रहणस्वभावमेवेति तन्नात्मग्रहणस्वभावम्। यत्पुनरन्यथास्वभावोऽस्यख्यातिमूढानाश्च(मूढानांस?) सामर्थ्यादागन्तुकप्रत्ययबलादेवेत्यवतिष्ठते, न स्वभावत्वेन, यथा रज्ज्वां सर्पप्रत्ययस्य। अतएव क्लेशगणोऽत्यन्तसमुद्धतोऽपि नैरात्म्यदर्शनसामर्थ्यमस्योन्मूलयितुमसमर्थः। आगन्तुकप्रत्ययकृतत्वेनादृत्वात्। नैरात्म्यज्ञानं तु स्वभावत्वात्प्रमाणसहायत्वाच्च बलवदिति तुल्येऽपि विरोधित्वे आत्मदर्शने प्रतिपक्षो व्यवस्थाप्यते। न चात्मदर्शनं तस्य तद्विपरीतत्वात्। यस्यापि न बाह्योऽर्थोऽस्तीति पक्षस्तस्यापि मते नैरात्म्यग्रहणस्वभावमेव ज्ञानं नात्मदर्शनात्मकम्, तस्यात्मनोऽसत्त्वात्। तथाहि—यदि नाम तेन विषयस्याभावात्तद्ग्रहणात्मकं ज्ञानं नेष्टम्, स्वसंवेदनात्मकं तु तदवश्यमङ्गीकर्त्तव्यम्। अन्यथा ज्ञानस्यापि व्यवस्था न स्यात्। स चात्मा विद्यमानेनैवानात्माद्वयादिरूपेण संवेद्यो नान्यथा, पूर्ववद्दोषप्रसङ्गात्। तस्मात्प्राणिधर्मत्वमेषां सिद्धम। नापि तत्रोत्पद्यत इत्येतावता स्वभावत्वेपरिकल्पिते प्रहाणासम्भवोऽनेकान्तात्। तथाहि—रज्ज्वां सर्पज्ञानमुत्पद्यते, अथ चतत्सम्यग्ज्ञानोत्पादान्निवर्त्तते। नापि क्षयोपायासम्भवः। स्वहेतुविरुद्धस्वभावपदार्थाभ्यासस्य क्षयोपायत्वेन सम्भवात्। तथाहि—ये सम्भवत्स्वहेतुविरुद्धस्वभावाभ्यासास्ते सम्भवदत्यन्तसन्तानविच्छेदाः, तद्यथा व्रीह्यादयः, तथा चामी रागादय इति सम्भवत्येवैषां क्षयोपायः। नापि तदपरिज्ञानम्, यतो हेतुस्वरूपज्ञानादेव यत्तद्विपरीतालम्बनाकारं वस्तु स तस्य प्रतिपक्ष इति स्फुटमवसीयत एव। नैरात्म्यदर्शनं च तत्र विपरीतालम्बनाकारत्वात्प्रतिपक्ष इति प्रदर्शितमेतत्। नापि लङ्घनादिवद्व्यवस्थितोत्कर्षता। पूर्वपूर्वाभ्यासाहितस्य स्वभावत्वेनानपायादुत्तरोत्तरप्रयत्नस्यापूर्वविशेषाधानैकनिष्ठत्वात्। स्थिराश्रयत्वात्। पूर्वसजातीयबीजप्रभवत्वाच्च प्रज्ञादेर्नत्वेवं लङ्घनादिरिति पश्चात्प्रतिपादयिष्यते। नापि जन्मान्तरासम्भवः पूर्वजन्मप्रसरस्य प्रसाधितत्वात्। नापि ताम्रादिकाठिन्यादिवत्पुनरुत्पत्तिसम्भवो दोषाणाम्, तद्विरोधिनैरात्म्यदर्शनस्या त्यन्तसात्म्यमुपगतस्य 874/k सदाऽनपायात्। ताम्रादिकाठिन्यस्य हि यो विरोधी वह्निस्तस्य कादाचित्कसन्निहितत्वात्काठिन्यादेस्तदभाव एव भवतः पुनस्तदपायादुत्पत्तिर्युक्ता। नत्वेवं मलानाम्। अपायेऽपि वा मार्गस्य भस्मादिभिरनैकान्तान्नावश्यं पुनरुत्पत्तिसम्भवो दोषाणाम्, तथाहि—काष्ठादेरग्निसम्बन्धाद्भस्मसाद्भूतस्य तदपायेऽपि न प्राक्तनरूपानुवृत्तिः, तद्वद्दोषाणामपीत्यनैकान्तः। किञ्चागन्तुकतया प्रागप्यसमर्थानां मलानां पश्चात्सात्मीभूतं तन्नैरात्म्यं बाधितुं कुतः शक्तिः, नहि स्वभावो यत्नमन्तरेण निवर्त्तयितुं शक्यते। नच प्राप्यपरिहर्त्तव्ययोर्वस्तुनोर्गुणदोषदर्शनमन्तरेण प्रेक्षावतां हातुमुपादातुं वा प्रयत्नो युक्तः। नच विपक्षसा(न-

१४ मेषां सिद्धम] Correction: ; मेषामसिद्धम् (sic!)मेषां सिद्धम

चाविपर्यस्ता ?)त्मनः पुरुषस्य दोषेषु गुणदर्शनं प्रतिपक्षे वा दोषदर्शनं सम्भवति, अविपर्यस्तत्वात्। नहि निर्दोषं वस्त्वविपर्यस्तधियो दुष्टत्वेनोपाददते, नापि दुष्टं गुणवत्त्वेन। नच नैरात्म्यदर्शनस्य कदाचिद्दुष्टता। सर्वोपद्रवरहितत्वेन गुणवत्त्वात्। तथाहि—निःशेषरागादिमलस्यापगमान्न भूतार्थदर्शननिबन्धोपद्रवः। नापि रागादिपर्यवस्थानकृतः कायचित्तपरिदाहोपद्रवोऽस्ति। नापि जन्मप्रतिबद्धो व्याधिजाद्युपद्रवः, जन्महेतोः क्लेशस्याभावात्। नापि साश्रवसुखोपभोगवद्वैरस्योपद्रवः प्रशमसुखरसस्यैकान्ततयाऽनुद्वेगकरत्वात्। तन्नास्य हानाय यत्नो युक्तः। अपि तु यदि भवेदपरिहाणायैव भवेत्। बुद्धेः, प्रकृत्या गुणपक्षपातात्। नापि दोषोपादानाय प्रयत्नः, तेषां सर्वोपद्रवास्पदत्वेन दुष्टत्वात्। तस्मात्सम्भविनी नैरात्म्याभावना। तस्याश्च प्रकर्षपर्यन्तगमनात्स्फुटप्रतिभासज्ञानफलत्वं दृष्टम्। यथा कामिनीं भावयतः कामातुरस्य। तथाहि तस्य सविभ्रमाः पश्याम्युपगूह इत्येवं वाचःकायव्यापाराश्चाभिप्रायानुरूपाः साक्षात्कारिनिबन्धानाः प्रवर्त्तन्ते। तस्मान्नासिद्धो हेतुः। नाप्यनैकान्तिकः, यतो नैरात्म्यदर्शनस्य भूतार्थविषयत्वेन बलवत्त्वमात्मदर्शनस्य तु विपर्ययाद्विपर्यय इति भवति विपक्षप्रतिपक्षभावः। रागद्वेषयोरप्यभूतात्मग्रहसंस्पर्शेन प्रवृत्तेर्न तयोर्विरुद्धरूपग्रहणनिमित्तो विपक्षप्रतिपक्षभावः। नापि विपर्यासात्, अविपर्यासकृतोर्द्वयोरपि विपर्यस्तत्वात्। नाप्यनयोर्विरोधः सिद्धः, द्वयोरप्यात्मग्रहैकयोनित्वात् कार्यकारणभावाच्च। तथाहि—सत्यात्मात्मीयाभिष्वङ्गे तदुपरोधिनि द्वेषो जायते नान्यथा। नचाभिन्नकारणयोः कार्यकारणभूतयोर्बाध्यबाधकभावो युक्तः, यथा वह्निधूमयोरेकेन्धनप्रभवयोः, यथा वात्मग्रहस्नेहयोः, अतिप्रसङ्गात्। युगपदनुत्पत्तिस्तु तदुपादानचित्तस्य युगपत्सजातीयचित्तद्व-
875/k याक्षेपासाम थ्यात्। नापि सुखदुःखयोः परस्परं विरोधः, तथाहि—द्विविधे सुखदुःखे मानसे विषयजे च। तत्र ये तावन्मानसे तयोर्द्वेषानुनयसंप्रयोगित्वाद्रागद्वेषाभ्यामेकयोगक्षेमतया तद्विपर्यस्तत्वमभिन्नात्मरूपग्राहित्वमात्मग्रहैकयोनित्वं कार्यकारणभावश्चेति न परस्परं विरोधः संभवति। ये च विषयजे तयोरपि परस्परं कारणभेदाप्रतिनियमान्न विरोधः। तथाहि यत एव सुखमुत्पद्यते तत एवातिसेव्यमानाद्दुःखमपीति न तयोः कारणभेदप्रतिनियमोऽस्ति। नत्वेवं नैरात्म्यदर्शनस्येतरेण। किञ्च—द्वयोरप्यनयोर्विषयबलभावित्वेन तुल्यबलत्वम्, नतु मार्गदोषयोः, मार्गस्यैव भूतार्थविषयत्वेन बलवत्त्वात्, न दोषाणाम्। अपि(च)खलु सुखदुःखेऽचिरस्थितिके न तु पुनरेवं नैरात्म्यदर्शनम्, तस्य सात्मत्वेन सदाऽनपायादिति पूर्वमुक्तमतो न व्यभिचारः। युगपदनुत्पत्तेस्तु कारणमुक्तम्। यत्पुनरुक्तमनुमानबलावधारितनैरात्म्यानामपि समुत्पद्यन्ते रागादय इति, तदयुक्तम्। यस्माद्भावनामयं स्फुटप्रतिभासतयानिरात्मकवस्तुसाक्षात्कारिज्ञानमविकल्पकं प्रमाणप्रसिद्धार्थविषयतया चाभ्रान्तं तन्नैरात्म्यदर्शनमात्मदर्शनस्यात्यन्तोन्मूलनेन प्रतिपक्षो वर्णितो न श्रुतचिन्तामयम्। यस्मादनादिकालाभ्यासादत्यन्तोपारूढमूलत्वान्मलानां क्रमेणैव विपक्षवृद्ध्याऽवह(?)सतां क्षयः, नतु सकृच्छ्रव-

णेन। यथा शीतस्पर्शस्य वह्निरूपसंपर्कमात्रान्न क्षयः। नचापि श्रुतचित्तामयनैरात्म्यज्ञानसंमुखीभावे सति रागादिसमुदयः सिद्धो येन व्यभिचारः स्यात्। तथाहि—समुत्पन्नं रागादिपर्यवस्थानमशुभादिमनस्कारबलेन विनोदयन्त्येव सौगताः। अतएवाखण्डितमहिमत्वमेषामसिद्धम्। विरोधोऽपि नैरात्म्यदर्शनेनैषामत एव व्यवस्थाप्यते। तत्संमुखीभावे सत्यपकर्षात्। ये हि यदुपधानादपकर्षधर्माणस्ते तदत्यन्तवृद्धौ निरन्वयसमुच्छित्तिधर्माणो भवन्ति, यथा सलिलावृद्धावग्निज्वाला, नैरात्म्यज्ञानोपधानाच्चापकर्षधर्माणो दोषा इति तदत्यन्तवृद्धौ कथमवस्थां लभेरन्। अतो नानैकान्तिकता हेतोः। सपक्षे भावाच्च न विरुद्धता ॥ ३३३८॥ § 10770

एवं क्लेशावरणप्रहाणं प्रसाध्य ज्ञेयावरणप्रहाणं प्रतिपादयन्नाह—साक्षात्कृति विशेषादिति। § 10771

साक्षात्कृतिविशेषाच्च दोषो नास्ति सवासनः।
सर्वज्ञत्वमतः सिद्धं सर्वावरणमुक्तितः॥
३३३९॥§ 10773

876/k

साक्षात्करणं कस्य ?, नैरात्म्यस्येति प्रकृतत्वाद्गम्यते। तस्याविशेषः—बहुशो बहुधोपायं(यैः?)कालेन बहुना सर्वाकारेण तत्र तद्विपक्षे च गुणदोषाणामत्यन्तप्रकाशीभावः। अत एव श्रावकादेर्नैरात्म्यदर्शनेऽपि न सर्वज्ञत्वम्। तथाविधान्तराभ्यासविशेषाभावेन ज्ञेयावरणस्याप्रहाणात्। प्रयोगः—या सादरनैरन्तर्यदीर्घकालविशेषणा भावना सा करतलायमानग्राह्यावभासमानज्ञानफला, तद्यथा कामातुरस्य कामिनीभावना, यथोक्तविशेषणत्रययुक्त च सर्वाकारसर्वमतनैरात्म्यभावना कारुणिकस्येति स्वभावहेतुः। नचासिद्धो हेतुः, कारुणिकस्यार्थित्वेन तथा प्रवृत्तिसम्भवस्य प्रतिपादितत्वात्। नाप्यनैकान्तिकत्वम्, यतः सर्वधर्मगतनैरात्म्यालम्बनस्य मनोविज्ञानस्य धर्मिणो यथोक्तविशेषणत्रययुक्तभावनासंस्पृष्टत्वेन हेतुना स्फुटप्रतिभासित्वं साध्यम्। एतेन च साध्यधर्म्येण यथोक्तसाधनधर्मस्य व्याप्तिः सिद्धा।कारणान्तरानपेक्षित्वात्स्फुटप्रतिभासित्वस्य। ततश्च सामर्थ्यात्सर्वज्ञत्वेनापि व्याप्तिः सिद्धा। यस्मात्सर्ववस्तुगतनैरात्म्याद्यालम्बनस्य मनसो यत्स्फुटप्रतिभासित्वं तदेवास्य सर्वज्ञत्वं नान्यत्। तथाहि भाव्यमानवस्तुस्फुटप्रतिभासित्वेन भावनायाःसामान्येन व्याप्तौ सिद्धायां सामर्थ्यात्सर्वज्ञत्वेनापि सिद्धैव। यथोक्तधर्मिण्यन्यस्यस्फुटप्रतिभासित्वस्यासम्भवात्। एतेन ये सत्तासाधने दोषाः प्रोक्तास्ते प्रत्युक्ताः। सर्वज्ञसत्ताया असाध्यत्वात्। प्रसिद्धे मनसि धर्मिणः स्फुटप्रतिभासित्वस्य साध्यत्वात्। एवमनेन प्रकारेण प्रसिद्धात्साक्षात्कृतिविशेषात्कायवाग्बुद्धिवैगुण्यलक्षणाया दोषवासनायाः प्र-

हाणात्सिद्धमावरणद्वयप्रहाणम्। अतः सर्वावरणविमुक्त्या सिद्धं सर्वज्ञत्वम्॥ ३३३९॥ § 10774

स्यादेतद्यदि नाम सामान्येन सिद्धं सुगते तु न सिद्धमित्याह—एतच्चेत्यादि। § 10775

एतच्च सुगतस्येष्टमादौ नैरात्म्यकीर्त्तनात्।
सर्वतीर्थकृतां तस्मात्स्थितो मूर्ध्नि तथागतः॥
३३४० ॥§ 10777

एतद्यथोक्तं सर्वज्ञत्वं सुगतस्यैवेष्टं—सिद्धम्। न कपिलादेः। कस्मात् ?, आदौ नैरात्म्यकीर्त्तनात्। एतदुक्तं भवति। येनेदं सर्वपदार्थानां स्कन्धपञ्चकत्वादिदेशनया सर्वाकारमादौ प्रथमतो नैरात्म्यं कीर्त्तितम्, स एवादौ सर्वधर्माणां विचित्रप्रभेदनैरात्म्यकीर्तनात्कार्यलिङ्गात्सिद्धः पुरुषविशेषोऽस्माभिः सुगत इत्युच्यते। तस्यानया देशनया साभ्युपायहेयोपादेयतत्त्वस्थिराशेषज्ञानं
877/k साध्यते। (ते) न ज्ञान योगादेवासौ सर्वज्ञः प्रमाणभूतश्चेति तदुक्तप्रतिपत्तिकामैः साधयितुं युक्तः, नतु कीटसङ्ख्यादिज्ञानात्। किंतु कीटसङ्ख्यादावपि तस्य ज्ञानसम्भवः साध्यते। तत्त्वस्थिराशेषज्ञानं त्वाहत्य। तथाहि—प्रमाणसंवादिनैरात्म्यदेशनया तत्त्वज्ञानं यस्य सिद्धम्, तस्यैव नैरात्म्यस्य पूर्वापराव्याहतदेशनया स्थिरज्ञानम, नवाङ्गेऽपि शास्त्रप्रवचने त्रियान विषयायामपि देशनायां दुःखादिलक्षणसत्यदेशनाया एकवाक्यत्वात्। विचित्रैश्चोपायैश्चतुःसत्यप्रकाशनादशेषज्ञानमस्यानुमीयते। शेषस्य सर्वाकारज्ञानप्रतिपादनासामर्थ्यलक्षणस्य प्रहाणात्। नह्यविदितसर्वाकारगुणदोषस्तत्प्रतिपादनाकुशलश्च तथा प्रतिपादयति। नापि वेदाद्विज्ञाय प्रतिपादयतीति युक्तम्। तस्य पौरुषेयत्वप्रतिपादनादिति भावः। अतोऽशेषतीर्थकरमूर्ध्नि भगवाञ्ज्ञानातिशययोगात्स्थित इति सिद्धम्॥ ३३४०॥ § 10778

अतएव यथोक्तज्ञानातिशययोगिना भगवता सहान्येषां न तुल्यत्वमस्तीति दर्शयन्नाह—तेनेत्यादि। § 10779

तेन प्रमाणसंवादितत्त्वदर्शनयोगिना।
न तुल्यहेतु(योग ?)ताऽन्येषां विरुद्धार्थोपदेशिनाम्
३३४१§ 10781

१४--१५ त्रियान] Correction: ; प्रियान(नु?) (sic!)त्रियान

प्रमाणगोचरा येषां प्रमाबाधाकुलं वचः।
तेषामत्यक्षविज्ञानशक्तियोगो हि दूरतः॥
३३४२॥§ 10783

नह्येषां ज्ञानातिशययोगिताप्रसाधकः कश्चिद्धेतुरस्ति। तथाहि—हेतुर्भवत् वचनाख्यमेव लिङ्गं भवेत्। तच्चैषां प्रमाणविरुद्धार्थप्रतिपादकमिति कथं ततो ज्ञानातिशययोगिताऽमीषां प्रतियेत॥ ३३४१॥ ३३४२॥ § 10784

सुगतस्यापि वचनं प्रमाणविरुद्धमिति चेदाह—सम्बद्धेत्यादि। § 10785

सम्बद्धानुगुणोपायं पुरुषार्थाभिधायकम्।
दृष्टेऽप्यर्थे प्रमाणाभ्यामीषदप्यप्रबाधितम्॥
३३४३॥§ 10787

सम्बद्धम्—वाक्यानामेकार्थोपसंहारेण परस्परं सङ्गतम्, नतु दशदाडिमादिवाक्यवत्परस्परासङ्गतम्। अनुगुणः—शक्यानुष्ठानतया नैरात्म्यभावनादिलक्षणउपायो यस्मिन्नुपदिष्टस्तत्तत्थोक्तम्, नतु विषप्रशमनाय तक्षकचूडारत्नालङ्कारोपदेशवदशक्योपायम्। पुरुषार्थः—अभ्युदयनिःश्रेयसलक्षणः, तस्याभिधायकम्, नतु काकदन्तपरीक्षावदपुरुषार्थफलम्। ननु चैतत्सर्वं कपिलादिवाक्येष्वप्यस्तीत्याह—दृष्टे ऽपीत्यादि। दृष्टे—प्रत्यक्षानुमानविषयत्वेनाभिप्रेते। प्रमाणाभ्याम्—प्रत्यक्षानुमानाभ्याम्। अबाधितं यथा निर्दिष्टस्यार्थस्य तथाभावात्। तथाहि—नीलादिसुखदुःखादिनिमित्तोद्ग्रहणरागादिबुद्धिलक्षणस्य स्कन्धपञ्चकस्य प्रत्यक्षत्वेनाभिमतस्यनान्यथात्वं सम्भवति, अप्रत्यक्षत्वेन चाभिमतानामप्रत्यक्षतेव। यथा परैः प्रत्यक्षाभिमतानां रूपशब्दादिसन्निवेशेनां सुखादीनां द्रव्यकर्मसामान्यसंयोगादीनां च।तथा—वस्तुबलप्रवृत्तानुमानविषयत्वेनाभिप्रेतानां तथा भाव एव। यथा चतुर्णामार्यसत्यानामतद्विषयत्वेनेष्टानां चातद्विषयत्वमेव। यथा परैर्वस्तुबलानुमानविषयत्वेनाभिमतानामात्मादीनाम्। अपिशब्दाददृष्टेऽपि न विक्रियेति दर्शितम्। तथाह्यत्र रागादिरूपं तत्प्रभवं वा धर्ममुद्दिश्य तत्प्रहाणाय तन्निदानात्मदर्शनविरोधेन नैरात्म्यदर्शनमेव प्रतिपक्षो देशितो नतु कपिलादिशास्त्रवत्तन्निदानाविरुद्धः स्नानाग्निहोत्रादिरुपदिष्टः॥ ३३४३॥ § 10788 878/k

अत एव विशुद्धसुवर्णवत्परीक्ष्य ग्राह्यमेतद्विचक्षणैरिति भगवतोक्तमित्येतत्सूचयन्नाह—तापादित्यादि। § 10789

तापाच्छेदान्निकषाद्वा कलधौतमिवामलम्।
परीक्ष्यमाणं यन्नैव विक्रियां प्रतिपद्यते॥
३३४४॥§ 10791

यथा कलधौतं सुवर्णममलं सर्वदोषरहितं परीक्ष्यमाणं तापादिभिर्न विक्रियां प्रतिपद्यते तथा भगवद्वचोरत्नं प्रत्यक्षेण तापसदृशेन वस्तुबलप्रवृत्तानुमानेन निकषप्रख्येणागमापेक्षानुमानेनापि छेददृष्टान्तसूचितेन न विक्रियते। अतः प्रेक्षापूर्वकारिण एवम्भूतादेवागमात्प्रवृत्तिर्युक्ता नान्यत इत्यभिप्रायः॥ ३३४४॥ § 10792

रत्नसाधर्म्यमस्य दर्शयन्नाह—समस्तेत्यादि। § 10793

समस्तकुमतध्वान्तविध्वंसानुगुणोदयम्।
तथागतवचोरत्नमलब्धंबहुकल्मषैः॥ ३३४५॥§ 10795

ततः सुगतमेवाहुः सर्वज्ञमतिशालिनः।
प्रधानपुरुषार्थज्ञं तं चैवाहुर्भिषग्वरम्॥
३३४६॥§ 10797

सुगतस्तेन सर्वज्ञः कपिलो नेति तु प्रमा।
अनन्तरोदिता व्यक्ताऽप्येषा मूढैर्न लक्षिता॥
३३४७॥§ 10799

कुमतमेव ध्वान्तमन्धकारम्, तस्य विध्वंसो विनाशः, तस्मिन्ननुगुण उद-
879/k यो यस्य तत्तथोक्तम्। बहुकल्मषैरिति। अपुण्यवद्भिः। अनन्तरोदितेति। यथोक्तवचनाख्यकार्थलिङ्गजा॥ ३३४५॥ ३३४६॥ ३३४७॥ § 10800

गणिताद्येकदेशेष्वित्यादावाह—यथोदितान्तरादित्यादि। § 10801

यथोदितान्तरादेव विशेषोऽप्यवधार्यते।
ऋषभादिकुतीर्थेभ्यः स्मरभङ्गविधायिनः॥
३३४८॥§ 10803

यथोक्तज्ञानातिशययोगाद्भगवतो मारजितो ऋषभवर्द्धमानादिभ्यो विशेषे सिद्धे सति न युक्तं सत्यवचसा भवता वक्तुम्—न विशेषोऽवधार्यत इति (इति) समुदायार्थः॥ ३३४८॥ § 10804

स्यादेतत्—गणिताद्येकदेशार्थेऽविसंवादादुभयेषामस्माभिरविशेष उच्यत इत्याह —को हीत्यादि। § 10805

को हि निःशेषशास्त्रार्थतत्त्वज्ञं मन्यते जडः।
समानभोजनज्ञानान्मातृकामात्रवेदनात्॥
३३४९॥§ 10807

येनैव हेतुनेत्यादावाह—तद्येनेत्यादि। § 10808

तद्येन हेतुनैकस्य सर्वज्ञत्वं प्रसाध्यते।
तद्धेतुवस्तुनोऽसत्त्वान्न सोऽन्यस्योपतिष्ठते॥
३३५०॥§ 10810

तदिति। तस्मात्। तद्धेतुवस्तुन इति। यदि नाम शब्दमात्रमस्ति—स्याद्वादादीनामविपरीतार्थानां सर्वार्थव्यापिनामुपदेष्टृत्वादिति, तथाऽपि तस्य वस्तुप्रतिबद्धस्य हेतुवस्तुनो—हेत्वर्थस्याभावान्नासौ हेतुरन्यस्य कपिलादेरुपतिष्ठते, वस्त्वेव हि वस्तुप्रतिबद्धत्वाद्वस्तु गमयति, न शब्दमात्रम्॥ ३३५०॥
§ 10811

दूषणानीत्यादावाह—तद्दूषणानीत्यादि। § 10812

तद्दूषणान्यसंरम्भाः सर्वज्ञजिनशासने।
शाक्या यानि वदन्त्येव तान्यशक्ता दिगम्बराः॥
३३५१॥§ 10814

असंरम्भा इति। संरम्भरहिताः। कृपयैव परानुग्रहाय तेषां प्रवृत्तेर्न भवतामिव रोषमानादिभिः। एवमिति। तदुपदिष्टस्य स्याद्वाद्वादेर्दुष्टत्वप्रतिपादनात्॥ ३३५१॥ § 10815

तत्रानवस्थितैरित्यादावाह—यदित्यादि। § 10816

यत्सिद्धप्रतिबन्धेन प्रमाणेनोपपादितम्।
तत्त्वं सौगतसिद्धान्ते सिद्धं नान्यमते तथा॥
३३५२॥§ 10818

880/k

तेन व्यवस्थितैस्तेषां भिन्नैः साधनदूषणैः।

प्रतिबिम्बोदयाग्रस्तैर्निर्णयः क्रियतामलम्॥
३३५३॥§ 10820

यदिति। यस्मात्। सिद्धप्रतिबन्धेनेति। वस्तुबलप्रवृत्तेर्न(र्नः?) सिद्धतादात्म्यतदुत्पत्तिलक्षणप्रतिबन्धेनेत्यर्थः। तेनेति। तस्मात्॥ ३३५२॥ ३३५३॥ § 10821

यस्य ज्ञेयेत्यादावाह—सर्वाकारज्ञतायास्त्वित्यादि। § 10822

सर्वाकारज्ञतायास्तु न कश्चिदपि विद्यते।
साक्षादितरथा वाऽपि विरोधो ज्ञेयतादिभिः॥
३३५४॥§ 10824

अज्ञेयत्वादिविश्लेषात् ज्ञेयत्वादि व्यवस्थितम्।
न सर्वज्ञत्वविश्लेषात्तत्पुनः स्थितलक्षणम्॥
३३५५॥§ 10826

अर्थान्तरविधानेनार्थान्तरस्य निषेधं प्रतिपादयितुमिच्छता साक्षात्पारम्पर्येण वा विरुद्धस्यैव विधानात्प्रतिपादनीयो नाविरुद्धस्य, अन्यथा हि यस्य कस्यचिद्विधानेन सर्वस्य निषेधः स्यात्। नच सर्वज्ञत्वस्य ज्ञेयत्वादिभिः सह कश्चित्साक्षात्पारम्पर्येण वा विरोधोऽस्ति। तथाहि—द्विविध एव धावानां विरोधो निरूप्यमाणोऽवतिष्ठते, परस्परपरिहारस्थितलक्षणो वा—यथा भावाभावयोः क्रमाक्रमयोर्वा। सहानवस्थानलक्षणो वा—यथाग्निशीतस्पर्शयोः। तत्राद्यस्तावज्ज्ञेयत्वादिभिः सह सर्वज्ञत्वस्य न सम्भवतीति दर्शयति—अज्ञेयत्वादीत्यादि। यद्व्यवच्छेदनान्तरीयको यस्य परिच्छेदस्तयोरेव परस्परपरिहारस्थितलक्षणो विरोध इति पूर्वमुक्तम्। न च ज्ञेयत्वादिसर्वज्ञत्वव्यवच्छेदेन स्थितम्, किं तर्हि ?, अज्ञेयत्वादिव्यवच्छेदेन॥ ३३५४॥ ॥ ३३५५॥ § 10827

नापि द्वितीयो विरोधः सम्भवतीति दर्शयन्नाह—सर्वज्ञत्वमित्यादि। § 10828

सर्वज्ञत्वं नचाप्येतत्क्वचित्संपूर्णकारणम्।
सत्त्वादिसम्भवे पश्चात्प्राक्प्रवृत्तं निवर्त्तते॥
३३५६॥§ 10830

यस्य ह्यविकलकारणस्य भवतो यत्सन्निधानादभावस्तयोरेव सहानवस्थानलक्षणो विरोधः, नचैतत्सर्वज्ञत्वमविकलकारणं प्राक्प्रवृत्तं दृष्टम्, येन पश्चात्सत्त्वादिसम्भवे सति निवर्त्तेत इति स्यात्॥ ३३५६॥ § 10831

कस्मान्न प्रवृत्तमित्याह—नैःस्वाभाव्य इत्यादि। § 10832

नैःस्वाभाव्योऽस्ववित्तौ च नहि तज्ज्ञातु जायते।
प्राक्प्रवृत्तेः प्रसिद्धेयमेवं सर्वज्ञता भवेत्॥
३३५७॥। § 10834

881/k

यदि सर्वज्ञत्वं सत्त्वज्ञेयत्वसद्भावे सति निवर्त्तेत इति भवताऽभ्युपगम्यते। तथा च सति सत्त्वादिसन्निधानात्पूर्वमस्यासत्त्वमज्ञेयत्वं च स्वसंविदापीत्यभ्युपगतं भवेत्, ततश्चासत्त्वेन नैःस्वाभाव्ये सत्यज्ञेयत्वाद्यास्ववित्तौ सत्यां नैतत्सर्वज्ञत्वं जायते—भवतीति तत्कथं प्राक्प्रवृत्तं पश्चान्निवर्त्तेत इति स्यात्। नहि निःस्वभावस्योत्पत्तिः सम्भवति। नाप्यनुपलब्धस्य सत्ताव्यवस्थानिबन्धनमस्ति, ज्ञाननिबन्धनत्वाद्वस्तुसत्ताव्यवस्थायाः। तस्मात् स्ववचनव्याघात इत्यभिप्रायः। किंच यदि प्राक् प्रवृत्तिरस्याभ्युपगम्यते तदा प्रवृत्तेः प्रयत्नमन्तरेणैव सर्वज्ञता सिद्धा, अतो न तत्प्रतिक्षेपो युक्तः,अन्यथा स्ववचनव्याहतिः स्यादिति दर्शयन्नाह—प्राक्प्रवृत्तेरित्यादि। प्राक्प्रवृत्तेः, सर्वज्ञत्वस्याभ्युपगमे सतीति शेषः॥ ३३५७॥ § 10835

अथापि स्यान्माभूद्विरुद्धं ज्ञेयत्वादि, तथापि सर्वज्ञासत्त्वं गमयतीत्याह। § 10836

नाविरुद्धविधाने च युक्तमन्यनिवर्त्तनम्।
अन्यता रूपसद्भावाद्रसाभावोऽपि गम्यते॥
३३५८॥ § 10838

यस्तु मन्यते—यद्यपि ज्ञेयत्वादयो न विरुद्ध्यन्ते सर्वज्ञत्वेन, वक्तृत्वं तु विरुध्यत एव, पारम्पर्येणैतत्कारणेन विकल्पेन सर्वज्ञत्वस्य सहानवस्थानात्। तथाहि —नावितर्क्य नाविचार्य वाचं भाषत इति न्यायाद्वचनस्य विकल्पो हेतुः, विकल्पानां च सर्वेषामभिलापसंसृष्टतया न वस्तुस्वरूपग्रहणमस्ति, तस्य निर्विकल्पज्ञानगोचरत्वात्, अतो विकल्पावस्थायां वस्तुस्वरूपपरिज्ञानाभावान्न सर्वज्ञत्वमस्तीति सिद्धाऽस्य वक्तृत्वस्य विपक्षात्सर्वज्ञत्वलक्षणात्कारणानुपलब्धा व्यतिरेकनिश्चितिरिति नानैकान्तिकता हेतोः। अयं च वक्तृत्वाख्यो हेतुः यस्य ज्ञेयप्रमेयत्ववस्तुसत्त्वादिलक्षणा इत्यत्रादिशब्देनाक्षिप्त एवेति। तदेतत् तदत्रादिपदाक्षिप्त इत्यादिनाऽऽशङ्क्य अत्रापि ये प्रवक्तृत्वमित्यादिना परिहरति। § 10839

तदत्रादिपदाक्षिप्ते वक्तृत्वे योऽभिमन्यते।
निश्चयं व्यतिरेकस्य परस्परविरोधतः॥
३३५९ ॥§ 10841

विकल्पे सति वक्तृत्वं सर्वज्ञश्चाविकल्पतः।
न ह्याविष्टाभिलापेन वस्तु ज्ञानेन गम्यते॥
३३६० ॥§ 10843

अत्रापि ये प्रवक्तृत्वं वितर्कानुविधानतः।
सर्वज्ञस्याभिमन्यन्ते न तैर्वचनसम्भवे॥
३३६१ ॥§ 10845

882/k

सर्वज्ञ इष्यते नापि विकल्पज्ञानवृत्तितः।
तस्मिन्क्षणे विकल्पे तु वक्तृत्वं न प्रसिद्ध्यति॥
३३६२ ॥§ 10847

केचिद्भगवतो वक्तृत्वं विकल्पसंमुखीभावादेवेति प्रतिपन्नाः, अन्ये तु पूर्वविव(श?)वशादेवाविकल्पयतोऽपि वचनप्रवृत्तिर्भगवत इति वर्णयन्ति। तत्र प्रथमे दर्शने यदि विकल्पावस्थायामसर्वज्ञत्वं साध्यते तदा सिद्धसाध्यता, इष्यत एव तैस्तस्यामवस्थायां भगवतोऽसर्वदर्शित्वम्। अथाविकल्पावस्थायामसर्वज्ञत्वं भावयितुमिष्टम्। तदा हेतोरसिद्धता। नहि तस्यामवस्थायां वचनप्रवृत्तिरस्ति, समुत्थापकस्य विकल्पस्य तदानीमभावात्॥ ३३५९॥ ३३६०॥ ३३६१॥ ३३६२॥ § 10848

ननु यदि विकल्पावस्थायामसर्वज्ञत्वमिष्यते तदा तद्वचनस्यासर्वज्ञभाषितत्वादप्रामाण्यमेव प्राप्नोतीत्याशङ्क्याह—असर्वज्ञप्रणीतत्वमित्यादि। § 10849

असर्वज्ञप्रणीतत्वं नचैवं तस्य युज्यते।
सर्वज्ञतासमाक्षेपादतः संवादनं भवेत्॥
३३६३ ॥§ 10851

अनुभूय यथा कश्चिदौष्णयं पश्चात्प्रभाषते।
तस्माद्वस्त्वविसंवादस्तदर्थानुभवोद्भवात्॥
३३६४॥§ 10853

तेन सर्वज्ञताकाले हेतोरस्याप्रसिद्धता।
व्याहारवृत्तिकाले तु भवेत्सिद्धप्रसाधनम्॥
३३६५॥§ 10855

यद्यपि तस्यामवस्थायामसर्वज्ञस्तथाप्यसर्वज्ञप्रणीतत्वमस्य न भवति, कुतः ?, सर्वज्ञतया समाक्षिप्तत्वात्तस्य। अत एव सर्वज्ञज्ञानबलोत्पन्नविकल्पसमुत्थापितत्वात्तस्य पारम्पर्येण वस्तुनि प्रतिबन्धादनुमानविकल्पवत्प्रामाण्यमपि भवति। अत्रैव दृष्टान्तमाह—अनुभूयेत्यादि। तस्मादिति। उष्णानुभवबलभाविनो वचनात्। तदर्थानुभवोद्भवादिति। तस्योष्णार्थस्यानुभवात्पारम्पर्येण विकल्पस्योद्भवादित्यर्थः। स्यादेतत्—यदि सर्वज्ञस्य विकल्पप्रत्ययोऽस्ति तदा भ्रान्तः प्राप्नोति, विकल्पस्य प्रकृत्यास्वप्रतिभासेना(ऽन?)र्थेऽर्थाध्यवसायेन प्रवृत्तेर्भ्रान्तत्वादिति। नैतदस्ति। यद्यारोपितस्यतात्त्विकस्य च रूपस्य विभागं न जानीयात्तदा भ्रान्तो भवेत्, यावता विकल्पविषयमारोपितात्मनैव निश्चिन्वन्बाह्यं च वस्तु निर्विकल्पकज्ञानगोचरं पृथगेव तात्त्विकंतात्त्विकात्मना पश्यन्कथं विपर्यस्तो नाम। यद्यविपर्यस्तः कथमारोपयति विकल्पावस्थायामिति चेत्। न। शब्दप्रवृत्त्युपायज्ञत्वात्। यतो नान्यमारोपकविकल्पव्य 883/k तिरेकेण शब्दस्य समुत्थापकं पश्यति, नापि शब्दर्थमारोपितादन्यमुपलभते, अतःशब्दप्रवृत्त्युपायज्ञो जगदनुकम्पया यथावदधिगतं तत्त्वमप्रतिपाद्य परस्मै नासितुं समर्थः संस्तत्प्रतिपिपादयिषया शब्दप्रवृत्त्युपायमारोपकं विकल्पमारोप्यं च शब्दाभिधेयमारचयति। एतच्च पश्चादाशङ्क्य चोद्यं परिहरिष्यति। अस्माभिस्त्वत्र प्रस्तावागतत्वादित्यभिहितम्। अत एव वक्तृत्वाद्रागित्वानुमानमप्ययुक्तमन्यथापि वचनप्रवृत्तिसम्भवात्। नहि रागादीनामेव कार्यं वचनस्पन्दादयः वक्तुकामतासामान्यहेतुत्वात्। भाव(सा च?)वक्तुकामता वीतरागस्य करुणयापि सम्भवतीति व्यभिचारः। सैव करुणा राग इति चेत्। न। (न)नामकरुण(या) किञ्चिदनिष्टमापद्यते। किंतु नित्यसुखात्मात्मीयदर्शनाक्षिप्तं साश्रववस्तुविषयं चेतसोऽभिष्वङ्गं रागमाहुः। तत्पूर्वकश्चात्मात्मीयोपरोधिनि प्रतिहतिर्द्वेषः। आत्मात्मीयग्रहश्च मोहो न चैव कृपा। तस्या असत्यप्यात्मग्रहे दुःखविशेषदर्शनमात्रेणाभ्यासबलेनैवोत्पादात्।तथाहि वीतरागाणां धर्माद्यालम्बना मैत्र्यादयः शास्त्रे वर्णिताः॥ ३३६३॥ ३३६४॥ ॥ ३३६५॥

§ 10856

स्यादेतद्यदि सर्वविषयज्ञानासंमुखीभावमात्रं साध्यते, तथापि सिद्धसाध्यता भवेद्यावता समस्तवस्तुतत्त्वविस्तरज्ञानाशक्तता साधयितुमिष्टा, अतो न सिद्धसाध्यता नापि हेतोरसिद्धता व्याहारसामर्थ्यमात्रस्य हेतुत्वेन विवक्षितत्वात् इत्यत आह—समस्तेत्यादि। § 10857

समस्तवस्तुविज्ञानशक्त्यपाकरणेऽपि ते।
संदिग्धव्यतिरेकित्वं तदवस्थं प्रसज्यते॥
३३६६॥ § 10859

व्याहारवृत्तिसामर्थ्ये हेतुत्वेनापि संमते।
संदिग्धव्यतिरेकित्वदोष एवानुवर्त्तते॥
३३६७॥ § 10861

उभयत्रापि पक्षे साध्यविपर्यये हेतोर्बाधकप्रमाणाभावात्। संदिग्धव्यतिरेकित्वेन नैकान्तिकता हेतोः॥ ३३६६॥ ३३६७॥ § 10862

अथ येषामविकल्प(य)तोऽपि भगवतो वचनप्रवृत्तिरिति पक्षस्तत्राह—चक्रेत्यादि। § 10863

चक्रभ्रमणयोगेन निर्विकल्पेऽपि तायिनि।
सम्भारावेगसामर्थ्याद्देशना संप्रवर्त्तते॥
३३६८॥ § 10865

इति ये सुधियः प्राहुस्तान्प्रत्यपि न सिध्यति। § 10866

884/k

यथाहि चक्रस्योपरतेऽपि दण्डप्रेरणव्यापारे पूर्वावेगवशाद्भ्रमणम्, एवं भगवति प्रत्यस्तमितसमस्तकल्पनाजालेऽपि स्थिते प्रवर्त्तत एव पूर्वपुण्यज्ञानसम्भारावेगवशाद्देशनेति सुधियः सौगताः केचन विज्ञानवादिनः प्रतिपन्नाः, तान्प्रति स्फुटतरमसिद्धतादोषो हेतोरवसीयत एव। § 10867

स्यादेतदस्मिन्दर्शने सर्वेषामेव स्वप्रतिभासानुभवमात्रत्वात्परमार्थतो न कस्यचिद्वक्तृत्वमस्ति, किं त्वध्यवसायवशादवदत्यपि परस्मिंस्तथा प्रतिभासिविज्ञानोत्पत्तावधिपतिप्रत्ययभावेन स्थिते वक्तृत्वाभिमानो लोके, तदेवाध्यवसायिकं लोकप्रतीतं वक्तृत्वं हेतुत्वेनाभिप्रेतम्। नहि सिद्धान्तप्रसिद्धो

हेतुर्धर्मी वा क्रियते, किं तर्हि लोकप्रतीत एवेत्यतो नासिद्धता हेतोरित्याशङ्क्याह—वक्तृत्वमित्यादि। § 10868

वक्तृत्वं यत्तु लोकेन मतमाध्यवसायिकम्॥
३३६९॥§ 10869

तत्र तादृशि हेतोः स्यात्सन्दिग्धव्यतिरेकिता।§ 10870

अत्रापि पूर्ववत्सन्दिग्धविपक्षव्यावृत्तिकत्वादनैकान्तिकता हेतोः। § 10871

नन्वित्यादिना परो यदसिद्धत्वमत्र विज्ञानवादनये प्रोक्तं तद्विघटयति। § 10872

ननु चासिद्धता केन मतेऽत्रानुपपत्तिके॥
३३७०॥§ 10873

एवं मन्यते—य एव तूभयनिश्चितवाची स एव साधनं दूषणं वा, नान्यतर(रा?)प्रसिद्धः सन्दिग्धवाची, पुनः साधनापेक्षणादिति न्यायात्। अप्रमाणोपपन्नेऽस्मिन्विज्ञानवादमते कथमसिद्धतोद्भाव्यते, नहि स्वेच्छामात्रेण सिद्धत्वासिद्धत्वपरिकल्पनायां दूषणं भवति, किं तर्हि ?, प्रमाणबलोपपादितायां सिद्धावसिद्धौ वा, न च प्रमाणबलाद्विज्ञाननयः सिद्धः, अस्य विस्तरेण निरस्तत्वात्॥ ३३६८॥ ॥ ३३६९॥ ३३७०॥ § 10874

उच्यत इत्यादिना प्रतिविधत्ते। § 10875

उच्यते यदि वक्तृत्वं स्वतन्त्रं साधनं मतम्।
तदानीमाश्रयासिद्धः सन्दिग्धासिद्धताऽथवा॥
३३७१॥§ 10877

अस्य चार्थस्य सन्देहात्सन्दिग्धासिद्धता स्थिरा।
प्रसङ्गसाधनं तस्मात्त्वया वक्तव्यमीदृशम्॥
३३७२॥§ 10879

तत्र चागममात्रेण सिद्धो धर्मः प्रकाश्यते।
नतु तद्भावसिद्ध्यर्थं ज्ञापकं विद्यते परम्॥
३३७३॥§ 10881

885/k

अत्र विकल्पद्वयं कदाचिद्वक्तृत्वं स्वातन्त्र्येण साधनं वाभिप्रेतं भवेत्, प्रसङ्गसाधनं वा। तत्राद्ये पक्षे विशेषेणाश्रयो न सिद्ध इत्याश्रयासिद्धता हेतोः। अथ सामान्येनाश्रयो विवक्षितस्तथापि यावत्प्रतिवादिनं प्रति प्रमाणेन वक्तृत्वं न साध्यते तावत्सन्दिग्धासिद्धता, य एव तूभयनिश्चितवाची स एव साधनमिति न्यायात्। अस्येति। वक्तृत्वस्य। तस्मान्माभूदयं दोष इति प्रसङ्गसाधनमङ्गीकर्त्तव्यं त्वया। तत्रापि प्रसङ्गसाधने य एवाविचाररमणीयतयाऽऽगममात्रात्परस्य प्रसिद्धो धर्मः स एव साधनत्वेन प्रकाशनीयः परस्परविरोधोद्भावनाय, नत्वसौ प्रमाणेन साधनीयो निष्प्रयोजनत्वात्। नच वक्तृत्वं परस्यागममात्रेण प्रसिद्धमित्युभयथाऽप्रसिद्धता हेतोः ॥ ३३७१॥ ३३७२॥ ३३७३॥ § 10882

एवमित्यादिनोपसंहरन्परोक्तेष्वर्थविपर्ययमादर्शयति। § 10883

एवं यस्य प्रमेयत्ववस्तुसत्तादिलक्षणाः।
निहन्तुं हेतवोऽशक्ताः को न तं कल्पयिष्यति॥
३३७४॥§ 10885

वेदवादिमुखस्थैवं युक्तिर्लौकिकवैदिकी।
न काचिदपि शाक्योग्रसर्पज्ञानविषापहा॥
३३७५॥§ 10887

दृग्विषैरिह दृष्टोऽपि स्वल्पशक्तिर्द्विजो जडः।
उच्छ्वासमपि नो कर्तुं शक्नोति किमु
वासि(बाधि?)तुम् ३३७६§ 10889

वेदवादिमुखस्था तु युक्तिः साध्व्यपि दुर्भगा।
कण्ठिका चरणस्थेव जघन्याश्रयसंस्थिता॥
३३७७॥§ 10891

को न तं कल्पयिष्यतीति। सम्भविबेनेति शेषः। यतो बाधकानुपलम्भादेव तस्य सम्भावना सिद्ध्यतीति भावः। आस्तां तावदेतत्—यदसाध्वी युक्तिर्वेदवादिमुखस्था नैव शोभत इति, नैवात्र चित्रम्, किंतु—साध्व्यप्याश्रयदोषेण भवतोच्यमाना न भ्राजते॥ ३३७४॥ ३३७५॥ ३३७६॥ ३३७७॥ § 10892

कथमित्याह—पावकाव्यभिचारिबमित्यादि। § 10893

पावकाव्यभिचारिबं धूमस्यापि न शक्यते।
वक्तुं तेन यतो धूमस्तन्मतेऽन्यत्र वर्त्तते॥
३३७८॥§ 10895

एकवस्तुस्वरूपबादुदन्वत्यपि वर्त्तते।
तत्राप्यनलसद्भावे व्यतिरेकः किमाश्रयः॥
३३७९॥§ 10897

886/k

धूमस्य हि दहनप्रतिबद्धजन्म तथा तदप्यभिचारिबमागोपालमतिप्रतीतमेव, तस्यापि बया सर्वस्य जगतो वस्तुबादिना पारमार्थिकमैक्यं वर्णयता दहनाव्यभिचारिबं न शक्यं प्रतिपादयितुम्, वस्तुस्वरूपबेनोदकेऽस्य भवन्मतेन धूमस्य परमार्थतो वृत्तेः। स्यादेतत्—अव्यभिचारितैवेत्याह—तत्रापीत्यादि। तत्राप्युदन्वति तादात्म्येन यद्यनलस्वभावोऽङ्गीक्रियते तदाऽनले साध्ये जलादिर्न विपक्षः स्यात्, ततश्च विपक्षाभावाद्धूमादेर्लिङ्गस्य किमाश्रयो विपक्षाद्व्यतिरेको भवेत्॥ ३३७८॥ ॥ ३३७९॥ § 10898

तद्रूपकार्यविज्ञप्तिः किंवा तत्रापि नो भवेत्।
विलक्षणात्मभावे वा वस्तुभेदोऽस्तु ताबिकः॥
३३८०॥§ 10900

यदि जलधौ परमार्थतो दहनोऽवस्थित इति मतम्, किमिति तद्रूपोपलब्धिर्दाहपाकादिलक्षणकार्यनिर्भासा च विज्ञप्तिर्न जायते। वैलक्षण्यमपीष्टमिति चेदाह—विलक्षणात्मेत्यादि। एतच्च विस्तरेण स्याद्वादपरीक्षायां विचारितमित्यास्तां तावदेतत्॥ ३३८०॥ § 10901

यदुक्तमेकेन प्रमाणेनेत्यादि, तत्राह—समस्तेत्यादि। § 10902

समस्तवस्तुसम्बद्धतत्त्वाभ्यासबलोद्गतम्।
सार्वज्ञं मानसं ज्ञानं मानमेकं प्रकल्प्यते॥
३३८१॥§ 10904

ननु नेत्रादिविज्ञानं ततः किमिदमुच्यते।
नूनं स चक्षुषा सर्वान्त्रसादीन्प्रतिपद्यते॥
३३८२॥§ 10906

सिद्धं च मानसं ज्ञानं रूपाद्यनुभवात्मकम्।
अविवादः परस्यापि वस्तुन्येतावति स्फुटः॥
३३८३॥§ 10908

वर्ण्यते हि स्मृतिस्तेन रूपशब्दादिगोचरा।
स्वप्ने च मानसं ज्ञानं सर्वार्थानुभवात्मकम्॥
३३८४॥§ 10910

ततश्चानियतार्थेन मानसेन प्रकल्पिते।
सर्वज्ञे चक्षुषा कस्माद्रसादीन्प्रतिपद्यते॥
३३८५॥§ 10912

चाक्षुषेणैव तत्क्लृप्तावयं दोषो भवेदपि।
समासेन तु चित्तेन वेत्त्येव च रसादिकम्॥
३३८६॥§ 10914

यत्राप्यतिशयो दृष्टः स्वस्वार्थानतिलङ्घनात्।

४ सर्वान्त्रसा] Correction: ; सर्वान्त्रसा
(sic!)सर्वान्त्रसा

दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तितः॥
३३८७॥§ 10916

887/k

इत्यादिकमतोऽनिष्टं परैरुक्तं न नो यतः।
स्वार्थाविलङ्घनेनैव मानसेऽतिशयो मतः॥
३३८८॥§ 10918

यज्जातीयैः प्रमाणैश्च यज्जातीयार्थदर्शनम्।
दृष्टं सम्प्रति लोकस्य तथा कालान्तरेऽपि नः॥
३३८९॥§ 10920

यदि चक्षुरादीन्द्रियधियां सर्वार्थपरिज्ञानमभ्युपगतं भवेत्, तदा भवेद्यथोक्तदोषप्रसङ्गः, यावता समस्तवस्तुगतानित्यत्वादिलक्षणाशेषतत्त्वाभ्यासप्रकर्षपर्यन्तजेन मनोविज्ञानेन सत्त्वार्थगोचरेण स्फुटप्रतिभासाविसंवादित्वाभ्यां प्रत्यक्षतामुपगतेन युगपदशेषवस्तुग्रहणात्सर्वविदिष्टः, नतु चक्षुरादिधिया। नच मनोज्ञानं सर्वार्थगोचरतया न प्रसिद्धमिति युक्तं वक्तुम्, यतो भवताऽपि रूपशब्दादिविषयं स्मार्त्तं ज्ञानमुपवर्णितम्। तच्च मनोज्ञानमेव। स्वप्ने च रूपादिप्रतिभासमतिप्रतीतमेवेति नास्यापह्नवः शक्यक्रियः। तेन स्वार्थाविलङ्घनेनैवातिशयस्येष्टत्वान्नास्माकं किञ्चिदनिष्टमापादितं भवता॥ ३३८१॥ ३३८२॥ ३३८३॥ ३३८४॥ ३३८५॥ ३३८६॥ ॥ ३३८७॥ ३३८८॥ ३३८९॥ § 10921

यस्यापि ज्ञानवादिनोऽक्षधिया सर्वविदिष्टस्तस्यापि दोषा(ष?)दौष्कुल्यवासनायाः प्रहाणे सति सर्वार्थवृत्तित्वेन सर्वधियां विभुत्वलाभस्येष्टत्वात्। दौष्कुल्यवासनैव हि धियां नियमकारणम्। तत्प्रहाणे सति कुतो नियतार्थविषयत्वमासां सम्भवेदिति मन्यमान आह—विशुद्धं वेत्यादि। § 10922

विशुद्धं वा भवेज्ज्ञानं सर्वं सर्वार्थगोचरम्।
हेतोः संभाव्यते कश्चित्फलेऽप्यतिशयः क्वचित्॥
३३९०॥§ 10924

नहि सूक्ष्मफला दृष्टा आमलक्यो मराविति।

सर्वास्तत्त्वेन तद्रूपा अन्यत्रापि भवन्ति ताः॥
३३९१॥§ 10926

शृण्वन्ति चक्षुषा सर्पा इत्येषाऽपि श्रुतिस्ततः।
सम्भाव्यार्था विचित्रा हि सत्त्वानां कर्मशक्तयः॥
३३९२॥§ 10928

कारणभेदेन हि भावानां स्वभावभेदप्रतिनियमान्न शक्यते क्वचिदेकदा दृष्टस्य वस्तुनः सर्वत्र सर्वदा तथा भावो निश्चेतुम्, नहि सूक्ष्मफला आमलक्यो मरुषु समुपलब्धा इत्येतावता सर्वत्र देशे सत्यपि कारणभेदसंभवे तथात्वेनावधारयितुं दर्शनमात्रेण प्रेक्षावन्तो युक्ताः। तेन चक्षुषाऽपि योगाभ्यासविशेषबलशलाकोन्मीलितेनकश्चिदपि सर्वार्थान्पश्यतीत्यविरुद्धम्॥ ३३९०॥ ३३९१॥ ३३९२॥ § 10929
888/k

यज्जातीयैरित्यादावाह—यस्येत्यादि। § 10930

यस्याध्वत्रितयस्थं हि सर्वं वस्त्ववभासते।
तथा नियतसामर्थ्यं वक्तुमित्थं स शोभते॥
३३९३॥§ 10932

तथा नियतसामर्थ्यमिति। तेनेष्टरूपेण नियतसामर्थ्यं सर्वं वस्त्ववभासत इति सम्बन्धः॥ ३३९३॥ § 10933

कीदृशं तद्वक्तुं शोभत इत्याह—यज्जातीयैरित्यादि। § 10934

यज्जातीयैः प्रमाणैस्तु यज्जातीयार्थदर्शनम्।
भवेदिदानीं लोकस्य तथा कालान्तरेऽप्यभूत्॥
३३९४॥§ 10936

इदानीमपि लोकस्य शक्तिर्ज्ञातुं न शक्यते।
भवता जन्तुमात्रेण सर्वशक्त्यविनिश्चयात्॥
३३९५॥§ 10938

निःशेषसत्त्वशक्तीनां ज्ञाने सर्वज्ञता बत।
नचानुमानतः सिद्धिरन्यथाभावशङ्कया॥
३३९६॥§ 10940

स्यादेतत्—न वयं प्रत्यक्षतो ज्ञात्वैवं ब्रूमः तथा कालान्तरेऽप्यभूदिति, किं तर्हि ?, अनुमानात्। यत्प्रमाणं यज्जातीयार्थग्राहि दृष्टं तत्कालान्तरेऽपि तथैवाभूत्प्रमाणत्वादिति, तत्राह—न चानुमानतः सिद्धिरिति। आमलक्यादिवद्धेतुविशेषणकार्यस्य विशेषदर्शनात्। अन्यथाऽपि विजातीयार्थग्रहणद्वारेण प्रवृत्तेः सम्भाव्यमानत्वादनैकान्तिकता हेतोः॥ ३३९४॥ ३३९५॥ ३३९६॥
§ 10941

येऽपि सातिशया दृष्टा इत्यादावाह—अतीन्द्रियार्थविज्ञानयोगेनापीत्यादि।
§ 10942

अतीन्द्रियार्थविज्ञानयोगेनाप्युपलभ्यते।
प्रज्ञादिगुणयोगित्वं पुंसां विद्यादिशक्तितः॥
३३९७॥§ 10944

अस्ति हीक्षणिकाद्याख्या विद्या या सुविभाविता।
परचित्तपरिज्ञानं करोतीहैव जन्मनि॥
३३९८॥§ 10946

श्रुतानुमितदृष्टं च यन्न वस्त्वत्र जन्मनि।
भूतं भवद्भविष्यच्च तद्विदन्ति वदन्ति च॥
३३९९॥§ 10948

ससंवादमभिव्यक्तमाविष्टाः पुरुषा इह।
विचित्रमन्त्रनागेन्द्ररक्षोयक्षादिशक्तितः॥
३४००॥§ 10950

५ विद्या या] Correction: ; विद्यायां (sic !)विद्या या

मावा भूद्दृष्टमित्यादि तथाऽप्यत्र न बाधकम्।
किञ्चित्प्रमाणमस्तीति तदभावो न सिद्ध्यति॥
३४०१॥§ 10952

889/k

नन्वतीन्द्रियार्थदर्शनादित्यसिद्धमेतत्, तथाहि—ईक्षणिकादिविद्याबलेन डाकिन्यादीनां परचित्तज्ञानं भूतभवद्भविष्यद्वस्तुपरिज्ञानं चोपलभ्यत एव। आदिशब्देन गान्धारीप्रभृतीनां ग्रहणम्। विचित्रभूतग्रहाद्य(द्या?) वेशबलाद्यातीन्द्रियार्थपरिज्ञानदर्शनादन्यत्राप्यप्रतिक्षेपः। मा भूद्वा व्यभिचारविषयदर्शनम्। तथाप्यप्रति(लम्भ)मात्रेण सर्वविदो नाऽभावो निश्चेतुं युक्तः। तदभावः—अतीन्द्रियार्थदृगभावो न सिद्ध्यति॥ ३३९७॥ ३३९८॥ ३३९९॥ ३४००॥ ३४०१॥ § 10953

प्राज्ञेऽपि हीत्यादावाह—उक्तेन चेत्यादि। § 10954

उक्तेन च प्रकारेण वेदकारे प्रसाधिते।
अवश्याभ्युपगन्तव्यस्त्वयाऽतीन्द्रियदृग्नरः॥
३४०२॥§ 10956

अतः प्राज्ञो नरः सूक्ष्मानर्थान् द्रष्टुं क्षमो भवेत्।
सजातीरप्यतिक्रामन्परानभिभवेन्नरान्॥
३४०३॥§ 10958

उक्तेनेति। अ(श्रु?)तिपरीक्षायाम्॥ ३४०२॥ ३४०३॥ § 10959

अत्रैवोपपत्तिमाह—यथा स्वविषय इत्यादि। § 10960

यथा स्वविषये शक्तिः श्रोत्रादेः प्रविशिष्यते।
गतियोगविशेषाद्यैर्मनसोऽपि तथा भवेत्॥
३४०४॥§ 10962

यथा गतिविशेषेणाञ्जनादिलक्षणयोगविशेषेण च श्रोत्रादेः स्वार्थशक्तिर्विशिष्यते तथा मनसोऽपि हेतुविशेषेण शक्तिः प्रविशिष्यत इति सम्भाव्यम्॥ ३४०४॥ § 10963

तत्र गतिविशेषकृतं श्रोत्रादेर्विशेषं दर्शयति—तथाहीत्यादि। § 10964

५ प्रभृती] Correction: ; प्रकृती
(sic !)प्रभृती

तथाहि वीक्ष्यते रूपं गृध्रैर्दूरतरस्थितम्।
तिरस्कृतं निधानादि तथा सिद्धाञ्जनादिकैः॥
३४०५॥§ 10966

योगविशेषकृतमप्याह—तिरस्कृतमित्यादि। सिद्धाञ्जनादिकैरिति। वीक्ष्यत इति सम्बन्धः। हेतौ करणे वा तृतीयेयम्॥ ३४०५॥ § 10967

एवं गतिविशेषस्य ज्ञानशक्तिविशेषंप्रति हेतुभावं प्रसाध्य दार्ष्टान्तिकेऽर्थे योजयन्नाह—एवमित्यादि। § 10968

एवं गतिविशेषेण देवादेर्दर्शनं भवेत्।
सूक्ष्मव्यवहितादीनां स्वोपपत्त्यानुरूप्यतः॥
३४०६॥§ 10970

स्वोपपत्त्यानुरूप्यत इति। अधस्तादेषां ज्ञानदर्शनं प्रवर्त्तते नोर्द्धमित्येवं यथा स्वमुपपत्त्या आनुरूप्येण ज्ञानं भवच्चातुर्महाराजकायिकादीनां(?) दे- 890/k
वानां केन वार्यते॥ ३४०६॥ § 10971

योगकृतमपि विशेषं योजयति—योगाभ्यासेत्यादि। § 10972

योगाभ्यासविशेषाच्च योगिनां मानसं तथा।
ज्ञानं प्रकृष्टरूपं स्यादित्यत्रास्ति न बाधकम्॥
३४०७॥§ 10974

यदि तु पुनर्यथोक्तगतियोगादिकारणासम्भवमुपदर्श्यातिशयनिषेधः क्रियते तदा सिद्धसाध्यतेति दर्शयन्नाह—गतियोगादिवैकल्य इति। § 10975

गतियोगादिवैकल्ये ज्ञाने त्वतिशयो यदि।
क्षिप्यतेऽयुक्तमेतद्धि हेत्वभावात्फलं नहि॥
३४०८॥§ 10977

यथा शास्त्रान्तरज्ञानं तन्मात्रेण न लभ्यते।

---

६ चातुर्म] Correction : ; चानु(ज्ञातु ?) म (sic !)चातुर्म

उत्तरोत्तरतद्धेतुवैकल्येऽतिशयस्तथा॥
३४०९॥§ 10979

देवानाम्। यच्चोक्तम्—श्रोत्रगम्येष्वि त्यादि, तदप्यनेनैव प्रत्युक्तम्, अदर्शनमात्रेण तथाविधस्यातिशयस्य प्रतिषेद्धुमशक्यत्वादित्यभिप्रायः॥ ३४०८॥ ३४०९॥ § 10980

यच्चोक्तम्, एवं शास्त्रविचारेष्वित्यादि, (तत्राह)—न चैकदेशेत्यादि। § 10981

नचैकदेशविज्ञानात्सर्वज्ञानास्तितोच्यते।
येन वेदादिविज्ञानात्स्वर्गाद्यध्यक्षता भवेत्॥
३४१०॥§ 10983

किंतु प्रज्ञाकृपादीनामभ्यासाद्वृद्धिदर्शनात्।
अन्योऽप्यतिशयस्तस्माद्वर्धमानात्प्रतीयते॥
३४११॥§ 10985

मनोगुणतयाऽप्येषां काष्ठापर्यन्तसम्भवः।
नैर्घृण्यवन्महाभ्यासान्निष्ठाऽशेषार्थबोधनात्॥
३४१२॥§ 10987

धर्मा(अर्था?)वबोधरूपा हि प्रज्ञा लक्षणतः स्थिता।
एकस्याप्यपरिज्ञाने साऽसमाप्तैव वर्त्तते॥
३४१३॥§ 10989

नह्यस्माभिरेकदेशपरिज्ञानमात्रादशेषपदार्थपरिज्ञानमभ्युपगम्यते, येनाभ्यधायि भवता न(तु) शास्त्रान्तरज्ञानं तावन्मात्रेण लभ्यत इति। किंत्वभ्यासवशात्प्रज्ञाप्रकर्षोपलम्भादन्योऽप्यतीन्द्रियपरिज्ञानकृतो विशेषस्तस्मादभ्यासाद्वर्द्धमानात्प्रकर्षविशेषं प्राप्ताद्भवतीति सम्भाव्यते। एतच्च पूर्वं प्रसाधितं पुनरपि भूयः प्रमाणयति—प्रयोगः—ये ये मनोगुणास्तेऽभ्यासातिशये सति सम्भ-
891/k वत्प्रकर्षपर्यन्तवृत्तयः, यथा श्रोत्रियजोदिंग(?)नैर्घृण्यम्, मनोगुणश्च प्रज्ञेति स्वभावहेतुः। न नैकान्तिकता हेतोः, प्रज्ञायाः पदार्थस्वभावबोधलक्षणायाः प्रकर्षपर्यन्तगमनं नाशेषार्थपरिज्ञानमन्तरेण संभवति। नाप्यप्रसिद्धविशेषणतया

हेतोरसिद्धता, पूर्वमभ्यासविशेषसम्भवस्य विस्तरेण प्रसाधितत्वात्। काष्ठाश्-ब्दः प्रकर्षपर्यायः॥ ३४१०॥ ३४११॥ ३४१२॥ ॥ ३४१३॥ § 10990

ये वा समानजातीयपूर्वबीजप्रवृत्तयः।
तेऽत्यन्तवृद्धिधर्माणः संस्कारोत्कर्षभेदतः॥
३४१४॥§ 10992

व्रीह्यादिवत्सम्भविनो दयामत्यादयोऽपि च।
यथाभिहितधर्माणः प्रवृद्धौ सर्वदर्शिता॥
३४१५॥§ 10994

अथवा ये तुल्यजातीयपूर्वबीजप्रसूतयस्ते संस्कारविशेषे सत्यत्यन्तवृद्धिधर्माणः सम्भविनः, यथा व्रीह्यादयः, यथोक्तधर्माणश्च दयाप्रज्ञादय इति स्वभावहेतुः। अत्रापि पूर्ववदसिद्धानैकान्तिकता न भवति। मतिः—प्रज्ञा। यथाऽभिहितधर्माण इति। समानजातीयपूर्वबीजप्रवृत्तय इत्यर्थः॥ ३४१४॥ ३४१५॥ § 10995

ये चापचपधर्माणः प्रतिपक्षस्य सन्निधौ।
अत्यन्तापचयस्तेषां कलधौतमलादिवत्॥
३४१६॥§ 10997

सम्भाव्यन्ते तथा चामी क्लेशज्ञेयानृतादयः।
यथोपदिष्टधर्माणस्तत्प्रहाणेऽमला धियः॥
३४१७॥§ 10999

यथोक्तधर्मणामेषां सम्भाव्यो यदि वा मलः।
अत्यन्तोन्मूलने दक्षः प्रतिपक्षस्तथैव हि॥
३४१८॥§ 11001

अथवा ये प्रतिपक्षसन्निधावपचयधर्माणो दृष्टास्ते प्रतिपक्षात्यन्तवृद्धौ सत्यां सम्भवदत्यन्तापचयधर्माणः, यथा कनकमलादि, नैरात्म्यादिलक्षण-

संमुखीभावे चापचयधर्माणो रागादय इति स्वभावहेतुरिति। नासिद्धता हेतोः, नैरात्म्यज्ञानेन सह क्लेशादेर्विरोधस्य प्रसाधितत्वात्। नाप्यनैकान्तिकता, प्रतिपक्षात्यन्तवृद्धौ सत्यां विपक्षस्यावस्थानासम्भवात्। अन्यथा योऽत्यन्तमुन्मूलयितुमसमर्थः स कथमल्पमप्यपचयं कुर्यात्। नहि स्फुटतरस्फुरत्स्फुलिङ्गमालोज्ज्वलज्ज्वलनकलापान्तर्गतमपि वज्रमपचयमनुभवति कदाचित्। न चापि विपक्षस्यात्यन्तवृद्ध्यसम्भवादनैकान्तिकता,पूर्वं विस्तरेणात्यन्तवृद्धिस-
892/k म्भवस्य प्रसाधितत्वात्। अथवा ये प्रतिपक्षसन्निधावपच यधर्माणस्ते सम्भवदत्यन्तोन्मूलनदक्षप्रतिपक्षाः, तद्यथा कनकमलादि, यथोक्तधर्माणश्च क्लेशज्ञेयावरणादय इति स्वभावहेतुः। अत्रापि पूर्ववदसिद्धानैकान्तिकते परिहार्ये। आदिशब्देन कर्मावरणादिपरिग्रहः॥ ३४१६॥ ३४१७॥ ३४१८॥ § 11002

तत्त्वदृष्टिनिबन्धत्वादत्यन्तापचयः क्वचित्।
बाह्यस्येवास्य तमस आन्तरस्यापि गम्यते॥
३४१९॥ § 11004

तस्य चापचये जाते ज्ञानमव्याहतं महत्।
स्वातन्त्र्येण प्रवर्त्तेत सर्वत्र ज्ञेयमण्डले॥
३४२०॥ § 11006

अथवा ये तत्त्वदर्शननिबन्धकारिणस्ते सम्भवदत्यन्तापचयाः, यथा बाह्यं शार्वरं तमः, तत्त्वदर्शननिबन्धकारिणश्च क्लेशज्ञेयावरणादय इति स्वभावहेतुः। नचास्यानैकान्तिकतेति दर्शयन्नाह—तस्य चेति। तस्यान्तरस्य तमसः॥ ३४१९॥ ३४२०॥ § 11007

ये वा स्थिराश्रये वृत्ताः कथञ्चिदपि चाहिताः।
तद्भावायापुनर्यत्नव्यापेक्षा बाधकेऽसति॥
३४२१॥ § 11009

संस्कारोत्कर्षभेदेन काष्ठापर्यन्तवृत्तयः।
ते सम्भवन्ति विस्पष्टं शातकुम्भविशुद्धिवत्॥
३४२२॥ § 11011

यथाऽभिहितधर्माण इमे मतिदयादयः।
तेषां पर्यन्तवृत्तौ च सर्ववित्त्वं प्रभास्वरम्॥
३४२३॥§ 11013

लङ्घनोदकतापाभ्यां नचेह व्यभिचारिता।
नहि तल्लङ्घनादेव लङ्घनं बलयत्नयोः॥
३४२४॥§ 11015

अथवा—ये स्थिराश्रयवर्त्तिनः सकृच्च यथाकथञ्चिदाहितविशेषाः सन्तोऽसति विरोधिप्रत्यये तद्भावायापुनर्यत्नापेक्षिणस्ते संस्कारोत्कर्षभेदेन सम्भवत्प्रकर्षपर्यन्तवृत्तयः, तद्यथा कनकविशुद्ध्यादयः, यथोक्तधर्माणश्च प्रज्ञाकृपादय इति स्वभावहेतुः। लङ्घनोदकतापाभ्यां न चेह व्यभिचारितेति। सविशेषणत्वादित्यभिप्रायः। नहिलङ्घनोदकतापौ सकृदाहितौ पुनराधानाय यत्नादिनिरपेक्षौ वर्त्तेते। नापि स्थिराश्रयौ यदि वाऽत्रापि समानजातीयबीजवृत्तित्वे सतीति विशेषणापेक्षणादव्यभिचारो लङ्घनेनेति मन्यमान आह—नहि तल्लङ्घनादेवेति। तल्लङ्घनं नहि लङ्घनादेव जायते। कस्मिन् सति नाम जायते इत्याह—लङ्घनं बलयत्नयोरिति। बले यत्ने च सतिलङ्घनं भवति, नतु लङ्घने सति। तयोश्च बलयत्नयोः स्थितशक्तितया लङ्घनस्यापि स्थितात्मतेति 893/k भावः। स्यादेतद्यदि बलयत्नाभ्यामेव लङ्घनं भवति न लङ्घनात्, एवं सत्यभ्यासे यादृशं लङ्घनं पुरुषस्य भवति तादृगभ्यासात्प्रागपि प्राप्नोतीति। नैष दोषः। प्राक्तनस्य श्लेष्मादिना देहस्य विगुणत्वात्पश्चाद्वन्न लङ्घनमुपजायते। पश्चात्तु शनैः प्रयत्नेन देहवैगुण्येऽपनीते सति यथाबलमेवावतिष्ठते लङ्घनम्। अवश्यं चैतदेवं विज्ञेयम्। अन्यथा यदि लङ्घनादेव लङ्घनं स्यात्तदा लङ्घनस्य व्यवस्थितोत्कर्षता न स्यात्॥ ३४२१॥ ३४२२॥ ३४२३॥ ३४२४॥
§ 11016

अथवा लङ्घनस्यापि हेतुविशेषापेक्षिणः स्थितोत्कर्षताया असिद्धेर्न तेन व्यभिचार इति दर्शयति—यदि वेत्यादि। § 11017

यदि वा लङ्घनस्यापि काष्ठापर्यन्तवृत्तिता।
समाधिबलगत्यादिविशेषात्स्यात्स्वहेतुतः॥
३४२५॥§ 11019

सिद्धिर्मनोजवासंज्ञा तथाच श्रूयते प्रमा।
यथा चिन्तितमात्रेण याति दूरमपि प्रभु(?)॥
३४२६॥§ 11021

नचाप्यदृष्टिमात्रेण तदभावः प्रसिध्यति।
नचात्र बाधकं किंचिद्वक्तुमत्र परः क्षमः॥
३४२७॥§ 11023

तथाहि—समाधिबलविशेषप्रयोगाल्लङ्घनस्यास्माभिरिष्यत एवात्यन्तप्रकर्षवर्त्तित्वम्, यथा भगवतो मनोजवा नाम सिद्धिः पठ्यते, यस्यां स्थितस्य मनस इव जवो भवति। अत एव सा मनोजवेति प्रख्याता। नचास्या बाधकं प्रमाणमस्ति। नाप्यदर्शनमात्रेण प्रतिक्षेपो युक्तोऽतिप्रसङ्गत्॥ ३४२५॥ ३४२६॥ ३४२७॥ § 11024

अपि च दृश्यत एवाश्रये विशेषोपाधिकादभ्यासविशेषाद्गतेरत्यन्तविशेषः, ततोऽपि भगवतस्तादृशी गतिः सम्भविनीति दर्शयन्नाह—राजहंसशिशुरित्यादि। § 11025

राजहंसशिशुः शक्तो निर्गन्तुं न गृहादपि।
याति चाभ्यासभेदेन पारमम्भःपतेरपि॥
३४२८॥§ 11027

आश्रयोपाधिकाभ्यासभेदादस्य गतिर्यथा।
तादृशी तादृशादेव किं न सम्भाव्यतेऽधिका॥
३४२९॥§ 11029

बोधिसत्त्वदशायां हि न शक्तस्तादृशीं गतिम्।
प्राप्तुं प्राप्ते समाधौ तु विशिष्टे शक्नुयान्मुनिः॥
३४३०॥§ 11031

यथा च राजहंसशावः प्राक् स्वकुलायादपि निर्गन्तुमशक्तः पश्चाद-
894/k ल्पीयस्यप्य भ्यासे सति समुपजातपक्षो जलधेरपि पारमुत्पतति, तद्वदन्योऽप्याश्रयविशेषोपाधिकादभ्यासाद्विशिष्टामपि गतिमासादयतीति सम्भाव्यम्। पक्षविशेषलाभादेवासौ दूरतरदेशगामी भवतीति नाभ्यासबलेनेति चेत्।

नहि सञ्जातपक्षोऽपि सहसैवोड्डीय गच्छन् दृश्यते शकुनिशावः, किं तर्हि ?, शाखान्तराच्छाखान्तरगमनक्रमेणाभ्यस्य कियन्मात्रं गमनं पश्चादपास्तशङ्को दूरतरमपि देशं व्रजति। किञ्च—आश्रयविशेषलाभे सति यथा हंसादेः प्रागशक्तस्यापि सतः पश्चाद्गतिर्विशेष्यते तथा भगवतोऽपि बोधिसत्त्वावस्थायामशक्तस्यापि सतः पश्चात्समाधिविशेषलाभादासादिताश्रयविशेषस्य तथाविधा गतिः सम्भाव्यत इत्येवम्परमेतत्। अभ्यासग्रहणमतन्त्रम्।प्रयोगः—यः सम्भवदाश्रयविशेषोपाधिरभ्यासः स सम्भवदत्यन्तदूरगमनफलः, यथा राजहंसशिशोरभ्यासः, सम्भवदाश्रयविशेषोपाधिर्मनुष्याणामभ्यास इति स्वभावहेतुः॥ ३४२८॥ ३४२९॥ ३४३०॥ § 11032

यदुक्तं दशहस्तान्तरमित्यादि तदपास्तमिति दर्शयति—दशेत्यादि। § 11033

दशहस्तान्तरव्योम्नस्तद्यदुत्लुत्य गच्छति।
शक्तिः स्यादीदृशी हेतोस्तस्य दूरगतावपि॥
३४३१॥ § 11035

स्थिराश्रयत्वे सतीति विशेषणोपादानादुदकतापेन नानैकान्तिक इति दर्शयति—उष्णतामित्यादि। § 11036

उष्णतां नीयमानस्य क्षयो भवति चाम्भसः।
अस्थैर्यादाश्रयस्यातः कस्य कस्मिन्प्रकृष्टता॥
३४३२॥ § 11038

स्यादेतत्, प्रज्ञादेस्तु स्थिराश्रयत्वमेव कथं सिद्धमित्याह—मानसानामित्यादि। § 11039

मानसानां गुणानां तु चित्तसन्ततिराश्रयः।
साऽधारयोगतो वृत्तान्न कथंचिन्निवर्त्तते॥
३४३३॥ § 11041

सेति। चित्तसन्ततिः। आधारयोगतो वृत्तादिति। बोधिसत्त्वाश्रयलक्षणाधारसम्बन्धेन प्रवृत्तेरित्यर्थः। विशिष्टस्याधारस्य विवक्षितत्वात्। तथाहि—परलोकस्य प्रसाधितत्वाद्बोधिसत्त्वानां च सात्मीभूतमहाकृपाणामासंसारमशेषसत्त्वोद्धरणायावस्थानात्तदाश्रयवर्त्तिनी चित्तसन्ततिरतितरां स्थिराश्रया। या तु श्रावकादीनां सन्तानवर्त्तिनी सा न स्थिराश्रया तेषां शीघ्रतरं प-

रिनिर्वाणान्मन्दत्वात् कृपायास्तेषामवस्थाने यत्नाभावादिति भावः॥ ३४३३॥
§ 11042

895/k

द्वितीयमपि विशेषणं कथं सिद्धमिति चेदाह—यावदित्यादि। § 11043

यावद्यावद्गुणौघोऽस्यामाभिमुख्येन वर्त्तते।
प्रभास्वरतरा तावत्सुतरामेव वर्त्तते॥
३४३४॥ § 11045

एतदेव कथं सिद्धमित्याह—प्रभास्वरमित्यादि। § 11046

प्रभास्वरमिदं चित्तं तत्त्वदर्शनसात्मकम्।
प्रकृत्यैव स्थितं यस्मान्मलास्त्वागन्तवो मताः॥
३४३५॥ § 11048

एतच्च पूर्वमेव व्याख्यातमस्माभिः। एते च प्रकृत्या तत्त्वदर्शनात्मकतया चित्तस्य स्वभावभूताः प्रज्ञादयो विशेषा इति प्रतिपादितमिति स्वभावत्वेन प्रज्ञादीनां सकृदाहितानां स्वरसत एव प्रवृत्तिति सिद्धम्॥ ३४३५॥ § 11049

द्वितीयमपि विशेषणं तत्त्वदर्शनात्मकमेव विज्ञानस्य कथं सिद्धमिति चेदाह—परबोधात्मेत्यादि। § 11050

परबोधात्मनियतं चेतो यदि हि सम्भवेत्।
तदाऽसिद्धोपलम्भत्वादर्थवित्तिर्न सम्भवेत्॥
३४३६॥ § 11052

तस्मात्स्वसंवेदनात्मत्वं चेतसोऽस्ति प्रकाशनात्।
अनारोपितरूपा च स्वसंवित्तिरियं स्थिता॥
३४३७॥ § 11054

मुख्यं हि तावच्चित्तस्य स्वसंवेदनमेव रूपमित्यवश्यं सर्ववादिभिरभ्युपेयम्, अन्यथा यदि परेण ज्ञानान्तरेण बुध्यत इति स्यात्तदाऽप्रसिद्धोपलम्भत्वेनार्थवित्तिर्नसिद्ध्येत्। तस्मान्मुख्यं चेतस आत्मप्रकाशनमेव रूपम्। स

५ प्रवृत्ति] Correction: ; प्रकृतिर्भवती (sic!)प्रवृत्ति

चात्मा तस्यानित्यादिरूप इति सामर्थ्यात्तत्त्वदर्शनात्मकमेव चित्तं सिद्धमिति भावः॥ ३४३६॥ ३४३७॥ § 11055

स्यादेतत्—भवतु तत्त्वदर्शनात्मकं चेतस्तथाऽपि प्रहीणानामपि बलेन पुनरुत्पत्तिसम्भवात्सर्वेषामेव यथोक्तानां हेतूनामनैकान्तिकता दुर्निवारेत्याशङ्क्याह—मार्गे सात्म्यमित्यादि। § 11056

मार्गे सात्म्यमतो याते तेत(तैस्त?)स्याभिभवो न हि।
रागद्वेषादिभिर्दोषैस्ते हि प्रागेव दुर्बलाः॥
३४३८॥§ 11058

सात्मीभावाच्च मार्गस्य सर्वापक्षालनाशिनः।
न यत्नेन विना हानिर्यत्नो न गुणदर्शनात्॥
३४३९॥§ 11060

अतो निर्मलनिष्कम्पगुणसन्दोहभूषणः।
दोषवाताविकम्प्यात्मा सर्वज्ञो गम्यते जिनः॥
३४४०॥§ 11062

896/k

मार्गे(र्ग?)सात्मीभावात्प्रागपि यदा रागादयो मला आगन्तुकतया दुर्बलत्वान्मार्गमभिभवितुमसमर्थास्तदा सात्मीभावगते मार्गे कथं तमभिभविष्यन्ति। किञ्च—सात्मीभावमुपगतस्य चेतोगुणस्य श्रोत्रियस्य जोदिंग(?)नैर्घृण्यवन्न यत्नमन्तरेण प्रहाणं शक्यं कर्त्तुम्। नच गुणवति वस्तुनि तत्त्वदर्शिनः प्रहाणाय यत्नः सम्भवति। कस्मात्? गुणदर्शनात्। एतच्च पूर्वमावेदितमेव। अपक्षालः—दोषः॥ ३४३८॥ ॥ ३४३९॥ ३४४०॥ § 11063

अथवा—यदेव वस्तुत्वादि त्वया सर्वज्ञप्रतिषेधायोक्तं तदेव तत्साधने पर्याप्तमिति दर्शयितुं व्याप्तिं तावदुस्तुत्वादेर्हेतोः साधयन्नाह—किञ्चेत्यादि। § 11064

१ बलेन] Correction: ; बलानां (sic!)बलेन

किञ्च ये ये ति(वि?)भाव्यन्ते ते ते भ्रा(भा?)न्ति
परिस्फुटम्।
भावनापरिनिष्पत्तौ कामादिविषया इव॥
३४४१॥§ 11066

सर्वधर्माश्च भाव्यन्ते दीर्घकालमनेकधा।
शून्यानात्मादिरूपेण तात्त्विकेन महात्मभिः॥
३४४२॥§ 11068

शून्यानात्मादिरूपस्य भाविकत्वं च साधितम्।
भूतार्थभावनोद्भूतेः प्रमाणं तेन तन्मतम्॥
३४४३॥§ 11070

तत्रायं मौलः प्रयोगो वक्ष्यमाणः। ये वस्तुत्वज्ञेयत्वादिधर्मयोगिनस्ते सम्भवद्भावनाप्रकर्षपर्यन्तवर्त्त्येकज्ञानस्फुटप्रकाशनाः, तद्यथा—कामिनीपुत्रचोरादयः कामाद्युपप्लुतैर्भाव्यमानाः, सर्वधर्माश्च वस्तुत्वादिधर्मयोगिन इति स्वभावहेतुः। नचायमनैकान्तिकः। तथाहि—यद्यद्भूतमभूतं वा भाव्यते तत्सर्वं भावनानिष्पत्तौ स्फुटप्रतिभासज्ञानफलं सिद्धम्, यथा कामुकादेरङ्गनादयो विषयाः, सर्वे च धर्मा भाव्यन्ते दीर्घकालं सात्मीभूतकृपैस्तात्त्विकेन रूपेणेति स्वभावहेतुः। अनेन स्फुटप्रतिभासेन ज्ञानफलेन भावना व्याप्तेति दर्शितम्, अर्थान्तरानपेक्षितत्वात्स्फुटप्रतिभासस्य तात्त्विकत्वमेव शून्यादिरूपस्य कथं सिद्धमित्याह—शून्येत्यादि॥ ३४४१॥ ३४४२॥ ॥ ३४४३॥ § 11071

एतच्च शून्यादिज्ञानं प्रत्यक्षप्रमाणं साधयन्नाह—प्रत्यक्षमित्यादि। § 11072

प्रत्यक्षं व्यक्तभासित्वात्प्रमाणं वस्तुसङ्गतेः।
चक्षुराद्याश्रयोद्भूतनीलादिप्रतिभासवत्॥
३४४४॥§ 11074

सम्भवत्येकविज्ञाने सकृत्स्पष्टावभासनम्।

---

४ महात्मभिः] Correction : ; महान्मतिः (sic !)महात्मभिः

सर्वेषामपि धर्माणामतश्चैवं प्रतीयताम्॥
३४४५॥§ 11076

897/k

तथा विभाव्यमानत्वादङ्गनात्मजचोरवत्।
इच्छामात्रमुखीभावा भावनापि न दुर्लभा॥
३४४६॥§ 11078

स्फुटप्रतिभासित्वेनाविकल्पतया प्रमाणप्रसिद्धार्थविषयत्वेनाविसंवादितया चक्षुरादिज्ञानवत्प्रत्यक्षप्रमाणमेतत्। ततश्च भावनामात्रभाविनि स्फुटप्रतिभासित्वे सिद्धे सिद्धमेव सर्वधर्माणामेकज्ञाने युगपत्स्फुटप्रतिभासनमिति सिद्धा व्याप्तिः सम्भवत्येकविज्ञाने सर्वधर्माणां सकृत्स्पष्टावभासनमिति। प्रयोगः—ये ये विभाव्यन्ते ते सम्भवत्सकृदेकविज्ञानस्फुटप्रतिभासना यथाऽङ्गनादयः। सर्वधर्माश्च विभाव्यन्ते इति स्वभावहेतुः। नचायमसिद्धो हेतुर्मन्तव्य इत्यादर्शयन्नाह—इच्छेत्यादि। पूर्वं च विस्तरेण भावनासम्भवस्य प्रतिपादितत्वादिति नासिद्धो हेतुः॥ ३४४४॥ ३४४५॥ ॥ ३४४६॥ § 11079

एवं स्फुटप्रतिभासित्वस्य भावनामात्रानुबन्धित्वप्रतिपादनेन व्याप्तिं प्रसाध्य साम्प्रतं मौलं प्रमाणार्थं दर्शयन्नाह—भावनेत्यादि। § 11080

भावनोत्कर्षनिष्ठैकबुद्धिस्पष्टप्रकाशनाः।
वस्तुसत्त्वादिहेतुभ्यः(?) सर्वधर्माः प्रियादिवत्॥
३४४७॥§ 11082

एवं च यस्य वस्तुत्वसत्त्वोत्पादादिलक्षणाः।
निश्चये हेतवः शक्ताः को न तं साधयिष्यति॥
३४४८॥§ 11084

एकज्ञानक्षणव्याप्तनिःशेषज्ञेयमण्डलः।
सुरासुरशिरोरत्नभूतः सिद्धोऽत्र सर्ववित्॥
३४४९॥§ 11086

भावनोत्कर्षस्य निष्ठा यस्यामेकबुद्धौ सा तथोक्ता। गमकत्वाद्वैयधिकरण्येऽपि बहुव्रीहिः। भावनोत्कर्षनिष्ठायामेकबुद्धौ स्पष्टं प्रतिभासनं येषां ते

तथोक्ताः। यस्य चज्ञाने ते तथा भासन्ते स सकृदेकज्ञानव्याप्ताशेषज्ञेयमण्डलः सकलसुरासुरचूडामणिभूतः सिद्धः सर्वज्ञ इति॥ ३४४७॥ ३४४८॥ ३४४९॥ § 11087

ज्ञाता धर्मादयो वै ते केनचिद्वचनादृते।
सत्यात्मनोपदिष्टत्वात्कनकादिविशुद्धिवत्॥
३४५०॥§ 11089

अथवा ये सत्यात्मनोपदिष्टास्ते केनचिद्विदिताः, यथा कनकविशुद्ध्यादयः, सत्यात्मना चोपदिष्टा धर्मादय इति स्वभावहेतुः॥ ३४५०॥ § 11090

स्यादेतत्—वेदतोऽपि ज्ञात्वोपदेशसम्भवात्सिद्धसाध्यतेति चेदाह—वेदानामित्यादि। § 11091

898/k

वेदानां पौरुषेयत्वे सिद्धे सिद्धं न साधनम्।
अज्ञातस्योपदेशोऽस्ति तथ्यो यादृच्छिको
नरः(हि?)३४५१॥§ 11093

पूर्वं श्रुतिपरीक्षायां वेदानां पौरुषेयत्वस्य प्रसाधितत्वान्न सिद्धसाध्यता। अथापि स्यादज्ञात्वा यदृच्छयाऽप्युपदेशसम्भवादनैकान्तिकतेत्याह—अज्ञातस्येत्यादि। नह्यज्ञात्वा यदृच्छया प्रमाणाविरुद्धं नियमेन बहु शक्यं भाषितुम्॥ ३४५१॥ § 11094

मुद्रामण्डलमन्त्रादेर्यत्सामर्थ्यमतीन्द्रियम्।
पिशाचडाकिनीमोक्षविषापनयनादिषु॥
३४५२॥§ 11096

श्रुतानुमानभिन्नेन साक्षाज्ज्ञानेन निर्मलम्।
मुनिताक्ष्यादिविज्ञानं न चेत्तद्विदितं कथम्॥
३४५३॥§ 11098

किञ्च—यदेतन्मन्त्रादीनां विषापनयनादिसामर्थ्यमत्यन्तपरोक्षं तद्यदि बुद्धादिभिः साक्षान्न विदितं तत्कथं तैर्भाषितमिति वक्तव्यम्॥ ३४५२॥ ३४५३॥ § 11099

अनुमानतो ज्ञात्वा भाषितमिति चेदाह—न चानुमानत इत्यादि। § 11100

न चानुमानतो ज्ञानं तस्य पूर्वमदृष्टितः।
तेन लिङ्गस्य सम्बन्धदर्शनानुपपत्तितः॥
३४५४॥§ 11102

नह्यविदितलक्षणसम्बन्धं वस्त्वनुमानविषयः, नच तेनात्यन्तपरोक्षेण वस्तुना सह कस्यचिल्लिङ्गस्य सम्बन्धः शक्यते निश्चेतुम्॥ ३४५४॥ § 11103

श्रुत्वा नचान्यतः प्रोक्तं तुल्यपर्यनुयोगतः।
न यदृच्छाविसंवादिरूपमीदृक् च भावितम्॥
३४५५॥§ 11105

देशनैवम्परैवेयं नान्यहेतूपकल्पना।
हेत्वन्तरकृतायां हि वृत्तौ तन्नाम शङ्क्यते॥
३४५६॥§ 11107

पिपासाकुलचित्तस्य वाहिनीमुपसर्पतः।
तथा विद्रुमसम्प्राप्तेर्युक्ता यादृच्छिकी स्थितिः॥
३४५७॥§ 11109

परतः श्रुत्वा प्रोक्तमिति चेन्न, तस्यापि तुल्यपर्यनुयोगात। तथाहि—तथाऽप्ययं विचारोऽवतरति तेनापि परेण कथं ज्ञातम्, नह्यज्ञात्वा तथोपदेशः सम्भवेत्, तेनाप्यन्यतो ज्ञातमिति चेत्, एवं तर्ह्यनवस्था स्यात्, ततश्चान्धपरम्परायां सत्यां सर्वेषामनभिज्ञत्वान्न सम्यगुपदेशः स्यात्। यथोक्तम्—नैवञ्जातीयकेष्वर्थेषु पुरुषवचनं प्रामाण्यमुपैति, अन्धानामिव वचनं रूपविशेषेष्विति। स्यादेतदविसंवादित्वं घुणा क्षरवद्यादृच्छिकमपि स- 899/k
म्भाव्यत इत्याशङ्क्य ह—न यदृच्छेत्यादि। यदृच्छयाअविसंवादस्तदेव रूपं यस्येति विग्रहः। अन्यार्थसमीहया प्रवृत्तस्यार्थान्तरसंवादो यादृच्छिकः सम्भाव्यते। यथा नदीदेशोपसर्पणाभिप्रायेण प्रवृत्तस्य वृक्षमूलोपसर्पणम्। नचात्रान्यार्थाभिप्रायेण प्रवृत्तिः सम्भवति, तथाहि—धर्मं वो भिक्षवो देशयिष्यामीत्येवं प्रतिज्ञाय प्रवृत्तेर्धर्माद्युपदेशपरैवेयं देशना, नान्यार्थपरेत्यवसीयते।

वाहिनी—नदी। विद्रुमो—वृक्षः। प्रवालं वा॥ ३४५५॥ ३४५६॥ ३४५७॥
§ 11110

मोहादप्युपदेशसम्भवादनैकान्तिकतेति चेदाह—विक्षिप्तचेतसामित्यादि।
§ 11111

विक्षिप्तचेतसामेतन्मूढानां नच भाषितम्।
नियतानुक्रमं हीदं प्रकृष्टं फलसाधकम्॥
३४५८॥§ 11113

नहि नियतानुपूर्वीकं पूर्वापराव्याहतं पुरुषार्थसाधकं वाक्यं विक्षिप्तचेतोभिरनल्पं भाषितुं शक्यम्। तस्मात्सिद्धं केनचित्साक्षाद्धर्मादयो विज्ञाता इति॥ ३४५८॥ § 11114

स्यादेतत्—यदि नाम सामान्येन सिद्धम्, तथाऽपि सुगते धर्मज्ञत्वं साधयितुमिष्टम्, तत्ते कथं सिद्ध्यतीत्याशङ्क्य भगवति धर्मज्ञत्वं साधयन्नाह—योऽश्रुतानुमितमित्यादि। § 11115

योऽश्रुतानुमितं सत्यं तत्परोऽर्थं प्रकाशते।
प्रत्यक्षज्ञाततद्रूपः स तादृक्प्रतिपादकः॥
३४५९॥§ 11117

प्रत्यक्षदृष्टनीरादिर्यथाऽन्यः प्रतिपादकः।
अश्रुतानुमितं सत्यं तत्परस्त्वार्थमुक्तवान्॥
३४६०॥§ 11119

अतीन्द्रियं पराज्ञातसामर्थ्यं परिनिश्चयात्।
मुद्रामण्डलकल्पादि लक्षणं मुनिसत्तमः॥
३४६१॥§ 11121

प्रयोगः—यस्तत्परोऽश्रुतानुमितसत्यार्थोपदेशी (स) साक्षाद्विविदिततदर्थतत्त्वः, यथा प्रत्यक्षज्ञातसलिलादिस्तदुपदेष्टा, तथा च भगवानिति स्वभावहेतुः। सत्यत्वादेः प्रसाधितत्वान्नासिद्धता हेतोः। नाप्यनैकान्तिकतेति प्रतिपादितमेतत्। सर्वेषां चहेतूनां सपक्षे सत्त्वान्न विरुद्धतेति मन्तव्यम्। प-

राज्ञातसामर्थ्यमिति। परैरज्ञातंसामर्थ्यं यस्य मुद्रादेस्तत्तथोक्तम्॥ ३४५९॥ ३४६०॥ ३४६१॥ § 11122

यदुक्तम्, तस्मादतिशयज्ञानैरित्यादि, तत्राह—तस्मादित्यादि। § 11123

तस्मादतिशयज्ञानैरुपायबलवर्त्तिभिः।
सर्व एवाधिको ज्ञातुं शक्यते योऽप्यतीन्द्रियः॥
३४६२॥§ 11125

900/k

एकापवरकस्थस्येत्यादावाह—एकेत्यादि। § 11126

एकापवरकस्थस्य प्रत्यक्षं यत्प्रवर्त्तते।
शक्तिस्तत्रैव तस्य स्यान्नैवापवरकान्तरे॥
३४६३॥§ 11128

इत्येतत्सर्वसत्त्वस्थसामर्थ्यानुभवे सति।
निश्चेतुं भवतो युक्तमन्यथा किंनिबन्धनम्॥
३४६४॥§ 11130

एतत्प्रतिज्ञामात्रप्रमाणकमेवोक्तं भगव(भव?)ता, नह्यर्वाग्दर्शिनामनुपलम्भमात्रेणसर्वपुंसामतीन्द्रियार्थज्ञानाशक्तिर्निश्चेतुं पार्यते॥ ३४६३॥ ३४६४॥ § 11131

स्यादेतत्—नानुपलम्भमात्रेणास्माभिरशक्तिनिश्चयः क्रियते। किं तर्हि ?। पुरुषत्वादिभ्यो हेतुभ्यः। तथाहि—सर्व एव प्ररुषा दूरव्यवस्थितादिपरार्थपरिज्ञानासमर्थाः पुरुषत्ववस्तुत्वज्ञेयत्वादिभ्यो यथाऽहमिति, अत्राह—आत्मोदाहरणेनेत्यादि। § 11132

आत्मोदाहरणेनान्यसामर्थ्याभावनिश्चये।
पुरुषत्वादिहेतुभ्यः कार्ये चातिप्रसज्यते॥
३४६५॥§ 11134

एवं हि भवतो जाड्ये निश्चिते सर्वसूरयः।

त्वदुदाहरणेनैव भवेयुर्जडबुद्धयः॥ ३४६६॥§ 11136

निश्चय इत्येतस्य कार्य इत्येतेन सामानाधिकरण्यम्। अत्रानैकान्तिकता हेतूनामतिप्रसङ्गात्। तथाहि—इदमपि शक्यं वक्तुम्—सर्व एव पुरुषा जडबुद्धयः पुरुषत्वादिभ्यो यथा भवानिति। न चैवं भवति। नह्येकत्र पुरुषेऽदृष्टस्य धर्मस्य सर्वत्राभावः शक्योऽवसातुम्, पुरुषाणां विशेषदर्शनात्॥ ३४६५॥ ३४६६॥ § 11137

यच्च ऋतुपर्णेनोक्तम्—सर्वः सर्वं न जानातीत्यादि, तदपि प्रतिज्ञामात्रमेवाप्रमाणकं तेनोक्तमित्यादर्शयन्नाह—नैकत्रेत्यादि। § 11138

नैकत्र परिनिष्ठाऽस्ति ज्ञानस्य पुरुषे क्वचित्।
इतीदमपि वाङ्मात्रमहेतुकमुदाहृतम्॥
३४६७॥§ 11140

अथवाऽत्मसमान्पुरुषानभिसन्धाय ऋतुपर्णेन भाषितम्, तेनाविरोधादज्ञापकमेतदित्यादर्शयन्नाह—स्वसमानित्यादि। § 11141

स्वसमानथवा सत्त्वानविशुद्धधियो जडान्।
अधिकृत्य तथा वाक्यमृतुपर्णेन कीर्त्तितम्॥
३४६८॥§ 11143

901/k

प्रमाणं विस्तरेणोक्तं सर्वज्ञस्य च सम्भवे।
बाधकं च प्रतिक्षिप्तं तस्य पूर्वं परोदितम्॥
३४६९॥§ 11145

अनुक्तेऽप्यथवा तस्मिंस्तस्य सम्भवसाधने।
बाधकापोहमात्रेण गम्यते तस्य सम्भवः॥
३४७०॥§ 11147

तथाहि बाधके(ऽ)दृष्टे साधके चाप्रकाशिते।

संशयो जायते तेन याति सम्भावनामसौ॥
३४७१॥§ 11149

तस्मिन्सम्भाव्यमाने च नियमस्तेन सिद्ध्यति।
वेदेनैव स्वतन्त्रेण धर्मो लक्ष्यत इत्ययम्॥
३४७२॥§ 11151

स्वेनात्मना समास्तुल्याः स्वसमाः॥ ३४६८॥ ३४६९॥ ३४७०॥ ३४७१॥ ॥ ३४७२॥ § 11152

अनागते न दृष्टमित्यादावाह—अनागते चेत्यादि। § 11153

अनागते च विज्ञेये प्रत्यक्षस्य तथा भवेत्।
सामर्थ्यं योगिनामुक्तं तत्रै(?)काल्यपरीक्षणे॥
३४७३॥§ 11155

तत्रै(?)काल्यपरीक्षण इति। तत्र ह्येवमुक्तम्—सर्व एव हि भावाः साक्षात्पारम्पर्येण वा कार्यकारणतां गताः, तत्र वर्त्तमानमेव वस्त्वतीतस्य साक्षात्पारम्पर्येण वा कार्यभूतम्, अनागतस्य तु कारणभूतम्। प्रत्यक्षेण यथावत्सर्वाकारमनुभवन्तस्तत्पृष्ठलब्धैः शुद्धलौकिकैः परमार्थतो निर्विषयैर्वस्तुप्रतिबन्धादविसंवादिभिर्विकल्पैर्हेतुफलभूतामतीतामनागतां च भावसन्ततिमालम्ब्यातीतानागतं वस्तु व्यवस्थापयन्ति योगिन इति। यदाह— पारम्पर्येण साक्षाद्वा कार्यकारणतां गतम्। यद्रूपं वर्त्तमानस्य तद्विजानन्ति योगिनः॥ अनुगच्छन्ति पश्चाच्च विकल्पानुगतात्मभिः। शुद्धलौकिकविज्ञानैस्तत्वतो विषयैरपि॥ तद्धेतुफलयोर्भूतां भाविनीं चैव सन्ततिम्। समाश्रित्य प्रवर्त्तन्तेऽतीतानागतदेशनाः॥ इति॥ ३४७३॥ § 11156

एतच्च सौत्रान्तिकानां नेष्टं सर्वत्र भगवतः साक्षाद्दर्शित्वाभ्युपगमादित्यतः सौत्रान्तिकदृष्टाभीष्टमतमादर्शयन्नाह—यदि वेत्यादि। § 11157

यदि वा योगसामर्थ्याद्भूताजातनिभं स्फुटम्।
लिङ्गागमनिराशंसं मानसं योगिनां भवेत्॥
३४७४॥§ 11159

यथाहि सत्यस्वप्नदर्शिनो ज्ञानमविषयमपि परमार्थतो लिङ्गागमानपेक्षं चाश्रय विशेषवशादुत्पद्यमानमविसंवादि भवति, तथा योगिनां योगबलेन 902/k
यथैव तदभूद्भविष्यति वातीतमनागतं वस्तु तथैव स्फुटप्रतिभासं लिङ्गागमानपेक्षं जायते। तच्च प्रत्यक्षं प्रमाणमिष्यते॥ ३४७४॥ § 11160

स्यादेतत्—स्वलक्षणविषयं प्रत्यक्षमिष्यते, नचातीतमनागतं स्वलक्षणतोऽस्ति, तत्कथं स्वलक्षणविषयं युज्यत इत्याह—स्वात्मेत्यादि। § 11161

स्वात्मावभाससंवित्तेस्तत्स्वलक्षणगोचरम्।
स्पष्टावभाससंवेदात्तच्च प्रत्यक्षमिष्यते॥
३४७५॥§ 11163

तस्मादतीन्द्रियार्थानां साक्षाद्द्रष्टैव विद्यते।
नित्यस्य वचसोऽसत्त्वात्तेन कश्चिन्न पश्यति॥
३४७६॥§ 11165

यद्यप्यतीतादि वस्तु स्वलक्षणतो नास्ति, तथाप्यात्मसंवेदनात्स्वलक्षणविषयत्वेनशास्त्रे निर्दिष्टमित्यविरोधः। तच्च स्फुटप्रतिभासतया प्रकल्पनापोढं तथाविधवस्त्वविसंवादाच्चाभ्रान्तमित्यतः प्रत्यक्षलक्षणोपेतत्वात्प्रत्यक्षमिति सिद्धम्॥ ३४७५॥ ३४७६॥ § 11166

एतदक्षममाणो य इत्यादावाह—अतीन्द्रियार्थविज्ञानमित्यादि। § 11167

अतीन्द्रियार्थविज्ञानं पूर्वोक्तादनुमानतः।
मुनेः सुमतयः प्राहुर्नान्यतस्त्वागमात्कृतात्॥
३४७७॥§ 11169

पूर्वोक्तादनुमानात्सिद्धमागमनिरपेक्षं भावनाबलनिष्पन्नमर्थसाक्षात्कारि यदतीन्द्रियार्थविज्ञानं तन्मुनेर्भगवतः सुधियः सौगताः प्राहुर्नान्यस्मात्कृतकादागमादित्यतः तदनभ्युपगमाददूषणमेव॥ ३४७७॥ § 11170

यच्चोक्तम्—कर्तृकृत्रिमवाक्यानामित्यादि, तत्राह—कर्तृकृत्रिमेत्यादि। § 11171

कर्तृकृत्रिमवाक्यानामुच्यते न त्वनादिता।
प्रामाण्यसिद्धये यस्मात्साऽप्रमाणेऽपि वर्त्तते॥
३४७८॥§ 11173

तथाहि नास्तिकादीनां तथा तद्वचसामपि।

वेदानां च प्रवक्तॄणां नानादित्वेऽपि मानता॥
३४७९॥§ 11175

नह्यनादिताऽस्माभिः प्रामाण्यसिद्धये साधनत्वेनोच्यते। तथा(स्या?)विपक्षेऽपि वृत्तेरनैकान्तिकत्वात्। अतोऽध्यारोप्य दूषणं भवताऽभिहितम्॥ ३४७८॥ ३४७९॥ § 11176

किञ्च—भवतामेव वेदप्रामाण्यसिद्धये वेदप्रवक्तॄणां वेदानां चानादित्वं साधनं ब्रुवतां सर्वमेतद्दूषणं स्फुटतरमवतरतीति दर्शयन्नाह—वक्त(?)कृत्रिमवाक्यानामित्यादि। § 11177

903/k

वक्त(?)कृत्रिमवाक्यानामुच्यते नन्वनादिता।
प्रामाण्यसिद्ध्यै साऽस्माभिः स्पर्द्धयैव निषिध्यते॥
३४८०॥§ 11179

वक्तारश्चाकृत्रिमवाक्यानि चेति द्वन्द्वः। तत्र वक्तारो वेदानां व्याख्यातारः ३४८० § 11180

कथं निषिद्ध्यन्त इत्याह—वक्तार इत्यादि। § 11181

वक्तारः कर्तृभिस्तुल्यास्तदपेक्षा च मानता।
वेदानां तत्कृताख्यानादर्थप्रत्ययजन्मतः॥
३४८१॥§ 11183

तदपेक्षेति। वक्र(?)पेक्षा। कथमित्याह—तत्कृताख्यानादिति। तैर्वक्तृभिः कृताद्व्याख्यानादर्थप्रतीत्युत्पत्तेः कारणात्तदपेक्षा मानता वेदानाम्॥ ३४८१॥ § 11184

ततश्च को दोष इत्याह—अत इत्यादि। § 11185

अतो न वेदवाक्यानां पारतन्त्र्यात्प्रमाणता।
अपश्यतां स्वयं धर्मं वक्तॄणामपि नैव सा॥
३४८२॥§ 11187

तदीदृशां प्रवक्तॄणां कल्प्यमानाप्यनादिता।

अप्रामाण्यपदस्थत्वान्नास्तिकादेर्न भिद्यते॥
३४८३॥§ 11189

तदज्ञातविशेषत्वात्सर्वं यात्यत्र तुल्यताम्।
न मानत्वाप्रमाणत्वे स्यातामेवमनादिनी॥
३४८४॥§ 11191

नैवेति। प्रमाणतेति सम्बन्धः। यदा चैवं वेदवाक्यानां पारतन्त्र्यात्प्रमाणता नास्ति तत्प्रवक्तॄणां च सर्वेषामन्धपरम्परावद्धर्ममपश्यतामप्रामाण्यम्, अतो यत्परेणोक्तम्— प्रमाणत्वाप्रमाणत्वे स्यातामेवमनादिनी इति, तदयुक्तमित्यादर्शयन्नाह —न मानत्वाप्रमाणत्वे स्यातामेवमनादिनी इति। सिद्धे हि वक्त(?)कृत्रिमवाक्यानां प्रामाण्ये प्रमाणत्वस्यानादित्वं स्यात्, यावता तदेव न सिद्धमित्ययुक्तं द्वयोरनादित्वमिति भावः॥ ३४८२॥ ३४८३॥ ३४८४॥
§ 11192

किञ्च—यदेतदस्माभिर्वेदतदध्यायिनां बुद्धतद्वाक्यैः सह तुल्यत्वमापादितं तत्स्पर्धयैव, न पुनर्भगवतां तद्वाक्यानां चैतैस्तुल्यत्वमस्ति, अपि तु विशेषो महानितिदर्शयन्नाह—यद्वेत्यादि। § 11193

यद्वाऽस्त्येव विशेषोऽयं मुनौ तद्वचनेषु च।
स दृष्टवानस्त्वयं धर्ममुक्तवांश्च कृपामयः॥
३४८५॥§ 11195

तथाहि प्रसाधितमेतत्। यथा भगवान्साक्षाद्धर्मं दृष्टवान्निर्दिष्टवांश्चेति। अतोऽपश्यतां स्वयं धर्ममित्येतदसिद्धमिति भावः॥ ३४८५॥ § 11196
904/k

स्यादेतत्—धर्ममुक्तवान्स इत्येतदेव कथं सिद्धमित्याह—यतोऽभ्युदयेत्यादि। § 11197

यतोऽभ्युदयनिष्पत्तिर्यतो निःश्रेयसस्य च।
स धर्म उच्यते तादृक्सर्वैरेव विचक्षणैः॥
३४८६॥§ 11199

२ तदज्ञात] Correction : ; तदज्ञान
(sic !)तदज्ञात

निःश्रेयसस्य चेति। यतो निष्पत्तिरिति सम्बन्धः। तत्राभ्युदयः सुखं मोक्षो निःश्रेयसम्। स धर्म उच्यते तादृगिति। यतोऽभ्युदयनिःश्रेयससंसिद्धिः स धर्म इति वचनात्॥ ३४८६॥ § 11200

भवतु नामाभ्युदयनिःश्रेयससिद्धिहेतुर्धर्मः, अस्य तु सुगतवचनस्य कथं तद्धेतुत्वं सिद्धम्, येनास्य धर्मज्ञत्वं भवेदित्याह—तदुक्तेत्यादि। § 11201

तदुक्तमन्त्रयोगादिनियमाद्विधिवत्कृतात्।
प्रज्ञारोग्यविभुत्वादिदृष्टधर्मोऽपि जायते॥
३४८७॥§ 11203

तेन भगवतोक्तश्चासौ मन्त्रयोगादिनियमश्चेति विग्रहः। योगः समाधिः। आदिशब्देन मुद्रामण्डलादिपरिग्रहः। दृष्टधर्मोऽपीति। अस्मिन्नेव जन्मनि, न केवलं परलोक इत्यपिशब्देन दर्शयति॥ ३४८७॥ § 11204

एवमभ्युदयहेतुत्वमुपदर्श्य निःश्रेयसहेतुत्वं दर्शयन्नाह—समस्तेत्यादि। § 11205

समस्तधर्मनैरात्म्यदर्शनात्तत्प्रकाशितात्।
सत्कार्यदर्शनोद्भूतक्लेशौघस्य निवर्त्तनम्॥
३४८८॥§ 11207

आत्मात्मीयदृगाकारसत्त्वदृष्टिः प्रवर्त्तते।
अहं ममेति माने च क्लेशोऽशेषः प्रवर्त्तते॥
३४८९॥§ 11209

सत्त्वदृक्प्रत्यनीकं च तन्नैरात्म्यनिदर्शनम्।
अभ्यासात्सात्म्यमायाते तस्मिन् सा विनिवर्त्तते॥
३४९०॥§ 11211

तन्मूलक्लेशराशिश्च हेत्वभावात्प्रती(ही?)यते।
तस्मिन्नसति तद्धेतुर्न पुनर्जायते भवः॥
३४९१॥§ 11213

तदत्यन्तविनिर्मुक्तेरपवर्गश्च कीर्त्यते।
अद्वितीयशिवद्वारमतो नैरात्म्यदर्शनम्॥
३४९२॥§ 11215

सर्वेषामपि तीर्थ्यानामहङ्कारनिवर्त्तनात्।
मुक्तिरिष्टाऽऽत्मसत्त्वे च नाहङ्कारो निवर्त्तते॥
३४९३॥§ 11217

शक्तकारणसद्भावाद्विषयस्याप्यदूषणात्।
तद्दूषणे त्वभावेन विपर्यासः प्रसज्यते॥
३४९४॥§ 11219

905/k

जन्मप्रबन्धात्यन्तोपशमो हि सर्वेषामेव मोक्ष इतीष्टम्, तस्य च प्राप्तिहेतुर्भगवद्वचनमेव, जन्महेतुक्लेशप्रतिपक्षभूतस्य नैरात्म्यदर्शनस्यात्रैवोपदेशात्, नान्यत्र। सर्वेषामेव चान्यतीर्थ्यानां वितथात्मदर्शनाभिनिविष्टत्वात्। अतो भगवद्वचनमेवाभ्युदयनिःश्रेयसप्राप्त्युपायभूतत्वाद्धर्मलक्षणं युक्तं नान्यत्। तेनैतदेव श्रेयोर्थिभिराश्रेयं नान्यदिति समुदायार्थः। अवयवार्थस्तूच्यते—सत्कार्यदर्शनोद्भूतत्वं क्लेशौघस्य कथं सिद्धमिति चेदाह—आत्मात्मीयेत्यादि। एतच्चास्माभिः पूर्वमेव व्याख्यातम्। यदि नाम क्लेशौघः सत्कार्यदर्शनोद्भूतस्तथापि कथमसौ नैरात्म्यदर्शनान्निवर्त्तत इत्याहसत्त्वदृगित्यादि। सत्त्वदृक्—सत्त्वदर्शनम्। सत्कार्यदृष्टिरिति यावत्। तस्याःप्रत्यनीकम्—प्रतिपक्षः। एतदपि पूर्वं दर्शितमेव। तस्मिन्निति। नैरात्म्यनिदर्शने।सेति। सत्त्वदृक्। तन्मूल इति। सत्त्वदृग्मूलः। हेत्वभावादिति। सत्त्वदर्शनाख्यस्य हेतोरभावात्। तस्मिन्निति। क्लेशराशौ। तद्धेतुरिति। क्लेशराशिहेतुः। न जायत इति। नहि कारणभावे कार्यस्योत्पादो युक्तो निर्हेतुकत्वप्रसङ्गात्। तदत्यन्तविनिर्मुक्तिरिति। तेषां क्लेशानां तस्य वा पुनर्भवस्यात्यन्तं पुनरुत्पत्तितो विमुक्तिस्तदत्यन्तविनिर्मुक्तिः। यथाहुः—तदत्यन्तविमोक्षोऽपवर्ग इति। ननु चान्यमतेष्वपि तत्त्वदर्शनं निःश्रेयसहेतुरभ्युदयहेतवश्च दश कुशलाः कर्मपथाः प्रोक्ताः, तत्कथं नैरात्म्यदर्शनमेवाद्वितीयं मोक्षद्वारमित्युच्यत इत्याह—सर्वेषामित्यादि। तथाह्यहङ्कारोद्भवत्वात्स्कन्धानां तन्निवृत्तौ मुक्तिरिति सर्वेषामेव मुमुक्षूणामत्राविवादः।सा चाहङ्कारनिवृत्तिरन्यतीर्थ्यानां न संभवति, वितथात्मदर्शनाभिनिविष्टत्वात्तेषाम्,अहङ्कारस्य चात्मदर्शनमूलत्वात्। तत्कथमय-

मात्मसत्त्वे—आत्मसत्त्वाभिनिवेशेऽस्थिते सत्यविकलकारणे, स्वविषये चात्मन्यविदूषिते, निवर्त्तेत। यथोक्तम्—साहङ्कारे मनसि न शमं याति जन्मप्रबन्धो नाहङ्कारश्चलति हृदयादात्मदृष्टौ तु सत्याम्। अन्यः शास्ता जगति भवतो नास्ति नैरात्म्यवादी नान्यस्तस्मादुपशमविधेस्त्वन्मतादस्ति मार्गः इति। तथाहि—मनोधर्मा न कण्टकादिवदुत्कील्यापनेतव्याः। किं तर्हि ?। यथाभूतविषयाभिनिवेशेन ते प्रवृत्तास्तद्धेतुदूषणात्। विदूषयत्येवात्मानं योगीति चेदाह—तद्दूषणेत्यादि। तथाहि स विदूष्यमाणो नास्तीत्येवमभावाकारेण दूष्यः, अन्यथा तद्दूषणवैयर्थ्यं स्यात्। तथाहि—यदि सत्त्वेनात्मानमभिनिवेश्य दुःखहेतुत्वेन तं दूषयेत्। तदाऽनर्थकमेव दूषणं स्यात्। त्यागार्थं हि तद्दूषणम्। नच स्वतो नित्यस्य स्वभावभूतस्य त्यागः सम्भवतीत्यतोऽनर्थकमेव तदापद्यते। नचाभा वाकारेण दूष्यस्तैरात्मा, आत्मनि सत्यासत्यत्वाभिनिवेशेन 906/k
तेषां विपर्यासप्रसङ्गात्॥ ३४८८॥ ३४८९॥ ३४९०॥ ३४९१॥ ३४९२॥ ३४९३॥ ३४९४॥ § 11220

किंच भवतु नाम दुःखहेतुत्वादिनाऽन्येनाकारेण तस्य दूषणम्, तथाऽप्यात्मदर्शनमात्रप्रभवस्याहङ्कारस्य निवृत्तिर्न युक्तेति दर्शयन्नाह—न युक्तमित्यादि। § 11221

न युक्तं नाहमित्येवं यद्यहं नाम विद्यते।
नियमात्तत्त्वविद्याति निर्वाणमिति वा मृषा॥
३४९५॥ § 11223

नाहमित्येवमिति। नाहमित्येवं दर्शनं न युक्तमित्यर्थः। यद्यहं नाम विद्यत इति। यद्यात्माऽस्तीत्यर्थः। तस्मात्तत्त्वविद्भवदीयो निर्वाणं यातीत्येतन्मृषा। यतोऽहङ्कारविगमान्मुक्तिरिष्टा, न चात्मनि विषयभूते स्थितेऽहङ्कारनिवृत्तिर्युक्तेति कुतो युक्तिः॥ ३४९५॥ § 11224

तस्मादित्यादिनोपसंहरति। § 11225

तस्मादन्येषु तीर्थेषु दशाकुशलहानितः।
लेशतोऽभ्युदयप्राप्तिर्यद्यप्यस्ति लघीयसी॥
३४९६॥ § 11227

अपवर्गस्य तु प्राप्तिर्न मनागपि विद्यते।
सत्त्वदृष्टिविशिष्टत्वात्क्लेशमूलानपोद्धृतेः॥
३४९७॥ § 11229

दशाकुशलहानित इति। प्राणातिपातादत्तादानकाममिथ्याचारमृषावाद-पैशुन्यपारुष्यासंभिन्नप्रलापाभिव्यापादमिथ्यादृष्टयो दशाकुशलाः। यद्वा—परेषामपरित्राणमदानमपरिचरणमसत्यमप्रियवचनमहितमस्वाध्यायः अश्रद्धा अदया स्पृहा चेति दशाकुशलानि पठ्यन्ते। तद्विपर्ययात् कुशलानि दश। तेषामकुशलानां हानिस्ततोविरतिर्दशकुशलानुष्ठानमिति यावत्। लघीयसीति। विपर्यासपूर्वकत्वात्तस्याः क्षिप्रतरं भ्रंशात्। क्लेशमूलं सत्त्वदृष्टिरेव॥ ३४९६॥ ३४९७॥ § 11230

अभ्युदयहेतुत्वेनापि भगवद्वचनविशेषं दर्शयति—दशेत्यादि। § 11231

दश कर्मयथा(पथाः?)प्रोक्ताः शुभा ये तायिना
पुनः।
सम्यग्दृष्ट्युपगूढास्ते बलवन्तो भवन्त्यलम्॥
३४९८॥§ 11233

बलवन्त इति। स्थिरोदारफलत्वात्॥ ३४९८॥ § 11234

इतरेऽपि कस्माद्बलवन्तो न भवन्तीत्याह—सत्त्वेत्यादि। § 11235

सत्त्वदृष्ट्युपगूढास्तु विपर्यासानुषङ्गतः।
अविशुद्धास्ततः शुद्धं फलं तेभ्यो न जायते॥
३४९९॥§ 11237

907/k

तदेवं धर्मतत्त्वस्य देशके मुनिसत्तमे।
अपश्यतः स्वयं धर्ममिति कः स्वस्थधीर्वदेत्॥
३५००॥§ 11239

परिशुद्धादेव हि कारणात्परिशुद्धं फलं जायते नाविशुद्धात्। मुनिसत्तम इति। मुनीनां बाह्यशैक्ष्याशैक्ष्याणां(?) मध्ये सत्तमः शोभनः मुनिसत्तमः॥ ३४९९॥ ३५००॥ § 11240

यच्चोक्तम्—सर्वज्ञत्वं च बुद्धादेर्या च वेदस्य नित्यता। तुल्ये जल्पन्ति इत्यादि, तत्राह—तायिन इत्यादि। § 11241

तायिनः सर्वविज्ञत्वं या च वेदस्य नित्यता।

तुल्ये जल्पन्ति नो विज्ञा नित्यताया असम्भवात्॥
३५०१॥§ 11243

तस्या हि बाधकं प्रोक्तं क्रमाक्रमविरोधतः।
विज्ञानादि न तत्कार्यं कथञ्चिदपि युज्यते॥
३५०२॥§ 11245

तायिन इति। भगवतो बुद्धस्य। यदि हि वेदस्या(स्य?) नित्यता सम्भवेत्तदेवं स्याद्वक्तुम्—या च वेदस्य नित्यतेति, यावता सैव न सिद्ध्येत्। पूर्वं बाधकप्रमाणोपदर्शनात्। प्रतिपादितं तदेव च बाधकं प्रमाणं स्मारयति—क्रमाक्रमविरोधत इति। एतच्च पूर्वं व्याख्यातमेव॥ ३५०१॥ ३५०२॥
§ 11246

यच्चोक्तम्—सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः इति, तत्राह—दृश्यत इत्यादि। § 11247

दृश्यते न च सर्वज्ञ इदानीमिति किं (यत् ?
)त्वया।
अथ सर्वैरिति प्रोक्तं विस्तरेणेह दूषणम्॥
३५०३॥§ 11249

भावत्कोऽनुपलम्भो हि केवलो व्यभिचारवान्।
सर्वान्यदृग्निवृत्तिस्तु संदिग्धेति न साधनम्॥
३५०४॥§ 11251

इदं चापरमुक्तं कुमारिलेन— निराकरणवच्छक्या न चासीदिति कल्पना इति, तत्राह—निराकरणेत्यादि। § 11252

निराकरणवच्छक्या न चासीदिति कल्पना।
इत्ययुक्तमतीतेऽपि तन्निराकृत्ययोगतः॥
३५०५॥§ 11254

यथा किल निराकरणमतीते काले सर्वज्ञस्य शक्यते कर्तुं तथासीत्सर्वज्ञ इति न कल्पना शक्यते कर्तुमिति, तदेतदयुक्तम्, अतीतेऽपि काले

तस्य निराकरणायोगात्। अपिशब्दाद्भवद्भविष्यतोरपि कालयोर्न शक्यमिति दर्शयति, नह्यदर्शनमात्रादभावगतिरिति पूर्वमुक्तम्॥ ३५०५॥ § 11255

908/k

स्यान्मतमित्यादिना परोपन्यस्तं साधनमाशङ्कते। § 11256

स्यान्मतं यो व्यतीतोऽध्वा स
शून्यस्तव(सर्व ?)दर्शिना।
कालत्वात्तद्यथाकालो वर्त्तमानः प्रतीयते॥
३५०६॥§ 11258

संदिग्धव्यतिरेकित्वाद्युक्तमेतन्न साधनम्।
वर्त्तमानश्च कालोऽयं तेन शून्यो न निश्चितः॥
३५०७॥§ 11260

प्रयोगः—योऽयमतीतः कालः स सर्वज्ञशून्यः, कालत्वात्, साम्प्रतकालवत्, तत्र साध्यविपर्यये बाधकप्रमाणानुपदर्शनात्सन्दिग्धव्यतिरेकित्वमित्यतोऽनैकान्तिकता हेतोः। दृष्टान्तोऽपि सन्दिग्धसाध्यधर्मत्वादसिद्धः॥ ३५०६॥ ३५०७॥ § 11261

भवतु वा दृष्टान्तस्य सिद्धिस्तत्रापि न दृष्टमात्रेणेष्टसिद्धिर्युक्तेति दर्शयन्नाह—हेत्वित्यादि। § 11262

हेतुसामग्र्यभावाच्च भूतो नाम न सम्प्रति।
रामादिवदतीते तु काले केन न सम्भवेत्॥
३५०८॥§ 11264

कः पुनरत्र प्रतिबन्धो य इदानीं नास्ति सोऽतीतेऽपि काले नाभूदिति। नहि रामभरतादय इदानीं न सन्तीत्यतीतेऽपि काले नाभूवन्निति शक्यमनुमातुम्। अतो रामादिभिरनैकान्त्यादनैकान्तिकता हेतोः॥ ३५०८॥ § 11265

यच्चोक्तम्—दृष्टो न चैकदेशोऽस्ति लिङ्गं चे त्यत्राह—प्रज्ञादीनामित्यादि § 11266

प्रज्ञादीनां च धर्मित्वं कृत्वा लिङ्गमुदीरितम्।

नना(तन्नाम ?) दृश्यते लिङ्गं नच सत्ता
प्रसि(सा ?)ध्यते॥ § 11268

ये चासमानजातीयेत्यादिना प्रज्ञादीनां धर्मित्वं विधाय लिङ्गमुदीरितमतो लिङ्गं नास्तीत्येतदसिद्धम्। नापि सत्ता साध्यते, किं तर्हि ?, प्रज्ञादीनामत्यन्तोत्कर्षाख्यो धर्मः, तदेव च सर्वज्ञत्वम्, अतः सत्तासाधनेऽपि ये दोषास्तेऽप्यत्र नावतरन्त्येव ॥ ३५०९॥ § 11269

न चागमविधिः कश्चिदित्यादावाह—आगमेन त्वित्यादि। § 11270

आगमेन तु सर्वज्ञो नास्माभिः प्रतिपाद्यते।
लैङ्गे सति हि पूर्वोक्ते को नामागमतो वदेत्॥
३५१० ॥§ 11272

नहि वस्तुबलप्रवृत्तानुमानसम्भवे सति कश्चिदिच्छामात्रानुविधायिनो वचनाद्वस्तुसिद्धिमन्विच्छेत्। अतो न वयमागमात्सर्वज्ञं साधयामः। किं तर्हि ?। अनुमानात्। तच्च पूर्वोक्तमेव॥ ३५१०॥ § 11273
909/k

न चाप्येतत्सिद्धम्—न चागमविधिः कश्चिन्नित्यः सर्वज्ञबोधन इति, (इति)दर्शयन्नाह—किन्त्वित्यादि। § 11274

किन्तु वेदप्रमाणत्वं यदि युष्माभिरिष्यते।
तत्किं भगवतो मूढैः सर्वज्ञत्वं न गम्यते॥
३५११ ॥§ 11276

निमित्तनाम्नि सर्वज्ञो भगवान्मुनिसत्तमः।
शाखान्तरे हि विस्पष्टं पठ्यते ब्राह्मणैर्बुधैः॥
३५१२ ॥§ 11278

तथाहि—निमित्तं नाम शाखान्तरमस्ति, तत्र स्फुटतरमयमेव भगवान् शाक्यमुनिः सर्वज्ञः पठ्यते, तत्किमिति मूढैर्वेदं प्रमाणयद्भिरपि भवद्भिरसौ प्रतिक्षिप्यते ॥ ३५११॥ ३५१२॥ § 11279

कथमसौ तत्र पठ्यत इत्यादर्शयन्नाह—योऽसावित्यादि। § 11280

योऽसौ षड्दन्तमात्मानमवदाताद्विपात्मकम्।

स्वप्ने प्रदर्श्य संजातो बोधिसत्त्वो गुणोदधिः॥
३५१३॥§ 11282

विघुष्टशब्दः सर्वज्ञः कृपात्मा स भविष्यति।
प्राप्तामृतपदः शुद्धः सर्वलोकपिताऽपि च॥
३५१४॥§ 11284

विघुष्टशब्द इति। सकलजगत्प्रख्यातकीर्त्तिः। प्राप्तामृतपद इति। प्राप्तसवासनाशेषक्लेशोपशमलक्षणनिर्वाणपद इत्यर्थः। शुद्ध इति। अनाश्रवधातुमयः। एतावता भगवतोऽज्ञानप्रहाणलक्षणा स्वार्थसम्पत्परिदीपिता। परार्थसम्पदं दीपयन्नाह—सर्वलोकपितेति। पिता—शास्ता। सर्वस्य जगतो ज्ञानत्रयसुगतिप्रतिष्ठापनात्॥ ३५१३॥ ३५१४॥ § 11285

अथेत्यादिना परस्योत्तरमाशङ्कते। § 11286

अथ शाखान्तरं नेदं वेदान्तर्गतमिष्यते।
तदत्र न निमित्तं वो द्वेषं मुक्त्वाऽवधार्यते॥
३५१५॥§ 11288

स्वरादयश्च ते धर्माः प्रसिद्धाः श्रुतिभाविनः।
कर्तुमत्राऽपि शक्यास्ते नरेच्छामात्रसम्भवात्॥
३५१६॥§ 11290

इदमिति। निमित्ताख्यं शाखान्तरम्। तदत्रेत्यादिना प्रतिविधत्ते॥ ३५१५॥॥ ३५१६॥ § 11291

910/k

नन्वित्यादिना परस्योत्तरमाशङ्कते। § 11292

ननु नैवं प(तत्प?)रो नित्यः शक्यो लब्धुमिहागमः।
नित्यश्चेदर्थवादत्वं तत्परे स्यादनित्यता॥
३५१७॥§ 11294

एवं प(एतत्प?)र इति। सर्वज्ञप्रतिपादनपरः। कथं न शक्यो लब्धुमित्याह—नित्यश्चेत्यादि। यद्यसौ सर्वज्ञप्रतिपादनपर आगमो नित्यः

स्यात्तदा नियमेनार्थवादत्वम्—अन्यार्थत्वमस्य द्रष्टव्यम्। अथार्थवादत्वं तस्य नेष्यते, तदा नियमादनित्यत्वमस्यापद्येत॥ ३५१७॥ § 11295

कस्मात्पुनर्नित्यत्वे सत्यर्थवादत्वमापद्यत इत्याह—आगमस्य चेत्यादि। § 11296

आगमस्य च नित्यत्वे सि(द्धे त)त्कल्पना वृथा।
यतस्तं प्रतिपत्स्यन्ते धर्ममेव ततो नराः॥
३५१८॥ § 11298

तत्कल्पनेति। सर्वज्ञकल्पना। किमिति वृथेत्याह—यत इत्यादि। तत इति। नित्यादागमात्॥ ३५१८॥ § 11299

न खल्वित्यादिना प्रतिविधत्ते। § 11300

न खल्वस्मिन्प्रसिद्धेऽपि वेदे नित्यत्वमस्ति यत्।
प्रयत्नानन्तरज्ञानक्रमिज्ञानादि तत्फलम्॥
३५१९॥ § 11302

किन्त्वेतस्य प्रसिद्धस्य प्रामाण्योपगमे सति।
शाखान्तरेऽपि वेदत्वात्प्रामाण्यं ते प्रसज्यते॥
३५२०॥ § 11304

यद्यप्ययमृगादिवेदः स्वरूपतोऽतिप्रसिद्धः, तथाप्यस्य नित्यत्वमसिद्धम्। कथमित्याह—यदिति। यस्मादर्थे। यत्प्रयत्नानन्तरज्ञानं क्रमज्ञानफलं वा तदनित्यं यथा घटादि तथा च वेद इति स्वभावहेतुः। अस्य च श्रुतिपरीक्षायामसिद्धतादि विस्तरेण निरस्तमिति नात्राभिधीयते। एतस्येति। वेदस्य॥ ३५१९॥ ३५२०॥ § 11305

शाखान्तरस्य वेदत्वमसिद्धमिति चेदाह—ज्ञापनीयमित्यादि। § 11306

ज्ञापनीयमवेदत्वं यद्वा युक्त्या ध्रुवं त्वया।
अन्यथाश्रुत्यनुक्तत्वं संदिग्धं तस्य ते भवेत्॥
३५२१॥ § 11308

अन्यथेति॥ यद्यवेदत्वमस्य न ज्ञाप्यते तदा यत्त्वया श्रुतौ—वेदे अनुक्तत्वं तस्य सर्वज्ञस्योक्तं तत्सन्दिग्धासिद्धं भवेत्॥ ३५२१॥ § 11309

यच्चोक्तं तत्परे स्यादनित्यतेत्यत्राह—नित्यत्वं चास्त्वित्यादि। § 11310

नित्यत्वं चास्तु वेदस्य तत्परत्वं च तत्र तु।
तत्परे स्यादनित्यत्वं कस्मान्नाश्यर्थसङ्गतेः॥
३५२२॥§ 11312

911/k

कस्मादिति पृष्टः सन्पर आह—नाश्यर्थसङ्गतेरिति। नाशिनार्थेन सङ्गतेः संबन्धात्कारणादनित्यत्वं प्राप्नोति॥ ३५२२॥ § 11313

यद्येवमित्यादिना नैकान्तिकत्वमुद्भावयति। § 11314

यद्येवमाज्यनीवारचामीकरजटादयः।
अनित्याः कथमुच्यन्ते तेन नित्यात्मना सता॥
३५२३॥§ 11316

आज्यम्—घृतम्। नीवारो—व्रीहिविशेषः। चामीकरजटः—अग्निः। तेनेति। वेदेन॥ ३५२३॥ § 11317

जातिरित्यादिना परस्योत्तरमाशङ्कते। § 11318

जातिस्तत्रापि नित्या चन्नेनु साऽपि निराकृता।
तन्मात्रवचने वाचो नाचाज्यादौ मतिर्भवेत्॥
३५२४॥§ 11320

तस्यापि वचने वाचो नित्यता किं न हीयते।
सर्वज्ञेऽप्याकृतिर्वास्तु तेन तत्परनित्यता॥
३५२५॥§ 11322

तत्राज्यादौ जातिरस्ति सा शब्दवाच्या तेनातिप्रसङ्गो न भविष्यतीति। तदेतदसम्यक्। सामान्यपरीक्षायां जातेर्विस्तरेण निराकृतत्वात्। भवतु वा जातिस्तथाप्याज्यादिशब्दाज्जातिमात्राभिधायिनो व्यक्तौ प्रत्ययो न प्राप्नोति। ततश्च व्यक्तिसाध्यार्थक्रियार्थिनो जात्यभिधानमनर्थकमेव स्यात्। नान्तरीयकतया व्यक्तिः प्रतीयत इति चेत्। न। प्रतीतिविप्रकर्षाभावात्। नहि शब्दादनन्तरं जातौ प्रथमतरमुपजायते मति, पश्चान्नान्तरीयकतया व्यक्तिप्रतीतिः। किं तर्हि ?। अव्यवधानेनैवार्थक्रियाकारिपदार्थाध्य-

वसायो लोके शब्दादुदेति। तत्प्रतिपिपादयिषयैव च शब्दंप्रयुङ्क्ते। अतो न युक्तं वक्तुं न व्यक्तिप्रत्ययः शब्दादिति। यदि च जातिमेव शब्दो ऽभिदधीत न व्यक्तिम्। तथा बलीवर्ददोहचोदनावदसम्बन्धाभिधायित्वमवगम्यप्रेक्षावान्नैव व्यक्तौ शब्दात्प्रवर्त्तेत। अथ माभूदेष दोषप्रसङ्ग इति तस्याभि(पि?)व्यक्तिरूपस्याभिधानमङ्गीक्रियते तदा नित्यताहानिर्वेदस्य कथं न प्रसज्यते। किञ्च— भवतु नाम मुख्यतो जात्यभिधानं शब्दानां नान्तरीयकं तद्व्यक्त्यभिधानम्, तथापिसर्वस्य (ज्ञ?) परस्याप्यागमस्य नित्यता न विरोधिनीति दर्शयति—सर्वज्ञेऽपीत्यादि।एकस्मिन्नपि हि सर्वज्ञेऽवस्थाभेदपरिकल्पितनानात्वेन जातिशब्दवाच्यत्वमुपपद्यते, किं पुनरपरिमितानादिसर्वज्ञपरम्परासु॥ ३५२४॥ ३५२५॥ § 11323
912/k

किञ्च—यदि नाम निमित्ताख्यं शाखान्तरं वेदत्वेन नाङ्गीक्रियते भवद्भिस्तथाऽपि श्रुत्यनुक्तत्वं सन्दिग्धं भवत्यनेनैवेति दर्शयन्नाह—तदा चेत्यादि। § 11324

तदा च वेदवाक्यानां स्वातन्त्र्येणार्थनिश्चयः।
वेदात्स्वतः परस्माच्च मोहादिविवशात्मनः॥
३५२६॥ § 11326

तेनाग्निहोत्रं जुहुयात्स्वर्गकाम इति श्रुतेः।
जिनः सर्वज्ञ इत्येवं नार्थ इत्यत्र का प्रमा॥
३५२७॥ § 11328

वेदवाक्यानां हि नित्यतया स्वातन्त्र्ये सति न ततो वेदार्थनिश्चयो जायते, नह्ययं वेदः—अयं ममार्थो नान्य इत्येवं विरौति। नापि प्रतिपत्तुः स्वतः—स्वात्मनः,परस्माद्वा, व्याख्यातुरर्थनिश्चयो भवति, सर्वेषामेव भवन्मत्या मोहादिभिर्विप्लुतत्वात्।तेनाग्निहोत्रादिवाक्याद्भगवान् सर्वज्ञ इत्ययमप्यर्थः संभाव्यत एव। का प्रमेति। नैव काचित्॥ ३५२६॥ ३५२७॥ § 11329

यच्चेदमपरमुक्तम्—नच सर्वनरज्ञानज्ञेयसंवादसम्भवः इति, तत्राह—स्वर्गेत्यादि। § 11330

स्वर्गापवर्गमात्रस्य विस्पष्टमुपदेशतः।
प्रधानार्थपरिज्ञानात्सर्वज्ञ इति गम्यते॥
३५२८॥ § 11332

समुद्रसिकतासङ्ख्याविज्ञानं क्वोपयुज्यते।
तस्यास्माकमतोऽन्यार्थज्ञानसंवेदनेन किम्॥
३५२९ ॥§ 11334

यच्चोक्तम्—(गौणत्वेनैव वक्तव्य इति, तत्राह—) गौणत्वेनेत्यादि। § 11335

गौणत्वेनैव वक्तव्यः सोऽपि मन्त्रार्थवादवत्।
इत्ययं नियमः सिध्येत्सर्वज्ञे तु निराकृते॥
३५३० ॥§ 11337

पूर्वोक्तबाधकायोगे साधिते तु सविस्तरम्।
संदिग्धो गौणनियमो मुख्यार्थस्यापि सम्भवात्॥
३५३१ ॥§ 11339

यदि हि प्रमाणेन सर्वज्ञो निरस्तः स्यात्तदाऽन्यथानुपपत्त्या गौणार्थत्वमस्य नियतं स्यात्, नान्यथा, मुख्यार्थत्वस्यापि सम्भाव्यमानत्वात्। नच नित्यस्य वचसोऽर्थवादत्वं युक्तम्, अन्याभिप्रायदेशना ह्यर्थवादः, न चाभिप्रायरहिते वचसि विवक्षामन्तरेण सा युक्ता॥ ३५३०॥ ३५३१॥ § 11340
913/k

यद्वा प्रकृतधर्मादिज्ञानादित्यादावाह—धर्मादीत्यादि। § 11341

धर्मादिगोचरज्ञानमात्राप्रतिघता यदि।
सफला वर्ण्यते व्यक्तं तदा बुद्धैर्जितं जगत्॥
३५३२ ॥§ 11343

कथं जितमित्याह—यस्मादित्यादि। § 11344

यस्मादभ्युदये मोक्षे सहैतैः साधितं पुरः।
ज्ञानमप्रतिघं तेषामावैणिकमतिस्फुटम्॥
३५३३ ॥§ 11346

१ वादवत्] Correction: ; वादवित्
(sic!)वादवत्

पूर्वं हि भगवतो निःश्रेयसज्ञानमप्रतिघं प्रसाधितमित्यतो भगवत एवाऽऽवैणिकमसाधारणं धर्मादिज्ञानमिति स्ववाचैव सर्वज्ञो ना(अ?)भ्युपेतः स्यात्॥ ३५३३॥ § 11347

यच्चोक्तम्—यद्वाऽऽत्मन्येव विज्ञानमिति, तत्रापि भगवत्येव तथाविधज्ञानसम्भवान्न किञ्चिदनिष्टमापादितमित्यादर्शयन्नाह—यच्चात्मन्येवेत्यादि। § 11348

यच्चात्मन्येव विज्ञानं ध्यानाभ्यासप्रवर्त्तितम्।
तस्याप्यप्रतिघातित्वं तेषां पूर्वं प्रसाधितम्॥
३५३४॥ § 11350

तस्यापीति। आत्मज्ञानस्य। तेषामिति। बुद्धानां भगवताम्। पूर्वमिति। यावद्यावत् गुणौघोऽस्यामित्यादिना॥ ३५३४॥ § 11351

ननु च तत्रात्मज्ञानं स्ववेदा(स्ववेदना?)त्मकं वर्णितम्। न त्वन्तर्व्यापारपुरुषज्ञानम्, तत्कथं सिद्धसाध्यता भवतीत्याह—एतदेव हीत्यादि। § 11352

एतदेव हि तज्ज्ञानं यद्विशुद्धात्मदर्शनम्।
आगन्तुकमलापेतचित्तमात्रत्ववेदनात्॥
३५३५॥ § 11354

चेत्तमात्रवेदनमेव कथं सिद्धमिति चेदाह—अवेद्येत्यादि। § 11355

अवेद्यवेदकाकारा बुद्धिः पूर्वं प्रसाधिता।
द्वयोपप्लवशून्या च सा संबुद्धैः प्रकाशिता॥
३५३६॥ § 11357

संसारानुचितज्ञानास्तेन सिद्धा महाधियः।
यदाधिपत्यभाविन्यो भासन्तेऽद्यापि देशनाः॥
३५३७॥ § 11359

पूर्वमिति। बहिरर्थपरीक्षायाम्। संसारानुचितमननुकूलं ज्ञानं येषां ते तथोक्ताः ॥ ३५३६॥ ३५३७॥ § 11360

काः पुनस्तास्तदाधिपत्यभाविन्यो देशनाः श्रूयन्त इत्याह—प्रकृत्या भास्वर इत्यादि। § 11361

४ मलापेत] Correction : ; मलोपेत
(sic !)मलापेत

प्रकृत्या भास्वरे चित्ते द्वयाकाराकलङ्किते।
द्वयाकाराविमूढात्मा कःकुर्यादन्यथामतिः(तिम्?)॥
३५३८॥§ 11363

914/k

द्वयनैरात्म्यबोधे च स्त्यादिसङ्कल्पभाविनः।
रागद्वेषादयो दोषाः संक्षीयन्तेऽप्रयत्नतः॥
३५३९॥§ 11365

इदं तत्परमं तत्त्वं तत्त्ववादी जगाद यत्।
सर्वसम्पत्प्रदं चैव केशवादेरगोचरः॥
३५४०॥§ 11367

द्वयाकाराविमूढात्मेति। प्रहीणग्राह्यग्राहकाभिनिवेशः। द्वयनैरात्म्यबोध इति। पुद्गलधर्मनैरात्म्यबोधे। यद्वा—द्वयं ग्राह्यं ग्राहकं च तस्य नैरात्म्यं नैःस्वाभाव्यमिति विग्रहः। केशवादेरगोचर इति। केशवो हरिः, आदिशब्देनेश्वरादिपरिग्रहः॥ ३५३८॥ ३५३९॥ ३५४०॥ § 11368

अथ केशवादेरपि विशुद्धमात्मदर्शनं कस्मान्नेष्यत इत्याह—ज्ञायते हीत्यादि। § 11369

ज्ञायते हि स्थिरात्माऽन्यैः शुद्धस्फटिकसन्निभः।
स च तेषां विपर्यासो नित्यात्मप्रतिषेधनात्॥
३५४१॥§ 11371

आत्मग्राहि च विज्ञानमात्मनो यदि जायते।
ततः सर्वात्मविज्ञानं युगपत्सम्प्रसज्यते॥
३५४२॥§ 11373

अथ तस्मान्न जायेत नित्यं वाऽभ्युपगम्यते।

तदा तद्विषयं न स्यात्पुरुषान्तरचित्तवत्॥
३५४३ ॥§ 11375

अन्यैरिति। केशवादिभिः। आत्मपरीक्षायामात्मनो निरस्तत्वात्तद्विषयं ज्ञानंविपर्यस्तत्वादविशुद्धम्। किञ्च—यदेतन्नित्यात्मविषयं तेषां ज्ञानमुपवर्ण्यते तत्किं तत आत्मनो जायते आहोस्विन्नेति पक्षद्वयम्, तत्र प्रथमे पक्षे युगपदशेषं तद्विषयं ज्ञानमविकलकारणतया जायेत, अथ द्वितीयः पक्षस्तत्रापि तन्नित्यं वा स्यादनित्यं वा।उभयथाऽपि तेनात्मना तस्यानुकार्यत्वादन्यचित्तवत् तद्विषयं न प्राप्नोति॥ ३५४१॥ ॥ ३५४२॥ ३५४३॥ § 11376

यच्चोक्तम्—एतदेव हि तज्ज्ञानं यद्विशुद्धात्मदर्शनमिति, तत्राह—ग्राह्येत्यादि। § 11377

ग्राह्यलक्षणवैधुर्याद्विस्तरेण च साधितात्।
नैतदेव हि तज्ज्ञानं यद्वि शुद्धात्मदर्शनम्॥
३५४४ ॥§ 11379

अथापि ज्ञानरूपत्वमात्मनोऽभ्युपगम्यते।
दृश्यदर्शननानात्वभावान्नैवमपि ग्रहः॥
३५४५ ॥§ 11381

स्वयम्प्रकाशरूपत्वं तज्ज्ञानस्येष्यते यदि।
स्वसंवित्तिस्तदा प्राप्ता प्रत्यक्षा च मतिर्भवेत्॥
३५४६ ॥§ 11383

915/k

यदि तावदात्मा जडरूपोऽभ्युपगम्यते तदा तद्विषयं ज्ञानमविशुद्धमेव, प्रकृत्या सर्वज्ञानानां ग्राह्यग्राहकवैधुर्यस्य बहिरर्थपरीक्षायां प्रसाधितत्वात्। अथ चिद्रूप आत्मेति पक्षस्तदाऽपि दृश्यदर्शनयोरभेदाद्ग्राह्यग्राहकभावानुपपत्तेस्तद्विषयं ज्ञानमिति न स्यात्, भेदे हि विषयविषयिणोर्विषयविषयिभावः स्यात्। अथ प्रदीपवत्प्रकाशतयाऽऽत्मविषयत्वमस्याभ्युपगम्यते तदा स्वसंवित्तेरनभिमतायाः प्रसङ्गः स्यात् , ज्ञानस्य चाप्रत्यक्षत्वमिष्टं व्याहन्येत। तद्दर्शयति—प्रत्यक्षा च मतिर्भवेदिति ॥ ३५४४॥ ३५४५॥ ३५४६॥ § 11384

४ यद्वि] Correction : ; यदि (sic !)यद्वि

यदुक्तम्—अथापि वेददेहत्वादित्यादि, तत्राह—ब्रह्मादीनां चेत्यादि।
§ 11385

ब्रह्मादीनां च वेदेन सम्बन्धो नास्ति कश्चन।
भेदान्नित्यतयाऽपेक्षावियोगाच्च तदन्यवत्॥
३५४७॥§ 11387

ततश्च वेददेहत्वं ब्रह्मादीनामसङ्गतम्।
सर्वज्ञानमयत्वं च वेदस्यार्थाविनिश्चयात्॥
३५४८॥§ 11389

स्वातन्त्र्येण च सम्बुद्धः सर्वज्ञ उपपादितः।
न पुनर्वेददेहत्वाद्ब्रह्मादिरिव कल्प्यते॥
३५४९॥§ 11391

सम्बन्धे सति ब्रह्मादीनां वेददेहत्वं भवेत्, नच वेदेन सार्द्धं ब्रह्मादेः सम्बन्धोऽस्ति। तथाहि—तादात्म्यतदुत्पत्तिलक्षणो द्विविध एव सम्बन्धो भावानामिति प्रतिपादितम्, तत्र भेदाभ्युपगमान्न तादात्म्यसम्बन्धः। नापि तदुत्पत्तिः द्वयोरपिनित्यत्वेनानुपकार्यतया परस्परमपेक्षाया अभावात्। सर्वज्ञानमयत्वं च वेदस्येति।असङ्गतमिति प्रकृतेन सम्बन्धः। कस्मात् ?। अर्थानिश्चयात्। विनिश्चिते ह्यर्थे वेदस्य सर्वज्ञानमयत्वं कल्पयितुं युक्तम्, स च भवन्मत्या न सम्भवतीत्यावेदितमेतत्। नच भवद्भिरिवास्माभिर्वेदद्वारेण सर्वज्ञोऽभ्युपगम्यते। किं तर्हि ?। स्वयंभुज्ञानत्वात्स्वयमेव भगवान्सर्वज्ञ इति प्रतिपादितमेतत्॥ ३५४७॥ ३५४८॥ ॥ ३५४९॥ § 11392

यच्चोक्तम्—क्वच बुद्धादयो मर्त्या इति। तत्र मर्त्यत्वं भगवतोऽसिद्धमिति दर्शयन्नाह—पञ्चेत्यादि। § 11393

पञ्चगत्यात्मसंसारबहिर्भावान्न मर्त्यता।
बुद्धानामिष्यतेऽस्माभिर्निर्माणं तत्तथामतम्॥
३५५०॥§ 11395

916/k

नरकप्रेततिर्यग्देवमनुष्यभेदेन पञ्चगत्यात्मकः संसारः, तद्बहिर्भूताश्च भगवन्त इत्यसिद्धं मर्त्यत्वमेषाम्। कथं तर्हि शुद्धोदनादिकुलोत्पत्तिरेषां श्रूयत इत्याह—निर्माणं तत्तथामतमिति॥ ३५५०॥ § 11396

एतदेवागमेन संस्पन्दयन्नाह—अकनिष्ठे इत्यादि। § 11397

अकनिष्ठे पुरे रम्ये शुद्धावासविवर्जिते।
बुध्यन्ते तत्र संबुद्धा निर्मितस्त्विह बुध्यते॥
३५५१॥§ 11399

अकनिष्ठा नाम देवा(शा?)स्तेषामेकदेशे शुद्धावासकायिका नाम देवाः(शाः?)। अत्र हि आर्या एव शुद्धा आवसन्ति तेषामुपरि माहेश्वरभवनं नामस्थानम्। तत्र चरमभविका एव दशभूमिप्रतिष्ठिता बोधिसत्त्वा उत्पद्यन्ते। इह तु तदाधिपत्येन तथा निर्माणमुपलभ्य(त) इत्यागमः॥ ३५५१॥ § 11400

नास्माकमिदं सिद्धमिति चेदाह—स्वातन्त्र्येणेत्यादि। § 11401

स्वातन्त्र्येण तु मर्त्यत्वं त्वया निश्चीयते कथम्।
परकीयागमद्वारान्न तस्यैवमवस्थितेः॥
३५५२॥§ 11403

नच तत्स्पर्धयाऽस्माभिस्ते सर्वज्ञा इतीष्यते।
आकाशकुसुमैः को हि स्पर्द्धां सत्येषु कल्पयेत्॥
३५५३॥§ 11405

यदि हि स्वातन्त्र्येण मर्त्यत्वं भवतोपादीयते तदा सन्दिग्धासिद्धता। नहि भगवतो मर्त्यत्वप्रसाधकं किञ्चिद्भवतः प्रमाणमस्ति, येन स्वातन्त्र्येण मर्त्यत्वं सिद्धं भवेत्, तस्मात्परकीयागमद्वारेण त्वया मर्त्यत्वं वक्तव्यम्। स च परस्यागम एवम् —यथोक्तरूपं स्थित इत्यसिद्धमेषां मर्त्यत्वम्॥ ३५५२॥ ३५५३॥ § 11406

कथमाकाशकुसुमप्रख्यत्वमेषां सिद्धमित्याह—सर्वशक्तिवियोगेनेत्यादि। § 11407

सर्वशक्तिवियोगेन नीरूपत्वं हि साधितम्।

नित्यानां तेन नो सन्ति परेष्टास्त्रय(?)म्बकादयः॥
३५५४॥§ 11409

परेण हि शङ्करादयो नित्यत्वेनेष्टाः। नित्यानां च क्रमाक्रमाभ्यामर्थक्रियाविरोधात्सर्वसामर्थ्यरहितत्वं प्रसाधितम्। सर्वसामर्थ्यविरहलक्षणं चासत्त्वमिति परेष्टास्त्र्यम्बकादयो नित्या न सन्त्येवेत्याकाशकुसुमप्रख्यत्वमेषां सिद्धमेव। त्र्यम्बकः— शङ्करः॥ ३५५४॥ § 11410

किञ्च—सन्तु नाम त्र्यम्बकादयः, तथाप्यतिनिकृष्टतया तेषां, न भगवतां तैः सह स्पर्द्धा क्रियतेऽस्माभिरित्यादर्शयन्नाह—किञ्चेत्यादि। § 11411
917/k

किञ्च तेषां विपर्यस्तं ज्ञानमात्मादिदर्शनात्।
बुद्धानां त्वविपर्यस्तं विस्तरेणोपपादितम्॥
३५५५॥§ 11413

तत्स्पर्द्धा क्रियते तैस्तु न दूरान्तरभावतः।
को हि तैमिरिकैः स्पर्द्धां कुर्यात्स्वस्थेक्षणे नरे॥
३५५६॥§ 11415

सुबोधम्॥ ३५५५॥ ३५५६॥ § 11416

यच्चोक्तम्—नित्येऽपि चागमे वेद इति, तत्राह—गुणकर्मेत्यादि। § 11417

गुणकर्मेश्वरादीनां वेदानां चापहस्तिता।
नित्यताऽतश्च नास्माभिर्नित्य आगम इष्यते॥
३५५७॥§ 11419

सर्ववस्तुव्यापिनः क्षणभङ्गस्य प्रसाधनान्न कस्यचिन्नित्यत्वमस्तीति सर्वमेतदसङ्गतमुक्तम्॥ ३५५७॥ § 11420

यच्चोक्तम्—सर्वज्ञसदृशमित्यादि, तत्राह—उपमानेनेत्यादि। § 11421

उपमानेन सर्वज्ञसत्तासिद्धिर्न चेष्यते।
तस्याप्रमाणताप्रोक्तेः सत्तासिद्धिस्ततो न च॥
३५५८॥§ 11423

प्रसिद्धायां हि सत्तायां सादृश्यं गम्यते ततः।
साधनं प्रकृतं चेदं सत्तायाः सर्ववेदिनः॥
३५५९॥§ 11425

तन्नोपमानतः सिद्धिः प्रतिषेधोऽफलः कृ(त?)तः।
नरा दृष्टास्त्वसर्वज्ञाः सर्वे चेद्भवता ततः॥
३५६०॥§ 11427

तवैव सर्ववित्ता स्याद्दूरव्यवहितेक्षणात्।
अन्यसन्तानसम्बद्धज्ञानशक्तेश्च दृष्टितः॥
३५६१॥§ 11429

नह्युपमानस्य प्रामाण्यमस्ति येन ततः सर्वज्ञसिद्धिमभिवाञ्छेद्बौद्धः। सत्यपि वा प्रामाण्ये तस्य सत्तासिद्धावनुपयोग एव। तथाहि प्रसिद्धे धर्मिणि गवादौ गवयादिसाधर्म्यमात्रं तेन साध्यते। नच सर्वज्ञो धर्मी प्रसिद्धस्तस्यैव भवन्मतेन साध्यत्वात्। तेन भवन्मत्या सर्वज्ञसत्तायां साध्यत्वेन प्रस्तुतायामुपमानस्य प्रसङ्गाभावात्तत्प्रतिषेधोऽनर्थकः, प्राप्त्यभावात्। प्राप्तिपूर्वकत्वात्प्रतिषेधस्येति भावः। नरान् दृष्ट्वा त्वसर्वज्ञानित्यादावाह—नरा दृष्टास्त्वसर्वज्ञा इत्यादि। यदि हि सर्व एव नरा दृष्टा भवता तदा सर्वज्ञनिषेधे स्ववचनव्याघातः। तथाहि—दूरव्यवहिताशेषनरदर्शनाभ्युपगमादन्यसन्तानसम्बन्धिज्ञानशक्तिनिश्चयाभ्युपगमाच्चात्मनि सर्वज्ञत्वं स्फुटतरमेवाभ्युपेतं स्यात्, 918/k
देशकालस्वभावविप्रकृष्टार्थदर्शनाभ्युपगमात्। नह्यसर्वज्ञस्यैवं परिज्ञानं संभवेत्। तत्प्रतिषेधाय च साधनोपादानात्तदेव प्रतिषिध्यत इतिस्ववचनव्याघातः, यथा माता मे वन्ध्येति॥ ३५५८॥ ३५५९॥ ३५६०॥ ॥ ३५६१॥ § 11430

असिद्धता च हेतोरिति दर्शयन्नाह—पुरःस्थितेऽपीत्यादि। § 11431

पुरःस्थितेऽपि पुंसि स्यात्कथं तव विनिश्चयः।
नायं सर्वज्ञ इत्येवंभावेऽतीन्द्रियविद्भवान्॥
३५६२॥§ 11433

आत्मासर्वज्ञतादृष्टौ शेषासर्वज्ञनिश्चये।

अतिप्रसङ्गोऽजाद्यादेः सर्वज्ञम(ज्ञस्या?)पि निश्चयात्
३५६३§ 11435

बाधादृष्टेर्नचेत्सर्वधर्मनिश्चय इष्यते।
बाधाशङ्का ननूक्तेऽपि बाधादृष्टेर्न भिद्यते॥
३५६४॥§ 11437

तथाहि—पुरोऽवस्थिते पुंसि शरीरमात्रदर्शनान्नायं सर्वज्ञ इत्येवमसर्वविदा निश्चेतुमशक्यम्, किमुत देशकालव्यवस्थिते पुंसि। भाव इति। नायं सर्वज्ञ इत्येवं निश्चयस्य। अथ मा भूदसिद्धता हेतोरित्यात्मासर्वज्ञतया शेषासर्वज्ञनिश्चयोऽभ्युपगम्यते तदातिप्रसङ्गादनैकान्तिकतेत्यादर्शयन्नाह—आत्मासर्वज्ञतादृष्टावित्यादि।आत्मन्यसर्वज्ञताया दृष्टिरिति विग्रहः। स्यादेतत्सर्वधर्मसाधनं क्रियमाणं दृष्टेन प्रज्ञादिभेदेन बाध्यत इत्यतस्तस्य साधनं (न) क्रियते। तत्त्वसर्वज्ञत्वं साध्यमानं(न) केनचिद्वाध्यत इत्यतोऽतिप्रसङ्गो न भविष्यतीति। तदेतदसम्यक्। यथैव दृष्टबाधं साध्यं हेतुर्न साधयति तथा शङ्क्यमानबाधमपीत्यतो बाधाशङ्का बाधादृष्टेर्नभिद्यते, तेनासर्वज्ञत्वसाधनमपि माभूदाशङ्क्यमानबाधत्वात्॥ ३५६३॥ ३५६४॥ § 11438

यच्चोक्तमुपदेशो हि बुद्धादेरन्यथाऽप्युपपद्यत इत्याह—स्वर्गेत्यादि। § 11439

स्वर्गापवर्गमार्गोक्तिं निरवद्यां प्रसाधिताम्।
बुद्धानां तां जाडात्कोऽन्यो
व्यामोहादभि(दिति?)मन्यते॥ ३५६५॥§ 11441

अन्यथोपपन्नत्वमुपदेशस्यासिद्धम्। नहि स्वर्गापवर्गमार्गस्य निरवद्य उपदेशो व्यामोहात्सम्भवति, निरवद्यत्वं च भगवद्वचनस्य सर्वाभिः परीक्षाभिः प्रसाधितम्।जडादिति। कुमारिलात्। स एव यदि परं मन्यत इत्यर्थः॥ ३५६५॥ § 11442

शिष्यव्यामोहनार्थं वेत्यत्राह—दृष्टेऽपीत्यादि। § 11443
919/k

दृष्टेऽप्यभ्युदयं चित्तदोषशान्तिं परां तथा।
ततश्चाप्नुवतां तेन परं व्यामोहनं कृतम्॥
३५६६॥§ 11445

दृष्ट इति। अस्मिन्नेव जन्मनि। अभ्युदयम्—नित्यारोग्यैश्वर्यादिलक्षणम्।अवाप्नुवतामिति सम्बन्धः। दोषशान्तिं चेति। रागादिदोषोपशमम्। ततः—मन्त्रध्यानसमयाभ्युपदेशात्तत्कृताद्यथाविहितानुष्ठानादाप्नुवतां शिष्याणां परं व्यामोहनं कृतमित्यतिशयोक्तिरियम्। यदीदृशं व्यामोहं भवान्मन्येत तदा भवानेव व्यामूढः स्यादव्यामोहमेवं व्यामोहमिति गृह्णन्॥ ३५६६॥ § 11446

यद्यसौ वेदमूलः स्यादित्यत्राह—वेदमूलं च नैवेदमिति। § 11447

वेदमूलं च नैवेदं बुद्धानामुपदेशनम्।
निष्कलङ्कं हि तत्प्रोक्तं सकलङ्कं श्रुतौ पुनः॥
३५६७ ॥§ 11449

नहि निष्कलङ्कमुपदेशनं सकलङ्कमूलं युक्तम्॥ ३५६७॥ § 11450

यतस्तु मूर्खशूद्रेभ्य इत्यत्राह—स्वार्थसंसिद्धये तेषामित्यादि। § 11451

स्वार्थसंसिद्धये तेषामुपदेशो न तादृशः।
आरम्भः सकलस्त्वेष परार्थं कर्तुमीदृशः॥
३५६८ ॥§ 11453

तस्माज्जगद्धिताधानदीक्षिताः करुणात्मकाः।
अनिबन्धनबन्धुत्वादाहुः सर्वेषु तत्पदम्॥
३५६९ ॥§ 11455

पदमिति। सर्वगुणसम्पत्प्रतिष्ठार्थेनाभ्युदयनिःश्रेयसमार्गः पदमुच्यते॥ ३५६८॥ ॥ ३५६९॥ § 11456

येस्तु मन्वादिभिर्वेदवादिभ्य एवोपदेशनं कृतम्, तेषामेव व्यामोहार्थं तत्सम्भाव्यत इति दर्शयति—ये हीत्यादि। § 11457

ये हि लोभभयद्वेषमात्सर्यादिवशीकृताः।
प्रादेशिकी भवेत्तेषां देशना निःकृपात्मनाम्॥
३५७० ॥§ 11459

या पुनर्भगवतामाकुमारं देशना सा तेषां माहात्म्यमेवोद्भावयतीति दर्शयति—करुणेत्यादि। § 11460

करुणापतन्त्रास्तु स्पष्टतत्त्वनिदर्शिनः।
सर्वापवादनिःशङ्काश्चक्रुः सर्वत्र देशनाम्॥
३५७१॥§ 11462

यथायथा च मौर्ख्यादिदोषदुष्टो भवेज्जनः।
तथातथैव नाथानां दया तेषु प्रवर्त्तते॥
३५७२॥§ 11464

920/k

नैवावाहविवाहादिसम्बन्धो वाञ्छितो हि तैः।
उपकारस्तु कर्त्तव्यः साधुगीतमिदं ततः॥
३५७३॥§ 11466

ऊढाया योषितः भर्तृगृहागमनमावाहः॥ ३५७१॥ ३५७२॥ ३५७३॥
§ 11467

किं तद्गीतमित्याह—विद्येत्यादि। § 11468

विद्याचरणसंपन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥
३५७४॥§ 11470

अपि च—भवतैव मूर्खशूद्रेभ्य इत्यतिप्रकटमुच्चैरसद्भूतजातिमदोद्धतेन चेतसा ब्रुवता स्फुटतरमात्मन एव प्रकटितमिह विद्वज्जनसदसि महामौर्ख्यम्। तथाहि—कदाचिद्ब्राह्मणत्वाख्यं सामान्यं नाम वस्त्वन्तरमस्तीत्येवमुपकल्पयन्तस्तत्रभवन्तोविप्रा गर्वार्बुदमुद्वहन्ति ?, यद्वा जातकर्मादिभिः संस्कृतत्वमात्मनः समीक्ष्य ?, ब्राह्मणपितृकृतां चात्मनो ब्राह्मणीगर्भप्रसूतिमालम्ब्य ?। तत्र प्रथमे पक्षे केवलमाकाशकुशेशयमण्डनमेतद्भवतामिति दर्शयति—शतश इत्यादि। § 11471

शतशः प्रतिषिद्धायां जातौ जातिमदश्च किम्।
तदन्यातिशयासिद्धौ विशिष्टा सा च किं मता॥
३५७५॥§ 11473

वशित्वादिगुणाधाराः प्रक्षीणाशेषकल्मषाः।
सर्वेऽप्यत्राविशेषेण तद्योगे च विजातयः॥
३५७६॥§ 11475

भवेयुर्यदि सिद्ध्यन्ति विशिष्टास्तत्समाश्रयाः।
वैशिष्ट्यमन्यथा नैव लुब्धकद्विजजातिवत्॥
३५७७॥§ 11477

अपि च भवतु नाम सा जातिस्तथाऽपि तत्कृतमाश्रयस्य यदि वैशिष्ट्यमुपलभ्येत तदा स्याद्भवतां गर्वः, यावता न किञ्चिदतिशयं पश्याम इत्यादर्शयति—तदन्येत्यादि। तेभ्यो ब्राह्मणेभ्योऽन्यस्तदन्यः शूद्रादिस्तस्माद-तिशयस्तस्यासिद्धिरितिविग्रहः। तथाहि—शूद्रादिभ्यो न प्रज्ञामेधादिभिर्विण्मूत्र-मांसशोणितादिभिश्च विप्राणामतिशयमुपलभामहे, तत्कथमतिशयासिद्धौ स-त्यां सा तदाधारा जातिर्विशिष्यते। येन भवता जातिवादावलेपोद्धतेनैव-मभिधीयते—वेदवादिभ्य एव तं प्रयच्छेयुर्यथा मन्वादय इति। यदि तु ब्राह्मणजातिसमाश्रयेण भवन्तः प्रकृत्यैव वशित्वेशित्वप्राकाम्यकरुणादिगुणग-णाधाराः प्रहीणाशेषदुरिता भवेयुस्तदा भवेद्भवतां वैशिष्ट्यमन्यथालुब्धककैवर्त्त-चर्मकारादिब्राह्मणस्येव सत्यपि ब्राह्मणजातियोगे कथमिव वैशिष्ट्यं सिद्ध्येत्॥ ३५७५॥ ३५७६॥ ३५७७॥ § 11478

921/k

द्वितीयेऽपि पक्षे दोषमाह—जातकर्मादय इत्यादि। § 11479

जातकर्मादयो ये च प्रसिद्धास्ते तदन्यवत्।
आचाराः सांवृतास्ते हि कृत्रिमेष्वपि भाविनः॥
३५७८॥§ 11481

तदन्यवदिति। कृत्रिमाभिमतब्राह्मणेष्विव। सांवृता इति। नाम-करणादिवत्सांव्यवहारिकाः। तृतीयेऽपि पक्षे न युक्तो मदः, न-हि ब्राह्मणब्राह्मणीशरीराणां शूद्रादिशरीरतः शुक्रशोणिताद्यशुचिमयत्वेन क-श्चिद्विशेषोऽस्तीत्युक्तमेतत्॥ ३५७८॥ § 11482

अपि च सन्दिग्धमेव भवतो ब्राह्मणपितृकत्वमित्यतोऽपि न युक्तो मद इत्यादर्शयन्नाह—अतीतश्चेत्यादि। § 11483

अतीतश्च महान्कालो योषितां चातिचापलम्।
तद्भवत्यपि निश्चेतुं ब्राह्मणत्वं न शक्यते॥
३५७९॥§ 11485

अतीन्द्रियपदार्थज्ञो नहि कश्चित्समस्ति वः।
त्वदन्वयविशुद्धिं च नित्यो वेदोऽपि नोक्तवान्॥
३५८०॥§ 11487

कालान्तरेण कदाचिदब्राह्मणगोत्रकोऽपि सम्भवान्ब्राह्मणः सांवृत इत्यपि सम्भाव्यते। सत्यपि ब्राह्मणपूर्वत्वे भवतो मातृचारित्रदोषेण जारजातत्वमपि सम्भाव्यत एव। तथाहि—प्रायेण योषितो मन्मथातुराश्चपलचेतसः स्वकुलव्रतसीमानमतिपत्यापि वर्त्तमानाः समुपलभ्यन्ते। न चातीन्द्रियार्थदर्शी भवद्भिः कश्चिन्नरोऽभ्युपेयते, यतो निश्चयः स्यात्। नापि वेदो निवेदयति भवतोऽन्वयशुद्धिम्॥ ३५७९॥ ॥ ३५८०॥ § 11488

किञ्च—न केवलं भवतामात्मन्यपरिनिश्चितब्राह्मण्यानां जातिमदावलेपो न युज्यते, अपि च—मन्वादीनामप्यविदितद्विजातीनां द्विजातिभ्य एवोपदेशो मोहादिति दर्शयति—अत इत्यादि। § 11489

अतो मन्वादयोऽप्येषामविज्ञातद्विजातयः।
नोपदेशं प्रयच्छेयुर्द्विजेभ्यस्तदनिश्चयात्॥
३५८१॥§ 11491

अविज्ञाता अनिश्चिता द्विजातयो येषां ते तथोक्ताः। तदनिश्चयादिति। तेषांद्विजातीनामनिश्चयात्॥ ३५८१॥ § 11492

अपि च—मन्वादिभिरस्मभ्यमेवोपदेशनं कृतमिति नैतद्भवतां महत्त्वकारणम्, अपि तु जडत्वमेव सूचयतीति दर्शयन्नाह—निर्युक्तिकत्वमित्यादि। § 11493

922/k

निर्युक्तिकत्वं वेदार्थे ज्ञापनाशक्तताऽऽत्मनि।
वेदाधीतिजडा विप्रा न परीक्षाक्षमा इति॥
३५८२॥§ 11495

कुतश्चिन्निश्चितं शङ्के नूनं मन्वादिभिस्ततः।
विप्रेभ्य एव वेदादेः कृतं तैरुपदेशनम्॥
३५८३॥§ 11497

वेदाधीतिजडा इति। वेदाधीत्या कृता जडा वेदाधीतिजडाः। वेदाध्ययनेन दूरीकृतवस्तुबोधशक्तय इति यावत्। कुतश्चिदिति। हेतोः॥ ३५८२॥ ३५८३॥ § 11498

अतएव वेदादीनामयुक्तिकत्वमवेत्य मन्वादिभिराज्ञासिद्धत्वमात्मवचनेषूक्तमितिदर्शयति—पुराणमित्यादि। § 11499

पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम्।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः॥
३५८४॥§ 11501

मन्ये तेनैव दत्तेयं जडेभ्यस्तैर्विभीषिका।
आज्ञासिद्धत्वमन्यत्र वाङ्मात्रात्किंनु वा भवेत्॥
३५८५॥§ 11503

पुराणं नाम शास्त्रम्। मानवो धर्म इति। मनुना विरचितः। साङ्गो वेद इति। सह व्याकरणादिभिः षड्भिरङ्गैर्वर्त्तत इति साङ्गः। चिकित्सितमिति। चिकित्साशास्त्रं। तेनैवेति। कारणेन। निर्युक्तिकत्वमेषां पुराणादीनां भवतां च जाड्यमवधार्येति यावत्॥ ३५८४॥ ३५८५॥ § 11504

यैरित्यादि। § 11505

यैः पुनः स्वोक्तिषु स्पष्टं युक्तार्थत्वं विनिश्चितम्।
तत्प्रत्यायनसामर्थ्यमात्मनश्च महात्मभिः॥
३५८६॥§ 11507

कुतीर्थ्यमत्तमातङ्गमदग्लानिविधायिनम्।
एवमस्ताखिलत्रासाः सिंहनादं नदन्ति ते॥
३५८७॥§ 11509

कुतीर्थ्या एव मत्तमातङ्गास्तेषां मदग्लानिं विधातुं शीलं यस्य सिंहनादस्य स तथोक्तः। एवमिति। वक्ष्यमाणम्॥ ३५८६॥ ३५८७॥ § 11510

कः पुनरसौ सिंहनाद इत्याह—तापादित्यादि। § 11511

तापाच्छेदाच्च निकषात्सुवर्णमिव पण्डितैः।
परीक्ष्य भिक्षवो ग्राह्यं मद्वचो नतु गौरवात्॥
३५८८॥§ 11513

अपि च भगवद्भिरेव परमार्थब्राह्मणेभ्यः कृतमुपदेशनं न मन्वादिभिरित्येतदाह —ये चेत्यादि। § 11514
923/k

ये च वाहितपापत्वाद्ब्राह्मणाः पारमार्थिकाः।
अभ्यस्तामलनैरात्म्यास्ते मुनेरेव शासने॥
३५८९॥§ 11516

इहैव श्रमणस्तेन चतुर्द्धा परिकीर्त्यते।
शून्याः परप्रवादा हि श्रमणैर्ब्राह्मणैस्तथा॥
३५९०॥§ 11518

वाहितपापधर्मत्वाद्ब्राह्मणा इति निरुक्तिः। ते चेहैव नैरात्म्याभ्यासोपदेशान्मुनेर्भगवतः शासने युक्ताः, नान्यत्र, पापक्षयोपायविकलत्वात्। अतएव भगवतोक्तम् —इहैव श्रमणः इहैव ब्राह्मणः, शून्याः परप्रवादाः श्रमणैर्ब्राह्मणैरिति। तत्र चत्वारःश्रमणाः फलस्था श्रोत आपन्नादयः (?)। ब्राह्मणा अपि तत्प्रतिपन्नकाश्चत्वार एव ॥ ३५८९॥ ३५९०॥ § 11519
नरः कोप्यस्तीत्यादावह—नर इत्यादि। § 11520

नरः कोप्यस्ति सर्वज्ञ इत्याद्यपि न साधनम्।
प्रतिज्ञान्यूनतादोषदुष्टमित्युपपादितम्॥
३५९१॥§ 11522

केन ग्रन्थेनोपपादितमित्याह—निःशेषार्थेत्यादि। § 11523

१ पन्नक] Correction: ; पालक
(sic!)पन्नक

निःशेषार्थपरिज्ञानसाधने विफलेऽपि हि।
सुधियः सौगता यत्नं कुर्वन्तीत्यादिना पुरा॥
३५९२॥§ 11525

किञ्च—नास्माभिः सर्वज्ञोक्तत्वमवगम्य तदनुष्ठानाय सर्वज्ञः प्रसाध्यते। किं तर्हि ?। ये सार्वज्ञपदप्राप्तीच्छवस्तदर्थं दोषक्षयो गुणोत्कर्षाय प्रसाध्यते। यतो वस्तुबलप्रवृत्तानुमानत एव सौगताः पुरुषार्थेषु घटन्ते न प्रवादमात्रेण। प्रमेयत्वादीनां च यथा साधनत्वं भवति तथा प्रतिपादितमेव। यच्चोक्तम्—दशभूमिगत इति, तदपि सिद्धान्तानभिज्ञेन भवतोक्तम्। नहि दशभूमिगतो भगवानिष्यते। किं तर्हि ?। बोधिसत्त्वावस्थां यावद्दशभूमिस्तत ऊर्ध्वं बुद्धभूमिरिष्यते॥ ३५९२॥ § 11526

यच्चोक्तम्—एकदेशज्ञगीतं तन्न स्यात्सर्वज्ञभाषितमिति, तदपि प्रतिविहितमेवेति दर्शयन्नाह—एकदेशेत्यादि। § 11527

एकदेशज्ञगीतं तु न स्यात्सर्वज्ञभाषितम्।
इत्यत्रापि पुरा प्रोक्तं सर्वज्ञानान्वयादिति॥
३५९३॥§ 11529

एतदेव पुनरपि प्रतिपादयन्नाह—यथैवेत्यादि। § 11530

यथैवेष्टादिकानर्थाननुभूयाल्पदर्शनः।
चेतस्यारोप्य तान्पश्चात्प्रवक्त्यनुभवाश्रयान्॥
३५९४॥§ 11532

924/k

न च तद्वचनं तस्य तद्वस्तुज्ञानजन्म न।
एवं सर्वज्ञवाक्यं स्याद्धेतुभेदात्तु भिद्यते॥
३५९५॥§ 11534

अल्पदर्शन इति। अर्वाग्दर्शनः, असर्वज्ञ इति यावत्। तद्वस्तुज्ञानजन्मेति।तस्योष्णादेर्वस्तुनो ज्ञानमनुभवस्तद्वस्तुज्ञानं ततो जन्मोत्पत्तिर्यस्य वचनस्य तत्तथोक्तम्। न नेति प्रतिषेधद्वयेन तद्वस्तुज्ञानजन्मैव भवतीति दर्शयति। एवमिति। तदपि तद्वस्तु ज्ञानजन्मतया प्रमाणम्। यद्येवं को विशेषोऽल्पदर्शनवचनाद्बुद्धवचनस्येत्याह—हेतुभेदात्तु भिद्यत इति॥ ३५९४॥ ३५९५॥ § 11535

एतदेव स्पष्टयति—समस्तेत्यादि। § 11536

समस्तवस्तुविज्ञानमस्य कारणतां गतम्।
किञ्चिन्मात्रार्थविज्ञानं निमित्तं तस्य तु स्थितम्॥
३५९६॥§ 11538

अस्येति। बुद्धवचनस्य। तस्य त्विति। एकदेशज्ञवचनस्य॥ ३५९६॥
§ 11539

विकल्पेत्यादिना—परश्नोदयति। § 11540

विकल्पासम्भवे तस्य विवक्षा ननु कीदृशी।
प्रहीणाचरणत्वाद्धि विकल्पो नास्य वर्त्तते॥
३५९७॥§ 11542

नह्यसंभवद्विकल्पस्य विवक्षा सम्भवति, तस्या विकल्पविशेषत्वात्। अतोऽसौ विकल्पत्वेन व्याप्ता सती तद्भा(तद?)वे कथमवस्थां लभेत। नहि वृक्षाभावे शिंशपायाः सम्भवोऽस्ति। नच सर्वज्ञस्य विकल्पसम्भवः, तस्य प्रहीणाशेषक्लेशविशेषाद्यावरणत्वात्। विकल्पस्य च प्रकृत्या भ्रान्तत्वात्। तत्समुदाचारे भ्रान्तः प्राप्नोति सर्वविदिति॥ ३५९७॥ § 11543

नैवमित्यादिना प्रतिविधत्ते। § 11544

नैवं क्लिष्टो हि संकल्पस्तस्य नास्त्यावृतिक्षयात्।
जगद्धितानुकूलस्तु कुशलः केन वार्यते॥
३५९८॥§ 11546

द्विविधो हि विकल्पः संक्लेशाद्यनुकूलतया क्लिष्टः। अलोभादिसम्प्रयोग-समुत्थानतया कुशलः। तत्र यः क्लिष्टः स प्रहीणक्लेशाद्यावरणानां नास्त्येव, कारणाभावात्। यस्तु कुशलः स प्रहीणावरणस्याप्यविरोधीति तेन भगवता कृपाभ्यासप्रवर्त्तितो जगद्धितोदयानुकूलतया कुशलो विकल्पः संमुखीभवन् केन वार्यते॥ ३५९८॥ § 11547

स्यादेतत्—सर्वस्यैव विकल्पस्य प्रकृत्या स्वप्रतिभासेऽनर्थेऽर्थाध्यव-
925/k सायेन प्रवृत्ते र्भ्रान्तत्वात्प्रहीणज्ञेयावरणस्य तत्समुदाचारो विरुद्ध एवेत्याश-
ङ्क्याह—नच तस्येत्यादि। § 11548

७ विकल्पस्य] Correction : ; कल्पस्य (sic !)विकल्पस्य

नच तस्य विकल्पस्य सोऽर्थवत्तामवस्यति।
तं हि वेत्ति निरालम्बं मायाकारसमो ह्यसौ॥
३५९९॥§ 11550

मायाकारो यथा कश्चिन्निश्चिताश्वादिगोचरम्।
चेतो निर्विषयं वेत्ति तेन भ्रान्तो न जायते॥
३६००॥§ 11552

यदि हि तस्य विकल्पस्याविषयस्य विषयवत्तां गृह्णीयात्तदा भ्रान्तो भवेद्यावता मायाकारवदसौ तज्ज्ञानविषयतयैवावगच्छतीति कथं भ्रान्तो भवेत्॥ ३५९९॥ ॥ ३६००॥ § 11553

यदुक्तम्, इत्यादि कीर्त्त्यमानं तु श्रद्दधानेषु शोभते इति, तत्राह— इत्यादीति। § 11554

इत्यादि कीर्त्त्यमानं तु श्रद्दधानेषु शोभते।
प्रकृतार्थानुरूपेण प्रोक्तं नैतद्द्विजातिना॥
३६०१॥§ 11556

कथम्, किं तत्प्रकृतम् ?, तदनुरूपमेतन्न भवतीत्याह—तथा(ऽ)व्याप्तश्चेत्यादि। § 11557

तथा(ऽ)व्याप्तश्च सर्वार्थैः शक्तो नैवोपदेशने।
इत्येतत्प्रकृतं ह्यत्र तत्र चाहुर्महाधियः॥
३६०२॥§ 11559

तस्योपदेशने शक्तिर्न स्याच्चेत्किं तदा भवेत्।
ततो भवद्भिर्वक्तव्यमागमो न भवेदिति॥
३६०३॥§ 11561

तत्राप्याहुर्भवत्त्वेवं किं दृष्टोऽसौ त्वया वदन्।

प्रसङ्गसाधनेनेदमनिष्टं चोद्यते यदि॥ ३६०४ ॥§ 11563

न चेद्वक्तृत्वमिष्येत नागमोपगमो भवेत्।
तत्प्रणेतागमेष्टौ तु तस्य वक्तृत्वमिष्यताम्॥
३६०५ ॥§ 11565

एतच्च प्रसङ्गसाधनं मयोक्तं न स्वातन्त्र्येणेत्येवं स्ववाचैव परोऽभिधास्यतीति मन्यमानः प्रसङ्गसाधनत्वमेव तावदस्य प्रकृतस्य समर्थयितुमाह—तत्र चाहुरित्यादि। यदेतद्भवतोक्तं सर्वार्थव्यावृत्तस्योपदेशने शक्तिर्न प्राप्नोतीति, अत्र तावद्भवान्प्रष्टव्यो माभूदुपदेशने तस्य शक्तिः, कोऽत्र दोष आपद्यते, इत्येवं पृष्टस्य परस्योत्तरं स्वयमेवाविष्करोति। तत इत्यादि। तत्राप्यभिधीयते—भवत्वेवमागमाभावः, कोऽत्र विरोधः, नहि भवताऽसौ ब्रुवाणः
926/k समुपलब्धो येन दृष्ट इति विरोधः स्यादित्येवं पृष्टेन त्वया सामर्थ्यादिदमभिधानीयम्—न मया स्वयमागमस्य तत्प्रणीतत्वमुपलभ्य तस्य वक्तृत्वं प्रसाध्यते, किं तर्हि ?, भवद्भिरेवागमस्य तत्प्रणीतत्वमिष्टम्, तच्च भवतां नोपपद्यते यदि तस्य वक्तृत्वं नेष्येत। तस्मादवश्यमागमस्य तत्प्रणीतत्वमिच्छद्भिर्वक्तृत्वमपि तस्येष्टव्यमित्येवमनिष्टापादानं प्रसङ्गेन क्रियत इति॥ ३६०२॥ ॥ ३६०३॥ ३६०४॥ ३६०५॥ § 11566

एवं प्रसङ्गसाधनत्वं समर्थ्य साम्प्रतं प्रकृतार्थानुरूप्यानभिधानं योजयितुमाहयद्येवमित्यादि। § 11567

यद्येवमीदृशो न्यायः प्रसिद्धो न्यायवादिनाम्।
प्रसङ्गसाधने धर्मः श्रद्धामात्रात्परैर्मतः॥
३६०६ ॥§ 11569

युक्तिप्रसिद्धतायां च स्वतन्त्रं साधनं भवेत्।
ईदृशश्च परेणेष्टस्तत्प्रणीतः स आगमः॥
३६०७ ॥§ 11571

सम्भारावेधतस्तस्य पुंसश्चिन्तामणेरिव।

१ भवत्वे] Correction : ; भवत्ये
(sic !)भवत्वे

निःसरन्ति यथाकामं कुट्यादिभ्योऽपि देशनाः॥
३६०८॥§ 11573

आधिपत्यप्रपत्त्याऽतः प्रणेता सोऽभिधीयते।
विकल्पानुगतं तस्य न वक्तृत्वं प्रसज्यते॥
३६०९॥§ 11575

वयमश्रद्दधानास्तु ये युक्तीः प्रार्थयामहे।
इतीदं गदितं तस्मात्प्रसङ्गार्थमजानता॥
३६१०॥§ 11577

य एव हि धर्मः परेणागममात्रादभ्युपेतः स एव प्रसङ्गसाधनेऽभिधीयत इति न्यायः। तत्र यदि परेण वक्तृत्वानुगमेन तत्प्रणीतत्वमागमस्येष्टं स्यात्तदा भवेद्वक्तृत्वाभावादागमस्यातत्प्रणीतत्वप्रसङ्गः, यावताऽधिपत्यमात्रेणासौ तस्यागमस्य प्रणेताऽभ्युपगतो न वक्तृत्वोपगमात्। अ तो यत्तत्प्रणीतागमोपगमेन वक्तृत्वापादनं तत्प्रसङ्गार्थानभिज्ञेन भवताऽभ्यधायि॥ ३६०६॥ ३६०७॥ ३६०८॥ ३६०९॥ ॥ ३६१०॥ § 11578

यच्चेदमुक्तं कुट्यादिनिःसृतानामित्यादि। तत्राह—कुट्यादीत्यादि।
§ 11579

कुट्यादिनिःसृतानां च कस्मान्नाप्तोपदिष्टता।
तदाधिपत्यभावेन यदा तासां प्रवर्त्तनम्॥
३६११॥§ 11581

यदि हि तदाधिपत्येन तासां देशनानां न स्यात्प्रवृत्तिस्तदाऽऽप्तोपदिष्टता न भवेत्। § 11582
927/k

यदा तु तदाधिपत्येन ताः प्रवर्त्तन्त इत्युपगतं तदा किमिति तदुपदिष्टत्वमासां न भवेत्॥ ३६११॥ § 11583

यच्चोक्तम्—विश्वासश्च न तासु स्यादिति, तत्राह—सम्भिन्नेत्यादि।
§ 11584

सम्भिन्नालापहिंसादिकुत्सितार्थविवर्जिताः।

क्रीडाशीलपिशाचादिप्रणीताः स्युः कथं च ताः॥
३६१२ ॥§ 11586

सम्भिन्नालापहिंसादिकुत्सितार्थोपदेशनम्।
क्रीडाशीलपिशाचादिकार्यं तासु न विद्यते॥
३६१३ ॥§ 11588

प्रमाणद्वयसंवादि मतं तद्विषयेऽखिले।
यस्य बाधा प्रमाणाभ्यामणीयस्यपि नेक्ष्यते॥
३६१४ ॥§ 11590

यच्चात्यन्तपरोक्षेपि पूर्वापरविबाधितम्।
करुणादिगुणोत्पत्तौ सर्वपुंसां प्रयोजकम्॥
३६१५ ॥§ 11592

सर्वाकारधरोपेतं सद्वृत्तप्रतिपादकम्।
इहामुत्र च भव्यानां विविधाभ्युदयावहम्॥
३६१६ ॥§ 11594

सर्वानुशयसन्दोहप्रतिपक्षाभिधायकम्।
निर्वाणनगरद्वारकपाटपुरभेदि च॥ ३६१७ ॥§ 11596

तच्चेत्क्रीडनशीलानां रक्षसां वा वचो भवेत्।
त एव सन्तु सम्बुद्धाः सर्वतल्लक्षणस्थितेः॥
३६१८ ॥§ 11598

नहि नामान्तरक्लृप्तौ वस्तुरूपं निवर्त्तते।

विशिष्टेऽशिष्टसंज्ञां तु कुर्वन्निन्द्यः सतां भवेत्॥
३६१९ ॥§ 11600

यदि हि नृत्यगीतहिंसागम्यगमनादेः तत्कर्तव्यतया तत्रोपदेशः स्यात्तदा क्रीडाद्यभिरतपिशाचादिकार्योपलम्भात्तासां तत्प्रणीतत्वं सम्भावनापथमवतरेत्। यावताप्रमाणाविरुद्धमपरस्परपराहतमार्यजनोचितं—करुणादिगुणेषु नियोजयितृ स्वर्गापवर्गफलवाहकमेतद्भगवतो वचनमित्युपपादितमेतत्। तदीदृशं कथं क्रीडनशीलस्यपिशाचादेः सम्भाव्यते। यदि नृणामपि भवता पिशाच इति नाम क्रियते। कामं क्रियतां नहि नामकरणे वस्तुस्वभावहानिः। किन्तु भवानेव विशिष्टे भगवत्यशिष्टव्यवहारं कुर्वन्सतां निन्द्य आपद्येतेति समासार्थः। अवयवार्थस्तूच्येते—सम्भिन्नालापो—गीताद्युपदेशः। हिंसा—प्राणिवधः। कुत्सितार्थः—काममिथ्याचारादिः। प्रमाणद्वयसंवादीति। 928/k प्रमाणद्वयं—प्रत्यक्षानुमाने, ताभ्यां संवादस्तदविरुद्धार्थता सोऽस्यास्तीति तत्तथोक्तम्। मतमिति। निश्चितम्। तद्विषयेऽखिल इति। प्रमाणद्वयविषये। प्रमाणद्वयसंवादीति सम्बन्धः। सद्वृत्तम्—आदिमध्यान्ते कल्याणं ब्रह्मचर्यम् सर्वानुशयसन्दोहः—दृग्भावनाहेयक्लेशौघः। तल्लक्षणस्थितेरिति। सम्बुद्धलक्षणस्थितेः । § 11601

यथोक्तम्—अभिज्ञातमभिज्ञेयं भावनीयं च भावितम्। प्रहातव्यं च प्रहीणं च तेन बुद्धो निरुच्यत इति ॥ ३६१२–३६१९ ॥ वेदस्यैव क्रीडाशीलपिशाचादिप्रणीतत्वं युक्तं सम्भावयितुम्। येन गोसवादिष्वगम्यगमनादयोऽसमाचाराः संप्रकाशिता इत्येतद्दर्शयन्नाह —कामेत्यादि। § 11602

काममिथ्यासमाचारप्राणिहिंसादिलक्षणाः।
असभ्यास्तु क्रिया येन वचसा सम्प्रकाशिताः॥
३६२० ॥§ 11604

तद्भुजङ्गपिशाचादिप्रणीतमिति शङ्क्यते।
तच्चेष्टाभिरतानां हि तादृक्सम्भाव्यते वचः॥
३६२१ ॥§ 11606

१४--१५ लक्षणस्थितेः ।] Correction : ; लक्षणस्थितेः॥ ३६१२॥ ३६१३॥ ३६१४॥ ३६१५॥ ३६१६॥ ३६१७॥ ॥ ३६१८॥ ३६१९॥ (sic !)लक्षणस्थितेः ।

१ यथोक्तम्] Correction : ; यद्योक्तम् (sic !)यथोक्तम्

२ निरुच्यत] Correction : ; निरुध्यत (sic !)निरुच्यत

२ इति ॥ ३६१२–३६१९ ॥ वेद] Correction : ; इति, वेद (sic !)इति ॥ ३६१२–३६१९ ॥ वेद

भुजङ्गो—धूर्त्तः॥ ३६२०॥ ३६२१॥ § 11607

यच्चोक्तम्—युगपच्छुच्यशुच्यादीत्यादि, तत्राह—युगपदित्यादि। § 11608

युगपच्छुच्यशुच्यादिस्वभावानां विरोधिनाम्।
ज्ञानमेकधिया दृष्टं न विरुद्धा विदा हि ते॥
३६२२॥§ 11610

यद्यपि भावाः केचित्परस्परं विरोधिनः, तथापि ते विदा—ज्ञानेन सहाविरुद्धा एव। युगपदेकेनापि ज्ञानेन विरुद्धानेकार्थग्रहणोपलम्भात्॥ ३६२२॥ § 11611

एतदेव स्पष्टयन्नाह—अन्योन्यपरिहारेणेत्यादि। § 11612

अन्योन्यपरिहारेण स्थितलक्षणतोऽथवा।
एकस्मिन्न सह स्थानं विरोधस्तेषु सम्भवेत्॥
३६२३॥§ 11614

एकज्ञानावभासित्वं नतु तेषां विरोधिता।
शुच्यशुच्यहिशिख्यादेश्चक्षुषा सकृदीक्षणात्॥
३६२४॥§ 11616

द्विविध एव हि भावानां विरोधः परस्परपरिहारस्थितलक्षणता सहान-
वस्थानता च। तत्र ये परस्परपरिहारेण स्थितलक्षणास्तेषामैक्यं विरुद्धम्।
929/k ये तु सहानवस्था यिनस्तेषामेकदेशावस्थानं विरुद्धम्। न चैकविज्ञानभास-
नादेषामैक्यमेकदेशत्वं वा प्रसज्येत। तेन नैकविज्ञानभासित्वेनैषां विरोधः।
दृष्टं च विरुद्धानामपि सतामेकज्ञानभासनम्। यथा शुच्यशुचिनोश्चक्षुर्ज्ञानेन
परस्परपरिहारस्थितलक्षणयोरहेर्मयूरस्य च सहानवस्थायिनोर्युगपद्ग्रहणम्।
आदिशब्देन छायातपादीनां ग्रहणम्। यदि तर्हि विरुद्धानामप्येकज्ञानाव-
भासनमविरुद्धम्॥ ३६२३॥ ३६२४॥ § 11617

एवं सति सुखदुःखयो रागद्वेषयोरेकज्ञानभासनं प्राप्नोतीत्याशङ्क्याह—सुखेत्यादि। § 11618

सुखदुःखादिभेदे तु यत्सकृन्नास्ति वेदनम्।
हेत्वभावादसान्निध्यात्तज्ज्ञेयं न विरुध्यते॥
३६२५॥§ 11620

तज्ज्ञेयमिति। यत्सुखादीनां सकृदवेदनं तत्कारणाभावेनानुत्पत्तेरसन्निहितत्वात्, तत् (नतु?) विरुद्धत्वादित्येवं ज्ञेयम्—बोद्धव्यमित्यर्थः। एतदुक्तं भवति—कारणवैकल्यादसान्निध्यं तत्र कारणं न परस्परविरोध इति॥ ३६२५॥ § 11621

येषां च वास्तवो विरोधो नतु शुच्यशुच्यादिवत्कल्पनाकृतस्तेषामप्येकज्ञाने भासनमस्तीति दर्शयति—नीलपीतेत्यादि। § 11622

नीलपीतावदातादिरूपभेदाविरोधिनः।
देशप्रकृतिभेदेपि(न?) वीक्ष्यन्ते युगपद्यतः॥
३६२६॥§ 11624

देशप्रकृतिभेदेन विरोधिन इति सम्बन्धः। तत्र देशभेदस्तदतद्देशत्वम्। प्रकृतिभेदो नीलपीतादिस्वभावत्वम्। यद्वा नीलाद्युपादानकारणत्वम्॥ ३६२६॥ § 11625

यच्चोक्तम्—भूतं भवद्भविष्यतीत्यादि, तत्राह—एकज्ञानेत्यादि। § 11626

एकज्ञानक्षणव्याप्तनिःशेषज्ञेयमण्डलः।
प्रसाधितो हि सर्वज्ञः क्रमो नाश्रीयते ततः॥
३६२७॥§ 11628

अत्र केचित्स्वयूथ्या एव विज्ञानवादिमतमुपोद्बलयन्तश्चोदयन्ति—यदि युगपदेकज्ञानक्षणेन (अ)विशेषं ज्ञेयमण्डलं व्याघा(प्य ?)ते, तदा भावनानि यत्ता(भावानामियत्ता?)परिच्छेदादानन्त्यमभ्युपेतं बाध्येत। तथा ह्येकज्ञानारूढाद्भावादन्यो भावो नास्तीत्येवं परिच्छिद्यमानाः कथमन्तवन्तो न भवेयुः। आह च— एकज्ञानसमारूढान्नान्यो भावोऽस्ति कश्चन। इयन्त इति विज्ञानादन्तवन्त इति। ततश्चक्रमपक्षे यो दोषः स युगपज्ज्ञानपक्षेऽपीति। तदेतदसारम्। यदि तावन्निराकारविज्ञानवादिमतमाश्रित्य चोद्यते तदा सर्वमसङ्गतम्। तथाहि—यावत्किञ्चिद्वस्तु ज्ञानं(तं?) सत्तामनुभवति। तस्य सर्वस्य 930/k
सत्तामात्रेण सर्वज्ञचेतसा परिच्छेदात्तेन तद्व्याप्तमिति व्यपदिश्यते, नतु पटेनेव घटानां देशपर्यन्ततया व्याप्तेः। न चैकेन ज्ञानेन परिच्छिन्नानीत्येतावता वस्तूनामात्मस्वभावहानिः। येन तान्येकज्ञानपरिच्छेदवशादनन्तत्वमात्मस्वभावं जह्युः। नहि नीलपीतादयो भावा बहवो युगपच्चित्रास्तरणादिष्वेकज्ञानक्षणावसीयमानतनवोऽनेकत्वं जहति। नापि परस्परमन्वाविशन्ति। अपितु यथैव सन्ति तथैव ज्ञानेन परिच्छिद्यन्ते। नान्येन रूपेण। तद्वत्सत्त्वभाजनलोकोऽपि यथैव सत्तामनुभवति तथैव सर्वज्ञचेतसा गृह्यते। अपर्यन्तश्च दिक्षु विदिक्षु सत्त्वादिलोकोऽवस्थित इत्यपर्यन्त(त)या तस्य ग्रहणं नतु पर्यन्तवर्त्तित-

येति कुतोऽन्तवत्त्वप्रसङ्गः। स्यादेतत्सकलग्रहणाभ्युपगमे कथं पर्यन्तग्रहणं न स्यादिति। नैतदस्ति। कोह्यत्र प्रतिबन्धो यत्र साकल्यग्रहणं तत्रावश्यं पर्यन्तग्रहणमिति। तथाहि—यावन्तस्ते सन्ति भावास्तेषां मध्ये नैकोऽपि सर्वज्ञज्ञानाविदितस्वरूपः सत्तामनुभवति। अपितु सर्व एव सर्वज्ञचेतसा विदितस्वरूपा एवोदयन्ते व्ययन्ते च, नैकोऽपि परित्यक्त इत्ययं सकलग्रहणस्यार्थः। इयमेव च तेषामेकज्ञानेन व्याप्तिः। अन्यथा सकलशब्दवाच्यत्वमपि तेषां नाङ्गीकर्त्तव्यं माभूदन्तवत्त्वप्रसङ्ग इति यत्किंचिदेतत्। यच्चोक्तमेकज्ञानारूढाद्भावादन्यो नास्तीत्येवं परिच्छेदात्कथमन्तवन्तो न भवेयुरिति, तदप्यसम्यक्। नहि निराकारज्ञानवादिपक्षे ज्ञानात्मनि भावानामारोहणमस्ति। अपि तु सत्तामात्रेण तेन निवेद्यन्ते। नापि भावानां ज्ञानापरिच्छेद्यस्वभावतयाऽनन्तत्वमभ्युपेतम्, येन ज्ञायमानतया तेषामन्तवत्त्वं प्रसज्येत। किन्तु देशवितानापर्यन्ततयाऽनन्तो भाजनलोकः। सत्त्वलोकस्तु सङ्ख्यानापर्यन्ततयाऽपि। न च देशावष्टम्भाय पर्यन्तत्वे(ऽ) सति ग्राह्यविरोधः कश्चिद्येनाग्राह्यता भवेत्। यदि पर्यन्ततया न संगृह्णाति कथं सर्वज्ञः स्यादिति चेदत एव। यत एवासौ पर्यन्ततया न गृह्णाति तत एव सर्वज्ञो भवति। अन्यथाऽनन्तं वस्त्वन्तवत्त्वेन गृह्णन् भ्रान्तो भवेत्। तथाहि—यदस्ति तदस्तित्वेन यन्नास्ति तन्नास्तित्वेन गृह्णन्सर्वविदुच्यते। न च सत्त्वभाजनलोकस्य पर्यन्तोऽस्ति। तस्मात्पर्यन्तं गमनकृत(मविद्यमान)मविद्यमानतया गृह्णन्सर्वज्ञज्ञानपरिच्छेदकृतं तु पर्यन्तं विद्यमानं विद्यमानतया पश्यन्कथमसर्वज्ञो नाम। स्यादेतत्—निराकारज्ञानपक्षे विषयग्रहणमनुपपन्नं सर्वत्राविशिष्टत्वात्तस्य। तेन प्रतिकर्मविभागानुपपत्तेरतो निराकारपक्षोऽनुपन्यसनीय एव। सर्वदा तस्य
931/k द्र(दु?)ष्टत्वादिति। तदेतदसम्यक्। नहि सर्वज्ञज्ञानस्य प्रतिकर्मविभाग इष्यते, तस्य सर्ववस्तुविषयत्वात्, यतो न तन्नीलस्यैव संवेदनं पीतस्यैव वा, अपि तु सर्वस्यैवेतीष्टम्। यस्य ह्यर्वाग्दर्शनस्य ज्ञानं प्रतिनियतार्थविषयं तं प्रति निराकारज्ञानपक्षे सर्वत्राविशेषात्प्रतिपन्नविभागानुपपत्तिर्दोष उच्यते। तथाहि नीलस्येदं संवेदनं न पीतस्येति नियमाभावात् सर्वस्य पृथग्जनस्य सर्वज्ञत्वप्रसङ्गापादनं क्रियते।सर्वज्ञस्य तु तदिष्टमेवेति कस्य किमनिष्टमापद्यताम्। तेन सर्वज्ञावस्थायां निराकारं योगबलेनोत्पद्यमानमविरुद्धमेव। विभागेन हेयोपादेयवस्तुपरिज्ञानं न स्यादिति चेत्। न। यदि हि युगपदनन्ते वस्तुनि प्रतिभासमाने हेयोपादेयवस्तुनः प्रतिभासविरोधः स्यात्, अविरोधे चान्यैः प्रतिभासमानस्य तस्य हेयोपादेयवस्तुनः तत्त्वप्रच्युतिः स्यात्, प्रच्युत(त)त्त्वस्यापि विभागेनावभास(न)मेव वा न स्यात्, वि(नि?)रुक्तावभासनस्यापि यदि परिच्छेदकः शुद्धलौकिको विमर्शप्रत्ययः पृष्ठभावी नोत्पद्यते तदेतत्सर्वं स्याद्वक्तुम्। यावता विश्वस्मिञ्जगत्यवभासमाने तदपि हेयोपादेयं वस्त्वविरुद्धप्रतिभासमप्रच्युतात्मतत्त्वं निरुक्तमेवावभासते। पश्चाच्च सर्वज्ञज्ञानबलोत्पन्न-

२१] Correction: ; (पन्न?) (sic!)
२२] Correction: ; (पन्न?) (sic!)

शुद्धलौकिकप्रत्यवमर्शप्रत्ययेन परिच्छिद्यत एवेति कथं विभागेन तदपरिज्ञानं नाम। तदेवं निराकारज्ञानपक्षे तावदचोद्यमेतदिति प्रतिपादितम्। § 11629

अथ साकारज्ञानवादपक्षे चोद्यते। तत्राप्यविरोध एव। तथाहि—यथैव तदनन्तं वस्त्वनन्ताकारानुगतमात्मसत्त्वं सत्ता मनुभवति तथैव तत्सार्वज्ञं चेतोऽपरिमितवस्तुगताकारोपग्रहेणोत्पद्यमानमविरुद्धमेव। एकस्य ज्ञानस्यानेकवस्त्वाकारोपग्रहेणोत्पत्त्यविरोधात्। एकस्यानेकाकारविरोध एवेति चेन्न। आकाराणामसत्यत्वात्। यदि ह्येकस्य पारमार्थिका आकारा भवेयुस्तदा स्याद्विचित्रत्वविरोधः, यावता अस्य(स्व?)भूता एवाकारा इतीष्टम्। यद्येवं भ्रान्तज्ञानसङ्गित्वा(त्) भ्रान्तः प्राप्नोति सर्वज्ञ इति चेन्न। यथाभूतपरिज्ञानाददोष एषः। यदि ह्यसत्यं सत्यत्वेन गृह्णीयात्तदा भ्रान्तः स्यात्, यदा त्वसत्यभूतानाकारानसत्यत्वेनैव जानाति तदा कथं भ्रान्तो भवेत्। अथाव्यतिरिक्तज्ञानारूढाकारग्रहणे सत्यर्थेषु दृष्टादिव्यवहारं कुर्वन्कथं (अ)भ्रान्त इति चेन्न। सम्यगुपायपरिज्ञानात्। यदि ह्युचितं ग्रहणोपायमपास्योपायान्तरेणामुख्येनार्थं गृह्णीयात्तदा भ्रान्तो भवेत्। यावता साकारज्ञानवादिपक्षे ज्ञानस्याकारानुभवव्यतिरेकेण नान्योऽर्थग्रहणव्यापारोऽस्ति। तत्कथमुचितेन ग्रहणव्यापारेणार्थं गृह्णन्भ्रान्तो भवेत्। अतो ज्ञेयवदेकस्यापि ज्ञानस्यानन्तवस्तुग ताकारोपग्रहेणोत्पत्तेरनन्तं वस्तु तेन व्याप्तमित्युच्यते। येनैव चात्मना 932/k ज्ञानात्मनि भावाः समारोहन्ति—तेनैव तत्पृष्ठभाविपरामर्शचेतसा परिच्छिद्यन्ते नच सार्वज्ञचेतसि परिमितभेदानुगताः समारोहन्ति भावाः। किं तर्हि ?। यावत्किंचिदस्तित्वमनुभवति तत्सर्वमेव समारोहति। सर्वस्यैव सर्वज्ञानोपादानं प्रत्यालम्बनभावेनाप्रतिबद्धशक्तित्वात्। मनोविज्ञानस्य च सर्वार्थविषयत्वात्। अतः सार्वज्ञचेतसः(अ)परिमितवस्त्वाकारोपग्रहणेऽननुपपत्तेः, पृष्ठलब्धेन च शुद्धलौकिकेन परामर्शप्रत्ययेन देशपर्यन्तवर्त्तित्वेनापरिच्छेदात्, कथमियन्त इति परिच्छेदो भवेत्, येनान्तवत्त्वं स्यात्। यदि नाम प्रतिभास(मा)नादन्यन्नास्तीत्येवं परामर्शो जातस्तथाऽपि नान्तवत्त्वप्रसङ्गः। तथाहि—यदि प्रतिभासमानमन्तवदेव निर्विकल्पसर्वज्ञचेतसि प्रतिभासेत तदा तत्पृष्ठलब्धेन परामर्शचेतसा अनन्तत्वं भावानां परिच्छिद्येत। तद्व्यवच्छेदाद्यानन्त(त्व)हानिर्भवेत्। यावता परिभासमानं वस्तु सर्वज्ञचेतस्यनन्तमेव प्रतिभासते सर्व(ज्ञ)स्याप्रत्तिहतशक्तित्वात्। तस्मादन्यदप्रतिभासमानमन्तवदेव। तस्यैव च परामर्शचेतसा व्यवच्छेदः क्रियत इति सुतरामेव भवताऽनन्तत्वं भावानामुपपादितमिति यत्किंचिदेतत्। ये तु पुनः सर्वमेव योगिविज्ञानमनालम्बनं सत्यस्वप्नदर्शनवद्वस्तुसंवादितया प्रमाणमिति प्रतिपन्नास्तान्प्रत्यन्तवत्त्वचोद्यं दूरीकृतावकाशमेवेत्यलं बहुना॥ ३६२७॥ § 11630

यैः स्वेच्छासर्वज्ञो वर्ण्यते तन्मतेनाप्यसौ न विरुध्यत इत्यादर्शयन्नाह—यद्यदित्यादि। § 11631

यद्यदिच्छति बोद्धुं वा तत्तद्वेत्ति नियोगतः।
शक्तिरेवंविधा तस्य प्रहीणाचरणो ह्यसौ॥
३६२८॥§ 11633

युगपत्परिपाट्या वा स्वेच्छया प्रतिपद्यते।
लब्धज्ञानं च सिद्धो(?)हि सक्षणैर्ह्यादिभिः प्रभुः
३६२९§ 11635

यद्वेत्यादिना क्रमज्ञानपक्षेऽप्यविरोधमाह। § 11636

यद्वा षोडशभिश्चित्तैश्चतुःसत्यस्वभावकम्।
क्रमेण वेत्ति विज्ञेयं सर्वं सर्वविदित्यतः॥
३६३०॥§ 11638

तत्र तादृशि विज्ञाने क्रमेण भवति प्रभोः।
लवमात्रोऽपि नापेक्ष्यः किमङ्गाब्दशतावधिः॥
३६३१॥§ 11640

933/k

षोडशभिश्चित्तैरिति। क्षान्तिज्ञानैः। अष्टौ क्षान्तयो दुःखधर्मज्ञानक्षान्त्यादयः, अष्टौ च ज्ञानानि दुःखधर्मज्ञानादीनीति षोडशभिन्नोऽयं सत्याभिसमय इति वचनात्।लवमात्रोऽपीति। काल(कला?)पर्यन्तः क्षणः, विंशक्षणशतमेकस्तत्क्षणः, षष्ठितत्क्षणा एको लव इति समयः। अङ्गेत्यामन्त्रणे। अब्द इति संवत्सरपर्यायः ॥ ३६३०॥ ३६३१॥ § 11641

स्वभावेनाविभक्तेनेत्यादावाह—स्वभावेनेत्यादि। § 11642

स्वभावेनाविभक्तेन यः सर्वमवबुध्यते।
स्वरूपाण्येव भावानां सर्वेषां सोऽवबुध्यते॥
३६३२॥§ 11644

ननु योगिनामनाश्रवं ज्ञानं शास्त्रे सामान्यविषयमेवोपवर्ण्यते, ननु स्वलक्षणविषयम्, तत्कथं सामान्यविषयेण योगिचेतसा भावानां स्वरूपाण्येव च बुध्यन्त इत्यत आह—सा(स्वा?)त्मकेत्यादि। § 11645

सा(स्वा)त्मकाक्षणिकादिभ्यो यद्व्यावृत्तं स्वलक्षणम्।
शमोत्प्रेक्षानिमित्तत्वात्सामान्यं तदिहोच्यते॥
३६३३॥§ 11647

तद्ग्राहकं च विज्ञानं भावनाबलभावि यत्।
योगीशानामभिव्यक्तं तत्स्वलक्षणगोचरम्॥
३६३४॥§ 11649

तदेव हि स्वलक्षणं विजातीयव्यावृत्तमभिन्नाकारप्रत्ययहेतुतया शास्त्रे सामान्यलक्षणमित्युच्यते, अतस्तद्ग्राहकं योगिज्ञानं भावनाबलेन स्फुटप्रतिभासमुत्पद्यमानंस्वलक्षणगोचरमेवेत्यविरुद्धमेव। तद्यत्सामान्यगोचरं तत्कथं (न) स्वलक्षणग्राहि तद्भवतीति। यचोक्तम्—तदेकाकारविज्ञानमित्यादि, तत्सर्वमेतेनैव प्रत्युक्तम्, स्वलक्षणविषयत्वाद्योगिज्ञानस्येति॥ ३६३३॥ ३६३४॥ § 11650

अथ यत्तत्सांवृत्तं तत्त्वान्यत्वादिभिराकारैरनिर्देश्यं सामान्यमस्माभिरुपवर्णितम्, यच्च परैस्तैर्थिकैः पारमार्थिकमेव प्रकल्पितम्, तद्ग्राहित्वेन योगिज्ञानस्य स्वलक्षणविषयत्वं साध्यते, तदसिद्धमित्यादर्शयन्नाह—तत्त्वेत्यादि। § 11651

तत्त्वान्यत्वाद्यनिर्देश्यं यत्परैश्च प्रकल्पितम्।
सामान्यं तस्य नैतेन ग्रहणं योगिचेतसा॥
३६३५॥§ 11653

आदिशब्देन नित्यत्वादिभिरनिर्देश्यमिति ग्रहीतव्यम्॥ ३६३५॥ § 11654
934/k

कस्मात्तेन तस्य ग्रहणं नास्तीत्याह—अविकल्पमित्यादि। § 11655

अविकल्पमविभ्रान्तं तद्योगीश्वरमानसम्।
विकल्पविभ्रमाक्रान्तं तद्ग्रहे च प्रसज्यते॥
३६३६॥§ 11657

योगिज्ञानमविकल्पाभ्रान्ततया प्रत्यक्षं प्रमाणमिष्यते। यदि च तद्यथोक्तसामान्यविषयं स्यात्तदा सांवृतार्थविषयत्वाद्विकल्पाक्रान्तं प्राप्नोति। परपरिकल्पितालीकसामान्यविषयत्वाद्विभ्रमाक्रान्तं च प्रसज्यते। यद्वा—प्रत्येकमुभयविषयत्वे दोषद्वयमापतति॥ ३६३६॥ § 11658

एवमध्यारोपितालीकार्थविषयत्वाद्विकल्पविभ्रमाक्रान्तं तत्प्रसज्यत इति प्रतिपादितम्। इतश्च विकल्पविभ्रमाक्रान्तं तद्ग्राहि प्रसज्यत इति भङ्ग्यन्तरेण प्रतिपादयन्नाह—विकल्पात्मा चेत्यादि। § 11659

विकल्पात्मा च सामान्यमवाच्यं यत्प्रकीर्त्तितम्।
नित्यानुगतिरूपं तन्नीरूपं प्रतिपादितम्॥
३६३७॥§ 11661

यदेतदनन्तरोक्तमवाच्यं—तत्त्वान्यत्वाद्यनिर्देश्यं सामान्यमुक्तम्, तद्विकल्पस्यात्मेति यद्यस्मात्प्रकीर्त्तितम्—प्रतिपादितमन्यापोहे। तस्मात्तद्ग्रहे विकल्पविभ्रमाक्रान्तं प्रसज्यत इति प्रकृतेन सम्बन्धः। तथाहि—विकल्पात्मतया सामान्यस्य तद्ग्राहियोगिज्ञानं विकल्पात्मकमेव स्यात्। तादात्म्येनैव तस्य ग्रहणात्। विकल्पस्य च प्रकृत्या स्वप्रतिभासेऽनर्थेऽर्थाध्यवसायेन प्रवृत्तेर्विपर्ययस्तत्त्वमिति विभ्रमाक्रान्तं च प्रसज्येत। यच्च परपरिकल्पितं सामान्यं नित्यानुगतिरूपं तदपि सामान्यपरीक्षायां नीरूपस्वभावमेव प्रतिपादितमिति तद्ग्रहे स्फुटतरमेव विकल्पविभ्रमाक्रान्तत्वमासज्यते॥ ३६३७॥ § 11662

यच्चोक्तम्—सहेतु सफलं कर्मेत्यादि, तत्राह—सहेत्वित्यादि। § 11663

सहेतु सफलं कर्म ज्ञानेनालौकिकेन यः।
समाधिजेन जानाति स सर्वज्ञोऽपदिश्यते॥
३६३८॥§ 11665

पुरस्तादनुमानेन तस्य सत्ता प्रसाधिता।
प्रमाणमस्य सद्भावे तदस्तीत्यस्ति तादृशः॥
३६३९॥§ 11667

युगपत्परिपाट्या चेत्यादावाह—युगपदित्यादि। § 11668

युगपत्परिपाट्या वा ज्ञानं कार्यात्प्रकाशितात्।
सामर्थ्यमपि तस्यास्ति देशनां कुरुते यदा॥
३६४०॥§ 11670

935/k

सुबोधम्॥ ३६४०॥ § 11671

लब्धासाधारणोपाय इत्यादावाह—स्वभ्यस्तधर्मनैरात्म्येत्यादि। § 11672

स्वभ्यस्तधर्मनैरात्म्या यस्येयं देशनाऽमला।
साधिता सर्वशास्त्रेषु(ण?) सर्वमानैरबाधिता॥
३६४१ ॥§ 11674

संसार्यनुचितज्ञाना केशवादेरगोचरः।
शिरोभिरर्च्यते शक्त्या याचातीव मनीषिभीः॥
३६४२ ॥§ 11676

समस्तदुरितारातिवर्गभङ्गविधायिनी।
चित्राभ्युदयनिष्पत्तिनिर्वाणप्राप्तिकारणम्॥
३६४३ ॥§ 11678

लब्धासाधारणोपायोऽशेषपुंसां विशेष(लक्ष?)णः।
स एकः सर्वविन्नाथ इत्येतत्सप्रमाणकम्॥
३६४४ ॥§ 11680

सर्वशास्त्रेणेति। सकलेनामुना तत्त्वसङ्ग्रहेण। संसार्यनुचितज्ञानेति। संसारिणामनुचितमसहजं संसार्यनुचितं तत्तादृशं ज्ञानं यस्यां देशनायां सा तथोक्ता।केशवादेरगोचर इति। स्वलिङ्गेनैव देशनासमानाधिकरणमेतत्। समस्तदुरितारातिवर्गभङ्गविधायिनीति। दुरितान्येवारातयस्तेषां वर्गः समूहस्तस्य भङ्गं विधातुं शीलमस्या इति विग्रहः। चित्राभ्युदयनिष्पत्तिनिर्वाणप्राप्तिकारणमिति। कारणशब्दः प्रत्येकमभिसम्बध्यते। चित्राभ्युदयनिष्पत्तिकारणं निर्वाणप्राप्तिकारणं चेत्यर्थः॥ ३६४१॥ ३६४२॥ ३६४३॥ ३६४४॥ § 11681

इत्थं यदेत्यत्राह—इत्थमित्यादि। § 11682

इत्थं यदा च सर्वज्ञः कश्चिदेवोपपद्यते।
धर्माद्यधिगमे हेतुः पौरुषेयं तदा वचः॥
३६४५ ॥§ 11684

कश्चिदेवेति। सुगत एव, न कपिलादिः। यथोक्तं प्रागित्यभिप्रायः। यश्चनिराकारसाकारज्ञानविकल्पेन दोष उक्तस्तथा(त्रा?)पि पूर्वमेवास्माभिः प्रतिविहितम् ॥ ३६४५ ॥ ननुचोक्तम्— सनिर्भासमनिर्भासमन्यनिर्भासमेव च। विजानाति न विज्ञानंबाह्यमर्थं कथंचन॥ इति, § 11685

तत्कथमुभयपक्षाश्रयणेऽपि दोषाप्रसङ्ग उच्यत इत्येतदाशङ्क्याह—(निराकारादीति)। § 11686

निराकारादिचिन्ता तु सर्वज्ञे नोपयुज्यते।
यथाहि भवतां ज्ञानं क्वचिदर्थे तथा परम्॥
३६४६॥
इत्यतीन्द्रियदर्शिपुरुषपरीक्षा।§ 11689

शान्तरक्षितविरचितस्तत्त्वसङ्ग्रहः समाप्तः।§ 11690

936/k

येयमस्माभिर्विज्ञानवादस्थितैर्निराकारचिन्ता प्रागकारि सा साम्प्रतं बाह्यार्थाभिनिविष्टान्भवतो मीमांसकान्प्रति बहिरर्थमभ्युपेत्य सर्वज्ञे प्रतिपाद्यमाने भवतां बहिरर्थवादिनां कथमपि नोपयुज्यत एव कर्तुम्। कथमित्याह—यथाहीत्यादि। अवश्यं हि भवद्भिर्बहिरर्थस्य साकारेण वा निराकारेण वा ज्ञाने ग्रहणमुपवर्णनीयम्। अन्यथा बहिरर्थोच्छेदः स्यात्। ततश्च यथा येन प्रकारेण भवतां क्वचिदर्थे ज्ञानं प्रवर्त्तते तथा तेनैवाकारेण परम्—उत्कृष्टम्, सार्वज्ञं (इति) सम्बध्यते, प्रवर्त्तिष्यते इत्यचोद्यमेतदिति॥ ३६४६॥ § 11691

इति कुशलमदभ्रं यन्मयाप्रापि
शुभ्रंनिरुपमजिनलक्ष्मीसद्मतामेत्य नित्यम्।
सकलजनमनांसि प्रीणयन् दीप्तकान्तिःसुगतकमलशीलस्तेन
सर्वोऽस्तु लोकः॥§ 11693

इत्यतीन्द्रियदर्शिपुरुषपरीक्षा।कमलशीलविरचिता पञ्जिका समाप्ता।

---

३ तम् ॥ ३६४५ ॥ ननु] Correction: ; तम्। तत्तु(त्र?) (sic!)तम् ॥ ३६४५ ॥ ननु
३ मन्यनिर्भा] Correction: ; मन्ये निर्भा (sic!)मन्यनिर्भा
४ विजानाति] Correction: ; विजानन्ति (sic!)विजानाति
४ विज्ञानं] Correction: ; विज्ञान (sic!)विज्ञानं
४ इति,] Correction: ; इति॥ ३६४५॥ (sic!)इति,

The TEI Header

Abbreviations

TSP_{msJ} Kamalaśīla (n.d.). **?**Tattvasaṃgrahapañjīkā**?** Jaisalmer manuscript. See p. 160 (running number 378) in Punyavijayaji's "New catalogue of Sanskrit and Prakrit manuscripts : Jesalmer collection.

References

Kamalaśīla (n.d.). **?**Tattvasaṃgrahapañjīkā**?** Jaisalmer manuscript. See p. 160 (running number 378) in Punyavijayaji's "New catalogue of Sanskrit and Prakrit manuscripts : Jesalmer collection.